॥ श्रीमन्न्यायामृतप्रकरणसूचीसंपूर्णा ॥

S.M.S.A. SABHA

॥ श्रीमन्न्यायामृतप्रारंभः ॥

पाण्डुरङ्गी सहोदराणामिदं पुस्तकं वीर नारायण न पाण्डुरङ्गी

M.B.A. SANGHA LIBRARY BANGALORE DATE

॥ श्रीमन्न्यायामृतस्थानांप्रकरणानांसूची ॥

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ।

प्रकरण संख्या	प्रकरणनाम	प्रकरणनाम्नः संकेतः	पत्रसंख्या	प्रकरण संख्या	प्रकरणनाम	प्रकरणनाम्नः संकेतः	पत्रसंख्या
	प्रथमपरिच्छेदे ॥ १ ॥			१२	प्रत्यक्षस्यअनुमानबाध्यत्वेबाधकविवरणं	प्रत्य. अनु०	११०
१	मिथ्यात्वनिरुक्तिभंगः	मिथ्यात्व०	२	१३	प्रत्यक्षस्यशब्दबाध्यत्वेबाधकविवरणं	प्रत्य. शब्द०	१११
२	सामान्यतोमिथ्यात्वभंगः	सामा. मि०	४१	१४	अपच्छेदन्यायवैषम्यं	अपच्छे०	११५
३	दृश्यत्वहेतुभंगः	दृश्यत्व०	४९	१५	मिथ्यात्वानुमितेरग्निशैत्यानुमितिसाम्यं	मिथ्या. अ.	११९
४	जडत्वहेतुभंगः	जडत्व०	६८	१६	प्रत्यक्षस्यलिंगाद्यबाध्यत्वेपरोक्तबाधकानामुद्धारविवरणं	प्रत्य. लिंग.	१२३
५	परिच्छिन्नत्वहेतुभंगः	परिच्छि०	७६	१७	प्रत्यक्षस्यभाविबाधकशंकाभंगः	प्रत्य. भावि.	१३०
६	अंशित्वादिहेतुभंगः	अंशित्व०	८३	१८	प्रत्यक्षस्यपारमार्थिकसत्त्वग्राहित्वविवरणं	प्रत्य. पार०	१४०
७	दृश्यत्वादेरुपाधिविवरणं	दृश्य. उपा०	८९	१९	विश्वमिथ्यात्वस्यअनुमानबाधः	विश्व. अनु०	१४३
८	दृश्यत्वादेराभाससाम्यविवरणं	,, ,, ,,	९३	२०	विश्वमिथ्यात्वस्यआगमादिबाधः	विश्व. आग०	१५६
९	सत्वनिरुक्तिः	सत्वनि०	९३	२१	असतःसाधकत्वेबाधकविवरणं	अ. सा. बा.	१६९
१०	प्रत्यक्षस्यजात्योपक्रमादिन्यायैश्चप्राबल्यं	प्रत्य. जा०	९८	२२	असतःसाधकत्वाभावेबाधकोद्धारविवरणं	अ. बाधो०	१७७
११	प्रत्यक्षस्यउपजीव्यत्वेनप्राबल्यविवरणं	प्रत्य. उप०	१०४				

SGDF
Sri Gangadharan Digital Foundation

प्रकरण संख्या	प्रकरणनाम	प्रकरणनाम्नः संकेतः	पत्रसंख्या
२३	दृग्दृश्यसंबंधानुपपत्तिभंगः	दृश्यसंबं०	१८७
२४	प्रतिकर्मव्यवस्थाभंगः	प्रतिकर्म०	२१५
२५	मिथ्यात्वहेतूनांप्रतिकूलतर्कविवरणं	प्रतिकूल०	२३३
२६	सामान्येनमिथ्यात्वश्रुतिनिरासः	सा० मिथ्या.	२४८
२७	द्वैतप्रत्यक्षस्याद्वैतश्रुतिबाधकत्वखण्डनभंगः	द्वै०प्र०अद्वै०	२५६
२८	एकमेवाद्वितीयमितिश्रुत्यर्थविवरणं	एकमेव०	२६६
२९	नेहनानेतिश्रुत्यर्थविवरणम्	नेहनाना०	२७१
३०	यत्रत्वस्येतिश्रुत्यर्थविवरणम्	यत्रत्वस्य०	२७६
३१	नतुतद्वितीयमस्तीतिश्रुत्यर्थविवरणम्	नतुतद्वि०	२७८
३२	वाचारंभणश्रुत्यर्थविवरणम्	वाचारं०	२८०
३३	इदंसर्वंयदयमात्मेतिश्रुत्यर्थविवरणम्	इदंसर्वं०	२८४
३४	यस्मात्परंनेतिश्रुत्यर्थविवरणम्	यस्मात्परं०	२८५
३५	मायामात्रमिदमितिश्रुत्यर्थविवरणम्	मायामात्रं०	२८६
३६	अनंतमितिश्रुत्यर्थः		२८८
३७	इंद्रोमायाभिरित्यादिश्रुत्यर्थः	इंद्रो०	२८८
३८	अतोन्यदार्तमितिश्रुत्यर्थः		२८९
३९	जगदसत्त्वादिवाचिपुराणार्थः	जगद०	२८९
४०	ज्ञाननिवर्त्यत्वान्यथानुपपत्तिभंगः	ज्ञाननि०	२९०
४१	सत्यस्यसत्यइत्यादिश्रुत्यर्थापत्तिभंगः		२९२
४२	दृष्टिसृष्टिभंगः	दृष्टिसृष्टि०	२९२
४३	एकजीवाज्ञानकल्पितत्वभंगः	एकजीवा०	२९४
४४	अविद्यालक्षणभंगः	अविद्या०	२९७
४५	भावरूपाज्ञानप्रत्यक्षभंगः	भावरू०	३०८
४६	अविद्यानुमानभंगः	अविद्यानु०	३१९
४७	श्रुतेरनिर्वाच्याविद्यापरत्वभंगः	श्रुतेरनि०	३२९
४८	अविद्यार्थापत्तिभंगः	अविद्यार्था०	३३२
४९	सामान्येनाविद्याप्रमाणभंगः	सा०अ० प्र०	३३४

प्रकरण संख्या	प्रकरणनाम	प्रकरणनाम्नः संकेतः	पत्रसंख्या
५०	अविद्याप्रतीतिभंगः	अविद्याप्र०	३३५
५१	अज्ञानस्यविवरणोक्तचिन्मात्राश्रितत्वभंगः	अ० चिन्ना०	३३६
५२	सर्वज्ञस्याज्ञानाश्रयत्वभंगः	सर्व० ज्ञा०	३४८
५३	परोक्तब्रह्ममायित्वभंगः	ब्रह्म०मायि०	३५०
५४	अज्ञानस्यवाचस्पत्युक्तजीवाश्रितत्वभंगः	अज्ञा० जी०	३५१
५५	अविद्याविषयभंगः	अविद्यावि०	३५४
५६	अहमर्थस्यअनात्मत्वभंगः	अह० अना०	३७०
५७	कर्तृत्वाध्यासभंगः	कर्तृत्वाध्या०	३८६
५८	देहात्मैक्याध्यासभंगः	देहात्मैक्या०	३९४
५९	अनिर्वाच्यत्वलक्षणभंगविवरणम्	अनिर्वाच्य०	४०४
६०	अनिर्वाच्यसाधकानुमानभंगः	अ०सा०अ०	४१६
६१	अनिर्वाच्यसाधकख्यातिबाधान्यथानुपपत्तिभंगः	अ०सा०ख्य.	४१७
६२	अनिर्वाच्यत्वसाधकनिषेधप्रतियोगित्वा-		
	न्यथानुपपत्तिभंगः	अ०सा०नि०	४२१
६३	श्रुत्यर्थापत्तिभंगः		४२३
६४	स्वाभिमतान्यथाख्यातिसमर्थनम्	स्वाभिमता०	४२३
६५	आविद्यकरजतोत्पत्तिभंगः	आविद्यक०	४२४
६६	भ्रमस्यअद्वैत्यभिमतज्ञानद्वयात्मकत्वभंगः	भ्रम० अद्वै०	४२५
६७	सत्तात्रैविध्यभंगः	सत्तात्रैवि०	४२६
	॥ द्वितीयपरिच्छेदे ॥ २ ॥		
१	अखंडार्थत्वलक्षणभंगः	अखंडा०	४३०
२	सत्यज्ञानादिवाक्यानामखंडार्थत्वानुमानभंगः	सत्यज्ञा०	४३५
३	तत्त्वमस्यादिवाक्यस्याखंडार्थत्वानुमानभंगः	तत्त्वमस्या०	४६९
४	ब्रह्मणोनिर्गुणत्वभंगः	निर्गुणत्व०	४८९
५	निर्गुणेप्रमाणभंगः	निर्गु०प्रमा०	४९६

SGDF
Sri Gangadharan Digital Foundation

प्रकरण संख्या	प्रकरणनाम	प्रकरणनाम्नः संकेतः	पत्रसंख्या
६	ब्रह्मणोनिराकारत्वभंगः	निराकार०	४९७
७	परमतेब्रह्मणोज्ञानत्वानंदत्वाद्वितीयत्वनित्यत्वसाक्षित्वभंगः	ज्ञानत्वा०	४९८
८	ब्रह्मणउपादानत्वभंगः	उपादान०	५०१
९	परमतेब्रह्मणोनिमित्तत्वभंगः	निमित्तत्व०	५०२
१०	ब्रह्मणउपादानत्वेप्रमाणभंगः	उपा० प्रमा०	५०३
११	स्वप्रकाशत्वलक्षणभंगः	स्वप्रकाश०	५०५
१२	आत्मनःपराभिमतस्वप्रकाशत्वभंगः	आ०प० स्व०	५१४
१३	अवाच्यत्वभंगः	अवाच्यत्व०	५३४
१४	सामान्यतोभेदखंडनोद्धारविवरणम्	सामा०भेद०	५४१
१५	विशिष्यभेदखंडनोद्धारः	विशिष्यभे०	५४९
१६	विशेषसमर्थनम्	विशेषस०	५६३
१७	भेदपंचकेप्रत्यक्षविवरणम्	भेदपंच०	५६५
१८	जीवब्रह्मभेदानुमानानि	जी०ब्र०भे०	५६९
१९	जीवानामन्योन्यंभेदेऽनुमानानि	जी०अ०भे०	५७७
२०	आत्मभेदेअनुकूलतर्काः	आत्मभेदे०	५८०
२१	भेदपंचकेऽनुमानानि	भे०पं०अनु०	५८४
२२	भेदश्रुतेरनुवादकत्वभंगः	भे०श्रु०अनु०	५८७
२३	भेदश्रुतेर्व्यावहारिकभेदपरत्वभंगः	भे०श्रु०व्या०	५८८
२४	जीवेशभेदेशब्दांतरादि		५८९
२५	भेदश्रुतेःषड्विधतात्पर्यलिङ्गानि	भेदश्रु० ष०	५८९
२६	ऐक्यस्वरूपभंगविवरणम्	ऐक्यस्वरू०	५९०
२७	ऐक्यश्रुतेरुपजीव्यबाधः	ऐ० श्रु० उ०	५९१
२८	तत्त्वमस्यादिवाक्यार्थविवरणम्	तत्त्वमसि०	५९४
२९	अहंब्रह्मास्मीत्यादिश्रुत्यर्थः	अहंब्रह्मा०	५९९
३०	ऐक्यानुमानभंगः	ऐ०अनु०भं०	६०३
३१	अंशत्वेनैक्यसिद्धिभंगः	अंश० भं०	६०६
३२	बिंबप्रतिबिंबैक्यभंगः	बिंबप्रति०	६०७

प्रकरण संख्या	प्रकरणनाम	प्रकरणनाम्नः संकेतः	पत्रसंख्या
३३	जीवाणुत्वविवरणम्	जीवाणुत्व०	६१०
	॥ तृतीयपरिच्छेदे ॥ ३ ॥		
१	मननिदिध्यासनयोर्विवरणोक्तश्रवणांगत्वभंगः	मनन०	६१५
२	श्रवणादिविधेर्विवरणोक्तनियमविधित्वभंगः	श्रवणादि०	६१७
३	परमतेश्रवणादिविध्यनुपपत्तिः	पर० श्रव०	६१८
४	श्रोतव्यइत्यादेरनुवादकत्वभंगः		६१९
५	श्रवणविधेर्विवरणोक्तविचारविधायकत्वभंगः	श्रवणवि०	६१९
६	अध्ययनविधेर्नित्यत्वेपिविचारविधायकत्वम्	अध्ययन०	६२२
७	स्वमतेश्रवणादिविधिसमर्थनम्	स्वमतेश्र०	६२३
८	ज्ञानविधिसमर्थनम्	ज्ञानविधि०	६२४
९	शाब्दप्रत्यक्षभंगः	शाब्दप्रत्य०	६२६
	॥ चतुर्थपरिच्छेदे ॥ ४ ॥		
१	अविद्यानिवृत्तिभंगः	अवि०निवृ०	६३१
२	अविद्यानिवर्तकभंगः	अ० निवर्त०	६३४
३	निर्विशेषसुखस्यपुरुषार्थत्वभंगः	निर्विशेष०	६३५
४	जीवन्मुक्तिभंगः	जीवन्मुक्ति०	६३८
५	मुक्तब्रह्मादीनांतारतम्यसमर्थनम्	मु० ब्रह्मा०	६४०

॥ श्रीमन्न्यायामृतप्रकरणसूचीसंपूर्णा ॥

SGDF Sri Gargeshwari Digital Foundation

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ वासवीहृदयानंदंवेदशास्त्र(खा)प्रणायकं । वेदव्या संगुरूपास्यंवंदेऽभीष्टप्र(दंसतां)दायकं ॥ १ ॥ श्रीरामंहनुमत्सेव्यंश्रीकृष्णंभीमसेवितं । श्रीव्यासंश्रीमदानंदतीर्थसंसेव्यमाभजे ॥ २ ॥ हृत्तमोनाशकंशास्त्रप्रभयातत्वभासकं । नमामिश्रीमदानंदतीर्थाचार्यदिवाकरं ॥ ३ ॥ श्रुतिक्षीराब्धिमामथ्यबुद्धिमंद रभूभृता । प्राप्तान्यायसुधायेनतंजयेंद्रमहंभजे ॥ ४ ॥ ब्रह्मण्यतीर्थवार्ध्युत्थंव्यासतीर्थेंदुमाभजे । तात्पर्यचंद्रिकायुक्तंसर्वतापा पहंसतां ॥ ५ ॥ वेदव्यासाब्धिसंजातंसदाहरिपदाश्रयं । पदार्थकौमुदीयुक्तंवेदेशेंदुमहंभजे ॥ ६ ॥ श्रीमन्न्यायसुधायायैर्भावः

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ।

हरिःॐ। निखिलगुणनिकायंनित्यनिर्धूतहेयंशुभतममतिमेयंशुद्धसौख्याप्त्युपायं ।

सम्यक्प्रदर्शितः । तान्वंदेयादवाचार्यान्सदाविद्यागुरूनहं ॥ ७ ॥ अथतत्कृपयान्यायामृतस्येदंप्रकाशनं । क्रियतेश्रीनिवासेन गुरुशिक्षानुसारतः ॥ ८ ॥ इहखलुव्यासतीर्थश्रीमच्चरणः श्रुतमर्थमिमनिषयानिबिभंत्सुः परीक्षकप्रवृत्त्यंगभूतमनुबंधचतुष्टयं वक्तुंविशिष्टविषयादिमद्ब्रह्ममीमांसयानिबध्यसंबंधयितुंचतुर्लक्षणीमीमांसाविवक्षितविशेषणचतुष्टयवत्त्वेनेष्टदेवतामभिष्टवीति ॥ **निखिलेत्यादिना** ॥ निखिलगुणपूर्णत्वनित्यनिर्धूतहेयत्वयोर्हेतुहेतुमद्भावः श्रियःपत्येनित्यागणितगुणमाणिक्यविशदप्रभा जालोल्लासोपहतसकलावद्यतमसइतिटीकाकारोक्तरीत्यावगंतव्यः । ननुनिकायमितिकथं । निकाय्यनिलयालयाइत्यमरकोशे "पा 1

SGDF
Sri Gargeshwari Digital Foundation

य्यसान्नाय्यनिकाय्यधाय्यामानहविर्निवाससामिधेनीषु”इतिसूत्रेचनिकाय्यशब्दस्यैवनिलयवाचित्वोक्तेर्निकाय्यमितिवक्तव्यत्वा
दितिचेत् । अत्राहुः । निपूर्वकान्निवासार्थकाच्चिनोतेर्धातुविशेषाद्घञ्प्रत्ययेऽकारमात्रंविहायसर्वस्यापिलोपेचकारस्थस्यइकारस्य
एकाररूपेगुणेप्राप्तेअचोऽञ्णितीतिऐकाररूपवृद्धौसत्यांतस्यचायादेशेचकारस्यककारादेशेनिकायमितिरूपस्य “निवासचितिशरी
रोपसमाधानेष्वादेश्चकः”इतिसूत्रेनिवासार्थेसाधिततयानिखिलगुणानांनिवासआश्रयइत्यर्थोद्रष्टव्यइति । गुरुचरणास्तु । नायं
निकायशब्दःकोशसूत्रोक्तरीत्यानिवासार्थेरूढोभिप्रेतः । किंतुअव्ययानामनेकार्थत्वान्निखिलगुणाएवनितरांकायोयस्येत्यर्थस्या
भिप्रेततयानकोपिक्षुद्रोपद्रवइत्याहुः ॥ शुभतमेति ॥ मतिशब्दस्यध्यानार्थत्वेतस्याःशुभतमत्वंनामवैराग्यभक्तिदार्ढ्योपकृत

सकलनिगमगेयंसर्वशब्दाभिधेयंनवजलधरकायंनौमिलक्ष्मीसहायं ॥ १ ॥

त्वं । तेनमेयंसाक्षात्कर्तव्यं । अपरोक्षज्ञानार्थत्वेतुवैराग्यभक्तिध्यानजातत्वेनशुभतमत्वंतस्यमंतव्यं । तेनमेयंविषयीकर्तव्यं ।
यद्वानित्यानित्यवस्तुविवेकवैराग्यशमदमादिसंपत्तिमुमुक्षारूपसाधनचतुष्टयसंपन्नत्वेनशुभतमायेपुरुषास्तेषांमत्यामेयं श्रवणादि
द्वाराऽपरोक्षज्ञानेनविषयीकरणीयमित्यर्थः । सौख्यस्यशुद्धत्वंनामदुःखासंभिन्नत्वंमंतव्यं । अनेनविशेषणचतुष्टयेनाऽध्यायचतु
ष्टयार्थःसंगृहीतइतिध्येयं । तथाचभगवतोविषयत्वाच्छुद्धसौख्यस्यपरमप्रयोजनत्वान्मतिशब्दोक्तापरोक्षज्ञानस्यचावांतरप्रयो
जनत्वाच्छुभतमानांचाऽधिकारित्वाद्यथायोग्यंसंबंधसद्भावात्प्रेक्षावतामत्रप्रवृत्तिरुचितेत्यपिसूचितं । गुणपूर्णत्वोपपादनायाह ॥ ॥ २ ॥
सकलेति ॥ वैदिकानांसर्वशब्दानांयौगिकत्वात्तदभिधेयत्वेसकलगुणपूर्णत्वमेवसिद्ध्यति । यथोक्तं “अतोऽनंतगुणोविष्णुर्य

SGDF
Sri Gargeshwari Digital Foundation

च्छब्दायोगवृत्तय"इति । ननुकासुचिच्छाखासुअन्यथाप्युच्यमानत्वान्नविष्णोर्निखिलनिगमगेयत्वंयुक्तमित्याशंकापरिहारायसूत्रकृदुक्तंगतिसामान्यंहृदिनिधायाह ॥ सर्वशब्देति ॥ वैदिकप्रकृत्यादिसर्वशब्दाभिधेयमित्यर्थः । अतोनानयोर्विशेषणयोः पुनरुक्तिरितिभावः । यद्वाअधिकारिभेदेनवाक्यसमन्वयपदसमन्वयाभ्यांभगवानेवप्रतिपाद्यइतिवाक्यान्वयाज्ज्योतिरुपक्रमादित्यादिसूत्रोक्तप्रकारंहृदिनिधायेदंविशेषणद्वयं । अतोनपुनरुक्तिरितिमंतव्यं । निराकारस्यब्रह्मणोबुद्धावनारोहाच्छुभतममतिमेयत्वंयदुक्तंतदयुक्तमित्याशंकापरिहारायोक्तं नवजलधरकायमितीत्याहुः । वस्तुतस्तुनिखिलगुणनिकायमित्यनेनैवनिराकारत्वशंकायाःपरिहृतत्वात्स्वोपास्यदेवतास्वरूपकथनायैवेदंविशेषणमितिमंतव्यं । नवजलधरोवर्षाकालीनोमेघः तद्वद्दृश्यमानःकायोय

विघ्नौघवारणंसत्याशेषविश्वस्यकारणं । करुणासिंधुमानंदतीर्थबंधुंहरिंभजे ॥ २ ॥

अभ्रमंभंगरहितमजडंविमलंसदा । आनंदतीर्थमतुलंभजेतापत्रयापहं ॥ ३ ॥

स्यतंनीलमेघश्यामंश्रीकृष्णमित्यर्थः । लक्ष्मीसहायमित्यत्रलक्ष्म्याःसहायइतिविग्रहोनतुलक्ष्मीरेवसहायोयस्येति । तथात्वेमहिमातिशयाऽलाभात् । एवंचलक्ष्म्याःभगवान्सहायइतिवचनेनग्रंथस्यवाङ्मनोव्यापाररूपत्वाल्लक्ष्म्याश्चवाङ्मनसदेवतात्वाद्यल्लक्ष्म्यावाङ्मनसदेवतात्वंतदपितदधीनमितिप्रमेयसूचनेनभगवतोमहामहिमालभ्यतइतिध्येयं ॥ १ ॥ स्वापेक्षितविघ्ननिवारणगुणवत्त्वेनभगवंतंसेवते ॥ विघ्नौघेति ॥ सत्याशेषेतिविशेषणमुत्तरग्रंथोपक्षेपायभूमिकारचनरूपमितिज्ञेयं ॥ २ ॥ आदिगुरून्सेवते ॥ अभ्रममिति ॥ भ्रमरूपज्ञानरहितं । गंगादिसर्वतीर्थेषुभ्रमोनामाऽऽवर्तस्तिष्ठतीत्याशयः । भंगरहितंप्रतिवादिप्रयुक्तप

SGDF
Sri Gargeshwari Digital Foundation

राभवरहितं । अन्यत्रतुवसंतादिकालेप्रवाहविच्छेदरूपोभंगोस्तीत्यवसेयं । अजडं जाड्याख्यदोषरहितं । इतरत्रतुजलात्मकत्वा
त्जाड्यमस्तीतिबोध्यं । विमलंविगतमलं । ‘‘शमलंपापमुद्दिष्टंरागद्वेषादिकंतथा । अपराधश्चशमलंमलंचशमलंविदु’’रितिकर्मनि
र्णयवचनात्मलशब्दोक्तपापरहितमित्यर्थः । अपरत्रतुवर्षाकालेकल्मषतादिरूपंमलमस्तीत्यवसेयं । तापत्रयापहं स्मरणादिना
आध्यात्मिकादितापत्रयवारकं । इतरत्रतुआधिभौतिकाख्यबाह्यतापवारकत्वमेवेतिध्येयं । अतएवातुलंगंगादितीर्थासदृशं ॥ ३॥

चित्रैःपदैश्चगंभीरैर्वाक्यैर्मानैरखंडितैः । गुरुभावंव्यंजयंतीभातिश्रीजयतीर्थवाक् ॥ ४ ॥
समुत्सार्यतमःस्तोमंसन्मार्गंसंप्रकाश्यच । सदाविष्णुपदासक्तंसेवेब्रह्मण्यभास्करं ॥ ५ ॥
ज्ञानवैराग्यभक्त्यादिकल्याणगुणशालिनः । लक्ष्मीनारायणमुनीन्वंदेविद्यागुरून्मम ॥ ६ ॥
श्रीमध्वशास्त्रदुग्धाब्धिंधीमंदरमहीभृता । आमथ्योद्ध्रियतेन्यायामृतंविबुधतृप्तये ॥ ७ ॥

जयतीर्थवाक्स्तुतिव्याजेनतान्स्तौति ॥ चित्रैरिति ॥ पदानांचित्रत्वंनामाऽऽकांक्षादियुक्तत्वं । वाक्यानांगंभीरत्वंनामास्पष्टा
र्थत्वं । मानानामखंडितत्वंनामप्रतिप्रमाणराहित्यंद्रष्टव्यं । गुरोरानंदतीर्थस्ययोगुरुभावस्तं ॥ ४ ॥ स्वसंन्यासगुरुंसेवते ॥ स
मुत्सार्येति ॥ भास्करपक्षेविष्णुपदमाकाशं । “ वियद्विष्णुपदंव्योमे ”त्यभिधानात् ॥ ५ ॥ स्वविद्यागुरून्प्रणमति ॥ ज्ञाने
ति ॥ ६ ॥ स्वग्रंथनामाह ॥ श्रीमध्वेति ॥ प्रसिद्धाऽमृतपक्षेविबुधाःदेवाः । ग्रंथपक्षेविबुधाःपंडिताः ॥ ७ ॥ न्यायामृतो

५

SGDF
Sri Gargeshwari Digital Foundation

द्धरणस्यमूलकोशैरेवशिष्यैःकर्तुंशक्यत्वाद्व्यर्थोयंभवतांश्रमइत्यतआह ॥ विक्षिप्तेति ॥ अनुक्तेति ॥ भगवत्पादटीकाकारा भ्यांकंठतोऽनुक्तमर्थादुक्तमितिव्याख्येयं । अन्यथातदुभयापेक्षयास्वस्यसार्वज्ञ्यापत्तिरितिध्येयं ॥ ८ ॥ ॥ सत्याशेषविश्वस्य कारणमित्युपक्षिप्तंविश्वस्यसत्यत्वमसहमानोमायावादीप्रत्यवतिष्ठते ॥ नन्विति ॥ अत्रैवकारार्थश्चिंत्यते । विशेषणसंगतोऽय मेवकारः । तस्यचविशेष्यतावच्छेदकेएवकारसमभिव्याहृतपदार्थतावच्छेदकव्याप्यत्वार्थकत्वस्यशंखःपांडुरएवेत्यादौदर्शनेन विश्वत्वेमिथ्यात्वव्याप्यत्वलाभात्सर्वोपिशंखःपांडुरइतिलाभवत्सर्वमपिविश्वंमिथ्येतिप्राप्त्यासत्याशेषविश्वस्यकारणमितियत्स

विक्षिप्तसंग्रहात्क्वापिक्वाप्युक्तस्योपपादनात् । अनुक्त
कथनात्क्वापिसफलोयंश्रमोमम ॥ ८ ॥ ननुमिथ्यैवविश्वं

त्याशेषविश्वस्यकारणत्वमुक्तंतदसदितिभावः । यद्वाविश्वमेवमिथ्येतिविशेष्यसंगतोऽयमेवकारः । तस्यचविशेष्यतावच्छे दकानवच्छिन्नेविशेषणसंबंधव्युदासार्थत्वस्यपार्थएवधनुर्धरइत्यादौदर्शनेनाऽत्रविश्वत्वानाक्रांतेब्रह्मणितुच्छेचमिथ्यात्वसंबंधव्य वच्छेदस्तदर्थः । [1] तथाचविश्वमेवमिथ्यातत्कारणत्वंदूरोत्सारितमितिभावः । अथवैवकारःकार्त्स्न्यार्थे । जगदेवदुः खपंकनिमग्नमितिवत् । तथाचमिथ्याशब्दैवशब्दाभ्यांसत्याशेषेत्युक्तविशेषणद्वयाक्षेपलाभइत्याशयः । संप्रदायस्तुप्र माणबाधाद्यशेषप्रतिज्ञादोषोद्धारार्थोत्रैवकारः । नचैतदलौकिकं । “ मिथ्यैवभेदोविमतोभेदत्वाच्चंद्रभेदवदि ”त्यनुव्या

SGDF Sri Gangeshwar Digital Foundation

तत्वनिर्णयमुद्दिश्य केवलं गुरुशिष्ययोः । कथाऽप्येषामपि सतां वादो वा संमते श्रुता । कथालक्षणं

ख्यानव्याख्यावसरेसुधायांसाध्यावधारणेनाऽऽभासोद्धारंसूचयतीतिटीकाकारैरुक्तत्वादितिध्येयं । इममेवैवकारार्थमेतादृशप्रतिज्ञयासिद्धेविश्वमिथ्यात्वेदूषणाभिधातृभिर्भवद्भिरतीवसावधानैर्भवितव्यमित्याशयेनविशदयति ॥ तथाहीति ॥ तथा यत्प्रतिज्ञातंविश्वमिथ्यात्वंतत् हिप्रमाणप्रसिद्धं नतुप्रमाणबाधादिदोषोपेतमित्यर्थः । पूर्वोत्तरपक्षपरिग्रहाभ्यांप्रवर्तनीयस्यविचारस्यसंशयजन्यत्वाद्विचारांगसंशयापरनाम्नींविप्रतिपत्तिंदर्शयति ॥ तत्रेति ॥ प्रवर्तनीयायांमिथ्यात्वसत्यत्वकथायां । विप्रतिपत्तिःसंशयः । ननुकस्येयंविप्रतिपत्तिः । नतावद्वादिनः । तस्यमिथ्यात्वनिश्चयवत्त्वात् । नापिप्रतिवादिनः । तस्यसत्यत्वनिश्चयवत्त्वादितिचेत्सत्यं । नवादिप्रतिवादिनोरियंविप्रतिपत्तिः । किंतुतदुभयव्यतिरिक्तानांसभापत्यादीनामेव तत्वनिर्णयेप्सुसभा

तथाहि तत्रविप्रतिपत्तिः ।

पत्याद्यर्थिताभ्यामपिवादिप्रतिवादिभ्यांक्रियमाणायाःकथायास्तत्संशयनिरासद्वारातत्वनिर्णयफलकत्वाद्ग्रंथस्यापिवादप्रक्रियया प्रवर्तमानत्वात् । अतःकथातःपूर्ववादिप्रतिवादिव्यतिरिक्तानांसभापत्यादीनांवादिप्रतिवादिप्रवर्तनीयविचारांगसंशयापरनाम्नी विप्रतिपत्तिरस्तीतिव्याख्येयं । यथोक्तं । “वासमितेःशुभेती ”तिसंप्रदायः । अन्येतुनेयंविप्रतिपत्तिर्वादिनोनापिप्रतिवादिनः किंनामोभौप्रतिएकैकपक्षपरिग्रहायविरुद्धार्थप्रतिपादकवाक्यद्वयरूपाविप्रतिपत्तिर्मध्यस्थप्रदर्शितास्तीत्यर्थइत्याहुः । ननुविप्रतिपत्तिमादौप्रदर्श्यपश्चात्पूर्वपक्षउत्थापनीयः । विषयोविशयश्चैवपूर्वपक्षस्तथोत्तरइतिवचनात् । अतोऽत्रवैपरीत्यंकस्मादाचरित

SGDF
Sri Gargeshwari Digital Foundation

मितिचेदुच्यते । मिथ्यैवेत्यस्यनपूर्वपक्षप्रदर्शनएवतात्पर्यं किंनाम संशयस्यविरुद्धार्थप्रतिपादकपूर्वोत्तरपक्षप्रतिपादकवाक्यद्वय जन्यत्वेनविप्रतिपत्तिवाक्यद्वयाऽज्ञानेप्रदर्शयितुमशक्यत्वात्सत्याशेषेतिसत्यत्वप्रतिपादकंमिथ्यैवविश्वमितिमिथ्यात्वप्रतिपाद कंवाक्यंचादौप्रदर्श्यानंतरंसंशयापरनाम्नीविप्रतिपत्तिःप्रदर्शितेत्यदोषइति । विश्वंमिथ्येतिसामान्येनप्रतिज्ञातं । तथाचब्रह्मादे रपिविश्वशब्देनग्रहणेबाधाद्यापत्तेःधर्मिणंनिर्धारयंस्तामेवविप्रतिपत्तिंविवृणोति ॥ ब्रह्मप्रमान्येनवेत्यादिना ॥ अत्रविद्वत्प्र मोदार्थंपदानांकृत्यंचिंत्यते । तथाहि । ब्रह्मान्यन्मिथ्येत्युक्तेतुच्छेबाधःस्यात् । अतःअसद्विलक्षणत्वेसतीत्युक्तं । तावत्युक्तेशु क्तिरूप्येसिद्धसाधनतास्यात् । अतोऽबाध्यत्वेसतीत्युक्तं । नन्विदंविशेषणंव्यर्थं । सिद्धसाधनतायावक्तुमशक्यत्वात् । अस

ब्रह्मप्रमान्येनवा

द्विलक्षणत्वेसतिब्रह्मान्यन्मिथ्येतिवादिनाप्रयुक्तेसतिप्रतिवादिभिरस्माभिःसिद्धसाधनतावाच्या । नहिसावक्तुंशक्या । अस्मन्म तेशुक्तिरूप्यस्यासत्त्वेनपक्षतावच्छेदकानाक्रांतत्वादितिचेन्न । परार्थानुमानेवक्तुमशक्यत्वेपियदातवैवस्वार्थानुमितिःतदात्वन्मते तस्यासद्विलक्षणत्वेनसिद्धसाधनताप्राप्त्याअबाध्यत्वविशेषणसार्थक्यात् । नचविशेषणप्रयोजनस्योभयवादिसिद्धत्वाभावइतिवा च्यं।विशेषणस्यसार्थक्येप्रयोजनवत्त्वमेवतंत्रंनतूभयवादिसिद्धप्रयोजनवत्त्वं। गौरवात्। नचैतददृष्टचरमितिवाच्यं। निरीश्वरवादि नंमीमांसकंप्रतीश्वरसाधनायतार्किकेणप्रयुज्यते "जन्यकृत्यजन्यानिजन्यानिसकर्तृकाणी" त्यादि । तत्रजन्यानिसकर्तृकाणीत्युक्ते

SGDF
Sri Gargeshwari Digital Foundation

घटादीनांकुलालादिकर्तृकतायाःसिद्धत्वेनसिद्धसाधनतास्यात् । अतःकृत्यजन्यानीत्युक्तं । तर्हितार्किकमतेसर्वस्यापीश्वरकृतिजन्यत्वेनाऽऽश्रयासिद्धौप्राप्तायांजन्यत्वंकृतिविशेषणमुपात्तं । नहीदंसंभवति । आद्यजन्यपदस्यतार्किकरीत्याकृत्यसद्भावेपिमीमांसकरीत्यातदभावात् तस्यनिरीश्वरवादित्वेनाश्रयासिद्धेस्तेनोद्भावयितुमशक्यतयोभयसिद्धप्रयोजनाभावेनतद्वैयर्थ्यशंकायांविशेषणस्यसार्थक्येप्रयोजनवत्त्वमेवतंत्रंनतुतस्योभयसिद्धत्वमपीतियथातार्किकैःसमाधीयतेतथेहापीति । अत्रेदंचिंत्यं । यदुक्तंस्वार्थानुमितिदशायांसिद्धसाधनतावारणायविशेषणंसार्थकमितितदयुक्तं । पक्षतावच्छेदकावच्छिन्नेसर्वत्रसाध्यसिद्धेरुद्देश्यत्वपक्षेसिद्धसाधनताऽभावःपृथिवीइतरभिन्नेत्यत्रदृष्टः यथाहिघटत्वावच्छेदेनेतरभेदसिद्धावपिपृथिवीत्वरूपपक्षतावच्छेदकावच्छिन्नेसर्वत्रसाध्यसिद्धेरभावेनसिद्धसाधनतायाअभावात् । एवमिहापिशुक्तिरूप्यत्वावच्छेदेनमिथ्यात्वरूपसाध्यसिद्धावपिअसद्विलक्षणत्वेसतिब्रह्मान्यत्वावच्छेदेनसर्वत्रवियदादौमिथ्यात्वरूपसाध्यसिद्ध्यभावेनसिद्धसाधनतायाअभावादबाध्यत्वविशेषणंव्यर्थमिति । केचित्तुपक्षतावच्छेदकावच्छिन्नेयत्रकुत्रचित्साध्यसिद्धेरुद्देश्यत्वपक्षेंऽशेसिद्धसाधनतायाःसंभवाद्विशेषणंसार्थकमित्याहुः । अत्रपृथिवीइतरभिन्नेत्यस्यापिदुष्टत्वापत्तेस्तदयुक्तं । अपरेतुअसद्विलक्षणत्वेसतिब्रह्मान्यत्सत्यमितिप्रतिवादिनासाधनीयं । तत्रमायिनाशुक्तिरूप्येबाधउद्भाव्येत तदर्थमबाध्यत्वेसतीत्युक्तमित्याहुः । ननुनात्रऽबाधःसंभवति । तथाहि । यद्धर्मावच्छेदेनयस्मिन्धर्मिणिसाध्यंसाध्यतेतद्धर्मावच्छेदेनतत्रतदभावज्ञानंबाधः । यथाऽग्नित्वावच्छेदेनाग्नावनुष्णत्वंसाध्यतेतद्धर्मावच्छेदेनैवाग्नावुष्णत्वज्ञानंचेद्बाधः । नतुअग्नित्वावच्छेदेनानुष्णत्वेसाध्येद्रव्यत्वावच्छेदेनयत्रकुत्रचिदुष्णत्वज्ञानंबाधः । समानप्रकारकवि

8

SGDF Sri Gargeshwari Digital Foundation

रहज्ञानस्यैवबाधत्वात् । एवंचपक्षतावच्छेदकावच्छिन्नेसर्वत्रसाध्यसिद्धेरुद्देशत्वेनाऽसद्विलक्षणत्वेसति ब्रह्मान्यत्वावच्छेदेनसर्व
त्रप्रपंचेसत्यत्वस्यास्माभिःसाध्यमानत्वाच्छुक्तिरूप्यत्वावच्छेदेनसत्यत्वाभावस्यसिद्धत्वमादायबाधोक्त्ययोगइतिचेन्न । त्वदुक्तं
हिसंपूर्णबाधलक्षणं । यदाहिपक्षतावच्छेदकावच्छिन्नेयत्रकुत्रचित्साध्यसिद्धेरुद्देश्यत्वंतदापक्षतावच्छेदकावच्छिन्नेयत्रकुत्रचित्सा
ध्याभावस्यसिद्धौअंशेबाधः । तथाचासद्विलक्षणत्वेसतिब्रह्मान्यत्वावच्छेदेनयत्रकुत्रचित्सत्यत्वसिद्धेरुद्देश्यत्वंयदातदाऽसद्विल
क्षणत्वेसतिब्रह्मान्यत्वावच्छिन्नेयत्रकुत्रचिच्छुक्तिरूप्येसत्यत्वाभावसिद्ध्यांशेबाधोमायिनोद्भाव्येतापि । तदर्थमबाध्यत्वविशेषण
मितिनकोपिदोषः । अथाऽबाध्यत्वेसतीत्याद्युक्तौमायिमतेआश्रयासिद्धिः । तन्मतेविश्वस्यबाध्यत्वेनपक्षालाभात् । अतोब्रह्मप्र
मान्येनेत्युक्तं । तथाचतन्मतेजगतोब्रह्मप्रमाबाध्यत्वेपितदन्येनाबाध्यत्वसत्त्वान्नाश्रयासिद्धिरितिभावः । नन्वत्रनञ्द्वयंकस्मादु
पात्तंब्रह्मप्रमाबाध्यत्वेसतीत्येवकस्मान्नोक्तमितिचेदुच्यते । तथात्वेतत्ववादिमतेआश्रयासिद्धिः । तन्मतेजगतःसत्यत्वेनब्रह्मप्रमा
बाध्यत्वाभावात् । अतोनञ्द्वयगर्भता । तथाचास्मन्मतेसर्वथाऽबाध्यत्वेनविशेषणपर्यवसानं । तन्मतेतुब्रह्मज्ञानबाध्यत्वेनेति
नकोपिदोषइतिद्रष्टव्यं । नन्वत्रप्रमापदंकिमर्थंब्रह्मज्ञानान्यज्ञानाबाध्यत्वेसतीत्येवकस्मान्नोक्तमितिचेदुच्यते । ब्रह्मज्ञानान्यज्ञा
नाबाध्यत्वेसतीत्युक्तौसर्वप्रत्ययवेद्येचेत्यादिवचनान्नेदंरूप्यमितिबाधकज्ञानस्यापिशुक्त्यवच्छिन्नचैतन्यविषयकत्वेनब्रह्मज्ञानत्वा
त्तद्बाध्येअतएवब्रह्मज्ञानान्यज्ञानाबाध्येशुक्तिरूप्येमिथ्यात्वसिद्ध्यासिद्धसाधनतास्यात्तदर्थंप्रमापदं । वेदांतजन्यनिष्प्रकारकब्रह्म
ज्ञानस्यैववस्तुगत्याप्रमात्वेननेदंरूप्यमितिज्ञानस्यवस्तुगत्यातन्मतेऽप्रमात्वात् । ब्रह्मप्रमान्येनाबाध्यत्वस्यशुक्तिरूप्येऽभावेनधर्मि

SGDF
Sri Gargeshwari Digital Foundation

कोटावप्रवेशान्नसिद्धसाधनतेतिध्येयं । अत्रयद्यपिप्रमात्वंनामनतद्वतितत्प्रकारकत्वंविवक्षितं । निर्विकल्पकाऽव्याप्तेः । ब्रह्मप्र
मायानिष्प्रकारकत्वेनब्रह्मत्ववतिब्रह्मत्वप्रकारकत्वाभावात् । तथापिविशेष्यावृत्त्यप्रकारकत्वंविवक्षितंसविकल्पकप्रमायांविशेष्य
वृत्तिप्रकारकत्वमादायनिर्विकल्पकायांतुसर्वथानिष्प्रकारकत्वेनलक्षणपर्यवसानं । प्रकृतेचवेदांतजन्यप्रमायाःनिर्विकल्पकरूपत
यासर्वथानिष्प्रकारकत्वेनब्रह्मावृत्त्यप्रकारकत्वात्उक्तंप्रमालक्षणमस्तीतिनकोपिदोषइतिध्येयं । अथब्रह्मप्रमान्येनाबाध्यत्वेसती
त्याद्युक्तौब्रह्मण्यारोपितक्षणिकत्वेब्रह्मस्थायीतिप्रमाबाध्येब्रह्मप्रमान्येनेत्यादिविशेषणजातस्यसत्त्वेनधर्मित्वप्राप्तौतत्रमिथ्यात्वसा
धनेसिद्धसाधनतास्यादित्यस्वरसादाह ॥ सप्रकारेण(रकेण)वेति ॥ तथाचनब्रह्मण्यारोपितक्षणिकत्वस्यविप्रतिपत्तिधर्मिता ।

सप्रकारेणवा अबाध्यत्वेसतिअसद्विलक्षणत्वेसतिब्राह्मान्य

तस्यस्थायीब्रह्मेतिसप्रकारकप्रमाबाध्यत्वेनसप्रकारकेणाबाध्यत्वाभावादित्याहुः । तच्चिंत्यं । नेदमस्वरसोद्भावनंयुक्तं । तथाहि ।
अत्रब्रह्मप्रमाशब्देननिष्प्रकारकप्रमायाएवविवक्षितत्वेनब्रह्मस्थायीतिप्रमायाब्रह्मप्रमात्वाभावेनब्रह्मण्यारोपितक्षणिकत्वमादाय
सिद्धसाधनतायावक्तुमशक्यत्वात् । किंचब्रह्मप्रमेत्यत्रप्रमाशब्देनातत्वावेदकप्रमाविवक्षितोततत्वावेदकप्रमा । नाद्यः । शुक्ति
रूप्यस्यापिनेदंरजतमित्यतत्वावेदकप्रमाबाध्यत्वेनातत्वावेदकब्रह्मप्रमान्येनाबाध्यत्वादेःसत्त्वेनतस्यमिथ्यात्वसाधनेपुनःसिद्धसा
धनतायादुर्वारत्वापातात् । नद्वितीयः । तथात्वेब्रह्मण्यारोपितक्षणिकत्वमादायसिद्धसाधनतायावक्तुमशक्यत्वात् । ब्रह्मस्था

10

SGDF Sri Gargeshwari Digital Foundation

यीतिप्रमायाःतत्वावेदकत्वाभावेनब्रह्मण्यारोपितक्षणिकत्वेतत्वावेदकप्रमान्येनाबाध्यत्वस्याभावेनतदादायसिद्धसाधनतायाअयोगेनसप्रकारकेणवेत्यस्यवैयर्थ्यापत्तेरिति । संप्रदायस्तु । ब्रह्मप्रमेत्यस्यहिब्रह्मविषयिणीप्रमेत्यर्थः । ब्रह्मवेदांतजन्यवृत्ति(व्याप्यं)विषयंनेतिमतेब्रह्मप्रमायाएवाभावेनतद्घटितविप्रतिपत्त्ययोगइत्यस्वरसादाहसप्रकार(रे)केणवेति । यद्वक्ष्यतिविश्वमिथ्यात्वस्याऽनुमानबाधकथनावसरे "ब्रह्मवृत्तिव्याप्यमपिनेतिमतेनतुद्वितीयतृतीये" इति ॥ ननुचब्रह्मान्यदित्यस्ययदिब्रह्मप्रतियोगिकान्योन्याभाववत्त्वमर्थस्तर्ह्यसतोनिस्स्वरूपत्वेनब्रह्मप्रतियोगिकान्योन्याभावस्य धर्मिस्वरूपभूतस्यासत्यऽसंभवेन तदाऽऽदायबाधाऽप्रसक्तेरसद्विलक्षणत्वेसतीतिविशेषणवैयर्थ्यात् । यदिचान्योन्याभावस्यप्रतियोगितावच्छेदकात्यंताभावव्याप्यतयाब्रह्मत्वात्यंताभाववत्त्वमर्थस्तर्हिनिर्धर्मकेब्रह्मण्यपितस्यसत्त्वेनतत्रमिथ्यात्वसाधनेबाधापत्तेः । नचब्रह्मणोनिर्धर्मकत्वेनब्रह्मत्वात्यंताभावाधिकरणत्वमपिनास्तीतिवाच्यं । अभावरूपाधर्मानाद्वैतंनिघ्नंतीतिमंडनमिश्रोक्तेरितिचेदुच्यते । द्वितीयपक्षांगीकारेदोषाभावात् । नचोक्तरीत्याबाधइतिवाच्यं । मायिकब्रह्मत्वसद्भावेनतदत्यंताभावाधिकरणत्वाभावेनतस्यपक्षबहिर्भूतत्वेनतत्रबाधाप्रसक्तेः । अथवाऽऽद्यएवपक्षोभिप्रेतः । नचोक्तदोषः । तस्याऽस्मन्मतेधर्मिस्वरूपत्वेपिपरमतेतदभावेनतद्रीत्याबाधवारणायविशेषणसार्थक्यादित्याहुः । वस्तुतस्तुब्रह्मान्यत्वंनामब्रह्मविलक्षणत्वं वैलक्षण्यंचतद्विरुद्धधर्मयोगित्वं तच्चास्त्यसति निषेधबुद्धिविषयत्वादिरूपब्रह्मविरुद्धधर्मसद्भावात् । अतस्तदादायबाधपरिहारायासद्विलक्षणत्वेसतीत्युक्तमित्यवगंतव्यं । अथवाब्रह्मान्यदित्यस्यब्रह्मान्यद्यस्मादित्यर्थकरणेनाऽसतोपिप्राप्त्या * तत्रबाधपरिहारायासद्विलक्षणत्वेसतीतिविशेषणस्यसार्थक्यात् । प्रति

SGDF
Sri Gargeshwari Digital Foundation

योगित्वादिधर्माणांरूपादिवद्धर्मिसत्तासापेक्षत्वाभावादित्यालोचनीयं ॥ प्रतिपन्नोपाधाविति ॥ यस्ययदधिष्ठानत्वेनप्रतिपन्नंतत्रेत्यर्थः । (प्रतियोग्याधारत्वेनप्रतिपन्नेत्यर्थः) तुच्छेऽतिव्याप्तिवारणायेदंविशेषणं । तत्रप्रतिपन्नोपाधेरेवाभावादितिभावः । नन्वत्रनिषेधशब्दोयदिप्रागभावध्वंसान्योन्याभावपरस्तर्हितत्प्रतियोगित्वस्यघटादिप्रपंचेसत्त्वेनसिद्धसाधनताप्रसंगः । प्रागभावविवक्षायामविद्यादावनादौबाधापत्तिश्च । अतोत्यंताभावपरएववाच्यः । तथाचत्रैकालिकपदंव्यर्थमितिचेत् । अत्रकेचित् । त्रैकालिकनिषेधशब्देनाखंडवृत्त्यात्यंताभावएवविवक्षितइत्यदोषइत्याहुः । गुरुचरणास्तु । निषेधशब्दःसंसर्गाभावपरः । तथाच

त्प्रतिपन्नोपाधौत्रैकालिकनिषेधप्रतियोगिनवा पारमार्थिकत्वाकारेणत्रैकालिकनिषेधप्रतियोगिनवा|अखंडार्थनिष्ठवेदांतजन्यनिष्प्रकारकब्रह्मप्रमाबाध्यमपिविश्वंब्रह्मप्रमान्येनवासप्रका

त्रैकालिकसंसर्गाभावोत्यंताभावएवेतिनकोपिक्षुद्रोपद्रवइतिनिरूपयंति । प्रतिपन्नोपाधौत्रैकालिकनिषेधप्रतियोगित्वेसाध्येऽत्यंतासत्त्वप्राप्तिः । नचेष्टापत्तिः । असद्विलक्षणस्वरूपांगीकारात्तथाचबाधइत्यस्वरसादाह ॥ पारमार्थिकत्वेति ॥ असद्विलक्षणंव्यावहारिकंस्वरूपमनुपमृद्यपारमार्थिकत्वाकारेणनास्तीतिसाध्यतइतिनदोषइतिभावः । ब्रह्मप्रमान्येनवासप्रकारेणवेत्यनयोर्विशेषणयोःकृत्यंदर्शयति ॥ अखंडार्थेति ॥ ब्रह्मप्रमाबाध्यमपीत्युक्त्याब्रह्मप्रमान्येनाबाध्यत्वमुपपादितं । निष्प्रकारकब्रह्मप्रमेत्युक्त्यासप्रकारेणाबाध्यत्वमुपपादितं । वेदांतजन्यप्रमायानिष्प्रकारकत्वोपपादनायाखंडार्थनिष्ठेत्युक्तं । निर्विशेषार्थनिष्ठेत्यर्थः ॥

विप्रतिपत्तिरूह्येति ॥ अत्रविप्रतिपत्तिर्नामसंशयजनिकाविरुद्धार्थप्रतिपादकवाक्यद्वयरूपैवविवक्षिताद्रष्टव्या । ननुमूलकोशेआचार्यैःटीकाकारैर्वाकुत्रापिविप्रतिपत्तेरप्रदर्शितत्वात्तत्प्रदर्शनेभवतामकौशलंस्यादितिचेत् । सत्यं । नप्रदर्शनीयैवविप्रतिपत्तिः । तर्हिभवद्भिःकस्मात्साप्रदर्शितेतिचेत्तत्राह ॥ इदंचेति ॥ वस्तुतइति ॥ अत्यावश्यकतयेत्यर्थः । अंगीकृत्येदमुक्तं । वस्तुतस्तुतार्किकमतेपिनविप्रतिपत्तिप्रदर्शनस्यावश्यकता । कुतइतिचेन्निष्प्रयोजनत्वादितिगूढाभिसंधिराह ॥ तत्पक्षेपीति ॥

रेणवानबाध्यमितिनाश्रयासिद्धिः । एवमुत्तरत्रापिपूर्वोत्तरपक्षानुमानप्रतिज्ञेसंकलय्यविप्रतिपत्तिरूह्या । इदंचविप्रतिपत्तिप्रदर्शनंतार्किकरीत्यैव नतुवस्तुतः। तत्पक्षेपिविप्रतिपत्तिवाक्यस्यपक्षपरिग्रहैकफलकत्वात् । तस्यचकथाबाह्येन

ननुतर्हिकथंनिष्प्रयोजनत्वं । पक्षपरिग्रहस्यैवफलत्वादितिशंकायांतस्यान्यथासिद्धत्वेनविप्रतिपत्तिवाक्यसापेक्षत्वाभावादित्याशयमुद्घाटयति ॥ तस्येत्यादिना ॥ तस्य पक्षपरिग्रहस्यसिद्धावित्यन्वयः । लौकिकरीत्यनुसारिणाभाषारूपेणवादिवाक्येनमयाप्रपंचमिथ्यात्वंसाध्यतइतिसंस्कृतरूपेणवादिवाक्येनेत्यन्वयोद्रष्टव्यः । ननुयदिकर्णाटकमहाराष्ट्रद्राविडादिभाषारूपेणवादिवाक्येनपक्षपरिग्रहरूपफलसिद्धिःतदाऽपशब्दादिनानिग्रहापत्तिः । तथायदिमयाप्रपंचमिथ्यात्वंसाध्यतइतिसंस्कृतरूपेणवादिवा

SGDF ... Foundation

क्येनतत्सिद्धिस्तर्हिंप्रपंचशब्देनब्रह्मशुक्तिरजत(तुच्छ)योरपिप्राप्त्याबाधसिद्धसाधनतेस्यातामित्याशंकापरिहारायोक्तं ॥ **निग्रहा नर्हेणेति** ॥ तत्कुतइत्यतउक्तं ॥ **कथाबाह्येनेति** ॥ समयबंधादितःपूर्वतनेत्यर्थः । कथायामेवनिग्रहइतिभावः । उक्तकुसृष्टिःब्रह्म प्रमान्येनेत्यादिविशेषणंप्रक्षिप्यतत्प्रयोजनान्वेषणरूपा । ननुतार्किकमतेपक्षपरिग्रहरूपफलस्यान्यथासिद्ध्यातदर्थंविप्रत्तिपत्तिवा क्यस्यवैयर्थ्येपिप्रयोजनांतरार्थंतत्सार्थकमितिचेत्तत्रविकल्पयामः । तत्प्रयोजनंसाध्योपस्थितिर्वापक्षत्वप्रयोजकसंशयोवा । तत्राद्य

निग्रहानर्हेणलौकिकरीत्यनुसारिणासंस्कृतरूपेणवाभाषारूपेणवामयाप्रपंचमिथ्या त्वंसाध्यतइतिवादिवाक्येनवात्वयाप्रपंचमिथ्यात्वंसाध्यमितिमध्यस्थपरिकल्पि तविषयस्वीकारेणवासिद्धौप्रतिज्ञाव्यतिरिक्तस्यउक्तकुसृष्टियुक्तस्यविप्रतिपत्तिवा क्यस्यवैयर्थ्यात् । नचसाध्योपस्थित्यर्थंतत् । प्रतिज्ञयैवतत्सिद्धेः । नचपक्षत्वप्रयो जकसंशयार्थंतत् । वादिप्रतिवादिनोःप्राश्निकानांचनिश्चयवत्त्वेनतद्योगात् ।

माशंक्यनिराकरोति ॥ **नचसाध्येति** ॥ तत्विप्रतिपत्तिवाक्यं । हेत्वभिधानप्रयोजकाकांक्षाजनकत्वेनसाध्योपस्थितेरावश्यक त्वादितिभावः । द्वितीयमाशंक्यनिराचष्टे ॥ **नचपक्षत्वेति** ॥ पक्षतायाःसंदेहघटितत्वादितिभावः । यथाहुःपदार्थविदः । "संदिग्धसाध्यधर्माधर्मीपक्ष" इति । पक्षत्वप्रयोजकसंशयोपिनवाद्यादीनामित्याह ॥ **वादीति** ॥ तथाचनिश्चायकप्रमाणरूप

14

SGDF
Sri Gargeshwari Digital Foundation

विशेषदर्शनसद्भावेनविशेषादर्शनाख्यहेत्वभावान्नविप्रतिपत्तिवाक्यस्यवाद्यादिसंशयाधायकत्वमितिभावः । ननुविशेषदर्शनसद्भावेनवाद्यादीनांस्वारसिकसंशयासंभवेप्याहार्यसंशयाधायकत्वेनविप्रतिपत्तिवाक्यस्यपक्षत्वप्रयोजकत्वंसंभवति । तस्यविशेषदर्शनाप्रतिबद्धत्वादित्यतआह ॥ आहार्येति ॥ अतिप्रसंगेनेति ॥ अनुमित्युत्तरकालेसिद्धिस्थलेसिषाधयिषाविरहदशायामप्याहार्यसंशयसंभवेनपक्षत्वापत्त्यानुमित्यापत्तिरित्यतिप्रसंगेनेत्यर्थः । वैयात्यादिष्टापत्तौचोदितायामाह ॥ विप्रतिपत्तीति ॥ आहार्यसंशयस्येत्येतदनुवर्तते । ननुवाद्यादीनांनिश्चयवत्त्वेनविप्रतिपत्तिवाक्यस्यवाद्यादिषुस्वारसिकसंशयाधायकत्वंनास्तीत्युक्त

आहार्यसंशयस्यचातिप्रसंगे(गित्वे)नपक्षत्वाप्रयोजकत्वात् । विप्रतिपत्तिवाक्यानपेक्षत्वाच्च । संशयंविनापिसिषाधयिषाविरहसहकृतसाधकमाना(साधकबाधकप्रमाणा)भावरूपस्यपक्षत्वस्यसंभवाच्च ।

मयुक्तं । तथात्वेकथायांवादिनाप्रतिवादिनंप्रतिप्रतिवादिनावादिनंप्रत्यनुमानेप्रयुक्तेअनुमितिरेवनस्यात् । संदेहघटितपक्षतायाअनुमितिजनिकायाअभावादित्यतआह ॥ संशयमिति ॥ सिषाधयिषाविरहेति ॥ ननुसर्वत्रानुमानरूपसाधकप्रमाणस्यैवसत्त्वेनतदभावादसंभवइतिचेदुच्यते । साधकमानपदस्यानुमानातिरिक्तसाधकमानपरत्वात् । तथाचसिषाधयिषाविरहसहकृतानुमानातिरिक्तसाधकमानरूपविशिष्टस्याभावःसर्वत्रानुगतः । तथाहि । सिद्धिस्थलेनुमानातिरिक्तप्रत्यक्षरूपसाधकमानरूप

SGDF
Sri Gargeshwari Digital Foundation

विशेष्यस्यसत्त्वेपिविशेषणाभावेनविशिष्टस्याभावोस्ति । महानसेवह्निमनुमिनुयामितिसिषाधयिषयाह्यनुमानंतत्रप्रवर्तते । धूमानुमानस्थलेविशेषणमस्ति । सिद्धिस्थलएवहिसिषाधयिषा नसर्वत्र । इच्छायाज्ञानसाध्यत्वमेवनत्वनुमित्यादिरूपज्ञानस्येच्छासाध्यत्वं । सत्यांसामग्र्यामिच्छाभावेनज्ञानानुदयाभावात् । अन्यथाऽनिच्छतोपिदुर्गंधज्ञानंनस्यात् । तस्मात्तत्रविशेषणसद्भावेपिविशेष्याभावाद्विशिष्टाभावः । एवमेवघनगर्जितस्थलेपिद्रष्टव्यं । यथोक्तमनुमानप्रकाशे रुचिदत्तोपाध्यायेन । "साधकमानपदमनुमानातिरिक्तसाधकमानपरंवेति" । एवंविप्रतिपत्तिवाक्यस्याफलत्वेनानावश्यकत्वमुपपाद्यपरपक्षेप्रमाणमुत्थापयति ॥ प्र 16

प्रमाणंचात्रानुमानं । विमतंमिथ्या "दृश्यत्वाज्जडत्वात्परिच्छिन्नत्वाच्छुक्तिरूप्यवत्" इत्यानंदबोधोक्तेः । "अयंपटःएतत्तंतुनिष्ठात्यंताभावप्रतियोगीपटत्वादंशित्वात्पटांतरवत्" इतितत्त्वप्रदीपोक्तेः ।

माणंचेति ॥ प्रकृतत्वानुसंधानार्थश्चशब्दः । तथाहीत्यत्रहीत्यनेनात्रविश्वमिथ्यात्वेयत्प्रतिज्ञातंप्रमाणं तच्चानुमानरूपमित्यर्थः । अनुमानंप्रमाणमितिकुतोवगतमित्यतआह ॥ **विमतमित्यादि** ॥ आनंदबोधोक्तेर्हेतोरत्रानुमानंप्रमाणमित्येतदवगम्यतइतियोज्यं । एवंतत्वप्रदीपोक्तेरित्येतदपिव्याख्येयं । **एतत्तंतुनिष्ठेति** ॥ एतत्पटस्येतरत्राभावःसिद्धएवास्तिएतत्तंतुष्वप्यभावसाधने मिथ्यात्वमेवसिद्ध्यतीतिभावः । ननुविमतमित्यत्रपक्षतावच्छेदिकाविमतिर्नामविरुद्धार्थप्रतिपादकंवाक्यद्वयंसंशयरूपंज्ञानंवेति ॥ ९ ॥

वक्तव्यं । तयोश्चकथंप्रपंचनिष्ठपक्षतावच्छेदकत्वं । वाक्यस्यशब्दरूपत्वेनगगनमात्रनिष्ठतयापक्षतान्यूनवृत्तित्वात् । संशयरूपज्ञानस्यचपक्षताशून्यात्मनिष्ठत्वेनाधिकवृत्तित्वादितिचेत्सत्यं । वाक्यद्वयस्यापिप्रपंचेप्रतिपाद्यप्रतिपादकभावसंबंधेनसंशयरूपज्ञानस्यचविषयविषयिभावसंबंधेनसत्त्वसंभवेनदोषाभावात् । नन्वत्रनविमतिःपक्षतावच्छेदिका । तस्याःब्रह्मतुच्छविषयकत्वरूपातिप्रसंगपरिहारायावच्छेदकसापेक्षत्वेनयदवच्छेदकमुच्यतेब्रह्मप्रमान्येनेत्यादिकंतस्यैवपक्षतावच्छेदकत्वमस्तु किंतज्ज्ञानाधीनज्ञानायाविमतेःपक्षतावच्छेदकत्वोक्त्या व्यर्थत्वादित्याशंक्यशरीरलाघवादियमेवपक्षतावच्छेदिकेत्याह ॥ **यद्यपीत्यादिना** ॥ 17

यद्यपिविमतिरपिनियतविषयत्वायावच्छेदक(कांतर)सापेक्षा । तथापिसावयवत्वसाधितेनकार्यत्वेनपृथिव्याःसकर्तृकत्वसाधनमिव स्वनियामकनियतयालघ्व्याविप्रतिपत्त्यापक्षतावच्छेदोनविरुद्धः ।

नियतविषयत्वायब्रह्मतुच्छाऽविशेष्यकावियदादिप्रपंचमात्रविशेष्यकाविमतिरितिनियतविषयत्वायेत्यर्थः ॥ **अवच्छेदकेति** ॥ ब्रह्मप्रमान्येनेत्याद्यवच्छेदकेत्यर्थः । तथाचतस्यैवपक्षतावच्छेदकत्वमस्त्वितिभावः । तथापिस्वनियामकनियतयाविप्रतिपत्त्याविमत्यापक्षतावच्छेदोनविरुद्धइत्यन्वयः ॥ **स्वनियामकेति** ॥ स्वस्याःविमतेःनियतविषयत्वेनियामकंयद्ब्रह्मप्रमान्येनेत्यादिकंतन्नियतयाब्रह्मतुच्छाविषयकत्वेननियतविषयेत्यर्थः । तत्रहेतुर्लघ्व्येति । स्वनियामकनियतस्यापिप्रयोगोदृष्टइत्याशयेनोक्तं ।

SGDF Foundation

स्वावयवत्वेति । व्याप्यव्याप्यस्यसुतरांव्याप्यत्वात्कार्यत्वव्याप्येनसावयवत्वेनैवसकर्तृकत्वसाधनोपपत्तौकार्यत्वरूपहेतूक्तिर्व्य र्थेत्याशंकायांगौरवात्सावयत्वमप्यप्रयुज्यलाघवात्तत्साधितंकार्यत्वमेवप्रयुज्यतेतद्वदित्यर्थः । ननुविमतेःशरीरलाघवेपिप्रतिपत्ति गौरवान्नपक्षतावच्छेदकत्वं । शब्दगौरवापेक्षयाप्रतिपत्तिगौरवस्यज्यायस्त्वादतोविप्रतिपत्तिधर्मितावच्छेदकमेवानुमानेपक्षताव च्छेदकमस्त्वित्यस्वरसादाह ॥ यद्वेति ॥ विप्रतिपत्तिर्विमतिरेवपक्षतावच्छेदिका । नचविप्रतिपत्तिधर्मितावच्छेदकमेवात्रपक्ष तावच्छेदकमस्त्वितिवाच्यं । स्यादिदं यदिब्रह्मप्रमान्येनेत्यादिरूपेणादौविप्रतिपत्तिमुक्त्वाविमतंमिथ्येतिप्रयुज्येत । नचैवं ।

यद्वापृथिवीसत्यामिथ्यावाजलंसत्यंमिथ्यावेत्यननुगत
धर्म्याश्रयाअनुगताविप्रतिपत्तिःपक्षतावच्छेदिका ।

किंतुपृथिवीसत्यामिथ्यावेत्याद्यननुगतधर्म्याश्रयांविप्रतिपत्तिमादौप्रदर्श्यपश्चाद्विमतंमिथ्येत्यादिप्रयुज्यते । तथाचविप्रतिपत्तौ यद्धर्मितावच्छेदकंपृथिवीत्वादिकंतस्याननुगतत्वान्नपक्षतावच्छेदकत्वंयुक्तं । नचविमतेरप्यननुगतत्वान्नतस्याअपिपक्षतावच्छे दकत्वंयुक्तमित्यतउक्तं ॥ अनुगतेति ॥ अननुगतानामपिविमतीनांविश्वधर्मिकसत्यत्वमिथ्यात्वकोटिकविमतित्वेनानुगतीकृ तानांपक्षतावच्छेदकत्वसंभवात् । नचैवंविप्रतिपत्तिधर्मितावच्छेदकभूतानांपृथिवीत्वादीनामननुगतानामपिसत्यत्वमिथ्यात्वको टिकविप्रतिपत्तिधर्मितावच्छेदकत्वेनानुगतानांपक्षतावच्छेदकत्वंयुक्तमितिवाच्यं । सत्यत्वमिथ्यात्वकोटिकविमतित्वाऽपेक्षया

i8

SGDF Sri Gargeshwari Digital Foundation

सत्यत्वमिथ्यात्वकोटिकविप्रतिपत्तिर्धर्मितावच्छेदकत्वस्यचानुगमकस्यगुरुत्वात् । अतोलाघवाद्विमतिरेवपक्षतावच्छेदिकेति भावः । ननुविमतेःपक्षतावच्छेदकत्वेपक्षतावच्छेदकसामानाधिकरण्येनसाध्यसिद्धेरुद्देश्यत्वात्पक्षतावच्छेदकीभूतायाश्चविमतेः समयबंधादिनाव्यवहितत्वेनानुमानकालेऽभावान्नानुमानेनतत्सामानाधिकरण्येनसाध्यसिद्धिरूपोद्देश्यसिद्धिरित्याशंक्यसमाध त्ते ॥ यद्यपीत्यादिना ॥ सैवेति ॥ विमतिरेवेत्यर्थः । श्यामत्वोपलक्षितोरक्तइतिवद्विमतंविमतिविषयत्वोपलक्षितंमिथ्येत्ये वंविमतेरुपलक्षणतयापक्षतावच्छेदकत्वंयुक्तमित्यर्थः । पक्षांतरमाह ॥ तज्ज्ञानंवेति ॥ विमतिविषयत्वज्ञानंवेत्यर्थः । समय

यद्यपिविमतिस्समयबंधादिनाव्यवहितत्वान्नानुमानकालेस्ति । तथापिसैवो पलक्षणतयातज्ज्ञानंवाविशेषणतया(पक्षता)वच्छेदकमस्तु । अतएवविमत मित्येवप्राचांप्रयोगः । नतुवियदादीत्येवपक्षनिर्देशः । अवच्छेदकाभावेऽ

बंधाद्यनंतरंविमतिविषयत्वज्ञानंस्मृतिरूपंतदुत्तरक्षणेचपरामर्शः । तदुत्तरक्षणेऽनुमितिरित्यंगीकारेणविमतिविषयत्वज्ञानस्यैव विनश्यदवस्थस्यानुमानकालवृत्तित्वेनपक्षतावच्छेदकत्वंयुक्तमितिभावइत्याहुः । गुरुचरणास्तु । तज्ज्ञानंवेत्यस्यात्रास्माकंविम तिर्जाताऽभूदित्येवंरूपविमतिविषयत्वज्ञानमनुव्यवसायरूपमित्यर्थः । एवंरूपंचज्ञानमस्मन्मतेसाक्षिरूपमितितस्यानुमितिकाले जागरूकत्वाद्युक्तंविशेषणत्वमित्युपदिशंति । विमतेरेवपक्षतावच्छेदकत्वेवृद्धसंमतिमाह ॥ अतएवेति ॥ विमतेरेवपक्षताव च्छेदकत्वसिद्ध्यर्थमवच्छेदकांतराणिनिराचष्टे ॥ नत्वित्यादिना ॥ अवच्छेदकाभावइति ॥ आदिपदग्राह्यतावच्छेदकाभा

19 तरंगिणी

SGDF Sri Gargeshwari Digital Foundation

वइत्यर्थः ॥ असंकुचितेनेति ॥ ब्रह्मतुच्छसंग्रहाविरोधित्वादितिभावः । प्रपंचशब्दस्यविश्वविस्तारवाचित्वात्प्रपंचोवि
श्वविस्तारस्तत्समुदायइतियावत् । सःपक्षीभूतोविश्वसमुदायःसमुदायिनान्यःतत्स्वरूपोवेत्याशंक्याद्येदोषमाह ॥ प्रपंचशब्दे
नेति ॥ वियदादिविश्वान्योयस्तत्समुदायइत्यर्थः ॥ वियदादीति ॥ समुदायस्यैवमिथ्यात्वंप्राप्तमितिभावः । समुदायस्यसमु
दाय्यनतिरिक्तत्वाद्वियदादिविश्वस्यैवपक्षत्वमितिद्वितीयपक्षेत्वाह ॥ वियदादीनामेवेति ॥ अवच्छेदकेति ॥ आदिपद
ग्राह्यतावच्छेदकेत्यर्थः ॥ उक्तदोषादिति ॥ असंकुचितेनादिपदेनात्मादेरपिग्रहणापातादित्युक्तदोषादित्यर्थः । ननुवियदित्ये

20

संकुचितेनादिशब्देनआत्मादेरपिग्रहणप्रसंगात् । नापिप्रपंचइत्येवपक्षनिर्देशः । प्रपंचश
ब्देनवियदाद्यन्यतत्समुदायोक्तौवियदादिमिथ्यात्वासिद्धेः । वियदादीनामेवोक्तावच्छे
दकाभावेनोक्तदोषात् । नापिवियदित्येवपक्षनिर्देशः ॥ घटादिस्तुपक्षतुल्यइतिवाच्यं ।

वपक्षनिर्देशःकर्तुंनशक्यते । तथात्वेघटादेःपक्षबहिर्भावेनतत्रदृश्यत्वसत्त्वेपिमिथ्यात्वाभावेनव्यभिचारापत्तेरित्यतआह ॥ घटा
दिस्त्विति ॥ नहिपक्षेपक्षतुल्येवाव्यभिचारइत्याशयः । कुतोनवाच्यमितिचेदुच्यते । घटादेःपक्षतुल्यत्वेननिश्चितव्यभिचारा
भावेपिसंदिग्धानैकांत्यंस्यादेव । ननुसंदिग्धानैकांत्यमपिकथं । निश्चितसाध्याभाववतिहेतुसंदेहरूपस्यतल्लक्षणस्याभावात् । घ ॥ ११ ॥
टादौसाध्याभावस्यसंदिग्धत्वाद्धेतोर्निश्चितत्वादितिचेन्न । निश्चितसाध्याभाववतिहेतुसंदेहइवनिश्चितहेतुमतिसाध्यसंदेहेपिसं

दिग्धानैकांत्यात् । व्यभिचारोहिहेतुसत्त्वसाध्याभावरूपद्वयंशः । तयोर्मध्येएकस्यनिश्चयेऽपरस्यसंदेहेसंदिग्धानैकांत्यं । घटा
दौतुहेतोर्निश्चयात्साध्यस्यचसंदिग्धत्वात्संदिग्धानैकांत्यमपरिहार्यमित्याह ॥ निश्चितेति ॥ नन्वस्यसंदिग्धानैकांत्यलक्षणत्वे
अनुमानमात्रोच्छेदः । सर्वानुमानेसाध्यसंदेहस्यांगत्वादित्यतउक्तं ॥ पक्षादन्यत्रेति ॥ पक्षादन्यत्रनिश्चितहेतुमतिसाध्यसंदे
हेपीत्यन्वयः । पक्षएवसाध्यसंदेहस्यांगत्वंतदन्यत्रतुसाध्यसिद्धिरेवांगं । तथाचघटादेःपक्षादन्यत्वात्तत्रचहेतोर्निश्चितत्वात्साध्य
स्यचसंदिग्धत्वात्संदिग्धानैकांत्यमेव । नचसंदिग्धसाध्यवत्त्वेनघटादेरपिपक्षत्वमेवनपक्षादन्यत्वमितिवाच्यं । संदिग्धसाध्यव
त्त्वंपक्षत्वमिहनाभिप्रेतंयत्रसिद्धिस्थलेसिषाधयिषायामनुमानप्रवृत्तिस्तत्रत्येपक्षेऽव्याप्त्यापत्तेः । किंनामप्रतिज्ञाविषयत्वं । तच्चघ

21

पक्षादन्यत्रनिश्चितसाध्याभाववतिहेतुसंदेहइवनिश्चितहेतुमतिसाध्यसंदेहेपिसंदिग्धानैकां
त्यात् । प्रतिज्ञांप्रत्यविषयेघटेस्वार्थानुमानानुगतस्यसाधकबाधकप्रमाणविरहरूपपक्षत्वस्य

टादौनास्तीतिपक्षादन्यत्वमेवेत्याशयः । ननुतथापिनसंदिग्धानैकांत्यं । घटादेःपक्षादन्यत्वाभावात् । नचप्रतिज्ञाविषयत्वरूपल
क्षणानाक्रांतत्वात्पक्षादन्यत्वंघटादेरितिवाच्यं । अस्यपक्षलक्षणत्वेस्वार्थानुमितिपक्षेव्याप्तेः । तत्रावयवप्रयोगाभावेनपक्षवचन
रूपप्रतिज्ञायाएवाभावात् । अतःस्वार्थानुमानपक्षसाधारण्यायसाधकबाधकप्रमाणाभावएवपक्षत्वमितिवाच्यं । तथाचघटेमि
थ्यात्वसाधकस्यप्रमाणस्यैतदनुमानव्यतिरिक्तस्याभावान्मिथ्यात्वबाधकप्रमाणाभावाच्चास्तिपक्षत्वमितिपक्षादन्यत्वघटितसंदि
ग्धानैकांत्यलक्षणाभावान्नघटेव्यभिचारोस्तीतिवियदित्येवपक्षनिर्देशोस्त्वित्याशंक्यनिराकरोति ॥ प्रतिज्ञामिति ॥ प्रतिज्ञा

SGDF
Foundation

विषयत्वंपक्षत्वं । नचसाध्येतिव्याप्तिः । प्रतिज्ञाविशेष्यत्वमित्यर्थंकरणात् ॥ सत्त्वेपीति ॥ तथाचनपक्षादन्यत्वमस्तीतिनसं दिग्धानैकांत्यमितिवियदित्येवास्तुपक्षनिर्देशइत्याशयः ॥ एवंपक्षनिर्देशस्येति ॥ वियदित्येवपक्षनिर्देशस्येत्यर्थः ॥ घटादि साधारणेति ॥ ब्रह्मप्रमान्येनेत्यादिरूपेत्यर्थः । तथाचवियन्मात्रस्यपक्षत्वेपिउक्तविधयानघटेसंदिग्धानैकांत्यं । तथापिघटा दिसाधारणविप्रतिपत्त्यनुसारेणैवपक्षनिर्देशेकर्तव्येतद्बहिर्भावेनवियन्मात्रस्यैवपक्षतयानिर्देशस्याकौशलव्यंजकत्वादितिभावः । ननुविप्रतिपत्तिधर्मितावच्छेदकस्यैवानुमानेपक्षतावच्छेदकतायाउक्तरीत्यासंभवेपिअनुमानेयापक्षतावच्छेदिकालघ्वीविमतिःसैव

सत्वेपिएवं(विध)पक्षनिर्देशस्यघटादिसाधारणविप्रतिपत्त्य
नानुगुण्याच्च । विप्रतिपत्तौतुनविमतिर्धर्मितावच्छेदिका

विप्रतिपत्तौधर्मितावच्छेदिकास्तु । अतःकिमुक्तकुसृष्टियुक्तब्रह्मप्रमान्येनेत्यादिधर्मितावच्छेदकाश्रयणेनेत्यतआह ॥ विप्रतिपत्तौ त्विति ॥ अनुगतावच्छेदकमंतरेणविमतेर्नियतविषयत्वासंभवादनुगतावच्छेदकेनानुगतानियतविषयाविमतिरेवविप्रतिपत्तौधर्मि तावच्छेदिकेतिवक्तव्यं । तत्रानुगमकोधर्मःकिंप्रमान्येनेत्याद्युक्तरूपोवाविमतिरेववा । नाद्यः । उक्तकुसृष्टियुक्तत्वेनतदनादर णात् । आदरेवासएवविप्रतिपत्तौधर्मितावच्छेदकोस्तुकृतंतद्ग्रहाधीनग्रहयाविमत्याधर्मितावच्छेदकत्वेनकल्पितया । नद्वितीयः । विमत्यानुगतीकृताविमतिर्धर्मितावच्छेदिकेत्युक्तौस्वेनानुगतीकृतस्यस्वस्यैवधर्मितावच्छेदकत्वप्राप्त्याआत्माश्रयस्यस्पष्टत्वादिति

SGDF
Sri Gargeshwari Digital Foundation

भावेनाह ॥ आत्माश्रयादिति ॥ एतत्पटानाद्यभावत्वादिति ॥ मृत्पिंडनिष्ठेघटध्वंसेव्यभिचारवारणायानादीतिविशेषणं । मृत्पिंडनिष्ठघटप्रागभाववारणायपटेति । पटांतरप्रागभाववारणायैतदिति ॥ एतत्पटान्योन्याभाववदिति ॥ एतत्तंतुरेतत्पटोनेतिप्रतीतेरितिभावः । ननुतर्हिएतत्पटाभावत्वादित्येवास्तु । नचैतत्पटध्वंसेव्यभिचारइतिवाच्यं । एतत्पटध्वंसेसाध्यस्यापिसत्त्वेनव्यभिचाराभावात् । अतोनादीतिपदंव्यर्थमितिचेत्तत्राह ॥ तंत्विति ॥ समवायिकारणनाशजन्यकार्यनाशेउक्त

आत्माश्रयात् । नवीनास्तुएतत्पटात्यंताभावःएतत्तंतुनिष्ठःएतत्पटानाद्यभावत्वात् एतत्पटान्योन्याभाववत् । (एतत्तं)तंतुनाशजन्यस्य(स्यैतत्प)पटनाश(स्यैतत्तं)स्य तंत्ववृत्तित्वादनादीतिविशेषणं । विमतंवाब्रह्मप्रमान्येनेत्यादिविप्रतिपत्तिवाक्योक्तविशेषणत्रयवत्वेसतिअव्याप्यवृत्तित्वानधिकरणंवास्वसमानाधिकरणात्यंताभावप्रतियोगि। अनात्मत्वात्संयोगवदिति । अत्रचपक्षधर्मताबलान्मिथ्यात्वसिद्धिः ।

हेतोःसत्त्वेपिसाध्याभावाद्व्यभिचारःस्यात् । अतोनादीतिविशेषणमित्यर्थः । विमतंवा स्वसमानाधिकरणेत्यन्वयः । वक्ष्यमाणसाध्यवत्त्वतदभावाभ्यांविमतमित्यर्थः । प्रकारांतरेणपक्षंनिर्दिशति ॥ ब्रह्मेत्यादि ॥ अव्याप्यवृत्तित्वमादायार्थांतरतापरिहारायाव्याप्यवृत्तित्वानधिकरणमित्युक्तं । इदंचपक्षद्वयेपिज्ञेयं । ननुकथमनेनमिथ्यात्वसिद्धिरित्यतआह ॥ अत्रचेति ॥ अ

SGDF
Sri Gargeshwari Digital Foundation

व्याप्यवृत्तित्वानधिकरणमितिपक्षविशेषणबलात्अव्याप्यवृत्तित्वेनपक्षेसाध्योपसंहारायोगेनस्वसमानाधिकरणव्याप्यवृत्त्यत्यंता भावप्रतियोगित्वरूपंमिथ्यात्वमेवपक्षेसिद्ध्यतीत्यर्थः । अत्रोत्तरत्रचपक्षधर्मबलादित्येवपाठः । पक्षधर्मताबलादितिपाठेतुस्वार्थे तल्प्रत्ययोव्याख्येयः ॥ विमतमित्येवोक्तौनित्यद्रव्यात्यंताभावस्यकेवलान्वयित्वे(नावृत्तित्वेनापिपर्यवसानोपपत्तेरर्थांतरतास्या दित्यतउक्तं ॥ नित्यद्रव्यान्यदिति ॥ वृत्तिमदित्यर्थः ।) नसिद्धसाधनतापत्तेर्विमतमित्येतद्विवृणोति ॥ नित्यद्रव्यान्यदि ति ॥ वृत्तिमदित्यर्थः । दृष्टांतेसाध्यवैकल्यंपरिहरति ॥ तार्किकमतइति ॥ अवृत्तित्वेनेति ॥ समवायेनसंबधेनकुत्राप्य

विमतंनित्यद्रव्यान्यत्केवलान्वय्यत्यंताभावप्रतियोगिपदार्थत्वात् । नित्यद्रव्यवत् ।
तार्किकमतेनित्यद्रव्याणामवृत्तित्वेनतदत्यंताभावःकेवलान्वयीतिनदृष्टांतःसाध्य
विकलः । अतएवनात्मनिव्यभिचारः । मिथ्यात्वसिद्धिस्तुपक्षधर्मताबलात् ।

वृत्तित्वेनेत्यर्थः । आत्मनिव्यभिचारशंकामपाकरोति ॥ अतएवेति ॥ नित्यद्रव्याणामवृत्तित्वेनतदत्यंताभावस्यकेवलान्वयि त्वादेवेत्यर्थः । आत्मनोपिनित्यद्रव्यतयाऽवृत्तित्वेनतदत्यंताभावस्यापिकेवलान्वयित्वेनसाध्यस्यापिसत्त्वादित्यर्थः । ननुकथम नेनमिथ्यात्वसिद्धिःनित्यत्वेनापिसाध्यपर्यवसानोपपत्तेरित्यतआह ॥ मिथ्यात्वसिद्धिस्त्विति ॥ वृत्तिमत्त्वार्थकनित्यद्रव्या न्यत्वेनपक्षविशेषणात्अवृत्तित्वमादायपक्षेसा(ध्यपर्यवसानायोगात्)ध्योपसंहारायोगात् । स्वसमवायिकारणेवृत्तिमतामपिप

दार्थानांअत्यंताभावस्यकेवलान्वयित्वेसाधितेसतिस्वसमवायिकारणेपितदत्यंताभावप्राप्त्यामिथ्यात्वसिद्धिरितिभावः ॥ आत्म त्वावच्छिन्नेति ॥ आत्मत्वावच्छिन्नधर्मिताकात्मेभेदप्रतियोगिनःप्रपंचस्यापारमार्थिकत्वसिद्ध्यामिथ्यात्वसिद्धिरितिद्रष्टव्यं । आत्मानात्मानौशुक्तिरूप्यंनेतिप्रतीतेःशुक्तिरूप्यप्रतियोगिकेआत्मानात्मधर्मिकेभेदेसिद्धसाधनत्ववारणायात्मभेदइत्यनुक्त्वाआ त्मत्वावच्छिन्नधर्मिताकोभेदइत्युक्तं । आत्मत्वेनव्यावर्तिता याधर्मिता तत्कःतद्वानित्यर्थः । तस्मिंश्चभेदेनात्मत्वंधर्मितावच्छे दक मनात्मन्य(वृत्तित्वे)भावेनन्यूनवृत्तित्वात्किंतुद्वित्वमेवेतिभावः ॥ अनात्ममात्रेति ॥ शुक्तिरूप्यमात्मानात्मानौनेतिप्रती

आत्मत्वावच्छिन्नधर्मिताकोभेदोनपरमार्थसत्प्रतियोगिकः । अना
त्ममात्रप्रतियोगिकत्वात् । शुक्तिरूप्यप्रतियोगिकभेदवदित्याहुः ।
मिथ्यात्वंचयद्यपिनात्यंतासत्वं अपसिद्धांतात् । नाप्यनिर्वाच्यत्वं

तेःशुक्तिरूप्यधर्मिकेआत्मानात्मप्रतियोगिकेभेदेपरमार्थसदात्मप्रतियोगिकत्वसद्भावेनसाध्याभावाद्व्यभिचारवारणायमात्रपदं ॥ शुक्तिरूप्येति ॥ तत्प्रतियोगिकात्मधर्मिकभेदवदित्यर्थः । अत्रसामान्यंपक्षःविशेषोदृष्टांतइत्यवधेयं । मिथ्यात्वंपंचधानिर्व कुंसंभावितप्रकारानाशंक्यस्वयमेवदूषयति ॥ मिथ्यात्वंचयद्यपीतिं ॥ यद्यपीत्यस्यव्यवहितेनाग्रेतनेनतथापीत्यनेनसंबंधः ॥ अपसिद्धांतादिति ॥ मिथ्यात्ववादिभिरस्माभिःप्रपंचस्यासद्वैलक्षण्यांगीकारा(दत्यंतासत्वसाधनेतत्ववादिभिरपसिद्धांतउ

SGDF Foundation

२ हेतुप्रतियोगिकाभावेनेत्यर्थः । तस्य हेतुपर्यवसितत्वात् । १ निर्धर्मकत्वस्येति शेषः ।
३ हेतुना सत्त्वानधिकरणत्वाभावरूपसाध्यस्य आहतिः । निर्धर्मकत्वादित्युच्यमाने एव साध्यधर्मांगीकारात् ।

न्यायामृ० द्व्याव्येतेत्यर्थः)दित्यर्थः ॥ अप्रसिद्धेरिति ॥ सत्यत्ववादिनानिर्वाच्यवस्त्वनंगीकारेण(अस्माभिरेतादृश)मयैतादृशमिथ्यात्वसा श्रीनिवा०

॥ १४ ॥ धनेऽप्रसिद्धविशेषणतांमांप्रतिदद्यादित्यर्थः । एवमेवोत्तरत्रापिद्रष्टव्यं ॥ निर्धर्मकत्वरूपहेतोरिति ॥ ब्रह्मसत्त्वानधिकरणंन मिथ्यात्व०

भवतिनिर्धर्मकत्वादित्यत्रनिर्धर्मकत्वरूपहेतोःपक्षेसत्त्वेनिर्धर्मकत्वरूपधर्मस्यैवप्राप्त्यानिर्धर्मकत्वहेतुनाव्याघातः । निर्धर्मकत्वस्यप

क्षेऽभावेसधर्मकत्वस्यैवप्राप्त्यानिर्धर्मकत्वहेतुनाव्याघातः । एवंसत्त्वानधिकरणत्वाभावरूपसाध्यस्यपक्षेसत्त्वेतादृशसाध्यरूपधर्म १।१

अप्रसिद्धेः । नापिसद्विविक्तत्वं सतोपिसदंतरविविक्तत्वात् । नापिसत्वानधिकरणत्वं निर्धर्मकेब्र 26

ह्मण्यपिसत्वात् । नचनिर्धर्मकत्वादेवतत्रसत्वानधिकरणत्वमपिनेतिवाच्यं । निर्धर्मकत्वरूपहेतोः

सत्वानधिकरणत्वाभावरूपसाध्यस्यचभावाभावाभ्यांव्याघातेनाभावरूपधर्मनिषेधायोगात् । अ

न्यथाऽसत्वानधिकरणत्वस्यापितत्राभावेनतद्व्यावृत्त्यर्थमनिर्वाच्यलक्षणेसत्वानधिकरणत्वरूपवि

शेषणायोगात् । नचप्रमित्यविषयत्वंमिथ्यात्वं । ब्रह्मतुवेदांतजन्यवृत्तिव्याप्यमितिवाच्यं ।

स्यैवलाभेननिर्धर्मकत्वहेतुनाव्याघातएव । तादृशसाध्यरूपधर्माभावेसत्त्वानधिकरणत्वरूपधर्मस्यैवप्राप्त्यापुनर्निर्धर्मकत्वहेतुना

व्याघातएवेत्यर्थः ॥ अभावरूपेति ॥ तथाचसत्त्वानधिकरणत्वरूपेऽभावरूपधर्मेब्रह्मण्यंगीकार्येमिथ्यात्वलक्षणमतिव्याप्तमि

त्यर्थः । ब्रह्मण्यभावरूपधर्मानंगीकारेबाधकमाह ॥ अन्यथेति ॥ तत्र ब्रह्मणि । अनिर्वाच्यलक्षणे सदसत्त्वानधिकरणत्वरूपे ॥ १४ ॥

मिथ्यात्वलक्षणे ॥ ब्रह्मत्विति ॥ तथाचवेदांतजन्यवृत्तेःप्रमितित्वान्नब्रह्मण्युक्तलक्षणस्याऽतिव्याप्तिरितिभावः । शुक्तिरूप्या

तरंगिण्यां तु हेतुसत्त्वासत्त्वोभयपक्षे हेतोर्व्याघातः । एवं साध्यसत्त्वासत्त्वपक्षे हेतोर्व्याघात इति आख्यातम्

SGDF
Shri Gangeshwar Digital Foundation

दावसंभवीदंलक्षणमित्याह ॥ शुक्तीति ॥ अनुव्यवसायमिति ॥ शुक्तिरूप्यज्ञानवानहमित्यनुव्यवसायंप्रतीत्यर्थः । ननु साक्षात्प्रमित्यविषयत्वंमिथ्यात्वंविवक्षितं । शुक्तिरूप्यादिकंतुव्यवसायद्वारैवाऽनुव्यवसायरूपप्रमितिविषयः । नसाक्षात् । अतोनासंभवइत्यतआह ॥ साक्षाच्चेति ॥ सत्वप्रकारकेति ॥ बाधकज्ञानरूपप्रमांप्रतिनिषेध्यत्वेनसाक्षाद्विषयत्वादसंभवपरिहारायसत्वप्रकारकेत्युक्तंअनुव्यवसायरूपसत्त्वप्रकारकप्रमांप्रतिव्यवसायद्वाराविषयत्वेनाऽसंभवपरिहारायसाक्षादित्युक्तं ॥ आवश्यकत्वादिति ॥ (आवश्यकत्वादिति । घटादीनांसत्वप्रकारकप्रमांप्रतिसाक्षाद्विषयत्वमस्तिरूप्यादौनास्तीतितावत्सिद्धं ।

शुक्तिरूप्यादेरपिव्यवसायद्वारा अनुव्यवसायंप्रतिसाक्षाच्चबाधकज्ञानंप्रतिमि[illegible]निषेध्यत्वेनविषयत्वात् । सत्वप्रकारकप्रमांप्रतिसाक्षादविषयत्वंचेदावश्यकत्वात्सत्वाभावएवमिथ्यात्वंस्यात् । नापिभ्रांतिविषयत्वं । ब्रह्मणोप्यधिष्ठानत्वेनतद्विषयत्वात् ।

तत्रकिंनियामकमितिपृष्टेघटादौसत्वस्यविद्यमानत्वात्सत्वप्रकारकप्रमांप्रतिसाक्षाद्विषयत्वमस्ति । शुक्तिरूप्यादौतदभावान्नास्तीत्युत्तरंवक्तव्यं। तथाचसत्वप्रकारकप्रमांप्रतिसाक्षादविषयतावच्छेदकतयासत्वाभावस्यावश्यकत्वात्सत्वाभावएवमिथ्यात्वंस्यात्। तथाचनिर्धर्मकेब्रह्मणिअतिव्याप्तिरित्यर्थइतिसांप्रदायिकोर्थइतिपाठांतरंक्वचित्दृश्यते ।) रूप्यादीनांसत्त्वप्रकारकप्रमांप्रतिसाक्षाद्विषयत्वंनास्तीत्यत्रकिंनियामकमितिपृष्टेसाक्षात्सत्वप्रकारकप्रमांप्रतिविषयतावच्छेदकतयासत्त्वस्यघटादौदृष्टत्वाच्छुक्तिरूप्यादौचतदभावादितिसत्त्वाभावस्यावश्यकत्वंवाच्यं । तथाचसत्त्वप्रकारकप्रमांप्रतिसाक्षादविषयत्वप्रयोजकतयासत्त्वाभावस्याऽऽव

SGDF
Sri Gargeshwari Digital Foundation

२८

श्यकत्वात्सत्त्वाभावएवमिथ्यात्वंस्यात् । तथाचनिर्धर्मकेब्रह्मण्यतिव्याप्तिरितिसांप्रदायिकोऽर्थः ॥ भ्रांतिमात्रेति ॥ ब्रह्मतु प्रमांप्रत्यपिविषयइतिभावः ॥ उक्तरीत्येति ॥ व्यवसायद्वारानुव्यवसायंप्रतीत्याद्युक्तरीत्येत्यर्थः । तथाचभ्रांतिमात्रविषयत्वा भावादव्याप्तिरितिभावः । अस्तुतर्ह्यध्यस्तत्वमेवमिथ्यात्वमित्यतआह ॥ विशेषणमात्रस्यचेति ॥ साधकंकारणमितियथाप र्यायःतद्वदित्यर्थः । तथाचात्माश्रयप्रसंगइतिज्ञातव्यं ॥ नापिबाधकज्ञानविषयत्वमिति ॥ नन्वन्यथाविज्ञातस्यसम्यग्वि

भ्रांतिमात्रविषयत्वस्यचोक्तरीत्याशुक्तिरूप्यादावप्यभावात् । अध्यस्ततयाभ्रांतिविषयत्वं चेद्विशेष्यवैयर्थ्यात् । विशेषणमात्रस्यचनिरुच्यमानमिथ्यात्वानतिरेकात् । नापिबाध्यत्वं तद्धिनतावदन्यथाविज्ञातस्यसम्यग्विज्ञातत्वं । मिथ्यात्वक्षणिकत्वादिनाविज्ञातस्यप्रपंचस्यस त्यत्वस्थायित्वादिनाविज्ञातत्वेनसिद्धसाधनात् । नापिबाधकज्ञानविषयत्वं ब्रह्मण्यतिव्याप्तेः ।

ज्ञानविषयत्वबाधकज्ञानविषयत्वयोःकोभेदइतिचेन्न । पूर्व सम्यग्विज्ञानविषयत्वमित्यस्यसम्यग्विज्ञाननिवर्त्यत्वमित्यत्रतात्पर्यं । अत्रबाधकज्ञाननिवर्त्यत्वेतात्पर्यं । तत्रतुज्ञाननिवर्त्यत्वमात्रे । अतएवोत्तरज्ञाननिवर्त्यत्वंपूर्वज्ञानस्यवक्ष्यति । नहितत्पूर्वज्ञानबा धकमितिव्यवह्रियते । अतोनदोषइत्याहुः । अन्येतुब्रह्मण्यतिव्याप्तिरूपंदूषणांतरंवक्तुंपूर्वोक्तमेवाशंक्यनिराकरोति ॥ नापीति ॥ ॥ १५ ॥ तथाचब्रह्मण्यतिव्याप्तेरपिबाधकज्ञानविषयत्वंनलक्षणमित्यपिशब्दान्वयोद्रष्टव्यइत्याहुः ॥ ब्रह्मणीति ॥ अधिष्ठानत्वेनतस्या

SGDF Sri Gargeshwari Digital Foundation

पिबाधकज्ञानविषयत्वादितिभावः । निषेध्यत्वेनबाधकज्ञानविषयत्वंमिथ्यात्वमतोनब्रह्मण्यतिव्याप्तिरित्यभिप्रेत्यनिषेध्यत्वंवि
व्रीयते ॥ नास्तीत्यादिना ॥ मन्मतइति ॥ मिथ्यात्ववादिनोममतेआपणस्थंरूप्यमेवनास्तीत्यादिनिषेधप्रतियोगि । नतुपु
रतःप्रतीयमानंरूप्यं । तत्रप्रातिभासिकसत्वांगीकारेणैवंविधनिषेधायोगात् । एवंविधनिषेधप्रतियोगिचापणस्थंरूप्यमेव । आभा
सस्यप्रसक्त्यानाभासस्यनिषेधइत्यंगीकारात् । तथाचशुक्तिरूप्येऽसंभवइतिभावः ॥ सत्त्वेपीति ॥ यथातत्रज्ञाननिवर्त्यत्वसद्भावेपि
नतत्प्रयुक्तोमिथ्यात्वव्यवहारस्तद्वदितिभावः । तथाचार्थांतरतेतिहृदयं ॥ स्वेति ॥ प्रतियोगीत्यर्थः । मृत्पिंडेव्यावहारिकोघटोस्तिपार

**नापिनास्तिनासीन्नभविष्यतीतिबोध्यमानाभावप्रतियोगित्वेनतद्विषयत्वं । मन्मतेह्यापणस्थरूप्य
स्यैवतत्प्रतियोगित्वात् । नापिज्ञाननिवर्त्यत्वं उत्तरज्ञाननिवर्त्यपूर्वज्ञानादाविवसत्वेप्युपपत्तेः । ना
पिस्वसमानाधिकरणात्यंताभावप्रतियोगित्वंमिथ्यात्वं अव्याप्यवृत्तिसंयोगादेरिवसत्वेप्युपपत्तेः ।**

मार्थिकस्तदत्यंताभावोप्यस्तीत्याशयः । स्वसमानाधिकरणात्यंताभावप्रतियोगित्वोपपादनायाव्याप्यवृत्तीत्युक्तं ॥ सत्त्वेपीति ॥ त
थाचतत्प्रयुक्तोमिथ्यात्वव्यवहारोयथानास्तितद्वदित्यर्थः । अव्याप्यवृत्तित्वानाश्रयेत्यत्यंताभावविशेषणं । अनेनसंयोगादेरिवेत्युक्ता
र्थांतरानवकाशइतिहृदयं । व्याप्यवृत्तित्वाश्रयेत्येवोक्तौगुणकर्माद्यवच्छेदेनसंयोगात्यंताभावस्यापिव्याप्यवृत्तित्वात्पुनःसंयोगादि
कमादायार्थांतरतास्यादतोनञ्द्वयगर्भत्वं । तथाचाधिकरणभेदेनाभावभेदाभावात् । अन्यथाप्रागभावध्वंसयोर्भेदोनस्यात् । तथाचगु

SGDF
Sri Gargeshwari Digital Foundation

णकर्माद्यवच्छेदेनव्याप्यवृत्तिरेवसंयोगात्यंताभावोद्रव्येऽव्याप्यवृत्तिरपिभवतीत्यव्याप्यवृत्तित्वानाश्रयत्वाभावान्नार्थांतरतेतिभावः। ननुद्रव्येव्याप्यवृत्तित्वाल्लक्षणमसंभवीतिचेन्न। सर्वथालक्षणाभावएवासंभवोवाच्यः।नहिससंभवति। विशेषसामान्ययोरुभयोरपिसामान्याभावप्रतियोगित्वेनविरोधित्वाद्यथाकथंचिल्लक्षणसत्त्वेतत्सामान्याभावप्रतीतेरयोगात्। नन्वस्यलक्षणस्यारोपितेसंयोगेमिथ्यात्वेनलक्ष्येऽव्याप्तिः।अनारोपितसंयोगप्रतियोगिकात्यंताभाववदारोपितसंयोगप्रतियोगितात्यंताभावोप्यव्याप्यवृत्तिरेवेत्यव्याप्यवृत्तित्वानाश्रयत्वाभावादुभयोरप्यत्यंताभावयोरेकत्वात्प्रतियोगिभेदेनाभावभेदाभावादितिमंदाशंकानिरासायाह॥आरो

नाप्यव्याप्यवृत्तित्वानाश्रयस्वसमानाधिकरणात्यंताभावप्रतियोगित्वं । आरोपितस्यसंयोगस्याऽत्यंताभावस्तुअनारोपितस्यसंयोगस्यात्यंताभावादन्यएवव्याप्यवृत्तिरितिवाच्यं। शुक्तिरूप्यादौ तदभावादित्युक्तत्वात् । नाप्यविद्यातत्कार्ययोरन्यतरत्वं अनादौजीवब्रह्मविभागादावव्याप्तेः ।

पितस्येति॥अन्यत्वमेवाह॥व्याप्यवृत्तिरिति॥प्रतियोगिभेदेनाभावभेदादारोपितसंयोगस्यकुत्राप्यभावात्तदत्यंताभावोव्याप्यवृत्तिरेवेत्युक्तलक्षणसद्भावाल्लक्ष्येमिथ्याभूतेआरोपितेसंयोगेनाव्याप्तिरितिभावः॥तदभावादिति॥ शुक्तिरूप्यस्यपुरतःप्रतीयमानत्वेनस्वसमानाधिकरणनिषेधायोगादापणस्थस्यरूप्यस्यैवतत्प्रतियोगित्वंआभासस्यप्रसक्त्यानाभासस्यनिषेधइतिपूर्वमुक्तत्वादव्याप्तिरितिभावः॥अनादाविति॥अविद्याकार्यत्वाभावोपपादनायेदंविशेषणं। “जीवईशोविशुद्धाचिद्भेदस्तस्यास्तयोर्द्वयोः।अ

SGDF
Sri Gargeshwari Digital Foundation

आद्यं स्यात्संतपाद्युक्तं ततो विवरणोदितं। चित्सुखीयं चतुर्थं स्यादसमानत्वबोधजम्। इति पंचविधं प्रोक्तं मिथ्यात्वं ध्वान्तनाशनम्॥ लघुचंद्रिकायां

वार्तिक

विद्यातच्चितोर्योगःषडस्माकमनादय"इति(तद्ध)वचनादितिभावः ॥ **परमतइति** ॥ मिथ्यात्वंनिर्वक्तुंमायावादिनोपेक्षयायःपरस्तत्त्ववादीतन्मतइत्यर्थः ॥ **सत्त्वेनेति** ॥ एतावंतंकालंशुक्त्यज्ञानमासीद्रजतज्ञानमासीदित्यनुभवेनाज्ञानादेःसत्यत्वावगमात्तत्कार्यत्वेपिमिथ्यात्वालाभादितिभावः । नन्वनिर्वाच्याविद्याकार्यत्वंमिथ्यात्वंसाध्यतेतच्चनपरेषांसंमतमित्याशंक्यदृष्टांतेसाध्यवैकल्यमाह ॥ **शुक्तिरूप्यादाविति** ॥ ननुशुक्तिरूप्यस्यासत्त्वेननिरुक्तानिर्वाच्यत्वस्यतत्राभावादृष्टांतेसाध्यवैकल्यमितिचेत्त 31

परमतेऽज्ञानस्यतत्कार्यभ्रांत्यादेश्चस(त्य)त्वेनार्थांतरत्वाच्च। शुक्तिरूप्यादावनिर्वाच्याविद्याकार्यत्वस्यप्रतिवाद्यसंमतेश्च । तथापिमिथ्याशब्दोऽनिर्वाच्यवचनइतिपंचपादिकारीत्यासदसत्त्वानधिकरणत्वरूपानिर्वाच्यत्वंमिथ्यात्वं। तत्प्रसिद्धिश्चख्यातिवादेवक्ष्यते ॥ १ ॥ यद्वाबाध्यत्वमनिर्वाच्यत्वं । तच्चशुक्तिरूप्यादिरेवपारमार्थिकत्वाकारेणत्रैकालिकनिषेधप्रतियोगीतिमतेप्रतिपन्नोपाधौत्रैकालिकनिषेधप्रतियोगित्वं । उक्तंहि(च)विवरणे । प्रतिपन्नोपाधावभावप्रतियोगित्वलक्षणस्य

त्राह ॥ **तत्प्रसिद्धिश्चेति** ॥ **वक्ष्यतइति** ॥ सत्त्वासत्त्वेएकधर्मिनिष्ठात्यंताभावप्रतियोगिनी धर्मत्वात् रूपरसवत् । सत्त्वंअसत्त्वानधिकरणनिष्ठंअसत्त्वंवासत्त्वानधिकरणनिष्ठंधर्मत्वाद्रूपरसवदितिसामान्यप्रसिद्धिर्वक्ष्यतइत्यर्थः ॥ **तच्चेति** ॥ बाध्यत्वमित्यर्थः । ननुशुक्तिरूप्यस्यकथंत्रैकालिकनिषेधप्रतियोगित्वं तस्यप्रातिभासिकत्वांगीकारेणनिषेधप्रसक्तेरेवाभावात् । आपणस्थरूप्यस्यैवनिषेध्यत्वादतोसंभवइत्यतआह॥ **पारमार्थिकत्वाकारेणेति** ॥ असद्विलक्षणस्वरूपमंगीकृत्येत्यर्थः ॥ **अभावेति**॥

प्रथमपक्षपरिष्कारकारणं तरंगिण्यां' विशिष्टाभावः विशेष्याभावादपि असत्त्वाभावादपीति

॥यद्वेति॥

SGDF
Sri Gurgeshwari Digital Foundation

त्रैकालिकनिषेधेत्यर्थः ॥ मिथ्यात्वस्येति ॥ शुक्तिरूप्येपिसत्त्वादितिशेषः ॥ तत्त्वमस्यादीति ॥ पूर्वार्धस्यप्रकृतासंगतत्वात्ज्ञाननिवर्त्यत्वरूपमिथ्यात्वपक्षएवायंश्लोकउदाहर्तव्योनात्रेतियद्यपि तथापिअविद्यातत्कार्ययोःकालत्रयवृत्त्यभावप्रतियोगित्वप्रतीत्यात्रैकालिकनिषेधप्रतियोगित्वरूपेमिथ्यात्वेसंमतिर्भवतीतियुक्तंतदुदाहरणमितिध्येयं । ननुप्रतिपन्नोपाधावित्यादेःकोर्थः । प्रतियोग्याधारत्वेनप्रमिताधिकरणनिष्ठात्यंताभावप्रतियोगित्वंवाउतप्रतियोग्यधिकरणत्वेनभ्रांतिप्रतीताधिकरणनिष्ठात्यंताभावप्रतियोगित्वंवेतिविकल्प्याद्यंपराचष्टे ॥ प्रतिपन्नत्वंचेति ॥ विरोधइति ॥ प्रतियोग्याधारत्वेनप्रमितेधिकरणेप्रतियोगिनःत्रै

मिथ्यात्वस्येति । उक्तंचवार्तिके । तत्त्वमस्यादिवाक्यार्थसम्यग्धीजन्ममात्रतः ।
अविद्यासहकार्येणनासीदस्तिभविष्यतीति । प्रतिपन्नत्वंचनप्रमितत्वंयेनविरो
धः । नापिभ्रांतिप्रतिपन्नत्वं । येनसिद्धसाधनं । किंतुप्रतीतत्वमात्रं ।

कालिकनिषेधस्यविरुद्धत्वादितिभावः । द्वितीयमाशंक्यनिराकरोति ॥ नापीति ॥ सिद्धसाधनमिति ॥ प्रतियोग्याधारत्वेनभ्रांत्याप्रतीतेधिकरणेप्रतियोगिनस्त्रैकालिकनिषेधस्येष्टत्वेनसिद्धसाधनमित्यर्थः ॥ प्रतीतत्वमात्रमिति ॥ तथाचप्रतियोग्याधारत्वेनप्रतीयमानाधिकरणनिष्ठात्यंताभावप्रतियोगित्वंविवक्षितमित्यर्थः । ननुतथापिसत्त्ववादिनांतार्किकादीनांमतेसिद्धसाधनता । अत्ररजतत्वमितिसंसर्गारोपेअत्ररजतत्वंनेतिप्रतिषिध्यते । तत्रसंसर्गमात्रमेवाऽसत् । रजतत्वंतुअन्यत्रसत्वात्सत्यमे

32

SGDF
Sri Gargeshwari Digital Foundation

व । तथाचप्रतियोगिभूतरजतत्वाधिकरणतयाप्रतीतशुक्तिलक्षणाधिकरणनिष्ठात्यंताभावप्रतियोगित्वंसत्यभूतेरजतत्वेंगीकृतमेवेतिसिद्धसाधनतेत्याशंक्यविवक्षांतरमाह ॥ **सर्वस्मिंश्चेति** ॥ भ्रांत्याप्रमयावाप्रतिपन्नेसर्वस्मिन्नित्यर्थः । अतएवचशब्दः । तथाचप्रतियोग्याधारत्वेनभ्रांत्याप्रमयावाप्रतीताधिकरणनिष्ठात्यंताभावप्रतियोगित्वस्यविवक्षितत्वान्नसिद्धसाधनावकाशइत्याह ॥ **सत्वपक्षइति** ॥ आरोपितस्यान्यत्रसत्त्वपक्षे । तथाचापणस्थरजतस्यापिरजतत्वाधारतयाप्रमाप्रतिपन्नोपाधित्वेनतत्ररजतत्वप्रतिषेधस्यभवतामसंमतत्वेनभ्रांत्याप्रमयावाप्रतिपन्नेसर्वस्मिन्नप्युपाधौनिषेधप्रतियोगित्वस्यास्मद्विवक्षितस्यरजतत्वेनंगीकारे

सर्वस्मिंश्चप्रतिपन्नोपाधौत्रैकालिकनिषेधप्रतियोगित्वंविवक्षितं । सत्त्वपक्षेरजतत्वंप्रतिपन्नोपाधौशुक्तौनिषिध्यमानमपिरजतेननिषिध्यतइतिनसिद्धसाधनं ॥ २१॥

णनसिद्धसाधनमित्यर्थः । प्रकृतेचभ्रांतिप्रतिपन्नोपाधौपारमार्थिकत्वाकारेणनिषेधप्रतियोगित्वं । प्रमाप्रतिपन्नेमृत्पिंडाद्युपाधावपिपारमार्थिकत्वाकारेणघटादिर्नास्त्येवेतिलक्ष्येलक्षणोपपादनंद्रष्टव्यं । विवादस्तुअनिर्वचनीयवादिनामस्माकंभूषणमेवेतिहृदयं ॥ ननुप्रतिपन्नोपाधिस्थस्त्रैकालिकनिषेधस्तावन्नतात्विकः । अद्वैतहानेः । निरुपाधिकेनसोपाधिकस्यैक्यायोगेनब्रह्मात्मकत्वायोगाच्च । नापिव्यावहारिकः । तत्प्रतियोगिनोप्रातिभासिकस्यप्रपंचस्यपारमार्थिकत्वापातात् । नापिप्रातिभासिकः । तादृशनिषेधप्रतियोगित्वसाधनस्येष्टत्वेनसिद्धसाधनापत्तेः । किंचशुक्तिरूप्यमेवपारमार्थिकत्वाकारेणत्रैकालिकनिषेधप्रतियोगीत्येकंमतं ।

SGDF
Sri Gargeshwari Digital Foundation

शुक्तिरूप्यस्याविद्यकसत्त्वोपेतस्यननिषेधःकिंत्वापणस्थस्यैवाभासस्यप्रसक्त्यानाभासस्यप्रतिषेधइतिमतांतरं । तत्रोक्तलक्षणाभा
वादसंभवइत्यस्वरसादाह ॥ **मतांतरेत्विति** ॥ अत्यंताभावगर्भलक्षणबाध्यत्वस्यशुक्तिरूप्येअसंभवादितिभावः ॥ **अज्ञान
स्येत्यादिना** ॥ अज्ञानस्यज्ञानेननिवृत्तिर्बाधइत्युक्तेऽज्ञानकार्यस्यवियदादेर्बाध्यत्वंनसिद्ध्यतिअतउक्तं ॥ **स्वकार्येणेत्यादि** ॥
तथाप्यतीतस्यबाधोनसिद्ध्येदित्यतउक्तं ॥ **प्रविलीनेनेति** ॥ ननुप्रविलीनस्यकथंज्ञानेननिवृत्तिरितिचेदुच्यते । कार्यात्मनाप्र
विलीनत्वेपितस्यकारणात्मनासत्त्वात् । अतएवकार्याकारेणवर्तमानेनकार्याकारेणप्रविलीनेनकारणात्मनाविद्यमानेनेतिव्याख्ये

**मतांतरेतुबाध्यत्वंज्ञानत्वेनज्ञाननिवर्त्यत्वं । उक्तंहिविवरणे । अज्ञा
नस्यस्वकार्येणवर्तमानेनप्रविलीनेनवासहज्ञानेननिवृत्तिर्बाधइति ।**

यं । ज्ञानत्वेनेतिविशेषणस्यकृत्यंदर्शयति ॥ **अनुमितिमित्यादिना** ॥ यदिज्ञाननिवर्त्यत्वंबाध्यत्वमित्येवोच्येत तर्ह्युत्तरज्ञान
निवर्त्यपूर्वज्ञानादावतिव्याप्तिरतोज्ञानत्वावच्छिन्ननिवर्तकताकज्ञाननिवर्त्यत्वंविवक्षितमित्याशयेनज्ञानत्वेनेत्युक्तं । तथाचनिवर्त
कतावच्छेदकंज्ञानत्वमभिप्रेतं । एवंचपूर्वज्ञाननिवर्तकतावच्छेदकंचोत्तरज्ञानेउत्तरात्मविशेषगुणत्वमेव नज्ञानत्वं । कुतइतिचेत् ।
जानातीच्छतिप्रवर्ततइतिक्रमसद्भावेनयदेच्छयापूर्वज्ञानंनिवर्तते तत्रपूर्वज्ञाननिवर्तकतावच्छेदकंनज्ञानत्वं । निवर्तकतान्यूनदेश
वृत्तित्वात् । तथाउत्तरज्ञाननिवर्त्येपूर्वज्ञानेपिसत्त्वेनाधिकवृत्तित्वाच्च । किंतूत्तरात्मविशेषगुणत्वमेव । तच्चेच्छासाधारणमिती

SGDF
Sri Gargeshwari Digital Foundation

दंप्रमेयंसूचयितुमिच्छादेरितीच्छाग्रहणंकृतमितिद्रष्टव्यं। इच्छादेरित्यादिपदेनभावनासंस्कारग्रहणं।पूर्वज्ञानेनात्मनिभावनासंस्का रोत्पत्त्यनंतरंतन्निवर्तनादितिद्रष्टव्यं।तथाचज्ञानत्वावच्छिन्ननिवर्तकताकज्ञाननिवर्त्यत्वमित्यर्थः । नन्वेकस्यैवज्ञानस्यज्ञानत्वेननपू र्वज्ञाननिवृत्तिहेतुत्वं।किंतूत्तरात्मविशेषगुणत्वेनेत्येतदयुक्तं। एकस्यैवकेनचिद्रूपेणहेतुतायाःकेनचिद्रूपेणाहेतुतायाश्चादर्शनादित्यत उक्तं॥अनुमितिंप्रतीति॥हेतुत्वेपीति॥तस्यसर्वोपलब्धिसाधनत्वादितिभावः॥इंद्रियत्वेनेति ॥ मनसोयद्यनुमितिंप्रतींद्रियत्वे नहेतुत्वं तर्ह्यनुमितेःप्रत्यक्षत्वप्राप्त्यासाक्षात्कारत्वापत्तिः।यथाहुः।“साक्षात्कारिणीचप्रमासैवोच्यते।येंद्रियजे”ति। “इंद्रियत्वेनेंद्रिय

अनुमितिंप्रतिमनसोमनस्त्वेनहेतुत्वेपींद्रियत्वेनाहेतुत्वमत्पूर्वज्ञानादिकंप्रतिउ त्तरस्यज्ञानेच्छादेरुत्तरात्मविशेषगुणत्वेननिवर्तकत्वेपिज्ञानत्वेनानिवर्तकत्वा त् ॥ ३॥ अथवा चित्सुखरीत्यास्वसमानाधिकरणात्यंताभावप्रतियोगित्वंमि थ्यात्वं । संयोगतदत्यंताभावयोरवच्छेदकभेदेनभिन्नाश्रितत्वस्यैवानुभवेन

जन्यज्ञानंप्रत्यक्ष”मितिमणिकृताप्रत्यक्षलक्षणस्योक्तत्वादितिभावः।ननुज्ञाननिवर्त्यत्वंनामज्ञानजन्यध्वंसप्रतियोगित्वं । तथाचशु क्तिज्ञानानंतररूप्यंनास्तीत्येवप्रतीत्यारूप्यंनष्टमित्यप्रतीतेःशुक्तिरूप्यादौसाध्यवैकल्यमित्यस्वरसादाह ॥ अथवेति॥ स्वशब्देनप्र तियोगी । तथाचस्वसमानाधिकरणेत्यस्यप्रतियोग्यधिकरणाधिकरणेत्यर्थोवर्णनीयः । तथाचनसंयोगादिनासिद्धसाधनतेत्याह ॥ संयोगेति ॥ अवच्छेदकभेदेनेति ॥ अग्रेवृक्षःकपिसंयोगीमूलेनेतिप्रतीतेरितिभावः ॥ अयोगादिति ॥ तथाचयदधि

SGDF
Sri Gargeshwari Digital Foundation

करणेसंयोगः तदधिकरणेनतदत्यंताभावइतितदधिकरणाधिकरणकत्वरूपसामानाधिकरण्यायोगादित्यर्थः।अस्मत्पक्षेयदधिकरणे व्यावहारिकःसंयोगः तदधिकरणेपारमार्थिकस्तदत्यंताभावोप्यस्तीतिसत्त्वपक्षइत्युक्तं।ननुतथाप्यापणस्थरूप्यस्यैवतथाभूतात्यंताभावप्रतियोगित्वेनशुक्तिरूप्येतदभावात्साध्यवैकल्यमित्यतआह ॥ शुक्तिरूप्यादेरिति ॥ प्रातिभासिकत्वेनसदपिरूप्यंपारमार्थिकत्वरूपव्यधिकरणधर्मेणस्वाधिकरणाधिकरणकात्यंताभावप्रतियोगीतिनोक्तदोषइतिभावः ॥ तात्त्विकेति ॥ प्रतियोग्य

सत्त्वपक्षेसामानाधिकरण्या(योगात्)भावात् । शुक्तिरूप्यादेरपिपारमार्थिकत्वाकारेणस्वसमानाधिकरणात्यंताभावप्रतियोगित्वाच्च । नचाधिकरणशब्देनतात्त्विकाधिकरणोक्तौसमवायिनिसंयोगिनिवातत्त्वतस्तदधिकरणेतदत्यंताभावायोगेनासंभवः । अधिकरणत्वेनप्रतीतत्व(प्रतीतित्व)मात्रोक्तौ

धिकरणाधिकरणकात्यंताभावेत्यत्रतात्विकप्रतियोग्यधिकरणविवक्षायामित्यर्थः ॥ समवायिनीत्यादि ॥ घटादेःसमवायेन तत्वतोधिकरणंमृत्पिंडादि । संयोगेनाधिकरणंभूतलादि । समवायेनसंयोगेनवासंबंधेनतत्वतोघटादिरूपप्रतियोग्यधिकरणेमृदादौभूतलादौचतदत्यंताभावायोगेनघटादौलक्ष्येलक्षणाभावादसंभवइतिभावः ॥ अधिकरणत्वेनप्रतीतीति ॥ प्रतियोग्यधिकरणत्वेनयत्प्रतीतंतदधिकरणकात्यंताभावविवक्षायामित्यर्थः । तथाचप्रतियोग्यधिकरणत्वंतात्विकंनविवक्षितमित्याशयः । मा

यिमतेशुक्त्यादौप्रातिभासिकरजतस्यसत्त्वान्नतत्रतदत्यंताभावोवक्तुंयुक्तोतउक्तं ॥ अन्यथाख्यातिपक्षइति ॥ शुक्तिरेवात्यंतासद्रजतात्मनाप्रतीयतइत्यभिनवान्यथाख्यातिपक्षेन्यत्रविद्यमानमेवान्यत्रप्रतीयतइत्येवंरूपान्यथाख्यातिपक्षेचेत्यर्थः ॥ स्वेति ॥ प्रतियोगिभूतरजतत्वेत्यर्थः । संसर्गारोपाभिप्रायेणेदं ॥ स्वेति ॥ प्रतियोग्यधिकरणत्वेनप्रतीयमानाधिकरणकात्यंताभावेत्यस्यस्वात्यंताभावाधिकरणएवप्रतीयमानत्वमर्थतयाविवक्षितमित्यर्थः । एतादृशमिथ्यात्वसाधनेतत्त्ववादिनासिद्धसाधनता

चान्यथाख्यातिपक्षेरजतत्वादेःस्वाधिकरणत्वेनप्रतीतशुक्त्या(दौतदत्यं)दावत्यंताभावस्यसत्त्वात्सिद्धसाधनमितिवाच्यं । स्वात्यंताभावाधिकरणएवप्रतीयमानत्वस्यविवक्षितत्वात् । तत्पक्षेचरजतत्वादिकंस्वात्यंताभावानधिकरणेरजतेपिभाति ॥ ४॥ यद्वाऽऽनंदबोधोक्तरीत्यासद्विविक्तत्वंमिथ्यात्वं । तच्चसद्रूपत्वाभावः ।

नाभिधातुंशक्येत्याह ॥ तत्पक्षेचेति ॥ अन्यथाख्यातिवादिनांपक्षइत्यर्थः ॥ रजतेपीति ॥ आपणस्थरजतेपीत्यर्थः । तथा चैवंविवक्षाकरणेन " प्रतिपन्नोपाधौत्रैकालिकनिषेधप्रतियोगित्वंमिथ्यात्व "मितिलक्षणेनपुनरुक्तिरपिपरिहृतेतिद्रष्टव्यं । नन्वेवमत्यंतासत्त्वापत्तिः । नचात्यंतासतःप्रतीयमानत्वमेवनेतिवाच्यं । शशविषाणमितिशब्दाभासादिनातस्यापिप्रतीयमानत्वादित्यस्वरसादाह ॥ यद्वेति ॥ सतोपिसदंतरविविक्तत्वात्सिद्धसाधनमितिचेत्तत्राह ॥ तच्चेति ॥ सद्विविक्तंचेत्यर्थः । ननुतर्हिब्रह्म

SGDF

ण्यतिव्याप्तिः । तस्यसत्ताजातिशून्यत्वेनसद्रूपत्वाभावस्यैवसत्वादित्यतआह ॥ ब्रह्मचेति ॥ सद्रूपमित्यन्वयः । सत्ताजाति
शून्यत्वंनसद्रूपत्वाभावसाधकं । सामान्येव्यभिचारात् । अतःसत्ताजातिशून्यमपिसामान्यंस्वरूपसत्वेनैवयथासदित्युच्यते ।
एवंब्रह्मसत्ताशून्यमपिस्वरूपसत्त्वेनैवसद्रूपमितिसद्रूपत्वाभावाभावान्नातिव्याप्तिरित्यर्थः । एवंसाध्यंनिरुच्यहेतुंनिर्वक्ति ॥ दृ
श्यत्वंचेति ॥ न्यायदीपावलीमायावादिग्रंथविशेषः ॥ दृग्विषयत्वमिति ॥ ज्ञानविषयत्वमित्यर्थः । दृश्यत्वहेतोर्ब्रह्मणि
व्यभिचारंवक्तुंब्रह्मणोदृश्यत्वमुपपादयितुमाह ॥ नन्विति ॥ दृश्यत्वहेतोरन्वयव्यतिरेकित्वादितिभावः । दृश्यत्वानुमानेव्य

ब्रह्मचसत्तारहितमपिसामान्यमिवसद्रूपं ॥ दृश्यत्वंचन्यायदीपावलीरीत्यादृग्विषय
त्वं । ननुयन्नमिथ्यानतदृश्यमितिव्यतिरेकस्याग्रहेसंदिग्धानैकांत्यं । तद्ग्रहश्चनतावद
सति । तत्रसद्विविक्तत्वरूपमिथ्यात्वस्यव्यतिरेकाभावात् । मिथ्यात्वांतरव्यतिरे
कसद्भावेपितत्र(मिथ्यात्व)साध्यव्यतिरेकग्रहार्थंतस्यापिज्ञातव्यत्वेनव्यभिचारात् ।

तिरेकव्याप्तिनिश्चयोस्ति नवा । नेतिपक्षेआह ॥ यन्नमिथ्येति ॥ इति व्याप्तौ व्यतिरेकस्यव्यतिरेकव्याप्तेरग्रहेनिश्चितसा
ध्याभाववतिहेतुसंदेहरूपंसंदिग्धानैकांत्यमित्यर्थः । आद्येआह ॥ तद्ग्रहश्चेति ॥ हेतुसाध्यव्यतिरेकनिश्चयश्चेत्यर्थः । नन्वस
त्येतादृशमिथ्यात्वसत्त्वेपिज्ञाननिवर्त्यत्वादिरूपमिथ्यात्वांतरव्यतिरेकोस्तीतितत्रव्यतिरेकव्याप्तिग्रहःसंभवतीतिचेत्तत्राह ॥ मि
थ्यात्वांतरेति ॥ तस्यापि असतोपि ॥ ज्ञातव्यत्वेनेति ॥ अभावज्ञानेअधिकरणज्ञानस्यकारणत्वादित्यर्थः ॥ व्यभिचा

SGDF
Sri Gargeshwari Digital Foundation

रादिति ॥ यत्रदृश्यत्वंतत्रमिथ्यात्वं । यत्रमिथ्यात्वाभावः तत्रदृश्यत्वाभावइत्यन्वयव्यतिरेकव्याप्त्योरसतिव्यभिचारइत्यर्थः ॥ ब्रह्मापीति ॥ अन्यथामिथ्यात्वव्यतिरेकग्रहासंभवादितिभावः । तथाचतत्रव्यभिचारइतिहृदयं ॥ घटावच्छिन्नस्येति ॥ घटावच्छेदेनेत्यर्थः ॥ व्यतिरेकावच्छिन्नस्येति ॥ मिथ्यात्वव्यतिरेकावच्छेदेनेत्यर्थः ॥ दृश्यत्वादिति ॥ शुद्धस्यचेतिशेषःअयमर्थः । मिथ्यात्वव्यतिरेकग्रहः। शुद्धएवब्रह्मण्यंगीक्रियते । तर्हितत्रदृश्यत्वहेतोर्व्यभिचारइतिनवाच्यं। शुद्धस्यब्रह्मणः स्वरूपेणादृश्यत्वांगीकारान्नव्यभिचारः । तस्यैवमिथ्यात्वव्यतिरेकावच्छेदेनदृश्यत्वोपपत्तेर्व्यतिरेकग्रहस्यापिसंभवात् । नचैवं दृश्यत्वादृश्यत्वेविरुद्धे अदृश्यत्वमेवस्वाभाविकंमिथ्यात्वव्यतिरेकावच्छेदप्रयुक्तंदृश्यत्वंत्वौपाधिकमस्वाभाविकमित्यंगीकारात् ।

ब्रह्मणिमिथ्यात्वव्यतिरेकग्रहे(च)पिब्रह्मापिदृश्यमितिचेन्न । आकाशस्यस्वरूपेणापरिच्छेदे
पिघटावच्छिन्नस्यपरिच्छेदवद्ब्रह्मणःस्वरूपेणादृश्यत्वेपिव्यतिरेकावच्छिन्नस्यदृश्यत्वात् ॥[illegible]॥

स्वाभाविकमेवचदृश्यत्वंहेतुतयाविवक्षितं । अतोनतत्र(हेतुरित्यंगीकारात्नतत्र)व्यभिचारप्रसक्तिः स्वाभाविकत्वास्वाभाविकत्वाभ्यामविरोधेदृष्टांतः ॥ आकाशस्येति ॥ यथैकस्यैवाकाशस्यस्वरूपेणापरिच्छेदेपिघटाद्यवच्छेदेनपरिच्छेदेसत्यपिस्वाभाविकत्वास्वाभाविकत्वाभ्यांनविरोधस्तद्वदित्येवैतद्ग्रंथार्थःसंप्रदायागतः । व्यतिरेकावच्छिन्नस्येत्यस्यव्यतिरेकावच्छेदेनशुद्धस्यैव दृश्यत्वादित्यव्याख्यानेयथास्थितार्थांगीकारेव्यतिरेकावच्छिन्नेविशिष्टेमिथ्यात्वस्यापिसत्त्वेनव्यतिरेकव्याप्तिग्रहायोगः । शुद्धेच तद्ग्रहेतस्यदृश्यत्वावश्यंभावेनव्यभिचारइतिग्रंथोऽसंगतएवस्यादितिद्रष्टव्यं । एवमेव "व्यतिरेकावच्छिन्नस्यस्यादेवदृश्यतेतिचे

SGDF
Sri Garge[illegible]i Digital Foundation

दि" तिमिथ्यात्वानुमानखंडनटीकावाक्योपपादनमपिद्रष्टव्यं । प्रमाणमालापिमायावादिग्रंथविशेषः ॥ स्वव्यवहारइति ॥
स्फुरणरूपनित्यसिद्धात्मस्वरूपव्यवहारेस्वाख्यसंविदपेक्षानियतेतिव्यभिचारइत्यतःस्वातिरेकीत्युक्तं । कदाचित्तस्यैवाद्वितीयं
ब्रह्मेत्याद्यद्वितीयत्वादिविशिष्टव्यवहारेविशेषणोपनायकैकमेवाद्वितीयमित्यादिवाक्यजन्यवृत्तिसापेक्षतास्तीतिनियतिग्रहणं । त
थाचाद्वितीयत्वादिव्यवहारेतदपेक्षायामपिस्फुरणरूपात्मव्यवहारेतदपेक्षाभावान्ननियतिरितितत्रदृश्यत्वाभावान्नव्यभिचारइत्य
र्थः । ज्ञानविषयत्वेपीत्युक्त्याव्यतिरेकग्रहोपपादनं । नोक्तरूपंदृश्यत्वमित्यनेनैतादृशस्यदृश्यत्वस्यैवहेतुतयाविवक्षितत्वान्नव्य

यद्वाप्रमाणमालारीत्यास्वव्यवहारेस्वातिरेकिसंवि(त्सा)दपेक्षानियतिर्दृश्यत्वं । तथा
चात्मनोज्ञानविषयत्वेपिनोक्तरूपंदृश्यत्वं । अस्वप्रकाशत्वंवादृश्यत्वं । स्वप्रकाश
त्वंचफलाव्याप्यत्वेसत्यपरोक्षव्यवहारयोग्यत्वं । फलंचवृत्तिप्रति(बिंबित)फलित

भिचारइत्युक्तंभवति ॥ फलेति ॥ धर्मादावतिव्याप्तिवारणायविशेष्यं । घटादौतद्वारणायविशेषणमितिद्रष्टव्यं ॥ व्यवहार
योग्यत्वमिति ॥ व्यवहारविषयत्वयोग्यत्वमित्यर्थः ॥ वृत्तीति ॥ अंतःकरणवृत्तीत्यर्थः । अत्रयोग्यतापदंकिमर्थमितिचेत् ।
उच्यते । यदुक्तंघटादौविशेष्यसद्भावेपिविशेषणाभावेनविशिष्टाभावइति तदयुक्तं । घटादिज्ञानानंतरंकदाचिन्मनसोविषयांत
रसंचाररूपव्यासंगेनव्यवहारोनजातस्तत्रापरोक्षव्यवहारविषयत्वस्यफलोपधानस्याभावादुभयाभावप्रयुक्तएवविशिष्टाभावःकिंन

स्यादित्याशंकापरिहारायययोग्यत्वमित्युक्तं । सहकारिविरहप्रयुक्तकार्याभावोयोग्यतावनस्थदंडादौयथादृष्टातद्वदिहापिज्ञानेनव्य
वहारेजननीयेव्यासंगाभावःसहकारीति तदभावाद्व्यवहारोनभवति । तत्सद्भावेतुभवत्येवेत्येवंव्यासंगदशायामपिअपरोक्षव्यव
हारविषयत्वयोग्यत्वरूपविशेष्यसद्भावेनविशेषणाभावेनैवविशिष्टाभावोवक्तव्योनतूभयाभावेनेतिसूचयितुंयोग्यत्वमित्युक्तमित्य
वगंतव्यं ॥ चैतन्यमिति ॥ तथाचब्रह्मणःप्रकाशरूपत्वेनप्रकाशरूपेप्रकाशांतरानुदयाच्चैतन्यरूपफलाव्याप्यत्वमस्ति स्फुरण
रूपत्वेनापरोक्षव्यवहारयोग्यत्वमप्यस्तीत्यवगंतव्यं । दृष्टांतेशुक्तिरूप्येचेदंदृश्यत्वमस्ति । प्रातिभासिकरूप्याकाराऽविद्यावृत्तिरे

चैतन्यं । स्वप्रकाशत्वाभावश्च(प)घटादौविशेषणाभावेनधर्मादौविशेष्याभावेने
तिविशिष्टाभावोनुगतः । अस्मिंश्चपक्षेजडत्वमसंविद्रूपत्वमित्यसंकरः ॥ [illegible] ॥

वनांतःकरणवृत्तिः । अतोंतःकरणवृत्तिप्रतिबिंबितचैतन्यरूपफलाव्याप्यत्वसत्त्वेपिअपरोक्षव्यवहारयोग्यत्वरूपविशेष्याभावा
द्विशिष्टाभावोनुगतोद्रष्टव्यः । अपरोक्षव्यवहारायोग्येपितत्र तद्व्यवहारस्तुअधिष्ठानभूतसाक्षिचैतन्यगतंयदापरोक्ष्यंतदध्यासा
द्युक्तः । इदमितिव्यवहारायोग्येपितस्मिन्नधिष्ठानगतेदंतारोपादिदमितिव्यवहारवदित्यग्रेस्पष्टं । ननुजडत्वमप्यस्वप्रकाशत्वमे
व । तथाचदृश्यत्वजडत्वहेत्वोःसांकर्यमित्यतआह ॥ अस्मिंश्चपक्षइति ॥ अस्वप्रकाशत्वंदृश्यत्वमितिपक्षइत्यर्थः ॥ असंवि
द्रूपत्वमिति ॥ अचिद्रूपत्वमित्यर्थः । इदंचपक्षैकदेशेवृत्तिज्ञानेप्यस्तीतिनभागासिद्धिरितिभावः । ज्ञानरूपत्वाभावइतिव्या

SGDF Foundation

ख्यानंतुवृत्तिज्ञानेभागासिद्धिप्रसंगाच्चिंत्यं ॥ प्रत्यक्षेति ॥ जगत्सत्यताग्राहिसन्घटइत्यादिप्रत्यंक्षेत्यर्थः ॥ अमुख्यार्थेति ॥ समाननिषेधादिपरेत्यर्थः । ननुप्रत्यक्षमपित्रिकालाबाध्यत्वरूपपारमार्थिकसत्त्वमेवगृह्णातीतिग्राह्याभावावगाहित्वेनसमानविषय कत्वाद्युक्तंबाधकत्वमित्यतआह ॥ नहीति ॥ वर्तमानमात्रग्राहि वर्तमानकालाबाध्यत्वग्राहि । नन्वेवंभिन्नविषयतयाऽनुमान स्यप्रत्यक्षविरोधाभावोपपादनेकालात्ययापदिष्टमात्रोच्छेदः । प्रत्यक्षेणव्यावहारिकौष्ण्यग्रहात्अनुमानेनपुनःपारमार्थिकौष्ण्य

श्रुतिश्चात्रप्रमाणं । "एकमेवाद्वितीय "मित्यादौअद्वितीयमित्यादिशब्दैर्द्वितीयमात्रनिषेधात्। नचप्रत्यक्षबाधादनुमानममानंश्रुतिश्चामुख्यार्थेतियुक्तं प्रत्यक्षेणव्यावहारिकसत्वग्रहात्। अनुमानादिभिश्चपारमार्थिकसत्त्वनिषेधात् । नहिवर्तमानमात्रग्राहिप्रत्यक्षंत्रिकालाबाध्यत्वग्राहि । वह्निरनुष्णइत्यत्रतुउष्णत्वस्यप्रत्यक्षसिद्धव्यावहारिकसत्त्वप्रतिषेधाद्बाधः। दृश्यतेचनभोनैल्यचंद्रप्रादेशत्वग्राहिप्रत्यक्षयोरनुमानागमाभ्यांबाधइति । उच्यते ।

निषेधेनभिन्नविषयतायाःतत्रापिवक्तुंशक्यत्वादित्यतआह ॥ वह्निरिति ॥ उष्णत्वस्यप्रत्यक्षसिद्धंयद्व्यावहारिकंसत्त्वंतस्यैववह्निरनुष्णइत्यनुमानेननिषेधात्साक्षाद्ग्राह्याभावावगाहित्वेनयुक्तस्तत्रबाध्यबाधकभावइतिनबाधोच्छेदइतिभावः । किंचापौरुषेयत्वे नानाशंकितदोषायाःएकमेवेत्यादिश्रुतेः तदनुगृहीतास्मदनुमानस्यचसंभावितदोषप्रत्यक्षापेक्षयाप्राबल्यात्प्रत्यक्षगृहीतमपिसत्य त्वमनुमानागमाभ्यामेवबाध्यतइत्याशयेनप्रत्यक्षस्याऽनुमानादिबाध्यत्वंदृष्टमित्याह ॥ दृश्यतेचेति ॥ नीलंनभइतिप्रत्यक्षं न

SGDF
Sri Gargeshwari Digital Foundation

भोननीलंविभुत्वादित्यनुमानेनबाध्यंदृष्टं । तथा प्रादेशमात्रपरिमितश्चंद्रमाइतिप्रत्यक्षं "अष्टाशीतिसहस्राणी" त्याद्यागमबाध्यं दृष्टमितिप्रकृतेपितथास्त्विवतिभावः ॥ ७ ॥ पक्षांतरानिषेधेनेति ॥ यद्यपीत्यादिग्रंथसंदर्भेणेत्यर्थः ॥ पंचधेति ॥ तथापीत्यादिग्रंथेन सदसत्त्वानधिंकरणत्वं सर्वस्मिन्प्रतिपन्नोपाधौत्रैकालिकनिषेधप्रतियोगित्वंवा ज्ञानत्वेनज्ञाँननिवर्त्यत्वंवा स्वात्यंताभावाधिकरणएवप्रतीयँमानत्वंवा सद्रूपत्वाभावोवेतिपंचप्रकारेणनिरुक्तमित्यर्थः । सदसत्त्वेत्यत्रसच्चतदसच्चेतिकर्मधारयाभिप्राये ५३

मिथ्यात्त्वंहित्त्वयैवपक्षांतरनिषेधेनपंचधानिरुक्तं । तत्राद्येकिंसत्वेसत्यसत्त्वरूप विशिष्टस्याभावोभिप्रेतः । किंवासत्त्वात्यंताभावासत्त्वात्यंताभावरूपधर्मद्वयं । यद्वासत्त्वात्यंताभाववत्त्वेसतिअसत्त्वात्यंताभाववत्त्वरूपंविशिष्टं । नाद्यः । मन्मतेसदेकस्वभावेजगतितस्यसिद्धत्त्वात् । नद्वितीयः । व्याहतेः ।

णाह ॥ सत्त्वेसतीति ॥ सच्चासच्चसदसतीतयोर्भावःसदसत्त्वं द्वंद्वांतेश्रूयमाणस्त्वप्रत्ययोनधिकरणपदंचप्रत्येकंसंबध्यते । तथाचसत्त्वानधिकरणत्वमसत्त्वानधिकरणत्वंचेतिधर्मद्वयंसाध्यमित्याशयेनाह ॥ किंवेति ॥ तस्येति ॥ सत्त्वेसत्यसत्त्वरूप विशिष्टाभावस्येत्यर्थः ॥ व्याहतेरिति ॥ परस्परविरुद्धयोरन्यतरनिषेधस्यान्यतरविधिनांतरीयकत्वात्सत्वात्यंताभावेसाध्येऽसत्त्वस्यैवप्राप्त्यापुनस्तदत्यंताभावेसाध्येव्याहतिः । एवमसत्त्वात्यंताभावेसाध्येसत्त्वस्यैवप्राप्त्यापुनस्तदत्यंताभावसाधनेव्याहति

SGDF
Sri Gargeshwari Digital Foundation

रित्यर्थः । ननुकथंव्याहतिःसत्त्वासत्त्वयोःपरस्परप्रागभावादिरूपतयापरस्परविरहरूपत्वासंभवेनात्यंताभावरूपतयैवपरस्परविर
हरूपतावाच्या । तथाचसत्त्वात्यंताभावःकथमसत्त्वं । सिद्धांतेअत्यंताभावस्याप्रामाणिकप्रतियोगिकत्वस्वीकारेणसत्त्वस्यप्रामा
णिकत्वात् । तथाअसत्त्वस्यापितुच्छेप्रामाणिकत्वेनतदत्यंताभावासंभवेनासत्त्वात्यंताभावएवसत्त्वमित्यस्याप्ययोगात् । नचता
र्किकादिमतेप्रामाणिकस्याप्यत्यंताभावप्रतियोगित्वस्वीकारात्तन्मतेनतयोःपरस्परविरहरूपत्वाभिधानमितिवाच्यं । सिद्धांतेप्य
सत्त्वाभावएवसत्त्वंसत्त्वाभावएवासत्त्वमितिस्वीकारात् । यद्वक्ष्यति । “ मयालाघवादावश्यकत्वादसत्त्वाभावएवसत्त्वंतदभाव
एवासत्त्वमितिस्वीकारा ”दिति । तथाचप्रामाणिकस्यात्यंताभावासंभवेनअसतिकिंचिदारोपितंसत्त्वमस्तितदत्यंताभावएवास
त्त्वं । सतिचारोपितंकिंचिदसत्त्वमस्तितदत्यंताभावएवसत्त्वमितिवाच्यं । आरोपितयोश्चासत्त्वेनात्यंताभावप्रतियोगित्वसंभ
वात् । एवंचारोपितसत्त्वाद्यभावस्यैवासत्त्वादित्वेआरोपितसत्त्वासत्त्वयोरेवव्याहतिप्राप्त्यावास्तवसत्त्वासत्त्वयोःकथंव्याघातः ।
तस्मादेतत्कथमितिचेदत्रवदंति । सत्त्वासत्त्वयोःपरस्परविरहरूपत्वोक्तेःपरस्परविरहव्यापकत्वेतात्पर्यं । तथाचयत्रारोपितसत्त्वा
त्यंताभावःतत्रासत्त्वं । यत्रारोपितासत्त्वात्यंताभावस्तत्रसत्त्वमितिव्याप्तेः । नचघटेवास्तवसत्त्वसद्भावेनारोपितसत्त्वात्यंताभा
वस्यसत्त्वेप्यसत्त्वाभावात् । एवंतुच्छेवास्तवासत्त्वसत्त्वेनारोपितासत्त्वात्यंताभावसद्भावेपिसत्त्वाभावाद्व्यभिचारः । तथाचकथं
परस्परविरहव्यापकत्वमपीतिवाच्यं । अत्यंताभावस्यप्रतियोग्यारोपपूर्वकत्वाद्यथाप्रतियोगिनासहविरोधः तथाप्रतियोग्यारोपे
यत्प्रधानंतेनापिविरोधस्यांगीकार्यत्वात् । एवंचात्रात्यंताभावेप्रतियोगिभूतंयदारोपितंसत्त्वंतत्रयत्प्रधानंवास्तवंसत्त्वंतेनसममत्यं

ताभावस्यविरोधात् । घटेचप्रधानभूतवास्तवसत्त्वसद्भावेनतत्रारोपितसत्त्वात्यंताभावस्यवक्तुमशक्यत्वात् । एवंतुच्छेअसत्वारोप
प्रधानभूतवास्तवासत्वसद्भावेनारोपितासत्त्वात्यंताभावस्यवक्तुमशक्यत्वात् । एवंचनव्यभिचारः । तथाचपरस्परविरहव्यापक
त्वेनविरोधोयुक्तइति । नन्वथापिप्रधानभूतंवास्तवंसत्त्वंघटेस्ति तत्रारोपितसत्त्वात्यंताभावोप्यस्ति । तुच्छेप्रधानभूतवास्तवास
त्त्वमस्ति आरोपितसत्त्वात्यंताभावोप्यस्तीतिकथंप्रतियोग्यारोपेप्रधानेनापिविरोधइतिचेदुच्यते । यत्रप्रधानंवास्तवंसत्त्वंतत्रारो
पितसत्त्वात्यंताभावोनास्तीत्यस्यप्रतियोग्यधिकरणसंसर्गारोपपूर्वकप्रतीतिविषयाभावोनास्तीत्यर्थकरणात् । यत्रघटेप्रधानभूतं
वास्तवंसत्त्वमस्तितत्रसत्त्वमारोप्यननिषिध्यते । एवंयत्रतुच्छेप्रधानभूतंवास्तवासत्त्वमस्ति तत्रासत्त्वमारोप्यननिषिध्यतइतिकृ
त्वाअसत्त्वारोपपूर्वकप्रतीतिविषयाभावरूपारोपितासत्त्वात्यंताभावोनास्तीतियुक्तःपरस्परविरहव्यापकत्वेनविरोधइति । एवमे
वदोषात्यंताभावरूपभगवल्लक्षणंनसंभवति । दोषाणांप्रामाणिकत्वेनतदत्यंताभावायोगादितिशंकितेआरोपितदोषात्यंताभावस्य
लक्षणत्वंवाच्यं । ननुतर्हिंजीवेतिव्याप्तिरितिचेन्न । तत्राप्यत्यंताभावस्यप्रतियोग्यारोपप्रधानेनविरोधात् । दोषाणामारोपेप्रधा
नभूतानांवास्तवदोषाणांजीवेसत्त्वेनतत्रदोषानारोप्यनिषेधःकर्तुंनशक्यते । तथाचप्रतियोग्यधिकरणसंसर्गारोपपूर्वकप्रतीतिवि
षयाभावाख्यारोपितदोषात्यंताभावोजीवेनास्ति । अस्तिचभगवति । भगवतिआरो(प्यदोषा)पितादोषानसंतीतिनिषेधःकर्तुंश
क्यत्वात् । अत्यंताभावस्यप्रतियोग्यारोपप्रधानेनविरोधात् । दोषारोपप्रधानभूतवास्तवदोषाणांचभगवत्यभावेननिषेधसंभवे
नदोषाभावादितिद्रष्टव्यं । सत्त्वात्यंताभावोपपादनायनिर्धर्मकेत्युक्तं । सत्त्वराहित्यस्यसद्रूपत्वानुपमर्दकत्वादितिभावः । किंच

SCDF Foundation

सत्त्वात्यंताभावासत्त्वात्यंताभावरूपधर्मद्वयस्यैकस्मिन्नधिकरणेकुत्राप्यप्रसिद्ध्याप्रसिद्धविशेषणत्वं । ननुपृथिवीतरभिन्नेत्यत्र जलादित्रयोदशान्योन्याभावानामैकाधिकरण्येनाप्रसिद्धावपितेजःप्रभृतिषुप्रत्येकंप्रत्येकंप्रसिद्ध्याऽप्रसिद्धिपरिहारवदत्रापिसत्त्वात्यंताभावासत्त्वात्यंताभावयोरैकाधिकरण्येनाप्रसिद्धावपिसतिअसत्त्वात्यंताभावस्यासतिचसत्त्वात्यंताभावस्यचप्रत्येकंप्रसिद्ध्याऽप्रसिद्धविशेषणत्वाभावादितिचेत्सत्यं । अप्रसिद्धविशेषणत्वाभावेपिअसत्त्वात्यंताभावरूपांशस्यसिद्धत्वेनसिद्धसाधनतास्यादि

निर्धर्मकब्रह्मवत्सत्त्वराहित्येपिसद्रूपत्वेनाऽमिथ्यात्त्वोपपत्यार्थांतराच्चपृथिवीइत
रभिन्नापृथिवीत्त्वादित्यत्रत्रयोदशान्योन्याभावानामिवात्रापिसत्वासत्त्वात्यंता
भावयोःप्रत्येकंप्रसिद्धत्वेनकथंचिदप्रसिद्धविशेषणत्त्वाभावेपिअसत्त्वात्यंताभा
वांशेसिद्धसाधनाच्च । नहिसिद्धमसिद्धेनसहोच्चरित(च्यमान)मसिद्धंभवति ।

त्याह ॥ पृथिवीत्यादिना ॥ अभावमनंतर्भाव्यत्रयोदशत्वंबोध्यं ॥ प्रत्येकमिति ॥ सतिअसतिचेत्यर्थः । ऐकाधिकरण्यावच्छेदेनसाध्यसिद्धेरुद्देश्यत्वेनात्रऐकाधिकरण्यावच्छेदेनसाध्यप्रसिद्धेरभावादप्रसिद्धविशेषणतास्यादेवेत्याशयेनकथंचिदित्युक्तं । ननुकेवलस्यासत्त्वात्यंताभावस्यसिद्धत्वेपिअसिद्धेनसत्त्वात्यंताभावेनसहोच्यमानत्वादसिद्धत्वमेवेतिनांशेसिद्धसाधनतेत्यतआह ॥ नहीति ॥ तथात्वेपर्वतोवह्निमान्पाषाणवांश्चेत्यत्रापिसिद्धसाधनतानोद्भाव्येतेतिभावः । नन्वेवंपृथिवीतरभिन्नेत्यत्रापिजला

SGDF
Sri Gargeshwari Digital Foundation

दित्रयोदशान्योन्याभावानांसाध्यत्वात्‌जलाद्येकैकान्योन्याभावानामपिघटोनजलादिरितिप्रतीत्याघटत्वावच्छेदेनसिद्धत्वादंशे
सिद्धसाधनतापत्तिरित्यनुमानंदुष्टंस्यादित्यतआह ॥ पृथिवीति ॥ जलाद्येकैकान्योन्याभावस्यघटेघटत्वावच्छेदेनसिद्धावपि
पक्षतावच्छेदकीभूतपृथिवीत्वावच्छेदेनघटेनसिद्धिरतोनांशेसिद्धसाधनतेत्यर्थः । पक्षतावच्छेदकसामानाधिकरण्येनैवसाध्यसि
द्धेरुद्देश्यत्वात्तस्याश्चाजातत्वादितिभावः । पृथिवीत्वोपहिते घटेइतिशेषः । प्रकृतेचपक्षतावच्छेदकसामानाधिकरण्येनैवासद्वै
लक्षण्यस्यसिद्धत्वात्सिद्धसाधनतेतिद्रष्टव्यं ॥ दृष्टांतस्येति ॥ धर्मद्वयस्यसाध्यत्वान्मन्मतेशुक्तिरूप्येसत्त्वात्यंताभावस्यसत्त्वे

पृथिवीतरभिन्नेत्यत्रतुजलाद्येकैकान्योन्याभावोपिनपृथिवीत्वोपहितेसिद्धः[1]।दृष्टांतस्यसाध्यवैकल्या
च्च।पृथिवीत्वहेतुस्तुकेवलव्यतिरेकी।त्रयोदशान्योन्याभावरूपसाध्यस्यव्यतिरेकनिरूपणंतुभिन्नाश्रि
तानामपित्रयोदशान्योन्याभावानांसमूहालंबनैकज्ञानोपारूढत्वमात्रेणयुक्तं । अतएवनतृतीयः ।

प्यसत्त्वस्यैवसत्त्वेनतदत्यंताभावस्यतत्राभावात्साध्यवैकल्यमित्यर्थः । नन्वेवंतर्हिंपृथिवीतरभिन्नेत्यत्रापित्रयोदशभेदानांसाध्य
त्वाज्जलादौतेजःप्रभृतिद्वादशभेदानांसत्त्वेपिजलभेदस्याभावात्साध्यवैकल्यं । एवंतेजःप्रभृतिष्वपिस्वस्वेतरप्रतियोगिकद्वादशभे
दसत्त्वेपिस्वस्वभेदाभावात्साध्यवैकल्यमेवस्यादित्यतआह ॥ पृथिवीत्वेति ॥ यत्रेतरत्वंतत्रपृथिवीत्वाभावइतिव्यतिरेकेजलादि
र्दृष्टांतइतिभावः । ननुपृथिवीत्वहेतौव्यतिरेकिणिदृष्टांताभावेत्रयोदशान्योन्याभावानांसाध्यभूतानांप्रसिद्ध्यभावेनसाध्यव्यतिरे
न्या. श्री. ५ कनिरूपणंनस्यादित्यतआह ॥ त्रयोदशेति ॥ जलादित्रयोदशान्योन्याभावानांतेजःप्रभृतिषुप्रत्येकंप्रत्येकंज्ञानानंतरंएतेत्रयो

1 घटादिभिन्नपृथिवीत्वोपहिते इत्यर्थः अन्यथा बाधापातात् ।

SGDF
Sri Gargeshwari Digital Foundation

दशान्योन्याभावाइतिसमूहालंबनरूपैकज्ञानोपरूढानांप्रसिद्धिसंभवेनव्यतिरेकनिरूपणंसंभवतीतिभावः । पूर्वंधर्मद्वयसाधन
पक्षेव्याहत्यर्थांतरांशेसिद्धसाधनसाध्यवैकल्याख्यदोषचतुष्टयस्योक्तत्वेनात्रातएवेत्यतिदेशेदोषचतुष्टयस्याप्यतिदेशःप्रतीयतेतः
अतएवेत्युक्तंविशदयति ॥ व्याहतेरित्यादिना ॥ धर्मद्वयसाधनइवविशिष्टसाधनेपिपरस्परविरुद्धयोर्विशेषणविशेष्यभावायो
गाद्व्याहतिरेव । निर्धर्मकब्रह्मवत्सत्त्वात्यंताभाववत्त्वेसत्यपिसद्रूपत्वेनाप्युपपत्त्याऽर्थांतराच्छुक्तिरूप्येविशेष्यांशाभावेनविशिष्टा
भावात्साध्यवैकल्यंचेत्यर्थः विशिष्टसाधनपक्षेंशेसिद्धसाधनातिदेशःकुतोनक्रियतइतिशंकायामस्मिन्पक्षेंशेसिद्धसाधनस्यानवका

**व्याहतेरर्थांतरा(त्दृष्टांते)त्साध्यवैकल्याच्च । किंचयथाअनित्येवाङ्मनसेइत्यत्रपक्षतावच्छे
दकनानात्वेनांशेसिद्धसाधनत्वेपिपृथिवीतरभिन्नेत्यत्रपक्षतावच्छेदकैक्यान्नां(शतः)शेसिद्धसाध
नं तथेहापियद्यपिकथंचित्साध्यतावच्छेदकैक्यान्नांशेसिद्धसाधनत्वं । नापिव्यर्थविशेष्यत्वं ।**

शंवदंस्तथाव्यर्थविशेष्य(त्वाख्यं)त्वरूपंदोषांतरंचनास्तीतिवदन्नप्रसिद्धविशेषण(त्वरूपं)त्वाख्यंदोषांतरमाह ॥ **किंचेत्यादिना** ॥
किंचाप्रसिद्धविशेषणत्वमित्यन्वयः ॥ **पक्षतावच्छेदकनानात्वेनेति** ॥ तथाचवाक्त्वावच्छेदेनानित्यत्वस्यसिद्धत्वादितिभा
वः ॥ **पक्षतावच्छेदकैक्यादिति** ॥ पक्षतावच्छेदकैक्येहिपक्षतावच्छेदकसामानाधिकरण्येनसाध्यस्यसिद्धत्वात्संपूर्णसिद्धसा
धनमेव नांशतःसिद्धसाधनं । पृथिवीतरभिन्नेत्यत्रतुपृथिवीत्वरूपपक्षतावच्छेदकसामानाधिकरण्येनसाध्यसिद्धिरूपोद्देश्यप्रती
तेरसिद्धत्वेनांशेसिद्धसाधनानवकाशादित्यर्थः ॥ **साध्यतावच्छेदकेति** ॥ पक्षतावच्छेदकनानात्वएवांशेसिद्धसाधनवत्साध्य

तावच्छेदकनानात्वएवांशेसिद्धसाधनता । अतएवधर्मद्वयसाधनपक्षेंशेसिद्धसाधनतोक्ता । पक्षतावच्छेदकैक्येंशेसिद्धसाधनत्वा
भाववत्साध्यतावच्छेदकैक्येपिनांशेसिद्धसाधनं । एवंचप्रकृतेविशिष्टस्यैकस्यसाध्यत्वेनसाध्यतावच्छेदकैक्येनतदवच्छिन्नसाध्य
स्याऽसिद्धत्वान्नांशेसिद्धसाधनावकाशइत्यर्थः । विशिष्टंविशेषणाद्यात्मकमितिपक्षेसाध्यतावच्छेदकैक्यंनास्त्येवेत्याशयेनकथंचि
दित्युक्तं । कुतोनव्यर्थविशेष्यत्वमित्यतोव्यापकगतविशेषणानामुद्देश्यप्रतीतिसिद्ध्यर्थत्वस्यदर्शनादित्याह ॥ **विमतमित्यादि
ना** ॥ **चिकीर्षादेरिवेति** ॥ चिकीर्षापरोक्षज्ञप्तिविशिष्टेश्वरसिद्धेरुद्देश्यत्वादित्यर्थः । समानाधिकृतत्वात् । शुक्लःपटइत्येक

**विमतंउपादानापरोक्षज्ञप्तिचिकीर्षाकृतिमज्जन्यमित्यत्रकृतिग्रहणेनैवेश्वरासिद्धावपिचिकीर्षादेरिव
गुणादिकंगुण्यादिनाभिन्नाभिन्नं समानाधिकृतत्वादित्यत्रतार्किकांगीकृतभिन्नत्वस्येवचव्यापकवि
शेषणानामुद्देश्यप्रतीत्यर्थत्वात् । इह(च)तुसद्विलक्षणत्वेसत्यसद्विलक्षणमितिप्रतीतेरुद्देश्यत्वात् ।**

विभक्त्यंतपदवाच्यत्वादितिव्याख्यानंचिंत्यं।घटःकलशइत्यादौव्यभिचारापत्तेर्यदिचेत्युत्तरग्रंथविरोधाच्च । किंतुविशेषणविशेष्य
भावेनव्यवह्रियमाणत्वादित्येवार्थोद्रष्टव्यः।दंडीदेवदत्तइत्यादौदंडित्वस्यैवविशेषणत्वाद्विशिष्टस्यचविशेष्येणभिन्नाभिन्नत्वान्नदोष
इतिद्रष्टव्यं । यथाहिभेदाभेदवादिनामीमांसकेनतार्किकंप्रतिप्रयुक्तेभिन्नाभिन्नमितिसाध्येभिन्नत्वविशेषणस्यतार्किकेणांगीकृतत्वे
पिनवैयर्थ्यं । भिन्नाभिन्नत्वप्रकारकप्रतीतेरुद्देश्यत्वात् । एवमिहापिसद्विलक्षणत्वेसत्यसद्विलक्षणमितिविशिष्टप्रतीतेरुद्देश्यत्वा

SGDF Foundation

योजकता
See Tarangini

50

न्व्यर्थविशेष्यत्वमित्यर्थः । विशेषणानां धर्माणां । ननुभेदाभेदानुमानदृष्टांतोनयुक्तः । तत्रगुणादिकंगुण्यादिनाऽभिन्नमित्ये
वकृतेऽभेदरूपसाध्यवति घटकलशादौघटःकलशइतिप्रयोगादर्शनेनसमानाधिकृतत्वरूपहेत्वभावेनाभेदरूपसाध्यंप्रतिसमानाधि
कृतत्वस्यप्रयोजकत्वाभावात् । हेतुरस्तुसाध्यंमास्त्वित्येवंरूपाप्रयोजकतात्रनाभिप्रेता । किंनाम । “ तस्मिन्सत्यभवतःतेनविना
पिभवतःतदप्रयोज्यत्वादि ”तिवचनात्साध्येसत्यप्यभवतोहेतोःसाध्येप्रयोजकत्वाभावात् । अतोप्रयोजकतानिरासायभेदविशि
ष्टाधीस्तत्रोद्देश्या । घटकलशादौचहेत्वभाववतिभेदाभेदरूपसाध्यस्याप्यभावान्नाप्रयोजकत्वमित्यप्रयोजकतापरिहारायैवभिन्न

यदिचाभेदेसत्यपिघटःकलशइतिसामानाधिकरण्यादर्शनादप्रयोजकत्वनिरासायविशिष्टधीस्तत्रोद्देश्या
तर्हितुच्छेसद्वैलक्षण्येसत्यपिदृश्यत्वादर्शनादिहापिसोद्देश्येतिसमं । तथाप्यऽप्रसिद्धविशेषणत्वं ।

त्वविशेषणंनोद्देश्यप्रतीत्यर्थमित्याशंक्यतर्हिंप्रकृतेपिसत्त्वाभावमात्रस्यैवसाध्यत्वेसत्त्वाभाववतितुच्छेऽविद्यमानस्यदृश्यत्वस्याऽ
ऽप्यप्रयोजकत्वंमाभूदितिअप्रयोजकतापरिहारायैवासद्विलक्षणत्वमपिसाध्यकोटौनिवेशितं । तन्निवेशेतुतुच्छेदृश्यत्वाभाववति
विशिष्टंसाध्यमपिनास्तीत्यप्रयोजकतायाअभावादित्यप्रयोजकतापरिहारायैवविशिष्टधीस्तत्रोद्देश्या । अतोनोद्देश्यप्रतीत्यर्थंवि
शिष्टोपादानं । अतोनव्यर्थविशेष्यत्वमित्याह ॥ यदिचेत्यादिना ॥ अप्रसिद्धेति ॥ विशिष्टसाध्यस्यकुत्राऽप्यप्रसिद्धत्वादि ॥ २६ ॥
तिभावः । ननुयदिसत्त्वात्यंताभाववत्त्वेसत्यसत्त्वात्यंताभावरूपविशिष्टसाधनेअप्रसिद्धविशेषणत्वं तदापृथिवीइतरभिन्नेत्यत्रापि

SGDF
Sri Gargeshwari Digital Foundation

जलादिद्वादशान्योन्याभाववत्त्वेसतिसमवायान्योन्याभावरूपविशिष्टस्यैवसाध्यत्वमंगीकृत्यतस्यकुत्राप्यप्रसिद्धत्वेनाप्रसिद्धविशे
षणत्वंतत्रापिस्यात् । तथाचत्रयोदशान्योन्याभावानांप्रत्येकंप्रसिद्ध्यासाध्यप्रसिद्धिंव्युत्पादनंव्याहतंस्यादित्यतआह ॥ पृथिवी
ति ॥ **साधनपक्षएवेति** ॥ नोक्तरीत्याविशिष्टसाधनपक्षइतिवाक्यशेषः । विशिष्टस्यसाध्यतापक्षेतुसमुदायालंबनरूपैकज्ञा
नोपारूढत्वमादायनसाध्यप्रसिद्धिसंपादनंसंभवतीतिद्रष्टव्यं । ननुविशिष्टस्यसाध्यत्वेपिनाप्रसिद्धविशेषणत्वं । सद्वैलक्षण्यादी
नांविशकलितानांप्रसिद्धिसंभवादित्यतआह ॥ अन्यथेति ॥ भूःशशविषाणोल्लिखिताभूत्वादित्यत्राप्यप्रसिद्धविशेषणत्वंसर्वसं

पृथिवीइतरभिन्नेत्यत्रत्वनेकधर्मसाधनपक्षएवप्रत्येकप्रसिद्ध्यासाध्यप्रसिद्धिरुक्ता । अन्य
थाशशादीनांप्रत्येकंप्रसिद्ध्याशशशृंगोल्लिखितत्वस्यापिसास्यात् ॥ नद्वितीयः । त्रैकालिकनि ॥१॥
षेधस्यतात्विकत्वेऽद्वैतहानेः । प्रातिभासिकत्वेसिद्धसाधनात् । व्यावहारिकत्वेपि
तस्यबाध्यत्वेनतात्विकसत्त्वाविरोधित्वेनार्थांतरात् । अद्वैतश्रुतेरतत्वावेदकत्वापाताच्च ।

मतंनस्यात् । तत्रापिशशादीनांविशकलितानांप्रसिद्धिसंभवादितिभावः ॥ सिद्धसाधनादिति ॥ प्रातिभासिकत्रैकालिकनि
षेधप्रतियोगित्वस्यसत्यत्वाविरोधित्वेनेष्टत्वादितिभावः ॥ बाध्यत्वेनेति ॥ ब्रह्मज्ञानबाध्यत्वेनेत्यर्थः । तात्विकसत्त्वं त्रैकालि
कसत्त्वं । तात्विकसत्त्वाविरोधित्वोपपादनायतस्यचबाध्यत्वेनेत्युक्तं । त्रैकालिकसत्तानिषेधस्यबाध्यत्वेत्रैकालिकसत्त्वमेवसिद्ध्य
तीतिभावः । अर्थांतरादित्युपलक्षणं । व्यावहारिकप्रतियोगिमतिव्यावहारिकनिषेधसाधनेबाधोपिद्रष्टव्यः ॥ अतत्वेति ॥

SGDF
Sri Gargeshwari Digital Foundation

व्यावहारिकमिथ्याभूतनिषेधप्रतिपादकत्वान्नेहनानेत्याद्यद्वैतश्रुतेरतत्वावेदकत्वंस्यादित्यर्थः । तत्प्रतियोगिनः व्यावहारिकनिषे
धप्रतियोगिनः ॥ पारमार्थिकत्वापत्तेरिति ॥ प्रतियोगितदभावयोर्भिन्नसत्ताकत्वांगीकारादितिभावः । नन्वथापिव्यावहा
रिकनिषेधप्रतियोगिनःप्रपंचस्यपारमार्थिकत्वं कुतः प्रातिभासिकत्वेनाप्युपपत्तेः । रूप्यात्यंताभावस्यव्यावहारिकत्वेपिरूप्यस्य
प्रातिभासिकत्ववदित्यतउक्तमप्रातिभासिकस्येति । तच्चोभय(वादि)सिद्धमितिभावः । वियदादेरसद्विलक्षणस्वरूपोपपादनाय

तत्प्रतियोगिनोऽप्रातिभासिकस्यप्रपंचस्यपारमार्थिकत्वापत्तेश्च । किंचनिषेधप्रतियोगित्वं
किंस्वरूपेण । किंवाअसद्विलक्षणस्वरूपानुपमर्देनपारमार्थिकत्वाकारेण ।नाद्यः । श्रुत्या
दिसिद्धोत्पत्त्यादिकस्यार्थक्रियासमर्थस्याविद्योपादानकस्यतत्त्वज्ञाननाश्यस्यचवियदादेरूप्या
देश्चधीकालेविद्यमानेनासद्विलक्षणस्वरूपेण[1]त्रैकालिकनिषेधायोगात् । त्रैकालिकनिषेधंप्रति
स्वरूपेणापणस्थरूप्यंपारमार्थिकत्वाकारेणप्रातिभासिकरूप्यंवाप्रतियोगीतित्वन्मतहानेश्च ।

श्रुत्यादीतिविशेषणद्वयं । असद्विलक्षणस्वरूपाभावेउत्पत्तिरयुक्तास्यात् । नचेष्टापत्तिः । तस्याःश्रुत्यादिसिद्धत्वात् । अर्थक्रि
यापिनिःस्वरूपत्वेनस्यादितिभावः । वियदादेरूप्यादेश्चोभयोरप्यसद्विलक्षणस्वरूपोपपादनायाविद्येत्यादि । निस्स्वरूपत्वेसो
पादानत्वादेरयोगादितिभावः ॥ धीकालइति ॥ सदितिप्रतीयमानस्यापिननिस्स्वरूपत्वंयुक्तमितिवक्तुमिदमुक्तमितिद्रष्टव्यं ।
तथाचैतादृशमिथ्यात्वसाधनेवियदादौबाधः । शुक्तिरूप्यादौत्वद्रीत्यासाध्यवैकल्यंचेत्युक्तंभवति ॥ आपणस्थेति ॥ आभास

[1] इत्थंभूतलक्षणे तृतीया

52

स्यप्रसक्त्याअनाभासस्यनिषेधांगीकारादितिभावः । तथाचस्वरूपेणनिषेधप्रतियोगित्वंशुक्तिरूप्येनास्तीतिलक्षणस्यासंभवइति
हृदयं ॥ अत्यंतासत्त्वेति ॥ वियदादेःस्वरूपेणनिषेधांगीकारइत्यर्थः । तदुपपादयति ॥ प्रतिपन्नेत्यादिना ॥ स्वरूपेणेति
शेषः । प्रतिपन्नोपाधौत्रैकालिकनिषेधप्रतियोगित्वमपिसर्वत्रत्रैकालिकनिषेधप्रतियोगित्वपर्यंतमितित्वन्मतमित्यन्वयः ॥ सर्व
त्रेति ॥ स्वोपाधौपरोपाधौचेत्यर्थः । ननुपटादेःस्वोपाधावेवत्रैकालिकनिषेधप्रतियोगित्वंनपरोपाधावित्यतउक्तं ॥ अन्यत्रास
त्त्वेनसंमतस्येति ॥ मृदादिरूपेपरोपाधावसत्त्वेनसंमतस्येत्यर्थः ॥ अन्यथेति ॥ पटादेरन्यत्रपरोपाधावसत्त्वस्यासंमतत्वे ।

अत्यंतासत्वापाताच्च । प्रतिपन्नोपाधौत्रैकालिकनिषेधप्रतियोगित्वमपिह्यन्यत्रा
सत्वेनसंमतस्यपटादेःसर्वत्रत्रैकालिकनिषेधप्रतियोगित्वपर्यंतमितित्वन्मतं ।
अन्यथाअन्यत्रतत्सत्वापातात् । नहितेषामन्यत्रसत्तासंभाविनीतित्वदुक्तेश्च ।[1]
तथाचकथंनात्यंतासत्वापत्तिः । नहिशशशृंगादीनामपीतोन्यदसत्त्वमस्ति ।

अन्यत्रसत्त्वांगीकारइतियावत् ॥ अन्यत्रतत्सत्त्वापातादिति ॥ सत्त्वपदंतत्प्रतीतिव्यवहारयोरुपलक्षणं । तथाचपटादेःमृ
दाद्युपाधौसत्त्वप्रतीतिव्यवहारयोरापातादित्यर्थः । तथाचायंपटएतत्तंतुनिष्ठात्यंताभावप्रतियोगीतिमिथ्यात्वानुमानेएतत्तंतुभिन्ने
तंत्वंतरेमृदादौचसत्त्वापत्त्याअर्थांतरतास्यादितिभावः । पटादेरन्यत्रसत्त्वांगीकारेस्वोक्तिविरोधश्चस्यादित्याह ॥ नहितेषामि
ति ॥ तेषां पटादीनां । अन्यत्र परोपाधौ ॥ तथाचेति ॥ प्रतिपन्नोपाधौस्वरूपेणत्रैकालिकनिषेधप्रतियोगित्वस्यसर्वत्रत्रैका

[1] इदं च चित्सुखीयं वाक्यम् ।

53

SGDF Foundation

लिकनिषेधप्रतियोगित्वपर्यंतत्वेसतीत्यर्थः । ननुसर्वत्रस्वरूपेणत्रैकालिकनिषेधप्रतियोगित्वंनात्यंतासत्त्वं । शशशृंगादौअसत्त्व स्यैतदन्यस्यैवसत्त्वादित्यतआह ॥ नहीति ॥ शशशृंगादीनामितोन्यदसत्त्वमस्तीत्याशंक्यनिषेधति ॥ नचेत्यादिना ॥ तेषां शशशृंगादीनां । निरुपाख्यत्वंनाम उपाख्यायतेअनेनेतिव्युत्पत्त्या(शब्द)पदशक्त्यविषयत्वंवाप्रतीत्यविषयत्वंवा । नाद्यइत्याह ॥ निरुपाख्यपदेनैवेति ॥ तथाचनिरुपाख्यपदशक्तिविषयतयातत्पदेनैवव्यवह्रियमाणत्वादित्यर्थः । तथाचासत्त्वेनसंप्रतिप

नचनिरुपाख्यत्वमेवतेषामसत्वं । निरुपाख्यपदेनैवख्यायमानत्वात् । असतोऽप्रती तावसद्वैलक्ष्यण्यज्ञानस्यासत्प्रतीतिनिरासस्यअसत्पदप्रयोगस्यचायोगाच्च । नाप्यपरो क्षतोप्रतीयमानत्वमसत्त्वं । नित्यातींद्रियेपिसत्वात् । नापिक्वचिदप्युपाधौसत्वेनाप्र तीयमानत्वमसत्वं जगतिशुक्तिरूप्यादौचैवंविधासद्वैलक्षण्यस्यशून्यवादेपिसत्वात् ।

न्नस्याप्यसत्त्वंनस्यादितिभावः । द्वितीयेदोषमाह ॥ असतइति ॥ असद्वैलक्षण्येति ॥ अभावज्ञानेप्रतियोगिज्ञानस्यकार णत्वादितिभावः ॥ असत्प्रतीति ॥ तस्यासत्प्रतीतिप्रसक्त्यपेक्षत्वादितिभावः ॥ असत्पदेति ॥ प्रेक्षावत्कृतशब्दप्रयोगस्य शब्दार्थज्ञानपूर्वकत्वादसत्पदप्रयोगार्थमसज्ज्ञानस्यावश्यकत्वादित्यर्थः ॥ क्वचिदपीति ॥ स्वोपाधौपरोपाधौचेत्यर्थः ॥ जग तीति ॥ शून्यवादिनाजगतोसत्त्वमंगीकृतमितितद्वैलक्षण्यंत्वयासाधनीयं । तेनचनिस्स्वरूपत्वमेवासत्त्वमंगीकृतमिति तद्वैल

SGDF
Sri Gargeshwari Digital Foundation

क्षण्यमेवत्वयासाधनीयं । नतुक्कचिदप्युपाधौसत्त्वेनाप्रतीयमानत्वमसत्त्वमित्यंगीकृत्यतद्वैलक्षण्यं । तथात्वेसिद्धसाधनतास्या
त् । तेनापिसांवृतसत्त्वांगीकारेणैताद्दशासद्वैलक्षण्यस्यांगीकारादितिभावः ॥ नप्रतीयेतेति ॥ सत्त्वेननप्रतीयेतेत्यर्थः । उक्ता
प्रतीतिंप्रति आपाद्यभूतसत्त्वेनाप्रतीतिंप्रति । क्वचिदप्युपाधौसत्त्वेनाप्रतीयमानत्वंशशश्रृंगादीनांकुतइत्युक्तेअसत्त्वादित्येवंस
त्त्वेनाप्रतीतिप्रयोजकीभूतमसत्त्वंसत्त्वेनाप्रतीयमानत्वादन्यदेववाच्यं । अन्यथेदमेवचेदसत्त्वंस्यात्तर्ह्यसच्चेन्नप्रतीयेतेत्यापादना
योगः । असच्चेदित्यस्यसत्त्वेननप्रतीयतेचेदित्यर्थः । तथाचसत्त्वेननप्रतीयतेचेत्सत्त्वेननप्रतीयेतेत्यापाद्यापादकयोरभेदःस्यादि
त्वया ऽप्यसच्चेन्नप्रतीयेतेतिवदतोक्ताप्रतीतिंप्रतिप्रयोजकस्यान्यस्यैवासत्त्वस्यवक्तव्यत्वाच्च । ब्र
ह्मण्यंगीकृतंयत्प्रपन्नोपाधौत्रैकालिकनिषेधाप्रतियोगित्वात्मकाबाध्यत्वरूपंसत्त्वंताद्विरुद्धस्यैवास
अ त्वरूपत्वाच्च । अन्यथाप्रतीत्यनुपाधिकासत्त्वाभावेब्रह्मण्यपिसत्त्वेनप्रतीतिरेवसत्त्वंस्यात् ।
त्यर्थः ॥ तद्विरुद्धस्यैवेति ॥ सत्त्वासत्त्वयोःपरस्परविरहरूपत्वस्यैवानुभवेनप्रतिपन्नोपाधौत्रैकालिकनिषेधप्रतियोगित्वात्मक
बाध्यत्वमेवासत्त्वंवक्तव्यंनोक्तरूपंसत्त्वेनाप्रतीयमानत्वमित्यर्थः । तथाचेतोन्यदसत्त्वंनास्तीतिभावः । अन्यथेत्यस्यविवरणमप्र
तीति । सत्त्वासत्त्वयोःपरस्परविरहरूपत्वस्यस्थितत्वाज्जगतिअप्रतीत्यनुपाधिकासत्त्वाभावेऽप्रतीत्यघटितासत्त्वानंगीकारेसत्त्वेना
प्रतीयमानत्वमित्यप्रतीतिघटितासत्त्वांगीकारेइतियावत् । ब्रह्मण्यपि असत्त्वविरहरूपंसत्त्वंनामसत्त्वेनप्रतीतिरेवस्यान्नवस्तुतस्त
त्रसत्त्वमस्तीतिप्राप्तेरित्यर्थः । सत्त्वेनाप्रतीयमानत्वरूपासत्त्वलक्षणस्यशशशृंगेऽव्याप्तिरित्याह ॥ येनेति ॥ ज्ञानोत्पत्तेः सत्त्व

SGDF
Sri Gargeshwari Digital Foundation

56

प्रकारकज्ञानोत्पत्तेः । तथाचसत्त्वेनाप्रतीयमानत्वंनास्तीतिभावः । ननुशशशृंगमस्तीतिवाक्यान्नशशश्रृंगास्तित्वप्रकारकंज्ञानमुत्पद्यते । शशशृंगंनास्तीत्ययोग्यतानिश्चयस्यतत्रप्रतिबंधकत्वादित्यतउक्तं ॥ येनपुंसेति ॥ अयोग्यतानिश्चयाभावदशायांयोग्यताभ्रमेणेत्यर्थः । नन्वव्याप्तिःकुत्रदीयते । नतावच्छशशृंगे तस्यास्तित्वप्रकारकारोपंप्रत्यधिष्ठानत्वेनसत्यत्वस्यावश्यकत्वेनासत्त्वाभावेनालक्ष्यत्वात् । नहिशून्यवादिमतइवाधिष्ठानमपित्वन्मतेऽसत् । नाप्यस्तित्वे । तस्यारोप्यत्वेनासद्विलक्षणत्वरूपानिर्वाच्यत्वेनालक्ष्यत्वादतःकथमेतदित्यतआह ॥ त्वन्मतेपिहीति ॥ अधिष्ठानं शशशृंगं । नचाधिष्ठानस्यासत्त्वेशून्यवादाप

येनपुंसाशशशृंगाभावोननिश्चितः ॥ तस्यगोशृंगमस्तीतिवाक्यादिवशशश्रृंगमस्तीतिवाक्यादपिज्ञानोत्पत्तेश्च । त्वन्मतेपिहितत्राध्यस्तस्यास्तित्वस्यानिर्वाच्यत्वेप्यधिष्ठानमसदेव। वक्ष्यतेचैतदनिर्वाच्यत्वभंगे ।

त्तिः । नहित्वयाभ्रममात्राधिष्ठानमसदित्युच्यते । किंनामतुच्छाधिकरणकभ्रमोयत्रतत्रैवतदधिष्ठानमसदित्यतोनिर्वचनीयास्तित्वप्रकारकभ्रमाधिष्ठानमपिशशशृंगमसदेवेतितत्राव्याप्तिरेवेतिसांप्रदायिकोर्थः । ननुशशशृंगादिशब्दान्नासतःप्रतीतिर्जायते किंनामविकल्पमात्रमेव । यथोक्तं । “ शब्दज्ञानानुपातीवस्तुशून्योविकल्प ”इति । अतःसत्त्वेनाप्रतीयमानत्वमस्त्येवेतिनाव्याप्तिरित्यतआह ॥ वक्ष्यतेचेति ॥ विकल्पस्येच्छादिवज्ज्ञानान्यवृत्त्यंतरत्वंनास्तीतिवक्ष्यतइत्यर्थः । तथाचाव्याप्तिःस्यादेवे ॥ २९ ॥

57

तिभावः ॥ तद्धैकइति ॥ असदासीदित्याहुरित्यनुवादमुखेनोक्तत्वेनासतःसत्त्वप्रतीत्यासत्त्वेनाप्रतीयमानत्वरूपासत्त्वलक्षणस्यासंभवइतिभावः ॥ अन्योन्याश्रयादिति ॥ अनिर्वाच्यत्वस्यासद्विलक्षणत्वरूपत्वेनासत्त्वज्ञानेतद्घटितानिर्वाच्यत्वज्ञानंतज्ज्ञानेचतदन्यत्वरूपासत्त्वज्ञानमित्यन्योन्याश्रयादित्यर्थः ॥ लाघवेनेति ॥ सार्वत्रिकत्रैकालिकनिषेधाप्रतियोगिरूपंयत्सत्तदन्यत्वमेवासत्त्वमस्तु लाघवात् । नतुतत्रानिर्वाच्यभिन्नत्वमपिप्रवेश्यं गौरवादित्यर्थः । अस्तुवानिर्वाच्यभिन्नत्वस्यलक्षणेप्रवेशः

“तद्धैकआहुरसदेवेदमग्रआसी ”दितिश्रुत्याप्यसतस्सत्वेनप्रतीतेश्च । नापिसदनिर्वाच्याभ्यामन्यत्वमसत्त्वं अनिर्वाच्यत्वस्यासत्त्वनिरूप्यत्वेनान्योन्याश्रयात् । लाघवेनसार्वत्रिकत्रैकालिकनिषेधाप्रतियोगिरूपसदन्यत्वस्यैवतत्वाच्च । अनिर्वाच्यस्यापिस्वरूपेणत्रैकालिकनिषेधेऽसतोनिर्वाच्यादन्यत्वासिद्धेश्च । अर्थक्रियासामर्थ्याभावादिकमसत्त्वमित्यशक्यशंकं । शुक्तिरूप्यादौशुद्धब्रह्मणिचसत्त्वात् । नचनिःस्वरूपत्वमसत्त्वंमिथ्याभूतंतुसस्वरूपमितिवाच्यं ।

तथाप्यसंभवइत्याह ॥ अनिर्वाच्यस्यापीति ॥ वियदादेरूप्यादेश्चेत्यर्थः । निषेधे निषेधांगीकारपक्षे । अनिर्वाच्यस्याप्यसत्त्वप्राप्त्यासतोनिर्वाच्यादन्यत्वाभावादसंभवइत्यर्थः । कुतोशक्यशंकमित्यतस्त्वन्मतेशुक्तिरूप्येब्रह्मणिचातिव्याप्तेरित्याह ॥ शुक्तीति ॥ मिथ्याभूतं वियदादिकंरूप्यादिकंच ॥ सस्वरूपमिति ॥ असद्विलक्षणस्यव्यावहारिकस्यप्रातिभासिकस्यवास्व

SGDF Foundation

रूपस्यांगीकारादितिभावः ॥ मिथ्याभूतस्यापीति ॥ रूप्यादेरित्यर्थः । तथाचातिव्याप्तिरितिभावः । ननुरूप्यादौवियदादौ चनिस्स्वरूपत्वंनास्ति किंतुस्वरूपमस्त्येव । नचमिथ्याभूतस्यापिस्वरूपेणैवत्रैकालिकनिषेधइतिपक्षेनिस्स्वरूपत्वंदुर्वारमित्युक्त मितिवाच्यं । मिथ्याभूतंस्वरूपमंगीकृत्यैवत्रैकालिकनिषेधांगीकारेणमिथ्याभूतस्वरूपस्यस्वरूपेणत्रैकालिकनिषेधेनसामानाधिक रण्यांगीकारात् । नचविरोधः । मिथ्यात्वादेवाविरोधादित्याशंक्यनिषेधति ॥ नचेति ॥ स्वदेशकालयोरिति ॥ वियदा दिरूपप्रतियोग्याधारभूतदेशकालयोरित्यर्थः ॥ तत्स्वरूपेति ॥ प्रतियोगिस्वरूपसहिष्णोस्तदनुपमर्दकस्येत्यर्थः ॥ तत्स्वरू

मिथ्याभूतस्यापिस्वरूपेणैवत्रैकालिकनिषेधइतिपक्षेनिःस्वरूपत्वस्यदुर्वारत्वात् । नचमिथ्याभूतं स्वरूपंमिथ्यात्वादेवस्वरूपेणत्रैकालिकनिषेधसामानाधिकरण्याविरोधीतिवाच्यं । स्वदेशकालयो स्तत्स्वरूपसहिष्णोस्तत्स्वरूपप्रतिषेधत्वस्यपारिभाषिकत्वापातात् । अन्यथातंतुष्विवातंतुष्वपि

पेति ॥ वियदादिस्वरूपप्रतिषेधत्वस्येत्यर्थः । अयंभावः । लोकेअत्यंताभावतत्प्रतियोगिनोर्विरोधेनाभावस्यप्रतियोगिस्वरूपा सहिष्णुत्वदर्शनात्तत्स्वरूपस्यकथंतत्प्रतिषेधेनसामानाधिकरण्यंवक्तुंशक्यं । तथात्वेप्रतियोगिस्वरूपसमानाधिकरणस्यतदत्यंता भावत्वंपारिभाषिकंस्यात् । तथाचपारिभाषिकात्यंताभावप्रतियोगित्वेपिस्वरूपेणवास्तवात्यंताभावप्रतियोगित्वंनसिद्ध्येदित्यत स्तत्सिद्ध्यर्थंतत्ररजतस्वरूपंनास्तीत्यंगीकार्यं । एवंचासत्त्वापत्तिर्दुर्वारेतिभावः ॥ अन्यथेति ॥ मिथ्यात्वादेवविरोधाभावमं

51

SGDF
Sri Gargeshwari Digital Foundation

गीकृत्यनिषेधाधिकरणेपिप्रतियोगिनःसत्त्वांगीकारइत्यर्थः । ननुमृदादावपिप्रातिभासिकंपटस्वरूपमस्त्येवेत्यतउक्तं ॥ व्याव हारिकेति ॥ नचविरोधः । पटस्यमिथ्यात्वादेवाविरोधोपपत्तेरितिभावः । निषेधाधिकरणेपिप्रतियोगिनःसत्त्वमंगीकृत्यतयोः सर्वजनसिद्धदैशिकविरोधानंगीकारेप्रतियोगिनःप्रागभावेनापिसमानकालीनत्वापत्त्याकालिकोविरोधोपिनस्यात् । मिथ्यात्वादे वाविरोधस्यतत्रापिवक्तुंशक्यत्वादित्याह ॥ प्रागभावादीति ॥ किंचयदिप्रपंचेरूप्यादौचस्वरूपेणत्रैकालिकनिषेधसामाना धिकरण्याविरोधिस्वरूपंकिंचिदंगीक्रियते तर्हितुच्छेपिएतादृशस्वरूपंस्वात्यंताभावसामानाधिकरण्याविरोधिरूपंकिंचिदंगीक्रि

व्यावहारिकपटस्वरूपापातात् । प्रागभावादिसमानकालीनत्वेनाप्यविरोधापाताच्च । तुच्छेपिपरोक्षप्रतीत्याद्यन्यथानुपपत्त्याएतादृशस्वरूपस्यापिसुवचत्वाच्च । तस्मात्सर्व त्रत्रैकालिकनिषेधप्रतियोगित्वमेवात्यंतासत्वं । तत्रतदानीमसदित्यनेनतत्रतदानिषे धप्रतियोगित्वस्येवात्यंतासदित्यनेनापिसर्वत्रसदानिषेधप्रतियोगित्वस्यैवप्रतीतेः ।

यतां तथाचनिस्स्वरूपत्वोक्त्ययोगः । विरोधश्चमिथ्यात्वादेवसमाधातुंशक्यः । यदिप्रपंचेअपरोक्षतःप्रतीत्यन्यथानुपपत्त्याकिं चित्स्वरूपमंगीकार्यमित्युच्यते तर्हितुच्छेपिपरोक्षतःशब्दादिनाप्रतीतिसंभवात्तदन्यथानुपपत्त्याकिंचित्स्वरूपमंगीक्रियतां । तथाचासंभवइत्याह ॥ तुच्छेपीति ॥ तथाचासंभवइतिभावः ॥ तस्मादिति ॥ प्रकारांतरस्यासंभवादितिभावः । सर्वत्रत्रै

कालिकनिषेधप्रतियोगित्वमत्यंतासत्त्वमित्यनयोरेकार्थत्वादिदमेवासत्त्वलक्षणंवाच्यमित्याशयेनोपपादयति ॥ तत्रतदानीमि

SGDF
Sri Gargeshwari Digital Foundation

त्यादिना ॥ तत्रतदाअसदितियथादेशविशेषेकालविशेषेचनिषेधप्रतियोगित्वंप्रतीयते एवमत्यंतासदित्यनेनापिअत्यंतंसर्वस्मिन्देशेसर्वस्मिन्कालेचासन्निषेधप्रतियोगीतिप्रतीतेरित्यर्थः । तथाचसर्वत्रत्रैकालिकनिषेधप्रतियोगित्वस्यैवात्यंतासत्त्वात्प्रपंचस्य स्वरूपेणत्रैकालिकनिषेधेतुच्छवदत्यंतासत्त्वंदुर्वारमितितात्पर्यं । ननुप्रपंचस्य नतुच्छसाम्यं प्रपंचनिषेधस्यमिथ्याभूतप्रपंचप्रतियोगिकत्वात् तुच्छसंबंधित्रैकालिकनिषेधस्यनिष्प्रतियोगिकत्वादितितन्निषेधयोर्वैलक्षण्यादित्याशंक्यनिषेधति ॥ नचेति ॥ तदभावः प्रपंचनिषेधः । इतिवावैषम्यंवक्तुंनचशक्यमित्यन्वयः । कुतइत्यतउक्तं ॥ मिथ्याभूतस्येत्यादि ॥ मिथ्या

नचमिथ्याभूतस्यापिस्वरूपेणैवनिषेधइतिपक्षेतदभावःसप्रतियोगिकः । तुच्छाभावस्तुनिष्प्रतियोगिकइतिवा । मिथ्याभूतस्यसदासर्वत्रसद्वैलक्षण्यमात्रंतुच्छस्यतुस्वरूपेणैवप्रतिषेधइतिवावैषम्यंवक्तुंशक्यं ।

भूतस्यापिस्वरूपेणनिषेधइतिपक्षेतदभावोपितुच्छभाववन्निष्प्रतियोगिकएव नसप्रतियोगिकः । प्रतियोगिस्वरूपस्यैवाभावादितिभावः ॥ ननुतथापिप्रपंचतुच्छयोःप्रकारांतरेणवैषम्यमस्ति । मिथ्याभूतस्यप्रपंचस्यसदासर्वत्रसद्वैलक्षण्यमात्रमस्ति नस्वरूपेणप्रतिषेधः । असद्विलक्षणस्वरूपांगीकारात् । तुच्छस्यतुस्वरूपेणैवप्रतिषेधइतिवैषम्यादित्याशंक्यनिषेधति ॥ मिथ्याभूतस्येति ॥ सदासर्वत्रेति ॥ सद्वैलक्षण्यमात्रमिति नस्वरूपेणैवप्रतिषेधइत्येवमात्रशब्दार्थोनत्वसद्वैलक्षण्यंनास्तीति तस्यांगी

॥ ३१ ॥

60

कारेणमात्रशब्दव्यवच्छेद्यत्वाभावादितिद्रष्टव्यं । इतिवावैषम्यंवक्तुंनचयुक्तं । कुतइत्याशंकायांमिथ्याभूतस्यापिस्वरूपेणैवनिषेधइतिपक्षइत्येतदत्रापियोज्यं । तथाचमिथ्याभूतस्यापिस्वरूपेणैवनिषेधइतिपक्षेप्रपंचस्यनसदासर्वत्रसद्वैलक्षण्यमात्रंस्वरूपेणैवप्रतिषेधादित्यर्थः । तथाचतुच्छसाम्यंदुर्वारमितिभावः । इदानींसर्वत्रत्रैकालिकनिषेधप्रतियोगित्वमेवासत्त्वमित्युक्तासत्त्वलक्षणस्यासंभवमाशंकते ॥ अथमतमिति ॥ असत्त्वादेव स्वस्यैवाभावेनसकलधर्मशून्यत्वादेव ॥ आत्यंतिकेति ॥ सर्वत्रत्रैकालिकेत्यर्थः । तथाचासदात्यंतिकनिषेधप्रतियोगित्वरूपधर्मशून्यंअसत्त्वादित्यनुमानमुक्तं । तथाचोक्तासत्त्वलक्षणस्यासंभवइतिभा

अथमतं । असतोसत्वादेवात्यंतिकनिषेधप्रतियोगि(त्वम)तापिनेति । तन्न । असत्वस्योक्तनिषेधप्रतियोगित्वरूपत्वेनहेतोर्विरुद्धत्वात् ।[1] असतोसत्ववत्सद्वैलक्षण्यवत्त्वयोच्यमानप्रतियोगित्वाभावव

वः ॥ असत्त्वस्येति ॥ हेतूकृतस्येत्यर्थः ॥ विरुद्धत्वादिति ॥ असत्आत्यंतिकनिषेधप्रतियोगित्वरहितंअसत्त्वात् । आत्यंतिकनिषेधप्रतियोगित्वादितिसाधनेहेतोर्विरुद्धत्वादित्यर्थः । साध्याभावव्याप्तत्वरूपंलक्षणंचाभेदेपिव्याप्यव्यापकभावांगीकारेणोपपादनीयं । (अन्यथाशब्दोनित्यःकृतकत्वादित्यत्रकृतकत्वमुपाधिःस्यात्) । एवंविरुद्धत्वमुक्त्वाऽप्रयोजकतांचाह ॥ असत इत्यादिना ॥ नन्वसतोनिर्धर्मकत्वान्नात्यंतिकनिषेधप्रतियोगित्वरूपधर्मोंगीकार्यइत्यतआह ॥ असत्त्ववदिति ॥ त्वयोच्यमानेति ॥ असतोऽसत्त्वादेवात्यंतिकनिषेधप्रतियोगितापिनेतित्वयोच्यमानेत्यर्थः । नन्वसत्यसद्वैलक्षण्यादिधर्माणामभावरू

61

[1] असति सद्वैलक्षण्य

SGDF

62

पाणांसत्त्वेपिभावरूपआत्यंतिकनिषेधप्रतियोगित्वरूपोधर्मोनांगीक्रियतइतिचेत्तत्राह ॥ **परोक्षेति** ॥ नन्वसत्त्वादीनांधर्माणा धर्मिसत्तानिरपेक्षत्वादसतिधर्मिणंविनाप्यवस्थानमस्तु आत्यंतिकनिषेधप्रतियोगित्वस्यतु धर्मिसत्तासापेक्षत्वात्कथमसत्युपपत्ति रित्यतआह ॥ **प्रतियोगित्वस्येति** ॥ अत्यंताभावप्रतियोगित्वस्येत्यर्थः । रूपादिवदितिव्यतिरेकदृष्टांतः ॥ **निरपेक्षत्वादि ति** ॥ प्रत्युतधर्मिणःसत्त्वेतत्रात्यंताभावप्रतियोगित्वस्यैवासंभवादितिभावः । प्रतियोगित्वस्यधर्मिसत्तानिरपेक्षत्वेदृष्टांतः ॥ **प्रागभावादीति** ॥ असतः अविद्यमानस्य ॥ **तत्प्रतियोगित्वेति** ॥ विद्यमानप्रागभावप्रतियोगित्वेत्यर्थः । नन्वविद्यमान

त्परोक्षज्ञानव्यवहारौप्रतिविषयत्ववदसद्वैलक्षण्यंप्रतिप्रतियोगित्ववच्चानिषेधप्रतियोगित्वस्याप्यु पपत्तेश्च । प्रागभावादिदशायामसतएवघटादेस्तत्प्रतियोगित्वदर्शनेनप्रतियोगित्वस्यरूपादिवद्ध र्मिसत्ता(निर)(त्तासापेक्षाभावाच्च)नपेक्षत्वाच्च । कालांतरेसत्व(स्यचे)स्येदानीमनुपयोगात् ।

स्यापिघटादेःप्रागभावप्रतियोगित्वंयुक्तं । उत्तरकालेघटादेःसत्त्वात् । अत्यंताभावप्रतियोगिनस्तुकदाप्यभावेनवैषम्यादित्यत आह ॥ **कालांतरइति** ॥ **इदानीमिति** ॥ घटोत्पत्तेःप्राक्प्रागभावप्रतियोगीघटइति(व्यवहारस)निरूपणसमयइत्यर्थः । ननु पूर्वोक्तादृष्टांतानयुक्ताः । तथाहि । प्रागभावादिदशायामित्येतदयुक्तं । प्रागभावएवघटप्रतियोगिकत्वमंगीक्रियते नतुघटे अ विद्यमानतादशायांतत्प्रतियोगित्वं । तथासद्वैलक्षण्यवदित्यप्ययुक्तं । सत्येवासद्वैलक्षण्यांगीकारेणासतिसद्वैलक्षण्यानंगीकारा

SGDF
Sri Gargeshwari Digital Foundation

त् । तथाप्रतियोगित्वाभावोपिनासति । किंतुप्रतियोगित्वाभावेअसदाश्रयकत्वमेवांगीकृतं । तथाअसज्ज्ञानव्यवहारयोरेवास
द्विषयकत्वं । नत्वसतितद्विषयत्वंस्वीकृतं । तथाअसद्वैलक्षण्यएवासत्प्रतियोगिकत्वं । नत्वसद्वैलक्षण्यंप्रत्यसतःप्रतियोगित्वं
स्वीकृतमित्यतआह ॥ शिष्टमिति ॥ प्रागभावादेर्घटादिप्रतियोगिकत्वेघटादेरविद्यमानतादशायांतत्प्रतियोगित्वमवर्जनीयमे
व । तयोःसमानसंवित्संवेद्यत्वादित्यादिकंवक्ष्यतइत्यर्थः । पुनरप्युक्तासत्त्वलक्षणस्यासंभवमाशंक्यनिराकरोति ॥ एतेनेति ॥ 63
मकरंदोनाममायावादग्रंथविशेषः । प्रतियोग्यधिकरणसंसर्गज्ञानंप्रसक्तिः । तथाचासन्नत्रैकालिकनिषेधप्रतियोगिअप्रसक्तत्वादि

शिष्टमनिर्वाच्यत्वभंगेवक्ष्यते । एतेनयदुक्तंमकरंदे । असतोप्रसक्तेर्निषेधाप्रतियोगित्वमिति
तच्चनिरस्तं । असतोप्रसक्त्याब्रह्मजगतोरसद्वैलक्षण्यस्यनासदासीदितिश्रौतनिषेधस्यासतिचसद्वै
लक्षण्यस्यप्रतियोगित्वाभावस्यचासिद्ध्यापातात् । तस्यापिप्रतियोगिप्रतीत्यधीनसिद्धिकत्वात् ।

त्यनुमानंद्रष्टव्यं । असतःप्रसक्त्यनंगीकारेबाधकतर्कसद्भावात्प्रसक्तिरंगीकार्या ततश्चस्वरूपासिद्धिरित्याह ॥ असतोऽप्रसक्त्ये
ति ॥ तथाचप्रतियोगित्वेनासत्प्रसक्तिरंगीकार्येत्याशयः ॥ असतिचेति ॥ असतिसत्वंनास्तीतिसद्वैलक्षण्यसिद्धेरधिकरणत्वे
नाऽसत्प्रसक्तिरपेक्षितेत्यर्थः । एतदेवोपपादयति ॥ तस्येति ॥ प्रतीतिः प्रसक्तिः । असद्वैलक्षण्यसिद्धेःप्रतियोगित्वेनासत्प्रस
क्तिसापेक्षत्वादसतिसत्त्वंनास्तीतिसद्वैलक्षण्यसिद्धेरधिकरणत्वेनासत्प्रतीतिसापेक्षत्वादित्यर्थः । असतःप्रसक्त्यभावेजगदादाव

SGDF
Sri Gargeshwari Digital Foundation

सद्वैलक्षण्यादिकंनसिद्ध्येदितिबाधकतर्केआपादकासिद्धिमाशंकते ॥ ननुतत्रेति ॥ असद्वैलक्षण्यादिस्थलइत्यर्थः । शशविषाणमस्तीतिशब्दाभासेनबुद्धिपूर्वकारोपेणवेत्यर्थः । [पाठान्तरंबाधकतर्केऽप्रयोजकतांचाह ॥ परार्थेनेत्यादि ॥ अनिषेधेपि । प्रत्यक्षेणेत्याद्यन्वयः । नासदासीदितिश्रौतनिषेधसंग्रहायोक्तं ॥ शब्देनेति ॥ अप्रसक्तस्यापिशब्देननिषेधःकुतोनयुक्तइत्यत उक्तं ॥ परार्थेनेति ॥ शब्दस्यपरार्थत्वात्परस्यचप्रतियोगिप्रसक्त्यभावेशब्दादिनातन्निषेधकरणेशब्दस्यतंप्रत्यबोधकत्वप्राप्त्या परस्यप्रवृत्तिनिवृत्त्योरयोगादितिभावः । यथोक्तं । संदिग्धविपर्यस्तान्यतरंप्रत्येवशब्दस्याऽर्थवत्त्वादिति ॥ अप्रसक्तस्यैवेति ॥

ननुतत्रशब्दाभासादिनाबुद्धिपूर्वारोपेणवाप्रसक्तिर्वा । परार्थेनशब्देनाप्रसक्तस्यानिषेधे पिशब्दाभासादिमूलकेप्रतियोगिस्मृत्यादिकेसतिप्रत्यक्षेणाप्रसक्तस्यैववानिषेधोयुक्तः ।

शब्दाभासादिनाबुद्धिपूर्वकारोपेणवेतिवर्तते । प्रत्यक्षेणनिषेधेएतावतीसामग्रीअपेक्षितेत्याह ॥ शब्देत्यादि ॥ ब्रह्मजगद्वाऽसदित्येवंशब्दाभासजन्यानुभवमूलकेप्रतियोगिस्मृत्यादिकेसतिचक्षुराद्युन्मीलनानंतरंझडिति अप्रसक्तस्यैवनिषेधानुभवादित्यर्थः । प्रतियोगिस्मृतिमात्रस्यप्रतियोग्यधिकरणसंसर्गज्ञानरूपत्वाभावान्नस्मृत्याप्रसक्तिर्वक्तुंशक्येतिहृदयं । प्रत्यक्षेणेत्युक्त्यानासदासीदितिश्रौतोनिषेधोव्यावर्तितः । स्वप्रकाशेब्रह्मणिअसद्वैलक्षण्यंप्रत्यक्षेणैवास्ति । स्फुरणमित्यादिनाप्रतीतेः । जगतितुस्पष्टमेवाऽसद्वैलक्षण्यंप्रत्यक्षसिद्धं । अप्रत्यक्षेप्यऽसतिसद्वैलक्षण्यप्रतियोगित्वाभावस्यचवायौरूपाभाववत्प्रत्यक्षत्वसंभवादितिभावः ॥

64

अन्यथेति ॥ शब्दाभासादिनाप्रसक्तिर्वाअप्रसक्तस्यैववाप्रत्यक्षेणनिषेधइत्यनंगीकारेइत्यर्थः ॥ नसिध्येदिति ॥ तथाचतत्रांगुल्यग्रेकरिशतमितिशब्दाभासेनप्रतियोग्यधिकरणसंसर्गज्ञानरूपाप्रसक्तिर्वाशब्दाभासादिजन्यानुभवजन्यसंस्कारत्वरूपोहेतुः सिद्धइतिभावः ॥ प्रकृतेपीति ॥ अप्रसक्तेर्निषेधाप्रतियोगित्वमूलकस्मृत्यादिकेसतिप्रत्यक्षेणैवाप्रसक्तस्यैवानिषेधइत्यंगीकार्यमितिहेतुबाधकतर्कस्यायुक्तत्वमितिप्रकृतेपीत्यर्थः । तदुपपादयति ॥ शशशृंगमिति ॥ यथाअनुभवसिद्धायाःअंगुल्यग्रेकरिशतंनास्तीतिप्रतीतेःदुरपह्नवत्वात्तदुपपादकंशब्दाभासादिनाप्रतियोग्यधिकरणसंसर्गज्ञानरूपप्रसक्तिरंगीकार्येतिभावः । तथा चाऽसतोऽप्रसक्तेःनिषेधाप्रतियोगित्वमित्यनुमानेस्वरूपासिद्धिरनेनैवोक्तेतिज्ञातव्यं । प्रत्यक्षेणैववाऽप्रसक्तस्यैववाप्रतिषेधइति

अन्यथाअंगुल्यग्रेहस्तिशताभावोनसिद्ध्येदितिचेत्समंप्रकृतेपि । शशशृंगंनास्तीत्यबाधितप्रतीतेः ।

पक्षेअनुमानेऽप्रयोजकतेतिज्ञातव्यं ॥ अबाधितेति ॥ निर्बाधसाक्षिसिद्धेत्यर्थः । असतोपिशब्दाभासादिनाप्रसक्तिसद्भावात् निषेधाप्रतियोगित्वमित्युक्तंतदयुक्तं । शशशृंगंनास्तीत्यत्रयद्वास्तवमसत्शृंगंतन्ननिषिध्यते । यन्निषिध्यते । तन्नासत् । किंत्वनिर्वाच्यमेव । तथाचनासतोनिषेधप्रतियोगित्वमित्यसत्वलक्षणस्यासंभवइत्याशंक्यनिराकरोति ॥ नचेति ॥ शृंगस्य । शशशृंगस्य । इतिपाठांतरंक्वचित्दृश्यते ।] बाधकतर्केआपादकासिद्धिमुक्त्वाअसतःप्रसक्त्यभावेपिजगदादावसद्वैलक्षण्यसिद्धिः प्रत्यक्षेणैवभविष्यतीत्यप्रयोजकतांचाह ॥ परार्थेनेत्यादिना ॥ नासदासीदित्यनेनअसत्तदानींप्रलयेनासीदित्येवंशब्देनयत्रासतःसत्त्वंनिषिध्यते । तत्रासतःप्रसक्तिरपेक्षिता । कुतइतिचेत् । शब्दस्यपरबोधनार्थंप्रयुज्यमानत्वात् । परस्यप्रतियोगिप्रस

65

SGDF
Sri Gurgamath Digital Foundation

न्यायामृ० त्त्यभावेपिशब्देनतन्निषेधेशब्दस्यतंप्रत्यबोधकत्वापातेनपरस्यप्रवृत्तिनिवृत्त्योरयोगात् । यथोक्तं । “ संदिग्धविपर्यस्तान्यतरं श्रीनिवा०
॥ ३४ ॥ प्रत्येवशब्दस्यार्थवत्त्वा ”दिति । तथाचयत्रशब्देननिषेधस्तत्राप्रसक्तस्यनिषेधायोगेनशब्दाभासेनाहार्यारोपेणवासत्प्रतीतिसापे मिथ्यात्व०
क्षत्वेपियत्रशब्दाभासादिमूलकानुभवजन्यसंस्कारमूलकप्रतियोगिस्मरणेजातेचक्षुराद्युन्मीलनानंतरमसत्प्रसक्त्यभावेपिझडिति
जगदादावसद्वैलक्षण्यसिद्धिःतत्रप्रत्यक्षेणैवभविष्यति । भूतलेघटाभावज्ञानवत् । नचप्रतियोगिस्मरणमेवतत्रप्रसक्तिरितिवा १ । १
च्यं । स्मरणस्यप्रतियोगिज्ञानरूपत्वेपिप्रतियोग्यधिकरणसंसर्गज्ञानरूपप्रसक्तित्वाभावादितिभावः । प्रत्यक्षेणाप्रसक्तस्यैवनिषे 66
धानंगीकारेबाधकमाह ॥ अन्यथेति ॥ नह्यंगुल्यग्रेहस्तिशतंप्रसक्तमितिभावः । यदितत्रांगुल्यग्रेहस्तिशतमितिशब्दाभासज
न्यानुभवजनितसंस्कारमूलकेप्रतियोगिस्मरणेसतिअप्रसक्तस्यैवनिषेधइतिब्रूषेतर्हिंजगदादावप्येवमेवप्रतियोगिस्मरणेसतिअसत्प्रस
क्त्यभावेपितन्निषेधरूपासद्वैलक्षण्यस्यप्रत्यक्षेणैवसिद्धिसंभवादसतःप्रसक्त्यभावेजगदादावसद्वैलक्षण्यंनसिद्ध्येदितितर्केअप्रयोज
कतेतिभावः ॥ प्रकृतेपीति ॥ असतोऽप्रसक्तेर्निषेधाप्रतियोगित्वमितिप्रकृतेमकरंदोक्तानुमानेप्यप्रयोजकत्वंसमानमित्यर्थः ।
अत्रापिअसतोप्रसक्तत्वेपिशब्दाभासजन्यानुभवजनितसंस्कारमूलकाऽसद्रूपप्रतियोगिस्मरणानंतरंप्रत्यक्षेणैवनिषेधप्रतियोगित्व
सिद्धिसंभवेनाप्रयोजकत्वसाम्यादित्यर्थः । ननुअसत्प्रतियोगिकोनिषेधोनप्रत्यक्षसिद्धइतिचेत्तत्राह ॥ शशशृंगंनास्तीत्यबा ॥ ३४ ॥
धितप्रतीतेरिति ॥ अबाधितप्रत्यक्षप्रतीतेरनुभवसिद्धत्वादित्यर्थः । यदुक्तंअसतोपिनिषेधप्रतियोगित्वंशशशृंगंनास्तीत्यबा

SGDF
Sri Gargeshwari Digital Foundation

धितप्रत्यक्षप्रतीतिसिद्धमितितन्न । मन्मतेऽसद्द्विविधमस्ति वास्तवासदेकं अनिर्वाच्यभूतमाभासासदपरं । तत्रशशशृंगंनास्ती तिनिषिध्यमानंयच्छृंगंतन्नवास्तवासत् । किंत्वनिर्वाच्यभूताभासासदेव । तथाचत्रैकालिकनिषेधप्रतियोगित्वरूपासत्त्वलक्षण स्यवास्तवेऽनाभासरूपेअसत्यसंभवइत्याशयेनाशंक्यनिराकरोति ॥ **नचेत्यादिना** ॥ **अनिर्वाच्यस्यैवेति** ॥ आभासासद्रूप स्यशशशृंगस्येत्यर्थः । नवास्तवासद्भूतशृंगस्येत्येवकारार्थः । तथाचाऽसत्वलक्षणस्यासंभवइतिभावः । कुतोनेतिचेत् । अत्र प्रष्टव्यं । अनिर्वाच्यस्यैवशशशृंगस्यनिषेधइत्येवंतार्किकरीत्योच्यतेत्वद्रीत्यावा । नाद्यइत्याह ॥ **अनाभासस्यैवेति** ॥ अन्य

नचतत्रापिबुद्धिपूर्वकमारोपितस्यानिर्वाच्यस्यैवशृंगस्यनिषेधः । अनाभासस्यै वारोप्यनिषेधइतितार्किकमतेआभासस्यानिर्वाच्यस्यप्रसक्त्यानाभासस्यनिषे धइतित्वन्मतेचानिर्वाच्यान्यस्यैवशृंगस्यनिषेद्धव्यत्वात् । जगदादावनिर्वा च्यभूताभासासद्वैलक्षण्यमेव नत्वनाभासासद्वैलक्षण्यमित्यापाताच ।

त्रविद्यमानस्यवास्तवस्यप्रधानभूतस्यैवेत्यर्थः । तार्किकमतेअनिर्वाच्यान्यस्यैवेत्यन्वयः । तथाचानिर्वाच्यान्यददनाभासभूतं वास्तवासद्भूतंशशशृंगंतस्यैवनिषेद्धव्यत्वादित्यर्थः । नापिद्वितीयइत्याह ॥ **आभासस्येति** ॥ अनिर्वाच्यान्यस्य आभासभू तानिर्वाच्यान्यस्यानाभासस्यवास्तवासद्भूतशृंगस्यैवेत्यर्थः । तथाचासतएवनिषेधप्रतियोगित्वान्नलक्षणस्यासंभवइतिभावः । यत्आभासासत्अनिर्वाच्यंतदेवनिषेध्यंयदनाभासासद्वास्तवंतन्ननिषेध्यमितिद्विविधासत्कल्पनेदूषणमाह ॥ **जगदादाविति** ॥

SGDF
Sri Gargeshwari Digital Foundation

अनिर्वाच्यभूतंयदाऽभासासत्तद्वैलक्षण्यमित्यर्थः । तथाचशून्यवादिनोनानिष्टमितिभावः । असतआभासत्वंचानिर्वाच्यत्वेनारोपितत्वादितिज्ञातव्यं । अनाभासासत् वास्तवासत् । तथाचैवंद्विविधासत्कल्पनेअतिप्रसंगाद्वास्तवासतएवनिषेद्धव्यत्वेऽसत्त्वलक्षणस्यासंभवोनास्तीतिसिद्धमितिद्रष्टव्यं । इदानीमसत्त्वलक्षणस्यातिव्याप्तिमाशंकते ॥ **नन्विति** ॥ **सदासर्वत्राविद्यमानत्वमिति** ॥ सर्वत्रत्रैकालिकनिषेधप्रतियोगित्वमित्यर्थः ॥ **अनाश्रितेति** ॥ समवायेनकुत्राप्यनाश्रितत्वात्सदासर्वत्रतदत्यंताभावएवास्तीतिभावः । नन्वात्मानमिथ्यातदत्यंताभावस्यकेवलान्वयित्वेनात्मादौत्रैकालिकनिषेधप्रतियोगित्वेपिप्रति

ननुसदासर्वत्राविद्यमानत्वमसत्वंचेदनाश्रितात्मादिविभुद्रव्यात्यंताभावेपिकेवलान्वयीत्यात्मादिरप्यसन्स्यादितिचेत् तर्हित्वन्मतेपिआत्मामिथ्यास्यात् । "तस्यापिसएवाधस्तादि"त्यादिश्रुतिप्रतिपन्नोपाधौकालत्रयेप्यभावात् ।

पन्नोपाधेरभावेनोक्तमिथ्यात्वलक्षणाभावान्नातिव्याप्तिरित्यतआह ॥ **तस्यापीति** ॥ भूमरूपात्मनःप्रतिपन्नेउपाधौअधरादिप्रदेशरूपे । ननुनात्मनोमिथ्यात्वंप्रतिपन्नोपाधौत्रैकालिकनिषेधप्रतियोगित्वरूपलक्षणाभावात् । नचोक्तरीत्याश्रुतिप्रतिपन्नोपाधौकालत्रयेप्यभावादित्युक्तमितिवाच्यं । सदासर्वत्रात्मेत्यबाधितप्रतीत्यास्वोचितेसर्वस्मिन्देशेस्वोचितेसर्वस्मिन्कालेचसत्त्वेनसार्वदैशिकसार्वकालिकनिषेधप्रतियोगित्वरूपलक्षणाभावात् । किंचप्रतिपन्नोपाधिरपितस्यनास्ति । नचश्रुतिप्रतिपन्नोपाधिरस्तीति

SGDF
Sri Gargeshwari Digital Foundation

वाच्यं । कुंडबदरादाविवोर्ध्वाधरीभावेनप्रतिपन्नोपाधेर्विवक्षितत्वात् । आत्मनश्चविभुत्वेनश्रुतिप्रतिपन्नोपाधौऊर्ध्वाधरीभावेनाभावात् । प्रत्युताधरादेर्ब्रह्मण्यारोपितत्वएवश्रुतेस्तात्पर्याच्च । ननूर्ध्वाधरीभावहीनश्चेदात्मास्वोचितेदेशेकथमस्तीतिचेत्सामान्यादिवदितिब्रूमः । नहिघटेघटत्वमूर्ध्वाधरीभावेनास्ति । अयुतसिद्धिस्थलेऊर्ध्वाधरीभावाभावात् । तथाचोर्ध्वाधरीभावहीनमपिसामान्यंयथास्वदेशादावस्ति । एवमात्माप्यूर्ध्वाधरीभावहीनोपिस्वदेशकालयोरस्तीतिमिथ्यात्वलक्षणाभावान्नातिव्याप्तिरितियद्युच्यते । तर्हिततएवसदासर्वत्रात्मेतिसार्वदैशिकसार्वकालिकसत्त्वावगाह्यबाधितप्रतीतिबलादेवस्वोचितदेशकालयोःस

अथविभुत्वेनोर्ध्वाधरीभावहीनोप्यात्मासामान्यादिवत्स्वदेशकालयोरप्यस्तिसदासर्वत्रात्मेत्यबाधितप्रतीतेरितिनतस्यमिथ्यात्वं । तर्हिततएवनासत्वं । देशकालावपिसदासर्वत्रदेशकालावित्यबाधितप्रतीत्याप्रमेयत्वाभिधेयत्ववत्तार्किकाभिमत(देशका)

त्त्वावगमात्सार्वदेशिकसार्वकालिकनिषेधप्रतियोगित्वरूपासत्त्वमप्यंगीकर्तुमशक्यमितिनास्मदुक्तासत्त्वलक्षणस्यात्मन्यतिव्याप्तिरित्याह ॥ अथेत्यादिना ॥ नन्वथाप्यसत्त्वलक्षणस्यदेशकालयोरतिव्याप्तिः । आत्माश्रयप्रसंगेनदेशकालयोर्देशकालयोरभावेनसार्वदैशिकसार्वकालिकनिषेधप्रतियोगित्वसद्भावादित्यतआह ॥ देशकालावपीति ॥ देशःसर्वदासर्वत्रास्तिकालःसदासर्वत्रास्तीत्यबाधितप्रतीत्यादेशकालयोरपिदेशकालयोःसद्भावावगमादित्यर्थः । तथाचसार्वदैशिकसार्वकालिकनिषेधप्रतियोगित्वाभावान्नातिव्याप्तिरितिभावः । नन्वेवंतर्ह्यात्माश्रयइत्यतआह ॥ प्रमेयत्वेति ॥ प्रमेयत्वंप्रमेयत्वेस्तिअभिधेयत्वेचास्ति एवम

SGDF
Sri Gargeshwari Digital Foundation

70

भिधेयत्वमभिधेयत्वेस्तिप्रमेयत्वेचास्तीत्येवंस्ववृत्तित्वमन्योन्यवृत्तित्वंचास्तीत्यर्थः ॥ दिक्कालेति ॥ तदत्यंताभावस्यसर्वत्रसत्त्वात् दिगत्यंताभावोदिगत्यंताभावेकालात्यंताभावेचास्ति । एवंकालात्यंताभावोपिकालात्यंताभावेदिगत्यंताभावेचास्तीत्यर्थः । तथाचात्माश्रयःप्रामाणिकइतिभावः ॥ अन्यथेति ॥ स्ववृत्तित्वान्योन्यवृत्तित्वयोरभावइत्यर्थः ॥ प्रातिभासिकत्वमिति ॥ तथाहि । देशकालयोःपारमार्थिकत्वायोगा(गात्व्यावहारिकप्रति)लौकिकप्रतिपन्नोपाधेरभावेनतत्रनिषेधप्रतियोगित्वासंभवात् । तथाब्रह्मणोप्यहमितिस्वप्रकाशतयासिद्धस्यशुक्तिवदध्यस्तभूतदेशकालसंभिन्नतयाप्रतीयमानत्वाभावेनप्रतिपन्नोपाधित्वासंभवे

दिक्कालात्यंताभाववच्चस्ववृत्तीअन्योन्यवृत्तीच । अन्यथा
त्वन्मतेपितयोःप्रातिभासिकसत्वंस्यादितिनकश्चिद्दोषः ।

नतत्रापिनिषेधप्रतियोगित्वासंभवेनव्यावहारिकत्वायोगात् । प्रतीयमानत्वेनचासत्त्वायोगात् । देशःसदासर्वत्रास्तिकालःसदासर्वत्रास्तीत्यबाधितप्रतीतेरपलपितुमशक्यतयातयोःस्ववृत्तित्वाद्यनंगीकारेदेशकालयोर्देशकालौप्रतिभ्रांतिप्रतिपन्नोपाधित्वप्राप्त्यातत्रनिषेधप्रतियोगिनोर्देशकालयोरूप्यवत्प्रातिभासिकत्वमेवपरिशेषात्स्यादित्यर्थः । तथाचदेशकालयोःस्ववृत्तित्वादिकेंगीकार्येसार्वदैशिकसार्वकालिकनिषेधप्रतियोगित्वाभावान्नासत्त्वलक्षणस्यदेशकालयोरतिव्याप्तिरितिभावः । तथाचासत्त्वलक्षणस्यदेशकालयोरपिनकश्चिदतिव्याप्तिरूपदोषइतिसिद्धमितिज्ञातव्यं । निषेधप्रतियोगित्वंस्वरूपेणेतिपक्षेआपादितमत्यंतासत्त्वमुपसं

SGDF
Sri Gargeshwari Digital Foundation

हरति ॥ तस्मादिति ॥ स्वोक्तमुपपादनंवियत्पादीयानुव्याख्यानसंमत्याद्रढयति ॥ तदुक्तमिति ॥ अनेन“ क्वाप्युक्तस्योपपादना ”दित्युक्तंप्रदर्शितंभवति ॥ अन्योन्याश्रयादिति ॥ अबाध्यत्वरूपपारमार्थिकत्वज्ञानेसतितद्धटितबाध्यत्वरूपमिथ्यात्वज्ञानं बाध्यत्वरूपमिथ्यात्वज्ञानेचसतितन्निरूप्याबाध्यत्वरूपपारमार्थिकत्वज्ञानमित्यन्योन्याश्रयइत्यर्थः॥स्वरूपेणैवेति॥

तस्मात्स्वरूपेणत्रैकालिकनिषेधप्रतियोगित्वेअत्यंतासत्वंदुर्वारं । तदुक्तं । “नासीदस्तिभविष्यच्चतदितिज्ञानमेयता । यदिबाधस्तदाऽसत्वंतेनैवांगीकृतंपुन” रिति॥ नापिपारमार्थिकत्वाकारेणत्रैकालिकनिषेधप्रतियोगित्वमित्यंत्यः । अबाध्यत्वरूपपारमार्थिकत्वस्यबाध्यत्वरूपमिथ्यात्वनिरूप्यत्वेनान्योन्याश्रयात् । रूप्यंनास्तिनासीन्नभविष्यतीतिनेहनानास्तिकिंचनेतिचस्वरूपेणैवनिषेधाच्च । अन्यथानृश्रृंगादेरपिनस्वरूपेणनिषेधःकिंतुसत्वेनेतिस्यात् । रूप्यवत्तत्पार्रमार्थिकत्वस्याप्यपरोक्षप्रतीत्यन्यथानुपपत्त्याधीकालेवर्तमानतयानिषेधायोगाच्च ।

तथाचपारमार्थिकत्वाकारेणनिषेधाभावात् पारमार्थिकत्वाकारेणनिषेधप्रतियोगित्वरूपमिथ्यात्वलक्षणस्यासंभवइ(त्यर्थः)त्याशयः ॥सत्त्वेनेति॥ पारमार्थिकत्वाकारेणेत्यर्थः । प्रकारांतरेणाप्यसंभवमाह॥ रूप्यवदिति॥ अयमर्थः। रूप्यंपारमार्थिकत्वाकारेणकुतोनिषिध्यतेस्वरूपेणैवकुतोननिषिध्यतइतिपृष्टेस्वरूपेणनिषेधेऽसत्त्वापत्त्याअपरोक्षप्रवृत्तेरनुपपत्त्याऽसद्विलक्षणस्वरूपस्यधी

SGDF
Sri Gargeshwari Digital Foundation

कालेवर्तमानतयातत्स्वरूपमंगीकृत्यतत्रपारमार्थिकत्वमेवनिषिध्यतेसविशेषणेहीतिन्यायादितियदिब्रूषे तर्हिपारमार्थिकत्वमपिरू
प्येनिषेद्धुंनयुक्तं । तस्यापिरूप्येअपरोक्षतःप्रतीयमानत्वेनधीकालेसत्त्वात् । अन्यथाप्रवृत्त्ययोगात् । तथाचासंभवइति । ननुरू
प्यगतपारमार्थिकत्वस्याप्यपरोक्षतःप्रतीत्यन्यथानुपपत्त्यास्वरूपेणनिषेधायोगात्तदपिपारमार्थिकत्वाकारेणैवनिषिध्यतइतिचेत्त
त्राह ॥ पारमार्थिकत्वस्येति ॥ रूप्यगतपारमार्थिकत्वस्यापिपारमार्थिकत्वेननिषेधेतस्याप्यपरोक्षतःप्रतीयमानत्वेनस्वरूपेण
निषेधायोगात्तस्यापिपुनःपारमार्थिकत्वाकारेणनिषेधेऽनवस्थेतिभावः । ब्रह्मण्यतिव्याप्तिंचाह ॥ सुखादीत्यादिना ॥ ननुब्र

पारमार्थिकत्वस्यपारमार्थिकत्वेननिषेधेत्वनवस्था । सुखाद्यनुभवरूपस्य
ब्रह्मणोपिमयिसुखाद्यनुभवइत्यादिप्रत्यक्षेणसएवाधस्तादित्यादिश्रुत्याचप्र
तिपन्नोपाधौनिर्धर्मकत्वेनपारमार्थिकत्वाकारेणनिषेधेनातिव्याप्त्यापत्तेश्च ।

ह्मणःपारमार्थिकत्वात्कथंपारमार्थिकत्वाकारेणनिषेधइत्यतउक्तं ॥ निर्धर्मकत्वेनेति ॥ ननुप्रतिपन्नोपाधावितिलक्षणेविशेषण
दानात्तस्यचब्रह्मण्यभावान्नातिव्याप्तिरितिचेन्न । उपाधेःप्रतिपन्नत्वंप्रत्यक्षेणश्रुत्यावावाच्यं । तादृशोपाधिद्वयमपिअहमर्थाध
रादिरूपंब्रह्मण्यस्तीत्युक्तं ॥ मयीत्यादि ॥ मयीत्यनेनाहमर्थस्याधिष्ठानत्वंप्रत्यक्षेणप्रतीयतइत्यर्थः । ननुमदंशस्यसुखानुभवं
प्रत्येवाधिष्ठानत्वंनब्रह्मप्रतीत्यतआह ॥ सुखादीति ॥ ननुनब्रह्मण्यतिव्याप्तिःप्रतिपन्नोपाधिशब्देनाध्यस्तंप्रतियदधिष्ठानंतेद

वविवक्षितं । नचब्रह्माधिष्ठानभूतोमदंशोधरादिश्चाध्यस्ताधिष्ठानं । ब्रह्मणोऽनध्यस्तत्वात् । एवंचाध्यस्ताधिष्ठानतयाप्रतिपन्नो
पाधेरभावेनतद्धटितलक्षणस्यनातिव्याप्तिरित्यतआह ॥ प्रतिपन्नेति ॥ आत्माश्रयादिति ॥ अध्यस्ताधिष्ठानत्वेनप्रतिपन्नो
पाधौनिषेधप्रतियोगित्वरूपमिथ्यात्वलक्षणस्याध्यस्तत्वरूपमिथ्यात्वघटितत्वेनात्माश्रय(यादित्य)इत्यर्थः । लक्षणमादौज्ञात्वाते
नलक्ष्यंपश्चात्प्रतिपत्तव्यं । लक्षणमपिचेल्लक्ष्यघटितंस्यात्तदास्वापेक्षयास्वस्यपूर्वज्ञातव्यत्वप्राप्त्याज्ञप्तावात्माश्रयइतिभावः । ए
वमेवैवंजातीयकेसर्वत्रद्रष्टव्यं । ननुअसच्चिद्भिन्नत्वमेवाध्यस्तत्वंविवक्षितं । नमिथ्यात्वं । येनपर्यायत्वप्राप्त्याआत्माश्रयःस्यादि

प्रतिपन्नोपाधिशब्देनाध्यस्ताधिष्ठानविवक्षायांचाध्यस्तत्वस्यनिरु
च्यमानमिथ्यात्वानतिरेकेणात्माश्रयात् । शेषवैयर्थ्याच्च ।

तिचेत्तर्हिलाघवान्निरुक्ताध्यस्तत्वमेवमिथ्यात्वमस्तु । अ्मितिचेत्तर्हिप्रतिपन्नोपाधावित्यादिशेषवैयर्थ्यंस्यादित्याह ॥ शेषेति॥
नचासच्चिद्भिन्नत्वरूपाध्यस्तत्वमेवमिथ्यात्वमस्तुशिष्टंत्यज्यतइतिवाच्यं । तादृशमिथ्यात्वस्यजगत्यस्माभि(रप्यंगी)रंगीकारेण
सिद्धसाधनापत्तेरित्याशयः । ननुप्रतिपन्नोपाधौपारमार्थिकत्वाकारेणत्रैकालिकनिषेधप्रतियोगित्वलक्षणस्यनब्रह्मण्यतिव्याप्ति
स्तस्यप्रतिपन्नोपाधेरेवाभावात् । नचमदंशोधरादिश्चतथाभूतोस्तीतिवाच्यं । सएवाधस्तादित्यादिश्रुत्यामदंशाधरादेःसमस्त
स्यापिब्रह्मण्यारोपितत्वावगमेनतस्यैवसर्वारोपाधिष्ठानतयामदंशादेःब्रह्मप्रत्यधिष्ठानत्वायोगादित्यस्वरसादेतादृशमिथ्यात्वस्यज

गतःसद्रूपत्वाविरोधित्वात्तत्साधनेअर्थांतरतास्यादित्याह ॥ ब्रह्मणइत्यादिना॥ यथानिर्धर्मकत्वेनब्रह्मणिपारमार्थिकत्वरूपधर्मा भावेपिसद्रूपत्वमस्ति । एवंघटादावपिपारमार्थिकत्वरूपधर्माभावेपिसद्रूपत्वमेवास्तु नमिथ्यात्वं । नचब्रह्मणःप्रतिपन्नोपाधिर्ना स्तिघटादेःसोस्तीतिवैलक्षण्यमितिवाच्यं । किंतावता ब्रह्मणःप्रतिपन्नोपाध्यभावेतत्प्रयुक्तपरिच्छिन्नत्वंनास्तीतिप्राप्तं । तथाचा परिच्छिन्नसद्रूपंजातं घटादेस्तुप्रतिपन्नोपाधिसद्भावेनतत्रसतोघटादेःतत्प्रयुक्तंपरिच्छिन्नत्वमस्तीतिप्राप्तं । तथाचघटादिकंपरि च्छिन्नसद्रूपंजातं । एवंचब्रह्मजगतोःपरिच्छिन्नत्वापरिच्छिन्नत्वाभ्यामेवविशेषेपिसद्रूपत्वेविशेषाभावाद्ब्रह्मवज्जगदपिपरमार्थसद्रू

ब्रह्मणःप्रतिपन्नोपाध्यभावेपिपारमार्थिकत्वरूपधर्माभावस्यब्रह्मण्यपरिच्छिन्नसद्रूपत्वाविरो धित्ववद्घटादेःप्रतिपन्नोपाधिसद्भावेपिपारमार्थिकत्वाभावस्यघटादौपरिच्छिन्नसद्रूपत्वाविरो धित्वोपपत्तेश्च । नहिब्रह्मण्यपिस्वरूपातिरिक्तंपारमार्थिकत्वंतत्वतोस्ति । अद्वैतहानेः ।

पंस्यादित्यर्थांतरतेतिभावः । ननुयथाद्रव्यत्वहीनंगुणादिकमद्रव्यमेव । एवंपारमार्थिकत्वहीनंजगदपरमार्थमेवभवति न(पार मार्थिकमिति)परमार्थसदितिचेत्तर्हिब्रह्माप्येवमपरमार्थसत्स्यात्कुतइत्यतआह ॥ नहीति ॥ कुतःपारमार्थिकत्वंतत्त्वतोनास्ती त्यतःपारमार्थिकत्वस्यतात्विकत्वेअद्वैतहानिःस्यादित्याह ॥ अद्वैतेति ॥ इदमुपलक्षणं । निर्धर्मकत्वादित्यपिद्रष्टव्यं । तथाच ब्रह्माप्यपरमार्थसत्स्यादितिभावः । ननुपारमार्थिकत्वस्यतत्त्वतःसत्त्वेपिनाद्वैतहानिः तस्यब्रह्मस्वरूपत्वेनब्रह्माद्वैताविरोधित्वा

SGDF
Sri Gargeshwari Digital Foundation

दित्यतआह ॥ नचेति ॥ नन्वेवंब्रह्मजगतोरुभयोरपिपारमार्थिकत्वसत्त्वेतयोःसाम्यमेवस्यात् । नचतद्युक्तं । ब्रह्मणोऽसदृश
त्वावगमादतःसत्यत्वमिथ्यात्वाभ्यामेववैषम्यंवाच्यमित्याशंकायामाह ॥ एवंचेति ॥ कालत्रयेपीति ॥ तथाचनित्यमिति
भावः ॥ कदाचिदेवेति ॥ तथाचानित्यमितिभावः । मिथ्यात्वस्ययद्द्वितीयलक्षणंतन्निराकरणंकारिकयासंगृह्णाति ॥ तथाचे
ति ॥ रूप्यादेरिति ॥ स्वरूपेणनिषेधेऽसत्त्वाप(त्तिरि)त्तेरितिभावः । तात्विकत्वेन पारमार्थिकत्वेन । आत्मनोपिच समान

नचसोपाधिकबाधाभावगर्भितंपारमार्थिकत्वंनिरुपाधिकब्रह्ममात्रं । एवंचब्रह्मकालत्रयेपिसत्वि
यदादिरूप्यादिचकदाचिदेवेतिनित्यत्वानित्यत्वाभ्यामेववैषम्यं । नतुसत्यत्वमिथ्यात्वाभ्यां । तथाच ।
"स्वरूपेणत्रिकालस्थनिषेधोनास्तितेमते । रूप्यादेस्तात्विकत्वेननिषेधस्त्वात्मनोपिच" ।^नापिज्ञानत्वे ॥२॥
नज्ञाननिवर्त्यत्वमितितृतीयः । अतीतघटादावव्याप्तेः । शुक्तिज्ञानेनरूप्यंनष्टमितिकदा(चिदनुभवा
भावेन)प्यननुभवेनतत्राप्यव्याप्तेश्च । एतावंतंकालंशुक्त्यज्ञानमासीद्भ्रमआसीदित्यनुभवेनशुक्तिव
त्सत्येअज्ञानभ्रमादौशुक्तिज्ञानेनतदज्ञानंनष्टमित्यनुभवेनज्ञानत्वेनज्ञाननिवर्त्यत्वस्यसत्वेनातिव्याप्तेश्च।

मितिशेषः । निर्धर्मकत्वादितिभावः ॥ अतीतेति ॥ ज्ञानेनविनास्वतएवनिवृत्तत्वादितिभावः ॥ अव्याप्तेश्चेति ॥ तथाचा
नुमानेसाध्यवैकल्यमितिभावः । लक्षणोपपादनायशुक्तिज्ञानेनतदज्ञानमित्यादि । इदमुपलक्षणं । भ्रमश्चनष्टइत्यनुभवेनेत्यपि
द्रष्टव्यं । नन्वज्ञानभ्रमयोर्मिथ्यात्वेनलक्ष्यत्वान्नातिव्याप्तिरित्यतउक्तं ॥ एतावंतमिति ॥ भ्रमरूपज्ञानस्वरूपस्यसत्यत्वेपिवि

SGDF
Sri Gargeshwari Digital Foundation

षयस्यबाध्यत्वंतुपरमतेब्रह्मस्वरूपत्वेनसत्यभूतसाक्षिविषयस्यदुःखादेरिवोपपन्नमितिभावः । लक्षणस्यासंभवंचाह ॥ अपरोक्षेति ॥ अपरोक्षाध्यास(स्य)निवर्तकतावच्छेदकंज्ञानेनज्ञानत्वं शंखःश्वेतःशंखत्वादित्यानुमानिकविशेषदर्शनरूपज्ञानेसत्यपिपीतःशंखइत्यपरोक्षभ्रमानिवृत्तेरतिप्रसक्तत्वात् । अतोपरोक्षज्ञानत्वमेववाच्यं । तथाचमिथ्याभूतेअपरोक्षजगदध्यासेकेवलज्ञानत्वावच्छिन्ननिवर्तकताकज्ञाननिवर्त्यत्वाभावादसंभवइतिभावः ॥ ज्ञानत्वव्याप्यधर्मेणेति ॥ तथाचापरोक्षज्ञानत्वस्यापिज्ञानत्वव्याप्यधर्मत्वेनब्रह्मापरोक्षज्ञाननिवर्त्येजगदपरोक्षाध्यासेनासंभवइतिभावः ॥ स्मृतित्वेनेति ॥ स्मृतित्वस्यज्ञानत्वव्याप्यधर्म

अपरोक्षाध्यासंप्रतिज्ञानस्यापरोक्षतयानिवर्तकत्वेनज्ञानत्वेनानिवर्तकत्वाच्च । ज्ञानत्वव्याप्यधर्मेणज्ञाननिवर्त्यत्वस्यचेच्छाद्यनिवर्त्येस्मृतित्वेनस्मृतिनिवर्त्येसंस्कारादावतिव्याप्तेः ।

त्वादितिभावः । ननुस्मृतौसंस्कारनिवर्तकतावच्छेदकंनस्मृतित्वं । येनज्ञानत्वव्याप्यधर्मेणज्ञाननिवर्त्यत्वसत्त्वादतिव्याप्तिःस्यात् । किंतूत्तरात्मविशेषगुणत्वमेव । नचेदंज्ञानत्वव्याप्यधर्मः । अतोलक्षणाभावान्नातिव्याप्तिरितिचेन्न । संस्कारनिवर्तकतावच्छेदकंस्मृतित्वमेववाच्यं । नोत्तरात्मविशेषगुणत्वं । यद्युत्तरात्मविशेषगुणत्वंसंस्कारनिवर्तकतावच्छेदकंस्यात्तर्हिंघटानुभवेनसंस्कारोत्पत्त्यनंतरंघटोमेभूयादितीच्छापिकदाचिद्भवति । तयापिसंस्कारनिवृत्तिःस्यान्निवर्तकतावच्छेदकस्योत्तरात्मविशेषगुणत्वस्यतत्रापिसत्त्वात् । नचेष्टापत्तिरितिवाच्यं । कुतइत्यतउक्तं ॥ इच्छाद्यनिवर्त्यइति ॥ नचलक्ष्यत्वान्नातिव्याप्तिरिति

SGDF
Sri Gargeshwari Digital Foundation

वाच्यं । तत्प्रयुक्तोमिथ्यात्वव्यवहारःस्यादित्यत्रतात्पर्यात् ॥ अनुभवत्वव्याप्यधर्मेणेति ॥ स्मृतित्वस्यानुभवत्वव्याप्यधर्मत्वाभावान्नसंस्कारेऽतिव्याप्तिरितिभावः ॥ यथार्थस्मृतिनिवर्त्येति ॥ यथार्थस्मृतित्वेनयथार्थस्मृतिनिवर्त्येत्यर्थः ॥ अव्याप्तेरिति ॥ अयथार्थस्मृतिविषयनिवर्तिकायांयथार्थस्मृतौअनुभवत्वव्याप्यधर्माभावादितिभावः ॥ भ्रमोत्तरप्रमेति ॥ अत्रप्रमाशब्दोनयथार्थानुभवपरः । तथात्वेअयथार्थस्मृतिविषयेव्याप्त्यनिवारणात् । अतोयथार्थज्ञानमात्रपरः । अत्रयथार्थपदाभावेधारावाहिकभ्रमस्थलेपूर्वभ्रमविषयेभ्रमोत्तरभ्रमरूपज्ञाननिवर्त्यत्वाभावादव्याप्तिःस्यात् । अतोयथार्थपदं । भ्रमोत्तरपदाभा 79

अनुभवत्वव्याप्यधर्मेणतन्निवर्त्यत्वस्यचयथार्थस्मृतिनिवर्त्यायथार्थस्मृतिविषयेऽव्याप्तेः । भ्रमोत्तरप्रमानिवर्त्यत्वस्यचतत्वज्ञानसंस्कारनिवर्त्याज्ञानसंस्कारेअव्याप्तेः ।

वेइयंशुक्तिरितियथार्थज्ञानानंतरंतत्रैवपुनर्दोषवशादिदंरजतमितिभ्रमरूपंज्ञानंजा(तां)यते । तथाचतद्विषयेरजतेपूर्वतनयथार्थज्ञाननिवर्त्यत्वाभावादव्याप्तिःस्यात् । अतोभ्रमोत्तरपदमितिद्रष्टव्यं । तथाचायथार्थस्मृत्यनंतरभाविन्याःयथार्थस्मृतेरपिभ्रमोत्तरयथार्थज्ञान(त्वेनत)त्वात्तन्निवर्त्यत्वमयथार्थस्मृतिविषयेऽस्तीतिनाव्याप्तिरितिभावः ॥ अज्ञानसंस्कारइति ॥ तत्त्वज्ञानेनाज्ञाननिवृत्त्यनंतरमपिजीवन्मुक्त्यवस्थायामज्ञानसंस्कारोस्तीत्यंगीकार्यं । अन्यथाभिक्षाटनादौप्रवृत्तिर्नस्यात् । सचाज्ञानसंस्कारःतत्वज्ञानसंस्कारेणनिवर्ततइत्यंगीकृतं । तथाचतस्यभ्रमोत्तरभावितत्त्वज्ञानसंस्कारनिवर्त्यत्वेनप्रमानिवर्त्यत्वाभावादव्या

SGDF
Sri Gargeshwari Digital Foundation

व्याप्तिरित्यर्थः ॥ स्वेति ॥ स्वशब्देनाज्ञानकार्यप्रपंचोग्राह्यः । तदुपादानभूतंयदज्ञानंतन्निवर्तकंयज्ज्ञानंतन्निवर्त्यत्वमित्यर्थः । " य
तोज्ञानमज्ञानस्यतत्कार्यस्यवानिवर्तक "मित्यंगीकारात् । अस्यापिलक्षणस्यस्वशब्देनाज्ञानसंस्कारःतदुपादानभूतंयदज्ञानंतस्य
जगदुपादानत्वात् । तन्निवर्तकंयत्तत्त्वज्ञानंतन्निवर्त्यत्वंनास्ति । तत्संस्कारनिवर्त्यत्वात् । अतोऽज्ञानसंस्कारेव्याप्तिःस्पष्टेतिता
मनुक्त्वादूषणांतरमाह ॥ अनादीति ॥ जीवईशोविशुद्धाचि(द्भेदःतस्यास्तयोर्द्वयोरित्या)दित्यादिवचनेनाऽनादिषुअध्यस्तेष्व
विद्यादिषुलक्षणाभावादव्याप्तिः । स्वशब्देना(ज्ञाना)विद्यादयोग्राह्याः । तेषांचानादित्वेनोपादानाभावेनतद्धटितलक्षणस्याप्य

॥३॥ स्वोपादानाज्ञाननिवर्तकज्ञाननिवर्त्यत्वस्यचानाद्यध्यासेऽभावात् । लाघवेनाज्ञानोपादानकत्व
स्यैवलक्षणत्वापाताच्च । तथाच" विज्ञाननाश्यतामिथ्यारूप्यादौनानुभूयते । किंत्वधिष्ठानवत्स
त्येतदज्ञानेऽनुभूयते " ॥ एतेनस्वात्यंताभावाधिकरणएवप्रतीयमानत्वंमिथ्यात्वमितिचतुर्थो
ऽपिनिरस्तः । अत्यंताभावस्यतात्विकत्वेप्रातिभासिकत्वेव्यावहारिकत्वेचदोषस्योक्तत्वात् ।

भावादितिभावः ॥ लाघवेनेति ॥ स्वोपादानेत्यादिलक्षणापेक्षयास्यलघुत्वादनादिपदार्थाव्याप्तेरुभयत्रापितुल्यत्वादितिभावः ।
अस्त्वितिचेन्न । अज्ञाननिराकरणेनदूष्यत्वात् । सिद्धांतेअज्ञानशब्दवाच्यप्रकृ(त्याद्युपा)त्युपादानकत्वांगीकारे(ण)णैतादृशमि
थ्यात्वसाधनेसिद्धसाधनतेतिबोध्यं । तृतीयलक्षणनिराकरणमुपसंहरति ॥ तथाचेति ॥ नानुभूयते । तथाचाव्याप्तिरितिभा
वः । अनुभूयते । तथाचातिव्याप्तिरितिभावः । एतेनेत्युक्तंविशदयति ॥ अत्यंताभावस्येति ॥ तात्विकत्वेऽद्वैतहानिः ।

SGDF Sri Gargeshwari Digital Foundation

प्रातिभासिकत्वेसिद्धसाधनं । व्यावहारिकत्वेतादृशात्यंताभावप्रतियोगिनोप्रातिभासिकस्यप्रपंचस्यपारमार्थिकत्वापत्तिरित्यादि
दोषस्योक्तत्वादितिभावः ॥ इतिचपक्षेदोषस्येति ॥ रूप्यादावव्याप्तिरात्मन्यतिव्याप्तिरितिदोषस्येत्यर्थः । पंचमे सद्विविक्त
त्वपक्षे ॥ सत्त्वादिति ॥ तथाचान्योन्याभावस्यप्रतियोगितावच्छेदकविरुद्धत्वा(त्सत्ववति)त्सत्ताजातिमद्विविक्तत्वाभावादसं
भवइतिभावः ॥ सिद्धसाधनादिति ॥ ब्रह्मवैलक्षण्यांगीकारादितिभावः । सद्विविक्तत्वंनामसद्रूपत्वाभावइत्यर्थस्योक्तत्वात्प

॥४॥ अत्यंताभावप्रतियोगित्वंस्वरूपेणेतिपक्षेपारमार्थिक(त्वेनेतिचपक्षे)त्वाकारेणेतिचपक्षेदोषस्यो
क्तत्वाच्च॥ पंचमेपि(किंसत्)सत्किंसत्ताजातिमद्विवक्षितं अबाध्यंवा ब्रह्मवा। नाद्यः। त्वन्मते
घटादौजातेस्सत्वात्। द्वितीयेबाध्यत्वंमिथ्यात्वमितिस्यात्। तच्चनिरस्तं। नतृतीयः। सिद्ध
साधनात्। नृशृंगादावपिसद्रूपत्वाभावादन्यस्यासत्वस्याभावेनात्यंतासत्वापाताच्च। मन्मतेअ
बाध्यत्वादिरूपस्यसत्वस्याऽभिधेयत्वादिवत्स्वाश्रितत्वेनब्रह्मणिसत्वाभावेसद्रूपत्वासिद्धेश्च।

क्षेत्यंतासत्त्वापत्तिरित्याह ॥ नृशृंगादावपीति ॥ अनेनमिथ्यात्वलक्षणस्यनृशृंगादावतिव्याप्तिश्चस्यादितिसूचितंभवतीतिज्ञा
तव्यं । ब्रह्मण्यपिसद्रूपत्वाभावस्यसत्त्वादतिव्याप्तिश्चस्यादित्याह ॥ मन्मतइति ॥ सत्त्वरूपधर्मस्यनिर्धर्मकब्रह्मण्यभावेंनसद्रू
पत्वमपितत्रनास्ति । ननुब्रह्मसत्त्वरहितत्वात्सद्रूपंनभवतीत्युक्तौसत्त्वएवव्यभिचारस्स्यात् । आत्माश्रयप्रसंगेनसत्त्वेसत्त्वाभावा

SGDF
Sri Gargeshwari Digital Foundation

त् । सत्त्वंसदितिप्रतीत्यासद्रूपत्वंचास्तीतिचेन्न । अबाध्यत्वादिरूपसत्त्वस्याभिधेयत्वादिवत्स्वाश्रितत्वांगीकारेणहेतोरेवाभावा न्नव्यभिचारः । तथाचात्माश्रयस्यप्रामाणिकत्वेनसह्यत्वात् । ब्रह्मणिसद्रूपत्वाभावावश्यंभावादतिव्याप्तिःस्यादेवेतिभावः । मिथ्यात्वलक्षणपंचकदूषणमपिसंगृह्णाति ॥ तस्मादिति ॥ अनिर्वाच्येसदसद्विलक्षणत्वपक्षे प्रतीते प्रतिपन्नोपाधौ प्रतिषेध्य ता । त्रैकालिकनिषेधप्रतियोगित्वं । धीनाश्यत्वे ज्ञाननिवर्त्यत्वपक्षे । ननुभवन्मतेपिशुक्तिरजतादेर्मिथ्यात्वात्त्वयापितन्निर्वक्त

तस्मात् । “ अनिर्वाच्येऽप्रसिद्ध्यादिःप्रतीतेप्रतिषेध्यता । स्वाश्रयेऽत्यंतविरहःसद्विलक्षणताथा । इतिपक्षत्रयेऽत्यंतासत्वंस्यादनिवारितं । धीनाश्यत्वेत्वनित्यत्वमेवस्यान्नमृषात्मता ” । ममत्वत्यंतासत्वमेवमिथ्यात्वमितिनास्मत्प्रतिबंदी ॥ ७ ॥ इतिमिथ्यात्वनिरुक्तिभंगः ॥ १ ॥ अस्तुवामिथ्यात्वंयत्किंचित् । तथापिमिथ्यात्वमबाध्यंबाध्यंवा । आद्येअद्वैतहानिः । न हिप्रपंचोपाधिकंभ्रमकालानिश्चितंतन्मिथ्यात्वंनिरुपाधिकभ्रमकालनिश्चिताधिष्ठानब्रह्ममात्रं ।

व्यमेवेतिनममैवपर्यनुयोगइत्यतआह ॥ ममत्विति ॥ मदभिमतंमिथ्यात्वंतुनत्वयाप्रपंचस्यांगीकर्तुंशक्यं । सदसद्वैलक्षण्यांगीकारेणापसिद्धांतापातादितिभावः ॥ ७ ॥ इतिमिथ्यात्वनिरुक्तिभंगविवरणं ॥ १ ॥ ननुमिथ्यात्वस्याबाध्यत्वेपिब्रह्मस्वरूपत्वांगीकारान्नाद्वैतहानिरित्यतआह ॥ नहीति ॥ प्रपंचेति ॥ कालादिप्रपंचघटितत्वादितिभावः ॥ भ्रमकालेति ॥

रूप्यमिथ्यात्वस्यभ्रमकालेनिश्चयेरूप्यभ्रमाद्रूप्यार्थिनःप्रवृत्तिर्नस्यादितिभावः । ब्रह्मणोभ्रमकालेनिश्चितत्वोपपादनायाधिष्ठाने त्युक्तं ॥ तस्यमांप्रत्यपिसिद्धत्वादिति ॥ मिथ्यात्वस्यब्रह्मस्वरूपत्वेप्रपंचोमिथ्येत्यस्यप्रपंचोब्रह्मस्वरूपवानित्यर्थःस्यात् । इदंचमांप्रत्यपिसिद्धं । ब्रह्मणोव्याप्तत्वेनप्रपंचेपिसत्त्वेनसिद्धसाधनतेतिभावः ॥ व्यभिचारश्चेति ॥ दृश्यत्वसत्त्वेपिमिथ्यात्वाभावादितिभावः । हेतोरेवाऽभावान्नव्यभिचारइत्याशंक्यनिराकरोति ॥ मिथ्यात्वस्येति ॥ कुतोनुमानवैयर्थ्यमित्यतआह ॥

तस्यमांप्रत्यपिसिद्धत्वात् । दृश्यत्वादेर्मिथ्यात्वएवव्यभिचारश्च । मिथ्यात्वस्यचादृश्यत्वेनुमानवैयर्थ्यं । तस्यसाध्यज्ञस्यर्थत्वात् । अंत्येसिद्धसाधनं अद्वैतश्रुतेरतत्वावेदकत्वंचस्यात् । जगच्चसत्यंस्यात् । आत्मवत् । नचात्मत्वमुपाधिः । सत्यत्वंविनातद्विरुद्धस्यमिथ्यात्वस्यमिथ्यात्वेव्याघातवदज्ञातृत्वादिरूपानात्मत्वस्यासत्यत्वंविनाव्याघाताभावेनोपाधेरप्रयोजकत्वात् ।

तस्येति ॥ सिद्धसाधनमिति ॥ जगन्निष्ठमिथ्यात्वस्यबाध्यतायाअस्माभिरंगीकारादितिभावः ॥ अतत्वेति ॥ बाध्यभूतमिथ्यात्वावेदकत्वादितिभावः ॥ जगच्चेति ॥ जगत्सत्यंमिथ्याभूतमिथ्यात्वकत्वादात्मवदित्यनुमानमुक्तंभवति ॥ उपाधिरिति ॥ आत्मनिसाध्यव्यापकत्वात्पक्षेजगत्यभावेनसाधनाव्यापकत्वाच्चेतिंभावः ॥ सत्यत्वंविनेत्यादि ॥ अयमभिप्रायः । आत्मत्वमुपाधिमुक्त्वातद्व्यतिरेकेण जगत्सत्यंन । अनात्मत्वाद्व्यतिरेकेणाऽऽत्मवदितिसत्प्रतिपक्षोन्नयनंकार्यं । तन्नसंभवति ।

SGDF Foundation

शंका चेदनुमाऽस्त्येव न चेच्छंका ततस्तराम् । व्याघातावधिराशंका तर्कश्शंकावधिर्मतः ॥ न्यायकुसुमांजलौ

अनात्मत्वमस्तुसत्यत्वमेवास्त्वित्यप्रयोजकत्वेनसत्यत्वेआत्मत्वोपाधेरप्रयोजकत्वात् । नचैवंभवदीयेस्थापनानुमानेपिअस्तुमिथ्याभूतमिथ्यात्वकत्वंसत्यत्वंमास्त्वित्यप्रयोजकत्वमेवेतिसाम्यमितिवाच्यं । मिथ्याभूतमिथ्यात्वकत्वेसत्यत्वस्यैवप्राप्त्यापुनःसत्यत्वंमास्त्वित्युक्तेःस्वक्रियाविरुद्धत्वेनव्याघाताख्यानुकूलतर्कस्यहेतुसाध्यव्याप्तिग्राहकस्यसत्त्वान्नाप्रयोजकताशंक्या । शंकायाः व्याघातावधित्वात् । " व्याघातावधिराशंके "त्युदयनोक्तेः । ननु(तर्हि)मदीयेसत्प्रतिपक्षानुमानेपिव्याघातरूपानुकूलतर्क(स्यहेतुसाध्यव्याप्तिग्राहकस्य)सत्त्वान्नाप्रयोजकतेतिचेन्न । अनात्मत्वमस्तुसत्यत्वमेवास्त्वित्यत्रानात्मत्वसत्यत्वयोर्व्याघाताभावात् । नन्वस्तिव्याघातः । असत्यत्वमनात्मत्वंसत्यत्वमेवचात्मत्वमितिचेन्न । अनात्मत्वस्याज्ञातृत्वादिरूपत्वात्सत्यत्वस्यचाबाध्यत्वादिरूपत्वेनविरोधाभावादिति । यद्वाइत्थंव्याख्येयं । आत्मत्वंनोपाधिः कुतइत्यतउक्तंअप्रयोजकत्वादिति । साध्याभावाविनाभाव्यभावत्वाभावेनसत्यत्वेआत्मत्वस्याप्रयोजकत्वादित्यर्थः । " साध्याभावाविनाभावीसउपाधिर्यदत्यय "इतिवचनात् । तथाचोपाधेःसाध्याभावाविनाभाव्यभावत्वेनयत्रात्मत्वाभावस्तत्रसत्यत्वाभावइतिव्याप्तिस्तावदवश्यंग्राह्या । सानयुक्ता । अनात्मत्वेपिसत्यत्वोपपत्तेरित्यप्रयोजकत्वात् । ननुतर्हिंभवदनुमानेपिमिथ्याभूतमिथ्यात्वकत्वेपिसत्यत्वंमास्त्वित्यप्रयोजकतास्यादितिचेन्न । सत्यत्वंविनामिथ्याभूतमिथ्यात्वकत्वेंगीक्रियमाणेव्याघातेनाप्रयोजकतायाःशंकानर्हत्वात् । ननुतर्हियत्रात्मत्वाभावः तत्रसत्यत्वाभावइत्युपाध्यभावसाध्याभावयोर्व्याप्तावपिनाप्रयोजकता । असत्यत्वरूपानात्मत्वमंगीकृत्यसत्यत्वाभावानंगीकारेव्याघातसाम्यादितिचेन्न । अज्ञातृ(त्वादिरू)त्वरूपानात्मत्वस्यअसत्यत्वंसत्यत्वाभावंविनावस्थित्यंगीकारेव्याघाताभावादिति

SGDF
Sri Gargeshwari Digital Foundation

योजनाद्वयेपिप्रमेयंत्वेकमेव । इयांस्तुविशेषः । उपाधिमुक्त्वाक्रियमाणेसत्प्रतिपक्षोन्नयनेअप्रयोजकतापरत्वेनप्राचीनव्याख्यानं उपाधेरप्रयोजकत्वादितिमूलग्रंथस्वारस्यानुसारेणसाध्याभावाविनाभाव्यभावत्वस्योपाधिलक्षणत्वेनोपाध्यभावसाध्याभावयोरव इयंव्याप्तिर्ग्राह्या । तत्राप्रयोजकतापरत्वेनद्वितीयव्याख्यानमिति ॥ननुमिथ्यात्वमबाध्यमित्यंगीक्रियते । नचाद्वैतहानिः । ब्रह्म स्वरूपत्वांगीकारात् । नचसोपाधिकनिरुपाधिकयोरैक्यायोगः । निरुपाधिकब्रह्ममात्रत्वाभावेपिद्वितीयाभावोपलक्षितब्रह्मस्व रूपत्वांगीकारात् । द्वितीयाभावोपलक्षितंचब्रह्मस्वरूपंननिरुपाधिकंनवाभ्रमकालेनिश्चितं । द्वितीयरूपप्रपंचभ्रमकालेतदभावो

नचमिथ्यात्वंनब्रह्ममात्रंकिंतुद्वितीयाभावोपलक्षितंब्रह्मेतिवा
च्यं । उपलक्षणेद्वितीयाभावएवबाध्याऽबाध्यविकल्पात् ।

पलक्षितब्रह्मस्वरूपस्यानिश्चितत्वात् । अतोनोक्तदोषइत्याशंक्यनिषेधति ॥ नचेति ॥ उपलक्षणइति ॥ उपलक्षणेद्वितीया भावरूपमिथ्यात्वएवबाध्याबाध्यविकल्पस्येदानीमस्माभिःक्रियमाणत्वेनमिथ्यात्वंमिथ्यात्वोपलक्षितब्रह्मस्वरूपमित्युक्तंस्यात् । तथाचात्माश्रयइतिसांप्रदायिकोर्थः । केचित्तुउपलक्षणस्यद्वितीयाभावस्यबाध्यत्वेद्वितीयस्यप्रपंचस्याबाध्यत्वेनसत्यत्वंस्यात् । अबाध्यत्वेअद्वैतहानेरित्येवंमिथ्यात्वंयदुपलक्षितब्रह्मस्वरूपमित्युच्यतेतस्मिन्नुपलक्षणेद्वितीयाभावएवबाध्याबाध्यविकल्पप्रसरा दित्यर्थइत्याहुः । द्वितीयाभावस्योपलक्षणत्वमेवायुक्तं । उपलक्ष्यस्याभावादित्याह ॥ द्वितीयेत्यादि ॥ अप्रसिद्धस्योपलक्ष्य

83

SGDF
Sri Gargeshwari Digital Foundation

स्यप्रसिद्धमुपलक्षणंभवति । ब्रह्मतुद्वितीयाभावरूपोपलक्षणज्ञाना(त्पूर्वमेव)त्प्रागेवज्ञातमितिनतस्योपलक्ष्यत्वंयुक्तं । कथंतत्पूर्वं ज्ञातमस्तीत्यतउक्तं ॥ द्वितीयाभावेति ॥ अभावज्ञानेअधिकरणज्ञानस्यकारणत्वाद्द्वितीयाभावरूपोपलक्षणस्यज्ञानार्थंतदधि करणभूतशुद्धब्रह्मज्ञानमावश्यकमित्यर्थः । तथाचोपलक्षणज्ञाना(त्पूर्वमेव)त्प्रागेवज्ञातंशुद्धंब्रह्मप्रतिनद्वितीयाभावस्योपलक्षण त्वंयुक्तमितिभावः । किंचाहमज्ञइतिप्रतीयमानत्वेनांगीकृतायाअविद्यायाःप्रतीतिस्तदधिष्ठानभूतशुद्धब्रह्मस्फुरणंविनानसंभव तीत्यविद्यारोपार्थमधिष्ठानभूतशुद्धब्रह्मज्ञानमावश्यकमित्यभिप्रायेणोक्तंअविद्याधिष्ठानतयेति । प्रकारांतरेणापिभासमानत्वमु

द्वितीयाभावाधिकरणतयाऽविद्याधिष्ठानतया(अविद्यासाक्षि)तत्साक्षितयाचभासमानचिदन्य स्योपलक्ष्यस्याभावेनद्वितीयाभावस्योपलक्षणत्वायोगाच । ननुरूप्यधर्मोमिथ्यात्वमपिमिथ्यैव ।

८५

पपादयति ॥ तत्साक्षितयेति ॥ (अविद्यासाक्षितयेति ॥) अविद्याविषयकसाक्षिरूपज्ञानतयेत्यर्थः । तच्चब्रह्मस्वरूपंस्व प्रकाशमितिसदाभासतइत्यर्थः। ननुकाकेनगृहगतोत्तृणत्वादिसंस्थानविशेषइवप्रकाशमानब्रह्मगतंधर्मांतरमेवद्वितीयाभावेनोपल क्ष्यतामित्यतउक्तं ॥ अन्यस्येति ॥ निर्धर्मकत्वादितिभावः । जगत्सत्यंमिथ्याभूतमिथ्यात्वकत्वादात्मवदित्युक्तानुमानेरूप्ये व्यभिचारइत्याशयेनतत्रहेतुसत्त्वंसाधयति ॥ नन्वित्यादिना ॥ रूप्यधर्मइतिहेतुगर्भविशेषणं । धर्मिणएवाभावादितिभावः। ॥ ४३ ॥
तथाचरूप्यगतंमिथ्यात्वंमिथ्याअविद्यमानधर्मिकत्वादित्यनुमानमुक्तंभवति । एवंचरूप्येमिथ्याभूतमिथ्यात्वकत्वेसत्यपिसत्य

1 रूप्यं मिथ्याभूतमिथ्यात्वाधिकरणं न भवति । सत्यभूततद्विरुद्धसत्यत्वानधिकरणत्वाभावात् । यत् सत्यभूततद्विरुद्धाधिकरणं न भवति तत् मिथ्याभूततदधिकरणं न भवति । यथा गोत्वविरुद्धसत्यगोत्वाभावानधिकरणं गौः मिथ्याभूतगोत्वाधिकरणं न भवति । तरंगिणी इत्यत्र अमिथ्यात्वमुपाधिः ।

त्वाभावाद्व्यभिचारइतिहृदयं । सिद्धांतीउक्तानुमानस्यप्रतितर्कपराहतिमाशंकते ॥ नचेति ॥ तथात्वइति ॥ रूप्यगतमिथ्या त्वंयदिमिथ्यास्यात्तदापरस्परविरुद्धयोरेकस्याभावेन्यतरस्यसत्त्वनियमात् तत्सत्यत्वंसत्यंस्यादितिप्रतितर्कपराहतत्वादुक्तानुमान मसत् । तथाचरूप्येहेतोरेवाभावान्नव्यभिचारइतिहृदयं । ननुयदिधर्मिणएवमिथ्यात्वेनतत्रत्ययोर्विरुद्धयोस्सत्यत्वमिथ्यात्वरू पधर्मयोर्द्वयोरपिमिथ्यात्वमुच्यते तर्हिपरस्परविरुद्धयोरित्युक्तनियमभंगइत्यतआह ॥ परस्परेति ॥ ननुयत्रधर्मीअसन्तत्रा प्ययंनियमःकिंनस्यादित्यतआह ॥ नहीति ॥ तयोरपिसहानवस्थानरूपविरोधसद्भावादितिभावः । ननुवंध्यासुतेश्यामत्वा ८५

[1]नचतथात्वेरूप्यस्यसत्यत्वंसत्यंस्यादितिवाच्यं । [2]धर्मिणोमिथ्यात्वेविरुद्धयोरपिधर्मयोर्मिथ्यात्वात् । परस्परविरुद्धयोरेकस्याभावेऽन्यस्यसत्त्वनियमस्तुयत्रधर्मीस(न्त)त्यस्तत्रैव । नहिवंध्यासुतस्य श्यामत्वाद्यभावेगौरत्वंसत्यं । नवास्वप्नेज्ञातस्यगजस्यमिथ्यात्वेतत्रैवज्ञातस्तदभावस्सत्यइतिचेन्न ।

भावेगौरत्वंनसत्यं तयोःपरस्परविरहव्याप्यत्वेनपरस्परविरहरूपत्वाभावात् । तथाचपरस्परविरहरूपविरोधवतोरेकस्याभावेन्य स्यसत्त्वमितिविवक्षितनियमस्यव्यभिचाराभावात् । प्रकृतेचरूप्यगतमिथ्यात्वसत्यत्वयोःपरस्परविरहरूपत्वसद्भावेनतन्मध्ये मिथ्यात्वस्यमिथ्यात्वे(सत्यत्वस्यसत्यत्वंस्यादेवे)सत्यत्वंसत्यंस्यादेवेत्यतोस्यापिनियमस्यव्यभिचारमाह ॥ नवेति ॥ तत्रैवेति॥ स्वप्नएवेत्यर्थः । तदभावो गजाभावः । तथाचस्वाप्नगजतदभावयोःपरस्परविरहरूपविरोधवतोरेकस्याभावेऽपरस्यसत्त्वाभावा

२ तथा च प्रयोगः रूप्यगतत्वेनोच्यमाने सत्यत्वमिथ्यात्वे मिथ्या मिथ्यात्वोपेतधर्मिकत्वात् । स्वप्नप्रतीतगजरूपवत् ।

SGDF
Foundation

१ रूप्यमिथ्यात्वं मिथ्या मिथ्यात्वोपेतधर्मिकत्वादित्यत्र धर्मसत्त्वप्रयुक्तसत्त्वाभावः उपाधिः। साधनीभूतमिथ्यात्वोपेतधर्मिकत्वावच्छिन्नमिथ्यात्वं बन्ध्यासुतश्यामत्वे तत्र सत्त्वाभावः। मिथ्यात्वोपेतधर्मिकत्वं रूप्यमिथ्यात्वे तत्र सत्त्वमेव बाधकज्ञानविहितत्वात्। साधनावच्छिन्नसाध्यव्यापकत्वात् न व्यक्ति साध्याव्यापकता।

द्यभिचारइतिभावः । तथाचरूप्यगतेमिथ्यात्वसत्यत्वेमिथ्याअविद्यमानधर्मिकत्वात्स्वाप्नगजतदभाववदित्यनुमानेनोभयोरपिमिथ्यात्वावगमेनमिथ्याभूतमिथ्यात्वकत्वस्यजगत्सत्यत्वसाधकस्यरूप्येव्यभिचारःसुस्थइतिहृदयं । किंचरूप्यधर्मोमिथ्या(त्वमपि)त्वंमिथ्याअविद्यमानधर्मिकत्वादित्यत्राविद्यमानधर्मिकत्वेपिमिथ्यात्वंसत्यमेवास्त्वित्यप्रयोजकता । ननुधर्मिणएवाभावेतद्गतमत्यंताभावप्रतियोगित्वरूपमिथ्यात्वंकथंसत्यंभविष्यतीत्यतआह ॥ प्रतिपन्नेति ॥ ततःकिमित्यतआह ॥ नचप्रतियोगित्वमिति ॥ धर्मांतरवद्रूपादिवदितिव्यतिरेकदृष्टांतः । ननुतर्हिंधर्म्यसत्त्वेधर्मासत्त्वनियमभंगइत्यतआह ॥ धर्म्यसत्त्वइति ॥

प्रतिपन्नोपाधौत्रैकालिकनिषेधप्रतियोगित्वंहिमिथ्यात्वं । नचप्रतियोगित्वंधर्मांतरवद्धर्मिसत्वा(त्तासा)पेक्षमित्यनिर्वाच्यत्वभंगेवक्ष्यते । १ धर्म्यसत्वेधर्मासत्वंतुधर्मिसत्तासापेक्षधर्मविषयं मिथ्यात्वंतुतत्प्रतिकूलं । अन्यथासिद्धसाधनात् ।

ननुतर्ह्यत्यंताभावप्रतियोगित्वाख्यमिथ्यात्वरूपधर्मस्यापिरूपादिवद्धर्मिसत्त्वसापेक्षत्वेननाप्रयोजकताशंकावकाशइत्यतआह ॥ मिथ्यात्वंत्विति ॥ मिथ्यात्वंतुधर्मिभूतप्रपंचसत्यत्वस्यविरहरूपं अतोधर्मिसत्त्वंनापेक्षते प्रत्युतधर्मिभूतप्रपंचसत्त्वंप्रतिक्षिपतीत्यर्थः ॥ अन्यथेति ॥ प्रपंचेअत्यंताभावप्रतियोगित्वरूपधर्मस्यसत्त्वाविरोधित्वइत्यर्थः ॥ सिद्धेति ॥ लोकेत्यंताभावप्रतियोगित्वरूपधर्मस्यधर्मिसत्त्वप्रतिकूलत्वस्यैवदर्शनात् अत्रतदनंगीकारेप्रपंचेत्यंताभावप्रतियोगित्वंधर्मिसत्त्वसहिष्णुभूतंपारि

SGDF Sri Gangeshwari Digital Foundation

भाषिकंस्यात् । तथाचपारिभाषिकात्यंताभावप्रतियोगित्वसाधनेतस्यप्रपंचसत्त्वाविरोधित्वेनदृश्यत्वानुमानेसिद्धसाधनतास्यादि तिभावः । [इतिसांप्रदायिकोऋजुःपंथाः । तरंगिणीकारास्तु । परोक्तरूप्यमिथ्यात्वमिथ्यात्वसाधकेमिथ्यात्वोपेतधर्मिकत्वेहे तावप्रयोजकतामुक्त्वाधर्म्यसत्वप्रयुक्तसत्वाभावत्वमुपाधिरित्याह ॥ धर्मीति ॥ वंध्यासुतश्यामत्वगौरत्वयोःसाध्यव्यापकत्वात् साधनाव्यापकतामाह ॥ मिथ्यात्वमिति ॥ रूप्यगतमिथ्यात्वमित्यर्थः । तथाचतस्यधर्मिसत्यत्वविरहरूपत्वेनतत्प्रतिक्षेपकत याधर्म्यसत्वप्रयुक्तंसत्वमेवास्तीतिसाधनाव्यापकत्वमितिभावः । धर्मिसत्वप्रयुक्तसत्ववत्वमित्येवोक्तौवंध्यासुतगतश्यामत्वगौर त्वयोःसाध्याव्यापकत्वापत्तेर्नञ्द्वयगर्भत्वमितिमंतव्यं । ननुयदिअत्यंताभावप्रतियोगित्वरूपंमिथ्यात्वंविवक्षितंस्यात् । तदात

किंचप्रतिपन्नोपाधावनिषिद्धंप्रत्युतबाधकज्ञानेनविहितमपिरूप्यमिथ्यात्वंयदिप्राति
भासिकरूप्यसंबंधमात्रेणप्रातिभासिकं तर्हिसतिब्रह्मणिनिषिद्धाअपिधर्मास्संतःस्युः।

त्धर्मिसत्वप्रतिकूलंस्यात् । नचैवं । किंतुब्रह्मभिन्नत्वादिरूपमन्यदेव । तच्चधर्मिसत्तानुकूलं । तथाचधर्म्यसत्वप्रयुक्तसत्वाभा वस्यैवसत्वात्साधनव्यापकत्वमुपाधेरित्यतआह ॥ अन्यथेति ॥ तथाचरूप्यमिथ्यात्वंमिथ्यानामब्रह्मभिन्नमितिचसाधितंस्या त् । तथाचसिद्धसाधनतेत्यर्थइतिधर्म्यसत्वइत्यादिग्रंथंव्याकुर्वते ।] किंचरूप्यमिथ्यात्वंमिथ्याअविद्यमानधर्मिकत्वादित्यस्य ह्ययमर्थः । प्रातिभासिकरूप्यसंबंधित्वमात्रेणैवमिथ्यात्वंप्रातिभासिकंयद्यत्संबंधितत्तत्समानमितिनियमादिति । तत्रचातिप्रसं गाःस्युरित्याह ॥ किंचेत्यादिना ॥ अनिषिद्धमित्यादिविशेषणद्वयंमिथ्यात्वस्याप्रातिभासिकत्वोपपादनायेतिज्ञातव्यं । रूप्यव

SGDF
Sri Gargeshwari Digital Foundation

४४

त्अनिषिद्धंमिथ्यैवरजतंप्रत्यभादितिबाधकज्ञानेनास्तीतिविहितमित्यर्थः । रूप्यसंबंधो रूप्यधर्मिकत्वरूपः । निषिद्धाःधर्माः दोषादयः । संतःस्युरितिभावः । निषेध्यतयासद्ब्रह्मसंबंधादित्यर्थः । तथाचाद्वैतहानिरितिभावः ॥ रूप्येति ॥ प्रातिभासिकरूप्यसंबंधादित्यर्थः ॥ रूप्येप्रपंचेचेति ॥ वस्तुगत्यारूप्येप्रपंचेचप्रातिभासिकव्यावहारिकसत्त्वेनवस्तुगत्यासद्वैलक्षण्याभावादित्यर्थः ॥ सत्स्यादिति ॥ सत्संबंधादित्यर्थः ॥ असद्वैलक्षण्यंचेति ॥ रूप्येप्रपंचेचेतिवर्तते । ब्रह्मणीत्यपिद्रष्टव्यं ॥ असत्स्यादिति ॥ असत्संबंधादित्यर्थः ॥ असतिचेति ॥ अधिकरणत्वेनासतासंबंधादित्यर्थः । रूप्यमिथ्यात्वमिथ्यात्वसाधना

रूप्याधिष्ठानशुक्तिरपिप्रातिभासिकीस्यात् । रूप्येप्रपंचेचसद्वैलक्षण्यं
चसत्स्यात् । असद्वैलक्षण्यंचासत्स्यात् । असतिचसद्वैलक्षण्यमस
त्स्यात् । रूप्यतन्मिथ्यात्वयोर्मिथ्यात्वेभ्रांतिबाधव्यवस्थाचनस्यात् ।

नुमानस्यतर्कपराहतिमाह॥भ्रांतिबाधेति॥ मिथ्याभूतार्थविषयकतयाभ्रांतित्वंदृष्टं । इदंरूप्यमित्यत्रमिथ्याभूतरूप्यविषयकतयाज्ञानस्यभ्रांतित्वदर्शनात् । सत्यार्थविषयकतयाचबाधत्वंदृष्टं । नेदंरूप्यंइदंरूप्यंमिथ्येत्येवंसत्यभूतरूप्यमिथ्यात्वविषयकत्वेनबाधत्वदर्शनात् ।एवंचत्वयारूप्यतन्मिथ्यात्वयोरुभयोरपिमिथ्यात्वंयद्यंगीक्रियतेतदोभयोरपिमिथ्याभूतार्थविषयकत्वाविशेषा(द्बाधस्यापिभ्रांतित्वापत्त्याभ्रांति)भ्रांतिबाधव्यवस्थानस्यादित्यर्थः । किंचमिथ्याभूतरूप्यधर्मिकत्वेनहेतुनायथारूप्यमिथ्यात्व

स्यमिथ्यात्वंत्वयासाध्यते एवमेवास्माभिरपिसाध्यभूतंयद्रूप्यमिथ्यात्वमिथ्यात्वं तस्यापिमिथ्यात्वंत्वदुक्तेनैवहेतुनासाधयितुंशक्यते । तथाहि । रूप्यमिथ्यात्वमिथ्यात्वंमिथ्या प्रातिभासिकमितियावत् । मिथ्याभूतरूप्यमिथ्यात्वधर्मिकत्वादितिप्रयोगसंभवात् । तथाचप्रातिभासिकंयद्रूप्यनिष्ठमिथ्यात्वमिथ्यात्वंतत्साधकत्वेमिथ्याभूतरूप्यधर्मिकत्वरूपहेतोरनुष्णत्वसाधककृतकत्ववद्बाधितार्थकत्वेनाप्रामाण्यंस्यादित्याह ॥ त्वदुक्तेनेति ॥ मिथ्यात्वेत्यतःपूर्वंरूप्यनिष्ठेतिशेषः । ननुसर्वस्यापिब्रह्मज्ञानबाध्यत्वेनतदंतःपातिनोस्यानुमानस्यबाधितत्वमिष्टमेवेतिशंकापरिहारायात्यंतेत्युक्तं । व्यवहारदशायामपिप्रातिभासिकार्थसाधकत्वे ४६

त्वदुक्तेनधर्मिणोमिथ्यात्वेनहेतुनासाध्यस्यमिथ्यात्वमिथ्यात्वस्यापिप्राति भा
सिकत्वापत्त्याहेतोरत्यंताप्रामाण्यंचस्यात् । हेतूकृतस्यधर्मिमिथ्यात्वस्य तृ
मिथ्यात्वेघटरूपादौव्यभिचारापत्त्यासत्यत्वावश्यंभावाद्विरोधश्चस्यात् ।

नाप्रामाण्यंस्यादित्यर्थः ॥ हेतूकृतस्येति ॥ रूप्यमिथ्यात्वेमिथ्यात्वसाधनायेत्यर्थः । धर्मिमिथ्यात्वस्य मिथ्यात्वोपेतधर्मिकत्वस्य मिथ्यात्वे मिथ्याभूतेतिविशेषणयुक्तत्वेइतिव्याख्येयं । यथाश्रुतेत्वसिद्धिरेवस्यान्नव्यभिचारइतिध्येयं । (सत्यत्वावश्यंभावात् । सत्यत्वाख्यविशेषणयुक्तत्वावश्यंभावादित्यर्थः । यथाश्रुतेत्वसिद्धिपरिहारएवस्यात् । नविरोधइतिध्येयं ।) अयंभावः । रूप्यमिथ्यात्वंमिथ्यामिथ्यात्वोपेतधर्मिकत्वादित्यत्रमिथ्याभूतमिथ्यात्वोपेतधर्मिकत्वादितिहेतुर्विवक्षितश्चेद्घटरूपादौव्यभिचा

SGDF
Foundation

मिथ्यात्वं

रः। घ(टादिरू)टरूपादिकंप्रतिधर्मिभूतस्यघटादेर्यत्प्रातिभासिकत्वरूपंतन्मिथ्या घटादेर्व्यावहारिकत्वात्। अतोमिथ्याभूतमिथ्यात्वोपेतंधर्मिकत्वंघटरूपादावस्ति साध्य(रूपंप्रा)भूतंप्रातिभासिकत्वापरपर्यायंमिथ्यात्वंनास्तीतिव्यभिचारापत्त्यासत्यभूतमिथ्यात्वोपेतधर्मिकत्वादितिहेतौकर्तव्येविरोधश्चस्यात्। तथाहि। पक्षीकृतेरूप्यगतमिथ्यात्वेसत्यभूतमिथ्यात्वोपेतधर्मिकत्वरूपोहेतुरस्तीतितदास्यात् यदिपक्षीकृतंरूप्यमिथ्यात्वंप्रतिधर्मिभूतेरूप्येमिथ्यात्वंसत्यंस्यात्। एवंचपक्षेहेतुसिद्ध्यर्थंसत्यत्वेनांगीकृतेरूप्यमिथ्यात्वेयदिमिथ्यात्वमनेनानुमानेनसाध्यतेतदाहेतुसाध्ययोःपक्षेसहानवस्थानरूपोविरोधःस्यादिति। तथाचरूप्यमिथ्यात्वंमिथ्यासत्यभूतमिथ्यात्वोपेतधर्मिकत्वादितिहेतुमभिदधतारूप्यमिथ्यात्वंसत्यमित्युक्तंस्यात्। तत्रचपुनःमिथ्यात्वसाधने

नचत्वन्मतेरूप्यादिकंवियदादिकंवावंध्यासुतवन्निःस्वरूपं।

विरोधस्स्यात् सत्यभूतोष्णत्ववान्वह्निर्मिथ्याभूतोष्णत्ववानितिवदित्यर्थ इत्येवंसुलभेनोपपादनंद्रष्टव्यं ॥ रूप्यधर्मोमिथ्यात्वंमिथ्यैवेतिपरेणोक्तेरूप्यमिथ्यात्वस्यमिथ्यात्वेतत्सत्यत्वंसत्यंस्यादित्यस्माभिरापादितेपरेणोत्तरितंरूप्यरूपधर्मिणएवाभावाद्विरुद्धयोःसत्यत्वमिथ्यात्वरूपधर्मयोरपिमिथ्यात्वमिति; पश्चात्परस्परविरुद्धयोरेकस्याभावेऽन्यस्यसत्त्वमितिनियमभंगेभिहितेपरेणयत्रधर्मीसन्तत्रैवायंनियमः। नहिवंध्यासुतस्यश्यामत्वाभावेगौरत्वंसत्यमित्युक्तं तत्रदूषणमाह ॥ नचेति ॥ नहीत्यर्थः ॥ वियदादिकंवेति ॥ वाशब्दउपमायां। यथावियदादिकंनवंध्यासुतवन्निस्स्वरूपं असद्विलक्षणस्वरूपांगीकारात्। एवंरूप्यादिकम

SGDF
Sri Gargeshwari Digital Foundation

पाण्डुरङ्गी वीर नारायण

पिनवंध्यासुतवन्निस्स्वरूपं प्रातिभासिकस्वरूपांगीकारात् । एवंचदृष्टांतस्यासंमतत्वात्परस्परविरुद्धयोरितिन्यायेनरूप्यमिथ्यात्व स्यमिथ्यात्वेरूप्यस्यसत्यत्वंसत्यंस्यादितितर्कपराहतत्वेनरूप्यप्रतियोगिकात्यंताभावरूपस्यरूप्यमिथ्यात्वस्यसत्यत्वेनमिथ्याभूतमि थ्यात्वकत्वरूपहेतोरूप्येऽभावेनव्यभिचाराभावात् मिथ्याभूतमिथ्यात्वकत्वेनहेतुनाजगत्सत्यंस्यादात्मवदितियदुक्तंतद्युक्तमेवेति भावः । कुतोननिस्स्वरूपमित्यतआह ॥ शून्येति ॥ तुच्छवन्निस्स्वरूपत्वांगीकारइत्यर्थः । परस्परविरुद्धयोरितिनियमस्यस्व प्नेप्रतीतगजतदभावयोर्व्यभिचारइत्याशंकांपरिहरति ॥ स्वाप्नस्यापीति ॥ गजादेरित्यर्थः । तन्मिथ्यात्वं गजप्रतियोगिकात्यं 81

शून्यवादापातात् । स्वाप्नस्यापिकल्पितत्वेनतद्ध्वंसादेर्मिथ्यात्वेपितन्मिथ्यात्वंस्वप्नेप्रतीतम
पिआत्मवदबाधात्सत्यमेव । नचमिथ्यात्वंप्रपंचसमसत्ताकं एवंचनतात्विकाद्वैतहानिः ।

ताभावइत्यर्थः । स्वाप्नगजतदभावयोरुभयोरपिमिथ्यात्वमितियदुक्तंतद्ध्वंसरूपाभावविषयं स्वाप्नगजस्यमिथ्यात्वेतत्प्रतियोगि कोध्वंसोनसत्यः मिथ्याभूतस्यप्रातिभासिकस्यध्वंसायोगात् । अत्रचपरस्परविरहशब्देनपरस्परात्यंताभावरूपत्वंविवक्षितं । एवं चगजस्यमिथ्यात्वेपितदत्यंताभावस्तुसत्यएवेत्यतोनव्यभिचारः । यथोक्तं । "नस्वप्नेपिद्वयंमिथ्यातत्रैकंसत्यमेवही "ति । यदु क्तंमिथ्यात्वंबाध्यमबाध्यंवेति । तत्रवदामोनबाध्यंनाप्यबाध्यं किंतुप्रपंचसमसत्ताकमिति । अतोनकोपिदोषइत्याशंक्यनिराक रोति ॥ नचेति ॥ एवंचेति ॥ प्रपंचसमसत्ताकत्वेनव्यावहारिकत्वादितिभावः ॥ तात्विकाद्वैतेति ॥ अद्वैतंतात्विकमिति

SGDF
Sri Gargeshwari Digital Foundation

मतस्यनहानिः। ब्रह्मसमसत्ताकत्वांऽगीकारएवसास्यादित्यर्थः ॥ **त्वन्मतइति** ॥ तत्ववादिमतइत्यर्थः ॥ **स्वसमेति** ॥ प्रपंचसमसत्ताकेत्यर्थः। भवद्भिःप्रपंचेपारमार्थिकसत्त्वांगीकारात्तत्समसत्ताकमिथ्यात्वस्यभवतामसंमतत्वात्प्रपंचसमसत्ताकमिथ्यात्वस्यैवाऽस्माभिःसाध्यमानत्वान्नसिद्धसाधनतेतिभावः। ननुमिथ्यात्वस्यव्यावहारिकत्वेमिथ्यात्वविरोधिनोविश्वसत्यत्वस्यपारमार्थिकत्वंकुतः प्रातिभासिकत्वंकिंनस्यादित्यतउक्तं ॥ **अप्रातिभासिकस्येति** ॥ नकेवलंपरिशेषात्पारमार्थिकत्वसिद्धिः। प्रत्यक्षसिद्धत्वाच्चेत्युक्तं ॥ **प्रत्यक्षादीति** ॥ सन्घटइत्यादिप्रत्यक्षसिद्धस्येत्यर्थः। तदप्रमाणंकिंनस्यादित्यतउक्तं ॥ **स्वतःप्रामा**

नापिसिद्धसाधनं। त्वन्मतेप्रपंचेस्वसमसत्ताकमिथ्यात्वासिद्धेरितिवा च्यं। मिथ्यात्वस्यव्यावहारिकत्वेतद्विरोधिनोप्रातिभासिकस्याऽनपोदितस्वतःप्रामाण्यप्रत्यक्षादिसिद्धस्यचविश्वसत्यत्वस्यपारमार्थिकत्वापातात्।

ण्येनेति ॥ स्वतःप्रामाण्योपेतेत्यर्थः। बलवद्बाधकात्प्रामाण्यस्यापवादःकिंनस्यादित्यतउक्तं ॥ **अनपोदितेति** ॥ एतच्चोत्तरत्रसाधयिष्यामइतिभावः ॥ **पारमार्थिकत्वेति** ॥ नहिविरुद्धयोरुभयोर्मिथ्यात्वसत्यत्वयोःसमसत्ताकत्वमुक्तमितिभावः। एवंचप्रपंचसमसत्ताकंमिथ्यात्वंसाधयताव्यावहारिकंमिथ्यात्वंसाधितंस्यात्। तस्यजगतिपारमार्थिकसत्यत्वाविरोधि(त्वादर्थांतरतेति)त्वात्सिद्धसाधनतेतिभावः। प्रपंचमिथ्यात्वस्यप्रपंचसमसत्ताकत्वेव्यावहारिकत्वग्राहयानेहनानेतिश्रुतेर्जगन्मिथ्यात्वरू

SGDF Sri Gargeshwari Digital Foundation

पाद्वैतपरायास्तत्वावेदकत्वंयदंगीकृतंतदपिभग्नंस्यादित्याह ॥ द्वैतेति ॥ प्रातिभासिके रूप्यादौ व्यावहारिके घटादौ ॥ प्रातिभासिकतयेति ॥ अद्वैतहानिप्रसंगेनपारमार्थिकत्वस्यवक्तुमशक्यत्वादितिभावः । तयोः प्रपंचतन्मिथ्यात्वयोः ॥ अयोगादिति ॥ तथाचमिथ्यात्वंप्रपंचसमसत्ताकंसाध्यतइत्युक्तमसदितिभावः ॥ अन्यथेति ॥ विरुद्धयोरेकत्रसमसत्ताकत्वेप्रपंचे तात्विकेसत्यत्वमिथ्यात्वेवातात्विकौतदभावौवास्यातामित्यतिप्रसंगादित्यर्थः ॥ जातिरिति ॥ धर्मस्यतदतद्रूपविकल्पेनप्रवृ 93

द्वैताद्वैतप्रमाणयोर्व्यावहारिकपारमार्थिकविषयत्वेनव्यवस्थोक्त्ययोगाच्च । मिथ्यात्वस्यप्रातिभासिकेव्यावहारिकतयाव्यावहारिकेचप्रातिभासिकतयाचदृष्टत्वेनतयोस्तुल्यसत्ताकत्वायोगाच्च । अन्यथाप्रपंचेसत्यत्वमिथ्यात्वयोर्विधिसमुच्चयोवानिषेधसमुच्चयोवास्यात् । तथा च“मिथ्यात्वंयद्यबाध्यंस्यात्सदद्वैतमतक्षतिः । मिथ्यात्वंयदिबाध्यंस्याज्जगत्सत्यत्वमापतेत् ।”॥नचमिथ्यात्वस्यसत्यत्वमिथ्यात्वाभ्यांदूषणंनित्यसमाजातिः स्वव्याघातादेरभावात् ।

त्तत्वात्त्वदीयंदूषणजात्युत्तरमितिभावः । जातिसामान्यलक्षणाभावान्नेदंजात्युत्तरं । “ स्वव्याघातकमुत्तरंजाति ”रितिवचनात् । प्रकृतेचस्वव्याघातादेरभावादित्याह ॥ स्वव्याघातादेरिति ॥ आदिपदेनयुक्तांगहान्ययुक्तांगाधिक(त्वादिग्र)त्वसंग्रहः । ननुकथंस्वव्याघाताभावः । अनयैवरीत्यासत्यत्वंसत्यंमिथ्यावेतिविकल्प्यदूषणसंभवादितिचेन्न । मिथ्यात्वस्यमिथ्यात्वेमिथ्यात्वं

SGDF
Sri Gargeshwari Digital Foundation

1 वादरत्नावल्यामपि इदमुदाहृतमेव नहिदं प्रथमतयोक्तम्।

यथाबाधितंभवति एवंसत्यत्वस्यसत्यत्वेसत्यत्वंनबाधितंभवति । प्रत्युतस्थापितमेवभवतीतिनस्वव्याघातइत्याशयेनतत्रविद्वत्सं मतिमाह ॥ उक्तंहीति ॥ [1]वादरत्नावल्यांविष्णुदासाचार्यैरित्यर्थः । नकेवलंसामान्यलक्षणाभावान्नेदंजात्युत्तरं । किंनाम नित्यसमजातिलक्षणाभावादपीत्याह ॥ किंचेति ॥ उदाहरणंतुअनित्यःशब्दइतिप्रतिज्ञायांवदति । अनित्यत्वंअनित्यंनित्यंवेति । अनित्यत्वेकदाचित्तदभावाच्छब्दोनित्यःस्यात् । तथाचशब्दअनित्यइतिशब्दरूपधर्मिणः अनित्यत्ववैशिष्ट्यभंगः । नित्यंचेद नित्यत्वधर्मस्यनित्यत्वान्नित्यधर्माधिकरणत्वेनधर्मिणोपिशब्दस्यनित्यतास्यात् । अनाश्रयधर्मावस्थानायोगात् । तथाचशब्दो

उक्तंहि" मिथ्यात्वस्यहिमिथ्यात्वेमिथ्यात्वंबाधितंभवेत् । सत्यत्वस्यचसत्यत्वेसत्यत्वंस्थापितंभवे"दिति । किंच" धर्मस्यतदतद्रूपविकल्पानुपपत्तितः । धर्मिणस्तद्विशिष्टत्वभंगोनित्यसमोभवे" दितितल्लक्षणं । नचात्रमिथ्यात्वस्यसत्यत्वेधर्मिणोमिथ्यात्ववैशिष्ट्यभंगउक्तः । किंतुअद्वैतहानिः ।

ऽनित्यइतिशब्दस्यानित्यत्ववैशिष्ट्यभंगइतितद्विशिष्टत्वभंगः तद्रूपत्वातद्रूपत्वोभयपक्षेपीत्यर्थः। लक्षणं नित्यसमजातेरितिशेषः॥ नचात्रेति ॥ यद्यपिमिथ्यात्वस्यमिथ्यात्वपक्षेसत्यत्वप्राप्त्याप्रपंचोमिथ्येतिप्रपंचस्य धर्मिणोमिथ्यात्ववैशिष्ट्यभंगउक्तः । तथापिमिथ्यात्वस्यसत्यत्वपक्षेसनोक्तोस्माभिः किंत्वद्वैतहानिरेव । अमिथ्यात्वरूपसाध्यस्यमिथ्यात्वरूपत्वातद्रूपत्वोभयपक्षेपिधर्मिणस्तद्विशिष्टत्वभंगस्यानुच्यमानत्वान्नतल्लक्षणस्यात्रावकाशइतिभावः । प्रत्युततवैवजातिवादित्वं त्वयाक्रियमाणस्यास्मदीयदू

SGDF Sri Gargeshwari Digital Foundation

षणस्यस्वव्याघातकत्वादित्याशयेनाह ॥ प्रत्युतेति ॥ भिन्नइत्यादि ॥ यदिभिन्नेभेदनिवेशः तर्हिभेदपरंपरयाअनवस्था । यद्यऽभिन्नेभेदनिवेशः तर्हिविरोधइत्यादित्वदुक्तिरित्यर्थः । कथंमदुक्तेःस्वव्याघातकत्वमित्यतउक्तं ॥ अभिन्नादीति ॥ अभिन्नंब्रह्मेत्यत्रापिकिमभेदःभिन्नेनिवेशितउताभिन्ने । आद्येविरोधात् । द्वितीयेऽभेदपरंपरयाऽनवस्थेत्यर्थः । यथोक्तंभगवत्पादैः । "अतोविशिष्टादिनिराकरणयुक्तीनामपिविशिष्टाद्यपेक्षत्वाज्जात्युत्तरमितिनयुक्तिबाधापी"ति । नकेवलंवेदांतिनांजातिवा

प्रत्युतभेदःकिंभिन्नेउताभिन्नेस्यादितित्वदुक्तिरेवाभिन्नादिरूपविशिष्टमात्रनिरासकत्वे
नस्वव्याघातापाताज्जातिः । उक्तंहि । "एतामेवजातिमवष्टभ्यशुष्कतर्कवादिनांबौद्धचा
र्वाकवेदांतिनांबालव्यामोहहेतवःकंठकोलाहला"इति ॥ ७ ॥ इतिसामान्यतोमि
थ्यात्वभंगः ॥ २ ॥ दृश्यत्वहेतूक्तिरपि "स्तंभादिप्रत्ययोमिथ्याप्रत्ययत्वात्तथाहियः ।

दित्वमस्माभिरेवोच्यते । किंतूदयनाचार्यैरप्याघोषितमित्याह ॥ उक्तंहीति ॥ एतामेव नित्यसमामेव । अवष्टभ्य परनिराकरणसाधनत्वेनाश्रित्य । कंठकोलाहलाः किंभिन्नेभेदनिवेशउताभिन्नइत्याद्याः । ऊहापोहरहिताबालास्तेषामेवबुद्धिव्यामोहहेतवोनपंडितानां स्वव्याहतेःस्पष्टत्वादित्यर्थः ॥ ७ ॥ इतिसामान्यतोमिथ्यात्वभंगविवरणं ॥ २ ॥ इदानींहेतुंपराचष्टे ॥ दृश्यत्वेति ॥ दृश्यत्वहेतुंतुपश्चान्निराकुर्मः । आदौदृश्यत्वहेतूक्तेरेवबौद्धोक्तयुक्त्युद्गिरणमात्रत्वेनतवबौद्धसाम्यात्त्वंतत्सभायामेवनिवेशनीयोनास्माभिर्दूषणायकक्षीकरणीयइत्याशयेनदृश्यत्वहेतूक्तिरपिबौद्धोक्तयुक्तिच्छर्दिमात्रमित्युक्तं । मिथ्यामि

SGDF
Sri Gargeshwari Digital Foundation

९६

थ्यार्थविषयः। तेनप्रत्ययपक्षकमनुमानंकृतं । त्वयातुविमतंमिथ्येतिविषयपक्षकं, प्रमेयंत्वेकमेव । ज्ञानस्यमिथ्यात्वेविषयस्यापि मिथ्यात्वादितिद्रष्टव्यं । मीमांसकरीत्यात्र्यवयवप्रयोगः । (व्यवहारेभट्टनयइत्यंगीकारात् ।) छर्दिरुद्गिरणं । विशेषोबौद्धमायि नोः ॥ तद्युक्तमिति ॥ यःप्रत्ययःसमृषादृष्टइतिज्ञानमात्रस्याऽप्रामाण्यकथनंयुक्तं । ज्ञानंजायमानंअप्रमाणंसदेवजायतइति अप्रामाण्यस्यस्वतस्त्वांगीकारात् । त्वन्मतेज्ञानंजायमानंप्रमाणंसदेवजायतइतिप्रामाण्यस्यस्वतस्त्वांगीकाराद्यत्रदृश्यत्वंतत्रसर्व त्रमिथ्यात्वमितिवचनमयुक्तं । तथाचसत्यत्वग्राहिप्रत्यक्षादिविरोधस्तवेत्याशयः । संभावितान् दृश्यत्वनिर्वचनप्रकारान्दूषयि

प्रत्ययस्समृषादृष्टःस्वप्नादिप्रत्ययोयथे"तिबौद्धोक्तयुक्तिच्छर्दिमात्रं । इयांस्तुविशेषः ।
बौद्धमतेह्यप्रामाण्यस्यस्वतस्त्वाद्युक्तं । त्वन्मतेतुप्रामाण्यस्यस्वतस्त्वात्तदयुक्तमिति ।
किंचेदंदृश्यत्वं वृत्तिव्याप्यत्वं फलव्याप्यत्वंवा साधारणंवाकदाचित्कथंचिच्चिद्विषय
त्वंवा स्वव्यवहारेस्वातिरेकिसंविदपेक्षानियतिर्वा अस्वप्रकाशत्वंवा । नाद्यः ।

तुंपृच्छति ॥ किंचेदमिति ॥ असंगतिपरिहारायेदमित्युक्तं । यद्धेतूकृतंतदिदमित्यर्थः ॥ वृत्तीति ॥ इंद्रियार्थसन्निकर्षात् बाह्येंद्रियद्वारानिस्सृतांतःकरणपरिणामोवृत्तिः । तद्व्याप्यत्वंनामतयाप्राप्यत्वं । विषयत्वमित्यनुक्त्वाव्याप्यत्वमितिवचनंयथा तटाकोदकंकुल्यात्मनाबहिर्निर्गत्यकेदारान्प्रविश्यतद्वदेवचतुष्कोणाद्याकारेणभवति तथासावयवंतैजसमंतःकरणंचक्षुरादिद्वारा बहिर्निर्गत्यविषयंव्याप्यतदाकारंभवतिसेयंवृत्तिरितिपरेणोच्यमानत्वाद्विषयंव्याप्येतितदीयवचनानुसारेणेतिज्ञातव्यं ॥ फले ॥ ४९ ॥

1 तदुभयदृश्यत्वानुगतं अवहारप्रयोजकविषयत्वं तरंगिणी ।

९७

ति ॥ उक्तरूपायांवृत्तौप्रतिबिंबितं तदुपारूढंज्ञातृचैतन्यमस्ति । तथाचघटादिविषयाधिष्ठानचैतन्यंचास्ति । घटाद्यावरकाज्ञा नंचतत्रैवास्ति । अस्मन्मतेतुपुंगतंतमः । तन्मतेविषयगतमज्ञानं । तथाचचैतन्या(धिष्ठितया)धिष्ठान(चैतन्य)वृत्त्याअज्ञाननाशे ऽनंतरंविषयाधिष्ठानंचैतन्यंव्यज्यते । अनंतरंवृत्तिप्रतिबिंबितंज्ञातृचैतन्यंविषयाधिष्ठानचैतन्यंचैकीभवति । अ(त)तएवमयाज्ञा तोघटइत्यादिव्यवहारः । यद्यपिकेवलायावृत्तेर्नाज्ञाननाशकत्वं । चैतन्यस्यचाऽज्ञानस्फोरकत्वान्नाज्ञाननाशकत्वंयुक्तं । तथा पिवृत्त्युपारूढस्यतद्युक्तं । यथोक्तं "तृणादेर्भासिकाप्येषासूर्यदीप्तिस्तृणंदहेत् । सूर्यकांतमुपारुह्यतन्यायंचितियोजये"दिति । तथाचज्ञप्तिर्ज्ञानमितिभावव्युत्पत्त्याऽधिष्ठानचैतन्यंज्ञानमित्युच्यते वृत्तिस्तुज्ञायतेऽनयाचैतन्यमितिकरणव्युत्पत्त्याज्ञानमित्यु च्यतइतितत्प्रक्रिया । यथोक्तं"स्वच्छेंतःकरणेऽशनिप्रसृमरेनेत्रादिमार्गोद्गतेतत्तद्बाह्यचयात्मनापरिणतेबिंबीभवंतीचितिः । ए काप्यर्थमनोविशेषकवशाद्वैतंप्रपन्नाहरत्यज्ञानंप्रकटीकरोतिविषयान्ज्ञातंमयेदंत्विती"ति । प्रसृमरे समाने । बाह्यचयात्मना घटादिबाह्यपदार्थसमूहात्मना । चितिः ज्ञातृचैतन्यं । अर्थमनोलक्षणविशेषकवशात् व्यावर्तकवशात् ज्ञातृचैतन्यंविषयाधि ष्ठानचैतन्यमितिद्वैविध्यंप्राप्ता विषयान् विषयाधिष्ठानचैतन्यानीतियावत् । अतउक्तरूपायांवृत्तौप्रतिबिंबितंचैतन्यंतदभिव्य क्तमधिष्ठानचैतन्यंवाफलं तद्व्याप्यत्वंतत्संबंधइत्यर्थः । साधारण मुभयानुगतंदृश्यत्वमात्रमित्यर्थः । अतीतादौभागासिद्धिवार णायकदाचिदिति । साक्षिरूपचिद्विषयत्वस्यसुखादावेवसत्त्वेनबाह्येघटादौनित्यातींद्रियेच धर्मादावभावाद्भागासिद्धिरित्यतःक थंचिदित्युक्तं । तथाचसाक्षाच्चिद्विषयत्वाभावेपिकथंचिद्घटादिकं(जानामीति)ज्ञातमितिज्ञानविषयकज्ञानस्यसाक्षिरूपत्वात्तत्रसा

NGMF ... Foundation

क्षिणि ज्ञानावच्छेदकतयाघटादेःधर्मादिकंनजानामीतिअज्ञानविषयकज्ञानस्यसाक्षिरूपत्वात्तत्रसाक्षिणि अज्ञानावच्छेदकतयाध र्मादेर्भासमानत्वाददोषइतिभावः । आत्मनिस्वव्यवहारेस्वाख्यसंविदपेक्षासद्भावेनातिव्याप्तिवारणायस्वातिरेकीति । तस्यैवा द्वितीयत्वादिव्यवहारेएकमेवेत्यादिविशेषणोपनायकमानापेक्षासद्भावेनातिव्याप्तिवारणायनियतिग्रहणं । तथाचस्वरूपमात्रस्य स्वप्रकाशत्वेनतद्व्यवहारेस्वातिरेकिसंविदपेक्षायाअभावान्नस्वातिरेकिसंविदपेक्षानियतिरितिभावः ॥ आत्मनोपीति ॥ वेदांत

आत्मनोपिवेदांतज(न्य)नितवृत्तिव्याप्यत्वात् । अन्यथाब्रह्मपराणांवेदांतानांब्रह्म ज्ञानार्थंश्रवणादिविधेश्चवैयर्थ्यं । [1] ब्रह्मविचारयतोर्गुरुशिष्ययोर्मौनंमौढ्यंचस्यात् । किंचब्रह्मजिज्ञासाब्रह्मज्ञानमित्यादौकर्मणिषष्ठी तमेवधीरोविज्ञायेत्यादौद्वितीया दृ श्यतेत्वग्र्ययाबुध्येत्यादौतिङ् आत्मावाअरेद्रष्टव्यइत्यादौतव्यादि(प्रत्यय)श्चनस्यात् ।

जन्यया उक्तरूपमनःपरिणामरूपचरमवृत्त्याआत्मनोपिव्याप्यमानत्वात्तत्रव्यभिचारइत्यर्थः ॥ अन्यथेति ॥ आत्मनोपिवृत्ति व्याप्यत्वानंगीकारइत्यर्थः । ननुनवेदांतवैयर्थ्यं जपाद्यर्थत्वेनसार्थक्यादित्यतआह ॥ ब्रह्मपराणामिति ॥ तत्प्रतीतीच्छयो च्चरितत्वंतात्पर्यं । एवंचोपक्रमादिभिर्ब्रह्मप्रतीतीच्छया पूर्वपूर्वाध्यापकोच्चारितानामित्यर्थः ॥ श्रवणादीति ॥ फलाभावादि तिभावः । ननुनफलाभावः विश्वजिन्न्यायेनस्वर्गार्थत्वोपपत्तेरित्यतउक्तंब्रह्मज्ञानार्थमिति । "आत्मावाअरेद्रष्टव्यःश्रोतव्य" ॥ ५० ॥

[1] गुरोर्मौनं विचारस्य ब्रह्मविषयकस्य अभावः। शिष्यमौढ्यं ब्रह्मज्ञानप्रागभावः।

SGDF Sri Gargeshwari Digital Foundation

इत्यत्रदर्शनार्थं श्रोतव्यइति श्रवणादे(र्ब्रह्मज्ञानार्थ)र्दर्शनार्थत्वस्यैवप्रतीतेर्नव्यवहितस्वर्गार्थत्वमित्यर्थः । ब्रह्मविचारयतोः ब्रह्म विचार(यितुमुपक्रांतयो)मुपक्रांतवतोरितिव्याख्येयं । अन्यथाविचारकरणकालेमौनाभावादितिध्येयं । गुरोर्मौनंशिष्यस्यमौढ्यं । गुरोर्मौनेशिष्यस्यमौढ्यंस्वतएवायातं उपदेशाभावेनब्रह्मज्ञानाभावादितिभावः ॥ दृशोऽज्ञानइति ॥ दृशः ब्रह्मचितः । सर्वस्यापिजगतःपक्षत्वेनचिद्विषयत्वरूपदृश्यत्वधर्मस्यापिपक्षकोटिनिविष्टत्वेनतज्ज्ञानमपिवाच्यं । तच्चनसंभवति । विशेषणीभूतायादृशःब्रह्मरूपचितः अज्ञानेचिद्विषयत्वरूपविशिष्टस्याप्यज्ञानात् । तथाचतस्मिन्नाश्रयैकदेशेवृत्तिव्याप्यत्वस्यज्ञातुमश 99

12 दृशोऽज्ञानेदृग्विषयत्वरूपदृश्यत्वज्ञानंचनस्यात् । "सर्वप्रत्ययवेद्येचब्रह्मरूपेव्यवस्थित "इत्यादिस्ववचनविरोधश्चस्यात् ।

क्यत्वात्हेतोर्भागेऽज्ञानासिद्धिरितिसांप्रदायिकोर्थः ॥ दृग्विषयत्वेति ॥ वृत्तिविषयत्वेत्यर्थः । केचित्तुदृग्विषयत्वरूपदृश्यत्वज्ञानंचनस्यादित्यस्यचिद्विषयत्वरूपदृश्यत्वज्ञानंनस्यादित्यर्थः । तथाचदृशश्चितोब्रह्मणोऽज्ञानेकदाचित्कथंचिच्चिद्विषयत्वरूपस्यदृश्यत्वस्यज्ञातुमशक्यत्वात् चिद्विषयत्वरूपदृश्यत्वहेतोरसिद्धिरित्यर्थइत्याहुः । तच्चिंत्यं । वृत्तिव्याप्यत्वरूपदृश्यत्वदूषणावसरेचिद्विषयत्वस्यासिद्धिवचनस्यानवसरग्रस्तत्वादिति ॥ इत्यादीति ॥ "प्रपंचस्यप्रविलयःशब्देनप्रतिपाद्यते" इत्युत्तरार्धः । नचविशिष्टमेवसर्वप्रत्ययवेद्यंनशुद्धमितिवाच्यं । उत्तरार्धेप्रपंचविलयाधिष्ठानत्वोक्त्यासर्वप्रत्ययवेद्यस्यशुद्धत्वावगमादित्यर्थः ।

SGDF
Sri Gangadharan Digital Foundation

100

ननुनात्मनिव्यभिचारः तल्लक्षणाभावात् । तथाहि । विपक्षेहेतोःसत्त्वमात्रंनव्यभिचारः तथात्वेधूमवत्त्वस्यापिह्रदेव्यभिचारः
स्यात् । तत्रापिप्रातिभासिकधूमवत्त्वस्यसत्त्वात् । तस्माद्धर्मिसमसत्त्वस्यहेतोर्वृत्तिर्व्यभिचारः । धर्मिभूतह्रदस्यव्यावहारिकत्वे
नतत्समसत्ताकधूमवत्त्वस्यतत्राभावान्नव्यभिचारइतिवक्तव्यं । एवंचब्रह्मण्यपिनव्यभिचारः । पारमार्थिकेब्रह्मणिदृश्यत्वस्य
व्यावहारिकत्वेनधर्मिसमसत्ताकदृश्यत्वहेतोर्ब्रह्मण्यवृत्तेरित्याशंक्यनिषेधति ॥ नचेति ॥ अव्याप्यीति ॥ तथाचब्रह्मजगतोः
पारमार्थिकत्वव्यावहारिकत्वविभागेसिद्धेलक्षणाभावेनदृश्यत्वस्यव्यभिचाराभावादनुमानस्यसम्यक्त्वसिद्धिः तत्सिद्धौचास्य

**नचविपक्षेधर्मिसमसत्वस्यहेतोर्वृत्तिर्व्यभिचारः नत्वारोपितस्य अतिप्रसंगात्। दृश्यत्वंचव्यावहा
रिकेजगतीवपारमार्थिकात्मन्यपिव्यावहारिकमेवेतिनव्यभिचारइतिवाच्यं । ब्रह्मजगतोःपारमा
र्थिकत्वव्यावहारिकत्वविभागस्याद्याप्यऽसिद्धेः। किंचपक्षेधर्मिसमसत्वस्यसाध्यस्याभावोबाधः।**

विभागस्यसिद्धिरित्यन्योन्याश्रयादितिभावः । ननुनान्योन्याश्रयः । विभागसिद्धेरनुमानसम्यक्त्वसिद्ध्यधीनत्वाभावात् । अ
पितर्हिअनाशंकितदोषयाततसत्यंअतोन्यदार्तमित्यादिश्रुत्यैवविभागसिद्धौउपोद्बलकतयैवानुमानस्योच्यमानत्वादित्यस्वरसादा
ह ॥ **किंचेति** ॥ यदिधर्मिसमसत्त्वस्यहेतोर्वृत्तिर्व्यभिचारइतिलक्षणंकल्पयित्वाव्यभिचारपरिहारःक्रियते तर्हिसाध्याभावमा
त्रंनबाधलक्षणं । तथात्वेवह्निरनुष्णइत्यत्रापिप्रातिभासिकानुष्णत्वस्यसद्भावेनसाध्याभावाभावाद्बाधाभावापत्तेः । तथापक्षेहेतो ॥ ५१ ॥

101

स्सत्त्वमात्रंनसिद्धिः । तथात्वेशब्दोनित्यश्चाक्षुषत्वादित्यत्रापिप्रातिभासिकहेतोःपक्षेसत्त्वेनासिद्ध्यभावापत्तेः । तस्मात्तत्परिहा
रायधर्मिसमसत्ताकस्यसाध्यस्याऽभावोबाधः, पक्षेधर्मिसमसत्ताकस्यहेतोःसत्त्वंसिद्धिः, तदभावोऽसिद्धिरितिलक्षणंवाच्यं । त
थाचअनुभूतिःस्वप्रकाशा अनुभूतित्वादितिब्रह्मणस्स्वप्रकाशत्वसाधकानुमानेपिअनुभूत्याख्यपारमार्थिकब्रह्मरूपधर्मिसमसत्ता
कस्यस्वप्रकाशत्वरूपसाध्यस्याभावाद्बाधःस्यात् ब्रह्मणिस्वप्रकाशत्वस्यव्यावहारिकत्वेनपारमार्थिकब्रह्मसमसत्ताकत्वाभावात् ।
तथाधर्मिसमसत्ताकस्यानुभूतित्वरूपहेतोःपक्षेऽभावेनासिद्धिश्चस्यात् । ब्रह्मण्यऽनुभूतित्वस्यापिव्यावहारिकत्वेनपारमार्थिकब्रह्म
समसत्ताकत्वाभावादित्यपिस्यात् । एवंविपक्षेसाधनाभावमात्रमव्यभिचारोनभवति । तथात्वेपर्वतोधूमवान्वह्नेरित्यत्रापिविपक्षे
ऽयोगोलकेवह्निरूपसाधनाभावस्यारोपितस्यसत्त्वादव्यभिचारित्वापत्तेः । तस्माद्धर्मिसमसत्ताकःसाधनस्याभावोऽव्यभिचारि
त्वं विपक्षेऽयोगोलकेव्यावहारिकेवह्निरूपसाधनाभावस्यप्रातिभासिकत्वेनधर्मिसमसत्ताकत्वाभावान्नाव्यभिचारइतिवाच्यं । त
थाचमिथ्यात्वसाधकदृश्यत्वानुमानस्यव्यभिचारःस्यात् । ब्रह्मणिदृश्यत्वरूपंयत्साधनंतदभावस्याऽद्वैतभंगापत्त्याब्रह्मरूपधर्मि
समसत्ताकत्वाभावेनाव्यभिचारित्वलक्षणाभावात् । तस्मात्स्वप्रकाशत्वानुमानेव्यावहारिकस्यसाध्यस्यव्यावहारिकस्यहेतोश्च
पक्षेसत्त्वमात्रेणबाधासिद्धीपरिहरणीये । एवमेवविपक्षेब्रह्मणिव्यावहारिकस्यदृश्यत्वस्यसत्त्वाद्व्यभिचारस्तदवस्थः । ननुतथा
पिनात्मनिव्यभिचारः।धर्मिसमसत्ताकदृश्यत्वादितिदृश्यत्वेधर्मिसमसत्ताकत्वविशेषणंदीयतइतिचेत्तर्हिदृश्यत्वंनामवृत्तिव्याप्यत्वं
व्याप्यत्वंचविषयत्वं । एवंचधर्मिसमसत्ताकविषयत्वादित्येवास्तु। वृत्तीतिविशेषणंव्यर्थं।नचब्रह्मणिधर्मिसमसत्ताकंविषयत्वमस्ती

तितत्रव्यभिचारवारणायवृत्तीतिविशेषणमितिवाच्यं । ब्रह्मणिधर्मिसमसत्ताकस्यकस्यापिधर्मस्याभावेनधर्मिसमसत्ताकविषयत्वरूपधर्मस्याप्यभावेनहेतोरेवाभावेनव्यभिचाराप्रसक्त्यावृत्तीतिविशेषणंव्यर्थमेवस्यादित्याह ॥ पक्षइत्यारभ्यमिथ्यात्वेहेतुःस्यादित्यंतेनग्रंथेन ॥ धर्मिसमसत्ताकंसाध्यंनास्तीत्युपपादनायतात्त्विकधर्महीनइत्युक्तं । दृश्यत्वादीनां वृत्तिव्याप्यत्वादीनां ॥

पक्षेहेतोर्धर्मिसमसत्ताकस्यसत्वंचासिद्धिःतदभावोऽसिद्धिः । तथाचात्मनितात्त्विकधर्महीनेस्वप्रकाशत्वादिरूपसाध्यस्यबाधः । तत्साधकानुभूतित्वादेश्चासिद्धिः । एवंविपक्षेधर्मिसमसत्ताकःसाधनस्याभावोऽव्यभिचारित्वं । तथाचदृश्यत्वादीनांआत्मनिव्यभिचार इतिचस्यात् । तस्माद्यथात्मनःपक्षत्वेतत्रव्यावहारिकस्यहेतोस्सत्वान्नासिद्धिः । तथा (अस्य)तस्यविपक्षत्वेपिव्यावहारिकस्यहेतोस्सत्वाद्व्यभिचारः । [1]अथधर्मिसमसत्वंहेतुविशेषणं । तर्ह्यात्मन्येवंविधधर्मस्यकस्याप्यभावाद्विषयत्वादिरेवमिथ्यात्वेहेतुःस्यात् ।

नासिद्धिरिति ॥ व्यावहारिकसाध्यस्यापिसत्त्वान्नबाधइत्यपिद्रष्टव्यं ॥ विषयत्वादिरेवेति ॥ वृत्तिविषयत्वमित्यत्रव्याप्यत्वापरपर्यायंविषयत्वमेवहेतुःस्यात्वृत्तीतिविशेषणंव्यर्थमितिभावः । ननुनवृत्तीतिविशेषणंव्यर्थं । धर्मिसमसत्ताकवृत्तिविषयत्वस्याखंडोपाधित्वात् । अखंडोपाधौचनवैयर्थ्यं व्यर्थविशेषणताबीजाभावात् । एकस्मिन्धर्मिणिलघुगुरुधर्मद्वयसा(समावेशे)वेशेलघुना

१ पूर्वं व्यभिचारादिलक्षणघटकत्वेन । इदानीं व्याप्यघटकहेतुलक्षणे इति भेदः ॥

SGDF
Sri Gargeshwari Digital Foundation

व्याप्त्यवच्छेदेगुरोरनावश्यकत्वंहितद्बीजं । यथानीलधूमवत्त्वादित्यत्रनीलधूमवतोभावोनीलधूमएवतत्रहेतुः तत्रएकस्मिन्धर्मि
णिधूमेधूमत्वनीलधूमत्वरूपधर्मद्वयसमावेशेलघुनाधूमत्वेनव्याप्तिज्ञानोपपत्तेर्गुरोर्नीलधूमत्वस्यानावश्यकत्वंदृष्टमित्येवंतद्बीजस
द्भावेनव्यर्थविशेषणत्वंदृष्टं । नह्येवंवृत्तीत्यस्यवैयर्थ्यंवक्तुंयुक्तं । अत्रविषयत्वंहेतुः । तत्रविषयत्वत्वंधर्मोस्तिवृत्तिविषयत्वेवृत्ति
विषयत्वत्वधर्मोस्तीत्येवंविषयत्वत्ववृत्तिविषयत्वत्वयोर्लघुगुरुधर्मयोरेकस्मिन्धर्मिणिविषयत्वेसमावेशाभावेनव्यर्थविशेषणताबी 103
जाभावेनवृत्तीतिविशेषणवैयर्थ्यस्यवक्तुमशक्यत्वादित्यस्वरसादाह ॥ ममरीत्येति ॥ मन्मतेदृश्यत्वादिधर्माणांब्रह्मणितात्वि

आरनारस्यं **ममरीत्याआत्मनिव्यभिचारश्च । दृष्टांतस्यसाधनवैकल्यंच । ननुशुद्धंब्रह्मनदृश्यं**
किंतुविशिष्टमेव दृश्यत्वश्रुतयोपितद्विषयाः । अन्यथायत्तदद्रेश्यमित्यादिश्रु
तिविरोधादितिचेन्न । स्वतःसिद्धेर्निराकरिष्यमाणत्वेनशुद्धसिद्धिप्रसंगात् । द्धा

कत्वेनधर्मिसमसत्ताकत्वादितिभावः ॥ दृष्टांतस्येति ॥ रजतंदृष्टमित्यनुभवेनव्यावहारिकदृश्यत्वाधिकरणेशुक्तिरूप्येधर्मिस
मसत्ताकदृश्यत्वस्यत्वन्मतेऽभावादित्यर्थः । ब्रह्मणिव्यभिचाराभावंशंकते ॥ नन्विति ॥ ननुशुद्धब्रह्मणोऽदृश्यत्वे दृश्यतेत्व
ग्रयाबुद्ध्येत्यादिश्रुतिविरोधइत्यतआह ॥ दृश्यत्वेति ॥ तद्विषयाः विशिष्टविषयाः । नचविशिष्टएवव्यभिचारः । तत्रमिथ्या
त्वस्यापिसत्त्वादितिभावः । अन्यथा शुद्धस्यदृश्यत्वांगीकारे । अद्रेश्यं अदृश्यं ॥ स्वतइति ॥ यदिशुद्धंब्रह्मदृश्यंनस्यात्तर्हि

SGDF
Sri Gargeshwari Digital Foundation

तत्सिद्धिरेवनस्यात् । नचस्वप्रकाशत्वात्स्वतएवतत्सिद्धिरितिवाच्यं । स्वतइतिकोर्थः स्वेनेतिवा प्रमाणेनविनेतिवा । नाद्यः । कर्तृकर्मविरोधात् । नद्वितीयः । शशविषाणादीनामप्येवंसिद्धिप्रसंगादित्येवंस्वतःसिद्धेर्निं(राकरि)रसिष्यमाणत्वादित्यर्थः । विधातुमितिदृष्टांतार्थे । "सिद्धंधर्मिणमुद्दिश्यसाध्यधर्मोविधीयते "इत्युक्तेरितिभावः ॥ ज्ञेयत्वाच्चेति ॥ अभावज्ञानेऽधिकरणज्ञानस्यकारणत्वादित्यर्थः । नन्वज्ञातेधर्मिणीत्येतदयुक्तंस्वप्रकाशतयास्वतस्सिद्धत्वेनतज्ज्ञानसंभवात् । तत्रचवृत्तिविषयत्वरूपदृश्यत्वनिषेधोपपत्तेरित्याशंक्यनिषेधति ॥ नचेति ॥ वृत्त्यादृश्यत्वेति ॥ वृत्तिविषयत्वरूपदृश्यत्वेत्यर्थः । तथापिब्र

अज्ञातेधर्मिणिकस्यचिद्धर्मस्यविधातुंनिषेद्धुंवाअशक्यत्वेनशुद्धेदृश्यत्वंनिषेधताशुद्धस्यज्ञेयत्वाच्च । नचस्वप्रकाशत्वेनस्वतःसिद्धेशुद्धेवृत्त्यादृश्यत्वनिषेधधीः। शुद्धंस्वप्रकाशमितिशब्दजन्यविशिष्टवृत्तौशुद्धाप्रकाशेतस्यस्वप्रकाशत्वासिद्धेः।लाघवेनस्फुरणमात्रमेवमिथ्यात्वेतंत्रमितिस्वतःस्फुरदपिब्रह्ममिथ्यैव।

ह्मणिवृत्तिव्याप्यत्वनिषेधोनसंभवति । तथाहि । शुद्धंस्वप्रकाशमितिशब्दजन्यवृत्तौब्रह्मप्रकाशते नवा । नेतिपक्षेतस्यस्वप्रकाशत्वासिद्धेरित्याह ॥ शुद्धमिति ॥ आद्येवृत्तिविषयत्वस्यैवप्राप्त्याव्यभिचारस्तदवस्थइतिद्रष्टव्यं ॥ विशिष्टवृत्ताविति ॥ स्वप्रकाशत्वविशिष्टशुद्धविषयकवृत्तावित्यर्थः । किंचमिथ्यात्वेवृत्तिव्याप्यत्वापेक्षयास्फुरणमात्रस्यलघुत्वात्तस्यैवप्रयोजकत्वमस्तु । तथाचजगद्वद्ब्रह्मणोपिस्फुरणान्मिथ्यात्वंस्यादित्याह ॥ लाघवेनेति ॥ इयांस्तुविशेषः । जगत्प्रमाणेनस्फुरतिब्रह्मतुस्व

104

SGDF
Sri Gargeshwari Digital Foundation

तःस्फुरतीति । ननुब्रह्मणोमिथ्यात्वेतत्सत्यमित्यादिश्रुतिविरोधइतिचेत्तर्हिंजगतोमिथ्यात्वेपिविश्वंसत्यमित्यादिश्रुतिविरोधसा म्यात् । ननुजगत्सत्यताश्रुतिःविमतंमिथ्यादृश्यत्वादित्यनुमानविरोधादसद्वैलक्षण्यपरेतिचेत्तर्हिंब्रह्मसत्यताश्रुतिरपि ब्रह्ममि थ्यास्फुरणादित्यनुमानविरोधादसद्वैलक्षण्यपरैवस्यादित्याह ॥ तत्सत्यत्वेति ॥ अभिधया शक्त्या ॥ तत्प्रयोगेति ॥ शुद्ध पदप्रयोगेत्यर्थः ॥ वैयर्थ्यादिति ॥ अर्थबोधकत्वरूपप्रयोजनाभावादितिभावः । शुद्धबोधकत्वेचदृश्यत्वप्राप्त्याव्यभिचारइ

तत्सत्यत्वश्रुतिस्तुजगत्सत्यत्वश्रुतिवदनुमानादिविरोधेनासद्वैलक्षण्यपरेत्यापाताच्च । शुद्धं नदृश्यतइत्यत्रशुद्धशब्दस्याभिधयालक्षणयावाशुद्धाबोधकत्वेतत्प्रयोगवैयर्थ्याच्च । विशिष्टे मिथ्यात्वदृश्यत्वयोर्व्यतिरेकासंभवेनशुद्धनिष्ठव्यतिरेकज्ञानायशुद्धस्यज्ञेयत्वाच्च । विशि ष्टज्ञानेविशेष्यस्यापिभानेनविशिष्टस्यदृश्यत्वेनैवशुद्धस्यापिदृश्यत्वसिद्धेश्च । नचविष्णवे शिपिविष्टायेत्यादौदेवतात्ववत्विषयत्वमपिविशिष्टएव । नतुविशेष्येपीतियुक्तं ।

तिहृदयं ॥ शुद्धेति ॥ दृश्यत्वहेतोरन्वयव्यतिरेकित्वाद्धेतुसाध्यव्यतिरेकग्रहाधिकरणत्वेनशुद्धस्यज्ञेयत्वादित्यर्थः । ननुव्यतिरे कग्रहोपिविशिष्टएवास्तामित्यतउक्तं ॥ विशिष्टइति ॥ ननुविशिष्टस्यज्ञानविषयत्वेविशेष्यभूतशुद्धस्यापितत्सिद्धमित्ययुक्तं । विष्णवेशिपिविष्टायेत्यादौयथादेवतात्वंनविशेष्यभूतविष्णुमात्रे नवाशिपिविष्टे किंनाम शिपिविष्टत्वविशिष्टएव एवंवृत्तिविषय त्वमपिविशिष्टएव नतुविशेष्येपि विशिष्टस्यविशेष्यातिरिक्तत्वादित्याशंक्यनिषेधति ॥ नचेति ॥ विषयत्वमपि ज्ञानविषयत्व

SGDF
Sri Gargeshwari Digital Foundation

मपि ॥ देवतात्ववदेवेति ॥ तस्यशिपिविष्टमात्रेऽभावादितिभावः । विषयत्वस्यज्ञानविषयत्वस्य ॥ भागेति ॥ कर्तृत्वादि
रूपविशेषणभागस्यापिजगदंतःपातित्वादितिभावः ॥ नतुविशेष्येघटइति ॥ ततश्चतस्यमिथ्यात्वंनस्यादितिभावः । विशि
ष्टएवदृश्यत्वंनतुविशेष्यइत्यंगीकारेबाधकांतरमाह ॥ विशिष्टइति ॥ ननुविशिष्टज्ञानानंतरंव्यवधानेनविशेष्यज्ञानंजायतेत
ज्ज्ञानादेवविशेष्यविषयकाज्ञानस्यनिवृत्तिर्नतुविशिष्टज्ञानात् अतोविशिष्टेज्ञातेपिविशेष्येऽज्ञानादिकमुपपद्यतइत्यतआह ॥ दं

106 घटत्व आदि तरंगिणी

देवतात्ववदेवविषयत्वस्यापिविशेषणेप्यभावेनभागासिद्धेः । घट्विशिष्टएवदृश्य
त्वंनतुविशेष्येघटइत्यापाताच्च । विशिष्टेज्ञातेपिकदाचिद्विशेष्येअज्ञानाद्यापा
ताच्च । दंडीचैत्रइतिज्ञानेनैवचैत्रोपिज्ञातइत्यनुभवाच्च । एतेनानुभवविरोधादिनै
वाग्नीषोमयोर्देवतात्ववद्विषयत्वमपिव्यासज्यवृत्तीतिनविशेष्येतदितिनिरस्तं ।

डीचैत्रइतिज्ञानेनैवेति ॥ तथाचव्यवहितविशेष्यज्ञानकल्पनमप्रामाणिकमितिभावः ॥ अग्नीषोमयोरिति ॥ यथादेवता
त्वपर्याप्त्यधिकरणत्वमग्नीषोमयोरेवनैकस्य । एवंदृग्विषयत्वपर्याप्त्यधिकरणत्वंकर्तृत्वादिविशेषणब्रह्मणोरेवनैकैकस्येतिकेवलेब्र
ह्मणिनव्यभिचारइतिभावः । एतेनेत्युक्तंविशदयति ॥ अनुभवेति ॥ दंडीचैत्रइतिज्ञानेकेवलेविशेष्येपिज्ञानविषयत्वानुभवेन ॥ ५४ ॥
तद्विरोधादित्यर्थः । आदिपदेन घटत्वघटयोरेववृत्तिविषयत्वपर्याप्त्यधिकरणत्वप्राप्त्याकेवलेघटेतदभावापातेनभागासिद्ध्यापत्ते

SGDF
Sri Gargeshwari Digital Foundation

रित्यवधेयं । ननुब्रह्मणोदृश्यत्वेऽदृश्यत्वश्रुतिविरोधइत्यतआह ॥ अतएवेति ॥ ब्रह्मणोदृश्यत्वस्ययुक्त्योपपादितत्वादेवेत्यर्थः । सर्वथादृश्यत्वपरत्वेबाधकमाह ॥ अन्यथेति ॥ यदित्यनेनब्रह्मोद्दिश्यतत्रादृश्यत्वादिकंविधीयते । तथाचयदित्यादिपदेनैवब्रह्मणोज्ञातत्वात्तस्यपुनरदृश्यत्वाभिधानेस्वक्रियाविरोधइतिभावः । तथाचोक्तं । "यतइत्यादिकैर्वद" न्नित्यादि ॥ एतेनेति ॥ चरमवृत्त्युपहितस्यात्मनएवचरमवृत्तिविषयत्वरूपदृश्यत्वांगीकारेउपधेयस्यशुद्धस्यापिवृत्तिविषयत्वस्यप्राप्तत्वेनव्यभिचारादितिपूर्वोक्तरीत्यानिरस्तमित्यर्थः । किंचचरमवृत्त्युपहितस्यात्मनःचरमवृत्तिविषयत्वंवदन्प्रष्टव्यः । वेदांतजन्यचरमवृत्तौ

अतएवादृश्यत्वश्रुतिस्साकल्येनादृश्यत्वपरा । अन्यथायत्तदद्रेश्यमित्यादौयच्छब्दाद्ययोगात् । एतेनचरमवृत्त्युपहितस्यैवात्मनस्तद्विषयत्वात्तस्यचमिथ्यात्वान्नव्यभिचारइतिनिरस्तं । चरमवृत्तेःस्वविषयांतर्भावेतस्याःस्वप्रकाशत्वस्याप्रमात्वस्यचापातात् । वृत्त्युपरागोत्रसत्तयोपयुज्यते

ब्रह्मविशेषणीभूताचरमवृत्तिःप्रतीयते नवेति । आद्येआह ॥ चरमवृत्तेरिति ॥ स्वेति ॥ स्वशब्देनचरमवृत्तिर्ग्राह्या । तद्विषयश्चरमवृत्त्युपहितंब्रह्मतदंतर्भावेब्रह्मवत्तद्विशेषणीभूतायाःस्वस्यावृत्तेरपिस्वविषयत्वइत्यर्थः ॥ स्वप्रकाशत्वस्येति ॥ स्वकर्मकप्रकाशत्वंचकर्तृकर्मविरोधात्त्वयानांगीकृतमितिभावः ॥ अप्रमात्वस्यचेति ॥ चरमवृत्त्युपहितस्यब्रह्मणोमिथ्यात्वात्तद्विषयिण्याश्चरमवृत्तेरप्रमात्वंस्यादित्यर्थः । वृत्त्युपरागः ब्रह्मणोवृत्तिसंबंधः । अत्र चरमवृत्तौ । सत्तया स्वरूपसत्तयैव । तद्भाव

SGDF
Sri Gargeshwari Digital Foundation

त्येदर्शयति ॥ नत्विति ॥ प्रतिभास्यतयास्वस्या अपिचरमवृत्तेश्चरमवृत्तिविषयतयेत्यर्थः । तथात्वेचरमवृत्तेः स्वप्रकाशत्वाप्रमा त्वयोरापातादेवेतिभावः । द्वितीयेत्वाह ॥ बहिर्भावेचेति ॥ वेदांतजन्यचरमवृत्तेर्ब्रह्ममात्रविषयकत्वेनस्वविषयकत्वानंगी कारइत्यर्थः ॥ विषयस्येति ॥ ब्रह्मणइत्यर्थः । तथाचचरमवृत्तेर्ब्रह्ममात्रविषयकत्वेनतस्मिन्वृत्तिविषयत्वसत्त्वेपिमिथ्यात्वाभा वाव्यभिचारइत्यर्थः ॥ स्वरूपेणेति ॥ विशेषणाविशिष्टकेवलस्वरूपेणैववृत्तिविषयत्वमित्यर्थः ॥ विशिष्टरूपेणैवेति ॥ विशे षणावच्छिन्नस्वरूपेणेत्यर्थः । तथाचहेतोरेवाभावान्नशुद्धेब्रह्मणिव्यभिचारइतिभावः । ननुनघटादेरपिविशिष्टरूपेणैवदृश्यत्वं ।

108

नतुप्रतिभास्यतयेतिकल्पतरुविरोधाच्च । बहिर्भावेचविषयस्यसत्यत्वेनव्यभिचारानुद्धारात् । नच स्वरूपेणदृश्यत्वंहेतुः । ब्रह्मतुविशिष्टरूपेणैवदृश्यमितिवाच्यं । निर्विकल्पकाभावपक्षेघटादेरपित त्सद्भावपक्षेनित्यातींद्रियस्यापिविशिष्टरूपेणैवदृश्यत्वेनासिद्धेः । नहिलिंगादिनानिर्विकल्पकधीः ।

निर्विकल्पकज्ञानविषयस्यघटादेःस्वरूपेणैवदृश्यत्वादतोनासिद्धिरित्यतउक्तं ॥ निर्विकल्पकेति ॥ ननुनित्यातींद्रियस्यापिनि र्विकल्पकविषयत्वसंभवेनस्वरूपेणदृश्यत्वोपपत्तेर्नविशिष्टरूपेणैवदृश्यत्वमित्यतोनासिद्धिरितिचेन्न । नित्यातींद्रियस्यज्ञानंनता वत्प्रत्यक्षेणभवितुमर्हं किंतुलिंगागमाभ्यामेवेतिवाच्यं । अस्तुतर्हिलिंगागमाभ्यामेवधर्माद्यतींद्रियविषयकनिर्विकल्पकज्ञानोदयः । ॥ ५५ ॥ तथाचनासिद्धिरित्यतआह ॥ नहीति ॥ लिंगजन्यानुमितिरूपज्ञानस्यननिष्प्रकारकनिर्विकल्पकज्ञानरूपत्वं । अनुमितेर्व्याप

कतावच्छेदकप्रकारकत्वनियमात् । तथाशब्देनापिजायमानंज्ञानंननिर्विकल्पकं । तस्यशक्यतावच्छेदकप्रकारकत्वनियमात् । किंचब्रह्मणोनस्वरूपेणवृत्तिविषयत्वं किंतुविशिष्टरूपेणैवेतियद्युच्यते तर्हिवेदांतानांकल्पितविशिष्टपरत्वेनातत्वावेदकत्वंस्यादि त्याह ॥ वेदांतानामिति ॥ तरतिशोकमिति ॥ तदुपादानाज्ञानंचेतिद्रष्टव्यं । यतोज्ञानमज्ञानस्यतत्कार्यस्यवानिवर्तक मित्यंगीकारात् । तथाचशोकाज्ञानतरणरूपनिवृत्तिंप्रतिसाधनत्वेनोक्तायाआत्मसंविदोनभ्रमत्वंयुक्तं । भ्रमस्याज्ञानानिवर्तक त्वात् । किंतुप्रमात्वमेव । प्रमात्वंचतस्याःकल्पितविशिष्टाविषयकत्वेनैववाच्यं । एवंचवेदांतानांकल्पितविशेषविनिर्मुक्तशुद्ध

109

वेदांतानांकल्पितविशिष्टपरत्वेतत्वावेदकत्वायोगाच्च । "तरतिशोकमात्मवि" दित्यादौमोक्षसाधनशुद्धरूपप्रमोक्तेश्च । किंचशुद्धज्ञानाभावेतदाच्छादकस्यमू लाज्ञानस्यनिवृत्तिर्नस्यात् । ज्ञानस्याज्ञाननिवर्तकत्वेहिसमानविषयत्वंतंत्रं ।

ब्रह्मज्ञानजनकत्वमेवेतितत्रव्यभिचारइत्यर्थः। मोक्षसाधनेतिप्रमाविशेषणं ॥ तदाच्छादकस्येति ॥ शुद्धावरकस्येत्यर्थः । (शु द्धब्रह्मविषयकस्येत्यर्थः) । ननुशुद्धज्ञानाभावेपिघटादिज्ञानेनतदज्ञाननिवृत्तिर्दृष्टा यावंतिज्ञानानितावंतितन्निवर्त्याज्ञानानीतिम तसद्भावात् । अतउक्तंमूलेति । घटज्ञानेनतदधिष्ठानचैतन्यावरकाज्ञानविवृत्तावपिसर्वजगदारोपाधिष्ठानभूतशुद्धब्रह्माच्छाद कंयन्मूलाज्ञानंनतन्निवृत्तं । तन्निवृत्तिश्चशुद्धब्रह्मज्ञानेनैव । तस्यचज्ञानाविषयत्वेतदाच्छादकमूलाज्ञाननिवृत्तिर्नस्यादित्यर्थः । ननुशुद्धज्ञानस्यशुद्धविषयकत्वाभावेपिशुद्धाज्ञाननिवर्तकत्वंकिंनस्यादित्यतआह ॥ ज्ञानस्येति ॥ ननुज्ञानस्याज्ञाननिवर्तकत्वे

SGDF Foundation

ऽज्ञानसमानविषयकत्वंनतंत्रं अप्रामाणिकत्वात् । नचघटादिज्ञानेदृष्टमितिवाच्यं । घटादिज्ञानेपितदज्ञाननिवर्तकत्वेघटान्याविषयकत्वमेवतंत्रं नसमानविषयकत्वं । एवंचब्रह्मज्ञानस्यब्रह्माविषयकत्वेपि ब्रह्मान्याविषयकत्वाद्ब्रह्माज्ञाननिवर्तकत्वंयुक्तमित्याशंक्यनिराकरोति ॥ **नचेति** ॥ तत्र घटाद्यज्ञाननिवर्तकत्वे । कुतोनचेत्यतआह ॥ **गौरवादिति** ॥ भावरूपत्वेनलघुत्वात्समानविषयकत्वमेवतंत्रं नतुतदन्याविषयकत्वंतंत्रं । अभावरूपत्वेनगुरुत्वादितिभावः ॥ **दीपेति** ॥ यद्विषयकंतमः तद्विष

नचघटादिविषयज्ञानेष्वप्यन्याविषयत्वमेवतत्रतंत्रं । गौरवात् । दीपेच्छादौसमानविषयत्वेनैवविरोधितमोद्वेषादिनिवर्तकत्वदर्शनाच्च । घटपटावितिज्ञानेनघटाज्ञानस्यविशिष्टज्ञानेनचविशेषणाज्ञानस्यचनिवृत्तिदर्शनाच्च । ब्रह्मज्ञानस्यानिर्विषयत्वे ज्ञानत्वायोगस्यवक्ष्यमाणत्वाच्च । अथतदज्ञाननिवर्तकत्वेतदाकारत्वमेवतंत्रं ।

८०

यकस्यैवदीपप्रकाशस्यविरोधितमोनिवर्तकत्वं । तथायद्विषयकोद्वेषः तद्विषयिण्याअयंमेप्रियोभूयादितीच्छायाविरोधिद्वेषनिवर्तकत्वं समानविषयकत्वेनैवदृष्टमित्यर्थः । नन्वत्रापितदन्याविषयकत्वमेवतंत्रमस्त्वित्यस्वरसादाह ॥ **घटपटाविति** ॥ घटपटावितिसमूहालंबनज्ञानस्यघटाज्ञाननिवर्तकत्वमस्ति तत्रतदन्याविषयकत्वंनास्ति घटान्यपटविषयकत्वात् । तथाविशिष्टज्ञानेनविशेषणाज्ञानंनिवर्तते । तत्रचनतदन्याविषयकत्वं विशेषणान्यविशेष्यविषयकत्वादितिभावः ॥ **ज्ञानत्वायोगस्येति** ॥ न

SGDF Sri Gargeshwari Digital Foundation

तावद्ब्रह्मरूपज्ञानस्यब्रह्मान्योविषयः । तस्यमिथ्यात्वेनब्रह्मज्ञानस्यभ्रमत्वापत्तेः । ब्रह्मणस्तुविषयत्वंकर्तृकर्मविरोधादयुक्तमित्ये वंनिर्विषयत्वाद्ब्रह्मज्ञानस्यज्ञानत्वमेवायुक्तमितिवक्ष्यमाणत्वादित्यर्थः । यथोक्तं । “ निर्विषयत्वेज्ञानमेवनस्याद्घटव” दिति । न नुतदाकारत्वमपितद्विषयकत्वाभावेकथंयुक्तमित्यतआह ॥ तच्चेति ॥ तदाकारत्वंचेत्यर्थः ॥ **तद्विषयत्वाभावेपीति** ॥ ज्ञा नस्यतद्विषयकत्वाभावेपीत्यर्थः ॥ **करणसामर्थ्यादेवेति** ॥ आकांक्षादिमच्छब्दरूपकरणस्यतदाकारज्ञानजनकत्वरूपसाम र्थ्यादेव नविषयसामर्थ्यादित्यर्थः । तथाहि शशशृंगादिशब्दाच्छशशृंगादिज्ञानंशशशृंगाद्याकारंतावज्जायते तत्रतदाकारत्वेन

तच्चतद्विषयत्वाभावेपिकरणसामर्थ्यादेवशशशृंगादिशब्दज
न्यज्ञानस्येवयुक्तं । दृश्यत्वश्रुत्यादिकमपितद्विषयमितिचेत् ।

तद्विषयकत्वंप्रयोजकं विषयत्वंहिकर्मत्वं तच्चकारकविशेषः(क्रियाजनकत्वविशेषः) । तस्यचसकलसामर्थ्यविधुरेशशशृंगेऽभा वात् । तस्मादाकांक्षादिमच्छब्दरूपकरणसामर्थ्याज्जायमानं शशशृंगाविषयकमपिशशशृंगाकारमेवजायतइत्यनुभवसिद्धं । ए वंब्रह्मणःसकलसामर्थ्यविधुरस्य कारकविशेषकर्मत्वापरपर्यायविषयत्वाभावेप्याकांक्षादिमद्वेदांतवाक्यरूपकरणसामर्थ्याज्जाय मानंज्ञानंब्रह्माविषयकमपिब्रह्माकारमेवजायतइ(त्यंगीकारादि)तिभावः । ननुब्रह्मज्ञानस्यब्रह्मविषयकत्वाभावे दृश्यतेत्वग्र्यया बु द्ध्येतिब्रह्मणोदृश्यत्वोक्तिविरोधइत्यतआह ॥ दृश्यत्वेति ॥ तद्विषयमिति ॥ तदाकारत्वविषयमित्यर्थः । तथाचदृश्यतइत्य

SGDF
Sri Gargeshwari Digital Foundation

स्यवेदांतजन्यब्रह्मज्ञानंतदाकारंभवतीत्येवार्थोवक्तव्यइतिभावः । वेदांतजन्यावृत्तिरात्माकारेत्यत्रविकल्पयति ॥ **सएवेति** ॥ सएव आत्मैव । तदाकारएव आत्माकारएव । तदाकारइव आत्माकारसदृशइत्यर्थः ॥ **वृत्त्यनाश्रितस्येति** ॥ आकारोह्या कारिणमाश्रयते । नचात्माख्याकारोवृत्तिरूपमाकारिणमाश्रयते अतोनात्मावृत्तेराकारइत्यर्थः ॥ **साकारवादेति** ॥ ज्ञानस्ये तिशेषः । बौद्धमतएवज्ञानंसाकारं नत्वन्मतेऽतइदंतवानिष्टमितिभावः । इदंचदूषणंपक्षत्रयेपिद्रष्टव्यं ॥ जडाद्याकारेति ॥

सएवाकारोयस्येतिवा । तदाकारएवाकारोयस्येतिवा । तदाकारइवाकारोयस्येतिवा । नाद्यः । वृत्त्यनाश्रितस्यात्मनोवृत्त्याकारत्वायोगात् । नद्वितीयः । साकारवादापातात् । जडाद्याकारवृत्तावात्मीयस्यज्ञानानंदाद्यपरिच्छेदाकारस्याभावाच्च । सत्तयैकाकारत्वे चघटज्ञानस्याप्यात्माकारत्वापाताच्च । आत्मनोनिराकारत्वाच्च । अतएवनतृतीयः ।

जडानानंदपरिच्छेदानृतरूपाकारयुक्तायावृत्तेर्ब्रह्मसंबंधिज्ञानानंदापरिच्छेदसत्यरूपाकारयुक्तत्वंनसंभवतीत्यर्थः । नन्वसाधारणो ज्ञानानंदापरिच्छेदादिरात्माकारोवृत्तेराकारइतिनब्रूमः । किंतुसर्वसाधारणीसत्तैवेत्यतआह ॥ **सत्तयेति** ॥ सत्तायाघटात्मोभ यनिष्ठत्वादितिभावः । ननुसत्तादिरूपसाधारणज्ञानादिरूपासाधारणाकारव्यतिरिक्तःसंस्थानविशेषएवात्माकारोवृत्तेराकारइत्यु च्यतइत्यतआह ॥ **आत्मनइति** ॥ आत्माकारसदृशाकारत्वंवृत्तेरितितृतीयोपिनसंभवतीत्यत्रोक्तमतएवेतिहेतुंविशदयति ॥

SGDF
Sri Gargeshwari Digital Foundation

ज्ञानेति ॥ अतिप्रसक्तेरिति ॥ घटज्ञानस्याप्यात्माकारतापातादित्युक्तातिप्रसक्तेरित्यर्थः ॥ घटतद्वृत्त्योरिति ॥ यथातटाकोदकस्यकुल्यात्मनाबहिर्निस्सृतस्यकेदारान्प्रविष्टस्यकेदारवदेवचतुष्कोणत्वाद्याकारत्वंभवति तद्वदेवसावयवस्यतैजसस्यांतःकरणस्यचक्षुरादिद्वाराबहिर्निस्सृतस्यघटादिविषयंव्याप्यघटाकारत्वंभवति सेयंवृत्तिरित्युच्यमानत्वेनघटतद्वृत्त्योःपृथुबुध्नोदरत्वादिसंस्थानसाम्यंसंभवतीत्यर्थः । एतादृशवृत्तेरप्रामाणिकत्वात्कथंचिदित्युक्तं । तद्विषयत्वमेवहितदाकारत्वमितिभगवत्पादवाक्यंमनसिनिधायाह ॥ तस्मादिति ॥ ननुशशविषाणशब्दात्तदाकारंज्ञानमुपजायतइतिताव(त्साक्षि)दनुभवसिद्धं । नतुतत्स 113

ज्ञानानंदादिनासाम्यस्यासंभवात् । सत्तयासाम्यस्यचातिप्रसक्तेः । संस्थान(सारूप्य)साम्यस्यचघटतद्वृत्त्योःकथंचित्संभवेपिअपरिच्छिन्नपरिच्छिन्नयोर्ब्रह्मतद्वृत्त्योरयोगात् । तस्मात्तद्विषयत्वमेवतदाकारत्वमितिवाच्यं ।

विषयकं । सकलसामर्थ्यविधुरस्यकर्मत्वापरपर्यायविषयत्वायोगादेव । प्रकृतेपितथास्त्वितिचेत् । अत्रब्रूमः । शशविषाणशब्दादुपजायमानंज्ञानंसविषयंनिर्विषयंवा । निर्विषयत्वेज्ञानमेवनस्याद्घटवत् । सविषयत्वेकथमकर्मकंस्यात् तयोरेकत्वात् । अथकथंसकलसामर्थ्यविकलस्यशशविषाणस्यकर्मत्वमितिचेत् विषयत्वमपिकथं । ननुनविषयत्वंनामवस्तुसामर्थ्यं किंनाम करणसामर्थ्याद्यदुल्लेखिज्ञानमुपजायतेसतस्यविषयइत्युच्यतइतिचेत् । अथज्ञानंप्रतिकर्मत्वमपिकिमधिकंपश्यसि । कर्तृकारकाद्यन्यत्वे

SGDF
Sri Gargeshwari Digital Foundation

सतिज्ञानजनकत्वमितिचेन्न । ज्ञानजनकत्वमित्यत्रकिंज्ञानत्वावच्छिन्नज्ञानजनकत्वंविवक्षितंअपरोक्षज्ञानजनकत्वंवा । नाद्यः ।
ज्ञानंप्रत्यर्थस्यव्यभिचारेणकस्मिन्नपिज्ञानेजनकत्वासंभवात् । नद्वितीयः । यद्यप्यपरोक्षज्ञानेविषयस्यनियतपूर्ववृत्तित्वम(स्त्ये
व)स्ति तथापिनानन्यथासिद्धिः । विषयस्येंद्रियसन्निकर्षनिष्पादकत्वेनान्यथासिद्धत्वात् । नचवर्तमानविषयकजन्यप्रत्यक्षत्वा
वच्छेदेनाव्यभिचारादनन्यथासिद्धेश्चकर्मणोपिहेतुत्वं । अन्यथाविषयसन्निकर्षनिष्पादकत्वेनकरणस्याप्यन्यथासिद्धतयाजनक
त्वंनस्यादितिवाच्यं । वर्तमानविषयकानुमितित्वावच्छेदेनापिकर्मणोहेतुत्वापत्तेः । सामान्यरूपतयालघुभूतविद्यमानविषयक
ज्ञानत्वावच्छेदेनापिजनकत्वापत्तेश्च । तत्रविषयस्यव्याप्त्यादिलक्षणसन्निकर्षनिष्पादकत्वेनान्यथासिद्धत्वेऽत्रापितथास्तु । नचै
वमिंद्रियस्यापिविषयसन्निकर्षजनकत्वेनान्यथासिद्धतयाऽजनकत्वमस्त्वित्युक्तमितिवाच्यं । याक्रियासाकरणजन्येतिक्रियायाः
करणजन्यत्वनियमेनव्यापारवतएवचकरणत्वेनसन्निकर्षजनकस्यापिचक्षुरादेःज्ञानजनकत्वंयुक्तमितिनविषयस्यकरणसमानयो
गक्षेमवत्ता । ननुचक्षुरादेःकरणस्यकरणत्वसिद्ध्यर्थंकर्मसन्निकर्षरूपव्यापारजननद्वाराक्रियाजनकत्वं । एवमेवघटादेःकर्मत्वसि
द्ध्यर्थंकरणसन्निकर्षरूपव्यापारजननद्वाराक्रियाजनकत्वमस्तु अन्यथाकरणत्ववत्कर्मत्वमपिनस्यादितिचेन्न । नहिकरणत्वमिव
कर्मत्वमपिव्यापारवत्त्वं । अतीतादिविषयकशाब्दादिज्ञानकर्मण्यव्याप्तेरिति । यथोक्तंतत्वोद्योतटीकायां । “ यत्रशाब्दादौज्ञा
नेविनापिविषयसत्त्वेनकरणसन्निकर्षोत्पत्तिस्तत्रासतोपिकर्मत्वेकिमनुपपन्न” मिति । ननुविनापिविषयसत्त्वंसन्निकर्षोत्पत्तिरिति ॥ ५८ ॥
कथमुच्यते कथंवाशाब्दानुमितिरूपज्ञानस्थलेसन्निकर्षापेक्षेतिचेन्न । नहिसन्निकर्षोविषयसत्त्वव्याप्यः सामान्यादेरतीतादिवि

SGDF Sri Gargeshwari Digital Foundation

वीर

ष्यप्रत्यासत्तित्वाभ्युपगमात् । नवाशब्दादिकमसन्निकृष्टकरणं । घटशब्दादिनापटादेर्धूमेनघटादेरपिबोधप्रसंगात् । नचशक्ति
व्याप्त्यादिकमेवातिप्रसंगभंजकमितिवाच्यं । तस्यैवसन्निकर्षशब्दार्थत्वोपगमात् । नन्वेवंपद्धत्यादिविरोधः । तत्रप्रमा
तृप्रमेयव्यवच्छेदार्थंसाधनग्रहणमित्युक्त्याप्रमेयापरपर्यायस्यविषयस्यापिजनकत्वांगीकारादितिचेन्न । तस्यपररीत्यांगीकारवाद
त्वादित्यवसेयं ॥ अन्यथेति ॥ तद्विषयत्वमेवतदाकारत्वमित्यनंगीकारइत्यर्थः । घटादिज्ञानेआत्मज्ञानेइत्यनयोरनंतरंतदज्ञा 115

अन्यथाघटादिज्ञानेतद्विषयत्वंतंत्रं । आत्मज्ञानेतुतदाकारत्वमित्यननुगमादितिसुस्थआत्म
निव्यभिचारः । अनिर्वचनीयत्वादिकंमिथ्यात्वमितिपक्षेतुतुच्छेव्यभिचारश्च । असद्वैलक्ष
ण्यज्ञानार्थंतस्यापिज्ञेयत्वात् ॥ अथप्राचांरीत्यामास्तुदृग्विषयत्वंदृश्यत्वं । किंत्वाधुनिकरी
त्याफलव्याप्यत्वमितिद्वितीयोस्त्वितिचेत् । फलंहिमद्रीत्याव्यवहारोवा। भट्टरीत्याज्ञातता
वा त्वद्रीत्यावृत्तिप्रतिफलितंचैतन्यंवा तदभिव्यक्तंविषयाधिष्ठानचैतन्यंवा। नाद्यः ।

ननिवर्तकत्वइतिशेषः । ननुसद्विविक्तत्वरूपमिथ्यात्वाख्यसाध्यस्यापितुच्छेसत्त्वात्नतत्रव्यभिचारइत्यतउक्तं ॥ अनिर्वचनी
यत्वादिकमित्यादि ॥ आदिपदेनज्ञाननिवर्त्यत्वादि । ननुतत्रदृश्यत्वाख्यहेतोरेवाभावान्नव्यभिचारइत्यतआह ॥ असद्वैल
क्षण्येति ॥ अभावज्ञानायप्रतियोगिनोज्ञातव्यत्वादितिभावः ॥ भट्टरीत्येति ॥ व्यवहारेभट्टनयइत्यंगीकारादितिभावः ।

SGDF
Sri Gargeshwari Digital Foundation

व्यवहारःकिंहानादिरूपोविवक्षितः अभिलपना(लापा)दिरूपोवा। नाद्यइत्याह ॥ हानादेरिति ॥ आदिपदेनोपादानोपेक्षेग्राह्ये । तथाचगगनादेर्व्याप्तत्वेनहानोपादानयोरभावाद्भागासिद्धिः । तत्रोपेक्षाबुद्धिविषयत्वसद्भावेपिकदलीफलादावुपादेयेऽसिद्धिः । तत्राप्युपादानबुद्धिविषयत्वसत्त्वेपिअहिकंटकादौहेयेतदभावादसिद्धिः । तत्रहानविषयत्वसत्त्वेपितस्योपेक्षणीयतृणादावभावादसिद्धिरित्येवंप्रत्येकंहानादिविषयत्वस्यहेतुत्वेभागासिद्धिरित्यर्थः । ननुहानाद्यन्यतमविषयत्वस्यविवक्षितत्वान्नलक्षणस्यपरस्पराव्याप्तिः नाप्यनुमानेभागासिद्धिरितिचेन्न । त(स्या)थाप्यानंदरूपतयासर्वोपादेयेब्रह्मणिव्यभिचारापरिहारादितिद्रष्टव्यमिति

हानादेर्गगनादावभावात् । अभिलापस्यचात्मन्यपिभावात् । नद्वितीयः । ज्ञाततायाममघटादौपरस्याप्यतीतादावभावात् । नतृतीयचतुर्थौ । अतीतादावसिद्धेः। तदपिस्वसत्ताकालेफलव्याप्यमितिचेन्न । नित्यातींद्रियेऽसिद्धेः।

संप्रदायः ॥ आत्मन्यपीति ॥ अयमात्मेत्याद्यभिलपनरूपव्यवहाराख्यफलव्याप्यत्वस्यात्मन्यपिभावाद्व्यभिचारइतिभावः ॥ अतीतादाविति ॥ असतिधर्मिणिधर्मजननायोगादितिभावः । तथाचोभयरीत्याभागासिद्धिरितिभावः ॥ अतीतादाविति ॥ तत्रातीतेऽनागतेचसन्निकर्षासंभवात्तत्रांतःकरणवृत्तेश्चक्षुरादिद्वारा बहिर्निस्सरणाभावेनतत्प्रतिफलितचैतन्यतदभिव्यक्ताधिष्ठानचैतन्यरूपफलाभावेनतद्व्याप्यत्वाभावादितिभावः । तदपि अतीतादिकमपि ॥ नित्यातींद्रियइति ॥ धर्मादीनां

नित्यातींद्रियत्वेन चक्षुराद्यसन्निकृष्टतयाद्वाराभावेनांतःकरणवृत्तेर्नबहिर्निस्सरणं किंनामांतरेवतदाकारवृत्तिर्भवतीतितन्मतं । एवंचांतःकरणवृत्तेश्चक्षुरादिद्वाराबहिर्निस्सरणाभावेनतत्प्रतिफलितचैतन्यतदभिव्यक्ताधिष्ठानचैतन्यरूपफलयोरसंभवेनतद्व्याप्यत्वाभावाद्भागासिद्धिरित्यर्थः ॥ योगिनंप्रतीति ॥ धर्मादेर्योगिप्रत्यक्षत्वाद्योग्यंतःकरणवृत्तेर्बहिर्निस्सरणसंभवेनतत्प्रतिफलितचैतन्यादिरूपफलव्याप्यत्वंसंभवतीतिनासिद्धिरितिभावः ॥ चोदनैकेति ॥ यथोक्तंजैमिनिना" चोदनागम्योर्थोधर्म "इतिचोदनाविधिवाक्यं । तथाचशास्त्रैकसमधिगम्यत्वेनयोगिप्रत्यक्षविषयत्वमपि धर्मादीनांनास्तीत्युक्तत्वेनत्वयाधर्मादीनांयोगि

तदपियोगिनंप्रतिफलव्याप्यमितिचेन्न । चित्सुखेननचयोगिप्रत्यक्षगम्यतयाऽपरोक्षत्वंधर्मादीनां चोदनैकप्रमाण(गम्य)योग्यत्वादित्युक्तत्वेनतद्विरोधात् । तुच्छमपितुच्छत्वेनयोगिनंप्रत्यपरोक्षमिति सुवचत्वाच्च।पक्षैकदेशेसाक्षिवेद्याविद्यांतःकरणतद्धर्मसुखादौ दृष्टांतेशुक्तिरूप्येचफलव्याप्यत्वाभावाच्च।

नंप्रतिफलव्याप्यत्वांगीकारेतद्विरोधादित्यर्थः । नित्यातींद्रियस्यापियोगिप्रत्यक्षविषयत्वेनापरोक्षत्वेऽतिप्रसंगमाह ॥ तुच्छमपीति ॥ तथाचासच्चेदपरोक्षतयानप्रतीयेतेत्यापादनानुपपत्तिरितिभावः ॥ पक्षैकदेशइति ॥ चक्षुरादिद्वाराबहिर्निस्सृतांतःकरणवृत्तिप्रतिबिंबितचैतन्यादिरूपफलव्याप्यत्वंबाह्यपदार्थएवांगीकृतं नसाक्षिवेद्याविद्याद्यांतरपदार्थे अतोभागासिद्धिः । तथाशुक्तिरूप्यादेःप्रातिभासिकत्वेनसाक्षिवेद्यांतरपदार्थत्वांगीकारान्नोक्तवृत्तिप्रतिबिंबितचैतन्यादिरूपफलव्याप्यत्वंत्वयांगीकृत

SGDF
Foundation

दृश्यत्वं च वृत्तिव्याप्यत्वं, फलव्याप्यत्वं, साधारणं, कदाचित् कथंचित् चिद्विषयत्वं, स्वव्यवहारे स्वातिरिक्त संविदपेक्षानियतिः, अस्वप्रकाशत्वं, इति षोढा विकल्पितं ।

मितिदृष्टांतेसाधनवैकल्यंचेत्यर्थः ॥ सामान्यस्यापीति ॥ दृश्यत्वरूपसामान्यस्यापि साधारणस्यापीत्यर्थः । ननुब्रह्मणिवृत्ति व्याप्यत्वसत्त्वेपिनसाधारणंदृश्यत्वमस्तीत्यतउक्तं ॥ वृत्तिव्याप्यत्वरूपविशेषस्येति ॥ ऋग्वेदिनिब्राह्मणत्ववद्विशेषसद्भावे सामान्यस्यापिसत्त्वाद्ब्रह्मणिव्यभिचारइतिभावः । कदाचिदितिविशेषणं भागासिद्धिवारणायेत्याशयेनोपपादयति ॥ अतीता देरपीत्यादिना ॥ कदाचि त्स्वसत्ताकाले ॥ स्वाकारेति ॥ स्वविषयकेत्यर्थः ॥ अविद्यादेरिति ॥ आंतरपदार्थस्येत्यर्थः ॥

नापिसाधारणमितितृतीयः(पक्षः) । ब्रह्मणिवृत्तिव्याप्यत्वरूपविशेषस्यसत्वेन(दृश्य त्वरूप)सामान्यस्यापिसत्वात् । नन्वस्तुतर्हिचतुर्थः । अतीतादेरपिकदाचित्स्वाकार वृत्तिप्रतिफलितचिद्विषयत्वात् । अविद्यादेरपिसाक्षिविषयत्वात्।नित्यातींद्रियस्यापि ज्ञातत्वेनाज्ञातत्वेनवासाक्षिविषयत्वात् । दृग्रू(पस्या)पात्मनस्तुतदविषयत्वादितिचेन्न।

साक्षीति ॥ साक्षिरूपचिदित्यर्थः । नित्यातींद्रियेभागासिद्धिवारणायकथंचिदित्युक्तमित्याशयेनोपपादयति ॥ ज्ञातत्वेने त्यादिना ॥ धर्मादिकंजानामीतिज्ञानावच्छेदकत्वेनवा नजानामीत्यज्ञानावच्छेदकत्वेनवा कथंचित्साक्षिरूपचिद्विषयत्वादित्य र्थः । अस्यहेतोर्नब्रह्मणिव्यभिचारइत्याह ॥ दृग्रूपस्येति ॥ चिद्रूपस्येत्यर्थः ॥ तदविषयत्वादिति ॥ ज्ञानरूपत्वेनधात्वर्थ क्रियारूपस्यब्रह्मणःकर्मत्वासंभवेनचिदविषयत्वादित्यर्थः । नित्यातींद्रियाणांयथाज्ञानाद्यवच्छेदकतयाकथंचित्साक्षिरूपचिद्वि

114

SGDF
Sri Gargeshwari Digital Foundation

षयत्वमस्ति (एवं)तथाब्रह्मणोपिज्ञानाद्यवच्छेदकतयाकथंचिच्चिद्विषयत्वमस्तीत्याह ॥ नित्यातींद्रियमिति ॥ प्रकारांतरेणापि चितोब्रह्मणश्चिद्विषयत्वमुपपादयति ॥ तद्व्यवहारेति ॥ चित्चिद्विषयिणी ४ तद्विषयकव्यवहारजनकत्वात् । यद्यद्विषयक व्यवहारजनकंतत्तद्विषयं यथाघटव्यवहारजनकंघटज्ञानंघटविषयकमित्यनुमानंद्रष्टव्यं । ननुज्ञानस्यतद्विषयकव्यवहारजनक त्वेतद्विषयकत्वरूपंसाध्यंनप्रयोजकं किंतुतदन्याविषयकत्वमेवेत्यतउक्तं ॥ तद्व्यवहारेति ॥ तदन्याविषयकत्वस्यघटव्यवहार जनकेघटपटावितिसमूहालंबनज्ञानेव्यभिचारेणगौरवेणचतद्विषयकव्यवहारजनकत्वेऽप्रयोजकत्वादितिभावः । ननुचितोज्ञान 119

नित्यातींद्रियंपूर्वंनज्ञातंइदानींशब्देनज्ञातमितिवत्शुद्धंब्रह्मपूर्वंनज्ञातमिदानींवेदांतेनज्ञात
मित्यनुभवेनब्रह्मणिव्यभिचारात् । तद्व्यवहारजननेतद्विषयत्वस्यतंत्रत्वेनस्वव्यवहारहेतो
श्चितोप्यभिधानस्याभिधेयत्ववच्चिद्विषयत्वाच्च। कल्पितभेदेनबिंबप्रतिबिंबयोर्लिंगलिंगिभा
ववज्जीवब्रह्मणोर्ज्ञातृज्ञेयभाववच्चात्मनोपिस्वाकारवृत्तिप्रतिफलितचिद्विषयत्वसंभवाच्च ।

रूपत्वेनक्रियात्वात्कथंतस्याःस्वविषयकत्वेनकर्मत्वं क्रियायाःकर्मत्वादर्शनादित्यतउक्तं ॥ अभिधानस्येति ॥ अभिधायाइत्य र्थः । अभिधेयत्वस्यकेवलान्वयित्वादभिधारूपक्रियायाअपिअभिधाविषयत्वेनकर्मत्वमस्तितद्वदित्यर्थः । नन्वथापिचितश्चिद्वि षयत्वंनोपपन्नं भेदाभावादित्याशंक्यकल्पितभेदसद्भावाद्युक्तमित्येतद्दृष्टांताभ्यामुपपादयति ॥ कल्पितभेदेनेति ॥ बिंबेति॥ त्वन्मतेबिंबप्रतिबिंबयोरभेदेपिकल्पितभेदमादाययथाप्रतिबिंबस्यबिंबानुमापकत्वं यथावा जीवब्रह्मणोरभेदेपिकल्पितभेदमादा

SGDF
Sri Gargeshwari Digital Foundation

यज्ञातृज्ञेयभावः तथाचितएकत्वेपिकल्पितभेदमादायस्वविषयकांतःकरणवृत्तिप्रतिफलितचिद्विषयत्वसंभवादित्यर्थः ॥ अन्य
थेति ॥ आत्मनःस्वाकारवृत्तिप्रतिफलितचिद्विषयत्वाभावे । तया स्वाकारवृत्तिप्रतिफलितचिता । यथाघटादेःस्वाकारांतःकर
णवृत्तिप्रतिफलितचिद्विषयत्वेनघटाज्ञाननिवृत्तिर्दृष्टा एवमात्मनोपितदज्ञाननिवृत्त्यर्थंस्वाकारवृत्तिप्रतिफलितचिद्विषयत्वेवाच्ये
व्यभिचारएवेतिभावः । ननुतदाकारवृत्त्यैवतदज्ञाननिवृत्ति(रित्या)रास्तां तथाचचिद्विषयत्वाभावान्नव्यभिचारइत्यतआह ॥
तदाकारेति ॥ तर्ह्यनयैवरीत्याघटाद्याकारवृत्त्यैवघटाज्ञाननिवृत्त्युपपत्तौघटादेरपिचिद्विषयत्वाभावापत्त्याऽसिद्धिःस्यादितिभा
वः । ननुघटाकारवृत्तौचित्प्रतिफलनंविनानाऽज्ञाननिवृत्तिः घटाद्याकारवृत्तिमात्रस्याज्ञानानिवर्तकत्वात् । यथाहुः "तृणादे

अन्यथातयातदज्ञाननिवृत्त्ययोगात् । तदाकारवृत्त्यैवचतन्निवृत्तौघटादावपितथात्वापातेनासिद्धेः ।

र्भासिकाप्येषासूर्यदीप्तिस्तृणंदहेत् । सूर्यकांतमुपारुह्यतन्न्यायंचितियोजये"दिति । अतोंतःकरणवृत्तिप्रतिफलितचिद्विषयत्वं
घटादेर्वक्तव्यमितिचेत्तर्ह्यात्मन्यपिवृत्तिमात्रस्याज्ञानानिवर्तकत्वादात्मनोप्यात्माकारवृत्तिप्रतिफलितचिद्विषयत्वंवाच्यमितिसमं ।
नन्वात्मनोंतःकरणवृत्तिप्रतिफलितचिद्विषयत्वाभावेप्यात्मनःस्फुरणरूपत्वात्स्फुरणरूपात्माकारवृत्त्यातदज्ञाननिवृत्तिर्युक्तेतिचेत्त
र्हिघटस्यापिस्फुरणरूपत्वात्स्फुरणरूपघटाकारवृत्त्यैवाज्ञाननिवृत्त्युपपत्तेरस्याप्यंतःकरणवृत्तिप्रतिफलितचिद्विषयत्वंनस्यादितिस ॥ ६१ ॥
मं ॥ ननुघटस्यस्फुरणरूपत्वेघटाज्ञानमेवनस्यादितिचेत् तर्हिब्रह्मणोपिस्फुरणरूपत्वेतदज्ञानमपिनस्यादितिसमं । नन्वज्ञानावि

रोधिस्फुरणरूपंब्रह्मेतिचेत्तत्राह । अज्ञानेतीतिसंप्रदायः । किंचघटादौस्वाकारेंद्रियजन्यवृत्तिविषयत्वमात्रंविहायतत्प्रतिबिंबित
चैतन्यरूपज्ञानविषयत्वंकस्मात्कल्प्यते किंघटादिव्यवहारार्थं, उतानुभवबलात्, अथश्रुतिबलात्, यद्वाघटादौविषयेस्वतोपरोक्षा आपरोक्षा
भावादपरोक्षचित्संबंधेनैवापरोक्ष्य(त्व)स्यवक्तव्यत्वात् घटादिविषयस्यापरोक्ष्य(त्व)सिद्ध्यर्थं । नाद्यइत्याह ॥ अस्फुरणरूपे 121
ष्वित्यादिना ॥ इंद्रियजन्यांतःकरणवृत्तावेवचित्प्रतिफलनं नत्वनुमित्यादिरूपांतःकरणवृत्ताविति हिपरसिद्धांतः । एवंचयथा
नुमित्यादिविषयेष्वतींद्रियेषुधर्मादिषुवृत्तिप्रतिफलितचिद्विषयत्वाभावेपिव्यवहारः तथैंद्रियकेष्वपिघटादिषुवृत्तिप्रतिफलितचि

अज्ञानाविरोधिस्फुरणरूपत्वस्यचात्मनीवघटादावपिसुवचत्वात् । अस्फुर
णरूपेष्वतींद्रियेष्विवैंद्रियकेष्वपिवृत्तिविषयत्वमात्रेणव्यवहारादिसंभवेतत्प्र
तिफलितचैतन्यविषयत्वस्यतदभिव्यक्तचैतन्यविषयत्वस्यवाकल्पनायोगाच्च।

द्विषयत्वाभावेपिस्वाकारेंद्रियजन्यवृत्तिविषयत्वमात्राद्व्यवहारोस्तु । एवंचव्यवहारान्यथानुपपत्त्यानवृत्तिप्रतिफलितचिद्विषय
त्वंकल्प्यमित्यर्थः । नन्वतींद्रियार्थानांस्फुरणरूपत्वाद्वृत्तिप्रतिफलितचिद्विषयत्वाभावेपिव्यवहारोभविष्यतीतिनदृष्टांतइत्यतउ
क्तं ॥ अस्फुरणरूपेष्विति ॥ नद्वितीयइत्याह ॥ घटादाविति ॥ चैतन्यस्याज्ञानस्फोरकत्वेनाज्ञानाविरोधितयाऽज्ञानानि
वर्तकत्वाद्वृत्तेरेवाज्ञाननिवर्तकत्वमंगीकृत्यतयाऽज्ञानेनिवृत्तेतदभिव्यक्तचैतन्यरूपज्ञानेनैवघटःप्रकाशतइत्युच्यते तर्हिवयमपिव
दामोलोकेययाप्रभयांधकारोनिवर्ततेतयैवप्रभयाघटःप्रकाशतइत्यनुभवसिद्धं तदपिनस्यात् । तत्रापिप्रभयांधकारेनिवृत्तेतदभि

SGDF Foundation

1 यद्येवमिति आदिः तथा इच्छान्तरादिकं कल्प्यते इत्यर्थः ॥

व्यक्तंपुनःकिंचित्प्रभांतरंकल्पयित्वातेनैवघटादिकंप्रकाशतइत्यपिकल्पनीयंस्यादिति । अस्त्वितिचेत्तत्राह ॥ घटादाविति ॥ अन्यथेति ॥ अज्ञाननिवृत्तिरूपकार्यस्यान्यथोपपन्नत्वेपि अज्ञाननिवृत्तिरूपकार्यजनकंघटाद्याकारापरोक्षांतःकरणवृत्त्यतिरिक्तं तत्प्रतिफलितचैतन्यरूपंतदभिव्यक्तचैतन्यरूपंवाज्ञानमननुभूतंकल्प्यतइत्यर्थः । ज्ञानप्रतिफलितंतद्व्यंग्यंवाज्ञानांतरंकल्प्येतइति यावत् । इच्छाद्यंतःकरणवृत्तीत्येवपाठः । अंतःकरणस्येच्छादिरूपेणपरिणतत्वादिच्छारूपायाअंतःकरणवृत्तिस्तत्प्रतिफलितंतद्व्यं

घटादावंधकारानिवर्तकप्रभायाइवाज्ञानाविरोधिज्ञानस्याननुभवाच्च । अन्यथाइच्छा(द्याकारां) द्यंतःकरणवृत्तिप्रतिफलितंतद्व्यंग्यंवाइच्छादिकंपरोक्षवृत्तिप्रतिफलितंतद्व्यंग्यंवापरोक्षज्ञानंतमो निवर्तकप्रभाप्रतिफलितंतद्व्यंग्यंवाप्रभांतरंचकल्प्यंस्यात् । "तमेवभांत"मि(त्यादि)तिश्रुत्यर्थ स्तुप्रतिकर्मव्यवस्थाभंगेवक्ष्यते । चैतन्याविषयस्याप्यापरोक्ष्यंचचैतन्याभिव्यंजकत्वार्थमावश्य

(122)

तरंगिणी अख्यादृष्टं

ग्यंवाकिंचिदिच्छादिकमपिकल्पनीयंस्यादित्याद्यतिप्रसंगइत्यर्थः । प्रभाप्रतिफलितंप्रभायांप्रतिफलितं । तमेवभांतमितिश्रुतौतं भांतंप्रकाशमानंवृत्तिप्रतिफलितचैतन्यरूपात्मानं अनुघटादिकंप्रकाशतइतिश्रुतिबलाद्वृत्तिप्रतिफलितचिद्विषयत्वंघटादीनामंगी कार्यमितितृतीयंनिराचष्टे ॥ तमेवेति ॥ विषयस्यापरोक्ष्यान्यथानुपपत्त्याचैतन्यरूपंज्ञानमंगीकार्यमितिचतुर्थंपराचष्टे ॥ चैत

SGDF
Sri Gargeshwari Digital Foundation

न्येति ॥ विषयस्यापरोक्ष्यान्यथानुपपत्त्याचैतन्यविषयत्वंनांगीकार्यं चैतन्यविषयत्वाभावेपिविषयेआपरोक्ष्यंतुवृत्तिगतोयःसा क्षात्कारत्वरूपोविशेषस्तेनैवोपपन्नं । अयंचविशेषस्त्वयाप्यावश्यकइत्युक्तं चैतन्येति । वृत्त्याचैतन्यव्यक्त्यंगीकारेणचैतन्याभि व्यंजकत्वार्थंवृत्तिगतविशेषस्यावश्यकत्वादित्यर्थः । अन्यथापरोक्षवृत्त्यापिचैतन्याभिव्यंजनापत्तेरितिभावः ॥ नन्वपरोक्षवृत्ति निष्ठं(परोक्षवृत्त्यनिष्ठं)साक्षात्कारत्वंघटादिवृत्तौकुतइत्यतउक्तं ॥ इंद्रियजन्यत्वेति ॥ अंतःकरणवृत्तेश्चक्षुरादिद्वाराबहिर्निस्सृ तत्वादितिभावः ॥ अपरोक्षवृत्तिगतापरोक्षत्वविशेषेणविषयेआपरोक्ष्यंयुक्तं । परोक्षवृत्तिगतेनज्ञानत्वरूपविशेषेणविषयस्यज्ञात

केनेंद्रियजन्यत्वप्रयुक्तेनवृत्तिगतेनसाक्षात्कारत्वरूपविशेषेणैवोपपन्नं । इ
च्छादिवृत्त्यनिष्ठेनपरोक्षवृत्तिगतेनज्ञानत्वरूपविशेषेणविषयस्यज्ञातत्ववत्स्मृ
त्याद्यनिष्ठेनानुभवादिगतेनविशेषेणतद्विषयस्यानुभूतत्वानुमितत्वादिवच ।

त्ववदित्याह ॥ परोक्षवृत्तीति ॥ विषयेज्ञातत्वंपरोक्षवृत्तिगतज्ञानत्वविशेषाधीनमित्युक्तेइच्छादिवृत्तावपिज्ञानत्वरूपविशेषप्र सक्तौसत्यांवृत्तावपिसंकोचःकार्यइत्यतउक्तं ॥ इच्छादीति ॥ इच्छादिरूपायांतःकरणवृत्तिः तदनिष्ठेनेत्यर्थः । ज्ञातत्वेपिपुन रवांतरभेदोस्त्येवेत्याह ॥ अनुभवादीति ॥ अनुभवगतोविशेषोनज्ञानमात्रनिष्ठइतिज्ञानेपिसंकोचःकार्यइत्याशयेनस्मृत्याद्य निष्ठेनेत्युक्तं । अनुभूतत्वेपिपुनरवांतरभेदोस्तीत्युक्तं अनुमितत्वेति । साक्षात्कारप्रमाऽवृत्तेनानुमितिगतविशेषेण तद्विषयस्यानु

SGDF
Sri Gargeshwari Digital Foundation

1 वृत्तिनिष्ठपरोक्षत्वस्य चिद्रूपज्ञाननिष्ठज्ञानत्वव्याप्यत्वाभावात् ॥
2 स्वातिरिक्तसंविदपेक्षानिरूपितस्वव्यवहारस्वभावविशिष्टव्याप्यतारूपव्यवहारत्वं हेत्वर्थः । तथा चादोस इत्यत आह ॥ नन्विति ॥

मितत्ववदित्यर्थः ॥ अन्यथेति ॥ अंतःकरणवृत्तावपरोक्षत्वमनंगीकृत्यतस्याःपरोक्षत्वमेवांगीकृत्यतत्प्रतिफलितचैतन्यएवापरोक्षत्वंनवृत्तावित्यंगीकारेपरोक्षत्वापरोक्षत्वयोर्ज्ञानत्वव्याप्यत्वंनस्यात् । चैतन्यनिष्ठापरोक्षत्वस्यचैतन्यनिष्ठज्ञानत्वव्याप्यत्वेपिवृत्तिनिष्ठापरोक्षत्वस्यज्ञानत्वव्याप्यत्वाभावात् । वृत्तौपरोक्षत्वसद्भावेपितत्रज्ञानत्वाभावात् । भावव्युत्पत्त्याज्ञप्तिरूपज्ञानत्वंचैतन्यस्यैव वृत्तेस्तज्ज्ञप्तिरूपचैतन्यव्यंजकतयाज्ञानकरणत्वमेवनज्ञानत्वमित्यंगीकारात् । तथावृत्तिगतपरोक्षत्वस्यवृत्तिव्याप्यत्वमेवस्यात् । तथाचकरणभावव्युत्पत्तिभ्यांवृत्तिचैतन्ययोरुभयोरपिज्ञानत्वात्तन्मध्येयद्भावव्युत्पत्त्याज्ञप्तिरूपमेकंज्ञानंतन्निष्ठंय

अन्यथापरोक्षत्वापरोक्षत्वेएकज्ञानत्वव्याप्येनस्यातां।1नपंचमः।2आत्मनोपिस्वप्रकाशत्वाद्वितीयत्वादिविशिष्टव्यवहारेतदपेक्षानियमात् । नन्वात्मनिविशिष्टव्यवहारेविशेषणोपनायकमानापेक्षानियमेपिस्वरूपमात्रव्यवहारेतदनपेक्षेतिचेन्न । घटादावपितथेत्यसिद्धेः ।

ज्ज्ञानत्वंतद्व्याप्यत्वंसर्वजनसिद्धंनस्यात् । अतःसर्वजनसिद्धैकज्ञानत्वव्याप्यत्वनिर्वाहायवृत्तावपिज्ञानत्वेंगीकार्येइंद्रियत्वेनेंद्रियजन्यतयाचापरोक्षत्वेचांगीकार्येऽपरोक्षज्ञानरूपवृत्तिविषयत्वमात्रेणविषयेआपरोक्ष्योपपत्तौतदर्थंवृत्तिप्रतिबिंबितचैतन्यस्यतदभिव्यक्तचैतन्यस्यवाकल्पनाऽयोगादितिचिद्विषयत्वरूपहेतोःस्वरूपासिद्धिरितिभावः ॥ तदपेक्षेति ॥ स्वातिरेकिसंविदपेक्षेतिभावः । अतिव्याप्तिपरिहारमाशंकते ॥ नन्विति ॥ तथेति ॥ घटत्वादिविशिष्टघटव्यवहारएवस्वातिरिक्तंयद्विशेषोपनाय

SGDF Sri Gargeshwari Digital Foundation

कंमानंतदपेक्षा नतुघटस्वरूपमात्रव्यवहारइत्यपिवक्तुंशक्यत्वादसिद्धिरितिभावः । असिद्धिपरिहारंशंकते ॥ नन्विति ॥ नि
र्विकल्पकाभावाभिप्रायेणेदं । तथाचविशिष्टव्यवहारस्यैवसत्त्वात्स्वातिरिक्तसंविदपेक्षानियतिस्तत्रास्तीतिनासिद्धिरित्यर्थः । न
न्वात्मन्यपिघटादाविवस्वरूपमात्रव्यवहाराभावेनविशिष्टव्यवहारस्यैवसत्त्वात्तत्रचविशेषणोपनायकप्रमाणापेक्षानियतिसद्भावेन 125
हेतोरात्मनिव्यभिचारइत्यतआह ॥ आत्मनित्विति ॥ परामर्शेनपरामर्शबलेन तस्यसौषुप्तिकव्यवहारस्य विशिष्टत्वेनकाला

ननुघटादौस्वरूपमात्रव्यवहारएवनास्तिआत्मनितुसुषुप्तावस्तीतिचेन्न । एतावंतंकालंसुखमह
मस्वाप्समितिपरामर्शेनतस्याविशिष्टत्वेनैवसिद्धेः । नन्वात्मनिविशिष्टव्यवहारेतदपेक्षायाम
पिनविशेष्यांशेतदपेक्षा । स्वप्रकाशत्वात् । घटादौतदंशेपीतिचेन्न । नियतिपदवैयर्थ्यात् ।

दिविशिष्टत्वेन तथाचस्वरूपमात्रव्यवहारस्यैवाभावादात्मनिव्यभिचारएवेतिभावः । ननुस्वव्यवहारेस्वांशावच्छेदेनापिस्वाति
रिक्तसंविदपेक्षानियतिरितिहेतुर्विवक्षितः । सुषुप्तिकालीनेआत्मगोचरकालादिविशिष्टव्यवहारेतुकालादिविशेषणांशएवतदपेक्षा
नत्वात्मांशेपि । तस्यस्वप्रकाशत्वादतोनात्मनिव्यभिचारइत्याशंकते ॥ नन्वात्मनीति ॥ असिद्धिंपरिहरति ॥ घटादावि
ति ॥ घटादेरस्वप्रकाशत्वात्स्वांशावच्छेदेनापिस्वातिरिक्तसंविदपेक्षानियतिरस्तीतिनासिद्धिरितिभावः ॥ नियतिपदेति ॥

SGDF
Sri Gargeshwari Digital Foundation

126

अद्वितीयत्वादिविशिष्टब्रह्मव्यवहारेस्वातिरिक्तसंविदपेक्षासद्भावेनब्रह्मणिदृश्यत्वप्राप्तौतद्व्यावृत्त्यर्थंहिनियतिपदंदत्तं । तथाच स्वरूपमात्रव्यवहारेतदपेक्षायाअभावेननस्वातिरेकिसंविदपेक्षानियतिरित्येवंब्रह्मणिदृश्यत्वाभावोवक्तव्यः । तथाचनियतिपदनिवारणीयब्रह्मण्यतिव्याप्तिरूपातिप्रसंगनिवारणस्यस्वांशावच्छेदेनापिस्वातिरेकिसंविदपेक्षावत्त्वंदृश्यत्वमित्यस्याविवक्षयैवोपपत्तौ नियतिपदंव्यर्थमित्यर्थः । ननुतर्हिस्वांशावच्छेदेनापिस्वातिरिक्तसंविदपेक्षावत्त्वमेवदृश्यत्वमित्येवहेतुर्विवक्षितइतिनियतिपदंत्यज्यतइतिचेन्न शुद्धएवव्यभिचारादित्याह ॥ आसंसारमिति ॥ अज्ञानावृतेशुद्धेशुद्धंब्रह्मेतिव्यवहारस्यापलापायोगेनशुद्धस्व

**आसंसारमज्ञानावृतस्यशुद्धस्यस्वव्यवहारेअनधिगता
र्थबोधकवेदांतजन्याज्ञाननिवर्तकवृत्त्यपेक्षानियमाच्च ।**

रूपव्यवहारेशुद्धरूपस्वांशावच्छेदेनापिस्वातिरेकिवेदांतजन्याज्ञाननिवर्तकवृत्तिरूपसंविदपेक्षास्त्येवेतिव्यभिचारः । नचस्वांशस्य शुद्धस्यस्वप्रकाशत्वेनस्वाख्यसंविदैवव्यवहारोपपत्तौतत्राज्ञानाभावान्नस्वांशावच्छेदेनाज्ञाननिवर्तकस्वातिरेकिवेदांतजन्यवृत्तिरूपसंविदपेक्षानियमइतिवाच्यं । शुद्धस्यस्वप्रकाशत्वेनस्वतःस्फुरणांगीकारेतस्याज्ञानावृतत्वंनस्यात् । तदिदमाह ॥ अज्ञानावृतस्येति ॥ नन्वात्माज्ञानावरणकालेस्वातिरिक्तसंविदैवव्यवह्रियतां तदनावरणकालेस्वातिरेकिसंविदंविनैवव्यवह्रियतामित्यत उक्तं ॥ आसंसारमिति ॥ आसंसारमज्ञानावृतत्वेनतदनावरणकालएवनास्तीत्यर्थः । नन्वासंसारमज्ञानावृतोप्यात्माकदाचि

SGDF Sri Gargeshwari Digital Foundation

त्स्वयमेवावरणमज्ञानंनिवर्तयिष्यति अनंतरमुक्तसंविदंविनैवव्यवह्रियतामित्यतःशुद्धस्येत्युक्तं । शुद्धस्यकेवलस्याज्ञानस्फोरकत्वे नाज्ञानानिवर्तकत्वान्नकदाचिदपिस्वाज्ञाननिवर्तकत्वं किंनामवेदांतजन्यचरमवृत्तेरेव ।अन्यथावेदांतजन्यचरमवृत्तेर्वैयर्थ्यापत्तेः। तस्याअज्ञाननिवर्तकत्वेनैवसार्थक्यादित्याशयेनोक्तं । वेदांतजन्याज्ञाननिवर्तकवृत्तीति । किंचयद्यात्मव्यवहारःस्वतःस्फुरणादे 127 वभवतिन्नतत्रस्वांशावच्छेदेनस्वातिरेकिसंविदपेक्षेत्युच्यते तर्हिवेदांतानांप्रकाशमानार्थप्रकाशकत्वेनानधिगतार्थावगतिसाधन (त्वा)ताऽभावेनप्रमाणलक्षणाभावादप्रामाण्यंस्यादित्याशयेनोक्तं ॥ अनधिगतार्थबोधकेति ॥ तथाचाज्ञानावृतेशुद्धस्वरूपे स्वांशावच्छेदेनापिस्वातिरेकिवेदांतजन्यवृत्तिरूपसंविदपेक्षासद्भावेनमिथ्यात्वाभावात् नियतिपदत्यागेपिव्यभिचारइतिभावः॥ न

वृत्त्यन्यसंविदपेक्षायाश्चतवनित्यातींद्रियेममघटादावप्यभावादित्युक्तत्वाच्च ।

नुस्वांशावच्छेदेनस्वातिरेकिवृत्त्यन्यचैतन्यरूपसंविदपेक्षावत्त्वमितिसंविदिवृत्त्यन्यत्वंविशेष्यते । शुद्धेस्वांशावच्छेदेनव्यवहारेस्वातिरेकिवृत्त्यपेक्षायाएवसत्त्वेनोक्तहेतोर्नव्यभिचारः । घटादौतुवृत्त्यन्यचैतन्यरूपसंविदपेक्षायाएवसत्त्वेननासिद्धिरित्याशंक्यनिराकरोति ॥ वृत्त्यन्येति ॥ अभावादिति ॥ वृत्त्यन्यायासंवित्वृत्तिप्रतिबिंबितचैतन्यंतदभिव्यक्तचैतन्यंवातदुभयंचाप्रामाणिकमित्युक्तमित्यर्थः । नन्वात्मव्यवहारेनवेदांतजन्यसंविदंतरापेक्षा किंत्वात्माज्ञाननिवृत्तिमात्रे । आत्मव्यवहारस्तुस्वतःस्फुरणादेव अतोनात्मनिव्यभिचारः । घटादौत्वस्फुरणरूपतयास्वव्यवहारेस्वातिरेकिसंविदपेक्षास्तीतिनासिद्धिरित्याशंक्य

SGDF
Sri Gargeshwari Digital Foundation

१ स्वातिरिक्तसंविद्विषय व्यवहारहेतुताविच्छेदकरूपत्वं दृ

निराकरोति ॥ नचेति ॥ नहीत्यर्थः । तथाचासिद्धिरेवेतिभावः । ननूक्तमस्फुरणरूपतयाघटादौस्वव्यवहारेस्वातिरेकिसंविद पेक्षेति । सत्यमुक्तंदुरुक्तंतत् । तथात्वेघटादिवद्ब्रह्मणोप्यस्फुरणरूपत्वमेवास्तुस्फुरणरूपत्वेतदज्ञानायोगात् । अज्ञानाविरोधि स्फुरणरूपत्वस्यचात्मनीवघटादावपिसुवचत्वादित्युक्तत्वादितिभावः ॥ एतेनेति ॥ उक्तप्रबंधेनब्रह्मणोज्ञानविषयत्वस्योपपादने नेत्यर्थः ॥ स्वावच्छिन्नेति ॥ स्वशब्दःसमभिव्याहृतपरः । स्वविषयकेत्यर्थः । तथाचस्वव्यवहारेस्वविषयकसंवित्सापेक्षत्वं दृश्यत्वं । वर्ततेचेदंघटादौ नास्तिचब्रह्मणि क्रियाकर्मभावविरोधेनस्वव्यवहारहेतोःस्वाख्यसंविदोब्रह्मविषयकत्वाभावात् । स

128

नचघटादावपिवृत्त्याऽज्ञानेनिवृत्तेव्यवहारार्थंसंविदंतरापेक्षाअनुभूयते।एतेनस्वव्यवहारेस्वातिरिक्त स्वावच्छिन्नसंवित्सापेक्षत्वंदृश्यत्वमितिनिरस्तं।(नषष्ठः।)घटादौविशेष्यवत्फलव्याप्यत्वाभावरूप

कलसामर्थ्यविधुरस्यकर्मत्वापरपर्यायवेदांतजन्यवृत्तिविषयत्वस्याप्यभावाच्च । अतोनतत्रव्यभिचारइत्येतदपिनिरस्तं । ब्रह्मणो पिवेदांतजन्यवृत्तिव्याप्यत्वस्योपपादितत्वात् । क्रियाकर्मभावाविरोधस्यचाभिधानस्याभिधेयत्ववदुपपन्नत्वेनस्वविषयकस्वा ख्यसंवित्सापेक्षत्वाच्चेतिसांप्रदायिकोर्थः । फलाव्याप्यत्वेसत्यपरोक्षव्यवहारयोग्यत्वाभावरूपास्वप्रकाशत्वरूपदृश्यत्वस्यभागा सिद्धिमुपपादयति ॥ घटादाविति ॥ विशेष्यवत्अपरोक्षव्यवहारयोग्यत्ववत् ॥ उक्तन्यायेनेति ॥ वृत्तिप्रतिबिंबितचैतन्य ॥ ६५ ॥
रूपस्यतदभिव्यक्ताधिष्ठानचैतन्यरूपस्यवाफलस्योक्तन्यायेनाऽप्रामाणिकतयापक्षैकदेशेघटादौविशेषणविशेष्ययोरुभयोरपिसत्त्वे

घटादौ विशिष्टसत्वेऽपि धर्मादौ तदभावात् पक्षैकदेशे इत्युक्तं ॥

नविशिष्टाभावरूपास्वप्रकाशत्वाभावाद्भागासिद्धिरित्यर्थः । प्रातिभासिकाविद्याशुक्तिरूप्यादिदृष्टांतेसाधनवैकल्यमुपपादयति ॥ अविद्यादाविति ॥ विशेषणवदिति ॥ अंतःकरणवृत्तिप्रतिबिंबितचैतन्यस्यैवात्रफलशब्देनाभिप्रेततयाप्रातिभासिकस्यस र्वस्याप्यविद्याशुक्तिरूप्यादेरांतरपदार्थतयाबाह्यत्वाभावेनांतःकरणवृत्तेर्नबहिर्निस्सरणं ततोत्रांतःकरणवृत्तिप्रतिबिंबितचैतन्या दिरूपफलव्याप्यत्वंनतत्रास्ति किंतुअविद्यावृत्तिप्रतिबिंबितचैतन्यरूपसाक्षिविषयत्वमेव । तथाचतत्रविशेषणवदपरोक्षव्यव हारयोग्यत्वरूपंविशेष्यंचास्ति । अतोनतत्रविशिष्टाभावरूपास्वप्रकाशत्वमस्तीतिदृष्टांतेसाधनवैकल्यमित्यर्थः । उत्तरग्रंथोपक्षे 129

विशेषणस्याप्युक्तन्यायेनसत्त्वेनाविद्यादौशुक्तिरूप्यादौचविशेषणवद्विशेष्यस्यापिसत्वेनविशिष्ट रूपस्वप्रकाशत्वव्यतिरेकरूपहेतोःपक्षैकदेशेदृष्टांतेचाभावात् । अत्रोक्तंचित्सुखेन । “ शुक्तिरूप्या

पार्थविशेष्यस्यापिसत्त्वेनेत्युक्तं॥अत्रोक्तमिति ॥ साधनवैकल्यापादनायविशेष्यस्यापिसत्त्वेनेतियदुक्तंतदुपरिचित्सुखेनसमाधान मत्रोक्तमस्तीत्यर्थः । तदेवाह ॥ शुक्तिरूप्यादाविति ॥ शुक्तिरूप्यादेर्व्यवहारकालएवबाधितत्वात्तत्रापरोक्षव्यवहारयोग्य त्वंव्यवहारदशायामपिनास्तीत्यर्थः । तथाचविशेष्याभावप्रयुक्तविशिष्टाभावस्यशुक्तिरूप्यादौसत्त्वेनास्वप्रकाशत्वसद्भावान्नदृष्टां तःसाध्यविकलइतिभावः । ननुशुक्तिरूप्यादेरापरोक्ष्याभावेशुक्तिरूप्यंसाक्षात्करोमीत्येवंशुक्तिरूप्यादौआपरोक्ष्यावगाह्यनुव्यव

SGDF Foundation

1 रूप्यस्य साक्ष्यधिष्ठानकत्वं च इदमाकारवृत्तिप्रतिबिंबितचैतन्यसाक्षिभेदे इदमंशावच्छिन्नचैतन्यगत आपरोक्ष्याध्यासादित्यर्थः ॥

सायरूपव्यवहारविरोधइत्यतआह ॥ अपरोक्षव्यवहारायोग्येपीति ॥ अविद्यावृत्तिप्रतिबिंबितचैतन्यरूपसाक्षिविषयत्वेनां तरत्वादितिभावः ॥ साक्षीति ॥ साक्षिगतंयदापरोक्ष्यंतदध्यासादित्यर्थः । तत्रदृष्टांतःइदमिति । तस्मिन् शुक्तिरूप्ये।परवत्त्वा भावादिदमितिव्यवहारायोग्यत्वंतस्येतिभावः ॥ अधिष्ठानगतेति ॥ इदमाकारवृत्तिप्रतिबिंबितचैतन्यगतेदंतारोपइत्यर्थः । ननुयदिरूप्यस्याध्यस्तत्वात्तत्रापरोक्ष्यमधिष्ठानभूतसाक्षिगतापरोक्ष्याध्यासादित्युच्यते तर्हिघटादीनामप्यापरोक्ष्यंनस्यात् । ते षामप्यध्यस्तत्वेनाधिष्ठानचैतन्यगतापरोक्ष्यमेवप्रतीयतइत्यपिवक्तुंशक्यत्वेनतत्राप्यापरोक्ष्यंप्रातिभासिकंस्यादित्याशंक्यनिराक

दौविशेषणमस्ति नतुविशेष्यं । अध्यस्तत्वात् । अपरोक्षव्यवहारायोग्येपितत्रतद्व्यवहारस्तुअधि

1 ष्ठानभूतसाक्षिगतापरोक्ष्याध्यासाद्युक्तः । इदमितिव्यवहारायोग्येपितस्मिन्नधिष्ठानगतेदंत्वारो

पादिदमितिव्यवहारवत् । 2 यद्यपिघटादिरप्यध्यस्तः । तथापितत्रसत्वमिवाऽऽपरोक्ष्यंव्यावहारि

रोति ॥ यद्यपीत्यादिना ॥ तथाचरूप्यादेरपरोक्षव्यवहारयोग्यत्वत्वाभावसाधकस्याध्यस्तत्वहेतोर्घटादौव्यभिचारइतिभावः । अध्यस्तत्वाविशेषेपिब्रह्मज्ञानेतरज्ञानाबाधितत्वात्तत्रसत्त्वंयथाव्यावहारिकंएवमापरोक्ष्यमपिव्यावहारिकमेव । रूप्यादेस्तुब्रह्मज्ञाने तरज्ञानबाध्यत्वात्तत्रसत्त्वमिवापरोक्ष्यमपिप्रातिभासिकमेवातोऽधिष्ठानगतमेवभासतइत्यर्थः।तथाचघटादिनिष्ठमापरोक्ष्यंव्यावहा रिकंव्यावहारिकधर्मिनिष्ठत्वात्सत्त्ववदित्यनुमानमुक्तंभवति । तथाचरूप्यादेरपरोक्षत्वाभावसाधकमध्यस्तत्वंब्रह्मज्ञानेतरज्ञान

2 ननु अपरोक्षव्यवहारयोग्यत्वाभावः अध्यस्तत्वात् अस्तु । न चासिद्धिः घटादेरप्यध्यस्तत्वेन तद्योग्यत्वाभावप्रसक्तेरि त आह ॥ यद्यपीति ॥

190

SGDF Sringeri Digital Foundation

बाध्यत्वापरपर्यायंप्रातिभासिकत्वरूपंविवक्षितमितिनघटादौव्यभिचारइतिभावः । एवंसाधनवैकल्यपरिहारेपिअविद्यादौभागा सिद्धिःस्यादित्याशयेनाह ॥ तन्नेत्यादिना ॥ सर्वव्यावहारिकोपादानत्वमज्ञानस्यैवविशेषणं; नांतःकरणादेः/ ब्रह्मज्ञानादित्या दिविशेषणद्वयमुभयोरितिज्ञेयं । व्यावहारिकेव्यावहारिकतयांगी(कर्तव्ये)कृतइत्यर्थः । तथाचप्रातिभासिकतयात्वयोच्यमान मज्ञानंव्यावहारिकंव्यावहारिकोपादानत्वात् ब्रह्मज्ञानात्प्रागबाधितत्वात् तमआसीदित्यादि(श्रुत्यादि)सिद्धत्वाच्चेत्यनुमानत्रयम

कं । रूप्यादौतुप्रातिभासिक"मिति । तन्न । सर्वव्यावहारिकोपादानेब्रह्मज्ञानात्प्रागबाधितेश्रुत्या दिसिद्धेचव्यावहारिकेऽज्ञानेअंतःकरणादौचयोग्यत्वस्यापिव्यावहारिकत्वात् । नह्यापरोक्ष्यैकर सेनसाक्षिणासाक्षाद्वेद्येअज्ञानादावापरोक्ष्यंप्रातिभासिकं । वृत्तिद्वारातद्वेद्येघटादौतुव्यावहारिक

त्वद्रष्टव्यं । योग्यत्वस्याऽपरोक्षव्यवहारयोग्यत्वस्य । व्यावहारिकत्वादिति । नत्वधिष्ठानगतत्वंतस्येत्यर्थः । तथाचाज्ञानादा वुक्तरीत्याविशेषणस्यविशेष्यस्यचसत्त्वेनविशिष्टाभावरूपास्वप्रकाशत्वस्यासिद्धिरितिभावः । आपरोक्ष्यंघटादौव्यावहारिकंरू प्यादौप्रातिभासिकमितिवदतोऽकौशलमित्याह ॥ नहीति ॥ वृत्तिद्वारेति ॥ ज्ञानावच्छेदकत्वेनसाक्षिवेद्यइत्यर्थः । (अ पिच)ननुअपरोक्षव्यवहारविषयत्वयोग्यत्वाभावरूपास्वप्रकाशत्वस्यब्रह्मण्यतिव्याप्तिः । तस्यनिर्धर्मकत्वेनापरोक्षव्यवहारविषय

SGDF
Sri Gargeshwari Digital Foundation

किंच ब्रह्मणि योग्यतापि मिथ्या। मिथ्यात्वं च स्वसमानाधिकरणात्यन्ताभाव प्रतियोगित्वं। तथा च तदत्यन्ताभावानधिकरणत्वरूपयोग्यत्वमसंभवीति ... ॥ ५०५ पत्रं पश्यत ॥

तायोग्यत्वरहितत्वात्। किंचापरोक्षव्यवहारविषयत्वयोग्यत्वाभावोनामअपरोक्षव्यवहारविषयत्वात्यंताभावानधिकरणत्वाभावः अपरोक्षव्यवहारविषयत्वात्यंताभावाधिकरणत्वमितियावत्। इदमपिब्रह्मण्यतिव्याप्तं । कल्पितैतादृशधर्मसद्भावादित्यादिदूषणमभिसंधायाह ॥ शिष्टमिति ॥ अस्यलक्षणस्यब्रह्मण्यतिव्याप्तिरूपंदूषणमित्यर्थः ॥ वक्ष्यतइति ॥ द्वितीयपरिच्छेदेस्वप्रकाशत्ववादे "प्रमाणंचात्रानुभूतिःस्वप्रकाशे"त्यादिग्रंथेनेत्यर्थः। एवमेतद्वाक्यव्याख्यानेउत्तरत्रसंग्रहश्लोके"(अस्तिचात्मनीति)" अस्वप्रकाशत्वलक्षणस्यात्मन्यतिव्याप्तिःसंगृह्यतेतदप्युपपन्नमितिध्येयमितिसंप्रदायागतःपंथाः। ननुफलव्याप्यत्वमेवास्वप्रकाशत्वं

एतदन्ते १।३

132

मितियुक्तं। [1] शिष्टंस्वप्रकाशत्ववादेवक्ष्यते । किंचास्वप्रकाशत्वस्यपंचमप्रकाराविद्यानिवृत्तौव्यभिचारः। यत्तुप्रमाणवस्त्वन्यतराधीनवृत्तिविषयत्वंदृश्यत्वं । तुच्छस्यघटादिवत्प्रमाणाधीनवृत्ति

घटादीनांफलव्याप्यत्वंचवृत्तिप्रतिबिंबितचैतन्यजन्यातिशययोगित्वं अतिशयश्च भग्नावरणचित्संबंधएवेतिलक्षणांतरमभिधीयतेइत्यतआह ॥ शिष्टमिति ॥ भग्नावरणचित्संबंधरूपातिशयस्यैवाप्रामाणिकत्वेननोक्तलक्षणंसाध्वितिस्वप्रकाशत्वभंगेवक्ष्यतइतिव्याख्यानेतुत्वदुक्तास्वप्रभत्वंचरूप्येनास्त्यस्तिचात्मनीतिसंग्रहश्लोकेआत्मन्यतिव्याप्तिःसंगृह्यते तदयुक्तं स्यात्। उक्तस्यैवसंग्राह्यत्वात् आत्मन्यतिव्याप्तेश्चपूर्वमनुक्तत्वादित्यस्वारस्यंद्रष्टव्यं ॥ अस्वप्रकाशत्वस्यतदाख्यदृश्यत्वस्य ॥ ॥ ६७॥
पंचमेति ॥ इदंचचतुर्थप्रकाररूपसदसद्वैलक्षण्याख्यमिथ्यात्वरूपसाध्याभावोपपादनाय । प्रतियोगितदभावयोर्वैलक्षण्यस्या

वश्यकत्वादितिभावः ॥ वस्त्विति ॥ प्रातिभासिकस्यापिरूप्यादेरसद्विलक्षणत्वमात्रेणवस्तुत्वंमंतव्यं । तथाचतदधीनवृत्तिर्नामतदाकाराविद्यावृत्तिरित्यर्थः। प्रमाणाधीनवृत्तिविषयत्वरूपंदृश्यत्वंमिथ्याभूतेप्रातिभासिकेरूप्यादौनास्तीतिसाधनवैकल्यपरिहारायवस्त्वधीनवृत्तिविषयत्वमित्युक्तं। घटादावसिद्धिवारणायप्रमाणाधीनवृत्तिविषयत्वमित्युक्तं । अननुगमवारणायान्यतरेत्युक्तमितिद्रष्टव्यं। तथाचनासिद्धिसाधनवैकल्येइतिभावः । घटादावसिद्धिपरिहारंदृष्टांतेसाधनवैकल्यपरिहारंचसूचयंस्तुच्छेव्यभिचारोपिनास्तीत्याह ॥ तुच्छस्येति ॥ व्याप्तेरिति ॥ तथाचैतादृशदृश्यत्वंसाध्याभावेनैवव्याप्तत्वाद्विरुद्धमितिभावः ॥ 133

विषयत्वस्यप्रातिभासिकवद्वस्त्वधीनवृत्तिविषयत्वस्यचाभावान्नतत्रव्यभिचारइति । तत्त्वतितुच्छं। प्रमाणाधीनवृत्तिविषयत्वस्यामिथ्यात्वेनव्याप्तेः। प्रमाणशब्देनज्ञापकोक्तौतुतुच्छेव्यभिचारः। तज्ज्ञानस्यापिज्ञापकाधीनत्वात् । धीमात्रशरीररूप्यादिवृत्तौवस्तुपरतंत्रत्वस्याप्यभावाच्च । वस्तुपरतंत्रशब्देनासदविषयकत्वस्यासद्विलक्षणविषयकत्वस्याचोक्तौमद्रीत्यादृष्टांतस्यसाधनवैकल्यात् ।

ज्ञापकोक्ताविति ॥ तथाचनास्यमिथ्यात्वेनैवव्याप्तिरितिभावः ॥ ज्ञापकाधीनत्वादिति ॥ शशशृंगादिपदरूपज्ञापकाधीनत्वादित्यर्थः। रूप्यादौसाधनवैकल्यंचाह ॥ धीमात्रेति ॥ धीमात्रशरीरंयद्रूप्यादितदाकाराविद्यावृत्तिरित्यर्थः । वस्तुपरतंत्रत्वस्यवस्त्वधीनत्वस्य। वस्तुपरतंत्रत्वाभावोपपादनायधीमात्रशरीरेत्युक्तं । तथाचप्रातिभासिकतयाधीमात्रस्यरूप्यादेर्घटादिवद्वृत्त्यपेक्षयापूर्वभावित्वाभावेनतदाकाराविद्यावृत्तेःशुक्तिरूप्यादिरूपवस्त्वधीनत्वाभावात्साधनवैकल्यमितिभावः। मद्रीत्येति॥

SGDF Foundation

रूप्यस्यात्यंतासत्त्वेननासदविषयकंवृत्तिविषयत्वं नवाऽसद्विलक्षणार्थविषयत्वमित्यर्थः ॥ ब्रह्मणीति ॥ असदविषयकासद्विल क्षणार्थविषयकवेदांतजन्यवृत्तिविषयत्वेनवस्त्वधीनवृत्तिविषयत्वसद्भावाद्व्यभिचारइत्यर्थः ॥ अन्यापेक्षेति ॥ स्वव्यवहारे स्वातिरेकीत्यादिलक्षणमित्यर्थः ॥ औपनिषदेति ॥ हेतुगर्भमिदंविशेषणं । अद्वितीयत्वादिविशिष्टव्यवहारेविशेषणोपनायकै कमेवाद्वितीयमित्यादिमानापेक्षास्तीत्यतिव्याप्तिरित्यर्थः ॥ रूप्येनास्तीति ॥ तथाचसाधनवैकल्यमितिभावः ॥ अस्तिचा

ब्रह्मणिव्यभिचारापरिहाराच्च । एवंच'नधर्मादौफलव्याप्तिर्वृत्तिव्याप्यत्वमात्मनि । अज्ञातत्वादि रूपेणचिद्वेद्यत्वंतुचित्यपि । अन्यापेक्षाभिलाषत्वमस्त्यौपनिषदात्मनि । त्वदुक्तास्वप्रभत्वंचरूप्ये नास्त्यस्तिचात्मनि'॥ ७ ॥ इतिदृश्यत्वहेतुभंगः ॥३॥ जडत्वमप्यज्ञातृत्वंवा अज्ञानत्वंवा अस्वप्रका शत्वंवा अनात्मत्वंवा पराभिप्रेतंवा । नाद्यः । त्वन्मतेपक्षनिक्षिप्तस्याहमर्थस्यैवज्ञातृत्वात् । शुद्धा त्मनोप्यज्ञातृत्वाच्च । शुद्धेपिकल्पितंज्ञातृत्वमस्तीतिचेन्न । कल्पितेनहेत्वभावेनव्यभिचारापरिहा

त्मनीति ॥ शिष्टंस्वप्रकाशवादेवक्ष्यतइत्यात्मनिअतिव्याप्तेःपूर्वमुक्तत्वात्तत्संग्रहोयमितिसंप्रदायः । तथाचातिव्याप्तिरितिभा वः ॥ ७ ॥ इतिदृश्यत्वहेतुभंगविवरणं ॥ ३ ॥ परेति ॥ मायावाद्यपेक्षयापरेषांतत्त्ववादिनामस्माकंयदभिप्रेतंतद्वे(तदि) त्यर्थः ॥ अहमर्थस्यैवेति ॥ तथाचभागासिद्धिरितिभावः ॥ शुद्धेति ॥ तथाचात्मनिव्यभिचारइतिभावः ॥ शुद्धेपीति ॥ तथाचहेतोरेवाभावान्नव्यभिचारइतिभावः ॥ अपरिहारादिति ॥ अज्ञातृत्वरूपोयोहेतुस्तदभावस्यकल्पितत्वमुक्तंस्यात् ।

SGDF
Sri Gargeshwari Digital Foundation

इदं न्च दूषणं घटादिसाधारणम् ॥

S.M.S.A.S. ... LIBRARY
BANGALORE
NO. ....
DATE ....

तथाचनव्यभिचारपरिहारः । अन्यथापर्वतोधूमवान्वह्नेरित्यत्रापिअयोगोलकेकल्पितस्यवह्न्यभावस्यसत्त्वाद्व्यभिचारित्वंनस्या
दितिभावः । ननुकल्पितत्वंनाभावविशेषणं किंनामाभावप्रतियोगिनोज्ञातृत्वस्यैव । एवंचब्रह्मणिकल्पितज्ञातृत्वसद्भावेनतदभा
वाभावान्नव्यभिचारइतिशंकते ॥ कल्पितस्येति ॥ गौरोहमिति ॥ अहमर्थनिष्ठस्यज्ञातृत्वस्यगौररूपवतिदेहेकल्पितत्वादि
तिभावः । नन्वत्राहमर्थएवज्ञातृत्वंप्रतीयतेनदेहइतिचेन्न । गौरोहमितिगौरत्वाहंत्वयोःसामानाधिकरण्यप्रतीत्याशरीराहमर्थयो
रभेदप्रतीतेरितिभावः । देहादौ पक्षीभूते तथाचभागासिद्धिरितिभावः ॥ धर्मीति ॥ तथाचनासिद्धिः । देहेप्रतीयमान

रात् । कल्पितस्यज्ञातृत्वस्याभावोहेतुरितिचेन्न । गौरोहंजानामीतिकल्पितज्ञातृत्ववतिदेहादौतद
भावासिद्धेः । धर्मिसमसत्तस्यज्ञातृत्वस्याभावोहेतुरितिचेन्न । तादृशज्ञातृत्ववत्यंतःकरणेतदभावा

स्यज्ञातृत्वस्यकल्पिततयाप्रातिभासिकत्वेनव्यावहारिकधर्मिभूतदेहसमसत्ताकत्वाभावादितिभावः ॥ तादृशज्ञातृत्ववतीति ॥
व्यावहारिकधर्मिभूतांतःकरणसमसत्ताकज्ञातृत्ववतीत्यर्थः । एवंचभागासिद्धिरितिभावः ॥ तादृशेति ॥ पारमार्थिकधर्मिभू
तशुद्धब्रह्मसमसत्ताकज्ञातृत्वाभावस्यशुद्धेसत्त्वाद्व्यभिचारइतिभावः । ननुवृत्तिज्ञानेनभागासिद्धिः । अज्ञानत्वादित्यस्याज्ञप्ति
त्वादित्यर्थोविवक्षितः । वृत्तिरूपंज्ञानंचनभावव्युत्पत्त्याज्ञानशब्दवाच्यं किंतुज्ञायतेऽनयाचैतन्यमितिकरणव्युत्पत्त्यैव । भा

SGDF
Sri Gargeshwari Digital Foundation

136

वव्युत्पत्त्यातद्वाच्यंतुवृत्तिप्रतिबिंबितचैतन्यमेवेत्यतोनदोषइत्याशंक्यदूषयति ॥ **यदिचेति** ॥ यदिचवृत्तिरज्ञप्तिरित्यन्वयः । तत्रविवरणसंमतिमाह ॥ **सांख्येति** ॥ सांख्यावेदांतिनश्चसांख्यवेदांतिनस्तेषां । सांख्यरूपावेदांतिनइत्यर्थइत्यप्याहुः । मतइति शेषः । बुद्धेरंतःकरणस्यवृतिःकरणव्युत्पत्त्याज्ञानमित्यन्वयः।अज्ञप्तित्वमपिवृत्तिरूपेज्ञानेनास्तीत्यसिद्धिरेवेत्याह॥**तर्हीति**॥ अप रोक्षवृत्तौचैतन्यप्रतिबिंबितत्वनियमात्तस्यचज्ञप्तित्वात्ततोऽज्ञाननिवृत्त्यादिकंभविष्यतीत्यतउक्तंपरोक्षवृत्त्येति। परोक्षवृत्तौचैतन्य प्रतिफलननियमादेस्त्वन्मतेऽभावादज्ञाननिवृत्त्यादेर्ज्ञप्तिकार्यस्यततोपिदर्शनात्परोक्षवृत्तेरपिज्ञप्तित्वमवश्यमभ्युपेयमतोऽसिद्धि

सिद्धेः। शुद्धेतादृशज्ञातृत्वाभावाच्च। नद्वितीयः। वृत्तिज्ञानेभागासिद्धेः। यदिचसांख्यवेदांतिनांतु करणव्युत्पत्त्याबुद्धिवृत्तिर्ज्ञानमितिविवरणोक्तेर्वृत्तिरज्ञप्तिस्तर्हिपरोक्षवृत्त्यास्वविषयेअज्ञाननिवृत्ति व्यवहारस्मृतयोनस्युः । तासांज्ञप्तिकार्यत्वात् । धर्माधर्मादिकंचजानामीत्यनुभवश्चनस्यात् ।

रित्यर्थः । कुतइत्यतआह ॥ **तासामिति** ॥ स्मृतेःसंस्कारद्वारज्ञप्तिकार्यत्वंद्रष्टव्यं । तथाचज्ञप्तिभिन्नात्ज्ञ प्तिकार्यंनदृष्टमितिभावः ॥ **जानामीति** ॥ ज्ञाअवबोधनइतिधातोःधर्मादिज्ञप्तिमानित्यनुव्यवसायरूपानुभवइत्यर्थः । ज्ञाधात्वर्थभूतज्ञप्तिविषयत्वंधर्मादौप्रतीयते । तथाचज्ञप्तित्वरहितायांपरोक्षरूपायांधर्मादिवृत्तौज्ञप्तित्वमवगाहमानोनुभवःप्रमा नस्यादित्यर्थः । घटादिकंजानामीत्यनुभवःप्रमानस्यादित्यापादनंतुनशक्यं । ज्ञप्तित्वरहितायांअपरोक्षरूपायांघटादिवृत्तौज्ञ

137

प्तित्वमवगाहमानानुभवस्यप्रमात्वंभविष्यतिअपरोक्षवृत्तेरज्ञप्तित्वेपिचैतन्यरूपज्ञप्तिप्रतिबिंबनसद्भावादतोधर्मादिकमित्युक्तं ॥**किं चात्मनीति**॥ त्वदभिप्रेतेआत्मरूपेज्ञानेज्ञानत्वाभावस्यापाद्यमानत्वेनतत्राज्ञानत्वरूपहेतोःसत्त्वाद्व्यभिचारइत्यर्थः। ज्ञानत्वव्याप कानांसविषयत्वज्ञातृसाहित्यप्रमाऽप्रमान्यतरत्वादीनामभावान्नात्मनोज्ञानत्वमितिज्ञानत्वाभावंवक्तुंज्ञानत्वव्यापकसविषयत्वाभा वंतावदुपपादयति ॥ **तथाहीति** ॥ आत्मरूपज्ञानं चैतन्यरूपाज्ञप्तिरित्यर्थः ॥ **स्ववृत्तिविरोधेनेति** ॥ तथाहि । लोकेक्रिया द्विविधादृष्टा सकर्मकाअकर्मकाचेति । तत्राकर्मकाक्रियाकर्त्राश्रितैवदृष्टा । यथाशयनासनादिक्रियादेवदत्ताश्रितैव । सकर्म

किंचात्मनिव्यभिचारः। तथाहि। आत्मरूपंज्ञानंसविषयं निर्विषयंवा। आद्येपिस्वविषयं परविष

काचक्रियाद्विविधा । काचनकर्त्राश्रिता यथाभोजनगमनादिक्रियादेवदत्ताश्रिता काचनकर्माश्रिता यथाछिदाछेद्यरूपकर्मा श्रिता । तदिहज्ञानरूपाचक्रियासकर्मकेतिकर्माश्रिताकर्त्राश्रितावावाच्या तदत्रचैतन्यस्वरूपभूतज्ञानरूपक्रियांप्रतिब्रह्मणएव विषयत्वांगीकारेतस्यैवकर्तृत्वात्तस्यैवचकर्मत्वात्कर्तृकर्मक्रियाणांसर्वासामप्येकत्वात्क्रियायाःक(र्म)र्मीभूतायांस्वस्यामेववृत्तिःप्रा प्ता। इदंचविरुद्धं । नहिछिदाछिदायांवर्तते शयनंवाशयने।एवंचस्ववृत्तिविरोधेनब्रह्मस्वरूपज्ञप्तेःस्वविषयत्वंपरैर्नांगीकृत ॐ मि(त्यर्थइ)तिसंप्रदायः। (ननुस्यादयंस्ववृत्तिविरोधः। यद्यात्मनःकर्मत्वंस्यात् नचैतदस्ति येनक(र्म)र्मीभूतायांस्वस्यामेववृ

SGDF Foundation

त्तिप्राह्यास्ववृत्तिविरोधःस्यात् किंतु)। ननुब्रह्मणःस्वरूपज्ञानंप्रतिकर्मत्वाभावेपिविषयत्वमस्त्येव । नचतदेवकर्मत्वमितिवा
च्यं । तयोर्भेदात्।तथाचनस्ववृत्तिविरोधइत्याशंकते॥नन्विति॥ (तथाचब्रह्मस्वरूपभूतंज्ञानंस्वविषयमेवेतिनज्ञानत्वव्यापकस
विषयत्वव्यावृत्तिर्ब्रह्मस्वरूपज्ञानेइतिनव्यभिचारइतिशंकते ॥नन्विति॥)कर्मत्वातिरिक्तंज्ञानजन्यव्यवहारयोग्यत्वमेवविषयत्वं।
ज्ञानेचस्वविषयविषयकव्यवहारजननयोग्यत्वंसविषयकत्वमित्यर्थः। यत्रज्ञानानंतरंव्यासंगादिनाव्यवहारोनजातस्तत्रज्ञानेस्ववि
षय विषयकव्यवहारजनकत्वाभावात्तद्विषयेचज्ञानजन्यव्यवहारास्पद (रस्यदृष्ट) त्वाभावादव्याप्तिवारणाययोग्यत्वमित्युक्तं ।
योग्यत्वंचसहकारिविरहप्रयुक्तकार्याभावः। तदिहज्ञानानंतरंव्यवहारेजननीयेव्यासंगाभावःसहकारीतदभावाद्व्यवहारोनभवति ।

**यंवा । नाद्यः । स्ववृत्तिविरोधेनपरैरस्वीकारात् । ननुस्वकर्मकत्वाभावेपिस्वव्यवहारजननयोग्यत्व
रूपंस्वविषयत्वमस्ति। तत्स्वभावस्यापिस्फुरणस्यतद्व्यवहारजनकतयातद्विषयत्वमितिचित्सुखोक्ते**

तत्सद्भावेतुभवत्येवेत्येवंव्यासंगदशायामपिउक्तरूपयोग्यतासद्भावान्नाव्याप्तिरितिभावः । ब्रह्मज्ञानस्यस्वकर्मकत्वाभावेपिस्वव्य
वहारजननयोग्यत्वरूपंस्वविषयत्वमस्तीत्यत्रपरःस्वाचार्यसंमतिमाह ॥ तत्स्वभावस्यापीति ॥ आत्मस्वभावस्यापीत्यर्थः
स्फुरणस्यज्ञानस्य तद्विषयत्वं तद्विषयकत्वं । एतदन्यस्यज्ञानजन्यव्यवहारयोग्यत्वभिन्नस्य । तथाचघटादौज्ञप्तिविषयत्वकर्मत्व
योरेकत्वदर्शनात्ब्रह्मणोज्ञप्तिकर्मत्वमनंगीकृत्यतद्विषयत्वांगीकारोविरुद्धइत्यर्थः । ननुज्ञानजन्यव्यवहारयोग्यत्वरूपविषय

138

SGDF
Sri Gargeshwari Digital Foundation

त्वातिरिक्तंज्ञप्तिकर्मत्वंघटादावस्त्येवेतिउक्तमसदित्याशंक्यनिराकरोति ॥ नहीत्यादिना ॥ एकदेशिमतेनाह ॥ तदाकारावृत्तिरिति ॥ घटाद्याकारांतःकरणवृत्तिरित्यर्थः ॥ तांचप्रतीति ॥ तदाकारावृत्तिर्ज्ञप्तिरितिमतेतांप्रतिकर्मत्वंनामतत्कारकविशेषत्वं । तत्प्रतिबिंबितंचैतन्यंज्ञप्तिरितिमतेतांप्रतिकर्मत्वंनामतज्जन्यत्यादिरूपमितिविवेकः । घटादेश्चैतन्यकारकत्वाभावेनतत्कारकविशेषत्वरूपकर्मत्वस्यद्वितीयमतेऽयोगादितिध्येयं । कर्त्रादिकारकव्यावृत्त्यर्थंविशेषपदं ॥ तज्जन्येति ॥ वृत्तिप्रतिबिंबित 134
चैतन्यजन्येत्यर्थः । अतिशयविशेषणमेतत् । अतिशययोगित्वं अतिशयजन्यव्यवहारयोगित्वमित्यर्थोद्रष्टव्यः ।

रितिचेन्न । घटादावप्येतदन्यस्यज्ञप्तिकर्मत्वस्याभावात् । नहिघटादावपितदाकारवृत्तिः तत्प्रतिबिंबितचैतन्यंवाज्ञप्तिः । तांचप्रतिकर्मत्वंतत्कारकविशेषत्वंवातज्जन्यावरणाभिभवरूपातिशययोगित्वंवेतियुक्तं । [1]ज्ञातैकसतिसुखादौशुक्तिरूप्यादौचोक्तरूपज्ञप्तिकर्मत्वाभावापातात् ।

अन्यथाप्राप्तप्रकाशप्रतिबंधरूपावरणस्ययोऽभिभवोध्वंसःतद्रूपातिशययोगित्वं । तदभिव्यक्ताधिष्ठानचैतन्यएवस्यात्नघटादावितिध्येयं । यद्वावृत्तिप्रतिबिंबितचैतन्यजन्योयआवरणाभिभवरूपोतिशयः भग्नावरणचित्संबंधइतियावत् । तद्रूपातिशययोगित्वमितिव्याख्येयं । इदंचघटादावस्तीतिध्येयं । ज्ञानकर्मत्वेनसंप्रतिपन्नेदुःखादौनिरुक्तंकर्मत्वमव्याप्तमित्याह ॥ ज्ञातैकसतीति ॥ दुःखादीनामविद्यावृत्तितत्प्रतिबिंबितसाक्षिचैतन्यविषयत्वेनोक्तरूपज्ञप्तिद्वयंप्रतिकारकविशेषत्वाभावादित्यर्थः । एतदुपपादनायज्ञातैकसतीत्युक्तं । दुःखादीनांशुक्तिरूप्यादीनांचप्रातिभासिकत्वेनप्रतीतिसमयमात्रवृत्तित्वेनज्ञातैकसत्त्वात्तत्रचाव

1 ज्ञातैकसत्त्वं च प्रत्यक्षयोग्यत्वे सति स्वाधिकरणकालवृत्तिप्रागभावप्रतियोगिप्रत्यक्षविषयभिन्नत्वम् ॥ तरंगिणी

SGDF
Sri Gargeshwari Digital Foundation

रणाभावेनआवरणाभिभवरूपातिशययोगित्वाभावेनकर्मत्वाभावापातात् । तथादुःखादेर्ज्ञातैकसत्त्वेनज्ञप्त्यपेक्षयापूर्वभावित्वा भावेनवृत्तिरूपज्ञप्तिकारकत्वरूपंकर्मत्वमपिनास्ति । कारकत्वस्यजनकत्वगर्भत्वेनतस्यपूर्ववृत्तित्वघटितत्वात् अतोऽव्याप्तिरित्यर्थः । उक्तयोःकर्मत्वलक्षणयोरतिव्याप्तिंचाह ॥ ब्रह्मणोपीति ॥ चरमवृत्तेर्ब्रह्माकारतयातांप्रतिब्रह्मणःकारकत्वात् चरमवृत्तेश्चित्प्रतिफलनाभावेवृत्तेर्मूलाज्ञाननिवर्तकत्वायोगात्तदन्यथानुपपत्त्याघटाकारवृत्तिवत्चित्प्रतिफलनयुक्ततायाअवश्यंवाच्यत्वेनब्रह्माकारवृत्तिप्रतिफलितचैतन्यंप्रतिब्रह्मणोपिकर्मत्वात् । सकलसामर्थ्यविधुरस्यकारकत्वंनास्तीत्येतच्चनिराकरिष्यतइतिहृदयं ।

ब्रह्मणोपिचरमवृत्तिविषयस्योक्तरूपांज्ञप्तिंप्रत्युक्तरूपकर्मत्वापाताच्च । किंतुवृत्त्यभिव्यक्तंघटाद्यधिष्ठानचैतन्यंतज्ज्ञप्तिः।नचतस्यघटादावपिव्यवहारादन्यत्कृत्यमस्ति । इयांस्तुभेदः घटादिःस्वान्यज्ञप्तिकर्म, चैतन्यंतुस्वस्वरूपज्ञप्तिकर्मेति । नद्वितीयः, मोक्षेप

ताद्दशचैतन्यजन्यावरणाभिभवरूपातिशययोगित्वात्ब्रह्मण्यतिव्याप्तिरित्यर्थः । विषयत्वातिरिक्तंकर्मत्वंनिरस्यज्ञानजन्यव्यवहारयोग्यत्वरूपंविषयत्वमेवकर्मत्वंघटादावित्याह॥किंत्विति॥तज्ज्ञप्तिःघटज्ञप्तिः। इत्येवत्वयावाच्यमितिशेषः।तस्यज्ञप्तिरूपघटाधिष्ठानचैतन्यस्य । एवंघटचैतन्ययोर्ज्ञप्तिकर्मत्वेपिआंतरालिकमेवभेदमाह ॥ इयांस्त्विति ॥ (स्वस्वरूपास्वाख्या) एवंसतिकर्मत्वविषयत्वयोरैक्येनब्रह्मणोपिकर्मत्वावश्यंभावात्स्ववृत्तिविरोधादितिभावः ॥ मोक्षइति ॥ तथाचमोक्षकालेसाक्षिणो

SGDF
Sri Gargeshwari Digital Foundation

निर्विषयत्वंस्यादितिभावः । मोक्षकालेपिसाक्षिणोमयापूर्वसुखादिकमनुभूतमित्येवंरूपेणातीतविषयकत्वंभविष्यतीत्याशंक्यतद तीतंकिंसाक्षान्मोक्षेसाक्षिणोविषयः । ज्ञानादिद्वारावा । नतावद्द्वितीयः । उपनायकस्यवृत्तिज्ञानस्यमोक्षेऽभावादित्यभिप्रे त्यप्रथमपक्षंनिराचष्टे ॥ त्वन्मतेचेति ॥ वर्तमानस्यैवेति ॥ योग्यस्यैवसुखादेरित्यर्थः । तथाचातीतसुखादेःनसाक्षात्साक्षि विषयत्वमितिभावः । साक्षिणोतीतविषयत्वेदूषणांतरमाह ॥ वह्निरिति ॥ वह्निरत्रपर्वतेपूर्वमासीदित्यनुमितौयथातीतवह्न्यु ल्लेखोभवत्येवंमोक्षेसुषुप्तौचअतीतविषयोल्लेखरूपसंसाराख्योपप्लवःस्यात् । तथाचमोक्षसुषुप्त्योर्नेष्प्रपंचतानस्यादित्यर्थः । त

राभावात् । त्वन्मतेचवर्तमानस्यैवसाक्षात्साक्षिविषयत्वात् । वह्निरासीदित्याद्यनुमि
ताविवसाक्षिज्ञानेमोक्षसुषुप्त्योरतीतविषयोल्लेखरूपोपप्लवापाताच्चनिर्विषयत्वेतुज्ञान
त्वमेवनस्यात् तद्धिविषयानुल्लेखित्वं । नतूल्लिखितस्यविषयस्यावर्तमानत्वमत्यंता

थाचज्ञानत्वव्यापकसविषयत्वरहितत्वान्नज्ञानमात्मेतितत्राज्ञानत्वहेतोर्व्यभिचारःसुस्थइतिभावः । आत्मरूपंज्ञानंनिर्विषयमिति द्वितीयपक्षंदूषयति ॥ निर्विषयत्वइति ॥ आत्मानज्ञानं निर्विषयत्वात् घटवदित्यत्रनिर्विषयत्वंनामअवर्तमानविषयत्वंवा अत्यंतासद्विषयकत्वंवा । आद्येऽतीतज्ञानेव्यभिचारः । द्वितीयेतुच्छज्ञानेव्यभिचारइत्याशंकांनिराकुर्वन्हेतुस्वरूपमाह ॥ तद्धीति ॥ निर्विषयत्वमित्यर्थः । अत्रबालमूकादिज्ञानव्यतिरिक्तत्वंहेतौविशेषणीयं । अतोनतत्रव्यभिचारइतिध्येयं । ननुनिर्विषयत्वेज्ञान मेवनस्यादित्युक्तमयुक्तं निर्विषयत्वेपिकदाचित्सविषयत्वमात्रेणज्ञानत्वमस्तु । तथाचमोक्षकालीनात्मरूपज्ञानस्यसंसारावस्थायांस

SGDF
Sri Gargeshw... Digital Foundation

विषयकत्वाज्ज्ञानत्वमुपपन्नमित्यप्रयोजकतामाशंक्यनिराकरोति ॥नचेति॥ सप्रतियोगिकइति॥ तथाचाभावादौसप्रतियोगि
कत्वादीनांस्वभावत्वमिवब्रह्मरूपज्ञानेपिसविषयत्वंस्वभावएवेत्यंगीकर्तव्येकदाचित्सविषयत्वस्याप्रयोजकत्वात्। मोक्षेचात्मरूपज्ञा
नस्यसविषयकत्वाभावाज्ज्ञानत्वंनस्यादेवेत्यर्थः । मोक्षेविषयानुल्लेखेब्रह्मरूपज्ञानस्यज्ञानस्वभावहान्यापत्त्याज्ञानत्वाभावमुक्त्वादो
षांतरमाह॥ परमेति॥मोक्षेआत्मरूपज्ञानस्यनिर्विषयत्वांगीकारेआनंदस्यआत्मरूपज्ञानाविषय(त्वापत्त्या)त्वप्राप्त्याआनं(दप्रकाश
एवन)दाप्रकाशएवस्यात् । तथाचमोक्षस्यपरमपुरुषार्थत्वं नस्यादित्यर्थः । नचानंदरूपत्वाद्युक्तंपरमपुरुषार्थत्वमितिवाच्यं । द्रवि
सत्वंवा येनातीतादिज्ञानेतुच्छज्ञानेचव्यभिचारःस्यात्।नचकदाचित्सविषयत्वमात्रेणज्ञानत्वं । सप्र
तियोगिकेअभावादौसप्रतियोगिकत्ववत्सविषयकेइच्छादौघटादिज्ञानेचसविषयकत्वादेःस्वभाव
त्वदर्शनात्।परमपुरुषार्थेमोक्षेआनंदाप्रकाशापाताच्च। अर्थप्रकाशत्वरूपज्ञानस्वभावाभावेपिज्ञानत्वे
णवत्त्वेहिपारिवृढ्यं नतुद्रविणत्वेऽतस्तन्न्यायेनानंदप्रकाशोऽवश्यंवाच्यइतिभावः । निर्विषयत्वेज्ञानमेवनस्याद्धटवदितिभगव
त्पादीयवाक्येनिर्विषयत्वाज्ज्ञानमेवनस्यादित्यंशमुपपाद्यघटवदित्यंशमुपपादयति ॥ अर्थेति ॥ ज्ञानस्वभावेति ॥ ज्ञानस्वरू
पलक्षणेत्यर्थः । "बुद्धिरर्थप्रकाशन"मितिवचनादितिभावः । नन्वर्थप्रकाशात्मकत्वरूपज्ञानस्वभावाभावेपिज्ञानत्वमस्तु नच
घटादेरपिज्ञानत्वापत्तिः अर्थाप्रकाशकंयज्जडंतद्व्यावृत्तत्वमेवज्ञानत्वमित्यंगीकृतत्वात् घटादेस्त्वर्थाप्रकाशात्मकजडव्यावृत्तेर
भावादितिचेन्न । ज्ञानस्यार्थप्रकाशात्मकत्वाभावेऽर्थाप्रकाशकजडव्यावृत्तेरेववक्तुमशक्यत्वादित्याह ॥ अर्थाप्रकाशेति ॥

142

SGDF
Sri Gargeshwari Digital Foundation

1 आदिपदेन

ज्ञात्रभावादिति॥ नतावदात्मस्वरूपभूतज्ञानस्यआत्मैवज्ञाता कर्तृत्वकर्मत्वयोरेकत्रविरोधात्।नापिपरः मोक्षेपराभावादित्यर्थः।एवंकर्तृकर्मणोरभावेपिज्ञानत्वमस्त्वित्यतआह ॥ नहीति ॥ नन्वात्मस्वरूपज्ञानस्यानादित्वान्नज्ञात्राद्यपेक्षा अनादिनःपरानपेक्षत्वादित्यतआह ॥यदिचेति॥ तदनपेक्षा कर्त्राद्यनपेक्षा । ब्रह्मसत्तायाः ब्रह्मकर्तृकसत्तायाः अस्तिब्रह्मेत्यादावितिशेषः। ब्रह्म

घटादेरपिज्ञानत्वापात्ताच|अर्थाप्रकाशात्मकजडव्यावृत्तेरपिअर्थप्रकाशात्मकत्वंविनाऽयोगाच्च। एवंज्ञात्रभावादपिनज्ञानं । नहिभोज्यभोक्तृरहिताभुक्तिरस्ति। यदिचज्ञानस्यानादित्वात्तदनपेक्षातर्ह्यनादेः[1]प्रागभावादेःप्रतियोगिनिजातिरूपस्यधर्मस्यव्यक्तिरूपेधर्मिणिजीवब्रह्मविभागस्यचधर्मिप्रतियोगिनोर्वेदरूपस्यशब्दस्यचवक्तृवाच्ययोरज्ञानस्यचाश्रयविषययोर्ब्रह्मसत्तायाश्चकर्तर्यपेक्षानस्यात् । तथाचास्तिब्रह्मेत्यादौकर्तरिलकारोनस्यात्। अतीतादिज्ञानस्येश्वरज्ञानस्यचोत्पत्त्यर्थंविषयाद्यनपेक्षत्वेपितन्निरूप्यत्वदर्शनेनज्ञानस्यज्ञातृज्ञेयनिरूप्यत्वस्वभावत्वाच्च ।

सत्तायाःकर्तर्यपेक्षानास्त्येवेतिचेत्तत्राह॥ तथाचेति॥ कर्तरि कर्त्रर्थे लकारः अस्तीत्यत्रलड्रूपः। कर्तरिलटोविधानादितिभावः। ननुज्ञातृज्ञेयादिनिरूप्यस्वभावत्वमप्युत्पत्त्यर्थमेवांगीकार्यं आत्मज्ञानस्यचानादित्वेनतदभावान्नतन्निरूप्यस्वभावत्वकल्पनमिति मंदाशंकानिरासायोक्तं ॥ अतीतादीति ॥ दृष्टांतोयं। ईश्वरादिज्ञानंदार्ष्टांतिकमितिबुध्याविवेकः । अतीतादिज्ञानस्यविष

143

SGDF
Sri Gargeshwari Digital Foundation

१ रज्ञेयत्वादिकमत्र ज्ञेयोपरक्तबुद्धिविलयत्वादिकं ॥ तेन सुप्ति विनापि जाते: प्रलये सत्त्वादि शंका

याभावान्नोत्पत्त्यर्थंतदपेक्षा ईश्वरज्ञानस्यतुनित्यत्वादितिज्ञेयं । ज्ञानस्यज्ञेयादिनिरूप्यस्वभावत्वेऽनुभवंप्रमाणयति॥इदमिति॥ इदमितिविषयस्यअहमितिज्ञातुरुल्लेखइतिज्ञातव्यं॥ज्ञातुरिति ॥ ज्ञातुर्योर्थप्रकाशःतदेवज्ञानमित्यर्थः । ज्ञातुरितिकर्त्रपेक्षाअर्थे तिज्ञेयापेक्षाचोक्तेतिभावः।ज्ञानविशेषाभ्यांप्रमाऽप्रमाभ्यांबहिर्भूतत्वाच्चनात्माज्ञानमित्याह ॥ किंचात्मेति॥तद्वेद्यस्य प्रमारूपसा क्षिवेद्यस्य प्रमायास्सदर्थविषयकत्वनियमादितिभावः । नन्वित्यनंतरं(यइति)यदितिशेषः ॥ अंतःकरणेति ॥ अंतःकरण

इदमहंजानामीतिह्यनुभवः। उक्तंहिविवरणे। "ज्ञातुरर्थप्रकाशस्यज्ञानत्वा"दिति। तथाच "ज्ञातृज्ञेय विहीनंतेब्रह्मज्ञानात्मकंयदि । भोक्तृभोज्यविहीनापिभवेत्तर्हिभुजिक्रिया" । किंचात्माज्ञानंचेत्प्र माभ्रमोवा । नाद्यः। तद्वेद्यस्याविद्यादेस्तात्विकत्वापातात्। नांत्यः।दोषाजन्यत्वात्। नन्वंतःकरणवृ त्तिप्रतिबिंबितस्सप्रमा । अविद्यावृत्तिप्रतिबिंबितस्तुभ्रमइतिचेन्न । स्वभावप्रश्नंप्रत्यस्यानुत्तरत्वात्।

वृत्तिप्रतिप्रबिंबितात्मचैतन्यमितियावत् ॥ अविद्येति ॥ अविद्यावृत्तिबिंबितसाक्षिचैतन्यमितियावत् ॥ स्वभावेति ॥ यन्मोक्षेप्य(नु)निवर्तमानंशुद्धात्मस्वभावभूतंज्ञानंतत्प्रमारूपंवाभ्रमरूपंवेतिप्रश्नस्यांतःकरणवृत्तिप्रतिबिंबितचैतन्यादेःप्रमात्वा दिकथनस्यानुत्तरत्वात् वृत्तिप्रतिबिंबितचैतन्यादेःसंसारकालीनत्वात्तत्प्रमात्वादिकथनमयुक्तमित्यर्थः । नन्वात्मरूपंज्ञानंस्व भावतःप्रमाऽप्रमाबहिर्भूतमितिस्वभावप्रश्नस्योत्तरंवदामइतिचेत्तत्राह ॥ स्वभावतइति ॥ रूपद्वयेति ॥ प्रमात्वाप्रमात्वाख्यध ॥ ७३ ॥

अज्ञातृत्वं अज्ञानत्वं अस्वप्रकाशत्वं अनात्मत्वं प्रागभिप्रेतं इति पंच विकल्पाः ॥

र्मद्वयेत्यर्थः ॥ ज्ञानमपीति ॥ यावद्विशेषाभावेसामान्यायोगाद्व्यभिचारइतिभावः ॥निरस्तत्वादिति ॥अस्वप्रकाशत्वंदृश्य त्वमित्यत्रेतिशेषः ॥ आत्मत्वमिति ॥ अनात्मत्वप्रतियोगिभूतमित्यर्थः ॥ एकत्वादिति ॥ जातेरनेकानुगतत्वावश्यंभावा दित्यर्थः । ननुविशिष्टात्मनांबहूनांसत्त्वात्तदनुगतमात्मत्वंजातिर्भविष्यतीत्यतआह ॥ विशिष्टेति ॥ तथाचविशिष्टात्मनांमि थ्यात्वेनपक्षनिक्षिप्तत्वेनतत्रानात्मत्वहेतोर्भागासिद्धिरित्यर्थः ॥ निरस्तत्वादिति ॥ तथाचज्ञातृत्वादीनामात्मत्वेअज्ञातृत्वम

स्वभावतोरूपद्वयहीनश्चेत्स्वभावतोज्ञानमपिनस्यात्। नतृतीयः। निरस्तत्वात्। चतुर्थेपिनतावदात्मत्वंजातिविशेषः । आत्मनएकत्वात् । विशिष्टात्मनांभे देपितेषांपक्षनिक्षिप्तत्वात् । नापिज्ञातृत्वंवाज्ञानत्वंवास्वप्रकाशत्वंवा निरस्त त्वात्। नाप्यानंदत्वं । जन्मादिमत्यऽनात्मनिवैषयिकानंदेऽनानंदत्वासिद्धेः ।

ज्ञानत्वमस्वप्रकाशत्वंचानात्मत्वमित्युक्तंस्यात् तथाचाद्यस्याहमर्थेऽसिद्धिःद्वितीयस्यवृत्तिज्ञानेतृतीयस्यफलाव्याप्यत्वेसत्यपरो क्षव्यवहारयोग्यत्वाभावरूपस्यघटादौअविद्यादौचासिद्धिः शुक्तिरूप्येसाधनवैकल्यंचेतिनिरस्तमित्यर्थः ॥ वैषयिकेति ॥ तस्यमिथ्यात्वेनपक्षनिक्षिप्तत्वादितिभावः । ननुवैषयिकानंदस्यात्माभिन्नत्वेनपक्षबहिर्भावएवेतिनासिद्धिरित्यतउक्तंजन्मादिम त्यनात्मनीति । अनात्मनि जडइत्यर्थः । तथाचानादिभूतेनचेतनभूतेनात्मनानाभेदइतिभावः । ननुनात्मस्वरूपानंदातिरिक्तो

SGDF

वैषयिकानंदोस्ति नचविषयभोगादिजन्योऽनुभवसिद्धइतिवाच्यं । विषयसंबंधेनापिआत्मस्वरूपानंदएवाभिव्यज्यतइतिविवर
णोक्तेरिरितितत्राह ॥ तस्यापीति ॥ वैषयिकानंदस्याप्यात्मस्वरूपत्वइत्यर्थः । अनुभवेन प्रत्यक्षेण ॥ साधनेति ॥ सुखंतारत
म्यवत् उत्कृष्टापकृष्टसाधनजन्यत्वादितियुक्त्याचेत्यर्थः ॥ नस्यादिति ॥ तथाचवैषयिकानंदस्यानुभवादिसिद्धतारतम्यव
त्त्वान्नाखंडैकरसात्माभिन्नत्वमितिभावः । नन्वानंदेनतारतम्यं किंत्वभिव्यक्तावेव तत्तारतम्यमेवचानंदेउपचर्यते उक्तानुभवा
दिकमपितदभिव्यक्तितारतम्यविषयकत्वेनान्यथासिद्धमित्यतआह ॥ अखंडेति ॥ यत्सावयवंवस्तुतत्रकेषांचिदवयवानांव्य

तस्याप्यात्मत्वेनीरपानजातात्क्षीरपानजंसुखमधिकमित्यनुभवेनसैषानंदस्यमीमांसाभवतीत्यादि
श्रुत्यासाधनतारतम्यादियुक्त्याचसिद्धमानंदतारतम्यंचनस्यात् । अखंडेस्वरूपानंदेअभिव्य
क्तितारतम्यस्याप्ययोगात् । विरोधिनोदुःखस्यसर्वात्मनाभावेपिसुखेतारतम्यानुभवाच्च ।

क्तौवस्तुनोऽपकृष्टाव्यक्तिः बह्ववयवव्यक्तौचोत्कृष्टाव्यक्तिरित्याद्यभिव्यक्तितारतम्यंसखंडेसावयवेएववस्तुनिदृष्टं नाखंडेआत्म
स्वरूपानंदइत्यर्थः । ननुवैषयिकानंदआत्मस्वरूपमेव । नचतारतम्यानुपपत्तिः यावानानंदस्तावतीदुःखनिवृत्तिर्भवतीतितद्विरो
धियद्दुःखंतन्निवृत्तावेवतारतम्यांगीकारादित्यतआह ॥ विरोधिनइति ॥ सर्वात्मनादुःखतद्ध्वंसाभ्यांरहितेकस्मिंश्चित्पुरुषेनीर
पानजात्क्षीरपानजंसुखमधिकमितिसुखतारतम्यानुभवात्स्वरूपानंदेचतदयोगात्तदतिरिक्तेवैषयिकानंदेंगीकार्यैतत्रानानंदत्वहे

SGDF Sri Gargeshwari Digital Foundation

1 अनानन्दत्वादेः तुच्छे ब्रह्मणि च स्पष्टत्वा[illegible] तस्मात् " ब्रह्मणि अनानन्दत्वाद्यङ्गीकारात् ॥

तोरसिद्धिरितिभावः । वैषयिकानंदस्यस्वरूपानंदाद्भेदेनानुभूयमानत्वादपितदतिरिक्तोवैषयिकानंदोस्तीतिवक्तव्यमित्याह ॥ अंतःकरणेति ॥ यथास्वरूपज्ञानातिरिक्तमंतःकरणवृत्तिरूपंज्ञानंजानामीत्यनुभवविषयोंगीक्रियते तथाहंसुखीत्यनुभवविषयभूतंस्वरूपानंदातिरिक्तंअंतःकरणवृत्तिरूपंवैषयिकंसुखमप्यवश्यमंगीकार्यं । एवंचांतःकरणवृत्तिरूपज्ञानवदंतःकरणवृत्तिरूपजडभूतवैषयिकानंदानंगीकारेऽहंसुखीतिअहमर्थस्यसुखित्वावगाह्यनुभवोनस्यात् । स्वरूपसुखस्याहमर्थनिष्ठत्वाभावात् । ननुअहमितिप्रतीयमानोप्यात्मैवेतिचेन्न । तर्हिसुतरामहंसुखीत्यनुभवायोगः । अहमितिप्रतीयमानस्यात्मनस्सुख(आनंद)स्वरूपत्वात्स्व 147

अंतःकरणवृत्तिरूपज्ञानवत्तद्वृत्तिरूपसुखाभावेअहंसुखीत्यनुभवायोगाच्च ।[1] अनानंदत्वस्यमिथ्यात्वंप्रत्यप्रयोजकत्वाच्च । नाप्यहंत्वं । तदभावस्याहंकारेऽसिद्धेः । आत्मनिव्यभिचाराच्च । नापिप्रत्यक्त्वं । उक्तादन्यस्यतस्याभावात् । नाप्यपरिच्छिन्नत्वं । निरसिष्यमाणत्वात् । नाप्यबाध्यत्वं ।

स्मिन्स्ववक्तायानिर्विशेषवादिनात्वयावक्तुमशक्यत्वात्।तथाच(स्वरूपानंदातिरिक्ते)वैषयिकानंदेंगीकार्येतत्रानानंदत्वहेतोरसिद्धिरितिभावः । अप्रयोजकतांचाह॥ अनानंदत्वस्येति ॥तद्रूपानात्मत्वस्येत्यर्थः॥ आत्मनीति ॥ अहंकारनिष्ठाहंत्वस्याभावआत्मन्यप्यस्तीतिअनहंत्वहेतोर्व्यभिचारइतिभावः ॥ उक्तादन्यस्येति ॥ आत्मत्वानंदत्वाहंत्वादेःसकाशादन्यस्यप्रत्यक्त्वस्याभावादित्यर्थः । तच्चदूषितमितिभावः ॥ निरसिष्यमाणत्वादिति ॥ अपरिच्छिन्नत्वमात्मत्वंचेदनात्मत्वादित्यस्यपरिच्छिन्न

SGDF
Sri Gargeshwari Digital Foundation

त्वादित्यर्थःस्यात् । सचपरिच्छिन्नत्वहेतुःदेशकालादावसिद्ध्यादिनानिरसिष्यतइतिभावः ॥ **साध्येति** ॥ तथाचानात्मत्वंनाम बाध्यत्वमित्युक्तंस्यात् । तदेवचमिथ्यात्वमितिसाध्यावैशिष्ट्यमित्यर्थः ॥ **आत्मशब्दवाच्यइति** ॥ "आत्मादेहेधृतौजीवे(जीवे धृतौदेहे)स्वभावेपरमात्मनी "त्यभिधानादितिभावः ॥ **तल्लक्ष्यत्वमिति** ॥ तथाचात्मनिआत्मशब्दालक्ष्यत्वरूपानात्मत्वाभावान्नव्यभिचारः । आत्मशब्दवाच्येदेहादौसत्त्वान्नासिद्धिरितिभावः ॥ **तत्प्रतिपाद्यत्वमिति** ॥ वाच्यत्वलक्ष्यत्वसाधारणमित्यर्थः । हेतोः आत्मशब्दालक्ष्यत्वहेतोः । आत्मशब्दलक्ष्यत्वस्यकेवलान्वयित्वादितिभावः । आत्मशब्दाप्रतिपाद्यत्वरूपहेतोर

(हेतोः)साध्यावैशिष्ट्यात् । नाप्यात्मशब्दवाच्यत्वं । अवाच्येआत्मनिहेतोर्व्यभिचारात् आत्मशब्दवाच्येदेहादावसिद्धेश्च । नापितल्लक्ष्यत्वं । तत्प्रतिपाद्यत्वमात्रंवा । इंद्रियादावात्मशब्दलक्ष्येहेतोर्भागासिद्धेः । नापिपराभिप्रेतं । मयाज्ञातृत्वमात्मत्वमित्यंगीकारात् । तस्मान्नचतुर्थः । नापिपंचमः । मयाअज्ञातृत्वंजडत्वमित्यंगीकारात् ।

पिलक्षणयातत्प्रतिपाद्येंद्रियादावसिद्धिश्चद्रष्टव्या ॥ **परेति** ॥ मायावाद्यपेक्षयापरेषांतत्ववादिनामस्माकंयदभिप्रेतमात्मत्वंतदेवमयापिहेतूक्रियतइतिवक्तुंनशक्यतइत्यर्थः ॥ **मयेति** ॥ यथोक्तमाचार्यैः" जडत्वंचाप्रमातृत्वमेवे"ति । तथाचतदभावरूपानात्मत्वंचनत्वयाहेतूकर्तुंशक्यं । आत्मनिव्यभिचारादहमर्थेऽसिद्धेश्चेतिभावः । पराभिप्रेतमेवजडत्वमितिपंचमःकुतोनयुक्तइत्यतआह ॥ **मयेति** ॥ तच्चात्मादौव्यभिचारादिनात्वयावक्तुंनशक्यतइतिभावः । तत्वशुद्धिः मायावा(दि)द्ग्रंथविशेषः ॥

॥ ७५ ॥

निरस्तइति ॥ अचेतनत्वंजडत्वमेव तच्चदूषितमितिभावः । यद्वाऽचेतनत्वंचेतनत्वाभावः तत्रचेतनत्वंजातिविशेषोवाज्ञातृत्वंवेत्याद्यात्मत्वनिर्वचनदूषणेनदूषितप्रायं । अतोमिथ्यात्वसाधनायपरोपन्यस्तोऽचेतनत्वहेतुरपिपरास्तइत्यर्थः ॥ **इतिजडत्वहेतुभंगविवरणं** ॥ ४ ॥ **देशतइति** ॥ देशांतरेऽसत्त्वमित्यर्थः ॥ **कालतइति** ॥ कालांतरेऽसत्त्वमित्यर्थः ॥ **वस्तुतइति** ॥ अन्योन्याभाववत्त्वमित्यर्थः । देशकालयोर्हेत्वभावंप्रत्यक्षा(गमानुमानै)नुमानागमैरुपपादयति ॥ **अवकाशरूपेति** ॥ अ

एतेनतत्वशुध्युक्तोऽचेतनत्वहेतुरपिनिरस्तइति ॥ ७ ॥ इतिजडत्वहेतुभंगः ॥ ४ ॥ परिच्छिन्नत्वमपिदेशतःकालतोवस्तुतोवा । नाद्यद्वितीयौ । देशकालाज्ञानेषुत्वदभिमतेवियदादेरूप्यादेश्चप्रतिपन्नोपाधिस्थनिषेधेचासिद्धेः । अवकाशरूपदेशस्यकालस्यचाऽपरिच्छिन्न(तयैव)त्वेनैवधर्मिग्राहिणासाक्षिणा "आकाशवत्सर्वगतश्चनित्यः । सदेवसौम्येदमग्रे । दृष्ट्वैवतंमुच्यते ।

व्याकृताकाशरूपेत्यर्थः ॥ **अपरिच्छिन्नत्वेनैवेति** ॥ देशस्यदेशांतरनिष्ठात्यंताभावाप्रतियोगित्वेनैवकालस्यचप्रध्वंसाप्रतियोगित्वेनैवेत्यर्थः ॥ **इदमग्रइति** ॥ जगत्सृष्टेःप्राक्प्रलयेकालस्यसत्त्वोक्त्यानित्यत्वसिद्धिरित्यर्थः ॥ **दृष्ट्वेति** ॥ दृष्ट्वेत्यस्यदर्शनानंतरमित्यर्थः । तथाचापरोक्षज्ञानेनसर्वस्यापिजगतोनिवृत्तत्वात्कतकरजोवद्वेणुसंघर्षजाग्निवच्चस्वस्यापिनष्टत्वात्तदनंतरमित्युक्त्यासाक्षात्कारानंतरमपिकालःप्रतीयते । तथाचतस्यनिवर्तकाभावेननित्यत्वावगमान्नकालतःपरिच्छिन्नत्वमित्यर्थः ॥

SGDF Foundation

"अथ मर्त्योऽमृतोऽमृतो भवति" इति मन्त्रस्य पूर्वभागः "यदा सर्वे प्रलीयन्ते" इत्यादि।

अथेति॥" यदासर्वेप्रमुच्यंतेकामायेऽस्यहृदिस्थिता "इतिज्ञानेनसर्वकामप्रहाणानंतरममृतोभवतीत्युच्यते । तथाचज्ञानेनसर्वकामप्रहाणानंतरमपिकालसत्त्वस्याथेत्यनेनावगमात्नित्यत्वसिद्धिरित्यर्थः ॥ यत्रत्विति ॥ यत्रत्वस्येत्यस्ययस्यामवस्थायामित्यर्थकत्वेनाविद्यानिवृत्तिरूपमोक्षावस्थायामपिकालसत्त्वप्रतीत्यातस्यनित्यत्वसिद्धेर्नतस्यकालतःपरिच्छेदइतिभावः । नन्वाकाशेनानित्यत्वरूपकालपरिच्छेदराहित्यं "तस्माद्वाएतस्मादात्मनआकाशःसंभूत" इतिश्रुतेःसिद्धजन्यत्वेनहेतुनाध्वंसप्रतियोगित्वरूपकालपरिच्छिन्नत्वस्याकाशेऽनुमातुंशक्यत्वादित्यतआह ॥ आकाशइति ॥ नाव्याकृताकाशविषया(येयं)श्रुतिःकिंतुभूताकाशविषया । भागासिद्धिश्चाव्याकृताकाशएवास्माभिरभिहितेत्याशयः । आकाशद्वयमप्रामाणिकमितिचेत्तत्राह ॥ उक्तंचेति ॥ भूताकाशोऽव्याकृताकाशश्चेत्याकाशद्वयंवियत्पादेसुधायांटीकाकृद्भिरस्माभिश्चचंद्रिकायांप्रतिपादितमित्यर्थः । देशकालयोर्देशांतरेऽसत्त्वरूपंदेशतःपरिच्छिन्नत्वंकालांतरेऽसत्त्वरूपंकालतःपरिच्छिन्नत्वंचवदतात्रदेशोनास्तिइदानींकालोनास्तीतिप्रतीतिरंगीकार्याअस्तीति चेत्तत्राह ॥ अत्रेति ॥ अत्रेदानींशब्दाभ्यामधिकरणतयादेशकालौनिर्दिश्यपुनस्तयोर्निषेधेव्याहतिरित्यर्थः । ॥ ७६ ॥

स्ति

अथमर्त्योऽमृतोभवति । यत्रत्वस्यसर्वमात्मैवाभू "दित्यादिश्रुत्या सदासर्वत्रकार्यदर्शनादियुक्त्याचसिद्धेः । "आकाशःसंभूत "इत्यादिश्रुतेश्चभूताकाशविषयत्वात् । उक्तंचाकाशद्वैतमन्यत्र । अत्रदेशोनास्तिइदानींकालोनास्तीत्यस्यव्याहतत्वाच ।

SGDF
Sri Gargeshwari Digital Foundation

ब्रह्मणः देशकालाभ्यामपरिच्छिन्नत्वेन देशकालयोरपि अपरिच्छेदसिद्धिरित्याह ॥ब्रह्मेति ॥

नन्वत्रदेशोनास्तिइदानींकालोनास्तीतिप्रतीत्यादेशकालयोर्देशांतरादावसत्त्वरूपंपरिच्छिन्नत्वंनोच्यते येनव्याहतिःस्यात् किंतु ब्रह्मकुत्रचित्कदाचिद्देशकालौविनास्तीति । तथाचयत्रयदाब्रह्मास्तितत्रतदादेशकालयोरभावप्राप्त्यादेर्देशांतरादावसत्त्वरूपपरिच्छेदसिद्धिरित्यतआह ॥ ब्रह्मेति ॥ कुत्रचित्कदाचिच्छब्दाभ्यांदेशकालौनिर्दिश्यपुनस्तौविनाब्रह्मास्तीत्यभिधानेव्याघातइत्यर्थः । किंचदेशकालयोर्देशांतरादावसत्त्वरूपपरिच्छेदनिरूपणार्थमपिदेशकालयोरपरिच्छेदसिद्धिरित्याह ॥ देशकालयोरिति ॥ देशादेर्देशांतरादावसत्त्वरूपंपरिच्छिन्नत्वंवदतायदुपाधौदेशकालौवर्तेतेतदुपाधौतयोर्निषेधेविरोधापत्त्यादेशकालयोर्निषे (58)

1 ब्रह्मकुत्रचित्कदाचिद्देशंकालंचविनास्तीत्यस्यापिव्याहतत्वाच्च । देशकालयोः
स्वोपाधौनिषेधेविरोधेनाविरोधायनिषेधोपाधितयादेशकालांतरयोरावश्यकत्वाच्च ।

धोपाधिभूतावन्यौसत्यभूतौदेशकालौदेशांतरादावसत्त्वरूपपरिच्छेदशून्यावपरिच्छिन्नावेववक्तव्यौ । तयोरपिपुनर्देशांतरादावसत्त्वरूपपरिच्छेदवत्त्वेपुनस्तयोर्यदुपाधौतौदेशकालौवर्तेतेतदुपाधावेवतयोर्निषेधेविरोधापत्त्यापुनस्तयोर्देशकालयोर्निषेधाधिष्ठानभूतावन्यौदेशकालौसत्यभूतौअपरिच्छिन्नावेववाच्यावित्येवमनवस्थास्यादतस्तद्धीत्याकयोश्चिद्देशकालयोर्देशांतरादावसत्त्वरूपपरिच्छेदाभावरूपमपरिच्छिन्नत्वमंगीकार्यमतोसिद्धिरितिभावः । ननुदेशांतरादावसत्त्वरूपंपरिच्छिन्नत्वंनोच्यते । येनैतन्निषेधाधि(करण)ष्ठान(भूत)तयादेशकालांतरयोस्सत्यभूतयोरपरिच्छिन्नयोःस्वीकारापत्तिः । किंनाम(अंतरपदंविहाय)देशादावस

SGDF
Sri Gargeshwari Digital Foundation

स्त्वमेवदेशादिपरिच्छिन्नत्वमित्युच्यते । इदंचदेशेकालेचास्ति देशस्वरूपेदेशस्यावृत्तित्वात् कालस्वरूपेचकालस्यावृत्तेः । अन्यथाऽऽत्माश्रयात् । अतोदेशादौनिषेधरूपपरिच्छिन्नत्वसद्भावेननासिद्धिरित्यतआह ॥ देशइति ॥ स्वनिर्वाहकतयेति ॥ स्वस्मिन्स्वस्याधाराधेयभावघटकतयेत्यर्थः । नात्माश्रयदोषेणदेशकालयोःस्वस्वरूपेऽवृत्तिर्वाच्या । प्रमेयत्वादिवदभेदेनसंबंधेनस्वस्मिन्नपिवृत्तेःप्रामाणिकत्वात् । तथाचदेशकालयोर्देशादावसत्त्वरूपंपरिच्छिन्नत्वमप्यसिद्धमितिभावः । प्रतिज्ञातामज्ञाने हेत्वसिद्धिमुपपादयति ॥ अज्ञानस्येति ॥ अपरिच्छिन्नत्वोपपादनायसर्वगतेत्युक्तं । (सर्वगत)अपरिच्छिन्नदेशकालोपादा(नं

देशस्सर्वत्रास्तिकालस्सदास्तिपूर्वःकालइत्याद्यबाधितप्रतीत्यातयोःस्वनिर्वाहकतयाप्रमेयत्वादिवत्स्वसंबंधसंभवाच्च।अज्ञानस्यचसर्वगतदेशकालोपादानत्वेनसर्वगतंब्रह्मप्रतिविषयसंबंध्यावरणत्वेनचदेशादिपरिच्छेदायोगात् ।

चाज्ञानं)नत्वादज्ञानंसर्वगतमेववाच्यमिति नतस्यपरिच्छिन्नत्वमित्यर्थः । अज्ञानस्यापरिच्छिन्नत्वेयुक्त्यंतरंसर्वगतंब्रह्मेति । द्विविधमावरणंलोकेदृष्टं । एकंज्ञातृसंबंधि यथानेत्रपटलादि । एकंविषयसंबंधि यथांधकारादि । तत्रज्ञातृसंबंध्यावरणं(नेत्र)नयनपटलादिस्वयंपरिच्छिन्नमपिमहतःपर्वतादेर्दर्शनप्रतिबंधकं । तदिहाज्ञानस्यज्ञातृसंबंध्यावरणत्वेऽपरिच्छिन्नत्वंनसिध्यतीत्यतउक्तंविषयसंबंधीति । अत्रचब्रह्मणोविषयत्वात्तस्यचापरिच्छिन्नत्वात्तदावरणभूतमप्यज्ञानंअपरिच्छिन्नमेववाच्यमित्यसिद्धिरित्य

र्थः । प्रतिज्ञातांवियदादेरूप्यादेश्चप्रतिपन्नोपाधिस्थनिषेधेहेत्वसिद्धिमुपपादयति ॥ प्रतिपन्नोपाधाविति ॥ कुत्रचिदिति ॥ देशांतरादावसत्त्वरूपपरिच्छिन्नत्वेप्रोच्यमानइत्यर्थः ॥ प्रतियोगिनइति ॥ अभावाभावस्यप्रतियोगिसत्त्वव्याप्यत्वादितिभावः । संगृह्णाति ॥ तथाचेति ॥ इत्यादिश्रुतिभिः प्रमाणैः कालादिर्नपरिच्छिन्नइत्यन्वयः । नपरिच्छिन्नः कालांतरेऽसत्त्ववान्नेत्यर्थः ॥ नोचेदिति ॥ कालादेःकालांतरादावसत्त्वरूपपरिच्छिन्नत्वांगीकारेइदानींकालोनास्तीत्यादिप्रतीत्याव्याहतिर्दुर्वारेत्यर्थः । एवंकालांतरादौनिषेधएवकालादिपरिच्छिन्नत्वमित्यंगीकृत्यदूषणमुक्तं । इदानींकालादिपरिच्छिन्नत्वंनामकिमेककाला

प्रतिपन्नोपाधौनिषेधस्यचकुत्रचित्कदाचिदभावेतत्रतदाप्रतियोगिनःसत्वापातात्। तथाच । "कालादिर्नपरिच्छिन्नअग्रआसीदथामृतः । इत्यादिश्रुतिभिर्नोचेद्दुर्वाराव्याहतिर्भवेत् ।" किंचकालादिपरिच्छिन्नत्वंनतावदेककालादिमात्रेसत्वं [1]

दिमात्रेसत्त्वंवा कालांतरादावसत्त्वंवेतिविकल्प्याद्यंनिराह ॥ किंचेत्यादिना ॥ एककालमात्रइति ॥ एककालादौसत्त्वमात्रंनासत्त्वमितियोज्यं । एवमुत्तरत्रापि । यथास्थितेतुएककालादिमात्रेसत्त्वोक्त्यामात्रपदव्यवच्छेद्यतयाकालांतरादावसत्त्वस्यलब्धत्वान्नापिकालांतरादावसत्त्वमितिपृथग्विकल्पानुपपत्तिरितिध्येयं । नचभवत्पक्षेपिकालांतरादावसत्त्वरूपस्यकालांतरादिपरिच्छिन्नत्वस्याग्रआसीदित्यादिश्रुतिविरोधेनदूषितत्वान्नापीतिपुनर्निषेधःकिमर्थइतिवाच्यं । दूषणांतरदानायपुनराशंक्यनिषे

तरंगिण्यां तु एककालादिमात्रे सत्त्वमित्यत्र मात्रपदमधिकं (न तु द्वयोः त्रिषु वा कालेषु सत्त्वं) इति दर्शितम् ॥ तेन नान्योन्यानुपपत्तिः ॥

SGDF Foundation

धोपपत्तेरितिध्येयं ॥ रूप्यादाविति ॥ रूप्यादेरत्यंतासत्त्वांगीकारेणैककालेसत्त्वस्याभावात्साधनवैकल्यमितिभावः ॥ त्रैका लिकनिषेधेति ॥ तद्रूपमिथ्यात्वेत्यर्थः ॥ विरोधाच्चेति ॥ एककालादौसत्त्वरूपपरिच्छिन्नत्वहेतोःत्रैकालिकसत्तानिषेधाख्य मिथ्यात्वाभावव्याप्यत्वाद्विरोधइत्यर्थः ॥ धीमात्रमिति ॥ एककालेसत्त्वेनज्ञानमात्रमित्यर्थः । एककालेसत्त्वेनज्ञानमात्रंतु रूप्यादावस्त्येव । अन्यथाप्रवृत्तिर्नस्यादितिभावः ॥ मात्रशब्देनेति ॥ सत्त्वेनज्ञानमात्रंनतुसत्त्वरूपोर्थइत्यर्थसत्त्वंमात्रपदव्य वच्छेद्यमितिभावः ॥ भ्रमोक्ताविति ॥ सत्त्वेनज्ञानमात्रं तज्ज्ञानंतुप्रमारूपंनभवति किंतुसत्त्वमस्ति । परंतुतज्ज्ञानंभ्रमरूप

रूप्यादौममासिद्धेः । तेनत्रैकालिकनिषेधसाधनेविरोधाच्च । नापितथाधीमात्रं । मात्रशब्देनै ककालादिमात्रेसत्वरूपार्थाभावोक्तौभ्रमोक्तौचप्रपंचेममासिद्धेः । प्रमाभ्रमसाधारणधीत्वसामा न्योक्तावात्मन्यपिताद्दशभ्रमसंभवेनव्यभिचारात् । व्यावहारिकप्रमोक्तौरूप्यादावभावात् ।

मिति मात्रशब्दाभिप्रायइत्यर्थः । पूर्वोत्तरपक्षयोरीतिभेदएवनत्वर्थभेदः । ज्ञानस्यभ्रमत्वेऽर्थस्यासत्त्वनियमादितिद्रष्टव्यं ॥ प्र पंचइति ॥ प्रपंचेसत्त्वांगीकारेणसत्त्वरूपार्थाभावस्वरूपमात्रपदार्थस्यतथातज्ज्ञानेभ्रमत्वस्यचानंगीकारेणासिद्धिरित्यर्थः ॥ सामान्येति ॥ सामान्यतःप्रयुक्तस्यविशेषविकल्पेननिराकरणेऽनुमानमात्रोच्छेदइत्यर्थः । यावद्विशेषातिरिक्तंसामान्यंनास्ती त्यभिप्रेत्यदूषणमाह ॥ आत्मन्यपीति ॥ ताद्दशेति ॥ एकका(लादि)लमात्रेसत्त्वेनभ्रमसंभवादितिभावः ॥ व्यावहारि

154

SGDF Sri Gargeshwari Digital Foundation

केति ॥ एककाले(लादौ)सत्त्वप्रकारकव्यावहारिकप्रमाविषयत्वंमात्रशब्दार्थइत्यर्थः ॥ रूप्यादाविति ॥ व्यावहारिकप्रमाविषयत्वाभावेनसाधनवैकल्यमितिभावः । पूर्वदूषितमपिद्वितीयपक्षंदूषणांतरदानायाशंक्यनिराकरोति ॥ नापीति ॥ कालांतरादावसत्त्वरूपंकालादिपरिच्छिन्नत्वमितोपिनोपपद्यतइत्यर्थः । कुतोनोपपद्यतइत्यतोऽतिप्रसंगादित्याह ॥ तेनेत्यादि ॥ अयमर्थः । तेनकालांतरादावसत्त्वरूपपरिच्छिन्नत्वहेतुनायथेदानीमपिस्वोपाधावसत्त्वरूपंमिथ्यात्वंसाध्यते तथावयमपिवदामः । इदानींस्वदेशकालयोःसत्त्वेनकालांतरादावपिसत्त्वं(त्वसाधनं)किंनस्यादिति । नन्विदानींसत्त्वेनकालांतरादावपिसत्त्वसाधनेभा 155

नापिकालांतरादावसत्वं । तेनस्वकालादावप्यसत्वसाधनेप्रमाणविरोधस्याविशिष्टतयास्वकालादौ सत्वेनकालांतरादौसत्वसाधनापातात् [1] । [2] रूपांतरेणासतोब्रह्मणःस्वरूपेणाप्यसत्वापाताच्च । [6]

विबाधकशंकादिरूपबाधकसद्भावान्नतत्साधनंयुक्तमितिचेत् तर्हिकालांतरेऽसत्त्वेनेदानीमप्यसत्त्वसाधनेसन्घटइत्यादिप्रत्यक्षबाधस्याविशिष्टत्वादिति । कालांतरेऽसत्त्वादिदानीमप्यसत्त्वमित्यस्यकेनचिद्रूपेणासतःप्रतीयमानस्वरूपेणाप्यसत्त्वमितिहिफलितोर्थः । तत्रातिप्रसंगमाह ॥ रूपांतरेणेति ॥ निर्धर्मकतयापारमार्थिकत्व(त्वेन)रूपेणासतइत्यर्थः । यद्वामिथ्यात्वादिरूपेणासतइत्यर्थः । किंचकालांतरेऽसत्त्वादिदानीमप्यसत्त्वसाधनेरूप्यादेर्वियदादेश्चकालांतरेऽसत्त्वादिदानीमपिस्वरूपेणासत्त्वंस्यात् । नचेष्टापत्तिः । असद्विलक्षणस्वरू(पमंगीकृत्यतदनुपमर्देन)पांगीकारात् । असद्विलक्षणस्वरूपानुपमर्देनपारमार्थिकत्वाकारेणैवनि

1 तेनाभाससाम्यं बाधो वेति भावः ॥ २ आभासान्तरसाम्यरूपमत्र योजकत्वं

SGDF Sri Gargeshwari Digital Foundation

न्यायामृ०
॥ ७९ ॥

षेधइतित्वत्सिद्धांतविरोधादित्याशयेनाह ॥ रूप्यादेरिति ॥ एतेनेति ॥ कालांतरादावसत्त्वेनेदानीमप्यसत्त्वसाधनेरूप्यादेरित्युक्तातिप्रसंगापातेनेत्यर्थः ॥ कदाचिदिति ॥ भाविबाधकदशायामित्यर्थः । तथाचतदानीमसत्त्वादिदानीमप्यसत्त्वमितिभावः ॥ शून्यवादीति ॥ तेनेदानींजगदसत्त्वांगीकारात् मायिनाचासद्विलक्षणत्वांगीकारादिदानीमप्यसत्त्वसाधनंशून्यवाद्युक्तिच्छर्दिरेवेत्यर्थः । ननुदेशपरिच्छिन्नत्वंनाम नदेशांतरेऽसत्त्वमेकदेशमात्रेसत्त्वंवाविवक्षितं येनोक्तदोषः किंत्वन्यदेवेति

रूप्यादेर्वियदादेश्चस्वकालेप्यसद्विलक्षणस्वरूपाभावापाताच्च । एतेनयत्सत्तत्सदा सर्वत्रसदेव । नहिरूपंकदाचित्कुत्रचिद्गंधोभवति । तथाचयत्कदाचित्कुत्रचिदसत्तत्सदासर्वत्रासदेवेतिवाचस्पतीयंशून्यवाद्युक्तयुक्त्युद्गिरणंनिरस्तं । ननुदेशपरिच्छिन्नत्वंसर्वमूर्तासंयोगित्वंवा परममहत्परिमाणानधिकरणत्वंवा महत्त्वानधिकरणपरिमाणाधिकरणत्वंवेतिचेन्न । आद्ययोरसंगेनिर्गुणेचब्रह्मण्यपिभावात्

तार्किकरीत्याशंकते ॥ नन्विति ॥ परिमाणाधिकरणत्वंविभुद्रव्येऽतिव्याप्तमतोमहत्त्वानधिकरणेतिपरिमाणविशेषणं । महत्त्वानधिकरणत्वमात्रंगुणेऽतिप्रसक्तमतःपरिमाणाधिकरणत्वमित्युक्तमितिद्रष्टव्यं ॥ आद्ययोरिति ॥ "असंगोह्ययंपुरुष" इतिश्रुतेःब्रह्मणोऽसंगत्वावगमात्सर्वमूर्तासंयोगित्वमस्ति । "केवलोनिर्गुणश्चे" तिश्रुतेर्ब्रह्मणोनिर्गुणत्वावगमात्परममहत्परिमाण

श्रीनिवा०
परिच्छि०
१ । ५
156
॥ ७९ ॥

रूपगुणाभावेनेनपरममहत्परिमाणाधिकरणत्वंचास्तीत्यतिव्याप्तिरितिभावः ॥ गुणादाविति ॥ गुणकर्मादौगुणानंगीकारादितिभावः । तथाचभागासिद्धिरितिभावः । लक्षणत्रयस्याप्यवकाशप्रकृत्यादावसिद्धिःस्पष्टेतिनोक्तेतिद्रष्टव्यं । कालांतरासत्त्वाख्यानित्यत्वमेवकालतःपरिच्छिन्नत्वमितिपक्षेपूर्वानुक्तदूषणांतरमाह ॥ कालेति ॥ अन्योन्याभावादावित्यत्रादिपदेननित्यभूतप्रध्वंसाभावग्रहणं । अन्योन्याभावस्याऽनित्यत्वेसर्वपदार्थानांतादात्म्यापत्तिः । प्रध्वंसस्यानित्यत्वेचप्रतियोग्युन्मज्जनापत्तिरितिहृदयं ॥ तद्धीति ॥ वस्तुतःपरिच्छिन्नत्वमित्यर्थः । किंतात्विकभेदवत्त्वंवा कल्पितभेदवत्त्वंवा धर्मिसमसत्ताकभेदवत्त्वं

अंत्यस्यगुणादावप्यभावात् । कालपरिच्छिन्नत्वमन्योन्याभावादौप्रतिवाद्यसिद्धंचनतृतीयः तद्धिभिन्नत्वं । तस्यचतात्विकस्यप्रपंचेप्यभावात् । आत्मन्यप्यनृतव्यावृत्तिस्तात्विकीतिवक्ष्यमाणत्वाच्च । कल्पितस्यत्वात्मन्यपिभावात् । धर्मिसमसत्वस्यरूप्येपिममाभावात्

वा उभयसाधारणभिन्नत्वमात्रंवा । नाद्यइत्याह ॥ तस्येति ॥ तथाचप्रपंचेत्वयातात्विकभेदवत्त्वानंगीकारादसिद्धिरित्यर्थः । आत्मन्यपिअनृतव्यावृत्तिरूपतात्त्विकभेदवत्त्वसत्त्वेनब्रह्मण्येवव्यभिचारश्चेत्याह ॥ आत्मन्यपीति ॥ नद्वितीयः । ब्रह्मण्येवव्यभिचारादित्याह ॥ कल्पितस्येति ॥ नतृतीयः । मन्मतेऽन्योन्याभावस्यधर्मिस्वरूपत्वेनासतिचधर्मिणएवाभावेनान्योन्याभावमात्रस्यैवानंगीकारेणधर्मिसमसत्ताकभेदवत्त्वंरूप्येऽसिद्धमितिसाधनवैकल्यमित्याह ॥ धर्मीति ॥ धर्मिसमसत्त्वस्येति

157

SGDF

बहुव्रीहिः । तस्येत्यनुवर्तते । अनृतव्यावृत्तेस्तात्विकत्वेनधर्मिसमसत्ताकभेदवत्त्वस्यब्रह्मणिव्यभिचारोपिद्रष्टव्यः । नचतुर्थः ।
तत्रापिकिमध्यस्ताद्भिन्नत्वंविवक्षितमुतसत्याद्भिन्नत्वं । नाद्यः । अध्यस्ताद्भिन्नत्वस्यअमिथ्यात्वेनैवव्याप्ततयासत्यत्वसाधकत्वा
द्विरुद्धत्वंस्यादित्याह ॥ भिन्नत्वेति ॥ अध्यस्ताद्भेदेन विद्यमानेननिमित्तेन नद्वितीयइत्याह ॥ सत्यादिति ॥ प्रपंचस्यमया
सत्यत्वांगीकारादितिभावः ॥ स्वानुगतेति ॥ स्वान्प्रत्यनुगतत्वेनप्रतिभासमानंयद्वस्तुतत्रकल्पिताइत्यर्थः । विभक्तत्वा दननु

भिन्नत्वमात्रस्यचाध्यस्ताद्भेदेनसत्वेप्युपपत्तेः। सत्याद्भेदस्यचासिद्धेः। एतेनयदुक्तंप्रमाण
मालायां "विवादाध्यासिताः स्वानुगतप्रतिभासेवस्तुनिकल्पिताः । विभक्तत्वात ।
यथासर्पमालादिकंस्वानुगतेरज्ज्वाइदमंशेसदर्थेचब्रह्मण्यनुगच्छतिपटादिकंविभज्यते
सन्घटःसन्पटइतिप्रतीते" रितिनिरस्तं । विभक्तत्वंहिनतावद्धिभिन्नत्वं । कादा
चित्कत्वंवा काचित्कत्वंवा । निरस्तत्वात् । नापिबाधकदशायांनिषिध्यमानत्वं

गतत्वादित्यर्थः । अननुगतंस्वानुगतेवस्तुनिकल्पितमितितदभिप्रेतोर्थः । सर्पमालादिकमित्यत्रादिपदेनबलीवर्दमूत्रग्रहणं । य
थैकस्मिन्रज्जाविदमंशेऽयंसर्पःइयंमालाअयंबलीवर्दमूत्रखंडइत्याद्यारोपदर्शनात्स्वान्सर्पादीननुगतान्प्रत्यधिष्ठानतयानुगतेर
ज्जाविदमंशेसर्पादिकंकल्पितमित्यर्थः । अनुगच्छतिसति विभज्यतेऽननुगतंभवति । तदेवदर्शयति ॥ सन्नित्यादि ॥ विभक्त
त्वादितिसामान्यतएवहेतोःकरणात्तदर्थतयाप्रसक्तपक्षानाशंक्यनिषेधति ॥ विभक्तत्वंहीति ॥ निरस्तत्वादिति ॥ आद्यस्य

SGDF
Sri Gargeshwari Digital Foundation

154

वस्तुपरिच्छिन्नत्वरूपहेतुनिरासेनद्वितीयतृतीययोःकालपरिच्छिन्नत्वदेशपरिच्छिन्नत्वरूपहेतुनिरासेननिरस्तत्वादित्यर्थः ॥ सा
ध्येति ॥ स्वानुगतप्रतिभासेवस्तुनिकल्पितत्वमपीदमेवेतिसाध्यावैशिष्ट्यमित्यर्थः ॥ सुखदुःखादीति ॥ सुखादेर्ज्ञातैकसत्त्वे
नस्वोत्पत्त्यनंतरंयावत्स्वसत्त्वंसर्वदाप्रकाशमानत्वेनकदाचिदेवप्रकाशमानत्वंनास्तीत्यर्थः ॥ अप्रयोजकत्वाच्चेति ॥ कदाचिदे
वप्रकाशमानत्वरूपंविभक्तत्वंकल्पितत्वंविनासत्यत्वेनाप्युपपन्नमित्यप्रयोजकत्वाच्चेत्यर्थः । ननुनाप्रयोजकता सत्त्वेसर्वदाप्रका
शप्रसंगेनकदाचिदेवप्रकाशमानत्वंनस्यादित्यनुकूलतर्कसद्भावादित्यतोऽत्रान्यथासिद्धिमाह ॥ युक्तोहीति ॥ सतोपिसत्यस्या

साध्यावैशिष्ट्यात् । नापिकदाचिदेवप्रकाशमानत्वं सुखदुःखा(दौभागा)दिभोगेअसि
द्धेः । अप्रयोजकत्वाच्च । युक्तोहिसतोपिप्रकाशसामग्र्याःकादाचित्कत्वेनकदाचिदेवेच्छा
दिवत्प्रकाशोपि । नाप्यननुगतत्वं । अननुगतानांघटपटादीनांचलनादौरूपादौद्रव्य
त्वादौध्वंसादावनात्मत्वादौचखपुष्पनृशृंगादीनांचासति[1]आत्मनश्चसदर्थेऽनध्यासात् ।

पिवस्तुनःइच्छादिवत्कदाचिदेवप्रकाशोपियुक्तइत्यन्वयः । प्रकाशसामग्र्याः इंद्रियार्थसंनिकर्षादिरूपायाः ॥ इच्छेति ॥ यथा
कदलीफलादेःसत्त्वेपिनसर्वदाइच्छा किंनामार्थेंद्रियसन्निकर्षजन्यज्ञानादिरूपतत्सामग्र्यांसत्यामेवतथेत्यर्थः । एवंसंभाविताान्प
क्षान्निषिध्येतःपरंपराभिप्रेतंविभक्तत्वमाशंक्यनिराकरोति ॥ नापीति ॥ कुतोनेत्यतोव्यभिचारादित्याशयेनाह ॥ अननुग
तानामिति ॥ नन्वननुगतस्यानुगतेऽध्यासोऽस्माभिःसाध्यते । तस्यचनघटादौव्यभिचारः । तत्रघटादौअननुगतत्वसद्भावे

[1] द्वितीयाभावस्य

SGDF
Sri Gargeshwari Digital Foundation

1 प्रत्येकपदकृत्यं तरंगिण्यां पश्यत ॥ अद्यापि व्यभिचारवारणायेति ॥

न्यायामृ० पिचलनादीनामनुगतत्वाभावादित्यतोघटादीनामननुगतत्वसद्भावेपिचलनादीनामनुगतत्वमुपपादयति ॥ अस्तिहीत्यादिना श्रीनिवा०
॥ ८१ ॥ ॥ आत्मासन्नित्यादीति ॥ आत्मासन्द्वितीयाभावःसन्नित्येवमात्मद्वितीयाभावयोरननुगतत्वेपिसदर्थस्यानुगमोद्रष्टव्यः । परिच्छि०
अतएवपूर्वमप्यात्मनश्चेत्यत्रद्वितीयाभावस्यचेत्यपिग्राह्यं । एवमव्याख्यानेघटपटौप्रतिचलनादिवत्सदर्थस्योभयानुगतत्वंनसि
ध्येदितिद्रष्टव्यं । किंचयद्यनेकेषामननुगतानामेकस्मिन्ननुगतेऽध्यासदर्शनात्प्रपंचस्यसदर्थेब्रह्मण्यध्यासउच्यतेतर्हिएकस्याप्यरू १।५

अस्तिहिघटश्चलतिपटश्चलतिघटोरूपीपटोरूपीघटोद्रव्यंपटोद्रव्यंघटोध्वस्तःपटोध्व
स्तःअनात्माघटःअनात्मापटःखपुष्पमसत्नृशृंगमसत् आत्मासन्नित्यादिधीः ॥ ७ ॥ 160
दृश्यतेचैकत्रानेकेषामिवैकस्यापिरूप्यस्यानेकेषुशुक्तिवंगादिष्वध्यासः। एवंचसदर्थस्यै
वघटादिष्वारोपःकिंनस्यात् । एतेनविवादाध्यासितंसद्रूपेकल्पितं । प्रत्येकंतदनु[1]
विद्धतयाप्रतीयमानत्वात्। प्रत्येकंचंद्रानुविद्धजलतरंगचंद्रवदितिब्रह्मसिद्ध्युक्तंनिरस्तं।

प्यस्यानेकेषु शुक्त्यादिष्वध्यासदर्शनादेकस्यैवसदर्थस्यब्रह्मणोनेकेषुपटादिष्वेवाध्यासःकिंनस्यादितिवैपरीत्यमेवस्यादित्याह ॥
दृश्यतेचेति ॥ वंगं सीसं ॥ तदनुविद्धतयेति ॥ सूत्रेस्यूतानांनानामणीनांसूत्रानुस्यूततयायथाप्रतीतिस्तथाघटःसन्पटःस
न्नितिसदर्थानुविद्धतयाप्रतीयमानत्वादित्यर्थः । यद्यदनुविद्धतयाप्रतीयते तत्तत्रकल्पितमितिसामान्यव्याप्तौदृष्टांतमाह ॥ ॥ ८१ ॥
प्रत्येकंचंद्रेति ॥ जलतरंगेषुप्रतिबिंबितचंद्रस्यायंचंद्रोयंचंद्रइत्यादिरूपेणगगनस्थचंद्रानुवेधोऽस्तीत्यवधेयं । ब्रह्मसिद्धि र्माया

वादग्रंथविशेषः । प्रत्येकंचलनाद्यनुविद्धत्वेनप्रतीयमानयोर्घटपटयोश्चलनादावनध्यासेनव्यभिचारादितिदूषणमेतेनेत्यतिदिश्य
दूषणांतरमाह ॥ खंडोगौरिति ॥ तत्र गोत्वे । तथाचोक्तहेतोःस्वानुविद्धतयाप्रतीयमानेगोत्वादौव्यक्तीनामकल्पितत्वात्खं
डमुंडादिव्यक्तौव्यभिचारइत्यर्थः । उक्तहेतोःस्वरूपासिद्धिमप्याह ॥ किंचेति ॥ सन्घटःसन्शब्दइत्यादिज्ञानविषयतयाप्रती
यमानेघटादौब्रह्मानुविद्ध(तयाप्रतीयमान)त्वंनास्तीतिकुतइत्यतआह ॥ रूपा(दिहीनमि)दीति ॥ रूपादीत्यादिपदेनगंधादि 161
ग्रहणं । अशब्दमस्पर्शमरूपमित्यादिश्रुतेरित्यर्थः । (नतावत्ब्रह्मचाक्षुषादिज्ञानविषयः । रूपादिहीनत्वात् । धर्मादिवत्इत्य

खंडोगौर्मुंडोगौरितिप्रत्येकंगोत्वानुविद्धस्यापिखंडादेस्त
त्रानध्यासात् । किंचरूपादिहीनमासंसारमज्ञानावृतं[1]

नुमानमुक्तंभवति । नन्विदमयुक्तं । गुणेगुणानंगीकारेणरूपादावेवव्यभिचारादितिचेत्सत्यं । रूपादिशब्दस्यमहत्त्वसमानाधि
करणोद्भूतरूपवत्त्वतद्वत्समवेतत्वादिरूपचाक्षुषत्वादिप्रयोजकधर्मपरत्वेनव्यभिचाराभावादित्यवधेयं ।) महत्त्वसमानाधिकर
णोद्भूतरूपवत्त्वतद्वत्समवेतत्वरूपचाक्षुषत्वश्रावणत्वादिप्रयोजकधर्महीनमितिव्याख्येयं । यथाश्रुतेरूपरूपत्वतदभावादिषुव्य
भिचारइतिध्येयं । तथाचब्रह्मचाक्षुषश्रावणादिज्ञानाविषयः । तत्प्रयोजकधर्मरहितत्वात् अतींद्रियवदित्यनुमानमुक्तंभवति ।
हेत्वंतरमाह ॥ आसंसारमिति ॥ तथाचब्रह्मनचाक्षुषादिज्ञानविषयः । आसंसारमज्ञानावृतत्वात् । व्यतिरेकेणघटादिवदि

1 [illegible] उक्तानुमाने मेघावृतसूर्ये व्यभिचारप्रसक्तिः । आवरणापगमं[illegible] आसंसारमिति विशेषणं ॥

SGDF

त्यनुमानमुक्तंभवति । घटादौसंसारप्रसक्तेरेवाभावेनहेत्वभावोऽस्तीतिज्ञातव्यं । विमुक्तिकालीनेब्रह्मचैतन्येस्वरूपासिद्धिवार णायाऽऽसंसारमित्युक्तं । व्यतिरेकेणघटादिर्दृष्टांतः । तत्रसंसारप्रसक्तेरेवाभावेनहेत्वभावस्यसत्त्वादितिद्रष्टव्यं । हेत्वंतरमाह ॥ शब्दैकेति ॥ ब्रह्मनचाक्षुषादिज्ञानविषयः शब्दैकसमधिगम्यत्वाद्धर्मादिवत् व्यतिरेकेणघटादिवच्चेत्यनुमानंद्रष्टव्यं । ननुचा क्षुषादिज्ञानेतावत्सन्घटइत्यादिप्रतीयते । सच्चब्रह्मैवेतिअनुमानानांबाधइतिचेन्न । सत्तुब्रह्मनभवत्येव । तर्हिकिमितिपृच्छति ॥ किंत्विति ॥ उत्तरयति ॥ अनित्यइति ॥ ननुरूपादिराहित्याद्युक्तहेतुत्रययुक्तस्यापिब्रह्मणश्चाक्षुषेज्ञानेभानमस्तु कथमितिचे

शब्दैकगम्यंब्रह्मसन्घटःसन्शब्दइत्यादिचाक्षुषादिज्ञानेनभाति । किंत्वनित्योघटइत्यादौअ नित्यत्वादिकमिवसत्वमपिघटगतमेव । नचस्वरूपेणाप्रत्यक्षस्यापिराहोश्चंद्रावच्छेदेनेवब्रह्मणो पिघटाद्यवच्छेदेनप्रत्यक्षतेतियुक्तं । शब्दाद्यवच्छिन्नस्यगगनादेःश्रावणादित्वापातात् ।

त् व्यंजकविशेषसमवधानादितिवदामः । यथाहिरूपादिरहिततयास्वरूपेणप्रत्यक्षायोग्यस्यापिराहोःप्रत्यक्षीभूतचंद्रसंबंधोयदा तदोपरागकालेचंद्रावच्छेदरूपव्यंजकसमवधानेनप्रत्यक्षत्वंदृष्टं । एवंस्वरूपेणरूपादिरहिततयाप्रत्यक्षायोग्यस्यापिब्रह्मणःप्रत्य क्षीभूतघटाद्यवच्छेदरूपव्यंजकसमवधानेनप्रत्यक्षत्वोपपत्तेरित्यप्रयोजकतामाशंक्यनिषेधति ॥ नचेति ॥ कुतोनचेत्यतोतिप्र संगानाह ॥ शब्दादीति ॥ तथात्वेस्वरूपेणाश्रावणस्यापिगगनस्यशब्दसंबंधोयदातदाश्रावणीभूतशब्दावच्छेदेन तस्यापिश्रा

SGDF
Sri Gargeshwari Digital Foundation

वणत्वंस्यादित्यर्थः । एवंस्पर्शावच्छेदेनवायोरपिस्पार्शनत्वंस्यादित्याद्यतिप्रसंगआदिशब्दार्थः । ननुराहोरिवोपपत्तिरित्युक्तमि तिचेन्न । स्यादिदं यदिराहोःस्वरूपेणरूपादिरहिततयाप्रत्यक्षायोग्यत्वंस्यात् । नचैवं । नीलरूपांगीकारेणचाक्षुषतायास्सत्त्वा त् । तर्हिकस्मान्नदृश्यतइतिचेत् दूरस्थत्वादिदोषयुक्तत्वात् । ननुतर्हिदूरस्थत्वादिदोषयुक्तत्वादेवराहुप्रतीतिःकदापिनस्यादि तिचेन्न । राहुमंडलस्यदूरस्थत्वेपिपर्वणिचंद्रंग्रसितुंयदातत्संबद्धंभवति तदानीलरूपवतोराहोःशुक्लभास्वररूपोपेतचंद्रसंबंधाच्चा क्षुषत्वोपपत्तेः । लोकेनीलस्यवस्तुनोदूरस्थस्यापिसौरादिप्रकाशसंबंधेनचाक्षुषतायाअनुभवसिद्धत्वात् । प्रकृतेचब्रह्मणोरूपादि

राहोस्तुदूरदोषेणाज्ञातस्यनीलस्यशुक्लभास्वरचंद्रसंबंधाच्चाक्षुषतायुक्तेति ॥ ७ ॥ इ तिपरिच्छिन्नत्वहेतुभंगः ॥ ७ ॥ ९ ॥ अंशित्वादिहेतुष्वपिमतद्वयेपिकार्यस्यकारणाभे देनतदनाश्रितत्वात्सिद्धसाधनं । अनाश्रितत्वेनान्याश्रितत्वेनवोपपत्त्यार्थांतरंच ।

रहितत्वेनप्रत्यक्षायोग्यतयाचाक्षुषादिज्ञानेभानायोगात्सदनुविद्धतयाप्रतीयमानत्वंविवादाध्यासितेघटादौस्वरूपासिद्धमित्याशये नाह ॥ राहोस्त्विति ॥ तथाचप्रत्यक्षायोग्यस्यापीत्युक्तमसदितिभावः ॥ ७ ॥ इतिपरिच्छिन्नत्वहेतुभंगविवरणं ॥ ९ ॥ मतद्वयेपीति ॥ आवयोर्मतइत्यर्थः ॥ कार्यस्येति ॥ कार्यकारणयोरभेदेनआश्रयाश्रयिभावानंगीकारात्एतत्तंतोरेवपटत्वेनै तत्तंतुनिष्ठात्यंताभावप्रतियोगित्वंसिद्धमितिसिद्धसाधनमितिभावः ॥ अनाश्रितत्वेनेति ॥ अन्यत्रानाश्रितत्वंसिद्धमेवास्ति

163

SGDF
Sri Gargeshwari Digital Foundation

एतत्तंतुष्वपिनास्तीत्युक्तेऽनाश्रितत्वेनाप्युपपत्तेः । अथवाविशेषनिषेधःशेषविध्यनुज्ञापकइतिन्यायेनएतत्तंतुष्वसत्त्वेऽन्याश्रितत्वमेवसिद्ध्येन्नमिथ्यात्वमित्यर्थः । अर्थांतराभावमाशंक्यनिषेधति ॥ यदिचेति ॥ अनाश्रितत्वेऽन्याश्रितत्वेवाप्रत्यक्षबाधः । एतत्तंत्वारब्धःपटस्तावत्प्रत्यक्षः । अंशित्वंचहेतुः । तत्रांशित्वंनामांशवत्त्वं पटस्यांशाश्चतंतवएव तद्वत्त्वंचाश्रयाश्रयिभावसंबंधेनैव । एवंचांशित्वहेतुर्यदाएतत्पटेप्राप्तस्तदैतत्पटस्यनानाश्रितत्वादिकमित्यर्थः । असत्त्वमत्यंताभावप्रतियोगित्वं । एतत्तंतुष्वसत्त्वसाधनेपिप्रत्यक्षबाधात्उक्तरीत्यांशित्वहेतोःपक्षधर्मताबलाद्वाएतत्तंतुष्वप्यसत्त्वंनसाधयितुंशक्यमित्यर्थः । उक्तमप्यधिक

यदिचप्रत्यक्षबाधादेतत्तंत्वारब्धस्यपक्षत्वेनपक्षधर्मताबलाद्वानानाश्रितत्वादिकं । तर्हिततएवैतत्तंतुष्वपिनासत्वं । अपिचात्यंताभावःप्रामाणिकोप्रामाणिकोवा[1] । आद्येऽद्वैतहानिः । अंत्ये सिद्धसाधनं । एतेनात्यंताभावमात्रंसाध्यमितिनिरस्तं । अत्यंताभावोव्यावहारिकइतितुनिरस्तं ।

विवक्षयाह ॥ अपिचेति ॥ प्रामाणिकइत्यादि ॥ प्रामाणिकात्यंताभावप्रतियोगित्वंवासाध्यमप्रामाणिकात्यंताभावप्रतियोगित्वंवेत्यर्थः ॥ एतेनेति ॥ यावद्विशेषातिरिक्तसामान्याभावेनेत्यर्थः । व्यावहारिकात्यंताभावप्रतियोगित्वंसाध्यतइतिचेत्तत्राह ॥ अत्यंताभावइति ॥ प्रतियोगितदभावयोर्वैलक्षण्यस्यावश्यकत्वेनात्यंताभावस्यव्यावहारिकत्वेतत्प्रतियोगिनोप्रातिभासिकस्यजगतःपारमार्थिकत्वंस्यादित्येवंनिरस्तमित्यर्थः । ननुप्रामाणिकात्यंताभावप्रतियोगित्वमेवसाध्यते तथात्वेऽद्वैतहानिः ॥ ८३ ॥

[1] प्रामाणिकत्वं पारमार्थिकत्वं । अप्रामाणिकत्वं प्रातिभासिकत्वं । अन्यथा विलक्षणेऽधिष्ठानचैतन्यविषयत्वरूपप्रामाणिकत्वस्य तन्नाभावे सत्त्वेऽपि अद्वैतहान्यभावापत्तेः । तरंगिणी ॥

स्यादितिचेन्न । कुतइत्यतआह ॥ अभावरूपाइति ॥ नेहनानेत्यादिश्रुतीनांभावद्वैतनिषेधपरत्वमेवेतिभावः । अभावस्यद्वितीयस्यांगीकारेद्वितीयभावोप्यवर्जनीयइत्याह ॥ अभावइति ॥ तदाश्रयइति ॥ अभावस्यसाधिकरणत्वादभावाश्रयेब्रह्मणिअभावाश्रयत्वंआदिपदेनअभावेतदाश्रितत्वमित्यादिभावरूपबहुधर्मांगीकारापत्तिरित्यर्थः । ब्रह्मणीवाऽभावेपिव्यावहारिकाधर्मास्संत्येवेतिनानिष्टमेतदित्यस्वरसादाह ॥ अभावरूपेति ॥ अद्वितीयादीत्यादिपदेननिर्गुणनिराकारादिशब्दग्रहणं । अत्रकिंचित्प्रष्टव्यं । त्वन्मतेब्रह्मणःकस्मात्सर्वशब्दावाच्यत्वमंगीकृतमिति । शब्दप्रवृत्तिनिमित्तभूतानांद्रव्यगु(णकर्माभावा)णा

नन्वभावरूपाधर्मानाद्वैतंघ्नंतीतिमंडनोक्तेरभावद्वैतंस्वीकृतमितिचेन्न । अभावेअभावत्वादेस्तदाश्रयेचाभावाश्रयत्वादेःभावस्यावश्यकत्वात् । अभावरूपप्रवृत्तिनिमित्तसंभवेनब्रह्मणोऽद्वितीयादिशब्दवाच्यत्वापातात् । अखंडार्थेनवेदांतेनब्रह्माभावयोर्द्वयोरसिद्धेश्च ।

दीनांनिर्धर्मकेब्रह्मण्यभावादितिचेत् तर्हिब्रह्मणो[2]द्वितीयादिशब्दवाच्यत्वंस्यात् । द्वितीयाभावरूपप्रवृत्तिनिमित्तस्यप्रामाणिकस्यब्रह्मणिसद्भावादित्यर्थः । किंचतात्विकेद्वितीयाभावेप्रमाणाभावेनतस्यासिद्धेश्च । ननुकथमसिद्धिः । "एकमेवाद्वितीय"मित्यादिवेदांतेनैवतत्सिद्ध्युपपत्तेरितिचेत्तत्राह ॥ अखंडार्थेनेति ॥ अयमर्थः । वेदांतानांलक्षणया ब्रह्ममात्रप्रतिपादकत्वरूपाखंडार्थत्वांगीकारेणाभावाप्रतिपादकत्वात्तदसिद्धिरेवस्यात् । ननुस्वातंत्र्येणाभावाप्रतिपादकत्वेपिब्रह्मविशेषणत्वेनतत्प्रतिपादकत्वं

[2] न तस्य प्रामाणिकत्वं इति ज्ञेयः

SGDF Foundation

भविष्यतीतिचेन्न । तथापिनिर्विशेषार्थनिष्ठत्वरूपाखंडार्थत्वहानिरेवेतिनवेदांतेनतत्सिद्धिरिति । व्यासज्यवृत्त्यभावाभिप्रायेण द्वयोरित्युक्तं । तथाप्यागमातिरिक्तप्रमाणेनतत्सिद्ध्युपपत्तिरितिचेत्तत्राह ॥ अन्यस्यचेति ॥ आगमातिरिक्तयोःप्रत्यक्षानुमान योरतत्वावेदकत्वात्तत्वावेदकंप्रमाणमागमएवेतिवाच्यं । तेनचतत्सिद्धिर्नसंभवतीत्युक्तमित्यर्थः ॥ श्रौतेति ॥ अयमत्रकक्षा क्रमः । ब्रह्मव्यतिरिक्तंद्वितीयाभावंप्रामाणिकमंगीकुर्वतात्वयाब्रह्मव्यतिरिक्तस्यसर्वस्याभावबोधिकायाः"एकमेवाद्वितीय" मि त्यादिश्रुतेरभावव्यतिरिक्तद्वितीयभावमात्रनिषेधपरत्वेनसंकोचःकार्योनत्वभावरूपद्वितीयनिषेधपरत्वेनेत्युच्यते तत्रवदामः ।

अन्यस्यचतत्वावेदकस्याभावात् । श्रौताद्वितीयपदस्याभावरूपद्वितीयनिषेधइव
भावरूपद्वितीयनिषेधेपिमानांतरेणाग्रइतिस्वपदेनचविरोधाविशेषेभावरूपद्विती
यनिषेधपरत्वेनैवसंकोचोनत्वभावरूपद्वितीयनिषेधपरत्वेनेत्यत्रहेत्वभावाच ।

अद्वितीयमित्यत्रब्रह्मव्यतिरिक्तंभावरूपंद्वितीयमस्ति अभावरूपंद्वितीयमेवनास्तीत्यपिसंकोचःक्रियतां विशेषहेत्वभावात् । न न्वस्तिविशेषहेतुः । तात्विकद्वितीयाभावंबोधयताऽद्वितीयपदेनपुनरभावनिषेधेस्वविरोधः । "यत्तदद्रेश्य" मितिमानांतरेण चविरोधः । तत्राभावरूपधर्मप्रतिपादनात् अतोभावरूपद्वितीयनिषेधपरत्वेनैवसंकोचःकर्तव्यइतिचेत् तर्हिभावरूपद्वितीयमा त्रनिषेधेप्यग्रआसीदित्यादिकालसत्त्वप्रतिपादकेनस्ववाक्यांतर्गतपदेनविरोधः । सन्घटइत्यादिप्रत्यक्षरूपमानांतरेणचविरोधः

166

SGDF
Sri Gargeshwari Digital Foundation

विजयीन्द्रतीर्थीये तु "अभावप्रतियोगित्वमित्यत्र अभावशब्देन अभावव्यवहारालम्बनं विवक्षितं सप्तमपदार्थो वा? नाद्य भावस्याऽपीति ॥ द्वितीयेऽपि अन्योन्याभावो वा संसर्गाभावो वा? नाद्य इत्याह ॥ अभेदस्यापीति । न द्वितीय इत्याह ॥ प्रध्वंसादेरिति ॥ भेदस्यापीति ॥ पारमार्थिकाभावप्रतियोगित्वस्यैव मिथ्यात्वे तन्त्रत्वादिति भाव" इति व्याख्यातम् ॥

?

समानएवेति(भावरूपपदार्थमंगीकृत्याभावरूपपदार्थनिषेधपरत्वेनस्वतंत्रभावनिषेधपरत्वेनवासंकोचःक्रियतामिति)भावाभावरूपं पदार्थमंगीकृत्यभावरूपपदार्थएवस्वतंत्रभावनिषेधपरत्वेनैवसंकोचःक्रियतामिति । अभावस्यसत्यत्वांगीकारे(सत्यत्वज्ञानत्वानं तत्वादिरूपस्य)भावमात्रस्यापिसत्यत्वंलब्धं सर्वस्यापिभावस्यस्वाभावाभावत्वेनाभावरूपत्वादित्याह ॥ भावस्यापीति ॥ अभावस्यैवसत्यत्वमंगीकृत्याभावप्रतियोगित्वमात्रेणमिथ्यात्वांगीकारेबाधकमाह ॥ अभेदस्येति ॥ अन्योन्याभावरूपभेदप्रतियोगित्वेनेत्यर्थः । तादात्म्यप्रतियोगिकाभावस्यैवान्योन्याभावत्वादितिभावः । अभावस्यसत्यत्वांगीकारेभेदस्यसत्यत्वंसिद्ध्यती 167

[1]भावस्यापिस्वाभावाभावत्वाच्च । अभेदस्याप्यन्योन्याभावप्रतियोगित्वे नतत्सत्यत्वासिद्धेश्च । भेदस्याप्यन्योन्याभावत्वेनतत्सत्यत्वापत्तेश्च । प्रध्वंसादेःप्रतियोगिनासहविरोधायस्वतुल्यसत्वप्रतियोगिसापक्षत्वाच्च ।

त्याह ॥ भेदस्यापीति ॥ अन्योन्याभावत्वेन अन्योन्याभावरूपत्वेन । अभावस्यसत्यत्वांगीकारेभावस्यापिसत्यत्वंप्राप्तमित्याह ॥ प्रध्वंसादेरिति ॥ अभावस्यप्रतियोगिनासहतावद्विरोधोस्ति । सचतुल्यसत्ताकयोरेव नभिन्नसत्ताकयोः तथात्वेप्रातिभासिकघटव्यावहारिकतदभावयोर्विरोधापत्तेः । तथाचप्रकृतेप्रध्वंसाद्यभावतत्प्रतियोगिनोर्विरोधायप्रतियोगिनोभावसमसत्ताकत्वमवश्यंवाच्यमेव । अतोऽभावस्यपारमार्थिकत्वेनतत्प्रतियोगिनोभावस्यापिपारमार्थिकत्वापत्तिरित्यर्थः । अभावस्यसत्यत्वां

SGDF
Sri Gargeshwari Digital Foundation

गीकारेऽन्यदप्यनिष्टमापतितमित्याह ॥ भावत्वेति ॥ सर्वस्यापिभावस्यत्वयासत्त्वेनवाभावत्वेनवाऽन्येनवाकेनापिप्रकारेणनि र्वक्तुमशक्यत्वादेवहिअनिर्वचनीयत्वंस्वीकृतं सत्यत्वेकेनापिप्रकारेणनिर्वक्तव्यत्वापत्तेस्तच्चाशक्यं एवमेवाभावेअभावत्वानिर्वच नेतस्यानिर्वचनीयत्वप्राप्त्यापारमार्थिकसत्यत्वासंभवेनतदर्थमभावत्वादिनिर्वचनेमहाप्रयासस्तवस्यात् तच्चत्वयानिर्वक्तुमशक्यं अतस्तस्याप्यनिर्वचनीयत्वापातेनसत्यत्वंनस्यादितिभावः । अभावत्वप्रकारकप्रमांप्रतिविशेष्यत्वमभावत्वमित्यस्यात्माश्रयदुष्ट त्वात्,प्रतियोगिज्ञानाधीनज्ञानविषयत्वादेस्तार्किकरीत्यासमवायेऽस्मद्रीत्यासादृश्येचातिव्याप्तत्वादित्यादिद्रष्टव्यं । अभावस्य

भावत्वानिर्वचनेभावस्यैवाभावत्वानिर्वचनेऽभावस्यापिसत्वासिद्धेरभावेसत्वार्थंतवाप्यभावत्वादिनिर्व च(ने)नप्रयासापाताच्च । अभावेदृश्यत्वादेर्व्यभिचारस्य(वा)चाभाववद्भावस्यापिसत्यत्वेपिदृश्यत्वोपप त्त्याअप्रयोजकत्वस्य(वा)चापाताच्चाअभावस्यप्रतियोगिघटितत्वेनभावादपिविशिष्याद्वैतविरोधित्वाच्च।

सत्यत्वांगीकारेदृश्यत्वानुमानंचदुष्टंस्यादित्याह ॥ अभावइति ॥ नन्वभावव्यतिरिक्तत्वेसतीतिविशेषणंदीयतइतिचेत्तत्राह ॥ अभाववदिति ॥ यथाऽभावेविद्यमानोपिहेतुर्नतत्रमिथ्यात्वप्रयोजकोजातः किंतुतद्व्यतिरिक्तस्थलएवेत्युच्यते एवंपक्षेविद्य मानोपिहेतुःसाध्येप्रयोजकोनस्यादित्यप्रयोजकइत्यर्थः । यत्रव्यभिचारेप्राप्तेतद्व्यतिरिक्तत्वेसतीतिविशेषणंदीयतेतत्रसर्वत्राप्यन यैवरीत्याऽप्रयोजकतैवदेयेतिसंप्रदायः ॥ प्रतियोगिघटितत्वेनेति ॥ प्रतियोगिनिरूप्यत्वेनेत्यर्थः । ब्रह्मव्यतिरिक्तस्यभाव

स्यसत्यत्वांगीकारेऽद्वैतविरोधस्त्वयादीयते तदपेक्षयापितवैवविशिष्याद्वैतविरोधःस्यात् ब्रह्मव्यतिरिक्तस्यद्वितीयाभावस्यसत्य त्वांगीकारेतस्यप्रतियोगिनिरूप्यत्वेनप्रतियोगिभूतभावरूपद्वितीयस्यापिसत्यत्वापत्त्याभावाभावद्वयस्यसत्यत्वांगीकारोविशिष्या द्वैतविरोधीत्याशयः ॥ निरस्तत्वादिति ॥ एतत्तंतुनिष्ठात्यंताभावप्रतियोगित्वंनस्वरूपेण अनंगीकारात् नापिपारमार्थिकत्वे न । ब्रह्मवत्सत्यत्वेप्युपपत्त्यार्थांतरादितिनिरस्तमित्यर्थः । एतच्चमिथ्यात्वनिरुक्तिदूषणप्रस्तावेउक्तमपिअनुमानदूषणायात्रोच्य

किंचात्यंताभावप्रतियोगित्वंस्वरूपेणवा पारमार्थिकत्वेनवा । नोभयमपि निरस्त त्वात् ॥ अन्या(न्यत्रा)समवेतस्यांशित्वमेतत्तंतुसमवेतत्वंविना(ऽनुपपन्नमि)नयुक्तमि तिविरुद्धश्च । कस्यचित्पटस्यसंयोगवृत्त्याएतत्तंतुषुसत्त्वादनैकांतिकश्च । समवायवृ त्त्याएतत्तंतुष्वसत्त्वंतुविशेषणासत्वेनापियुक्तं । इहतंतुषुपटइतिप्रत्यक्षबाधितश्च ।

तइत्यपौनरुक्त्यं । अंशित्वहेतोर्विरुद्धानैकांतिकबाधसत्प्रतिपक्षोपाध्याभाससाम्यानिक्रमेणदर्शयिष्यन्विरुद्धत्वंतावदाह ॥ अ न्यासमवेतस्येति ॥ अंशित्वंतंतुरूपांशवत्त्वं तच्चाश्रयाश्रयिभावसंबंधेनैव नान्यथा एवंचान्यासमवेतत्वेनसिद्धस्यपटादेरं शित्वंएतत्तंतुसमवेतत्वंविना(ऽनुपपन्नं)नयुक्तं । तथाचांशित्वरूपहेतोरेतत्तंतुनिष्ठात्यंताभावप्रतियोगित्वरूपसाध्येनविरोधइत्य र्थः । साध्याभावोपपादनायसंयोगवृत्त्येत्याद्युक्तं ॥ समवायवृत्त्येति ॥ तथाचसाध्यस्यापिसत्त्वान्नपूर्वोक्तोव्यभिचारइतिध्ये

SGDF Foundation

यं ॥ विशेषणासत्त्वेनेति ॥ समवायस्यैवाप्रामाणिकत्वादितिभावः ॥ अप्रसिद्धेति ॥ एतत्तंतुनिष्ठात्यंताभावप्रतियोगित्वा भावोह्येतत्तंतुषुसत्त्वं तच्चपक्षादन्यत्रकुत्राप्यप्रसिद्धमित्यर्थः । नचतंतुगतरूपादौविशेषणंप्रसिद्धमितिवाच्यं । अत्रहिएतत्तंतुनिष्ठेतत्पटमात्रस्यैवनपक्षत्वं किंनामैतत्तंतुनिष्ठतयासंप्रतिपन्नायेपदार्थाःपटतद्गतरूपादयस्तेसर्वेपिपक्षत्वेनाभिम(संहि)ताएवप्रटसमानन्यायत्वादतोनतत्रविशेषणप्रसिद्धिर्युक्तेतिहृदयं । पटमात्रपक्षीकरणंतुलाघवायेतिज्ञेयं । तथाचपटादिरित्यर्थः । सामान्यतःप्रसिद्धिरस्तीत्याह ॥ एतत्तंत्विति ॥ किंचिदिति ॥ यन्निष्ठात्यंताभावप्रतियोगितत्एतत्तंतुनिष्ठात्यंताभावप्रतियोगित्वर

अयंपटःएतत्तंतुनिष्ठात्यंताभावप्रतियोगीन । एतत्तंत्वारब्धत्वाद्व्यतिरेकेणपटांतरवदितिसत्प्रतिपक्षश्च । नचाप्रसिद्धविशेषणता । एतत्तंतुनिष्ठात्यंताभावप्रतियोगित्वंकिंचिन्निष्ठात्यंताभावप्रतियोगिसंसर्गाभावप्रतियोगित्वव्याप्यत्वात् ।

हितमेवाऽऽयास्यतीतिभावः ॥ संसर्गाभावेति ॥ अत्राभावप्रतियोगित्वाभावादित्युक्तेअन्योन्याभावप्रतियोगित्वदशायांघटादौव्यभिचारःस्यात् अन्योन्याभावप्रतियोगित्वदशायांअत्यंताभावप्रतियोगित्वव्यवहाराभावेनसाध्याभावात् अतःसंसर्गाभावेत्युक्तं । तावत्युक्ते(स्वरूपा)ऽसिद्धिः दृष्टांतेसाधनवैकल्यंचस्यात् । पक्षीभूतमत्यंताभावप्रतियोगित्वंदृष्टांतीकृतंप्रागभावप्रतियोगित्वंचसंसर्गाभावप्रतियोगित्वव्याप्यमेवनतुसंसर्गाभावप्रतियोगित्वरूपमेवतदुभयं । नहिनीलघटत्वंघटत्वंचैकमेवेत्यतोऽ

SGDF
Sri Gargeshwari Digital Foundation

सिद्धिसाधनवैकल्यपरिहारायव्याप्यत्वादित्युक्तमितिद्रष्टव्यं ॥ साध्येति ॥ संयोगस्याव्याप्यवृत्तित्वेनस्वात्यंताभावसमानाधिकरणत्वादेतत्तंतुनिष्ठात्यंताभावप्रतियोगित्वरूपंसाध्यमस्तीतिद्रष्टव्यं ॥ स्वेति ॥ यदधिकरणावच्छेदेनस्वयमस्तितदधिकरणावच्छेदेनस्वयमस्तीतितत्रसाध्यमेवनास्तीतिभावः । अव्याप्यवृत्तित्वमंगीकृत्याप्याह ॥ द्रव्यत्वेति ॥ तथाचपक्षधर्मावच्छिन्नसाध्यव्यापकोपाधिरयमितिभावः । ननुअयंपटएतत्तंतुनिष्ठात्यंताभावप्रतियोगीअंशित्वादित्यत्रएतत्तंत्वनारब्धत्वंनोपाधिः । हेतुसाध्ययोर्व्याप्यव्यापकभावग्राहकानुकूलतर्कसद्भावेनपक्षएवसाध्यव्यापकताभंगात् । यथोक्तं । " अनुकूलेनतर्केण

> प्रागभावप्रतियोगित्ववदितिसामान्यतस्तत्सिद्धेः । एतत्तंत्वनारब्धत्वंचोपाधिः । नचैतत्तंत्वारब्ध
> संयोगेसाध्याव्यापकं । आवयोस्संयोगःस्वात्यंताभावासमानाधिकरणइतिसंमतेः । द्रव्यत्वाव
> च्छिन्नसाध्यव्यापकत्वोपपत्तेश्चउपाधिरेवप्रयोजकः । साध्यवतिब्रह्मणिउपाधिवद्धेतोरभावात् ।

सनाथेसतिसाधने । साध्यव्यापकताभंगात्पक्षेनोपाधिसंभव "इति । ततश्चानुकूलतर्कसत्त्वेसाध्येहेतुरेवप्रयोजकतयाप्राप्तोनोपाधिरित्यतआह ॥ उपाधिरेवेति ॥ साध्येउपाधिरेवप्रयोजकोनांशित्वहेतुः । कुतइत्यतआह ॥ साध्यवतीति ॥ ब्रह्मणः एतत्तंतुष्ववृत्तित्वेनैतत्तंतुनिष्ठात्यंताभावप्रतियोगित्वरूपसाध्यवतिब्रह्मणिएतत्तंत्वनारब्धत्वरूपोपाधिवत् अंशित्वाख्यहेतोरभावेनतस्मिन्सत्यभवतोंशित्वहेतोस्तस्मिन्साध्येऽप्रयोजकत्वात् अतउपाधिरेवसाध्येप्रयोजकइतिभावः । ननुहेतुसाध्ययोर्व्याप्यव्यापकभावग्राहकानुकूलतर्कसद्भावदशायांसाध्यवतिपक्षेउपाधेरभावेन पक्षएवव्यभिचारादुपाध्यभावसाध्याभावयोर्व्याप्यभा

SGDF
Sri Gargeshwari Digital Foundation

अविनाभाविं आप्यहं उपाध्यभावेन साध्याभावस्य साध्यमानत्वात् ॥

वात्साध्याभावाविनाभाव्यभावप्रतियोगित्वरूपोपाधिलक्षणाभावान्नास्योपाधित्वमित्यतआह ॥ अनुकूलतर्काभावेचेति ॥ व्यतिरेकहीनस्यापीति ॥ उपाधिव्यतिरेकसाध्यव्यतिरेकयोर्व्याप्तिहीनस्यापीत्यर्थः । अयमाशयः । स्यादेवंयद्यत्रानुकूलतर्कःस्यात् सचनहीतिवक्ष्यमाणरीत्यानास्त्येव तथाचैवमनुकूलतर्काभावेतुपक्षेसाध्यानिश्चयेनव्यभिचाराभावेनोपाध्यभाववति पक्षेसाध्याभावसद्भावादुपाधित्वंयुक्तमेव । नन्वनुकूलतर्काभावदशायांपक्षएवोभयव्यतिरेकसद्भावात्कथंव्यतिरेकहीनस्यापीत्युक्तमितिचेन्न । पक्षादन्यत्रव्यतिरेकहीनस्यापीतिव्याख्यानात् । तंतुरूपादीनांचपक्षतुल्यत्वात् । एवंचयत्रैतत्तंत्वनारब्धत्वाभावः एतत्तंत्वारब्धत्वमितियावत् । तत्रैतत्तंतुनिष्ठात्यंताभावप्रतियोगित्वाभावः एतत्तंतुषुसत्त्वमितियावत् । इत्येवमुपाधिसाध्य

अनुकूलतर्काभावेचव्यतिरेकहीनस्याप्युपाधित्वाच्च । नह्यंशित्वंसाध्यंविनानयुक्तं । उक्तहेतुनैवैतत्पटार्थक्रियाकारित्वाद्यभावस्यापिसुसाधत्वाद्दाभाससाम्यंच ।

व्यतिरेकयोःपक्षेसद्भावेपितंतुरूपादीनांपक्षतुल्यतयापक्षादन्यत्रकुत्राप्यभावेनोपाधित्वमुपपद्यतएवेति । ननुकथमत्रानुकूलतर्काभावः यद्येतत्तंतुनिष्ठात्यंताभावप्रतियोगित्वंनस्यात् तर्ह्यंशित्वंनस्यादितिहेतूच्छित्तिरूपबाधकतर्कस्यसत्त्वादित्यतआह ॥ नहीति ॥ साध्यंविनापियुक्तमेवेत्यर्थः । एतत्तंतुनिष्ठात्यंताभावप्रतियोगित्वाभावरूपापादकस्यांशवत्त्वरूपंयदंशित्वंतदभावरूपंयदापाद्यंतदभावेनैवव्याप्तत्वयातर्कस्यविरुद्धत्वापत्त्याऽनुकूलतर्कस्यदुष्टत्वेनवक्तुमशक्यतयापक्षेव्यभिचाराभावेनयुक्तमेतत्तंत्वनारब्धत्वस्योपाधित्वमितिभावः ॥ उक्तहेतुनैवेति ॥ अयंपटः एतत्पटोचितार्थक्रियाकारीन । अंशित्वात्पटांतरवदित्याभासानु

172

SGDF Sri Gargeshwari Digital Foundation

मानेनसाम्यं । अत्रबाधादिकस्यत्वदुक्तानुमानेपिसाम्यादितिभावः ॥ ज्ञानेति ॥ ज्ञानंचब्रह्मैवेतिज्ञेयं ॥ सहोपलंभेति ॥ सहोपलंभनियमेत्यर्थः । यथोक्तंबौद्धेन" सहोपलंभनियमादभेदोनीलतद्धियो;" रिति । तद्विरहस्य उपलब्धिविरहस्य ॥ तद्वि रहेति ॥ ज्ञानविरहेत्यर्थः । तथाचासिद्धिरित्यर्थः । तर्ह्युपलब्धिविरहःकिंविरहप्रयुक्तइतिप्रसंगात्पृष्टवंतंप्रत्याह ॥ उपलब्धि

173

यतुविमतंज्ञानव्यनिरेकेणासत्ज्ञानव्यतिरेकेणानुपलभ्यमानत्वादितिविद्यासागरीयंबौद्धोक्तस होपलंभयुक्त्युद्गिरणं । तत्रज्ञानाद्भेदेनानुपलभ्यमानत्वंवाहेतुः । ज्ञानविरहप्रयुक्तोपलब्धिविर हवत्त्वंवा । आद्येऽसिद्धिः । घटस्यज्ञानमितिहिधीः नतुघटोज्ञानमिति । नांत्यः । ज्ञानस्योपल ब्धित्वेनतद्विरहस्यतद्विरहाप्रयुक्तत्वात् । उपलब्धिसामग्रीविरहप्रयुक्तत्वाच्च । यत्तुविमतंमिथ्या धीकालएवान्यथाप्रमितत्वाच्चित्रनिम्नोन्नतादिवत् । भारूपवस्तुसंलग्नत्वात्सवितृछिद्रवत् । न चासिद्धिः । इदानीमेव" इदंसर्वंयदयमात्मे "तिश्रुत्याअशेषाऽनात्मनःआत्मत्वप्रमितेः । घ टादिकंस्फुरतीतिभारूपवस्तुसंलग्नत्वाच्चेतिकौमुद्युक्तं । तत्राद्येऽन्यथेत्यस्ययद्यात्मत्वेनेत्यर्थः ।

सामग्रीति ॥ चित्रेति ॥ सभायामपिचित्रभित्तौलिखितंयन्निम्नोन्नतादिकंतत् अविद्यमानमेवलिखितमस्तीतिधीकालएवद्र ष्टुरन्यथाप्रतीयतइत्यर्थः ॥ असिद्धिरिति ॥ हेतुद्वयस्यापीत्यर्थः । पक्षेहेतुद्वयस्यापिसत्त्वंक्रमेणोपपादयति ॥ इदानीमेवे

SGDF
Sri Gargeshwari Digital Foundation

ति ॥ धीकालएवेत्यर्थः ॥ सदात्मेति ॥ सन्योयमात्मातदात्मत्वेनेत्यर्थः ॥ असिद्धिरिति ॥ अस्माकंपक्षेऽसिद्धत्वादित्यर्थः ॥ व्यर्थेति ॥ प्रतिपन्नोपाधौनिषेधप्रतियोगित्वेनप्रतीयमानत्वादित्येतावतापूर्तौधीकालएवेतिविशेषणंव्यर्थमित्यर्थः । तत्त्यागेचसाध्याविशिष्टत्वादितिभावः । सवित्रादेरपिमिथ्यात्वान्नतत्रव्यभिचारइत्यस्वरसादुक्तमात्मनिचेति । तत्रभारूपवस्तुसंलग्नत्वरूपहेतोरेवाभावान्नव्यभिचारइत्यतआह ॥ तस्यापीति ॥ सवितुरात्मनश्चेत्यर्थः ॥ आद्यइति ॥ एतत्पटात्यंताभावए

तदासदात्मत्वेनप्रमितत्वस्यामिथ्यात्वव्याप्तत्वात्विरुद्धोहेतुः । यदिप्रतिपन्नोपाधिस्थनिषेधप्रतियोगित्वेनेति तर्ह्यसिद्धिः । व्यर्थविशेषणताच । द्वितीयस्तुसवित्रादावात्मनिचानैकांतिकः । तस्यापिसविताप्रकाशतेआत्मास्फुरतीतिभारूपसंलग्नत्वादितिदिक् । एतेन नवीनानामनुमानानिनिरस्तानि । आद्येसिद्धसाध(नादि)नदोषात् । द्वितीये अव्याप्यवृत्तित्वानधिकरणशब्देनावयवावृत्तित्वोक्तावचयव्यादेरपक्षत्वापातात् ।

तत्तंतुनिष्ठः एतत्पटानाद्यभावत्वात् एतत्पटान्योन्याभाववदित्याद्यनुमानइत्यर्थः ॥ सिद्धेति ॥ कार्यकारणयोरभेदेनतंतोरेव पटत्वेनस्वस्मिन्स्वस्याभावेनपटात्यंताभावस्यतंतुनिष्ठत्वंसिद्धमेवेत्यर्थः ॥ द्वितीयइति ॥ ब्रह्मप्रमान्येनेत्यादिविप्रतिपत्तिवाक्योक्तविशेषणत्रयवत्त्वेसति अव्याप्यवृत्तित्वानधिकरणंस्वसमानाधिकरणात्यंताभावप्रतियोगि अनात्मत्वात्संयोगवदितिद्वितीयानुमानइत्यर्थः ॥ अवयवावृत्तित्वोक्ताविति ॥ कथमिदंलभ्यतइतिचेदुच्यते । संयोगादिकंअव्याप्यवृत्तीत्युक्तेआश्र

SGDF
Sri Gargeshwari Digital Foundation

यंव्याप्यनवर्ततेकिंनामाश्रयैकदेशेतदवयवेस्तीतिलभ्यते । तथाचाव्याप्यवृत्तित्वंनामाऽवयववृत्तित्वं । अव्याप्यवृत्तित्वानधि
करणत्वंनामअवयवावृत्तित्वंलभ्यतइतिद्रष्टव्यं ॥ अवयव्यादेरिति ॥ अवयवरहितत्वेनतदवृत्तिनोगगनादेरेवपक्षत्वापत्त्या
वयव्यादेरवयववृत्तिनःपक्षत्वंनस्यात् । तथाचावयव्यादेर्मिथ्यात्वंनसिद्ध्येदित्यर्थः । नन्वव्याप्यवृत्तित्वंनामस्वसमानाधिकर
णात्यंताभावप्रतियोगित्वं अव्याप्यवृत्तित्वानधिकरणत्वंचस्वसमानाधिकरणात्यंताभावाप्रतियोगित्वमितिविवक्षितं नावयवावृ
त्तित्वं अतोऽवयव्यादेःपक्षत्वोपपत्तिरित्यतआह ॥ स्वेति ॥ बाधितत्वादिति ॥ तथाचस्वसमानाधिकरणात्यंताभावाप्रति

स्वसमानाधिकरणात्यंताभावाप्रतियोगित्वोक्तौचतदप्रतियोगिनितत्प्रतियोगि
त्वस्यबाधितत्वात् । अनात्मत्वस्यनिरस्तत्वाच्च । तृतीये स्वरूपेणात्यंताभावप्र
तियोगित्वेसाध्येअत्यंतासत्वापातात् ।धर्मावच्छेदेनतत्प्रतियोगित्वेसाध्येअर्थां
तरत्वात् । नित्यद्रव्याणामपिकालेसत्वेनदृष्टांतस्यसाध्यवैकल्याच्च । चतुर्थे

योगिनिविमतेस्वसमानाधिकरणात्यंताभावप्रतियोगित्वसाधनेबाधः ॥ निरस्तत्वादिति ॥ जडत्वभंगे“नतावदात्मत्वंजाति”
रित्यादिनानिरस्तत्वादितिभावः ॥ तृतीयइति ॥ “ विमतंनित्यद्रव्यान्यत् केवलान्वय्यत्यंताभावप्रतियोगि । पदार्थत्वात्
नित्यद्रव्यव” दितितृतीयानुमानइत्यर्थः ॥ धर्मावच्छेदेनेति ॥ पारमार्थिकत्वाकारेणेत्यर्थः ॥ अर्थांतरत्वादिति ॥ ब्रह्म
वत्सत्त्वेप्युपपत्त्यार्थांतरत्वादित्यर्थः ॥ नित्यद्रव्याणामपीति ॥ इदानीमाकाशइत्यबाधितप्रतीतेःसत्त्वादित्यर्थः ॥ चतुर्थइ

175

SGDF
Sri Gargeshwari Digital Foundation

ति ॥ “ आत्मत्वावच्छिन्नधर्मिताकोभेदःआत्माअनात्मानेत्येवंरूपःनपरमार्थसत्प्रतियोगिकः । अनात्ममात्रप्रतियोगिकत्वात् शुक्तिरूप्यप्रतियोगिकभेदवदि” तिचतुर्थानुमानइत्यर्थः ॥ इत्यपीति ॥ यथानपरमार्थसत्प्रतियोगिकइतिआत्मधर्मिकभेदप्रतियोगिनोऽनात्मनःपारमार्थिकत्वाभावःसाध्यते । एवंनव्यावहारिकसप्रतियोगिकइत्यपिसुसाधत्वेनआत्मधर्मिकभेदप्रतियोगिनोव्यावहारिकसत्वमपिनस्यादित्यर्थः ॥ वक्ष्यमाणेति ॥ सन्घटइत्यादिप्रत्यक्षबाधादिरूपवक्ष्यमाणदोषेत्यर्थः ॥ ७ ॥ इत्यंशित्वहेतुभंगविवरणं ॥ ६ ॥ स्वबाधकेति ॥ दिदर्शयिषितोपाध्यधिकरणंस्वशब्दार्थः । शुक्तिरूप्येदृष्टांतेमिथ्यात्वमस्ति

नव्यावहारिकप्रतियोगिकइत्यपिसुसाधत्वेनाभाससाम्यात् । वक्ष्यमाणदूषणगणग्रासाच्च ॥७॥इत्यंशित्वादिहेतुभंगः ॥६॥ सोपाधिकाश्चदृश्यत्वादयः । स्वबाधकाभिमताबाध्यदोषप्रयुक्तभानत्वस्यतदबाध्यबाधकंप्रतिनिषेध्यत्वेनाविषयत्वस्यवापक्षाद्व्यावृत्तस्यसमव्याप्तिमतो

उपाधिश्चास्ति । तथाहि । स्वशब्देनशुक्तिरूप्यंतद्बाधकत्वेनाभिमतंयन्नेदंरजतमितिज्ञानंतदबाध्योयोदोषःकाचादिस्तज्जन्यभ्रमरूपज्ञानविषयत्वेनतत्प्रयुक्तभानत्वस्यसत्त्वात् । दृश्यत्ववतिपक्षेचोपाधिर्नास्ति । तथाहि । स्वशब्देनप्रपंचः तद्बाधकत्वेनाभिमतंयद्वेदांतजन्यचरमवृत्तिरूपंज्ञानं तदबाध्यदोषप्रयुक्तभानत्वंनास्ति जगद्भ्रमनिमित्तेमायाऽविद्या(दि)रूपेदोषेस्वबाधकाभिमतबाध्यत्वस्यैवसत्त्वेनविशेषणाभावप्रयुक्तविशिष्टाभावस्यैवसत्त्वात्साधनाव्यापकइतिभवत्युपाधिः । दोषप्रयुक्तभानत्वमात्रोक्तौसाधनव्यापकतास्यादतःस्वबाधकाभिमताबाध्येतिदोषविशेषणं ॥ तदबाध्येति ॥ स्वबाधकाभिमताबाध्येत्यर्थः । तथा 176 ॥ ८९ ॥

चमिथ्यात्ववतिरूप्येउपाधिरस्ति । तथाहि । स्वबाधकाभिमतंयन्नेदंरूप्यमितिज्ञानंतदबाध्यंयद्बाधकज्ञानंस्वयमेव, स्वेनैवस्वस्याबाध्यत्वात् तत्प्रतिनिषेध्यत्वेनविषयत्वमस्ति । साधनवतिचपक्षेनास्ति । स्वबाधकाभिमतंयद्बाधकज्ञानंचरमवृत्तिरूपंतद्बाध्यबाधकंप्रत्येवनिषेध्यत्वेनविषयत्वमस्ति नतुतदबाध्यबाधकंप्रतिनिषेध्यत्वेनविषयत्वं । जगद्बाधकस्यवेदांतजन्यचरमवृत्तिरूपज्ञानस्यकतकरजोवद्वेणुसंघर्षजाग्निवच्चस्वेनैवबाध्यत्वात् । यथोक्तं । “ वेणुसंघर्षजोवह्निर्दग्ध्वाशाम्यतितद्वनं । एवंगुणव्यत्ययजोवेदःशाम्यतितद्यथे ”ति । वेदोवृत्तिज्ञानमित्यर्थः । एवंचपक्षेस्वबाधकाभिमताबाध्यबाधकंप्रतिनिषेध्यत्वेनविषयत्वंना 177

व्यतिरेकव्याप्तिमतश्चोपाधित्वात् । नचपर्वतावयववृत्त्यन्यत्वापर्वतीयवह्निसामग्रीयुक्तत्वादेरिवपक्षमात्रव्यावर्तकविशेषणवत्त्वात्पक्षेतरत्वं ।

स्तीतिविशेषणाभावप्रयुक्तविशिष्टाभावस्यसत्त्वात्साधनाव्यापकत्वमित्यर्थः । पक्षेसाधनाव्यापकतालाभायस्वबाधकाभिमताबाध्येतिबाधकज्ञानविशेषणोपादानं ॥ व्यतिरेकेति ॥ साध्याभावाविनाभाव्यभावप्रतियोगित्वस्योपाधित्वेनउपाध्यभाववतिब्रह्मणिसाध्याभावसत्त्वादित्यर्थः ॥ पर्वतेति ॥ अन्यत्वस्यकेवलान्वयित्वेनसाधनव्यापकत्वात्साधनाव्यापकत्वार्थंपर्वतावयववृत्तीत्युक्तं । नन्वथापिसाधनव्यापकत्वमेवपर्वतेपर्वतावयववृत्तिरूपाद्यन्यत्वसद्भावादितिचेन्न । अन्योन्याभावस्यप्रतियोगितावच्छेदकव्यधिकरणत्वेनपर्वतावयववृत्तित्वरूपप्रतियोगितावच्छेदकवतिपर्वतेतदन्यत्वप्रतीतेर्विरुद्धत्वेनसाधनाव्यापकत्वमेवे

SGDF Foundation

त्यवधेयं । वह्निसामग्रीयुक्तत्वस्यापिसाधनव्यापकत्वात्साधनाव्यापकत्वलाभायापर्वतीयेत्युक्तं । ननुपर्वतावयववृत्तीत्यस्यनप क्षमात्रव्यावर्तकत्वं पर्वतावयवगतरूपादिव्यावर्तकत्वात् । तथाचकथंपर्वतावयववृत्त्यन्यत्वस्यपर्वतेतरत्वमितिचेत् सत्यं । पक्ष मात्रव्यावर्तकविशेषणवत्त्वादित्यापाततः वस्तुतस्तुहेतुसाध्ययोर्व्याप्तिग्राहकानुकूलतर्कसद्भावेनसाध्यस्यपक्षेनिश्चितत्वादुपाधेः साध्यव्यापकताग्राहकानुकूलतर्काभावेपक्षएवसाध्यव्यापकताभंगात्पर्वतावयववृत्त्यन्यत्वादेर्नोपाधित्वंयथातथाप्रकृतयोरप्युपा ध्योर्मिथ्यात्वव्यापकताग्राहकानुकूलतर्काभावान्नोपाधित्वमितिशंकितुरभिप्रायः । अतएववक्ष्यमाणानुकूलतर्कैःसाध्यव्यापक

वह्निनाधूमेसाध्येआर्द्रेंधनप्रभववह्निमत्त्वादेरिववक्ष्यमाणानुकूलतर्कै
स्साध्यव्यापकत्वनिश्चयात् । बाधितेपक्षेतरत्वस्याप्युपाधित्वाच्च ।

तानिश्चयादित्यनुकूलतर्केणसाध्यव्यापकतानिश्चयंवक्ष्यतीतिद्रष्टव्यं । प्रकृतोपाध्योःपक्षेतरत्वतुल्यत्वंपरिहर्तुंअनुकूलतर्कैरुपा धेःसाध्यव्यापकतानिश्चयोस्तीत्याह ॥ वह्निनेति ॥ आर्द्रेंधनप्रभववह्निमत्त्वोपाधेःसाध्येनधूमेनव्यापकत्वग्राहक आर्द्रेंधनोत्क र्षेणधूमोत्कर्षरूपानुकूलतर्कोस्ति । एवंप्रकृतोपाध्योरपिसाध्यभूतभ्रमविषयत्वरूपमिथ्यात्वव्यापकताग्राहकोदोषोत्कर्षेणभ्रमो त्कर्षरूपानुकूलतर्कोस्ति । अतःसाध्यव्यापकत्वनिश्चयादुपाधित्वंयुक्तमित्यर्थः । साध्यव्यापकताग्राहकानुकूलतर्काभावात्पक्षेतर त्वस्योपाधित्वंनास्तीत्यंगीकृत्यानुकूलतर्कोपपादनंकृतं । वस्तुतस्तुक्वचित्पक्षेतरत्वमप्युपाधिरेवेत्याह ॥ बाधितइति ॥ तर्हिप्र

Sri Gargeshwari Digital Foundation

कृतानुमानेकथंबाधितत्वमित्यतआह ॥ इहचेति ॥ यथावह्निरनुष्णःपदार्थत्वादित्यत्रबाधेनहेतुसाध्ययोर्व्याप्तिग्राहकानुकूलतर्काभावेनपक्षेसाध्यव्यापकताभंगा(योगे)भावेनतत्रवह्नीतरत्वमुपाधिरेव तद्वदत्रापिसन्घटइत्यादिप्रत्यक्षबाधेनहेतुसाध्ययोर्व्याप्तिग्राहकानुकूलतर्काभावात्पक्षेसाध्यव्यापकत्वभंगाभावेनोक्तोपाध्योः पक्षमात्रव्यावर्तकविशेषणवत्त्वेनपक्षेतरत्वेप्युपाधित्वंयुक्तमित्यर्थः । पक्षमात्रव्यावर्तकविशेषणवत्त्वरूपपक्षेतरत्वशंकायाअविषयमुपाधिमाह ॥ यद्वेति ॥ ननुविपरीतप्रमाविषयत्वरूपोपाधेरपिदृश्यत्वहेतुनापक्षेसाध्यमानत्वेनसाधनव्यापकत्वान्नोपाधित्वमित्यतउक्तं तस्मिन्साध्यइति । नचैतददृष्टचरमित्यतो

इहचवक्ष्यमाणप्रत्यक्षादिबाधात् । यद्वायथानुकूलतर्काभावान्मित्रातनयत्वेनश्यामत्वे साध्येशाकपाकजत्वं तस्मिन्साध्येश्यामत्वमुपाधि स्तथेहापिबाध्यत्वादिरूपेमिथ्यात्वे साध्येविपरीतप्रमाविषयत्वदोषप्रयुक्तभा(?)नत्वादिकं तस्मिन्साध्येमिथ्यात्वमुपाधिरस्तु ।

यथेत्युक्तं । हेतुसाध्ययोर्व्याप्तिग्राहकानुकूलतर्काभावादित्यर्थः । मित्रातनयत्वेनैवहेतुनागर्भस्थस्यशाकपाकजत्वमपिसाध्यतेऽतःसाधनव्यापकत्वमित्यतउक्तंतस्मिन्निति ॥ इहापीति ॥ दृश्यत्वमिथ्यात्वयोरपिव्याप्तिग्राहकानुकूलतर्काभावादित्यर्थः । ननुविपरीतप्रमाविषयत्वदोषप्रयुक्तभानत्वयोरेवमिथ्यात्वेनकथमुपाधित्वमित्यतउक्तंबाध्यत्वादीति । यदानयोरुपाधित्वंतदामिथ्यात्वंबाध्यत्वादिरूपमन्यदेवोच्यतइत्यर्थः । ननुतत्रमित्रातनयत्वेनैवहेतुनायुगपदेवगर्भस्थःशामःशाकपाकजश्चेत्येवंशामत्व

S.M.S.O. SABHA LIBRARY BANGALORE NO. DATE श्री. म. वि. नायिपुरिषदीर्थसमिति

SGDF Sri Gargeshwari Digital Foundation

शाकपाकजत्वयोरुभयोरपिसाधनंक्रियते । ततश्चनपरस्परोपाधित्वंयुक्तं । एवंदृश्यत्वेनहेतुनापक्षेमिथ्यात्वविपरीतप्रमाविषयत्वयोर्मिथ्यात्वदोषप्रयुक्तभानत्वयोर्वायुगपदेवसाधनंक्रियतेऽतोनपरस्परोपाधिग्रस्तत्वमित्यतआह ॥ **युगपदिति** ॥ कथमित्यतआह ॥ **मिथ्यात्वएवेति** ॥ ननुबाध्यत्वरूपेमिथ्यात्वेपि कथंविपरीतप्रमाविषयत्वस्योपाधित्वं विपरीतप्रमाविषयत्वस्यैवबाध्यरूपत्वेनतयोरेकत्वादित्यतआह ॥ **बाधइति** ॥ यत्रेदंरजतमितिभ्रांतिपूर्वकंनेदंरजतमितिज्ञानंजायतेतद्बाधइत्युच्यते । अतएव“ पूर्वप्रसंजितान्यथाकारविलोडकंज्ञानंबाध ”इतिबाधलक्षणमाहुः । विपरीतप्रमातुनभ्रांतिपूर्विका यथामार्गेगच्छतःपुरु

युगपदुभयसाधनेत्वर्थांतरं। मिथ्यात्वएवविप्रतिपत्तेः। बाधो
भ्रांतिपूर्वकःविपरीतप्रमातुनेतितयोर्भेदः । यद्वाअधिष्ठा
नाभिमतसमसत्ताकदोषवद्धेतुजन्यज्ञानविषयत्वमुपाधिः ।

षस्यइदंरजतमितिभ्रमप्रसक्त्यभावेपिशुक्तिंदृष्ट्वाझडितिइदंरूप्यंनभवतीतिज्ञानंजायतेसाविपरीतप्रमेतितयोर्भेदइत्यर्थः । प्रमायाविपरीतत्वंचनिषेधविषयकत्वादित्यवगंतव्यं ॥ **अधिष्ठानेत्यादि** ॥ मिथ्यात्ववतिरूप्येऽधिष्ठानाभिमतशुक्तिसमसत्ताककाचादिदोषवदिंद्रियादिजन्यज्ञानविषयत्वमस्तीतिसाध्यव्यापकः दृश्यत्ववतिपक्षेउपाधिर्नास्ति प्रपंचविषयकज्ञानजनकेमायाविद्यारूपदोषेप्रपंचारोपाधिष्ठानभूतब्रह्मसमसत्ताकत्वाभावेनविशेषणाभावप्रयुक्तविशिष्टाभावस्यसत्त्वात्साधनाव्यापकत्वमित्यर्थः ।

अस्योपाधेःपक्षमात्रव्यावर्तकविशेषणवत्त्वेनपक्षेतरत्वमितिशंकावारणायउपाधौविशेषणकृत्यंदर्शयति ॥ **ब्रह्मणइति** ॥ बौद्धकल्पितायेदोषाः यदनृतंतदप्रमाणंदृष्टंयथोन्मत्तवाक्यं । अनृतंचपुत्रकामःपुत्रकामेष्ट्यायजेतेत्यादिवेदवाक्यं कृतायामपीष्टौपुत्रजन्मानुपलंभादित्येवमनृतव्याघाताद्यास्तद्वान्योहेतुर्वेदरूपकरणंतज्जन्यज्ञानविषयत्वेपिमिथ्यात्वाभावेनव्यभिचारात्समव्याप्त्यभावादित्यर्थः । विशेषणं दोषाणांविशेषणमित्यर्थः । तथाचवेदेदोषाणांबौद्धेनकल्पि(तया)तानांप्रातिभासिकत्वेनाधिष्ठाना

ब्रह्मणोपिबौद्धकल्पितदोषवद्वेदजन्यज्ञानविषयत्वात् समव्याप्त्यर्थमधिष्ठानसमस
त्ताकेतिविशेषणं । नतुपक्षव्यावृत्त्यर्थं । येनपक्षेतरत्वंस्यात् । यद्वावेदतात्पर्यविष
याद्धर्माधर्मादिरूपात्साक्षिवेद्यात्सुखदुःखादिरूपाद्वापक्षैकदेशाद्व्यावृत्तंश्रुतितात्पर्या
विषयत्वंदोषजन्यधीविषयत्वंवापक्षमात्राद्व्यावृत्तंप्रतिभासमात्रशरीरत्वंवोपाधिः ।

भिमतब्रह्मसमसत्ताकत्वाभावेनतादृशदोषवद्धेतुजन्यज्ञानविषयत्वरूपोपाधेरेवाभावेनोपाधिपुरस्सरव्याप्तौनव्यभिचारइतिभावः । पक्षव्यावृत्त्यर्थं पक्षमात्रव्यावृत्त्यर्थं । समग्रपक्षव्यावृत्तोपाधिमुक्त्वापक्षैकदेशव्यावृत्तोपाधिद्वयमाह ॥ **यद्वेति** ॥ श्रुतितात्पर्याविषयत्वस्यघटादिप्रपंचेसत्त्वेपिधर्माधर्मादिरूपपक्षैकदेशव्यावृत्त्युपपादनायवेदतात्पर्यविषयादित्युक्तं । धर्मादेःश्रुतितात्पर्याविषयत्वाभावादितिभावः । दोषजन्यधीविषयत्वस्यपरमतेघटादौसत्त्वेपिसुखदुःखादिरूपपक्षैकदेशव्यावृत्त्युपपादनायसा

SGDF

क्षीत्युक्तं । साक्षिरूपज्ञानस्यदोषजन्यत्वाभावादितिभावः । ननुदृष्टिसृष्टिपक्षेसर्वस्यापिजगतःप्रतिभासमात्रशरीरत्वेनप्रातिभासिकत्वात् साधनव्यापकउपाधिरित्यतआह ॥ **नचेति** ॥ **तवापीति** ॥ तवमतेपीत्यर्थः । कुतोनेत्यतआह ॥ **प्रतिकर्मेति** ॥ देवदत्तज्ञानस्यैवायंविषयइत्येवमादिरूपव्यवस्थेत्यर्थः । परेणहिब्रह्मरूपेज्ञानेघटादीनामध्यासाद्युगपत्सर्वेषांप्रकाशप्रसक्तौयदिंद्रियसन्निकर्षजन्यांतःकरणवृत्त्यायदवच्छिन्नचैतन्यावरणाज्ञानशक्त्यपगमस्तंप्रत्येवतच्चैतन्यरूपज्ञानेनप्रकाशतइत्येवंव्यवस्थांगीक्रियते साद्दृष्टिसृष्टिपक्षेनयुज्यते अन्योन्याश्रयात् । सतिचैतन्यरूपेज्ञानेतन्मात्रशरीरघटादिस्वरूपसिद्धिः तत्स्वरूपेचसतितेनेंद्रियसन्निकर्षेजातेतदवच्छिन्नचैतन्यावरकाज्ञानशक्त्यपगमानंतरंचैतन्यरूपज्ञानसिद्धिरिति । घटादेःप्रतिभासमात्रशरीरत्वे

नचतवापिजगत्प्रतिभासमात्रशरीरंप्रतिकर्मव्यवस्थाद्ययोगादितिदिक् ॥ ७ ॥

नसन्निकर्षात्पूर्वंसत्त्वाभावादितिचद्रष्टव्यं । (सर्वंमिथ्येत्यंगीकारेचलाघवं) तस्मात्प्रतिकर्मव्यवस्थानुपपत्त्याद्दृष्टिसृष्टिपक्षस्याप्रामाणिकत्वेननजगत्प्रतिभासमात्रशरीरमितिसाधनवतःपक्षाद्व्यावृत्तत्वेनोपाधित्वंयुक्तमितिभावः । संप्रदायस्तुशुक्तिरूप्यस्यदृष्टांतत्वमुपलक्षणत्वेन वस्तुतस्तुप्रातिभासिकत्वेनतत्समानानांसुखादीनामपिदृष्टांतत्वेनव्यावहारिकपक्षमात्राद्व्यावृत्तत्वेनसमग्रपक्षव्यावृत्तत्वमेवेत्याशयात् । ननुप्रातिभासिकत्वस्यापिसुखदुःखादौपक्षैकदेशेसत्त्वेनवियदादावसत्त्वेनास्यापिपक्षैकदेशव्यावृत्तत्वमेवनपक्षमात्रव्यावृत्तत्वमितिचेत् पक्षमात्रव्यावृत्तत्वमापाततएव वस्तुतस्तुपक्षैकदेशव्यावृत्तत्वमेवेत्याहुः ॥ ७ ॥ दृश्यत्वादे

SGDF
Sri Gargeshwari Digital Foundation

रुपाधिविवरणं ॥ ७ ॥ ननुजगतःप्रातिभासिकत्वेतदप्रातिभासिकत्वग्राहिसन्घटइत्यादिप्रत्यक्षविरोधः । ब्रह्मणश्चमिथ्यात्वे
तत्सत्यत्वग्राहिश्रुतिविरोधइत्यतआह ॥ जगतइति ॥ अत्राप्रयोजकतापरिहारायानुकूलतर्कमाह ॥ विपक्षेचेति ॥ जगतो
दृश्यत्वमंगीकृत्यप्रातिभासिकत्वानंगीकारेजगतःपारमार्थिकत्वप्राप्त्याजगद्ब्रह्मरूपसत्यद्वयांगीकारापत्त्यागौरवंस्यात् । व्यावहा
रिकत्वांगीकारेपिब्रह्मजगद्रूप्यादीनांत्रिविधसत्त्वांगीकारेत्रैरूप्यापत्त्यागौरवं । ब्रह्मणएकस्यैवसत्यत्वंतदितरस्यसर्वस्यप्रातिभासि 183

इतिदृश्यत्वादेरुपाधिविवरणं ॥ ७ ॥ विमतंप्रातिभासिकं दृश्यत्वाच्छुक्तिरूप्यवत् । ब्रह्ममिथ्या
व्यवहारविषयत्वादसद्विलक्षणत्वाद्वाशुक्तिरूप्यवदित्याभाससाम्यंच । जगतोऽप्रातिभासिक तोऽप्रा
त्वग्राहिप्रत्यक्षंब्रह्मणस्सत्यत्वश्रुतिश्चानुमानविरोधादप्रमाणं । विपक्षेचगौरवं । व्यवहृतिव्य
वहार्ययोःसंबंधांतराभावा त्सर्वव्यवहार्यंव्यवहृतावध्यस्तमित्यादिचबाधकमितिसुवचत्वात् ॥

कत्वांगीकारेलाघवं । तथाब्रह्मणोपिव्यवहारविषयत्वमंगीकृत्यमिथ्यात्वानंगीकारेसत्यत्वप्राप्त्याब्रह्मसत्यंजगन्मिथ्येतिद्वैरूप्यांगी
कारापत्त्यागौरवंविपक्षेबाधकं सर्वंमिथ्येत्यंगीकारेचलाघवमित्यर्थः । द्वितीयानुमानाप्रयोजकतापरिहारायहेतूच्छित्तिरूपंबाध
कांतरमाह ॥ व्यवहृतीति ॥ बाधकं अप्रयोजकताशंकायांबाधकं । ब्रह्मणोव्यवहारविषयत्वमंगीकृत्यमिथ्यात्वानंगीकारेस
त्यत्वप्राप्त्यासत्यभूतब्रह्मव्यवहारयोःसंबंधांतरायोगात्सर्वंव्यवहार्यंब्रह्मादिव्यवहृतावध्यस्तमित्याध्यासिकसंबंधएववक्तव्यः । त

SGDF
Sri Gargeshwari Digital Foundation

थाचब्रह्मणोव्यवहृतावध्यस्तत्वप्राप्त्यामिथ्यात्वसिद्धिरित्यर्थः । एवमेवदृश्यत्वमंगीकृत्यप्रातिभासिकत्वानंगीकारेदृग्दृश्ययोःसंबंधोनस्यादित्याध्यासिकएवसंबंधोवाच्यस्तथाचजगतोज्ञानेऽध्यस्ततयाप्रातिभासिकत्वसिद्धिरितिहेतूच्छित्तिरूपंबाधकंचद्रष्टव्यं ॥ ७ ॥ **दृश्यत्वादेराभाससाम्यविवरणं ॥ ८ ॥** प्रतिज्ञाश्रयंप्रबलप्रमाणविरोधाख्यंदोषंविवक्षुःप्रमाणज्येष्ठप्रत्यक्षविरोधंतावदाह ॥ **सन्घटइतीति** ॥ प्रत्यक्षगृहीतसत्त्वविरोधिमिथ्यात्वसाधकमनुमानंप्रत्यक्षबाधितमग्न्यनौष्ण्यानुमानवदित्यर्थः । ननुनमिथ्यात्वानुमानस्यप्रत्यक्षबाधः प्रत्यक्षगृहीतव्यावहारिकसत्त्वस्यानुमानगृहीतपारमार्थिकसत्त्वनिषेधरूपमिथ्यात्वाविरोधि

॥ ७ ॥ इतिदृश्यत्वादेराभाससाम्यविवरणं ॥ ८ ॥ सन्घटइत्यादिप्रत्यक्षबाधिताश्चदृश्यत्वादयः । ननुकिमिदंसत्त्वंयत्प्रत्यक्षसिद्धं परजातिर्वा असद्वैलक्षण्यंवा अर्थक्रियाकारित्वंवा प्रमाविषयत्वंवा तद्योग्यत्वंवा भ्रमाऽविषयत्वंवा स्वसमानाधिकरणस्वसमानकालीननिषेधाप्रतियोगित्वंवा अबाध्यत्वंवा ।

त्वात् । अनुमानगृहीतमिथ्यात्वविरोधिसत्त्वस्यचप्रत्यक्षेणाग्रहणादित्यभिप्रायेणसत्त्वंपृच्छति ॥ **नन्विति** ॥ असंगतिपरिहारायाह ॥ **यदिति** ॥ घटादौयत्प्रत्यक्षसिद्धमनुमानगृहीतमिथ्यात्वविरोधीतिशेषः ॥ **परजातिरिति** ॥ द्रव्यत्वगुणत्वकर्मत्वव्यापिकासत्ताजातिरित्यर्थः ॥ **तद्योग्यत्वमिति** ॥ प्रमाविषयत्वयोग्यत्वमित्यर्थः ॥ **स्वेति** ॥ स्वाधिकरणाधिकरणकोयःस्वसमानकालीनोनिषेधस्तदप्रतियोगित्वमित्यर्थः । निषेधाप्रतियोगित्वमित्युक्तेघटादेःकालांतरीयनिषेधप्रतियोगित्वादसंभवोऽतः

स्वसमानकालीनेति । तस्यघटादिसमानकालीनत्वाभावेनतादृशनिषेधाप्रतियोगित्वसत्त्वेननासंभवः । तावत्युक्तेस्वसमानकालीनदेशांतरीयनिषेधप्रतियोगित्वात्पुनरसंभवःस्यादतःस्वसमानाधिकरणेत्युक्तं । देशांतरीयनिषेधस्यस्वाधिकरणाधिकरणकत्वाभावान्नासंभवः ॥ **नाद्याइति** ॥ चतुर्थापेक्षयाआद्याः । प्रथमद्वितीयतृतीयाइत्यर्थः ॥ **सिद्धसाधनादिति** ॥ ननुइदमयुक्तंसिद्धसाधनतायाअनुमानएववक्तव्य(तयाप्र)त्वात्प्रत्यक्षेणैतादृशसत्त्वंविषयीक्रियतइत्युक्तेसिद्धसाधनोद्भावनस्याकौशलव्यंजकत्वमितिचेत्सत्यं । सिद्धसाधनात्सिद्धार्थावगाहित्वादित्यर्थः । परजात्यादिरूपस्यसत्त्वस्य मिथ्यात्ववादिनामयापिप्रत्यक्षविषय

**नाद्याः । सिद्धसाधनात् । नचतुर्थः । असतिप्रमाणाप्रवृत्त्या
तद्विषयत्वात्प्राक्सत्वस्यवक्तव्यतयातस्यसत्वादन्यत्वात् ।**

त्वांगीकारादनुमाननिषेध्यपारमार्थिकसत्त्वावगाहित्वाभावान्नतेनबाधइतिभावइत्याहुः । वस्तुतस्तुपरजात्यादिरूपसत्त्वस्यमिथ्यात्ववादिनामयापिप्रत्यक्षविषयत्वांगीकारादेतादृशसत्त्वंप्रत्यक्षविषयइतिभवदीयवचनंमांप्रतिसिद्धसाधनंसिद्धार्थसाधकंसिद्धार्थबोधकंअसंगतमित्यर्थः । तथाचानुमाननिषेध्यपारमार्थिकसत्वावगाहित्वाभावेनभिन्नविषयत्वान्नानुमानस्यतेनबाधइतिभावः ॥ **असतीति** ॥ सत्येवप्रमाणंप्रवर्ततेनासतीतितावत्सिद्धं तत्कुतइतिपृष्टेप्रमाणप्रवृत्तिप्रयोजकीभूतंसत्त्वंसतिवर्ततेऽसतिचनास्तीतिवक्तव्यं । एवंचप्रमाणप्रवृत्तिप्रयोजकतयाप्रमितिविषयत्वात्प्राक्सत्त्वस्यावश्यंवक्तव्यत्वेनप्रमितिविषयत्वस्यसत्त्वादन्यत्वे

SGDF Foundation

नतदेवसत्त्वंनेत्यर्थः । किंचप्रमाविषयत्वंपरंपरयावा साक्षाद्वा । नाद्यः । शुक्तिरजतमहं(असत्परोक्षतो)जानामीतिव्यवसायद्वा राऽसतोप्यनुव्यवसायविषयत्वात्असत्यतिव्याप्तिः । नद्वितीयः । इदंरजतमसदितिअसत्त्वप्रकारकप्रमांप्रतिअसतोपिसाक्षाद्वि षयत्वेनासत्येवातिव्याप्तिरित्याह ॥ असतोपीति ॥ आत्माश्रयादिति ॥ सत्त्वलक्षणेसत्त्वप्रवेशादित्यर्थः ॥ अन्योन्याश्र यादिति ॥ सत्त्वज्ञानेप्रतियोगि(गिज्ञानप्राप्त्या)नःप्राप्त्याऽसत्त्वज्ञानंतज्ज्ञानेतद्घटितसत्त्वज्ञानमित्यन्योन्याश्रयइत्यर्थः ॥ अ

असतोपिव्यवसायद्वारासाक्षाच्चासत्वप्रकारकप्रमाविषयत्वाच्च । सत्वप्रकारकप्रमाविषयत्वेचा त्माश्रयात् । असत्वाप्रकारकप्रमाविषयत्वेचासत्वस्यसत्वनिरूप्यत्वेनान्योन्याश्रयात् । अत एवनपंचमः । नषष्ठः । सतोप्यसत्त्वप्रकारकभ्रमविषयत्वात् । सत्वप्रकारकभ्रमाविषयत्वेचात्मा श्रयात् । असत्वाप्रकारकभ्रमाविषयत्वेचान्योन्याश्रयात् । नसप्तमः । संयोगादावव्याप्तेः ।

तएवेति ॥ सत्त्वस्यप्रमाविषयत्वयोग्यत्वप्रयोजकत्वेनतस्यसत्त्वादन्यत्वादेवेत्यर्थः ॥ सतोपीति ॥ घटोऽसन्निति भ्रमसंभ वेन तत्रलक्षणाभावादसंभवइतिभावः ॥ असत्त्वाप्रकारकेति ॥ असत्त्वप्रकारकभ्रमविषयत्वंतदप्रकारकभ्रमविषयत्वंचना स्तीत्येवंसर्वथाभ्रमाविषयत्वेनैवपर्यवसानंनतुअसत्त्वप्रकारकभ्रमविषयत्वेनेतिध्येयं ॥ अन्योन्येति ॥ पूर्ववदसत्त्वस्यसत्त्वनि रूप्यत्वेनाऽन्योन्याश्रयादितिभावः ॥ संयोगादाविति ॥ संयोगस्याव्याप्यवृत्तित्वेनसंयोगाधिकरणाधिकरणकोयःस्वसमा

SGDF
Sri Gargeshwari Digital Foundation

नकालीनोनिषेधः संयोगात्यंताभावएवतदप्रतियोगित्वाभावेनाव्याप्तिरित्यर्थः ॥ शुक्तीति ॥ रूप्यस्यासतोऽधिकरणस्यैवाभा वेनस्वसमानाधिकरणस्वसमानकालीननिषेधस्यैवाभावेनतदप्रतियोगित्वंविशेषणाभावप्रयुक्तविशिष्टाभावमादायास्तीत्यर्थः ॥ अन्योन्येति ॥ बाध्यत्वज्ञानेऽबाध्यत्वज्ञानं । तत्रतस्यप्रतियोगित्वात् । अबाध्यत्वज्ञानेचबाध्यत्वज्ञानं बाध्यत्वस्याऽबाध्यत्व रूपसत्त्वघटितत्वादित्यन्योन्याश्रयादित्यर्थः । इह जगति । तत्र ब्रह्मणि । तत् सत्त्वं । अनिर्वाच्यं निर्वक्तुमशक्यमित्यर्थः ॥ 18२

शुक्तिरूप्यादेरधिकरणाद्यभावेनातिव्याप्तेश्च ।नाप्यष्टमः ।बाधस्यप्रतिपन्नोपाधौत्रैकालिकस त्वनिषेधत्वेनान्योन्याश्रयात् ।उच्यते । तवात्मनियत्सत्वंतदेवेहमम ।उक्तंहि "यादृशंब्रह्म णःसत्वंतादृशंस्याज्जगत्यपी "ति । तत्रतदनिर्वाच्यंचेदिहापितथास्तु ।सत्वानिर्वचनेपितद्व देवस्वरूपपारमार्थ्योपपत्तेः । यदिचतत्रानृतव्यावृत्तिमात्रंअबाधितस्वरूपंवासत्वं । बाधश्चप्र तिपन्नोपाधौत्रैकालिकनिषेधः । ज्ञानेननिवृत्तिर्वैतिनान्योन्याश्रयः । तर्हीहापितथास्तु

इहापीति ॥ जगत्यपिनिर्वक्तुमशक्यमित्यर्थः । दूषणांतरमाह ॥ सत्त्वेति ॥ ब्रह्मणिसत्त्वस्यनिर्वक्तुमशक्यत्वेपियथातत्पर मार्थसद्रूपंएवंजगन्निष्ठसत्त्वस्यापिनिर्वक्तुमशक्यत्वेपिब्रह्मवदेवपरमार्थसद्रूपमस्त्वित्यर्थः । तत्र ब्रह्मणि ॥ अनृतेति ॥ अपो हवादाश्रयणेनेत्यर्थः । " अनृतजडविरोधिरूप "मित्यादितद्वचनात् । नन्वबाधितस्वरूपंसत्त्वंचेद्बाधस्यत्रैकालिकसत्त्वनिषेध रूपत्वेनपूर्वोक्तरीत्यान्योन्याश्रयइत्यतआह ॥ बाधश्चेति ॥ निषेधःस्वरूपनिषेधः । तथाचबाधोनसत्त्वघटितइत्यर्थः । ननु

SGDF
Sri Gargeshwari Digital Foundation

183

ब्रह्मजगतोरेकप्रकारसत्ताकत्वेजगतोब्रह्मसाम्यापत्तिरित्यतआह ॥ **ब्रह्मसाम्यस्यैवेति** ॥ पारमार्थिकसत्त्वरूपधर्मेणेत्यर्थः । ननु "याद्दशंब्रह्मणस्सत्त्वंताद्दशंस्याज्जगत्यपी"त्ययुक्तं । कुतइत्यतआह ॥ **अपरिच्छिन्नत्वमिति** ॥ तत्र ब्रह्मणि । नहिजगत्येताद्दशंसत्त्वंवक्तुंयुक्तमित्याशयः ॥ **शुक्तिरूप्ययोरित्यादि** ॥ अयमत्रोत्तरक्रमः । यथाऽपरिच्छिन्नत्वंसत्वमंगीकृत्यजगतितदभावात्सत्त्वंनास्तीत्युच्यते एवंवयमपिवदामः । परिच्छिन्नत्वमेवसत्त्वंब्रह्मणितुतदभावात्तत्रापिसत्त्वंनास्तीति । ननुपरिच्छिन्नत्वंसत्त्वंनभवतिशुक्तिवद्रूप्यस्यापिपरिच्छिन्नत्वेनतत्रातिव्याप्तेरितिचेत्तर्ह्यपरिच्छिन्नत्वमपिनसत्त्वं शून्यवादिनाशून्यस्या

ब्रह्मसाम्यस्यैवापेक्षितत्वात् । अपरिच्छिन्नत्वंतत्रसत्वमितिचेन्न । शुक्तिरूप्ययोः परिच्छिन्नत्वेब्रह्मशून्ययोश्चापरिच्छिन्नत्वेतुल्येपिसत्वासत्वयोर्व्यवस्थितत्वेनजगत्युक्तपारिभाषिकसत्वाभावस्यब्रह्मणिपरिच्छिन्नत्वरूपसत्वाभावस्येवेष्टत्वात् ।

प्यपरिच्छिन्नत्वांगीकारेणशून्येऽतिव्याप्तेः । एवंचापरिच्छिन्नत्वंसत्त्वमितिस्वीकुर्वतात्वयाब्रह्मशून्ययोरपरिच्छिन्नत्वेतुल्येपिब्रह्मण्येवसत्त्वमस्तिनशून्यइतियथासत्त्वासत्त्वयोर्व्यवस्थितत्वंस्वीकृतं एवंपरिच्छिन्नत्वंसत्त्वमितिस्वीकुर्वतामयापिशुक्तिरूप्ययोः परिच्छिन्नत्वेसमानेपिशुक्तावेवसत्त्वंनरूप्यइत्यपिसत्त्वासत्त्वयोर्व्यवस्थितत्वमेवस्वीकृतं । सतिचैवंब्रह्मणिमदभिप्रेतपारिभाषिकपरिच्छिन्नत्वरूपसत्त्वाभावेप्यपरिच्छिन्नसद्रूपंब्रह्मभवति । एवंजगत्यपित्वदभिप्रेतपारिभाषिकापरिच्छिन्नत्वरूपसत्त्वाभावेपिप ॥ ९५ ॥

184

रिच्छिन्नसद्रूपत्वेनैवोपपत्तेःअपरिच्छिन्नत्वंसत्त्वमित्यंगीकृत्यजगतितदभावेनासत्त्वंनवक्तव्यमिति । प्रतिबंद्याअनुत्तरत्वादाह ॥ **सौहार्देत्विति** ॥ सुहृद्भावेनविचारेत्वित्यर्थः। तंप्रति त्रिकालसर्वदेशीयनिषेधंप्रति । श्लोकंव्याचष्टे ॥ **सर्वेति** ॥ ननुवृक्षकपिसंयोगस्तावदितरत्रकुत्रापिनास्ति । स्वयंयत्रास्तितत्रापितदत्यंताभावोस्त्येव संयोगस्याव्याप्यवृत्तित्वेनस्वात्यंताभावसमानाधिकरणत्वादतःसार्वदैशिकनिषेधप्रतियोगित्वसद्भावेनतदप्रतियोगित्वाभावादव्याप्तिरित्यतआह ॥ **यदवच्छिन्नइति** ॥ भावेक्तःयदवच्छेदेनेत्यर्थः। आवयोर्मतेसंयोगस्यस्वात्यंताभावसामानाधिकरण्यरूपाव्याप्यवृत्तित्वस्यासंमतत्वेनयत्प्रदेशावच्छेदेनसं

सौहार्देतु । "त्रिकालसर्वदेशीयनिषेधाप्रतियोगिता । सत्तोच्यतेऽध्यस्ततुच्छेतंप्रतिप्रतियोगिनी ।" सर्वदेशकालसंबंधिनिषेधाप्रतियोगित्वंसत्वं । यदवच्छिन्नेसंयोगस्तदवच्छिन्नेतदत्यंताभावोनेतिनतत्राव्याप्तिः । गगनादेरप्यत्यंताभावःकेवलान्वयीनेत्युक्तत्वान्नगगनादावव्याप्तिः ।

योगस्तत्प्रदेशावच्छेदेनैवतदत्यंताभावाभावान्नसार्वदैशिकनिषेधप्रतियोगित्वमितिनाव्याप्तिः । नन्वथापिगगनादिनित्यद्रव्यात्यंताभावस्यकेवलान्वयित्वेनसार्वदैशिकत्वाद्गगनादौसार्वदैशिकनिषेधप्रतियोगित्वस्यैवसद्भावेनाव्याप्तिरित्यतआह ॥ **गगनादेरपीति** ॥ **उक्तत्वादिति** ॥ देशकालावपिसदासर्वत्रदेशकालावित्यबाधितप्रतीत्याप्रमेयत्वाभिधेयत्ववत्स्ववृत्तीअन्योन्यवृत्तीचेत्युक्तत्वेनदेशकालयोर्देशकालयोरेवसत्त्वेननसार्वदैशिकनिषेधप्रतियोगित्वंअतोनाव्याप्तिरित्यर्थः । तुच्छेऽध्यस्तेचातिव्याप्तिं

SGDF

परिहरति ॥ तुच्छमिति ॥ उक्तत्वादिति ॥ अध्यस्ततुच्छेतंप्रतिप्रतियोगिनीइतिकारिकायामुक्तत्वादित्यर्थः । मन्मतेध्यस्त स्यतुच्छत्वेपिपररीत्येयमुक्तिरितिज्ञातव्यं ।"सत्वस्यलक्षणेकृत्यंपदानांतुविचार्यते । विद्वत्प्रमोदकःसस्यात्दययाश्रीपतेर्गुरोः"॥१॥ तथाहि । अत्रलक्षणेविद्वत्प्रमोदार्थंपदकृत्यादिविचारःक्रियते । तथाहि । सार्वदेशिकसार्वकालिकनिषेधाप्रतियोगित्वंसत्त्वमित्य त्रसार्वदेशिकनिषेधाप्रतियोगित्वंसत्त्वमित्येवोक्तेसमवायिकारणनाशजन्यनाशप्रतियोगिनिकिंचित्कालमनाश्रिततयाविद्यमानेप टेऽव्याप्तिःस्यात् । तस्यपटस्यकपालादिदेशेष्वभावस्यसर्वसंमतत्वेनस्वसमवायिदेशेऽवस्थानेनभाव्यं । समवायिकार(णनाशेतु तत्रा)णाभावात्तत्रावस्थानासंभवेनसार्वदेशिकनिषेधप्रतियोगित्वसद्भावेनतदप्रतियोगित्वाभावादव्याप्तिःस्यादतःसार्वकालिकेत्यु

तुच्छमध्यस्तंचउक्तप्रतिषेधप्रतियोगीत्युक्तत्वान्नातिव्याप्तिरपि ।

क्तं । तथाचतस्यपटस्यसमवायिकारणनाशात्पूर्वंस्वसमवायिकारणेस्थितत्वेनत्रैकालिकनिषेधाप्रतियोगित्वसद्भावान्नाव्याप्तिः । नन्वत्रनिषेधपदस्यात्यंताभावपरत्वात्समवायिकारणनाशजन्यनाशप्रतियोगिपटेकथमव्याप्तिः । नाशस्यात्यंताभावत्वाभावेनना शप्रतियोगित्वादेवतत्रात्यंताभावाप्रतियोगित्वमस्तीतिकथमव्याप्तिः । अतःसार्वकालिकपदंव्यर्थमितिचेन्न । निषेधपदस्यसंसर्गा भावपरत्वांगीकारात् । तथाचनाशप्रतियोगिनिसंसर्गाभावप्रतियोगित्वसद्भावादव्याप्तिःस्यादेवेत्यतःसार्वकालिकपदंसार्थकमेव। सार्वकालिकनिषेधाप्रतियोगित्वमित्येवोक्तौअश्वेगोत्वंकदापिनास्तीतिप्रतीत्याश्वनिष्ठगोत्वात्यंताभावप्रतियोगिनिगोत्वेसार्वकालि

Sec 7 पर्

SGDF Sri Gargeshwari Digital Foundation

कनिषेधप्रतियोगित्वस्यैवसत्त्वेनतदप्रतियोगित्वाभावादव्याप्तिःस्यादतःसार्वदैशिकेत्युक्तं । तथाचगोत्वस्याश्वादिदेशेऽभावेपिग विसत्त्वेनसार्वदैशिकनिषेधप्रतियोगित्वाभावान्नाव्याप्तिः । ननुगोत्वस्यप्रामाणिकतयानिषेधप्रतियोगित्वासंभवाद्गोत्वसंसर्गएव निषिध्यतइतिमतेगोत्वेऽश्वनिष्ठसार्वकालिकनिषेधाप्रतियोगित्वसद्भावेनअव्याप्तेरेवाभावात्सार्वदैशिकपदंव्यर्थमितिचेत्सत्यमेवे तिवदामः । तदिदमाह ॥ अश्वेगोत्वमिति ॥ निषेधपदस्यात्यंताभावपरत्वेतुसमवायिकारणनाशजन्यनाशप्रतियोगिनिपटेऽ व्याप्त्यभावात्सार्वकालिकपदमप्यनपेक्षितमित्यपिद्रष्टव्यं । ननुतर्हिअश्वेगोत्वसंसर्गःकदापिनास्तीतिप्रतीत्याऽश्वनिष्ठात्यंताभा

अश्वेगोत्वंकदाचिदपिनास्तीत्यादौतत्संसर्गएवनिषिध्यतइतिमतेदेशपदमनपेक्षि तं । केचित्तुपराभिप्रेतमिथ्यात्वाभावोवा ऽसद्विलक्षणत्वेसत्यनारोपितत्वंवा

वप्रतियोगिनिगोत्वसंसर्गएवाव्याप्तिरितिचेन्न । भ्रांतोसि । अश्वेगोत्वसंसर्गस्यारोपितत्वेनात्यंतासत्त्वादलक्ष्यत्वमेवेतितत्रलक्ष णाभावोनदोषाय । अतएवोक्तं“ अध्यस्ततुच्छेतंप्रतिप्रतियोगिनी ”इति । ननुकथमस्मदनुमानानांप्रत्यक्षबाधः । सत्वग्राहि त्वादितिचेन्न । चक्षुराद्ययोग्यातीतवर्तमानैष्यत्कालदेशाद्यनेकपदार्थघटितसत्त्वस्यकथंप्रत्यक्षसिद्धत्वं चक्षुरादेरेतादृशसत्त्वग्र हणेऽसामर्थ्यादितिचेत् उच्यते । देशकालयोश्चक्षुराद्ययोग्यत्वेपिसाक्ष्युपनीतयोश्चाक्षुषप्रत्यक्षेभानंसंभवत्येव । कथमन्यथाअ त्रेदानींघटइत्यत्रापितयोर्भानमिति । पुनःप्रकारांतरंचात्रोपदिशंति । तथाहि । सार्वदैशिकसार्वकालिकनिषेधाप्रतियोगित्वंनाम

SGDF
Sri Gargeshwari Digital Foundation

सार्वदेशिकसार्वकालिकनिषेधप्रतियोगित्वाभावः । सचप्रत्यक्षयोग्यएव । कथमितिचेदुच्यते । अत्रादावभावस्यप्रत्यक्षयोग्यतायांतंत्रंकिमितिप्रष्टव्यं । प्रतियोगियोग्यत्वमितिचेन्न । तथात्वेजलपरमाणौपृथिवीत्वाभावःप्रत्यक्षःस्यात् । पृथिवीत्वस्यघटादौप्रत्यक्षयोग्यत्वात् अतोनप्रतियोगियोग्यत्वंतंत्रं किंनाम मणिकारोक्तरीत्यायोग्यानुपलब्धिरेव । ननुतथापियोग्यस्यानुपलब्धिर्योग्यानुपलब्धिः । तथाचपृथिवीत्वस्यघटादौयोग्यस्यानुपलब्धेःसत्त्वात्तदभावोजलपरमाणौप्रत्यक्षःस्यादित्यतिप्रसंगानिस्तारएवेतिचेन्न । योग्यस्यानुपलब्धिर्योग्यानुपलब्धिरितिनार्थः । किंनाम । तर्कितप्रतियोगिसत्त्वप्रसंजितोपलब्धिप्रतियोगिकाभावएवहियोग्यानुपलब्धिः । तथाहि । यद्यत्रभूतलेघटःस्यात्तर्ह्युपलभ्येत । घटस्यमहत्त्वसमानाधिकरणोद्भूतरूपवत्त्वेनयोग्यत्वात् नोपलभ्यते तस्मान्नास्तीत्येवंरूपा । एवंचजलपरमाणौपृथिवीत्वाभावोनप्रत्यक्षः । तत्रोक्तरूपयोग्यानुपलब्धेरभावात् । तत्रहियदिजलपरमाणौपृथिवीत्वंस्यात्तदोपलभ्येत योग्यव्यक्तिवृत्तिजातेर्योग्यत्वादित्यापादनंकर्तुमशक्यं । जलपरमाणोः पृथिवीत्वजातिंप्रत्ययोग्यव्यक्तित्वेनपृथिवीत्वस्ययोग्यव्यक्तिवृत्तित्वाभावात् । अतएवमापादनासंभवेनतत्रोक्तरूपयोग्यानुपलब्धेरभावेनपृथिवीत्वाभावोनप्रत्यक्षः । प्रकृतेचास्त्युक्तरूपायोग्यानुपलब्धिःसार्वदेशिकसार्वकालिकनिषेधप्रतियोगित्वाभावग्राहिका । तथाहि । यद्यत्रघटादौसार्वदेशिकसार्वकालिकनिषेधप्रतियोगित्वंस्यात्तर्ह्युपलभ्येत । योग्यव्यक्तिवृत्तिधर्मत्वात् नह्युपलभ्यतेऽतोत्रनास्तीत्यापादनसंभवेनोक्तरूपयोग्यानुपलब्धेःसंभवादुक्तनिषेधप्रतियोगित्वाभावस्यप्रत्यक्षयोग्यत्वंयुक्तमिति । अत्रपुनर्निष्कर्षमुपदिशंति । निषेधाप्रतियोगित्वमित्यत्रान्योन्याभावएवनञर्थतयाविवक्षितः । तथाचसार्वदेशिकसार्वकालिकनि ॥ ९७ ॥

193

षेधप्रतियोगिभिन्नत्वमित्यर्थः । इदंचप्रत्यक्षयोग्यमेव । तथाहि । अन्योन्याभावप्रत्यक्षेऽधिकरणयोग्यत्वमेवतंत्रंनप्रतियोगियोग्यत्वं । स्तंभेपिशाचान्योन्याभावस्यप्रत्यक्षत्वात् । यथोक्तंगंगेशेन । "स्तंभेपिशाचान्योन्याभावःप्रत्यक्षएव अधिकरणस्यप्रत्यक्षत्वा" दिति । एवंचप्रकृतेऽन्योन्याभावाधिकरणस्यघटादिजगतोयोग्यत्वात्तन्निष्ठंसार्वदेशिकसार्वकालिकनिषेधप्रतियोगिभिन्नत्वरूपंसत्वंप्रत्यक्षयोग्यमेवेतिनकोपिदोषः । अतएतादृशसत्त्वग्राहिप्रत्यक्षविरोधोनुमानस्यसुस्थइतिसर्वमवदातं । स्वोत्प्रेक्षितान्पक्षानेवकेचित्त्वित्याहेतिसंप्रदायः ।[1]परैरिति । परैर्मिथ्यात्वंयत्किंचिदेवोच्यतांनास्माकंतत्रनिर्बंधः । तथाचसामान्यतः पराभिप्रेतंयन्मिथ्यात्वंतदभावइत्यर्थः । असद्विशेषस्यकूर्मरोमादेःप्रधानाभावेनकुत्राऽप्यऽनारोपात्तत्राऽतिव्याप्तिवारणायअस

अस्तित्वप्रकारकप्रमांप्रतिकदाचित्साक्षाद्विषयत्वंवा कालसंबंधित्वंवासत्वं । अस्तित्वंचवर्तमानत्वं ।

द्वैलक्षण्येसतीत्युक्तं । परीत्याशुक्तिरूप्येऽतिव्याप्तिवारणायविशेष्यं ॥ अस्तित्वेति ॥ प्रमाविषयत्वमात्रोक्तौइदंरजतमितिज्ञानवानहमित्यनुव्यवसायेव्यवसायद्वारारजतस्यापिविषयत्वेनभानादतिव्याप्तिःस्यादतःसाक्षादित्युक्तं । नेदंरजतमितिबाधकप्रमांप्रतिनिषेध्यत्वेनसाक्षाद्विषयेरजतेऽतिव्याप्तिवारणायअस्तित्वप्रकारकेत्युक्तं । तावत्युक्तेऽतीतादावसंभवःस्यादतःकदाचिदित्युक्तं । स्वसत्तादशायांपूर्वमेतल्लक्षणमस्तीतिनदोषः। नन्वस्तित्वंनामसत्त्वमेव । तथाचात्माश्रयइत्यतआह ॥ अस्तित्वंचेति ॥ वर्तमानत्वमिति ॥ घटादेर्वर्तमानत्वंनामस्वप्रागभावविरहरूपत्वं प्रतियोग्यापत्तेरेवाभावविपत्तित्वात् । यथोक्तंशिवादित्ये

1॥परेति॥ मूले एतद्गुणपाठाभावात्॥

SGDF Foundation

न । "तच्चप्राक्संबद्धस्वाभावविरहस्वरूपत्व "मिति । नन्वतीतादौवर्तमानत्वप्रकारकप्रमाविषयत्वाभावादव्याप्तिःस्यादित्यत आह ॥ अतीतादिरपीति ॥ कदाचित् स्वसत्तादशायां । अनेनकदाचिदितिविशेषणकृत्य(मपि)मुपदर्शितं । ननुकालसंबंधित्वरूपंसत्त्वंशुक्तिरूप्येऽतिव्याप्तं । तस्यप्रातिभासिकत्वेनप्रतिभासकालसंबंधित्वादित्यतआह ॥ आरोपितंत्विति ॥ बाधबोधितमिति ॥ नास्तिनासीन्नभविष्यतीतित्रैकालिकनिषेधरूपे(ण)बाधेनकालत्रयासंबंधित्वेनारोपितस्यबोधिततयाप्रातिभा

अतीतादिरपिकदाचिद्वर्ततएव । आरोपितंतुकालत्रयासंबंधित्वेनबाधबोधितमितिनदोषइत्याहुः ॥ ७ ॥ इतिसत्वनिरुक्तिः ॥ ९ ॥ नन्विदंरूप्यमित्यत्रेदमितिवत्सन्घटइत्यत्रापिसन्नित्यधिष्ठानब्रह्मानुवेधएवेतिचेन्न । चाक्षुषादिज्ञानेरूपादिहीनब्रह्मास्फुरणादित्युक्तत्वात् । → See 8254

सिकस्यकालासंबंधित्वेनकालसंबंधित्वलक्षणस्यारोपितेनातिव्याप्तिरित्यर्थः ॥ ७ ॥ इतिसत्त्वनिरुक्तिविवरणं ॥ ९ ॥ सन्घटइत्यादिप्रत्यक्षस्यघटादौस(त्ता)त्त्वग्राहकत्वेननतद्विरोधोनुमानस्येत्याशंकते ॥ नन्विति ॥ यथाइदंरूप्यमित्यत्ररूप्येइदंताविरहात्अधिष्ठानभूतशुक्तिकायांइदंत्वेनगृह्यमाणायांतत्रारोपितंरजतमपीदमितिभ्रमेनिर्दिश्यते तथासद्रूपेब्रह्मणिघटादेरध्यस्तत्वेनतद्गतमेवसत्त्वंघटादौव्यवह्रियते । तथाचनघटादौसत्त्वंप्रत्यक्षविषयइत्यर्थः ॥ उक्तत्वादिति ॥ परिच्छिन्नत्वहेतुभंगइति

SGDF
Sri Gargeshwari Digital Foundation

शेषः ॥ अन्योन्याश्रयादिति ॥ घटादेरारोपितत्वसिद्धौसत्त्वाभावसिद्धिः तत्सिद्धौचाधिष्ठानगतमेवसत्त्वंप्रतीयतेनवस्तुतइ
त्येतत्प्रमेयसिद्ध्याआरोपितत्वसिद्धिरित्यन्योन्याश्रयादित्यर्थः । प्रतिबंदींगृह्णाति ॥ अन्यथेति ॥ सदित्यधिष्ठानगतमेवसत्त्वं
प्रतीयतइत्यंगीकारइत्यर्थः । ननुसत्यंज्ञानमित्यत्रसदित्यधिष्ठानानुवेधोनभवति । ब्रह्मणःसद्रूपत्वात् घटादौत्वधिष्ठानानुवेधए
व तस्यमिथ्यात्वादित्यतआह ॥ नहीति ॥ तथाचब्रह्मैवसद्रूपमन्यन्मिथ्येतिविभागसिद्धौसत्यंज्ञानमित्यत्रसत्यमितिनाधिष्ठा

नीलोघटःमिथ्यारूप्यंअसन्नृशृंगमित्यादावपिनीलइत्यादिरधिष्ठानानुवेधइत्यापाता
च्च । नैल्यादिकंघटेऽस्तिसत्वंतुनेतिचेन्न । अस्यारोपितत्वसिद्ध्यधीनत्वेनान्योन्या
श्रयात् । अन्यथासत्यंज्ञानमित्यत्रापिसत्यमित्यधिष्ठानानुवेधइतिस्यात् । नह्यद्यापि
ब्रह्मैवसद्रूपमन्यन्मिथ्येतिसिद्धं । ननुतथापिकथंप्रत्यक्षमात्यंतिकाबाध्यत्वग्राहि ।

नानुवेधः । सन्घटइत्यत्रतुतदनुवेधइतिप्रमेयद्वयसिद्धिस्तत्सिद्धौचोक्तविभागसिद्धिरित्यन्योन्याश्रयइत्यर्थः । एवंचयथासत्यं
ब्रह्मेत्यत्रब्रह्मगतमेवसत्त्वंप्रतीयते नत्वधिष्ठानगतं(तथा) एवंसन्घटइत्यत्रापिघटगतमेवसत्त्वंप्रतीयतइत्यंगीकार्यमितिभावः । प्र
तिपन्नोपाधौत्रैकालिकनिषेधप्रतियोगित्वरूपमिथ्यात्वसाधकानुमानस्यप्रत्यक्षविरोधोनास्तीत्याशंकते ॥ नन्विति ॥ आत्यंति
काबाध्यत्वं कालत्रयेपिसत्त्वं । तथाचग्राह्याभावानवगाहित्वान्नविरोधइतिभावः । ननुवर्तमानकालीनबाधाभावग्राहकत्वमात्रे

195

SGDF
Sri Gargeshwari Digital Foundation

णैवविरोधोस्त्विवत्यतआह ॥ तात्कालिकेति ॥ तात्कालिकबाधाभावश्चनवस्तुसत्त्वसाधकः । तथात्वेरूप्यादेरपितदापातादि तिभावः । आद्यपक्षस्यत्रेधाविकल्पितत्वान्नाद्यावित्युक्तं । तयोः अनुमानागमयोः ॥ मानेति ॥ प्रत्यक्षरूपप्रमाणाविरोधेने त्यर्थः । ननुभवत्पक्षेप्यन्योन्याश्रयः । प्रत्यक्षस्यप्रामाण्येतद्विरोधादनुमानादेरप्रामाण्यं तयोरप्रामाण्येतद्विरोधाभावात्प्रत्यक्ष

तात्कालिकाबाधस्तुरूप्यादेरिवेष्टइतिचेत्किंप्रत्यक्षमप्रमाणमेवउतप्रमाणमपिवर्तमाम मात्रग्राहित्वात्रिकालाबाधग्रहाक्षमं । आद्येपिस्वतःप्राप्तस्यतत्वावेदनरूपप्रामाण्यस्य त्यागःकिमनुमानविरोधादागमविरोधाद्वाभाविबाधकशंकामात्रेणवा । नाद्यौ।तयोः प्रामाण्येतद्विरोधेनाक्षस्याप्रामाण्यंसतिचतस्मिन्मानाविरोधेनतयोःप्रामाण्यमित्यन्यो न्याश्रयात् । अक्षस्यतुप्रबलस्यप्रामाण्यम(नुमितिशब्दाविरो)नुमानागमाविरोधापे क्षंनेतिनान्योन्याश्रयः । नहिसिंहःशशशाबकाभा(वंप्रतीक्ष्य)वमपेक्ष्यवनंगाहते ।

स्यप्रामाण्यमितीतिचेन्न । प्रत्यक्षप्रामाण्यसिद्धेरनुमानादिविरोधाभावानपेक्षत्वान्नान्योन्याश्रयइत्याह ॥ अक्षस्यत्विति ॥ प्र बलस्यदुर्बलविरोधाभावापेक्षानास्तीत्यत्रदृष्टांतमाह ॥ नहीति ॥ " पोतस्तोकोर्भकोडिंभःपृथुकःशाबकःशिशु "रित्यभिधानं । ॥ ९९ ॥
स्यादयमन्योन्याश्रयपरिहारः यदिप्रत्यक्षस्यानुमानादितःप्राबल्यंस्यात्तदेवकुतइत्यतः तस्यानुमानादितोजात्याप्राबल्यंसमर्थय

ते ॥ प्रत्यक्षस्येति ॥ प्रत्यक्षस्यानुमानादितःप्राबल्यंचतदसाध्यकार्यकारित्वेन । तच्चकार्यंद्विविधं । तदगृहीतार्थविषयकत्वं तदनिवर्त्यनिवर्तकत्वंचेत्यभिप्रेत्योक्तं ॥ तदगृहीतेत्यादि ॥ अनुमित्याद्यगृहीतव(ह्निगत)स्तुगतरेखोपरेखादिग्राहकत्वादित्य र्थः ॥ दिङ्मोहादीति ॥ प्रतीच्यांप्राचीत्वारोपेनेयंप्राचीत्याद्याप्तवाक्यजन्यज्ञानेनेयंप्राचीसूर्योदयशून्यत्वादित्याद्यानुमानि कज्ञानेचसत्यपियावत्प्रत्यक्षेणसूर्योदयादिकंनपश्यतितावत्सभ्रमोननिवर्ततइत्यर्थः । ननुधर्मिप्रतियोग्यादिग्राहकत्वेनोपजीव्य 197
तयैवप्राबल्यंलोकेदृष्टं तदतिरिक्तंजात्याप्राबल्यंनामकीदृशमित्यतस्तद्दर्शयति ॥ दृष्टंहीति ॥ वह्निःशीतइत्यनुमानेस्पार्शनप्र

प्रत्यक्षस्यानुमित्यादितःप्राबल्यंचतदगृहीतरेखोपरेखादिविशेषग्राहित्वादनुमि त्याद्यनिवर्तितदिङ्मोहादिनिवर्तकत्वाच्चजात्यैव । दृष्टंहिवह्निशैत्यानुमाने धर्म्यादेश्चक्षुरादिनापिसिद्धानुपजीव्यत्वेपिऔष्ण्यप्रत्यक्षस्यजात्यैवप्राबल्यं ।

त्यक्षस्यप्राबल्येनबाधकत्वंतावदस्ति । तत्रप्राबल्यंकथमितिप्रष्टव्यं । धर्मिग्राहकत्वेनोपजीव्यत्वादितिचेन्न । चक्षुरादिनाधर्मिभू तवह्नेःसिद्धत्वात् नाप्यनौष्ण्यप्रतियोग्यौष्ण्यग्राहकत्वेनोपजीव्यत्वंसंभवति । स्यादेतदेवंयद्यनौष्ण्यंसाध्यंस्यात् । नचैवंभाव रूपस्यशैत्यस्यसाध्यत्वात् । तदिदमुक्तंवह्निशैत्येति । तथाचएतादृशस्थलेधर्मिप्रतियोगिग्राहकत्वादिनाप्रत्यक्षस्योपजीव्यत्वाद्य भावेपिकेवलंजात्यैवप्राबल्यंदृष्टमित्यर्थः । नन्वेवंप्रत्यक्षस्यैवानुमानागमाभ्यांजात्याप्राबल्ये" प्राबल्यमागमस्यैवजात्यातेषुत्रिषु

SGPF Foundation

स्मृत "मितिब्रह्मतर्कवचनविरोधइत्यतआह ॥ प्राबल्यमिति ॥ वैदिकपरब्रह्मादिरूपार्थनिर्णयविषयेआगमस्यैवजात्याप्राबल्यं । अत्रतुघटादिप्रपंचरूपलौकिकार्थस्यप्रस्तुतत्वात्तद्विषयेजात्याप्रत्यक्षस्यप्राबल्याभिधानेनतद्विरोधइत्यर्थः ॥ अतएवेति ॥ एवंलौकिकार्थविषयेप्रत्यक्षस्यैवजात्याप्राबल्यदर्शनादेवेत्यर्थः । उक्तं भगवत्पादैः । एवंजात्याप्राबल्यमुपपाद्याऽनुपसंजातविरोधित्वाच्चप्रत्यक्षस्यप्राबल्यमित्याह ॥ उपक्रमाधिकरणन्यायेनेति ॥ तृतीयाध्यायेतृतीयपादेचिंतितं । " श्रुतेर्जाताधिकारः स्या "दित्यत्र ज्योतिष्टोमेश्रूयते" प्रजापतिरकामयतप्रजाःसृजेयेतिसतपोतप्यततस्मात्तेपानात्त्रयोदेवाअसृज्यंतअग्निर्वायुरादित्य

"प्राबल्यमागमस्यैवजात्यातेषुत्रिषुस्मृतं"मितितुवैदिकार्थविषयं । अतएवोक्तं । "क्वचप्रत्यक्षतःप्राप्तमनुमागमबाधितं"मिति। उपक्रमाधिकरणन्यायेनोपसंहारादुपक्रमस्यैवानुपसंजातविरोधित्वाच्च । उक्तंहि । "असंजातविरोधित्वादर्थवादोयथाश्रुतः । व्याख्येयस्तद्विरुद्धस्यविध्युद्देशस्यलक्षणे"ति ।

स्तेतपोतप्यंततेभ्यस्तेपानेभ्यस्त्रयोवेदाअसृज्यंतअग्नेर्ऋग्वेदोवायोर्यजुर्वेदआदित्यात्सामवेद" इत्युपक्रम्यश्रूयते "उच्चैर्ऋचाक्रियतेउपांशुयजुषाउच्चैःसाम्ने" ति । तत्रसंदेहः किमुच्चैष्ट्वादयोऋगादिधर्माः ऋचामंत्रेणयत्क्रियतेतदुच्चैःकर्तव्यमिति । किंवाऋग्वेदादिधर्माः ऋग्वेदेनोच्चैरिति । तत्रक्रियतइतिलकारव्यत्ययेनकुर्यादितिविधेरभिप्रेततयोपसंहारगतेषुविध्युद्देशेषुऋगादिशब्द ॥ १०० ॥
श्रवणादुपक्रमगतार्थवादेऋग्वेदादिशब्दसत्त्वेपिअर्थवादस्यविधिबोधितार्थप्राशस्त्यमात्रप्रतिपादकस्यविधिशेषत्वेनगुणप्रधानयो

SGDF Sri Gargeshwari Digital Foundation

विरोधेप्रधानस्यविध्युद्देशस्यैवानुसरणीयत्वादृगादिधर्मा उच्चैष्ट्वादयः । तथाचार्थवादगतऋग्वेदादिपदंलक्षणयास्वार्थत्यागेनवि
ध्युद्देशानुसारेणऋगादिमात्रपरमेव । एवंचयजुर्वेदेपिऋग्वेदस्यर्चांसत्त्वाद्यजुर्वेदादिगतेष्वप्यृगादिषुउच्चैष्ट्वादयःकर्तव्याइतिपूर्व
पक्षः । सिद्धांतस्तुलब्धात्मनएवप्रधानस्यगुणाद्बलीयस्त्वंवाच्यं । नचेहविध्युद्देशानांऋगादिविषयतयालब्धात्मता । उपक्रमे
वेदशब्दसंकीर्तनेनवेदानामतःपरंकिंचित्विधास्यतइत्याकांक्षायांअनंतरंविधास्यमानस्योच्चैष्ट्वादेर्वेदधर्मत्वावगमात्तदेकवाक्यत 199
यापश्चादापततउपसंहारस्यतद्विरुद्धार्थबोधकत्वासंभवात् असंजातविरोध्युपक्रमगतार्थवादानुसारेणपश्चादापततस्तद्विरुद्धस्यो
पसंहारस्थविध्युद्देशस्यलक्षणैवकार्या । तथाचऋक्शब्दस्यऋग्वेदलक्षकत्वेनोच्चैष्ट्वादयऋग्वेदधर्माएवेति । एवंचऋग्वेदेनयत्क्रिय

लिंगाच्छ्रुतेरिवशीघ्रगामित्वाच । उक्तंच ।

तेतदेवोच्चैःकर्तव्यं अतोयजुर्वेदादिगतेष्वप्यृगादिषुउच्चैष्ट्वादिकंनकर्तव्यंकिंतूपांशुत्वादिकमेवेति । एवंचयथाऽसंजातविरोधि
त्वादुपक्रमस्योपसंहारापेक्षयाप्राबल्यंतथाप्रत्यक्षसिद्धान्पदार्थान्पक्षीकृत्यानुमानंप्रयोक्तव्यं । एवंचसन्घटइत्यादिप्रत्यक्षस्याप्य
संजातविरोधित्वेनप्रबलत्वादद्वैतागमाद्यपेक्षयाप्राबल्यमित्यर्थः । विध्युद्देशस्य विधिर्विधानमेवोद्देशोयस्येतिविध्युद्देशोविधिप्र
तिपादकंवाक्यंतस्येत्यर्थः । लिंगाद्यपेक्षयाशीघ्रगामित्वाच्चप्रत्यक्षस्यप्राबल्यमित्याह ॥ लिंगाच्छ्रुतेरिवेति ॥ तृतीयाध्याये
तृतीयपादे "श्रुतिलिंगवाक्यप्रकरणस्थान (जै० अ० ३. पा. ३ अधि. ७ सूत्र. १४) समाख्यानांसमवायेपरदौर्बल्यमर्थविप्र

SGDF
Sri Gargeshwari Digital Foundation

कर्षात् "इतिबलाबलाधिकरणसूत्रं । तत्रश्रुतिलिंगयोर्विरोधेइदमुदाहरणं । अग्निचयनेश्रूयते "ऐंद्र्यागार्हपत्यमुपतिष्ठत "इति । अत्रलकारव्यत्ययेनगार्हपत्योपस्थानंकुर्यादित्यर्थः । तत्र "प्रवक्षणाअभिनत्पर्वतानांवज्रंजघन्वान्नेंद्रसश्चिदि" त्याद्यैंद्र्याइंद्रप्रकाशिकयाऋचाइंद्रस्योपस्थानंकर्तव्यं उतगार्हपत्यस्याग्नेरितिसंशये "वस्तुशक्त्यनुसारीहिशब्दःसर्वःप्रवर्तत" इतिन्यायेनअशक्यार्थेवस्तुनःकेनापिविनियोक्तुमशक्यत्वादैंद्र्येतितृतीयाश्रुत्याऐंद्रीशक्यएवविनियोक्तव्या । तस्याश्चशक्तिरिंद्रप्रकाशनएवेतितस्यैवोपस्थानंकर्तव्यं । गार्हपत्यशब्दस्तुयज्ञसाधनत्वसाधर्म्यादिनाइंद्रेप्रवर्तयितव्यइतिपूर्वपक्षः । सिद्धांतस्तुयत्रवस्तुनःसर्वथाऽसामर्थ्यंतत्रैवविनियोगोनसंभवति अस्तित्विंद्रशब्दस्यगार्हपत्येगौणंतत् यथोक्तं "गार्हपत्येतुसामर्थ्यंगौणंमंत्रस्यवि

" प्रत्यक्षेचानुमानेचयथालोकेबलाबलं । शीघ्रमंथरगामित्वात्तथेहश्रुतिलिंगयो" रिति ।

द्यत "इति । अवश्यंचमंत्रस्थेंद्रशब्दस्यत्वाविनियोजकवाक्यपरब्राह्मणस्थगार्हपत्यशब्दस्यवाकस्यचिदमुख्यार्थत्वंकल्पनीयं । तच्चमंत्रस्थेंद्रशब्दएवयुक्तं विधौलक्षणायाअन्याय्यत्वात् । नचविध्यनुसारेणऐंद्र्याऋचोलक्षणयागार्हपत्योपस्थानेविनियोगेपि इंद्रप्रकाशनशक्तिरूपयामुख्यवृत्त्यालिंगात्मिक्याइंद्रोपस्थानेविनियोगोस्त्विति वाच्यं । गार्हपत्यमुपतिष्ठतइतिप्रत्यक्षश्रुत्याशीघ्रं मंत्रेविनियुक्तेसतितावतैवमंत्राम्नानस्यचरितार्थतयामंथरगामिलैंगिकविनियोगकल्पनाऽयोगात् । तस्माद्गार्हपत्यस्यैवोपस्थानंकर्तव्यमिति । एवंचप्रकृतेव्याप्त्यादिसापेक्षतयामंथरगाम्यनुमानाद्यपेक्षयाप्रत्यक्षस्यझडित्यर्थावगाहित्वात्प्राबल्यमित्यर्थः ॥ प्रत्यक्षइति ॥ यथालोकेप्रत्यक्षेचानुमानेचशीघ्रमंथरगामित्वात्बलाबलंदृष्टं तथेहश्रुतिलिंगयोरित्यर्थः । एवंचश्रुतिलिंगयोःशीघ्र

मंथरगामित्वेनबलाबलचिंतायां उदाहरणतयाप्रत्यक्षानुमानयोर्गृहीतत्वात्प्रत्यक्षस्यानुमानापेक्षयाप्राबल्यंनिश्चितमस्तीत्याशयः । विशेषविषयत्वाच्चप्रत्यक्षस्यप्राबल्यमुपपादयति ॥ यदाहवनीयइत्यादिना ॥ दशमेध्यायेऽष्टमपादेचिंतितं "अविशेषेणयच्छास्त्रमन्याय्यत्वाद्विकल्पस्यतत्संदिग्धमाराद्विशेषशिष्टंस्या" दित्यत्रज्योतिष्टोमे "अरुणयैकहायिन्यापिंगाक्ष्यागवासोमंक्रीणाती" त्यत्रसोमक्रयणकाले "पदेजुहोतिवर्त्मनिजुहोती" तिश्रूयते । गवांपदसंबंधोयत्रतत्रहोमादिकंकार्यमित्युक्तेऽतिप्रसंगप्राप्तौ गौर्येनवर्त्मनासोमक्रयणार्थंनीयतेतद्वर्त्मनिविद्यमानेपदेहोमःकर्तव्यइतितदर्थः । "गार्हपत्येपत्नीसंयाजान्यजती" त्यादिचश्रूयते तथा "यदाहवनीयेजुहोती" तिच । तत्रहोमसामान्येऽधिकरणतयाश्रुतस्याहवनीयस्यहोमविशेषेऽधिकरणत्वेनविहितवर्त्म

यदाहवनीयेजुहोतीत्यस्मात्पदेजुहोतीत्यस्येवाविशेषविषयत्वाच्च ।

पदगार्हपत्यादिनाविकल्पोबाधोवेतिसंशयेसामान्यविशेषशास्त्रयोर्द्वयोरपिप्रत्यक्षत्वेनक्लृप्ततयाबलाबलानवधारणात्विकल्पइति पूर्वपक्षः । सिद्धांतस्तुसामान्यविशेषशास्त्रयोःक्लृप्तत्वेपिविशेषशास्त्रतःसोमक्रयणार्थंनीयमानावस्थाविशेषकालीनहोमविशेषपत्नीसंयाजादिहोमविशेषेचाधिकरणतयावर्त्मपदगार्हपत्यादेःस्पष्टश्रुत्यैवप्राप्तिः । "यदाहवनीय" इतिसामान्यशास्त्रतस्तु आहवनीयादेःहोमसामान्याधिकरणताविधानाच्छ्रुतहोमसामान्यमुखेनतद्विशेषेलक्षणयाप्राप्तिरित्येवंसन्निकर्षविप्रकर्षसद्भावाद्विशेषविषयैर्वर्त्मपदगार्हपत्यादिभिःसामान्यतोविहिताहवनीयस्यबाधएवेति । एवंचप्रकृतेपिप्रत्यक्षस्यविशेषविषयत्वात्तेनसामान्यविष

यिण्याःश्रुतेरेवबाधइत्यर्थः । कथंप्रत्यक्षश्रुत्योःसामान्यविशेषविषयकत्वमित्यतआह ॥ प्रत्यक्षंहीति ॥ किंचप्रत्यक्षस्यनिरवकाशत्वात्सावकाशश्रुतेःप्राबल्यमित्याह ॥ किंचयथायत्किंचित्प्राचीनमिति ॥ नवमेध्यायेप्रथमपादेचिंतितं "देशबद्धमुपांशुत्वं तेषांस्याच्छ्रुतिनिर्देशात्तस्यचतत्राभावादि "त्यत्र ज्योतिष्टोमेश्रूयते" यत्किंचित्प्राचीनमग्नीषोमीयात्तेनोपांशुचरतीति" । तत्राग्नीषोमीयपश्वालंभनात्पूर्वंयत्किंचित्कर्तव्यंदीक्षाकालमारभ्यक्रियमाणदीक्षणीयेष्टियूपावटबर्हिरास्तरणऋत्विग्वरणादितत्समस्तमपिकर्मकिमुपांशुमंत्रोच्चारणपूर्वकंकर्तव्यमुतनेतिसंशयेऽग्नीषोमीयात्पूर्वतनंसमस्तमप्युपांश्वेवकर्तव्यं समस्तव्यक्तिवाचिया

प्रत्यक्षंहिविशिष्यघटसत्वग्राहि । श्रुतिस्तुसामान्येनद्वितीयनिषेधिका । किंचयथा "यत्किंचित्प्राचीनमग्नीषोमीयात्तेनोपांशुचरती" त्यत्रत्यस्ययत्किंचिच्छब्दस्यप्रकृतविशेषवाचित्वेनसामान्याविषयत्वेपि

वदर्थकयत्किंचिच्छब्दश्रवणात् । अन्यथायत्किंचिच्छब्दोव्यर्थःस्यात् इतिपूर्वपक्षेप्राप्तेसिद्धांतितं । नाग्नीषोमीयात्प्राचीनंसमस्तमुपांशुकर्तव्यं तत्साधकाभावात् । नचयत्किंचिच्छब्दोस्तीतिवाक्यं । तस्यप्रकृताग्नीषोमीयपूर्वकालीनदीक्षणीयादिसमस्तविशेषवाचित्वेनसामान्याविषयत्वेपिदीक्षणीयाव्यतिरिक्तेतस्यसावकाशत्वेनसंकोचकरणात् । कुतइतिचेत् "यावत्यावाचाकामयीत तावत्यादीक्षणीयायामनुब्रूयादि" तिनिरवकाशवाक्यसद्भावात् । अतोग्नीषोमीयात्प्राक्दीक्षणीयेष्टिव्यतिरिक्तमेवोपांशुकर्तव्यमिति ॥ प्रकृतेति ॥ प्रकृताग्नीषोमीयपश्वालंभपूर्वकालीनदीक्षणीयेष्टिऋत्विग्वरणयूपावटादिसमस्तविशेषवाचित्वेनेत्य

SGDF
Sri Gargeshwari Digital Foundation

र्थः ॥ दीक्षणीयेति ॥ प्रकृतविशेषेष्वपीतिशेषः । ननुतर्हिप्रकृतेश्रुतिप्रत्यक्षयोःकथंसावकाशत्वनिरवकाशत्वेइत्यतस्तदुपपादयति ॥ तथावृत्त्यंतरेणेत्यादिना ॥ "तत्त्वमसीत्यादौ" वृत्त्यंतरेणलक्षणया "ब्रह्मैवसन्ब्रह्माप्येती" त्यादौब्रह्मशब्दस्यानेकार्थत्वेन "सर्वएकीभवंती" त्यादौस्थानैक्यादिरूपविषयांतरपरत्वेनवाऽद्वैतश्रुतेःसावकाशत्वमित्यर्थः ॥ निरवकाशेनेति ॥ वृत्त्यंतरादिनावकाशानर्हेणेत्यर्थः । पूर्वसामान्यविशेषभावेनबाधेतात्पर्यं अत्रतुसावकाशत्वादिनासंकोचेइतिभेदः । यद्यपिसा

दीक्षणीयाव्यतिरिक्तेसावकाशत्वात् "यावत्यावाचाकामयीततावत्यादीक्षणीयाया
मनुब्रूया" दित्यनेननिरवकाशेनसंकोचः । तथावृत्त्यंतरेणवाअनेकार्थत्वेनवाविषयांतर
परत्वेनवासावकाशायाःश्रुतेर्निरवकाशेनाक्षेणसंकोचःकिंनस्यात् । किंचपंचदशरा
त्रेप्रथमेहनिअग्निष्टुन्नामकेनामातिदेशेनएकाहाग्निष्टुद्धर्मभूतासुब्रह्मण्याग्नेयीप्राप्ता ।

मान्यविशेषभावस्थलेपिसावकाशत्वादिनासंकोचएवक्रियते तथाप्युदाहरणभेदेनशब्दभेदेनचोपपादनमात्रमितिद्रष्टव्यं । किंच "बहुबाधस्यान्याय्यत्वादि" तिन्यायेनद्वैतग्राहिप्रत्यक्षादिबहुप्रमाणाऽबाधायाऽद्वैतवाक्यस्यप्रतीतार्थबाधएवकार्यइत्याशयेनाह ॥ किंचपंचदशरात्रइत्यादिना ॥ द्वादशाध्यायेद्वितीयपादेचिंतितं । "जै. अ. १२. पा. २. अधि. ७ सू. २२ विप्रतिषिद्धधर्माणांसमवायेभूयसांस्यात्सधर्मत्व" मित्यत्र । अयमत्राधिकरणनिष्कर्षः । अस्तिपंचदशरात्राख्यंसत्रंपंचदशसुत्यात्मकं

SGDF
Sri Gargeshwari Digital Foundation

204

तस्यप्रथमंसौत्यंअहरग्निष्टुन्नामकं ततःपराणित्रीण्यहानि ज्योतिर्गौरायुरित्येतन्नामकानि । अग्निष्टुत्ज्योतिर्गौरायुरित्येतन्नामकाऐ
काहिकाःप्रसिद्धाः॥ अपरेपिक्रतवोवर्तंते।तिषांनामान्यग्निष्टुदादीनि तदीयेतिकर्तव्यताप्राप्त्यर्थंपंचदशरात्रस्यप्रथमदिवसचतुष्टये
स्थाप्यंते । ततःपराण्येकादशाहानिद्वादशाहक्रतुप्रकृतिकानि । तत्रपंचदशस्वप्यहस्सुउपसदःसंति । आज्यहविष्काइष्टयोह्युप
सदइत्युच्यंते । तत्रसुब्रह्मण्यानामकायजुर्वेदीयनिगदविशेषाःसंति। तत्र" यदस्यकर्मणोत्यरीरिचंयद्वान्यूनमिहाकरं । अग्निष्ट
त्स्विष्टकृद्विद्वान्सर्वंस्विष्टंसुहुतंकरोत्वि" त्याग्नेयीसुब्रह्मण्या । "गौरावस्कंदिन्मेधातिथेमेषवृषाणअहल्यायैजारे" त्यैंद्रीसुब्रह्म
ण्या । इत्येवंसुब्रह्मण्याद्वयमस्ति । तेनाग्नींद्रयोराह्वानंतत्रोपसत्कालेकार्यं । तत्रपंचदशरात्रस्ययत्प्रथममहरग्निष्टुन्नामकंतत्रोपस
त्कालेएकाहाग्निष्टुन्नामधेयसाम्येन आग्नेयीसुब्रह्मण्याप्राप्ता । एकाहाग्निष्टुतिउपसत्कालेआग्नेय्याःसुब्रह्मण्यायाःसत्त्वात् । ज्यो
तिर्गौरायुरित्येतत्संज्ञकेषुत्रिष्वहस्सुक्रियमाणोपसत्कालेज्योतिर्गौरायुरित्येतत्संज्ञकैकाहनामधेयसाम्येनैंद्रीसुब्रह्मण्याप्राप्ता । ऐ
काहिकज्योतिरादिदिवसेउपसत्कालेऐंद्र्याःसुब्रह्मण्यायाःसत्त्वात् । परिशिष्टेष्वेकादशाहस्सुक्रियमाणोपसत्कालेऐंद्र्येवसुब्रह्मण्या
चोदकेनप्राप्ता । एतत्प्रकृतिभूतेद्वादशाहक्रतौक्रियमाणोपसत्कालेऐंद्र्याःसुब्रह्मण्यायाःसत्त्वात् । एवंचपंचदशरात्रेआद्याहीयो
पसदःआग्नेयीसुब्रह्मण्याअंगं । परिशिष्टानांचतुर्दशानामह्नांऐंद्रीअंगं । तत्रचैंद्रीत्रिषूपसत्कालेनामधेयेनप्राप्नोति । एकादशाह
स्सुचचोदकेनेतिविवेकइतिवस्तुगतिः । तत्राग्निष्टुन्नामकेप्रथमेह्निउपसत्कालीनसुब्रह्मण्यायांसंदेहः किमाग्नेयीआह्वातव्याऐंद्री
ति । ननुप्रथमेह्निउपसत्कालेऐंद्र्याःप्राप्तेरेवाभावात्संदेहएवानुपपन्नइतिचेत् संप्रदायानभिज्ञोसि । याउपसदस्ताऐंद्र्यइतिसामा

SGDF
Sri Gargeshwari Digital Foundation

न्यश्रुत्याउपसन्मात्रस्यइंद्रदेवताकत्वावगमेनऐंद्र्याःसुब्रह्मण्यायाअग्निष्टुन्नामकप्रथमाहःसंबंध्युपसत्कालेपिप्राप्त्यासंशयसंभवात् । तत्रैकाहाग्निष्टुदुपसदःआग्नेयीसुब्रह्मण्यांगत्वेनतन्नामसाम्येनप्रथमोपस्थितत्वेनमुख्यत्वात् । असंजातविरोधित्वेनचाग्नेय्येवआह्वातव्या । नत्वैंद्री चरमोपस्थितत्वेनसंजातविरोधित्वेनचामुख्यत्वात् । तथाचैतदनुसारेणचतुर्दशाहस्स्वप्याग्नेय्येवाह्वातव्येतिपूर्वपक्षः । सिद्धांतस्तुऐंद्र्येवाह्वातव्येति । चतुर्दशस्स्वहस्सुउपसत्कालेऐंद्र्याआहूयमानत्वात् । भूयसांसाधर्म्यायात्रापिऐंद्र्येवाह्वातव्या । बहुबाधस्यान्याय्यत्वात् । “त्यजेदेकंकुलस्यार्थे” इतिन्यायादिति । प्रथमेह्नीत्यनंतरंउपसत्कालइतिशेषः ॥ अ

तस्याअल्पविषयायाश्चतुर्दशाहस्सुचोदकेनप्राप्तयाऐंद्र्याबहुविषययाबाधः । बहुबाधस्यान्याय्यत्वात् । तथाद्वैतग्राहिप्रत्यक्षतदुपजीव्यनुमानकर्मकांडसृष्ट्यादिवाक्यसगुणोपासनावाक्यादिरूपबहुप्रमाणाबाधायाद्वैतवाक्यस्यप्रतीतार्थबाधःकिंनस्यात् ।

ल्पविषयायाइति ॥ अग्निष्टुन्नामकप्रथमाहस्संबंध्युपसन्मात्रविषयत्वादित्यर्थः । ननुचतुर्दशाहस्सुचोदकप्राप्तयेत्यनुपपन्नं । उक्तरीत्याएकादशस्वेवाहस्सुचोदकेनप्राप्तेःत्रिष्वहस्सुचनामधेयेनैवप्राप्तेर्निर्णीतत्वादितिचेत्सत्यं । चोदकेनेत्यनंतरंनामधेयसहितेनेतिशेषः । तथाचनामधेयसहितेनचोदकेनप्राप्तयाऐंद्र्येत्यर्थोद्रष्टव्यः । तत्रत्रिषुनामधेयेनएकादशसुचोदकेनेतिविवेकः । ननुकथमत्रद्वैतग्राहिप्रमाणानांबहुत्वमित्यतआह ॥ तथाद्वैतग्राहीति ॥ द्वैतग्राहिबहुप्रमाणविरोधादेवाद्वैतवाक्यस्यप्रतीता

SGDF
Sri Gargeshwari Digital Foundation

थेंऽप्रामाण्यमित्यत्रभगवत्पादवाक्यंसंवादयति ॥ तदुक्तमिति ॥ ९ ॥ प्रत्यक्षस्यजात्योपक्रमादिन्यायैश्चप्राबल्यविव रणं ॥ १० ॥ श्रुतेःस्मृतिरिवइति ॥ स्मृतीनांश्रुतिमूलकत्वेनोपजीव्यत्वाद्यथाश्रुतेःस्मृतितःप्राबल्यंतथाद्वैतग्राहिप्रत्यक्षस्याप्य द्वैतश्रुत्यपेक्षयाप्राबल्यमित्यर्थः । तदुपपादयति ॥ तच्चेति ॥ तच्चोपजीव्यत्वेनप्राबल्यं अक्षेणचाक्षुषप्रत्यक्षेण ग्राह्यत्वाद्धेतो रित्यन्वयः ॥ अनुमितिकारणस्येति ॥ स्वरूपसतःपक्षादेरनुमितिकारणत्वाभावात्कथमेतत् । नचपक्षशब्देनतज्ज्ञानग्रहणं

तदुक्तं "बहुप्रमाणविरोधेचैकस्याप्रामाण्यंदृष्टंशुक्तिरजतादावि" ति ॥ ९ ॥ इतिप्रत्यक्षस्यजा त्योपक्रमादिन्यायैश्चप्राबल्यं ॥ १० ॥ किंचोपजीव्यत्वात्प्राबल्यमक्षस्य श्रुतेःस्मृतिरिव । तच्चाक्षेणानुमितिकारणस्यपक्षसाध्यहेतुव्याप्त्यादेःशाब्दधीहेतोःशब्दस्वरूपस्यतद्धर्मस्ययोग्य तादेःउपक्रमोपसंहारैकरूप्यादेःअनुमितिशाब्दधीस्वरूपतत्प्रामाण्यादेश्चग्राह्यत्वात् । यदाहि घटोव्यापकःसत्वादित्यत्राक्षंधर्मिमात्रग्राहित्वेनशुचिनराशिरःकपालंप्राण्यंगत्वादित्यत्रशब्दः

तथात्वेऽक्षेणपक्षस्यग्राह्यत्वादित्युक्त्ययोगात् । उच्यते । अनुमितिकारणस्येत्येतत्अनुमितिप्रयोजकस्येतिव्याख्येयं । पक्षादी नांचज्ञानद्वाराप्रयोजकत्वंत्वस्तीतिध्येयं ॥ शब्दस्वरूपस्येति ॥ तस्यज्ञानकरणत्वादितिभावः । उपक्रमोपसंहारयोर्यदैकरूप्यं तदादेः ॥ धर्मिमात्रग्राहित्वेनेति ॥ एतदनुमानबाधकंयदक्षंतस्यव्यापकत्वविरोधिपरिच्छिन्नपरिमाणग्राहकस्यपक्षीभूतघट

तथा च "असंजातविरोधित्वं तथा स्या[illegible]प्रमाणिता । विरोधविजयित्वं च तथा निरवकाशता। बाहुल्यमेतत्त्रयं चैव कारणं बलनिर्णये" ॥ इति ॥

प्रत्य० उप० जीव्य

206

SGDF
Sri Gargeshwari Digital Foundation

ग्राहकत्वेनैवोपजीव्यत्वं । यदिचसत्त्वरूपहेतुग्राहकत्वेनाप्युपजीव्यत्वंब्रूयास्तर्हिसिद्धांतेऽतिरिक्तसत्तायाअभावात्तस्याअपिपक्ष कोटावेवनिवेशइत्यवधेयं । प्राण्यंगत्वादित्यनंतरंशंखवदितिशेषः ॥ **साध्यमात्रग्राहित्वेनेति** ॥ दृष्टांतेसाध्यग्राहकागमजातीयत्वमात्रेणेतिव्याख्येयं । अयमभिप्रायः । नरशिरःकपालंशुचिप्राण्यंगत्वाच्छंखवदितिनरशिरःकपालशुचित्वानुमानस्य बाधकतयाऽभिप्रेतोयो "नारंस्पृष्ट्वास्थिसस्नायुसवासाजलमाविशे" दित्यशुचित्वागमस्तस्यदृष्टांतेशंखेशुचित्वग्राहकोयः "त्रैलोक्येयानितीर्थानिवासुदेवस्यचाज्ञया । शंखेतिष्ठंतिविप्रेंद्रतस्माच्छंखंप्रपूजये" दित्याद्यागमस्तज्जातीयत्वमात्रेणप्राबल्यमितिसंप्र

साध्यमात्रग्राहित्वेनमनोविभुज्ञानासमवाय्याधारत्वा
दित्यत्रानुमानंहेतुमात्रग्राहित्वेनाऽनुमानस्योपजीव्यं ।

दायः ॥ **ज्ञानासमवायीति** ॥ ज्ञानासमवायिकार(णभूतात्म)णात्ममनस्संयोगाधारत्वादात्मवदित्यर्थः ॥ **हेतुमात्रेति** ॥ "युगपज्ज्ञानानुत्पत्तिर्मनसोलिंग" मित्युक्तत्वेनयत्संयोगवशाज्ज्ञानेक्रमःप्रक्रमते ✗ तदेकंक्रमिकज्ञानासमवायिकारण(भूतसं)संयोगाधारभूतंकिंचिद्द्रव्यमणुभूतमंगीकार्यं । तथाचमनोविभुत्वानुमानस्यबाधकीभूतंयत् "सुखादिप्रतीतिःक्रमिकसंयोगवत्करणसाध्याक्रियात्वाच्छिदिक्रियावदि" त्येवमाद्यनुमानं तत्हेतुमात्रग्राहकत्वेनोपजीव्यमित्यर्थः । यद्यपीदंपक्षीभूतमनोग्राहकमपीतिनहेतुमात्रग्राहकं तथापिज्ञानासमवाय्याधारत्वेनैवमनोग्राहकं । नमनस्त्वेनकेवलंमनःस्वरूपमात्रग्राहकमितिसंप्रदायः ॥

207

SGDF
Sri Gargeshwari Digital Foundation

सर्वेति ॥ व्याप्त्याद्यशेषेत्यर्थः । ननुयुष्माभिःसन्घटइत्यादिचाक्षुषप्रत्यक्षविरोधोऽभिहितस्तस्यदृश्यत्वादिलिंगापेक्षितग्राहित्वे नोपजीव्यत्वेपि "नेहनाने" त्यादिशब्दस्वरूपादिग्राहकत्वाभावाच्छब्दापेक्षितसर्वग्राहित्वेनकथमुपजीव्यत्वं येनप्राबल्यंस्यादि त्यतआह ॥ चक्षुरादेरिति ॥ सन्घटइत्यादिसत्त्वग्राहिणइत्यर्थः ॥ तद्ग्राहीति ॥ शब्दस्वरूपग्राहिश्रोत्रं तज्जन्यज्ञानप्रामाण्यादि ग्राहीसाक्षीतिध्येयं ॥ रूपादीति ॥ रूपादीनामपिपक्षत्वात्रूपादिरूपधर्म्यंशइतिवारूपादिमद्धटादिप्रपंचरूपधर्म्यंशइतिवार्थः ।

तदेहप्रत्यक्षंलिंगशब्दापेक्षितसर्वग्राहीतिकथंनोपजीव्यं । चक्षुरादेःशब्दतज्ज न्यज्ञानप्रामाण्याद्यग्राहित्वेपितद्ग्राहिश्रोत्रसाक्ष्यादिसजातीयत्वात् । रूपा दिधर्म्यंशेसाक्षादुपजीव्यत्वाच्चप्राबल्यं । दृष्टंचनरशिरःकपालाशुचित्वागम स्यतच्छुचित्वानुमानादुपजीव्यशुचित्वग्राहिशब्दसाजात्यमात्रेणप्राबल्यं ।

ननुसाक्षादनुपजीव्यस्यउपजीव्यसजातीयत्वमात्रेणप्राबल्यमदृष्टचरमित्यतआह ॥ दृष्टंचेति ॥ अशुचित्वागमस्य "नारंस्पृ ष्ट्वे" त्यादेरित्यर्थः ॥ तदिति ॥ नरशिरःकपालेत्यर्थः ॥ उपजीव्यशुचित्वेति ॥ दृष्टांतीभूतेशंखेशुचित्वग्राहितयोपजीव्य भूत "त्रैलोक्येयानी "त्यादिशब्देत्यर्थः । नन्वथापिअनुमानंप्रतिप्रत्यक्षंयथोपजीव्यं तथाप्रत्यक्षंप्रत्यनुमानमप्युपजीव्यं ज्ञाते नहिचक्षुरादिनाघटादिसत्त्वंगृह्यतइतिवक्तव्यं । तत्स्वरूपज्ञानंचरूपादिज्ञानजन्यं । तथाचानुमानस्ययथाव्याप्त्याद्यंशेप्रत्यक्षा

208

पेक्षा तथाप्रत्यक्षस्यापिस्वस्वरूपसिद्धिंप्रत्यनुमानापेक्षातुल्येत्याशंक्यनिराकरोति ॥ यद्यपीति ॥ तथापीति ॥ इंद्रियस्याऽ ज्ञातकरणत्वाज्ज्ञानजननार्थं नस्वस्वरूपज्ञानापेक्षा । अनुमानादीनांतुज्ञानजननार्थमेवप्रत्यक्षापेक्षेतिविशेषसद्भावान्नानुमाप्रत्य क्षंप्रत्युपजीव्येत्यर्थः । नन्वनुमानविरुद्धत्वात्प्रत्यक्षस्यैवाप्रामाण्यंकिंनस्यादित्यतआह ॥ अक्षेति ॥ तदिति ॥ चक्षुस्साक्ष्या दीत्यर्थः । अनुमाननिष्ठव्याप्त्यादेःशब्दनिष्ठयोग्यतादेरितिविवेकः । व्याप्त्यादेर्बाधेऽनुमेयस्ययोग्यतादेर्बाधेशब्दार्थस्यचकुतो

209

यद्यपींद्रियमनुमेयं तथापितस्याज्ञातकरणत्वान्नानुमोपजीव्या । अक्षाप्रामाण्येहितत्सिद्धस्य व्याप्त्यादेर्योग्यतादेश्चबाधेनानुमेयस्यशब्दार्थस्यचबाधःस्यात् । अनुमेयस्यव्याप्त्यादिनानुमि तिप्रामाण्यादिनाशब्दार्थस्यचयोग्यतादिनाशाब्दधीप्रामाण्यादिनाचतुल्ययोगक्षेमत्वात् ।

बाधइत्यतस्तदुपपादयति ॥ अनुमेयस्येत्यादिना ॥ तुल्येति ॥ समसत्ताकत्वादित्यर्थः । नन्विदमयुक्तंअनुमेयस्यव्याप्त्या दिसमसत्ताकत्वनियमाभावात् धूलीपटलेधूमभ्रमादिनानुमितिर्जायते । तत्रदैवाद्वह्निरप्यस्ति तथाचतत्रानुमेयस्यव्यावहारि कत्वेनव्याप्त्यादेःप्रातिभासिकतयाऽनुमेयस्यव्याप्त्यादिनासमसत्ताकत्वाभावाद्व्यभिचारइतिचेत् । अत्रवदंति । अत्रव्याप्त्यादी त्यादिपदेनचित्रगुमानयेत्यादिवदतद्गुणसंविज्ञानबहुव्रीहिणापंच[1]रूपमध्येऽबाधितत्वाख्यंरूपंग्राह्यं । तथाचानुमेयस्याबाधितत्व

१ पक्षवृत्तित्वसपक्षवृत्तित्वविपक्षावृत्तित्वाबाधितत्वासत्प्रतिपक्षत्वानिपंचरूपाणि ।

SGDF Sri Gargeshwari Digital Foundation

इदं चानुमाने बाधयत्वं । शब्दे तु इतरपदार्थसंसर्गे परपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वाभावरूपाया योग्यताया बाधे शब्दार्थबाधः तं रंगिणी ॥

रूपेणसमसत्ताकत्वनियमोभिप्रेतः । एवंचाक्षाप्रामाण्ये[1]तद्गृहीतस्यसाध्याभा(वप्रमाभावरू)वाप्रमारूपाबाधितत्वस्यापिबाधेना
नुमेयस्यापिबाधोनियतएवेति । गुरुचरणास्तु यादृच्छिकस्थलेऽनुमेयस्यस्वतःसिद्धत्वेनव्याप्त्यादिबलसिद्धसिद्धिकत्वाभावात् ।
तथात्वेवह्निरहितस्थलेपिकदाचिद्धूलीपटलेधूमभ्रमेणापिवह्निसिद्ध्यापत्तेः (अतो)ततोव्याप्त्यादिबलसिद्धसिद्धिकंयदनुमेयंतद्व्या
प्त्यादिसमसत्ताकं यथाधूमानुमानेव(ह्न्यादीति)ह्निरितिव्याप्तेरत्राभिप्रेतत्वात् । अस्याश्चव्यभिचाराभावाद्व्याप्त्यादीत्येतद्यथा

अन्यथाप्रातिभासिकव्याप्त्यादिमताबाष्पाध्यस्तधूमेनतात्विकोव्यावहारिको(वह्निः)वाग्निःव्यावहारि
कव्याप्त्यादिमताचधूमेनतात्विकोऽग्निःव्यावहारिकेणाबाधेनविरुद्धधर्माधिकरणत्वेनचविश्वस्यजीवेश
भेदस्यचतात्विक(स)त्वंसिध्येत् । प्रातिभासिकयोग्यतादिमताऽनाप्तवाक्येनचतात्विकोव्यावहा
रिकोवार्थःव्यावहारिकयोग्यतादिमताचलौकिकवाक्येनाग्निहोत्रादिवाक्येनचतात्विकोर्थःसिध्येत् ।

स्थितमेवेत्युपदिशंति । अतएवोक्तंसुधायां "यादृच्छिकस्थलेव्याप्त्यादिबलसिद्धसिद्धिकत्वाभावादनुमेयस्ये"ति ॥ अन्यथेति॥
अनुमेयस्यव्याप्त्यादिसमसत्ताकत्वाभावइत्यर्थः । वह्निः ह्रदे व्यावहारिकव्याप्त्यादिमतेत्येतत्व्यावहारिकाबाधितत्ववतेति
व्याख्येयमित्याहुः । व्यावहारिकेणाबाधेनविश्वस्यतात्विकत्वंव्यावहारिकेणविरुद्धधर्माधिकरणत्वेनजीवेशभेदस्यचतात्विकत्वं ॥ १०६ ॥
सिध्येदित्यन्वयः । शब्दार्थस्ययोग्यतादिनासमसत्ताकत्वाभावेऽतिप्रसंगमाह ॥ प्रातिभासिकेति ॥ नन्वयंप्रदेशोबिंबवान्

SGDF
Sri Gargeshwari Digital Foundation

प्रतिबिंबवत्त्वादितिप्रतिबिंबेनबिंबानुमानंक्रियते तत्रबिंबस्यसत्यत्वात्प्रतिबिंबस्यप्रातिभासिकतयामिथ्यात्वेनतत्रसामानाधिकरण्यगर्भव्याप्तेरेवाभावात्कथंसत्यभूतबिंबरूपाऽनुमेयस्यव्याप्त्यादिसमसत्ताकत्वमित्यतआह ॥ प्रतिबिंबस्येति ॥ प्रतिबिंबस्यमिथ्यात्वेनसाध्यसामानाधिकरण्यरूपव्याप्त्यभावेपिबिंबरहितस्थलेऽवृत्तित्वंवाबिंबराहित्येनावृत्तित्वंवाव्याप्तिरस्त्येव । तथाचप्रतिबिंबस्यसत्यत्ववादिमतेपिबिंबरहितावृत्तित्वमस्त्येव । प्रतिबिंबस्यमिथ्यात्ववादिमतेपिप्रतिबिंबस्यसत्यत्वाभावादेवप्रतिबिंबर

प्रतिबिंबस्यमिथ्यात्वेपिबिंबरहितावृत्तित्वरूपाव्याप्तिरस्त्येव । नचधूमस्यतात्विकाग्निनानव्याप्तिःदृश्यत्वस्यतुतात्विकमिथ्यात्वेनव्याप्तिरित्यस्ति । न(चा)ह्यद्यापिमिथ्यात्वप्रमाणंतत्वावेदकमन्यदतत्वावेदकमितिव्यवस्थासिद्धा । येनक्लृप्तनियमत्यागः । अकस्मात्त्यागेचदृश्यत्वस्यमिथ्यात्वनियमोपित्याज्यः ।

हितावृत्तित्वमस्त्येव । अविनाभावरूपव्याप्तिरस्त्येवेत्यर्थः । ननुधूमाद्यनुमानस्यातत्वावेदकत्वेनतन्निष्ठव्याप्त्यादेरपिव्यावहारिकत्वेनाग्नेरपिव्यावहारिकतयातात्विकत्वाभावेनानुमेयस्यव्याप्त्यादिसमसत्ताकत्वमस्ति । दृश्यत्वानुमानस्यतुतत्वावेदकतयाव्याप्त्यादिसमसत्ताकत्वाभावेपिनदोषइत्यप्रयोजकतायामाह ॥ नचेति ॥ कुतोनचेत्यतआह ॥ नहीति ॥ कारणंविनापिक्लृप्तनियमत्यागे बाधकमाह ॥ अकस्मादिति ॥ एवमनुमेयस्यव्याप्त्यादिसमसत्ताकत्वमुपपाद्यानुमितिप्रामाण्यादिनापिसमसत्ताकत्वमुपपादयि

२१

SGDF
Sri Gargeshwari Digital Foundation

212

तुमुत्तरोग्रंथः। तत्रेदमाशंकते॥ नन्विति ॥ तथापीति ॥ अनुमेयस्यव्याप्त्यादिसमसत्ताकत्वेसत्यपीत्यर्थः॥ कथमिति ॥ येना
नुमितिप्रामाण्यस्यसत्यत्वेऽनुमेयस्यसत्यत्वंस्यादितिभावः। अप्रमाणत्वेन अतत्वावेदकप्रमाणत्वेन। तद्विषयस्यअतत्वावेदकप्रमा
णविषयस्य। तथाचानुमित्यादिप्रामाण्यग्राहकस्यप्रत्यक्षस्याप्रामाण्येऽनुमितिप्रामाण्यस्यापिमिथ्यात्वापत्त्याविषयस्यानुमेयस्यापि
मिथ्यात्वमेव। प्रमाणांतरेणतत्सि(द्धेरसं)द्ध्यसंभवात् प्रत्यक्षस्यचाप्रमाणत्वात्। अद्वैतश्रुतिजन्यज्ञानप्रामाण्यग्राहकस्यप्रत्यक्षस्याप्र

ननुतथापिकथंप्रामाण्यमिथ्यात्वेविषयमिथ्यात्वं। प्रत्यक्षस्याप्रमाणत्वेनतद्विषयस्यश्रौ
तधीप्रामाण्यस्यमिथ्यात्वेपिश्रुतेःप्रमाणत्वात्तद्बोध्याद्वैतस्यसत्यत्वोपपत्तेरितिचेन्न ।
रूप्यादिज्ञानेषुप्रामाण्यमिथ्यात्वेविषयमिथ्यात्वदर्शनात् । अर्थाबाधरूपप्रामाण्य
स्यातात्विकत्वेऽर्थस्यतात्विकत्वायोगाच्च । यत्तूक्तंवाचस्पतिना "उपजीव्यविरोधे
नश्रुत्यप्रामाण्येइदंरूप्यमितिपूर्वधीविरोधान्नेदंरूप्यमितिधीरप्रमास्यादि" ति तन्न ।

माणत्वेन तद्विषयस्यश्रौतधीप्रामाण्यस्यमिथ्यात्वेपिश्रुतिबोध्याद्वैतस्यसत्यत्वमुपपद्यते। श्रुतेःप्रमाणत्वेनतयैवतत्सिद्धिसंभवादि
त्यर्थः॥ अर्थाबाधेति॥ अर्थाबाधरूपप्रामाण्यस्यार्थसत्त्व(घटिततया)पर्यवसन्नतयाप्रामाण्यबाधेऽर्थबाधएवेतिभावः। ननुश्रुतेः ॥ १०७ ॥
प्रमाणत्वात्तद्बोध्याद्वैतस्यसत्त्वमुपपद्यतइतिचेन्न। श्रुतेरन्यार्थत्वेनस्वार्थेतात्पर्याभावादित्याशयात्॥ उक्तमिति ॥ किंचोपजी

व्यत्वात्प्राबल्यमक्षस्येत्येतदुपरिसमाधानमुक्तमित्यर्थः। पूर्वधीत्युक्त्याउपजीव्यत्वमुक्तंभवति। नेदंरूप्यमितिधीरेव ॥ यत्प्रामा
ण्यमिति ॥ अनुमित्यादिप्रामाण्यंस्वस्वरूपसिद्ध्यर्थंसाक्षिप्रामाण्यायत्तंव्याप्त्यादिज्ञानप्रामाण्यायत्तंचभवतीतितत्तस्योपजीव्यं।
नन्वेवमनुमितिप्रामाण्यस्यस्वरूपसिद्ध्यर्थंस्वोत्पत्त्यर्थंव्याप्त्यादिज्ञानप्रामाण्या(धीनत्वे)यत्तत्वेप्रामाण्यस्यगुणजन्यत्वापत्त्यापर
तस्त्वापत्तिरित्यतउक्तं ॥ अपवादनिरासार्थंवेति ॥ तथाचानुमित्यादिप्रामाण्यंतार्किकमतेउत्पत्तौव्याप्त्यादिज्ञानप्रामाण्या 213

यत्प्रामाण्यंस्वरूपसिध्यर्थंअपवादनिरासार्थंवायत्प्रामाण्यायत्तंतत्तस्योपजीव्यं । इहनच[1]व्याप्त्या
दिज्ञानाप्रामाण्येनुमित्याद्यप्रामाण्यवत्सर्वज्ञ(त्वनिर्दुःख)त्वादिरूपब्रह्मबुध्यप्रामाण्येब्रह्मात्मैक्यबु —तरं गि भी पश्यत
ध्यप्रामाण्यवच्चप्रतिषेध्यज्ञानाप्रामाण्येप्रतिषेधकज्ञानाप्रामाण्यं। येनतदुपजीव्यंस्यात्। यद्वायेनवि
नायस्यानुत्थानंतत्तस्योपजीव्यं। इदंरूप्यमितिधीश्चप्रतिषेध्यार्पकतयाधर्म्यर्पकतयाचोपजीव्यैव।

यत्तं। अस्मन्मतेत्वपवादनिरासार्थंबुद्धिदोषनिरासार्थंयत्प्रामाण्यायत्तंतत्तस्योपजीव्यमित्यर्थः। यत्प्रामाण्याधीनसिद्धिकंयत्प्रा
माण्यंतत्तस्योपजीव्यमित्यर्थो(बोद्धव्यः)द्रष्टव्यः। एवंसतिपूर्वस्येदंरूप्यमितिज्ञानस्योपजीव्यत्वमेवनास्तीत्याह ॥ नचेति ॥
सर्वज्ञत्वादीति ॥ ब्रह्मात्मैक्यबोधनेस्वरूपमात्रस्यनोपजीव्यत्वं । तथात्वेचैतन्यंचैतन्याभिन्नमितिबोधनापत्त्यासिद्धार्थबोध
नापत्तेः। तथाचसर्वज्ञत्वादिविशिष्टंचैतन्यंआत्माभिन्नमितिबोधनीयं । तथाचसर्वज्ञत्वादिविशिष्टब्रह्मबुद्धेरुपजीव्यत्वात्तदप्रा

1 अत्राव्याप्त्यादिज्ञानस्य विज्ञानबहुव्रीहिणा अबाधितत्वा पर्यवसानमेव। अन्यथा पूर्वोक्तरीत्या अतिप्रसक्तेः ॥ कुतर्किणा ज्ञायमानेयामवि
तस्यामप्रामाण्याभावात्

SGDF Foundation

see तरंगिणी । 1 प्रबलं इति शोध: योगक्षेम "

माण्येतदुपजीविब्रह्मात्मैक्यबुद्धेरप्यप्रामाण्यमेवेत्यर्थः । प्रतिषेध्यज्ञानं इदंरूप्यमितिज्ञानं ॥ नदोषइति ॥ उपजीव्यत्वेकथं बाध्यत्वमितिदोषोनेत्यर्थः ॥ तंत्रमिति ॥ येनइदंरूप्यमितिज्ञानमुपजीव्यं[1]स्यादित्यर्थः ॥ परीक्षितत्वेति ॥ इदंरूप्यमिति ज्ञानंचापरीक्षितमितिभावः । येनविनेत्यादिरूपंपूर्वमुक्तमुपजीव्यत्वंपरीक्षितत्वविशेषितमेवप्राबल्येतंत्रमित्येवंनास्माकमेवपरी क्षितत्वविशेषणमावश्यकं किंनामभट्टोक्तंपश्चात्तनत्वापरपर्यायंपरत्वंप्राबल्येप्रयोजकमित्यंगीकुर्वतस्तवाप्यावश्यकमित्याह ॥

तथापिनदोषः । नह्युपजीव्यत्वमेवप्राबल्येतंत्रं । किंतुपरीक्षितत्वविशिष्टं । उक्तंहि "यावच्छ क्तिपरीक्षायामुपजीव्यस्यबाधने । दोषोनाशोधितेदोषउपजीव्यत्वमस्त्वल" मिति । नहिपर त्वंप्राबल्येतंत्रमितित्वन्मते[1]पिपरत्वमात्रंतंत्रं । किंतुपरीक्षितत्वविशिष्टं । अन्यथाप्रमानंतरभ्र मस्यवेदात्परस्यबाह्यागमस्यचतत्त्वंस्यात् । परीक्षितत्वंचनतावत्प्रतिषेध्यार्पकेशुक्तिरूप्या

नहीति ॥ इति भट्टेनांगीकृतत्वाद्धेतोः । त्वन्मतेपि व्यवहारेभट्टनयइत्यंगीकुर्वतस्तवमतेपि । परत्वमात्रमेवकुतोनप्राबल्येतं त्रमित्यतआह ॥ अन्यथेति ॥ बाह्येति ॥ वेदस्यापौरुषेयत्वेनपूर्वत्वात्बाह्यागमस्यबौद्धागमस्यपौरुषेयत्वेनपश्चात्तनत्वादिति भावः । तत्त्वंस्यात् प्राबल्यंस्यात् । ततश्चभ्रमबाह्यागमाभ्यांप्रमावेदयोरेवबाधापत्तिरितिभावः । एवंसतिपरीक्षितत्वस्यतवा प्यावश्यकत्वात्परीक्षितत्वविशिष्टमेवोपजीव्यत्वंप्राबल्येतंत्रं । इदंचइदंरजतमितिज्ञानेनास्तीत्याह ॥ परीक्षितत्वंचेति ॥ अ

1 अपच्छेदन्यायेन बाधांगीकर्तुस्तव मतेऽपीत्यर्थः ॥

SGDF Sri Gargeshwari Digital Foundation

भेदज्ञानांशइति ॥ तादा(त्म्यरूपांशे)त्म्यारोपांशइत्यर्थः । इदमंशेत्वस्त्येवपरीक्षिततत्वं । तदंशेउपजीव्यत्वमप्यस्त्येवेतिभावः । कुतोनोपजीव्यत्वंतादात्म्यरूपांशइत्यतआह ॥ **सजातीयेति** ॥ इदंरजतंइदंरजतमितिज्ञानद्वयंजातं तत्रापिस्वसमानविषयकभ्रमरूपज्ञानांतरसंवादसत्त्वेनतस्यापिसजातीयसंवादत्वापत्तिरतउक्तं । विशेषदर्शनजन्येतिज्ञानांतरविशेषणं । तादृशंचज्ञानं प्रमारूपमेवभवति । अतएवसाक्षात्स्वविषयविषयकमानांतरसंवादोहिसजातीयसंवादइतिप्रवादः ॥ **रूप्यार्थक्रियेति** ॥ 215

भेदज्ञानांशोस्ति । सजातीयविजातीयसंवादविसंवादभावाभावौहिपरीक्षा । नचात्रविशेषदर्शनजन्यस्वसमानविषयकज्ञानांतररूपःसजातीयसंवादोवारूप्यार्थक्रियादिरूपोविजातीयसंवादोवास्ति प्रत्युततद्विसंवादएव । दृश्यतेचोत्तरस्यैवसंवादादिकमितिपूर्वधीर्बाध्या । जगत्सत्यत्वप्रत्यक्षेतुविशेषदर्शनजन्यं सन्घटइतिज्ञानांतरं घटार्थक्रिया[1]प्रत्यक्षेक्लृप्तदूरादिदोषाभावश्चास्तीतिनतद्बाध्यं ।

ज्ञाननिष्ठप्रामाण्यव्यवस्थापनद्वाराज्ञानविषयविषयकरूप्योचितार्थक्रियाकारित्वरूपोविजातीयसंवादइत्यर्थः । नन्वेतादृशसंवादादिकंपूर्वज्ञानस्यचेत्स्यात्तदातस्यापिपरीक्षिततत्वमेवस्यादितिचेत्तत्राह ॥ **दृश्यतेचेति** ॥ प्रकृतेचजगत्सत्यत्वग्राहिप्रत्यक्षंतुपरीक्षितमित्याह ॥ **जगत्सत्यत्वेति** ॥ नन्वेवंप्रतिषेध्यसमर्पकस्योपजीव्यस्योपजीवकेनबाधांगीकारेऽभेदश्रुतिंप्रतिप्रतिषेध्या

1 सजातीयविजातीयविसंवादाभावमाह ॥ प्रत्यक्षेति ॥

SGDF
Sri Gargeshwari Digital Foundation

र्पकभेदश्रुतिरेवबाध्यास्यादितिचेत्तत्राह ॥ जीवेशाभेदश्रुतौचेति ॥ तथाचनिषेध्यार्पकतयोपजीव्यमपियदिपरीक्षितंतर्ह्युप जीवकस्यैवबाधकमितिभावः । ननुपरीक्षितत्वमप्यप्रयोजकमेवपरीक्षायाअपिदोषाभावादिज्ञानरूपत्वेनतत्राप्यनाश्वासएवेत्यत आह ॥ इत्थमेवेति ॥ अपौरुषेयत्वेनहेतुना तज्ज्ञानेदोषाभावज्ञानेतद्रूपपरीक्षायामित्यर्थः ॥ त्वदुक्तेत्यादि ॥ दृश्यत्वाद्यनु मानंहेत्वाभासादिदोषरहितंअनुमानयोग्यानांदोषाणामनुपलंभात्इत्येवंहेत्वाभासादिराहित्यरूपपरीक्षायामित्यर्थः । आनुगुण्य

जीवेशाभेदश्रुतौचनिषेध्यार्पिकाभेदश्रुतिःसाक्षिप्रत्यक्षंचादोषत्वात्परीक्षितामितिनतदपिबा ध्यं। इत्थमेवचदोषाभावादिज्ञानरूपपरीक्षायामनाश्वासेवेदस्यापौरुषेयत्वेनतज्ज्ञानेत्वदुक्तानु मानेचयोग्यानुपलंभादिनाहेत्वाभासादिराहित्यज्ञानेब्रह्ममीमांसायांचप्रत्यधिकरणंसिद्धांत्य भिप्रेतार्थेउपक्रमाद्यानुगुण्यज्ञानेचानाश्वासःस्यादितिप्रमाणतदाभासादिव्यवस्थानस्यात् । यद्यपिधर्म्यर्पकेइदंज्ञानांशेपरीक्षितत्वविशिष्टमुपजीव्यत्वमस्ति । तथापितन्नबाध्यते ।

ज्ञानरूपपरीक्षायां । नन्विदंरूप्यमितिज्ञानेपिपरीक्षितत्वविशिष्टमुपजीव्यत्वमस्तीत्याशंक्यनिषेधति ॥ यद्यपीति ॥ नेदंरजत मितिज्ञानेधर्मिभूतोयइदमंशःतदर्पकइत्यर्थः ॥ तथापीति ॥ नेदंरजतमित्यत्रइदमंशमात्रंधर्मि नतुरजतत्वविशिष्टं इदमंशमा त्रेरूप्यनिषेधेनैवेष्टसिद्धेः । एवंचयदुपजीव्यंतन्नबाध्यं इदमंशमात्रस्याबाधात् । य(च्चबा)द्बाध्यंरजतत्ववैशिष्ट्यं नतदुपजीव्यं

रजतत्वविशिष्टस्याधर्मित्वादित्यर्थः । नन्वेवमैक्यबोधनेपिब्रह्मस्वरूपमात्रमेवधर्मि नतुसार्वज्ञादिविशिष्टंब्रह्मस्वरूपं । एवंचयदु पजीव्यंतन्नबाध्यं य(च्चबा)द्बाध्यंनतदुपजीव्यमितिनैक्यश्रुतेरुपजीव्यविरोधइत्यतआह ॥ शिष्टमिति ॥ ऐक्यवाक्येसार्वज्ञा दिनाभावरूपेणनिर्दुःखत्वादिनाऽभावरूपेणवाऽसाधारणधर्मेणैवब्रह्मोद्देष्टव्यं उतचित्त्वादिनासाधारणधर्मेण । द्वितीयेचितएव जीवैक्यंसिद्ध्येन्नब्रह्मणः जीवचितोजीवैक्यस्यममापिसिद्धत्वात् । तस्मादाद्यएवांगीकार्यः । तथाचोपजीव्यविरोधःसुस्थइत्या द्यैक्यभंगेवक्ष्यतइत्यर्थः ॥छ॥ प्रत्यक्षस्योपजीव्यत्वेनप्राबल्यविवरणं ॥११॥ औदुंबरीमिति ॥ प्रमाणलक्षणेस्मृतिपादे

शिष्टमैक्यभंगेवक्ष्यते ॥ प्रत्यक्षस्योपजीव्यत्वेनप्राबल्यविवरणं ॥ ११ ॥ यदितुप्रत्यक्षंलिंगबाध्यंतर्हि "औदुंबरींस्पृष्ट्वोद्गायेत्"

चिंतितं । "विरोधेत्वनपेक्षंस्यादसतिह्यनुमान"मित्यत्र ज्योतिष्टोमे"औदुंबरींस्पृष्ट्वोद्गाये"दितिश्रुत्याउदुंबरमयींयज्ञसदस्स्थूणां स्पृष्ट्वाउद्गात्राउद्गानंकर्तव्यमितिविहितं । स्मृतिकारास्तुतत्स्पर्शनविरुद्धंतस्याःकात्स्न्येंनवाससावेष्टनंस्मरंति । "औदुंबरीवासर्वा वेष्टयितव्ये"ति । तत्स्मरणंप्रमाणं (अप्रमाणंवेति)नवेतिसंशयेस्मृत्यधिकरणेस्मृतीनांमूलश्रुत्यनुमापकतयाश्रुतिमूलकत्वेनप्रा माण्यसमर्थनादियमपिस्मृतिर्मूलश्रुतिमनुमापयंतीप्रमाणमितिपूर्वपक्षः । स्पर्शनवेष्टनयोर्विरुद्धत्वेनतत्कर्तव्यताबोधकयोरपि औष्ण्यशैत्यवद्विरुद्धत्वाद्वह्नावौष्ण्यप्रत्यक्षेणशैत्यानुमानस्येवप्रत्यक्षसिद्धस्पर्शनश्रुत्यासर्ववेष्टनश्रुत्यनुमानस्यबाधान्मूलश्रुत्यभा

SGDF

वेनाप्रमाणंस्मरणमितिसिद्धांतः ॥ ऐंद्र्येति ॥ गार्हपत्यमितिप्रत्यक्षश्रुत्याबाधादिंद्रप्रकाशकत्वेनेंद्रशेषत्वानुमानंअप्रमाणमिति सिद्धांतितं । एतदधिकरणंचपूर्वमुपन्यस्तं ॥ शरमयमिति ॥ दशमाध्यायेचतुर्थपादेचिंतितं । "चोदनालिंगसंयोगेतद्विकारःप्रतीयेतप्रकृतिसंनिधानात्" इत्यत्रसोमारौद्रचरौश्रूयते "शरमयंबर्हिर्भवती" ति । तत्रकिंदर्शपौर्णमासिकाःकुशानिवर्तंते निवर्तंतेवेतिसंशयेउपदेशेनशराणां "प्रकृतिवद्विकृतिःकर्तव्ये" त्यतिदेशेनकुशानांचावगतत्वेनद्वयोरपिप्रमाणत्वात्समुच्चयइति पूर्वपक्षः । सिद्धांतस्तुबर्हिश्शब्दलक्षितेबर्हिःकार्येशराणांविधायकस्यवचनस्यप्रत्यक्षत्वात्तैरेवकृतस्वका(कर्मणां)र्याणांकुशानां

"ऐंद्र्यागार्हपत्यमुपतिष्ठते" "शरमयंबर्हिर्भवति" इतिश्रुतित्रयग्राह्यप्रत्यक्षंचयथाक्रमंऔदुंबरीवा सर्वावेष्टयितव्येतिस्मृतिरूपेणसर्ववेष्टनश्रुत्यनुमानेन"नेंद्रसश्चासिदाशुष" इतिमंत्रसामर्थ्यरूपेणइंद्रशेषत्वश्रुत्यनुमानेनचोदनालिंगसारूप्येणकुशश्रुत्यनुमानेनबाध्येतेतिसर्वैवमीमांसोन्मूलितास्यात् ।

प्रापकस्यकुशसाधारणस्यातिदेशवाक्यस्यकल्पनंनप्रवर्तते । किंतुकुशव्यतिरिक्तांगप्रापकएवससाधारणोतिदेशइत्यनुमीयते । अतःप्रापकाभावात्कुशानिवर्ततइतिसिद्धांतितं ॥ स्मृतिरूपेणेति ॥ स्मृत्याख्यलिंगेनेत्यर्थः ॥ चोदनालिंगसारूप्येणेति ॥ चोदनाविधिवाक्यंतत्सारूप्यरूपलिंगेनेत्यर्थइतिव्याख्येयं । यथाप्रकृतिवद्विकृतिःकर्तव्येतिचोदनयाइतरांगानांप्राप्तिः तथातत्सारूप्येणकुशरूपांगस्यापिप्राप्त्यनुमानमित्यर्थः । अत्रसर्वत्राप्यनुमानप्रकारस्त्वित्थं । औदुंबरीश्रुत्युक्तसर्ववेष्टनयुक्ता । बाध

SGDF
Sri Gargeshwari Digital Foundation

काभावेसतिसर्ववेष्टनप्रतिपादकस्मृतियुक्तत्वात् । यत्यदर्थप्रतिपादकस्मृतियुक्तं तत्तच्छ्रुत्युक्ततदर्थयुक्तं यथासंमतमितिसामा न्यव्याप्तिः । कदाचनस्तरीरसिनेंद्रसश्चसिदाशुषइतिमंत्रःइंद्रशेषत्वप्रतिपादकश्रुतियुक्तः बाधकाभावेसतींद्रप्रकाशनसाम र्थ्योपेतत्वात् यद्यत्प्रकाशनसमर्थं तत्तस्यशेषत्वप्रतिपादकश्रुतियुक्तं यथासंमतं । सोमारौद्रश्चरुःकुशबर्हिःप्रतिपादकश्रुतियुक्तः कुशश्रुतियुक्तदर्शपौर्णमासचोदनासदृशनिर्वापशब्दाष्टाकपालादिसंख्याद्विदेवतादियुक्तचोदनायुक्तत्वात् यद्यत्सदृशचोदनोपे तंतत्तदीयधर्मप्रतिपादकश्रुतियुक्तं यथासंमतमिति । नन्विदमापादनंमीमांसकमतविरुद्धं । औदुंबर्याद्युदाहरणेषुप्रत्यक्षेणश्रु

अग्न्यौष्ण्यप्रत्यक्षंचतच्छैत्यानुमित्याविवरणोक्तंआत्मस्थायित्वप्रत्यभिज्ञानंचबौद्धोक्ततत्क्ष

णिकत्वानुमित्याबाध्येतेतिकालात्ययापदिष्टोच्छेदःस्यात् । तथाचशृंगित्वेपशुत्वंतंत्रंनतुत

द्विशेषोगोत्वादीत्यादितर्कानुगृहीतेनपशुत्वादिनाशशादेस्तात्विकंव्यावहारिकंवाशृंगं ॥

तिरेवबाध्यतइत्येवप्रतिपादितमस्ति । नतुश्रुत्याऽनुमानंबाध्यतइति । अतःप्रत्यक्षस्यशब्दबाध्यत्वांगीकारएवेदमापादनीयं नतुप्र त्यक्षस्यलिंगबाध्यत्वांगीकारे । अतइदमापादनमयुक्तमित्यस्वरसाद्दूषणांतरमाह ॥ अग्न्यौष्ण्येति ॥ आत्मस्थायित्वप्रत्यभि ज्ञानमस्माभिर्नोक्तमित्यनुक्तोपालंभइतिशंकापरिहारायोक्तं ॥ विवरणोक्तमिति ॥ तत्क्षणिकत्वेति ॥ आत्मक्षणिकत्वेत्य र्थः । प्रत्यक्षस्यानुमानबाध्यत्वेऽतिप्रसंगांतराण्याह ॥ तथाचेत्यादिना ॥ शशःशृंगीपशुत्वादित्यत्रशृंगित्वेपशुत्वंनतंत्रंकिंतु गोत्वादिरूपःपशुत्वविशेषएवेत्यप्रयोजकतापरिहारायातिप्रसंगंतर्कानुसारेणोपपादयति ॥ शृंगित्वइति ॥ पशुत्वादिनेत्यत्रादि

२१९

SGDF
Sri Gargeshwari Digital Foundation

पदेनवस्तुत्व(परिग्र)संग्रहः । शशादेरित्यत्रादिपदेनतुरगसंग्रहः । तथाचभगवत्पादोक्तो "वस्तुत्वात्तुरगःशृंगी" त्यतिप्रसंगःसंगृहीतइतिज्ञातव्यं । भूतचतुष्टयस्यपृथिवीत्वाद्दृष्टेःपृथिव्या अपिपृथिवीत्वंनस्यादितिभगवत्पादोक्तातिप्रसंगमाह ॥ गंधवदिति ॥ तत्वोद्योतोक्तातिप्रसंगंहृदिनिधायाह ॥ पदार्थत्वादिनेति ॥ अयंचहेतुर्वक्ष्यमाणातिप्रसंगद्वयेपिबोध्यः । मृत्कलत्रकंटकादृष्टांताः ॥ अदृश्यत्वामिति ॥ ब्रह्मवदितिशेषः ॥ घटवृत्तित्वादिनेति ॥ दृश्यत्वंप्रातिभासिकत्वाख्यमिथ्यात्वव्याप्यंन ।

गंधवद्द्रव्यस्यभूतत्वेनाऽपृथिवीत्वं पदार्थत्वादिनान्नाभिमतस्यानन्नत्वं सुखस्यनिरुपाधिकेष्टत्वाभावः दुःखस्यनिरुपाधिकानिष्टत्वाभावः असद्वैलक्षण्येनशुक्तिरूप्यस्यापिसत्यत्वं अप्रातिभासिकत्वादिनाप्रपंचस्यादृश्यत्वं घटवृत्तित्वादिनादृश्यत्वस्यमिथ्यात्वाव्याप्यत्वंच स्यादितिव्यावहारिक्यपिव्यवस्थानस्यात् । नह्यत्रप्रत्यक्षबाधादन्योदोषोऽस्ति ॥ प्रत्यक्षस्यानुमानबाध्यत्वेबाधकं ॥ १२ ॥ यदिचाक्षंशब्दबाध्यंतर्हिजैमिनिनातस्माद्धूमएवाग्नेर्दिवाददृशेनार्चिरित्याद्यर्थवादस्य

घटवृत्तित्वाद्घटत्ववत् । घटादीनांव्यावहारिकतयाप्रातिभासिकत्वापरपर्यायमिथ्यात्वव्याप्यत्वंघटवृत्तित्वादेर्नास्तीतिदृश्यत्वादिहेतोरपिशुक्तिरजतादौतन्नस्यादित्यर्थः ॥ ७ ॥ इतिप्रत्यक्षस्याऽनुमानबाध्यत्वेबाधकविवरणं ॥ १२ ॥ ७ ॥ तस्माद्धूमएवाग्नेरिति ॥ प्रमाणलक्षणेऽर्थवादाधिकरणे "तस्माद्धूमएवाग्नेर्दिवाददृशेनार्चिस्तस्मादर्चिरेवाग्नेर्नक्तंददृशेनधूम" इत्य

220

र्थवादयोर्दिवाप्यर्चिर्दर्शनान्नक्तमपिधूमदर्शनात्दृ(ष्टवि)ष्टविरोधेनाप्रामाण्यं "शास्त्रदृष्टविरोधाच्चे" तिसूत्रेणपूर्वपक्षयित्वादिवानक्तंचार्चिर्धूमयोर्दर्शनशब्दोगौणइति "गुणवादस्त्वि" तिसिद्धांतसूत्रेणदृष्टविरोधःसमाहितः । गौणतानिमित्तंच "दूरभूयस्त्वादि" तिसूत्रेणोक्तंयथादिवाधूमोदूरस्थैर्भूम्नादृश्यतेनतथार्चिःरात्रौचयथाआर्चिर्दूरस्थैर्भूम्नादृश्यतेनतथाधूमः । अतोनदृष्टविरोधादप्रामाण्यमिति ॥ अदितिर्द्यौरिति ॥ प्रमाणलक्षणेमंत्राधिकरणे "अदितिर्द्यौरदितिरंतरिक्षमदितिर्मातासपितासपुत्र" इतिमंत्रस्यएकस्याअदितेःपरस्परभिन्नद्युगगनाद्यनेकात्मकत्वस्यदृष्टविरोधेनार्थविवक्षायाअयोगादप्रामाण्यमिति "विप्रतिषेधादि" तिसूत्रेणपूर्वपक्षयित्वा "गुणादविप्रतिषेधःस्यादि" तिसिद्धांतसूत्रेणद्यंतरिक्षादिवत्सुखकरत्वादिनाद्युशब्दादीनांगौणार्थत्वमंगीकृत्यदृष्टविरोधःसमाहितः । तदेतत्सर्वंशब्दस्यप्रत्यक्षबाधकत्वेविरुध्येत मुख्यार्थपरत्वमेवस्यादित्यर्थः ॥ तत्सिद्धिरित्यादितत्सिद्धिपेटिकयेति ॥ एकार्थप्रतिपादकानेकाधिकरण(समूहः)संग्रहःपेटिकेत्युच्यते । मीमां(सकशा)साशास्त्रप्रसिद्धोयंशब्दः । प्रमाणलक्षणेनामधेयपादे "तत्सिद्धिजातिसारूप्यप्रशंसाभूमलिंगसमवाया" दितिसूत्रेण "यजमानःप्रस्तरः

अदितिर्द्यौरित्यादिमंत्रस्यचदृष्टविरोधेनाप्रामाण्येप्राप्तेतदविरोधाय "गुणवादस्तुगुणादविप्रतिषेधःस्यादि" त्यादिनागौणार्थतानोच्येत । तत्सिद्धिरित्यादितत्सिद्धिपेटिकयाच "यजमानःप्रस्तर" इत्यादेर्गौणार्थतानोच्येत ।

221

SGDF
Sri Gangadharendra ... Foundation

अग्निर्वै ब्राह्मणः आदित्योयूपः अपशवोवाअन्येगोअश्वेभ्य" इतिश्रुतिषुप्रस्तरस्ययज्ञसाधनभूतदर्भमुष्टिविशेषस्ययजमानत्वं ब्रा
ह्मणस्याग्नित्वं यूपस्यादित्यत्वं गवाश्वव्यतिरिक्तानांअजादीनामपशुत्वं प्रत्यक्षविरुद्धमितितत्परिहारायप्रस्तरादिषुयजमानादि
शब्दागौणाइति तेषांप्रवृत्तिनिमित्तभूतागुणाःप्रदर्शिताः । तत्रयजमानशब्दस्यप्रस्तरेप्रवृत्तौ(तत्सिद्धिः)तत्कार्यकरत्वंगुणः । उ
भयोरपियज्ञसाधनत्वेनएककार्यकरत्वात् । ब्राह्मणेऽग्निशब्दप्रवृत्तौ(जातिः)जन्मएकप्रभवत्वंगुणः । "ब्राह्मणोस्यमुखमासीत्
मुखादिंद्रश्चाग्निश्चे" तिब्राह्मणाग्न्योर्मुखजत्वश्रवणात् । यूपेआदित्यशब्दस्यप्रवृत्तौ आज्यांजननिमित्तमौज्वल्यंगुणः । तदेवसा
रूप्यमित्युक्तंसूत्रे । यद्यपितत्सिद्ध्यादिकमपिसारूप्यमेव । तथापिइदंचक्षुर्ग्राह्यंसारूप्यमितिविशेषात्तथोक्तं । अपशुशब्दस्याजा

त्वयाचप्रत्यक्षाविरोधायतत्वंपदयोर्लक्षणानोच्येत । श्रुतिविरोधात्प्रत्यक्षस्यैवाप्रामाण्यसंभवात् ।
एतेनाद्वैतवाक्यमनन्यपरत्वान्नामुख्यार्थंप्रस्तरवाक्यादिकंतुअन्यपरमितिवाचस्पत्युक्तंनिरस्तं ।

दिषुप्रवृत्तौगवादीनांप्रशंसानिमित्तं । पशुशब्देनगवाश्वगतेनोपकारातिशयेनप्रशस्तत्वेलक्षितेनञातदभावःपश्वंतरेषुबोध्यते ।
यथोक्तं । "गवाश्वादिगतांपूर्वमुपादायप्रशस्ततां । तदभावोन्यपश्वादौनञ्समासेनबोध्यत" इति भूमलिंगसमवायोदाहरणा
नितुग्रंथगौरवभयान्नप्रदर्श्यंते । एतावतैवचारितार्थ्यात् । यथोक्तं "तत्सिद्धिजातिसारूप्यप्रशंसालिंगभूमभिः । षड्भिःसर्वत्रश
ब्दानांगौणीवृत्तिःप्रकल्पिते" ति ॥ प्रत्यक्षाविरोधायेति ॥ सार्वज्ञादिविशिष्टदुःखादिविशिष्टयोरैक्यस्यप्रत्यक्षविरुद्धत्वात्
तदविरोधायेत्यर्थः । लक्षणा सार्वज्ञादिभागत्यागेनेतिशेषः ॥ अनन्यपरत्वादिति ॥ अद्वैतेतात्पर्यलिंगानांसत्त्वेनाद्वैतव्य

२२१

SGDF
Sri Gargeshwari Digital Foundation

तिरिक्तेऽर्थेतात्पर्याभावात्तत्रैवतात्पर्यं । प्रस्तरादिवाक्येतुतात्पर्यलिंगाभावेनयजमानाभेदेनतात्पर्यं । किंनामान्यत्रैवतत्कार्यका रित्वादावित्यर्थः । वाक्यस्यैकत्रतात्पर्यतदभावयोर्मानांतराविरोधतदभावयोरेवप्रयोजकत्वं नतात्पर्यलिंगसत्त्वासत्त्वयोःव्यभि चारादित्याह ॥ सत्यपीति ॥ मानांतरविरोधे प्रत्यक्षरूपमानांतरविरोधे ॥ सोमेनेति ॥ सोमेनयागेनेष्टंभावयेदितितदर्थः । एवंचसोमलतायायागाभेदःप्रत्यक्षेणविरुद्धइत्यर्थः । अनन्यपरत्वस्य प्रतीतार्थव्यतिरिक्तार्थांतरेतात्पर्याभावस्यायोगादित्यर्थः । 223

सत्यपितात्पर्यलिंगेमानांतरविरोधेप्रस्तरादिवाक्यवत्सोमेनयजेतेत्यादिवचानन्यपरत्वस्यैवा योगात् । नहिकुरूपांअशूरंचोद्दिश्यअहोदर्शनीयेतिसिंहइतिचशतकृत्वःप्रयुक्तमपिवा क्यंवाच्यार्थपरंभवति । नवातत्वमासिवाक्यंषड्विधतात्पर्यलिंगोपेतमपिमानांतरविरुद्धंवा च्यार्थपरं । किंचोपक्रमोपसंहारादिकंहिप्रत्येकंतात्पर्यलिंगं अस्तिचप्रस्तरादिवाक्येऽपूर्वता ।

सत्यपितात्पर्यलिंगेमानांतरविरोधेस्वार्थेतात्पर्यंनास्तीत्येतद्दृष्टांतांतरेणोपपादयति ॥ नहीति ॥ दर्शनीया सुरूपा । शतकृत्वः शतवारं । शतकृत्वइत्यभ्यासरूपतात्पर्यलिंगसद्भावोक्तिः ॥ प्रयुक्तमपीति ॥ आप्तवाक्यमपीत्यर्थः । प्रत्यक्षविरोधस्तुस्पष्टः ॥ वाच्यार्थेति ॥ विशिष्टैक्यरूपेत्यर्थः । त्वन्मतइतिशेषः । ननुप्रस्तरादिवाक्यवदितिपूर्वोक्तोदृष्टांतोनयुक्तः । तत्रतात्पर्य लिंगस्यैवाभावादित्यतआह ॥ अस्तिचेति ॥ उपक्रमादीनांषण्णामपिसंभूयैवतात्पर्यलिंगत्वान्नापूर्वतामात्रंतात्पर्यलिंगमित्यत

SGDF
Sri Gargeshwari Digital Foundation

उक्तंउपक्रमेत्यादि । किंचोपक्रमादीनांप्रत्येकमेवतात्पर्यलिंगत्वंवक्तव्यंनतद्बाहुल्यस्यातिप्रसंगादित्याह ॥ त्वत्पक्षेचेति ॥ ब
हुप्रमाणसंवादस्यास्मन्मतेदार्ढ्यहेतुत्वात्त्वत्पक्षेचेत्युक्तं ॥ एकलिंगेति ॥ उपक्रमरूपेत्यर्थः । लिंगांतरं तत्रैवप्रवर्तमानमुपसंहा
रादिकं । तत्रदृष्टांतःप्रत्यक्षसिद्धइति । प्रत्यक्षसिद्धेभेदेप्रवर्तमानायाभेदश्रुतेर्यथानुवादकत्वमुच्यतेतथेत्यर्थः । तथाचैकलिंग
सिद्धेतात्पर्येलिंगांतरस्यानुवादकत्वाभावेभेदश्रुतेरप्यनुवादकत्वंनस्यादित्याशयः ॥ अन्यशेषत्वादिति ॥ यज्ञोपयुक्तार्थप्र

**त्वत्पक्षेचप्रत्यक्षसिद्धेभेदेश्रुतिरिवैकलिंगसिद्धेतात्पर्येलिंगांतरमनुवादकमेवे
तिकिंतद्बाहुल्येन । यच्चोक्तंवाचस्पतिना प्रस्तरादिवाक्यमन्यशेषत्वादमु
ख्यार्थं अद्वैतवाक्यंतुनतथा । उक्तंहिशाबरभाष्ये "नविधौपरःशब्दार्थ"
इति । तन्न । अन्यशेषेपिप्रत्यक्षाविरुद्धेलोके "इयंगौःक्रय्याबहुक्षीरे"त्यादौ**

तिपादकत्वादित्यर्थः ॥ नतथेति ॥ (स्वप्राधान्येन)स्वातंत्र्येणाद्वैतप्रतिपादकत्वादनन्यशेषमित्यर्थः । विधिवाक्यरूपमितिया
वत् ॥ नविधाविति ॥ विधौ विधायकेप्रधानवाक्ये । परः प्रतीयमानवाक्यार्थातिरिक्तोन्योवाक्यार्थोनास्तीत्यर्थः । अमु
ख्यार्थत्वेऽन्यशेषत्वंनप्रयोजकं किंनाम प्रत्यक्षविरोधएव । अन्यशेषत्वेपिप्रत्यक्षविरोधाभावेलोकेवेदेचमुख्यार्थत्वस्यैवदर्शना ॥ ११३ ॥
दित्याह ॥ अन्यशेषेपीति ॥ कुतःक्रय्या यतोबहुक्षीरेत्यर्थः । इयंगौःक्रय्येत्यस्यशेषभूतेबहुक्षीराख्यपत्याऽनवद्यप्रजेत्यादि

२२४

वाक्येप्रत्यक्षविरोधाभावेनप्रतीयमानबहुक्षीरादिसंसर्गपरत्वेनमुख्यार्थत्वात्|कामधेनुरितिव्यतिरेकदृष्टांतः । यथाइयंगौःक्रय्या
यतःकामधेनुरित्यत्रकामधेन्वभेदस्यप्रत्यक्षसिद्धायांगविबाधितत्वेनयथाऽमुख्यार्थत्वंकल्प्यतेतथानेत्यर्थः ॥ वेदेपीति ॥ "त
स्यहिरण्यंदक्षिणे" तिहिरण्यदक्षिणाविधिशेषे "सोरोदीद्यदरोदीत्तद्रुद्रस्यरुद्रत्वं यदश्रुअश्रीयततद्रजतमभवत्तस्माद्रजतमद
क्षिण्यमश्रुज" मित्यादिष्वपिप्रतीयमानसंसर्गेदक्षिणाभावरूपवाक्यार्थेतात्पर्यंविनारजतनिंदायाअसिद्धेःप्रत्यक्षविरोधाभावात्प्र
तीयमानसंसर्गपरत्वरूपमुख्यवृत्तिरेवाश्रीयतइत्यर्थः ॥ प्रस्तरादीति ॥ व्यतिरेकदृष्टांतः । यथाप्रत्यक्षविरोधात्प्रस्तरादिवा

**"कामधेनु" रित्यादाविवाऽमुख्यवृत्तेर्वेदेपि" सोरोदीदि" त्यादौप्रस्तरादिवाक्यइवामुख्यवृत्तेरना
श्रयणात् । अनन्यशेषेपि "सोमेनयजेते" त्यादौवैयधिकरण्येनाऽन्वयेविरुद्धत्रिकद्वयापातात्**

क्येऽमुख्यवृत्तिराश्रीयतेतथानेत्यर्थः । एवमेवमुख्यार्थत्वेऽनन्यशेषत्वंनप्रयोजकं किंनाम प्रत्यक्षाविरोधएव । अनन्यशेषत्वे
पिप्रत्यक्षविरोधेऽमुख्यार्थत्वस्यस्वीकारादित्याह ॥ अनन्यशेषेपीति ॥ सोमेनयजेतेति ॥ प्रमाणलक्षणेनामधेयपादेचिंति
तं|"सोमेनयजेते" तिश्रूयते तत्रलतारूपेणसोमेनयागंभावयेत् यागेनचेष्टंभावयेदितिवैयधिकरण्येनान्वयोवासोमेनयागेनेष्टं
भावयेदितिसामानाधिकरण्येनान्वयोवेतिसंदेहेसोमलतायागयोरैक्याभावेनसामानाधिकरण्यायोगाद्वैयधिकरण्येनान्वयइतिपू
र्वपक्षः । सिद्धांतस्तुवैयधिकरण्येनान्वयेपिसोमेनयागंभावयेद्यागेनेष्टंभावयेदितिवाक्यभेदापत्तेः । तथाविरुद्धत्रिकद्वयमापद्य

२२५

SGDF Sri Gangadhar... Digital Foundation

ते । तथाहि । सोमेनयागंभावयेदित्यत्रयागंभावयेदितियत्तत्सोमेनेतिसोमरूपगुणविधानेयागेकर्मत्वानुबंधि प्रधानत्वं अनुवाद्यत्वं उद्देश्यत्व मितित्रिकं,तथासोमेकरणत्वानुबंधि गुणत्वं विधेयत्वं उपादेयत्वं चेतित्रिकमस्ति । यागेनचेष्टंभावयेदित्यत्रतु यागस्यकरणत्वेनपूर्वकर्मत्वानुबंधित्रिकवतएवतद्विरुद्धकरणत्वानुबंधित्रिकवत्त्वप्राप्तेः । अतोवैयधिकरण्येनान्वयायोगात्सामानाधिकरण्येनान्वयः । तत्रचप्रत्यक्षविरोधःसमायाति । यजेःसोमलतारूपत्वाभावात् । अतःप्रत्यक्षाविरोधायमत्त्वर्थलक्षणया

सामानाधिकरण्येनान्वयेप्रत्यक्षाविरोधायसोमवतायागेनेतिमत्वर्थलक्षणायाः,
विचारविधायकेचजिज्ञासासूत्रेतद्विजिज्ञासस्वेत्यादिश्रुतौचप्रत्यक्षाविरोधायजिज्ञा
साशब्देनविचारलक्षणायाःसर्वंखल्विदंब्रह्मेत्यादौअमुख्यार्थतायाश्चस्वीकृतत्वाच्च ।
सर्वस्यापिवाक्यस्यावाच्येब्रह्मणिलक्षणायाएवेष्टत्वेनामुख्यार्थत्वनिषेधायोगाच्च ।

सोमद्रव्यवतायागेनेष्टंभावयेदित्यर्थांगीकारेणलक्षणयाऽमुख्यार्थांगीकारादित्यर्थः ॥ श्रुतौचप्रत्यक्षाविरोधायेति ॥ इच्छायाविधेयत्वस्यानुभवरूपप्रत्यक्षविरुद्धत्वात्तदविरोधायेत्यर्थः ॥ सर्वमिति ॥ घटादेर्ब्रह्माभेदस्यबाधितत्वादित्यर्थः । अनन्यशेषत्वादमुख्यार्थंब्रह्माद्वैतवाक्यंनेतिनिषेधोनयुक्तइत्याह ॥ सर्वस्यापीति ॥ मुख्यार्थत्वेवाच्यत्वापत्त्यालक्षणायाअंगीकारेणामुख्यार्थतैवांगीकृतेत्यर्थः । अद्वैतवाक्यस्यविधिवाक्यरूपत्वान्नतत्रलक्षणायुक्तेतिचेन्न । लक्षणाबीजसद्भावेविधिवाक्ये

SGDF
Sri Gargeshwari Digital Foundation

पिलक्षणाआवश्यकीत्याह ॥ अन्वयेति ॥ गंगायांघोषइत्यत्रान्वयानुपपत्तिः । भोजनसमयेयष्टीःप्रवेशयेत्यादौतात्पर्यानुपपत्तिः । तर्हि "नविधौपरःशब्दार्थ" इतिशाबरवचनविरोधइत्यतआह ॥ शाबरेति ॥ कयोश्चिदनुवादकविधायकयोर्वाक्ययोर्मध्येअनुवादकस्यमुख्यार्थत्वायविधायकवाक्येलक्षणानन्याय्या । किंनाम । विधायकानुसारेणानुवादएवामुख्यार्थइत्येवंपरं । नतुसर्वत्रापिविधिवाक्येलक्षणैवनास्तीत्येवंपरमित्यर्थः ॥ ७ ॥ प्रत्यक्षस्यशब्दबाध्यत्वेबाधकविवरणं ॥ १३ ॥ ७ ॥ 227

अन्वयानुपपत्तेस्तात्पर्यानुपपत्तेर्वालक्षणाबीजस्याविध्यविधिसाधारण्याच्च । शाबरवचनं तुअनुवादमुख्यार्थत्वायविधौलक्षणानयुक्तेत्येवंपरं । तस्मान्नप्रत्यक्षंशब्दबाध्यं । तदुक्तं "यजमानप्रस्तरत्वंयथानार्थःश्रुतेर्भवेत् । ब्रह्मत्वमपिजीवस्यप्रत्यक्षस्याविशेषत "इति ॥ प्रत्यक्षस्यशब्दबाध्यत्वेबाधकं ॥ १३ ॥ यत्तूक्तंवाचस्पतिना पूर्वस्यप्रत्यक्षस्यपरेणागमेनापच्छेदन्यायेनबाधइति तन्न । नह्यस्माभिःपूर्वत्वमात्रेणप्रत्यक्षस्यबाधकतोक्ता किंतूपजीव्यत्वेन।

परेणेति॥प्रत्यक्षसिद्धजीवादिधर्मिकत्वादित्यर्थः ॥ अपच्छेदन्यायेनेति ॥ षष्ठेचिंतितं । "पौर्वापर्येपूर्वदौर्बल्यंप्रकृतिवत्" । ६ अ/५ पा/५४ सू
"अध्वर्युंप्रस्तोतान्वारभतेप्रस्तोतारंप्रतिहर्ताप्रतिहर्तारमुद्गाताउद्गातारंब्रह्मातंयजमान" इत्यादिश्रुत्याविहितस्यबहिष्पवमानंप्रसर्पतांप्रस्तोत्रादीनांअध्वर्य्वाद्यन्वारंभस्यविच्छेदेसतिप्रायश्चित्तविशेषाःश्रूयंते । बहिष्पवमानंप्रसर्पतांमध्ये "यदिप्रस्तोतापच्छिद्या

SGDF Sri Gargeshwari Digital Foundation

द्ब्रह्मणेवरंदद्याद्यजमानःयदिप्रतिहर्ताऽपच्छिद्यात्तर्हिसर्ववेदसंदद्यात्यद्युद्गाताऽपच्छिद्याददक्षिणंयज्ञमिष्ट्वातेनपुनर्यजेततत्रतद्
द्याद्यत्पूर्वस्मिन्दास्यन्स्यादि" ति । तत्रक्रमेणप्रतिहर्त्रुद्गात्रोरपच्छेदेकिंपूर्वनिमित्तकंसर्वस्वदक्षिणारूपंप्रायश्चित्तंकार्यंउतोत्तरनि
मित्तकोऽदक्षिणाकोयागःकार्यइतिसंशयेपूर्वस्यासंजातविरोधित्वेनप्रबलत्वात्प्रतिहर्त्रपच्छेदनिमित्तकंसर्वस्वदक्षिणारूपंप्रायश्चि
त्तंकार्यमितिपूर्वपक्षे "नानुपमृद्यपूर्वंतद्विरोध्युत्तरमुत्पत्तुमर्हती" तिन्यायेनपूर्वोपमर्देनपरप्राबल्यस्यैवन्याय्यत्वादुद्गात्रपच्छेदनि
मित्तकोऽदक्षिणाकोयागएवकार्यइतिपरेणपूर्वस्यबाधइतिसिद्धांतः ॥ नचापच्छेदइति ॥ प्रतिहर्त्रपच्छेदउद्गात्रपच्छेदस्योप

नचापच्छेदेपूर्वमुपजीव्यं । किंचप्रतिहर्त्रुद्गात्रोःक्रमेणापच्छेदेप्रतिहर्त्रपच्छेदनि
मित्तसर्ववेदसदानस्यपरेणोद्गात्रपच्छेदनिमित्तादक्षिण्येनबाधेपिनात्यंतबाधः । प्र
तिहर्तृमात्रापच्छेदेद्वयोरपियुगपदपच्छेदेक्रमेणापच्छेदेपिप्रतिहर्त्रपच्छेदस्यपश्चात्त्वे
च "यदिप्रतिहर्तापच्छिद्यात्तर्हिसर्ववेदसंदद्यादि" तिशास्त्रप्रामाण्यसंभवात् ।

जीव्योनैवभवति । येनपरेणोपजीवकेनपूर्वस्योपजीव्यस्यापच्छेदनयेबाधदर्शनात्प्रकृतेपितथास्यादित्युच्येतेत्यर्थः ॥ अत्यंत
बाधइति ॥ विषयांतरेप्यनवकाशेनसर्वथाऽप्रामाण्यरूपइत्यर्थः । कुतोनात्यंतबाधइत्यतआह ॥ प्रतिहर्त्रिति ॥ प्रतिहर्तृ
मात्रापच्छेदेयदिप्रतिहर्तापच्छिद्येततदासर्ववेदसंदद्यादितिशास्त्रप्रामाण्यसंभवादित्यन्वयः ॥ क्रमेणेति ॥ प्रतिहर्त्रुद्गात्रोःक्रमे ॥ ११५ ॥
णापच्छेदेपियदाप्रतिहर्त्रपच्छेदःपश्चात्तनोभवतितदापरेणपूर्वबाधांगीकारात्सर्ववेदसंदद्यादितिशास्त्रस्यप्रामाण्यसंभवादित्यर्थः ।

ननुप्रतिहर्त्रुद्गात्रोर्युगपदपच्छेदेकथंसर्ववेदसंदद्यादितिशास्त्रप्रामाण्यसंभवइत्यतआह ॥ अतएवषष्ठइति ॥ यतोयुगपदपच्छे
देपिसर्ववेदसंदद्यादितिशास्त्रप्रामाण्यसंभवोऽतएवेत्यर्थः ॥ विकल्पउक्तइति ॥ नात्यंतबाधेनाप्रामाण्यमित्यर्थः । षष्ठेऽध्या
येचिंतितंतत्रविप्रतिषेधाद्विकल्पःस्यात्प्रतिहर्त्रुद्गात्रोर्युगपदपच्छेदे तन्निमित्तकंसर्वस्वदानादक्षिण्यरूपंनैमित्तिकद्वयंसमुच्चीयते
उतविकल्पइतिसंशयेपुनर्यजेतेतिप्रयोगद्वयसद्भावेनपूर्वस्मिन्प्रयोगेऽदक्षिणत्वमुत्तरस्मिन्सर्वस्वदानमित्युभयस्यापिसंभवात्समुच्च
यइतिपूर्वपक्षः । यस्मिन्प्रयोगेनिमित्तंतस्यैवांगंनैमित्तिकंनप्रयोगांतरेतस्यावकाशसंभवइति एकस्मिन्नेवप्रयोगेद्वयमापतितं ।

अतएवषष्ठे "तत्रविप्रतिषेधाद्विकल्पःस्यादि" त्यधिकरणेद्वयोर्युगपदपच्छेदेविक
ल्पउक्तः। किंच "यद्युद्गाताजघन्यःस्यात्पुनर्यज्ञेसर्ववेदसंदद्यादि" त्यधिकरणेउद्गा
त्रपच्छेदस्यप्रतिहर्त्रपच्छेदात्परत्वेउद्गात्रपच्छेदनिमित्तकेप्रथमप्रयोगंदक्षिणाही
नंसमाप्यकर्तव्येज्योतिष्टोमस्यद्वितीयप्रयोगे "तद्दद्याद्यत्पूर्वस्मिन्दास्यन्स्यादि"

तच्चविरुद्धमतोविकल्प्यतइतिसिद्धांतः । एवंप्रतिहर्त्रुद्गात्रोःक्रमेणापच्छेदेप्रतिहर्त्रपच्छेदनिमित्तस्यसर्वस्वदानस्यपरेणोद्गात्रपच्छे
देनबाधेपिनात्यंतबाधः । प्रकारत्रयेणापितच्छास्त्रप्रामाण्योपपत्तेरित्युपपाद्यइतोपिनात्यंतबाधःप्रयोगांतरेनिक्षेपोपपत्त्यातच्छा
स्त्रप्रामाण्योपपत्तेरित्याह ॥ किंचेति ॥ षष्ठेस्थितं "यद्युद्गाताजघन्यःस्यात्पुनर्यज्ञेसर्ववेदसंदद्यात्" प्रतिहर्त्रुद्गात्रोःक्रमेणापच्छे
देयदोद्गात्रपच्छेदोजघन्यःपरःपश्चात्तनोभवतितदा "यद्युद्गाताऽपच्छिद्याददक्षिणंयज्ञमिष्ट्वातेनपुनर्यजेततत्रतद्दद्याद्यत्पूर्वस्मिन्दा

SGDF ... Foundation

230

स्यन्स्यादि" तिश्रूयते । तत्रोद्गात्रपच्छेदनिमित्तकेप्रथमप्रयोगंदक्षिणाहीनंसमाप्यकर्तव्येज्योतिष्टोमस्यपुनःप्रयोगेतद्दद्यादितिश्रु
तादक्षिणाकिंप्रस्तोत्रादिप्रसर्पणाधिकरणीभूतपूर्वक्रतुसंकल्पकालेयादित्सिताद्वादशशतरूपासैववा । उतप्रतिहर्त्रपच्छेदेदित्सिता
सर्वस्वरूपावेतिसंशयेपूर्वस्मिन्दास्यन्स्यादित्युक्तत्वेनयाक्रतुस्वभावतःप्राप्ताद्वादशशतरूपासैवेतिप्राप्तेप्रथमंद्वादशशतंधनंदास्य
न्नासीत्तत्परेणप्रतिहर्त्रपच्छेदनिमित्तेनसर्ववेदसेनबाधितमेवेतिपुनर्यज्ञेसर्वस्वदक्षिणैवदेया । नचसर्वस्वदक्षिणापिप्रतिहर्त्रपच्छे
दात्परेणोद्गात्रपच्छेदनिमित्तकाऽऽदक्षिण्येनबाधितेतिवाच्यं । प्रतिहर्त्रपच्छेदनिमित्तकसर्वस्वदक्षिणायाःप्रयोगांतरेनिक्षेपोपपत्ते

तियाश्रुत्युक्तादक्षिणासापूर्वंभाविप्रतिहर्त्रपच्छेदनिमित्तकपूर्वप्रयोगस्थसर्वस्वदित्सायाअबाधेन
सर्वस्वरूपैव नतुयाज्योतिष्टोमेनित्याद्वादशशतरूपासा तस्मान्नप्रतिहर्त्रपच्छेदस्यसर्वथाबाधः

रदक्षिण्येननसर्वथाबाधइतिसिद्धांतितं । प्रथमप्रयोगं बहिष्पवमानप्रसर्पणाधिकरणीभूतं ॥ नन्विति ॥ येनसर्ववेदसंदद्यादि
तिशास्त्रस्यप्रयोगांतरेनिक्षेपाभावेनाप्रामाण्यंस्यादितिभावः । इतिउद्गात्रपच्छेदनिमित्तकप्रयोगांतरेसर्वस्वदानेद्वादशशतदक्षि
णायाअपिप्राप्तत्वेनतदंतर्भावादिज्ञातव्यं । यत्पूर्वस्मिन्नित्युक्तदक्षिणायाद्वादशशतरूपत्वेप्रतिहर्त्रपच्छेदनिमित्तकप्रायश्चित्ताकर
णेनप्रत्यवायप्राप्तेः । अयंचविचारउद्गात्रपच्छेदस्यप्रतिहर्त्रपच्छेदात्पाश्चात्यत्वएवसति नान्यथा । यदिचप्रतिहर्त्रपच्छेदाभावे
पिउद्गातृमात्रापच्छेदएवजातस्तदापुनर्यजेत तत्रतद्दद्याद्यत्पूर्वस्मिन्दास्यन्स्यादित्युक्तादक्षिणाद्वादशशतरूपैव नसर्वस्वरूपा ।

SGDF
Sri Gargeshwari Digital Foundation

उद्गात्रपच्छेदनिमित्तकेति भाष्यं ॥

तस्याःप्रतिहर्त्रपच्छेदमात्रनिमित्तकत्वेनतदभावेयोगादिति ॥ प्रयोगांतरइति ॥ उद्गात्रपच्छेदनिमित्तकप्रथमप्रयोगंदक्षिणाहीनंपरिसमाप्यप्रतिहर्त्रपच्छेदनिमित्तेनकर्तव्येज्योतिष्टोमस्यद्वितीयप्रयोगइत्यर्थः । इतोपिनसर्वस्वदानशास्त्रस्यबाधः । तथाहि । यथाबदरफलेश्यामरक्तरूपयोःक्रमेणोत्पत्त्यनंतरंयःपूर्वंश्यामःसएवेदानींपाकेनरक्तइतिज्ञानयोर्यथाऽविरोधेनप्रामाण्यमेवास्ति । एवमेवयोद्वादशशतदक्षिणाधिकरणक्रतुःप्रतिहर्त्रपच्छेदेननिमित्तेनसर्वस्वदानविशिष्टतयाकर्तव्योऽभूत्सएवेदानीमुद्गात्र २३१

किंतुप्रयोगांतरेनिक्षेपइत्युक्तं । उक्तंहिटुप्टीकायां "तस्यप्रयोगांतरेनिक्षेपःक्रियत" इति । अपिचैकस्मिन्नपिप्रयोगेक्रमिकाभ्यांनिमित्ताभ्यांक्रतौतत्तन्नैमित्तिककर्तव्यतयोर्बदरफलेश्यामरक्तरूपयोरिवक्रमेणोत्पत्तेरूपज्ञानद्वयवच्छास्त्रद्वयमपिप्रमाणमेव । उक्तंह्यपच्छेदाधिकरणे "नैमित्तिकशास्त्रस्यह्ययमर्थः निमित्तोपजननात्प्रागन्यथाकर्तव्योपिक्रतुर्निमित्तेसत्येवंकर्तव्य" इति । शास्त्रदीपिकायां

पच्छेदेननिमित्तेनादक्षिण्यविशिष्टतयाकर्तव्योजातइत्येवंतयोःसर्वस्वदानादक्षिण्यप्रतिपादकशास्त्रजन्यज्ञानयोःप्रामाण्यात्तज्जनकशास्त्रयोरपिप्रामाण्यमित्याह ॥ अपिचेत्यादिना ॥ क्रमिकाभ्यां प्रतिहर्त्रुद्गात्रपच्छेदरूपाभ्यां ॥ तत्तन्नैमित्तिकेति ॥ प्रतिहर्त्रपच्छेदनिमित्तकसर्वस्वदानवत्तयाकर्तव्यतायाःउद्गात्रपच्छेदनिमित्तकादक्षिण्यवत्तयाकर्तव्यतायाश्चक्रमेणोत्पत्तेरित्यर्थः ॥ अन्यथेति ॥ द्वादशशतदक्षिणावत्त्वेनेत्यर्थः ॥ निमित्तेसतीति ॥ प्रतिहर्त्राद्यपच्छेदरूपेनिमित्तेप्राप्तेसतीत्यर्थः ॥ एव

SGDF
Sri Gargeshwari Digital Foundation

मिति ॥ सर्वस्वदक्षिणावत्त्वादिनाकर्तव्यइत्यर्थः । तथाचनसर्वथाऽप्रामाण्यमितिभावः ॥ अप्रामाण्यमिति ॥ (प्रामाण्य मेवेति) ॥ तथाचपूर्वस्मिन्नेकस्मिन्नेवक्रतौप्रकारद्वयेनकरणयोग्यतयोरुत्पन्नत्वेनतदुभयज्ञानस्यप्रामाण्यात्तज्जनकंतस्मिन्क्रतौसर्वस्वदानादक्षिण्याभ्यांकरणयोग्यताप्रतिपादकतज्ज्ञानजनकमितियावत् । शास्त्रद्वयंप्रमाणमेवेत्यर्थः । प्राक्तथाभूतस्य श्यामतयाभूतस्य पश्चादन्यथाभावात् रक्ततयाभावात् यथाश्यामरक्तरूपेणबदरफलरूपार्थस्यैवतादृशत्वात्श्यामरक्तस्वरूपत्वात्तज्ज्ञानयोर्नाप्रामाण्यंयथास्थितार्थावगाहित्वात् । एवंप्राक्तथाभूतस्यप्रतिहर्त्रपच्छेदनिमित्तकसर्वस्वदक्षिणावत्त्वेनकरणयोग्यत्ववतः

ततश्चार्थस्यैवबदरफलस्येवश्यामरक्तरूपेणप्राक्तथाभूतस्यपश्चादन्यथा
भावा ("त्पूर्वशास्त्रस्यप्रामाण्यमेव ")न्नपूर्वशास्त्रस्याप्रामाण्यं । नहि
बदरफलेश्यामत्वविज्ञानंअनंतरस्यरक्तत्वस्यावगत्यामिथ्याभवतीति ।

क्रतुरूपार्थस्यैवपश्चादन्यथाभावात्उद्गात्रपच्छेदनिमित्तकादक्षिण्येनकरणयोग्यतावत्तयाभावात्क्रतुरूपार्थस्यैवतादृशत्वात्सर्वस्वदक्षिणादक्षिण्यांकरणयोग्यतावत्स्वरूपत्वात्नैकस्मिन्क्रतौतदुभयज्ञानयोरप्रामाण्यं यथास्थितार्थावगाहित्वात् ततश्चनतज्जनकशास्त्रयोरप्यप्रामाण्यमितिभावः । ननुएकस्मिन्नेवक्रतौप्रतिहर्त्रपच्छेदनिमित्तकसर्वस्वदक्षिणावत्त्वेनकर्तव्यत्वज्ञानंअनंतरभाविन्योद्गात्रपच्छेदनिमित्तकादक्षिण्यवत्तयाकर्तव्यतावगत्यामिथ्याकिंनस्यादित्यतआह ॥ नहीति ॥ विज्ञानं प्रागासीदि

232

SGDF
Sri Gargeshwari Digital Foundation

तिविज्ञानं । अपच्छेदन्यायवैषम्यंप्रकृतेउपपाद्यतद्विषयंसंगृह्णाति ॥ पौर्वापर्यमिति ॥ केवलमितिशेषः । यत्रेतिश्रवणात्तत्रे
तिग्राह्यं । तथाचकेवलमुपजीव्योपजीवकभावरहितंपौर्वापर्यंयत्रास्ति तत्रापच्छेदनयोऽपच्छेदन्यायोभवेत् । नहिप्रतिहर्त्रुद्गा
त्रोःक्रमेणापच्छेदेपूर्वमुपजीव्यमित्यर्थः । प्रकृतेचप्रत्यक्षागमयोःपौर्वापर्येसत्यपिउपजीव्योपजीवकभावांगीकारात्ताभ्यांतन्न्याय
वैषम्यमितिभावः । तथाविरोधश्चयत्रास्तितत्प्रयुक्तंनियमात्अत्यंतंविषयांतरेऽनवकाशरूपंपूर्वाप्रामाण्यंचयत्रनास्तितत्रापच्छेद 233
नयोभवेत् । प्रतिहर्त्रुद्गात्रोःक्रमेणापच्छेदेतन्निमित्तकसर्वस्वदानादक्षिण्ययोर्विरोधोस्तितत्प्रयुक्तंपूर्वाप्रामाण्यंनियमान्नास्ति । स

तस्मात् "पौर्वापर्यंविरोधश्चपूर्वाप्रामाण्यमेवच । नियमान्नास्तियत्रासावपच्छेदन — तरंगिणी
योभवेत् ।" नचैवंप्रकृतेप्रत्यक्षप्रामाण्यस्यावकाशोस्तीतिनापच्छेदन्यायः । एते
नसगुणसप्रपंचश्रुत्योर्निर्गुणनिष्प्रपंचश्रुतिभ्यामपच्छेदन्यायेनबाधइतिनिरस्तं।

र्ववेदसंदद्यादितिशास्त्रस्यप्रतिहर्तृमात्रापच्छेदादौसतिसावकाशत्वात् । प्रकृतेचप्रत्यक्षागमयोर्विरोधोस्ति । तन्निमित्तकंपूर्वस्यप्र
त्यक्षस्याप्रामाण्यंनियमान्नास्ति । विषयांतरेसावकाशत्वसंभवादितिवक्तव्यं । नह्येवंवक्तुंशक्यते । अनुमानविरोधेनसत्त्वग्राहि
णःप्रत्यक्षस्यसत्त्वरूपार्थंविनाविषयांतरेप्रामाण्यस्यावकाशाभावान्नापच्छेदन्यायावकाशः । नचप्रकृतेपिसत्त्वग्राहिणःप्रत्यक्षस्या
पिव्यावहारिकसत्त्वावगाहित्वेनसावकाशत्वमस्तीतिवाच्यं । सत्तात्रैविध्यस्योत्तरत्रदूष्यत्वादितिहृदयं ॥ एवमिति ॥ सर्ववेद
सशास्त्रवदित्यर्थः ॥ एतेनेति ॥ अपच्छेदन्यायवैषम्योपपादनेनेत्यर्थः ॥ सगुणेति ॥ सगुणश्रुतेर्निर्गुणश्रुत्यापच्छेदन्याये

SGDF
Sri Gargeshwari Digital Foundation

नबाधः । निषेधरूपत्वेननिर्गुणश्रुतेःपरत्वात् । तथासप्रपंचश्रुतेर्निष्प्रपंचश्रुत्यापरयाऽपच्छेदन्यायेनबाधइतिपरोक्तमप्येतेनैव निरस्तं । नह्यस्माभिःपूर्वत्वमात्रेणबाधकत्वमुच्यते किंतूपजीव्यत्वेन । नचापच्छेदेपूर्वमुपजीव्यमित्युक्तन्यायेनेत्यर्थः । यद्वा सर्वस्वदानशास्त्रवत्सप्रपंचादिश्रुतेरर्थांतरेऽवकाशाभावेनेत्यर्थः ॥ तत्परत्वादिति ॥ वैदिकं अद्वैतादिवाक्यं पूर्वस्य प्रत्यक्षस्य बाधकं । कुतः अद्वैतवाक्यस्यतत्परत्वात् । तस्मिन्नद्वैतेतात्पर्ययुक्तत्वात् । परत्वात् अपच्छेदन्यायेनपरत्वादित्यर्थः ॥

एतेनैव "तत्परत्वात्परत्वाच्चनिर्दोषत्वाच्चवैदिकं। पूर्वस्यबाधकंनायंसर्पइत्याप्तवाक्यवदि" त्यानंदबोधोक्तंनिरस्तं । यतः "तत्परत्वमसिद्धत्वात्परत्वंव्यभिचारतः । निर्दोषताऽन्यथासिद्धेःप्राबल्यंनैवसाधयेत्" । असिद्धंहिमानांतरविरोधेश्रुतेःतत्परत्वं । परत्वंतुप्रमानंतरभ्रमेव्यभिचारि । दृश्यतेच" नक्त्वासेडि "तिपरंप्रति" मृडमृदे "त्यादिपूर्वंबाधकं ।

निर्दोषत्वाच्चेति ॥ अपौरुषेयत्वेनानाशंकितदोषत्वादित्यर्थः । आप्तवाक्यवत् यथाऽयंसर्पइतिप्रत्यक्षस्यबाधकमित्यर्थः । अद्वैतेतात्पर्याभावेचनिर्दोषत्वंनसंभवतीतिभावः । तत्परत्वं अद्वैततात्पर्ययुक्तत्वादित्ययंहेतुः प्राबल्यंनैवसाधयेत् । कुतः असिद्धत्वात् । अद्वैतेतात्पर्ययुक्तत्वस्यासिद्धत्वादित्यर्थः । असिद्धिमेवाह ॥ असिद्धंहीति ॥ द्वितीयस्यपरत्वहेतोर्व्यभिचारस्थलमाह ॥ परत्वंत्विति ॥ पुनःपरत्वस्यव्याकरणशास्त्रीयंव्यभिचारस्थलांतरमाह ॥ दृश्यतेचेति ॥ "मृडमृदगुधकुषक्लि ॥ ११८ ॥

SGDF Sri Gargeshwari Digital Foundation

शवदवसः क्त्वा" । एभ्योधातुभ्यः परः क्त्वाकित्स्यादितिक्त्वाप्रत्ययस्यकित्त्वंककारेत्संज्ञकत्वंविहितं। इदंचसूत्रंपूर्वं नक्त्वासेडिति परंपश्चात्तनंसूत्रं । सेड्धातवोऽनिड्धातवइतिद्विविधाधातवःसंति । तत्रसेट्क्त्वा सेड्धातोःपुरतःप्राप्तःक्त्वाप्रत्ययः कित्न इडागमो पेतःक्त्वाककारेत्संज्ञकोनस्यात्इत्येवंसेटःक्त्वाप्रत्ययस्यकित्त्वनिषेधःकृतइतिस्थितिः । तत्रमृडमृदेत्यादिनायत्क्त्वाप्रत्ययस्यकि त्त्वंविहितंतदनुपपन्नं। क्त्वाप्रत्ययस्यकित्त्वंस्वभावतएवसिद्धमितितद्विधानवैयर्थ्यात् असिद्धस्यैवविधेयत्वात् अतो"व्यर्थंसत्किं चिदिष्टंज्ञापयती"तिन्यायेन"नक्त्वासेडि"तिसेटःक्त्वाप्रत्ययस्ययःकित्त्वनिषेधःकृतस्तन्निषेधार्थत्वंमृडेत्यादिविधानस्यांगीकृतं। तथाचशास्त्रेपिपूर्वमेवपरस्यबाधकंदृष्टमितिपरत्वहेतोर्व्यभिचारित्वात्नप्राबल्यसाधकत्वमितिभावः । यथोक्तंवैयाकरणैः "स्वत एवकितःक्त्वायाःकिद्वाचोऽनर्थकत्वतः । सेटःक्त्वायाःकिन्निषेधनिषेधार्थत्वमास्थितमिति"। स्वतएव स्वभावतएव कितःककारे त्संज्ञकस्य क्त्वायाःक्त्वाप्रत्ययस्य किद्वाचः मृडेत्यादिसूत्रेणकित्त्वविधानस्य अनर्थकत्वतः व्यर्थत्वात् सेटःक्त्वायाःयःकिन्निषेधः कित्वनिषेधःनक्त्वासेडितिसूत्रेणकृतस्तन्निषेधार्थत्वमास्थितमंगीकृतंपाणिनिनेत्यर्थः । अयमेवाऽर्थःपुनःकारिकांतरेणसंगृहीतः । "कित्त्वंहिक्त्वोनिजंयन्नक्त्वासेडितिनिराकृतं । मृडेत्यादिविधानंतुपुनरुज्जीवयत्यद" इति । क्त्वःक्त्वाप्रत्ययस्य कित्त्वं निजं स्वाभाविकं अतोनविधेयमितिमृडेत्यादिसूत्रेणतद्विधानंतुकर्तृ नक्त्वासेडितिसूत्रेणयत्सेटःक्त्वायाःकित्त्वंनिराकृतं अदःकित्त्वं पुनरुज्जीवयति सेटःक्त्वायाःकित्त्वनिषेधनिषेधेनकित्त्वमेवपुनर्विधत्तइत्यर्थः।निर्दोषत्वाच्चेतिहेतोःनिर्दोषतान्यथासिद्धेरित्यन्यथा

235

SGDF
Sri Gargeshwari Digital Foundation

सिद्धिरुक्ता तामुपपादयति ॥ निर्दोषत्वंत्विति ॥ अद्वैतादिवाक्यस्यस्वार्थेतात्पर्याभावेपिअर्थांतरेप्रामाण्येननिर्दोषत्वमन्यथा सिद्धमितिनतस्यप्राबल्यहेतुत्वमित्यर्थः ॥ ७ ॥ इत्यपच्छेदन्यायवैषम्यविवरणं ॥ १४ ॥ व्यवस्थापकंवेति ॥ एतादृशस्थलेअक्षस्यलिंगबाध्यत्वं एतादृशस्थलेनेतिव्यवस्थापकंवक्तव्यमित्यर्थः । उक्तं व्यवस्थापकमुक्तमित्यर्थः ॥ लिंगेति ॥ सर्ववेष्टनस्मृत्याश्रुतिरनुमीयतेयतोऽतोलिंगग्राह्यासर्ववेष्टनश्रुतिः । पदार्थत्वादिलिंगग्राह्यमनुष्णत्वं । "यजमानःप्रस्तर" इति

निर्दोषत्वंतुअर्थांतरेप्रामाण्येनान्यथासिद्धमिति ॥ ७ ॥ अपच्छेदन्यायवैषम्यं ॥ १४ ॥ एवंचाक्षस्य लिंगादिबाध्यत्वेकालात्ययापदिष्टादेर्दोषतावात्याज्याव्यवस्थापकंवावक्तव्यं । अत्रोक्तंखंडने । तत्राक्षसिद्धस्पर्शनश्रुत्युष्णत्वायजमानत्वादिवल्लिंगशब्दग्राह्यसर्ववेष्टनश्रुत्यनुष्णत्वयजमानत्वादिकमपिव्यावहारिकं । इहत्वक्षसिद्धंसत्यत्वंव्यावहारिकं । लिंगशब्दग्राह्यंमिथ्यात्वंतुतात्विकं ।

शब्दग्राह्यंयजमानत्वमितिविवेकः । तथाचोष्णत्वप्रत्यक्षेणानौष्ण्यानुमानंबाध्यते । उभयोरपिव्यावहारिकत्वेनाक्षसिद्धव्यावहारिकौष्ण्यनिषेधरूपत्वादनुमानस्य । अतोनुमानमेवाक्षबाध्यं । समानविषयकत्वात् । समानविषयकत्वंनामतत्सिद्धसाध्यसमानसत्ताकवस्तुविषयकत्वंविवक्षितं । प्रकृतेचाक्षग्राह्यसत्त्वस्यव्यावहारिकतयाऽनुमानविषयस्यसत्त्वनिषेधरूपमिथ्यात्वस्यतात्विकतयाभिन्नविषयकत्वादनुमानेनैवात्र(सन्घटइत्यादि)प्रत्यक्षंबाध्यं अतःसमानविषयकत्वेबाध्यबाधकभावः । भिन्नविषयत्वे

॥ ११९ ॥

तुनेत्येवंव्यवस्थापकमस्तीत्यर्थः । अद्वैतं द्वितीयनिषेधरूपंमिथ्यात्वं ॥ शरणमिति ॥ तत्प्रतिपादकत्वादितियावत् । श्रुतिः नेहनानेत्यादिका । अनुमानंचग्राह्यं । व्यावहारिकसत्त्वग्राहिणोपजीव्यप्रत्यक्षेणविरोधान्नबिभेतीत्यर्थः ॥ किंवेति ॥ बाध्यबाधकभावमंगीकृत्यमिथ्यात्वग्राहिप्रमाणंतात्विकविषयकत्वाद्बाधकमेव नतुबाध्यं । बाध्यंतुप्रत्यक्षमेवेतिभावइत्यर्थः । अनु

237

एवंच "पारमार्थिकमद्वैतंप्रविश्यशरणंश्रुतिः । विरोधादुपजीव्येननबिभेतिकदाचने" ति । तत्र किंसत्यत्वमिथ्यात्वग्राहिणोर्व्यावहारिकतात्विकविषयकत्वाद्बाध्यबाधक(भावोने)तैवनेतिभावः किंवामिथ्यात्वग्राहितात्विकविषयकत्वाद्बाधकमेवनतुबाध्यमिति । आद्येप्यनुमित्यादिकंकिमक्षसिद्धव्यावहारिकसत्वस्याभावमगृहीत्वैवतदसिद्धस्यतात्विकसत्यत्वस्यैवाभावंगृह्णाति किंवातत्सिद्धस्यैवप्रतिपन्नोपाधौतात्विकमभावं । नाद्यः मिथ्यात्वश्रु(ते)त्यादेरप्रसक्तप्रतिषेधत्वापातात् । अक्षसिद्धस्यसत्वस्यप्रतिपन्नोपाधावभावाग्रहणेतस्यतात्विकत्वापाताच्च । नद्वितीयः ।

मित्यादिकं मिथ्यात्वावगाह्यनुमित्यादिकमित्यर्थः । तदसिद्धस्य अक्षासिद्धस्य । तत्सिद्धस्यैव प्रत्यक्षसिद्धतात्विकसत्त्वस्यैव । मिथ्यात्वश्रुतेः तात्विकसत्त्वनिषेधपरायाः ॥ अप्रसक्तेति ॥ तात्विकसत्त्वस्यप्रत्यक्षासिद्धत्वेनाप्रसक्तत्वादित्यर्थः ॥ अक्षसिद्धस्येति ॥ अक्षसिद्धसत्त्वाभावमगृहीत्वैवतदसिद्धसत्त्वस्याभावग्रहणेऽक्षसिद्धसत्त्वाभावग्राहकत्वाभावेनतस्याबाधितत्व

SGDF
Sri Gangadharendra Saraswati Foundation

प्राप्त्याऽक्षसिद्धसत्त्वस्यतात्विकत्वंस्यादित्यर्थः ॥ तात्विकतदभावेति ॥ तात्विकोयःसत्त्वाभावःतद्ग्राहिणएवेत्यर्थः । तद्बा
धकत्वेन अक्षसिद्धसत्त्वबाधकत्वेन ॥ अबाधोक्तीति ॥ समानविषयकत्वप्राप्त्याऽबाधोक्त्ययोगादित्यर्थः ॥ उपजीव्येति॥
तथाच "मिथ्यात्वग्राहितात्विकविषयकत्वाद्बाधकमेवे" त्ययुक्तमितिभावः ॥ योगेवेति ॥ उपजीव्यप्रत्यक्षबाधितस्यापिता
त्विकत्वयोगइत्यर्थः । तात्विकादित्यतां तात्विकादित्याभेदं ॥ श्रुतिरिति ॥ "आदित्योयूप" इतिश्रुतिरित्यर्थः ॥ उपजी

प्रतिपन्नोपाधौतात्विकतदभावग्राहिणएवतद्बाधकत्वेनाबाधोक्त्ययोगात् । नांत्यः उपजीव्य
प्रत्यक्षबाधितस्यमिथ्यात्वस्यतात्विकत्वायोगात् । योगेवाऽनौष्ण्यमपितात्विकंस्यात् । एवं
च "आदित्योयूप" इत्यादावपि "तात्विकादित्यतांयूपस्याश्रित्यशरणंश्रुतिः । विरोधादुपजी
व्येननबिभेतिकदाचनेति"स्यात् । नन्विदमनौष्ण्यमतात्विकविश्वांतर्गतेनजलाद्यनौष्ण्ये
नतुल्यस्वभावंचेन्नतात्विकं । नचेदद्वैतस्यैवनामांतरंस्यादितिचेत् न । विश्वमिथ्या
त्वमपिघटादितुल्यतयाक्षसिद्धेनाऽतात्विकेनरूप्यादिमिथ्यात्वेनसमस्वभावंचेन्नतात्विकं ॥

व्येनेति ॥ व्यावहारिकभेदग्राह्युपजीव्यप्रत्यक्षविरोधान्नबिभेतीत्यर्थः । योगेवानौष्ण्यमपितात्विकंस्यादित्युक्तंतदयुक्तमित्या
शंकते ॥ नन्विदमिति ॥ वह्नौसाध्यमानंतात्विकतयाभवद्भिरापाद्यमानंअनौष्ण्यमित्यर्थः । तुल्यस्वभावं व्यावहारिकं ॥
नचेदिति ॥ अतात्विकजलाद्यनौष्ण्येनव्यावहारिकेणसमस्वभावंनचेत्तर्ह्यौष्ण्याभावस्तात्विकःप्राप्तः । तथाचास्मदभिमतता

238

SGDF
Sri Gargeshwari Digital Foundation

त्विकद्वितीयाभावएवपर्यवसन्नइतितस्यैवेदंनामांतरमित्यर्थः । तथाचेष्टापत्तिरितिभावः । विश्वमिथ्यात्वं अनुमानेनत्वयासा ध्यमानं । अतात्विकेन व्यावहारिकेण । नतात्विकं तथाचमिथ्यात्वस्यतात्विकत्वाभावेजगतःपारमार्थिकत्वसिद्धिरितिभावः ॥ नचेदिति ॥ प्रपंचनिष्ठंमिथ्यात्वंअर्थक्रियानर्हरूप्यादिनिष्ठमिथ्यात्वसमस्वभावंनभवतिकिंत्वर्थक्रियाकारित्वाद्यविरोधिकिंचि दस्तीत्यंगीक्रियमाणेब्रह्मभिन्नसत्यप्रपंचप्राप्त्याद्वैतस्यैवनामांतरंस्यात् । अद्वैतस्यैवनामांतरंस्यादित्येतत्प्रतिबंदीत्वेनोक्तं । वस्तु तस्तुप्रपंचेमिथ्याभूतरूप्यादिवैलक्षण्यप्राप्त्यातत्स्वरूपोपमर्दकंनस्यात् । तथाचतत्स्वरूपसहिष्णोस्तत्प्रतिषेधत्वस्यपारिभाषिक 239

नचेत्द्वैतस्यैवनामांतरंस्यादितिसाम्यात् । ननुतात्विकत्वमात्रेणविल
क्षणमपितन्मिथ्यात्वलक्षणयुक्तमितिचेदिदमपितन्मात्रेणविलक्षणमपि
स्पर्शत्वव्याप्यजातिविशेषवदाश्रयत्वरूपानौष्ण्यलक्षणयुक्तमितिसमं ।

त्वापातादित्यत्रतात्पर्यमितिज्ञेयं । साम्याभावमाशंकते ॥ नन्विति ॥ विलक्षणं व्यावहारिकात्रूप्यमिथ्यात्वात् । तत् प्रपं चनिष्ठंमिथ्यात्वं ॥ मिथ्यात्वेति ॥ प्रतिपन्नोपाधौनिषेधप्रतियोगित्वरूपमिथ्यात्वलक्षणसत्त्वमात्रेणतत्रमिथ्यात्वमितिव्यपदि श्यतइत्यर्थः । इदमपि वह्नौसाध्यमानानौष्ण्यमपि ॥ तन्मात्रेणेति ॥ तात्विकत्वमात्रेणविश्वांतर्गतव्यावहारिकजलाद्यनौ ष्ण्यविलक्षणमपिअनौष्ण्यलक्षणयुक्तत्वादेवानौष्ण्यमितिव्यपदिश्यतइत्यर्थः । अनौष्ण्यंलक्षयति ॥ स्पर्शत्वेति ॥ स्पर्शत्व

SGDF
Sri Gargeshwari Digital Foundation

240

व्याप्योयोजातिविशेषःशीतत्वंतद्वान्शीतस्पर्शःतदाश्रयोजलादिरनुष्णइत्युच्यतेतन्निष्ठधर्मत्वमेवानौष्ण्यमित्यर्थः । पुनर्व्यव स्थापकांतरंशंकते ॥ नन्विति ॥ प्रातिभासिकस्यमिथ्यात्वं प्रातिभासिकप्रतियोगिकप्रतिपन्नोपाधिनिषेधः ॥ व्यावहारिक स्येति ॥ व्यावहारिकप्रपंचप्रतियोगिकोनिषेधस्तात्विकःअतस्तात्विकनिषेधग्राह्यनुमानमेवव्यावहारिकसत्त्वावगाहिप्रत्यक्षस्य बाधकमितिभावः । प्रातिभासिकप्रतियोगिकोनिषेधएवव्यावहारिकइत्यस्यप्रतिबंदीमाह ॥ जलादीति ॥ मिथ्यात्वंनिषेधइ

ननुप्रातिभासिकस्यैवमिथ्यात्वंव्यावहारिकं व्यावहारिकस्यतुतात्विकमितिचेन्न।जलादिस्थ स्यप्रातिभासिकौष्ण्यस्याभावएवव्यावहारिकः अग्न्यादिस्थस्यव्यावहारिकौष्ण्यस्यतुतात्वि कइत्यापातात् तस्मान्मिथ्यात्वंतात्विकंअनौष्ण्यंतुव्यावहारिकमितिव्यवस्थानयुक्ता । अ स्तुवासा तथापितात्विकमिथ्यात्वानुमितिबाधेनसत्यत्वस्यव्यावहारिकत्ववत्व्यावहारि कानुष्णत्वानुमितिबाधेनौष्ण्यंनभोनैल्यवत्स्वार्थक्रिययासहस्वप्नवत्प्रातिभासिकंस्यात् ।

त्यव्याख्यानेऔष्ण्यस्याभावइतिप्रतिबंद्ययोगइतिमंतव्यं । व्यावहारिकप्रतियोगिकनिषेधस्तात्विकइत्यस्यापिप्रतिबंदीमाह ॥ अग्न्यादिस्थस्येति ॥ औष्ण्यस्यत्वित्यनंतरंअभावइतिवर्तते । खंडनकारोक्तांव्यवस्थांदूषयित्वोपसंहरति ॥ तस्मादिति ॥ मिथ्यात्वं लिंगशब्दग्राह्यं । व्यावहारिकं स्पर्शनश्रुत्युष्णत्वायजमानत्वादिवदित्यर्थः । सा व्यवस्था सत्यत्वस्य अक्षसिद्धस्य ॥ व्यावहारिकेति ॥ तात्विकमिथ्यात्वविषयकानुमितिबाधेनाक्षसिद्धस्यव्यावहारिकत्वेव्यावहारिकानुष्णत्वानुमितिबाधेना

SGDF
Sri Gargeshwari Digital Foundation

क्षसिद्धमौष्ण्यंनभोनैल्यवत्प्रातिभासिकंस्यात् न्यायसाम्यादितिशेषः । नचौष्ण्यस्यप्रातिभासिकत्वेकरतलानलसंयोगाद्दाहाद्यर्थ क्रियानस्यादितिवाच्यं । अर्थक्रिययासहस्वप्नस्ययथाप्रातिभासिकत्वंतद्वत्दाहाद्यर्थक्रिययासहैवौष्ण्यंप्रातिभासिकमित्यर्थः । न चवह्नावनुमितिविषयभूतमनौष्ण्यंप्रातिभासिकमेवनव्यावहारिकमितिवाच्यं । तर्हिमिथ्यात्वानुमितिविषयभूतमिथ्यात्वमपिप्रा तिभासिकमेवनतात्विकमितिसमं । पुनर्व्यवस्थापकमाशंक्यनिषेधति ॥ तत्वेति ॥ उभयेति ॥ वादिप्रतिवादीत्यर्थः । तथा चप्रत्यक्षेणैवानुमानबाधः । सत्वबुद्धिप्रामाण्येनोभयसंमतिः । भवतांसंमतत्वेपिममासंमतेः । अतोत्रानुमानमेवप्रत्यक्षबाधक 251

तत्वप्रदीपिकायांतुऔष्ण्यधीप्रामाण्येउभयसंमतिः सत्वबुद्धौतुनेत्युक्तं तन्न । इहाऽसंमतौहेत्वभा वात् । तत्त्वशुद्धौतुमिथ्यात्वानुमितिःश्रुत्यनुगृहीतेतिनाक्षबाध्याइतरातुनेतितद्बाध्येत्युक्तं तन्न ।

मित्यर्थः ॥ इहेति ॥ सत्वबुद्धिप्रामाण्यइत्यर्थः । पुनर्व्यवस्थापकांतरमाशंक्यनिषेधति ॥ तत्त्वशुद्धाविति ॥ इतरा अनु ष्णत्वानुमितिः श्रुत्यनुगृहीतानेत्यक्षबाध्येत्यर्थः ॥ मिथ्यात्वेति ॥ मिथ्यात्वानुमित्यनुग्राहिकाश्रुतिरनुवादकत्वेनाप्रमाणं । नचमिथ्यात्वस्याप्राप्तत्वाच्छ्रुतेस्तदनुवादकत्वायोगः । दृश्यत्वेनानुमितासत्यमिथ्यात्वानुवादित्वसंभवात् । नचानुमानप्राप्तानु वादकत्वंश्रुतेःकथमितिवाच्यं । यथावह्नौहिमनिवारणशक्तेरतींद्रियत्वेनप्रत्यक्षसिद्धत्वाभावात्अयंवह्निर्हिमनिवारणशक्तिमान् उद्भूतोष्णस्पर्शविशेषवत्त्वादित्याद्यनुमानसिद्धहिमनिवारणशक्त्यनुवादित्वं "अग्निर्हिमस्यभेषज"मितिश्रुतेर्दृष्टंतद्वदित्यर्थः ।

SGDF
Sri Gargeshwari Digital Foundation

न्यायामृ०

॥ १२२ ॥

पुनर्व्यवस्थापकांतरमाशंक्यनिराचष्टे ॥ मिथ्यात्वेति ॥ अतोनाक्षबाध्येत्यर्थः । इतरा अग्न्यनौष्ण्यानुमितिर्नतर्कानुगृहीता तोबाध्येत्यर्थः ॥ उक्तंचेति ॥ अक्षबाधेनात्मक्षणिकत्वतर्काणामाभासत्वमित्यर्थः । ध्रुवे सति । लिंगं क्षणिकत्वसाधकंसत्त्वं ॥ प्रत्यक्षेति ॥ यतइतिशेषः । योऽहंपाकादिकर्ताऽभवंसोहमधुनाव्याख्याताभवमितिस्थैर्यग्राहिप्रत्यभिज्ञाप्रत्यक्षसिद्धार्थविरु

मिथ्यात्वश्रुतेः(अग्निर्हिमस्यभेषज)मितिश्रुतेरनुमितहिमनिवारणशक्त्यनुवादित्ववद
नुमितासत्यमिथ्यात्वानुवादित्वोपपत्तेः। मिथ्यात्वानुमितिस्तर्कानुगृहीता इतरातुनेति
चेन्न । तर्काणांमिथ्यात्वानुमितिवदक्षबाधेनात्मक्षणिकत्वादितर्काणामिवाभासत्वा
त् । उक्तंचसुरेश्वरवार्तिकेबौद्धंप्रति । "प्रत्यभिज्ञायमानेर्थेतदेवेदमितिध्रुवे । लिंगमा
भासतामेतिप्रत्यक्षार्थविरुद्धगि"ति । नन्वनौष्ण्यस्यौष्ण्यनिरूप्यत्वात्तस्यचाग्न्यादा
वेवग्राह्यत्वात्तत्रतदभावानुमाबाधिता मिथ्यात्वंतुनसत्यत्वाभावः । किंतुभावांतरं ।

द्धार्थज्ञानजनकमित्यर्थः । मिथ्यात्वानुमितेरग्न्यनौष्ण्यानुमितिवैषम्यमाशंकते ॥ नन्विति ॥ तस्यचेति ॥ प्रतियोगिभूतौष्ण्यस्य । तत्र वह्नौ तदभावानुमा अनौष्ण्यानुमा । प्रतियोगिग्राहकतयोपजीव्येनप्रत्यक्षेणबाधितेत्यर्थः ॥ मिथ्यात्वंत्विति ॥ येनपक्षएवसत्यत्वरूपप्रतियोगिग्राहकतयोपजीव्येनप्रत्यक्षेणबाधःस्यादित्यर्थः । अभावत्वेपि सत्यत्वाभावत्वेपि प्रतियो

श्रीनिवा०

मिथ्या. अग्नि

१ । १५

२४९

॥ १२२ ॥

SGDF
Sri Gargeshwari Digital Foundation

गिसत्त्वं तत्प्रतियोगिभूतसत्त्वं ॥ ब्रह्मणीति ॥ तथाचौष्ण्यस्यपक्षएवग्रहणवत्नसत्यत्वरूपप्रतियोगिज्ञानंपक्षएवापेक्षितं ये नपक्षएवप्रतियोगिग्राहकतयोपजीव्यप्रत्यक्षेणबाधःस्यादित्यर्थः । औष्ण्यप्रत्यक्षानौष्ण्यानुमित्योर्भिन्नविषयत्वाद्बाध्यबाधक भावएवनास्तीत्याह ॥ औष्ण्येति ॥ इहेति ॥ पक्षएवप्रतियोगिग्राहकत्वेनोपजीव्यत्वाभावेपीत्यर्थः । किंचमिथ्यात्वंनसत्य त्वाभावःकिंतुभावांतरमभावत्वेपिप्रतियोगिसत्त्वंब्रह्मणिप्रसिद्धमित्यत्रन्यायसाम्येनदोषमाह ॥ उष्णमात्रइति ॥ अयमर्थः ।

अभावत्वेपितत्प्रतियोगिसत्वंब्रह्मणिप्रसिद्धमितिचेन्न। औष्ण्यतद्भावयोर्व्यावहारिकत्वतात्विक त्वाभ्यांप्रातिभासिकत्वव्यावहारिकत्वाभ्यांवाव्यवस्थोक्तेः। तत्रप्रतियोगिग्राहिणउपजीव्यत्वेऽपिह चधर्म्यादिग्राहिणस्सुतरामुपजीव्यत्वाच्च। उष्णमात्रेशैत्यस्यउष्णविशेषेवानुष्णत्वस्यसाधनेऽबाधा पाताच्च। एतेनौष्ण्यात्यंताभावात्मकमनौष्ण्यंऔष्ण्यमिथ्यात्वरूपमेवेतितस्यतात्विकतेष्टेतिनिरस्तं।

अह्न्यनौष्ण्यानुमितेर्नप्रत्यक्षबाधोयुक्तः । नचप्रत्यक्षेप्रतियोग्युष्णत्वग्राहकत्वेनोपजीव्यत्वाद्युक्तइतिवाच्यं । यदाप्रत्यक्षसिद्धं तेजःपक्षीकृत्यानुष्णत्वंसाध्यते तदाबाधोनस्यादेव । प्रतियोगिभूतौष्ण्यस्यचतेजोंतरेग्रहणसंभवेनपक्षएवाग्रहणात् । अथवास र्वंतेजःपक्षीक्रियते । ननुतर्ह्युष्णत्वंप्रतियोगिभूतंपक्षएवप्रत्यक्षेणज्ञातव्यमितितद्बाधःस्यादेवेतिचेत् स्यादेतदेवं यद्यनौष्ण्यंसा ध्येत नचैवं किंतुशैत्यंसाध्यते तथाचतस्यभावरूपत्वेननतत्रप्रतियोगिग्रहापेक्षा अतःप्रतियोगिग्राहकतयोपजीव्येनप्रत्यक्षेणत

SGDF
Sri Gargeshwari Digital Foundation

त्राबाधापातादिति । योगेवानौष्ण्यमपितात्विकंस्यादितिपूर्वमापादितं । तदुपरिकेनचिदिष्टापत्तिःस्वग्रंथेप्रतिपादितास्तितामाशं
क्यदूषयति ॥ एतेनेति ॥ एतेनेत्युक्तंविवृणोति ॥ **शैत्यस्येति** ॥ स्यादिदंयद्यनौष्ण्यंसाध्येत नह्येवं किंनाम शैत्यंसाध्यते
तदानैवंवक्तुंशक्यं । शैत्यस्यभावरूपत्वेनऔष्ण्यात्यंताभावात्मकत्वाभावात् । अस्माभिरपियोगेवाशैत्यमपितात्विकंस्यादित्येवा
पाद्यमानत्वान्नेष्टापत्तेरवकाशइतिभावः । संगृह्णाति ॥ तस्मादिति ॥ प्रत्यक्षोपजीविभिर्लिंगाद्यैः । स्वविरोधात् प्रत्यक्षविरो

**शैत्यस्यातद्रूपत्वात् । तस्मात् " स्वतःप्रमात्वंप्रत्यक्षेलिंगाद्यैःस्वोपजीविभिः । स्व
विरोधान्मृत्यवस्थामापन्नैर्नैवबाध्यते " ॥ ७ ॥ मिथ्यात्वानुमितेरग्निशैत्यानुमि
तिसाम्यं ॥ १५ ॥ इदंरूप्यमितिप्रत्यक्षमपिनेदंरूप्यमितिसयुक्तिकबलवत्प्रत्यक्षे
णबाध्यं । नतुयुक्त्यैव । गौरोहमित्याद्यपिममशरीरमितिबलवत्प्रत्यक्षबाध्यं**

२४४

धात् मृत्यवस्थामापन्नैः प्रत्यक्षेविद्यमानंयत्स्वतःप्रामाण्यंतन्नैवबाध्यतइतिकारिकार्थः ॥ ७ ॥ **मिथ्यात्वानुमितेरग्निशैत्या
नुमितिसाम्यविवरणं** ॥ १५ ॥ नन्विदंरूप्यमितिप्रत्यक्षंइदंरूप्यंनभवतिदाहच्छेदादिमत्त्वादितियुक्तिबाध्यंदृष्टमितिचेत्त
त्राह ॥ **इदंरूप्यमिति** ॥ ननुगौरोहमितिअहंत्वगौरत्वयोःसामानाधिकरण्यप्रतीतेरात्मनःशरीराभेदावगाहिप्रत्यक्षंआत्मानश ॥ १२३ ॥
रीरंचेतनत्वादित्यादिभेदानुमानबाध्यंदृष्टमित्यतआह ॥ **गौरोहमिति** ॥ किंचममशरीरमितिसर्वसिद्धभेदप्रत्ययाच्चगौरोह

मितिनैक्याध्यासः किंतूपचारइत्याह ॥ **कर्दमेति** ॥ गौणं उपचारः । तथाचव्यवहारमात्रमेवेदंनज्ञानमित्यर्थः । "उपचार
श्चकृष्णोहमपिकर्दमलेपने । वस्त्रस्ये"त्यनुव्याख्यानोक्तेः । ननूष्णंजलमितिप्रत्यक्षंनोष्णंजलंशीतत्वादित्याद्यनुमानबाध्यमि
तिचेत्तत्राह ॥ **उष्णमिति** ॥ गौणं उपचारः । तथाचप्रत्यक्षस्यानुमानबाध्यत्वेगौरोहमुष्णंजलमितिउदाहरणद्वयमप्यऽयुक्त
मित्याशयः । प्रौढिवादोयं । संयुक्तसमवायेनउष्णंजलंकृष्णंवस्त्रमित्यनयोःप्रत्यक्षयोःप्रमाणत्वादितिध्येयं । अतएवास्वरसा

२४५

**कर्दमलिप्तेवस्त्रेकृष्णंवस्त्रमितिवद्गौणंवा उष्णंजलमित्यपिगौणमेवनतुलिंगादि
बाध्यं । यद्वानिश्चितद्रव्यांतरसमभिव्याहाररूपदोषेणशंकिताप्रामाण्येनउ
ष्णंजलमित्यनेनावकाशेदत्तेलिंगादिकंप्रवर्ततेनतुतल्लिंगादिबाध्यं । अहमिहै
वास्मिसदनेजानानइत्यादितुप्रमाणमेव जीवस्याणुत्वात् नतुलिंगादिबाध्यं ।**

दूषणांतरमाह ॥ **यद्वेति** ॥ जलेऔष्ण्याभावस्यस्पार्शनेनपूर्वमेव(सिद्धत्वात्निश्चि)निश्चितत्वात् । निश्चितंयद्द्रव्यांतरंअनुद्भू
तरूपोद्भूतस्पर्शवत्तेजोरूपंतत्समभिव्याहाररूपदोषेणोष्णंजलमितिज्ञानंशंकिताप्रामाण्योपेतमेवजायते ततःपरंप्रवर्तमानंलिंगंबा
धकमिवोच्यतइत्यर्थः । नन्वथापिअहमिहैवास्मिसदनेजानानइत्यात्माणुत्वग्राहिप्रत्यक्षं । आत्माविभुःसर्वत्रकार्योपलंभादित्य
नुमानबाध्यंदृष्टमित्यतआह ॥ **अहमिहैवेति** ॥ **अणुत्वादिति** ॥ उत्क्रांतिगत्यागतीनांहेतूनांसकाशादणुरेवेत्युक्तेरित्यर्थः ।

SGDF Foundation

ननुदीपज्वालैक्यग्राहिप्रत्यक्षंह्रस्वत्वदीर्घत्वादिविरुद्धधर्माधिकरणत्वान्नैकापूर्वोत्तरदीपज्वालेत्यनुमानबाध्यंदृष्टमितिचेत् तत्रवि कल्पयामः । यत्रादौदीपोनिर्वापितःपश्चात्पुनरारोपितस्तत्रज्वालैक्यग्राहिप्रत्यक्षमित्युच्यते । अथवायत्रनिर्वापितारोपितोनभ वति किंतुयथास्थितएवास्ति तत्रज्वालैक्यग्राहिप्रत्यक्षमित्युच्यते । आद्येआह ॥ निर्वापितेति ॥ नाशितेत्यर्थः ॥ भेदग्रा हीति ॥ पूर्वोत्तरज्वालयोरितिशेषः । द्वितीयेत्वाह ॥ अन्यत्रापीति ॥ निर्वापितारोपितदीपेनभवतिचेदित्यर्थः । प्रत्यक्षेण

ज्वालैक्यप्रत्यक्षमपिनिर्वापितारोपितदीपेचेद्भेदग्राहिप्रत्यक्षेणबाधितमेवजायते । अ न्यत्रापिदीर्घोयंदीपोह्रस्वोनेतिप्रत्यक्षेणबाध्यते नत्वऽनुमित्या । तादृशप्रत्यक्षाभावेतुन दीपभे(दमनुपश्यामः)दः । दूरस्थस्यायंसर्पइत्याद्यपिप्रत्यक्षंनशब्दमात्रेणबाध्यं किंतुना यंसर्पइत्याप्तवाक्यमूलपरीक्षितप्रत्यक्षगौरवादेव । राजगौरवादिवराजभृत्येनामात्यः,

परिणामभेदग्राहिप्रत्यक्षेण । दीर्घोयमित्यादिपरिणामभेदग्राहिप्रत्यक्षाभावेकथमित्यतआह ॥ तादृशेति ॥ नेति ॥ एकप्र कारेणैवदीपस्यसत्त्वात्तत्रभेदग्राहिलिंगस्यैवाभावात् । तथाचतत्रैक्यग्राहिप्रत्यक्षंप्रमाणमेवेतिभावः । नन्वयंसर्पइतिप्रत्यक्षंना यंसर्पइत्याप्तवाक्येनबाध्यंदृष्टमित्यतआह ॥ अयंसर्पइति ॥ अयंसर्पइतिप्रत्यक्षंपुनरुत्तरक्षणेनायंसर्पइतिस्वप्रत्यक्षेणैवबाध्यं भविष्यतीत्यतउक्तं ॥ दूरस्थस्येति ॥ स्वस्यदूरस्थत्वेनविशेषदर्शनावकाशाभावेनभ्रमएवभविष्यति नबाधकप्रत्यक्षावकाशइ

SGDF Sri Gargeshwari Digital Foundation

तिभावः । दृष्टांतांतरमाह ॥ श्रुतीति ॥ श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानांसमवायेपरदौर्बल्यस्यनिर्णीतत्वात् । दुर्बले नापिश्रुत्यनुसारिणाप्रकरणेनश्रुतिगौरवात्प्रबलमपिलिंगादिकंबाध्यंदृष्टं । तथाहि "यएषोंतरक्षणी"त्यत्रोक्तंचक्षुरंतस्स्थत्वरू पलिंगंप्रबलमपि "प्राणोब्रह्मकंब्रह्मखंब्रह्मे"त्यादिब्रह्मश्रुत्युपेतप्रकरणेनदुर्बलेनापिश्रुतिगौरवाद्बाध्यंदृष्टमित्यवधेयं ॥ शिष्टा कोपेयथोदितमिति ॥ प्रमाणलक्षणेस्मृतिपादेचिंतितं । "शिष्टाकोपेविरुद्धमितिचेत्नशास्त्रपरिमाणत्वादि"त्यत्र "वेदंकृ त्वावेदिंकरोती" तिश्रूयते । वेदोनामसंमार्जनसाधनभूतदर्भमुष्टिः । तस्यकरणंनामदृढबंधनादिरूपःसंस्कारः । वेदिर्नामगार्ह

श्रुतिगौरवादिववाश्रुत्यनुसारिप्रकरणादिनालिंगादिकं । उक्तंहि "दुर्बलस्यप्र
माणस्यबलवानाश्रयोयदा । तदापिविपरीतत्वंशिष्टाकोपेयथोदित"मिति ।

पत्याहवनीययोर्मध्येचतुरंगुलखाताभूमिः । तत्करणंनामवेदेनसंमार्जनादिसंस्कारः । तथाचादौवेदःकार्यःपश्चाद्वेदिःकार्येतिश्रु तौक्रमःप्रतिपाद्यते । अत्रैव "क्षुतआचामेदि" तिस्मरणमस्ति । तत्रयदिवेदकरणानंतरंयदिक्षुतःस्यात्तर्ह्याचामेत्अनंतरंवेदिः कार्येतिस्मृत्यर्थः।तत्रतत्स्मरणंप्रमाणमप्रमाणंवेतिसंशयेवेदवेदिक्रमवचनस्यैवप्रबलत्वात्तद्विरुद्धंस्मरणमेवाप्रमाणमितिपूर्वःपक्षः। सिद्धांतस्तुक्षुतआचामेदितिस्मरणंप्रधानभूताचमनादिपदार्थप्रतिपादकतयाप्रबलं । श्रुतिस्तुवेदवेदिरूपपदार्थयोर्धर्मभूतक्रमप्र तिपादकतयादुर्बला अतोनिरंतरानंतर्यप्रतिपादिकाश्रुतिरेवस्मृत्याबाध्यतइति । प्रबलाश्रयसद्भावदशायामेवनीचंप्रबलबाधकं

SGDF
Sri Gargeshwari Digital Foundation

शिष्टाकोपे विरुद्धमिति चेन्न शास्त्रपरिमाणत्वात् (पूर्वपक्षः) अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन्निति सिद्धान्तः।

नान्यदेत्येतदुपपादयति ॥ नहीति ॥ प्रधानभूतेति ॥ पदार्थनिष्ठधर्मापेक्षयापदार्थानांप्रधानत्वादित्यर्थः । तथाचप्रधानभूताचमनादिविषयकत्वरूपबलवदाश्रयवतीस्मृतिःश्रुतिबाधिकेतिभावः ॥ अन्यत्रापीति ॥ औदुंबरींस्पृष्ट्वोद्गायेदित्यादावपीत्यर्थः ॥ अतएवेति ॥ अयंसर्पइतिप्रत्यक्षंनायंसर्पइत्याप्तवाक्यंप्रतिमूलभूतपरीक्षितप्रत्यक्षगौरवादेवशब्दबाध्यंयतोऽतएवेत्य

नहिप्रधानभूताचमनादिपदार्थविषयस्मृत्यापदार्थधर्मभूतक्रमविषया "वेदंकृत्वावेदिंकरोती"तिश्रुतिर्बाधितेत्यन्यत्रापितयासाबाध्यते । अतएवनायंसर्पइत्युक्तेप्रतिवदंति किमेवंवदसि केवलं अपिपुनःपरामृश्यपश्यसीति । ननुतथापिपीतःशंखःनीलंनभइत्यादिप्रत्यक्षंश्वैत्यनीरूपत्वाद्यनुमित्यैवचंद्रप्रादेशत्वप्रत्यक्षंचाप्रत्यक्षमूलशब्देनैवबाध्यंदृष्टमितिचेत् उच्यते ।

र्थः ॥ शब्देनैवेति ॥ "अष्टाशीतिसहस्राणिविस्तीर्णयोजनानितु । प्रमाणंतत्रविज्ञेयंकलाःपंचदशैवत्वि"तिशब्देनैवेत्यर्थः । ननुतत्रापितन्मूलभूतप्रत्यक्षेणैवबाधइतिशंकावारणायअप्रत्यक्षमूलेत्युक्तं । चंद्रप्रादेशत्वादिसर्वापटुप्रत्यक्षवैलक्षण्यंजगत्प्रत्यक्षस्योपपादयितुंचंद्रप्रादेशत्वादिप्रत्यक्षस्यापटुत्वेऽनुमानागमबाध्यत्वंकथं । प्रत्युतापटुत्वादेवानुमानागमबाध्यत्वमेवस्यादित्या ॥ १२५ ॥

SGDF
Sri Gargeshwari Digital Foundation

शंकांपरिहरन्ज्ञानप्रभेदंतावदाह ॥ द्विविधंहीत्यादिना ॥ एकाकारनियतं एककोट्यवगाहीत्यर्थः ॥ निश्चयादिति ॥ य
दूरस्थत्वादिदोषयुक्तंतत्परिमाणादावयथार्थमितिसाक्षिणानिश्चितत्वादित्यर्थः । एवंज्ञानप्रभेदमुक्त्वाइदानींचंद्रप्रादेशत्वादिप्र
त्यक्षस्यएकाकारविषयत्वात्स्तंभप्रत्यक्षवत्पटुत्वमेव । अपटुत्वेपिआगमादिबाध्यत्वमेवेतिशंकायाउत्तरमाह ॥ एवंचेत्यादि

द्विविधंहिज्ञानं संदेहरूपमेकाका(रनियतंचे)रंचेति । द्वितीयमप्यप्रामाण्यधीकलंकितंतदकलंकितं २५१
चेतिद्वेधा । (अप्रामाण्यधी)कलंकितत्वमपिद्वेधा बाधकाभिमतज्ञानोदयात्प्रागेवदोषज्ञानेनवा
ऽर्थाभावनिश्चयेनवा। तत्राद्यंयथा चंद्रप्रादेशत्वग्राहि । शैलाग्रस्थतरुपरिमाणादिज्ञानेदूरादेर्दो
षत्वनिश्चयात् । द्वितीयंयथा सवितृशंखादौसुषिरपीतत्वादिग्राहि । प्रागेवतत्रपरीक्षितप्रत्यक्षे
णसुषिराद्यभावनिश्चयात् । एवंचचंद्रप्रादेशत्वादिप्रत्यक्षेणप्रागेवज्ञातदूरादिदोषेणअप्रमाणत्वे
नज्ञातेनसंदेहवत्स्वार्थपरिच्छेदपराङ्मुखेननिःशंकप्रवृत्त्यजनकेनावकाशेदत्तेपश्चाच्छब्दादिःप्रवर्तते
नतुतेनप्रत्यक्षबाधः । यथाप्रबलप्रत्यक्षबाधितस्याक्षस्यानंतरंप्रवृत्तेनशब्दादिनानबाधस्तद्वत् । ये
नयस्यभ्रमत्वंज्ञायतेतत्तस्यबाधकं । नचचंद्रप्रादेशत्वादिप्रत्यक्षस्यागमादिनाभ्रमत्वंज्ञायते ।

ना ॥ आदिपदेननभोनैल्यप्रत्यक्षग्रहः ॥ ज्ञातेनेति ॥ साक्षिणेतिशेषः । परिच्छेदो निश्चयः ॥ नतुतेनेति ॥ शब्दादिनान
बाधः किंतुप्रबलप्रत्यक्षेणैवेतिभावः ॥ नबाधइति ॥ तत्रप्रवर्तमानंशब्दादिबाधकमिवोच्यतइत्यर्थः ॥ आगमादिनेति ॥

SGDF
Sri Gargeshwari Digital Foundation

येनतस्यबाधकत्वंस्यादित्यर्थः । किंनामप्रबलप्रत्यक्षेणैवातस्तस्यैवबाधकत्वमितिवाक्यशेषः । द्वितीयेद्वितीयमुदाहरति ॥ अकलंकितमिति ॥ स्वार्थपरिच्छेदे स्वार्थनिश्चये ॥ नह्यत्रेति ॥ घटस्सन्नेवेत्यादिजगत्प्रत्यक्षइत्यर्थः । तथाचसर्वापटुप्रत्यक्षवैलक्षण्यमितिभावः ॥ प्रत्यक्षेक्लृप्तेति ॥ चंद्रप्रादेशत्वादिप्रत्यक्षेक्लृप्तेत्यर्थः । कल्प्येत जगत्प्रत्यक्षेपीत्यर्थः ॥ विप्रलंभेति ॥

अकलंकितंस्वार्थपरिच्छेदेऽभिनिविष्टंनिःशंकप्रवृत्तिजननयोग्यं । यथा अग्निरुष्णएव प्रस्तरोयजमानोनैव घटस्सन्नेवेत्यादि । नह्यत्रप्रागेवदूरादिदोषधीर्वाऽर्थाभावनिश्चयो वाऽस्ति । यदिचप्रत्यक्षेक्लृप्तदूरादिदोषाभावेप्यन्यःकल्प्येत तर्हिश्रुतावपिशब्देक्लृप्त विप्रलंभाद्यभावेप्यन्यःकल्प्येत। नचाविद्यकतैवदोषः मेयाविद्यकत्वस्याद्याप्यसिद्धेः। मानाविद्यकत्वस्यतुश्रुतावपिसत्त्वात् । नाप्यनादिभेदभ्रमवासनादोषः श्रौतज्ञान स्यापिप्रकृतिप्रत्ययादिभेदवासनाजन्यत्वात् । भेदधियोद्यापिभ्रांतित्वासिद्धेश्च ।

विप्रलंभादिदोषेत्यर्थः । अपौरुषेयत्वेनपुरुषदोषनिबंधनदोषाभावादितिभावः। जगत्प्रत्यक्षेऽन्यत्रक्लृप्तदोषव्यतिरिक्तंदोषांतरमाशंक्यनिषेधति ॥ नचेत्यादिना ॥ जगत्प्रत्यक्षेदोषत्वेनोच्यमानमाविद्यकत्वंकिंमेयस्य उतमानस्य नोभयमपीत्याह ॥ मेयेत्यादिना ॥ श्रौतेति ॥ तथाचतस्याप्यप्रामाण्यंस्यादितिभावः ॥ भेदवासनेति ॥ तथाचभेदभ्रमवासनायादोषत्वकथन

२५०

SGDF
Sri Gargeshwari Digital Foundation

मयुक्तमितिभावः ॥ इदंचेति ॥ अनुमानादिबाधकतयोच्यमानंसत्त्वग्राहिप्रत्यक्षमित्यर्थः ॥ अवकाश(प्र)दमिति ॥ स्वबाधनायतिशेषः । बाह्यं साक्षिभूतस्वरूपस्वरूपेंद्रियव्यतिरिक्तंचक्षुरादि । अन्येन । अनुमानेनागमेनवेत्यर्थः ॥ अवकाशदमिति ॥ स्वबाधनायेतिशेषः । एवंचंद्रप्रादेशत्वादिप्रत्यक्षस्यागमाबाध्यत्वमुपपाद्यनभोनैल्यप्रत्यक्षस्याप्यनुमानाबाध्यत्वमुपपादयति ॥ एवंचेति ॥ दूरतःक्रोशादिपरिमितप्रदेशेनैल्यबुद्धौसत्यांसमीपेतावदाकाशेममरूपंनप्रतीयतएवदूरेतज्ज्ञानंदोषजन्यमितिसमीपगमनात्प्रागेवनिश्चिततयापश्चात्पुनर्धावनेनयत्प्रदेशेरूपंप्रतीतंतत्रगमनेसतिरूपंनप्रतीयतएव । तथाचनभोनैल्य

इदंचाकलंकितंप्रत्यक्षंसाक्षिरूपंचेन्नकेनापिबाध्यं नकस्याप्यवकाशदं । बाह्यंतुप्रबलप्रत्यक्षेणबाध्यं
नत्वन्येनबाध्य मन्यस्यावकाशदंवा । एवंचाकाशेसमीपेनीरूपत्वनिश्चयाद्दूरेतद्धीर्दूरदोषजन्ये
तिप्रागेवनिश्चिता नतुनीरूपत्वानुमितिबाध्या । केचित्त्वाकाशोनीलिमोदेतीतिश्रुतेर्नभोनीलमेव,
समीपेतुभूसंनिकर्षस्यप्रतिबंधकत्वान्नैल्यानुपलंभइत्याहुः । अन्येतुनैल्यधीःसाक्षिप्रत्यक्षबाधिता ।

प्रत्यक्षेणप्रागेवज्ञातदूरादिदोषेणाप्रमात्वेनसाक्षिणाज्ञातेनसंदेहवत्स्वार्थपरिच्छेदपराङ्मुखेननिश्शंकप्रवृत्त्यजनकेनावकाशेदत्तेपश्चात्नभोनीरूपंविभुत्वादितिप्रवर्तमानमनुमानंबाधकमिवोच्यते नतुतेनबाधः किंतुसमबलप्रत्यक्षेणैवेतिभावः । अन्यापदेशेनस्वयमेवपक्षांतरमुत्प्रेक्षयति ॥ केचित्त्वित्यादिना ॥ नीलमेवेति ॥ तथाचदूरेनभोनैल्यप्रत्यक्षंप्रमारूपमेवनभ्रमरूपमित्यर्थः । तर्हिसमीपेकस्मान्नोपलक्ष्यतइत्यतआह ॥ समीपेत्विति ॥ केचिदाहुरित्यस्वरसोद्भावनं । तद्बीजंतुगुरुचरणाइत्थमु

SGDF
Sri Gargeshwari Digital Foundation

पदिशंति । तथाहि । सिद्धांतेऽव्याकृतमेवाकाशंनीरूपंसाक्षिवेद्यं नतुभूताकाशंसाक्षिवेद्यं "आकाशोनीलिमोदेती" तिश्रुतिर्भू
ताकाशविषयैव नीलरूपोपेतमपितद्भूताकाशमतींद्रियमेव । नसर्वजनप्रत्यक्षविषयः । "भूतमप्यसितंदिव्यदृष्टिगोचर" मिति
दिव्यदृष्टिगोचरत्वोक्तेः । नीलंनभइतिप्रत्यक्षंचसर्वजनसाधारणं । अतोनायंपक्षःसाधीयानिति ॥ ननुकथंनैल्यधियःसाक्षिप्रत्य
क्षबाधितत्वं । तथात्वेसाक्षिणानभसिनीलरूपंनास्तीतिप्रतीत्याभाव्यं । नचेयंप्रतीतिर्युक्ता ॥ येनेंद्रियेणप्रतियोगीगृह्यतेतेनैवत
दभावोपिगृह्यतइतिनियमदर्शनादत्राप्यभावप्रतियोगिभूतनीलरूपस्यबाह्यपदार्थस्यसाक्षिप्रत्यक्षाविषयत्वात्कथंसाक्षिणातदभाव

252

अचाक्षुषपिशाचान्योन्याभावस्यस्तंभःपिशाचोनभवतीतिचक्षुषेवसाक्ष्ययो
ग्यरूपाभावस्यापिनीरूपत्वविशेषावकाशत्वग्राहिणासाक्षिणाग्रहणात् ।

ग्रहइतिचेन्न । अन्योन्याभावप्रत्यक्षेऽधिकरणप्रत्यक्षस्यैवतंत्रतायाःसर्वतार्किकसंमतत्वेनप्रतियोगियोग्यत्वस्यातंत्रत्वात् । यथाप्र
तियोगिभूतपिशाचस्याचाक्षुषत्वेपिअधिकरणीभूतस्तंभस्यप्रत्यक्षत्वमात्रेणस्तंभःपिशाचोनेतिअन्योन्याभावस्यज्ञानंचक्षुषाभवती
त्यंगीकृतं । एवमिहापिअधिकरणभूताव्याकृताकाशस्यसाक्षिसिद्धत्वात्प्रतियोगिनोनीलरूपस्यायोग्यत्वेपितदभावज्ञानंसाक्षिणा
युक्तमेवेत्याह ॥ **अचाक्षुषेति** ॥ साक्ष्ययोग्येतिरूपविशेषणं ॥ **रूपाभावस्यापीति** ॥ रूपात्यंताभावस्यापीत्यर्थः । नील ॥ १२७ ॥
रूपाभावोपपादनायाव्याकृताकाशेऽवकाशत्वंनिर्वक्ति ॥ **नीरूपत्वेति** ॥ नीरूपत्वोपेतपदार्थविशेषत्वमेवाकाशत्वमित्यर्थः ।

एवंप्रतियोगिभूतनीलरूपस्यसाक्ष्ययोग्यत्वेपितदभावःसाक्षिप्रत्यक्षएवेत्यस्मद्रीत्योक्तं । परमतेतुनेदंदुर्घटं तन्मतेनीलरूपस्यापि
साक्षिवेद्यत्वांगीकारात् । नचैतदनानुभाविकं । नीलंनभइतिसाक्षिणानुभूयमानत्वात् । नचेयंप्रतीतिश्चक्षुषैवनसाक्षिणेतिवा
च्यं । निमीलितनेत्रस्यापिनीलंनभइतिप्रतीतेर्दर्शनात् । तथाचप्रतियोगिनोनीलरूपस्याधिकरणीभूताकाशस्यचसाक्षिवेद्यत्वां 253
गीकारेणप्रतियोगितदभावयोरेकेंद्रियग्राह्यत्वप्राप्त्यानैल्याभावज्ञानंसाक्षिणैवभ(वती)विष्यतीत्याह ॥ **परमतेपीति** ॥ अत्र
चाक्षुषपिशाचान्योन्याभावदृष्टांतेनसाक्ष्ययोग्यरूपाभावस्यापिसाक्षिणाग्रहणादित्युक्तं । अन्योन्याभावप्रत्यक्षेअधिकरणप्रत्यक्ष

परमतेपिह्याकाशंसाक्षिवेद्यंनिमीलितनेत्रस्यनीलंनभइतिधीश्चसाक्षिरूपेत्याहुः । यद्वाअश्रा
वणेआकाशेश्रावणीशब्दाभावधीरिवाचाक्षुषेप्याकाशेरूपाभावधीर्वायाविवचाक्षुष्येव ।

स्यैवप्रयोजकत्वेनप्रतियोगिनोचाक्षुषत्वेपिअन्योन्याभावस्यचाक्षुषत्वोपपत्तावपिप्रकृतेनतथासंभवति । नभोनीलंनेत्यत्यंताभा
वस्यैवप्रतीतेः । तत्रचप्रतियोगिनोऽभावग्राहकेंद्रियत्वस्यैवतंत्रत्वेनप्रकृतेतदभावात् । नचनभोनीलंनेतिप्रतीतिरपिअन्योन्या
भावप्रतीतिरेवेतिवाच्यं । तथात्वेनभोनीलंनेतिप्रतीत्यानीलरूपान्योन्याभावस्यैवावकाशेसिध्यानीलरूपाभावासिद्धेः । घटादौ
रूपान्योन्याभावसत्वेपितद्वत्वस्यैवदर्शनादित्यस्वरसमाहुरित्यनेनसूचयति । नीलरूपवदन्योन्याभावकत्वेतुस्वारस्यंद्रष्टव्यं ।
अतएवास्वरसादाह ॥ **यद्वेति** ॥ आकाशेनीलरूपंनास्तीतिप्रतीतिःचक्षुषैवभवति नसाक्षिणा । नचाधिकरणस्याकाश(स्यचक्षु

SGDF Foundation

षाऽयो)स्यायोग्यत्वात्तत्रकथंरूपाभावज्ञानंचक्षुषास्यादितिवाच्यं । आकाशस्यश्रावणत्वाभावेपिआकाशेशब्दोनास्तीतिशब्दाभावप्रतीतेःश्रावणत्वदर्शनात् । तथाऽचाक्षुषेपिवायौरूपाभावज्ञानस्यचाक्षुषत्वदर्शनात् । अतोऽधिकरण(स्याप्रत्यक्षत्वेपि)स्यायोग्यत्वेपिप्रतियोगियोग्यत्वमात्रेणतदत्यंताभावस्यप्रत्यक्षतायास्तार्किकैरंगीकारात्प्रकृतेप्याकाशस्याचाक्षुषत्वेपिनीलरूपात्यंताभावज्ञानंचाक्षुषमेवभविष्यतीत्यर्थः । आकाशेरूपाभावज्ञानंचक्षुषैवभवतीत्येतदनुभवसिद्धमित्याह ॥ **दूरस्थस्येति** ॥ **अन्यथेति** ॥ आकाशेनीरूपत्वप्रतीतेश्चाक्षुषत्वानंगीकारइत्यर्थः । नन्वाकाशस्यनीरूपत्वेकथंलिंगाभावः । नभोनीरूपं परममहत्परि

दूरस्थस्यपुंसोयत्रनभःप्रदेशेनैल्यधीस्समीपस्थस्यतस्यैवतत्रैवचक्षुषैवानैल्यबुद्धेः । अन्यथा ऽऽकाशस्यनीरूपत्वंनसिध्येत् । लिंगाभावात् । तत्पक्षेमहत्त्वद्रव्यानारंभकत्वादेरसिद्धेः ।

माणवत्त्वात् द्रव्यानारंभकत्वात् निस्पर्शत्वात् कालादिवत् पृथिव्यादित्रयेतरत्वाद्वायुवदित्यनुमानैस्तत्सिद्धिसंभवादित्यतआह ॥ **महत्त्वेति** ॥ परममहत्परिमाणवत्त्वेत्यर्थः । अन्यथामहत्त्वमात्रस्यघटादौव्यभिचारापत्तेरितिध्येयं । ननुपरममहत्त्वस्य कथमसिद्धिरुच्यते । भवद्भिरव्याकृताकाशेपरममहत्परिमाणांगीकारादित्यतउक्तं ॥ **तत्पक्षइति** ॥ अव्याकृताकाशस्यपरेणानंगीकाराद्भूताकाशस्यच "अबग्नीरनभोऽहंकृन्महत्तत्त्वगुणत्रयैः । क्रमाद्दशोत्तरै" रितिस्मृत्यापरिच्छिन्नत्वावगमेनपरममहत्त्वस्यासिद्धिरेव । तथाद्रव्यानारंभकत्वमप्यसिद्धमेव "आकाशाद्वायु" रित्याकाशस्यवायुरूपद्रव्यारंभकत्वांगीकारादित्यर्थः ।

SGDF
Sri Gargeshwari Digital Foundation

अंत्यावयविनिघटादौव्यभिचारोपिद्रष्टव्यः ॥ तमसीति ॥ ननुनीरूपत्वस्यापितत्रसत्त्वान्नव्यभिचारइतिचेन्न । "नीलंविदारयामासतमश्चक्रेणमाधव" इतिहरिवंशादौतमसोविदारणोक्त्यातमसोनीलरूपवद्द्रव्यत्वस्यास्माकंसम्मतत्वात् । "नीलरूपंतमोद्रव्य" मितिवाचस्पत्युक्त्यापरस्यापिसंमतत्वादितिभावः ॥ एतैरेवेति ॥ परममहत्त्वादिहेतुभिरित्यर्थः ॥ अशब्दत्वस्यापीति ॥ शब्दरूपगुणराहित्यस्यापीत्यर्थः । त्रिवृत्करणपक्षेआकाशेरूपासिद्ध्यापंचीकरणेनेत्युक्तं । एवंचपंचानांभूतानांमिश्रीकरणपक्षेआकाशस्यरूपवत्तेजोजलपृथिव्यात्मकतयारूपवत्त्वसद्भावेनरूपाभावानुमानेबाधःस्यादित्यर्थः ॥ यद्वेति ॥ नभोनी

निस्स्पर्शत्वस्यतमसिव्यभिचारात् पृथिव्यादित्रयेतरत्वादेश्चाप्रयोजकत्वात् । एतैरेवाशब्दत्वस्याप्यापाताच्च । पंचीकरणेनरूपस्यापिसत्त्वेनबाधाच्च । यद्वाव्याप्तिप्रत्यक्षेणतन्मूलानुमित्यावातद्बाधः । अनौष्ण्यहेतोस्तुनव्याप्तिः अप्रयोजकत्वात् ।

रूपंविभुत्वात् यद्विभुतन्नीरूपमितिव्याप्तिग्राहकंयत्साक्षिप्रत्यक्षंतेनैवनीरूपत्वग्राहिणानीलंनभइतिप्रत्यक्षस्यबाधोनानुमानेनेत्यर्थः ॥ तन्मूलेति ॥ साक्षिप्रत्यक्षगृहीतव्याप्तिकविभुत्वानुमानेनैवबाधः । राजगौरवेणराजभृत्येनामात्यस्येवेत्यर्थः । नन्वेवंचेद्भवद्रीत्यैववह्निरनुष्णःपदार्थत्वादित्यनुमानेनस्पार्शनप्रत्यक्षस्यबाधाभावेपियत्रपदार्थत्वंतत्रानुष्णत्वमितिव्याप्तिग्राहकंप्रत्यक्षमस्ति तेनैववा तन्मूलानुमित्यावा बाधोस्त्वित्यतआह ॥ अनौष्ण्येति ॥ स्यादिदं यदिपदार्थत्वानुष्णत्वयोर्व्याप्तिःस्यात्तद्वै

SGDF
Sri Gargeshwari Digital Foundation

वतद्ग्राहकप्रत्यक्षेणबाधदानावकाशः । नचैवं तत्राप्रयोजकत्वेनव्याप्तेरेवाभावादितिभावः । नन्वथापियद्दृश्यंतन्मिथ्येतिव्या
प्तिग्राहकंयत्प्रत्यक्षंतेनवा तन्मूलकानुमित्यावा सत्त्वग्राहिप्रत्यक्षस्यबाधोस्त्वितिसाम्यमित्याशंक्याह ॥ मिथ्यात्वेति ॥ घट
धीवदिति ॥ यथाघटधियोघटसत्त्वग्राहित्वंतथेत्यर्थः । व्याप्तिधीः व्याप्तिग्राहिप्रत्यक्षं । नैवंत्वयावक्तुंशक्यं । तथाहि । य
द्दृश्यंतन्मिथ्येतिव्याप्तिग्राहिप्रत्यक्षेणस्वविषयस्यहेतुसाध्यव्याप्त्यादेःसत्त्वंविषयीक्रियतेनवा । नेतिपक्षेव्याप्त्याद्यसत्त्वप्राप्त्यानु
मानाप्रामाण्यं । आद्येनदृश्यत्वहेतुमतिमिथ्यात्वसिद्धिः । प्रत्यक्षविषयतयादृश्यत्ववतिव्याप्त्यादौमिथ्यात्वाभावेनव्यभिचारा

मिथ्यात्वहेतौतुघटधीवत्व्याप्तिधीरपिस्वार्थसत्वग्राहितयाऽनुमितिप्रतिकूलैव
नतुतस्यामूलं । अथवानीरूपत्वानुमितिरुपजीव्यव्याप्तिप्रत्यक्षाद्यविरुद्धाधर्मि
ग्राहकाऽबाधिताच । मिथ्यात्वाद्यनुमितिस्तूपजीव्यव्याप्तिप्रत्यक्षादिविरुद्धाध
र्मिग्राहकबाधिताचेतिवैषम्यं । तस्मात्'स्वार्थनिश्चयरूपेणनिश्चलाह्यपरोक्षधीः ।

पत्तेरतोनुमित्यायत्सिषाधयिषितंप्रपंचांतर्गतव्याप्त्यादेरपिमिथ्यात्वंतत्प्रतिकूलतयाव्याप्तिप्रत्यक्षस्यानुमितिमूलत्वासंभवान्नतेन
वातन्मूलानुमित्यावासत्त्वग्राहिप्रत्यक्षस्यबाधइतिसांप्रदायिकोर्थः । प्रकारांतरेणापिनास्मन्न्यायेनत्वयापिमिथ्यात्वानुमित्यास
त्त्वग्राहिप्रत्यक्षस्यबाधोवक्तुंशक्यतइत्याह ॥ अथवेति ॥ व्याप्तिप्रत्यक्षं साक्षिप्रत्यक्षं ॥ धर्मीति ॥ आकाशरूपधर्मिग्राहको ॥ १२३ ॥
पिसाक्ष्येव । अतस्तादृशानुमित्यानैल्यप्रत्यक्षबाधइतिभावः ॥ व्याप्तीति ॥ उक्तरीत्येत्यर्थः । अतएतादृशानुमित्यानसत्त्वप्र

त्यक्षबाधइत्याशयः । निश्चला अप्रामाण्यशंकयाऽकलंकितेत्यर्थः ॥ विजातीयेति ॥ सजातीयप्रबलप्रत्यक्षेणविनाविजाती
यानुमानादिनानबाध्येत्यर्थः । ननुतर्हियद्वाव्याप्तिप्रत्यक्षेणेत्यादिनानीरूपत्वानुमित्याकथंनैल्यप्रत्यक्षबाधोऽभिहितइत्यतउक्तं ॥
केवलेनेति ॥ अतएवतत्रव्याप्तिप्रत्यक्षमूलानुमित्यैवबाधउक्तोनकेवलयेतिद्रष्टव्यं । परीक्षितंप्रत्यक्षंनानुमानादिबाध्यमित्येत
त्त्वापिसंमतमित्याह ॥ उक्तंचेति ॥ व्यवहारः प्रवृत्तिः ॥ तत्रतथेति ॥ तत्रप्रत्यक्षस्यापरीक्षितत्वादनुमानादिनाबाधितं

विजातीयप्रमाणेनकेवलेननबाध्यते'। तदुक्तं" नहिदृष्टस्यवस्तुनोबलवद्दृष्टिंविनाऽन्यद्बाध
क "मिति । उक्तंचविवरणेपि " यत्राविचारपुरस्सरमेवप्रत्यक्षावभासमप्यनुमानादिना
बाधितमुच्छिन्नव्यवहारंभवतितत्रतथाभवतु यत्रपुनर्विचारपदवीमुपारूढयोर्ज्ञानयोर्ब
लाबलचिंतयाबाधनिश्चयस्तत्रनानुमानादिनाप्रत्यक्षस्यमिथ्यात्वसिद्धिरिति ॥ ७ ॥
प्रत्यक्षस्यलिंगाद्यबाध्यत्वेबाधकोद्धारः ॥ १६ ॥ नापिभाविबाधकशंकामात्रेणेतितृतीयः ७५ सांके पत्रे

भवतीत्यर्थः ॥ चिंतयेति ॥ परीक्षयेत्यर्थः ॥ ७ ॥ प्रत्यक्षस्यलिंगाद्यबाध्यत्वेपरोक्तबाधकानामुद्धारविवरणं ॥ १६॥
प्रत्यक्षमप्रमाणमेवेतिप्रथमःकल्पःस्वतःप्राप्ततत्वावेदनलक्षणप्रामाण्यस्यत्यागःकिमनुमानविरोधात् आगमविरोधाद्वा भा
विबाधकशंकयावे तित्रेधाविकल्पितः । तत्रप्रथमद्वितीयौनिराकृतौ । इदानींतृतीयमनूद्यदूषयति ॥ नापीति ॥ सत्त्वग्राहि

SGDF Foundation

२५८

प्रत्यक्षस्यशंक्यमानंभाविबाधकंकिमनुमान मागमोवा प्रत्यक्षंवा । नाद्यद्वितीयौ । कुतइत्यतआह ॥ उक्तरीत्येति ॥ जात्या उपक्रमादिन्यायैश्चप्रबलेनप्रत्यक्षेणविरोधान्नलिंगशब्दयोर्बाधकत्वमित्यर्थः । नतृतीयइत्याह ॥ अक्षस्येति ॥ जगत्प्रत्यक्षवदे वतद्बाधकेपिप्रत्यक्षेऽप्रामाण्यशं(कापातेनबाधकत्वायो)कयातेनबाध्यत्वायोगादित्यर्थः । ननुसामान्यतःकेनचित्प्रमाणेनबाधः शंक्यतइतिचेत्तत्राह ॥ सर्वेति ॥ सत्त्वग्राहिप्रत्यक्षंबाध्यंत्रैकालिकनिषेधरूपबाधोपेतत्वात्स्वाप्नप्रत्यक्षवदितिअनुमातव्यं स्वा प्नगजादिज्ञानस्यहिजाग्रत्कालीनंस्वाप्नगजाद्यभावज्ञानमेवबाधकंवाच्यं । तथाचजाग्रत्कालीनस्वाप्नगजाद्यभावप्रत्यक्षस्यापिभा

उक्तरीत्यालिंगशब्दयोरबाधकत्वात् अक्षस्याप्रमाणतयाशंक्यमानत्वात् सर्वविशेषा भावेचसामान्यस्याप्यभावेनबाधकशंकायाअनुदयात् । किंचत्वन्मतेजाग्रदादिज्ञान स्याप्रमाणत्वेनस्वप्नादेर्बाधासिद्धौकथंतदृष्टांतेनान्यत्रतच्छंका । तदुक्तंवार्तिकेबौद्धंप्रति "प्रतियोगिनिदृष्टेचजाग्रज्ज्ञानेमृषाभवेत्। स्वप्नादिबुद्धिरस्माकंतवभेदोपिकिंकृत" इति।

विबाधकशंकयाऽप्रामाण्येस्वाप्नप्रत्यक्षस्यबाधकाभावेननिषेधप्रतियोगित्वरूपबाधासिद्धौदृष्टांताभावेनान्यत्रसत्त्वग्राहिप्रत्यक्षेपि बाधकशंकानयुक्तेत्याह ॥ किंचेति ॥ जाग्रच्छब्देनस्वप्नदृष्टस्यगजादेरभावोग्राह्यः । शुक्तिरूप्यादेरभावआदिशब्दार्थः । तयोर्ज्ञानस्येत्यर्थः । स्वप्नादेरित्यादिपदेनशुक्तिरूप्यादि । बाधोनिषेधप्रतियोगित्वं । वार्तिकेभट्टवार्तिके । भट्टाचार्येणेतिशेषः ॥ प्रतियोगिनीति ॥ विरोधिनीत्यर्थः । स्वाप्नगजादिज्ञानविरोधिनिजाग्रज्ज्ञानेजाग्रत्कालीनगजाद्यभावज्ञाने दृष्टेप्रामाणिकेस

SGDF Sri Gargeshwari Digital Foundation

ति । अस्माकं सत्यमिथ्याविवेकवतां स्वप्नादिबुद्धिर्मृषामिथ्यार्थावभासिकाभवेत् । तव सर्वमिथ्यात्ववादिनः स्वाप्नजाग्रज्ज्ञानयोर्भेदःकिंकृतः बाधकत्वेनाभिमतस्यजाग्रद्गजाद्यभावज्ञानस्यापिमिथ्यार्थावभासत्वात्स्वप्नगजादेर्मिथ्यात्वंनसिद्ध्यतीतिवार्तिकार्थः । विश्वबाधकत्वेनाभिमतज्ञानेबाधकत्वव्यापकाभावात्तदभावइत्याह ॥ अपिचेति ॥ भ्रमकालीनापरोक्षबुद्धिर्भ्रमएव स्वस्यस्वकालीनत्वात् तदविषयोयोविशेषःशुक्तित्वादिस्तद्विषयाइयंशुक्तिरितिधीर्बाधिकादृष्टेत्यर्थः । प्रकृतेतदभावमाह ॥ नचेति ॥ धीः वेदांतजन्यब्रह्मविषयकचरमवृत्तिः । भ्रमाविषयविशेषविषयानभवति ब्रह्मणोनिर्विशेषत्वादि

अपिचभ्रमकालीनापरोक्षबुद्ध्यविषयविशेषविषयैवधीर्बाधिका नचतवविश्वबाधिका
धीस्तद्विषया । किंचसप्रकारैवधीर्बाधिका [1] । निर्विकल्पिकायाःसप्रकारकभ्रमा
विरोधित्वात् नचते(तव)विश्वबाधिकाधीःसप्रकारिका । किंचनतावत्सासप्रकारा

तिभावः । बाधकत्वव्यापकांतराभावमाह ॥ किंचेति ॥ सप्रकारैवेति ॥ भ्रमविरोधिप्रकारप्रकारिकेत्यर्थः । कुतइत्यतआह ॥ निर्विकल्पिकायाइति ॥ धर्मिमात्रविषयकत्वेनाबाधकत्वादितिभावः । प्रकृतेतदभावमाह ॥ नचेति ॥ किंचविश्वबाधिकाधीःकिंशब्दजन्या शब्दाजन्यावा आद्येपिकिंसासप्रकारा निष्प्रकारावा त्वदनभिप्रेतत्वान्नाद्यइत्याह ॥नतावत्सेति॥ शब्दजन्याविश्वबाधिकाधीः नद्वितीयः । शब्दस्यसंसर्गप्रतियोगितावच्छेदकप्रकारकज्ञानजनकतयानिष्प्रकारकज्ञानजनकत्वा

1 जाग्राद्यकालीनरजतभ्रमहेतुभूतशुक्तिरूपधर्मिज्ञानोपपादकत्वेन शुक्तिति विशिष्ट... स्यावश्यकतया तस्य भ्रमाविरोधित्वात् - तरंगिणी

259

260

सिद्धेरित्याह ॥ नापीति ॥ नांत्यइत्याह ॥ नचत्वन्मतइति ॥ बाधिकाधीरिति ॥ नेदंरजतमित्यादिका ॥ भ्रमस्येत्यादि ॥ एतावत्कालंशुक्त्यज्ञानमासीद्रजतज्ञानमासीदित्यनुभवेनाज्ञानंभ्रमस्वरूपंचनबाध्यते किंतुभ्रमविषयएव विषयस्यबाध्यत्वेपिज्ञानस्वरूपस्याबाध्यत्वंचदुःखादिविषयकसाक्षिणःपरमतेप्रसिद्धमितिभावः ॥ नेति ॥ त्वयातुबाधकत्वाभिमतचरमवृत्त्याभ्रमस्वरूपाज्ञानदोषाध्यस्तद्रष्टृभूतजीवादिसर्वप्रपंचबाधांगीकारेणदृष्टवैरूप्यापातइत्यर्थः । एतावत्पर्यंतंभाविबाधकतयाशंक्यमानंज्ञानंनबाधकमित्युपपाद्यतद्बाध्यत्वंसन्घटइत्यादिप्रत्यक्षेनास्तिबाध्यत्वव्यापकाभावादित्याह ॥ किंचेति ॥ दोषज

नापिनिष्प्रकाराशब्दजन्येतिवक्ष्यते । नचत्वन्मतेसाशब्दान्यजन्या । किंचबाधिकाधीर्भ्रमस्यतद्धेतोरज्ञानस्यतद्दोषस्याध्यस्तस्यद्रष्टुश्चनबाधिकेतिनभ्रमादिबाधोयुक्तः । किंचदोषजन्यमेवबाध्यं नचसाक्षिप्रत्यक्षंतज्जन्यं । अद्वैतज्ञानेतुश्रुतितात्पर्यभ्रमोदोषः ।

न्यं ज्ञानं । प्रकृतेतदभावादित्याह ॥ नचेति ॥ साक्षीति ॥ वियदादिजगत्सत्यत्वग्राहीत्यर्थः ॥ तज्जन्यमिति ॥ अजन्यत्वात्तस्येतिभावः । ननुयथाऽपौरुषेयतयावेदस्यदोषाजन्याप्यद्वैतश्रुतिर्भेदश्रुतिबाध्येतिभवद्भिरुच्यते । एवंदोषाजन्यमपिसाक्षिज्ञानंबाध्यतामित्यतआह ॥ अद्वैतज्ञानेत्विति ॥ नास्माभिर्भेदश्रुत्याऽद्वैतश्रुतिर्बाध्यतइत्युच्यते । किंनामाद्वैतश्रुतिजन्यंज्ञानमेव । तच्चाभेदविषयकश्रुतितात्पर्यभ्रमजन्यमेवेत्यर्थः । सन्घटइत्यादिज्ञानेऽबाध्यत्वव्याप्यस्यसत्त्वादबाध्यत्वमंगीकार्य ॥ १३१ ॥

261

मित्याह ॥ किंचेति ॥ रूप्यज्ञानबाधकंयत्नेदंरजतमितिज्ञानंतत्तुल्यंयन्मानंइयंशुक्तिरितिआप्तवाक्यजन्यज्ञानांतरंतत्संवादिइयंशुक्तिरितिज्ञानंतन्नबाध्यमित्यर्थः । प्रकृतेतत्सद्भावमाह ॥ द्वैतेति ॥ अबाध्यत्वव्याप्यांतरमाह ॥ किंचेति ॥ बाधकधीबोध्यं अनिषेध्यत्वेनेतिशेषः । तेनरजतस्यापिनिषेध्यतयाबाधकधीबोध्यत्वाद्बाध्यत्वादबाध्यत्वापत्तिरितिशंकानवकाशः ॥ नबाध्यमिति ॥ अधिष्ठानभूतशुक्तिवदित्यर्थः । प्रकृतेतत्सद्भावमाह ॥ भेदश्चेति ॥ कथंबाधकधीबोध्यत्वंभेदस्येत्यतआह तयेति ॥ बाधकधियेत्यर्थः ॥ स्वेति ॥ चरमवृत्तिरूपबाधकधीविषयस्यब्रह्मणोऽभेदस्यवेत्यर्थः ॥ भेदेति ॥ स्वबाध्योयोभे

किंचबाधकतुल्यमानसंवादिनबाध्यं । द्वैतप्रत्यक्षंचाद्वैतश्रुतितुल्यद्वैतश्रुतिसंवादि । किंचबाधकधीबोध्यंनबाध्यं भेदश्चबाधकधीबोध्यः तयाचस्वविषयस्यभेदाभिन्नतयौदासीन्येनवाग्रहेबाधकत्वायोगेनभिन्नतयैवग्राह्यत्वात् ।

दस्तदभिन्नतयेत्यर्थः । अयंभावः । द्वैतस्यबाधकंवेदांतजन्यचरमवृत्तिरूपंज्ञानंस्वविषयंब्रह्मअभेदंवानिषेध्याद्भेदादभिन्नतयागृह्णाति । औदासीन्येनवाभिन्नतयावा । नाद्यः । तथात्वेभ्रमत्वस्यैवापत्त्याबाधकत्वायोगात् । यथानेदंरजतमितिज्ञानंस्वविषयंशुक्तिकाशकलंनिषेध्यरजताभिन्नतयागृह्णातिचेत्तस्यभ्रमत्वमेवदृष्टं । तथाइहापिब्रह्मअद्वैतंवास्वविषयंनिषेध्यभेदाभिन्नतयागृह्णातिचेद्भ्रमत्वमेवस्यान्नबाधकत्वं भेदौदासीन्येनग्रहणेपितथैव । भेदादिप्रपंचसाधारण्येनैवैक्यग्रहणात् । तस्माद्यदानेदंरजत

SGDF Sri Gangadhar Digital Foundation

मितिज्ञानंस्वविषयभूतंशुक्तिशकलंरजताद्भिन्नमितियदिगृह्णातितर्ह्येवबाधकतयादृष्टं अतोत्रापिबाधकत्वोपपत्तयेचरमवृत्तिर्ब्रह्म अद्वैतंवास्वविषयंस्वनिषेध्यभेदाद्भिन्नमितिगृह्णातीत्यवश्यमभ्युपेयं । ततश्चभेदस्यबाधकधीबोध्यत्वंसिद्धमिति । उपसंहरति ॥ तस्मादिति ॥ बाधकशंका भाविबाधकशंका सन्घटइतिप्रत्यक्षेभाविबाधकशंकाकिमबाधितबाधोभविष्यतीत्येवंरूपाआहोस्विद्बाधितबाधोभविष्यतीत्येवंरूपा । नाद्यः । अबाधितबाधरूपकोट्यप्रसिद्धेः । नचरूप्यादिज्ञानबाधकेनेदंरूप्यमितिज्ञानेऽबाधितत्वंप्रसिद्धमितिवाच्यं । रूप्यादिबाधेपिबाधकशंकायाःसत्त्वात् । नद्वितीयः । तादृशशंकायाद्वैतादेरबाध्यत्वाविरोधि

तस्मान्नबाधशंकायुक्ता । कथंचेयंशंका रूप्यादिबाधेपिबाधकशंकापातेनाबाधितबाधरूपकोट्यप्रसिद्धेः । बाधितबाधशंकायाश्चाबाध्यत्वाविरोधित्वात् । भाविबाधेपिबाधशंकापातेनस्वव्याघाताच्च । तदुक्तंवार्तिकेबौद्धंप्रति "दुष्टज्ञानगृहीतार्थप्रतिषेधोपियुज्यते । गृहीतमात्रबाधेतुस्वपक्षोपिनसिध्यती"ति ।

त्वात् । बाधोभविष्यतीत्येवंसामान्यतःशंकायाश्चयावद्विशेषाभावेनायोगादित्याह ॥ कथंचेयंशंकेत्यादिना ॥ स्वव्याघाताच्चेति ॥ स्वेनोक्ताभाविबाधकशंकास्वात्मानमेवघातितवतीत्यर्थः । दुष्टज्ञानं इदंरजतमितिज्ञानं । युज्यतेनेदंरजतमितिबाधकरूपादुष्टज्ञानेनेत्यर्थः ॥ गृहीतमात्रेति ॥ त्वन्मतेऽप्रामाण्यस्यस्वतस्त्वाद्यःप्रत्ययःसमृषादृष्टइतिव्याप्तिमाश्रित्यगृहीतमात्रस्यभाविबाधकशंकयाबाधांगीकारेस्वपक्षोपिगृहीतमात्रस्यबाधरूपःस्वकीयःपक्षोपिनसिद्ध्यति तत्रापिबाधकशंकाप्रसरेणस्व

SGDF
Sri Gargeshwari Digital Foundation

263

व्याघातादितिभावः ॥ धीमात्रइति ॥ तथाचनभाविबाधकज्ञानेबाधशंकेतिभावः ॥ किंत्विति ॥ तथाचद्वैतादिसाक्षात्कारएवबाधकशंकायुक्तेत्यर्थः । भाविबाधकस्यासाक्षात्काररूपत्वनैयत्येनापसिद्धांताभीरुणापरेणोक्तमंगीकृत्यदूषणमाह ॥ विशेषेति ॥ वस्तुतस्तुभाविबाधकज्ञानस्यापिवेदांतजन्यचरमवृत्तित्वेनसाक्षात्काररूपतयातत्रापिशंकास्यादेवेत्याह ॥ वृत्तिरूपेति ॥ शब्दाजन्येति ॥ द्वैतादिसाक्षात्कारःशब्दाजन्यइतितत्रशंकायुक्ता । अद्वैतसाक्षात्कारस्तुशब्दजन्यइतिनतत्रशंकेत्य

नचधीमात्रेनबाधशंका किंतुसाक्षात्कारइतियुक्तं । विशेषहेत्वभावात् । वृत्तिरूपाद्वैतसाक्षात्कारेतत्प्रसंगाच्च । नापिशब्दाजन्यसाक्षात्कारेतच्छंका । मुक्तस्वरूपानंदसाक्षात्कारेतत्प्रसंगात् । वेदांतजन्यधीप्रामाण्यग्राहिसाक्षिप्रत्यक्षमप्यतत्त्वावेदकमेवतत्त्वावेदकत्वेनगृह्णातीतिशंकयातत्त्वज्ञानायवेदांतश्रवणादिस्वक्रियाविरोधाच्च । शंकाग्राहिसाक्षिप्रत्यक्षमपिअशंकामेवशंकात्वेनगृह्णातीतिशंकयास्वव्याघाताच्च [1] ।

र्थः ॥ मुक्तस्वरूपेति ॥ तस्यनित्यत्वेनसर्वथाऽजन्यत्वेनशब्दाजन्यत्वादितिभावः । अतत्त्वावेदकमेव वेदांतजन्यधीस्वरूपमितिशेषः ॥ स्वक्रियाविरोधाच्चेति ॥ सर्वत्रप्रत्यक्षेशंकास्तीतिवदतस्तवबह्वायाससाध्यावेदांतश्रवणादिक्रियावेदांतजन्यधीप्रामाण्यग्राहिसाक्षिगोचराप्रामाण्यशंकाभावसाध्याविरुद्ध्येतेत्यर्थः ॥ शंकेति ॥ भाविबाधकशंकेत्यर्थः ॥ अशंकामिति ॥ वस्तुगत्याशंकानभवतीत्यर्थः ॥ स्वव्याघाताच्चेति ॥ घटादिसत्त्वग्राहिप्रत्यक्षंवस्तुतोऽप्रमाणमेवप्रमाणत्वेनसाक्षीगृह्णातीतियथो

[1] भाविबाधेऽपि बाधशंकाघातेनेत्यादिना ज्ञानमात्रे शंकायां स्वव्याघात उक्तः। अत्र तु साक्षात्कारमात्रे शंकायां स इति भेदः।

SGDF Shri Gargeshwari Digital Foundation

च्यते तथाशंकाग्राहिप्रत्यक्षमप्यशंकामेवशंकात्वेनगृह्णातीतिशंकापातेनस्वन्यायेनव्याघातादित्यर्थः ॥ शब्दान्येति ॥ द्वैतसा
क्षात्कारःशब्दान्यजन्यइतितत्रशंकायुक्ता । वेदांतजन्यसाक्षात्कारस्तुशब्दजन्यएवेतिनतत्रशंकेत्यर्थः । अनेनमु(क्तस्वरूपानंद)
क्तानंदव्यावृत्तिःकृताद्रष्टव्या । शब्दान्यजन्यसाक्षात्कारेतच्छंकेत्युक्त्याशब्दजन्यसाक्षात्कारेतच्छंकानास्तीत्युक्तंस्यात् ऽमि
तिचेत्तत्राह ॥ दशमइति ॥ शब्दाभासेति ॥ वस्तुतोनवमेदशमस्त्वमसीतिप्रयुज्यमानंवाक्यंशब्दाभासएवेत्यर्थः ॥
साक्षात्कारेपीति ॥ दशमोऽस्मीतिभ्रमरूपसाक्षात्कारइत्यर्थः । दशमस्त्वमसीतिवाक्यंसाक्षात्कारजनकमितितन्मतरहस्यं ॥

नापिशब्दान्यजन्यसाक्षात्कारेतच्छंका । दशमस्त्वमसीतिशब्दाभासजन्यसाक्षात्कारेपिबाधदर्श
नेनविशेषहेत्वभावात् । विश्वान्यप्रत्यक्षएवतच्छंकेतिसुवचत्वाच्च । अद्वैतश्रुत्यनुमानादिग्राहिप्र
त्यक्षमपितात्विकींव्यावहारिकींवाअनेकमेवसद्वितीयमितिश्रुतिमेवव्यावहारिकेणप्रातिभासिके
नवाएकमेवाद्वितीयंब्रह्मेतिश्रुतित्वेनगृह्णातीत्यादिशंकयामिथ्यात्वादिश्रुत्यादेरेवासिद्ध्यापत्तेश्च ।

विशेषेति ॥ शब्दान्यजन्यसाक्षात्कारएवतच्छंकानतुशब्दजन्यसाक्षात्कारइत्यत्रविशेषहेत्वभावादित्यर्थः ॥ विश्वान्येति ॥
शब्दान्यजन्यसाक्षात्कारएवतच्छंका नतुशब्दजन्यसाक्षात्कारइतियथोच्यते एवंवयमपिवदामो विश्वविषयकप्रत्यक्षभिन्नप्रत्य
क्षएवभाविबाधकशंका । ततश्चवेदांतजन्यसाक्षात्कारेपितच्छंकास्यान्नविश्वप्रत्यक्षइत्यपि(सुवचत्वा)वक्तुंशक्यत्वादित्यर्थः । य
दिभाविबाधकशंकयाऽप्रमाणमेवप्रमाणत्वेनप्रत्यक्षंगृह्णातीत्युच्यते तर्हिमिथ्यात्वश्रुतिरेवत्वन्मतेनसिद्ध्येदित्याह ॥ अद्वैतेति ॥

अद्वैतश्रुतिस्वरूपग्राहिश्रोत्रप्रत्यक्षंलिंगकरणतापक्षेऽनुमानस्वरूपग्राहिचक्षुरादिकं । तथाचवस्तुगत्याएकमेवाद्वितीयमितिश्रु
तिर्नास्त्येव किंनामानेकमेवसद्वितीयमित्येवास्तिश्रुतिः । एवंचानेकमेवसद्वितीयमितितात्विकीमेवश्रुतिंव्यावहारिकैकमेवाद्वि
तीयमितिश्रुतित्वेनअथवाव्यावहारिकीमेवानेकमेवसद्वितीयमितिश्रुतिंप्रातिभासिकैकमेवाद्वितीयमितिश्रुतित्वेनश्रोत्रप्रत्यक्षंगृ
ह्णातीतिशंकयामिथ्यात्वश्रुतिरेवनसिद्ध्येदित्यर्थः । तथाऽधूममेवधूमत्वेनचक्षुर्गृह्णातीतिशंकयातेनवह्निसिद्धिरपिनस्यादित्यपि
द्रष्टव्यं ॥ शून्येत्यादि ॥ अयमर्थः । त्वन्मतेब्रह्माद्वैतमेवतत्वं द्वितीय(स्यसतोऽभाव)स्यात्यंताभावएवतत्त्वं नतुशून्याद्वैतं

शून्याद्वैतंतत्वमितिसद्वैतंतत्वमितिचश्रुतेरभावग्राहिप्रत्यक्षमपितात्विक्यांव्यावहारिक्यां
वातस्यांश्रुतौसत्यामेवव्यावहारिकंप्रातिभासिकंवातदभावंगृह्णातीतिशंकयाशून्याद्वैतादि
सिद्ध्या(पाताच्च)पत्तेश्च।नचात्माद्वैतश्रुतिविरोधादुक्तशंकानुदयः तस्याएवसंदिह्यमानत्वात्।

सद्वैतंवातत्वं तथाश्रुतेरश्रवणादितित्वयोच्यते । तत्रवदामः । शून्याद्वैतंतत्वमित्यादिश्रुत्यभावग्राहिश्रोत्रप्रत्यक्षंतात्विक्यांशू
न्याद्वैतंतत्वमित्यादिश्रुतौसत्यामेवव्यावहारिकंतदभावंगृह्णाति अथवाव्यावहारिक्यांशून्याद्वैतंतत्वमित्यादिश्रुतौसत्यामेवप्राति
भासि(कमेवत)कंतदभावंगृह्णाति । प्रतियोगितदभावयोर्भिन्नसत्ताकत्वनियमादि(तिशं)त्याशंकयाशून्याद्वैतसद्वितीयरूपतत्त्व
सिद्धेरप्यापातादिति । आदिपदेनसद्वैतग्रहणं ॥ उक्तशंकेति ॥ शून्याद्वैतादिसिद्ध्यापादकोक्तशंकेत्यर्थः ॥ तस्याएवेति ॥
आत्माद्वैतश्रुतेरेवभाविबाधकशंकयाऽप्रमाणत्वेनसंदिह्यमानत्वादित्यर्थः । तथाचशंकायाअभावेनात्माद्वैतश्रुतिप्रामाण्यसिद्धौ

264
265
SGDF
Sri Gangadharan ... Foundation

तद्विरुद्धतयातात्विक्यांव्यावहारिक्यांवेत्यादिनोक्तशंकायाअभावेनशून्याद्वैताद्यसिद्धिः । तस्यांचसत्यांतद्विरोधाभावेनआत्मा द्वैतश्रुतिप्रामाण्यसिद्धिरित्यन्योन्याश्रयादितिभावः । यदुक्तमद्वैतश्रुतिस्वरूपग्राहिप्रत्यक्षेपिशंकापत्त्यामिथ्यात्वश्रुत्यादेरेवासि द्ध्यापत्तेश्चेति तदयुक्तं । वस्तुतोमन्मतेमिथ्यात्वश्रुतिरपिनास्त्येव । सर्वस्यापिब्रह्मातिरिक्तस्यमिथ्यात्वांगीकारात् । नचतर्हिमि थ्यात्वसिद्धिःकथमितिवाच्यं । व्यवहारदशायांभवदीय(भेदश्रु)द्वैतश्रुतिरेवास्तितत्वतःसाऽद्वैतश्रुतित्वेनास्माभिर्ज्ञाताऽस्ति ता दृश्यैवचश्रुत्याऽद्वैतंसिद्ध्यति । असतएवमन्मतेसाधकत्वेनांगीकारादित्याशंक्यातिप्रसंगानाह ॥ नचेत्यादिना ॥ भेदश्रुति

नचतत्वतोद्वैतश्रुत्याव्यवहारदशायामद्वैतश्रुतित्वेनगृहीतयामिथ्यात्वसिद्धिः । वह्नित्वे नज्ञाताद्गुंजापुंजाद्दाहापत्तेः । भेदश्रुतित्वेनपूर्वपक्षिणाज्ञातेनाद्वैतवाक्येनद्वैतसिद्ध्या पत्तेश्च । नचाद्वैतश्रुतितत्प्रामाण्यादेरप्यन्यत्राद्दृष्टस्तात्विकसत्वविरोधीतत्वावेदकेनैवबा धःशंक्यःनतुस्वप्नादौदृष्टःव्यावहारिकसत्वविरोधीअतत्वावेदकेनबाधइतिराजाज्ञास्ति ।

त्वेनेति ॥ यथाऽसतएवसाधकत्वेनाद्वैतश्रुतित्वेनज्ञातयाद्वैतश्रुत्यैवमिथ्यात्वंसिद्ध्यतीतित्वयोच्यतेतथेत्यर्थः । असतःसाधक त्वमप्युत्तरत्रनिराकरिष्यतइत्यवधेयं । ननुमयाप्रत्यक्षादीनांतत्वावेदकेनाद्वैतागमेनबाधःशंकितुंशक्यते । तत्वावेदकेनबाधस्य तात्विकसत्त्वविरोधित्वेनव्यावहारिकसत्त्वाविरोधित्वात् । अद्वैतागमस्यतुबाधोनशंकितुंशक्यः । सहितत्वावेदकेनैवशंक्यो नातत्वावेदकेन तत्वावेदकंचाऽद्वैतागमादन्यन्नास्तीतिकथमद्वैतागमेबाधशंकेत्यतआह ॥ नचेति ॥ अद्वैतश्रुत्यादेस्तात्विकस

SGDF
Sri Gargeshwari Digital Foundation

त्त्वविरोधीयस्तत्वावेदकेनबाधःसएवशंक्यो नतुव्यावहारिकसत्त्वविरोधीअतत्वावेदकेनबाधःशंकनीयइतिराजाज्ञायाअभावेना द्वैतश्रुत्यादेरतत्वावेदकेनैवबाधोऽस्माभिःशंक्यतएव प्रत्युतत्वयोच्यमानःतत्वावेदकेनबाधोन्यत्रस्वप्नादौकुत्राप्यदृष्टः । अस्मा भिरुच्यमानोऽतत्वावेदकेननायंगजइत्यादिजाग्रज्ज्ञानादिनाबाधोव्यावहारिकसत्त्वविरोधीस्वाप्नेशुक्तिरजतादौचदृष्टोऽतोतत्वा वेदकेनैवबाधोऽद्वैतश्रुत्यादेःशंक्यते तथाचव्यावहारिकसत्त्वंयदंगीकृतंश्रुत्यादेस्तन्नस्यात् तावतैवममेष्टसिद्धेरित्यर्थः । नन्विद मयुक्तं । अन्यत्रस्वप्नादावदृष्टेपितत्वावेदकेनैवबाधेजगतिशंकितेतस्यचतात्त्विकसत्त्वविरोधित्वात्तदेवगच्छति नव्यावहारिकस त्त्वं । अद्वैतश्रुत्यादेरन्यत्रस्वप्नादौदृष्टेनअतत्वावेदकेनबाधेशंकितेतस्यव्यावहारिकसत्त्वविरोधित्वात्तस्मिन्नपगतेप्रातिभासिक 267

अप्रातिभासिकत्वधीस्तुतात्विकत्वधीरिवयुक्ता ।

त्वमेवस्यात् । नचेष्टापत्तिरितिवाच्यं । अप्रातिभासिकत्वधीविरोधादित्यतआह ॥ अप्रातिभासिकत्वधीस्त्विति ॥ यथाब्र ह्मव्यतिरिक्तस्यमिथ्यात्ववादिनस्तवाद्वैतश्रुतितत्प्रामाण्यादौतात्विकत्वधीस्तवास्ति साकथमितिवाच्यं । बाधविलंबाभावाच्छु क्तिरजतादावतात्विकत्वधीः श्रुत्यादौबाधविलंबात्तात्विकत्वधीरितियदिब्रूयास्तर्हिव्यावहारिकसत्त्वविरोध्यतत्वावेदकागमेनबा धशंकयाश्रुत्यादेःप्रातिभासिकत्वलाभेपितत्राप्रातिभासिकत्वधीरपितात्विकत्वधीवत्बाधविलंबप्रयुक्तेतिवयमपिवदामइत्यर्थः । ननुश्रुत्यादेःप्रातिभासिकत्वेपिअप्रातिभासिकत्वधीस्तात्विकत्वधीरिवयुक्तेत्ययुक्तं तथात्वे "तरतिशोकमात्मविदि" तिब्रह्मतत्व

SGDF
Sri Gargeshwari Digital Foundation

ज्ञानाच्छ्रुत्यादिसर्वप्रपंचनिवृत्तिप्रतिपादकश्रुतिविरोधः । प्रातिभासिकस्यब्रह्मतत्वज्ञानान्निवृत्त्यनुपपत्तेरित्याशंक्यनिषेधति ॥
नचैवमिति ॥ वस्तुतस्तुतन्निवृत्तिश्रुतिरेवनास्तितत्रापिभाविबाधकशंकाप्रसरादित्याह ॥ अत्रापीति ॥ अनिवृत्तीति ॥
वस्तुगत्याब्रह्मतत्वज्ञानान्निवृत्तिश्रुतिस्सानभवत्येव । साचतन्निवृत्तिश्रुतित्वेनगृहीतेतिशंकोदयादित्यर्थः । तद्दर्शनेन दोषबाध
दर्शनेन । अद्वैतलिंगं मिथ्यात्वसाधकंदृश्यत्वादि । तत्वमसीत्यद्वैतशब्दः । तच्छंका दोषबाधशंका । सदोषानुमायानिर्दोष

नचैवंब्रह्मतत्वज्ञानात्तन्निवृत्तिश्रुतिविरोधः । अत्राप्यनिवृत्तिश्रुतिरेवनिवृत्तिश्रुतितयागृही
तेतिशंकोदयात् । किंचापरीक्षितेरूप्यादिप्रत्यक्षेदोषबाधयोर्दर्शनेनपरीक्षितेजगत्प्रत्यक्षे
पितदाशंकायांलिंगशब्दाभासयोस्तद्दर्शनेनाद्वैतलिंगशब्दयोरपितच्छंका । बाधितेअ
क्षलिंगाद्याभासेपिभ्रमबाधितप्रमादृष्टांतेनाबाधशंकापिस्यादितिप्रमाणतदाभासव्यवस्थान
स्यात् । तदुक्तं "निर्दोषानुमायास्सदोषत्वंसदोषानुमायानिर्दोषत्वमित्यव्यवस्थे" ति ।

त्वमित्युक्तातिप्रसंगांतरमाह ॥ बाधितइति ॥ बाधितेकथमबाधितत्वंशंकितुमर्हमित्यतउक्तं भ्रमबाधितेति । भ्रमबाधितत्वे
नाभिमतेत्यर्थः । भ्रमनिवृत्तेत्यर्थइत्यन्ये । इदंरजतमितिबाधितेऽक्षेऽनुष्णत्वादिसाधकेपदार्थत्वादिलिंगाभासेचाबाधशंकापि
स्यात् कुतः इयंशुक्तिरितिप्रमानंतरंजातेनइदंरजतमितिभ्रमेणसाप्रमाबाध्यते तस्याःप्रमायावस्तुगत्याऽबाध्यत्वमप्यस्ति कुतः

भ्रमस्यअन्यथाविज्ञातस्यसम्यग्विज्ञानत्वाभावेनतदबाधकत्वात् तथाचभ्रमबाधितेप्यबाधितत्वदर्शनेनबाधितेऽक्षादावपिअबा
धशंकास्यादित्यर्थः । तथाचवस्तुगत्याअबाधितेपिजगत्प्रत्यक्षेबाधितरूप्यादिप्रत्यक्षदृष्टांतेनयदिबाधशंकाक्रियते तर्हिभ्रमबाधि
तत्वेनाभिमतायांप्रमायांवस्तुगत्याऽबाध्यत्वसत्वेनतदृष्टांतेनवस्तुतोऽबाधितेप्यक्षेलिंगेचबाधशंकास्यादितिप्रतिबंदीग्रहणमिति
भावः । अद्वैतलिंगशब्दयोरपिबाधशंकास्यादित्ययुक्तं । लोकेदोषजन्यज्ञानएवबाधदर्शनात् श्रुतेश्चनित्यत्वेनदोषजन्यत्वाभा
वादित्याशंकते ॥ श्रुतिरिति ॥ नित्यत्वंस्वरूपासिद्धमित्याह ॥ त्वन्मतइति ॥ ननुनाद्वैतश्रुतौदोषबाधयोःशंका तस्याःप्र

श्रुतिर्नित्यत्वान्निर्दोषेतिचेन्न त्वन्मतेश्रुतिनित्यतायाआकल्पंस्थितिमात्ररूपत्वेनआकाशा
दिवत्प्रतिकल्पंतस्याउत्पत्तेः । तस्याःप्रमाकरणत्वेपिममद्वैतइवब्रह्ममीमांसायांप्रत्यधिक
रणंपूर्वपक्ष्यभिमतार्थइवचतवाद्वैतेतात्पर्यधीःभ्रमइतिशंकयातज्जन्याद्वैतधियःप्रमात्वासिद्धे
श्च । उपक्रमोपसंहारतदैकरूप्यग्राहिप्रत्यक्षेप्युक्तन्यायेनशंकोदयेनतदैकरूप्यासिद्धेश्च ।

माकरणत्वरूपविशेषदर्शनसद्भावादित्यतआह ॥ तस्याइति ॥ श्रुतेःप्रमाकरणत्वेपिममतत्ववादिनोजायमानाद्वैतेतात्पर्यधी
र्भ्रमइतितवशंकयातज्जन्यद्वैतधियःप्रमात्वंनसिध्यति । यथावाब्रह्ममीमांसायांप्रत्यधिकरणंपूर्वपक्ष्यभिमतश्रुत्यर्थतात्पर्यधीर्भ्र
मइतिशंकयातज्जन्यधियःप्रमात्वंनसिद्ध्यति एवमेवश्रुतेःप्रमाकरणत्वेपिपूर्वपक्ष्यभिमतार्थइवतवाद्वैततात्पर्यधीर्भ्रमइतिममशंक
यातज्जन्यायास्त्वदीयाद्वैतधियःप्रमात्वासिद्धेरित्यर्थः ॥ उपक्रमेति ॥ अद्वैतइतिशेषः ॥ उक्तन्यायेनेति ॥ अनेकरूप्येएवै

SGDF

270

करूप्यशंकयेत्यर्थः । दोषजन्यत्वज्ञानरूपकारणाभावाच्चनभाविबाधकशंकेत्याह ॥ किंचेति ॥ क्लृप्तदोषाणा मतिदूरत्वादीनां । अत्र जगत्सत्यताग्राहिप्रत्यक्षे । विनिश्चितः परीक्षयेतिशेषः । अन्यस्य अक्लृप्तस्य । प्रत्यक्षेदूरादिदोषाभावस्ययोग्यानुपलब्ध्यानिश्चयेपिसन्घटइतिप्रत्यक्षेयदिदोषशंका तदाश्रुतावपिसास्यादित्यर्थः । ननुदूरादिदोषाभावनिश्चयमात्रेणनप्रत्यक्षेणार्थसिद्धिः स्वप्नेप्येतादृशनिश्चयसद्भावेनस्वाप्नप्रत्यक्षतुल्यत्वादित्याशंकते ॥ स्वाप्नेति ॥ तर्हिब्रह्मैवतत्वमितिवेदेपिभ्रांत्याद्यभात्रनिश्चयोयोजायतेसोपिशून्यमेवतत्वमितिस्वप्नेकश्चनवेदोदृष्टस्तत्रभ्रांत्याद्यभावनिश्चयोयोजातस्तत्तुल्यइत्याह ॥ स्वाप्नइति ॥

किंच"प्रत्यक्षेक्लृप्तदोषाणामभावोत्रविनिश्चितः । अन्यस्यकल्पनानित्येवेदेपिननिवार्यते"।
स्वाप्नप्रत्यक्षेपितदादूराद्यभावनिश्चयोस्तीतिचेन्न । स्वाप्नेशून्यमेवतत्वमितिवेदेपितदाभ्रां
त्याद्यभावनिश्चयस्यसत्वात्[2] । स्वप्नवैषम्यानुभवस्तूभयत्रसमः । किंच नतावत्साक्षिणिबाध[2]
शंका तस्यनित्यानुभवरूपतयावेदइवतात्पर्यभ्रांतेरप्ययोगेनवेदादप्यनाशंकितदोषत्वात् ।

नन्वद्वैतश्रुतौस्वाप्नशून्यप्रतिपादकवेदवैषम्यानुभवान्नस्वाप्नवेदतुल्यत्वमित्यतआह ॥ स्वप्नेति ॥ समइति ॥ सन्घटइतिप्रत्यक्षेपिस्वाप्नप्रत्यक्षवैषम्यानुभवात्नतत्तुल्यत्वमित्यर्थः । एतावत्पर्यंतंभाविनोबाधकत्वमेवाऽयुक्तं तस्यबाधकत्वेपिनास्यजगतस्तद्बाध्यत्वं अतोनभाविबाधकशंकायुक्तेत्युक्तं । इदानीमस्तुवासाशंका साकिंसाक्षिप्रत्यक्षेक्रियते बाह्यप्रत्यक्षेवा नाद्यइत्याह ॥ ॥ १३६ ॥
किंचेति ॥ ननुदोषजन्यत्वज्ञानाभावेपिप्रमाणाजन्यत्वमात्रेणसाक्षिण्यप्रामाण्यहेतुभूतबाधकशंकास्यादितिचेत्समानमेतद्वेदे

2 See Tarangini ?

SGDF Sri Gargeshwari Digital Foundation

पीत्याह ॥ प्रमाणेति ॥ तदप्रामाण्ये तस्याप्रामाण्यहेतुभूतबाधकशंकायां ॥ गुणेति ॥ अपौरुषेयतयाआप्तोक्तत्वरूपगुणस्यैवा भावादितिभावः ॥ अप्रामाण्येति ॥ अप्रामाण्यहेतुबाधकशंकापातादित्यर्थः ॥ निश्शंकमिति ॥ निश्शंकंयथास्यात्तथा । साक्षिग्राह्यंयत्सुखादिकमित्यन्वयः । अस्त्यत्रपुरतःपानीयमितिवाक्यंश्रुतवतःपानीयसमीपप्राप्तिः प्राप्तस्यपानं तेनोदन्यानि मित्तदुःखनाशःसुखप्राप्तिरित्येवंरूपयासुखादिपर्यंतपरीक्षयेत्यर्थः ॥ तन्निरासादिति ॥ दोषजन्यत्वज्ञाननिरासेनशंकानिरा 271

प्रमाणाजन्यत्वमात्रेणतदप्रामाण्येगुणाजन्यत्वमात्रेणवेदस्याप्यप्रामाण्यापातात् । नापि बाह्यप्रत्यक्षे । तत्रापिनिःशंकसाक्षिग्राह्यसुखादिपर्यंतपरीक्षयातन्निरासात् । उक्तंहि "न परीक्षानवस्थास्यात्साक्षिसिद्धेत्वसंशयादि" ति । "नहिबाधःक्वचिद्दृष्टोदुःखाद्यनुभवस्य त्वि"तिच । ननुस्वाप्नजलप्रत्यक्षेपिस्वाप्नावगाहनपानतज्जन्यसुखपर्यंतापरीक्षास्तीतिचेन्न ।

सादित्यर्थः । प्रत्यक्षेसुखपर्यंतापरीक्षापिस्वाप्नप्रत्यक्षपरीक्षातुल्येत्याशंकते ॥ नन्विति ॥ यदिस्वाप्नजलप्रत्यक्षसंबंधिपरीक्षासा म्येनजाग्रदवस्थाकालीनजलप्रत्यक्षसंबंधिपरीक्षायाअप्यप्रामाण्येनानाश्वासःशंक्यते । तर्ह्यद्वैतश्रुतावप्यनाश्वासःस्यात् । ननु तत्रनानाश्वासः ब्रह्मैवतत्त्वमितिवेदस्यापौरुषेयत्वज्ञानषड्विधतात्पर्यलिंगज्ञानतदनुग्राहकतर्कानुसंधानशून्याद्वैतप्रतिपादकश्रुति प्रतियोगिकप्राबल्यनिर्णयब्रह्मसाक्षात्कारतज्जन्यब्रह्मभावापत्तिरूपमोक्षपर्यंतापरीक्षास्तीतिचेन्न । शून्यमेवतत्त्वमितिस्वाप्नवेदप

SGDF
Sri Gargeshwari Digital Foundation

न्यायामृ० रीक्षातुल्यत्वादित्याह ॥ स्वाप्नस्येत्यादिना ॥ नन्वद्वैतश्रुतिपरीक्षायाःस्वाप्नशून्याद्वैतश्रुतिपरीक्षातोवैषम्यमनुभूयतइतिचेत् श्रीनिवा०
॥ १३७ ॥ तर्हिस्वाप्नजलप्रत्यक्षेसुखांतपरीक्षायाःसकाशात्जाग्रत्कालीनप्रत्यक्षेपिसुखांतपरीक्षायावैषम्यमनुभवसिद्धमित्याह ॥ स्वाप्नेति ॥
अन्यथेति ॥ परीक्षायामप्यनाश्वासइत्यर्थः ॥ नसिद्ध्येदिति ॥ तत्सिद्धिश्चत्वयापरीक्षयैववाच्या तदप्रामाण्येतन्नसिद्ध्येदि प्रत्य.भावि.

स्वाप्नस्यशून्यमेवतत्वमितिवेदस्याप्यपौरुषेय(त्वादिज्ञा)त्वज्ञानषड्विधतात्पर्यलिंगज्ञानानुग्राह १ । १७
कतर्कानुसंधानब्रह्माद्वैतश्रुतिप्रतियोगिकप्राबल्यनिर्णयस्वाप्नशून्यसाक्षात्कारतज्जन्यशून्य
भावापत्तिरूपमोक्षपर्यंतापरीक्षास्तीतिफलपर्यंताद्वैतश्रुतावप्यनाश्वासापातात् । स्वाप्नवैष 272
म्यानुभवेनाश्वासस्तूभयत्रसमइत्युक्तं।अन्यथापरस्यापिप्रातिभासिकवैलक्षण्यंनसिध्येत् ।
एवंच ।"स्वाप्नाद्विशेषस्यासिद्धौप्रपंचस्याद्वयश्रुतिः ।स्यात्फलेनसहस्वाप्नीसिद्धौशंकाक्षजेकुतः
॥ १ ॥ नहिप्रत्यक्षशब्दत्वकृतंवैषम्यमीक्ष(क्ष्य)ते । बाधाबाधकृतस्त्वेवविशेषःसंप्रदृश्यते॥२॥"

त्यर्थः । प्रपंचस्यस्वाप्नाद्विशेषस्येत्यन्वयः । स्वाप्नी स्वाप्नशून्याद्वैतश्रुतिसमानास्यात् । सिद्धौ प्रपंचस्यस्वाप्नाद्विशेषस्येतिवर्तते ।
ननुप्रत्यक्षंप्रत्यक्षत्वादेवाप्रमाणं अद्वैतश्रुतिस्तुशब्दत्वादेवप्रमाणमित्युच्यतइत्यतआह ॥ नहीति ॥ नहीक्षते प्रामाण्यमिति ॥ १३७ ॥
शेषः । ईक्ष्यतइतिपाठमंगीकृत्यप्रामाण्याप्रामाण्यप्रयोजकत्वेननप्रदर्श्यतइत्यर्थइत्यन्ये । प्रामाण्यंकर्तृ वैषम्यंनेक्षते । नापेक्षत

इत्यर्थः । विशेषइत्यनंतरंप्रामाण्येप्रयोजकतयेतिशेषः । प्रत्यक्षेश्रुतिवत्प्रामाण्यप्रयोजकोऽबाधोस्तीत्युपसंहरति ॥तस्मादिति॥
सप्तमेति ॥ शंकामात्रेणापवादेसप्तमोरसःकश्चनस्यादित्यपिशंकास्यादितिभावः ॥ स्वव्याघातादिनेति ॥ भाविबाधकशंका
यामपिभाविबाधकशंकाप्रसरादित्यर्थः ॥ उक्तंहीति ॥ बाधाभावस्यप्रामाण्यप्रयोजकत्वमित्यर्थः । अर्थेऽत्यंतासत्यपिशब्द
स्तावदत्यंतासद्रूप्यादिविषयकंज्ञानंकरोत्येव तत्रविषयाभावात्तज्ज्ञानंबाध्यते । अत्रेतितद्ग्रंथप्रकृतपरामर्शः । तत्रस्वतःप्रामा 273

तस्मात्त्वयाप्यौत्सर्गिकस्यप्रामाण्यस्यबलवद्बाधकदर्शनैकापोद्यत्वेन[1]सप्तमरसशंकातु
ल्येनशंकामात्रेणानपवादात् स्वव्याघातादिनाशंकानुदयाच्चश्रुतेःप्रामाण्यनिश्चयइ
तिवाच्यं।उक्तंहिखंडने "अत्यंतासत्यपिज्ञानमर्थेशब्दःकरोतिहि । अबाधात्तुप्रमा
मत्रस्वतःप्रामाण्यनिश्चला "मिति ।(ए)तत्प्रत्यक्षेपितुल्यं । उक्तंहिसुरेश्वरेणापि" अ
तोवबोधकत्वेनदुष्टकारणवर्जनात् । अबाधाच्चप्रमाणत्वंवस्तुन्यक्षादिवच्छ्रुते"रिति ।

ण्यान्निश्चलामचलांप्रमांकरोति । तत्रहेतुरबाधात्त्विति ॥ तुल्यमिति ॥ औत्सर्गिकप्रामाण्यस्यबलवद्बाधकैकापोद्यत्वेनप्रकृते
तदभावात्प्रत्यक्षस्यप्रामाण्यनिश्चयइत्यर्थः । अतःश्रुतेःप्रमाणत्वमित्यन्वयः । तत्रहेतुरवबोधकत्वेनेत्यादि । वस्तुनि वस्तुसद्भा
वे । श्रुतेरबाधितत्वेनप्रामाण्येऽक्षप्रामाण्यस्यदृष्टांतत्वेनोपादानादित्यर्थः । स्वक्रियादिविरोधतः तत्वज्ञानायवेदांतश्रवणादिरू

1 हलन्ताध्यन । न तु न्यध्यतौ । उपसर्गस्थितात् । अपनाद्यत्वेनेति तरंगिणीपाठः ॥

SGDF ... Foundation

पस्वक्रियाविरोधप्रसंगात् । अध्यक्षेश्रुताविवभाविबाधकशंकानयुक्ता । स्वक्रियाविरोधेदृष्टांतः ॥ अहेत्विति ॥ कारणंविना पिकार्यंस्यादितिशंकावत् धूमार्थंवह्निमुपादत्ते तृप्त्यर्थंचभोजनं तत्कारणंचतन्नेतिब्रूतेइत्येवंवचनक्रियायाउपादानक्रियायाविरो धइत्यर्थः । प्रकृतेचोक्तरीत्यास्वक्रियाविरोधआयातीतिनभाविबाधकशंकाकार्येत्यर्थः ॥ उक्तंचेति ॥ भाविबाधकशंकाराहि

तस्मात् " अहेतुकार्यशंकेवस्वक्रियादिविरोधतः । भाविबाधकशंकानयुक्ताध्यक्षेश्रुताविव " । उक्तंह्युद यनेन तदेवह्याशंक्येतयस्मिन्नाशंक्यमानेस्वक्रियाव्याघातोनभवतीति । उक्तंचवार्तिकेबौद्धंप्रति " इह जन्मनिकेषांचिन्नतावदुपलभ्यते । योग्यवस्थागतानांतुनविद्मःकिंभविष्यती "ति । नहिसंभवतिशब्दा नुमानाभासयोःरूप्यादिधीप्रामाण्यग्राहिप्रत्यक्षस्यचबाधंपदार्थत्वस्यचमिथ्यात्वव्यभिचारंस्वैरिण्याश्चा नियमंपश्यन्नपिपरीक्षितत्वाद्वेदांततदनुकूलानुमानयोःवेदांतधीप्रामाण्यग्राहिप्रत्यक्षस्यचाबाधंदृश्यत्व स्यचमिथ्यात्वाव्यभिचारंस्वमातुश्चनियमंनिश्चिनोति । जगत्प्रत्यक्षस्यतुपरीक्षितस्याप्यपरीक्षितरूप्या दिप्रत्यक्षदृष्टांतमात्रेणाबाधंननिश्चिनोतीति । परीक्षितप्रत्यक्षेप्यनाश्वासेहिनैकापिव्यवस्थासिध्येत्

त्यमित्यर्थः । इहजन्मनिकेषांचित्केषामपिबाधोनोपलभ्यते । योगिनांभविष्यतीतिचेत्तत्राह ॥ योगीति ॥ योग्यवस्थायांबा धोभविष्यतिवानवेतिवयंनविद्मइत्युपहासः । परःकेवलंस्वपक्षनि(क्षिप्तदृ)ष्टदृष्टिरित्यपहासमुखेनातिप्रसंगंसूचयन्जगत्प्रत्यक्ष स्यपरीक्षितत्वादबाधनिश्चयोयुक्तइत्याह ॥ नहीत्यादिना ॥ शब्दानुमानाभासयोर्बाधंपश्यन्नपिपरीक्षितत्वाद्वेदांततदनुकूला

SGDF Sri Gargeshwari Digital Foundation

नुमानयोरबाधंनिश्चिनोति । रूप्यादिधीप्रामाण्यग्राहिप्रत्यक्षस्यबाधंपश्यन्नपिपरीक्षितत्वाद्वेदांतजन्यधीप्रामाण्यग्राहिप्रत्यक्षस्याबाधंनिश्चिनोति। पदार्थत्वरूपहेतोर्ब्रह्मणिमिथ्यात्वव्यभिचारंपश्यन्नपिपरीक्षितत्वाद्दृश्यत्वहेतोर्मिथ्यात्वाव्यभिचारंनिश्चिनोति। स्वैरिण्यास्संभोगकर्तृपुरुषानियमंपश्यन्नपिपरीक्षितत्वात्स्वमातुःसंभोगकर्तृपुरुषनियमंनिश्चिनोति । जगत्प्रत्यक्षस्यतुपरीक्षितस्याप्यपरीक्षितरूप्यादिप्रत्यक्षदृष्टांतमात्रेणाबाधंननिश्चिनोतीतिसंभवति। परीक्षितप्रत्यक्षेप्यऽनाश्वासेऽपरीक्षितशब्दानुमानाभासादिदृष्टांतमात्रेणपरीक्षितवेदांततदनुकूलागमादेरप्यबाधादिनिश्चयोनस्यादितिनकाप्युक्तव्यवस्थासिध्येदित्यतिप्रसंगइत्यर्थः । 275

तद्वसानत्वात्सर्वस्य नहिश्रुतेनुमितेवादृष्टइवाश्वासः । किंचैवंनहिंस्यादित्यस्याग्नीषोमीयेव्यभिचारदर्शनेनान्यत्रापितदाशंक्येतेत्युत्सर्गापवादन्यायोभज्येत ।

कुतोनसिद्ध्यतीत्यतआह ॥ **तद्वसानत्वादिति** ॥ परीक्षावसानत्वादित्यर्थः । प्रत्यक्षसिद्धेऽनाश्वासोनास्तीत्येतदनुभवसिद्धमित्याह ॥ **नहीति** ॥ भाविबाधकशंकांगीकारे(दूषणांत)बाधकांतरमाह ॥ **किंचेति** ॥ **व्यभिचारेति** ॥ अग्नीषोमीयपशुहिंसायाःकर्तव्यत्वस्यश्रुतत्वाद्भूतत्वस्याहिंस्यत्वेनव्यभिचारदर्शनेनेत्यर्थः । अन्यत्रापि ब्राह्मणहिंसायामपि ॥ **तदाशंक्येतेति** ॥ कर्तव्यत्वशंकास्यादित्यर्थः ॥ **न्यायइति** ॥ अग्नीषोमीयपशुहिंसाव्यतिरिक्तब्राह्मणादिहिंसायाअकर्तव्यत्वरूपस्तदर्थो

SGDF
Sri Gargeshwari Digital Foundation

276

नसिद्ध्येदित्यप्रामाण्यंस्यादित्यर्थः । इष्टापत्तिंपरिहर्तुमाह ॥ उक्तंहीति ॥ उपसंहरति ॥ तस्मादिति ॥ भाविबाधकशंकयाप्रत्यक्षमात्रस्याप्रामाण्यंनवक्तुंयुक्तमित्याह ॥ किंचेति ॥ अन्यथा तस्याप्रामाण्ये ॥ वृद्धिमिच्छतइति ॥ शतद्रव्यवतः कुसीदादिनाशतद्वयंमेस्यादितिद्रव्याभिवृद्धिमिच्छतोमूलहानिवत्नेदंरजतमितिप्रत्यक्षविरोधेनशुक्तिरूप्यप्रत्यक्षस्याप्रमाणतया

उक्तंहि "उत्सर्गतोपियत्प्राप्तमपवाद्विवर्जितं । [1]व्यभिचार्यपवादेनमानमेवभविष्यती"ति । एवंच" बाधाभावोत्रनिर्णीतःशशशृंगाद्यभाववत् । अन्यथाशशशृंगादिरपिशंक्येतबाधवत् " । तस्मात्प्रामाण्यस्योत्पत्तौज्ञप्तौचस्वतस्त्वादिहचोत्पत्तिस्वतस्त्वापवादस्यदोषस्यज्ञप्तिस्वतस्त्वापवादस्यबाधकस्यचादर्शनात्निर्मूलशंकायाश्चस्वक्रियाविरोधादिनानुत्थानात्सुस्थंप्रत्यक्षप्रामाण्यं । किंच नेदंरूप्यमितिप्रत्यक्षप्रामाण्यमावश्यकंअन्यथाइदंरूप्यमित्यस्याप्रामाण्यंनस्यादितिवृद्धिमिच्छतोमूलहान्यापत्तेः ।

तद्विषयस्यमिथ्यात्वात्तदृष्टांतेनसमस्तस्यापिजगतोमिथ्यात्वंसिषाधयिषितं । अन्यथानेदंरजतमितिप्रत्यक्षस्याप्रामाण्येइदंरूप्यमितिप्रत्यक्षस्याप्रामाण्यसाधकाभावेन(प्रमात्वापत्त्या)प्रामाण्यापत्त्याशुक्तिरूप्यादेर्मिथ्यात्वसाधकाभावेनमिथ्यात्वाभावात्दृष्टांताभावान्नविश्वमिथ्यात्वसिद्धिरित्यर्थः । अत्रशुक्तिरूप्यमिथ्यात्वंमूलंविश्वमिथ्यात्ववृद्धिरितिविवेकः । यद्वाइदानींत्वयारूप्यप्र ॥ १३३ ॥

1 अपवादेन व्यभिचारीत्यन्वयः

277

त्यक्षदृष्टांतेनसर्वजगत्प्रत्यक्षस्याप्यप्रामा(ण्यमुच्यतेतत्र)ण्यंसिषाधयिषितंतत्रनेदंरजतमित्येकस्यबाधकस्यप्रत्यक्षस्याप्रामाण्येइदंरजतमितिप्रत्यक्षस्याप्रामाण्यंनसिद्ध्यति । तस्यबाधकप्रमाणकत्वात् । तथाचदृष्टांताभावान्नप्रत्यक्षमात्रस्याऽप्रामाण्यंवक्तुंयुक्तमित्यर्थः । अत्ररूप्यप्रत्यक्षाप्रामाण्यंमूलं सर्वजगत्प्रत्यक्षाप्रामाण्यंवृद्धिरितिविवेकः । मूलसंरक्षणार्थंरूप्यादिबाधकप्रत्यक्षस्यप्रमाणत्वेंगीकार्येघटादिसत्ताग्राहकस्यापिप्रामाण्यंस्यादित्याह ॥ तथाचेति ॥ नेदंरूप्यमितिप्रत्यक्षस्यप्रामाण्येसिद्धेसतीत्यर्थः ॥ तत्तुल्येति ॥ नेदंरूप्यमितिप्रत्यक्षतुल्ययोगक्षेममित्यर्थः ॥ सौषुप्तिकानंदानुभवस्येति ॥ तद्रूपसाक्षिप्रत्यक्षस्येत्यर्थः । सु

तथाचतत्तुल्ययोगक्षेमंसन्घटइत्यादिप्रत्यक्षंकथंनप्रमाणं । किंचसौषुप्तिकानंदानुभवस्याप्रामाण्येकथमात्मनआनंदरूपतातात्विकी । आनंदश्रुतेरनुभूतातात्विकानंदानुवादित्वोपपत्तेः ।किंच "स्मृतिः प्रत्यक्ष" मित्यादिश्रुत्या "प्रत्यक्षमनुमानंचशास्त्रंचविविधागमा"इतिमनुस्मृत्याचासिद्धंतत्प्रामाण्यं।

खमस्वाप्समित्युत्तरकालीनपरामर्शबलेनआत्मनआनंदरूपत्वंसाक्षिणासुषुप्तौतात्विकमेवानुभूयतइतिस्वीकृतं साक्षिप्रत्यक्षस्यैवाप्रामाण्येकथमानंदरूपतातात्विकीस्यात् प्रमाणाभावादित्यर्थः । ननुसौषुप्तिकानंदानुभवस्याप्रामाण्येपिआत्मनआनंदरूपता "विज्ञानमानंदंब्रह्मे" त्यादिश्रुत्यासेत्स्यतीत्यतआह ॥ आनंदेति ॥ अनुभूतेति ॥ अप्रमाणभूतसाक्षिसिद्धेत्यर्थः । तत्प्रामाण्यं प्रत्यक्षप्रामाण्यं । ननुनास्माकंश्रुतिस्मृतिविरोधः श्रुतौतत्त्वावेदकप्रामाण्यस्यप्रत्यक्षेत्वतत्त्वावेदकप्रामाण्यस्यचांगीकारादि

SGDF Foundation

२ प्रतियोग्यधिकरणसंसर्गाभावस्यैव अधिकरणेऽसत्त्वाभावसम्बन्धरूपतया ऽधिकरणे प्रतियोगिसंसर्गस्यैवासत्त्वाभावसंबन्धाभावरूपतया सत्त्वे सति सत्त्वाभावाभाव इति ॥

न्यायामृ०

॥ १४० ॥

त्यतआह ॥ नचेति ॥ कुतोनयुक्तमितिचेत् सकृत्प्रयुक्तशब्दस्यार्थद्वयकल्पनायाबलवत्साधकाधीनत्वात् । प्रत्यक्षेत्वतत्वावे दकप्रामाण्यसाधकानांभाविबाधकशंकादिरूपाणांबाधकानांपरिहृतत्वादित्याशयः ॥ ७ ॥ प्रत्यक्षस्यभाविबाधकशंकाभंग विवरणं ॥ १७ ॥ पूर्वंप्रत्यक्षमप्रमाणमेवउतप्रमाणमपिकालत्रयाबाध्यत्वरूपसत्त्वग्रहाक्षममितिद्वौविकल्पावुक्तौ तत्राद्यस्त्रेधा विकल्प्यनिराकृतः । संप्रतिद्वितीयमनूद्यनिराकरोति ॥ नापीति ॥ प्रत्यक्षस्यवर्तमानमात्रग्राहित्वात्रसग्रहणादौचक्षुषइवत्रि

श्रीनिवा०

प्रत्य.पार.

१ । १८

278

नचसकृत्प्रयुक्तस्यप्रमाणशब्दस्यश्रुतौतत्वावेदकत्वमर्थः प्रत्यक्षेऽतत्वावेदकत्वमितियु क्तं ॥७॥ इतिप्रत्यक्षस्यभाविबाधकशंकाभंगः ॥ १७॥ नापिप्रत्यक्षंकालत्रयाबाध्यत्वग्र हाक्षममितिद्वितीयः तद्भिनकालत्रयेपिसत्वं मन्मतेप्यनित्यप्रपंचेतदभावात् किंतुका [1]लत्रयवृत्तियदसत्वंतदभावः सचकदाचित्सत्वेगृहीतेपिगृहीतएवेतिप्रतिपन्नोपाधौस त्वग्राहिणाप्रत्यक्षेणतदुपाधौत्रैकालिकनिषेधप्रतियोगित्वरूपमिथ्यात्वाभावसिद्धिः । "स्वकालेह्यस्तितांगृह्णन्साक्षात्कारस्त्रिकालगं । प्रतिषेधंनिरुंधानोगृह्णात्येवात्यबाध्यतां"।

See ११५

कालाबाध्यत्वरूपसत्यताग्रहणेऽक्षमत्वादित्यर्थः ॥ तद्भीति ॥ अबाध्यत्वरूपंसत्यत्वमित्यर्थः। सत्त्वं विद्यमानत्वं । तदभावात् कालत्रयेपिसत्त्वरूपाबाध्यत्वाभावादित्यर्थः ॥ कदाचित्सत्त्वइति ॥ वर्तमानकालीनेसत्त्वइत्यर्थः ॥ स्वकालइति ॥ ननु कथमत्रविरोधः नहिवर्तमानकालीनंसत्त्वंकालत्रयवृत्तिसत्ताप्रतिषेधाभावरूपमितिचेत्उच्यते । अनुमानग्राह्यंयत्कालत्रयवृत्ति ॥ १४० ॥

[1] सर्वकालावच्छेदेन सर्वाधिकरणसंसृष्टाप्यवृत्तिसत्त्वाभावप्रतियोगिविद्यमानताकत्वरूपं यदसत्त्वं तदभावः । अन्यथा यथाश्रुते असत्त्वशब्दस्य विद्यमानात्वाभावार्थकत्वे कालत्रयवृत्तित्वरूपविशेषणस्याव्यावर्तकता । अभावमात्रार्थकत्वे तादृशविद्यमानताऽत्यन्ताभावस्य घटादौ सत्त्वपक्षे सत्त्वान्तदभावासिद्धिरित्यादिशंकावकाशस्स्यात् ॥

SGDF
Sri Gaurang... Digital Foundation

सत्त्वप्रतिषेधरूपमिथ्यात्वंतदभावव्याप्यभूतैककालीनसत्त्वावगाहित्वेनविरोधोत्राभिप्रेतइत्याहुः । तन्न । वह्निरनुष्णइत्यत्रापि कालत्रयेऔष्ण्याभावस्यसाध्यत्वात्प्रत्यक्षेणचवर्तमानकालएवऔष्ण्यग्रहणात्त्रैकालिकानौष्ण्याभावव्याप्यभूतैककालीनौष्ण्यग्र हणात्साक्षात्साध्याभावावगाहित्वेनबाधकत्वंसर्वसंमतंनस्यादिति । गुरुचरणास्तुप्रतिपन्नोपाधौत्रैकालिकसत्तानिषेधइत्यत्रदेश कालयोरपिननिषेध्यकोटौप्रवेशः किंत्वधिकरणकोटावेव तथाचसर्वदेशेकालत्रयेचयासत्तातत्प्रतिषेधोविवक्षित स्तथाचवर्तमान कालेस्तितांसत्तांगृह्णन्साक्षात्कारःकालत्रयेसत्ताप्रतिषेधमात्ररूपबाध्यत्वंनिरुंधानोऽत्यबाध्यतांगृह्णात्येव । तथाचसाक्षाद्ग्राह्याभा २७१

वेदेपिहिविषयस्याबाध्यत्वेज्ञानप्रामाण्यमेवतंत्रं नतुशब्दत्वंवावर्तमानकालाद्य
नवच्छेदेनस्वविषयसत्वग्राहित्वंवासर्वकालादिसंबंधित्वेनस्वविषयसत्वग्राहि
त्वंवातंत्रं । उक्तप्रकारत्रययुक्तानाप्तवाक्यविषयस्यात्यंताबाध्यत्वापातात् ।

वावगाहित्वेनैवविरोधइति । यथोक्तंभक्तिपादीयसुधायां "तत्सत्ताप्रतिषेधमात्ररूपबाधस्यतत्सत्ताग्राहिणाप्रत्यक्षेणविरोधावश्यं भावादि" ति । एतच्चतट्टिप्पण्यांगुरुचरणैर्निपुणतरमुपपादितमनुसंधेयं । किंचप्रत्यक्षंस्वविषयस्यवास्तवाबाध्यत्वग्राहिप्रमाण त्वात्वेदवत् । नचवेदेशब्दत्वादिकमेवस्वविषयाबाध्यत्वेप्रयोजकं नतुतज्जन्यज्ञानप्रामाण्यमितिवाच्यं । मद्वाक्यविषयःसर्व कालसंबंधीभावविबाधकशून्यश्चेत्यनाप्तवाक्येव्यभिचारेणशब्दत्वाद्युपाधेःसमव्याप्त्यभावात् । ततश्चज्ञानप्रामाण्यमेवविषयाबा ध्यत्वेतंत्रमित्यंगीकार्यमित्याह ॥ वेदेपीति ॥ उक्तानुमानदृष्टांतभूतेवेदेपीत्यर्थः । उक्तप्रकारयुक्तानाप्तवाक्येत्येवपाठः । उक्त

SGDF
Sri Gargeshwari Digital Foundation

1 इदन्त्वनुव्याख्यानवचनम् ।

प्रकारत्रययुक्तेतिपाठेशब्दत्वस्यसिद्धत्वात्तदनभिप्रेतमितिमंतव्यं । ततःकिमित्यतआह ॥ तच्चेति ॥ ननुज्ञानग्राहकेणसाक्षिणाप्रामाण्यस्यग्राह्यत्वंकुतइत्यतआह ॥ प्रामाण्यस्येति ॥ स्वतस्त्वादिति ॥ ज्ञानग्राहकग्राह्यत्वस्यैवस्वतस्त्वादित्यर्थः । ननुघटादिज्ञानेकश्चिद्दोषोबाधोवाभविष्यतीतिनविषयाबाध्यत्वगर्भंप्रामाण्यमित्यतआह ॥ नचेति ॥ कालतोमर्यादेत्यन्वयः । मर्यादाव्यवच्छेदःतात्कालिकत्वमितियावत् । श्रुतिप्रत्यक्षयोःसत्यत्वग्रहणेप्यवांतरवैषम्यमस्तीत्याह ॥ इयांस्त्विति ॥ वर्त

तच्चतत्वावेदनरूपंप्रामाण्यंश्रौतज्ञानस्येवाक्षजज्ञानस्याऽपिज्ञानग्राहिणासाक्षिणागृह्यते प्रामाण्यस्यस्वतस्त्वात् । नचरूप्यादिज्ञानेष्विवबाधोवादोषोवानिश्चितः येनतदपोद्येत । [1]तदुक्तं "यदिस्वतस्त्वंप्रामाण्येविश्वसत्ताकथंनते । प्रामाण्यस्यचमर्यादाकालतोव्याहताभवेदि"ति । इयांस्तुभेदः "तत्सत्य" मित्यादिश्रुत्याब्रह्मणोवर्तमा(नकालाद्य)नादिकालाद्यनवच्छेदेनसत्तागृहीतेतितत्रसातदनवच्छिन्ना प्रत्यक्षेणतुघटादेस्तदवच्छिन्नासागृहीतेतितत्रसातदवच्छिन्नेति ।

मानेति ॥ "तत्सत्य" मित्यादिश्रुतौवर्तमानकालोपस्थापकपदाभावादितिभावः । तत्र ब्रह्मणि । सा सत्ता तदनवच्छिन्ना वर्तमानकालानवच्छिन्ना ॥ प्रत्यक्षेणेति ॥ प्रत्यक्षज्ञानेवर्तमानकालस्यावश्यंविषयताप्रतीयते । इदमिदानीमितिहिप्रत्यक्षानुभवः । अतएव "कालःषडिंद्रियवेद्य" इतिप्रवादइत्यर्थः । तत्र घटादौ सा सत्ता तदवच्छिन्ना वर्तमानकालावच्छिन्ना । प्रामा

28

SGDF
Sri Gargeshwari Digital Foundation

ण्यप्रयुक्ताऽबाध्यत्वंवेदाक्षोभयसाधारणमित्याह ॥ यद्देशेति ॥ उभयेति ॥ वेदप्रत्यक्षोभयेत्यर्थः ॥ नित्यत्वादीति ॥ स
र्वकालावच्छिन्नसत्तासंबंधरूपनित्यत्वाद्यसिद्धावपीत्यर्थः ॥ त्रैकालिकेति ॥ तद्व्याप्यावगाहित्वइतिकेचित् । उक्तरीत्याकाल
स्यअधिकरणकोटावेवप्रवेशेननिषेध्यकोटावप्रवेशात्सत्ताग्राहित्वेनकालत्रयेयस्सत्यताप्रतिषेधस्तदप्रतियोगित्वरूपाबाध्यत्वग्राहि
त्वंसाक्षादस्त्येवेतिगुरुचरणाः । ननुयद्देशकालप्रकारावच्छेदेनयत्रयस्ययेनसत्तागृहीतातद्देशकालप्रकारावच्छेदेनतत्रतस्यतेनस 281
यद्देशकालप्रकारा(द्य)वच्छेदेनतुयस्ययेनसत्तागृहीतातदवच्छेदेनतस्याबाध्यत्वंप्रामाण्यप्रयु
क्तंउभयसाधारणमितिप्रमाणेनप्रत्यक्षेणनित्यत्वाद्यसिद्धावपिस्वोपाधौत्रैकालिकनिषेधाप्रति
योगित्वरूपमात्यंतिकाबाध्यत्वंसिध्यत्येव । कालांतरादिस्थमपिहिबाधकंकिंयत्कालाद्यव
च्छेदेनानेनस्वार्थोगृहीतस्तदवच्छेदेनैवतान्निषेधति अन्यावच्छेदेनवा।आद्येकथमस्यप्रामाण्यं।
अंत्येत्वनित्यत्वादिकमेवस्यान्नतुमिथ्यात्वं।[1] किंचानागतकालग्राहीसाक्षीस्वविषयस्यगगना
देःसाक्षात्स्वाविषयस्यघटादेरपिनिर्दोषतद्धीप्रामाण्यग्रहणद्वाराभाविबाधाभावंगृह्णात्येव ।
त्वसिद्धावपिनत्रैकालिकनिषेधाप्रतियोगित्वसिद्धिः। "नेहनाने" तिभाविबाधबाधितत्वादित्यतआह ॥ कालांतरेति ॥ अ
न्येति ॥ यत्कालाद्यवच्छेदेनतेनस्वार्थोगृहीतस्तत्कालभिन्नकालावच्छेदेनतन्निषेधतीत्यर्थः ॥ आद्यइति ॥ अनेनबाधकप्रमा
णेनरूप्यज्ञानवत्यस्मिन्कालेयत्रार्थोगृहीतस्तस्मिन्नेवकालेतत्रार्थापहारादित्यर्थः ॥ अंत्यइति ॥ यस्मिन्कालादौयोऽर्थोगृहीतः

1 यदि परो वैयात्याद् ब्रूयात् कुतो भाविबाधाभाव इति तत्राऽऽह ॥ किंचेति ॥

SGDF
Sri Gargeshwari Digital Foundation

282

पूर्वज्ञानेनतस्मिन्नेवकालादौबाधकज्ञानेनसोऽर्थोऽप्रतिषिद्धएव । अन्यदैवतु निषिद्धइतिअनित्यत्वमेवस्यादित्यर्थः । कथमित्यत आह ॥ नहीति ॥ अन्यथेति ॥ वर्तमानमात्रग्राहित्वइत्यर्थः । प्रत्यक्षस्यत्रिकालाबाध्यत्वरूपपारमार्थिकसत्त्वग्राहित्वाभावे नाप्रामाण्येघटादेःप्रातिभासिकवैधर्म्यरूपव्यावहारिकत्वंनसिध्येत् । नचार्थक्रियाकारित्वेनतद्वैधर्म्यसिद्धिरितिवाच्यं । तस्यैव ममतात्विकत्वसाधकत्वात् । तथाचप्रत्यक्षस्यत्रिकालाबाध्यत्वरूपतात्विकसत्ताग्राहित्वंसिद्ध्यतीत्याह ॥ किंचेति ॥ येन विशे

नहिविषयाबाधमनंतर्भाव्यप्रामाण्यग्रहणंनाम । त्यक्तव्यंचपरेणैवप्रत्यक्षस्यवर्तमानमात्रग्रा हित्वं अन्यथारूप्यादेःप्रतिपन्नोपाधौत्रैकालिकनिषेधप्रतियोगित्वरूपंमिथ्यात्वंप्रत्यक्षंनस्यात् । किंच "प्रातिभासिकवैधर्म्यंतवयेनप्रसिध्यति । घटादेःपरमार्थत्वंममतेनैवसेत्स्यति" । अ स्तिहित्वन्मतेपिघटादेर्व्यावहारिकसत्त्वायतज्ज्ञानेरूप्यादिधीतोविशेषः । तथाचतेनैवविशे षेणतात्विकत्वसिद्धिः । किंच "यद्यऽक्षसिद्धंविश्वस्यसत्यत्वंनैवतात्विकं । तर्ह्यक्षसिद्धंरूप्या दिमिथ्यात्वंतात्विकंकथं" । नहिघटस्सन्रूप्यंमिथ्येतिप्रत्यक्षयोर्मात्रयापिविशेषोनुभूयते ।

षेण वैधर्म्यंव्यावहारिकत्वं कारिकार्थमाह ॥ अस्तिहीति ॥ विशेषः अर्थक्रियाकारित्वरूपः । तात्विकं त्रिकालाबाध्यं ॥ तर्हीति ॥ तथाचतदपितात्विकंनस्यादित्यर्थः । कथमिदमापादनमित्यतस्तयोरविशेषादित्याह ॥ नहिघटइति ॥ दोषाभावा दिनिश्चयस्यरूप्यमिथ्यात्वप्रत्यक्षइवविश्वसत्यत्वप्रत्यक्षेप्यविशेषादित्यर्थः । ननुअक्षसिद्धत्वाविशेषाद्रूप्यमिथ्यात्वंतात्विकंनस्या

SGDF Sri Gargeshwari Digital Foundation

दित्यत्रेष्टापत्तिः यतःरूप्यधर्मोमिथ्यात्वमपिमिथ्यैव । धर्मिणएवमिथ्यात्वेधर्मस्यापिमिथ्यात्वात् । नहिवंध्यासुतस्यश्यामत्वा भावेगौरत्वंसेत्स्यतीत्यतआह ॥ रूप्येति ॥ कालांतरबाध्यत्वे मिथ्यात्वइत्यर्थः ॥ तात्विकंस्यादिति ॥ मिथ्याभूतमिथ्यात्व कत्वाद्रूप्यंसत्यंस्यादित्यर्थः । तथाचपरस्परात्यंताभावरूपयोरेवान्यतरनिषेधेऽन्यतरस्यसत्यत्वं गौरश्यामरूपयोस्तुनपरस्परवि रहरूपत्वं अतोनैकाभावेऽपरस्यसत्यत्वमितिभावः । किंचप्रत्यक्षस्यातत्वावेदकत्वंतावदंगीकृतं । तत्रातत्त्वंनामान्यस्यान्यातम 283

रूप्यमिथ्यात्वस्यकालांतरबाध्यत्वेचरूप्यंतात्विकंस्यात् । किंच " पारमार्थिकस
त्यत्वंनचेत्प्रत्यक्षगोचरः । तन्निषेधश्रुतीनांस्यादप्रसक्तनिषेधता " । किंच " अ
तत्वंतात्विकत्वेनप्रपंचंनावभासयेत् । अक्षंयदितदातस्याऽतत्वावेदकताकथं " ।
नहिव्यावहारिकंतथैवगृह्णत्अतत्वावेदकंभवति किंतुपारमार्थिकत्वेन ।

त्वं तथाचवस्तुतोव्यावहारिकस्यप्रपंचस्यत्रिकालाबाध्यत्वरूपपारमार्थिकत्वरूपंयदन्यात्मत्वाख्यमतत्वं तदावेदकत्वेखलुप्रत्यक्ष स्यातत्वावेदकत्वंसिद्ध्यति । एवंचत्रिकालाबाध्यत्वरूपपारमार्थिकसत्त्वावगाहितायाआवश्यकत्वेननवर्तमानमात्रग्राहित्वनियम इत्याह ॥ किंचेति ॥ अतत्वं तत्वंपारमार्थिकंतद्भिन्नमतत्वंव्यावहारिकं । इदमेवव्यावहारिकत्वंजगतस्तत्त्वंवास्तवंरूपंतन्मत इत्यर्थः । तथैव व्यावहारिकतयैव । यद्यथास्तितत्तथैवगृह्णतस्तत्वावेदकत्वमेवस्यात् । त्वदभिमतमतत्वावेदकत्वंनसिद्ध्येदित्य

SGDF
Sri Gargeshwari Digital Foundation

न्यायामृ० र्थः । त्रिकालाबाध्यत्वरूपपारमार्थिकसत्त्वग्राहित्वमनुभवसिद्धंचेत्याह ॥ अनुभूयतेचेति ॥ प्रत्यक्षबाधमुपसंहरति ॥ तस्मा श्रीनिवा०
दिति ॥ ७ ॥ प्रत्यक्षस्यपारमार्थिकसत्त्वग्राहित्वविवरणं ॥ १८ ॥ प्रत्यक्षबाधमभिधायानुमानबाधमाह ॥ अनुमाने
॥ १४३ ॥ ति ॥ ब्रह्मप्रमान्येनेत्यादि ॥ ब्रह्मान्यदित्येवोक्तेऽसतोपिपक्षकोटिनिवेशप्राप्त्यातत्रसत्त्वसाधनेबाधस्यात्तद्वारणायअसत्त्वा विश्व. अनु.
नधिकरणत्वेसतीत्युक्तं । तर्हिप्रातिभासिकस्यापिपक्षकोटिनिवेशापत्त्याबाधवारणायाबाध्यत्वेसतीत्युक्तं । मायिमतेप्रपंचस्या १ । १९

अनुभूयतेचजगतिलौकिकानांपारमार्थिकत्वधीः । तस्मात्प्रत्यक्षस्यप्रतिपन्नोपा
धौत्रैकालिकनिषेधप्रतियोगित्वरूपमिथ्यात्वाभावग्राहित्वात्तद्बाधितादृश्यत्वा २८४
दयः ॥ ७ ॥ इतिप्रत्यक्षस्यपारमार्थिकसत्वग्राहित्वं ॥ १८ ॥ अनुमानबाधिता
श्चदृश्यत्वादयः तथाहि ब्रह्मप्रमान्येनवा वेदांततात्पर्यप्रमाजन्यज्ञानान्येनवा

बाध्यत्वाभावेनाश्रयासिद्धिवारणायब्रह्मप्रमान्येनेत्युक्तं प्रपंचस्यमायिमतेब्रह्मप्रमान्येनाबाध्यत्वान्नपक्षालाभः । प्रातिभासिक
स्यतुब्रह्मप्रमान्येनबाध्यत्वात्तद्व्यावृत्तिः । तत्त्ववादिमतेपक्षलाभायनञ्द्वयगर्भता । ब्रह्मवृत्तिव्याप्यमितिमतेनेदंविशेषणं । ब्रह्म
वृत्तिव्याप्यंनेतिमतेब्रह्मप्रमेत्येववक्तुमशक्यमतआह ॥ वेदांतेति ॥ प्रपंचस्यवेदांततात्पर्यप्रमाजन्यंयज्ज्ञानंचरमवृत्तिरूपंतद ॥ १४३ ॥
न्येनाबाध्यत्वान्नमायिमतेपक्षालाभः । प्रातिभासिकस्यतुवेदांततात्पर्यप्रमाजन्यज्ञानान्यज्ञानबाध्यत्वात्तद्व्यावृत्तिः । तत्त्ववादि

मतेपक्षलाभायनञ्द्वयगर्भत्वं । शाब्दप्रमांप्रतितात्पर्यप्रमाहेतुरितिमतेनेदं । शाब्दप्रमांप्रतितात्पर्यप्रमानहेतुः अन्योन्याश्रयात्
मानांतरागम्यस्यवाक्यार्थस्यवाक्या(त्प्रतीतौस)दुपस्थितौसत्यांतत्रवाक्यस्यतात्पर्यावधारणं तात्पर्यावधारणेचतेनवाक्यार्थप्रती
तिः तात्पर्यज्ञानस्यवाक्यार्थज्ञानेकारणत्वस्यपरेणोच्यमानत्वादित्येवमन्योन्याश्रयान्नशब्दार्थसंसर्गरूपवाक्यार्थप्रमांप्रतितात्प
र्यप्रमाहेतुरितिमतेनाह ॥ मोक्षहेत्विति ॥ प्रपंचस्यमोक्षहेतुभूतंयज्ज्ञानंचरमवृत्तिरूपंतदन्येनाबाध्यत्वान्नमायिमतेपक्षालाभः । २८५
तत्वादिमतेपक्षलाभायनञ्द्वयगर्भता । गौरवान्नैवंपक्षनिर्देशइत्याशयेनाह ॥ विमतंवेति ॥ सद्वापरमार्थसद्वेतिसाध्यद्वयं ।

मोक्षहेतुज्ञानान्येनवा [1]अबाध्यत्वेसतिअसत्वानधिकरणत्वेसतिब्रह्मान्यद्विमतंवा ।
सद्वा पारमा(र्थस)र्थिकसद्वा प्रातिभासिकत्वानधिकरणत्वेसत्यसत्त्वानधिकरणत्वात्[1]

तत्रप्रपंचेव्यावहारिकसत्त्वंनामसत्त्वेनप्रतीतिमात्रं वस्तुतोऽर्थगतंसत्त्वंनास्ति । अतएवप्रतिपन्नोपाधौस्वरूपेणैवत्रैकालिकनिषे
धप्रतियोगित्वमंगीकुर्वंति । तन्मतानुसारेणसदित्येवसाध्यनिर्देशः । अर्थगतंमायिकंसत्त्वमस्ति । अतएवप्रतिपन्नोपाधौस्वरूपे
णैवसत्ताप्रतिषेधस्यकर्तुमशक्यत्वात्पारमार्थिकत्वाकारेणैवनिषेधमंगीकुर्वंति । तन्मतेसदित्येवसाध्यनिर्देशेसिद्धसाधनतास्यादतः
परमार्थसद्वेत्युक्तं । तेनपारमार्थिकसत्त्वनिषेधांगीकारात्परमार्थसद्वेतिसाधितमितिभावः ॥ प्रातिभासिकत्वेति ॥ अनधिक
रणत्वादित्येवोक्तेसत्त्वादिधर्मानधिकरणेऽसतिव्यभिचारःस्यादतःअसत्त्वानधिकरणत्वादित्युक्तं । तावत्युक्तेप्रातिभासिकेव्यभि

1 ब्रह्मण्यारोपित क्षणिकत्वादिव्युदासाय उभयसिद्धब्रह्माद्यज्ञानकल्पितत्वे सतीत्यपि हेतौ देयम् ॥ 2 परमते ज्ञाननिवृत्तिरूपमोक्ष हेतोर्ज्ञानान्तरस्याभावेनाव्यावर्तकतया ज्ञानपदं व्यर्थमित्यरुचेराह ॥ ~~अबाध्यत्वे इति~~ स्वबाधकाभिमतेत्यादि ॥ (उत्तरपक्षे वर्तते)

SGDF Foundation

चारःस्यादतःसत्यंतविशेषणं । असतिव्यभिचारवारणायविशेष्यभागः ॥ अनिषेध्यत्वेनेति ॥ पुरोवृत्तिनंरंगंरजततयाजाना मीत्याद्यनुव्यवसायरूपप्रमांप्रतिव्यवसायद्वाराविषयेप्रातिभासिकेरजतेव्यभिचारवारणायसाक्षादित्युक्तं । नेदंरजतमितिबाध कज्ञानरूपप्रमांप्रतिनिषेध्यतयासाक्षाद्विषयेरजतेव्यभिचारपरिहारायअनिषेध्यत्वेनेतिविषयविशेषणं । इदंरजतमितिभ्रमंप्रति अनिषेध्यत्वेनसाक्षाद्विषयेरजतेव्यभिचारवारणायप्रमांप्रतीत्युक्तं ॥ अनिषेध्यत्वेनेति ॥ पदानांकृत्यंपूर्ववत् । इदंरजतमि त्यस्मदादिभ्रमरूपंज्ञानंप्रतिअनिषेध्यत्वेनसाक्षादपरोक्षत्वंरजतेप्यस्तीतिव्यभिचारवारणायपूर्वंप्रमांप्रतीत्युक्तं । अत्रतत्स्थानेई

अनिषेध्यत्वेनप्रमांप्रतिसाक्षाद्विषयत्वात् अनिषेध्यत्वेनेश्वरं
प्रतिसाक्षादपरोक्षत्वात् सप्रकारकाबाध्यार्थक्रियाकारित्वात्
आरोपितमिथ्यात्वकत्वात् कल्पकरहितत्वाच्च आत्मवत् ।

श्वरंप्रतीत्युक्तं । रजतंचेश्वरंप्रतिनिषेध्यत्वेनैवसाक्षादपरोक्षमित्यदोषः । इदंच "अपरोक्षदृशोमिथ्यादर्शनंनक्वचिद्भवेत् । स र्वापरोक्षविद्विष्णुर्विश्वदृक्तन्नतन्मृषे" तिप्रमाणोक्तमनुमानं । असत्यार्थक्रियाकारित्वस्यैंद्रजालिकेपिसत्त्वाद्व्यभिचारवारणायाबा ध्येत्युक्तं । ऐंद्रजालिकार्थक्रियातुबाध्येति । नन्वेवंस्वरूपासिद्धिः । प्रपंचगतार्थक्रियायानिष्प्रकारकब्रह्मज्ञानबाध्यत्वांगीकारा दित्यतउक्तं ॥ सप्रकारकाबाध्येति ॥ तथाचनासिद्धिः । प्रपंचगतार्थक्रियायानिष्प्रकारकज्ञानबाध्यत्वेनसप्रकारकाबाध्य

286

SGDF Sri Gargeshwari Digital Foundation

त्वादितिभावः । रूप्यादौव्यभिचारवारणायआरोपितेत्युक्तं । प्रातिभासिकस्येत्यादेरुक्तरीत्यार्थःस्पष्टः । वैकल्पिकं वाशब्दोपेतं ॥ एतद्विशेषणेति ॥ ब्रह्मप्रमान्येनेत्यादिविशेषणेत्यर्थः । स्वबाधकाभिमतबाध्यदोषजन्यज्ञानविषयत्वेनस्वबाधकाभि
मत मतबाध्यबाधविषयत्वेनपरमतेपर्यवसानेनपक्षलाभः । अस्मन्मतेपक्षलाभायनञ्द्वयगर्भत्वं । स्वबाधकस्यैवाभावेनतदबाध्यदोषजन्यज्ञानविषयत्वंतदभिमताबाध्यबाधविषयत्वंचनास्ति अतोनास्माकंपक्षालाभइतिज्ञेयं । प्रातिभासिकंचैतेनपक्षाद्व्यावर्तितं 281

प्रातिभासिकस्य(रूप्यादेः)बाधकंहिज्ञानंब्रह्मप्रमान्यत् वेदांततात्पर्यप्रमाजन्यज्ञानान्यत्मोक्षहेतुज्ञानान्यच्चेतितस्यापक्षत्वायपक्षेसतीत्यंतंवैकल्पिकमाद्यंविशेषणत्रयं। तत्रापिन्नब्रह्मवृत्तिव्याप्यमितिमतेनाऽऽद्यंविशेषणं ब्रह्मवृत्तिव्याप्यमपिनेतिमतेनतुद्वितीयतृतीये । तत्रापिशाब्दप्रमांप्रतितात्पर्यप्रमाहेतुरितिमतेनद्वितीयं । अन्योन्याश्रयान्नहेतुरितिमतेनतृतीयं । यद्वा एतद्विशेषणस्थाने स्वबाधकाभिमताऽबाध्यदोषजन्यज्ञानाऽविषयत्वेसतीतिवा[1]स्वबाधकाभिमताबाध्यबाधाविषयत्वेसतीतिवासमानाधिकरणकर्मप्रागभावसमानकालीनज्ञानाबाध्यत्वेसतीतिवाविशेषणंदेयं ।

प्रातिभासिकरजतविषयकज्ञानहेतुकाचादिदोषस्यरजतबाधकत्वेनाभिमतंयन्नेदंरजतमितिज्ञानंतदबाध्यत्वेनस्वबाधकाभिमताबाध्यदोषजन्यज्ञानविषयत्वस्यैवसत्त्वात् । तथाप्रातिभासिकविषयकोयोबाधस्तस्यप्रातिभासिकबाधकत्वेनाभिमतेनस्वेनैवबाध्य
न्या. श्री. २५ त्वादितिध्येयं ॥ समानाधिकरणेति ॥ ज्ञानेनसमानाधिकरणेत्यर्थः । ज्ञानेनाबाध्यत्वेसतीत्येवोक्तेमायिमतेपक्षालाभः अतः

1 स्वबाधकेत्यादिपूर्वविशेषणे असतः तद्विशेषणेनैव वारणसंभवेऽसमानाधिकरणत्वं व्यर्थं । अविद्याकृतमनंगीकृतमते रूप्यस्याऽपि प... ह्यापत्तिश्चेत्यरूप्यस्याऽऽह ॥ स्वबाधकेति ॥
वस्तुतस्तु आद्यसहजविशेषणस्य ... मिथ्यात्ववादि - एतदुभयसिद्धमिथ्यात्वकल्पितत्वमर्थः ॥

SGDF
Sri Gargeshwari Digital Foundation

न्यायामृ० कर्मप्रागभावसमानकालीनेत्युक्तं । जगद्बाधकंचज्ञानंनकर्मप्रागभावसमानकालीनं साक्षात्कारानंतरं “क्षीयंतेचास्यकर्माणित श्रीनिवा०
॥ १४५ ॥ स्मिन्दृष्टेपरावर” इतिवचनात् कर्मणामनुदयेनतदाकर्मप्रागभावाभावात् अतःकर्मप्रागभावसमानकालीनंयदयंघटइ(त्यादिज्ञा)
तिज्ञानंतदबाध्यत्वमस्तीतिनपक्षालाभः । नन्वथापिपक्षालाभः यज्ञदत्तस्यजगद्बाधकज्ञानोत्पत्तिकालेदेवदत्तकर्मप्रागभावसत्त्वे विश्व. अनु.
नप्रपंचस्यदेवदत्तकर्मप्रागभावसमानकालीनयज्ञदत्तज्ञानेनबाध्यत्वात् । अतःसमानाधिकरणेतिकर्मप्रागभावविशेषणं । तथाच १ । १९
बाधकज्ञानाधिकरणकोयःकर्मप्रागभावोयज्ञदत्तीयएव तत्समानकालीनंयज्ज्ञानंअयंघटइतिज्ञानं तेनाबाध्यत्वमस्तीत्यर्थः । प्रा

प्रातिभासिकविषयकज्ञानहेतुर्दोषःतद्बाधश्चनप्रातिभासिकबाधकबाध्यौ । तथाचरम
साक्षात्कारानंतरंसमानाधिकरणकर्मांतरानुदय(वत्शु)इवशुक्तिसाक्षात्कारानंतरंतद 288
नुदयाभावात् प्रातिभासिकंसमानाधिकरणकर्मप्रागभावसमानकालीनज्ञानबाध्यमि
तितद्व्यवच्छेदः । व्यावहारिकसत्वंसत्वेनव्यवहारमात्रमितिमतानुसारेणाद्यंसाध्यं ।

तिभासिकंचानेनपक्षाद्व्यावर्तितं । शुक्तिसाक्षात्कारानंतरमपिकर्मणामुदयेनप्रातिभासिकरजतबाधकस्यशुक्तिज्ञानस्यज्ञानसमाना
धिकरणकर्मप्रागभावसमानकालीनत्वेनतादृशज्ञानेनाबाध्यत्वस्यप्रातिभासिकेऽभावादितिद्रष्टव्यं । स्वबाधकेत्यादिप्रकारत्रयेण
पक्षनिर्देशेनप्रातिभासिकव्यावृत्तिर्जातेत्याह ॥ प्रातिभासिकेत्यादिना ॥ प्रातिभासिकेति ॥ प्रातिभासिकस्ययद्बाधकंते ॥ १४५ ॥
नबाध्यौनभवतइत्यर्थः । सद्वेतिसाध्यनिर्देशकृत्यमाह ॥ व्यावहारिकेति ॥ द्वितीयसाध्येविशेषणवैयर्थ्यंपरिहरति ॥

अर्थगतमिति॥मायिकं व्यावहारिकं । ननुवादिनस्तवमतेपरमार्थसद्वेतिद्वितीयसाध्येपरमार्थेतिविशेषणंव्यर्थं । नचापरमार्थस
द्व्या(वर्तकत्वेनसार्थकमितिवाच्यं)वृत्त्यर्थंतदितिवाच्यं । भवन्मतेऽपरमार्थसतोऽभावेनव्यावर्त्याप्रसिद्धेः अतःसदित्युक्ते(पारमा
र्थिकसत्व)परमार्थसत्त्वस्यैवप्राप्तेस्तद्विशेषणंअनुमानप्रयोक्तुर्वादिनस्तवमतेव्यर्थमित्याशंक्यनिराकरोति ॥ नचेति ॥ सत्त्वेने
ति ॥ सत्त्वेनधीमात्रमेव नतुवास्तवंसत्त्वमित्येवंरूपमपारमार्थिकसत्त्वंरूप्यादौमयाप्यंगीकृतमितितद्वारणायतत्सार्थकमितिभा 289
वः । तर्हिमायिमतेप्रवेशःस्यादित्यस्वरसादेवाह ॥ अनिर्वाच्येति ॥ नेदंविशेषणंव्यर्थं । प्रातिभासिकव्यावहारिकसत्त्वव्या

अर्थगतंमायिकंसत्वमितिमतानुसारेणद्वितीयं । नचवादिनःपारमार्थिकत्वविशेषणंव्यर्थंव्यावर्त्या
प्रसिद्धेरितियुक्तं । सत्वेनधीमात्ररूपस्यापारमार्थिकसत्वस्यमन्मतेपिसत्वात् । अनिर्वाच्यलक्षणेस
दसत्वानधिकरणत्वेसतीतिविशेषणव्यावर्त्यस्यसदसत्वस्येवपरप्रसिद्धत्वमात्रेणव्यावर्त्यत्वोपपत्तेश्च ।

वृत्त्यर्थत्वात् । नचभवन्मतेव्यावर्त्याप्रसिद्धिरितिवाच्यं । परमतेतत्सद्भावेनपरप्रसिद्धिमात्रेणव्यावर्त्यत्वोपपत्तेः । परप्रसिद्धि
मात्रेणस्वलक्षणस्थविशेषणकृत्यकथनमदृष्टमितिचेन्न । यथाहिसत्त्वानधिकरणत्वेसत्यसत्त्वानधिकरणत्वेसतिसदसत्त्वानधिकर
णत्वमनिर्वचनीयत्वमित्यनिर्वाच्यत्वलक्षणेआद्यविशेषणद्वयव्यावर्त्यप्रसिद्धावपिसदसतोमायिमतेऽभावात्तृतीयंविशेषणंव्यर्थमि
त्याशंकायांस्याद्वादिमतेजगतःसप्तभंगित्वेनसदसत्त्वस्यतन्मतेप्रसिद्धत्वेनव्यावर्त्यत्वंपरैरुक्तंतद्वदित्यर्थः । परप्रसिद्धिमात्रेणेत्य

SGDF
Foundation

२९०

स्यस्याद्वादिप्रसिद्धिमात्रेणेतिसांप्रदायिकोर्थः । कस्यचित्पुंसःसदसत्त्वारोपःकुत्रचिज्ज्ञातःतादृशभ्रमरूपप्रसिद्धिमात्रेणेत्यर्थइत्ये
तदसांप्रदायिकंव्याख्यानमित्युपेक्ष्यं । किंचमयात्वांप्रत्यनुमानंप्रयुज्यते तत्रविमतंसदित्येवप्रयोगेतवसिद्धसाधनतास्यादतःपर
मार्थेतिविशेषणं । नचेदंमत्प्रयोजनमेवनभवत्प्रयोजनमितिवाच्यं । अनुमानप्रयोक्त्रामयायथातवसिद्धसाधनादिकंनस्यात्तथाय
त्नःकार्यः । अतस्तवप्राप्तसिद्धसाधनोद्धारोपिमत्प्रयोजनमेवेत्याह ॥ **परार्थेति** ॥ **जन्येति** ॥ यथानिरीश्वरवादिनंमीमांसकं
प्रतिजन्यपदस्यव्यर्थत्वेपिजन्यकृत्यजन्यत्वावच्छिन्नेसकर्तृकत्वसिद्धेरुद्देश्यत्वेनउपरंजकव्यावर्तकंविशेषणंतदित्यंगीकृतं । यथा
परार्थानुमानेपरंप्रतिसिद्धसाधनोद्धारस्यापिमत्प्रयोजनत्वाच्च । जन्यकृत्यजन्यानी
त्यत्रमीमांसकंप्रतिजन्यत्वस्येवेहाऽपिमांप्रतिपरमार्थत्वस्यप्रमेयत्वादिवदुपरंजकत्वे
नविशेषणत्वोपपत्तेश्च । अन्यथाप्रपंचःपरमार्थसद्भिविक्तइतित्वदीयप्रयोगेपिपर
मार्थत्वविशेषणंमांप्रतिव्यर्थंस्यात् । नचाऽऽद्यहेतौवादिनंप्रतिप्रातिभासिकत्वा
वापर्वतःप्रमेयवह्निमानित्यत्रप्रमेयत्वंवह्नेर्नव्यावर्तकंविशेषणं । किंतुप्रमेयवह्निसिद्धेरुद्देश्यत्वेनोपरंजकमेवतदितिअवैयर्थ्यमित्यु
च्यते । तथापरमार्थसत्त्वरूपसाध्यसिद्धेरुद्देश्यत्वेनउपरंजकविशेषणत्वेनावैयर्थ्यादित्यर्थः । यथोक्तंपरेण "विशेषणमपिद्वि
विधं व्यावर्तकमुपरंजकंचेति । तत्राव्यावर्तकंविशेषणमुपरंजकमित्युच्यत" इति ॥ **मांप्रतीति** ॥ त्वन्मतेव्यावर्त्याप्रसिद्धेरि
तिभावः ॥ **आद्येति** ॥ प्रातिभासिकत्वानधिकरणत्वेसत्यसत्त्वानधिकरणत्वादित्याद्यहेतावित्यर्थः ॥ **वादिनंप्रतीति** ॥ अ

SGDF
Sri Gargeshwari Digital Foundation

नुमानप्रयोक्तारंत्वांप्रतीत्यर्थः ॥ अप्रसिद्धिरिति ॥ “सद्भ्यामधिकरणप्रतियोगिभ्यामभावोनिरूप्यत” इतिवचनादितिभावः॥ अप्रामाणिकस्यापीति ॥ तथाचप्रतियोगिसत्त्वंनापेक्षितमित्यर्थः ॥ प्रतिभाससमात्रशरीरेति ॥ मात्रशब्देनार्थोव्यावर्त्यते अर्थाभावेपिप्रतिभासवत्त्वमित्यर्थः । यथाश्रुतेज्ञानात्मकत्वापत्तौविरोधःस्यादितिध्येयं । तस्य प्रातिभासिकत्वस्य । प्रसिद्धेः

प्रसिद्ध्यातदनधिकरणत्वाप्रसिद्धिः। मतद्वयेप्यप्रामाणिकस्यापिनिषेधप्रतियोगित्वात्। आरोपितत्वेनोभयसंमतत्वरूपस्यवाप्रतिभासमात्रशरीरत्वरूपस्यवातस्यप्रसिद्धेश्च । अन्यथा त्वन्मतेपिमिथ्यात्वानुमानेप्रातिभासिकान्यस्यैवपक्षीकर्तव्यत्वाद्दोषसाम्यं। नचाद्यहेतौप्रातिभासिकत्वविशेषणस्याऽसिद्धिवारकत्वंदोषः। “ शरीराजन्यत्वात्। अनभ्यासदशायां सांशयिकत्वात्। विमतंसौरभविशेषवद्धूमरहितं चंदनप्रभववह्निरहितत्वात् । विमतं निर्धूमंआर्द्रेंधनप्रभववह्निरहितत्वा ”दित्यादावसिद्धिवारकविशेषणस्यापिस्वीकारात् ।

मन्मतेपीतिशेषः ॥ अन्यथेति ॥ प्रातिभासिकत्वाप्रसिद्ध्यातदनधिकरणत्वाप्रसिद्धौचोदितायामित्यर्थः । त्वयापिप्रातिभासिकान्यद्विश्वंमिथ्येत्यनुमातव्यं । अन्यथासिद्धसाधनतापत्तेः । “ब्रह्मप्रातीतिकान्यद्विश्वंमिथ्याप्रतीतित” इतित्वदुक्तेश्च । तथाचतत्रप्रतियोग्यप्रसिद्ध्यातदन्यत्वाप्रसिद्धेःपक्षएवाप्रसिद्धइत्यनुमानस्यैवायोगइतिदोषसाम्यमित्यर्थः ॥ असिद्धीति ॥ अ

SGDF
Sri Gargeshwari Digital Foundation

नधिकरणत्वेसतीत्येवोक्तेयत्किंचिदधिकरणेप्रपंचेऽनधिकरणत्वमसिद्धमित्यर्थः । विमतं पर्वतादिरूपं । सौरभेत्याद्यनुमानंधूम वह्न्योःसद्भावदशायामेव । अन्यथाचंदनप्रभवादिविशेषणस्यासिद्धिवारकत्वायोगादितिद्रष्टव्यं । विमतं तप्तायोगोलकं ॥ दृष्टांतेपीति ॥ आत्मनीत्यर्थः । आत्मनोपियत्किंचिदधिकरणत्वादितिभावः । तथाचानधिकरणत्वस्यकुत्राप्यप्रसिद्धत्वेनत दवच्छेदेनव्याप्तेर्गृहीतुमशक्यत्वेनाप्रसिद्धिवारकतयाव्याप्तिग्रहोपयुक्तस्वंप्रातिभासिकत्वविशेषणस्येत्यर्थः ॥ रूपादीनामिति ॥ "चक्षुःतैजसंरूपादिषुपंचसुमध्येरूपस्यैवाभिव्यंजकत्वादि" त्यत्रालोकादौरूपत्वादिव्यंजकत्वस्यापिसद्भावेनरूपस्यैवाभिव्यंजक

किंचानधिकरणत्वस्यदृष्टांतेप्यभावेनप्रातिभासिकत्वस्यचक्षुस्तैजसत्वानुमानेरूपादीनांम
ध्यइत्यस्येवव्याप्तिग्रहौपयिकत्वात्।व्यभिचारवारकेपितदौपयिकत्वस्यैवतंत्रत्वान्नदोषः ।
यत्किंचिदनधिकरणत्वस्यप्रातीतिकेपिसत्वाद्व्यभिचारवारकमेवेदंविशेषणमितिकेचित् ।

त्वस्यकुत्राप्यप्रसिद्धत्वेनतदवच्छेदेनव्याप्तिग्रहासंभवात्तद्वारणायरूपादिषुपंचसुमध्यइत्युक्तं । एवंचयथातस्याप्रसिद्धिवारकत्वे नव्याप्तिग्रहोपयुक्तत्वंतद्वदित्यर्थः । ननुहेतौव्यभिचारवारकमेवविशेषणंदेयं नतुव्याप्तिग्रहोपयुक्तमितिनियमोस्तीतिचेत्तत्राह ॥ व्यभिचारेति ॥ तदौपयिकत्वस्य व्याप्तिग्रहोपयुक्तत्वस्य । हेतोर्व्यभिचारेतत्सत्त्वावच्छेदेनसाध्यनिरूपिताव्याप्तिर्गृहीतु मशक्येतितद्वारकेपिविशेषणेव्याप्तिग्रहोपयुक्तत्वमेवतंत्रमित्यर्थः ॥ यत्किंचिदिति ॥ वस्तुत्वादीत्यर्थः । केचिदित्यस्वरसो

SGDF
Sri Gargeshwari Digital Foundation

द्भावनं । तद्बीजंतुअनधिकरणत्वहेतोः अधिकरणत्वसामान्याभावपरत्वांगीकारात् निषेधप्रतियोगित्वरूपधर्मविशेषाधिकरणेप्रा
तीतिकेसामान्याभावायोगेनव्यभिचारस्यैवाभावादिति ॥ व्यावहारिकेति ॥ पारमार्थिकसत्त्वाभावेप्युपपन्नत्वादितिभावः ।
नात्राऽप्रयोजकताशंक्या । प्रातिभासिकत्वानधिकरणत्वेसतिअसत्वानधिकरणत्वरूपहेतोरसत्प्रातिभासिकव्यावृत्तिरूपत्वात्
तादृशहेतुंप्रतिप्रयोजकत्वेनपारमार्थिकसत्त्वस्यैवदृष्टांतेब्रह्मणिक्लृप्ततयाजगत्यपिपारमार्थिकसत्त्वाभावेहेतूच्छित्तेरेवबाधकत्वात् ।
ननुदृष्टांतेब्रह्मणितथाक्लृप्तत्वेपिप्रकृतेव्यावहारिकसत्त्वेनैवोक्तहेतोरुपपत्तिःकिंनस्यादितिचेत्तत्राह ॥ ब्रह्मणीति ॥ व्यावर्तक

नचव्यावहारिकसत्वेनाप्याद्यहेतोरुपपत्त्याऽप्रयोजकता। ब्रह्मण्यसत्प्रातिभा
सिकव्यावृत्तिरूपहेतुंप्रतिव्यावर्तकतयाप्रयोजकत्वेनक्लृप्तपरमार्थसत्वत्यागस्य
विश्वमिथ्यात्वासिद्धिंविनाऽयोगेनान्योन्याश्रयात् । अन्यथातिप्रसंगात् ।

तया असत्प्रातिभासिकयोरतिप्रसंगभंजकतयेत्यर्थः ॥ त्यागस्येति ॥ व्यावहारिकसत्त्वमंगीकृत्येतिशेषः ॥ अन्योन्याश्रया
दिति ॥ विश्वमिथ्यात्वेसिद्धेव्यावहारिकसत्त्वसिद्ध्यातेनैवहेतोरुपपत्त्या(अनुमानस्याप्रयो)हेतोरप्रयोजकत्वसिद्धिः । तत्सिद्धौ
चानुमानस्यदुष्टत्वेनतद्बाधाभावाद्विश्वमिथ्यात्वसिद्धिरित्यन्योन्याश्रयादित्यर्थः ॥ अन्यथेति ॥ क्लृप्तपरित्यागेनाक्लृप्तकल्पने
वह्निंप्रतिधूममप्रयोजकीकृत्यपर्वतत्वमेवप्रयोजक(मित्यंगी)मंगीकृत्यमहानसस्यापिवह्निमत्त्वंनस्यादित्यतिप्रसंगइत्यर्थः । ननुदृ

SGDF
Sri Gargeshwari Digital Foundation

ष्टांतेंब्रह्मण्यपिअसदादिव्यावृत्तेर्नसत्त्वंतंत्रत्वेनक्लृप्तं । किंतुज्ञानत्वाद्यपरपर्यायंयद्ब्रह्मत्वंतदेवेत्याशंक्यनिराकरोति ॥ नचेति ॥ अन्यथेति ॥ तद्व्यावृत्तिंप्रतितद्विरुद्धधर्मवत्त्वस्यप्रयोजकत्वमनंगीकृत्यासद्व्यावृत्तिंप्रतितदविरुद्धंज्ञानत्वादिकमेवप्रयोजकं नतद्विरुद्धंसत्त्वमित्यंगीकारइत्यर्थः ॥ सत्यज्ञानादीत्यादि ॥ सत्यज्ञानादिवाक्येपिज्ञानपदेनज्ञानत्वप्रतिपादनद्वारानृतव्यावृत्तेरपिसिद्धिप्रसंगेनसत्यपदंव्यर्थंस्यादित्यर्थः ॥ प्रपंचइति ॥ यद्यसद्व्यावृत्तौज्ञानत्वादिरूपंब्रह्मत्वमेवप्रयोजकमित्युच्यते तर्ह्यस

नचब्रह्मणिज्ञानत्वानंदत्वादिरूपब्रह्मत्वमेवतत्प्रयोजकं । अपृथिवीव्यावृत्तिंप्रतिपृथिवीत्वस्येवासद्व्यावृत्तिंप्रतितद्विरुद्धसत्वस्यैवप्रयोजकत्वेनक्लृप्तत्वात् अन्यथासत्यज्ञानादिवाक्येज्ञानपदेनैवानृतव्यावृत्तिसिद्धौसत्यपदवैयर्थ्यंस्यात् । प्रपंचेऽसत्प्रातीतिकव्यावृत्तौसत्यामपिब्रह्मत्वाभावाच्च । नचद्वितीयेतत्वावेदकप्रमोक्तावसिद्धिः अतत्वावेदकप्रमोक्तौत्वप्रयोजकतेतिवाच्यं । प्रामाण्यातत्वावेदकत्वयोर्व्याहतत्वात् ।

द्व्यावृत्तिमतिप्रपंचेब्रह्मत्वाभावेनप्रयोज्यापेक्षयान्यूनवृत्तित्वान्नतत्प्रयोजकमित्यर्थः ॥ द्वितीयइति ॥ अनिषेध्यत्वेनप्रमांप्रतिसाक्षाद्विषयत्वादितिद्वितीयहेतावित्यर्थः । अत्रतत्वावेदकप्रमाविषयत्वंहेतुरतत्वावेदकप्रमाविषयत्वंवा । नाद्यः । ममासिद्धेरित्याह ॥ तत्वेति ॥ नद्वितीयइत्याह ॥ अतत्वेति ॥ अप्रयोजकतेति ॥ अतत्वावेदकप्रमाविषयत्वस्यसत्त्वाभावेप्युपपत्तेरित्यर्थः ॥ व्याहतत्वादिति ॥ अर्थसत्त्वगर्भप्रामाण्यस्यार्थासत्त्वगर्भातत्वावेदकत्वेनात्यंतविरोधात्प्रामाण्यातत्वावेदकत्वयोः

SGDF
Sri Gargeshwari Digital Foundation

सामानाधिकरण्यस्यव्याहतत्वेनविकल्पएवायुक्तइतिभावः ॥ प्रत्यक्षस्येति ॥ तथाचतत्वावेदकप्रमोक्तावपिनासिद्धिरितिभावः
॥ अनुमानादेश्चेति ॥ तत्वावेदकंयत्प्रमाणंविमतंसत्यंप्रमाणदृष्टत्वादित्यनुमानरूपंतद्विषयत्वस्यप्रपंचेसद्भावेनापिनासिद्धिः ।
नचानुमानमतत्वावेदकमितिवाच्यं । त्वयापिदृश्यत्वादेस्तत्त्वभूतमिथ्यात्वादौप्रमाणीकरणेनतस्यतत्त्वावेदकत्वांगीकारात्तज्जा
तीयास्मदनुमानविषयत्वेनापितत्वावेदकप्रमा(ण)विषयत्वंपक्षेनासिद्धमित्यर्थः । प्रमाणविषयत्व(सद्भा)भावेपिसत्त्वंमास्त्वित्य
प्रयोजकताशंकापरिहारायाह ॥ विपक्षइति ॥ व्याघातमेवोपपादयति ॥ विषयबाधइति ॥ विषयासत्त्वइत्यर्थः । प्रामा

प्रत्यक्षस्यतत्वावेदकतोक्तेश्च । अनुमानादेश्चपरेणापिमिथ्यात्वादौप्रमाणीकरणात् । विपक्षेव्याघा
तात् । विषयबाधेप्रामाण्यायोगात् । नापितृतीयेऽसिद्धिः । त्वयापीशस्यजगत्कर्तृत्वशास्त्रयोनित्वा
दिनाकुलालपाणिन्यादिवदनिषेध्यत्वेनतद्द्रष्टृत्वोक्तेः । अन्यथेशस्यतत्पालनादौप्रवृत्तिर्नस्यात् ।

ण्यं प्रमाविषयत्वं । प्रपंचस्यसत्त्वाभावेविषयसत्त्वघटितप्रमाविषयत्वरूपहेतोरेवायोगादितिहेतूच्छित्तिर्बाधिकेतिभावः ॥ ना
पितृतीयइति ॥ अनिषेध्यत्वेनेश्वरंप्रतिसाक्षादपरोक्षत्वहेतावित्यर्थः ॥ असिद्धिरिति ॥ ईश्वरंप्रत्यपिनिषेध्यत्वेनैवविश्व
स्यापरोक्षत्वादसिद्धिरित्यर्थः ॥ शास्त्रेति ॥ वेदकर्तृत्वेनेत्यर्थः । तद्द्रष्टृत्वोक्तेः स्वकृतजगच्छास्त्रद्रष्टृत्वोक्तेर्नासिद्धिरित्यर्थः ॥
अन्यथेति ॥ निषेध्यत्वे(नैवेश्व)नेश्वरंप्रत्यपरोक्षत्वइत्यर्थः । प्रातिभासिकत्वापत्त्येतिशेषः । तत्पालनादौ प्रातिभासिकजगत्पा

SGDF
Sri Gargeshwari Digital Foundation

लनादौ । अप्रयोजकतांपरिहरति ॥ विपक्षइति ॥ अनिषेध्यत्वेनेश्वरज्ञानविषयस्यापिविश्वस्यसत्यत्वाभावेरूप्यवन्निषेध्यत्व प्राप्त्यानिषेध्यमेवप्रपंचमनिषेध्यत्वेनईश्वरोजानातीतिस्यात् । तथाचेश्वरस्यभ्रांतत्वंस्यादितिबाधकसद्भावान्नाप्रयोजकताशंक्ये त्यर्थः । अस्त्वीश्वरस्यभ्रांतिरित्यतआह ॥ साचेति ॥ "शोकंमोहंजरांमृत्युमत्येती" त्यादिश्रुतिविरुद्धेत्यर्थः ॥ चतुर्थइति ॥ सप्रकारकाबाध्यार्थक्रियाकारित्वादितिहेतावित्यर्थः । सप्रकारकाबाध्येतिपदस्यकृत्यमाह ॥ अर्थक्रियायाइति ॥ सत्यभूतार्थ क्रियाकारित्वंहेतुरुतासत्यभूतार्थक्रियाकारित्वं नाद्यइत्याह ॥ सत्यायाइति ॥ व्याप्तिपक्षधर्मतयोरिति ॥ यथायोग्यंसंबं

विपक्षेचेशस्यभ्रांतिःस्यात् साचश्रुत्यादिविरुद्धा । चतुर्थेऽर्थक्रियायाःसत्यायाः[1]
पक्षेसपक्षेचपरंप्रत्यसिद्ध्याव्याप्तिपक्षधर्मतयोरयोगात् असत्यायाश्चैंद्रजालिकादौ
व्यभिचारात्सप्रकारकाबाध्यत्वेनसाविशेषिता । व्यभिचारस्त्वस्यनिरसिष्यते।

धोनयथाक्रमं । सत्यभूतार्थक्रियायाःपक्षेऽसिद्ध्यापक्षधर्मतायास्सपक्षेब्रह्मण्यसिद्ध्याव्याप्तेश्चायोगादित्यर्थः । नद्वितीयइत्याह ॥ असत्यायाश्चेति ॥ सप्रकारकेति ॥ ऐंद्रजालिकार्थक्रियातुसप्रकारकेणइदानींतनबाधेनबाध्येतिनतत्रव्यभिचारइत्यर्थः । ननुसप्रकारकजाग्रद्बाधाबाध्यचरमधातूत्सर्गरूपार्थक्रियाकारित्वस्यमिथ्याभूतेस्वाप्नप्रियासंगमेसत्त्वेनव्यभिचारइत्यतआह ॥ व्यभिचारस्त्वस्येति ॥ नस्वाप्नप्रियासंगमस्यार्थक्रियाकारित्वं किंतुतज्ज्ञानस्य तच्चसत्यमेवेतिनिरसिष्यतइत्यर्थः । ननुदृष्टां

1 सत्यत्वविशेषितार्थक्रियायाः हेतुविशेषणत्वे इत्यर्थः। यथाऽनुतेऽप्रसिद्धमभावात् ॥

SGDF
Sri Gargeshwari Digital Foundation

तेब्रह्मण्यर्थक्रियाकारित्वाभावात्साधनवैकल्यमित्यतआह ॥ सत्यस्येति ॥ साक्षिचैतन्यस्यब्रह्मरूपत्वादितिभावः ॥ साधकत्वादिति ॥ यथोक्तं "साधकत्वंसतस्तेनसाक्षिणासिद्धिमिच्छता । स्वीकृतंही" ति । "साधकत्वंतुसत्यस्यसाक्षिणोह्यावयोर्द्वयोः । सम्यक्संप्रतिपन्न" मितिच । नन्वविद्यावृत्तिप्रतिबिंबितचैतन्यस्यैवसाक्षित्वात्तस्यैवाज्ञानादिसाधकत्वमंगीकृतं । तस्य चमिथ्याभूतत्वान्नदृष्टांतत्वं । दृष्टांतस्तुशुद्धब्रह्मैव तत्रहेतोरेवाभावात्साधनवैकल्यंस्यादेवेत्यस्वरसादाह ॥ असद्वेति ॥ ननु सत्त्वरूपसाध्ययुक्तात्मनःसपक्षाद्धेतोर्व्यावृत्ततयाऽसाधारण्यदोषःस्यादित्यतआह ॥ असाधारण्यस्येति ॥ यथाभूर्नित्यागं

२९७

सत्यस्यसाक्षिणोऽज्ञानादिसाधकत्वान्नदृष्टांतःसाधनहीनः ।[1] असद्वाव्यतिरेकदृष्टांतः । असाधारण्यस्यागृह्यमाणविशेषत्वावस्थायामेवदोषत्वात् । विपक्षेव्याघातः ।

धवत्त्वादित्यत्रनित्यव्यावृत्तगंधवत्त्वाद्भूः किमनित्याउतानित्यव्यावृत्तगंधवत्त्वाद्भूः किंनित्येतिविरुद्धोभयपरामर्शोत्थापकतयासत्प्रतिपक्षत्वेनसांशयिकत्वेनवानुकूलतर्कादिरूपविशेषादर्शनदशायामेवासाधारण्यस्यदोषत्वंदृष्टं एवंप्रकृतेपिसत्यभूतब्रह्मव्यावृत्तार्थक्रियाकारित्वात्प्रपंचः किंमिथ्याउतमिथ्याभूतरूप्यादिव्यावृत्तार्थक्रियाकारित्वात्प्रपंचःसत्यइत्येवंविरुद्धोभयपरामर्शोत्थापकतयासत्प्रतिपक्षत्वेनसांशयिकत्वेनवादोषत्वंवाच्यं । इदंचानुकूलतर्कादिरूपविशेषादर्शनदशायामेव । अत्रचमिथ्याभूतरूप्यादिव्यावृत्तार्थक्रियाकारित्वात्सत्यःप्रपंचइतिपरामर्शेऽनुकूलतर्काणांवक्ष्यमाणत्वेनविशेषदर्शनसद्भावान्नसत्प्रतिपक्षत्वेनसांशयिक

१ तुष्यतु दुर्जनन्यायेनाह ॥ असद्वेति । वाशब्दोऽनपेक्षायाम् ॥

SGDF
Sri Gargeshwari Digital Foundation

त्वेनवातस्यदोषत्वंसंभवतीत्यर्थः । यथोक्तंगंगेशेन "संशयःसत्प्रतिपक्षोवाऽसाधारण्यस्यदूषकतायांद्वारं सचेहविशेषदर्शनान्ना स्ती" ति । अर्थक्रियाकारित्वेपिसत्यत्वंमास्त्वित्यप्रयोजकतायामाह ॥ विपक्षइति ॥ अर्थक्रियाकारित्वस्यसत्त्वप्रयोज्यत्वेन प्रयोज्यभूतार्थक्रियाकारित्वमंगीकृत्यतत्प्रयोजकीभूतसत्यत्वानंगीकारोविरुद्धइत्यर्थः । दृष्टांतेहेतुसाध्ययोर्व्याप्तेर्निर्णीतत्वान्नाप्र योजकत्वशंकाकार्येत्याह ॥ ब्रह्मणीति ॥ हेतुत्वं सप्रकारकाबाध्यजगद्धेतुत्वाद्यर्थक्रियांप्रति अर्थक्रियाऽकारणंयदसदादित द्व्यावृत्तस्यपरमार्थसत्त्वस्यैवप्रयोजकत्वेनावधारणात्प्रपंचेतदभावेप्रयोज्यस्यार्थक्रियाकारित्वस्याप्यभावरूपविपक्षबाधकतर्केणहे

ब्रह्मणिहेतुत्वंप्रतिअकारणासदादिव्यावृत्तस्यपरमार्थसत्वस्यैवप्रयोजकत्वेनक्लृप्त
त्वात् । नचपंचमेऽसिद्धिः । परमतेपिजगन्मिथ्यात्वस्यारोपितत्वात्[1] । अत्रचहे
त्वंतर्गतंमिथ्यात्वंसत्वाभावोभिप्रेतइतिनासत्यनैकांत्यं । नचषष्ठेऽसिद्धिः ।

तोर्व्याप्यत्वग्रहान्नाप्रयोजकत्वमित्यर्थः ॥ पंचमइति ॥ आरोपितमिथ्यात्वकत्वादितिपंचमहेतावित्यर्थः ॥ परमतइति ॥ मिथ्यात्वस्यसत्यत्वेऽद्वैतहानिप्रसंगात्सोपाधिकस्यनिरुपाधिकेनैक्यासंभवादारोपितत्वमेवतस्यवक्तव्यमित्यर्थः । मिथ्यात्वस्यस त्तानिषेधरूपत्वेनसत्यत्वेप्यभावद्वैतांगीकारादविरोधइत्येतत्तुपूर्वमेवदूषितमितिभावः । नन्वसतोनिर्धर्मकत्वेनतत्रमिथ्यात्वा ख्याभावरूपधर्मस्याप्यारोपितत्वाद्व्यभिचारइत्यतआह ॥ अत्रचेति ॥ तथाचारोपितसत्त्वाभाववत्त्वादित्यर्थः । असतिचस त्त्वाभावोवास्तवएवेतिनव्यभिचारइतिभावः । षष्ठे कल्पकरहितत्वादितिहेतौ कल्पकंकिंचिन्मात्रं तदन्यद्वा । नाद्यइत्याह ॥

1 आरोपितत्वं च मिथ्यात्वेनोभयसंमतत्वमेव ॥

SGDF
Sri Gargeshwari Digital Foundation

चिन्मात्रस्येति ॥ कल्पनोपयुक्तदेहेंद्रियाद्यभावादितिभावः । नद्वितीयइत्याह ॥ अन्यस्यचेति ॥ तथाचस्वेनैवस्वस्यकल्पितत्वंविरुद्धमित्यर्थः । नन्वसतःकेनाप्यकल्पितत्वेनकल्पकरहितत्वहेतोस्तत्रव्यभिचारइत्यतआह ॥ अत्रचेति ॥ तथाचसाध्यभूतंसत्वंनामाकल्पितत्वमेवविवक्षितं । अतोसतिसाध्यस्यापिसत्वान्नव्यभिचारइत्यर्थः ॥ विपक्षइति ॥ कल्पकरहितत्वेपिकल्पितत्वमेवास्त्वित्यप्रयोजकतायामित्यर्थः । व्याघातमेवाह ॥ कल्पकमिति ॥ हेतोरेवाऽभावान्नव्यभिचारइत्याशयेनाह ॥

चिन्मात्रस्याद्रष्टृत्वेनान्यस्यचकल्पितत्वेनाक[illegible]त्वात्[2]। अत्रचाकल्पितत्वस्यसाध्यत्वान्नासतिव्यभिचारः । विपक्षेव्याघातः । कल्पकंविनाक[illegible]पनाऽयोगात् । किंचविमतंनसद्विलक्षणं असद्विलक्षणत्वात् आत्मवत् । नचशुक्तिरूप्येव्यभिचारः।तस्यासद्विलक्षणत्वेनतद्विरुद्धसद्विलक्षणत्वायोगात् । विमतंनचैतन्याज्ञानकार्यं नचैतन्याज्ञानकार्यंधीविषयोवा नचैतन्याज्ञानकार्यसत्ववद्वा चैतन्यज्ञानाबाध्यंवा चैतन्यज्ञानाबाध्यसत्ववद्वा तस्मिन्नपरोक्षेपि[1]अनिषेध्यत्वेनसाक्षाद्भासमानत्वात्

तस्येति ॥ शुक्तिरूप्येऽसद्वैलक्षण्यमंगीकृत्यव्यभिचारदानायसद्वैलक्षण्यांगीकारेव्याघातःस्यात् । असद्वैलक्षण्येसत्वस्यैवप्राप्तेस्तद्वैलक्षण्यायोगात् । नचेष्टापत्तिरितिवाच्यं । तत्रतत्वस्यबाधितत्वात् । अतोव्यभिचारदानाययदिसद्वैलक्षण्यंतस्यांऽगीक्रियते । तर्ह्यऽसत्वस्यैवप्राप्त्यासद्विलक्षणत्वायोगेनहेतोरेवाभावान्नव्यभिचारइति "तुंदिलसुरतन्याय" इतिभावः ॥ विमतामित्यादि ॥ अर्थज्ञानात्मकोभयविधभ्रमांगीकारात्तद्विरोधित्वेनाद्यानुमानद्वयं ॥ तस्मिन्निति ॥ चैतन्यइत्यर्थः । नेदंरजतमि

1 अत्रापरोक्षत्वं च भ्रमनिवर्तकं । चिज्ज्ञानापरोक्षान्यून विषयक भ्रमादि ज्ञानापरोक्षमिति विवक्षितं ॥ २ स्वप्रकाशत्वकल्पक रहितत्वादित्यर्थः । तेन नास्ति व्यभिचारः ॥

SGDF
Sri Gurgeshwari Digital Foundation

तिज्ञानंप्रतिनिषेध्यत्वेनसाक्षाद्विषयेव्यवसायद्वाराअनुव्यवसायविषयेचरजतेव्यभिचारवारणायानिषेध्यत्वेनसाक्षादितिचविशेषणद्वयं । तस्मिन्नपरोक्षेपीतिस्वरूपसंकीर्तनं ॥ यदेवमिति ॥ यद्यस्मिन्नपरोक्षेपिअनिषेध्यत्वेनसाक्षाद्भासतेनतत्तदज्ञानकार्यादीतिसामान्यव्याप्तिरित्यर्थः । उक्तभानवान् । अनिषेध्यत्वेनसाक्षाद्भानवान् । समूहालंबनादावितिशेषः । ननुचैतन्यस्याऽपरोक्षत्वाभावात्तस्मिन्नपरोक्षेपीत्यस्यासिद्धिरित्यतआह ॥ चैतन्यंचेति ॥ आरोपाधिष्ठानतयेत्यर्थः । चैतन्यस्यसर्वप्रत्ययवेद्य

300

यदेवंतदेवं यथापटेऽपरोक्षेप्युक्तभानवान्घटोनपटाज्ञानकार्यादिः । चैतन्यंचाधिष्ठानतयासुखादिसाक्षित्वेनचेदानीमप्यपरोक्षमितिनासिद्धिः । शंखत्वादावऽपरोक्षेपिभासमानंपीतत्वादिकंनतदज्ञानकार्यं । किंतुश्वेतत्वाज्ञानकार्यादिकमितिनव्यभिचारः । अत्राप्यापरोक्ष्यस्याज्ञानविरोधित्वात्सतितस्मिन्नज्ञानांगीकारेव्याघातः । एवमुत्तरत्रापिविपक्षेबाधकमुन्नेयं । विमतंनात्मन्यध्यस्तं ।

त्वांगीकारेणायंघटइत्यादावधिष्ठानत्वेनप्रमितचैतन्यस्यैवनिर्देशादितिभावः । ननुशंखत्वेअपरोक्षेपिअनिषेध्यत्वेनपीतःशंखइत्यत्रसाक्षाद्भासमानंपीतत्वंशंखत्वाज्ञानकार्यंभवत्येवेतिपीतत्वेसामान्यव्याप्तेर्व्यभिचारइत्यतआह ॥ शंखत्वादाविति ॥ ॥ १५१ ॥ तदिति ॥ शंखत्वेत्यर्थः ॥ श्वेतत्वेति ॥ श्वेतत्वंचनापरोक्षतयाभासतइत्याशयः । अप्रयोजकतापरिहारायाह ॥ अत्रापी

ति ॥ आपरोक्ष्यस्य अधिष्ठानापरोक्ष्यस्य । आत्मनि शुद्धे ॥ तत्तत्वेति ॥ शुद्धात्मतत्वसाक्षात्कारवान्यईशःशबलःशुकादिजीवन्मुक्तश्च तयोर्याप्रवृत्तिःपालनभिक्षाटनशिष्यबोधनादिरूपा तद्विषयत्वादित्यर्थः । तत्र पटे । ननुशंखगतंयच्छंखत्वंतत्साक्षात्कारवत्प्रवृत्तिविषयमपिपैत्यंशंखेअध्यस्तमितिपैत्येव्यभिचारइत्यतआह ॥ शंखइति ॥ शंखतत्वेति ॥ श्वेतत्वेत्यर्थः । शंखतत्वंचनशंखत्वं किंतुश्वैत्यमेव अतोहेतोरेवा(भावा)नागमनान्नव्यभिचारइतिभावः । "नचमायाविनामायादृश्यते

301

तत्तत्वसाक्षात्कारवत्प्रवृत्तिविषयत्वात् यदेवं तदेवं यथापटसाक्षात्कारवत्प्रवृत्तिविषयोघटोनतत्राध्यस्तः । नचासिद्धिः । ईशजीवन्मुक्तयोरात्मसाक्षात्कारवतोरपिजगद्रक्षणभिक्षाटनशिष्यबोधनादौप्रवृत्तेः । शंखेध्यस्तमपिपीतत्वंनशंखतत्वसाक्षात्कारवत्प्रवृत्तिविषयइतिनव्यभिचारः । विमतंनेश्वरमायाकल्पितं तंप्रत्यपरोक्षत्वात् यदेवंतदेवं यथाचैत्रंप्रत्यपरोक्षोघटोनचैत्रमायाकल्पितः । विमतंनजीवकल्पितं तस्मिन्सुषुप्तेप्यवस्थितत्वात् आत्मवत् नचाऽसिद्धिः

विश्वमीश्वरः । सदापश्यतितेनेदंनमायेत्यवधार्यता" मितिप्रमाणोक्तानुमानमाह ॥ विमतमिति ॥ ननुजीवेसुप्तेअहमर्थपर्यंतंजगद्विलयांगीकारादसिद्धिरित्याशंक्यनिषेधति ॥ नचेति ॥ सुषुप्तौजगद्विलयांगीकारेपुनरुत्थानानंतरंपूर्वस्मिन्दिनेयंघटमहमद्राक्षंसएवायंघटइतिप्रत्यभिज्ञाविरोधात् । तदप्रामाण्येबौद्धोक्तक्षणिकत्वनिरासोपायाभावेनक्षणिकवादापातात् । अप्रामा

SGDF
Foundation

३०२

ण्यस्यबाधकैकोन्नेयत्वेनप्रत्यभिज्ञाप्रामाण्येबाधकाभावाच्चेत्याह ॥ प्रत्यभिज्ञानादित्यादिना ॥ यदिसुषुप्त्यवस्थायांजगद्विलयमंगीकृत्यासिद्धिःशंक्यते तर्ह्यस्यसुप्त्यनंतरंपुनरुद्बोधोनस्यात् । उद्बोधकानिष्टसंस्कारादेर्नाशादित्याह ॥ अदृष्टादेरपीति ॥ सामान्येनेति ॥ सामान्यतआत्मव्यतिरिक्तंकिंचिदनात्मभूतंसत्यमस्तीत्यत्रइत्यादीत्यनुमानानिद्रष्टव्यानीत्यन्वयः ॥ आत्मान्येति ॥ तथाचात्मान्यस्मिन्ननात्मनिकुत्रचिन्नास्तीतिप्राप्त्याआत्मान्यदनात्मभूतंकिंचित्सत्यभूतमितिहृदयं । ज्ञेयत्वादौ

प्रत्यभिज्ञानात् तस्यात्यंताप्रामाण्येचक्षणिकवादापातात् । बाधकाभा
वाच्च । अदृष्टादेरप्यभावेनपुनरुद्बोधायोगाच्च । सामान्येनानात्मसत्यत्वे,
मिथ्यात्वंनात्मान्यसर्ववृत्ति [1] मिथ्यामात्रवृत्तित्वात् शुक्तिरूप्यत्ववत् ।
आत्मापरमार्थसदन्यः परमार्थसद्भावान्योवा पदार्थत्वात् अनात्मवत् ।

मिथ्याभूतरूप्यादिवर्तिनिआत्मान्यसर्ववस्तुवृत्तिनिव्यभिचारवारणायहेतौमात्रपदं । मात्रपदेनसत्यवृत्तित्वव्यावृत्तिः अभावद्वैतांगीकारेणात्मनः ॥ [1] परमार्थसद्भावान्यत्वस्यसिद्धत्वात्सिद्धसाधनतास्यादतआह ॥ [2] परमार्थसद्भावान्यइति ॥ आभ्यामनुमानाभ्यामात्मव्यतिरिक्तस्यकस्यचिदनात्मनःपरमार्थसत्वंपरमार्थसद्भावत्वंचलब्धमितिहृदयं । दृष्टांतेअनात्मनिपरमा

१ परमार्थसन्योऽभावःतदन्यत्वेत्यर्थः । २ परमार्थसन्योभावःतदन्यइति । 1 सर्वशब्देनासदन्यसर्वग्रहणं अन्यथाऽसति व्यभिचारापत्तेः

SGDF
Sri Gargeshwari Digital Foundation

र्थसद्भावभूतब्रह्मान्यत्वमस्तीतिद्रष्टव्यं ॥ यावदिति ॥ अनेनचानुमानेनानात्मनअव्याकृताकाशवर्णप्रकृत्यादेर्यावदात्मस्वरूपमनुवर्तमानत्वोक्त्यात्रैकालिकनिषेधरूपमिथ्यात्वाभावसिद्धिः । अभावमादायसिद्धसाधनतावारणायाह ॥ यावदिति ॥ सिद्धसाधनतावारणायैवाह ॥ स्वेति ॥ स्वप्रतियोगीति ॥ मायिमतेस्वात्मतत्वसाक्षात्कारेणबंधोनिवर्ततइत्यंगीकृतं । ज्ञानेनबंधनिवृत्तिदशायांचसर्वस्याप्यनात्मनोबाध्यत्वंचांगीकृतं । तदानींबंधनिवृत्तिसमानात्मकालीनोऽबाध्यःकश्चनानात्मास्तीति

आत्मायावत्स्वरूपमनुवर्तमानानात्मवान् यावत्स्वरूपमनुवर्तमानभावरूपानात्मवान्वा स्वज्ञानाबाध्यानात्मवान्वा स्वज्ञानाबाध्यभावरूपानात्मवान्वा पदार्थत्वाद्भावत्वाद्वाघटवत् । विमताबंधनिवृत्तिःस्वप्रतियोगिविषयविषयकज्ञानाबाध्यानात्मसमानकालीना उक्तज्ञानाबाध्यभावरूपानात्मसमानकालीनावा बंधनिवृत्तित्वात् निगडबंधनिवृत्तिवदित्यादीनिद्रष्टव्यानि । विशिष्यानात्मसत्यत्वेतु

साध्यते । तथाहि । स्वशब्दनिर्दिष्टाबंधनिवृत्तिः तस्याःप्रतियोगीबंधः तस्यविषयःकर्मीभूतोबंध्यइतियावत् । एतादृशआत्माजीवः तद्विषयकंयज्ज्ञानंआत्मतत्वसाक्षात्कारः । तेनाबाध्योयोऽनात्मा तत्समानकालीनेत्यर्थः ॥ निगडेति ॥ निगडबंधनिवृत्तिप्रतियोगिनिगडबंधविषयापराधिपुरुषविषयकज्ञानाबाध्यघटाद्यनात्मसमानकालीनत्वंनिगडबंधनिवृत्तावस्तीत्यर्थः । बंधनिवृत्तेरात्मतत्वसाक्षात्काराबाध्याभावरूपानात्मसमानकालीनत्वमादायसिद्धसाधनतावारणायाह ॥ उक्तेति ॥ स्वप्रतियोगि

303

SGDF
Sri Gargeshwari Digital Foundation

1 क्षणिकत्वादिरूपेणात्मधियो क्षणिकत्वादिधीबाध्यत्वा बाधवारणाय स्वविषयकेति । २

न्यायामृ० विषयिकेत्यर्थः । आत्मधीः चरमसाक्षात्कारः ॥ स्वेति ॥ स्वशब्देनआत्मधीः तद्विषयःआत्मा तद्विषयिणीयाधीःस्वयमेव त श्रीनिवा०
॥ १५३ ॥ द्बाध्यास्वयंधीरेव कतकरजोवदितिपरेणांगीकृतं । बाध्यानभवतीतिचास्माभिःसाध्यते । तथाचानेनविशिष्यात्मधीरूपानात्म विश्व. अनु.
सत्यत्वसिद्धिरितिज्ञेयं । भ्रमेहेतुरज्ञानादिः । स्वशब्देनाज्ञानं तत्कार्योयोभ्रमोजगद्भ्रमः तदधिष्ठानंयद्ब्रह्म तज्ज्ञानबाध्यइति
परेणांगीकृतं तदभावस्त्वस्माभिःसाध्यतेइत्यवधेयं । भ्रमकत्वात् । भ्रमजनकत्वात् ॥ काचादिरिति ॥ स्वशब्देनकाचादिः १ । १९
तत्कार्योयोरजतभ्रमः तदधिष्ठानशुक्तिज्ञानबाध्योनभवतीत्यर्थः । नन्वेवंचेच्छुक्त्यज्ञानेव्यभिचारः । भ्रमकत्वेसत्यपिशुक्त्यज्ञा

304

आत्मधीःनस्वविषयविषयकधीबाध्या धीत्वात् शुक्तिधीवत् । [2]आत्माधिष्ठानकभ्रम
हेतुः[3]नस्वकार्यभ्रमाधिष्ठानज्ञानबाध्यः । भ्रमक(हेतु)त्वात् यदेवंतदेवं यथाशुक्त्य
धिष्ठानकभ्रमहेतुःकाचादिः।शुक्त्यज्ञानमपिपक्षतुल्यं ।[4]ब्रह्मान्यदनादि परमार्थसत्

नकार्यभ्रमाधिष्ठानभूतशुक्त्यज्ञानबाध्यत्वेनसाध्याभावादित्यतआह ॥ शुक्त्यज्ञानमपीति ॥ एतावंतंकालंशुक्त्यज्ञानमासी
दित्यनुभवेनाज्ञानस्यसत्यत्वसिद्धेःस्वकार्यभ्रमाधिष्ठानज्ञानबाध्यत्वाभावोप्यस्माभिःसाध्यतेइतितस्यापिपक्षतुल्यत्वान्नव्यभिचा
रइत्यर्थः॥ब्रह्मान्यदनादीति ॥ "जीवईशोविशुद्धाचित्भेदस्तस्यास्तयोर्द्वयोः। अविद्यातच्चितोर्योगःषडस्माकमनादय"इतिश्लो ॥ १५३ ॥
कोक्तमनादिजातमित्यर्थः।अनादित्वेप्यध्यस्तत्वमेवास्तुइत्यप्रयोजकतायामाह ॥दोषेति॥ स्वाध्यासात्पूर्वमनादित्वादेवसतोपीत्य

2 एतच्च शुक्त्यधिष्ठानकभ्रमहेतुकाचादिः पक्षत्वे सिद्धसाधनवारणाय । 3 शुक्तिकायां रूप्यभ्रमहेतोः काचादेः घटादौ बाधकदर्शनेन व्यभिचारवारणाय स्वकार्येति ॥

4 अत्रानादिपदेन अनादिभावो विवक्षितस्तेन ध्वंसाप्रतियोगित्वस्योपाधित्वनिरासः । पक्षासावृत्तेः ॥

र्थः॥अनादीति॥ब्रह्मज्ञानानिवृत्तेःसत्वेनानाद्यध्यस्तत्वमित्यंगीकारेब्रह्मणोप्यनादित्वाविशेषादनाद्यध्यस्तत्वंस्यात् तथोत्तरत्रत
न्निवर्तकाभावादनंताध्यस्तत्वंचस्यादित्यर्थः॥कालादीति॥अनेनकालादेर्यावद्ब्रह्मस्वरूपवर्तमानत्वोक्त्याऽबाध्यत्वसिद्धिः । पक्षे
हेतूपपादनायवेदैकगम्यमित्युक्तं । आदिपदेनब्रह्मग्रहणेसिद्धसाधनतापरिहारायब्रह्मान्यदित्युक्तं । दोषाजन्यज्ञानविषयत्वोपपाद
नायसाक्षिवेद्यमित्युक्तं। साक्षिरूपज्ञानस्यनित्यत्वेनदोषाजन्यत्वादितिभावः । बाधकज्ञानस्यदोषाजन्यत्वात्तत्प्रतिनिषेध्यत्वेनसा

अनादित्वात् ब्रह्मवत् । दोषजन्यज्ञानात्पूर्वंसतोप्यनादेरनाद्यध्यस्तत्वेब्रह्माप्यनाद्यनंताध्यस्तं 305
स्यात् । ब्रह्मकालाद्यसंबद्धंनावतिष्ठते पदार्थत्वात् । घटवत् । ब्रह्मान्यद्वेदैकगम्यंधर्मादिपरमार्थ
सत् । श्रुतितात्पर्यविषयत्वाद्ब्रह्मवत् । साक्षिवेद्यंसुखादिपरमार्थसत् अनिषेध्यत्वेनदोषाजन्यज्ञा
नंप्रतिसाक्षाद्विषयत्वात् । आत्मवत् । विमतंपरमार्थसत् स्वविषयकसाक्षात्कारात्पूर्वभावित्वात्
आत्मवत् नचाऽसिद्धिः त्वन्मतेपिप्रतिकर्मव्यवस्थार्थंस्वविषयसाक्षात्कारात्पूर्वंघटादेर्भावात् ।

क्षाद्विषयेरूप्येव्यभिचारवारणायानिषेध्यत्वेनेति।इदंरूप्य(रजतमि)मितिज्ञानंप्रत्येवसाक्षादनिषेध्यत्वेनविषयेरूप्येतद्वारणायदो
षाजन्यज्ञानंप्रतीत्युक्तं। इदंरूप्य(रजत)मित्यस्यचदोषजन्यत्वान्नव्यभिचारः । व्यवसायद्वाराऽनुव्यवसायंप्रतिविषयेरूप्येतद्वार
णायसाक्षादित्युक्तं । विमतं घटादिरूपंविश्वं ॥ त्वन्मतइति ॥ घटज्ञानस्यघटएवकस्माद्विषयः पटोपिकिंनस्यादितिशंकायां
प्रतिकर्मव्यवस्थासिध्यर्थंघटसन्निकृष्टेंद्रियजन्यत्वात्घटज्ञानस्यघटविषयकत्वमित्येवमिंद्रियसंनिकर्षार्थंघटादिसाक्षात्कारात्पूर्वम

SGDF Foundation

पिघटादेर्विद्यमानत्वमावश्यकत्वं । स्वविषयकसाक्षात्कारश्चाध्यासरूपएव । तथाचततःपूर्वमपिविद्यमानस्यघटादेरधिष्ठाना दिवत्स(त्य)त्वमेवसिध्यतीत्यर्थः ॥ अन्योन्याभावातिरिक्तेति ॥ मायावादिनाहिघटादेरन्यत्रासत्वस्यसिद्धत्वात्स्वयंयत्रा स्तितत्रापितदत्यंताभावोऽस्तीत्युच्यते । तद्विरोधितयाऽस्माभिःसाध्यते । अन्योन्याभावातिरिक्तैतद्घटसमानाधिकरणैतद्घटप्र तियोगिकोयोत्यंताभावः सएवैतद्घटसमानकालीनइतिपरेणोच्यते । अस्माभिस्त्वेतद्घटसमानाधिकरणैतद्घटप्रतियोगिकाभाव

अन्योन्याभा(वातिरि)वव्यतिरिक्तैतद्घटसमानाधिकरणैतद्घटप्रतियोगिकाभाव
त्वंएतद्घटसमानकालीनावृत्ति । अन्योन्याभावव्यतिरिक्तैतद्घटसमानाधिकरणै
तद्घटप्रतियोगिकाभावमात्रवृत्तित्वात् । एतद्घटप्रतियोगिकप्रागभावत्ववदित्याद्यू
ह्यं । व्यधिकरणधर्मावच्छिन्नाभावपक्षेव्यधिकरणधर्मानवच्छिन्नेतिविशेषणीयं ।

त्वंएतद्घटसमानकालीनोयोऽत्यंताभावःतदवृत्तीत्युच्यते । एतद्घटात्यंताभावएवैतद्घटसमानाधिकरणएतद्घटसमानकालीनश्च नभवतीतियावत् । एवंचस्वसमानाधिकरणस्वसमानकालीनात्यंताभावाप्रतियोगित्वरूपसत्वसिद्धिः । अन्योन्याभावातिरिक्ते त्यभावविशेषणं । एतद्घटसमानाधिकरणैतद्घटप्रतियोगिकाभावःअन्योन्याभावोपिभवति । कपालमेतद्घटोनेतिप्रतीत्याएतद्घ टान्योन्याभावस्यकपालेएतद्घटसमानाधिकरणत्वात् सचैतद्घटसमानकालीनोपिभवति । एवंचैतद्घटसमानाधिकरणैतद्घटप्रति

366

SGDF
Sri Gargeshwari Digital Foundation

योगिकाभावत्वंएतद्धटसमानकालीनावृत्तीतिसाधनेएतद्धटान्योन्याभावत्वमादायबाधःस्यात् । अतोन्योन्याभावातिरिक्तेति । तावत्युक्तेतंत्वादौएतद्धटप्रतियोगिकात्यंताभावस्तावदस्ति सचान्योन्याभावातिरिक्तएतद्धटसमानकालीनश्च एतद्धटस्यतंत्वादावेतद्धटात्यंताभावस्यचसमानकालीनत्वात् । एवंचैतद्धटप्रतियोगिकाभावत्वंएतद्धटसमानकालीनावृत्तीतिसाधनेतंत्वादिनिष्ठैतद्धटात्यंताभावमादायबाधःस्यात् । अतएतद्धटसमानाधिकरणेत्युक्तं । तंत्वादिनिष्ठैतद्धटात्यंताभावस्यैतद्धटसमानाधिकरणत्वाभावान्नबाधः । अन्योन्याभावातिरिक्तैतद्धटसमानाधिकरणनिष्ठधर्मत्वमित्येतावत्युक्तेकपालरूपादिकमन्योन्याभावातिरिक्तमेतद्धटसमानाधिकरणमेतद्धटसमानकालीनंचभवति । एवंचकपालरूपत्वेएतद्धटसमानकालीनावृत्तित्वसाधनेबाधःस्यात् । अतः अभावत्वमित्युक्तं । तावत्युक्तेअन्योन्याभावातिरिक्तेकपालेएतद्धटसमानाधिकरणोयःपटात्यंताभावः सएतद्धटसमानकालीनश्चभवति । तथाचतन्निष्ठेपटात्यंताभावत्वेएतद्धटसमानकालीनावृत्तित्वसाधनेबाधःस्यात् अतएतद्धटप्रतियोगिकेत्युक्तं । नन्वेतद्धटप्रतियोगिपदेनैवकपालरूपत्वमादायबाधस्यपरिहृतत्वादेतद्धटप्रतियोगिकनिष्ठधर्मत्वमित्येवास्तु अभावत्वमित्येतत्किमर्थमितिचेदुच्यते । एतद्धटसमवायोद्विनिष्ठत्वेनकपालेएतद्धटसमानाधिकरणःस्वप्रतियोगिकत्वेनैतद्धटप्रतियोगिकत्वेनैतद्धटप्रतियोगिकश्चभवति । तद्वृत्तियदेतद्धटकपालसमवायत्वंतदादायबाधःस्यात् । तस्यैतद्धटसमानकालीनोयःएतद्धटसमवायःतद्वृत्तित्वात् । अतोभावत्वमित्युक्तं । नन्वेवंचेत्पुनर्बाधः व्यधिकरणधर्मावच्छिन्नाभावपक्षेसंयोगेनसंबंधेनघटवतिभूतलेसमवेतत्वावच्छिन्नघटोनास्तीतिप्रतीत्याऽन्योन्याभावातिरिक्तःभूतलादावेतद्धटसमानाधिकरणःयःएतद्धटात्यंताभावःअसमवेतत्वरूपव्यधिकरण

SGDF
Sri Gargeshwari Digital Foundation

धर्मावच्छिन्नत्वाद्यत्यंताभावः सएतद्धटसमानकालीनश्चभवति । एवंचव्यधिकरणधर्मावच्छिन्नैतद्धटात्यंताभावत्वेएतद्धटसमान
कालीनावृत्तित्वसाधनेबाधःस्यात् । अतोऽन्योन्याभावातिरिक्तैतद्धटसमानाधिकरणव्यधिकरणधर्मानवच्छिन्नैतद्धटात्यंताभाव
त्वमितिविशेषणीयं । अतोनबाधः । हेतावाद्यविशेषणत्यागेएतद्धटान्योन्याभावत्वेएतद्धटसमानकालीनान्योन्याभाववृत्तिनि
हेतोर्व्यभिचारःस्यात् । अतआद्यमन्योन्याभावातिरिक्तेत्यभावविशेषणं । तावत्युक्तेतंत्वादिनिष्ठैतद्धटात्यंताभावत्वेएतद्धटसमा
नकालीनतंतुनिष्ठैतद्धटात्यंताभाववृत्तिनिहेतोर्व्यभिचारःस्यात् । अतएतद्धटसमानाधिकरणेतिद्वितीयंविशेषणं । एतावत्युक्तेए
तद्धटसमानाधिकरणैतद्धटसमानकालीनकपालरूपवर्तिनिकपालरूपत्वेव्यभिचारःस्यात् । अतएतद्धटप्रतियोगिकाभाववृत्तित्वा
दित्युक्तं । तावत्युक्तेएतद्धटसमानाधिकरणात्यंताभाववृत्तिनिपटात्यंताभावत्वेएतद्धटसमानकालीनपटात्यंताभाववृत्तिनिचव्य
भिचारःस्यात् । अतएतद्धटप्रतियोगिकेत्युक्तं । एतावत्युक्तेएतद्धटकपालसमवायोद्विनिष्ठत्वेनकपालेएतद्धटसमानाधिकरणःस्व
प्रतियोगिकत्वेनैतद्धटप्रतियोगिकश्चभवति । तद्वृत्तिनिएतद्धटकपालसमवायेएतद्धटसमानकालीनोयःएतद्धटसमवायःतद्वृत्तिनि
व्यभिचारःस्यात् । अतःअभावेत्युक्तं । तावत्युक्तेप्रमेयत्वेएतद्धटसमानकालीनयत्समवेतादिवर्तिनिव्यभिचारःस्यात् । अतो
मात्रपदं । एतावत्युक्तेसमवेतत्वरूपव्यधिकरणधर्मावच्छिन्नैतद्धटात्यंताभावत्वेएतद्धटसमानकालीनोयःसमवेतत्वावच्छिन्नैतद्ध
टात्यंताभावःतद्वृत्तिनिव्यभिचारःस्यात् । अतोव्यधिकरणधर्मानवच्छिन्नेत्यपिविशेषणंदेयं । दृष्टांतेपटप्रागभावत्वेएतद्धटसमा
नकालीनोयःपटप्रागभावः तद्वृत्तित्वेनसाध्यवैकल्यंस्यात् । एतद्धटप्रतियोगिकाभाववृत्तित्वाभावेनसाधनवैकल्यंचस्यात् । अत

308

SGDF
Sri Gargeshwari Digital Foundation

एतद्धटप्रतियोगिकेत्युक्तमितिसंप्रदायगम्यानिपदानांकृत्यानिद्रष्टव्यानि ॥ अनेनचेति ॥ अन्योन्याभावातिरिक्तैतद्धटसमाना धिकरणैतद्धटसमानकालीनाभावस्यनिषेधेस्वसमानाधिकरणात्यंताभावप्रतियोगित्वरूपमिथ्यात्वाभावरूपसत्वसिद्धिरित्यर्थः ॥ अत्रचेति ॥ सामान्येनात्मसत्यत्वेविशिष्यानात्मसत्यत्वेचोक्तानुमानेष्वित्यर्थः । संगृह्णाति ॥ तथाचेति ॥ असदिति ॥ 309

अनेनचस्वसमानाधिकरणःस्वसमानकालीनःअन्योन्याभावव्यतिरिक्तोयोऽभावःतद्प्रतियोगित्व रूपसत्वसिद्धिः । अत्रचाऽनुकूलतर्कावक्ष्यंतइतिनोपाध्याभाससाम्यादिशंका । तथाच "अस त्प्रातीतिकान्यत्वात्प्रमाणविषयत्वतः । अर्थक्रियाकारितादेर्विश्वंसत्य" मितिस्थितं" ॥ ७ ॥ विश्व मिथ्यात्वस्यानुमानबाधः॥१९॥ किंच "विश्वंसत्यं" यच्चिकेतसत्यमित्तन्नमोघं" याथातथ्यतोर्थान्व्यदधा च्छाश्वतीभ्यःसमाभ्य" इत्यादिश्रुतिभिः। "असत्यमप्रतिष्ठंतेजगदाहुरनीश्वर" मित्यादिस्मृतिभिः "नाभावउपलब्धेः,वैधर्म्याचन[1]स्वप्नादिवदि" त्यादिसूत्रैश्चबाधितादृश्यत्वाद्यः । नचायंप्रत्यक्षप्रा प्तानुवादः त्वन्मतेसन्घटइत्यस्यसदर्थस्यव्यावृत्तघटाद्यन्यानुवृत्तब्रह्मत्वेनघटादिसत्वस्याऽप्राप्तेः ।

अनेनप्रातिभासिकत्वानधिकरणत्वेसतिअसत्वानधिकरणत्वादित्यनुमानसंग्रहः ॥ प्रमाणेति ॥ अनेनानिषेध्यत्वेनप्रमांप्रतिसा क्षाद्विषयत्वादित्यनुमानसंग्रहः । आदिपदेनारोपितमिथ्यात्वकल्पकरहितत्वाद्यनुमानानांसंग्रहःकृतइतिज्ञातव्यं ॥ ७ ॥ विश्व मिथ्यात्वस्यानुमानबाधविवरणं ॥ ७ ॥ १९ ॥ विश्वमिथ्यात्वानुमानस्यागमबाधमप्याह ॥ किंचेति ॥प्रत्यक्षप्राप्तेति॥

1 स्वप्नशब्देनात्र स्वप्नगजादिगतं ~~सत्त्वं~~ जाग्रत्त्वं गृह्यते ॥

SGDF
Sri Gargeshwari Digital Foundation

प्रत्यक्षप्राप्तसत्यत्वेत्यर्थः । व्यावृत्तंअननुवृत्तं यद्घटादितदन्यद्यदनुवृत्तंब्रह्मतत्त्वेनतत्स्वरूपत्वेनपरमतेघटोनित्यइत्यादिष्विव सन्घटइत्यत्रघटेसत्त्वंनप्रतीयते किंत्वधिष्ठानभूतसद्ब्रह्मानुवेधमात्रमित्यंगीकारेणघटःसन्नित्यादिप्रत्यक्षेणघटादिषुसत्यत्वस्याप्राप्तेःश्रुतेरनुवादकत्वायोगइत्यर्थः ॥ यच्चिकेतेत्यादीति ॥ "विश्वंसत्य" मित्यत्रसत्यत्वमात्रस्यप्रत्यक्षप्राप्तत्वसंभावनयाकथंचिदनुवादकत्वशंकायामपि "यच्चिकेते" त्यादिवाक्यद्वयेनतच्छंका । अत्रेश्वरस्यसत्यजगत्स्रष्टृत्वोक्तेः तस्यचप्रत्यक्षाद्यवेद्यतयाप्राप्त्यभावात्तत्प्रतिपादकश्रुतिद्वयस्यनानुवादकत्वमितिभावः । "विश्वंसत्य" मित्यस्याःश्रुतेःकथंचिदनुवादकत्वेपि"यच्चिकेते"

यच्चिकेतेत्यादिवाक्यद्वयेईश्वरस्यमानांतराप्राप्तसत्यजगत्स्रष्टृत्वस्यैवोक्तेश्च । पृथिवीइतरभिन्ना नहिंस्यात्सर्वाभूतानीत्यादाविवएकदेशेविधेयसिद्धावपिविश्वमात्रेतदसिद्ध्यानुवादकत्वाच्च । अनुवादकत्वंहिवाक्यस्यनज्ञातज्ञापकत्वमात्रं

त्यादिश्रुतिद्वयस्यतावन्नानुवादकत्वमित्यंगीकृत्योक्तं इदानीं "विश्वंसत्य" मित्यस्याअपिश्रुतेर्नानुवादकत्वमस्तीत्याह ॥ पृथिवीति ॥ यथापृथिवीइतरभिन्नेत्यत्रैकदेशघटाद्यवच्छेदेनेतरभेदस्यप्रत्यक्षेणसिद्धावपिपृथिवीत्वावच्छेदेनसर्वत्रासिद्ध्यानुमान(स्यनानु)स्याननुवादकत्वं यथाच "नहिंस्यात्सर्वाभूतानी" त्यत्र "ब्राह्मणोनहंतव्य" इत्यादिनाब्राह्मणादावेकदेशेहिंसाभावस्य ॥ १५६ ॥ सिद्धावपिभूतपदोक्तप्राणिमात्रेतदसिध्यानहिंस्यादितिवाक्य(स्यनानु)स्याननुवादकत्वं तथेहापिविश्वंसत्यमित्यत्रविश्वैकदेशघ

SGDF
Sri Gargeshwari Digital Foundation

टाद्यवच्छेदेनप्रत्यक्षेणसत्त्वग्रहेपिविश्वत्वावच्छेदेनप्रत्यक्षेणतदग्रहात्तदयोग्येषुधर्मादिषुश्रुत्यासत्यत्वबोधनान्नविश्वंसत्यमित्य स्याःश्रुतेरनुवादकत्वमित्यर्थः । ज्ञातज्ञापकत्वमात्रमित्यत्रमात्रशब्दोऽयोगव्यवच्छेदार्थः ॥ अतिप्रसंगादिति ॥ सिद्धंधर्म्यं शमुद्दिश्यासिद्धविधायकस्य "दध्नाजुहोती" त्यस्याप्यनुवादकत्वमापद्येतेत्यर्थः ॥ ज्ञातमात्रेति ॥ तथाचधर्म्यंशस्यसिद्धत्वेपि अधिकस्याज्ञातस्यदधिरूपगुणस्यापितत्रविधानान्नज्ञातमात्रज्ञापकत्वमस्तीतिनातिप्रसंगइत्यर्थः । एवंचप्रकृतेपिविश्वंसत्यमित्या देर्नज्ञातमात्रज्ञापकत्वं "आपश्चनप्रमिनंती" तिवाक्यशेषेणविश्वसत्यत्वस्यसमस्तदेवताप्रमितिविषयत्वस्यासिद्धस्यापिकथनादि

अतिप्रसंगात् किंतुज्ञातमात्रज्ञापकत्वं। एकशाखास्थविधिवाक्यैकार्थशाखांतरस्थविधिवाक्यस्य पुरुषांतरंप्रतीवयेनपुंसावादिविप्रतिपत्त्यादिनाप्रत्यक्षेणविश्वसत्यताननिर्णीतातांप्रत्यऽर्थवत्त्वाच्च ।[1]

तिभावइतिसंप्रदायः । इतोपिविश्वंसत्यमित्यादेर्नज्ञातज्ञापकत्वेनवैयर्थ्यमित्याह ॥ एकशाखेति ॥ "प्रातस्संध्यामुपासीते" तिऋग्वेदशाखागतंवाक्यंतत्समानार्थकमपियजुश्शाखागतं "प्रातस्संध्या" मितिवाक्यंनव्यर्थं ऋक्शाखाध्यायिनंप्रतिव्यर्थत्वे पियेनपुंसाऋक्शाखाध्ययनंनकृतंतंप्रत्यर्थवत्त्वांगीकारात् । एवंप्रत्यक्षेणविश्वसत्यतायेनननिर्णीता वादिविप्रतिपत्त्यादिनाप्रत्य क्षेऽप्रामाण्यशंकनात् तंप्रतिविश्वंसत्यमितिवाक्यस्याऽर्थवत्त्वसंभवादित्यर्थः । एकशाखेत्युक्त्यापूर्वमीमांसान्यायःसूचितः । तथाहि । द्वितीयाध्यायेचतुर्थपादेचिंतितं । "शाखांतरेषुकर्मभेदःस्या" दित्यत्रनानाशाखाम्नातंअग्निहोत्रादिकंकर्मभिद्यते न

[1] एतच्च विशेषादर्शनकालीनसंशयस्य तत्सामग्र्याश्च प्रतिबंधकमिति अभिप्रेत्योक्तम् ॥

3611

SGDF Sri Gargeshwari Digital Foundation

त्वेतिसंशयेअविशेषेणपुनःश्रुतिरूपाभ्यासस्यकर्मभेदाभावेवैयर्थ्यापत्तेःकर्मभिद्यतइतिपूर्वपक्षः । सिद्धांतस्तुपुनःश्रुत्याशाखांतरोक्तमेवकर्मविधीयतइतिसिद्ध्यति नतुकर्मभेदः तर्हिवैयर्थ्यमितिनशंकनीयं शाखाभेदानामध्येतृभेदनियतत्वेनविहितस्यापिविधानंपुरुषांतराधिकारेणसंभवत्येवेतितस्यैवकर्मणोविधानेपिनवैयर्थ्यमिति । नन्वेवंरीत्यासर्वत्रानुवादमात्रोच्छेदप्रसंगःस्यादित्यतः "सर्वाविवादस्थलएवकथंचिदनुवादकत्व" मितिभगवत्पादवाक्यंहृदिनिधायाह ॥ अनुवादकत्वंत्विति ॥ अतएवेति ॥ सर्वाविवादस्थलएवानुवादकत्वस्यसावकाशत्वेनयत्रविवादस्तत्रतस्यादोषत्वादेवेत्यर्थः ॥ देहेति ॥ देहातिरिक्तात्मेत्यर्थः ॥

[1]अनुवादकत्वंतुसर्वाविवादस्थलेसावकाशं । अतएवत्वयापिबृहदारण्यकभाष्येदेहान्यात्मबोधिकायाः "अस्तीत्येवोपलब्धव्य" इतिश्रुतेःप्रत्यक्षप्राप्तानुवादित्वमाशंक्यवादिविप्रतिपत्तिदर्शनादित्यादिनातत्परिहृतं ।

317

अस्तीति ॥ देहातिरिक्तोस्तीत्यर्थः ॥ प्रत्यक्षप्राप्तेति ॥ ममदेहइतिप्रत्यक्षेणदेहात्मभेदस्यसिद्धत्वादित्यर्थः । इत्यादिना सिद्धांतभाष्येण । किंचविश्वंसत्यमितिश्रुतेर्नानुवादकत्वं । यथाहितवमतेसन्घटःसन्पटःसद्घटज्ञानंसत्सुखस्फुरणमित्यादिप्रत्यक्षेणात्मसत्यत्वस्यप्राप्तेरात्मसत्यत्वप्रतिपादिकायाःसत्यआत्मेत्यादिश्रुतेर्वैयर्थ्यंस्यात्तन्माभूदित्येवमर्थंप्रत्यक्षेणवर्तमानकालएवसत्ताग्रहणात्वर्तमानकालमात्रेसत्ताग्राहिप्रत्यक्षाप्राप्तत्रिकालाबाध्यत्वरूपसत्यत्वप्रतिपादकत्वमंगीकृतं ।एवं ॥ १५७ ॥

[1] सर्वविवादस्थलानि च "अग्निर्हिमस्य भेषजं, अस्या ओषधयो जायन्ते, अग्निरेनां स्वदयती" त्यादीनि ।

SGDF Sri Gargeshwari Digital Foundation

प्रकृतेवयमपिसन्घटइत्यादिप्रत्यक्षेणविश्वसत्यत्वस्यप्राप्तत्वाद्विश्वंसत्यमित्यादिश्रुतेर्वैयर्थ्यंस्यात्तन्माभूदित्येवमर्थंवर्तमानकालमा त्रेसत्ताग्राहिप्रत्यक्षाप्राप्तत्रिकालाबाध्यत्वरूपसत्यत्वप्रतिपादकत्वमंगीकुर्मोतोनदोषइत्याह ॥ इहापिश्रुतेरिति ॥ विश्वंसत्यमि त्यादिकायाइत्यर्थः । अत्रपूर्वतंत्रसिद्धोदृष्टांतउक्तः ॥ द्वयोःप्रणयंतीत्यादिना ॥ सप्तमाध्यायेतृतीयपादेचिंतितं । "सौकंतु प्रणयनमवाच्यंहीतरवदि" त्यत्रचातुर्मास्येषुयज्ञेषुवैश्वदेववरुणप्रघाससाकमेधशुनासीरसंज्ञकपर्वचतुष्टयमस्ति । मासानामेव पर्वसंज्ञा तत्र "द्वयोःप्रणयंती" तिश्रूयते मध्यस्थयोर्द्वयोःपर्वणोःप्रणयंतिगार्हपत्यादाहवनीयंप्रत्यग्निर्नेतव्यइत्यर्थः । चातुर्मा

सौमिकन्तु

313

7-3-19 द्वयोःप्रणयंतीतिवाक्यस्यावैयर्थ्यायचातुर्मास्यमध्यपर्वणोश्चोदकाप्राप्तप्रणयनां

तरप्रापकत्ववत्इहापिश्रुतेरवैयर्थ्यायतत्सत्यमित्यादिश्रुतिवत्वर्तमानमात्रग्रा

हिप्रत्यक्षाप्राप्तकालत्रयाबाध्यत्वरूपसत्यत्वप्रापकत्वाच्च । अन्यथाआत्मनआनं

दत्वश्रुतिरपिसुखंसुप्तोऽस्मीतिप्रत्यक्षप्राप्ताऽतात्त्विकानंदत्वानुवादिनीस्यात् ।

स्यंचकर्मदर्शपौर्णमासाख्यकर्मप्रकृतिकं तत्रचातुर्मास्यपर्वणांमध्येमध्यस्थयोर्द्वयोःपर्वणोरुच्यमानमग्निप्रणयनंकिंदर्शपौर्णमास धर्मकंउतापूर्वंतद्विलक्षणमितिसंशयेचातुर्मास्यानांदर्शपौर्णमासप्रकृतिकतयाचोदकप्राप्तत्वेनतदीयांगकलापयुक्ततयाचोदकप्राप्त प्रणयनप्रापकत्वमेवेतिपूर्वपक्षेद्वयोःपर्वणोरग्निप्रणयनस्यदर्शपौर्णमासप्रकृतिकतयासिद्धत्वेनपुनर्द्वयोःप्रणयंतीत्यस्यवैयर्थ्यापत्ते स्तदवैयर्थ्यायचोदकाप्राप्तांगकलापयुक्तापूर्वप्रणयनप्रतिपादकत्वमेवेतिसिद्धांतितं तद्वदिहापीत्यर्थः ॥ अन्यथेति ॥ विश्वंस

1 सुप्तौ स्वरूपानन्दो गृह्यते । स्वरूपं च तदा ज्ञानोपहितमेवेति मेव साक्षिविषय इति सौषुप्तिकानन्दस्यातात्त्विकत्वमित्यर्थः ।

SGDF
Sri Gargeshwari Digital Foundation

त्यमित्यादेरपूर्वसत्यत्व(प्रापकत्वा)प्रतिपादकत्वाभावइत्यर्थः ॥ स्यादिति ॥ तथाचप्रत्यक्षाप्राप्तानंदत्वप्रतिपादकत्वंश्रुतेरंगी कार्यमितिभावः । तन्वेवमपूर्वविषयांतरदानेनसर्वत्रानुवादकत्वमात्रोच्छेदःस्यादित्यतआह ॥ अनुवादकत्वंत्विति ॥ (प्रमा णांतराप्राप्तापूर्वविषयांतरंयत्रनास्तितत्रानुवादकत्वंसावकाशमित्यर्थः) । स्थलांतरेनुवादकत्वंसावकाशमित्यर्थः । दार्ढ्यहेतुत्वा च्चनानुवादकत्वंदोषायेत्याह ॥ निगमनवदित्यादिना ॥ पिपासितस्येतिहेतुगर्भं अत्यंतंतृषितत्वादेवएकप्रमाणोक्तौविश्वासा

अनुवादकत्वंतुअप्राप्तविषयांतराभावेसावकाशं। निगमनवत्तत्वमसी तिनवकृत्वोभ्यासवत्पिपासितस्यएकजलविषयकलिंगशब्दप्रत्यक्षरूप प्रमाणसंप्लववत्त्व(न्मते)त्पक्षेप्रत्यक्षसिद्धभावरूपाज्ञाने "तमआसी दि" त्यादिश्रुतिवत्श्रुतेरैक्यतात्पर्येषड्विधलिंगवच्चप्रत्यक्षानाश्वासनि रासेनदार्ढ्यार्थत्वाच । अनुवादकत्वंतुयत्रदार्ढ्यंप्रागेवसिद्धंतत्रैव ।

भावादेकजलरूपार्थविषयकशब्दादिबहुप्रमाणापेक्षेत्यर्थः ॥ प्रत्यक्षसिद्धइति ॥ अहमज्ञइतिप्रत्यक्षसिद्धइत्यर्थः ॥ त्वन्मतइ ति ॥ त्वन्मतेतमश्शब्दस्यभावरूपाज्ञानपरत्वादितिद्रष्टव्यं । ऐक्यतात्पर्ये ऐक्यविषयकतात्पर्ये । नन्वेवंचेत्सर्वत्राप्यनाश्वास निरासार्थत्वेनदार्ढ्यार्थत्वस्यवक्तुंशक्यत्वादनुवादकत्वमात्रोच्छेदइत्यतआह ॥ अनुवादकत्वंत्विति ॥ प्रागेवेति ॥ अना

SGDF
Sri Gargeshwari Digital Foundation

श्वासपरिहारेणेत्यर्थः ॥ यथाषड्विंशतिरस्यवंक्रयइति ॥ नवमेध्यायेचतुर्थपादेचिंतितं । अग्निष्टोमीयपशौश्रूयते "षड्विंश
तिरस्यवंक्रयःताआनुष्टय्योच्यावयतादि" ति । अस्यायमर्थः । अग्निष्टोमीयपशोर्वंक्रयःपार्श्वस्थास्थीनिषड्विंशतिसंख्याकानि एकै
कस्मिन्पार्श्वेत्रयोदशानामवस्थितत्वात् ताश्चवंक्रीःअनुष्ठ्याऽनुक्रमेणगणयित्वेतियावत् उच्यावयतात्उद्धरतादिति । षड्विंशति
वंक्रिकपशुयुताग्नीषोमीयप्रकृतिकेऽश्वमेधेश्रूयते । "चतुस्त्रिंशद्वाजिनोदेवबंधोर्वंक्रीरश्वस्ये" ति । तथा "नचतुस्त्रिंशदितिब्रूया
त्षड्विंशतिरित्येवब्रूयादि" तिच । तत्रसंदेहः किंचोदकप्राप्तस्यषड्विंशतिरितिमंत्रस्यबाधोस्त्युतनेति । तत्राश्वमेधे "प्रकृतिव

तदुक्तं "बहुप्रमाणसंवादश्चदार्ढ्यहेतुरेवे"ति । किंचयथा "षड्विंशतिरस्यवंक्रय"
इतिमंत्रस्याऽश्वमेधेचोदकप्राप्तस्य "चतुस्त्रिंशद्वाजिनोदेवबंधो"रितिवैशेषिकमंत्रे
णाऽपोदितस्यप्रतिप्रसवार्थं "षड्विंशतिरित्येवब्रूयादि" तिवचनं तथाप्रत्यक्षप्राप्त
स्यजगत्सत्वस्याऽद्वैतश्रुत्याऽऽपाततोऽपोदितस्यप्रतिप्रसवार्थंसत्वश्रुतिःकिंनस्यात्

द्विकृतिःकर्तव्ये" तिचोदकेनषड्विंशतिरितिमंत्रप्राप्तौचतुस्त्रिंशदितिवैशेषिकमंत्रस्यप्रेषणपठितस्यबाधायोगाच्चोदकप्राप्तस्यैवबाध
इतिप्राप्ते "षड्विंशतिरित्येवब्रूयादि" तिप्रतिप्रसवसद्भावादपवादस्यापवादेपुनरुत्सर्गस्यैवावस्थितिरितिन्यायेनचोदकप्राप्तःषड्विंश
तिरस्येतिमंत्रएवप्रयोक्तव्यः । अतोनतस्यबाधः चतुस्त्रिंशदित्यस्यतुमंत्रस्यास्मात्प्रकरणात्स्थानांतरंप्रत्युत्कर्षःकार्यइतिसिद्धांतः ।
ननुषड्विंशतिरित्येवब्रूयादित्यत्रनतुचतुस्त्रिंशदितीतीतरनिषेधकैवकारश्रवणेनचोदकप्राप्तमंत्रापवादकवैशेषिकमंत्रप्रतीतस्यबाध

-१-५-१-॥
३१८

SGDF
Sri Gargeshwari Digital Foundation

316

कत्वमस्तु विश्वंसत्यमित्यादौतुनिषेधाश्रवणात्कथंप्रत्यक्षप्राप्तसत्यतापवादकनिषेधरहिताद्वैतश्रुतिबाधकत्वमित्यतआह ॥ दृश्यं तेहीति ॥ "असंयोगाल्लिट्क्किदि" तिकित्वविधिसन्निधिपठितस्यनिषेधरहितस्य "मृडमृदगुधकुषक्लिशवदवसःक्त्वे" तिसूत्रस्य "नक्त्वासेडि" तिकित्वापवादकंप्रतियथाबाधकत्वं तथाविश्वंसत्यमित्यादेर्निषेधविधुरस्यापिसत्त्वग्राहिप्रत्यक्षापवादकाद्वैतकश्रुतिबाधकत्वंयुक्तमित्यर्थः । यथोक्तं "कित्वंहिक्त्वोनिजंयन्नक्त्वासेडितिनिराकृतं । मृडेत्यादिविधानंतुपुनरुज्जीवयत्यद" इति । क्त्वः क्त्वाप्रत्ययस्य हि यस्मात्कित्वं निजंस्वाभाविकमेवास्ति ततोमृडेत्यादिनाक्त्वाप्रत्ययस्यकित्वकथनमयुक्तं तथापि

दृश्यंतेहि मृडमृदेत्याद्याःप्रतिप्रसवार्थविधयः । तस्मात् "धर्मिप्रमातृधर्मा
दिभेदान्नद्वैतगीर्वृथा । असिंहावाग्भिन्नशाखावाग्द्विप्रणयनादिवत्" अहिंसा

नक्त्वासेडितियत्कित्वंनिराकृतं तद्बाध(कभूतं)कंमृडेत्यादिविधानं अदःकित्वं पुनरुज्जीवयतीत्यर्थः । "स्वतएवकितःक्त्वायाः किद्वाचोऽनर्थकत्वतः । सेटःक्त्वायाःकिन्निषेधनिषेधार्थत्वमास्थित" मित्यपिपठंति । संगृह्णाति ॥ तस्मादिति ॥ प्रत्यक्षाविषयेधर्मिणिसत्यत्वबोधनायधर्मिभेदः विप्रतिपत्त्यादिनाप्रत्यक्षेणयेनसत्त्वंनगृहीतंतत्रतद्बोधनायप्रमातृभेदः प्रत्यक्षगृहीतव्यावहारिकसत्त्वभि(न्नतात्विकस)न्नाव्यावहारिकसत्त्वरूपधर्मग्रहायधर्मभेदः आदिपदेनदार्ढ्यार्थत्वप्रतिप्रसवयोर्ग्रहणं । नहिंस्यादित्यहिंसावाग्वद्धर्मिभेदः भिन्नशाखावाग्वत्एकार्थकनानाशाखागतवाग्वत्प्रमातृभेदः द्विप्रणयनादिवत्धर्मभेदइतिविवेकः । ॥ १५९ ॥

317

प्रमाणं अबाधितार्थग्राहकमित्यर्थः ॥ तद्बाधइति ॥ विरुद्धयोर्द्वयोरप्यबाधितार्थत्वानुपपत्तेरित्यर्थः ॥ नचेदिति ॥ प्रमितप्रमापकत्वाभावादित्यर्थः । अननुवादकत्वमेवदर्शयति ॥ श्रुतेरिति ॥ अननुवादकत्वोपपादनायप्रत्यक्षाप्राप्तेत्युक्तं । सदर्थत्वोपपादनायतात्विकसत्त्वेत्युक्तमितियथायोग्यंसंबंधोद्रष्टव्यः । प्रमाणस्याप्यप्रमाणप्राप्तानुवादकत्वमस्त्वित्यतआह ॥ नहीति ॥ येनभ्रमप्राप्तानुवादकत्वंप्रमाणस्यस्यादितिभावः ॥ यथेति ॥ द्वैतग्राहिप्रत्यक्षंअद्वैतश्रुतिविषयापहारकंयथानभवति

किंचप्रत्यक्षंप्रमाणंचेत्तद्बाधोमिथ्यात्वानुमानादेः नचेत्कथंसत्वश्रुतिरनुवादः । श्रुतेःसदर्थत्वाया
ऽननुवादकत्वायचप्रत्यक्षाऽप्राप्ततात्विकसत्वविषयकत्वोपपत्तेः । नहिप्रमाभ्रमयोरेकविषयता ।
किंच "यथानापहरेत्द्वैताभावश्रुत्यर्थमक्षधीः । तथानोपहरेद्द्वैतश्रुत्यर्थमपिदुर्बला"। प्रत्यक्षंप्रमाणत्वे
ननिश्चितंचेत्तद्बाधोमिथ्यात्वानुमानादेः अनिश्चितंचेत्प्रत्यक्षंमिथ्यात्वश्रुतिविषयापहारइवसत्व
श्रुतिविषयापहारेप्यशक्तं स्वप्रामाण्यनिर्णयायश्रुतिसंवादापेक्षंसन्नश्रुत्यऽनुवादकत्वापादकं ।

दुर्बलत्वात् तथाद्वैतश्रुत्यर्थं भेदमपि नोपहरेत् नप्रापयेत् । कारिकार्थमेवाह ॥ प्रत्यक्षमित्यादिना ॥ पूर्वंप्रमाणत्वेदोषउक्तः इदानींतन्निश्चयेदोषउच्यतइतिभेदः । तदेवविशदयति ॥ स्वप्रामाण्येति ॥ नन्वेवंचेत्स्पार्शनप्रत्यक्षेणहिमभेषजत्वरूपोयस्तस्यगृहीतत्वात्तत्प्रतिपादकाग्निर्हिमस्यभेषजमितिश्रुतेरनुवादकत्वंसर्वसंमतंनस्यात् तत्रापिप्रत्यक्षस्यदुर्बलत्वेनाग्निर्हिमस्यभेषजमि

SGDF Sri Gurgaonkar Digital Foundation

318

तिश्रुतिविषयापहारकंनभवति स्वप्रामाण्यनिर्णयायश्रुतिसंवादापेक्षंसत्नश्रुत्यनुवादकत्वापादकमितिवक्तुंसुशकत्वादित्यतआह
॥ अद्ध्यौष्ण्येति ॥ प्रमाणाप्रमाणयोरेकविषयकत्वाभावेनापूर्वताप्राप्त्याविधायकमेवतन्नानुवादकमितिभावः ॥ अन्यथेति ॥
विश्वसत्यत्वश्रुतेःप्रत्यक्षप्राप्तसत्यत्वानुवादकत्वइत्यर्थः । ननुब्रह्मसत्त्वस्याप्राप्तत्वात्कथमनुवादकत्वमित्यतआह ॥ ब्रह्मसत्त्व
स्येति ॥ लोकतइति ॥ सत्सुखस्फुरणमितिप्रत्यक्षेणेत्यर्थः । नचब्रह्मत्वसामानाधिकरण्येनसत्त्वंनप्रत्यक्षसिद्धमितिवाच्यं ।
स्फुरणत्वस्यैवब्रह्मत्वादितिभावः ॥ भ्रमेति ॥ यद्भ्रमाधिष्ठानंतत्सदितिदर्शनात्जगद्भ्रमाधिष्ठानंब्रह्मसदितित्वद्रीत्यानुमानेने

अद्ध्यौष्ण्यप्रत्यक्षस्यप्रामाण्यानिश्चयेऽग्निर्हिमस्यभेषजमित्यादिरप्यनुवादोनस्यादेव । अन्य
था"सत्यंज्ञानं नेहनाने"त्यादिश्रुतिरप्यऽनुवादिनीस्यात् । ब्रह्मसत्वस्यलोकतोभ्रमाधिष्ठान
त्वादिलिंगेनचविश्वमिथ्यात्वस्यचदृश्यत्वाद्यनुमानेनाऽवेदमूलप्रवाहानादिविज्ञानवादादि
नाचप्राप्तेः । उक्ताहिमंत्राधिकरणेमंत्रलिंगप्राप्तबोधकस्यापितदर्थशास्त्रस्याऽनुवादकता ।

त्यर्थः । विश्वमिथ्यात्वप्रतिपादिकायानेहनानेतिश्रुतेरनुवादित्वमुपपादयति ॥ विश्वेति ॥ नन्वनादिश्रुतेःकथंवादिप्राप्तानुवा
दित्वमित्यतउक्तं ॥ प्रवाहानादीति ॥ यथोक्तं "अनादिकालतोवृत्तास्समयाहिप्रवाहत" इति । तस्यवेदमूलकत्वेवेदानुप्रवे
शेनवेदस्यनतत्प्राप्तानुवादकत्वमतउक्तं ॥ अवेदमूलेति ॥ नन्वनु[redacted]प्राप्तानुवादकत्वंश्रुतेःकुत्रापिनदृष्टमितिचेत्तत्राह ॥
उक्ताहीति ॥ प्रमाणलक्षणे "तदर्थशास्त्रादि" तिसूत्रइत्यर्थः ॥ तदर्थेति ॥ तदर्थश्रुतिविनियोगार्थंयच्छास्त्रंतत्तदर्थशास्त्रं

मान

SGDF Sri Gargeshwari Digital Foundation

ब्राह्मणंतस्येत्यर्थः । “उरुप्रथस्वउरुतेयज्ञपतिःप्रथतामितिपुरोडाशंप्रथयतीति” श्रूयते तत्रउरुप्रथस्वेतिमंत्रविनियोजकंयत् “इतिपुरोडाशंप्रथयती” तिब्राह्मणवाक्यंतदनुवादकंनवेतिसंदेहेअननुवादकमेव अन्यथावैयर्थ्यापत्तेरितिप्राप्तेपुरोडाशप्रथनाभिधानरूपमंत्रगतलिंगेनपुरोडाशप्रथनरूपेऽर्थेउर्विंतिमंत्रविनियोगस्यसिद्धत्वात् “इतिपुरोडाशंप्रथयती” तिब्राह्मणरूपतदर्थशास्त्रस्यानुवादकत्वंयुक्तमित्यर्थः । तर्हिवैयर्थ्यमितिनवाच्यं । उच्चारणमात्रेणादृष्टार्थत्वादितिप्रथमाध्यायस्यद्वितीयचरणेऽभि ३१९

उक्ताचत्वयैवेक्षत्यधिकरणेसदेवेत्यादिवाक्यस्यप्रधानपरत्वेसांख्यस्मृतिप्राप्तानुवादिता । किंचसत्वश्रुतेःसत्वप्रत्यक्षानपेक्षत्वान्नसापेक्षानुवादत्वं निरपेक्षानुवादित्वंतुधारावाहिकज्ञानइवनाप्रामाण्यहेतुः । उक्तंहिनयविवेके “सापेक्षानुवादेहिनप्रमितिः नतुदैवादनुवादेधारावाहिकवदि” ति । उक्तंचवाचस्पत्ये “यत्रतुप्रमाणांतरसंवादःतत्रप्रमाणांतरादिवार्थवादादपिसोऽर्थःप्रसिद्ध्यति

हितं । उक्तंचशास्त्रदीपिकायां “यदिदृष्टार्थतैवस्यान्मंत्राम्नानमनर्थकं । प्रत्यायनाददृष्टंचेत्तदुच्चारणतोवर” मिति[1] । अनुवादकत्वभियाश्रुतेरपूर्वार्थत्वंत्वयाप्यंगीकृतमित्याह ॥ उक्ताचेति ॥ एवमनुवादित्वमुक्त्वाब्रह्मपरत्वमुक्तमित्याशयः । किंचसत्त्वश्रुतेःसापेक्षानुवादित्वंवानिरपेक्षानुवादित्वंवा नाद्यइत्याह ॥ किंचसत्त्वश्रुतेरिति ॥ द्वितीयेत्वाह ॥ निरपेक्षेति ॥ धारावाहिकेति ॥ उत्तरज्ञानेनस्वार्थेविषयीकरणीये नपूर्वज्ञानापेक्षा । पूर्वज्ञानगृहीतार्थविषयकत्वमात्रेणानुवादकत्वंत्वस्ति तन्ना

1 अत्र किंचित्त्रुटितमिव भाति तरंगिणी पश्यत ॥

SGDF
Sri Gargeshwari Digital Foundation

प्रामाण्यकारणं तद्वदि(त्यर्थः)तिभावः । नप्रमितिःअप्रामाण्यं दैवादनुवादे निरपेक्षानुवादे धारावाहिकवत्प्रामाण्यमित्यर्थः ।
नचधारावाहिकस्थलेपिविशेषणज्ञानत्वेनपूर्वपूर्वज्ञानापेक्षेतिवाच्यं। आद्यविशेषणज्ञानस्यैकस्यैवउत्तरभाविसर्वविशिष्टज्ञानहेतुत्वो
पपत्तेः । अतोनिरपेक्षानुवादकत्वंधारावाहिकस्थलइतिसंप्रदायः । संवादः निरपेक्षानुवादकत्वं । अर्थवादात् अनुवादात् अनु
वादवाक्यात् प्रसिद्ध्यतीति । तथाचप्रामाण्यमेवेतिभावः । निरपेक्षानुवादित्वमेवोपपादयति ॥ द्वयोरिति ॥ संवादसंवादि
प्रमाणयोः परस्परानपेक्षयोरेवैकत्रार्थेप्रवृत्तेः । तत्रदृष्टांतःप्रत्यक्षेति ॥ प्रमात्रिति ॥ प्रमाणयोःपरस्परनिरपेक्षतयैवस्वार्थप्रति

द्वयोःपरस्परानपेक्षयोःप्रत्यक्षानुमानयोरिवैकत्रार्थेप्रवृत्तेः प्रमात्रपेक्षयात्वनुवादत्वं प्रमा
ताह्यव्युत्पन्नःप्रथमंयथाप्रत्यक्षादिभ्योऽर्थमवगच्छति नतथाऽऽम्नायत"स्तत्रव्युत्पत्त्यपे
क्षत्वादि" ति । किंचवादिविप्रतिपत्तिनिरासार्थत्वान्ननिष्प्रयोजनानुवादत्वं । सप्रयो
जनानुवादत्वंतुविद्वद्वाक्यइवस्वार्थपरत्वाविरोधि । अतएवमीमांसकैर्विद्वद्वाक्यस्य

पादकत्वान्नानुवादकत्वेनाप्रामाण्यं प्रमात्रपेक्षयाप्राप्तमनुवादकत्वंत्वस्त्वित्यर्थः । तदुपपादयति ॥ प्रमाताहीति ॥ व्युत्पत्त्य
नंतरमर्थावगमेतंप्रतिप्रत्यक्षादिसिद्धार्थबोधकतयानुवादकत्वंस्यादेवेत्यर्थः । तथाचनिरपेक्षानुवादित्वंत्वप्रामाण्यसाधकंनभव
तीतिवाचस्पतेःसंमतमितिफलितोर्थः । किंचसत्त्वश्रुतेर्निष्प्रयोजनानुवादित्वं सप्रयोजनानुवादित्वंवा नाद्यइत्याह॥वादीति ॥ ॥ १६१ ॥
द्वितीयेत्वाह ॥ सप्रयोजनेति ॥ मीमांसकैरिति ॥ द्वितीयाध्यायेद्वितीयपादेर्चिंतितं । "प्रकरणंतुपौर्णमास्यांरूपावचना

२-२-३

दि" त्यत्रयदाग्नेयोष्टकपालोमावास्यांपौर्णमास्यांवाच्युतोभवति|तावब्रूतामग्नीषोमावाज्यस्यैवनोपांशुपौर्णमास्यांयजन्नैंद्रंदधिअमा (नानुपांशु)
वास्याया" मिति तत्राग्नेयःऐंद्रंदधिऐंद्रंपयःइत्यमावास्याकालसंबंधियागत्रिकं आग्नेयःआज्यभागःउपांशुयागश्चेतिपौर्णमासी
कालसंबंधियागत्रिकंविहितं । एतत्सन्निधौ "यएवंविद्वान्पौर्णमासींयजते यएवंविद्वानमावास्यांयजत" इतिवाक्यद्वयंश्रुतं । त
था "दर्शपौर्णमासाभ्यांस्वर्गकामोयजेते" तिचश्रुतं । तत्रयएवंविद्वानितिविद्वद्वाक्येसंदेहः यएवंविद्वानितिवाक्याभ्यांपौर्णमा
स्यामावास्यासंज्ञकौयागांतरौविधीयेते उतपूर्वप्राप्तामावास्यात्रिकपौर्णमासत्रिकानुवादएवक्रियतेइतिसंदेहेऽनुवादस्यव्यर्थत्वात्
अपूर्वयागांतरविधायकावितिपूर्वपक्षेपूर्वप्राप्तषड्यागानुवादित्वमेव । नचैवंप्रयोजनाभावादनुवादवैयर्थ्यमितिवाच्यं । पूर्वप्राप्त

समुदायद्वित्वापादनरूपप्रयोजनवत्वेनानुवाद्यस्वार्थपरत्वाद्वाक्यैकवाक्यतोक्ता ।

दर्शपौर्णमासानुवादेनफलविधायके "दर्शपौर्णमासाभ्या" मितिवाक्येद्विवचनप्रयोगोस्ति । सचपूर्वप्राप्तषड्यागेष्वयुक्तःअतः
फलवाक्येद्विवचनेनसम्यग्व्यवहारोपपत्त्यर्थंषण्णांयागानांद्वित्वंसंपाद्यतेऽनेनवाक्येन । अमावास्यापौर्णमास्यासंबंधिनआग्नेया
दिषड्यागान्त्रिकत्वेनत्रिकत्वेनैकीकृत्य "यएवंविद्वान्पौर्णमासींयजते अमावास्यांयजत" इत्युक्तमितिसिद्धांतितं॥ समुदायेति ॥
षड्यागरूपसमुदायस्यद्वित्वापादनरूपप्रयोजनसद्भावादित्यर्थः । तदपिद्वित्वापादनंदर्शपौर्णमासाभ्यामितिफलवाक्येद्वित्वोप
पत्त्यर्थमितिज्ञातव्यं । एवंचपौर्णमासामावास्यायागसमुदायस्यविद्वद्वाक्यनिष्पन्नार्थस्यदर्शाख्येनसमुदायेनपौर्णमासाख्यसमु

'ऐन्द्रं पयोऽमावास्यायाम् इति' पूरणीयम्

SGDF Sri Gargeshwari Digital Foundation

दायेनफलकामइष्टिंकुर्यादितिफलवाक्येनान्वयाद्विद्वद्वाक्यस्यफलवाक्येनैकवाक्यत्वमुक्तमित्यर्थः ॥ स्वार्थेति ॥ यथा "वायु वैक्षेपिष्ठादेवते" त्यादीनांअवांतरप्राप्तमनुवदतांअनुवाद्यस्वार्थेतात्पर्याभावेनावांतरवाक्यार्थमनादृत्य(आलभेते)तिपदप्रतिपाद्या लंभनेप्राशस्त्यबोधकतया(पदैक)तदेकवाक्यतोच्यते । तथाविद्वद्वाक्येपिफलवाक्योक्तद्वित्वसंपादनेनानुवाद्यस्वार्थपरत्वाभावे "स्वर्गकामोयजेते" तिवाक्येयजेतेतिपदप्रतिपाद्ययागरूपार्थप्राशस्त्यबोधकतयापदैकवाक्यतैवोच्येतेत्यर्थः । किंचायमनुवादः

स्वार्थपरत्वाभावेह्यर्थवादवत्पदैकवाक्यतोच्येत । किंचानुवादत्वेपिनैष्फल्यमात्रंनत्वप्रामाण्यं याथार्थ्यमेवप्रामाण्यंनत्वनधिगतार्थत्वमित्यन्यत्रोक्तत्वात् । किंचायमनुवादोनतावद्वायुक्षेपिष्ठादिवाक्यवत्स्तुत्यर्थः। नापि "दध्नाजुहोती" त्यत्रजुहोतिरिवान्यविधानार्थः विधानाय प्रमाणानूदितस्यतात्विकत्वनियमात् । नहि "व्रीहीन्प्रोक्षती" त्यादावारोपितव्रीह्यादेर्धीः।

स्तुत्यर्थोवान्यविधानार्थोवानिषेधार्थोवा । नाद्यइत्याह ॥ किंचायमिति ॥ विश्वंसत्यमित्यनुवादइत्यर्थः । "वायव्यंश्वेतमालभेतभूतिकामोवायुर्वैक्षेपिष्ठादेवते" त्यादौइत्थं वायव्यश्वेतपश्वालंभःप्रशस्तः यतःशीघ्रगामिनीवायुदेवतेत्यादिवत्स्तुतेरत्राभावादित्यर्थः । नापिद्वितीयइत्याह ॥ नापीति ॥ "दध्नाजुहोती" त्यत्रजुहोतीतियत्तद्दध्नेतिदधिरूपगुणविधानायजुहोत्यनुवादोयथा तथान्यविधानार्थोनभवतीत्यर्थः । कुतोनेत्यतआह ॥ विधानायेति ॥ कुतोयंनियमइत्यतआह ॥ नहीति ॥

SGDF Sri Gargeshwari Digital Foundation

व्रीहीनितिप्रमाणवाक्यंप्रत्यक्षप्राप्तव्रीह्यनुवादेनप्रोक्षणंविधत्ते । एवंचप्रमाणानूदितस्यव्रीह्यादेस्तात्विकत्वनियमान्नारोपितत्वमि त्यर्थः । आद्यादिपदेनदध्नाजुहोतीत्यादेर्ग्रहणं । द्वितीयादिपदेनहोमादेरितिज्ञेयं । अस्त्वारोपितव्रीह्यादेरेवधीरित्यतआह ॥ अनुवाद्यस्येति ॥ अनुवाद्यस्यासत्त्वेऽनुवाद्यविधेयसंसर्गरूपवाक्यार्थोबाधितःस्यादित्यन्वयः । तत्रदृष्टांतआश्रयासिद्धावि त्यादि । नापितृतीयइत्याह ॥ नापीति ॥ तत्रैवेति ॥ नेहनानास्तिकिंचनेतिवाक्येकिंचनेत्यनेनैवसर्वानुवादोपपत्तेस्तदर्थंपृ ३२३

अनुवाद्यस्यासत्वेह्याश्रयासिद्धौधर्मिधर्मसंसर्गरूपानुमितिवेद्यइवाऽनुवाद्यविधेयसं
सर्गरूपवाक्यार्थोबाधितःस्यात् । नापिनेहनानेतिनिषेधार्थः । तत्रैवकिंचनेत्यनु
वादकांशस्यसत्वात् । नहि "नसुरांपिबेदि" तिनिषेधायसुरांपिबेदितिवाक्यां
तरमपेक्षितं । अत्रचापश्चनप्रमिनंतीत्यलौकिकस्यप्रमाणस्याविधेयस्यसत्वाच्च ।

थक्विश्वंसत्यमितिवाक्यांतरमनपेक्षितमित्यर्थः । तदेवदृष्टांतेनोपपादयति ॥ नहीति ॥ वाक्यांतरं अनुवादकभूतं । तत्रसु रामित्यस्यैवानुवादकांशत्वादितिभावः । किंचनेहनानेतिनिषेधार्थोयमनुवादोनभवतिकिंनामविधानार्थएव । विश्वंसत्यमिति न्या. श्री. २८ वाक्येएववांव्रतंतत्सर्जनादिकं । आपश्चनआपोपि सर्वदेवताअपि प्रमिनंतिजानंतीत्येवं पारमेश्वरसृष्ट्यादेस्सत्यत्वेनज्ञानंसर्वदे वानामप्यस्तीतिसर्वदेवसंबंधितादृशज्ञानरूपस्यालौकिकप्रमाणस्योक्तेरित्याह ॥ अत्रचेति ॥ विश्वंसत्यमितिवाक्यइत्यर्थः ॥

SGDF
Sri Gargeshwari Digital Foundation

यत्तन्नेतीति ॥ यत्तन्नेत्येवंनिषेधार्थानुवादलिंगस्यएकस्याप्यभावादित्यर्थः । तदभावेपि तदनुवादलिंगाभावेपि । ननुतत्सत्य मित्यादिवाक्यंनब्रह्मसत्तानुवादकं । तस्यामानांतराप्राप्तत्वादित्यतआह ॥ **सर्वेति** ॥ व्यवस्थिते अनुस्यूते । तथाचब्रह्मणः सर्वप्रत्ययवेद्यत्वेनसन्घटइत्यत्रब्रह्मसत्त्वस्यप्रत्यक्षेणप्राप्तत्वात्तत्सत्यमित्यादेरनुवादकत्वंयुक्तमित्यर्थः । विशिष्टस्यैवसर्वप्रत्ययवेद्यत्वंनशुद्धस्येतिशंकामपाकर्तुमुत्तरार्धः(उदाहृतः)प्रवृत्तः । प्रपंचविलयाधिष्ठानत्वेनसर्वप्रत्ययवेद्यस्यशुद्धत्वादितिभावः ॥

यत्तन्नेत्यादिनिषेधार्थानुवादलिंगाभावाच्च । तदभावेपिनिषेधायानुवादे "तत्सत्य" मित्याद्यपि "नसत्तन्नासदुच्यतेअसद्वाइदमग्रआसीदि" तिनिषेधायब्रह्मसत्तानुवादकंस्यात्। "सर्वप्रत्ययवेद्ये चब्रह्मरूपेव्यवस्थिते। प्रपंचस्यप्रविलयःशब्देनप्रतिपाद्यत" इतिमंडनोक्त्यासन्घटइत्यत्रापिब्रह्मसत्ताप्रतीतेः। "परागर्थप्रमेयेषुयाफलत्वेनसंमता। संवित्सैवेहमेयोर्थोवेदांतोक्तिप्रमाणत" इतिसुरेश्वरोक्त्यासद्घटज्ञानमित्यत्रापितत्प्रतीतेश्च। सत्सुखस्फुरणंअज्ञोस्मीत्यादौतुतत्प्रतीतौनविवादः।

परागर्थेति ॥ घटज्ञानस्यब्रह्मज्ञानत्वोपपादनायेदंवाक्यांतरं परागर्थाःप्रत्यगर्थाःतद्रूपाणियानिप्रमेयानितेषुफलभूतायासंवित् घटादिभासकंचैतन्यंतदेववेदांतवाक्यरूपप्रमाणस्यप्रमेयं । तथाचघटज्ञानस्यब्रह्मज्ञानत्वात्सत्पटज्ञानमित्यत्रब्रह्मसत्ताप्रतीयतइत्यर्थः । ननुघटावच्छिन्नचैतन्यरूपेब्रह्मणिसत्त्वप्रतीतावपिनशुद्धेतत्प्रतीतिरित्यतस्तदंगीकृत्यदूषणांतरमाह ॥ **सदिति** ॥ तत्प्रतीतौ ब्रह्मसत्ताप्रतीतौ । कुतइत्यतआह ॥ **शुद्धेति** ॥ अज्ञोस्मीत्यत्रकथंब्रह्मसत्ताप्रतीयतइत्यतआह ॥ **अज्ञानादीति** ॥ अज्ञोस्मीत्यस्याज्ञानंमय्यस्तीत्यर्थः । तथाचाऽज्ञानाधिष्ठानचैतन्येअस्तीतिसत्ताप्रतीयतइत्यर्थः । नन्वत्रापिविशिष्टेऽज्ञानविशिष्टेचसत्ताप्रतीयतेनकेवलेइत्यतआह ॥ **अधिकेति** ॥ **चिदस्फुरणाभावादिति** ॥ विशिष्टेविशेष्यांशसद्भावादितिभावः । ननुसत्सुखस्फुरणमित्यादौब्रह्मशब्दोल्लेखाभावेनब्रह्मणिसत्त्वंनप्रतीयतइतिचेत्तत्राह ॥ **ब्रह्मशब्देति** ॥ यत्रब्रह्मशब्दोल्लेखोस्ति "सत्यंज्ञानमनंतंब्रह्मे" तितत्रापिब्रह्मणिसत्त्वंनप्रतीयतएव । "अथकस्मादुच्यतेब्रह्मेतिबृहंतोह्यस्मिन्गुणा" इतिश्रुतेर्ब्रह्मशब्द

325

शुद्धचितएवसुखस्फुरणत्वात्अज्ञानाद्यध्यासाधिष्ठानत्वाच्च। अधिकस्फुरणेपिचिदस्फुरणाभावात् । ब्रह्मशब्दानुल्लेखेपिअखंडार्थनिष्ठवाक्यबोध्यंयत्ब्रह्मतत्सत्वप्रतीतेः। एवमानंदश्रुतिरपिअदुःखमसुखंसममित्यादिनिषेधायप्रत्यक्षप्राप्तानंदानुवादिनीस्यात् ।

स्यगुणविशिष्टवाचित्वात्तस्यचमिथ्यात्वेनतत्रसत्यत्वबोधनस्यबाधिततयालक्षणयाब्रह्मचैतन्यमात्रपरत्वमेवांगीकृतं । वेदांतानामखंडार्थनिष्ठत्वेनवेदांतवाक्यबोध्यार्थस्यब्रह्मणोऽखंडत्वांगीकारात् यदाब्रह्मशब्दोल्लेखस्थलेइत्थंगतिस्तदासत्सुखस्फुरणंमय्यज्ञानमस्तीत्यत्रापिब्रह्मशब्दोल्लेखाभावेपिसुखाज्ञानविशिष्टेसत्तायाबाधितत्वेनलक्षणयाऽखंडार्थनिष्ठवेदांतवाक्यबोध्यंयद्ब्रह्मचैतन्यंतत्सत्त्वमेवप्रतीयते । विशिष्टेविशेष्यांशसद्भावादित्येववक्तव्यमितिभावः ॥ **प्रत्यक्षेति** ॥ सुखंसुप्तोस्मीतिसाक्षिप्रत्यक्षेत्यर्थः ॥

॥ १६३ ॥

SGDF
Sri Gargeshwari Digital Foundation

किंचैवमिति ॥ अबाध्यत्वरूपोयोबाधनिषेधस्तदर्थमित्यर्थः । विज्ञानवादिरीत्याप्राप्तंयत्प्रतिपन्नोपाधौनिषेधप्रतियोगित्वरूपं बाध्यत्वंतन्नेहनानेतिवाक्येनाऽनूद्यविश्वंसत्यमितिवाक्येनाऽबाध्यत्वरूपबाधनिषे(धबोधकेननिषिध्यते)धेप्रतिपादितेबाध्यत्वंनि षिध्यतइत्यपिस्यादित्याशयः ॥ स्वर्गनरकादेरिति ॥ स(त्य)त्वस्येतिशेषः । विश्वांतर्गतातींद्रियधर्मादिपदार्थसत्यत्वस्यप्रत्य

किंचैवंनेहनानेतिश्रुतिरेवविश्वंसत्यमित्यबाध्यत्वरूपबाधनिषेधायविज्ञानवादादिप्राप्तवि श्वबाधानुवादिनीकिंनस्यात् । किंचधर्माधर्मस्वर्गनरकादेर्नप्रत्यक्षादिनाप्राप्तिः।शब्दप्राप्तस्य शब्देननिषेधायानुवादेएतच्छास्त्रास्थाग्नीषोमीयवाक्यस्यनहिंस्यादितिनिषेधायशास्त्रांत रोक्ताग्नीषोमीयहिंसानुवादित्वंस्यात् । सत्यंज्ञानमित्यादेरपिइदंवाअग्रेनैवकिंचनासीदि तिनिषेधायतत्सत्यमित्यादिवाक्योक्तब्रह्मसत्तानुवादित्वंस्यात्। तस्मान्नानुवादिनीश्रुतिः । नापिव्यावहारिकसत्वपरा वैय्यर्थ्यात् नहिकोपिप्रपंचेव्यावहारिकसत्यतांनोपैति ।

क्षादिनाऽप्राप्तत्वेपिशब्दतएवप्राप्तिसंभवाच्छब्दप्राप्तधर्मादिसत्यत्वंनेहनानेतिनिषेधायविश्वंसत्यमित्यनेनाऽनूद्यतइत्यतआह ॥ शब्देति ॥ अतिप्रसंगांतरमाह ॥ सत्यमिति ॥ अनुवादित्वनिराकरणमुपसंहरति ॥ तस्मादिति ॥ वैयर्थ्यमेवोपपादयति ॥ नहीति ॥ येनसंप्रति "विश्वंसत्य" मितिवाक्येनव्यावहारिकसत्यत्वंबोधनीयंस्यात् बौद्धादिमतेपिजगतिव्यावहारिकसत्त्वा

SGDF
Sri Gargeshwari Digital Foundation

परपर्यायसांवृतसत्त्वसद्भावादितिभावः । प्रपंचेसर्वांगीकृतमपिव्यावहारिकसत्यत्वंश्रुतिःप्रतिपादयत्विवितिचेत्तत्राह ॥ अप्राप्ते चेति ॥ तथाचापूर्वताभंगइतिभावः ॥ इष्टापत्तिरिति ॥ श्रुतेरबाध्यसत्त्वप्रतिपादकत्वमस्माकमपिसंमतमितिभावः ॥ बाध्योक्ताविति ॥ बाध्यसत्त्वप्रतिपादकत्वइत्यर्थः ॥ श्रुतिरिति ॥ श्रुतिप्रतिपादितसत्वस्यबाध्यत्वेभ्रांतिहेतुत्वेनातत्वावेदकतयाऽप्रामाण्यंप्राप्तंनेदंवाक्यांतराप्रामाण्यतुल्यंकिंत्वित्यतउक्तं ॥ चिरेति ॥ अनादिकालानुवृत्तेत्यर्थः ॥ दृढेति ॥ ब्रह्मज्ञानात्प्राग्बाधाभावेनेत्यर्थः । अतएवात्यंताप्रामाण्यं रज्जुसर्पादिविज्ञानादप्याधिक्येनस्वकार्यहेतुभ्रांत्यतिशयजनकत्वादितिद्रष्टव्यं । 327

अप्राप्तेचशास्त्रमर्थवत् । किंचव्यावहारिकशब्देनाबाध्योक्ताविष्टापत्तिः । बाध्योक्तौश्रुतिश्चिरानुवृत्तदृढभ्रांतिहेतुत्वेनात्यंताप्रमाणंस्यात् । नचमिथ्यात्वश्रुतिविरोधात्तदिष्टं । त्वत्पक्षेतस्यालक्षणयाअखंडचिन्मात्रपरत्वेनजगत्सत्वाविरोधित्वात् ।

यथोक्तं "दीर्घभ्रांतिकरीचेत्स्यादतत्वावेदकप्रमा । रज्जुसर्पादिविज्ञानादाधिक्यादप्रमामते"ति ॥ नचेति ॥ मिथ्यात्वश्रुतेःप्रामाण्यांगीकारेणब्रह्मेतरसर्वमिथ्यात्वप्रतिपादकश्रुतिविरोधात्तदप्रामाण्यमिष्टमेवेत्यर्थः ॥ त्वत्पक्षइति ॥ त्वन्मतेजगन्मिथ्यात्वप्रतिपादकश्रुतिरेवनास्ति सर्वश्रुतेरपिलक्षणयाचिन्मात्रपरत्वात् मिथ्यात्वस्यापिश्रुतिप्रतिपाद्यत्वांगीकारेब्रह्मप्रतिपादनमात्रपरत्वादिरूपाखंडार्थत्वहानेरित्यर्थः । नचमिथ्यात्वेऽवांतरतात्पर्यमस्तिमहातात्पर्यंचिन्मात्रएवेतिवाच्यं । अवांतरतात्पर्यविषय

SGDF
Sri Gargeshwari Digital Foundation

स्यापितात्विकत्वांगीकारात् धर्मादेरिवमिथ्यात्वस्यापिअतात्विकत्वापातेनश्रुतेरतत्वावेदकत्वंस्यादित्यादिवक्ष्यामइतिभावः । नेहनानेतिश्रुतिविरोधाद्विश्वंसत्यमित्यादिश्रुतेर्व्यावहारिकसत्त्वपरत्वेऽतिप्रसंगमाह ॥ **असद्वाइत्यादिना** ॥ ब्रह्मादिसर्वासत्त्वप्रतिपादकश्रुतिविरोधात्तत्सत्यमितिश्रुतेःप्रातिभासिकसत्त्वपरत्वादित्यर्थः ॥ **सुवचत्वादिति** ॥ श्रुतित्वाविशेषादित्यर्थः ॥ **प्रबलमिति** ॥ तथाचाद्वैतस्यसत्यत्वेनतच्छ्रुतेर्नद्वैतसत्त्वश्रुतिविरोधेनाप्रामाण्यमितिभावः । कुतःप्रबलंनचेत्यतआह ॥

असद्वाइत्यादिश्रुतिविरोधेनतत्सत्यमित्यादेरपिप्रातिभासिकसत्वपरत्वापाताच्च । सत्वश्रुतिविरोधेनमिथ्यात्वश्रुतिरेवाप्रमाणमित्यपिसुवचत्वाच्च । नचषड्विधतात्पर्यलिंगवत्त्वादद्वैतवाक्यंप्रबलं । लिंगानिहितात्पर्यज्ञापकानि नत्वर्थतथात्वस्य । अस्तिचात्रापिवाक्यशेषेआपश्चनप्रमिनंतीतिप्रामाणिकत्वरूपा । नमोघमित्यर्थक्रियाकारित्वरूपाचोपपत्तिस्तात्पर्यलिंगं । लिंगबहुत्वंतुत्वत्पक्षेप्रमाणबाहुल्यवद्व्यर्थमित्युक्तं ।

लिंगानिहीति ॥ तथाचतात्पर्यलिंगैरद्वैतसत्त्वंनसिद्ध्यति । उपक्रमादिलिंगैस्तात्पर्येसिद्धे । तथात्वंतुप्रमाणाविरोधेनैवनिश्चेयं प्रकृतेप्रमाणविरोधइतिभावः । "विश्वंसत्य" मित्यादिवाक्येपितात्पर्यलिंगमस्तीत्याह ॥ **अस्तिचेति** ॥ अस्मत्पक्षेषड्विधंतात्पर्यलिंगमस्तिभवत्पक्षेतूपपत्तिरूपमेकमेवेत्यतोवैषम्यमित्यतआह ॥ **लिंगेति** ॥ **व्यर्थमिति** ॥ अनुवादकत्वादितिभावः ॥ ॥ १६५ ॥

329

प्रत्यक्षेति ॥ प्रत्यक्षप्राप्तसत्त्वप्रतिपादकत्वेनापूर्वतायाअभावात्तद्विरोधेनमिथ्यात्वश्रुतेरप्रामाण्यंनास्तीतिभावः॥**तद्विरुद्धेति** ॥ प्रत्यक्षविरुद्धमिथ्यात्वप्रतिपादकत्वादेवस्वार्थपरानस्यादित्यर्थः । ननुमानांतरप्राप्तेरपूर्वताभंजकत्वेनातात्पर्यहेतुत्वंदृष्टं नतुमानांतरविरोधस्येत्यतआह ॥ **मानांतरेति** ॥ मानांतरप्राप्तार्थत्वेऽनधिगतार्थत्वहानिः । मानांतरविरुद्धार्थत्वेतुतथाभूतार्थत्वमेवनस्यादित्यर्थः ॥ **प्रत्यक्षेति** ॥ तथाचनमिथ्यात्वश्रुतेःप्रमाणांतरविरोधोस्त्यतोऽद्वैतवाक्यंप्रबलमितिभावः॥**तदगृहीतेति** ॥

यदिचसत्वश्रुतिःप्रत्यक्षप्राप्तार्थत्वान्नस्वार्थपरा तर्हिमिथ्यात्वश्रुतिरपितद्विरुद्धार्थत्वात्तथास्यात् मानांतरप्राप्तिवत्तद्विरोधस्याप्यतात्पर्यहेतुत्वात् । यदितुमिथ्यात्वश्रुतिःप्रत्यक्षागृहीतत्रिकालाबाध्यत्वनिषेधपरा [1] तर्हिसत्वश्रुतिरपितदगृहीततद्विधिपरास्तु । नचसुषुप्तौनिष्प्रपंचतायाःपुरुषार्थत्वदर्शनात्फलवत्संनिधावफलंतदंगमितिन्यायेननिष्प्रपंचवाक्यानुसारेणसप्रपंचवाक्यंनेयमितिविवरणोक्तंयुक्तं ।

त्रिकालाबाध्यत्वरूपसत्त्वस्यप्रत्यक्षेणागृहीतत्वादेवसत्त्वश्रुतेरनुवादकत्वाभावात्त्रिकालाबाध्यत्वरूपसत्त्वविधिपरैवास्त्वित्यर्थः ॥ **फलवदिति** ॥ प्रयाजज्योतिष्टोमादिवाक्यवदित्यर्थः । तथाचसुषुप्तौनिष्प्रपंचतायाःसुखत्वेनफलवत्त्वात्तद्बोधकास्थूलादिवाक्यस्यप्रधानार्थप्रतिपादकतुल्यत्वात्सप्रपंचसगुणवाक्यस्यनिष्फलप्रपं(चादि)चप्रतिपादकत्वेनप्रयाजाद्यंगवाक्यतुल्यतयाप्रधा

१ श्रुत्योः प्राबल्यप्रसंगेनास्योक्तत्वात् न 'धर्मादिभेदान्न द्वैतधीर्बुधेति' पौनरुक्त्यमिति भावः॥

SGDF
Sri Gargeshwari Digital Foundation

नवाक्यानुसारेणांगवाक्यस्यनेतव्यत्वादस्थूलादिप्रपंचनिषेधकवाक्यांनुसारेणसत्यत्वप्रतिपादकसप्रपंचवाक्यंस्तुत्यर्थकत्वेननेय मित्यर्थः ॥ तस्याइति ॥ निष्प्रपंचतायाइत्यर्थः । दुःखमात्रप्रतिस्मृतेरितिवचनेननिष्प्रपंचतायादुःखहेतुत्वेनफलवत्त्वव्यभि चारान्नपुरुषार्थत्वमित्यर्थः । तथाचफलवत्सन्निधावितिन्यायानवकाशइतिभावः । प्रपंचस्य विद्यमानस्य तथाचमूर्च्छायांनिष्प्र पंचतैवनास्तीतितस्याअपुरुषार्थत्वमित्यर्थः ॥ सममिति ॥ तथाचतत्रापिविद्यमानप्रपंचाज्ञानमेवनत्वभावः अतोनिष्प्रपंचता याःसुषुप्तावपिनफलवत्त्वमित्यर्थः । ननुनिष्प्रपंचतायाःप्रयोजनमुत्सर्गतःबाधकादपोद्यते मूर्च्छायामपिमन्मतेनिष्प्रपंचतैव त

तस्यामूर्च्छायामपुरुषार्थत्वस्यापिदर्शनात् । मूर्च्छायांप्रपंचस्याज्ञानमेवनत्वभावइतिचेत्
समंसुषुप्तावपि । यदिचमूर्च्छादुःखयोगेनैवापुरुषार्थः तर्हिसुषुप्तिरपिसुखयोगेनैवपुरुषार्थः।

थाचमूर्च्छायांप्रसक्तंनिष्प्रपंचतायाःपुरुषार्थत्वंदुःखयोगरूपाद्बाधकादपोद्यतइत्याशंक्याह ॥ यदिचेति ॥ मूर्च्छायांनिष्प्रपंच तादुःखयोगेनापुरुषार्थभूतेतियावत् । तर्हिसुषुप्तौनिष्प्रपंचतायाःपुरुषार्थत्वदर्शनादित्युक्तमयुक्तमित्याह ॥ तर्हीति ॥ सुषुप्तेर पिनप्रपंचाभावरूपफलेनपुरुषार्थत्वं तस्यपुरुषेणानर्थ्यत्वात् किंतुसुखयोगेनैवेत्यपिप्राप्यानिष्प्रपंचतायाःसुषुप्तौपुरुषार्थप्रदत्वमे वनास्तीतिननिष्प्रपंचताप्रधानतुल्येतिभावः । ननु "द्वितीयाद्वैभयंभवती"तिश्रुतेर्द्वितीयाभावरूपनिष्प्रपंचतायादुःखराहित्या पादकत्वेनपुरुषार्थत्वमेवेतिचेत् । "तस्मादेकाकीनरमत" इतिश्रुतेर्निष्प्रपंचतायाअपिदुःखहेतुत्वादपुरुषार्थत्वंस्यादित्याह ॥

१ इतआरभ्यकानिचित्पत्राणिप्रत्यंतरसंवादंविनाशोधितानि ।

330

SGDF Sri Gargeshwari Digital Foundation

अस्तिचेति ॥ नन्वेकधैवानुद्रष्टव्यमित्यादिवाक्यस्वारस्यादभेदज्ञानस्यैवमोक्षहेतुत्वान्निष्प्रपंचतैवपुरुषार्थइत्यतआह ॥ संति चेति ॥ तेन भेदज्ञानेन । तेन परमात्मनावा तुष्टः अलंबुद्धियुतः । ततः परमात्मनःप्रसादात् तथाचसप्रपंचतैवपुरुषार्थइति तदेवप्रधानमितितद्वाक्यानुसारेणैवनिष्प्रपंचवाक्यंअस्वातंत्र्यादिनार्थांतरेयोज्यमितिसिद्धमितिभावः । प्राबल्यं विधिरूपद्वैत

अस्तिच "द्वितीयाद्वैभयंभवती" तिश्रुतिरिवतस्मादेकाकीनरमतइत्यपिश्रुतिः । स तिचभेदज्ञानस्यमोक्षसाधनत्वे "पृथगात्मानंप्रेरितारंचमत्वातुष्टस्ततस्तेनामृतत्वमेती" जुष्ट त्याद्याःश्रुतयः । यदिचाद्वैतवाक्यस्यनिषेधवाक्यत्वात्प्राबल्यं तर्हि "क्तिचे" तिवृद्धिसूत्रात् "क्ङितिं" चेतितन्निषेधसूत्रस्याऽग्नीषोमीयवाक्यादहिंसावाक्यस्यषोड शिग्रहणवाक्यादग्रहणवाक्यस्यसत्यज्ञानादिवाक्यादसद्वाइत्यादिवाक्यस्यप्राबल्या पातेनाहिंसापारमार्थिकोधर्मःअग्नीषोमीयहिंसातुव्यावहारिकोधर्मइत्यादिस्यात् ।

वाक्यादितिशेषः । निषेधकवाक्यस्यैवप्राबल्येऽतिप्रसंगमाह ॥ तर्हीति ॥ क्तिचेति ॥ "क्ङिति चे" तिकितिङितिचप्रत्यये परेतन्निमित्तकगुणवृद्धीनस्तइतिसुप्तिङ्कृत्तद्धितसाधारणेकितिपरेवृद्धिर्निषिद्धा । तदपवादकतया "क्तिचे" तिकितितद्धिते परेपूर्ववृद्धिःस्यादितिवृद्धिर्विहितास्तिसानस्यादित्यर्थः । इत्यादीत्यादिपदेनग्रहणाग्रहणवाक्ययोरुभयोरपिसमत्वेनविकल्पएवा

331

SGDF
Sri Gargeshwari Digital Foundation

332

श्रितोमीमांसकैःसोपिनस्यादितिग्राह्यं। प्रत्युतद्वैतवाक्यस्यैवपूर्वंअद्वैतवाक्यात्प्राबल्यंप्रतिपादितमस्तीत्याह॥ प्रत्यक्षेति॥ अनुपसं जातेत्यादिन्यायःपूर्वमुक्तोऽनुसंधेयः। ननुमिथ्यात्वानुमानस्योक्तरीत्याविश्वंसत्यमित्याद्युदाहृतश्रुतिविरोधेपि "असत्यमप्रतिष्ठं ते नाभाव"इत्यादिस्मृतिसूत्रविरोधोनास्ति। सर्वजगदत्यंतासत्त्ववादिशून्यवादिनिंदार्थत्वात्स्मृतेः। सूत्रस्यापितदभिमतसर्वास त्त्वनिरासकत्वादित्याशंक्यनिराकरोति॥ नचेति॥ ननुशून्यवादिनस्सकाशात्तववैलक्षण्याभावेनतन्मतनिरासकसूत्राणांत्वन्मत

प्रत्यक्षप्राबल्यप्रस्तावेउक्तप्रकारेणाऽद्वैतवाक्यात्द्वैतवाक्यस्यानुपसंजातविरो धित्वशीघ्रगामित्वविशेषविषयत्वनिरवकाशत्वादिनाप्राबल्याच्च। नचस्मृतिसू त्रेशून्यवादिनिरासार्थे तन्मतेजगतोत्यंतासत्वात् मन्मतेअसद्विलक्षणत्वादि तिवाच्यं। अर्थक्रियाकारित्वादिनाशशशृंगादिवैलक्षण्यस्यतन्मतेपिसत्वात्।

निरासायोदाहरणेनदोषइत्यतआवयोर्मतवैलक्षण्यमस्तीत्याह॥तन्मतइति॥असद्विलक्षणत्वादिति॥ अर्थक्रियाद्यन्यथानुप पत्त्याऽसद्विलक्षणस्वरूपांगीकारादितिभावः। त्वदभिमतमसद्वैलक्षण्यंशून्यवादिमतेप्यस्तीत्याह॥ अर्थेति॥ शशशृंगादी ति॥ शशशृंगादिरूपासदित्यर्थः। तन्मतेपि शून्यवादिमतेपि। ननुजगतिप्रतिपन्नोपाधौत्रैकालिकनिषेधप्रतियोगित्वंमयांगी कृतमस्ति असतिशशशृंगादौतुनास्ति तस्यप्रतिपन्नोपाधेरभावात् अतोऽर्थक्रियाकारित्वादिनाऽसद्वैलक्षण्यस्यतन्मतेसत्त्वेपिप्र

॥ १६७ ॥

तिपन्नोपाधौत्रैकालिकनिषेधप्रतियोगित्वेनधर्मेणासद्वैलक्षण्यंमयांगीक्रियतइतिचेत्तत्राह॥ प्रतिपन्नोपाधाविति॥ त्वन्मते पीति॥ प्रतिपन्नोपाधौस्वरूपेणत्रैकालिकनिषेधप्रतियोगित्वांगीकारेशून्यवादिमतइवत्वन्मतेपिजगतोऽत्यंतासत्त्वमेवप्राप्तमिति शशशृंगवत्प्रतिपन्नोपाध्यभावएवप्राप्तोऽतःशून्यवादिनिरासकसूत्राणांत्वन्मतनिरासायोदाहरणंयुक्तमेवेतिभावः। किंचप्रतिप न्नोपाधौत्रैकालिकनिषेधप्रतियोगित्वंजगत्यंगीकृत्यासद्वैलक्षण्यंयद्युच्यते तर्हित्वन्मते "वैधर्म्याच्चनस्वप्नादिवदि" तिस्वप्नाद्वैध र्म्योक्तिरयुक्ता। स्वप्नस्यत्वन्मतेप्रातिभासिकत्वेनप्रतिपन्नोपाधौनिषेधप्रतियोगित्वसद्भावेनानेनरूपेणस्वप्नजगतोःसाम्यादित्याह॥

333

प्रतिपन्नोपाधौनिषेधप्रतियोगित्वेनतद्वैलक्षण्यस्यत्वन्मतेप्यभावात्। सूत्रेस्वप्नवैलक्षण्योक्त्य योगाच्च। व्यावहारिकसत्वेनस्वप्नवैलक्षण्यस्यतन्मतेपिसत्वात्। "द्वेसत्वेसमुपाश्रित्यबुद्धा नांधर्मदेशना। लोकेसंवृत्तिसत्यत्वंसत्वंचपरमार्थतः। सत्वंतुद्विविधंप्रोक्तंसांवृतंपारमार्थि कं। सांवृतंव्यावहार्यंस्यान्निवृत्तौपारमार्थिक" मितिबौद्धोक्तेः। तस्माच्छ्रुत्यादिबाधोदुर्वारः।

सूत्रइति॥ नन्वनेनरूपेणसाम्येपिव्यावहारिकसत्त्वप्रातिभासिकसत्त्वाभ्यांजगत्स्वप्नयोर्मन्मतेवैधर्म्यमस्तीत्यतआह॥ व्याव हारिकेति॥ तन्मतेपीति॥ शून्यवादिमतेपीत्यर्थः। तथाचपुनस्तवतत्सालक्षण्यमेवेतिभावः। व्यावहारिकसत्त्वंशून्यवादि नाप्यंगीकृतमितिकथंज्ञायतइत्यतस्तद्वाक्यंपठति॥ द्वेसत्त्वेइति॥ देशना उपदेशः। संवृतिसत्यत्वंकिंनामेत्यतस्सत्त्वंविवि च्यदर्शयति॥ सत्त्वंत्विति॥ निवृत्तौ संवृतिशब्दोक्ताविद्यानिवृत्तौ। श्रुत्यादिविरोधमुपसंहरति॥ तस्मादिति॥

SGPF ... Digital Foundation

तत्तत्प्रमाणेति॥घटपटचक्षुर्मनोधर्मादिपदार्थप्रापकप्रत्यक्षानुमानागमेत्यर्थः । ननुतत्तत्प्रमाणैस्तत्तद्विषयस्यसत्त्वंसिद्ध्यतीत्ययुक्तं । तथाहि अग्निरासीदितिज्ञानंभवति । तत्राग्निरासीदित्यस्याग्निरिदानींनास्तिध्वंसप्रतियोगीत्यर्थः । तथा वृष्टिर्भविष्यतीति ज्ञानंभवति । तत्रवृष्टिर्भविष्यतीत्यस्यवृष्टिरिदानींनास्तिप्रागभावप्रतियोगिनीत्यर्थः । तथारूप्यंमिथ्येतिज्ञानंभवति । तत्ररूप्यं मिथ्येत्यस्यरूप्यंत्रैकालिकनिषेधप्रतियोगीत्यर्थः । तथाचाग्निरासीदित्यादिज्ञानेनविषयस्यसत्त्वंनसिद्ध्यति तत्रविषयभूतस्यध्वंस प्रतियोगिनःप्रागभावप्रतियोगिनश्चज्ञानकालेऽभावात् अत्यंताभावप्रतियोगिनश्चकदाप्यभावात् अतस्तेतेविषयभूतास्तत्तत्प्रमा

किंचत्वयापितत्तत्प्रमाणसिद्धाएवार्थाःपक्षीकर्तव्याः । तैश्चतेसत्वेनैवसिद्धाइतितत्त
न्मानबाधः । अग्निरासीद्वृष्टिर्भविष्यतिरूप्यंमिथ्येत्यादिधीरपिस्वविषयसत्वंगृह्णाति

णेनसत्त्वेनैवसिद्धाइत्येतदयुक्तमित्यतआह ॥ अग्निरासीदित्यादिना ॥ अयमर्थः नात्राग्निरासीदित्यादेरग्न्यादिषुध्वंसादिप्रतियोगित्वमर्थः । येनप्रतियोगिप्राधान्येनार्थस्यविवक्षितत्वादग्न्यादेर्ध्वंसादिप्रतियोगिनस्तत्तज्ज्ञानविषयत्वमंगीकृत्यतस्यतदाऽसत्त्वंशंकनीयंस्यात् । नचैवं किंत्वभावप्राधान्येन । तथाचाग्निरासीदित्यस्याग्निप्रतियोगिकोध्वंसोऽस्तीत्यर्थः । तथावृष्टिर्भविष्यतीत्यस्यापिवृष्टिप्रतियोगिकप्रागभावोस्तीत्यर्थः । तथारूप्यंमिथ्येत्यस्यापिरूप्यप्रतियोगिकोत्यंताभावोस्तीत्यर्थः । एवंचात्र ध्वंसप्रागभावात्यंताभावानामेवविषयत्वात्तत्रतैस्तैर्ज्ञानैस्सत्त्वंविषयीक्रियतएवेतिसत्त्वेनैवतत्तत्प्रमाणसिद्धान्प्रध्वंसादीन्पक्षीकृत्य

SGDF
Sri Gurgeshwari Digital Foundation

मिथ्यात्वसाधनेतत्तन्मानविरोधस्तदवस्थएवेति ॥ अन्यथेति ॥ ध्वंसादिरूपविषयसत्त्वंअग्निरासीदित्यादिज्ञानेननगृह्यतेचेत्त
र्हितत्तज्ज्ञानानंतरंध्वंसाद्युचितार्थक्रियाभवति स्तानस्यादित्यर्थइत्येवंअग्निरासीदित्यादिकंयोज्यमितिसंप्रदायः । अन्येतुनप्रमा
णैर्विषयसत्त्वंसिद्ध्यति । अतीतादिग्राहकमानेविषयभूतार्थस्यसत्त्वाभावादित्यतआह ॥ अग्निरासीदिति ॥ नात्रसत्त्वंविद्य
मानत्वंकिंत्वबाध्यत्वं तच्चातीतादिष्वप्यस्तीतितद्गोचरज्ञानस्यापिस्वार्थसत्त्वग्राहकत्वमक्षतमेव । रूप्यस्यसद्विलक्षणतयातद्गतं
मिथ्यात्वमसदेवेत्यर्थइत्याहुः ॥ ७ ॥ मिथ्यात्वस्यागमादिबाधविवरणं ॥ २० ॥ सत्त्वसाधकप्रमाणापेक्षयामिथ्यात्वसा

अन्यथातदुचितप्रवृत्त्याद्ययोगादिति ॥ ७ ॥ विश्वमिथ्यात्वस्यागमादिबाधः
॥ २० ॥ किंचैतैरेवप्रयोगैःस्वप्रतिज्ञाहेतूदाहरणादिप्रापितानांसाध्यसाधनव्या
प्त्यादीनांमिथ्यात्वंनबोध्यतेचेत्सर्वमिथ्यात्वासिद्धिःबोध्यतेचेत्परस्परव्याहतिः - स्वक्रिया

धकानुमानानांव्याहत्यादिनादौर्बल्याच्चनतद्बाधकत्वमित्याह ॥ किंचेति ॥ एतै दृश्यत्वजडत्वपरिच्छिन्नत्वादिहेतुभिः । प्र
तिज्ञावाक्येनप्रापितस्यमिथ्यात्वरूपसाध्यस्य हेतुवाक्यप्रापितस्यसाधनस्य उदाहरणवाक्यप्रापितायाव्याप्ते रुपनयादिवाक्यप्रा
पितानांचार्थानांमिथ्यात्वंनबोध्यते बोध्यतेवा । आद्यआह ॥ नबोध्यतइति ॥ द्वितीयेत्वाह ॥ बोध्यतइति ॥ विमतंमि
न्या. श्री. २९ थ्येतिप्रतिज्ञारूपेणवाक्येनपक्षेमिथ्यात्वंविधीयते। अनुमानप्रयोगेणतुविश्वमिथ्यात्वंसाधयताविश्वांतर्गतस्यमिथ्यात्वरूपप्रतिज्ञा 335

SGDF
Sri Gargeshwari Digital Foundation

र्थस्यात्यंताभावरूपमिथ्यात्वंसाध्यतेइतिव्याहतिरित्यर्थः ॥ बाधेति ॥ अनुमानेनविश्वांतर्गतमिथ्यात्वस्यापिअत्यंताभावप्रतियोगित्वरूपमिथ्यात्वबोधनेपक्षेऽभावप्राप्त्याबाधइत्यर्थः ॥ स्वरूपासिद्धीति ॥ अनुमानेनविश्वांतर्गतदृश्यत्वादिहेतूनांअत्यंताभावसाधनेपक्षेऽसत्त्वप्राप्त्यास्वरूपासिद्धिरित्यर्थः ॥ व्याप्यत्वेति ॥ उदाहरणवाक्यप्रापितस्यव्याप्यत्वस्यमिथ्यात्वबोधनेव्याप्त्यभावप्राप्त्याव्याप्यत्वासिद्धिरित्यर्थः । नन्वनुमानप्रयोगेणदृश्यत्वादीनांमिथ्यात्वबोधनेपिसाधकत्वमुपपद्यतएवमिथ्याभू

336

बाधस्वरूपासिद्धिव्याप्यत्वासिद्ध्यादिकंचस्यात्।परमार्थसत्वस्यैवसाधकत्वेतंत्रत्वात्।
तथाहिनतावद्धीमात्रंतत्रतंत्रं । तुच्छस्यापितत्प्रसंगात् । नाप्यपरोक्षधीःअपरोक्षस
त्वधीर्वातंत्रं । नित्यातींद्रियेतदभावात् । ह्रदेप्रपंचेचापरोक्षभ्रांतिसिद्धेनधूमेनात्यंता
बाधेनचवह्नेःपारमार्थिकसत्वस्यचासिद्धेश्च । वह्नित्वेनाज्ञातस्यापिवह्नेर्दाहकत्वाच्च । — ?

तस्यैवमयासाधकत्वांगीकारादित्यतआह ॥ परमार्थेति ॥ परमार्थसत्त्वस्यसाधकत्वेतंत्रत्वंपरिशेषेणोपपादयति ॥ तथाहीत्यादिना ॥ तत्र साधकत्वे ॥ तुच्छस्यापीति ॥ शब्दाभासादिनाव्योमकमलादीनामपिज्ञानसंभवेनसाधकत्वप्रसंगइत्यर्थः ॥ नापीति ॥ तथाचतुच्छव्यावृत्तिरित्यर्थः । प्रपंचेत्वद्रीत्याऽपरोक्षभ्रांतिसिद्धेनात्यंताबाधेनपारमार्थिकत्वस्यसिद्धिःस्यादित्यर्थः । धीमात्रादेःसाधकत्वेव्यतिरेकव्यभिचारमाह ॥ वह्नित्वेनेति ॥ नारिकेलद्वीपवासिनोवह्नेर्वह्नित्वेनज्ञानाभावेपिदाहरूप

कार्यसिद्धेर्दर्शनादित्यर्थः । धीमात्रादेस्तंत्रत्वेऽन्वयव्यभिचारमप्याह ॥ अमृतत्वेनेति ॥ विषास्यमृतत्वज्ञानेसत्यपिसंजीवनरूपकार्यादर्शनादित्यर्थः ॥ अबाधितेति ॥ तथाचह्रदेऽपरोक्षभ्रांतिसिद्धेनधूमेनवह्न्यसिद्धिः । अमृतत्वेनज्ञातेनापिविषेणसंजीवनासिद्धिःतज्ज्ञानेत्रिचतुरकक्षासुबाधसद्भावादितिभावः । इत्येतदप्यतएवनिरस्तं । प्रपंचेऽपरोक्षभ्रांतिसिद्धात्यंताबाधस्यापिब्रह्मज्ञानपर्यंतमपिबाधाभावेनत्रिचतुरकक्ष्यास्वबाधितसत्त्वप्रकारकधीविषयत्वसत्त्वेनपारमार्थिकत्वसिद्धिःस्यादितिभावः । त्रिचतुरकक्ष्यास्वबाधितसत्त्वधियःसाधकत्वतंत्रत्वेदूषणांतरमाह ॥ गौरोहमिति ॥ तदेवोपपादयति ॥ गौरोहमित्यादा

337

अमृतत्वेनज्ञातस्यापिविषस्यासंजीवकत्वाच्च । अतएवनत्रिचतुरकक्ष्यास्वबा
धितासत्वधीस्तंत्रं । गौरोहंनीलंनभइत्यादिभ्रांतिसिद्धेनगौरत्वनीलत्वादि
नाआत्माकाशादेरपिअनित्यत्वस्पर्शवत्वाद्यापात्ताच्च । गौरोहमित्यादावपि
तत्कक्ष्यासुप्रत्यक्षाबाधात् । यौक्तिकादिबाधस्यचत्वन्मतेप्रकृतेपिभावात् ।

वपीति ॥ गौरत्वादेरात्मादौसत्त्वधियःत्रिचतुरकक्ष्यास्वबाधितत्वेनआत्माऽनित्यःरूपवत्त्वादित्येवंगौररूपेणात्मन्यनित्यत्वसिद्धिःस्यात् । भौतिकंत्वेवरूपादिव्याप्तंनाशेनेतिवचनात् । तथानभःस्पर्शवन्नीलरूपवत्त्वादित्येवंनीलरूपेणाकाशेपिस्पर्शसिद्धिःस्यादितिभावः । ननुत्रिचतुरकक्ष्यास्वबाधितत्वंनामनप्रत्यक्षमात्रेणबाधाभावः किंतुबाधसामान्याभावः । तथाचनतत्रत्रिचतुरकक्ष्यास्वबाधः । आत्माकाशौनरूपवंतौविभुत्वादित्यनुमानबाधोस्तीतिचेत्तत्राह ॥ त्वन्मतइति ॥ प्रपंचेसत्त्वधियोप्यनुमान

SGDF
Foundation

338

बाधितायास्त्वयांगीकृतत्वान्नत्रिचतुरकक्ष्यास्वबाधितासत्त्वधीस्त्वन्मतेस्तीतिदृश्यत्वादीनांसाधकत्वंनस्यादित्यर्थः ॥ लोकप्रसिद्धिरिति ॥ सत्त्वेनलोकप्रसिद्धिरित्यर्थः । इष्टसिद्धिर्मायावादग्रंथविशेषः । तदप्येतेनैवनिरस्तं । गौरोहंनीलंनभइत्यादेरपि सत्त्वेनपरमलोकप्रसिद्धेःसत्त्वादित्यर्थः । एतेनेत्युक्तंविशदयति ॥ निपुणेनेति ॥ कथायांकुशलेनेत्यर्थः ॥ उक्तधीविषयेति॥ त्रिचतुरकक्ष्यास्वबाधितवादिप्रतिवादिप्राश्निकसत्त्वधीविषयेत्यर्थः । तथाचनिपुणबौद्धोक्तानांशून्यमेवाद्वितीयंतत्त्वमित्येतदर्थ

एतेनलोकप्रसिद्धिस्तंत्रमितीष्टसिद्ध्युक्तंनिरस्तं । एतेनैवत्रिचतुरकक्ष्यास्वबाधितावादिप्रतिवादिप्राश्निकानांसत्वधीस्तंत्रमितिनिरस्तं । निपुणेनबौद्धेनोक्तधीविषयव्याहृत्यादिमत्त्वेनव्युत्पादितैःशून्याद्वैतादिहेतुभिस्तत्सिद्ध्यापातात् । एतेनैवयादृश्यातवसत्वसिद्धिस्तादृशीधीर्ममतंत्रमितिखंडनोक्तंनिरस्तं । यादृश्याशब्देक्षुद्दोषहीनयातवब्रह्मणिसत्वसिद्धिस्तादृश्याप्रत्यक्षेक्षुद्दोषरहितयाममजगतिसत्वसिद्धेः ।

प्रतिपादकहेतूनामपिप्राश्निकादिभिस्त्रिचतुरकक्ष्यास्वबाधितत्वेनज्ञातत्वात्त्वांप्रतितदुक्तैरपिहेतुभिस्तवशून्याद्वैतसिद्धिःस्यादिति भावः ॥ यादृश्येति ॥ यादृश्याबुद्ध्यानभोनैल्यादिधीव्यावृत्तयाघटादौसत्त्वसिद्धिस्तादृशबुद्धिविषयत्वमेवममसाधकत्वेतंत्रमित्यर्थः । एतेनेत्युक्तंविशदयति ॥ यादृश्येति ॥ शब्देक्षुद्रादोषाअर्थबाधादयः । प्रत्यक्षेक्षुद्रदूरत्वादिदोषरहितेनप्रत्यक्षेण जगतिसत्त्वस्यसिद्धत्वात्तादृशधियस्त्वयासाधकत्वांगीकारेपारमार्थिकसत्त्वधियएवसाधकत्वप्राप्तेरित्यर्थः । ननुप्रत्यक्षेक्षुद्रदोष

SGDF
Sri Gargeshwari Digital Foundation

राहित्यमसिद्धं । शुक्तिरूप्यप्रत्यक्षदृष्टांतेनजगत्प्रत्यक्षेपिप्रत्यक्षत्वहेतुनादोषोनुमीयतेतेननजगतिसत्त्वसिद्धिरितिचेत्तत्राह ॥ अन्यथेति ॥ तर्हितवापिशब्देक्लृप्तदोषहीनवेदांतजन्ययाधियाब्रह्मण्यपिसत्त्वंनसिद्ध्येत् । तत्कुतइत्यतउक्तं ॥ पूर्वपक्षीति ॥ तेनेति ॥ स्वार्थानुमानेपराभावादितिभावः । स्वार्थानुमानेपरसिद्धसत्त्वानपेक्षायामपिपरार्थानुमानंतदपेक्षमस्त्वित्यतआह ॥ परार्थेति ॥ प्रयोगस्यज्ञानपूर्वकत्वेनस्वस्यज्ञानाभावेपरार्थप्रयोगएवायुक्तइतिभावः ॥ परेति ॥ परप्रसिद्धसत्त्वोपेतेनदृश्य 339

अन्यथाशुक्तिरूप्यादिप्रत्यक्षदृष्टांतेनजगत्प्रत्यक्षइवपूर्वपक्षिप्रतिपन्नश्रुत्यर्थदृष्टांते नत्वत्प्रतिपन्नेपिश्रुत्यर्थेदोषांतरशंकाकालांतरभाविबाधशंकाचस्यात् । नापिपरप्र सिद्धंसत्वंतंत्रं तेनस्वार्थानुमानायोगात् । परार्थप्रयोगस्यचतत्पूर्वकत्वात् । परप्र सिद्धमात्रेणहेतुनावास्तवसाध्यासिद्धेश्च । नचमिथ्यात्वमपिपररीत्यैवनतुवास्त वमितिवाच्यं । बौद्धरीत्यामिथ्याभूतस्यात्मनइवजगतोवस्तुतस्सत्त्वापातात् ।

त्वादिहेतुनेत्यर्थः । वास्तवसाध्यं मिथ्यात्वं । असिद्धे स्तवेतिशेषः । तथात्वेबौद्धप्रसिद्धहेतुनात्वन्मतेजगतिवास्तवसत्त्वभंगित्वा दिकमपिसिद्ध्येदितिभावः । पररीत्या बौद्धरीत्या । अतोबौद्धमतप्रसिद्धेनैवदृश्यत्वेनहेतुनामिथ्यात्वमपित्वद्रीत्यैवसाध्यंतेनम न्मतेतद्वास्तवमतोनोक्तदोषइतिभावः ॥ बौद्धरीत्येति ॥ परसिद्धेनपरंप्रतिमिथ्यात्वसिद्धावपितवप्रपंचमिथ्यात्वसिद्ध्यभावेन

SGDF
Sri Gargeshwari Digital Foundation

वस्तुतस्त्वन्मतेजगतस्सत्यत्वमेवस्यात्बौद्धोक्तसाधनेनबौद्धमतएवात्मनोमिथ्यात्वेपित्वन्मतेतस्यसत्यत्ववदित्यर्थः ॥ मिथ्या
त्वस्येति ॥ मिथ्यात्वमपिपररीत्यैव नवास्तवमित्यंगीकारे तद्बोधकस्यनेहनानेतिप्रमाणस्यत्वदभिमततत्वावेदकत्वंनस्यादिति
भावः ॥ योपीति ॥ यःपदार्थःपरमतेऽसिद्धःस्वमतेसिद्धस्तत्रप्रतीकारोदूषणंस्यात्स्वमतेऽसिद्धोयमितिवादिनंप्रतिकःप्रतीका
रःतेनैवासिद्धत्वांगीकारात्तद्दूषणंव्यर्थमित्यर्थः । तथाचमिथ्यात्वंवास्तवंमयानांगीक्रियतइत्युच्यतेचेदस्मदिष्टसिद्ध्यानतद्दूषणेन।

मिथ्यात्वस्यतत्वावेदकश्रुतिवेद्यत्वाच्च । तदुक्तंवार्तिकेबौद्धंप्रति "योपितावत्प
रासिद्धःस्वयंसिद्धोभिधीयते। भवेत्तत्रप्रतीकारःस्वतोऽसिद्धेतुकाक्रिये" ति । ना
पिव्यावहारिकसत्वंतंत्रं । प्रपंचमिथ्यात्वसिद्धेःप्राक्तदसिद्ध्यान्योन्याश्रयापा
तात् । प्रातिभासिकेनहेतुव्याप्त्यादिनाव्यावहारिकसाध्यसिद्ध्यदर्शनेनहेतुव्या
प्त्यादेरनुमितिविषयसमसत्ताकत्वनियमेनव्यावहारिकेणपारमार्थिकासिद्धेश्च ।

स्माकंकृत्यमित्याशयः ॥ अन्योन्येति ॥ सिद्धेप्रपंचमिथ्यात्वेव्यावहारिकसत्त्वसिद्धिस्तत्सिद्धौचतस्यसाधकत्वेतंत्रत्वसिद्ध्या
तादृशसत्त्ववतादृश्यत्वादिनामिथ्यात्वसिद्धिरित्यन्योन्याश्रयादित्यर्थः । व्यावहारिकेण दृश्यत्वादिहेतुना । पारमार्थिकासिद्धेः ॥ १७१ ॥
पारमार्थिकस्यमिथ्यात्वस्यासिद्धेरित्यर्थः । कुतोऽसिद्धिरितिचेत् हीनसत्ताकेनाधिकसत्ताकसाध्यसिद्धेरदर्शनादित्याशयेनोक्तं

प्रातिभासिकेनेति । नन्वेतदयुक्तं । यादृच्छिकस्थलेआरोपितेनापिधूमेनव्यावहारिकवह्निसिद्धेर्दर्शनादित्यस्वरसादाह ॥ किंचे
ति ॥ उक्तदोषाइति ॥ सत्त्वेनव्यवहारमात्रंवस्तुतस्सत्त्वंनास्तीत्यंगीकारेहेत्वादिवाक्यप्रतिपाद्यस्यदृश्यत्वादेःसत्त्वाभावप्रा
प्त्यास्वरूपासिद्धिव्याप्यत्वासिद्ध्यादयोदोषाउक्ताइत्यर्थः । बहुकालानुवृत्तभ्रांतिहेतुत्वेननभोनैल्यभ्रमहेतोरिवव्यावहारिकस
त्त्वविषयश्रुतीनामप्रामाण्यापातात् । अतोबहुकालानुवृत्तभ्रांतेर्नसाधकत्वप्रयोजकत्वं । नभोनैल्यछत्राकारत्वादिप्रत्यक्षस्यापि
साधकत्वापत्तेरित्यर्थः । संगृह्णाति ॥ तथाचेति ॥ साधकत्वप्रयोजकभूतंसत्त्वंयदायाहिंव्यवहारसिद्धंअबाध्यत्वादिरूपंविव 341

किंचव्यावहारिकसत्वस्याबाध्यत्वरूपसत्वविशेषत्वेस्मदिष्टासिद्धिः । सत्वेनव्यवहारमात्रत्वेचो
क्तदोषाः । भ्रांतेर्बहुकालानुवृत्तिश्चाप्रयोजिका । तथाच"व्यावहार्यंयदासत्वमस्माकंतर्हिकाक्षतिः ।
नचेदसत्साधकत्वंनास्तीत्यत्रकिमागतं"। तदुक्तंवार्तिकेबौद्धंप्रति "तस्माद्यन्नास्तिनास्त्येवयच्चास्ति

क्षितंतर्हिअस्माकंकाक्षतिःइष्टापत्तिरितिभावः । नचेत् सत्त्वेनव्यवहारमात्रंवस्तुतस्सत्त्वंनास्तीत्यंगीकृतंचेत् असतस्साधकत्वं
नास्तीत्यत्रकिमायातं । हेत्वादिवाक्यप्रतिपाद्यस्यदृश्यत्वादेःसत्त्वाभावात्स्वरूपासिद्ध्यादिदोषःस्यादतःसाधकत्वायोगइत्यभि
हिते नासतःसाधकत्वंमयोच्यतेदृश्यत्वादेर्व्यावहारिकसत्त्वांगीकारात्तस्यैवसाधकत्वेतंत्रत्वादितित्वयेरितं । तत्रव्यावहारिकस
त्त्वस्वरूपविचारे वस्तुतस्सत्त्वंनास्तीत्युक्तंस्यात् । तथाचासतएवपुनःसाधकत्वोक्तेरसतःसाधकत्वंनास्तीत्यस्माभिरभिहितप्रमेये
दूषणंकिमायातमित्यर्थः । असतोपिसाधकत्वमित्येतांतुदुराशांउत्तरत्रापाकरिष्यामइतिभावः ॥ तस्मादिति ॥ यन्नास्तिशश

SGDF Sri Gargeshwari Digital Foundation

शृंगादि तन्नास्त्येव यदस्तितत्परमार्थतएवास्ति तस्मात्तत्सत्यमेव अन्यच्छशशृंगादिकंमिथ्यैवेतिसत्यद्वयकल्पना सत्यद्वैविध्य कल्पना पारमार्थिकसांवृतरूपसत्त्वद्वैविध्यकल्पनानयुक्ता । पारमार्थिकमिथ्याव्यतिरिक्तसांवृतसत्त्वोपेतवस्तुनोभावात् । सांवृतत्वोक्त्याशशशृंगवन्मिथ्यात्वमेवोक्तंस्यात् । तथाचप्रत्यक्षादिबाधः । तेनकारणेनलालावक्रासवादिशब्दवत्मिथ्यासांवृतशब्दयोस्तुल्यार्थत्वेपर्यायत्वेसतिशशशृंगंमिथ्याजगत्सांवृतंसत्यमित्युपन्यासःशिष्यवंचनार्थमेवेत्यर्थः । तथाचैवंभट्टाचार्यैर्बौद्धंप्रत्युक्तत्वात्तवापिप्रच्छन्नबौद्धत्वात्सांवृतसत्त्वस्थानाभिषिक्तव्यावहारिकसत्त्वस्यापिमिथ्याशब्दपर्यायत्वात्तदुपन्यासोवंचनार्थएवे

परमार्थतः । तत्सत्यमन्यन्मिथ्यैवनसत्यद्वयकल्पना । तुल्यार्थत्वेपितेनैवमिथ्यासंवृतिशब्दयोः ।
वंचनार्थमुपन्यासोलालावक्रासवादिवदिति" । अज्ञानादेःसिद्धिपर्यंतसाधकेस्वरूपेणपरमार्थस
तिसाक्षिणिव्यावहारिकसत्वाभावाच्च । नचसाक्ष्यप्यविद्यावृत्तिप्रतिबिंबितएवाज्ञानादिसाधकः ।

तिभावः । तथाचव्यावहारिकसत्त्वंसाधकत्वोपयोगिनभवतीतिध्येयं । व्यावहारिकसत्त्वस्यसाधकतायांप्रयोजकत्वेसाक्षिणिव्यभिचारइत्याह ॥ अज्ञानादेरिति ॥ आदिपदेनसुखादि ॥ सिद्धीति ॥ स्वरूपसतःसत्त्वपर्यंतेत्यर्थः । साक्षिणि शुद्धचैतन्ये । सिद्धिपर्यंतसाधकइत्यनेनरूप्यादिसाधकाविद्यावच्छिन्नसाक्षिणोव्यावहारिकाद्वैलक्षण्यंसूचितमितिज्ञेयं ॥ साक्ष्यपीति ॥ अविद्याकाराऽविद्यावृत्तिर्जायते । तस्यांप्रतिबिंबितएवसाक्षीअविद्यादिकंसाधयति । तस्यचव्यावहारिकत्वान्नव्यभिचारइति

SGDF Sri Gargeshwari Digital Foundation

भावः । चैत्ररागःचैत्रगतःस्वशब्दःसमभिव्याहृतपरः । स्वशब्देनरागःतद्विषयकंयदनित्यज्ञानंअयमिच्छावान्प्रयत्नवत्त्वादित्य नुमानजन्यंतदतिरिक्तंयदध्यक्षंतद्वेद्यइत्यर्थः । घटादौतुपटविषयकंयदनित्यज्ञानंअस्मदादिज्ञानंवृत्तिरूपंतदतिरिक्तंयदध्यक्षंअ धिष्ठानचैतन्यरूपंतद्वेद्यत्वमस्तीतिज्ञेयं । अविद्यावृत्तिप्रतिबिंबितसाक्षिरूपाध्यक्षवेद्यत्वेनसिद्धसाधनतावारणाय अनित्यज्ञाना तिरेकिणेत्युक्तं । अविद्यावृत्तिप्रतिबिंबितंविशिष्टंसाक्षिचैतन्यंचानित्यमितिभावः । सुखादावपिरागवदिदमनुमेयमितिभावः ॥ नित्यधीति ॥ शुद्धसाक्षीत्यर्थः । तथाचतत्रव्यावहारिकसत्त्वाभावाद्व्यभिचारइतिभावः । सुखेच्छाज्ञानादीनामप्यविद्यावृत्ति

त्वयैव "चैत्ररागःस्वविषयानित्यज्ञानातिरेकिणा । तदध्यक्षेणसंवेद्यःप्रत्यक्षत्वाद्घटादिवदि"ति सु खादेर्नित्यधीवेद्यत्वोक्तेः । अज्ञानसुखादेर्ज्ञातैकसत्वाभावापाताच्च । अविद्यावृत्तिंप्रतितदप्रतिबिं बितस्यैवसाधकत्वाच्च । साक्षिगतसाधकतायाअज्ञानाधीनत्वेऽपारमार्थिकतयाप्रातीतिकस्याज्ञान

प्रतिबिंबितसाक्षिवेद्यत्वेसुखाद्युत्पत्त्यनंतरंकदाचिदविद्यावृत्तिविलंबेनतज्ज्ञानविलंबापत्त्यासुखादीनांज्ञातैकसत्त्वंनस्यादित्याह ॥ अज्ञानेति ॥ अस्तुवायथाकथंचित्सुखादेरविद्यावृत्तिप्रतिबिंबितसाक्षिवेद्यत्वं तथाप्यविद्यायानाविद्यावृत्तिप्रतिबिंबितसाक्षिवे द्यत्वं । आत्माश्रयानवस्थापत्तेरतःशुद्धसाक्षिवेद्यत्वमेववाच्यं । तथाचाविद्यासाधकशुद्धसाक्षिणिव्यभिचारःसुस्थइत्याशयेनाह ॥ अविद्यावृत्तिंप्रतीति ॥ साधकताया अज्ञानसाधकतायाः । शुद्धसाक्षिणःसाधकत्वाभावइतियावत् ॥ अन्योन्येति ॥

SGDF
Sri Gargeshwari Digital Foundation

अज्ञानस्वरूपसिद्धौतदधीनस्यसाक्षिणस्साधकत्वस्यसिद्धिः तत्साधकत्वेसिद्धेऽज्ञानस्यप्रातीतिकत्वसिद्धिः अज्ञानस्यप्रातीतिकत्वेनसाक्षिणएवतत्सत्त्वसाधकत्वादित्यन्योन्याश्रयइत्यर्थः ॥ एतेनेति ॥ मयोच्यमानमसतःसाधकत्वंयथात्वदसंततं एवंभवदभिमतंसतस्साधकत्वंनममापिसंमतमित्येतदेतेनैवसत्यस्यसाक्षिणोह्यावयोर्मतेसाधकत्वांगीकारेणैवनिरस्तमित्यर्थः । विमति विंवादः । आनंदबोधः चित्सुखः ॥ नापीति ॥ क्वचित्पारमार्थिकीसत्तासाधकत्वेतंत्रं क्वचिद्व्यावहारिकीसत्ता क्वचित्प्रातिभासिकीसत्तेति सत्तात्रयमपितंत्रं । अथवाद्वयं प्रातिभासिकसत्त्वातिरिक्तंसत्त्वद्वयमित्यर्थः ॥ अननुगमादिति ॥ पारमार्थिक

सत्वस्यसाक्षिणासिद्धिंविनाऽयोगेनान्योन्याश्रयाच्च । एतेनतवासतइवममसतोपिसाधकत्वेविमतिरित्यानंदबोधाद्युक्तंनिरस्तं। नापिसत्तात्रयंद्वयंवातंत्रं । अननुगमात् । प्रयोज्यवैजात्याभावेन

सत्त्वाभावेपिव्यावहारिकसत्त्वोपेतादप्यर्थसिद्धेर्दर्शनाद्व्यभिचारइत्यर्थः । ननुतृणाभावेपिपर्णादिनावह्नेर्जायमानत्वेनव्यभिचारान्नवह्नौतृणादीनांकारणत्वंएवमेवयागस्यापिनस्वर्गसाधनत्वमित्याशंकायांयथातृणजन्यवह्नेःसकाशान्मणिजन्यवह्नौ यथावायागजन्यस्वर्गात्दानादिजन्येस्वर्गेवैजात्यमंगीकृत्यव्यभिचारःपरिह्रियते एवमिहापिपारमार्थिकसत्त्वोपेतप्रमाणजन्यसिद्धितोव्यावहारिकादिसत्त्वोपेतप्रमाणजन्यसिद्धौवैजात्यकल्पनान्नव्यभिचारइत्याशंकांपरिहरति ॥ प्रयोज्येति ॥ तृणादिप्रयोज्यवह्नेस्तृणादिजन्यतावच्छेदकीभूतजातिविशेषस्यानुभवसिद्धत्वात्तृणेसतिताद्दशजात्युपेततार्णोवह्निविशेषइत्यस्यव्यभिचारोना ॥ १७३ ॥

345

स्तीतिकल्प्यतेतद्वदिहपारमार्थिकसत्त्वादिप्रयोज्यजातिविशेषाणामभावेनतृणारणिमणिन्यायासंभवादितिभावः ॥ अपरमार्थेति ॥ पारमार्थिकसद्भिन्नव्यावहारिकादिसतइत्यर्थः ॥ असत्त्वेनेति ॥ सत्प्रभेदत्वाभावेनसत्त्वसामान्यंप्रतिअव्यक्तित्वादित्यर्थः । तथाचशशविषाणगोविषाणानुगतविषाणत्वसामान्यवत्सत्त्रयसद्द्वयानुगतसत्त्वसामान्यस्याप्यभावादित्यर्थः । तथाचपरमार्थसतएवसाधकत्वंसिद्ध्यतीतिद्रष्टव्यं ॥ विरोधादिति ॥ अबाध्यत्वादिरूपसत्त्वस्यबाध्यत्वादिरूपमिथ्यात्वाश्रयमृषार्थे

तृणारणिमणिन्यायासंभवाच्च । नापिसत्त्रयानुगतंसद्द्वयानुगतंवासत्वसामान्यंतंत्रं । अपरमार्थसतोऽसत्वेनतत्रसत्वस्यविरुद्धत्वात् । तदुक्तंवार्तिकेबौद्धंप्रति । "सत्यत्वंनचसामान्यंमृषार्थपरमार्थयोः । विरोधान्नहिसिंहत्वंसामान्यंवृषसिंहयोरिति"[1] । अपरमार्थसतःअबाध्यत्वरूपसद्विशेषत्वेचशाबलेयस्यगोविशेषत्ववत्प्रपंचस्यापिब्रह्मवत्सद्विशेषत्वात्सद्वैलक्षण्यंनस्यात् । किंचयद्यारोपितानारोपितानुगतंसामान्यंस्यात्तर्हिब्राह्मणोयजेतेत्यादिसामान्यविधिंप्रतिब्राह्मण्यामब्राह्मणाज्जातआरो

वृत्तिर्नसंभवतिस्वाभाववतिस्ववृत्तेर्विरुद्धत्वादित्यर्थः ॥ वृषसिंहयोरिति ॥ वृषस्यसिंहप्रभेदत्वाभावादितिभावः । नन्वपरमार्थसतोपिअबाध्यत्वरूपसद्विशेषत्वात्तत्रसत्त्वसामान्यंसंभवतीत्यतआह ॥ अपरमार्थसतइति ॥ शाबलेयस्य शबलगोजन्यस्यगोरूपपदार्थस्य ॥ सद्वैलक्षण्यमिति ॥ अबाध्यत्वरूपसत्त्वाविरोधिनःअपारमार्थिकत्वस्यपारिभाषिकत्वापत्त्याऽपरमार्थसतोपिप्रपंचस्यवस्तुतःपरमार्थसद्विशेषत्वात्तत्रसद्वैलक्षण्यंनस्यादित्यर्थः ॥ सामान्यविधिमिति ॥ अनारोपितब्राह्मण्यवा

1 वृक्षसिंहयोरिति चित्सुख्यां दृश्यते ।

SGDF ... Foundation

न्यजेतेतिविशेषाश्रवणादित्यर्थः । ब्राह्मण्यांब्राह्मणस्त्रियां । अब्राह्मणात्शूद्रांत्यजादेर्जातश्चंडालः । एतच्चात्यंतनिषिद्धतासूच नाय । ननुप्रतिलोमजानांयज्ञाधिकारेनिषेधवचनविरोधइत्यतआह ॥ निषेधस्यत्विति ॥ तथाचारोपितब्राह्मण्यवान्निषेधा विषयइतितस्यापिविधिविषयत्वापत्तिरितिभावः । तदनुगतं आरोपितानारोपितानुगतंसत्त्वसामान्यं । तस्यतंत्रत्वे सत्त्वसामा न्यस्यतंत्रत्वे । स्वाप्नेन प्रातिभासिकत्वोपेतेन ॥ तत्फलस्येति ॥ ऐक्यापत्तिस्वर्गरूपफलस्येत्यर्थः । पारमार्थिकस्येत्येतत्द्वैत

346

पितब्राह्मण्यादिरपिनियोज्यःस्यात् । निषेधस्यतुआरोपितेनापिब्राह्मण्येनहीनोविषयःस्यात् । अस्तुवातदनुगतंसामान्यं तथापितस्यतंत्रत्वेस्वाप्नेनाद्वैतसाक्षात्कारेणाश्वमेधादिनाचतत्फलस्य द्वै तश्रुत्यादिनाचद्वैतस्य धूमाभासेनचवह्ने र्व्यावहारिकेणचविरुद्धधर्मेणपारमार्थिकस्यजीवेश्वरभेद स्य सिद्धिःस्यात् । अतएवधर्मितुल्यसत्वंवाअसद्विलक्षणत्वंवानतंत्रं । गौरवाच्च । ननुधूमाभास

स्यवह्नेरित्यत्राप्यनुषंजनीयं ॥ विरुद्धधर्मेणेति ॥ सर्वज्ञत्वाल्पज्ञत्वादिरूपविरुद्धधर्मेणेत्यर्थः । साधकत्वप्रयोजकीभूतस्यस त्त्वसामान्यस्यसत्त्वादितिभावः ॥ धर्मीति ॥ तादृशसत्त्ववान्धर्मी । तद्वान्हेतुःसाधकइत्यर्थः । अतएव धर्मिभूतयोर्विशि ष्टयोर्जीवेशयोर्व्यावहारिकत्वेनतत्तुल्यसत्ताकेनासद्विलक्षणेनचविरुद्धधर्मरूपहेतुनापारमार्थिकजीवेश्वरभेदसिद्धिप्रसंगादेवेत्य र्थः । ननुव्यावहारिकेश्वरभेदसिद्धिर्भवत्येवेत्यस्वरसादाह ॥ गौरवाचेति ॥ सत्त्वेद्वैविध्याभावेनधर्मितुल्यसत्त्वासद्विलक्षण

SGDF Sri Gargeshwari Digital Foundation

त्वापेक्षयासत्त्वमात्रस्यसाधकत्वेतंत्रत्वोक्तौलाघवमित्यर्थः । धूमाभासेनपारमार्थिकवह्नेःसिद्धिःस्यादित्यत्रपरिहारंशंकते ॥ न न्विति ॥ कुतोव्याप्त्यभावइत्यतआह ॥ बहुलेति ॥ यथाधूममात्रेनवह्निव्याप्तिः किंतुबहुलोर्ध्वत्वाविच्छिन्नमूलत्वयुक्ते त थाआभासधूमेपिनवह्निव्याप्तिः किंत्वाभासभिन्नएवेत्यर्थः । व्याप्त्यर्थत्वात् व्याप्त्युपयोगित्वात् ॥ अस्याइति ॥ असतःसा धकत्वेसिद्धेधूमाभासस्यापिसाधकत्वंस्यादित्यतिप्रसंगवारणायबहुलोर्ध्वतादिवदाभासविविक्तत्वस्यापिव्याप्त्युपयोगित्वसिद्धिःत त्सिद्धौतदभावादेवासाधकत्वंधूमाभासस्यनासत्त्वादितिकल्पनायाःसिद्ध्याऽतिप्रसंगाभावेनासतःसाधकत्वसिद्धिरित्यन्योन्याश्र 347

स्यासाधकत्वंनासत्वात्किंतुव्याप्त्यभावात् बहुलोर्ध्वतादिवदाभासविवेकस्यापिव्याप्त्यर्थत्वादि तिचेन्न । अस्याःकल्पनायाअसतःसाधकत्वसिद्धिसापेक्षत्वेनान्योन्याश्रयात् । आभासेप्यारोपित व्याप्तेरारोपिताभासविवेकस्यचसत्वाच्च । प्रकृतेपिदृश्यत्वस्यारोपितस्यब्रह्मण्यपिसत्वेनव्याप्त्यर्थ

यादित्यर्थः । आरोपितेति आभासविवेकस्यविशेषणं । तथाचव्यर्थमाभासविविक्तत्वविशेषणं । धूमाभासेव्यभिचारस्यतदव स्थत्वादितिभावः ॥ प्रकृतेपीति ॥ तथाचयथाह्रदादावारोपितेधूमेनव्याप्तिःकिंत्वाभासविविक्तेपर्वतवृत्तिधूमएव एवंब्रह्मण्या रोपितेदृश्यत्वेपिनव्याप्तिरस्तीतिव्याप्तिसिद्धयेप्रपंचेदृश्यत्वस्यसत्त्वंस्वीकार्यमित्यर्थः । साधकत्वार्थंवा साधकत्वोपयुक्तव्याप्त्या द्यर्थंवा दृश्यत्वादेस्सत्त्वमावश्यकमितिनासतःसाधकत्वमितिभावः । किंच दृश्यत्वादिहेतोःसत्त्वमावश्यकं अन्यथाहेत्वाद्या

SGDF Sri Gargeshwari Digital Foundation

रोपस्यसर्वत्रसौलभ्येनासिद्ध्यादिविभागएवनस्यात् अतस्तदर्थंवास्तवसत्त्वमेववाच्यमित्याह ॥ हेत्वादीति ॥ ननुमिथ्यात्वानु मानेनासत्त्वेनबोधितानामपिपक्षहेत्वादीनांसाध्यव्याप्त्यादीन्प्रत्याश्रयत्वंभविष्यति वंध्यासुतोनवक्ताअत्यंताभावप्रतियोगित्वा दित्यत्रासतोपिसाधनंप्रत्याश्रयत्वदर्शनादित्यतआह ॥ आश्रयादेरिति ॥ आदिपदेनसाध्यसंसर्गग्रहणं । आश्रयसाध्यव्य धिकरणासिद्ध्योनदूषणमितिवचनेनआश्रयासिद्ध्यादेरदूषणत्वेनतस्यसत्त्वनियमाभावेपिव्याप्तिरेवहिप्रयोजिकेत्युक्तत्वेनतस्या

358

मेवहेत्वादिसत्वस्यापेक्षितत्वाच्च । हेत्वाद्यारोपस्यसर्वत्रसौलभ्येनासिद्ध्यादेरदोषत्वापाताच्च । आ श्रयादेस्सत्वनियमाभावेपिव्याप्त्यादेस्तान्नियमाच्च । नाप्यप्रातिभासिकत्वंतंत्रं तुच्छेऽतिप्रसक्तेः । नाप्यप्रातिभासिकसत्वंतंत्रं गौरवात् । व्यावहारिकतात्विकानुगतसत्वसामान्यस्याभावाच्च । नाप्यसद्विलक्षणत्वेसतिप्रातिभासिकवैलक्षण्यंतंत्रं अतिगौरवात् । अन्यथा प्रवृत्तौनसंसर्गग्रहो

श्चसदाश्रयकत्वनियमेनहेत्वादेःसत्त्वमावश्यकमितिभावः ॥ तुच्छइति ॥ असद्वैलक्षण्यघटितानिर्वाच्यत्वरूपप्रातिभासिकत्व स्यतुच्छेऽभावेनतस्याप्रातिभासिकत्वेनसाधकत्वंस्यादितिभावः ॥ गौरवादिति ॥ सत्त्वद्वैविध्यादिकल्पनमनादृत्यसत्त्वमात्र स्यैवसाधकतायांप्रयोजकत्वेलाघवमितिभावः । नन्ववस्तुसत्त्वमेवप्रयोजकं तत्राह ॥ व्यावहारिकेति ॥ पारमार्थिकसत्त्वाति रिक्तव्यावहारिकसत्वरूपव्यक्त्यभावादितिभावः ॥ अतीति ॥ उक्तसत्त्वापेक्षयेत्यर्थः ॥ अन्यथेति ॥ लघुनिसंभवेगुरुणोंगी ॥ १७५ ॥

कारइत्यर्थः ॥ उपस्थितेति ॥ उपस्थितंयद्रूप्यत्वादिकंतस्यपुरोवृत्तिनियोऽसंसर्गः तदग्रहएवप्रवृत्तौहेतुःस्यात् । एवंचभ्रांतिर्न सिद्ध्येत् । संसर्गग्रहेभ्रमरूपंविशिष्टज्ञानंसिद्ध्येत् । एवंचसंप्रतिपन्नविशिष्टज्ञानेनैवप्रवृत्तिर्भवति तत्रासंसर्गस्याभावादेवतदग्र होस्ति तत्सादृश्यादसंसर्गाग्रहादिदंरजतमितिज्ञानादपिप्रवृत्तिर्भविष्यति विद्यमानस्याप्यसंसर्गस्याग्रहणसद्भावादितिप्राभाकरे णोक्तेत्वयावाच्यं निषेधद्वयगर्भत्वेनगौरवाल्लाघवात्संसर्गग्रहएवप्रवृत्तौहेतुरिति । एवंसति भ्रमरूपविशिष्टज्ञानसिद्धिरिति । तथाचलाघवानादरेणैतदपिनस्यात् साध्यंनसिद्धमित्यर्थः ॥ सदिति ॥ सतःसाधकत्वानंगीकारादितिभावः । नन्वसतःसाध

359

हेतुःकिंतूपस्थितासंसर्गाग्रहइतिभ्रांतिर्नसिद्ध्येत् । किंचासतःसाधकत्वंविप्रतिपन्नत्वात्साध्यं । तत्साधकंचनतावत्त्वन्मतेसत् । अपसिद्धांतात्नाप्यसत् प्रतिवादिनस्तत्साधकत्वेविप्रतिपत्यानव स्थानात् । नचसतःसाधकत्वेप्ययंदोषः । त्वन्मतेसतःसाक्षिणःसाधकत्वात् । उक्तंहि "साधकत्वं

कत्वमपिअसतैवसाधकांतरेणप्रतिवादिनंत्वांप्रतिसिद्ध्यतीतिचेत्तत्राह ॥ अनवस्थानादिति ॥ ननुसतःसाधकत्वमपिविप्रति पन्नत्वात्साध्यं तत्साधकंचमानं तावन्मांप्रत्यसिद्धं । तथाहि । नतावत्सतःसाधकत्वंसतासाध्यते ममासिद्धेः । नाप्यसता त वासिद्धेरित्याशंक्यनिराकरोति ॥ नचेति ॥ नसतःसाधकत्वंमयासाधनीयं त्वन्मतेसतःसाक्षिणोऽज्ञानादिसाधकत्वस्यसिद्ध त्वादित्याह ॥ त्वन्मतेपीति ॥ तथाचसतःसाधकत्वमुभयसंमतमित्यर्थः । अत्रानुव्याख्यानसंमतिमाह ॥ उक्तंहीति ॥

SGDF
Sri Gangeshwar... Foundation

350 वद्दुर्ल

साक्षिणाऽज्ञानादिसिद्धिमिच्छतातेनमायावादिनासतस्साधकत्वंस्वीकृतमित्येवपरंतुतन्नसंभवति । अविशेषस्यसाधकतापुनःसाध्यैव नतुसिद्धा सर्वशक्तिरहितस्यशून्यवत्साधकताऽयोगादित्यर्थः ॥ औत्सर्गिकेति ॥ धूमादिग्राहकस्यज्ञानस्योत्सर्गतःप्रमाणत्वात्प्रामाण्यस्यस्वार्थसत्त्वपर्यंतत्वात्प्रमाणसिद्धानांसतांधूमादीनांसाधकत्वस्यतत्साधकत्वेपर्यवसानादित्यर्थः ॥ उपायांतरेति ॥ लोकमर्यादासिद्धोपायातिरिक्तोपायाभावेनेत्यर्थः ॥ स्वच्छायेति ॥ यथास्वकीयाच्छायास्वेनैवोल्लंघितुंनशक्यतेएवंपर्वतवर्तिनएवसाधकत्वंनतुबाष्पारोपितधूमस्येत्येवंलोकसिद्धंयत्सतःसाधकत्वंतदप्युल्लंघितुंनशक्यतइत्यर्थः । नन्वसतःसाध

सस्य सा सतस्तेनसाक्षिणासिद्धिमिच्छता। स्वीकृतंह्यविशेषसाध्यासाधकतापुनरिति"। औत्सर्गिकप्रामाण्ये
नसिद्धत्वाच । तवापिव्यवहारेउपायांतराभावेनस्वच्छायावदुर्लंघ्यलोकमर्यादासिद्धत्वाच । नच
सिद्धिरप्यसतीत्युक्तेनिस्तारः। अन्योन्याश्रयात् । अन्यथा प्रतीतिरप्यत्यंतासतीतिसुवचत्वेन

कत्वंनास्तीतिवदतांलौकिकानामयमभिप्रायः। असतोजायमानासिद्धिः सतीप्रमारूपा नभवतीति मयात्वसतोऽसत्सिद्धिरुच्यतइति नममलोकमर्यादोल्लंघनमित्यतआह ॥ नचेति ॥ अन्योन्येति ॥ असतःसाधकत्वेसिद्धेऽसतःसाधकत्वंनास्तीतिलोकप्रसिद्धेर्विषयांतरपरत्वं लोकप्रसिद्धेर्विषयांतरपरत्वेच तद्विरोधाभावादसतोपिसाधकत्वंसिद्ध्यतीत्यन्योन्याश्रयइत्यर्थः ॥ अन्यथेति ॥ लोकमर्यादातिक्रमइत्यर्थः ॥ प्रतीतिरिति ॥ असच्चेन्नप्रतीयेतेतिप्रतीत्यन्यथानुपपत्तिरूपार्थापत्त्याप्रपंचेऽसद्वै

SGDF Sri Gargeshwari Digital Foundation

लक्षण्यंसाध्यतेतन्नस्यात् । लोकमर्यादासिद्धायारूप्यादिप्रतीतेरप्यत्यंतासत्त्वस्यशून्यवादिनावक्तुंशक्यत्वादित्यर्थः ॥ सल्लक्ष
णेति ॥ सतस्साधकस्ययल्लक्षणंपक्षवृत्तित्वादिरूपंतद्योगित्वंसाधकत्वेतंत्रंसल्लक्षणायोगित्वमसाधकत्वेतंत्रमित्यर्थः । तच्चपर्वत
वृत्तिधूमेऽस्तिअतस्तत्रसाधकत्वंनतुतदाभासइतिनातिप्रसंगः । प्रकृतेदृश्यत्वादौचसल्लक्षणयोगित्वमस्तीतिसाधकत्वंयुक्तमिति
भावः ॥ असत्त्वइति ॥ दृश्यत्वादिभिरेवप्रयोगैःप्रपंचांतर्गतस्यहेत्वादेरपिमिथ्यात्वबोधनेनासत्त्वापत्त्यासतःसाधकस्ययल्ल 351

प्रतीत्याअसद्वैलक्षण्यंनसिध्येत् । एतेनसल्लक्षणयोगित्वायोगित्वेएवसाधकत्वासाधकत्वयोस्तंत्रे
नतुसत्वासत्वेइतिखंडनोक्तंनिरस्तं । हेतुव्याप्त्यादेरसत्त्वेऽसिद्ध्यव्याप्त्याद्यसल्लक्षणापाताच्च । एते
नमिथ्यात्वाविशेषेपिस्वप्नवद्धेतुतदाभासव्यवस्थेतिनिरस्तं । तद्वदेववास्तवसाध्यासिद्ध्यापातात् ।

क्षणंपक्षवृत्तित्वव्याप्तिमत्त्वादिरूपंतद्योगित्वाभावेनपक्षवृत्तित्वव्याप्त्यादिराहित्यरूपासत्साधकलक्षणयोगित्वप्राप्तेर्नसाधकत्वंयु
क्तमित्यर्थः ॥ स्वप्नवदिति ॥ यथास्वप्नप्रतीतयोर्धूमतदाभासयोरुभयोरपिमिथ्यात्वाविशेषेपितत्रकश्चनसद्धेतुःसाधकत्वेनव्यव
ह्रियतेकश्चनतदाभासोऽसाधकत्वेन एवमिहापिदृश्यत्वादेर्धूमाभासादेश्चमिथ्यात्वाविशेषेपिहेतुतदाभासव्यवस्थयासाधकत्वाद्यु
पपत्तेरित्यर्थः । एतेनेत्युक्तमेवविशदयति ॥ तद्वदेवेति ॥ स्वप्नदृष्टधूमादिनावास्तववह्निसिद्ध्यदर्शनादिहापिदृश्यत्वादिनावा

SGDF
Sri Gargeshwari Digital Foundation

स्त्वमिथ्यात्वरूपसाध्यसिद्धिर्नस्यादित्यर्थः । उपसंहरति ॥ तस्मादिति ॥ असत्यादिति ॥ स्वबोधितमिथ्यात्वकविश्वांतर्गतत्वेनासत्यदृश्यत्वादेस्सकाशान्नसत्यभूतमिथ्यात्वादिसिद्धिरितिबाधादिकंदुर्वारमितिभावः ॥ साधकंचेदिति ॥ किंचिद्धेत्वादिकंचेद्यदिसाधकंतर्हितस्यपरमार्थास्तितापारमार्थिकसत्त्वंअवश्यमपेक्षितंभवेदेव । परमार्थसत्त्वस्यैवसाधकत्वेतंत्रत्वादिति भावः । नन्वपरमार्थसतोपिसाधकत्वंकिंनस्यादित्यतआह ॥ सिद्धिर्नेति ॥ सवितृसुषिरादावपिसत्यस्यैवसाधकत्वमित्यनुपद

352

तस्मान्नासत्यात्सत्यसिद्धिः । तदुक्तंवार्तिकेबौद्धंप्रति "साधकंचेदवश्यंचपरमार्थास्तिताभवेत् । सिद्धिर्नापरमार्थेनपरमार्थस्ययुज्यतइति" । उक्तंचबौद्धधिक्कारे "लोकस्यापिव्यतिक्रमेविचारस्ययादृच्छिकवाङ्मात्रत्वापत्तेरिति" ॥ असतःसाधकत्वेबाधकविवरणं ॥ २१ ॥ ७ ॥ नन्वसत्यमपिप्रतिबिंबंबिंबस्य स्वाप्नार्थश्चशुभाशुभयोः स्फटिकलौहित्यंचोपाधिसंनिधानस्य रेखारोपितवर्णश्चार्थ

मेववक्ष्यतइतिभावः ॥ लोकस्यापीति ॥ सदसतोःसाधकत्वासाधकत्वातिक्रमेविचारस्यदैववशसंपन्नवनस्थवेणुनिस्सृतस्वनवद्यादृच्छिकवाङ्मात्रत्वापत्त्याप्रमाणसिद्धत्वाभावापातेनार्थनिश्चायकत्वाभावापातात् । अतोलोकमर्यादानुसारेणैवसतएवसाधकत्वंनासतइत्यंगीकार्यमितिभावः ॥ असतस्साधकत्वेबाधकविवरणं ॥ २१ ॥ प्रतिबिंबंबिंबस्येति ॥ अयंप्रदेशोबिंबवान्क्वचित्स्थलेप्रतिबिंबयुक्तत्वादित्येवंबिंबानुमापकत्वंप्रतिबिंबेदृष्टमित्यर्थः । स्वाप्नार्थःस्वाप्नमंत्रादिरूपः । उत्तरत्रस्वाप्नमंत्रो

पीतिव्यवहारादितिज्ञेयं ॥ अर्थभेदस्येति ॥ वृक्षहस्तिरूपार्थभेदस्येत्यर्थः ॥ त्वन्मतेपीति ॥ स्वच्छदर्पणादिषुप्रतिफलनेनपरावृत्तानायनरश्मयोग्रीवास्थमुखेनसंबद्धाग्रीवास्थमेवमुखंगृह्णंति । तत्रैवदर्पणस्थत्वंग्रीवास्थमुखभिन्नत्वादिकंचारोपयंति । यथोक्तंत्वया । "दर्पणाभिहतादृष्टिःपरावृत्यस्वमाननं । व्याप्नुवंत्याभिमुख्येनव्यत्यस्तंदर्शयेन्मुखमिति" । लिंगलिंगिभावस्तुवृक्षशिंशुपावदितिपरैरंगीकारात् । अतोग्रीवास्थमुखस्यैवप्रतिबिंबतायास्त्वयोक्तत्वात्तस्यप्रतिबिंबस्वरूपस्यसत्यत्वादित्यर्थः ॥

353

स्य वर्णदैर्घ्यादिकंचनगोनागइत्यादावर्थभेदस्य शंकाविषंचमरणस्य सवितृसुषिरादिचारिष्टादेः साधकंदृष्टमितिचेन्न । प्रतिबिंबस्वरूपस्यत्वन्मतेपिसत्यत्वात् । स्वाप्नस्यचमन्मतेसत्यत्वात् । त्वन्मतेपिपुरुषंकृष्णंकृष्णदंतंपश्यतीत्यादिश्रुत्याज्ञानमेवसूचकं । अन्वयव्यतिरेकाभ्यांचस्वाप्नकामिन्यादिज्ञानमेवार्थक्रियाकारीत्युपपत्तेः । स्फटिकलौहित्यस्यापिप्रतिबिंबत्वात् । रेखायाश्चवर्णे पदस्या

ज्ञानमेवेति ॥ तच्चसत्यमेवेतिभावः । ननुस्वाप्नकामिन्यादेश्चरमधातूत्सर्गाद्यर्थक्रियाहेतुत्वदर्शनात्स्वाप्नपदार्थस्यैवसाधकत्वंनतुतज्ज्ञानस्येतिचेत्तत्राह ॥ अन्वयेति ॥ जाग्रतिअन्वयव्यतिरेकाभ्यांतज्ज्ञानस्यैवार्थक्रियाहेतुत्वंदृष्टंनस्वरूपसत्कामिन्यादेः अतस्तद्दृष्टांतेनस्वप्नेपितथात्वंकल्प्यतेऽतस्सत्यस्यैवसाधकत्वमित्यर्थः ॥ लौहित्यस्यापीति ॥ लोहितिमविशिष्टजपाकुसुमस्य तदवयवसमुदायस्यवेत्यर्थः । तेनगंधरसादेरिवनरूपस्यप्रतिबिंबोदृष्टचरइतिचोद्यानवकाशः । पदस्यार्थइववर्णेरेखायाःसंकेति

SGDF Foundation

354

तत्वेनेत्यर्थः । वर्णस्यरेखास्मारितत्वेहेतुरयं । वर्णश्चसत्यएवेतिभावः । अत्रपदस्यार्थेसंकेतितत्वेनेतिपररीत्यैव । स्वमतेस्वाभा
विकीशक्तिरेवेत्यंगीकारात् । नित्ययोगोपिशब्दानामर्थेनैवेत्युक्तेः ॥ अतएवेति ॥ रेखायावर्णेसंकेतितत्वादेवेत्यर्थः । रेखा
स्मारितवर्णेषुदीर्घत्वंस्वतोस्त्येवतच्चक्षुरादिवत्स्वरूपसदेवार्थविशेषधीजनकंनतुज्ञाततयेत्येकःपक्षः । वस्तुतोदीर्घत्वंवर्णेषुनास्त्येव
किंत्वारोपितमेव तच्चज्ञातंसदेवतथेत्यन्यःपक्षः । तत्राद्यपक्षेदीर्घत्वंनिर्वक्ति ॥ दीर्घत्वादिकमिति ॥ वर्णेषुदीर्घत्वंनामदीर्घध्व
निसंनिहितत्वमेवनान्यदित्यर्थः ॥ तद्व्यक्तत्वरूपमिति ॥ दीर्घध्वनिव्यक्तत्वाख्योधर्मइत्यर्थः । तथाचवस्तुतोदीर्घोयोध्वनि
र्थइव संकेतितत्वेनरेखास्मारितवर्णस्यैवार्थबोधकत्वात् । अतएवरेखांदृष्ट्वावर्णमुच्चारयंति । नगो
नागइत्यादौदीर्घत्वादिकंस्वरूपसदेवार्थविशेषधीहेतुश्चेद्दीर्घध्वनिसाहित्यरूपंवातद्व्यक्तत्वरूपंवादी
र्घत्वंवर्णगतंसत्यमेवहेतुः । नध्वनिगतंवर्णेष्वारोपितंहेतुः । ज्ञातंसद्धेतुश्चेद्वक्ष्यमाणरीत्यासवितृसु
षिरादिज्ञानमिवार्थानवच्छिन्नंसत्यंज्ञानमेवहेतुः । एतेन "यथासत्यत्वाविशेषेपिचक्षुषारूपज्ञानमे
स्तद्व्यक्तत्वरूपोधर्मोवर्णेष्वस्तितदेवदीर्घत्वंनततोतिरिक्तं तत्सत्यमेवेतिभावः । तथाचैतादृशदीर्घत्वंपारिभाषिकमितिभावः । द्वि
तीयेऽसत्यस्यैवसाधकत्वंप्राप्तमितिचेत्तत्राह ॥ ज्ञातंसदिति ॥ आरोपितंसदित्यर्थः । ननुज्ञेयभेदानवच्छिन्नस्यज्ञानमात्रस्या
तिप्रसंगेनतदवच्छिन्नस्यसिद्ध्यंगतायांविशिष्टस्ययद्भवतीतिन्यायेनासतोप्यर्थस्यहेतुत्वंप्राप्तमेवेत्यतउक्तं ॥ अर्थानवच्छिन्नमि
ति ॥ एतच्चोत्तरत्रापाकरिष्यामइतिभावः ॥ एतेनेति ॥ आद्यपक्षानुसारेणवर्णेषुदैर्घ्यस्यसत्त्वेन द्वितीयेतुसत्यस्यैतज्ज्ञानस्यै

SGDF
Sri Gargeshwari Digital Foundation

वसाधकत्ववचनेनेत्यर्थः ॥ यथेति ॥ असतःसाधकत्वेपरेणोक्ते ऽसत्त्वाविशेषाद्धूमाभासस्यापिवह्निसाधकत्वंस्यादित्यतिप्रसं गेस्माभिरभिहितेसति यथेत्यादिवाचस्पतिनाजल्पितमित्यर्थः । सदर्थभेदरूपंप्रमेयं ॥ धात्विति ॥ साचसत्यैवेतिभावः । धा तुव्याकुलतायांचभयं भयेचविषशंकारूपंज्ञानमेव हेतुस्तच्चसत्यमेवेतिहृदयं ॥ आत्मवदिति ॥ अबाधादितिभावः । ननुस त्यभूतस्यमंत्रस्यकथंस्वप्नेभानमित्यतआह ॥ स्वप्नमिति ॥ नन्वथापिभारतयुद्धादौघटोत्कचादिसृष्टमायिकगजादेरर्थक्रियाका 355

वजायतेनतुरसज्ञानंतथैवासत्वाविशेषेपिवर्णदैर्घ्यादिनासत्यंज्ञायते नतुधूमाभासादिने" तिवाच स्पत्युक्तंनिरस्तं । शंकाविषेपिशंकानिमित्तभयजन्याधातुव्याकुलतैवमरणहेतुः नतुविषं । स्वाप्नमं त्रोपिफलसंवादीचेत्स्वप्नप्रतीतत्वेप्यात्मवत्सत्यएवस्वयंप्रतिभातवेदवद्दृष्टोभासते । भारतयुद्धा दौघटोत्कचादिभिःशक्तिविशेषात्सृष्टमर्थक्रियाकारिगजादिकंसत्यमेव । सवितृसुषिररज्जुसर्पा दिज्ञानमेवचारिष्टभयादिहेतुर्नत्वर्थः । सत्यप्यर्थेतदज्ञानेभयाद्यभावात् । नचैवमनुमितिंप्रत्यपिहे

रित्वंदृष्टमितिचेत्तत्राह ॥ भारतयुद्धादाविति ॥ वक्ष्यमाणरीत्येतिपूर्वमुक्तं तदुपपादयति ॥ सवित्रिति ॥ नन्वर्थएवहे तुःकिंनस्यादित्यतआह ॥ सत्यप्यर्थइति ॥ अभावादिति ॥ ज्ञानस्यैवहेतुत्वंनार्थस्येतिभावः ॥ एवमिति ॥ ज्ञानस्यैवा रिष्टादिंहेतुत्वंनार्थस्येत्यंगीकारइत्यर्थः ॥ अनुमितिमिति ॥ प्रमानुमितिंप्रतीत्यर्थः ॥ व्याप्त्यादीति ॥ अतद्गुणसंविज्ञान

SGDF
Sri Gargeshwari Digital Foundation

बहुव्रीहिणाऽबाधितत्वंग्राह्यं ।तथाचाबाधितत्वज्ञानमेवेत्यर्थोद्रष्टव्यः ।यथाश्रुतेतुव्याप्त्यादिप्रमायानहेतुत्वंतथात्वेगंधप्रागभावाव च्छिन्नोघटोगंधवान्पृथिवीत्वादित्यत्रव्याप्त्यादिप्रमाजन्यायाअप्यनुमितेर्बाधितत्वेनप्रमात्वाभावादसंगतिःस्यादित्यवधेयं॥ नतुहे त्वादीति॥अबाधितविषयत्वमित्यर्थः॥ तज्ज्ञानेति॥ अबाधितत्वज्ञानेत्यर्थः। तथाचहेत्वाभासव्यावृत्त्यर्थंअबाधितत्वप्रमायाए वानुमितिप्रमांप्रतिप्रयोजकत्वेवाच्येप्रमात्वघटकाबाधितत्वरूपार्थस्यापितत्प्रयोजकत्वंप्राप्तमित्यर्थः । इत्येवंव्याचक्षते । वस्तुतस्तु व्याप्त्यादिज्ञानमेवेत्यादियथास्थितएवास्तुगंधप्रागभावावच्छिन्नोघटोगंधवान्इत्यत्रतुबाधादनुमितिरेवनोत्पद्यतइतितार्किकैरंगी

तुव्याप्त्यादिज्ञानमेवकारणंनतुहेत्वादीतिवाच्यं । तज्ज्ञानमात्रस्यहेत्वाभासेपिसत्त्वात् । त्वन्मते वृत्तिरूपस्यतत्प्रतिबिंबितचैतन्यरूपस्यवाज्ञानस्यापिमिथ्यात्वाच्च । सत्यसर्पादेस्त्वभिसर्पणदंश

कृतत्वेनातिप्रसंगाभावादितिसंप्रदायः।ज्ञानमात्रस्यहेत्वाभासेपिसत्त्वात्प्रमानुमितेरभावात्तत्प्रमायाएवहेतुत्वेवाच्येप्रमात्वस्यार्थस त्ताघटितत्वाद्धेतुव्याप्त्यादीनामपिहेतुत्वंप्राप्तमेवेतिसंप्रदायः। किंच न हेत्वादिज्ञानमात्रस्यप्रमानुमितिंप्रति हेतुत्वं । तथाहि। हेत्वा दिज्ञानं त्वन्मतेवृत्तिर्वा वृत्तिप्रतिबिंबितचैतन्यंवा विशिष्टं तदुभयमपिमिथ्याभूतमेव । ततश्चनमिथ्याभूतस्यहेतुव्याप्त्यादिज्ञानेप्र मात्वंनास्तीतिचेन्न। तत्रव्याप्त्यादिज्ञानस्यजनकत्वाभावात् यज्जातीयानंतरं नियमेनकार्योत्पत्तिसत्त्वमेवजनकत्वमभिप्रेतमितिन दोषइतिज्ञेयं। ननुभयादिरूपार्थक्रियातावत्सर्पजन्या साकथंसर्पभिन्ना तज्ज्ञानात्स्यादतोऽसतःसर्पस्यैवकारणत्वमित्यतोनभयादि

कंसर्पकार्यमित्युच्यतेकिंतुसर्पज्ञानकार्यमिति सन्निहितेपिसर्पेतमजानानस्यभयाद्यदर्शनात् सर्पकार्यंत्वभिसर्पणादिकमेवेत्याह ॥ सत्येति ॥ अतिप्रसंगइति ॥ सर्पाभावघटादिज्ञानस्यापिभयहेतुत्वापत्तिरित्यर्थः ॥ हेतुःस्यादिति ॥ अवच्छिन्नस्ययद्भवति तत् अवच्छेदकस्यापिभवतीतिनियमादित्यर्थः । अस्यनियमस्यव्यभिचारमाह ॥ घटेत्यादिना ॥ घटावच्छिन्नस्यघटात्यंताभा वस्य घटदेशमृत्पिंडभिन्नदेशत्वेपिघटस्यतदभाववदित्यर्थः । घटावच्छिन्नस्यध्वंसस्यघटकालभिन्नकालत्वेपिघटस्यतदभाववदित्य

नादिरेवार्थक्रियानतुभयादिः । नन्वर्थानवच्छिन्नस्यज्ञानस्यहेतुत्वेऽतिप्रसंगः । अवच्छिन्नस्यहेतुत्वेऽ र्थोपिहेतुःस्यादितिचेन्न । घटावच्छिन्नस्यघटात्यंताभावध्वंसादेर्घटदेशकालभिन्नदेशकालादित्वेपि अवच्छेदकस्यघटस्यतदभाववत्घटेच्छाब्रह्मज्ञानयोर्घटज्ञानवेदांतसाध्यत्वेपिघटब्रह्मणोस्तदभाववत्। घटप्रागभावस्यघटंप्रति विशेषदर्शनाभावस्यचभ्रमंप्रति विहितनिषिद्धकरणाभावयोः प्रत्यवाया

र्थः॥ घटब्रह्मणोरिति ॥घटस्यनित्यस्यब्रह्मणश्चघटज्ञानवेदांतसाध्यत्वाभाववदित्यर्थः॥ विहितनिषिद्धकरणाभावयोरि ति॥ विहितकरणाभावनिषिद्धकरणाभावयोरित्यर्थः।प्रत्यवायादिमित्यादिपदेनप्रत्यवायाभावसंग्रहः । ततश्चघटप्रागभावस्यघटं प्रतिहेतुत्वेपिघटस्यतदभाववत् विशेषदर्शनाभावस्यभ्रमंप्रतिहेतुत्वेपि अवच्छेदकस्यविशेषदर्शनस्यतदभाववत् विहितकरणा भावस्यप्रत्यवायहेतुत्वेपि अवच्छेदकस्यविहितकरणस्यप्रत्यवायंप्रतिहेतुत्वाभाववत् निषिद्धकरणाभावस्यप्रत्यवायाभावंप्रतिहे

SGDF Foundation

358

तुत्वेपि अवच्छेदकस्य निषिद्धकरणस्य प्रत्यवायाभावहेतुत्वाभाववत् स्वर्गकामनायायागंप्रतिहेतुत्वेपिअवच्छेदकस्यस्वर्गस्ययागहेतुत्वाभाववत् अतीतादिवस्तुस्मृत्यादेर्दुःखादिकंप्रतिहेतुत्वेपिअवच्छेदकस्यातीतादेःतदभाववत् असद्विषयकपरोक्षज्ञानस्यतद्व्यवहारंप्रतिहेतुत्वेपिअत्यंतासतस्तद्व्यवहारंप्रतिहेतुत्वाभाववदितिविवेकः । नचस्वर्गस्यातीतादेरसतश्चयागदुःखव्यवहारान्प्रतिहेतुत्वंकिंनस्यादितिवाच्यं । कामनावत्कामनाविषयस्यापिस्वर्गस्यजनकत्वेतस्यपूर्ववृत्तित्वघटितत्वात्सुखापरपर्यायस्यस्वर्गस्यप्राक्स

दिंप्रति स्वर्गकामनायाश्चयागंप्रतिअतीतादिस्मृत्यादेर्दुःखादिकंप्रतिअसद्विषयकपरोक्षज्ञानस्यचतद्व्यवहारंप्रतिहेतुत्वेपि अवच्छेदकस्यघटस्य विशेषदर्शनस्य विहितनिषिद्धकरणयोः स्वर्गस्या तीतादे रत्यंतासतश्चतदभाववत् चिकीर्षितघटबुद्धेर्घटहेतुत्वेपिघटस्यतदभाववत् ब्रह्मज्ञानस्यतदज्ञाननिवर्तकत्वेप्युदासीनस्वभावस्यब्रह्मणस्तदभाववत् । ब्रह्मज्ञानस्यजगत्प्रतिपरिणामिकारणत्वेपिब्रह्मणस्तदभाववच्चा र्थावच्छिन्नस्यहेतुत्वेपिअवच्छेदकार्थस्यकुरूणांक्षेत्रेवसतीत्यत्रकुरूणामिव

त्वापत्त्यातत्कामनैवव्याहन्येत। सिद्धेइच्छाविरहात् अतीतस्यापिदुःखजनकत्वेकार्याव्यवहितपूर्वसमयेसत्त्वापत्तिः असतोजनकत्वेतुनिस्स्वरूपत्वव्याघातइत्यवधेयं ॥ चिकीर्षितेति ॥ कर्तुमिष्टेत्यर्थः। अनागतेतियावत् । अवर्तमानत्वोपपादनायेदंविशेषणं। तथाचघटबुद्ध्यभावेघटंकरिष्यामीतीच्छानुदयेनघटोत्पत्त्यनुपपत्तेर्घटबुद्धेर्घटंप्रतिहेतुत्वेपिघटस्यतदभाववदित्यर्थः । ब्रह्मणस्तदनिवर्तकत्वेहेतुरुदासीनस्वभावस्येति। कर्तृत्वकरणत्वाद्युदासीनस्वभावस्यनिवर्तकत्वाद्यनुपपत्तेरित्यर्थः॥ अर्थावच्छिन्नस्येति॥

SGDF
Sri Gargeshwari Digital Foundation

ज्ञानस्येतिशेषः ॥ ताटस्थ्येनेति ॥ उपलक्षणत्वेनेत्यर्थः । संगृह्णाति ॥ तथाचेति ॥ सर्पपूर्वकंनैवकारणमितिसंबंधः । तस्यदृष्टांतः फलेच्छेति। फलंस्वर्गापरपर्यायसुखमित्यर्थः। फलेच्छासाध्ययागादौफलस्यापिकारणत्वे तस्यप्राक्सत्त्वापत्त्याकामनैवा युक्ता। सिद्धेइच्छाविरहादितिभावः। ननुकेवलस्यातिप्रसंगित्वादसतोर्थस्यावच्छेदकत्वमंगीकृत्य अवच्छेदकत्वंनामव्यावर्तकत्वं तच्चव्यावृत्तिप्रत्ययजनकत्वमित्यसतोपिहेतुत्वंप्राप्तमित्याशंकते ॥ नन्विति ॥ यतइति ॥ व्यावृत्तिधीजनकत्वंनव्यावर्तकत्वं सत्यपिदंडविशिष्टेदेवदत्तेतदज्ञानेव्यावृत्त्यज्ञानात् अतोव्यावृत्तिधीहेतुधीविषयत्वमेवव्यावर्तकत्वं दंडविशिष्टोदेवदत्तइतिज्ञाना

ताटस्थ्येनाहेतुत्वोपपत्तेः। तथाच "रज्जुसर्पादिधीसाध्यभयादौसर्पपूर्वकं। फलेच्छासाध्ययागादौफ लवन्नैवकारणं"। नन्वथापिमिथ्यार्थेज्ञानंप्रतिव्यावृत्तिधीहेतुत्वरूपव्यावर्तकत्वमस्तीत्यसतोपिहेतुते तिचेन्न। यतोव्यावृत्तिधीहेतुधीविषयत्वमेवव्यावर्तकत्वं। सत्यपिदंडेतदज्ञानेव्यावृत्त्यज्ञानात्। नन्व

देवदत्तेऽदंडिव्यावृत्तिधीर्जायते तद्विषयत्वंनामतत्प्रकारत्वंविवक्षितं। अन्यथाविशेष्येऽतिव्याप्तेः। अतोऽविशिष्टात्व्यावृत्ति धीहेतुभूतायाधीः दंडप्रकारिका देवदत्तविशेष्यका विशिष्टधीः तत्प्रकारत्वंदंडेस्ति एवमिहापिसर्पज्ञानेऽसर्पज्ञानाद्व्यावृत्तिबुद्धि र्भवति तज्जनिकायाधीःइदंसर्पज्ञानमित्येवंसर्पप्रकारिकातज्ज्ञानविशेष्यकाऽनुव्यवसायरूपाविशिष्टधीः तत्प्रकारत्वंसर्पेऽस्ति अतोनमिथ्यार्थस्यव्यावृत्तिधीजनकत्वं किंतुतज्ज्ञानस्यैवप्राप्तमितिनकोपिदोषः। सत्यपिदंडइत्येतत् दंडविशिष्टेदेवदत्ते तदज्ञाने

दंडप्रकारकदेवदत्तविशेष्यकविशिष्टज्ञानाभावेऽविशिष्टाद्व्यावृत्त्यज्ञानादितिव्याख्येयं । नन्वथापिज्ञानस्यैवहेतुत्वांगीकारेपिअ

SGDF
Sri Gargeshwari Digital Foundation

360

सत्यस्यैवहेतुत्वंसिद्ध्यति ज्ञानस्यभयादिजनकत्वेऽतिप्रसंगभयायसर्पाद्यवच्छिन्नत्वंकारणतावच्छेदकंवाच्यं । तथाचावच्छेदकी
भूतस्यसर्पादेर्मिथ्यात्वेन तदवच्छिन्नज्ञानस्यापिमिथ्यात्वंप्राप्तमित्याशंकते ॥ नन्विति ॥ स्यादिदंयद्यवच्छेदकस्ययद्भवति
तत्अवच्छिन्नस्यापीतिनियमःस्यात् नचैवंव्यभिचारादित्याह॥तुच्छस्येति॥ अवच्छेदकीभूतस्यतुच्छस्य तुच्छत्वेपितदवच्छिन्न
ज्ञाने तुच्छवैलक्षण्येचतुच्छत्वस्यादर्शनादित्यन्वयः। अविद्यानिवृत्तिःपंचमप्रकारावा । आत्मैवाज्ञानहानिरितिवचनात् अधिकर

थाप्यवच्छेदकस्यमिथ्यात्वेऽवच्छिन्नस्यापितन्नियमादसत्यस्यहेतुतेतिचेन्न । तुच्छस्यज्ञानेतुच्छाद्वैल
क्षण्येचतुच्छत्वस्य प्रातिभासिकाद्वैलक्षण्येचप्रातिभासिकत्वस्यपंचमप्रकारायामात्मस्वरूपभूतायां
वाऽनिर्वचनीयाज्ञाननिवृत्तौचचतुर्थप्रकाररूपानिर्वचनीयत्वस्य पारमार्थिकात्मस्वरूपेतद्भिन्नेवानृतद्वै
तस्याभावेततोव्यावृत्तौचानृतत्वस्यादर्शनात् । तत्रावच्छेदकानामसदादीनांताटस्थ्येऽत्रापिविषय

णातिरिक्ताभावाभावादात्मस्वरूपावेति मतद्वयसद्भावादाह ॥ पंचमेति ॥ चतुर्थप्रकारानिर्वचनीयत्वाभावोपपादनायपंच
मप्रकारेत्यादिविशेषणं । अत्रापिमतद्वयसद्भावादाह ॥ परमार्थिकेति ॥ अनृतंयद्द्वैतंतस्याभावेइत्यर्थः । ततः अनृतात्
द्वैतात् । अनृतद्वैताभावस्यानृतव्यावृत्तेश्चपारमार्थिकत्वात् पारमार्थिकात्मस्वरूपत्वमेव । तद्भिन्नत्वेपिनाद्वैतहानिः ॥ १८१ ॥
अभावरूपधर्मानाद्वैतंघ्नंतीतिमंडनवचनादितिध्येयं ॥तत्रेति॥ तत्र तुच्छज्ञानादौ । असदादीनांताटस्थ्ये उपलक्षणत्वे अत्रापि

361

सर्पज्ञानादौ विषयस्योपलक्षणत्वमेवास्त्वित्यर्थः ॥ अर्थानवच्छिन्नमेवेति ॥ एवंचावच्छेदकस्यमिथ्यात्वेऽवच्छिन्नस्यापित
न्नियमादसत्यस्यापिहेतुतेतिचोद्यानवकाशइतिभावः ॥ अतिप्रसंगइति ॥ विषयातिरिक्तस्यव्यावर्तकस्यज्ञानेऽभावात्विषयस्य
चव्यावर्तकत्वानंगीकारेज्ञानमात्रस्यैवभयादौहेतुत्वांगीकारापातेनसर्पाभावघटादिज्ञानमपिभयादिहेतुःस्यादित्यतिप्रसंगइत्यर्थः ।
विषयावच्छेदंविषयरूपंव्यावर्तकं ॥ स्वरूपातिरिक्तेति ॥ विषयतत्संबंधयोर्ज्ञानेनसहस्वरूपसंबंधातिरिक्तद्विष्ठसंबंधस्याभा

स्तथास्तु । वस्तुतस्त्वर्थानवच्छिन्नमेवज्ञानंहेतुः। नचातिप्रसंगः। विषयावच्छेदमनपेक्ष्यस्वतएवस
र्पज्ञानस्यासर्पज्ञानाद्व्यावृत्तेः । तथाहि सर्पज्ञानमसर्पज्ञानात्तावद्व्यावृत्तं व्यावृत्तिश्चव्यावर्तकाधीना।
नचविषयस्तत्संबंधोवाव्यावर्तकः। स्वरूपातिरिक्तद्विष्ठसंबंधाभावात् । असंबद्धस्यचाव्यावर्तकत्वा
त् । अर्थ[1]संबंधांतरमंतरेणविशिष्टव्यवहारजननयोग्यंस्वरूपमेववा ज्ञानमात्रनिष्ठधर्मोवासंबंधः ।

वादित्यर्थः ॥ असंबद्धस्येति ॥ विषयस्यतत्संबंधस्यचज्ञानेनासंबद्धस्येत्यर्थः । ज्ञानंप्रत्यव्यावर्तकत्वात् । अन्यथातिप्रसंगः
स्यादित्यर्थः । स्वरूपमेवसंबंधइत्यन्वयः । किमिदंस्वरूपसंबंधत्वमित्यतस्तन्निर्वक्ति ॥ संबंधांतरमिति ॥ घटसंयुक्तेपटेस्वरूप
संबंधत्वंमाभूदितिसंबंधांतरमंतरेणेत्युक्तं । घटवद्भूतलस्यचत्वरीयघटाभावेनसहसंबंधांतरशून्यत्वसद्भावेनस्वरूपसंबंधप्रसंगवा
रणायविशिष्टप्रत्ययजनकत्वमित्युक्तं । विशिष्टप्रत्ययाजनकेनित्यातींद्रियाभावभूतलयोः स्वरूपसंबंधेऽव्याप्तिवारणाययोग्ये

1 आत्मविषयकज्ञानेनात्मन स्वरूपसम्बन्धेऽव्याप्तिवारणाय उद्देश्यप्रतीतिनिर्वाहकेति रूप भान्तरविशेषणं । इत्यादि तरंगिणीस्थमेव ।

SGDF

त्युक्तं । योग्यत्वंसहकारिविरहप्रयुक्तकार्याभावः । एतादृशयोग्यतायास्तत्रापिसद्भावान्नाव्याप्तिः । अयमात्मेतिआत्मविषय
कज्ञानस्यात्मनाविषयविषयिभावलक्षणस्वरूपसंबंधसद्भावात्तत्राव्याप्तिःस्यात् समवायस्यैवसंबंधांतरस्यसत्त्वादतउद्देश्यप्रतीति
निर्वाहकेतिसंबंधांतरेविशेषणंदेयं। दंडीदेवदत्तः रूपीघटइत्यत्रसंयोगसमवाययोरुद्देश्यविशिष्टप्रतीतिनिर्वाहकत्वेसत्यपि अयमा
त्मेतिविषयविषयिभावरूपा याउद्देश्यप्रतीतिःतन्निर्वाहकत्वंसतोपिसमवायस्यनास्तीतिउद्देश्यप्रतीतिनिर्वाहकसंबंधांतरमंतरेणवि
शिष्टव्यवहारजननयोग्यत्वस्यसत्त्वान्नाव्याप्तिरितिसंप्रदायविदः ॥ ज्ञानमात्रनिष्ठेति ॥ सर्पज्ञानमात्रनिष्ठेत्यर्थः । सचक्षीरमाधु
र्यादिवदाख्यातुमशक्योवा तद्व्यवहारजननशक्तत्वरूपोवा वक्ष्यमाणरीत्याद्रष्टव्यः । एतच्चद्वितीयपक्षाभिप्रायेण । प्रथमपक्षे
तर्हिविषयमनंतर्भाव्यज्ञानएवविशेषःसिद्धः[1]। किंचसर्पज्ञानमसर्पज्ञानाद्धर्म्यंतरसंबंधमनपेक्ष्यविल
क्षणं। तज्जनकविलक्षणजन्यत्वात् । यवांकुरात्कलमांकुरवत्। तज्जन्यविलक्षणजनकत्वात्। यवबीजा
तुज्ञानमेवविशेषइतिबोध्यं ॥ सर्पज्ञानमिति ॥ रज्जावितिशेषः । धर्मीविषयः । तथाचसंबंधांतरमनपेक्ष्येत्यर्थः । अतएवोत्तर
त्रतथैवव्यवहारः स्वतएवेतियावत् ॥ तदिति ॥ असर्पज्ञानजनकसामग्रीविलक्षणसामग्रीजन्यत्वंपक्षे । दृष्टांतेतुयवांकुरजनक
सामग्रीविलक्षणसामग्रीजन्यत्वंकलमांकुरेऽस्तीतिज्ञातव्यं ॥ तदिति ॥ असर्पज्ञानजन्यंयत्संतोषादिकार्यंतद्विलक्षणंयद्भयादि
कार्यंतज्जनकत्वंपक्षेस्ति । दृष्टांतेतुयवबीजजन्यंयद्यवांकुररूपंकार्यंतद्विलक्षणंयत्कलमांकुररूपंकार्यंतज्जनकत्वंकलमबीजेस्तीतिज्ञा
तव्यं ॥ विलक्षणेति ॥ तथाचधर्म्यंतरसंबंधमनपेक्ष्यविलक्षणत्वरूपंसाध्यंविनापीत्यर्थः ॥ यवबीजेत्यादि ॥ यवबीजवि

362
तरंगिणी पर्यंत

SGDF
Sri Gargeshwari Digital Foundation

लक्षणजन्यंकलमांकुरंयवांकुरविलक्षणजनकंकलमबीजंतेअपीतिविवेकः। तथाचस्वाभाविकंवैलक्षण्यंविनैवधर्म्यंतरसंबंधेनतज्जन
कविलक्षणजन्यत्वंचेत्तर्हियवांकुरजनकबीजविलक्षणसामग्रीजन्यमपिकलमांकुरंकदाचित्कलमांकुरत्वरूपस्वाभाविकविशेषंवि
नैवोपलक्षणभूतचैत्रादिधर्म्यंतरसंबंधित्वमात्रेणयवांकुराद्विलक्षणंस्यात् तथास्वाभाविकंवैलक्षण्यंविनैवधर्म्यंतरसंबंधमात्रेणै
वतज्जन्यजनकविलक्षणजनकत्वंचेत्तर्हियवबीजजन्ययवांकुरकार्यविलक्षणजनकमपिकलमबीजंकदाचित्कलमबीजत्वरूपस्वाभा
विकवैलक्षण्यंविनाप्युपलक्षणीभूतचैत्रादिसंबंधित्वमात्रेणयवबीजाद्विलक्षणंस्यात्। नचोभयत्रापीष्टापत्तिरितिवाच्यं। चैत्रादि

त्कलमबीजवत्। नचविलक्षणविषयसंबंधेनैवहेत्वोरुपपत्तेरप्रयोजकत्वं। तथात्वेहियवबीजतदं
कुरविलक्षणजन्यजनकेकलमांकुरतद्बीजेअपिकदाचिद्यवांकुरतद्बीजाभ्यांकलमांकुरत्वतद्बीजत्वरू
पस्वाभाविकैवलक्षण्यंविनोपलक्षणभूतचैत्रादिसंबंधित्वमात्रेणविलक्षणेस्यातां। साक्षात्कारोपि
परोक्षज्ञानादन्यसंबंधित्वमात्रेणविलक्षणःस्यात्। गृहमपिसंस्थानविशेषंविनाविचित्रकाकहंसो

संबंधित्वाज्ज्ञानेपिकलमांकुरत्वतद्बीजत्वदर्शनमात्रेणांकुरांतरात्बीजांतराच्चवैलक्षण्यानुभवस्यसार्वजनीनत्वादित्यर्थः। कादाचि
त्कविषयसंबंधमात्रेणहेत्वोरुपपत्तावुच्यमानायांअतिप्रसंगांतरमाह ॥ साक्षात्कारोपीति ॥ अन्येति ॥ चैत्रादि
संबंधित्वमात्रेणेत्यर्थः। पुनस्तत्रैवदूषणांतरमाह ॥ गृहमिति ॥ गृहंविचित्रकारणजमितिसंबंधः। कादाचित्कविचित्रकाकहंसा

363

SGDF
Sri Gargeshwari Digital Foundation

364

द्युपलक्षणत्वमात्रेणेत्यर्थः ॥ विचित्रकार्यकारीति ॥ इतरगृहासाध्यातपवारणादिरूपकार्यविशेषकारिस्यादित्यर्थः ॥ अभा
वस्येति ॥ यथाघटप्रागभावइत्यादौप्रतियोगिनोऽभावंप्रत्युपलक्षणत्वंतथेत्यर्थः । ननुघटादेःप्रागभावंप्रत्युपलक्षणत्वमेवनवि
शेषणत्वं तयोरेककालत्वाभावात् प्रकृतेतुविषयस्यज्ञानंप्रतिविशेषणत्वमेवकिंनस्यादित्यतआह ॥ अतीतादीति ॥ तथादर्शना
त् विषयाभावेपिज्ञानदर्शनादित्यर्थः । तदेवोपपादयति ॥ नहीति ॥ अनिर्वाच्यः रूप्यवत्प्रातिभासिकः । व्यावहारिकस्तुदू
रापास्तइत्यपिशब्दार्थः । तथाचविषयस्यनविशेषणत्वंयुक्तंकिंतूपलक्षणत्वमेवेतिभावः । किंप्रकृतइत्यतआह ॥ उपलक्षणेन

पलक्षणत्वमात्रेणविचित्रकारणजंविचित्रकार्यकारिचस्यात् । अपिच ज्ञानस्यस्वकारणादुत्पत्तौ
स्वकार्यकरणेचविषयः अभावस्यप्रतियोगीवोपलक्षणं । अतीतादिज्ञानेऽसद्विषयकपरोक्षज्ञानेच
तथादर्शनात् । नहितत्रार्थः अनिर्वाच्योप्यस्ति । उपलक्षणेनचान्योव्यावर्तकउपस्थाप्यः का
केनसंस्थानविशेषइवेतिस्वतोविशेषसिद्धिः । एवंचयथाप्रतियोगिनमनंतर्भाव्यैवघटस्याभावः
अभावांतरात्यथाचविषयमनंतर्भाव्यैवशिलोद्धरणकृतिर्माषोद्धरणकृतितः । यथाचातीतादि

चेति । उपलक्षणीभूतविशेषणंचेत्यर्थः ॥ स्वतइति ॥ उपलक्षणीभूतसर्पादिविषयोपस्थाप्योज्ञानेविशेषःसिद्धइत्यर्थः ॥ एवं
चेति ॥ यथेत्यस्य तथासर्पज्ञानमपीतिदूरस्थेनतथाशब्देनान्वयः ॥ अनंतर्भाव्येति ॥ प्रतियोग्यघटितस्वरूपतयेत्यर्थः ।
तस्योपलक्षणत्वेनाभावस्वरूपानंतर्गतत्वादितिभावः । अभावांतरादिति । अस्यविलक्षणमित्यनेनाग्रेतनेनसंबंधः ।

यथाचेत्यादौसर्वत्रविषयमनंतर्भाव्येत्यस्यानुषंगः ॥ ज्ञानांतरादीति ॥ अतीतानागतज्ञानंवर्तमानवस्तुज्ञानांतरात् अस
द्विषयकपरोक्षज्ञानव्यवहारौसद्विषयकापरोक्षज्ञानव्यवहाराभ्यामित्यर्थः । ज्ञानव्यवहारौज्ञानांतरादितोविलक्षणावितिलिंगव
चनव्यत्ययेनान्वयः ॥अन्यथेति॥ परोक्षापरोक्षज्ञानस्मृत्यनुभवादीनांवैलक्षण्यानंगीकारेपरोक्षापरोक्षज्ञानस्मृत्यनुभवकार्याणां
संकरापत्त्याऽसंकीर्णव्यवहारादिकंचनस्यात् । तथाऽभावस्याभावांतराद्वैलक्षण्यानंगीकारेतयोस्सांकर्यापत्त्यादोषाभावगुणाभाव
कार्याणांभ्रमादीनामपिसंकरःस्यादित्यर्थः। नन्वभावकृत्यतीतादिज्ञानेषुप्रतियोगिविषयाभ्यांकृतासंकरसंभवात्तत्कार्येष्वसंकरोपप

365

ज्ञानमसद्विषयकपरोक्षज्ञानव्यवहारौचज्ञानांतरादितः । यथाचघटस्मृतिर्घटानुभवात् ।
यथाचघटस्यपरोक्षज्ञानंतदपरोक्षज्ञानाद्विलक्षणं अन्यथातत्तत्कार्यसंकरःस्यात् । नचा
भावाद्यवच्छेदकप्रतियोग्यादिविशेषादसंकरः । ध्वंसादेःकृतेरतीतादिज्ञानस्यचकालेप्र
तियोगिविषययोरसत्वात् । पूर्वक्षणेऽसतश्चनियतपूर्ववृत्तित्वरूपकारणत्वव्याघातात् ।

त्तिरित्याशंक्यनिराकरोति ॥ नचेति ॥ कुतोनचेत्यतआह ॥ ध्वंसादेरिति ॥ आदिपदेनप्रागभावः । प्रागभावप्रध्वंसाभाव
कालेप्रतियोगिनोरसत्त्वात्कृतेःकालेविषयस्यासत्त्वात्। कृत्यपरपर्यायियत्नस्यसिद्धवस्तुकर्मकत्वाभावेनकृतेःकालेपिविषयाभावाद
तीतादिज्ञानकालेचविषयस्यासत्त्वादितियोजना । ननुप्रध्वंसादेःकालेप्रतियोग्यादेरसत्त्वेपिकदाचित्सत्त्वमस्त्येवेत्यतआह ॥ पू
र्वक्षणइति ॥ अयमर्थः कदाचित्प्रतियोगिनःसत्त्वेपिध्वंसनिर्वाह्यकार्यापेक्षयापूर्वकालप्रतियोगिनोऽसत्त्वेनप्रतियोगिसंकीर्ण

SGDF
Foundation

स्वरूपस्यध्वंसादेःकारणस्यासिद्ध्याध्वंसादिकार्याणामसंकरोनस्यात्। एवंचकृत्युत्तरकालेशिलोद्धरणरूपविषयस्यसत्त्वेपिकृतिकाले तस्यासत्त्वेनअसंकीर्णस्वरूपालाभात्कृतिकार्याणामसंकरोनस्यात् । कार्यापेक्षयापूर्वक्षणेऽसतोऽविद्यमानस्यासंकीर्णस्वकार्यप्रति नियतपूर्वक्षणवृत्तित्वरूपंकारणत्वंव्याहतमिति । ननुध्वंसादेःकालेप्रतियोग्यादीनामसत्त्वेनविशेषणत्वायोगेपितेषांतत्रोपलक्षण त्वंभविष्यति तथाचोपलक्षणीभूतप्रतियोग्यादिसंबंधमात्रेणध्वंसादिस्वरूपाणामसांकर्येसतितत्कार्येप्यसांकर्यंभविष्यतीत्यतआह ॥ उपलक्षणेति॥ अन्यथासंस्थानविशेषंविनाकाकहंसाद्युपलक्षणसत्त्वमात्रेणगृहंविचित्रकारणजंविचित्रकार्यकारिचस्यात् कल मबीजांकुरतद्बीजेअपिउपलक्षणीभूतचैत्रादिसंबंधमात्रेणविलक्षणेस्यातामित्यतिप्रसंगःस्यादितिभावः । इदमुपलक्षणं काकादिकं

उपलक्षण भेदमात्रेण[1]चविलक्षणकार्याद्ययोगात् । अत्यंतासतश्चकदाप्यभावात् । शिलोद्धरणार्थमाषोद्धारप्र यत्नेकृतेपितदनिष्पत्तेश्च । तथासर्पज्ञानमपिविषयमनंतर्भाव्यैव असर्पज्ञानाद्विलक्षणं । उक्तप्रमाणैरनुभवे

ह्युपलक्षणंस्वोपलक्ष्यगृहादिनाकदाचित्संबद्धंसदुपलक्षणंदृष्टं । प्रतियोग्यादिकंचध्वंसादिनाकदाप्यसंबद्धमितिनोपलक्षणमित्य पिद्रष्टव्यं । शिलोद्धरणकृतेर्माषोद्धरणकृतितोवैलक्षण्येहेतुमाह ॥ **शिलोद्धरणार्थमिति**॥ माषोद्धरणेयावान्प्रयत्नःतावतिप्रय त्नेकृतेपीत्यर्थः । यदिशिलोद्धरणकृतेर्माषोद्धरणकृतितोवैलक्षण्यंनस्यात्साम्यंस्यादितियावत् । तर्हिमाषोद्धरणकृतितःशिलोद्धर णनिष्पत्तिःस्यान्नचैवं ततोवैलक्षण्यंतयोरनुभवसिद्धमितिभावः । विषयकृतवैलक्षण्याभावस्तुपूर्वमेवोपपादितइतिद्रष्टव्यं ॥ **वि षयमिति** ॥ विषयांतर्भाववंविनास्वतएवविलक्षणंविशेषयुक्तमित्यर्थः । नन्वसौज्ञानगतोविशेषःयद्यौपाधिकस्तर्हिवक्तव्यइतिचे

[1] मात्रशब्दो स्वार्थः

SGDF
Sri Gargeshwari Digital Foundation

त्त्राह ॥ तस्यजातिरूपस्येति ॥ तस्याप्रामाणिकत्वंनमंतव्यमित्याशयेनोक्तंउक्तप्रमाणैरिति । ननुज्ञानेविशेषःस्वतोनयुक्तः घटज्ञानमित्यादिविषयविशेषनिरूपितत्वेनैवव्यवहाराज्जातिविशेषस्यसत्त्वेतुकदाचिद्विषयसंबंधंविनाव्यवहारःस्यात् तेनज्ञायतेस विशेषोऽप्रामाणिकइतितत्राह ॥घटज्ञानमिति॥ यथामाधुर्यादेःस्वतोविलक्षणत्वेपिक्षीरादिसंबंधंविनापिप्रकारांतरेणप्रतिपादयि तुमशक्यत्वात्क्षीरादिनैवनिरूपणंतथाज्ञानस्यस्वतोविलक्षणस्यापिघटादिसंबंधंविनाप्रकारांतरेणनिरूपयितुमशक्यत्वात्घटादिना निरूपणंयुक्तं । तावतानानुभवसिद्धविशेषापलापःकार्यइत्यर्थः । किंचसविशेषआख्यातुंचशक्यतइत्याशयेनाह ॥ किंचेति॥ 367

नचसिद्धस्य तस्यजातिरूपस्यविशेषस्याख्यातुमशक्यत्वात् । घटज्ञानमितिव्यवहारः क्षीरमाधुर्यंचाक्षुष ज्ञानमितिवद्युक्तः । किंचत्वन्मतेतत्तद्वृत्तेस्तत्तदाकारत्वेनचैतन्यस्यचतत्तत्प्रतिबिंबितत्वेनवातदभिव्यक्त त्वेनवाममतुतत्तज्ज्ञानस्यतत्तदीयस्वभावत्वेनवातत्तद्व्यवहारजननशक्तत्वेनवास्वतएववैलक्षण्यं । नहि

तत्तदाकारत्वेन तत्तत्प्रतिबिंबितत्वेनस्वतएववैलक्षण्यमितिसंबंधः॥ तत्तदीयेति ॥ घटपटीयस्वभावत्वादिरेवविशेषइत्यर्थः। नन्वेवंघटीयस्वभावस्यज्ञानस्यस्वकार्यंप्रतिकारणत्वाद्घटादेरपिकारणत्वेननिवेशःप्राप्तः तद्व्यवहारजननशक्तत्वस्यवाज्ञानगतवि शेषत्वेतत्कार्येपितत्कारणत्वेननिवेशःप्राप्तएवेत्यतआह ॥ नहीति ॥ घटीयस्वभावस्यतदभावस्येतिसामानाधिकरण्यं । अय मत्रविवेकः । त्वन्मतेघटाकारवृत्तिरस्तितत्रघटाकारवृत्तेर्यत्कार्यमस्तितत्कारणत्वेनघटादेरपिननिवेशः । तत्रदृष्टांतोगवयेति ।

SGDF
Sri Gargeshwari Digital Foundation

गवयाकाररेखाचवर्ततेतस्यायत्कार्यंतत्रकारणत्वेनप्रसिद्धगवयस्यननिवेशस्तद्वत्ज्ञानस्यतदीयस्वभावत्वेपितत्तदीयस्वभावोपेत ज्ञानकार्ये नघटादेःकारणत्वेनप्रवेशः । तत्रदृष्टांतः घटीयस्वभावस्यतदभावस्येति । घटीयस्वभावस्यघटाभावस्ययत्कार्यंतत्कार णत्वेनघटादेर्नप्रवेशस्तद्वत्तथाज्ञानस्यतद्व्यवहारजननशक्तत्वेनस्वतोवैलक्षण्येतद्व्यवहारजननशक्तस्यज्ञानस्यकार्येतच्छब्दोदितघ टादेःकारणत्वेननप्रवेशः । तत्रदृष्टांतो दाहशक्तेरिति । दाहशक्तिमतोवह्नेरित्यर्थः । यथादाहशक्तिमतोवह्नेर्यत्कार्यंहिमनिवार णादितत्रकारणत्वेननवह्नेःप्रवेशस्तथेत्यर्थः । अत्रसर्वस्यापितत्तद्विषयसंबंधंविनाव्यवहर्तुमशक्यत्वादेवतत्तद्व्यवहारोनतुतद्बला

गवयाकाररेखायाघटीयस्वभावस्यतदभावस्य[1]वादाहशक्तेर्वायत्कार्यंतद्धेतुकोटौगवयादेर्निवेशः । त स्माद्रज्जौसर्पज्ञानस्यभ्रमत्वेनाधिकजन्यत्वेपिसर्पज्ञानत्वेनतद्धेतुजन्यत्वात्स्वतएवासर्पज्ञानात्वैलक्षण्य मितिनकोपिदोषः । तदुक्तं"सर्पभ्रमादावपिहिज्ञानमस्त्येवतादृशं ॥ तदेवार्थक्रियाकारितत्सदेवार्थ

त्कारणकोटौप्रवेशोस्यकल्प्यइत्याशयः ॥ तद्धेतुजन्यत्वादिति॥ सर्पज्ञानेयाक्लृप्तसामग्रीतज्जन्यत्वादित्यर्थः । यद्यपिसर्पज्ञान हेतुसर्पसन्निकर्षजन्यत्वंरज्जुसर्पज्ञानेनास्ति रज्जुसन्निकर्षस्यैवसर्पज्ञानहेतुत्वमित्यंगीकारात्तथापि सर्पज्ञानहेतुर्द्विविधः सर्पसन्नि कर्षोदोषश्चेति रज्जुसर्पज्ञानेचदोषरूपसर्पज्ञानकारणमस्त्येवेतिभावः । तथाचोक्तंसुधायां । सचायंविशेषः सत्यसर्पज्ञानेसमीची नसामग्र्याजातोमिथ्यासर्पज्ञानेत्वसमीचीनयेतिनकश्चिद्दोषइति । तदेतदाह । भ्रमत्वेनाधिकजन्यत्वेपीति । तज्जन्यत्वादिति ।

1 घटीयस्वभावस्य तदभावस्येति समानाधिकरणं

368 तदंशानि पश्यत

विषयकृतवैलक्षण्याभावोपपादनायेतिज्ञातव्यं । तादृशंमिथ्याभूतसर्पाद्यनवच्छिन्नंस्वतएवासर्पज्ञानाद्व्यावृत्तमित्यर्थः ॥ खंडन कारोक्तासत्कारणत्वसाधकयुक्तिमनूद्यदूषयति ॥ अंतर्भावितसत्त्वंचेदिति ॥ अयंकारिकार्थः । अंतर्भावितंसत्त्वंयस्मिंस्तदं तर्भावितसत्त्वं सत्ताविशिष्टमितियावत् । दंडादि । तथाअंतर्भावितंसत्त्वंयस्मिन्नभवतितन्नांतर्भावितसत्त्वंसत्तोपलक्षितमितिया वत् । दंडादि । तथाचसत्ताविशिष्टंवाकारणंसत्तोपलक्षितंवाकारणंनाद्यइत्याह ॥अंतर्भावितेति॥ अंतर्भावितसत्वंसत्ताविशिष्टं दंडादिकारणंचेत्तर्हिततः सत्ताविशिष्टंकारणमित्यभ्युपगमात्सत्ताविशिष्टेसत्तायाआत्माश्रयेणाभावात्सत्ताविशिष्टमसदेवेतिप्राप्तं

कारकमिति ॥ अंतर्भावितसत्वंचेत्कारणंतदसत्ततः। नांतर्भावितसत्त्वंचेत्कारणंतदसत्ततइत्यादिखंडनोक्ता

369

तथाचासतःकारणत्वसिद्धिः। नद्वितीयइत्याह॥ नांतर्भावितेति॥ नसमासोयंनांतर्भावितसत्त्वंसत्त्वोपलक्षितंसत्ताविरहितंदंडादि कंकारणंचेत्तर्हिततःसत्तोपलक्षितंकारणमित्यभ्युपगमादसदेवकारणमितिप्राप्तं । सत्तायाउपलक्षणत्वमात्रेणवस्तुतोदंडादौसत्ता याअभावादितिप्राप्तेरितिभावः । यद्वाकारणमित्युभयत्रभावप्रधानोनिर्देशः । कारणत्वंअंतर्भावितसत्त्वंअंतर्भावितसत्त्वोपेतंभव ति सत्तामंतर्भाव्यकारणत्वंवर्ततेवानवा कारणत्वाश्रयकोटौसत्तावर्ततेवानवेत्यर्थः। सत्तायांकारणत्वंवर्ततेवानवेतियावत् । आद्ये तर्ह्यसदेवकारणमितिप्राप्तं । कुतः ततःसत्तायांकारणत्वस्वीकारात् । सत्तायांचसत्ताविरहात् । एवंचसत्ताविरहितत्वेनासत्याएवस त्तायाःकारणत्वंप्राप्तमितिअसतःकारणत्वसिद्धिः। द्वितीयेतर्ह्यसदेवकारणमित्यायातं कुतः ततः सत्तायांकारणत्वास्वीकारात् । अयं

SGDF Foundation

370

भावः । सत्ताजातिस्तावत्द्रव्यंसत् गुणः सन् कर्मसदित्यनुगतव्यवहारजनकत्वेनाभ्युपेया । प्रकारांतराभावात् । एवंचसत्तायांकारणत्वाभावेऽनुगतव्यवहारजनकत्वमेवनस्यात् । जनकत्वस्यकारणत्वरूपत्वात् । तथाचसत्तास्वरूपएवप्रमाणाभावप्राप्त्यासत्तावार्तायाएवलोपेनसर्वेषामपिकारणानांदंडादीनामसत्त्वप्राप्त्याऽसतामेवकारणत्वसिद्धिरिति ॥ असत्कारणतेति ॥ एतस्यस्वव्याहतेत्यादिनान्वयः । तदीयग्रंथेतदीयप्रमेयेपूर्वपक्षिणाकेनचिच्छ्लोकेनदूषितेसतितेनोक्तमस्ति । त्वद्ग्रंथैवान्यथाकाराअक्षराणिकियंत्यपि । तस्मादस्माभिरप्यस्मिन्नर्थेनखलुदुष्पठेति । अस्मिन्नर्थेऽस्मदभिमतविषयेपित्वद्ग्रांथैवकियंत्यक्षराणिस्थापयित्वाऽन्यथाकारादुष्पठानखलुसुपठैवेतितदर्थः । एतमेवखंडनकारोक्तंन्यायंहृदिनिधायाह ॥ अस्येत्यादिना ॥ तत्प्रकारस्तु अंऽसत्कारणता । अस्यैवश्लोकस्याकारप्र(क्षेपे)श्लेषेणपठितुंशक्यत्वात् अंतर्भावितसत्वंचेदधिष्ठानमसत्ततः । तर्भावितसत्त्वंचेदनसत्कारणंततः । नांतर्भावितसत्त्वंचेदनसत्कारणंततइतिअकारप्रश्लेषेणपठितुंशक्यत्वादित्यर्थः । कारिकार्थस्त्वित्थं अंतर्भावितसत्त्वंअबाध्यत्वरूपसत्ताविशिष्टंदंडादिकारणंचेत्तर्हिततःसत्ताविशिष्टस्यकारणत्वाभ्युपगमात् अनसत्कारणं असत्कारणंनकिंनामसदेवकारणमित्यायातं । अबाध्यत्वरूपसत्ताविशिष्टेऽबाध्यत्वरूपसत्तायाःसत्त्वात् आत्माश्रयत्वस्यप्रमेयत्वादेःस्ववृत्तित्वइवादोषत्वात् । नांतर्भावितसत्त्वंचेत् सत्त्वोपलक्षितंकारणंचेत् तर्हिततस्सत्तोपलक्षितस्यकारणत्वांगीकारादेवानसत्कारणं सदेवकारणमितिसिद्ध्यति । अबाध्यत्वरूपसत्त्वोपलक्षितेपिअबाध्यत्वरूपसत्तायाःसत्त्वादित्यर्थः । एवंद्वितीययोजनायामपिकारणत्वंसत्तायांवर्ततेनवेत्यर्थः । तत्रकारणत्वंसत्तायांवर्ततइतिपक्षेप्यनसत्कारणंसिद्ध्यति सत्तायामप्यबाध्यत्वरूपसत्ता

SGDF
Sri Gargeshwari Digital Foundation

याःस्वीकारेणसत्तायांसत्तारहितत्वाभावात् । कारणत्वंसत्तायांनास्तीतिपक्षेप्यनसत्कारणंसिद्ध्यति सत्तायांकारणत्वाभावेतस्याः स्वज्ञानंप्रत्यपिकारणत्वाभावप्रसंगेनसत्तास्वरूपस्यैवाप्रामाणिकत्वंस्यात् अतःकारणभिन्नासत्तासतितिष्ठतीत्यंगीकार्यं तथाचसत्तायाएवकारणत्वसिद्धिरितिकिंचिद्द्रष्टव्यं ॥ अंतर्भावितेति ॥ अयमिहकारिकार्थः । अंतर्भावितसत्त्वंचेदधिष्ठानंसत्ताविशिष्टमधिष्ठानमितियावत् । तर्ह्यधिष्ठानमसदेवेतिप्राप्तंसत्ताविशिष्टेऽधिष्ठानेआत्माश्रयप्रसंगेनसत्तायाअभावात् । नांतर्भावितसत्त्वंचेदधिष्ठानंसत्तोपलक्षितंसत्ताविरहितंचेदधिष्ठानमितियावत् । तर्ह्यधिष्ठानमसदेवेतिप्राप्तमितित्वदुक्तन्यायेनाधिष्ठानस्याप्यसत्त्वापत्तिःस्यादित्यर्थः । यद्वाउभयत्राप्यधिष्ठानमितिभावप्रधानः । तथाचांतर्भावितसत्त्वंचेदधिष्ठानमित्यादेःसत्तामंतर्भाव्याधिष्ठानत्वं ३७८

नांतर्भावितसत्वंचेदधिष्ठानमसत्ततइत्यपिपठितुंशक्यत्वाचस्वव्याहता । कथमसतःसज्जायेतेत्यादिश्रुत्या

वर्ततेनवा अधिष्ठानत्वाश्रयकोटौसत्तावर्ततेवानवेत्यर्थः । सत्तायामधिष्ठानत्वंवर्ततेवानवेतियावत् । आद्येऽसदधिष्ठानंसत्तायांसत्ताभावेनासत्त्वात् । द्वितीयेसत्तायामधिष्ठानत्वंनास्तिचेत्तर्हिअसदेवाधिष्ठानमितिप्राप्तंअसत्तायांचसत्ताव्याघातेनाभावादसत्ताऽसत्येवेति। तथाचासत्यायामेवासत्तायामधिष्ठानत्वंप्राप्तमितिअधिष्ठानमसदितिप्रसिद्ध्यतीत्युपपादनंद्रष्टव्यं। अथवाअधिष्ठानत्वस्यसत्तायामभावेतद्विरुद्धासत्त्वप्राप्त्यासर्वथात्यंतासत्त्वप्राप्तेः सत्तास्वरूपमेवकुत्रापिनास्तीतिप्राप्तंतथाचयदधिष्ठानत्वेनसंमतंकिंचित्तत्रापिसत्तानास्तीतिप्राप्त्याधिष्ठानमसदेवापन्नमितिभावः। असत्कारणताश्रुत्यादिविरुद्धाचेत्याह ॥कथमिति॥ असदेवेद

SGDF
Sri Gargeshwari Digital Foundation

मग्रआसीदित्यादिनाऽसतःकारणत्वंपूर्वपक्षय्य कथंनुखलुसोम्यैवंस्यात्कथमसतःसज्जायेतेत्यादिनाऽसतःकारणत्वंनिषिद्धमित्यर्थः ॥नासतइति॥ असतःकारणत्वंनयुज्यतेऽदृष्टत्वादितिसूत्रार्थः। विरुद्धाऽन्यत्रनिरस्ताचअसत्कारणतेतिवर्तते। उपसंहरति ॥तस्मादिति ॥ असत्त्वइति ॥ दृश्यत्वादिहेतुभिर्हेतुवाक्यादिप्रापितानांसाधनव्याप्त्यादीनांमिथ्यात्वबोधनेनतेषामसत्त्वेप्राप्तेऽसिद्ध्यादिदुर्वारमित्यर्थः॥ असतःसाधकत्वाभावेबाधकोद्धारविवरणं ॥ २२ ॥ दृग्दृश्ययोस्संबंधानुपपत्तिरूपतर्कंनिराकर्तुमुत्थापयति ॥ अनुकूलेति ॥ मायिभिक्षवइत्यस्याऽऽहुरित्यनेनसंबंधः । विज्ञानवादिमतेज्ञानज्ञेययोरधिष्ठानाध्यस्तभावेनाऽभेदात्

नासतोऽदृष्टत्वादित्यादिसूत्रेणअसद्भ्यःशशविषाणादिभ्यःसदुत्पत्त्यदर्शनादित्यादिस्वीयभाष्येणचविरुद्धाऽन्यत्रनिरस्ताच। तस्माद्धेतुव्याप्त्यादीनामसत्वेऽसिद्ध्यादिदुर्वारमिति ॥असतःसाधकत्वाभावेबाधकोद्धारः ॥ २२ ॥ अनुकूलतर्कहीनाश्चमिथ्यात्वहेतवः । अत्रकेचिन्मायिभिक्षवः"अन्यच्चेत्संविदोनीलं नतद्भासेतसंविदि ॥ भासतेचेत्कुतःसर्वोनभासेतैकसंविदि ॥ नियामकंनसंबंधंपश्यामोनीलतद्धियो"

ज्ञानातिरिक्तज्ञेयप्रपंचःपरमार्थसन्नास्त्येव । यद्यऽस्तीतिकश्चिद्ब्रूयात्तदातंप्रतिकथयतिविज्ञानवादी ॥ अन्यच्चेदिति ॥ संविदः प्रतीतेःसकाशात् नीलरूपादि अन्यच्चेदितिसच्चेदित्यपिग्राह्यं । तथाचसंविन्नीलयोर्भेदेनीलंसंविदिनभासेतसंविदिनीलस्यभानंनस्यात् । ननुभिन्नस्याऽपिभानमस्तुकोदोषइत्यतआह ॥ भासतेचेदिति ॥ भिन्नमपिभासतेचेद्विज्ञानतत्वस्यैकत्वात्तस्मिन्भासमानेसतिनीलेतरस्यधवलपीतादेरपिभानंस्यात् । ननुनीलसंविदिनीलस्यसंबंधोऽस्तीतिनीलंभासते धवलादेस्तुनतत्रसंबंधइतिनभानमित्यतआह ॥ नियामकमिति ॥ नीलस्यनीलबुद्धेश्चवक्ष्यमाणरीत्याऽन्यःसंबंधोनसंभवति येनविषयनियमः

स्यात् । तस्मात्संविदिनीलादेरारोपितत्वमेवसंबंधइति सत्यत्वेनीलादेर्विज्ञानसंबंधानुपपत्तिरूपोविपक्षेबाधकतर्कोस्तीत्यर्थः ॥ आत्मेति ॥ आत्माविज्ञानस्वरूपमेवनैल्याद्यात्मनाख्यायतइतिवदद्भिर्विज्ञानवादिभिरित्यर्थः ॥ ग्राह्येति ॥ ग्राह्यस्यनीलादेस्सर्वथाऽलीकत्वमभिदधानाःविज्ञानवादिनोग्राह्यलक्षणाभावं तद्रूपांयुक्तिंवदंति नीलतद्धियोःसंयोगादेःसंबंधस्या(सं)भावाद्विषयविषयिभावएववक्तव्यः । अर्थस्यचविज्ञानाद्भेदेग्राह्यस्यविषयस्ययल्लक्षणं विषयत्वंतस्याभावः विषयत्वंनिर्वक्तुमशक्यमितियावत् । तथाचाऽर्थस्यविषयत्वंनस्यादितिविषयस्याऽऽरोपितत्वमेवसंबंधइत्याशयः ॥ भिक्षित्वेति ॥ इमंतर्कंतैर्भिक्षारूपेण

रित्यादिवदद्भिरात्मख्यातिवादिभिरुक्तंग्राह्यलक्षणाभावाख्यंतर्कंभिक्षित्वाहुः। दृश्यस्यसत्यत्वेनतावज्ज्ञानंतदसंबद्धंप्रकाशकं अतिप्रसंगात् नापिसंबद्धं अत्मगुणस्यज्ञानस्यज्ञेयेनसंयोगसमवाययोरयोगात् । अन्यस्यचसंबंधस्याऽभावात् विषयविषयिभावस्यचाऽद्विष्ठत्वेना

गृहीत्वेतियावत् । अतएवपूर्वंमायिभिक्षवइतिभिक्षास्वभावस्तेषामुक्तः । तथाचविज्ञानवाद्युक्तयुक्तिछर्दिमात्रमित्यत्रतात्पर्यं । ननुदृग्दृश्ययोःसंबंधाभावेपिअसंबद्धस्यैवप्रकाशनमस्त्वित्यतआह ॥ दृश्यस्येति ॥ अतिप्रसंगादिति ॥ घटज्ञानंपटादेःनीलज्ञानंधवलादेरपिप्रकाशकंस्यादित्यर्थः । दृग्दृश्ययोराध्यासिकंसंबंधंवक्तुंसंबंधांतरंनिराकरोति ॥ नापीति ॥ आत्मेति ॥ गुणत्वान्नज्ञेयेनघटादिनासंयोगः । आत्मगुणत्वान्नसमवायःसंभवतीत्यर्थः ॥ अन्यस्येति ॥ संयोगसमवायातिरिक्तद्विष्ठसंबं

SGDF

374

धाभावादित्यर्थः ॥ असंबंधत्वादिति ॥ संबंधोहिसंबंधिभ्यांभिन्नस्तावाश्रितश्चैकश्चेति तल्लक्षणाभावादितिभावः ॥ दुर्निरूपत्वाचेति ॥ विषयत्वस्येतिशेषः । अनेनग्राह्यलक्षणाभावरूपस्तर्कएवविवृतइतिज्ञातव्यं ॥ ज्ञानाकारेति ॥ ज्ञानेस्वाकारार्पकत्वमित्यर्थः । ज्ञेयस्यघटादेर्यःपृथुबुध्नोदराकारःसएवज्ञानेभासतइतितत्सिद्धांतः । आकाराकारिणोरभेदेनज्ञानार्पकत्वमेवोक्तंस्यात् । तच्चेंद्रियादिषुज्ञानहेतुष्वतिव्याप्तंअतउक्तं ॥ दृश्यमानत्वेसतीति ॥ एतज्ज्ञानेनदृश्यमानत्वेसतीत्यर्थः । इंद्रि

संबंधत्वात् दुर्निरूपत्वाच्च । तथाहि विषयत्वंकिंज्ञानजन्य[1]फलाधारत्वं ज्ञानजन्य[2]हानादिबुद्धिगोचरत्वंवा ज्ञानक[3]र्मत्वंवाज्ञानाकारा[4]र्पकत्वंवा दृश्यमान[5]त्वेसतितत्वंवा ज्ञानजन्यव्य[6]वहारयोग्यत्वंवा यत्संनिकृष्टकरणेनयज्ज्ञानमुत्पद्यतेसतस्यविषयइतिवा यस्यांसंविदियोऽर्थोवभासतेसतस्याविषयइतिवा संबंधांतरमंतरेणयोयंज्ज्ञानावच्छेदकःसतस्यविषयइतिवा । आद्येपिफलंनतावज्ज्ञातता अनंगीकारात् अतीतादा

यादेःस्वकर्मकज्ञानेनदृश्यमानत्वेपिस्वजन्यैतज्ज्ञानेनदृश्यमानत्वाभावान्नातिव्याप्तिरितिभावः ॥ संबंधांतरमिति ॥ योयज्ज्ञानावच्छेदकःसतस्यविषयइत्येवोक्तेज्ञातर्यतिव्याप्तिः । ज्ञानावच्छेदकोहिज्ञेयःज्ञाताचभवति यज्ञदत्तीयंज्ञानंघटीयंज्ञानमिति व्यवहारात् । अतोज्ञातर्यतिव्याप्ति (परिहाराय)वारणायसंबंधांतरमंतरेणेत्युक्तं । सतुज्ञाताविषयविषयिभावातिरिक्तद्विष्ठसमवायरूपसंबंधांतरेणैवज्ञानावच्छेदकोनतमंतरेणेतितद्व्यवच्छेदइतिभावः ॥ अतीतादाविति ॥ असतिधर्मिणिधर्माजननादितिभावः

SGDF
Sri Gargeshwari Digital Foundation

॥ गगनादाविति ॥ तज्ज्ञानानंतरंव्याप्तत्वेनतत्रहानादेरभावादव्याप्तिरितिभावः ॥ कलधौतेति ॥ रूप्यज्ञानादिविषयस्य रूप्यमलादेरूप्येणसहोपादीयमानत्वाद्रूप्यज्ञानविषयत्वंस्यादित्यर्थः ॥ अभिज्ञेति ॥ प्रत्यभिज्ञेत्यर्थः । तस्याअपिज्ञानजन्य त्वादितिद्रष्टव्यं । प्रत्यभिज्ञाव्यवहारयोर्ज्ञातृनिष्ठत्वेनज्ञेयेतदाश्रयत्वाभावादसंभवइत्यर्थः ॥ हानादीति ॥ कंटकादिज्ञानं कंटकादिस्वरूपमेवप्रकाशयति ततःकंटकांतरेऽनिष्टसाधनत्वंजानतःपुरुषस्यतद्दृष्टांतेनपुरोवृत्तिकंटकेपितदनुमानंभवति तदनंतरं हेयबुद्धिर्भवतिइत्यस्तिक्रमः ततश्चहानादिबुद्धीनांअनिष्टसाध(नता)नानुमितिजन्यत्वेनकंटकादिप्रत्यक्षाजन्यत्वादसंभवइत्यर्थः ।

वसंभवाच्च । नापिहानादिः गगनादौतदयोगात् कलधौतमलादेरपितज्ज्ञानविषयत्वापाता
च्च ।नाप्यभिज्ञाभिलपने । तयोर्ज्ञेयानिष्ठत्वात् । नद्वितीयः । हानादिबुद्धीनांतदजन्यत्वात् ।
गोचरतायाएवाऽव्याप्यानिरूपणाच्च । नतृतीयः । ईश्वरज्ञानस्याऽतीतादिज्ञानस्यचकर्मकार
काजन्यत्वात् । नचतुर्थः।ज्ञानतदाकारयोरभेदेनसर्वेषांज्ञानहेतूनांविषयत्वापातात् ।नपंचमः।

नतृतीयः । ईश्वरज्ञानविषयेघटेऽतीतादिज्ञानविषयेचघटेज्ञानकर्मत्वंनास्तीत्यव्याप्तिः॥कुतइत्यतआह॥ईश्वरेति॥ क्रियांकुर्वद्धि कारकं । कर्मचकारकविशेषः । एवंचेश्वरज्ञानस्यनित्यस्यकर्मजन्यत्वाभावेनविषयस्यैवाभावेअतीतादिज्ञानस्यचतदजन्यत्वात्तद्वि षयेज्ञानकर्मत्वाभावेनाव्याप्तिरित्यर्थः ॥ ज्ञानहेतूनामिति ॥ ज्ञानतदाकारयोरभेदेनज्ञानस्वरूपार्पकत्वमेवोक्तंभवति । तच्चज्ञा नजनकेंद्रियादिष्वतिव्याप्तमित्यर्थः ॥ नपंचमइति ॥ एतज्ज्ञानेनदृश्यमानत्वेसतितत्त्वमितिविवक्षायांनेंद्रियादावतिव्याप्तिः ।

SGDF
Sri Gargeshwari Digital Foundation

376

तेषामेतज्ज्ञानेनदृश्यमानत्वाभावादितिपंचमोनेत्यर्थः॥ दृश्यमानतायाइति॥ दृश्यमानत्वस्यदृग्विषयत्वरूपत्वादित्यर्थः॥योग्यतायामिति॥ततश्चस्वज्ञानविषयीभूतायांयोग्यतायामव्याप्तिरितिभावः॥संविदोविषयत्वमिति॥ सप्तम्याविषयार्थत्वाद्यस्यांसंविदिविषयभूतायामित्यर्थप्राप्त्यासंविदोविषयत्वमापन्नमित्यर्थः॥सतिसप्तमीति॥ यस्यांसंविदिसत्यांयोर्थोवभासतेविषयोभवतीत्यर्थप्राप्त्याआत्माश्रयादित्यर्थः॥यत्समवेतमिति॥ रूपज्ञानंयन्निरूपितसमवायवदित्यर्थः॥विनैवेति॥ रूपज्ञानात्मसमवाययोः

दृश्यमानतायाएवाद्याप्यनिरूपणात्। नषष्ठः। योग्यतायांयोग्यतांतराभावात्। नसप्तमः। नित्येश्वरज्ञानस्यनिर्विषयत्वापातात्। अष्टमेपिसंविदीतिनतावदधिकरणसप्तमी। ज्ञानस्यज्ञेयंप्रत्यनधिकरणत्वात्। नापिविषयसप्तमी। तस्यैवनिरूच्यमानत्वात् संविदोविषयत्वमर्थस्यविषयित्वमितिवैपरीत्यापाताच्च। नापिसतिसप्तमी। भासमानतायाएवाद्याप्यनिरूपणात्। ननवमः। यत्समवेतंरूपज्ञानमित्यत्ररूपज्ञानात्मसमवायस्यसंबंधांतरंविनैवरूपज्ञानावच्छेदकस्यतद्विषयत्वापातात्। तस्मात्सत्यत्वेदृश्यत्वानुपपत्तेर्दृग्दृश्ययोराध्यासिकएवसंबंधइतिअत्रोच्यते

संयोगसमवाययोरभावादित्यर्थः। तथाचतस्यवस्तुगत्यारूपज्ञानादिकंप्रत्यवच्छेदकत्वेन इदंरूपमितिजायमानस्य केवलरूपज्ञानस्यापिविषयःस्यादित्यतिव्याप्तिरितिभावः। तस्मात् विषयत्वस्यदुर्निरूपत्वादित्यर्थः॥ दृश्यत्वानुपपत्तेरिति॥ दृग्विषयत्वानुपपत्तेरित्यर्थः॥सिद्धांताभिधानंप्रतिजानीते॥ अत्रोच्यतइति॥ दृग्दृश्ययोराध्यासिकसंबंधःत्वयाकस्मात्स्वीकृतइतिप्रष्टव्यं संबं ॥ १८९ ॥

धांतरानिरूपणादितिचेन्न। इंद्रियसन्निकर्षजन्यवृत्तिज्ञानद्वारकएवसंबंधोऽस्तु किमाध्यासिकसंबंधदुर्व्यसनेन। नन्विन्द्रियसन्निकर्षजन्यवृत्तिद्वारकसंबंधोऽप्रामाणिकइतिचेन्न।अस्यसंबंधस्य तवाप्यावश्यकत्वात्। तथाहि। त्वन्मतेसर्वमपिदृश्यंघटादिकंसर्वगतं यदज्ञानानावृतंब्रह्मचैतन्यं तत्रैवाध्यस्तं एवंचानावृतब्रह्मचैतन्यस्यसर्वान्प्रत्यविशिष्टत्वात्तत्रारोपितंघटादिकंसर्वंसर्वेषांसर्वदाप्रकाशेतनतुकश्चित्पदार्थःकदाचित्कंचित्प्रत्येवकाशेत इत्यतिप्रसंगेऽभिहिते यत्सन्निकृष्टेंद्रियजन्यवृत्तिर्यदाकारायदाचभवति सएव तंप्रत्येव कदाचिदेवप्रकाशतेनसर्वदेत्यतिप्रसंगःपरिहर्तव्यः।तथाचेंद्रियसन्निकर्षजन्यवृत्तिस्तवाप्यावश्यकी।एवंचदृश्यत्वेपिसत्यत्वमेवाऽस्तुनमिथ्यात्वं संबंधानुपपत्तिस्तुनास्ति। इंद्रियसन्निकर्षजन्यवृत्तिद्वारकसंबंधसंभवात्। एवंचतवाप्यावश्यकेनानेनसंबंधे (नैवोपपत्तावाध्या)नोपपत्त्या आध्यासिकसंबंधदुर्व्यसनेनप्रयोजनाभावात्। ननुनवयं ब्रह्मात्मकानावृतैकदृगध्यस्तत्वंअभिदध्महे येनतस्यसर्वान्प्रत्यऽविशिष्टत्वात्सर्वदासर्वस्यसर्वप्रकाशेतेत्यतिप्रसंगपरिहारायतत्तदाकारकवृत्तिद्वारकसंबंधापेक्षाममाप्यावश्यकीस्यात्। किंतुघटाद्यधिष्ठानभूतानांचैतन्यानांभेदांगीकारेण तत्तदर्थास्तत्तदधिष्ठानभूतेषुचैतन्येष्वध्यस्ताइत्युच्यंते। एवंचवृत्तिं विनैवतादृशेनचैतन्येनैवघटादेःसाक्षादेवसंबंधांगीकारेणतेनैवप्रकाशोघटते अतोऽतिप्रसंगाभावान्नतदर्थंवृत्तिद्वारकसंबंधानुसरणमितिचेन्न।यथाविज्ञानवादिनातत्तदर्थास्तत्तज्ज्ञानेध्यस्ताइत्युच्यंते। यथाहुर्विज्ञानवादिनः। ''तत्तज्ज्ञानेषुतेतेर्थाअध्यस्ताइतिनोमतमिति''तथात्वयाततेतेर्थाः तेषुतेष्वनेकेषुअधिष्ठानचैतन्येषुअध्यस्ताइतिनह्युच्यते। किंतुब्रह्मात्मकानावृतैकदृगध्यस्तत्वमेव। तत्राऽतिप्रसंगपरिहारायवृत्तिरनुसरणीयैव। ननुविज्ञानवादिमतइवममतेपिघटादेस्तत्तदधिष्ठानचैतन्येषुअनेकेषुअध्यासोस्तु अतो

377

SGDF Sri Gurudev Datta Foundation

नवृत्तिरपेक्षितेतिचेन्न । अनेकेष्वधिष्ठानेषुत्वन्मतेऽध्यासायोगात् । तथाहि । अध्यासाधिष्ठानभूताःअनेकाश्चैतन्यरूपब्रह्म दृशःकिंसत्यभूतशुद्धब्रह्मरूपा उतघटाद्युपाधिविशिष्टाः अथवोपाध्युपलक्षिताः। नाद्यः। एकमेवेत्यादिश्रुतिविरोधेन तत्रभेदाभावात् । नद्वितीयः। उपाधिविशिष्टानांचैतन्यरूपब्रह्मदृशांभेदेपि विशिष्टानांघटादिवन्मिथ्यात्वेनाधिष्ठानत्वायोगात् । अध्यस्ताधिकसत्ताकत्वस्यैवाधिष्ठानत्वौपयिकत्वात्।नतृतीयः। यद्यप्युपाध्युपलक्षितायाब्रह्मचैतन्यरूपदृशःसत्यत्वमस्ति उपाधेरुपलक्षणमात्रत्वात् । तथाचाधिष्ठानत्वमुपपद्यते तथाप्युपाध्युपलक्षितायाःअधिष्ठानभूतायाःसत्यायादृशअभेदस्य(एकमेव)इत्यादिश्रुतिसिद्धत्वान्नानिकत्वमुपपद्यते ॥ तथाचानावृतैकदृगध्यस्तत्वेवाच्येतत्रोक्तातिप्रसंगवारणायवृत्ति(रावश्यक्येव)रपेक्षणीयैव । उपाध्युप

सर्वस्यापिदृश्यस्यब्रह्मात्मैकदृगध्यस्तत्वेपिकस्यचित्कदाचित्कंचित्प्रतिप्रकाशायत्वयापितत्तत्संनिकृष्टेंद्रि

लक्षितेउपाधिकृतोभेदोस्तीतिनवृत्तिरपेक्षितेतिचेन्न। कथंचिदेवंभेदेपिवृत्तिरावश्यक्येव । तथाहि । तत्तदर्थानांतत्तदधिष्ठानचैतन्येष्वध्यासमंगीकृत्यास्मदभिमतवृत्तिद्वारकसंबंधानंगीकारे त्वन्मतेऽस्मदभिमतवृत्तिद्वारकसंबंधात्प्रागेवघटादीनांतत्तदधिष्ठानचैतन्येस्वतएवाध्यस्तत्वेनआध्यासिकसंबंधस्यसत्त्वाद्घटादिरूपदृश्यप्रतीतिःसर्वदास्यादेव । अतोध्यस्तत्वसंबंधेसत्यपिदृश्याप्रतीतेरतिप्रसंगपरिहारार्थंवृत्तिद्वारकसंबंधोंगीकार्यएव । तत्रापिप्रपंचस्यसत्यत्वेपिइंद्रियसन्निकर्षजन्यवृत्तिद्वारकसंबंधेनैवदृश्यत्वोपपत्तेराध्यासिकसंबंधांगीकारोव्यर्थएव सचसंबंधोविषयविषयिभावएव। विषयत्वनिरूपणंकरिष्यामइत्याशयेनाह ॥ सर्वस्यापीत्यादिना॥ दृश्याप्रतीतेरित्यंतेन ॥ वृत्तेरनावश्यकत्वेघटप्रकाशश्चैतन्यसंबंधादेवसाक्षाद्भवतीत्युच्यते तत्रविकल्पयति

SGDF
Sri Gargeshwari Digital Foundation

379

॥ किंचेति ॥ अतंत्रत्वेति ॥ (चैतन्याभिव्यंजकत्वेनावश्यक्याइंद्रियजन्ययावृत्त्यैवघट)चैतन्याभिव्यंजकेंद्रियवृत्त्यैवघट प्रकाशोपपत्तावतिप्रसंगाभावेनघटादेश्चैतन्येऽध्यासकल्पनायाव्यर्थत्वेनाध्यासिकसंबंधस्यव्यर्थत्वापातात् । नहिवृत्तिप्रतिबिंबितचैतन्येघटादिरध्यस्तइतिभावः ॥ आवश्यकेनेति ॥ घटाधिष्ठानचैतन्यंघटप्रकाशकमितिमतेपि तदभिव्यक्त्यर्थंघटाकार

यजन्यतत्तदाकारवृत्तिद्वारकएवाऽनावृतदृक्संबंधःस्वीकृतः । तथाचसत्यत्वेपितद्वारकएवसंबंधोऽस्तु किमाध्यासिकसंबंधदुर्व्यसनेन। नहित्वन्मतेविज्ञानवादिमतइवतत्तदर्थास्तत्तज्ज्ञानेऽध्यस्ताः । सत्यायाःशुद्धदृशःस्वतोभेदाभावादुपाधिविशिष्टायाभेदेपिघटादिवन्मिथ्यात्वेनतदधिष्ठानत्वायोगात् । उपाध्युपलक्षितायास्सत्यत्वेप्यऽभेदात् । कथंचिद्भेदेपिवृत्तिद्वारकसंबंधात्प्रागध्यस्तत्वरूपे संबंधेसत्यपिदृश्याप्रतीतेः। किंचकिंघटाकारवृत्तिप्रतिबिंबितंचैतन्यंघटप्रकाशकं किंवातदभिव्यक्तं घटाधिष्ठानचैतन्यं। नाद्यः। आध्यासिकसंबंधस्याऽतंत्रत्वापातात्। नांत्यः। आवश्यकेनवृत्तिप्रतिबिंबितेनैवप्रकाशोपपत्तौतेनाधिष्ठानचिदभिव्यक्त्यादिकल्पनायोगात् । किंचघटाधिष्ठानस्यसत्यस्यचि

वृत्तिप्रतिबिंबितचैतन्यस्याऽनुसरणीयत्वात् तेनैवघटाधिष्ठानचैतन्येनसत्यस्यघटस्यप्रकाशोपपत्तौतेनाऽधिष्ठानचैतन्याभिव्यक्ति कल्पनायोगादित्यर्थः । अधिष्ठानचैतन्यमध्यस्तस्यप्रकाशकमितिमतेदोषांतरमाह ॥ किंचेति ॥ सत्यस्येत्यधिष्ठानत्वोपपादनाय

B.M.S.A. SABHA LIBRARY BANGALORE NO. DATE
SGDF Sri Gargeshwari Digital Foundation

380

॥ नाभिव्यक्तिरिति ॥ वृत्तिप्रतिबिंबितचैतन्येनेतिशेषः। तथाचनतेनघटादेःप्रकाशःस्यादित्यर्थः ॥ नतदधिष्ठानत्वमिति॥ तथाचनतदपिघटादिप्रकाशकमित्यर्थः॥ आत्माश्रयादिति ॥ स्वावच्छिन्नस्यस्वाधिष्ठानत्वेस्वस्याप्यधिष्ठान(त्वप्रसंगेना)त्वेना त्माश्रयइत्यर्थः। केचित्त्वात्माश्रयशब्दोऽन्योन्याश्रयपरः। तथाचघटस्याध्यासेसतिघटस्वरूपसिद्धौचैतन्यस्यघटावच्छिन्नत्वं। त दवच्छिन्नेचैतन्येसतिअधिष्ठानलाभेनघटादेरध्यासइत्यन्योन्याश्रयादित्यर्थः। तथैवक्वचित्पाठश्चेत्याहुः। दोषांतरमाह ॥ किंचे

न्मात्रस्यचरमसाक्षात्कारात्पूर्वंनाभिव्यक्तिः। अभिव्यक्तस्यतुघटाधिष्ठानचैतन्यस्यनतदधिष्ठा नत्वंआत्माश्रयात्। किंचघटप्रकाशिकायादृशोघटवन्मिथ्यात्वेनतदधिष्ठानत्वं सत्यत्वेदोषाजन्य त्वेनप्रमात्वात्सत्यंस्वविषयंप्रतिनाधिष्ठानत्वमित्युभयतःपाशारज्जुः। यत्तूक्तंज्ञानज्ञेययोर्नसंबं धइतितन्न। गुणगुण्यादेस्संयोगासंभवेसमवायवत्ज्ञानज्ञेययोरुभयासंभवेऽन्यस्यसंभवात्।

ति ॥ घटाधिष्ठानचैतन्यंघटप्रकाशकमितिमतेमिथ्याभूतस्यघटवद्घटाधिष्ठानत्वाभावेनघटाप्रकाशकत्वात्सत्यमेवघटाधिष्ठानचै तन्यरूपंज्ञानंघटप्रकाशकमितिवाच्यं। तस्यचसत्यत्वेनदोषाजन्यतयाऽबाधितार्थविषयकत्वरूपप्रमात्वयोगित्वेन तद्विरुद्धं यत्स्वविषयमिथ्यात्वापादनशीलंस्वविषयंप्रत्यधिष्ठानत्वंतन्नसंभवतीत्यर्थः। उभयतः। प्रकाशकदृशोमिथ्यात्वेसत्यत्वेचेत्यर्थः। ॥ १९१ ॥ पाशारज्जुरितिक्वचित्पाठः। गलबंधकरज्जुरित्यर्थः। पाशेतिपाठएवस्वरसः। "(पाशास्याद्गलबंधिके)" त्यभिधानात्। ननुदो

फा फा

षाजन्यत्वंनप्रमात्वप्रयोजकं। चैतन्यस्यसर्वत्रदोषाजन्यत्वात् किंतुदोषाजन्यवृत्त्यवच्छिन्नत्वं प्रकृतेचतदभावान्नविषयस्यसत्यत्वम तोमिथ्याभूतस्वविषयंप्रत्यधिष्ठानत्वंसत्यायादृशोयुक्तमितिनोभयतःपाशारज्जुरितिचेन्मैवं। घटाकारवृत्तेरपिसंभावितेंद्रियादिदो षाजन्यत्वात्। आविद्यकत्वरूपप्रधानोदोषएवास्तीतिचेन्न। अविद्यायादोषत्वासंमतेः। अन्यथाऽद्वैतागमविषयकश्रोत्रादिवृ त्तेरप्यविद्यारूपदोषजन्यत्वेनाप्रमात्वापत्त्याऽद्वैतागमस्याप्यसिद्धिप्रसंगःस्यादितितरंगिण्युक्तंद्रष्टव्यं। स्वरूपसंबंधस्थले पिसंयोगसमवायातिरिक्तमपिसंबंधंसाधयति ॥ अभाववद्भूतलमिति ॥ विशेषणविशेष्यकेति ॥ विशेषणविशेष्यभा

381

अभाववद्भूतलंज्ञातोघटःइष्टोघटःघटस्याभावइत्यादिकापरस्परासंयुक्तासमवेतविशेषणवि शेष्यविषयकविशिष्टधीः। विशेषणविशेष्यतत्संबंधविषयिका। विशिष्टधीत्वात्। दंडीति विशिष्टधीवत्। उक्ताजन्यप्रमाविशेषणविशेष्यसंबंधनिमित्तका [1] अबाधितविशिष्टजन्य

वावगाहीत्यर्थः। परस्परासंयुक्तेत्यादिकमेवपक्षः। अभाववद्भूतलमित्यादितद्विवरणरूपमितिद्रष्टव्यं। संयोगसमवायाभ्याम र्थांतरता(परिहाराय)वारणायपक्षेपरस्परासंयुक्तेत्यादिविशेषणं। दृष्टांतेसं(योगमा)युक्तत्वमादायसाध्यपर्यवसानं। पक्षेतुसंयो गसमवायातिरिक्तमादायेतिविवेकः ॥ उक्तेति ॥ अभाववद्भूतलमित्याद्या परस्परासंयुक्तासमवेतविशेषणविशेष्यकविशिष्टधी रित्यर्थः। ईश्वरप्रमामादायबाधवारणायजन्येत्युक्तं ॥ संबंधनिमित्तकेति ॥ तज्जन्येत्यर्थः। अबाधितपदाभावेऽ

1 अपरोक्षेतिपि विशेषणं। तेन न परोक्षानुमितिषु व्यभिचारः।

SGDF Sri Gangadharesh... Digital Foundation

त्रजतत्वमितिभ्रमेव्यभिचारः । अत्रशुक्तौरजतत्वसंयोगसमवाययोर्बाधेनसाध्याभावात् अतोऽबाधितपदं । ईश्वरधि यांव्यभिचारवारणायहेतौजन्यपदं ॥ विमताधीरिति ॥ अभाववद्भूतलमित्यादिकापरस्परासंयुक्तेत्यादिरूपाजन्यप्रमाधी रित्यर्थः । तेननबाधः ॥ तत्सिद्धेरिति ॥ ज्ञानज्ञेययोःसंयोगसमवायातिरिक्तद्विष्ठसंबंधसिद्धेरित्यर्थः । ननुपल्लीस्थितगोम तिचैत्रेगोमांश्चैत्रइतियदाविशिष्टधीर्भवति तदाविप्रकृष्टगवांतद्वतश्चैत्रस्यचसंयोगसमवायाभावादन्यस्यसंबंधस्यतत्राक्लृप्तत्वाद्विशि ष्टधीत्वंव्यभिचारीत्यतआह ॥ गोमांश्चैत्रइति ॥ गोमांश्चैत्रइत्यादावपितेनैवहेतुनासंयोगाद्यतिरिक्तसंबंधसाधनान्नव्यभिचार

धीत्वात् । संमतवत् । विमताधीःअबाधितविशेषणविशेष्यसंबंधविषयिका । अबाधितविशिष्ट धीत्वात् । दंडीतिप्रमावदित्यनुमानात्तत्सिद्धेः । गोमांश्चैत्रइत्यादिधीरपिपक्षएव । उक्तंहि "षष्ठीस्था नेयोगे"त्यत्रमहाभाष्ये "एकशतंषष्ठ्यर्था" इति । तेचस्वस्वामिभावादयःसंबंधाःषष्ठीदंडकेपठिता

इत्यर्थः । ननुसंयोगादेरेवसंबंधत्वात्तस्यचज्ञानज्ञेयादिष्वभावात्तत्रसंबंधानुमानंबाधितमित्याशंकांसंयोगाद्यतिरिक्तसंबंधसाधका भियुक्तवचसानिराकरोति ॥ उक्तंहीति ॥ केतेएकशतंषष्ठ्यर्थसंबंधाइतिशंकायामाह ॥ तेचेति ॥ कैयटे महाभाष्यटीकायां । (षष्ठीदंडकपाठाश्रयणेनेदमुक्त) मितिकैयटवाक्यस्याऽर्थानुवादोयं । कःषष्ठीदंडकशब्दार्थइत्याशंकायांकैयटटीकाकारेण बृह द्विवरणकारेणोक्तं "(षष्ठीदंडकोनामग्रंथविशेष)" इति । ननुसंयोगादेरन्यस्यसंबंधत्वेतस्यक्लृप्तपदार्थेषुअनंतभावात्तदाधि

SGDF
Sri Gargeshwari Digital Foundation

कथंस्यादित्यतआह ॥ प्रमितेति ॥ अयंचसंबंधःउक्तानुमानत्रयेणप्रमितोतस्तादृशसंबंधसमावेशेनैवपदार्थाःपरिगणनीयाइ
त्याशयः । उक्तानुमानानांबाधकांतरमाशंक्यनिराकरोति ॥ नचेति ॥ संयोगसमवायातिरिक्तसंबंधकल्पनइतिशेषः ॥ अन्यो
न्याश्रयादिति ॥ सिद्धेद्वित्वेतद्बाधितत्वात्संयोगाद्यतिरिक्तसंबंधसाधकानुमानानामप्रामाण्यं । तस्मिंश्चसिद्धेतद्बाधाभावात्संबं
धद्वित्वसिद्धिरित्यन्योन्याश्रयादित्यर्थः । संयोगसमवायातिरिक्तसंबंधसाधकानुमानस्ययदिसंबंधद्वित्वंबाधकमित्युच्यते । 383
तर्हिइहतंतुषुपटइत्यादिप्रत्ययःविशेषणविशेष्यभावसंबंधनिबंधनः । अबाधितत्वेनप्रमितत्वादित्यनुमानेनसमवायोपिनसि

इत्युक्तंकैयटे । प्रमितवस्त्वनुसारेणहिप्रक्रियाकल्प्या नतुस्वकल्पितप्रक्रियानुरोधेनप्रमितत्यागः ।
[1]नचसंबंधद्वित्वमेवबाधकं ।[2]अन्योन्याश्रयात् । अन्यथासंबंधैक्यंसमवायबाधकंस्यात् । नाप्यऽ
तीतादौसंबंध्यभावोवाज्ञानज्ञेययोर्विप्रकर्षोवाबाधकः । अस्यसंबंधस्यसमवायवत्संबंध्यभाव

द्ध्येत् । संयोगरूपसंबंधस्यममतेएकत्वेनतद्विरुद्धत्वादितिबाधकेऽभिहितेऽन्योन्याश्रयेणतद्बाधकंपरिहरणीयं । तन्ममापितुल्य
मित्याशयेनाह ॥ अन्यथेति ॥ ज्ञानज्ञेययोरतिरिक्तसंबंधकल्पनेबाधकांतरमाशंक्यनिराचष्टे ॥ नापीति ॥ अतीतादिरूपज्ञेयेन
साकंज्ञानस्यसंबंधोनसंभवतिसंबंधिनोरतीतानागतयोरभावादित्यर्थः ॥ विप्रकर्षइति ॥ ज्ञानस्यात्मनिष्ठत्वेनांतरत्वाज्ज्ञेयस्यचबा
ह्यपदार्थत्वेनतयोर्विप्रकृष्टत्वात्संबंधोनयुक्तइत्यर्थः ॥ अस्येति ॥ संयोगसमवायातिरिक्तोयंसंबंधोनुमानेनसिद्ध्यन्संबंध्यभावविप्र
न्या. श्री. ३३ कर्षौयथास्वस्यबाधकौनस्यातां तथैवस्वापेक्षिताशेषनिर्वाहकतयैवसिद्ध्यति यथासमवायोऽबाधितेहप्रत्ययत्वाद्यनुमानेनसिद्ध्यन्

बाधक [1] संयोगसमवायात्यद्वित्त्वस्त्रस्याद्दूरणवृत्तित्वेन सम्बन्धत्वानवगाहित्वं [2] निरुक्तस्य सम्ब निरिक्तबुद्धित्वमापकत्वे इत्यादि ऊह्यम् ।

SGDF
Sri Gangeshwar Digital Foundation

स्वापेक्षितैकत्वादियुततयैवसिद्ध्यतितद्वदित्यर्थः।उक्तानुमानसिद्धसंयोगाद्यतिरिक्तसंबंधस्यसंबंध्यभावोविप्रकर्षोवाबाधकइतियद्यं
गीक्रियतेतर्ह्यबाधितेहप्रत्ययत्वाद्यनुमानेनसमवायोपिनसिद्ध्येत् पृथक्सिद्धयोर्युतसिद्धयोरेवसंयोगसंबंधदर्शनात् । अपृथग्दृष्टयो
स्तददर्शनात् । अपृथक्सिद्धिरयुतसिद्धिर्वासमवायसंबंधस्यबाधिकास्यादितिशंकिते तत्रत्वयासमवायःसिद्ध्यन्धर्मिग्राहकप्रमाणे
नापृथक्सिद्धसंबंधत्वेनैवसिद्ध्यतीतिवाच्यं । तत्समंममापीत्याह ॥ अन्यथेति ॥ ज्ञानज्ञेययोःप्रसिद्धसंबंधातिरिक्तसंबंधानंगीकारे
विप्रकर्षाद्यविरुद्धत्वेनैवधर्मिग्राहकेणसिद्धेः । अन्यथाहिपृथक्सिद्धयोरेवसंयोगसंबंधदर्शनात्अपृ
थक्सिद्धिःसमवायसंबंधस्यबाधिकास्यात् । ध्वंसादेश्चातीतादिनामिथ्यात्वलक्षणांतर्गतस्यात्यंता
भावस्यचप्रतियोगिनावेदांतनिष्ठशक्तितात्पर्ययोश्चब्रह्मणा(ज्ञात्राश्रि)जीवाश्रिताज्ञानस्यचाऽज्ञेयेन
ब्रह्मणाव्यवहारस्यचव्यवहर्तव्येनब्रह्मणामुमुक्षायाश्चमोक्षेणत्वदुक्तदूषणस्यचदूष्येण त्वद्वाक्यस्यचा
ऽर्थेनज्ञानस्यज्ञेयेनसंबंधोनेतित्वद्वाक्योक्तसंबंधाभावस्यस्वज्ञानेनाऽसंबंधात्स्वन्यायस्वक्रियास्ववचनवि
स्वन्यायविरोधादिस्यादित्याह ॥ ध्वंसादेरित्यादिना ॥ आवश्यकत्वोपपादनाय ॥ मिथ्यात्वेत्यादि ॥ अर्थेनासंबंधादित्यंतं
स्वन्यायविरोधोदाहरणं । ज्ञानस्येत्यादिकंस्वक्रियास्ववचनविरोधयोः । तत्रज्ञानस्यज्ञेयेनसंबंधानिरूपणन्यायेनध्वंसप्रागभावा
देःप्रतियोगिनापिदुर्निरूपणीयःस्यादितिस्वन्यायविरोधः । ज्ञानज्ञेययोःसंबंधाभावंप्रतिपादयितुंज्ञानस्यज्ञेयेनसंबंधोनास्तीतिप्रा
गुक्तंयद्वाक्यंतत्प्रयोगरूपायाक्रियातत्प्रतिपाद्यस्यसंबंधाभावरूपार्थस्यैतद्वाक्यजन्यज्ञानस्यचसंबंधान्मूकोहमितिस्वक्रियाविरो ॥ १९३ ॥

धः।ज्ञानज्ञेययोःसंबंधाभावरूपार्थस्यज्ञानज्ञेययोस्संबंधोनास्तीत्येतद्वाक्यजन्यज्ञानेनसंबंधंबोधयितुंएतद्वाक्यंप्रयुंक्ते ज्ञानज्ञेययोः
संबंधोनास्तीतिवदतिचेतिमेमातावंध्येतिवत्स्ववचनविरोधः । तथाचयथाध्वंसप्रतियोग्यादिषुनाध्यासिकसंबंधः किंत्वन्यएव
तथाज्ञानज्ञेययोरपीत्यर्थः । ननूक्तेषुध्वंसादिषुआध्यासिकसंबंधोभविष्यतीतिसंबंधाभावप्रयुक्ताःस्वन्यायविरोधादयोनस्युरित्य
तआह ॥ नहीत्यादिना ॥ एतेनेति ॥ स्वन्यायविरोधादिनेत्यर्थः ॥ न्यायइति ॥ "न्यायेदृढेऽन्यसामान्यात्किंदृढेऽन्यदपिबा
ध्यता)" मितिखंडनकारिकापाठः । तदर्थस्त्वित्थं । ज्ञानज्ञेययोःसंबंधानुपपत्त्याआध्यासिकसंबधोंऽगीकार्यइतिमदीयेन्याये
रोधाःस्युः । नहिज्ञेयंज्ञानइवप्रतियोगि(शक्त्या)क्याज्ञेयेष्यमाणव्यवहर्तव्यादयःअभावशक्त्यज्ञानेच्छा
व्यवहारादावध्यस्ताः । एतेन । "न्यायेदृढे(न्यसामान्यात्किंदृढेऽन्यदपि)न्यायसाम्यात्किमन्यदपिबा
ध्यतां । नममत्वंमुमुक्षूणामनिर्वचनवादिना"मितिनिरस्तं । स्वव्याहतस्यन्यायाभासतयादार्ढ्याभावात् ।
स्वतएवदृढेसतिध्वंसप्रतियोग्यादेःप्रसिद्धसंबंधाभावात्संबंधांतरंयथांगीकार्यंतथात्वयापिज्ञानज्ञेययोरप्यतिरिक्तःसंबंधोंऽगीक्रि
यतांन्यायसाम्यादितिध्वंसप्रतियोग्यादेरन्यसाम्यापादनात्किं ?। त्वदीयन्यायादार्ढ्यंसहमेवस्वीकरिष्यामीतिभवदापादनंव्यर्थंस्या
दितिभावः । मदीयेन्यायेपूर्वोक्तेदृढेसतितन्न्यायाद्ध्वंसप्रतियोग्यादीनामतिरिक्तसंबंधवत्त्वंबाध्यतां तत्राप्येतन्न्यायादाध्यासिकएव
संबंधोऽस्तु । ननुध्वंसप्रतियोग्यादीनामाध्यासिकसंबंधवत्त्वेमिथ्यात्वंप्राप्तमितिचेन्न । इष्टापत्तेरित्याशयवानाह ॥ नममत्व
मिति ॥ अस्माकंकुत्रापिपदार्थेपक्षपातोनास्तीत्यर्थः । दृढेऽन्यदपिबाध्यतामित्याशंक्यखंडयति ॥ स्वव्याहतस्येति ॥ व्या

SGDF

386

वहारिकव्यवस्थोच्छेदस्येत्यर्थः ॥ अन्यथेति ॥ स्वव्याहतस्यापिन्यायस्यदार्ढ्यंइत्यर्थः ॥ जातीति ॥ यदिमहान
ससाधर्म्याद्धूमवत्त्वात्पर्वतोऽग्निमान्स्यात्तदाह्रदसाधर्म्यात्द्रव्यत्वान्निरग्निकःकिंनस्यादितिजात्युत्तरं । इदंचस्वव्याहतं ।
यदिसाधकसाधर्म्यात्पक्षधर्मत्वादेःद्रव्यत्वहेतुःसाध्यसाधकःस्यात्तदाऽसाधकानुमानसाधर्म्यात्पंचम्यंतत्वादेःसाध्यासाधकोपि
किंनस्यादित्यापादनसंभवेनस्वन्यायविरोधात् ।एवंचजातिवादीवदिष्यति मदीयेज्ञानेस्वतएवदृढेसाम्यापादनंव्यर्थंअहमेवतत्स्वी
करिष्यामीति ।दृढत्वेतद्विरुद्धत्वाद्भवदीयंस्वन्यायविरोधापादनमेवबाधितमित्यर्थः । मुमुक्षायाश्चमोक्षेणेत्यत्रशंकांपरिहरति ।
नचेति । इच्छायाविषयेणातिरिक्तोविषयविषयिभावसंबंधोनांगीक्रियते किंतर्हिघटविषयकज्ञानजन्यत्वमेवेच्छायाघटविषय
अन्यथाजातिवाद्यपीत्थंवदेत् । नचेच्छायास्तज्ज्ञानजन्यत्वादन्यस्तत्संबंधोनेतियुक्तं । ज्ञानेसंनिकर्षाधी
नस्येवस्मृतावनुभवाधीनस्येवचइच्छायांज्ञानाधीनस्यविषयसंबंधस्यानुभवात् । अन्यथाघटपटाविति
कत्वं नतुज्ञानस्येवेच्छायाःसविषयकत्वमस्तीत्यर्थः । अन्योविषयविषयिभावःकुतोनयुक्तइत्यतआह ॥ ज्ञानइति ॥ ज्ञा-
नेइंद्रियसन्निकर्षाधीनंसविषयकत्वमस्तिवास्तवं तदपिनस्यात् तत्रघटसन्निकृष्टेंद्रियजन्यत्वमेवघटविषयकत्वमितिवक्तुंशक्य
त्वात् स्मृतावपिघटविषयकानुभवजन्यत्वमेवसविषयकत्वमस्तुनवास्तवमिति अनुभवाधीनमनुभूयमानंवास्तवंसविषयकत्वंन
स्यादित्यर्थः । तथाचयथाज्ञानादौसन्निकृष्टकरणजन्यत्वाद्यधीनं स्मृतौचजनकानुभवाधीनंसविषयकत्वमस्ति तथेच्छायामपि
स्वजनकज्ञानाधीनंसविषयकत्वमस्तीतिसएवसंबंधस्तत्रवक्तव्यइतिभावः ॥ अन्यथेति ॥ घटविषयकज्ञानजन्यत्वेनैवेच्छाया

१ पक्षधर्मत्वादिमत्त्वादित्यर्थः॥

SGDF
Sri Gargeshwari Digital Foundation

घटीयत्वंनवास्तवं तद्विषयकत्वमस्तीतियद्युच्यते तर्हिघटपटावितिसमूहालंबनज्ञानानंतरंपटोमेभूयादितीच्छायाअपिघटीयत्वं स्यात् । घटविषयसमूहालंबनज्ञानजन्यत्वादितिभावः । नित्येति । नित्यायाईश्वरेच्छायाघटादिविषयसंबंधोनस्यात् तद्विषयकज्ञानजन्यत्वाभावादिनाजन्यत्वादितिभावः । अनित्येच्छायामियंव्यवस्थेतिपरोवदिष्यति अतोदूषणांतरमाह ॥ पुत्रादीति ॥ घटविषयकज्ञानजन्यत्वमेवेच्छायास्तद्विषयकत्वमितियद्युच्यते तर्हिपुत्रादिविषयकज्ञानजन्यत्वान्निर्विषयस्यसुखादेरपिपुत्रादिविषयकत्वव्यवहारःस्यादित्यर्थः । अज्ञानस्याऽज्ञेयेनेत्यत्रशंकांपरिहरति ॥ अज्ञानस्येति ॥ तद्विषय

ज्ञानजन्यायाःपटेच्छायाघटीयत्वापातात् । नित्येश्वरेच्छायाविषयाऽऽसंबंधापाता
च । पुत्रादिधीजन्यसुखादेस्तद्विषयत्वापाताच्च । अज्ञानस्यचतज्ज्ञाननिवर्त्यत्वाति
रिक्ततद्विषयत्वाभावेतन्निवर्त्यत्वमेवनस्यात् तस्यसमानविषयकज्ञाननिवर्त्यत्वात् ।

त्वेति ॥ वास्तवेत्यर्थः । अज्ञानस्यापिवास्तवमज्ञेयविषयकत्वंनास्ति किंनाम तज्ज्ञाननिवर्त्यत्वमेवतद्विषयकत्वमितिनवाच्यं । तथात्वेतद्विषयकज्ञाननिवर्त्यत्वमेवनस्यात् कुतइत्यतआह ॥ तस्येति ॥ अज्ञानस्येत्यर्थः ॥ समानेति ॥ स्वविषयविषयकेत्यर्थः । तथाचाज्ञानस्यस्वविषयविषयकज्ञाननिवर्त्यत्वनियमेनस्वविषयेत्युक्त्यावास्तवंसविषयकत्वमंगीकार्यमितिभावः । ज्ञानस्याज्ञानविषयविषयकत्वेननिवर्तकत्वानंगीकारे "अतद्विषयज्ञानेनतदज्ञाननिवृत्तौघटज्ञानेनापिनिवर्तेते"तिभगवत्पादोक्तातिप्रसंगोद्रष्टव्यः । नन्वज्ञानस्यसविषयकत्वंतदास्यात् यदिविषयाच्छादकत्वंस्यात् नचैवं किंनाम यथांधकारस्यगृह

अस्याऽभिन्नज्ञानमिति व्यवहारादित्यर्थः ।

SGDF
Sri Gargeshwari Digital Foundation

388

रूपाश्रयाच्छादकत्वं एवमज्ञानस्यापिस्वाश्रयरूपजीवाच्छादकत्वमेवस्वीकृतमितिचेत्तत्राह॥ अज्ञानस्येति॥ स्वीकृतत्वाच्चेति॥
अस्मिन्गृहे घटादिविषयेंऽधकारःप्रतिबंधकइतिवदस्मिन्नस्याज्ञानमित्यज्ञानस्याश्रयविषयसाहित्यानुभवेनसविषयकत्वस्वीकारा
च्चेत्यर्थः । यथोक्तं "आश्रयत्वविषयत्वभागिनीनिर्विशेषचितिरेवकेवलेति" । ध्वंसादेश्चातीतादिनेत्येतदुपपादयति ॥ यदिचेत्या
दिना ॥ नियामकं विशिष्टव्यवहारनियामकं । स्वभावसंबंधइत्यस्यविवरणंस्वरूपात्मकइति । स्वरूपसंबंधलक्षणमाह ॥ सं

अज्ञानस्यांधकारवत्आश्रयाच्छादकत्वेपिसविषयत्वस्यस्वीकृतत्वाच्च । यदिचभावाभा
वादेःसंबंधांतरमंतरेणतद्विशिष्टव्यवहारजननयोग्यस्वरूपात्मकःस्वभावसंबंधोवाअसंबं
धरूपंप्रतियोगित्वादिकंवानियामकंसत्संबंधकार्यकारि तर्हीहापिविषयत्वंतथैवास्तु ।
भावाभावादेरपिसंबंधोमिथ्यैवेतिचेन्न । प्रपंचमिथ्यात्वसिद्धेःप्राक्तदसिद्ध्याऽन्योन्या

बंधांतरमिति॥ प्रतियोगित्वादिकमित्यादिपदेनानुयोगित्वसंग्रहः॥ इहापीति॥ दृग्दृश्ययोर्विषयविषयिभावसंबंधोपिस्वभाव
संबंधोवा(स्वरूपमेववा)ऽसंबंधरूपोवासंबंधकार्यका(रीभवत्वित्य)रिस्यादित्यर्थः । ननुप्रतियोग्यभावादी(नांसंबंधस्याकल्पि
तत्वदर्शनात्)नामकल्पितस्यसंबंधस्यदर्शनाज्ज्ञानज्ञेययोरप्यकल्पितआध्यासिकसंबंधातिरिक्तस्संबंधःसिद्ध्यतीत्युक्तं तदयुक्तं प्र
तियोग्यभावादिसंबंधस्यापिमिथ्यात्वेनदृष्टांतासंमतेरित्याशंकते ॥ भावाभावादेरिति ॥ आध्यासिकसंबंधइत्यस्यज्ञानज्ञेय ॥ १९५ ॥
योःसंबंधोऽस्ति । सचाऽध्यस्तइतितयोरध्यासएवसंबंधइतिचार्थद्वयंपरेणस्वीकृतं तत्राऽऽद्यार्थाऽभिप्रायेणेयंशंकेतिज्ञातव्यं॥ प्रपं

चेति॥दृग्दृश्ययोः संबंधानुपपत्त्याज्ञेयमात्रस्याध्यासिकत्वेसिद्धेतन्मध्यपतितस्यप्रतियोग्यभावादिसंबंधस्यापिमिथ्यात्वंसिद्ध्यति
तन्मिथ्यात्वेसिद्धेकुत्रापिसत्यसंबंधस्याकल्पनाज्ज्ञानज्ञेययो(रप्याध्या)राध्यासिकसंबंधःसिद्ध्यतीत्यन्योन्याश्रयइत्यर्थः॥ घटस्ये
ति ॥ ज्ञानज्ञेयसंबंधस्यमिथ्यात्वंनसिद्ध्यति यस्संबंधस्सधर्मिसमसत्ताकोदृष्टः यथाघटस्याभावइत्यत्रघटप्रतियोगिकोऽभाव
धर्मिकःसंबंधोऽभावसमसत्ताकोदृष्टः । एवमेवघटस्यज्ञानमित्यत्रापिज्ञानस्यधर्मित्वात्तत्समसत्ताकएवस्वीकार्यः ज्ञानंचचैतन्य 389
मेवेतिनसंबंधमिथ्यात्वसिद्धिरित्यर्थः ॥ संयोगवदिति ॥ यथाविभक्तयोर्घटपटयोस्संयोगआरोपितस्तद्वदित्यर्थः । अन्येत्व

श्रयात् । घटस्याभावइत्यादावभावसमसत्ताकसंबंधवत्घटस्यज्ञानमित्यत्रापिज्ञानसम
सत्ताकसंबंधस्यस्वीकार्यत्वाच्च । अस्तुवा[1]संयोगादिवत्तवविषयत्वमपिमिथ्यैव । नचताव
ताप्रस्तुतदृश्यमिथ्यात्वसिद्धिः । ज्ञानस्येवज्ञेयस्यसत्यत्वेपितत्संबंधमिथ्यात्वोपपत्तेः ।

न्यतरकर्मादिजन्यत्वाभावेनविभुद्रव्ययोस्संयोगाभावादजन्यसंयोगस्यचाप्रामाणिकत्वात्तत्संयोगस्तार्किकैकदेशिमतेआरोपित
स्तद्वदित्यर्थःइत्याहुः ॥ तथाचयथासंयोगसंबंधस्यमिथ्यात्वेपिसंबंधिनोस्सत्यत्वमेवंविषयत्वरूपसंबंधस्यमिथ्यात्वेपिप्रपंचमिथ्या
त्वंनसिद्ध्यति । दृश्येतिहेतुगर्भं । ज्ञानेनसत्यतयाप्रमितत्वादित्यर्थः । ननुसंबंधमिथ्यात्वमेवसंबंधिनोर्मिथ्यात्वमाक्षिपतीतिशं
कायांसंयोगस्यमिथ्यात्वेपिसंबंधिनोस्तदभावादितिदूषणेसत्येवदूषणांतरमाह ॥ ज्ञानस्येवेति ॥ ज्ञेयस्यदृश्यप्रपंचस्यसत्यत्वेपि
तत्संबंधस्यमिथ्यात्वमस्तु संबंधिनःसत्यत्वेपिसंबंधस्यमिथ्यात्वंतुतवापिसंमतमित्याशयेनोक्तं ॥ ज्ञानस्येति ॥ यथादृग्दृश्ययो

1 विभुद्रव्यसंयोगवदित्यर्थः।

SGDF Foundation

र्मध्येएकस्याश्चैतन्यरूपदृशः सत्यत्वेपितत्संबंधस्यमिथ्यात्वंस्वीकृतं । एवंदृग्दृश्ययोरुभयोस्सत्यत्वेपितत्संबंधस्यमिथ्यात्वोपपत्ते
रित्यर्थः । ननुज्ञेयंज्ञानेऽध्यस्तं मिथ्याभूतसंबंधप्रतियोगित्वात् यन्मिथ्याभूतसंबंधप्रतियोगितदपरस्मिन्नारोपितंयथारजतंमि
थ्याभूततादात्म्यरूपसंबंधप्रतियोगिशुक्तावध्यस्तमितिचेत्तत्राह ॥ नचेति ॥ दंडचैत्रयोर्विभक्तयोर्यःसंयोगआरोपितोयदातदा
मिथ्याभूतसंबंधप्रतियोगीचैत्रोऽपरस्मिन्दंडेऽध्यस्तोनभवतीतिचैत्रेव्यभिचारइत्यर्थः । ननुतात्विकसंबंधप्रतियोगीपरस्मिन्नध्य
स्तइतिनोऽभिप्रायः । नचदंडचैत्रादेरारोपितःसंयोगस्तात्विकः अतोनदंडेचैत्रस्याध्यासो तोनचैत्रेव्यभिचारइत्यतःस्वरूपासि[1]

340

नचसंयोगादिरपित्वन्मतेतात्विकः । नचतावतादंडेचैत्रोध्यस्तः । नचा
ध्यासिकसंबंधोपितात्विकःयेनेच्छादौक्लृप्तसंबंधत्यागेनज्ञानेसआश्रीयेत ।

द्धिरित्याह ॥ नचेति ॥ इच्छादौइच्छेष्यमाणादौक्लृप्तसंबंधोहिविषयविषयिभावः । इच्छेष्यमाणादौक्लृप्तस्यविषयविषयिभावसंबं
स्यत्यागेनज्ञानज्ञेययोराध्यासिकसंबंधकल्पनंहिज्ञेयमिथ्यात्वसिद्ध्यर्थं । नचतदंगीकारेपिज्ञेयमिथ्यात्वसिद्धिः।तत्साधकस्यतात्विक
संबंधप्रतियोगित्वादित्यस्यस्वरूपासिद्धत्वादितिभावः । ननुदृष्टानुसारेणघटतदभावादिष्विवधर्मिसमसत्ताकःसंबंधोज्ञानज्ञेययोर
स्त्वितयुक्तं । तत्राभावादेःप्रतियोग्यादिनाताद‍ृशसंबंधःसंभवतीतिकल्प्यते।घटतदभावयोरेकसत्ताकत्वात्। ज्ञानस्यज्ञेयेनसंबंधस्त
थानभवति।तथाहि।ज्ञानज्ञेययोरुभयोरपिसंबंधित्वात्ससंबंधःकिंज्ञानसमसत्ताकोवाज्ञेयसमसत्ताकोवा । नाद्यः। ज्ञानस्यचैतन्यरू

1 स्वरूपासिद्धिर्न विपक्षे चैत्रे हेत्वभाव इत्यर्थः।

SGDF
Sri Gargeshwari Digital Foundation

पतयास(त्य)त्त्वेनसंबंधस्यापिसत्यत्वापत्तेः।द्वितीयेज्ञेयस्यमिथ्यात्वेनसंबंधस्यापिमिथ्यात्वापत्तेरिति परस्परप्रतिबंधादित्यतआह॥ नचेति॥ नियमाकेति॥ संबंधस्यसत्तासंबंधिसत्तयासमाना नतुयावत्संबंधिसत्तया। नियामकाभावादित्यर्थः। तथाचज्ञानसम सत्ताकस्तात्विकएवसंबंधःस्वीकार्यइतिभावः।ज्ञानज्ञेययोस्तात्विकसंबंधाकल्पनेबाधकंचाह॥दृग्दृश्ययोरिति॥ दृग्दृश्ययोःसंबं धोनेत्येतद्वाक्यप्रतिपाद्यार्थस्यएतद्वाक्यजन्यज्ञानेनासंबंधेनश्रवणादिरूपक्रियायाश्चश्रोतव्येनासंबंधेनचरमवृत्तिरूपसाक्षात्कार रूपक्रियायाश्चसाक्षात्कर्तव्येनब्रह्मणाऽसंबंधेनतववाक्यप्रयोगरूपायाक्रियासाविरुद्ध्येतेत्यर्थः ॥ असंबंधेनेति ॥ ब्रह्मज्ञानरू

नचाभावादेःप्रतियोग्यादिनासंबंधोस्ति नतुज्ञानस्यज्ञेयेनेतियुक्तं । नियामकाभावात्। दृग्दृश्य योस्संबंधोनेत्येतद्वाक्यजज्ञानस्यस्वज्ञेयेन श्रवणमननादीनांच श्रोतव्यादिरूपेणब्रह्मणाचरमसा क्षात्कारस्यचसाक्षात्कर्तव्येन ब्रह्मणाअसंबंधेनस्वक्रियादिविरोधापाताच्च। नहिदृग्दृश्ययोस्संबंधो नेतिवाक्यज(न्य)ज्ञाने दृग्दृश्यसंबंधाभावश्चरमसाक्षात्कारादौचब्रह्माध्यस्तं । ब्रह्मणिअध्यस्तस्य

पधर्मिसमसत्ताकसंबंधाभावेनेत्यर्थः। तथाचोक्तस्थलेतादृशसंबंधासिद्धिरेवज्ञानज्ञेययोस्तादृशसंबंधानंगीकारेबाधिकेत्याशयः। ननूक्तस्थलेप्याध्यासिकसंबंधएवस्वीक्रियतइतिचेत्तत्राह ॥ नहीति ॥ श्रवणमननादीनांचरमसाक्षात्कारस्यचेत्यत्रशंकते ॥ ब्रह्मणीति ॥ यथाकथंचिदेकस्यैकत्राध्यासमंगीकृत्याध्यासिकसंबंधोस्माभिरुच्यते तत्रसाक्षात्कारादौब्रह्मणोऽध्यासाभावेपि साक्षात्कारश्रवणादिरूपक्रियायाब्रह्मण्यध्यासोंगीक्रियते तावतैवब्रह्मसाक्षात्कारादीनांब्रह्मीयत्वंभविष्यतीत्यर्थः॥ तदिति ॥ब्र

1 भविष्यतीति चेत्तत्राह॥ ब्रह्मणीति॥ इति भास्वं तरंगिणी पाठः।

SGDF
Sri Gargeshwari Digital Foundation

ह्मेत्यर्थः॥तत्त्वेति॥ब्रह्मीयत्वापातादित्यर्थः॥सर्वस्यापिब्रह्मण्यध्यस्तत्वेन घटसाक्षात्कारस्यापिब्रह्मण्यध्यस्तत्वादितिभावः। यदिसा
क्षात्कारस्यब्रह्मण्यध्यासोंगीक्रियते तर्हिंन्यायसाम्याद्भेदतात्पर्यादेरपिधर्मादावध्यासःस्यात्। प्रकृतेपिज्ञेयप्रपंचएवज्ञानाध्यासा
पातइत्याह ॥ धर्मादावित्यादिना ॥ दृग्दृश्ययोःसंबंधोनेत्यादिनोक्तंसंगृह्णाति ॥ एवंचेति ॥ तदर्थस्य दृग्दृश्यसंबंधाभावस्य
अनध्यासादित्यन्वयः । अन्यः आध्यासिकसंबंधादन्योविषयविषयिभावः । ननुज्ञानज्ञेययोराध्यासिकसंबंधादन्यस्संबंधएव
नसंभवति । तथाहि । ज्ञानंप्रकाशःप्रकाशस्यचविप्रकृष्टेनप्रकाश्येनसंबंधाभावस्यप्रदीपादौदृष्टत्वादत्रापिविप्रकृष्टेनप्रकाश्येन

तत्साक्षात्कारत्वेघटसाक्षात्कारस्यापितत्त्वापातात्। धर्मादौतत्तात्पर्यादेरनध्यासाच्च। इहापिज्ञेये 392
ज्ञानाध्यासापाताच्च।एवंच"दृग्दृश्ययोर्नसंबंधइतिवाक्योत्थसंविदि॥अनध्यासात्तदर्थस्यसंबंधोन्य
स्तयोर्मतः"॥ यद्यपिज्ञानंप्रकाशस्तथापीच्छादिवदांतरत्वेनप्रदीपवैलक्षण्यात् परोक्षवृत्तौदर्शनाच्च

विषयविषयिभावसंबंधोनयुक्तः । तथाचज्ञानंविप्रकृष्टेनविषयेणनसंबध्यते प्रकाशत्वात्प्रदीपवदित्यनुमानविरोधइतिचेत्तत्राह ।
यद्यपीत्यादिना । यथेच्छायाआंतरायाबहिष्ठविषयविषयकत्वं एवंप्रकाशरूपज्ञानस्यापि। आंतरत्वेनप्रदीपवैलक्षण्यात्।तथापरो
क्षस्थलेंतःकरणवृत्तेर्बहिर्निस्सरणाभावेनतद्विषयिणीवृत्तिरंतरेवभवतीतित्वन्मतरहस्यं। एवंचांतरायांपरोक्षवृत्तौविप्रकृष्टेनापिविष
येणसंबंधस्यत्वन्मतेदर्शनाच्च विप्रकृष्टे(नापि)नप्रकाश्येनाध्यासिकसंबंधातिरि(क्तोपि)क्तोविषयविषयिभावसंबंधोयुक्तएवेत्यर्थः। ॥ १९७ ॥
तथाचत्वदीयानुमाने आंतरत्वाभावउपाधिरित्युक्तंभवति । यदिप्रदीपदृष्टांतेनप्रकाशरूपज्ञानस्यविषयेणसंबंधाभावःकथ्यते

तर्हिप्रदीपेप्रकाश्यस्यघटादेरध्यासा(दर्शनात्त)भावात्तदृष्टांतेन प्रकाशरूपेज्ञानेपिज्ञेयस्याध्यासोनयुक्तःस्यादित्याह॥ अन्यथेति॥
ज्ञानविशेषेज्ञेये(नसहाध्यताति)नातिरिक्तसंबंधस्त्वयाप्यभ्युपगतइतिसर्वत्रज्ञानेसएवास्त्वित्याह ॥ किंचेति ॥ नियमइति ॥
येन दृश्यप्रपंचस्यदृश्यध्यासःसिद्ध्येदित्यर्थः।यज्ज्ञेयंतज्ज्ञानेऽध्यस्तमितिनियमःकुतोनास्तीत्यतोव्यभिचारादित्याह॥ अनध्यस्त 393
स्येति ॥ तुच्छस्यस्वज्ञानेशब्दादिजन्यज्ञानेऽनध्यासादित्यन्वयः । तदुपपादनायोक्तमनध्यस्तस्येति । तुच्छस्याऽनध्यस्त
त्वांगीकारात् । अध्यस्तेप्रातिभासिकसत्वमंगीकृत्यासद्वैलक्षण्यांगीकारात् तुच्छस्यचाध्यासांगीकारेप्रातिभासिक(सत्वाद्या)

विप्रकृष्टेनापिप्रकाश्येनसंबंधोयुक्तः। अन्यथादीपवदेवाध्यासिकसंबंधोनस्यात्। किंचतवापिमतेज्ञे
यस्यनस्वज्ञानेऽध्यस्तत्वनियमः॥ अनध्यस्तस्यतुच्छस्य,विद्यानिवृत्तिः पंचमप्रकारेतिमतेऽविद्यानिवृत्ते,

ताद्यापत्तेरितिभावः । पंचमप्रकारेति । "नसन्नासन्नसदसन्नानिर्वाच्यश्चतत्क्षयः । यक्षानुरूपोबलिरित्याचार्याःप्रत्य
पीपदन्नि"तिवचनादितिभावः । अविद्याया अनिर्वाच्यत्वेनसदसद्वैलक्षण्यात्प्रतियोगितदभावयोर्वैलक्षण्यस्यावश्यकतयातन्नि
वृत्तेःपंचमप्रकारत्वंतैरंगीकृतमितिध्येयं। अविद्यानिवृत्तेःस्वज्ञानेऽनध्यासादित्यन्वयः । अध्यस्तत्वेप्रातिभासिकसत्वापत्त्यापं
चमप्रकारत्वभंगइतिभावः। अभावस्यस्वज्ञानेऽनध्यासादित्यन्वयः ॥ नन्वभावस्यप्रपंचांतर्गतस्यस्वज्ञानेऽध्या(सोंऽगीक्रियतए)
सएवेतिचेन्न। तस्यपारमार्थिकत्वांगीकारात्। ननुकथंपारमार्थिकत्वमभावस्य तथात्वेदृग्रूप(ब्रह्माभेदाप)त्वापत्तेः । नचेष्टाप

SGDF Foundation

त्तिः । भावाभावयोस्तदयोगादित्यतउक्तं ॥ अदृग्रूपत्वेपीति ॥ अब्रह्मरूपत्वेपीति सत्यस्येतिशेषः। ननुतर्ह्यद्वैतहानिरित्यतउ
क्तमभावद्वैतमतइति । अभावरूपंद्वितीयंपारमार्थिकमस्ति "अद्वितीय"मित्यादिश्रुतिस्तुद्वितीयभावनिषेधपरेतिमतइत्यर्थः।
"भावाद्वैतमत" इत्यपिपाठः । तत्रभावरूपंद्वितीयंनास्तिअभावरूपंद्वितीयमस्तीतिमतइत्यर्थोद्रष्टव्यः । तथाचोक्तनियमस्यतु
च्छेऽविद्यानिवृत्तावभावतत्वेचाभावात्तत्रैवव्यभिचारइतिभावः । पुनरुक्तनियमस्यस्थलांतरेव्यभिचारमाह ॥ अपरोक्षेति ॥
अतीतादेर्व्यावहारिकस्यपरोक्षानुभवरूपेऽनुमित्यादिरूपस्वज्ञानेऽनध्यासादित्यन्वयः । नन्वतीतादेरपिव्यावहारिकस्यानुमि
(अभावद्वैतमते)(रभावाद्वैमते)र्भावाद्वैतमतेअभावस्यचादृग्रूपत्वेपि स्वज्ञानेऽनध्यासात् । अपरोक्षा
नुभवैकरसेब्रह्मण्यध्यस्तस्यव्यावहारिकस्यातीतादेर्नित्यातींद्रियस्यचपरोक्षानुभवरूपे
स्वज्ञानेऽनध्यासात् । स्मर्यमाणस्यचस्मृतिरूपेवृत्त्यात्मकेस्वज्ञानेऽनध्यासात् । प्रातिभा
सिकस्यचप्रातिभासिकेस्वज्ञानेव्यावहारिकस्यच वर्तमानघटादेर्व्यावहारिकेस्वज्ञाने
त्यादिरूपपरोक्षज्ञानएवाध्यासोस्त्वित्यतउक्तमपरोक्षेति । अध्यस्तस्य अध्यस्तत (यात्वदंगी) यांगीकृतस्यनित्यातींद्रियस्य
धर्मादेः । स्थलांतरेव्यभिचारमाह ॥ स्मर्यमाणस्येति ॥ स्मृतिविषयस्येत्यर्थः । ननुस्मर्यमाणमपिस्मृतावेवाध्यस्तंस्मृतेश्चैतन्य
रूपत्वादित्याशंकावारणायवृत्त्यात्मकइति । स्मृतेरंतःकरणवृत्त्यात्मकत्वात्तत्रचैतन्यप्रतिफलनादेरप्यभावादित्यर्थः । स्थलांतरेव्य
भिचारमाह ॥ प्रातिभासिकस्येति ॥ ननुप्रातिभासिकार्थज्ञानंयत्तत्सत्यमेव तत्रप्रातिभासिकस्याध्यासःसंभवतीत्यतआह ॥

1 भावरूपद्वैताभावे इत्यर्थः

SGDF
Sri Gargeshwari Digital Foundation

त्वन्मतइति ॥ भ्रमरूपज्ञानस्यापि ॥ अर्थज्ञानात्मकोभयविधभ्रमांगीकारादितिभावः। ननुप्रातिभासिकस्यापिप्रातिभासिकेस्वज्ञानेव्यावहारिकस्यापिघटादेर्व्यावहारिकेस्वज्ञानएवाध्यासोस्त्वतोनव्यभिचारइत्यतआह ॥ अध्यस्तेति ॥ अधिष्ठानस्याध्यस्ताधिकसत्ताकत्वनियमादितिभावः । अतएवाध्यस्ताधिकसत्ताकत्वाभावप्रदर्शनार्थंपूर्वंप्रातिभासिकेव्यावहारिकइत्युक्तमितिध्येयं । प्रातिभासिकस्यरूप्यादेःप्रातिभासिकेस्वज्ञानेऽध्यासइत्यत्रदूषणांतरमाह ॥ प्रातिभासिकादिति ॥ रूप्यादित्यर्थः । अधिष्ठानस्याध्यस्तात्पूर्वंसत्त्वनियमात्प्रातिभासिकाद्रूप्यात्पूर्वंप्रातिभासिकस्यतज्ज्ञानस्यसत्त्वमयुक्तं । रूप्यस्यप्रतिभासमात्रशरीरत्वेनतयोरेकका

नध्यासात् । त्वन्मतेऽर्थवद्भ्रमरूपज्ञानस्यापिकल्पितत्वात् । अध्यस्ततुल्यत्वेनकल्पितस्यचानधिष्ठानत्वात् प्रातिभासिकात्पूर्वमसत्यास्तत्प्रतीतेरधिष्ठानत्वायोगाच्च ।[1] त्वयापिरूप्यादिकमिदमंशावच्छिन्नचैतन्येध्यस्तं । रूप्याकाराविद्यावृत्तिप्रतिबिंबितेनतुचैतन्येनप्रकाशतइत्यंगीकाराच्च

लीनत्वादितिभावः । इतोपिनरूप्यस्यज्ञानेऽध्यासः तथात्वेत्वन्मतविरोधादित्याह ॥ त्वयापीति ॥ इदमंशेति ॥ शुक्त्यवच्छिन्नेत्यर्थः ॥ प्रकाश्यतइति ॥ तथाचरूप्याकाराविद्यावृत्तिप्रतिबिंबितचैतन्यमेवरूप्यज्ञानमित्यर्थः। तथाचरूप्यज्ञानाधिष्ठानयोर्भेदान्नरूप्यादेःस्वज्ञानेऽध्यासइत्याशयः। अधिष्ठानाज्ञानेनाध्यासजन्म तज्ज्ञानेनाध्यासनिवृत्तिरितिविवेकः ॥ रूप्येति ॥ रूप्यज्ञान

न्या. श्री. ३४ स्याधिष्ठानत्वाद्रूप्यज्ञानाज्ञानेनरूप्यभ्रमजननप्रसंगः । रूप्यज्ञानज्ञानेनरूप्यभ्रमनिवृत्तिप्रसंगइत्यर्थः । नचेष्टापत्तिः । ज्ञानस्य

[1] ननु न शुक्तावध्यासः। किन्तु शुक्त्यवच्छिन्नचैतन्ये एवेति चोद्यं निराकरोति ॥ त्वयाऽपि ॥

SGDF
Sri Gargeshwari Digital Foundation

ज्ञातैकसत्त्वेनतदज्ञानायोगादितिभावः ॥ ज्ञानमिति ॥ अधिष्ठा(नसामानाधिकरण्येनाध्य)नासंभिन्नतयाध्यस्तप्रतीतेर्दर्शनाज्ज्ञानंरूप्यमितिधीःस्यादितिभावः। ज्ञानात्स्वाधिष्ठानभूतात् स्वज्ञाने पश्चाद्भाविनि। तथाचघटादेःपूर्वमसत्त्वेसन्निकर्षायोगेनाधिष्ठानभूततज्ज्ञानोत्पत्तेरेवायोगादित्यर्थः। स्वाधिष्ठानभूतस्वज्ञानेघटादेरध्यस्तत्वेप्रातिभासिकत्वापत्त्याऽध्यासेसतिघटस्वरूपसिद्ध्याघटसन्निकर्षजन्यघटज्ञानरू(पघटाधि)पाधिष्ठानसिद्धिः अधिष्ठानेसिद्धेसतितत्रघटादेरध्याससिद्धिरित्यन्योन्याश्रयइतिहृदयं।

रूप्यादेःस्वज्ञानेऽध्यस्तत्वेऽधिष्ठानाज्ञानज्ञानाभ्यामध्यासजन्मनिवृत्त्योर्नियतत्वाद्रूप्यज्ञानस्याज्ञानज्ञानाभ्यांरूप्यभ्रमजन्मनिवृत्त्योःप्रसंगाच्च। ज्ञानंरूप्यमितिधीप्रसंगाच्च। घटादेःस्वसन्निकृष्टेंद्रियजन्यात्स्वज्ञानात्पूर्वंसत्त्वेनस्वज्ञानेऽध्यासायोगाच्च। ननुयाघटसन्निकर्षजावृत्तिर्नतयाघटःप्रकाश्यः येनच प्रकाश्यःघटाधिष्ठानचैतन्येन नतद्घटसन्निकर्षजन्यमितिचेन्न।त्वन्मतेपिवृत्तेरेवाज्ञानविरोधित्वात्।

ननुनमयाघटसन्निकृष्टेंद्रियजन्यज्ञानेऽध्यासोंऽगीक्रियते येनोक्तदोषः किंनाम घटसन्निकर्षजन्यायावृत्तिस्तयाघटोनप्रकाश्यते सा घटज्ञानंनभवतीतियावत्। तस्यावृत्तेरज्ञाननिवर्तकत्वमात्रमेवांगीक्रियते तथाचाज्ञानेनिवृत्तेतदभिव्यक्तंयद्घटाधिष्ठानचैतन्यंतेनप्रकाश्यते तदेवचैतन्यंघटज्ञानमितियावत्। यच्चघटादिज्ञानत्वेनाभिमतंघटाधिष्ठानचैतन्यं नतद्घटसन्निकर्षजन्यं तच्चाधिष्ठानचैतन्यरूपंज्ञानंचघटापेक्षयापूर्ववृत्तीतियुक्तोघटादेःस्वज्ञानेऽध्यासइत्याशंकते ॥ नन्विति ॥ ननुवृत्तेरेवाज्ञानविरोधित्वंमयांगी

396

॥ १९९ ॥

कृतमितिततःकिंप्रकृतइत्यतआह ॥ अज्ञानेति ॥ अन्यस्य चैतन्यरूपस्य। तथाचवृत्तेरेवज्ञानत्वात्तस्याश्चघटसन्निकृष्टेंद्रियजन्यत्वेनवृत्तेःपूर्वंघटस्यसत्त्वान्नतस्यज्ञानेऽध्यासइत्यर्थः। घटाधिष्ठानचैतन्यस्यैवघटज्ञानत्वांगीकारेस्ववचनविरोधंचाह ॥ त्वयापीति॥ घटाधिष्ठानस्यवृत्तिप्रतिबिंबितचैतन्यस्यत्वन्मतेआभाससंज्ञा। तथाचोक्तं। "चैतन्यंद्विविधंप्रोक्तंवृत्तौयत्प्रतिबिंबितं। आभास उच्यतेऽन्यच्चानाभासइतिशब्दित"मिति। उक्तिर्व्यवहारः। घटोयमित्यसावुक्तिरित्यस्यवृत्तिरूपज्ञानेनभवतीत्यर्थः। घटोयमिति

अज्ञाननिवर्तकादन्यस्यचज्ञानस्यानुपलंभात् त्वयापि "घटोयमित्यसावुक्तिराभासस्यप्रसादतः। विज्ञातोघटइत्युक्तिर्ब्रह्मानुभवतोभवेत्" इतिवदतावृत्तिप्रतिबिंबितस्यघटानधिष्ठानस्यचैन्यस्यैवघटानुभवत्वोक्तेश्च॥किंचदृश्यत्वान्यथानुपपत्त्यामिथ्यात्वमित्यर्थापत्तिर्विवक्षिता किंवासत्यत्वेदृश्यत्वंनस्यादित्यनुकूलतर्कमात्रं।नाद्यः। तत्सामग्र्यभावात्। आक्षेप्यस्यो

397

व्यवहारजनकंघटोयमितिज्ञानमाभासरूपमेवेतियावत् ॥ विज्ञातइति ॥ घटज्ञानवानहमित्युक्तिरित्यर्थः। ब्रह्मरूपानुभवस्साक्षी। विज्ञातोघटइत्युक्तिजनकंअनुव्यवसायरूपंज्ञानंसाक्ष्येवेतियावत् ॥ घटानधिष्ठानस्येति ॥ तथाचघटानधिष्ठानस्यवृत्तिप्रतिबिंबितस्यविशिष्टचैतन्यस्यैवघटज्ञानत्वावगमात् घटाधिष्ठानचैतन्यस्यघटज्ञानत्वांगीकारेत्वद्वचनविरोधःस्यादितिभावः ॥दृश्यत्वान्यथानुपपत्त्येति॥ दृश्यत्वस्यान्यथासत्त्वेनुपपत्त्येत्यर्थः॥तत्सामग्रीति॥ अर्थापत्तिसामग्रीत्यर्थः। आक्षेप्यस्य रा

SGDF Foundation

त्रिभोजनस्य । उपपादकत्वं पीनत्वोपपादकत्वं । आक्षेपकस्यपीनत्वस्य । अनुपपद्यमानत्वं आक्षेप्यंरात्रिभोजनंविनानुपपद्य
मानत्वं ॥ संबंधीति ॥ ज्ञेयप्रपंचेत्यर्थः। संबंधस्येति ॥ दृक्संबंधरूपदृश्यत्वस्येत्यर्थः ॥ प्रतिकूलमेवेति॥ संबंधिनोमिथ्या
त्वेसंबंधस्वरूपमेवनसिद्ध्येदितिमिथ्यात्वंसंबंधरूपाक्षेपकस्यप्रतिकूलमेवनोपपादकमित्यर्थः । ननुयद्याक्षेपकःसंबंधोऽध्यस्तत्वाद
न्योविषयविषयिभावादिर्वास्तवःस्यात्तदैवमिथ्यात्वंतदुपपादकंनस्यात् । किंतुप्रतिकूलमेवेतिवक्तुंशक्यते । नचैवं किंत्वध्यस्तत्व
रूपसंबंधएवमिथ्यात्वाक्षेपकः मिथ्यात्वंचाध्यस्तत्वरूपसंबंधानुकूलमेवेतितदुपपादकंभविष्यत्येवेत्याशंक्यनिषेधति॥ नचेति॥ आ

पपादकत्वंप्रमाणाविरुद्धत्वंचाक्षेपकस्यानुपपद्यमानत्वंप्रमितत्वंचेतिह्यर्थापत्तिसाम
ग्री । नचाक्षेप्यंसंबंधिमिथ्यात्वमाक्षेपकस्यसंबंधस्योपपादकं । किंतुप्रतिकूलमे
व । नचाध्यस्तत्वरूपसंबंधस्यनतत्प्रतिकूलं । तस्याद्याप्यसिद्ध्यानाक्षेपकत्वात् ।

ध्यासिकसंबंधशब्दस्यार्थद्वयमस्तिदृग्दृश्ययोरध्यासएवसंबंधइतितथा अन्यःकश्चिद्विषयविषयिभावःसंबंधोस्तिसोध्यस्तइतिच । त
त्राद्याभिप्रायेणेदंनिराकरणं तस्येति। अध्यस्तत्वरूपसंबंधस्येत्यर्थः। तथाचाक्षेपकस्यप्रमितत्वाभावादर्थापत्तिसामग्रीन्यूनेतिभावः।
नन्वाध्यासिकसंबंधोनामअध्यासएवसंबंधइतिनार्थः। येनतस्याद्याप्यप्रमितत्वेनाक्षेपकत्वाभावः। किंनामकश्चित्संबंधोविषयविषयि
भा(वरूपोस्ति)वोस्तिसोध्यस्तोमिथ्याभूत(इत्यु)उच्यते।तथाचैतादृशमिथ्याभूतसंबंधस्यसंबंधिमिथ्यात्वोपपादकतयानुकूल्यमेवभ
विष्यतीत्याशंक्यनिराकरोति ॥नचेति॥ संबंधस्य विषयविषयिभावस्य। तथाचैतादृशसंबंधस्यप्रत्यक्षसिद्धतयासत्यत्वेननतस्यसंबं

SGDF
Sri Gargeshwari Digital Foundation

धिमिथ्यात्वमुपपादकमितिभावः । ननुविनैवबाधकमित्यनुपपन्नं संबंध(स्यसत्यत्वे)स्यामिथ्यात्वेदृश्यमिथ्यात्वस्यैवबाधकत्वात् दृश्यस्यसंबंधिनःप्रपंचस्यैवमिथ्यात्वात्तत्संबंधस्यापिमिथ्यात्वमेवांगीकार्यमित्याशंक्यनिषेधति ॥ नचेति ॥ अन्योन्येति ॥ दृग्दृश्यसंबंधमिथ्यात्वेसिद्धेदृश्यस्यसत्यत्वेसंबंधानुपपत्त्यादृश्यमिथ्यात्वसिद्धिः तत्सिद्धौचसंबंधिभूतदृश्यस्यमिथ्यात्वेनतत्संबंधस्यापिमिथ्यात्वसिद्धिरित्यन्योन्याश्रयःस्यादित्यर्थः ॥ प्रत्यक्षादीति ॥ सन्घटइत्यादिप्रत्यक्षेत्यर्थः । तथाचाक्षेपकस्यप्रमाणावि

नचमिथ्याभूतसंबंधस्यनतत्प्रतिकूलं । स्वतःप्रमाणप्रत्यक्षसिद्धसंबंधस्यविनैवबाधकंमिथ्यात्वायोगात् । नचदृश्यमिथ्यात्वमेवबाधकं । अन्योन्याश्रयात् । प्रत्यक्षादिविरुद्धंचाक्षेप्यंमिथ्यात्वं । नचप्रत्यक्षाद्यविरुद्धसंबंधांतरकल्पनेनैवदृश्यत्वोपपत्तौप्रत्यक्षस्यस्वतःप्राप्ततत्वावेदकत्वत्यागोयुक्तः ।

रुद्धत्वरूपार्थापत्तिसामग्री(भग्नेत्य)नेत्यर्थः। नन्वाक्षेप्यमिथ्यात्वंनप्रत्यक्षविरुद्धं तस्यातत्वावेदकत्वादित्यतआह॥नचप्रत्यक्षेति॥ स्वतःप्राप्तेति ॥ स्वतःप्रामाण्यप्राप्तेत्यर्थः । ननुदृश्यत्वान्यथानुपपत्त्याध्यासिकसंबंधसिद्ध्याप्रपंचमिथ्यात्वसिद्धेःकथंतत्सत्त्वग्राहिप्रत्यक्षस्यतत्वावेदकत्वमित्यतउक्तं प्रत्यक्षाद्यविरुद्धेति । अनेनाक्षेपकस्यदृश्यत्वस्याक्षेप्यंदृश्यमिथ्यात्वंविनासत्यसंबंधेनैवोपपत्तावनुपपद्यमानत्वमपिनास्तीत्युक्तंभवति । एकस्यदृश्यत्वस्यान्यथानुपपत्त्यासर्वप्रपंचमिथ्यात्वकल्पनमयुक्तमित्याह ॥

SGDF
Sri Gargeshwari Digital Foundation

नापीति ॥ एकस्यदृश्यत्वस्योपपत्तयेप्रत्यक्षादिनासत्यत्वेनप्रमितानेकप्रपंचाख्यवस्तुनस्त्यागोमिथ्यात्वकल्पनरूपोयुक्तः " (त्यजेदेकंकुलस्यार्थे) " इतिन्यायेनएकस्यदृश्यत्वस्यैवत्यागोस्तु बहुबाधस्यान्याय्यत्वादितिभावः । आक्षेपकंविकल्प्यदूषयति ॥ आक्षेपकंचेति ॥ मिथ्यात्वाक्षेपकमित्यर्थः ॥ दृगिति ॥ दृगध्यस्तत्वरूपंदृश्यत्वमित्यर्थः ॥ आक्षेप्येति ॥ दृगध्यस्तत्वस्यैवमिथ्यात्वरूपत्वादितिभावः ॥ तवेति ॥ विषयत्वमनंगीकर्तुः । तथाचप्रमितत्वंनास्तीतिभावः ॥ अनुपपत्तीति ॥ दृग्विष

नाप्येकस्यदृश्यत्वस्योपपत्तयेप्रमितानेकवस्तुत्यागोयुक्तः। आक्षेपकंचनतावद्दृगध्यस्तत्वं । तस्याक्षेप्याभिन्नत्वेनमांप्रत्यसिद्धेः । नापिदृग्विषयत्वरूपोदृक्संबंधः । तवासिद्धेः । सिद्धौवातेनैवसंबंधेनप्रकाशोपपत्त्याध्यस्तत्वंविनानुपपत्त्यभावात् । नापिदृगधीनसिद्धिकत्वं दृग्विषयत्वातिरिक्तसिद्ध्यसंमतेः । नचदृक्संबंधसामान्यमाक्षेपकं । तच्चप्रसक्तविशेषप्रतिषेधेध्यस्तत्वरूपविशेषेपर्यवस्यतीतियुक्तं । तस्यघटस्यज्ञानमितिधीसिद्धसंबंधसामान्यंप्रत्यविशेषत्वात् ।

यत्वरूपदृश्यत्वाख्याक्षेपकस्येत्यर्थः । तथाचार्थापत्तिसामग्री(भग्नेति)न्यूनेतिभावः ॥ सिद्ध्यसंमतेरिति ॥ दृगधीनसिद्धिकत्वमित्यत्रबहुव्रीह्यर्थस्यसिद्धिसंबंधस्यविषयत्वरूपत्वादितिभावः । तच्चतवासिद्धमितिहृदयं ॥ नचदृक्संबंधेति ॥ दृक्संबंधसामान्यमेवदृश्यत्वं । तच्चप्रसक्तसंयोगादिसंबंधविशेषनिषेधसहकृतंसत् अध्यस्तत्वरूपेसंबंधविशेषेपर्यवस्यच्चसंबंधिनोदृश्यस्यमिथ्यात्वंआक्षेप्स्यतीतिभावः ॥ तस्येति ॥ घटस्यज्ञानमित्यादिप्रतीतिसिद्धोयोज्ञानज्ञेययोस्संबंधस्तंप्रत्यध्यस्तत्वरूपसंबंधस्यविशे

षरूपत्वाभावात् । आदावध्यस्तत्वंसंबंधेनैवअक्लृप्तंदूरेज्ञानज्ञेयसंबंधसामान्यंप्रतिविशेषत्वेन । तथाचपरिशेषेणाध्यस्तत्वेनपर्यवसानमित्यर्थः । ज्ञानज्ञेयसंबंधसामान्यंप्रत्यध्यस्तत्वरूपसंबंधस्यविशेषत्वेघटस्यज्ञानमित्यादौयथाज्ञानज्ञेयसंबंधसामान्यव्यवहारेज्ञेयस्यषष्ठ्यंतेननिर्देशः ज्ञानस्यप्रथमांतेन तथातद्विशेषभूताध्यस्तत्वरूपसंबंधव्यवहारेपिअध्यस्तस्यषष्ठ्यंतेनाधिष्ठानस्यप्रथमांतेननिर्देशःस्यात् नहितथास्तीत्याह ॥ नहीति ॥ सत्त्वेदृश्यत्वंनस्यादित्यनुकूलतर्कमात्रमितिद्वितीयंनिराकरोति ॥ नांत्यइति ॥ तर्कोऽप्रयोजकइत्याह ॥ सत्त्वेपीति ॥ संबंधांतरेणआध्यासिकसंबंधातिरिक्तेनसंबंधेनेत्यर्थः । अत्रापादकीभूतंसत्त्वंअनिर्वाच्य

नहिरूप्यस्यशुक्तिरित्यस्ति । नांत्यः । सत्त्वेप्युक्तरीत्यासंबंधांतरेणैवदृश्यत्वोपपत्त्याऽप्रयोजकत्वात् । किंचनतावदनिर्वाच्यत्वाभावआपादकः । तद्वतोपितुच्छस्यपरोक्षधीवेद्यत्वेनदृश्यत्वात् । नापिसत्त्वं सत्त्वेपिब्रह्मणस्वव्यवहृत्येवघटस्यापिस्वज्ञानेनसंबंधोपपत्तेः । किंचाध्यासिकसंबंधइतिकोर्थः । किंयःकश्चित्संबंधएवाध्यस्तइति किंवातदध्यस्तमेवसंबंधइति ।

त्वाभावोवापारमार्थिकत्वंवा । नाद्यइत्याह ॥ नतावदिति ॥ तद्वतोपीति ॥ सदसद्वैलक्षण्यरूपानिर्वाच्यत्वाभाववतइत्यर्थः । तथाचतर्कस्यतुच्छेव्यभिचारेणव्याप्तिभंगात्प्रशिथिलमूलत्वमितिभावः । नद्वितीयइत्याह ॥ नापीति ॥ सत्वं पारमार्थिकत्वं ॥सत्वेपीति॥ सत्त्वेपि घटस्यज्ञानेनसंबंधोस्त्वित्यप्रयोजकता । नचसत्त्वेसंबंधायोगः। यथाब्रह्मणःसत्यत्वेपितद्व्यवहारेणसंबंधोस्तिब्रह्मणोपिव्यवह्रियमाणत्वात् तद्वत्सत्यस्यापिघटस्यज्ञानेनसंबंधोस्त्वित्यर्थः । तदध्यस्तं भावेक्तः । तस्मिन्नध्यासएवसंबंधइत्यर्थः ।

SGDF

॥ नदृश्येति ॥ संबंधस्याध्यस्तत्वेपिसंबंधिनःपारमार्थिकत्वंसंभवति घटस्यज्ञानेनाध्यस्तसंबंधवत्त्वेपिनसंबंधिनोमिथ्यात्वं विभक्तयोर्घटपटयोरारोपितसंयोगस्यमिथ्यात्वेपिसंबंधिनोस्तदभावात् । यथावा तार्किकैकदेशिमतेऽजन्यसंयोगाभावा(त्काला काशसं)द्विभुद्व्यसंयोगस्यारोपितत्वेनमिथ्यात्वेपिसंबंधिनोर्मिथ्यात्वाभावाद्व्यभिचारइत्युक्तमित्यर्थः ॥ ज्ञेयवदिति ॥ अध्यासस्यसंबंधत्वपक्षेएकस्यापरत्राध्यासोवक्तव्यः । तत्रनतावज्ज्ञानंज्ञेयेध्यस्तं ज्ञेयस्यमिथ्यात्वेनज्ञानंप्रत्यधिष्ठानत्वाभावात् । तथाचज्ञेयस्यज्ञानएवाध्यासोवाच्यः । सनयुक्तः । व्यावहारिकस्यघटादेर्व्यावहारिकेतज्ज्ञानेऽनध्यासात् प्रातिभासिकस्यरू

आद्येनदृश्यमिथ्यात्वसिद्धिरित्युक्तं । नांत्यः । त्वन्मतेज्ञेयवत्तज्ज्ञानस्याप्यध्यस्तत्वेनतत्रतस्या नध्यासादित्युक्तत्वात् । एवंचशाब्दवृत्तेर्हिविषयोब्रह्मतत्रनकल्पितं । यथातथादृग्विषयोदृश्यं नदृशिकल्पितं ॥[1] अविद्याविषयोब्रह्मह्यविद्यायांनकल्पितं । यथातथादृशाग्राह्यंनविश्वंदृशिकल्पितं ॥[1] तस्मादृग्दृश्येच्छेष्यमाणादेर्नाध्यासिकस्संबंधः । किंत्वन्यएव । कोसाविविचेत् न ।

प्यादेःप्रातिभासिकेतज्ज्ञानेऽनध्यासात् अर्थज्ञानात्मकोभयविधभ्रमांगीकारेणज्ञेयवज्ज्ञानस्याप्यध्यस्तत्वेन तत्रतस्यानध्यासादित्युक्तत्वादित्यर्थः । संगृह्णाति ॥ एवंचेति ॥ ज्ञानेज्ञे(यस्या)याध्यासपक्षदूषणायाद्यश्लोकः । वियषोविषयिण्यध्यस्तइतिसामान्यनियमखंडनाभिप्रायेणद्वितीयश्लोकइतिज्ञातव्यं । दृशाग्राह्यं दृग्विषयः । दृशि विषयिभूतायां । आध्यासिकसंबंधखंडनमुपसंहरति ॥ तस्मादिति ॥ अतिप्रसंगे सर्वंसर्वेणदृश्येतेत्यतिप्रसंगइत्यर्थः । विशेषजिज्ञासायाः कोसाविविविशेषविचारस्येत्य

१ ननु कृत्स्नस्यादित्वात्र तत्र ब्रह्मणोऽध्यस्तः। ब्रह्मण्यनादौ दृश्याध्यासो भविष्यतीति चेत् तत्राहोदाहरणान्तरं॥ अविद्येति॥

SGDF
Sri Gargeshwari Digital Foundation

र्थः । तत्रतार्किकोक्तंदृष्टांतमाह ॥ विशेषगतेति ॥ पार्थिवपरमाणुषुसमानगुणकर्मसामान्यवत्सुव्यावर्तकाभावेनव्यावृत्तिबुद्ध्य(संभ)भावेन योगीतरेषांपरस्परासंकीर्णव्यवहारोच्छेदरूपातिप्रसंगपरिहाराय विशेषोनामपदार्थोव्यावृत्तिहेतुतयाकल्पितः। तेनचोक्तातिप्रसंगेनिरस्तेविशेषेपिव्यावृत्तिबुद्धिजनकः कस्सनिरूप्यतामिति जिज्ञासावृथाइदानींतत्प्रयोजनाभावादिति यथातार्किकेणसमाधीयतेतद्वदित्यर्थः । यथोक्तंद्रव्यकिरणावल्यां "असंकीर्णव्यवहृतेर्योगिनांपरमाणुषु ॥ विशेषकल्पनेतत्रविशेषेच्छावृथातवे"ति । नन्वतिप्रसंगनिरासकसंबंधसद्भावेप्रमाणस्यतल्लक्षणस्यचाभावादप्रामाणिकएवासौसंबंधः । "लक्षणप्रमा संबंधेनैवातिप्रसंगेनिरस्तेविशेषजिज्ञासायाविशेषगतविशेषजिज्ञासायाइवानर्थकत्वात् । प्रमाणस्यचोक्तत्वात् । संयोगसमवायांतर्भावेचतल्लक्षणस्यवबहिर्भावेतुतदितरत्वेसतिसंबंधत्वादेर्लक्षणत्वात्विशेषसंज्ञायाश्चयथारुचिकल्प्यत्वात्। यत्तुसंबंधस्यसंबंधिभिन्नत्वेऽनवस्था नचेत्संबंधासिद्धिरितिसंबंधसामान्यखंडनंणाभ्यांवस्तुसिद्धि" रितिवचनादित्यतआह ॥ प्रमाणस्येति ॥ अनुमानत्रयस्येत्यर्थः । यःसंबंधःकल्प्यतेससंयोगसमवायांतर्भूतश्चेत्तल्लक्षणमेवतस्यापिलक्षणं नपृथग्वक्तव्यं बहिर्भावेतुसंयोगसमवायान्यत्वेसतिसंबंधत्वमेवतल्लक्षणमस्त्वित्याह॥संयोगेति॥ नन्वेवंलक्षणप्रमाणाभ्यांजातातत्सिद्धिः तस्यविशेषनामकिमितिचेत्तत्राह ॥ विशेषसंज्ञायाश्चेति ॥ कल्प्यत्वादिति ॥ विषयविषयिभावइत्यादिसंज्ञाकर्तव्येत्यर्थः । संयोगाद्यतिरिक्तःसंबंधःसामान्यतःसिद्ध्यतीत्युक्तंतदयुक्तमित्याशंक्यनिराकरोति ॥यत्त्विति॥ संबंधस्यकल्प्यमानस्य । अनवस्थाभेदःकिंभेदिभ्यांभिन्नोनवेत्यादिभेदपरंपरायामनवस्थेत्यर्थइतिकेचित् । वस्तुत

SGDF
Sri Gargeshwari Digital Foundation

स्तु भिन्नस्यसंबंध्यसंबद्धस्यस्वकार्यकारित्वाभावात्तत्रापिसंबंधांतरंवक्तव्यं तत्राप्युक्तविकल्पापत्त्याऽनवस्थेत्यर्थः ॥ नचेदिति ॥ संबंधस्यसंबंध्यभिन्नत्वेसंबंध्येवास्तिनसंबंधइत्यागतं । तथाचतस्यसंबंधित्वंसंबंधत्वंचनस्यादित्यर्थः ॥ उक्तरीत्येति ॥ ज्ञानस्यज्ञेयेनसंबंधोनेतित्वद्वाक्योक्तसंबंधाभावस्यज्ञानेनासंबंधादित्युक्तरीत्याज्ञानज्ञेययोःसंबंधोनास्तीत्यादिवाक्यजन्यज्ञानस्यैतद्वाक्यप्रतिपाद्येनसंबंधाभावरूपेणार्थेनसंबंधासत्त्वेस्वक्रियाविरोधापत्त्यासंबंधेवाच्ये तस्यचभिन्नत्वेऽनवस्थानचेत्संबंधासिद्धिरितिस्वव्याहतमित्यर्थः । संबंधःसंबंध्यभिन्नएव नचोक्तदोषः । यथादृश्यत्वेदृश्यत्वांतराभावेपियुक्तंदृश्यत्वं यथावाप्रमेयत्वे

तदुक्तरीत्यास्वव्याहतं । युक्तंचदृश्यत्वाद्यंतरहीनस्यापिदृश्यत्वादेरिवसंबंधस्यापिक्वचित्स्वनिर्वाहकत्वं । यदपिज्ञानविषयत्वनिरुक्तिखंडनं तत्प्रकृतानुपयुक्तं । अनतिप्रसंगायहिदृग्दृश्ययोस्संबंधोवाच्यः । नतुज्ञानविषयत्वंनिर्वक्तव्यं । नचविषयत्वस्यानिरुक्तिमात्रेणविषयस्यमिथ्यात्वं ।

प्रमेयत्वांतराभावेपिप्रमेयत्वमस्तिस्वनिर्वाहकत्वांगीकारात् । एवंसंबंधेसंबंधांतराभावेपिसंबंधत्वंयुक्तं स्वनिर्वाहकत्वांगीकारादित्याह ॥ युक्तंचेति ॥ क्वचिदिति ॥ स्वविषयइत्यर्थः । स्वनिर्वाहकत्वंयुक्तंचेत्यन्वयः ॥ प्रकृतानुपयुक्तमिति ॥ अनुकूलतर्कप्रस्तावेतन्निरुक्तिखंडनस्यप्रकृतानुपयोगादित्यर्थः ॥ अनतिप्रसंगायेति ॥ घटदृशिपटस्यविषयत्वपरिहारायकरणसन्निकर्षादिद्वारकोदृग्दृश्ययोःसंबंधोवाच्योनतुविषयत्वमपिनिर्वक्तव्यमित्यर्थः ॥ नचविषयत्वस्येति ॥ उक्तविकल्पखंडनाभ्यां

विषयस्यमिथ्यात्ववर्णनंभौतविचारमनुसरतीत्यर्थः । उक्तंह्यात्मतत्वविवेके । केनचिद्भूतेनद्विरदंचतुष्पादमवलोक्यविकल्पितंकिमयमंधकारोमूलकमत्ति अथवाजलवाहो बलाहकान्वर्षतिगर्जतिच यद्वाबांधवोयं । राजद्वारेश्मशानेचयस्तिष्ठतिसबांधवइतिवचनादितिभावः । अथवायोयंभूमौदृश्यतेतस्यछायेयं । नाद्यः । तस्यशूर्पयुगलस्फोटनाभावात् । नद्वितीयः । तस्यस्तंभचतुष्टयाभावात् । नतृतीयः । तस्यपुच्छ(लगुड)भ्रामणाभावात् । नचतुर्थः । तस्यानरशिरश्शतोद्गिरणाभावात् । अतोनकिंचिदेतत् । किंतुमिथ्यैवेति । किमेतावताविकल्पखंडनमात्रेण द्विरदस्वरूपंनहिनिवर्तते किंतुयोद्विरदोस्तिसोस्त्येवेतिवदन्नेवपिशाचउपेक्ष्यतेपरीक्षकैः । "विकल्पदूषणाभ्यांस्वरूपंनैवहीयते । प्रमाणसिद्धंतत्कर्तोपेक्ष्यतेभूतवज्जनै"रितिवचनादिति ॥ विषयित्व

विषयित्वस्यानिरुक्तावपिविषयीभूतदृग्वत्सत्वोपपत्तेः । स्वव्याहतंच । त्वयैवप्रमाणज्ञानंस्वविषयावरणेत्याद्युक्तेः[1] । दृग्विषयत्वस्यहेतूकृतत्वाच्च । नचप्रमाणज्ञानेविषयोध्यस्तः ।

स्येति ॥ दृशोविषयवत्त्वंहिविषयित्वं ततश्चविषयत्वानिरुक्तौतद्घटितविषयित्वस्याप्यनिरुक्तावपिनविषयिण्यादृशोमिथ्यात्वंकिंतुसत्यत्वमेव । एवंविषयत्वानिरुक्तावपिविषयस्यसत्यत्वमक्षतमित्यर्थः ॥ इत्याद्युक्तेरिति ॥ एवमाद्यनुमानेविषयत्वस्यव्यवहृतत्वाद्विषयत्वनिरुक्तिखंडनंव्याहतमित्यर्थः ॥ दृग्विषयत्वस्येति ॥ दृग्रूपज्ञानविषयत्वस्येत्यर्थः । ननुप्रमाणज्ञानंस्वविषयावरणेत्यत्रविषयत्वंनामनवास्तवं किंत्वध्यस्तत्वमेव । तथाचस्वविषयावरणेत्यत्रस्वाध्यस्तावरणेत्यर्थोविवक्षितइतिचेन्न । एवंवदताप्रमाणज्ञानएवविषयोऽध्यस्तइतिवाच्यं । ऽमितिचेत्तत्राह ॥ नचेति ॥ प्रमाणज्ञानेतद्विषयस्याध्यासेतुच्छादिज्ञानेतुच्छादेरध्यासप्रसंगइत्युक्त

SGDF Foundation

606

त्वादितिभावः। दोषांतरमाह ॥तदज्ञानजन्यमिति॥ प्रमाणज्ञानेस्वविषयस्याध्यस्तत्वंनयुक्तं। अध्यस्तत्वंनामाध्यासंप्रतिविषयत्वं। अध्यासोहिलोकेऽधिष्ठानाज्ञानजन्योऽधिष्ठानज्ञाननिवर्त्यश्चदृष्टः। तद्विषयत्वमेवाध्यस्तत्वंतदनुविद्धतयाप्रतीयमानत्वंवा। नचघटश्चलतीत्यादिचलनानुविद्धतयाप्रतीयमानस्यघटादेस्तत्राध्यस्तत्वंस्यादितिवाच्यं। तदनुविद्धतयाप्रतीयमानत्वविशेषएवाध्यस्तत्वमितिविवक्षितत्वात्। एवंचप्रमाणज्ञानेविषयस्यनाध्यासः। तस्यप्रमाणज्ञानाज्ञानजन्यत्वाभावात्। कुतः ज्ञानस्यज्ञातैकसत्त्वेनप्रमाणज्ञानाज्ञानस्यैवाभावात्। तथाप्रमाणज्ञानाज्ञानजन्यत्वाभावादेवप्रमाणज्ञानज्ञाननिवर्त्यत्वाभावेनतस्याध्यासत्वाभावात्। ततश्चतद्विषयत्वरूपमध्यस्तत्वमयुक्तं। तथातदनुविद्धतयाप्रतीयमानत्वरूपमप्यध्यस्तत्वंनयुक्तं इदंरजतमितिवत्

तदज्ञानजन्यंतज्ज्ञाननिवर्त्यंवाध्यासंप्रतिविषयत्वाद्वातदनुविद्धतयाप्रतीयमानत्वविशेषाद्वान्यस्यतत्राध्यस्तत्वस्याभावाच्च। नह्यनिर्वाच्यत्वादिरूपंसाधारणमध्यस्तत्वंदृश्यविशेषस्यदृग्विशेषप्रकाश्यत्वेतंत्रं।

प्रमाणज्ञानंस्वविषयइतिप्रमाणज्ञानानुविद्धतयाविषयस्यप्रतीयमानत्वाभावात्। अतोनप्रमाणज्ञानेविषयस्याध्यासइत्यर्थः। अन्यस्याध्यस्तत्वस्याभावादित्ययुक्तं। अनिर्वाच्यत्वादिरूपंयत्परोक्षापरोक्षविषयसाधारणमध्यस्तत्वंतदेवापरोक्षज्ञानविषयस्यवृत्तिप्रतिबिंबितचैतन्यरूपेणतदभिव्यक्ताधिष्ठानचैतन्यरूपेणचदृग्विशेषेणप्रकाश्यत्वेप्रयोजकं। एवंचानिर्वाच्यत्वादिरूपंप्रमाणज्ञानाध्यस्तत्वंविषयेस्तीत्याशंक्यनिषेधति ॥ नहीति ॥ परोक्षज्ञानविषयस्यदृग्विशेषप्रकाश्यत्वेऽनिर्वाच्यत्वादिरूपंसाधारणमध्यस्तत्वंनप्रयोजकं परोक्षविषयस्थलेऽनिर्वाच्यत्वादिरूपेऽध्यस्तत्वेसत्यपिदृग्विशेषप्रकाश्यत्वाभावात् तस्मिन्सत्यभवतस्तदप्रयोजकत्वा

प्रयोजक द्वार

SGDF
Sri Gargeshwari Digital Foundation

दितिभावः ॥ यादृशमिति ॥ वृत्तावनध्यस्तेवृत्तिंप्रतिविषयेचिदात्मनियादृशंविषयत्वंतादृशमेवज्ञेयस्यज्ञानंप्रत्यस्त्वित्यर्थः ॥ अनिर्वाच्यमेवेति ॥ निर्वक्तुमशक्यमेवेत्यर्थः । वृत्तिंप्रतिचिदात्मनइतिशेषः । विषयत्वस्य ब्रह्मगतस्य ॥ जगतइति ॥ जगन्निष्ठविषयत्वस्यानिर्वाच्यत्वेपीत्यर्थः । लक्षणस्यावश्यवक्तव्यत्वमाह ॥ त्वयापीति ॥ व्यावहारिकेति ॥ ज्ञानविषयेप्रपंचइतिशेषः ॥ असंकीर्णेति ॥ प्रातिभासिकविषयासंकीर्णेत्यर्थः ॥ लक्षणस्यापीति ॥ विषयत्वस्यव्यवहारविसंवादि

किंच "यादृशंविषयत्वंतेवृत्तिंप्रतिचिदात्मनः । तादृशंविषयत्वंमेदृश्यस्यापिदृशंप्रति "॥ नन्व निर्वाच्यमेवविषयत्वंमयाव्यवहृतमितिचेन्न । विषयत्वस्यानिर्वाच्यत्वेपितवब्रह्मवन्ममापिजगत स्सत्त्वोपपत्तेः । त्वयापिव्यावहारिकसत्त्वस्यासंकीर्णव्यवहारस्यचसिद्ध्यर्थंव्यवहाराविसंवादिनो लक्षणस्यापिप्रमाणवदविद्यादाविववक्तव्यत्वाच्च । कथंचत्वयासाध्यंमिथ्यात्वंनिर्ब्रुवतासाधनंदृ ग्विषयत्वंननिर्वक्तव्यं । नचतवापिघटादौपटाद्यसंकीर्णव्यावहारिकपृथुबुध्नोदराद्याकाराद्यज्ञाने

प्रातिभासिकविषयव्यावृत्तलक्षणस्यापिप्रमाणवद्वक्तव्यत्वादित्यर्थः । तत्रदृष्टांतःअविद्यादाविवेति । यथाऽविद्यायांप्रमाणंलक्षणंचकथ्यतेतद्वद्विषयत्वस्यापिलक्षणादिकंवक्तव्यमेवेत्यर्थः । तथाचावश्यवक्तव्यविषयत्वखंडनंस्वव्याहतमितिभावः ॥ निर्ब्रुवतेति ॥ सदसद्वैलक्षण्यमित्यादिनिर्वचनंकुर्वतेत्यर्थः ॥ साधनमिति ॥ विषयत्वस्यत्वदीयहेत्वंतर्गतत्वात्तद्धेतुज्ञानायतदवश्यंलक्षणीयमित्यर्थः ॥ नचेति ॥ नहीत्यर्थः । घटादौपटाद्यसंकीर्णव्यवहारायतद्धेतुभूतंपटाद्यसंकीर्णपृथुबुध्नोदरादेर्ज्ञानंतादृ

SGDF Sri Gargeshwari Digital Foundation

शासंकीर्णव्यवहारश्चतवाप्यस्ति । तथाचासंकीर्णतादृशाकारएवघटादेर्लक्षणमितिलक्षणतयाज्ञातस्यतादृशाकारस्यलक्षणत्वंयाव दवश्यंवक्तव्यं । एवमसंकीर्णव्यवहारहेतुतयाज्ञातस्याविषयत्वस्यलक्षणंत्वयापिवक्तव्यमितितत्खंडनमयुक्तमित्यर्थः । ननुतादृशा कारलक्षणज्ञानमपिनतादृशव्यवहारहेतुरितिशंकते ॥ नन्विति ॥ सममिति ॥ असंकीर्णविषयाकारमात्रेणासंकीर्णव्यवहा रोपपत्तौतन्निर्वचनंमयापिनकर्तव्यमित्यर्थः ॥ इयांस्त्विति ॥ अयमांतरालिकोविशेषः । असंकीर्णतदाकारस्यैवव्यवहारहेतु त्वादितिभावः । स आकारः । ननुविषयलक्षणंभवद्भिरेववाच्यं । मयातन्नवक्तव्यं । मयातस्याऽनिर्वाच्यत्वांगीकारात् । लक्ष

असंकीर्णघटादिव्यवहारः । नन्वसंकीर्णाकारज्ञानमात्रेणतदुपपत्तौकिंतन्निर्वचनेनेतिचेत् समं ममापि । इयांस्तुविशेषः । तवसआकारस्सद्विलक्षणः । ममतुसन्नितीति अनिरुच्यमानोपिसतवये नमानेनाप्रातिभासिकःतेनैवममतात्विकोस्तु । नचलक्षणोक्त्यनुक्तिभ्यांसदसद्वैलक्षण्यरूपानिर्व चनीयत्वहानिलाभौ । ब्रह्मण्यपिश्रौतस्यापिजगत्कारणत्वादिलक्षणस्यकारणत्वादिखंडनरीत्या

णवचनेतुवस्तुनोऽनिर्वाच्यत्वभंगापत्तिः निर्वक्तुमशक्यत्वमेवह्यनिर्वाच्यत्वंनामेत्यतआह ॥ नचलक्षणोक्तीति ॥ लक्षणो क्तावनिर्वाच्यत्वभंगःअनुक्तौतल्लाभइतिनयुक्तं । नह्यनिरुच्यमानलक्षणवत्त्वमनिर्वाच्यत्वं किंनाम सदसद्वैलक्षण्यं तच्चलक्षणो क्त्यनुक्त्योःसममेवेत्यर्थः । ननुसदसद्वैलक्षण्यमनिर्वाच्यत्वंतत्रतुदुर्निरूपलक्षणकत्वंप्रयोजकतयामयांगीक्रियतइतिचेत्तत्राह ॥ ब्रह्मणीति ॥ खंडनकारोक्तरीत्याकारणत्वलक्षणंदुर्निरूपमितिब्रह्मणिजगत्कारणत्वस्यासंभवापातात् । इष्टापत्तिंपरिहर्तुंश्रौत

स्येत्युक्तं । "यतोवाइमानिभूतानी"त्यादिश्रु(तिबोधितज)त्युक्तस्यजगत्कारणत्वस्यानिर्वचनीयत्वेश्रुतेरतत्वावेदकत्वंस्यादितिभा वः ॥ असंभवादिति ॥ प्रसंगांतोहेतुः । असंभवप्रसंगादित्यर्थः । ब्रह्मणोदुर्निरूपलक्षणकत्वस्यत्वयोक्तत्वात्तस्यापिअनि र्वाच्यत्वंस्यादित्याह ॥ त्वयैवेति ॥ तत्प्रत्यगात्मस्वरूपं । कीदृक्कीदृशमितिचेत्पृच्छसितर्हितादृक् तादृशं ईदृक्ईदृशमितिनिरू पणंयत्रनप्रसरति तद्वस्तुप्रत्यगित्यवधार्यतामित्यनेनब्रह्मणोपिदुर्निरूपत्वस्योक्तत्वात्तस्याप्यनिर्वाच्यत्वंस्यादित्यर्थः । दुर्निरूप लक्षणवत्त्वेऽसत्यत्वमित्यनेनसुनिरूपलक्षणवत्त्वेसत्यत्वमितिप्राप्तं तच्चत्वन्मतेऽयुक्तमित्याह ॥ प्रपंचादाविति ॥ त्वदुक्तस

असंभवात् । त्वयैव "कीदृक्तत्प्रत्यगितिचेत्तादृगीदृगितिद्वयं । यत्रनप्रसरत्येतत्प्रत्यगित्यवधारये" तिब्र ह्मण्यपिदुर्निरूपत्वस्योक्तत्वाच्च । प्रपंचादावपित्वदुक्तानिर्वाच्यत्वादिलक्षणसंभवाच्च । "यत्कठिनं सापृथिवी" त्यादिश्रुत्यापृथिव्यादीनामपिलक्षणोक्तेश्च । तस्मात्प्रमितस्येत्थमितिनिर्वक्तुमशक्यत्वं

दसद्वैलक्षण्यरूपानिर्वाच्यत्वलक्षणस्यप्रपंचेपिसुनिरूपणभावात्सत्यत्वापत्तिरित्यर्थः । प्रपंचेनिर्वचनीयत्वाख्यलक्षणमाधुनिकपु रुषोत्प्रेक्षितत्वात्संभावितदोषं नतत्सत्यत्वमापादयतीत्यतआह ॥ यत्कठिनमिति ॥ इत्यादीत्यादिपदेन "यद्द्रवंतदापोयदुष्णं तत्तेज" इत्यादिश्रुतिग्रहणं । तथाचनिर्दोषश्रुतिसिद्धलक्षणस्यसत्त्वात्पृथिव्यादीनामपिसत्यत्वापत्त्याऽनिर्वचनीयत्वंनस्यादिति भावः । इत्थमितिवक्तुमशक्यत्वमद्भुतत्वादेवयुक्तमित्यन्वयः । असत्त्वादेववक्तुमशक्यत्वंकिंनस्यादित्यतउक्तं ॥ प्रमितस्येति ॥

SGDF

स्पष्टयाऽबाधितयादृष्ट्याद्दृष्टंविषयीकृतंयत्विलक्षणंसंस्थानविशेषरूपंतस्यप्रतिपुरुषमुखेसत्त्वेपियथाद्भुतत्वाद्वक्तुमशक्यत्वं तथा प्रमितस्यविषयत्वस्यापिअद्भुतत्वादेवनिर्वक्तुमशक्यत्वमस्त्वित्यर्थः । इत्थमितिवक्तुमशक्यत्वेऽद्भुतत्वंप्रयोजकमित्येतत्प्रमाणेनद्रढयति ॥ उक्तंहीति ॥ अद्भुतत्वहेतोरित्थमित्यनिर्वाच्यमित्यर्थः । यदपिपरैःस्वग्रंथेप्रलपितंसुनिरूपलक्षणत्वंव्यावहारिकत्वेतंत्रंदुर्निरूपलक्षणत्वंप्रातिभासिकत्वेतंत्रं । एवंचविषयत्वस्यदुर्निरूपणत्वाज्जगतितत्प्रातिभासिकमेवेति । तद्व्यभिचारेणखंडयति ॥ नहीत्यादिना ॥ इतरेति ॥ इतरभेदकलक्षणरूपंरूप्यत्वमित्यर्थः ॥ प्रातीतिकेति ॥ प्रातिभासिकेत्यर्थः । तथाचप्रा

प्रतिपुरुषमुखंस्पष्टाबाधितदृष्टिदृष्टविलक्षणसंस्थानविशेषस्येवसत्वेप्यद्भुतत्वादेवयुक्तं।उक्तंहि "अद्भुतत्वादनिर्वाच्य"मिति। नहिशुक्तिरूप्यस्येतरभेदकंरूप्यत्वंप्रातीतिकजातिरूपतयासुवचमितितद्व्यावहारिकं। नवामुखसंस्थानविशेषोदुर्वचइतिसप्रातिभासिकः नवाब्रह्मणआनंदत्वज्ञानत्वसत्यत्वस्वप्रकाशत्वादिकंखंडनोक्तरीत्यादुर्वचमितिब्रह्मतत्वतोनानंदाद्यात्मकं तस्मान्निर्वचनायोग्यस्यापिविश्वस्येक्षुक्षीरादिमाधुर्यवत्ब्रह्मवचप्रामाणिकत्वादेवसत्वसिद्धेःसदसद्वैलक्षण्यरूपानिर्वाच्यत्वायनिरुक्तिखंडनंशब्दसाम्या

तिभासिकावांतरजातिविशेषएवरूप्यत्वमितिसुवचमितिसंप्रदायः । रज्जुसर्प(स्येतर)स्यभेदकंसर्पत्वमपिरूप्यत्वंस्यात्प्रातिभासिकावांतरजातिरूपत्वात्तस्यापीत्यतोविशेषपदं ॥ सप्रातिभासिकइति ॥ अतएवप्रातिभासिकत्वाभावोपपादनायैवस्पष्टाबाधितदृष्टिदृष्टेत्युक्तं । विषयत्वनिरुक्तिखंडनमुपसंहरति ॥ तस्मादिति ॥ विश्वस्य विश्वांतर्गतविषयत्वस्य ॥ शब्दसाम्यादि

1 अनिर्वचनीयत्वे नति प्रातिभासिकत्वमिति रूप्ये व्यतिरेकव्यभिचारः । ... अन्वयव्यभिचार

४५८ ५१०

SGDF Sri Gurgeshwar Digital Foundation

ति ॥ निरुक्तौखंडितायांनिर्वचनाभावरूपमनिर्वचनीयत्वंसिद्ध्यति । निरुक्तिविरहस्यानिर्वचनीयत्वस्यचैकार्थत्वाच्छब्दसाम्यमितिभावः ॥ भ्रांतिमूलमिति ॥ निरुक्तौखंडितायांनिर्वचनाभावरूपमनिर्वाच्यत्वंयद्यपिसिद्ध्यति तथापिसदसद्वैलक्षण्यरूपंतन्नसिद्ध्यति निरुक्तिविरहेपिप्रतिपुरुषमुखवदिक्षुक्षीरादिमाधुर्यवद्ब्रह्मवदानंदादिवत्सत्त्वसिद्धेः । एवंचसदसद्वैलक्षण्यरूपानिर्वचनीयत्वसिद्ध्यर्थंयन्निरुक्तिखंडनंकृतंतद्भ्रांतिमूलकं भ्रांतौकारणमनिर्वाच्यानिरुक्तिशब्दयोरेकार्थत्वरूपंशब्दसाम्यमित्यर्थः । निर्वचनायोग्यत्वमुपेत्यसमाहितं । वस्तुतस्तदपिनास्तीत्याह ॥ नचेति ॥ केषांचित् निर्वचनेऽकुशलानामित्यर्थः ॥ नहिजात्यं

द्भ्रातिमूलं। नचकेषांचिन्निर्वचनाशक्तिमात्रेणवस्तूनांतदयोग्यत्वं। उक्तंहिबौद्धधिक्कारे ।"नहिजात्यंधेननीलंद्रष्टुंवक्तुंचनशक्यतइतिअज्ञेयमनिर्वाच्यमेवतत्"। "दुरवगाहत्वेनापितदुपपत्तेरिति । नचतदनिर्वचनं। यथा "मंत्रस्यमंत्र"इत्य

धेनेति ॥ नहिजात्यंधोनीलंज्ञातुंवक्तुंचाशक्तइत्यज्ञेयानिर्वाच्यमेवतल्लोके अन्येनज्ञेयत्वादिसंभवादितिबौद्धधिक्कारग्रंथस्यार्थानुवादोयमितिज्ञातव्यं ॥ अज्ञेयानिर्वाच्यमेवतदिति ॥ अन्येनज्ञेयत्वादिसंभवादितिभावः । बौद्धधिक्कारग्रंथस्थवाक्यांतरमुदाहरति ॥ दुरवगाहत्वेनापीति ॥ अयमप्यर्थानुवादः । तद्ग्रंथपाठस्त्वित्थं । "नहिलक्षणापरिज्ञानमात्रेणस्पष्टदृष्टमपिलक्ष्यमपह्नोतुंशक्यतेऽपरिज्ञानस्यदुरवगाहत्वेनाप्युपपत्तेरिति ॥ नचेति ॥ कुशलैर्निर्वक्तुमशक्यंनचेत्यर्थः ॥ यथामंत्रस्येति ॥

SGDF
Sri Gangeshwar Digital Foundation

412

द्वितीयाध्यायेप्रथमपादेविचारितं। "अहिर्बुध्नीयमंत्रंमेगोपाये"त्या(दौप्र)दिप्रतीतमंत्रस्यकिंलक्षणं । नतावद्विहिताभिधायकत्वं। निषेधकेऽव्याप्तेः । नापिनिषेधाभिधायकत्वं । विधायकेऽव्याप्तेः । उत्तमपुरुषांतोयोमंत्रअसिपदांतोयोमंत्रअनयोःपरस्पराव्याप्तेरित्याशंकायांयाज्ञिकसमाख्यायाएवनिर्दोषलक्षणत्वादितिसमाहितं । यथोक्तमधिकरणमालायां "याज्ञिकानांसमाख्या(नां ल)यालक्षणंदोषवर्जितं । तेऽनुष्ठानस्मारकादौमंत्रशब्दंप्रयुंजत"इति ॥ प्रयोगइति ॥ प्रयुज्यतइतिप्रयोगःकर्मणिघञ् अभियुक्तप्रयोगविषयत्वमित्यर्थः । नचात्माश्रयःशंक्यः । अर्थस्यलक्ष्यत्वात् । मंत्रशब्दस्यैवलक्षणांतर्गतत्वात् । तथाचघटपदप्रयोगवि

भियुक्तप्रयोगएवलक्षणंतथाज्ञानविषयस्यापिज्ञानविषयइत्यभियुक्तप्रयोगएव
लक्षणं । नचान्योन्याश्रयः । पूर्वपूर्वप्रयोगस्यज्ञानेनोत्तरोत्तरप्रयोगोपपत्तेः ।

षयत्वंघटत्वमितिवत्मंत्रपदप्रयोगविषयत्वंमंत्रत्वमित्युक्तंभवति ॥ ज्ञानविषयइति ॥ ज्ञानविषयपदप्रयोगविषयत्वमित्यर्थः ॥ अन्योन्येति ॥ प्रयोगापरपर्यायेव्यवहारेप्रवृत्तिनिमित्तज्ञानस्यकारणत्वाल्लक्षणस्यैवचप्रवृत्तिनिमित्तत्वान्मंत्रपदप्रयोगविषयत्वरूपप्रवृत्तिनिमित्तज्ञानेमंत्रपदप्रयोगःमंत्रपदप्रयोगसिद्धौतद्धटितप्रवृत्तिनिमित्तज्ञानमित्यन्योन्याश्रयइत्यर्थः ॥ पूर्वपूर्वेति ॥ स्यादयमन्योन्याश्रयः । यदिमंत्रपदप्रयोगविषयत्वरूपलक्षणांतर्गतःप्रयोगोलक्षणसाध्यप्रयोगएवस्यात् । नचैवं । किंतुलक्षणसाध्यप्रयोगोऽस्मदीयोभिन्नएव । लक्षणांतर्गतोयःप्रयोगः सपूर्वतनानामेवविवक्षितः । सचभिन्नएव । पूर्वतनानामपियःप्रयोगः

413

सोपितत्पूर्वतनप्रयोगज्ञानेनेतिव्यक्तिभेदान्नान्योन्याश्रयइतिभावः । पूर्वोक्तलक्षणान्येवदूषणपरिहारेणसमर्थयते ॥ अथवेत्यादिना ॥ ननुचक्षुरादिनाज्ञानानंतरंवागिंद्रियपाटवाभावेनाभिलपनरूपव्यवहारःएडमूकानांनभवतितज्ज्ञानविषयेऽव्याप्तिरित्यतआह ॥ करणेति ॥ नाव्याप्तिःशंक्या । तत्राप्येडमूकादिज्ञानेव्यवहारकारणत्वस्यफलोपधानस्याभावेपिव्यवहारजननयोग्यतारूपंकारणत्वमस्त्येव । ननुयोग्यत्वंनामतदवच्छेदकावच्छिन्नत्वं । तत्रचज्ञानेव्यवहारजननयोग्यत्वंनामव्यवहारजनकतावच्छेदकावच्छिन्नत्वंवाच्यं त(च्चव्य)द्व्यवहारजनकतावच्छेदकंतद्विषयविषयकत्वमेववाच्यं। तन्नवक्तुंशक्यं । विषयत्वस्यैवेदानींनि

अथवायज्ज्ञानंयदभिलपनरूपव्यवहारकारणंसतस्यविषयः । करणपाटवा
द्यभावेनव्यवहारानुदयेपिसहकारिवैकल्यप्रयुक्तकार्याभाववत्त्वरूपंकारण
त्वमस्त्येव । कदापिव्यवहाराजनकंतुनिर्विकल्पकंनोपेयतइतिनाव्याप्तिः ।

रुच्यमानतयातस्याज्ञानादितिचेत् । अस्त्यत्रसंप्रदायविशेषः । योग्यत्वंद्विविधं । तदवच्छेदकावच्छिन्न(त्वरूपमेकं)त्वंएकं सहकारिवैकल्यप्रयुक्तकार्याभाव(वत्वरू)रूपंचापरं । उभयमपिवनस्थदं(डादौप्रसिद्धं)डेस्ति प्रथमस्यायोगेपिएडमूकादिज्ञानेव्यवहाराभावेपिवाग्रूपसहकार्यभावेनसहकार्यभावप्रयुक्तकार्याभाववत्त्वापरपर्याययोग्यतारूपकारणतायाःसत्त्वान्नाव्याप्तिरित्यर्थः । सहकारिवैकल्येत्यादेर्योग्यतारूपत्वंतूत्तरत्रैवस्पष्टं । तार्किकाणांमतेनिर्विकल्पकज्ञानस्यकदापिव्यवहारजनकत्वानंगीकारात्तद्विषयेव्याप्तिरित्यतआह ॥ कदापीति ॥ तत्रापिनिरुक्तयोग्यतारूपकारणत्वमंगीकृत्ययद्यप्यव्याप्तिःपरिहर्तुंशक्यते तथापिवस्तु

SCDF Foundation

स्थितिकथनमेतदित्याहुः ॥ यत्वतत्वेति ॥ यज्ज्ञानंयदभिलपनेत्यादिलक्षणांतर्गतयोर्यत्त्वतत्त्वजात्योरित्यर्थः ॥ कस्येति ॥ अयंचन्यायःतार्किकाणामपिसंमतएव । कस्य(का)व्याप्तिरितिप्रश्नेऽस्ये(यंव्याप्तिरित्य)त्यननुगतायाएवलक्ष्यत्वादित्युक्तत्वात् । ननुयत्रघटज्ञानानंतरंप्रमादात्पटइतिव्यवहारोभवतितत्रघटज्ञानंपटाभिलपनरूपव्यवहारकारणमतोघटज्ञानस्यपटोपिविषयःस्या दितितत्राह ॥ घटेति ॥ प्रमादएवतत्रहेतुरितिभावः । ननुक्रियाजनकत्वाख्यकारकविशेषःकर्मत्वंतच्चनित्येश्वरज्ञानविषयेऽ व्याप्तमित्यतआह ॥ ज्ञानकर्मेशब्देनेति ॥ करणपाटवाभावेनयत्रज्ञानेव्यवहारोनोत्पन्नस्तद्विषयेऽव्याप्तिरित्यतउक्तं ॥ यो

नचयत्वतत्वजात्योरभावेनाननुगमः कस्यकोविषयइत्यननुगतप्रश्नेअस्यायंविषयइत्यननुगत स्यैववक्तव्यत्वात्। घटज्ञानानंतरंप्रामादिकेपटइतिव्यवहारेनघटज्ञानंहेतुरितिनातिव्याप्तिः। अतएवज्ञानकर्मत्वंविषयत्वमित्यत्रापिनदोषः । ज्ञानकर्मशब्देनज्ञानाधीनव्यवहारयोग्य त्वरूपातिशयवत्त्वस्याविवक्षितत्वात्। नहिक्रियाजनकत्वविशेषःकर्मत्वं । (पटं)घटंकरोती

ग्यत्वरूपेति ॥ नन्वत्रविषयनिष्ठंयोग्यत्वंज्ञानाधीनव्यवहारजनकतावच्छेदकयुक्तत्वमित्युक्तं । तच्चतद्विषयकत्वमेववाच्यं । तच्चनसंभवति । तस्यैवेदानींनिरुच्यमानत्वेनतस्याज्ञानादितिचेन्न । उक्तन्यायेनज्ञानाधीनव्यवहारेसहकारिवैकल्यप्रयुक्तकार्या भावरूपयोग्यतायास्तत्राप्यनपायादितिध्येयं ॥ पटमिति ॥ कृतिःप्रयत्नः । पटजननानुकूलयत्नवान्भवतीतितदर्थः । तथाच कृतिकालेपटोनास्तीतितत्कर्मणिपटेऽव्याप्तिः । ननुकृतिरूपक्रियाजनकत्वंपटेस्तीतिचेत् तत्रपृच्छामः किमसिद्धस्यपटस्यकृतिज

SGDF
Sri Gargeshwari Digital Foundation

नकत्वमुतसिद्धस्य । नाद्यः । असिद्धस्यजनकत्वाभावात् तस्यपूर्ववृत्तित्वघटितत्वात् । नद्वितीयः । सिद्धेइच्छायाइवयत्नस्या प्यभावात् । अतोऽव्याप्तेर्नकर्मत्वलक्षणंत्वदुक्तं किंत्वस्मदुक्तमेव तच्चतत्राप्यस्ति यदातज्ज्ञानंभविष्यतितदातदधीनव्यवहारयो ग्यतारूपकर्मत्वस्यानपायादित्याह ॥ नहीत्यादिना ॥ भासमानतायाएवाद्याप्यनिरूपणादित्युक्तदोषंपरिहरति ॥ भासमा नत्वंचेति ॥ योग्यत्वंनामव्यवहारजनकतावच्छेदकयुक्तत्वं तच्चावच्छेदकंतद्विषयत्वमेववाच्यं । तन्नज्ञातुंशक्यं तस्यैवेदानीं

त्यादावभावात् । नह्यसिद्धंजनकं नापिसिद्धंकृतिकर्म । अतएवयस्यांसंविदीत्यादिलक्षणे पिनदोषः । यतस्संविदीतिसतिसप्तमी । भासमानत्वंचव्यवहारयोग्यत्वं । योग्यत्वंचसति कारणांतरेव्यवहारावश्यंभावः योग्यत्वेचदृश्यत्वेदृश्यत्ववदाध्यासिकसंबंधेआध्यासिकसंबं धवच्चतदेववान्यद्वायोग्यत्वमस्ति । आत्माश्रयादिकंतुतद्वदेवोत्पत्त्याद्यप्रतिबंधकत्वाददोषइ तिनाव्याप्तिः । अन्येतुयस्संबंधांतरमनपेक्ष्ययज्ज्ञानावच्छेदकोयज्ज्ञानानवच्छिन्नस्वभावश्च

निरुच्यमानत्वादित्यतआह ॥ योग्यत्वंचेति ॥ सतीति ॥ सहकारिवैकल्यप्रयुक्तकार्याभावइतियावत् । ननुयोग्यतायांयो ग्यतांतराभावादित्युक्ताव्याप्तिंपरिहरति ॥ योग्यत्वेचेति ॥ तर्ह्यात्माश्रयइत्यतआह ॥ आत्माश्रयादिकंत्विति ॥ तद्वदे वेति ॥ दृश्यत्वादिवदेवेत्यर्थः । नाव्याप्तिः योग्यतायामितिशेषः । अन्येत्वित्यस्यनतत्राव्याप्तिर्दोषइत्याहुरित्यनेनवक्ष्यमाणे नसंबंधः ॥ संबंधांतरमिति ॥ ज्ञातर्यतिव्याप्तिवारणायसंबंधांतरमिति । संबंधांतराभावेसतीत्यर्थः । तत्रचसमवायएवास्ती

SGDF
Sri Gargeshwari Digital Foundation

H16

तिनदोषः । एवंचेत्अहमित्यात्मविषयकेज्ञानेआत्मावच्छेदकोभवति । तत्रसंबंधांतराभावोनास्ति । स्वज्ञानेनात्मनःसमवायस्यै वसत्त्वात् । अतःस्वज्ञानविषयेऽआत्मन्यव्याप्तिरित्यतउक्तंसंबंधांतरमनपेक्ष्येति । संबंधांतरंतत्रतिष्ठतु । परंतुज्ञानावच्छेदकत्वेतद पेक्षयानभवितव्यमित्यर्थः ॥ एवंचनाव्याप्तिः । आत्मनःस्वविषयकज्ञानावच्छेदकत्वेविषयत्वस्यैवापेक्षा । नविद्यमानस्यापिसम वायस्य । तस्यावर्जनीयसन्निधित्वात् । यदिचज्ञानावच्छेदकत्वेविषयत्वंविहायसमवायस्यैवापेक्षा । तर्हिघटस्यज्ञानमित्यादौघट स्यापिज्ञानावच्छेदकत्वंनस्यात् । ज्ञाननिरूपितसमवायस्यघटेऽभावात् । अतोविषयत्वमेवतत्रावच्छेदकतयाअपेक्षितं नसमवा यः । अतआत्मनिसंबंधांतरमनपेक्ष्यस्वज्ञानावच्छेदकत्वंवर्ततएवेतिनाव्याप्तिरित्याह ॥ यद्यपीत्यादिना ॥ स्वज्ञानेति ॥

सतस्यांविषयः॥ यद्यप्यात्मास्वविषयकज्ञानेनसमवायवान् तथापिनतस्यतदवच्छेदेतदपेक्षा स्वज्ञानासमवा यिनोपिघटादेस्स्वज्ञानावच्छेदकत्वदर्शनात्। यथात्मनःस्वानुमितिविषयत्वेपिनविषयत्वेनतत्रहेतुता तद्वत्।

स्वविषयकज्ञाननिरूपितसमवायशून्यस्येत्यर्थः । नन्वहमित्यत्रात्मविषयकज्ञानेआत्मनोज्ञाननिरूपितसमवायविषयत्वयोस्सत्त्वे पिज्ञानावच्छेदकत्वेविषयत्वस्यैवापेक्षानसमवायस्येत्येतत्कुतइत्याशंकायांउभयोस्सत्त्वेप्येकमवर्जनीयसन्निधीत्यत्रोदाहरणमाह ॥ यथेति ॥ यथाआत्मविषयिणीअनुमितिर्भवति तत्रात्माविषयोजनकश्चभवति अनुमितेर्ज्ञानरूपत्वेनतांप्रत्यात्मनस्समवायिकार णत्वात् एवंचात्मनोऽनुमितिनिरूपितसमवायविषयत्वयोःसत्त्वेप्यनुमितिंप्रतिजनकतासमवायेनैव समवायिकारणत्वेनैवका रणतायाःक्लृप्तत्वेनविषयत्वस्यावर्जनीयसन्निधितयानपेक्षायास्तार्किकैरुक्तत्वात् विषयस्यपरोक्षज्ञानेऽकारणत्वात् एवंप्रकृतेपीत्य

H17

र्थः । नन्वेवमनुमित्यादाविवाहमितिस्वविषयकज्ञानंप्र(त्यप्यात्म)तिआत्मनस्समवायिकारणत्वात्समवायापेक्षाविषयत्वस्यस्या दितिचेन्न । भ्रांतोसि । तत्रज्ञानजननेसमवायस्यापेक्षानविषयत्वस्येतिसत्यं । प्रकृतेतुज्ञानावच्छेदकत्वेसमवायापेक्षानास्ति । किंतुविषयत्वस्येत्युच्यतइतिद्रष्टव्यं । नन्वेवंचेद्रूपज्ञानंप्रतिसमवायादेर्विषयत्वंस्यात् । रूपज्ञानंमत्समवेतमित्यादौसंबंधांतरमन पेक्ष्यसमवायादीनांतदवच्छेदकत्वादतउक्तं ॥ यज्ज्ञानानवच्छिन्नस्वभावइति ॥ तथाचरूपज्ञानंमत्समवेतमित्यत्ररूपज्ञाना वच्छेदकेआत्मनिरूपितसमवायेरूपज्ञानानवच्छिन्नस्वभावत्वंनास्ति । समवायस्यसावधिकपदार्थत्वेन(ससंबंधिकपदार्थत्वेनरू)रूप ज्ञानरूपसंबंध्यवच्छिन्नस्वभावत्वात्। तथारूपज्ञानमिष्टमित्यत्रापिसंबंधांतरमनपेक्ष्यरूपज्ञानावच्छेदिकायाअपीच्छायानरूपज्ञान

यद्यपिचरूपज्ञानंमत्समवेतंरूपज्ञानमिष्टंरूपज्ञानंध्वस्तमित्यादौरूपज्ञानाविषयाअप्या

विषयत्वं त(त्रतज्ज्ञानानवच्छिन्नस्वभावत्वाभावात्)स्याज्ञानावच्छिन्नस्वभावत्वात् इच्छायाअपिससंबंधिकपदार्थ(त्वेनेष्य)त्वात्इ ष्यमाणंयद्रूपज्ञानंतदवच्छिन्नस्वभावत्वान्नतत्राप्यतिव्याप्तिः । तथारूपज्ञानंध्वस्तमित्यत्रापिसंबंधांतरमंतरेणरूपज्ञानावच्छेदक स्यापिध्वंसस्यनरूपज्ञानविषयत्वं तज्ज्ञानानवच्छिन्नस्वभावत्वाभावात् ध्वंसस्याभावरूपतयाससंबंधिकपदार्थत्वेनप्रतियोगिभूतरू पज्ञानावच्छिन्नस्वभावत्वेननतत्राप्यतिव्याप्तिः । अस्तिचैतत्पटादिज्ञाने संबंधांतरमनपेक्ष्यज्ञानावच्छेदकस्यपटस्यज्ञानानवच्छि न्नस्वभावत्वात् यथाससंबंधिकपदार्थत्वात्पटज्ञानंपटावच्छिन्नस्वभावंतथापटोनज्ञानावच्छिन्नस्वभावः पटस्यससंबंधिकपदार्थ त्वाभावादित्याह ॥ यद्यपिचेत्यादिना ॥ अवच्छेदकाः तथाचातिव्याप्तिरितिभावः । इष्यमाणाद्यात्मकेत्यत्रादिपदेनप्रतियो

SGDF
Sri Gangadharendra Saraswati Foundation

गिग्रहणं । कुतइत्यतआह ॥ संबंधेच्छादीनामिति ॥ समवायरूपसंबंधस्यसंबंध्यवच्छिन्नस्वभावत्वात् इच्छायाइष्यमाणाव
च्छिन्नस्वभावत्वात्आदिपदेनध्वंसस्यप्रतियोग्यवच्छिन्नस्वभावत्वादितिविवेकः । लक्ष्येउपपादयति ॥ ज्ञानविषयस्त्विति ॥
ज्ञानस्येति ॥ ससंबंधिकपदार्थत्वादितिभावः ॥ अदर्शनादिति ॥ ससंबंधिकपदार्थत्वाभावादितिभावः ॥ नन्वेवंचेदव्या
प्तिः । तथाहि । आदौव्यवसायोजातः । तदनंतरंतद्विषयिणीअनुमितिर्जाता । भाट्टमतेज्ञानस्यज्ञाततालिंगकानुमितिवेद्यत्वा

ऽऽत्मसमवायेच्छाध्वंसादयस्संबंधांतरमनपेक्ष्यरूपज्ञानावच्छेदका स्तथापितेसमवेतेष्यमा
णाद्यात्मकरूपज्ञानावच्छिन्नस्वभावाः संबंधेच्छादीनांसंबंधीष्यमाणाद्यवच्छिन्नस्वभावत्वा
दितिनातिव्याप्तिः। ज्ञानविषयस्तुनज्ञानावच्छिन्नस्वभावः। ज्ञानस्यघटावच्छिन्नस्वभावत्ववत्

त् । अथवानैयायिकरीत्याऽनुव्यवसायोवाजातः अनुमितिविषयकमनुव्यवसायविषयकंवापुनर्ज्ञानांतरंजातं । एवंचव्यवसाय
विषयकेमध्यस्थेऽनुमितिरूपेऽनुव्यवसायरूपेवाज्ञानेस्वग्राहकज्ञानविषयीभूतेऽव्याप्तिः यद्यपिसंबंधांतरमनपेक्ष्याऽनुमितिरूपम
नुव्यवसायरूपंवाज्ञानंस्वग्राहकतृतीयज्ञानावच्छेदकं तथापिज्ञानानवच्छिन्नस्वभावंनभवति । अनुमितेरनुव्यवसायस्यवाससंबं
धिकपदार्थत्वेनपूर्वव्यवसायरूपज्ञानावच्छिन्नस्वभावत्वादितिचेन्न । स्वयंयज्ज्ञानावच्छेदकस्तदनवच्छिन्नस्वभावत्वस्यसत्त्वात् ।

५18

SGDF
Sri Gargeshwari Digital Foundation

ज्ञानग्राहकानुमितेरनुव्यवसायस्यवासंबंधिकपदार्थत्वेनपूर्वज्ञानावच्छिन्नस्वभावत्वेपिस्वयंयज्ज्ञानावच्छेदकःस्वग्राहकज्ञानात्र
च्छेदकोभवतितदवच्छिन्नस्वभावोनभवति नहिस्वग्राहकंज्ञानंज्ञानग्राहकानुमितावनुव्यवसायेवाप्रतीयते येनाऽनुमितेरनुव्यव
सायस्यवातदवच्छिन्नस्वभावत्वंस्यात् ततोनाव्याप्तिरित्याह ॥ यद्यपीत्यादिना ॥ स्वशब्देनज्ञानग्राहकानुमितिरनुव्यवसायो
वाग्राह्यः ॥ ज्ञानविषयकेति ॥ पूर्वव्यवसायविषयकेत्यर्थः । ज्ञानावच्छिन्नस्वभावं पूर्वज्ञानावच्छिन्नस्वभावं । तथाचाव्या
प्तिरितिभावः । यच्चतज्ज्ञानंचयज्ज्ञानं ॥ यदीयस्वभावमिति ॥ यदवच्छिन्नस्वभावमित्यर्थः । नन्वेवंचेत्मत्समवेतंरूपज्ञान

घटादेर्ज्ञानावच्छिन्नस्वभावत्वस्यादर्शनात् । यद्यपिस्वग्राहकज्ञानविषयभूतंज्ञानविषयका
नुमित्यनुव्यवसायादिकंज्ञानावच्छिन्नस्वभावं तथापिस्वयंयज्ज्ञानंप्रतिविषयः तदवच्छि
न्नस्वभावंनेतिनाव्याप्तिः । अथवायज्ज्ञानंयदीयस्वभावंसतस्यविषयः । मत्समवेतंरू
पज्ञानमित्यत्रतुसमवायएवरूपज्ञानावच्छिन्नस्वभावः । नतुरूपज्ञानंतदवच्छिन्नस्वभावं ।

मित्यत्रापिरूपज्ञानंसमवायीयस्वभावमितिरूपज्ञानंप्रतिसमवायोविषयःस्यादितिचेन्न । मत्समवेतंरूपज्ञानमित्य(त्राप्यात्म)स्या
त्मनिरूपितसमवायवद्रूपज्ञानमित्यर्थोनविवक्षितः किंतुरूपज्ञाननिरूपितस्समवायोमय्यस्तीति । एवंचसमवायएवरूपज्ञानाव
च्छिन्नस्वभावोनरूपज्ञानंसमवायावच्छिन्नस्वभावं तत्रस्वभावावच्छेदकस्यरूपस्यैवसत्त्वेनरूपावच्छिन्नस्वभावतयासमवायाव

च्छिन्नस्वभावत्वाभावात् अतोनातिव्याप्तिरित्याह ॥ मत्समवेतमिति ॥ नतुरूपज्ञानमिति ॥ रूपज्ञानमितिहेतुगर्भं ।

SGDF
Sri Gargeshwari Digital Foundation

रूपावच्छिन्नस्वभावत्वेनसमवायावच्छिन्नस्वभावत्वाभावादित्यर्थः । नन्वेवंचेदिच्छादिविषयेऽव्याप्तिः तत्रपूर्वोक्तज्ञानघटितलक्षणानाम(योगादि)भावादित्यतआह ॥ प्रकृतस्येति ॥ दृश्यत्वरूपहेत्वर्थतयाप्रकृतस्येत्यर्थः ॥ शब्देनेति ॥ रूप(ज्ञान)मितिशब्देनेत्यर्थः । आकाशस्यचक्षुषासंयोगःसन्निकर्षःशब्देनसमवायइतिज्ञातव्यं । लिंगकरणतापक्षमालंब्यशंकते ॥ नन्विति ॥ नन्वनुमितेःपक्षविषयकत्वेनलिंगजन्यज्ञानस्यपक्षविषयकत्वमिष्टमेवेतिचेन्न । लिंगविषयकांशेपक्षविषयकत्वंस्यादित्यापादनात् ।

प्रकृतस्यज्ञानविषयत्वस्यैवेयंनिरुक्तिर्नत्विच्छादिविषयत्वस्यापीति नतत्राव्याप्तिर्दोषइत्याहुः । अथवायत्सन्निकृष्टकरणेनयज्ज्ञानमुत्पद्यतेसतस्यविषयः । नचैवमाकाशसन्निकृष्टेनचक्षुरादिनाशब्देनचजन्यंरूपादिज्ञानंप्रतिआकाशस्यविषयतापत्तिः । सन्निकर्षस्यापिहेतुत्वेनविवक्षितत्वात् । नचचक्षुरादिनाकाशस्यसन्निकर्षोरूपादिज्ञानहेतुः । ननुतथापिपक्षसन्निकृष्टलिंगजानुमितिंप्रतिपक्षः । श्रोत्रसन्निकृष्टवाक्यजशाब्दज्ञानंचप्रतिश्रोत्रंविषयःस्यादितिचेन्न ।

अंशभेदविवक्षायाआवश्यकत्वात् । अन्यथासुरभिचंदनमित्यादिचक्षुषाजायमानानांज्ञानानांविशेषणांशेविशेष्येयस्सन्निकर्षस्तज्जन्यत्वाभावेनाव्याप्त्यापत्तेरितिध्येयं ॥ श्रोत्रेति ॥ श्रोत्रस्याकाशात्मकत्वेनवाक्येनसाकंसमवायोस्तीतिभावः । शाब्दज्ञानं वाक्यार्थभूतसंसर्गज्ञानं । अत्रपक्षलिंगसन्निकर्षस्यश्रोत्रवाक्यसन्निकर्षस्यवाऽनुमित्यादौहेतुत्वादित्यपिद्रष्टव्यं । लिंगज्ञानंकरण ॥ २११ ॥

मित्यभिप्रेत्यपरिहरति ॥ अतीतादीति ॥ लिंगकरणतापक्षेअतीतभोजनमिष्टसाधनंभोजनत्वादित्यत्राऽनुमितिर्भवति । सानस्यात् । तत्रलिंगस्याभावात् अतोनलिंगंकरणं किंतुतज्ज्ञानमेव तच्चातीतादिस्थलेप्यस्तीत्यर्थः । अतीतादीत्यादिपदेनानागतसंग्रहः । लिंगादेरित्यादिपदेनवाक्यसंग्रहः । तथाचपक्षस्यलिंगज्ञानेनश्रोत्रस्यवाक्यज्ञानेनचसन्निकर्षाभावादितिभावः । तथाचनातिव्याप्तिरितिद्रष्टव्यं । नन्वेवंचेदात्मनिअतिव्याप्तिः । लिंगादिज्ञानेनात्मनःसमवायस्यसत्त्वेनात्मसन्निकृष्टलिंगज्ञानजन्यानुमि

अतीतादिलिंगादेर्ज्ञानेनानुमित्यादिदर्शनेनलिंगज्ञानवाक्यज्ञानयोरेवकरणत्वात् । लिंगादिज्ञानस्यचात्मसन्निकर्षोनानुमित्यादिहेतुः । किंत्ववर्जनीयसन्निधिः । ननुतथापिरूपादिज्ञानस्यात्माविषयःस्यात् । तत्रमनसःकरणत्वादात्ममनस्सन्निकर्षस्यचरूपादिधी(ज्ञानहे)हेतुत्वादितिचेत्न । असाधारणकरणत्वस्यविवक्षितत्वात् मनसश्चसाधारण्यात् । तर्हिमनस्सन्निकृष्टचक्षुर्जन्यंरूपज्ञानंमनोविषयंस्यादितिचेन्न । सन्निकर्षस्याप्यसाधारणहेतुत्वेनविवक्षितत्वात् ।

तेरप्यात्मविषयकत्वंस्यादित्याशंक्यसन्निकर्षस्याप्यस्माभिर्हेतुतयाविवक्षितत्वेनतत्रातिव्याप्त्यभावात् लिंगादिज्ञानेनात्मसन्निकर्षस्यानुमित्याद्यहेतुत्वादित्याह ॥ लिंगादीति ॥ नन्विति ॥ तथाचात्मनिरूपितकारणीभूतसन्निकर्षवतामनसारूपादिज्ञानस्यजायमानत्वेनरूपज्ञानस्यात्मविषयकत्वंस्यादित्यर्थः ॥ असाधारणेति ॥ तथाचयत्सन्निकृष्टेनासाधारणकरणेनेत्यादिविवक्षितमित्यर्थः ॥ साधारण्यादिति ॥ सर्वोपलब्धिसाधनत्वादितिभावः ॥ चक्षुरिति ॥ चक्षुषःरूपज्ञानेऽसाधारणकारण

SGDF Sri Gangadharendra ... Foundation

427

त्वादितिभावः ॥ चक्षुर्मनस्सन्निकर्षस्येति ॥ ननुचक्षुर्मनस्सन्निकर्षवच्चक्षुषोपिद्रव्यादिज्ञानसाधारणत्वात्कथमसाधारण्यं । तथाचकरणेऽसाधारण्यविवक्षयैवमनस्सन्निकृष्टचक्षुर्जन्यंरूपज्ञानंमनोविषयंस्यादित्यतिप्रसंगवारण(परिहार)संभवेसन्निकर्षस्याप्यसाधारण्यंकस्माद्विवक्षणीयमितिचेदुच्यते । अस्त्यत्रसंप्रदायविशेषः । अत्रचक्षुषोऽसाधारण्यंनामचाक्षुषत्वावच्छिन्नकार्यतानिरूपितकारणताश्रय(त्वरूपंवि)त्वंविवक्षितं । एवंचपूर्वोक्तातिव्याप्तिःस्यादेव । चक्षुर्मनस्सन्निकर्षस्यतुद्रव्यादिज्ञानंप्रतिनचक्षुर्मनस्सन्निकर्षत्वेनहेतुता मनस्त्वगिंद्रियसन्निकर्षजन्येद्रव्यसाक्षात्कारेमनोघ्राणादिसन्निकर्षजन्यगंधादिसाक्षात्कारेचाभावेनद्रव्यत्वावच्छिन्नकार्यतान्यूनवृत्तित्वेनानवच्छेदकत्वात् किंतुचक्षुर्मनस्सन्निकर्षस्येंद्रियमनस्सन्निकर्षत्वेनैवकारणताविवक्षिता ।

चक्षुर्मनस्सन्निकर्षस्यचद्रव्यादिज्ञानसाधारणत्वात् । प्रत्यभिज्ञायामिंद्रियस्यतत्तयासंस्कारः

जन्यलौकिकसाक्षात्कारत्वेनकार्यताविवक्षिता । तथाचजन्यलौकिकसाक्षात्कारत्वावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वंचक्षुर्मनस्संनिकर्षस्येंद्रियमनःसंनिकर्षत्वेनास्तीत्येवं करणसन्निकर्षयोःसाधारण्यस्यभिन्नतयाचक्षुर्मनस्सन्निकर्षस्यद्रव्यादिज्ञानसाधारणत्वेन सन्निकर्षासाधारण्यविवक्षयैवपूर्वोक्तातिव्याप्तिपरिहारोनोक्तरूपकरणासाधारण्यविवक्षयेतिभावः । अत्रविस्तरस्त्वस्मदाचार्यकृतन्यायसुधाटिप्पण्यांद्रष्टव्यः । ननुचक्षुर्जन्यप्रत्यभिज्ञाविषयभूततत्तायामव्याप्तिः । अतीतदेशकालसंबंधरूपतत्तायाश्चक्षुषासन्निकर्षाभावादित्यतआह ॥ प्रत्यभिज्ञायामिति ॥ ननुकरणत्वेनाभिमतयोर्लिंगज्ञानवाक्यज्ञानयोर्लिंगिवाक्यार्थाभ्यांसंबंधा

SGDF Sri Gargeshwari Digital Foundation

भावादव्याप्तिरित्यतआह ॥ लिंगज्ञानस्येत्यादिना ॥ तद्व्याप्तेति ॥ लिंगिव्याप्तंयल्लिंगंतेनसंबंधः लिंगिव्याप्तलिंगविषयकत्व मितियावत् ॥ तत्परेति ॥ वाक्यार्थतात्पर्यकेत्यर्थः । वाक्यार्थपरवाक्यविषयकत्वमितियावत् । नन्वथाप्यनुमितौव्यापकताव च्छेदकादेरपिप्रतीयमानत्वेन तस्यलिंगज्ञानेनव्याप्तिद्वारकसंबंधाभावात्तद्विषयकत्वंनस्यादित्यतआह ॥ एवमन्यत्रापीति ॥ व्यापकतावच्छेदकावच्छिन्नलिंगिव्याप्तलिंगविषयकत्वं लिंगज्ञानस्यसंबंधऊह्यः।तेनव्यापकतावच्छेदकस्याप्युक्तक्रमेणलिंगज्ञानेन संबंधोस्त्येवेति नकोपिदोषइ(त्यादिद्र)तिद्रष्टव्यं । ननुसंयोगसमवाययोरेवसन्निकर्षत्वादुक्ताःसंस्कारादयःसन्निकर्षाअप्रामा

लिंगज्ञानस्यचालिंगिनातद्व्याप्तलिंगसंबंधः वाक्यज्ञानस्यचतत्परवाक्यसन्निकर्षः । एवमन्य
त्रापिसन्निकर्षऊह्यः । नहिसंयोगादिरेवसन्निकर्षः । किंतुप्रत्यासत्तिमात्रं । तच्चानतिप्रसं
गायतत्तादिनासहवक्तव्यमितिनाव्याप्तिः । यद्यपिलिंगज्ञानादेर्लिंगादिनाविषयित्वमेव
संबंधः तथापिसइदानीमुभयसंमतेनसंबंधत्वेनैवज्ञेयः । नतुविषयित्वेनेतिनात्माश्रयः ।

णिकाएवेतिचेत्तत्राह ॥ नहीति ॥ सन्निकर्षः विषयत्वलक्षणेविवक्षितः ॥ किंत्विति ॥ विवक्षितमितिशेषः । ननुलिंगज्ञानादेर्लि ग्यादिनातद्व्याप्तलिंगसंबंधादिकमेवसन्निकर्षइत्युक्तं तदयुक्तं लिंगज्ञानस्यलिंगसंबंधित्वंनामलिंगविषयकत्वमेवसंबंधइतिविषयल क्षणांतर्गतसन्निकर्षस्यापिपुनर्विषयघटितत्वादात्माश्रयइत्याशंक्याह ॥ यद्यपीति ॥ लिंगादिना लिंग्यादिव्याप्तलिंगादिनेत्यर्थः। विषयित्वं विषयवत्वंविषयीकारित्वमितियावत् ॥ सइदानीमिति॥ तद्व्याप्तलिंगसंबंधोलिंगज्ञाने तत्परवाक्यसंबंधश्चवाक्यज्ञा

SGDF
Sri Gargeshwari Digital Foundation

नेसन्निकर्षइत्येवव्यवहर्तव्यमित्यर्थः । ननुयत्सन्निकृष्टेनेति लक्षणंनित्येश्वरज्ञानविषयेऽव्याप्तमित्यतआह ॥ इदंचेति ॥ ईश्वर ज्ञानव्यावृत्तयेजन्यपदं । अतीतादिविषयकानुमितावव्याप्तिपरिहारायोक्तं । नियतविषयकेति । वर्तमानावर्तमानविषयकेत्यर्थः । जन्याजन्यज्ञानविषयसाधारणलक्षणमाह ॥ अथवेति ॥ यथापाकजरूपवतीति ॥ यथापाकजरूपवतीपृथिवीत्यत्रपाकज रूपवत्त्वंनपृथिव्यालक्षणं वज्रादौपाकेनरूपपरिवर्तनाभावात्पाकजरूपवत्त्वंपृथिवीप्रभेदे वज्रादावव्याप्तमित्याशंक्ययथानाऽ व्याप्तिस्तथापृथिवीलक्षणमुक्तं पाकजरूपेति । पाकजरूपसमानाधिकरणायाद्रव्यत्वसाक्षाद्व्याप्याजातिस्तद्वतीपृथिवीतत्त्वंपृथि

इदंचनियतविषयकजन्यज्ञानविषयलक्षणं । अथवायथापाकजरूपवतीपृथिवीत्यत्रपाकजरूपसमा नाधिकरणद्रव्यत्व(साक्षाद्व्या)व्याप्यजातिमत्त्वंविवक्षितं। तथाज्ञानकरणसन्निकर्षसमानाधिकरणः

वीत्वमित्यर्थः । जातिमतीपृथिवीत्युक्ते गुणादावतिव्याप्तिरतउक्तं द्रव्यत्वव्याप्यजातिमतीति । तावत्युक्तेव्याप्यव्याप्यस्यसुत रांव्याप्यत्वेनद्रव्यत्वव्याप्याद्रव्यव्याप्यकरकत्वादेरपिद्रव्यत्वव्याप्यत्वात्तादृशजातिमतिकरकादावतिव्याप्तिरतउक्तं साक्षादिति । तावत्युक्तेद्रव्यत्वसाक्षाद्व्याप्यजातिभूताद्रव्यजातिमतीष्वप्स्वतिव्याप्तिरतउक्तं पाकजरूपसमानाधिकरणेति । अद्रव्यस्यपाकजरूपस मानाधिकरणत्वाभावान्नदोषः । तथाचवज्रादौनाव्याप्तिः । तत्रापिवस्तुगत्याघटादौपाकजरूपसमानाधिकरणायाद्रव्यत्वसाक्षाद्व्या प्याजातिःपृथिवीत्वं तद्वत्त्वस्यसत्त्वादितिलक्षणमुच्यते।एवमेवजन्याजन्यज्ञानविषयत्वमपिनिर्वक्तुंशक्यमित्याह॥ तथाज्ञानका

SGDF
Sri Gargeshwari Digital Foundation

रणेति ॥ ज्ञानकारणीभूतोयस्सन्निकर्षःइंद्रियार्थसन्निकर्षस्तत्समानाधिकरणोयोज्ञानावच्छेदकत्वसाक्षाद्व्याप्योधर्मःघटत्वादिः सएवविषयत्वंविषयस्यघटादेरित्यर्थः । घटज्ञानेघटस्यविषयत्वंनामघटत्वमेवेत्युक्तंभवति । घटीयंज्ञानमित्यादिव्यवहारात् घटादि ज्ञेयतयाज्ञानावच्छेदकोभवति। तथाचज्ञानावच्छेदकत्वमस्ति । एवंचज्ञानावच्छेदकत्वसाक्षाद्व्याप्यधर्मोभवतिघटत्वादिः यत्रघट त्वंतत्रज्ञानावच्छेदकत्वमितितिनियमात् । तथाचज्ञानकारणीभूतोयस्सन्निकर्षःइंद्रियार्थसन्निकर्षः तस्यद्विष्ठत्वेनघटेपिसत्त्वात् तत्समानाधिकरणोभवतिघटत्वादिः । एवंचनेश्वरज्ञानविषयेघटेऽव्याप्तिः । ईश्वरज्ञानविषयघटादिनिष्ठोज्ञानावच्छेदकत्वसा क्षाद्व्याप्यधर्मभूतोघटत्वादिर्जन्यज्ञानविषयेघटेवस्तुगत्याज्ञानकरणसन्निकर्षसमानाधिकरणइतिनदोषः । इतःपरंपदानांकृत्यंवि

ज्ञानावच्छेदकत्वसाक्षाद्व्याप्यधर्मोविषयत्वमितिनाव्याप्तिरिति ॥ ७ ॥

चार्यते । तथाहि । अत्रधर्मोविषयत्वमित्युक्तेघटज्ञानविषयताद्रव्यत्वस्यस्यात् अतउक्तं ज्ञानावच्छेदकत्वव्याप्येति । द्रव्यत्व स्यपटेपिविद्यमानत्वेनघटज्ञानावच्छेदकत्वव्याप्यत्वाभावात् तावत्युक्तेघटज्ञानावच्छेदकत्वव्याप्ये एतद्घटत्वेसामान्याकारेणघ टज्ञानविषयत्वरूपत्वंस्यादतउक्तं साक्षादिति । एतद्घटत्वादिकंतुनतथा तस्यघटज्ञानावच्छेदकत्वव्याप्यघटत्वन्यूनवृत्तित्वात् तद्व्याप्यान्यूनवृत्तित्वस्येहसाक्षात्पदार्थतयाविवक्षितत्वात् । धर्मपदंस्वरूपकथनं । एवंचेद्देवदत्तात्मनोपिकर्तृतयाज्ञानावच्छे दकत्वेनदेवदत्तात्मत्वेतिव्याप्तिः यत्रदेवदत्तात्मत्वंतत्रघटज्ञानावच्छेदकत्वमितिव्याप्तेर्देवदत्तात्म(नांस)निसत्त्वात् । एवं

SGDF
Sri Gargeshwari Digital Foundation

चघटज्ञानावच्छेदकत्वसाक्षाद्व्याप्यधर्मभूतदेवदत्तात्मत्वंघटज्ञानविषयतास्यादतोज्ञानकरणसन्निकर्षसमानाधिकरणेतिव्याप्यधर्म विशेषणमभिहितं । एवंचदेवदत्तात्मत्वेनातिव्याप्तिः देवदत्तात्मत्वस्यज्ञानकारणीभूतेंद्रियार्थसन्निकर्षसमानाधिकरणत्वाभावात् । ननुसामान्यतोज्ञानकारणेत्येवविवक्षितत्वादात्ममनस्सन्निकर्षस्यदेवदत्तात्मनिसत्त्वात्तत्सामानाधिकरण्यंदेवदत्तात्मत्वेप्यस्तीतिचेन्न । इंद्रियार्थसन्निकर्षरूपसन्निकर्षविशेषस्यैवविवक्षितत्वात् । यद्वाघटज्ञानत्वेऽतिव्याप्तिः यत्रघटज्ञानत्वंतत्रज्ञानावच्छेदकत्वं यथाघटज्ञानेघटज्ञानमस्तीतिज्ञानावच्छेदकत्वात् ज्ञानावच्छेदकत्वंचास्ति घटज्ञानेप्रकारत्वेनप्रतीयमानस्यैवघटज्ञानत्वस्यैवज्ञानावच्छेदकत्वात् । एवंचज्ञानावच्छेदकत्वसाक्षाद्व्याप्यभूतेघटज्ञानत्वेऽतिव्याप्तिवारणायघटज्ञानकारणसन्निकर्षसमाना

दृग्दृश्यसंबंधानुपपत्तिभंगः ॥ २३ ॥

धिकरणेत्युक्तं । घटज्ञानकारणीभूतस्यघटेंद्रियसन्निकर्षस्यघटज्ञानेऽवृत्तित्वेनघटज्ञानत्वस्यतदसमानाधिकरणत्वात्नातिव्याप्तिरितिध्येयं । नन्वेवंघटत्ववत्तत्समनियतंकंबुग्रीवादिमत्त्वंघटत्वप्रकारकप्रमाविशेष्यत्वादिकमपिविषयत्वंस्यात्उक्तलक्षणसत्त्वादितिचेन्न । इष्टापत्तेरितिकेचित् । वस्तुतस्तुव्याप्यधर्मेलघुभूतेतिविशेषणंदेयं । एवंचकंबुग्रीवादिमत्त्वाद्यपेक्षयाघटत्वस्यलघुभूतत्वेन तदेवविषयत्वं नेतरत् गौरवात् व्याप्यधर्मेलघुभूतत्वंतार्किकाणामपिसंमतं अन्यथाघटकारणताव्याप्यत्वंदंडत्वस्येवरूपवद्दंडत्वस्यापिस्यात् ।वह्निव्याप्यत्वंधूमस्येवनीलधूमत्वस्यापिस्यादित्यतिप्रसंगवारणायव्याप्यधर्मेलाघवस्यविवक्षितत्वादित्यतिप्रसंगोमणिकृतापरिहृतः । एवमिहापीतिनदोषइतिसांप्रदायिकोर्थः ॥ ॥ दृग्दृश्यसंबंधानुपपत्तिभंगविवरणं ॥ २३ ॥ दृश्यस्यदृग

426

SGDF Sri Gargeshwari Digital Foundation

ध्यस्तत्वेप्रातिभासिकस्थलइवेंद्रियसन्निकर्षायोगेनत्वदुक्तप्रतिकर्मव्यवस्थाऽयोगइतिवक्तुंशिष्याणांस्पष्टंदूषणज्ञानायतत्प्रक्रियाम
नुवदति ॥ यच्चोक्तमित्यादिना ॥ प्रतिकर्मव्यवस्थायुक्तेत्यंतेन । कुल्या कृत्रिमजलप्रवाहः । केदाराः क्षेत्राणि । विषया
कारेणपरिणामोपपादनायोक्तं ॥ सावयवमिति ॥ शीघ्रगमनोपपादनायोक्तं ॥ तैजसमिति ॥ ध्रुवादिविषयेति ॥
(ध्रुवमं) तन्मंडलादिरूपविषयेत्यर्थः । तत्रेति । जीवचैतन्यंसर्वगतंपरिच्छिन्नंचेतिमतद्वयमित्यन्वयः ॥ अविद्येति ॥

यच्चोक्तंयथातटाकोदकंछिद्रान्निर्गत्यकुल्यात्मनाकेदारान्प्रविश्यतद्वदेवचतुष्कोणाद्याकारंभवति ५२७
तथाविषयेंद्रियसंप्रयोगादिकेसतिसावयवंतैजसमंतःकरणंचक्षुरादिद्वारेणनिर्गत्यध्रुवादिविषय
पर्यंतंचक्षुर्वत्शीघ्रंदीर्घप्रभाकारेणपरिणम्यविषयंव्याप्यतदाकारंभवतिसेयंवृत्तिरित्युच्यते ।
तत्रजीवचैतन्यमविद्योपाधिकंसत्सर्वगतमंतःकरणोपाधिकंसत्परिच्छिन्नंचेतिमतद्वयं । त
त्राद्येविषयप्रकाशकंजीवचैतन्यं द्वितीयेब्रह्मचैतन्यं । सर्वगतत्वपक्षेपिजीवचैतन्यमविद्यानावृ

अविद्यायास्सर्वगतत्वेनतदुपाधिकजीवचैतन्यमपिसर्वगतमित्यर्थः ॥ अंतःकरणेति ॥ अंतःकरणस्यासर्वगतत्वात्तदुपाधिक
जीवोप्यसर्वगतइत्यर्थः ॥ तत्राद्यइति ॥ जीवचैतन्यस्यसर्वगतत्वात्तत्रैवविषयस्याऽध्यस्तत्वेनजीवचैतन्यमेवविषयप्रकाशकं
घटादिज्ञानमित्युच्यतइतियावदित्यर्थः ॥ द्वितीयइति ॥ अंतःकर(णोपाधिप)णपरिच्छिन्नस्यांऽऽतरत्वेनबाह्यप्रपंचाध्यासा
धिष्ठानत्वाभावात्ब्रह्मचैतन्यंयदनावृतंतत्रैवाध्यस्तं तदेवचविषयप्रकाशकमित्यर्थः ॥ सर्वगतत्वेति ॥ अविद्योपाधिकंससर्व

SGDF
Sri Gargeshwari Digital Foundation

गतमितिपक्षेप्यविद्यावृतस्वभावंतदनावृतस्वभावंचेतिमतद्वयमित्यर्थः । असर्वगतत्वपक्षेत्वनावृतमेवेतिबोध्यं । नन्वेतेषुमतेषु वृत्तेःक्वोपयोगइत्यतस्तदुपयोगमाह ॥ तत्राद्यइति ॥ अविद्योपाधिकंयत्सर्वगतंजीवचैतन्यंतदविद्यानावृतमेवविषयाध्यासाधिष्ठानं अतएवविषयप्रकाशकमितिमतइत्यर्थः ॥ विषयेति ॥ सर्वगतेजीवचैतन्येविषयादिकमस्ति तत्संश्लेषोजीवचैतन्येनास्ति असंगत्वात् वृत्तिरगत्याऽसंगेपितत्संश्लेषंसंपादयतीत्यर्थः । आवरणविरहस्यस्वतःसिद्धत्वेनावरणाभिभवार्थत्वमेतन्मतेनास्तीति ध्येयं ॥ द्वितीयइति ॥ अविद्योपाधिकंजीवचैतन्यंसर्वगतमविद्यावृतमितिमतइत्यर्थः ॥ आवरणेति ॥ आवरणेचाभिभूते

तमावृतंचेतिमतद्वयं । तत्राद्येवृत्तिर्जीवचैतन्यस्यविषयोपरागार्था । द्वितीयेत्वावरणाभि
भवार्था । परिच्छिन्नत्वपक्षेतुजीवचैतन्यस्यविषयप्रकाशकब्रह्मचैतन्याभेदाभिव्यक्त्यर्था ।

५२८

चैतन्यंस्वतएवविषयेणोपरज्यतेऽतआवरणाभिभवार्थैववृत्तिर्नसंश्लेषार्थेतिभावः । अंतःकरणोपाधिकंजीवचैतन्यंपरिच्छिन्नंब्रह्मचैतन्यमेवविषयप्रकाशकमितिमतेवृत्त्युपयोगमाह ॥ परिच्छिन्नत्वपक्षेत्विति ॥ अभेदेति ॥ वृत्त्याआवरणेऽभिभूतेसतिवृत्तिप्रतिबिंबितचैतन्यस्यविषयाधिष्ठानचैतन्यस्यचवस्तुगत्याऽभेदोस्तिसव्यज्यतइत्यर्थः । तथाचवृत्तिप्रतिबिंबितचैतन्येनाभिव्यक्ताभेदमधिष्ठानचैतन्यंभवतीतियावत् । अविद्योपाधिकंसर्वगतंजीवचैतन्यमनावृतंविषयाध्यासाधिष्ठानमितिमतेवृत्तिश्चिदुपरागार्थानावरणाभिभवार्थेत्युक्तं तत्रावरणाभावेनचैतन्यस्यस्वतएवविषयेणसंश्लिष्टत्वाद्वृत्तिर्व्यर्थेत्यतस्तत्सार्थक्यमुपपादयति ॥ ॥ २१५ ॥

अनावृतत्वेति ॥ जीवचैतन्यंअसंगत्वाद्विषयासंश्लिष्टमेवावतिष्ठतइतिशेषः ॥ उपरज्यतइति ॥ विषयैरितिशेषः । विषयाकारवृत्तिरगत्याऽसंगत्वंपरिहृत्यसंश्लेषापरपर्यायमुपरागंसंपादयतीत्यर्थः ॥ नत्विति ॥ वृत्तिंविनापूर्वंविषयैःस्वतोनोपरज्यतेऽसंगत्वादित्यर्थः । ननुसर्वगतस्याऽनावृतस्यविषयाध्यासाधिष्ठानस्यविषयैःसहवृत्तेःपूर्वमुपरागोनास्तिवृत्त्यैवोपरज्यतइत्येतदयुक्तमदृष्टत्वादित्यतोत्रतार्किकादिसंमतंदृष्टांतमाह ॥ यथेति ॥ सास्नेति ॥ केसरादिमत्सिंहादिव्यक्तावप्यस्तिगोत्वं परं

५२९

अनावृतत्वपक्षेह्यनावृतंसर्वगतमपिजीवचैतन्यंतत्तदाकारवृत्त्यैवोपरज्यते । नतुविषयैः ।
असंगत्वात् । यथागोत्वादिकंसर्वगतमपिसास्नादिमद्व्यक्त्यैवोपरज्यतेनतुकेसरादि
मद्व्यक्त्या यथावाप्रदीपप्रभाआकाशगंधरसादिप्रदेशव्यापिन्यपितान्नप्रकाशयति रूपि
संसर्गितयातदेवप्रकाशयति तद्वत् केवलाद्वयदाह्यस्यापिअयःपिंडसमारूढाग्निदा
ह्यत्ववच्चकेवलचैतन्याप्रकाश्यस्यापिघटादेस्तदाकारवृत्त्युपारूढचैतन्यप्रकाश्यत्वंयुक्तं ।

तुतस्यतदुपरागःसंश्लेषविशेषःसमवायरूपोनास्तिसास्नादिमद्व्यक्त्यैवतूपरज्यतइत्यर्थः ॥ आकाशेति ॥ आकाशदेशव्यापिनीतथाघटादिपदार्थस्थितगंधरसादिप्रदेशव्यापिनीत्यर्थः ॥ रूपीति ॥ रूपोपेतपदार्थेत्यर्थः । अनावृतत्वपक्षेकेवलजीवचैतन्याप्रकाश्यस्यापिघटादेस्तदाकारवृत्त्युपारूढसर्वगतचैतन्येनप्रकाश्यत्वंयुक्तमित्यत्रदृष्टांतमाह ॥ केवलेति ॥ वृत्त्युपारूढेति ॥

SGDF Foundation

430

वृत्तिसहकृतेत्यर्थः । एवंवृत्तेरुपयोगमुपपाद्यचैतन्यस्यसर्वान्प्रत्यविशिष्टत्वात्सर्वस्यसर्वंप्रतीयेतेस्यतिप्रसंगंपरिहरन्एतेषुपक्षे
षुघटप्रकाशकंचैतन्यंविवेचयन्प्रतिकर्मव्यवस्थामुपपादयति ॥ एवंचेत्यादिना ॥ ननुजीवचैतन्यस्यपरिच्छिन्नत्वपक्षेब्रह्म
चितएवविषयाध्यासाधिष्ठानतयाविषयप्रकाशकत्वेनविषयानुभवरूपत्वादिदंजीवज्ञानमितिव्यवहारःकथंब्रह्मचैतन्यज्ञानमित्येव
व्यवहारःस्यादित्यतआह ॥ विषयानुभवस्येति ॥ जीवचैतन्येनवृत्त्युपारूढज्ञातृचैतन्येनसाकंयोऽभेदस्तद्वत्त्वेनघटाधि

एवंचानावृतत्वपक्षेतत्तदाकारवृत्तिद्वाराचैतन्यस्यचतत्तदुपरागेतत्तत्प्रकाशः । आवृतत्वपक्षेपितत्तदाकारवृ
त्त्यातत्तदवच्छिन्नचैतन्यावरणाभिभवेतत्तत्प्रकाशः । परिच्छिन्नत्वपक्षेपितत्तज्जीवावच्छेदकांतःकरणीयत
त्तद्विषयाकारवृत्त्यातत्तद्विषयावच्छिन्नब्रह्मचैतन्याभिव्यक्तौतत्तत्प्रकाशइतिनातिप्रसंगः । विषयानुभवस्य
ब्रह्मचित्त्वेपिवृत्त्याजीवचैतन्याभेदेनाभिव्यक्तत्वात्जीवचित्त्वमविरुद्धमितिप्रतिकर्मव्यवस्था[1]युक्तेति तन्न

ष्ठानभूतब्रह्मचैतन्यस्याभिव्यक्तत्वाज्जीवचित्त्वंविषयानुभवस्ययुक्तमित्यर्थः ॥ एवमनूदितांप्रक्रियांदूषयति ॥ तन्नेत्या
दिना ॥ प्रतिकर्मव्यवस्थासिद्ध्यर्थं चैतन्यस्यविषयप्रकाशकत्वार्थं इंद्रियसन्निकर्षद्वारिकावृतिःकल्प्यते । तत्रादौस
न्निकर्षएवायुक्तः । तथाचतदधीनवृत्तिद्वारकंयत्विषयोपरक्तत्वंतेनचैतन्यस्यविषयप्रकाशकत्वमयुक्तं । अस्तुवाचैतन्य
स्यविषयप्रकाशकत्वं तथापिदेहांतरेववृत्त्यवस्थानोपपत्तेर्देहाद्बहिर्वृत्तेर्निर्गमनकल्पनमप्रामाणिकं । अस्तुवादेहाद्बहिर्वृत्तेर्निस्सरणं

1 घटादेर्थापकचैतन्येऽध्यासेऽपि तस्य घटादिकं कर्म प्रति नियमः प्रतिकर्मव्यवस्था ॥

SGDF
Sri Gargeshwari Digital Foundation

तथापितस्याएवाज्ञाननिवर्तकत्वेनविषयप्रकाशकत्वोपपत्तौ तत्प्रतिबिंबितचैतन्यंतदभेदेनाभिव्यक्ताधिष्ठानचैतन्यमितिचैतन्यद्वयकल्पनमप्रामाणिकमित्येवमुत्तरग्रंथप्रवृत्तिरितिनिष्कर्षः । तत्रप्रतिकर्मव्यवस्थासिद्ध्यर्थंचैतन्यस्यविषयप्रकाशकत्वसिद्ध्यर्थंच विषयसन्निकृष्टेंद्रियजन्यवृत्तिद्वारकःसंबंधःकल्पितः । तत्रादौसन्निकर्षंखंडयति ॥ स्वसन्निकृष्टेत्यादिना ॥ चैतन्यस्यविषयप्रकाशकत्वसिद्ध्यर्थंसंनिकर्षकथनमयुक्तं । तथात्वेसन्निकर्षात्पूर्वंघटादेःसत्त्वंस्यात् । अन्यथासंनिकर्षस्यैवायोगात् । नचसन्निकर्षात्पूर्वंघटादिकमस्त्येवेतिवाच्यं । तथात्वेत्वदंगीकृतकल्पितत्वायोगात् । कुतइतिचेत् । कल्पितत्वेप्रतीतिमात्रशरीरकत्वस्य प्र

स्वसन्निकृष्टेंद्रियजन्यस्वज्ञानात्पूर्वंघटादेस्सत्त्वेप्रतीतिमात्रशरीरत्वव्याप्यकल्पितत्वायोगात् । नच
कल्पितत्वविशेषःप्रातिभासिकत्वमेवतद्व्याप्यं ॥ गौरवात् । वह्निप्रत्यपर्वतीयधूमस्याप्रामाणिक

योजकत्वेन कल्पितत्वांगीकारेप्रतीतिमात्रशरीरकत्वापत्त्यासन्निकर्षजन्यज्ञानात्पूर्वंघटादेरसत्त्वेनसन्निकर्षस्यैवायोगादित्यर्थः । एवमापादयतःप्रातिभासिकत्वातिरिक्तंव्यावहारिकत्वंनास्तीतिहृदयं । ननुनकल्पितत्वंप्रतीतिमात्रशरीरत्वव्याप्यं किंतुकल्पितत्वविशेषःप्रातिभासिकत्वमेव । एवंचप्रकृतेकल्पितत्वांगीकारेनप्रतीतिमात्रशरीरत्वप्राप्तिः । तथाचसन्निकर्षात्पूर्वंघटादेःसत्त्वोपपत्त्यायुक्तःसंनिकर्षइत्याशंक्यनिराकरोति ॥ नचेति ॥ गौरवादिति ॥ कल्पितत्वंसामान्यरूपत्वेनसर्वग्राहकत्वाल्लघुभूतं प्रातिभासिकत्वंतुकल्पितत्वविशेषरूपत्वाद्गुरुभूतमित्यर्थः । ननुविपरीतमेवगौरवंकिंनस्यादित्यतोऽतिप्रसंगमाह ॥ वह्निप्रतीति ॥ वह्नि

१ कल्पितत्वसकाशाद्विशेषः प्रातिभासिकत्वं । सामान्यस्य [illegible] । धूमे धूमत्व-अपर्वतीयधूमत्वयोः [illegible] लघोर्धूमत्वस्यैवावच्छेदकत्वं प्रकृते तु न तथेत्यतः दृष्टान्तान्तरमाह ॥ अप्रामाणिकत्वादिकमिति ॥

मत्त्वंप्रतिधूमविशेषोऽपर्वतीयधूमएवास्तुव्याप्यः । महानसादौदर्शनात् विशेषरूपत्वेनलाघवात् । ततश्चापर्वतीयधूमस्यपक्षेऽ
भावेनस्वरूपासिद्ध्यातेनवह्निर्नसिद्ध्येत् तथाऽप्रामाणिकत्वंप्रतिकल्पितत्वविशेषःप्रातिभासिकत्वमेवव्याप्यमस्तु नकल्पितत्वं ।
तथाचतेनाप्रामाणिकत्वानुमानंनस्यात् । एवंच (तथाचघ) घटादीनांप्रामाणिकत्वापातः अतस्त्वयाविशेषस्यगुरुभूतत्वात्सामान्यं
धूमवत्त्वमेवकल्पितत्वमेवचवह्निमत्त्वमप्रामाणिकत्वंचप्रतिव्याप्यमितिवाच्यं । तत्प्रकृतेपितुल्यमितिनविपरीतगौरवमितिभावः ।
दोषप्रयुक्तज्ञानत्वमादिशब्दार्थः । ननुप्रतीतिमात्रशरीरत्वव्याप्यंकल्पितत्वमित्ययुक्तं । अप्रयोजकत्वात् । कल्पितत्वेपिप्रतीति

त्वादिकंचप्रतिप्रातिभासिकत्वस्यैवव्याप्यत्वापाताच्च । नचप्रतीतिमात्रशरीरत्वाभावेपिज्ञाननिवर्त्य (तिप३२)
त्वादिनाकल्पितत्वोपपत्तिः । प्रतीतिमात्रशरीरत्वाभावेनैवज्ञाननिवर्त्यत्वाद्यभावस्याप्यापादनात् ।

मात्रशरीरत्वाभावोपपत्तेः । ननुप्रतिभासमात्रशरीरत्वाभावेकल्पितत्वमेवनस्यादितिहेतूच्छित्तिरेवबाधिकेतिचेन्न । प्रतिभासमा
त्रशरीरत्वाभावेपिज्ञाननिवर्त्यत्वेन कल्पितत्वोपपत्तेरिरितितर्केण प्रयोजकत्वमेवेतिनकल्पितत्वस्यप्रतीतिमात्रशरीरत्वव्याप्यत्वसि
द्धिरित्याशंक्यनिषेधति ॥ नचेति ॥ प्रतीतिमात्रशरीरत्वाभावमंगीकृत्यकल्पितत्वस्यज्ञाननिवर्त्यत्वेनोपपत्तिर्वक्तुंनयुज्यते प्रतीति
मात्रशरीरत्वाभावेनैवज्ञाननिवर्त्यत्वाभावस्यापाद्यमानत्वादित्याह ॥ प्रतीतीति ॥ तथाचनाप्रयोजकत्वमितिभावः । ननुक ॥ २१७ ॥
ल्पितस्यापिदृश्यस्यप्रतीतिस्तावत्सर्वसिद्धा । साचेंद्रियसन्निकर्षंविनाऽऽनुपपन्नेतींद्रियसन्निकर्षार्थंस्वज्ञानात्पूर्वंदृश्यस्यसत्त्वमंगी

१ आपणस्थरूप्यशुक्तिरूप्ययोरिव अपरोक्षितत्वपरोक्षितत्वाभ्यां विरोध इति चेत्त नाह ॥व्यावहारिकत्वस्य चेति ॥ स्वप्नेऽपि परोक्षादिरूपादि (ति भाव:)

कार्यमित्यतआह ॥ प्रतीतेश्चेति ॥ स्वप्नवदिति ॥ स्वाप्नप्रतीत्यन्यथानुपपत्त्यासन्निकर्षोवा तत्पूर्वंविषयसत्त्वंवानांगीक्रियते
तद्वदितिभावः । ननुस्वप्नवदितिदृष्टांतोनयुक्तः तस्यप्रातिभासिकत्वेनतत्रसन्निकर्षापेक्षाभावात् प्रपंचस्यतुव्यावहारिकत्वात्सन्नि
कर्षार्थंविषयसत्त्वमपेक्षितमितिचेत्तत्राह ॥ व्यावहारिकत्वस्येति ॥ भ्रांतिदैर्घ्यमात्रेणेति ॥ इदानींबाधाभावमात्रेणेत्यर्थः ।
एवंसन्निकर्षंखंडयित्वावृत्त्युपारूढचैतन्येनाभेदेनाभिव्यक्ताधिष्ठानचैतन्यस्यविषयप्रकाशकत्वकल्पनप्रक्रियांखंडयति ॥ तत्तदा (५३३)
कारेति ॥ परोक्षधर्माद्याकारावृत्तिरंतरेवभवति तत्रवृत्तेरेवधर्मादिप्रकाशरूपत्वंकल्पितंनचैतन्यस्य तत्रचैतन्यप्रतिफलनाभा

प्रतीतेश्चविश्वस्यसत्यत्वेनवामिथ्यात्वेपिस्वप्नवदिंद्रियसन्निकर्षानपेक्षतयैवोपपत्तेश्च । [1] व्यावहारिकत्वस्यच
भ्रांतिदैर्घ्यमात्रेणोपपत्तेश्च । तत्तदाकारपरोक्षवृत्तेरिवापरोक्षवृत्तेरेवतत्तत्प्रकाशकत्वोपपत्तावपरोक्षवृत्त्युप
रागादिमतश्चैतन्यस्यतत्तत्प्रकाशत्वकल्पनायोगाच्च । विषयापरोक्ष्यंत्वावश्यकेनवृत्तिगतविशेषेणैवेत्युक्तं ।

वादित्युच्यतेतद्वदेवापरोक्षवृत्तावप्यस्त्वितिभावः ॥ वृत्त्युपरागादीति ॥ वृत्त्युपारूढचैतन्येनाभेदेनाभिव्यक्ताधिष्ठानचैत
न्यस्येत्यर्थः । ननुचैतन्यस्यविषयप्रकाशकत्वाभावेविषयेआपरोक्ष्यंनस्यात् अपरोक्षचित्संबंधेनैवापरोक्ष्यस्यवक्तव्यत्वादित्यत
आह ॥ विषयेति ॥ वृत्तिगतेति ॥ वृत्तिगतापरोक्षत्वविशेषेणेत्यर्थः । परोक्षवृत्तेश्चैतन्याभिव्यंजकत्वाभावेनचैतन्या
भिव्यंजकत्वार्थंसविशेषस्तवाप्यावश्यकइतिभावः । तथाचाऽपरोक्षवृत्तिविषयत्वादेवाऽपरोक्षत्वमस्त्वितिभावः । ननुपरोक्षवृ

SGDF

५६३४

त्तेरिवेतिदृष्टांतोनयुक्तः। तत्रापिपरोक्षवृत्त्युपरक्तचैतन्यस्यैवविषयप्रकाशकत्वांगीकारादित्यतआह ॥ नचेति ॥ कुतोनास्तीत्यत आह॥ अभिव्यक्तेति ॥ एतच्चावरणदशाव्यवच्छेदाय। ननुचैतन्यस्यविषयप्रकाशकत्वेनापरोक्षानुभवत्वमनंगीकृत्यवृत्तेरेवापरोक्षत्वमस्त्वित्युक्तमयुक्तं। तथात्वेऽपरोक्षानुभवत्वप्रयुक्तंप्रकाशकत्वमपिवृत्तेरंगीकार्यंस्यात्। नचास्त्विततिवाच्यं (ओमितिचेन्नवृ) वृत्तेरंतःकरणोपादानकतयाउपादानेंतःकरणेप्रकाशकत्वाभावेनतत्कार्यभूतायामपिवृत्तौतदयोगादितिचेन्न । उपादानगतस्यैवोपादेयेप्राप्तिरितिनियमाभावात् । अंतःकरणस्येच्छाकारेणपरिणतत्वादुपादानांतःकरणानिष्ठमपीच्छात्वमुपादेयेच्छावृत्तावंगी

नचपरोक्षवृत्तिविषयस्यापिचैतन्योपरागाद्यस्ति । अभिव्यक्तापरोक्षैकरसचिदुपरागेणविषयस्याप्यापरोक्ष्यापातात्। वृत्तेरेवापरोक्षानुभवत्वेतत्प्रयुक्तंस्वप्रकाशत्वमपीच्छात्वज्ञानत्वादिकमिवांतःकरणानिष्ठमपितदुपादेयवृत्तिनिष्ठमस्तु ।

कृतं । यथावाअंतःकरणानिष्ठमपिज्ञानत्वंतदुपादेयवृत्तावंगीकृतं । एवमंतःकरणानिष्ठमपिप्रकाशकत्वंतदुपादेयवृत्तावस्तु अन्यथाउपादानांतःकरणानिष्ठत्वादपरोक्षवृत्तौप्रकाशकत्वंनास्तीत्यंगीकारेअंतःकरणपरिणामपरोक्षवृत्तौचैतन्यप्रतिफलनाभावेनतस्या एवविषयानुभवत्वप्रयुक्तंप्रकाशत्वमंगीकृतं तदपिनस्यात् त्वन्मतेउपादानेंतःकरणेतस्याभावादित्याह॥ वृत्तेरेवेत्यादिना ॥ अंतःकरणानिष्ठंतत् प्रकाशकत्वं। अत्राद्वैतसिद्धिकारेणोक्तंसावयवंतैजसमंतःकरणमितिपरेणांगीकृतत्वात्प्रकाशकत्वमप्यंतःकरणेस्तीत्ये

SGDF
Sri Gargeshwari Digital Foundation

तदयुक्तमिति तन्न । नहितैजसत्वंप्रकाशकत्वेतंत्रं तथात्वे "(तेजोवैघृतं)" "(तेजोवैहिरण्य)"मिति(त्यादिश्रु) श्रुते घृतादीनामपिप्रकाशकत्वापातात्। तत्रपार्थिवादिभागकल्पनेऽत्रापितथास्त्वितितुल्यमिति। ननुवृत्तिरूपज्ञानस्यप्रकाशत्वमयुक्तं। घटंजानामीतिवृत्तिरूपज्ञानस्यसकर्मकत्वप्रतीतेः घटःप्रकाशतइतिप्रकाशस्याऽकर्मकत्वप्रतीतेः अतोऽकर्मकप्रकाशःचैतन्य (रूपमे)ज्ञानमेवेत्यंगीकार्यमित्याशंक्यनिराकरोति ॥ नचेति ॥ क्रियैक्येपितत्प्रतिपादकशब्दस्वभावादेवकर्मसंबंधप्रतीत्यप्रतीती यथाकरोतियततइत्यत्रकरणस्यप्रयत्नरूपत्वेनतेनैक्येपिकरोतेःसकर्मकत्वं यततेस्त्वकर्मकत्वंदृष्टं यथावागच्छतिचलतीत्यत्र

[1]अन्यथाअपरोक्षानुभवस्यापितन्नस्यात्। नचघटंजानामीतिसकर्मकज्ञानरूपवृत्त्यन्याघटःप्रकाशतइत्यकर्मकप्रकाशरूपाचिदनुभवसिद्धेतिवाच्यं। क्रियैक्येपिकरोतिप्रयततेगच्छतिचलतीत्यादाविवधात्वोःकर्मोपरागवाचित्वतदभावस्वभावत्वोपपत्तेः। अन्यथात्वत्पक्षेपिपरिणतेरकर्मकत्वात्परिणतिविशेषस्य

गमनस्यचलनत्वेपिगच्छतेःसकर्मकत्वंचलतेस्त्वकर्मकत्वंदृष्टमेवमिहापिवृत्तेरेवप्रकाशत्वेनतयोरैक्येपिज्ञानरूपतयावृत्तेःसकर्मकत्वंप्रकाशस्यत्वकर्मकत्वमुपपद्यतएव । सकर्मकत्वादेर्धातुस्वाभाव्यादित्याह ॥ क्रियैक्येपीति ॥ धात्वोः जानातिकाशत्योः । उपरागः संबंधः ॥ अन्यथेति ॥ शब्दस्वभावानादरइत्यर्थः ॥ परिणतेरिति ॥ घटःपरिणमतइतिधात्वर्थभूतायाःपरिणामरूपक्रियायाइत्यर्थः ॥ अकर्मकत्वादिति ॥ अकर्मकधातुप्रयोगविषयत्वादित्यर्थः । परिणतिविशेषस्य अंतःकरणपरिणतिरू

1 अपिशब्दो भिन्नक्रमः तदपीति ज्ञानंभवीत्यर्थः ॥

SGDF
Sri Gargeshwari Digital Foundation

पक्रियायाःज्ञानविशेषस्य। सकर्मकज्ञानत्वं सकर्मकजानातिप्रयोगविषयत्वं ॥ अतीतमिति ॥ वृत्तिव्यतिरिक्तस्यचैतन्यरूप ज्ञानस्यैवप्रकाशत्वेऽतीतेचैतन्यरूपज्ञानाभावेनप्रकाशाभावादतीतंप्रकाशतइतिधीर्नस्यादित्यर्थः । घटादौवृत्त्यतिरिक्तचिद्रूप ज्ञानांगीकारेदृष्टविरुद्धंबहुकल्पनीयंस्यादित्याह ॥ एवंचेति ॥ इष्यमाणे इच्छाविषये यथास्वविषये । इच्छास्वतएवनान्य द्वारेणेत्यर्थः। अनुभाव्ये अनुभवविषयेघटादौ स्वतःप्रवणस्य स्वतएवप्रवणतास्वभावस्येत्यर्थः। अन्यद्वारा वृत्तिद्वारा। तदु

वृत्तेस्सकर्मकज्ञानत्वंनस्यात् । अतीतंप्रकाशतइतिधीश्चनस्यात् । एवंचेष्यमाणे
इच्छादेरिवानुभाव्येस्वतःप्रवणस्यानुभावस्यान्यद्वारातदुपरक्तत्वं १तत्प्रत्यावृतत्वं
घटाज्ञानविरोधिन्यावृत्तेर्नघटानुभवत्वं तदविरोधिचैतन्यस्यतुतदित्यादिकंदृष्टवि
रुद्धंनकल्प्यं । अन्यथाद्वेषविरोधिन्यावृत्तेर्नेच्छात्वं किंत्वन्यस्यैवेत्यादिस्यात् ।

4 36

परक्तत्वं अनुभाव्येनसंबद्धत्वं । तत्प्रति अनुभाव्यंप्रति अज्ञानेनावृतत्वंवृत्त्यभावप्रयुक्तघटादिविषयकत्वाभावइतियावत् ॥ घटाज्ञानेति ॥ घटज्ञानस्यैवघटाज्ञानविरोधित्वदर्शनादितिभावः ॥ तदिति ॥ घटाज्ञानेत्यर्थः । तदज्ञानस्फोरकत्वेनतद विरोधित्वं। आदिपदेनसुखाज्ञानाविरोधिनश्चैतन्यस्यसुखज्ञानंत्वग्राह्यं ॥ दृष्टविरुद्धमिति ॥ इच्छादिषुयादृशंसाक्षादेवेष्यमा णोपरक्तत्वं इष्यमाणंप्रत्यनावृत्तत्वं इष्यमाणेद्वेषविरोधित्वंदृष्टंतदपेक्षयाविरुद्धमित्यर्थः ॥ अन्यथेति ॥ अज्ञानविरोधिन्या

— ?

॥ २१९ ॥

विजयीन्द्रतीर्थीये एतद्ग्रन्थे १। तरंगिण्यान्त्वस्त्वेव।

वृत्तेर्ज्ञानत्वानंगीकारइत्यर्थः। वृत्तेः अंतःकरणवृत्तेः। अन्यस्यैव इच्छाभिव्यक्तचैतन्यस्यैव। ननु "(तमेवभांत)" मिति (त्यादिश्रु) श्रुत्याचैतन्यरूपब्रह्मप्रकाशमनुसृत्यघटादिसर्वप्रपंचस्यप्रकाशउच्यतेऽतश्चिद्रूपंवृत्त्यन्यज्ञानमंगीकार्यमित्यतआह ॥ तमेवेति ॥ ननुसर्वशब्देननियामकंविनासूर्यादिमात्रग्रहणमयुक्तं। तस्यसमस्तघटादिप्रपंचोपस्थापकत्वादित्यतआह ॥ सर्व शब्दस्येति ॥ सर्वेभ्यःकामेभ्यइति ॥ "(सर्वेभ्यःकामेभ्योदर्शपूर्णमासाभ्यांयजेते)" तिश्रूयते। चतुर्थीद्वितीयार्थे स र्वान्कामानुद्दिश्येत्यर्थः। अत्रसर्वशब्दः पशुपुत्रधनादिसमस्तवाचीनवेतिसंशयेनियामकंविनासर्वशब्दसंकोचायोगेनतस्यसर्वोप

4 35

" तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभाती "तिश्रुतिस्तुसूर्यादिप्रकाशस्ये
शाधीनत्वमेवाह। नत्वस्मदादिगतघटादिज्ञानस्यब्रह्मत्वं । सर्वशब्दस्य"सर्वेभ्यःका
मेभ्योदर्शपूर्णमासा"वित्यादाविव "नतत्रसूर्योभातिनचंद्रतारक"मितिप्रकृतसूर्यादि
परत्वात् । त्वन्मतेपिनित्यातींद्रियस्यचित्प्रकाश्यत्वाभावेनसर्वशब्दसंकोचाच्च ।

स्थापकत्वात्पशुपुत्रादिसमस्तकामनावान्दर्शपूर्णमासाभ्यांयजेतेतिपूर्वपक्षेप्राप्तेसर्वशब्दस्यसंकोचएव । नचनियामकाभावः। "(दर्शपूर्णमासाभ्यांस्वर्गकामोयजेते)" तिपूर्ववाक्येस्वर्गकामइत्युक्तत्वात्प्रकृतस्वर्गमात्रपरत्वमेवेतिसिद्धांतितंपूर्वतंत्रेतद्वदि त्यर्थः। सर्वशब्दस्तवा(प्यावश्यकइ)पिसंकुचितार्थकइत्याह ॥ त्वन्मतेपीति ॥ अतीतादेर्वर्तमानतादशायांचित्प्रकाश्यत्वे पिनित्यातींद्रियेकदापिचित्प्रकाश्यत्वंनास्तीत्याशयेननित्यातींद्रियस्येत्युक्तं ॥ संकोचाच्चेति ॥ संकोचस्यावश्यकत्वाच्चेत्यर्थः।

SGDF

सर्वशब्दस्यप्रकृतपरत्वज्ञापकमस्तीत्याह ॥ प्रकृतपरेति ॥ स्मृतेरेवेति ॥ तत्रसूर्यादितेजसांमामकमितिम(भगव)दधीनत्व रूपतत्संबंधित्वस्यैवोक्तत्वादित्यर्थः ॥शतृप्रत्ययस्येति॥ सन्संतौसंतइतिवत्भान्भांतौभांतइतिभाच्छब्दस्यभांतमितिद्वितीया। शतुःकर्त्रर्थकलडादेशत्वाज्ज्ञानकर्त्रुपस्थापकत्वेनभानरूपेब्रह्मणिभानकर्तृत्वस्यासंभवाच्छतृप्रत्ययस्यायोगः । तथातस्यभासेति षष्ठ्याब्रह्मणोभासासंबंधोबोध्यते भानरूपेचब्रह्मणितत्संबंधासंभवात्षष्ठ्याअयोगः । तथा " (तमेवभांतमनुभाती) " त्यत्रप्र

प्रकृतपरेदंशब्दसमभिव्याहाराच्च । एतद्वाक्यनिर्णायके"अपिस्मर्यते"इतिसूत्रेत्वद्भाष्येपि"यदादित्यग तंतेज"इत्यादिस्मृतेरेवोदाहृतत्वाच्च । त्वन्मतेब्रह्मणोभानमात्रत्वेनभांतमितिशतृप्रत्ययस्यतस्यभासे तिषष्ठ्याःप्रपंचेब्रह्मभानान्यभानाभावेनाऽनुशब्दस्यचायोगाच्च। गच्छंतमनुगच्छतीत्यादौगमनादिभे देसत्येवानुशब्दोदृष्टः । अस्तुवाचैतन्यस्याविषयप्रकाशत्वं तथापिअंतःकरणस्यनदेहान्निर्गतिःकल्प्या

पंचकर्तृकभानरूपक्रियायाभांतमित्युक्तब्रह्मभानरूपक्रियातोभेदावगमादनुशब्दस्याप्यनुपपत्तिरित्यर्थः । क्रियाभेदेसत्येवानुश ब्दप्रयोगइत्यत्रोदाहरणमाह ॥ गच्छंतमिति ॥ एतत्पर्यंतंसन्निकर्षस्यैवायोगेनसन्निकृष्टेंद्रियजन्यवृत्तेरसंभवाच्चैतन्यस्यविषय प्रकाशकत्वंनास्तीत्युक्तं। इदानींतदंगीकृत्यसावयवंतैजसमंतःकरणंचक्षुरादिद्वाराबहिर्निस्सरतीतिवृत्तेर्बहिर्निस्सरणंयदुक्तंतत्प्रक्रि यांदूषयति ॥ अस्तुवेत्यादिना ॥ परोक्षस्थलेजायमानवृत्तितोवैलक्षण्यायांतःकरणस्यदेहान्निर्गतिरपरोक्षस्थलेकल्प्यतइतिचेत्त

SGDF
Sri Gargeshwari Digital Foundation

त्राह ॥ परोक्षधीति ॥ ननुविषयस्यवृत्तिसंबंधंविनाचिदुपरागएवनसंभवतिचिदुपरागेवृत्तिसंबंधस्यतंत्रत्वात् सास्नाद्यवच्छि
न्नेगोत्वाद्युपरागवत्वृत्त्यवच्छिन्नविषयएवचिदुपरागस्यसत्त्वात्तस्यवृत्तेर्बहिर्निर्गतिंविनाऽयोगात्साकल्पनीयेत्यतआह ॥ चिदुपरा
गादाविति ॥ इंद्रियसन्निकर्षद्वारावृत्तेर्बहिर्निस्सरणाभावेपिविषयाकारेणवृत्तेरंतरेवपरिणाममात्रेणचैतन्यविषययोरुपरागासंभवे
नचिदुपरागेतदाकारत्वस्यैवप्रयोजकत्वात् (तया)वृत्त्यवच्छिन्नएवतदुपरागइतिकल्पनेमानाभावादित्यर्थः । ननुप्रभायामावरणनि ५३५
वर्तकत्वेप्रकाशकत्वेचविषयसंश्लेषस्यैवप्रयोजकतयादृष्टत्वेनविषयसंबंधंविनावृत्तेरावरणनिवर्तकत्वासंभवेनतदर्थंबहिर्निर्गतिःक

परो(क्षधीवै)क्षाद्धिवैलक्षण्यायविषयस्याभिव्यक्तापरोक्षचिदुपरागएववक्तव्यः । चिदुपरागादौचापरोक्ष
वृत्तेस्तदाकारत्वमेवतंत्रं ।[1]नतुप्रभायाइववृत्तेस्तदावरणानिवर्तकत्वादौतत्संश्लेषस्तंत्रं । नेत्रान्निर्गच्छद्ध्रुवा
द्याकारवृत्त्यैवस्वसंश्लिष्टनेत्रस्थकज्जलादेर्देहध्रुवमध्यवर्तिनःपरमाण्वाकाशादेर्ब्रह्मणश्चापरोक्ष्यापातात् । ?

ल्प्येतिचेत्तत्राह ॥ नत्विति ॥ विषयप्रकाशकत्वमादिशब्दर्थः । वृत्तेरावरणनिवर्तकत्वादौतदाकारत्वमेवतंत्रं नतुतत्संश्लेषः ।
ज्ञानस्यप्रभापेक्षयाआंतरत्वेनवैषम्यादितिभावः । वृत्तेर्देहाद्बहिर्निर्गत्याविषयसंश्लेषावरणनिवर्तकत्वेबाधकमाह ॥ नेत्रादिति ॥
ध्रुवमंडलज्ञानार्थमेवनेत्रान्निर्गच्छंतीध्रुवमंडलाद्याकाराअंतःकरणवृत्तिस्तयेत्यर्थः ॥ स्वेति ॥ वृत्तीत्यर्थः ॥ आपरोक्ष्यापाता
दिति ॥ संश्लेषावरणनिवृत्तिद्वाराआपरोक्ष्यापातादित्यर्थः । ननुसिद्धांतेपिनयनरश्मीनांबहिर्निर्गमनांगीकारादतिप्रसंगस्तुल्य

1 तुल्यार्थे। चशब्देन तदाकारत्वमुक्तहेतुं समुच्चिनोति ।

SGDF
Sri Gargeshwari Digital Foundation

न्यायामृ० ॥ २२१ ॥

श्रीनिवा० प्रतिकर्म. १ । २४

५५०

इतिचेन्न । कज्जलादावतिसामीप्यादिदोषात्परमाण्वादौमहत्त्वविशेषादिकारणविरहादित्यादिद्रष्टव्यमित्याहुः । ननुक्वचिद्विषयसंश्लेषस्तदावरणनिवर्तकत्वेतंत्रं क्वचिद्वृत्तेस्तदाकारत्वमपि तथाचनातिप्रसंगः । नेत्रस्थकज्जलपरमाण्वादौवृत्तेस्तदाकारत्वाभावात् किंतुध्रुवमंडलाद्याकारत्वमेवेत्यतआह ॥ द्वयोरिति ॥ संश्लेषतदाकारत्वयोः । ननुतर्हिमास्तुविषयसंश्लेषार्थंवृत्तेर्बहिर्गमनं किंतुतदाकारत्वार्थमेव । वृत्तेर्बहिर्निर्गमनेनविषयसंश्लेषेसतितदाकारतायाजायमानत्वादित्यतआह ॥ तदाकारत्वस्यचेति ॥ वृत्तेर्बहिर्गमनद्वाराविषयसंश्लेषाभावादित्यर्थः । तर्हिवृत्तेःकथंतदाकारत्वमित्यतउक्तं ॥ परोक्षेति ॥ तत्सन्निकृष्टेति ॥

द्वयोस्तंत्रत्वेचगौरवात् । तदाकारत्वस्यचतत्संश्लेषंविनापिपरोक्षवृत्ताविव तत्सन्निकृष्टकरणजन्यत्वेनैवोपपत्तेः । [1] नचखेतरहेतुसाकल्येसत्यपिघटचक्षुस्सन्निकर्षाभावेनेवघटमनस्सन्निकर्षाभावेनघटानुभवाभावोदृष्टः ।

परोक्षविषयसन्निकृष्टमनोरूपकरणेत्यर्थः । मनसस्तत्सन्निकर्षस्तुज्ञानादिरूपोऽलौकिकःकश्चिदंगीकृतोस्ति तद्वदपरोक्षवृत्त्युपपत्त्याबहिर्निस्सरणमयुक्तमित्यर्थः । ननुवृत्तेर्बहिर्निस्सरणमयुक्तमित्यसत् । तथाहि । घटचक्षुस्सन्निकर्षवत्साक्षादर्थेमनस्सन्निकर्षस्यापिज्ञानहेतुत्वान्मनसोबहिर्निर्गत्यभावेतदयोगाद्घटानुभवोनस्यादित्याशंक्यनिषेधति ॥ नचेति ॥ दृष्टइति ॥ तथा ॥ २२१ ॥
चयद्व्यतिरेकेणयद्व्यतिरेकइतिकारणत्वग्राहकोव्यतिरेकांशोनास्तियेनतस्यकारणत्वंप्रतीमइतिभावः । यथोक्तंपदार्थविद्भिः "(आ

[1] मनसो बहिर्निर्गमनं व्यभिचारि नेत्याह ॥ न चेति ०

५५१

त्मामनसासंयुज्यते मनइंद्रियेण इंद्रियमर्थेने)"ति । तथाचार्थमनस्संयोगस्यज्ञानहेतुतयातार्किकाद्यनंगीकृतत्वान्नतदर्थंबहिर्निर्गतिःकल्प्येत्यर्थः ।किंचबहिर्निर्गत्यविषयमाश्लिष्यंत्याएववृत्तेर्विषयावरणनिवर्तकत्वमितिनियमानंगीकारेस्पार्शनज्ञानमप्यनुकूलितंस्यात् । तथाहि । चाक्षुषज्ञानेमनसोबहिर्निर्गमनेचक्षुरादिरूपनियतद्वारमिवस्पार्शनज्ञानेतन्नास्ति कुतइतिचेत् "त्वगिंद्रियंसर्वशरीरव्यापी" त्यभियुक्तवचनेनत्वगिंद्रियस्यसर्वशरीरव्यापित्वावगमेनांतःकरणस्यबहिर्निर्गमनेनियतद्वाराभावात् द्वारविशेषोक्तौचविनिगमनाविरहप्रसंगात् अतस्तत्रवृत्तिरंतरेवभवतीतिवाच्यं । एवमेवान्यत्रापिभवत्वितिचक्षुरादिद्वाराबहिर्निर्गमनक

एवंचस्पार्शनज्ञानमप्यनुकूलितंस्यात् । चक्षुरादेरिवस्पर्शनस्यनियतगोलकद्वाराभावेनांतःकरणनिर्गत्ययोगात् । अन्यथेच्छाद्वेषादिरूपवृत्तयोपिदेहान्निर्गत्यविषयान्गच्छेयुः । अस्तुवादेहान्निर्गति स्तथापिविषयप्रकाशकंचैतन्यंकिं "घटैकाकारधीस्थाचिद्घटमेवावभासयेत् । घटस्यज्ञातताब्रह्मचैतन्येनावभासत"

ल्पनमयुक्तमित्याह ॥ एवंचेत्यादिना ॥ अन्यथेति ॥ नियतगोलकाभावेपिमनसोबहिर्निर्गमनांगीकारइत्यर्थः । वृत्तयः मनोवृत्तयः । गच्छेयुः संबध्येरन् । घटादिप्रकाशकंचैतन्यमेवेतिप्रक्रियांदूषयति ॥ अस्तुवेत्यादिना ॥ किंवृत्तिप्रतिबिंबितंचैतन्यमित्यर्थः । उपदेशसहस्रीतिमा(यावादिग्रं)यिग्रंथविशेषस्यसंज्ञा । भारतीतीर्थः कश्चिन्मायिभिक्षुः । उपदेशसहस्र्यनुसारिणीयाभारतीतीर्थादिरीतिस्तयेत्यर्थः । उपदेशसहस्रीवाक्यंपठति ॥घटैकाकारेति ॥ घटैकाकारतया परिणतायाधीर्वृत्तिस्तत्स्थाचि

SGDF

देवतत्प्रतिबिंबितचैतन्यमेव घटमवभासयेदित्यर्थः । घटस्यज्ञातता व्यवसायविषयता ब्रह्मचैतन्येन साक्षिरूपानुव्यवसायेन
॥परागर्थेति॥ परांचोयेऽर्थास्तद्रूपाणियानिप्रमेयानि तेषुफलभूतायासंवित् घटादिभासकचैतन्यंसएवाऽधिकारिभिर्वेदांतोक्ति
रूपप्रमाणतोमेयोर्थइतिश्लोकार्थः ॥ अभिव्यक्तमिति ॥ वृत्तिप्रतिबिंबितचैतन्याभेदेनाभिव्यक्तंघटाधिष्ठानचैतन्यमित्यर्थः ॥
आध्यासिकेति ॥ वृत्तिप्रतिबिंबितचैतन्यरूपज्ञानस्यविशिष्टस्यत्वन्मतेमिथ्यात्वेनतत्रघटादीनामध्यासाभावेनज्ञानेआरो
इत्युपदेशसहस्र्यनुसारिभारतीतीर्थादिरीत्यावृत्तिप्रतिबिंबितचैतन्यंकिंवा"परागर्थप्रमेयेषुया
फलत्वेनसंमता ॥ संवित्सैवेहमेयोर्थोवेदांतोक्तिप्रमाणत" इतिसुरेश्वररीत्यावृत्तिप्रतिबिंबि
तचैतन्याभिव्यक्तंविषयविवर्ताधिष्ठानंचैतन्यं।नाद्यः। आध्यासिकसंबंधस्यातंत्रत्वापातात् ।
नांत्यः । आवश्यकेनविषयसंश्लिष्टवृत्तिप्रतिबिंबितचैतन्येनैवतदज्ञाननिवृत्तिवत्तत्प्रकाश
स्याप्युपपत्तौतदधिष्ठानचैतन्याभिव्यक्तयादिकल्पनायोगादित्युक्तत्वात् । किंचवृत्तेस्तदा
कारत्वंनतावत्तद्विषयत्वं।त्वयैवनिरासात् । नापितस्मिन्चैतन्योपरागयोग्यतापादकत्वंवा
पितत्वरूपस्याध्यासिकसंबंधस्यप्रतिकर्मव्यवस्थासिद्धावतंत्रत्वापातादित्यर्थः । एवमेवोत्तरत्राप्यर्थोद्रष्टव्यः॥ आवश्यकेनेति ॥
अधिष्ठानचैतन्यस्यविषयप्रकाशकत्वपक्षेपिविषयाधिष्ठानचैतन्यावरकाज्ञाननिवृत्त्यर्थंवृत्तिप्रतिबिंबितत्वस्याऽऽवश्यकत्वादित्य
र्थः । सावयवंतैजसमंतःकरणंविषयंव्याप्यतदाकारंभवतीत्युक्तप्रक्रियांदूषयति ॥ किंचेति ॥ तदाकारत्वं विषयाकारत्वं ।

५५७

SGDF Sri Gargeshwari Digital Foundation

तदिति ॥ विषयत्वनिरासादित्यर्थः । तस्मिन् विषये । पूर्वंचैतन्यंविषयासंबद्धमेवावतिष्ठते वृत्त्यातूपरज्यतइतिवृत्तेश्चिदुपरागार्थत्वांगीकारादित्यर्थः ॥ तदज्ञानेति ॥ विषयावरकाज्ञानेत्यर्थः ॥ तदाकारत्वप्रयोज्यत्वेनेति ॥ अयमर्थः । घटवृत्तेर्घटएवचैतन्योपरागार्पकत्वंकुतः । पटेपितदर्पकत्वंकिंनस्यात् तथाघटाज्ञानाभिभावकत्वमेवेतिकुतः । पटाज्ञानाभिभावकत्वमपि किंनस्यादितिशंकायां वृत्ते(र्घटाकारत्वेनतस्याघटाकारायावृ तेर्घ)स्तदाकारत्वेन घटएवचैतन्योपरागार्पकत्वंतदज्ञानाभिभावकत्वं चेत्येवंतयोश्चैतन्योपरागार्पकत्वतदज्ञानाभिभावकत्वयोस्तदाकारत्वप्रयोज्यत्वेन तयोस्तत्त्वस्यतदाकारत्वरूपत्वस्यायोगादित्य

तदज्ञानाभिभावकत्वंवा तयोस्तदाकारत्वप्रयोज्यत्वेनतत्त्वायोगात् । नापिघटादिवत् पृथुबुध्नोदराद्याकारत्वं साकारवादापातात् । संस्थानहीनगुणकर्मजात्यभावादिवृत्तेस्तदाकारत्वायोगाच्च । घटपटौपटतद्रूपेघटतदभावावित्यादिसमूहालंबनवृत्तेस्सर्वविषयक

र्थः ॥ नापीति ॥ वृत्तेस्तदाकारत्वमितिवर्तते । आकारत्वं आकारवत्त्वं ॥ साकारेति ॥ ज्ञानविषयाकारांतरांगीकारइत्यर्थः । तथाचबौद्धसाम्यापत्तिरितिभावः । अर्थनिष्ठाकारवत्त्वमेववृत्तेस्तदाकारत्वंचेद्दूषणांतरमाह ॥ संस्थानेति ॥ आकारेत्यर्थः । आदिपदेनसादृश्यं । संस्थानहीनागुणकर्मजात्यभावादयस्तद्विषयिण्यावृत्तेरित्यर्थः ॥ समूहेति ॥ समूहालंबनरूपायाएकस्या एववृत्तेरित्यर्थः ॥ विरुद्धेति ॥ घटपटादेःपृथुबुध्नोदराकारादिनानाकारतया तद्विषयिण्यास्समूहालंबनवृत्तेःविरुद्धोभयाका

न्या. श्री. ३८ रतापातः । तथाघटस्यस्वाकारत्वात्रूपाभावस्यनिराकारत्वात्तद्विषयिण्याःसमूहालंबनवृत्तेःसाकारत्वनिराकारत्वोभयापा

444

तइतिद्रष्टव्यं ॥ योगिनिष्ठेति ॥ योगीश्वरनिष्ठांतःकरणवृत्तेरित्यर्थः । निराकारेतिहेतुगर्भं । तथाचचरमसाक्षात्कारस्य ब्रह्मनिष्ठाकारत्वेनयत्तदाकारत्वंतन्नस्यादित्यर्थः ॥ पक्षत्रयमिति ॥ अविद्योपाधिकंसर्वगतंजीवचैतन्यंअविद्यानावृतंविषयप्रकाशकं वृत्तिस्तुजीवचैतन्यस्यविषयोपरागार्थेत्येकःपक्षः । उक्तरूपंजीवचैतन्यंअविद्यावृतंविषयप्रकाशकं वृत्ति (स्त्वावरणाभि) स्त्वविद्याभिभवार्थेतिद्वितीयःपक्षः । अंतःकरणोपाधिकमसर्वगतमेवजीवचैतन्यं ब्रह्मचैतन्यमेवविषयप्रकाशकं वृत्तिस्तुविषयप्रकाशकब्रह्मचैतन्येनप्रमातृजीवचैतन्यस्याभेदाभिव्यक्त्यर्थेतितृतीयःपक्षइतिपक्षत्रयमयुक्तं । तत्र

योगिनिष्ठवृत्तेश्चयुगपद्विरुद्धनानाकारत्वायोगाच्च। चरमसाक्षात्कारस्यनिराकारब्रह्माकारत्वायोगाच्च तस्मात्पक्षत्रयमप्ययुक्तं । किंचनतावत्विषयदृग्जीवचैतन्यमितिपक्षोयुक्तः । तथाहि । तत्रविषयाध्यासोनतावद्विशिष्टेब्रह्मणिचिन्मात्रेवा । दृग्दृश्ययोराध्यासिकसंबंधासिद्धेः ।

हेतुः तस्मादिति । उक्तरीत्याचैतन्यस्यघटप्रकाशकत्वायोगादित्यर्थः । सामान्यतश्चैतन्यस्यघटप्रकाशकत्वंनास्तीत्युक्तंतद्विशेषतः खंडयति ॥ किंचेति ॥ विषयदृग्विषयप्रकाशकं ॥ तत्रेति ॥ विषयदृक्जीवचैतन्यमितिपक्षइत्यर्थः । विशिष्टे घटाधिष्ठानत्वेनघटविशिष्टे ॥ दृगिति ॥ त्वयादृशिविषयाध्यासोवाच्यः । विशिष्टेब्रह्मणिचिन्मात्रेवाविषयाध्यासेविशिष्टस्यचिन्मात्रस्य चब्रह्मणोविषयदृक्त्वेनाभिमतजीवचैतन्याद्भिन्नत्वेनदृगध्यस्तत्वंनप्राप्तमित्यर्थः । ननुविषयाध्यासोविषयदृशिजीवचैतन्यएवेत्या

445

ध्यासिकसंबंधइत्याशंक्यनिषेधति ॥ नापीति ॥ कल्पितत्वादिति ॥ घटाधिष्ठानत्वेनघटविशिष्टतयाकल्पितत्वेनाध्यस्तानधिकसत्ताकत्वान्नाध्यासाधिष्ठानत्वमित्यर्थः । अतएवेत्युक्तंविशदयति सविशेषस्येति । विषयाध्यासाधिष्ठानतयाविषयदृक्त्वेनाऽभिमतस्यसविशेषस्यब्रह्मणएवकल्पिततयाध्यस्तानधिकसत्ताकत्वादितिभावः ॥ जगदांध्येति ॥ घटाधिष्ठानंशुद्धचैतन्यमेवविषयप्रकाशकमितिवक्तव्यं । तस्यचशुद्धस्यासंसारमज्ञानावृतत्वेनकदापिप्रकाशाभावेनघटादिपदार्थज्ञानमात्राभावापत्त्यासर्वप्रवृत्तिविलयापत्त्याजगदांध्यापातादित्यर्थः । जगदांध्यविरहमाशंकते अनवच्छिन्नस्येति । अनवच्छिन्नस्यशुद्धस्यासंसारमज्ञानावृतत्वेपि

नापिजीवे । तस्यावच्छिन्नस्यस्वयंकल्पितत्वात् । अतएवविषयदृग्ब्रह्मचैतन्यमितिपक्षोनयुक्तः । सविशेषस्यब्रह्मणोपिकल्पितत्वात् । शुद्धस्यचासंसारमावृतत्वेनजगदांध्यापातात् । अनवच्छिन्नस्यावृतत्वेपिघटाद्यवच्छिन्नंवृत्त्याप्रकाश्यतइतिचेन्न । अवच्छिन्नस्य कल्पितत्वेनात्माश्रयापातेनचघटाद्यनधिष्ठानत्वेनाध्यासिकसंबंधस्यातंत्रत्वापातात् ।

मूलाविद्यानिवृत्त्यभावेसर्वतआवरणाभिभवाभावेपिघटाद्यवच्छेदेनावरणाभिभवसंभवादांध्यविरहउपपद्यतइत्यर्थः ॥ अवच्छिन्नस्येति ॥ वृत्त्याभिभूतावरणस्यैवघटाद्यवच्छिन्नस्यघटादिदृक्त्वमित्यायातं । तस्यचनतदधिष्ठानत्वं । तत्रहेतुः कल्पितत्वेनेति । घटाद्यवच्छिन्नस्यकल्पितत्वेनाध्यस्तानधिकसत्ताकत्वादित्यर्थः ॥ आत्माश्रयेति ॥ घटावच्छिन्नस्यघटाधिष्ठानत्वेघटस्यघटाधिष्ठानकोटौप्रवेशेनात्माश्रयापातइत्यर्थः ॥ आध्यासिकेति ॥ दृश्यस्यनसद्रूपायांदृश्यध्यस्तत्वसिद्धिरित्यर्थः । शुद्धमेवब्रह्म

SGDF
Foundation

घटावच्छिन्नंवृत्त्याप्रकाश्यतइतिपक्षेदूषणांतरमाह ॥ विशिष्टेति ॥ घटविशिष्टचैतन्यज्ञाने । ननुघटस्यापिस्फुरणान्नविशेष्यं प्रकाशतइतिमंदाशंकापरिहारायोक्तं अधिकेति । दंडीतिज्ञानेदेवदत्तस्यापिप्रकाशवदितिभावः ॥ तद्वैयर्थ्याच्चेति ॥ चरमवृत्तिवैयर्थ्याच्चेत्यर्थः । ननुनचरमवृत्तिवैय्यर्थ्यं घटावच्छिन्नचैतन्यज्ञानेप्रकाशितोयोविशेषणभूतोभावरूपोऽभावरूपोवाप्रकारोविशेषणरूपउपलक्षणरूपोवाप्रकारस्तत्प्रकाशार्थत्वेनसार्थक्यादित्यतआह ॥ नहीति ॥ यदिभावाभावादिरूपोधर्मःप्रकारत्वेनप्रतीयते तर्हिवेदांतानांनिर्विशेषार्थनिष्ठत्वरूपाखंडार्थत्वहानिःस्यादित्यभिप्रेत्योक्तंअखंडार्थपरेति ॥ त्वन्मतइति ॥ सुषुप्तावंतः

विशिष्टज्ञानेधिकप्रकाशेपिचरमवृत्तिविषयस्यविशेष्यस्यप्रकाशेनतद्वैयर्थ्याच्च । नह्यखंडार्थपरवेदांतजन्यायांतस्यांभावोभावोवाविशेषणमुपलक्षणंवाप्रकारःप्रकाशते । अंतःकरणावच्छिन्नस्यजीवत्वेत्वन्मतेतस्यसुषुप्त्यादावभावेनकृतहान्याद्यापाताच्च । किंचोपरागार्थत्वपक्षेपिचितःस्वतोवृत्तिमात्रोपरक्तत्वं नतावद्दर्पणेमुखस्येवप्रतिबिंबितत्वं

करणलयांगीकारादितिभावः ॥ कृतहान्यादीति ॥ यदंतःकरणावच्छिन्नेनयत्कृतंकर्मतदंतःकरणस्यसुषुप्त्युत्तरकालेऽसत्त्वेन तत्कर्मजन्यभोगस्यहानिः । परदिनेचयदंतःकरणावच्छिन्नस्यभोगोभवति तदंतःकरणावच्छिन्नेनतद्भोगहेतुभूतंकर्मनकृतमिति अकृताभ्यागमआदिपदार्थः । वृत्तिप्रतिबिंबितंचैतन्यमितिप्रक्रियांनिराकरोति ॥ किंचेति ॥ वृत्तिश्चिदुपरागार्थेतिपक्षइत्यर्थः ॥ वृत्तिमात्रेति ॥ स्वतएवकेवलवृत्त्युपरक्तत्वं । चैतन्यस्येतिशेषः ॥ प्रतिबिंबितत्वमिति ॥ अंतःकरणइतिशेषः । अंतः

uu6

SGDF
Sri Gargeshwari Digital Foundation

करणस्यतावत्प्रतिबिंबनोपाधित्वंनसंभवति । कुतइतिचेत् । उद्भूतरूपवत्त्वस्यैवप्रतिबिंबनोपाधित्वप्रयोजकत्वादंतःकरणस्याऽनुद्भूतरूपवत्त्वात् । तदिदमुक्तं ॥ अनुद्भूतरूपांतःकरणइति ॥ ननूद्भूतरूपवत्त्वंनप्रतिबिंबनोपाधित्वप्रयोजकं । यदागुहास्थिताकाशेप्रतिध्वनिर्भवति तत्रशब्दःप्रतिफलतीतियावत् तत्राकाशस्यकथंशब्दप्रति (बिंबनो) फलनोपाधित्वं उद्भूतरूपवत्त्वाभावादतउक्तं ॥ शब्दान्येति ॥ तथाचैतन्येप्रतिबिंबनंचनसंभवति प्रतिबिंबनेचाक्षुषत्वस्यप्रयोजकत्वात् ब्रह्मचैतन्यस्याचाक्षुषत्वादित्याशयेनोक्तं ॥ अचाक्षुषइति ॥ ननुजलाद्युपाधौअचाक्षुषस्याप्याकाशस्यप्रतिफलनंदृष्टमितिचेन्न तत्रसौरप्रभा

अनुद्भूतरूपांतःकरणेशब्दान्यप्रतिबिंबनोपाधितायाअचाक्षुषेचचैतन्येप्रतिबिंबनस्य
चायोगात् । नापिमूषास्थद्रुतसुवर्णादिवत्तदात्मनाविकृतत्वं चितोनिर्विकारत्वात् ।
नापिगोत्वादिवत्तदाश्रितत्वं तत्राभिव्यक्तत्वंवा चितआकाशवत्अनाश्रितत्वात् ।

मंडलस्यचाक्षुषस्यैवप्रतिफलनादितिसंप्रदायविदः । पुनर्वृत्त्युपरक्तत्वंविविच्यदूषयति ॥ नापीति ॥ मूषायांस्थितंयत्सुवर्णंतच्चोत्ताराग्निसंयोगेनद्रुतंसत्मूषायथाऽस्तिवर्तुलतया तथैवांतस्तदाकारेणपरिणमते तथामूषास्थानीयांतःकरणवृत्तौसुवर्णस्थानीयंब्रह्मतदात्मनाविकृतंभवतितदिदमेवचितोवृत्त्युपरक्तत्वमित्यर्थः ॥ गोत्वादिवदिति ॥ यथागोत्वादेर्गवाद्युपरक्तत्वंनामसास्नादिमद्व्यक्त्याश्रितत्वरूपं केसरादिमद्व्यक्तिंविहायसास्नादिमद्व्यक्तेरेवाभिव्यक्तत्वरूपंवादृष्टं । एवंचितो वृत्त्याश्रितत्वंवातत्रवृत्तावभिव्यक्तत्वंवातदुपरक्तत्वमित्यर्थः । आद्येदोषमाह ॥ चितआकाशवदिति ॥ यथाऽऽकाशस्यसर्वगतत्वादनाश्रितत्वंतद्वद

८८७

SGDF
Sri Gargeshwari Digital Foundation

नाश्रितत्वादित्यर्थः । द्वितीयेदोषमाह ॥ उपरागेति ॥ विषयप्रकाशकजीवचि (दनावृतेतिपक्षएवत्रवृ) तोऽनावृतत्वपक्षेवृत्तेरुपरा गार्थत्वांगीकारादित्यर्थः ॥ सर्वत्रेति ॥ तथाचचितःसर्वत्राभिव्यक्तत्वरूपोपरक्तत्वस्यसत्त्वेनचितःस्वतोवृत्तिमात्राभिव्यक्तत्व मेववृत्त्युपरक्तत्वमितिप्रतिज्ञाहानिःस्यादित्यर्थः ॥ घटेति ॥ तथाघटाकाशोघटांतःस्थएवंचितोवृत्त्यंतस्स्थत्वमेववृत्त्युपरक्तत्व मित्यर्थः ॥ आकाशवदिति ॥ आकाशस्ययथासर्वगतत्वाद्घटांतरेवस्थितिर्नतुगृहांतरितिविभागोनसंभवति एवंचितोपिसर्व गतत्वेनचित्स्वतोवृत्तिमात्रोपरक्तास्वतोवृत्तिमात्रांतस्थेतियावत् । नतुघटादिविषयांतस्स्थेत्यस्यायोगादित्यर्थः ॥ प्रभाया

उपरागार्थत्वपक्षेचितोनावृतत्वेनसर्वत्राभिव्यक्तत्वाच्च । नापिघटाकाशादिवत्तदंतस्थत्वं आकाशा दिवत्सर्वगताचित्स्वतोवृत्त्यंतस्थानतुघटाद्यंतस्थेत्यस्यायोगात् । नापिप्रभायारूपंप्रतीवप्रकाशक त्वं प्रभायास्तमोविरोधित्वस्यरूपंप्रतीवगंधादीन्प्रत्यपिसत्वात् । नहिसागंधदेशस्थंतमोननिवर्तयति।

इति ॥ यथाप्रभारूपमात्रप्रकाशकत्वेनरूपोपरक्तेत्युच्यतेतथाचिदपिवृत्तिमात्रप्रकाशकत्वेनस्वतोवृत्त्युपरक्तेत्युच्यतइत्यर्थः । प्रभायारूपमात्रप्रकाशकत्वंनामरूपप्रदेशस्थतमोनिवर्तकत्वंवारूपाऽज्ञाननिवर्तकत्वंवारूपमात्रग्राहिप्रमाणसहकारित्वंवा । नाद्यइत्याह॥प्रभायाइति॥ तमोविरोधित्वस्यरूपप्रदेशस्थतमोनिवर्तकत्वस्य।तदेवोपपादयति॥नहीति॥ प्रभायारूपप्रदेशस्थतमो निवर्तकत्वेनरूपप्रकाशकत्वंयद्युच्यतेतर्हिगंधादिप्रदेशस्थतमोनिवर्तकत्वस्यापिसत्त्वेनतत्प्रकाशकत्वमपिस्यादितिभावः।नद्वितीय

इत्याह॥प्रभायामिति॥रूपमिति॥ यतोज्ञानमेवाज्ञाननाशकंप्रभाचनज्ञानमितिभावः। तथाचनप्रभादृष्टांतेनचितोवृत्तिप्रकाशक त्वरूपंस्वतोवृत्त्युपरक्तत्वं चितस्तमोनिवर्तकत्वाभावात् वृत्तावज्ञानाभावेनतन्निवर्तकत्वस्याप्यभावादितिदार्ष्टांतिकेपिनसंभवती तिध्येयं।तृतीयोयद्यपिदृष्टांतभूतप्रभायामस्ति तथापिदार्ष्टांतिक्यांचितिनास्तीत्याह॥प्रभायामिति॥रूपेति॥तथाचरूपप्रकाशक त्वमस्तीत्यर्थः॥गंधादीति॥तथाचतत्प्रकाशकत्वंनास्तीत्यर्थः॥ग्राहकांतरेति॥ यथाप्रभायारूपग्राहकमानसहकारित्वमस्ति एवंन प्रकृतेसंभवति चितःस्वस्याएववृत्तिग्राहकत्वेनग्राहकांतराभावाद्वृत्तिग्राहकमानसहकारित्वरूपंप्रकाशकत्वंदार्ष्टांतिकेनसंभवतीत्य

प्रभायामज्ञानविरोधित्वस्यरूपंप्रत्यप्यभावात्। प्रभारूपग्राहिचक्षुस्सहकारित्ववत् गंधादिग्राहिघ्राणादिसहकारित्वस्याभावेपिचितोग्राहकांतरासहकारित्वेनदार्ष्टां तिकानानुगुण्यात् । तस्माच्चितस्सर्वगतत्वेनसर्वसंबंधाद्रूपादेरिवगुरुत्वादेरप्याश्रय द्वारासाक्षाद्वाचित्संबंधित्वात्चित्संबंधित्वस्यैवचप्रकाशकत्वात्सर्वप्रकाशोदुर्वारः।

र्थः। ननुरूपादेरिवगुरुत्वादेरपिप्रकाशोनसंभवतिचित्संबंधाभावादितिचेत्तत्राह ॥आश्रयेति॥ रूपादीनामिवगुरुत्वादीनामपिघटा द्याश्रयद्वारैवचित्संबंधित्वात् तथाचैतन्यस्यानावृतस्यघटतद्रूपसंबंधःयथासाक्षादेवास्ति एवंगुरुत्वादरेपीत्यर्थः ॥ चित्संबंधित्व स्यैवेति ॥ अनावृतचित्संबंधस्यैवेत्यर्थः । विषयप्रकाशिकाचित्अनावृतेतिपक्षएववृत्तिरुपरागार्थेत्यभ्युपगमादितिभावः ॥ सर्वे ति ॥ अनावृतचित्संबंधस्यसर्वेषामपिपदार्थानांसत्त्वात्सर्वेषामपिपदार्थानांसर्वदासर्वस्यजनस्यप्रकाशोदुर्वारइतिभावः । नन्व

SGDF

संगोह्ययंपुरुषइतिश्रुतेर्जीवचितःस्वतोविषयासंबंधित्वात्तदर्थंवृत्तिरपेक्षिता । अन्यथाश्रुतिविरोधादित्यतआह ॥ असंगोहीति ॥ तत्तत्कृतेति ॥ तत्तत्पदार्थसंबंधकृतेत्यर्थः । नन्वियंश्रुतिर्जीवचैतन्यपरैवईश्वरपराकुतइत्यतआह ॥ सयत्तत्रेति ॥ 'शुक्लमादायपुनरेतिस्थानंहिरण्मयःपुरुषएकहंसः । सयत्तत्रे' तिपूर्ववाक्येईश्वरस्यैवप्रकृतत्वादितिभावः । नन्वियंश्रुतिर्लेपाभावपराकुतः ईश्वरस्यसर्वपदार्थासंबंधित्वपराकिंनस्यादित्यतआह ॥ यथेति ॥ इत्यादीत्यादिपदेन"तथासर्वाणिभूतानिमत्स्थानीत्युपधारये"तिद्वितीयार्धःप्रकृतोपयुक्तोग्राह्यः । तथाचात्रसर्वसंबंधस्यैवोक्तत्वेनतद्वाक्यविरोधाच्छ्रुतिर्लेपाभावपरतयैवव्याख्येयेतिभावः ॥ वृत्तिश्चितोविषयोपरागार्थेतिमतेवृत्तेर्वैयर्थ्यमेवस्यात् । तथाहि । चितोविषयोपरागस्तावत्संयोगादिरूपोनास्त्येव । तस्यदृश्यत्वाप्रयोजकत्वात् किंतुतत्राध्यस्तत्वरूपएवेतिवाच्यं । सचवृत्त्यपेक्षयापूर्वमप्यस्तीतिकिंचितोविषयोपरागार्थयावृत्त्येत्याह ॥ अपिचेति ॥ जीवचैतन्यमसंगमितिवृत्त्यैवविषयैःसंबध्यतइत्युच्यते । तर्हिब्रह्मचैतन्यस्यसुतरामसंगत्वेनस्वतोविषयैःसहसंबंधाभावात्प्रमाणजन्यवृत्त्यैवविषयैःसंबध्यतेप्रमाणैरेवसर्वंजानातिनस्वतइत्यापत्त्यास्वतःसार्वज्ञ्यंनस्यादित्याह ॥ किंचेति ॥ मा

"असंगोह्यय"मितिश्रुतिरीश्वरस्यतत्तत्कृतलेपाभावपरा "सयत्तत्रकिंचित्पश्यतिअनन्वागतस्तेनभवती"तिपूर्ववाक्यात् । "यथाकाशस्थितोनित्यंवायुस्सर्वत्रगोमहानि"त्यादिस्मृतेश्च । अपिचवृत्तितःपूर्वमाध्यासिकसंबंधोस्त्येव । अन्यस्तूपरागोनदृश्यत्वेतंत्रमितिकिंतदर्थयावृत्त्या । किंचजीवचैतन्यमसंगंचेद्ब्रह्मचैतन्यंसुतरांतथेतिमानोपाधिकविषयोपरागत्वात्

गवत्वात्

यदि

४५०

SGDF
Sri Gargeshwari Digital Foundation

नेति ॥ प्रमाणोपाधिकविषयोपरागवत्त्वादित्यर्थः । वृत्तिद्वाराविषयैःसंबंध्यतत्प्रकाशकत्वादितियावत् ॥ स्वतइति ॥ प्रमाणं
विनेत्यर्थः । नन्वसंगस्यापिब्रह्मणोविषयैस्साक्षात्संबंधोघटते सर्वस्यापिविषयस्यब्रह्मोपादानकत्वेनब्रह्माभिन्नत्वात् मानोपाधिंवि
नैवस्वस्वरूपत्वात्स्वाभिन्नंजगद्भासयतीतिस्वतःसर्वज्ञत्वमुपपद्यतइत्याशंकते ॥नन्विति ॥ अत्रोपादानत्वंनामपरिणामित्वंतच्चवि
शिष्टनिष्ठं ततश्चतत्सर्वज्ञमित्युच्यते । अथवोपादानत्वंनामाधिष्ठानत्वं तच्चशुद्धनिष्ठं ततश्चतत्सर्वज्ञमित्युच्यते । नाद्यइत्याह
॥उपादानत्वंहीति॥ आध्यासिकेति॥ विशिष्टनिष्ठेनपरिणामित्वरूपेणसर्वोपादानत्वेनविशिष्टब्रह्मणःसर्वज्ञत्वेतस्यकल्पितत्वे

स्वतस्सार्वज्ञ्यंनस्यात् । ननुब्रह्मसर्वोपादानत्वादुपाधिंविनैवस्वस्वरूपवत्स्वाभिन्नंजगद्भासयती
तिचेत् । उपादानत्वंहिनतावद्विशिष्टनिष्ठंपरिणामित्वं आध्यासिकसंबंधस्यातंत्रत्वापातात् ।
अनाद्यविद्यादिकंप्रतितदभावाच्च । नापिशुद्धनिष्ठमधिष्ठानत्वं सार्वज्ञ्यादेर्विशिष्टनिष्ठत्वात् ।

नाधिष्ठानत्वायोगेनतत्रजगदध्यासासंभवात् आध्यासिकसंबंधेनप्रकाशतइतिभवदभिमतनियमभंगप्रसंगः । आध्यासिकसंबंधभि
न्नेनपरिणामित्वरूपोपादानत्वाख्यसंबंधेनैवविशिष्टस्यजगत्प्रकाशांगीकारादित्यर्थः। परिणामिनिब्रह्मणिजगदध्यासोनसंभवतीत्या
शयेनैवविशिष्टनिष्ठेत्युक्तं ॥ अनादीति ॥ उपादानत्वेनजगत्प्रकाशेऽविद्यांप्रत्युपादानत्वाभावात्तत्प्रकाशोब्रह्मणोनस्यादित्यर्थः ।
द्वितीयमाशंक्यनिषेधति ॥नापीति ॥शुद्धनिष्ठेनजगदधिष्ठानत्वरूपेणजगदुपादानत्वेनब्रह्मणोजगत्प्रकाशेशुद्धस्यैवसार्वज्ञ्याप
त्तिः । अस्तुशुद्धस्यैवसार्वज्ञ्यमित्यतआह ॥ सार्वज्ञ्यादेरिति ॥ विशिष्टनिष्ठत्वात् । विशिष्टनिष्ठत्वेनत्वयांगीकारादित्यर्थः ।

SGDF
Sri Gargeshwari Digital Foundation

शुद्धेसार्वज्ञ्यांगीकारेऽपसिद्धांतइतिभावः।वृत्तिरावरणाभिभवार्थेतिपक्षेदोषमाह॥आवरणेति ॥ आवरणंहिआव्रियमाणेनव्याप्तं तच्चकिंचिन्मात्रंविशिष्टंवा । नाद्यइत्याह ॥विवर्तेति॥ प्रकाशमानेचावरणंनसंभवति नितरांचावरणविवर्ताधिष्ठानस्येत्यर्थः । न द्वितीयइत्याह॥ अन्यस्यचेति ॥ तथाचाज्ञानसिद्धौतत्कल्पितविशिष्टसिद्धिस्तत्सिद्धौचतदावरकाज्ञानसिद्धिरित्यन्योन्याश्रयादि त्यर्थः । आवरणासंभवमभिधायेदानींआवरणाभिभवासंभवमाह ॥ किंचेति ॥ नयनपटलं नयनगतकाचादि । पुंगतत्वे प्रमा

आवरणाभिभवार्थत्वपक्षोप्ययुक्तः। विवर्ताधिष्ठानचिन्मात्रस्याज्ञानादिसाक्षित्वेनसदाप्रका शनात् । अन्यस्यचाज्ञानाकल्पितस्याभावात् । किंचाज्ञानस्यनयनपटलवत्पुंगतत्वेचैत्रस्या ज्ञाननाशेपिमैत्रस्यतदनाशादप्रकाशोयुक्तः । विषयगतत्वेतुचैत्रगतयावृत्त्याअज्ञानेदीपेनत मसीवनाशितेमैत्रस्यापिप्रकाशःस्यात् । अपिचकिं"आत्माश्रयमात्माविषयंचाज्ञानमंतरेणा नात्मसुप्रतिविषयंभावरूपाज्ञानसद्भावेमानाभावादिति"विवरणोक्तरीत्याऽज्ञानमेकं किंवा

तरिपुरुषेविद्यमानत्वे ॥ विषयगतत्वइति ॥ विषयगतत्वपक्षेत्वित्यर्थः । त्वन्मतेऽज्ञानस्यविषयावरकतयाविषयगतत्वांगीका रादितिभावः ॥ दीपेनेति॥ दीपवद्गृहस्थोघटोयथानिवृत्तावरणत्वात्सर्वैरपिज्ञायते तथाचैत्रगतयावृत्त्यानिवृत्ताज्ञानावरणोघटा दिःसर्वान्प्रतिप्रकाशेतेत्यर्थः । अज्ञानैकत्वानेकत्वविकल्पदूषणाभ्यांअज्ञानस्वरूपंखंडयति ॥ अपिचेति ॥ किंविवरणरीत्या ऽज्ञानमेकमितिसंबंधः । विवरणवाक्यंपठति ॥ आत्माश्रयमित्यादिना ॥ अज्ञानमंतरेण एकमेवाऽज्ञानमंतरेणेत्यर्थः । किं

वाइष्टसिद्धिरीत्याप्रतिविषयमनेकानीत्यन्वयः। अज्ञानानीतिशेषः । इष्टसिद्धिर्मायावादग्रंथविशेषः । तद्वाक्यंपठति ॥ अनंता न्येवेत्यादिना ॥ अज्ञानमेकमितिपक्षेपिशुक्तिज्ञानेनाज्ञानंसकार्यंनिवृत्तंनवा । नाद्यइत्याह ॥ सद्यएवेति ॥ अज्ञानस्यैक त्वेनमूलाज्ञानस्यैवरजतभ्रमोपादानत्वाच्छुक्तिज्ञानेनचतन्निवृत्तेरित्यर्थः । द्वितीये(त्वा)आह ॥ अनिवृत्ताविति ॥ सवि लासेति ॥ कार्यसहितेत्यर्थः । यथोक्तं "अज्ञानस्यवर्तमानेनप्रविलीनेनवास्वकार्येणसहज्ञानेननिवृत्तिर्बाध" इति ।

"अनन्तान्येवशुक्त्यज्ञानानियद्यनंतानिशुक्तिज्ञानानी"तिइष्टसिद्धिरीत्याप्रतिविषय मनेकानि । नाद्यः । शुक्तिज्ञानेनाज्ञाननिवृत्तौसद्यएवमोक्षापात् । अनिवृत्तौरूप्यादे स्सविलासाविद्यानिवृत्तिरूपबाधायोगात् । नन्वस्मिन्पक्षेशुक्तिज्ञानेनरूप्यादेःस्वकारणे प्रविलयमात्रंक्रियते मुद्गरप्रहारेणेवघटस्य। नत्वज्ञानंनिवर्ततेब्रह्मज्ञानेनतुविरोधित्वाद

तथाचाज्ञाननिवृत्तेरभावाद्रजतादिबाधोनस्यादितिभावः । अज्ञाननिवृत्त्यनिवृत्त्योरुभयोरपिसद्योमोक्षाभावबाधौयुक्ताविल्याशं कते ॥ नन्विति ॥ स्वकारणइति ॥ तथाचतावन्मात्रेणबाधोपपत्तिरितिभावः । यथामुद्गरप्रहारेणघटनाशेपिजलाहरणा द्यर्थक्रियाकारित्वसामर्थ्यमात्रंगच्छतिकारणात्मनाऽनुवर्ततेएव । एवमज्ञानस्यावरकत्वशक्तिमात्रमेवगच्छतिनस्वरूपेणनिवर्त तइतिद्रष्टव्यं ॥ नन्विति ॥ कारणात्मनासत्त्वात्स्वरूपेणननिवर्ततइत्यर्थः । ब्रह्मज्ञानेन चरमसाक्षात्काररूपेण ॥ रूप्ये

SGPF Foundation

ति ॥ शुक्तिज्ञानमज्ञानमनिवर्त्यतत्कार्यभूतंरूप्यमात्रंनिवर्तयतीत्येतदयुक्तं । यतोज्ञानमज्ञानस्यतद्द्वारातत्कार्यस्यचनिवर्तकमि
तिनियमेनज्ञानस्याज्ञाननिवृत्तिद्वारातत्कार्यविरोधिताऽतोऽज्ञानमनिवर्त्यतत्कार्यनिवर्तकत्वायोगेनबाधायोगस्तदवस्थइत्यर्थः ।
किंचशुक्तिज्ञानेनाज्ञाननिवृत्तिमनंगीकृत्यतद्गतावरकत्वशक्तिमात्रप्रतिबंधांगीकारेबाधेपिशुक्तिप्रकाशोनस्यात् । अभिव्यक्तचै
तन्यसंबंधाभावादित्याह ॥ शुक्तीति ॥ अज्ञानानाशेपितद्गतावरणशक्तेरपगतत्वाच्चितोऽभिव्यक्तिसंभवेनाभिव्यक्तचित्सं

[1] ज्ञानमेवनिवर्ततइतिचेन्न । ज्ञानस्याज्ञानद्वारैवान्यविरोधित्वेनाज्ञानमनिवर्त्यरूप्यादिनिवर्तकत्वा
योगात् । शुक्तिज्ञानेनाज्ञानानिवृत्तावभिव्यक्तचैतन्यासंबंधेनभ्रांताविवबाधेपिशुक्तेरप्रकाशा
पाताच्च । नचखद्योतादिप्रकाशैर्महांधकारस्येवाज्ञानस्यैकदेशेननाशाद्वाभीरुभटवदपसरणाद्वा
कटवत्संवेष्टनाद्वाचैतन्यस्याप्येकदेशेनप्रकाशइतियुक्तं । अनाद्यज्ञानचैतन्ययोर्निरवयवत्वात् ।

बंधोयुक्तइत्येतत्अनुपदमेवनिरसिष्यतइतिभावः ॥ खद्योतेति ॥ यथाखद्योतप्रकाशेनमहांधकारस्यैकदेशेत्यल्पेनष्टेसतितद्देश
स्थंवस्तुदृश्यते तथावृत्त्याऽज्ञानस्यैकदेशनाशेसतिविषयप्रकाशइत्यर्थः ॥ भीरुभटवदिति ॥ प्रतिभटेप्रबलेदृष्टेसतिभीरुर्भ
यशीलोभटोयथातंदेशमपहायापसरति एवंवृतौसत्यांतद्देशमपहायाऽज्ञानमपसरतीत्यर्थः ॥ कटवदिति ॥ यथाकटेवेष्टितेभूत
लादिदेशोऽनावृतोभवति एवमज्ञानेवेष्टितेसतिचैतन्यमनावृतंभवतीत्यर्थः ॥ अनादीति ॥ अनादित्वेनचैतन्याज्ञानयोर्निरव

1 एव शब्दो भिन्नक्रमः निवर्तते एवेति ॥

SGDF
Sri Gargeshwari Digital Foundation

यवत्वादज्ञानैकदेशनाशेनचैतन्यस्यैकदेशेनप्रकाशोनयुक्तइत्यर्थः ॥ शक्तेरिवेति ॥ वह्निस्वरूपानाशेपीत्यर्थः ॥ अविद्येति ॥ अविद्यास्वरूपानाशेपीत्यर्थः ॥ तत्तदिति ॥ भग्नावरणचित्संबंधस्यप्राप्तत्वादितिभावः । ननुशुक्तिज्ञानेनाविद्याशक्त्यभिभवोनयुक्तः शुक्तिज्ञानस्याप्यविद्याकार्यत्वेनोपादेयतयाउपादेयेनोपादानाऽभिभवस्यक्काप्यदर्शनादित्यतआह ॥ वृत्त्येति ॥ ॥ वृश्चिकेति ॥ यथागोमयाद्वृश्चिकोजायते तथामृदोवृक्षोजायते तत्रगोमयाद्युपादानकोवृश्चिकोवृक्षोवास्वोपादानगतगोमयत्वमृत्त्वाभिभावकोदृष्टस्तद्वत्प्रकृतेपीत्यर्थः। अविद्यागतावरकत्वशक्तिः किंशुद्धात्मविषया शुद्धात्मज्ञानंप्रतिबध्नातीतियावत्। किं

नचमण्यादिनावह्न्यादिगतदाहादिशक्तेरिवशुक्त्यादिज्ञानेनाऽविद्यागतावरणशक्तेरभिभवात्तत्तत्प्रकाशः । वृत्त्याचस्वोपादानभूतायाअप्यविद्यायाअभिभवोवृश्चिकवृक्षादिनागोमयमृदादेरिवयुक्तइतिवाच्यं। चक्षुरादिजन्यशुक्तिवृत्तेरूपादिहीनशब्दैकगम्यशुद्धात्माविषयतयातदावरणशक्त्यप्रतिबंधकत्वात् ।

वाजडविषया उतजडविशिष्टात्मविषयावेतिविकल्प्याद्येदोषमाह ॥ शुद्धात्मेति ॥ अविद्यानिष्ठशुद्धात्मावरकत्वशक्तेःशुद्धात्मविषयकवृत्त्याऽभिभवोवक्तव्यः शुक्तिवृत्तेश्चशुक्त्यवच्छिन्नचैतन्यविषयकतयाविशिष्टविषयकत्वेनशुद्धात्माविषयकत्वात्तादृश्या शुक्तिवृत्त्याऽविद्यागतशुद्धात्मावरकत्वशक्त्यभिभवोनसंभवतीत्यर्थः । शुक्तिवृत्तिरपिशुद्धात्मविषयिण्येवास्त्वित्यतउक्तं ॥ चक्षुरादिजन्येति ॥ ननुचक्षुरादिजन्याप्यात्मविषयास्त्वित्यतउक्तं रूपादिहीनेति । ननुरूपादिहीनस्यरूपादेरिवात्मनोपिचाक्षुषत्व

455

SGDF
Sri Gargeshwari Digital Foundation

विजयीन्द्रतीर्थीये ऽप्ययं पाठोऽस्त्येव ॥

मस्त्वित्यतउक्तं शब्देति । ननुशुक्तिवृत्तेःशुक्त्यवच्छिन्नचिद्विषयत्वेपिविशेष्यभूतचिद्विषयकत्वमस्त्येवेतितयातदज्ञानशक्त्यभि भवोस्तु नीरूपायाश्रितःशुक्तिसंबंधेनचाक्षुषत्वमुपपद्यते राहोरिवचंद्रसंबंधेनेत्यतआह ॥ शुक्तिवृत्तेरिति ॥ तदवच्छिन्ने ति ॥ शुक्त्यवच्छिन्नेत्यर्थः । तत्प्रतिबंधकत्वे शुक्त्यवच्छिन्नचैतन्यावरकाज्ञाननिष्ठावरकत्वशक्तिप्रतिबंधकत्वे । तयैव विशे ष्यभूतचिद्विषयिण्याशुक्तिवृत्त्यैव ॥ आपातादिति ॥ तथाचशुक्तिज्ञानेनसद्योमोक्षःस्यादित्यर्थः । तृतीयपक्षसांकर्यापत्त्याऽ यंपाठःक्वाचित्कइतिसंप्रदायः । द्वितीयंनिराकरोति । अविद्येति ॥ अविद्यायाइवेति ॥ यथाऽविद्याजडाश्रयानभवति

शुक्तिवृत्तेस्तदवच्छिन्नचिद्विषयत्वेनतत्प्रतिबंधकत्वेचतयैवतदाशुद्धात्मप्रकाशापातात् । अविद्याक ल्पितमप्रसक्तप्रकाशंचजडंप्रतिचाविद्यायाइवाविद्यागतावरणशक्तेरप्ययोगात् । अस्वीकाराच जड विशिष्टात्मानंप्रतितत्स्वीकारेचविशेषणानावरकविशिष्टावरकशक्त्यभिभवस्यविशेष्यावरकश

जडस्याविद्याकल्पितत्वेनाविद्यासिद्धौतत्कल्पितजडसिद्धिः । तत्सिद्धौचतदाश्रिताज्ञानसिद्धिरित्यन्योन्याश्रयात् । एवमविद्या गतावरकत्वशक्तिरपिनजडविषयिणी जडंप्रत्यविद्याया आवरकत्वंनास्तीतियावत् । कुतःअप्रसक्तप्रकाशत्वात् प्राप्तप्रकाशप्रतिबं धोह्यावरणं तत्रचप्रकाशप्रसक्तेरेवाभावेनावरणकृत्याभावादित्यर्थः ॥ अस्वीकाराच्चेति ॥ जडंप्रत्यावरकत्वानंगीकाराच्चेत्यर्थः । तृतीयंनिराकरोति ॥ जडेति ॥ तत्स्वीकारे अविद्याया आवरकत्वस्वीकारे ॥ विशेषणेति ॥ यथाविशिष्टविषयकयोर्विधिनि षेधयोर्विशेष्येबाधेविशेषणविषयकत्वं तथाविशेषणेबाधेविशेष्यविषयकत्वावश्यंभावात् । जडविशिष्टात्मानंप्रत्यावरकत्वस्वी

कारेविशेषणीभूतजडानावरिका अथचविशिष्टावरिकायाशक्तिस्साविशेष्यावरिकैवजाता । शुक्तिज्ञानेनचतदभिभवेविशेष्यावर कत्वशक्तिरेवाभिभूतेतिशुक्तिवृत्त्याशुद्धात्मप्रकाशापातेनसद्योमोक्षःस्यादित्यर्थः । उपादेयेनउपादानगतशक्तेरभिभवोवृश्चिका दौदृष्टइत्युक्तंतत्प्रसंगात्खंडयति ॥ प्रच्युतेति ॥ अवस्थांतरप्राप्ताइत्यर्थः ॥ पार्थिवेति ॥ स्यादयंदृष्टांतः । यदिगोमयत्वाद्य वस्थापन्नगोमयादीनांतदुपादानत्वंस्यात् नचैवं किंतुआपरमाण्वंतंप्रच्युतगोमयत्वाद्यवस्थानांपार्थिवावयवानांपरमाणूनामेव ।

त्त्यभिभवंविनाऽयोगेनशुक्तिवृत्त्यैवतदाशुद्धात्मप्रकाशापातात् । प्रच्युतगोमयत्वाद्यव स्थाएवपार्थिवावयवावृश्चिकाद्युपादानानीतिनवृश्चिकादिनोपादानस्वभावाभिभवः । शि ष्टमविद्यानिवर्तकभंगेवक्ष्यते । नचमूलाज्ञानस्यैवावस्थाविशेषारजताद्युपादानानिशु क्तिज्ञानेनसाध्यासंनिवर्तंतइतिवाच्यं । तेषामज्ञानविशेषत्वेऽनेकाज्ञानवादापातात् ।

तेषांचवृश्चिकोपादानानांपार्थिवावयवानांतदुपादेयेनवृश्चिकादिनाननाशइतिदृष्टांतोऽसंप्रतिपन्नइतिभावः ॥ शिष्टमिति ॥ परमतेऽविद्याया एवाऽप्रामाणिकत्वमित्यर्थः । पूर्वमेकमेवाज्ञानमितिमतेशुक्तिज्ञानेनाज्ञाननिवृत्तौसद्यएवमोक्षःस्यादित्यापादितेऽ नंतरमज्ञानैकदेशस्यनाशेऽपसरणेचपरेणकल्पितेतद्दूषितं पुनस्तदीयैःप्रकारांतरेणकल्पितमस्ति तदाशंक्यनिराकरोति ॥ नचेति ॥ यथाग्रीष्मवर्षादिषुनदीनामवयवोपचयाःकार्यविशेषकरादृष्टास्तथेत्यर्थः । साध्यासं (रजततद्वृत्तिभ्यांसहे) तत्तद्वृत्त्यासहेत्यर्थः ।

456 457

SGDF Foundation

एवंचमूलाज्ञानस्यानिवृत्तत्वान्नशुक्तिज्ञानेनसद्योमोक्षःस्यादितिभावः । तेषांअवस्थाविशेषाणां ॥ नचेदिति ॥ अवस्थाविशेषाणा मज्ञानविशेषत्वाभावेइत्यर्थः ॥ साक्षादिति ॥ यतोज्ञानमज्ञानस्यैवनिवर्तकमित्यंगीकारादित्यर्थः ॥ भ्रमेति ॥ अज्ञानस्यैवभ्र मोपादानत्वांगीकारादित्यर्थः ॥ तेषामिवेति ॥ यथाऽज्ञानावस्थाविशेषाःस्वोपादानभूतमूलाज्ञानानिवृत्तावपिनिवर्तंतइत्यु च्यते एवमेवाज्ञानावस्थाविशेषोपादानकंरूप्याद्यपिस्वोपादानभूतावस्थाविशेषानाशेपिनश्यतु । तथाचशुक्तिज्ञानेनसाध्यासंनि वर्ततइत्युक्तमसदितिभावः ॥शुक्त्यज्ञानमिति॥ अज्ञानभिन्नानांअवस्थाविशेषाणांरजतोपादानत्वेनतन्निवर्तकशुक्तिज्ञानेनरजतो

नचेत्साक्षाज्ज्ञानेननिवृत्तेर्भ्रमोपादानतायाश्चायोगात् तेषामिवरूप्यस्यै
वोपादाननिवृत्तिंविनानिवृत्तिप्रसंगाच्च । शुक्त्यज्ञानंनष्टमित्यनुभवविरोधा
च्च । द्वितीयेप्येकयावृत्त्याकिंसर्वतदज्ञानानांनिवृत्तिः । उतैकतदज्ञानस्य ।

पादानभूतावस्थाविशेषानिवृत्ताइत्यनुभवप्रसंगेनशुक्तिज्ञानेनशुक्त्यज्ञानंनष्टमित्यनुभवविरोधादित्यर्थः । तस्मादेकाज्ञानपक्षेमूला ज्ञानस्यैवरजतोपादानत्वेशुक्तिवृत्त्यामूलाज्ञानानाशेपिरजतस्यप्रविलयाद्रजतादर्शनंशुक्त्यावरकाज्ञानानाशेपितस्यैकदेशनाशाद्वा पसरणाद्वावेष्टनाद्वामण्यादिनावह्नेरिवशक्त्यभिभावाद्वाबाधकालेशुक्तेःप्रकाशइत्येतानिसमाधानानिनसंभवंति।अवस्थाविशेषाणा मेवोपादानत्वमित्यपिनसंभवतीत्येकाज्ञानपक्षोनसंभवतीतिभावः। इष्टसिद्धिरीत्यानेकाज्ञानपक्षेदोषमाह ॥ द्वितीयेपीति ॥ एक यावृत्त्या शुक्तिवृत्त्या ॥ सर्वेति ॥ एतच्छुक्तिविषयकाणामनेकाज्ञानानां ॥ एकेति ॥ एतच्छुक्तिविषयकस्यैकाज्ञानस्य। कुतइत्य

SGDF
Sri Gargeshwari Digital Foundation

तआह॥ एकस्येति॥ अनेकयवनिकावृतवस्तुन्येकयवनिकापगमेपियवनिकांतरसद्भावाज्ज्ञानाभावोयथातथेत्यर्थः॥अयंचेति॥
एकयाशुक्तिवृत्त्याशुक्तिप्रकाशेनरजतभ्रमजनकानांअवस्थाविशेषाणांसर्वेषांनिवृत्तिरुतैकस्यावस्थाविशेषस्य। नाद्यः। शुक्तेःक
दाप्यप्रकाशोनस्यात्। अंत्येतदापिप्रकाशोनस्यात्। एकस्यावस्थाविशेषस्यनिवृत्तावप्यन्यस्यसत्त्वादित्येवंरूपेणयोज्यइत्यर्थः॥
सादीति॥ शुक्त्यादेःसादित्वेनतदवच्छिन्नचैतन्यस्यापिसादितयाशुक्त्याद्युत्पत्तेःपूर्वंअज्ञानस्यनिर्विषयत्वंस्यादित्यर्थः। अस्तु 459
निर्विषयत्वंतस्येत्यतआह॥ निर्विषयस्यचेति॥ अस्यास्मिन्नज्ञानमित्याश्रयविषयोपेतस्यैवावरणस्यप्रतीतेरित्यर्थः। एकमेवा

आद्येशुक्तेःपुनःकदाप्यप्रकाशोनस्यात्। अंत्येतदापिप्रकाशोनस्यात्। एकस्यावरणस्यनिवृत्ता
वपिअन्यस्यसत्त्वात्। अयंचदोषःअवस्थाविशेषपक्षेपियोज्यः। कथंचसादिशुक्त्यादेस्त
दवच्छिन्नचैतन्यस्यवाऽनाद्यज्ञानविषयत्वं निर्विषयस्यावरणस्यानवस्थानात्। नचपूर्वमन
वच्छिन्नावरणमिदानीमवच्छिन्नावरणंजातं। शुक्तिज्ञानेनैवमोक्षापातात्। एतेनव्यक्तितः

नाद्यज्ञानमनादिचैतन्यविषयकमेवावरणंतदानींचैतन्येतरशुक्त्यादिपदार्थविशेषानवच्छिन्नंसदेवावरणमभूत्। पदार्थोत्पत्त्यनं
तरंत्वागंतुकतत्तत्पदार्थावच्छेदेनशुक्त्याद्यवच्छिन्नचैतन्यावरणमित्युच्यतेऽतोनोक्तदोषइत्याशंक्यनिराकरोति॥ नचेति॥ कुतो
नचेत्यतोऽनेकाज्ञान(वादहा)मतहान्यापत्तेरितिदूषणेसत्येवदूषणांतरमाह॥शुक्तीति॥अनवच्छिन्नशुद्धचैतन्यावरणाज्ञानस्यैवशु
क्त्यवच्छिन्नचैतन्यावरणत्वाच्छुक्तिसाक्षात्कारेणशुक्त्यवच्छिन्नचैतन्यावरणाज्ञाननिवृत्तौशुद्धचैतन्यावरणाज्ञाननिवृत्तेरपिजात

SGDF
Sri Gargeshwari Digital Foundation

त्वा(त्तेनैवमो)पातेनसद्योमोक्षापातइत्यर्थः।जातिरिति॥ निराश्रयैवावतिष्ठतइत्यर्थः। एतेनेत्युक्तंवि(वृणोति)शदयति ॥ प्रतिवि
षयमिति॥ यथानेक(व्यक्तिविषयाएकै)विषयेष्वेकैवजातिस्तथाऽज्ञानमप्येकमेवस्यान्नतुप्रतिविषयंभिन्नं। तत्रचशुक्तिसाक्षात्कारा
न्मोक्षापत्तिरित्युक्तदोषएवेत्यर्थः । पूर्वमात्माश्रयमात्मविषयंचाज्ञानमनेकमितिपक्षेएकयावृत्त्यासर्वेषामज्ञानानांनिवृत्तिरुतैकतद
ज्ञानस्येतिविकल्प्यदूषणमभिहितं। तदुपरिवेदांतकौमुद्युक्तंदूषणमाशंक्यनिराकरोति ॥यत्तूक्तमिति ॥ ज्ञानेनेति॥ चैत्रनिष्ठ
घटज्ञानेनचैत्रनिष्ठघटज्ञानप्रागभावनिवृत्तिस्तावद्भवति ।(तत्रपृच्छामःघट)तत्राप्ययंविकल्पःसमः। घटज्ञानप्रागभावानामनंतानां

पूर्वंजातिरिवविषयात्पूर्वमज्ञानमस्तीतिनिरस्तं। प्रतिविषयमनेकाज्ञानांगीकारायोगात्। यत्तूक्तंकौमुद्यां
(ज्ञानेनतत्प्रागभावनिवृत्तावप्ययंविकल्पःसमः । ततश्चसत्स्वप्यनंतेष्वज्ञानेषुबहुजनसंकीर्णदेशेवैद्युत

विद्यमानत्वाद्धटज्ञानेनसर्वेषामपिघटज्ञानप्रागभावानांनाशः उतैकस्य। नाद्यः । घटज्ञानेनैकेनैवसर्वेषामपिघटज्ञानप्रागभावा
नांनष्टत्वेनोत्तरत्रघटस्यकदाप्यप्रकाशोनस्यात्। नद्वितीयः । एकेनघटज्ञानेनैकस्यघटज्ञानप्रागभावस्यनिवृत्तावपिघटज्ञानजन्य
व्यवहारप्रतिबंधकानांअनेकेषामनष्टानांप्रागभावानांसत्त्वेनअनेकयवनिकावृतवस्तुन्येकस्यायवनिकायाअपगमेपियवनिकांतरस्य
सत्वेनयथातदप्रकाशः। एवंकालांतरइवज्ञानकालेप्यप्रकाशःस्यादित्यर्थः ॥ ततश्चसत्स्वपीति ॥ यथाचसत्स्वप्यनंतेषुएतद्घ
टज्ञानप्रागभावेष्वेकंज्ञानमेकमेवप्रागभावंनाशयतिइतरप्रागभावानपसार्यप्रागभावांतरनिबंधनमज्ञातत्वादिव्यवहारंप्रतिबध्नाती

तिवक्तव्यं। तथाहमपिसत्स्वनंतेष्वज्ञानेषुज्ञानमेकमेवाज्ञानंनाशयति इतराज्ञानान्यपसारयतीतिवदिष्यामीत्यर्थः। तत्रदृष्टांतः॥
बह्विति॥यथाबहुजनसंकीर्णदेशेतत्समुदायइतियावत्।विद्युन्निपातेसत्येकःपुमान्म्रियते।इतरेऽपसर्पंति यथावावातपित्तश्लेष्मरूप
त्रिदोषहरेकस्मिंश्चिदौषधेदत्तेसत्येकोदोषोनिवर्ततेइतरावपसर्पतइतिवैद्यप्रसिद्धिः तद्वदित्यर्थः। एकेनज्ञानेनैकएवप्रागभावोनश्य
तीतिपक्षमाश्रित्यसमाधत्ते॥तन्नेति॥आवरणानीति॥घटज्ञानकार्यस्यव्यवहारादेर्विषयभूतोयोघटस्तस्यतज्ज्ञानप्रागभावानावर
णानीत्यर्थः॥दंडेति॥यथादंडप्रागभावोदंडकार्यस्यघटादेर्नावरणं किंतुघटकारणस्यदंडस्याभावरूपएव तथाज्ञानप्रागभावोपिज्ञा

निपातवत्रिदोषहरौषधवच्चज्ञानमितराज्ञानापसारणेनैकमज्ञानंनाशयती
ति तन्न। नहिमन्मतेज्ञानप्रागभावाःआवरणानि किंतुदंडप्रागभाववत्हे
त्वभावरूपाः। नापिज्ञानंतन्निवर्तकत्वेनहेतुः किंतुदंडादिवत्स्वरूपेणैव ।

नकार्यव्यवहारकारणस्यज्ञानस्याभावरूपएवेत्यर्थः।नह्यभावस्यकुड्यादिवदावरणत्वमितिभावः॥नापीति॥ ज्ञानस्यप्रागभावनिवृ
त्तिरूपत्वेनतन्निवर्तकत्वेननहेतुत्वमित्यर्थः। व्यवहारजनकतावच्छेदकंज्ञानेनस्वप्रागभावनिवर्तकत्वमितिभावः। ज्ञानंस्वकार्यव्यव
हारंप्रतियदिज्ञानप्रागभावनिवर्तकत्वेनहेतुर्भवेत्तदैवज्ञानांतरप्रागभावसत्वेनतन्निवृत्तिरूपकारणाभावादेकस्मिन्नज्ञानेसत्यपिघटव्य
वहारोनस्यात्।नतुतथास्तीत्याशयः॥किंत्विति॥ यथादंडोदंडत्वेनैवघटंप्रतिकारणं नतुदंडप्रागभावनिवर्तकत्वेन तथाज्ञानमपिस्व

SGDF
Foundation

कार्यव्यवहारंप्रतिस्वरूपेणैवहेतुः ज्ञानत्वेनैवहेतुरितियावदितिमयांगीकारादित्यर्थः॥ एवंचेति॥प्रागभावस्यज्ञानकार्यव्यवहारविष
यानावरकत्वेचेत्यर्थः॥एकोदंडइति॥ यथाएकोदंडःसजातीयदंडांतरप्रागभावेसत्यपिस्वकार्यंघटंजनयत्येवमित्यर्थः ॥ सजाती
यांतरेति॥एकज्ञानसजातीयज्ञानांतरेत्यर्थः। ननुमाभूज्ज्ञानप्रागभावःआवरणं माचभूज्ज्ञानंप्रागभावनिवर्तकत्वेनहेतुः किंतुज्ञा
नत्वेनैवास्तु तथापिज्ञानांतरप्रागभावसत्त्वेनतदभावरूपज्ञानांतराख्यकारणाभावादेकस्मिन्ज्ञानेविद्यमानेपितवाप्येतज्ज्ञानकार्य
व्यवहारोनस्यादित्यतआह ॥ कार्येति॥ कारणतावच्छेदकावच्छिन्नयत्किंचित्कारणसत्त्वेकार्योत्पत्तेरावश्यकत्वस्यदृष्टत्वात्। य

**एवंचएकोदंडइवैकंज्ञानंस्वसजातीयांतरप्रागभावेसत्यपिस्वकार्यंजनयेदेव। कार्यो
त्पत्तौहिकारणसत्तातंत्रं नतुकारणजातीयसर्वप्रागभावनिवृत्तिः। असंभवात्।**

थाहिदंडत्वावच्छिन्नस्यैकस्यदंडस्यसत्त्वेकार्यंघटोभवत्येव नतुदंडत्वावच्छिन्नसर्वदंडसद्भावोऽपेक्षितः एवंज्ञानत्वावच्छिन्नस्यैक
स्यघटज्ञानस्यसत्त्वेव्यवहारोभवेदेव नतुसर्वज्ञानसत्त्वमपेक्षितमितिभावः॥ सर्वप्रागभावनिवृत्तिरिति॥सर्वज्ञानप्रागभावनि
वृत्तिस्सर्वज्ञानसत्त्वमित्यर्थः। प्रतियोग्यापत्तेरेवप्रागभावनिवृत्तित्वादितिभावः। कुतोनेत्यतआह॥ असंभवादिति ॥ अतीता
नागतवर्तमानानामेकदासत्त्वस्यासंभवादित्यर्थः। एवंचममतेज्ञानप्रागभावस्यानावरणत्वाज्ज्ञानंस्वप्रागभावनिवृत्तौलब्धस्वरू
पंसज्ज्ञानांतरप्रागभावस्यानावरकस्यसत्त्वेपिस्वविषयेस्वकार्यंव्यवहारादिकंकरोत्येव। तवमतेत्वज्ञानस्यावरकत्वादेकस्मिन्ज्ञाने

462

SGDF
Sri Gargeshwari Digital Foundation

सत्यपितद्विषयावरणस्याज्ञानांतरस्यसत्त्वात् ज्ञानकार्यंव्यवहारादिकंज्ञानकालेपिनस्यादित्याह ॥ त्वन्मतेत्विति ॥ आवरण निवर्तकत्वादिति ॥ अनावृतविषयसंपादकत्वेनेत्यर्थः । ननुतथापितमस्तावद्घटादिविषयावरणं तच्चआलोकाभावः सचालोके ननिवर्तते । एवंचतत्रपृच्छामः । एतेनालोकेनसमस्तायेआलोकाः तदभावरूपाणियानिसर्वाणितमांसितानिसर्वाण्यपिनिवर्तंते एकमेववा । नाद्यः । तर्हिंकदाप्यप्रकाशोनस्यात् । नद्वितीयः । एकेनालोकेनतदभावरूपस्यैकस्यतमसोनिवृत्तत्वेपीतरालो काभावरूपतमसांविषयावरणभूतानांयवनिकांतरवत्सत्त्वेनतदापिप्रकाशोनस्यादित्यापादितेतत्रत्वयावाच्यं । सत्स्वप्यनेकेषुतम

त्वन्मतेतुवृत्तेरावरणनिवर्तकत्वादेकस्मिन्नज्ञानेनिवृत्तेऽप्यन्यस्ययवनिकांतरवत्सत्वा
त्कालांतरइववृत्तिकालेप्यप्रकाशःस्यात् । नचालोकाभावस्तमइतिमतेतमः कुड्यादि
वदावरणं हेत्वभावरूपत्वात् । नाप्यालोकस्तन्निवर्तकत्वेनज्ञानहेतुः किंतुस्वरूपेणैव ।

स्स्वेकेनाऽऽलोकेनैकस्यतमसोनिवृत्तावपिइतराण्यपसरंति । बहुजनसंकीर्णदेशेवैद्युतनिपातवदिति तन्ममापितुल्यमित्यतआ ह ॥ नचेति ॥ भावरूपत्वेकुड्यादिवदावरणत्वसंभवादालोकाभावस्तमइतिमतइत्युक्तं ॥ हेत्विति ॥ आलोकरूपस्य ज्ञानहेतोरभावरूपत्वादि(त्यर्थः)तिभावः । नह्यभावस्यावर(कत्व)णत्वमित्याशयः ॥ नापीति ॥ आलोकस्स्वका र्यंज्ञानंप्रतिआलोकाभावनिवर्तकत्वेनयदिहेतुस्स्यात्तदाऽऽलोकांतराभावरूपतमसस्सत्त्वेनालोकांतराभावनिवृत्तिरूपकारणाभा वादेकस्मिन्नालोकेसत्यपिज्ञानंनभवेत् नतुतदस्तीत्यर्थः ॥ स्वरूपेणैवेति ॥ दंडादिवदालोकत्वेनेत्यर्थः । तथाचालोकत्वावच्छि

SGDF
Sri Gargeshwari Digital Foundation

466

न्नाशेषालोकसत्तायाअनपेक्षितत्वेनतदवच्छिन्नैकालोकसत्त्वेज्ञानंस्यादेवेतिभावः । ननुयत्किंचिज्ज्ञानसत्वेपिअज्ञानांतरनिबंधना प्रकाशवदेकालोकसत्त्वेप्यालोकांतराभावरूपतमोंतरनिबंधनोऽप्रकाशोपिकिंनस्यादित्यतआह ॥ नापीति ॥ येनैकालोकसत्त्वे प्यालोकांतराभावरूपतमसस्सत्त्वेनतदाज्ञानाभावशंकास्यात्। नचैवं किंत्वालोकत्वावच्छिन्नालोकाभावइत्यर्थः ॥ सोस्तीति ॥ आलोकत्वावच्छिन्नतदभावोनास्ति । विशेषसत्त्वस्यसामान्याभावविरोधित्वादित्यर्थः । यद्यप्यालोकांतराभावोस्ति । तथापिस नतमः एकैकालोकाभावस्यातमस्त्वादितिध्येयं ॥ भावीति ॥ तथाचयवनिकांतरवदज्ञानांतरसद्भावात्तदानीमप्यप्रकाशःस्या

नाप्येकैकालोकाभावस्तमः किंत्वाऽऽलोकत्वावच्छिन्नतदभावः। नचैकस्मिन्नप्यालोकेसतिसोस्ति। भाविज्ञा ननिवर्त्यमज्ञानंत्वेतज्ज्ञानकालेऽप्यस्तीतिवैषम्यं । नचेहाप्यज्ञानसमुदायएवावरणं एकेनचज्ञानेनैकस्मिन्न ज्ञानेनिवृत्तेसनास्तीतिप्रकाशोपपत्तिरितिवाच्यं।वृत्तिनाशेपिसमुदायाभावस्यसत्त्वेनसदाप्रकाशापातात्।

देवेतिभावः ॥ इहापीति ॥ यद्यालोकत्वावच्छिन्नालोकाभावरूपतमसएवावारकत्वादेकालोकाभावरूपावारकसत्तायामालो कांतरसत्त्वेप्युक्ततमोरूपावरणाभावसत्त्वाद्यथाप्रकाशएवमेवाज्ञानसमुदायएवावरणं तत्रैकेनज्ञानेनैकाज्ञाननिवृत्तौसत्यामज्ञानां तरसद्भावेप्युक्तसमुदायरूपावरणभंगसद्भावाद्युक्तःप्रकाशइतिभावः ॥ सनास्तीति ॥ एकाज्ञाननाशेसमुदायनाशादितिभावः ॥ वृत्तिनाशेपीति ॥ वृत्तिकालइववृत्तिज्ञाननाशोत्तरकालेपिसर्वदाप्रकाशएवस्यात् वृत्तिरूपज्ञानकालेयोऽज्ञानसमुदायनाशः

अनिबिडा — ?= तरंगिणी

465

स्थितःतस्यवृत्तिनाशकालेपिसत्त्वादित्यर्थः । बहुजनसंकीर्णदेशइत्युक्तमुदाहरणंखंडयति ॥ अयुक्तंचेति ॥ अमूर्तानांनिबिडा वयवानां । दृष्टांतेएकस्यनाशेप्यन्येषांपुरुषाणामपसरणंमूर्तत्वाद्युक्तं । दोषाणामपिमूर्तत्वादेकनाशेऽन्यापसरणंयुक्तं । नत्वेवम ज्ञानेषुसंभवति । तेषाममूर्तत्वेनापसरणायोगादितिभावः । अनुकूलतर्काभावोपपादनमुपसंहरति ॥ तस्मादिति ॥ प्रतिकर्म व्यवस्थाभंगविवरणं ॥ २४ ॥ यदिविश्वमिति ॥ विश्वमिथ्यात्वानुमानेयःपक्षःसएवविश्वशब्देनाभिप्रेतोद्रष्टव्यः । सा धिष्ठानादिकमित्यत्रादिपदेनप्रधानादिकंग्राह्यं । तथाचयदिविश्वंकल्पितंस्यात्तदासाधिष्ठानंस्यात् सत्यप्रधानंस्यात् सत्यसादृश्यो

अयुक्तंचाऽमूर्तानामज्ञानानामपसरणं ।तस्मादनुकूलतर्कहीनामिथ्यात्वहेतवः ॥ ७ ॥ ॥ इतिप्रतिक र्मव्यवस्थाभंगः ॥२४॥ प्रतिकूलतर्कहताश्चैते । तथाहि । यदिविश्वंकल्पितंस्यात्तदासाधिष्ठानादि कंस्यात्।भ्रांतेस्सदृशंसत्यंचाधिष्ठानंप्रधानंदोषमज्ञानंबाधकज्ञानंद्रष्टारंदेहेंद्रियादिकंचविनायोगात्।

पेतंस्यात् सत्यदोषोपेतंस्यात् सत्याज्ञानोपेतंस्यात् सत्यबाधकज्ञानोपेतंस्यात् सत्यद्रष्टुपेतंस्यात् सत्यदेहेंद्रियादिसापेक्षंस्यादितिप्र त्येकंतर्काअभिमताइतिनवैयर्थ्यमितिद्रष्टव्यं । तर्केऽप्रयोजकतांपरिहरति ॥ भ्रांतेरिति ॥ सदृशं अधिष्ठानप्रधानयोस्सादृश्यं सत्यमितिसर्वत्रसंबध्यते । आदिपदेनदेशकालादृष्टादिकंग्राह्यं । इदंप्रतिज्ञावाक्यं । उत्तरत्रैकैकस्तर्कस्सम्यगप्रयोजकतादिपरि हारेणोपपाद्यते । तत्रादौविश्वंयदिकल्पितंस्यात्तदासाधिष्ठानंस्यादितितर्कस्तावदुपपाद्यते ।(नन्वत्रेष्टापत्तिः ॥ ब्रह्मणोऽधिष्ठा

SGDF Foundation

नस्यसत्यत्वांगीकारादितिचेन्न । त्वन्मतेब्रह्मणोऽधिष्ठानत्वासंभवात् । अधिष्ठानत्वेसामान्यतोज्ञातत्वेसत्यऽज्ञातविशेषवत्वस्य प्रयोजकत्वात् । ब्रह्मणःसामान्यधर्मोपेतत्वादिनातावत्ज्ञातत्वंनसंभवति । निस्सामान्यत्वात् । अज्ञातविशेषवत्वंचनसंभवति । निर्विशेषत्वांगीकारादित्याह। निस्सामान्यइति'। इतिपाठांतरंक्वचित्दृश्यते)। ननुयदिविश्वंकल्पितंस्यात्तदासत्याधिष्ठानोपेतंस्या दित्ययुक्तं । सत्यस्यात्मनोऽधिष्ठानत्वांगीकारादितिचेन्न । सामान्यतोज्ञातत्वेसत्यज्ञातविशेषत्वस्याधिष्ठानत्वेतंत्रत्वात् त्वयाचा त्मनिनिस्सामान्यविशेषत्वेनांगीकृतेसामान्यतोज्ञातत्वेसत्यज्ञातविशेषत्वानंगीकारादित्याह॥ निःसामान्येइति ॥उक्तंहीति॥

निस्सामान्येनिर्विशेषेचात्मनिअधिष्ठानत्वेतंत्रस्यसामान्यतोज्ञातत्वेसत्यज्ञातविशेषत्व
स्याभावात् । उक्तंहि । "अधिष्ठानस्यकात्स्न्र्येनज्ञानेऽज्ञानेचनभ्रमः । ज्ञाताज्ञातविभाग
स्तुनिर्विशेषेनयुज्यते"इति । ननुनसामान्यज्ञानंसद्विशेषाज्ञानंचतत्रतंत्रं गौरवात् । किं
तुस्वरूपज्ञानंविशेषाज्ञानंच । लाघवात् । तच्चस्वप्रकाशेनिर्विशेषेचात्मन्यस्तीतिचेन्न।

अधिष्ठानत्वेतंत्रभूतंसामान्यतोज्ञातत्वेसत्यज्ञातविशेषत्वंब्रह्मणिनास्ति । निस्सामान्यत्वान्निर्विशेषत्वाच्चेत्युक्तंहीत्यर्थः । कात्स्न्र्ये न सर्वविशेषवत्त्वेन अज्ञाने सामान्यतोप्यज्ञानेचेत्यर्थः ॥ ज्ञातेति ॥ सामान्यविशेषाभ्यामित्यर्थः ॥ निर्विशेषइति ॥ सा मान्यधर्मशून्येविशेषधर्मशून्येचेत्यर्थः । यदुक्तंब्रह्मणोनाधिष्ठानत्वमितितदयुक्तं । त्वदुक्तस्याधिष्ठानत्वेऽतंत्रत्वादित्याशंकते ॥ नन्विति ॥ सद्विशेषेति ॥ विशेषाणांसत्त्वंनापेक्षितमितिभावः । तत्रअधिष्ठानत्वे ॥ तच्चेति ॥ स्वरूपज्ञानंस्वप्रकाशत्वा

SGDF
Sri Gargeshwari Digital Foundation

द्युक्तं । विशेषाणामभावादेवविशेषाज्ञानंचास्तीत्यर्थः । सामान्यतोज्ञातत्वमेवाऽधिष्ठानत्वेप्रयोजकं । नस्वरूपेणज्ञानं । कुतइत्यतआह ॥ त्वन्मतेपीति ॥ संस्कारादीति ॥ संस्कारसंप्रयोगदोषरूपकारणत्रयजन्यत्वादित्यर्थः । ततःकिमित्यतआह ॥ सामान्याकारेति ॥ "सदृशादृष्टचिंताद्याःस्मृतिबीजस्यबोधका" इत्युक्तत्वात्संस्कारोद्बोधार्थंसामान्याकारेणज्ञातत्वमपेक्षितं । तथाहि । चाकचक्यादिसादृश्यदर्शनेनप्रधानसंस्कारोद्बोधानंतरंभ्रमोभवति । ब्रह्मणश्चनिस्सामान्यत्वेनसामान्यतोज्ञातत्वासंभवान्नाधिष्ठानत्वमितिभावः । तथासद्विशेषाज्ञानस्यैवभ्रमकारणत्वंवक्तव्यं । कुतइत्यतआह ॥ असदिति ॥

त्वन्मतेपिभ्रांतेस्संस्कारादित्रयजन्यत्वात् । सामान्याकाराज्ञानेचसंस्कारानुद्बोधात् । असद्विशेषाज्ञानस्यचबाधकालेपिसत्त्वात् । वल्मीकेस्थाणुत्वभ्रमनिवर्तकस्यापिपुंस्त्वभ्रमस्यवल्मीकत्वप्रमानिवर्त्यत्वेनां

बाधकालव्यावृत्तभ्रमकालीनाधिष्ठानत्वेऽसद्विशेषाज्ञानंनप्रयोजकं । बाधकालेपिअसद्विशेषाज्ञानस्यैवसत्त्वेनतदानीमप्यधिष्ठानत्वव्यवहारस्यादतस्सद्विशेषाज्ञानमेवतत्रप्रयोजकं तच्चबाधकालेनास्तीतिभावः । ननुसद्विशेषाज्ञानस्यभ्रमाधिष्ठानत्वप्रयोजकत्वेसद्विशेषज्ञानंविशेषप्रमेतियावत् । भ्रमनिवृत्तौप्रयोजकमित्युक्तंस्यात् तच्चनसंभवति । तथाहि । आदौवल्मीकेस्थाणुत्वभ्रमोजातः अनंतरंतत्रैवपुंस्त्वभ्रमोजातः अनेनैवपूर्वभ्रमोनिवर्तते । तत्रपुंस्त्वस्यासत्त्वेनविशेषप्रमायाअभावात्पूर्वभ्रमानिवृत्तिःस्यादित्यतआह ॥ वल्मीकइति ॥ तत्रपुंस्त्वभ्रमस्यपश्चात्तनत्वेपिननिवर्तकत्वं किंनाम पुंस्त्वभ्रमानंतरंपुनरयंवल्मीकएवेतियदा

SGDF Sri Gargeshwari Digital Foundation

तन्मात्रनिवर्त
प्रतिकूल.
१ । २५

वल्मीकत्वप्रमाभवतितदैवतद्भ्रमद्वयंनिवर्ततेनान्यथेतिविशेषप्रमैवबाधकत्वेनभ्रमनिवृत्तौहेतुरितिसद्विशेषत्वाज्ञानमेवाधिष्ठानत्वे प्रयोजकमितिभावः । यद्यप्युत्तरभ्रमःपूर्वभ्रमनिवर्तकोभवति तथापितस्योत्तरज्ञानत्वेनैवनिवर्तकत्वं नतुबाधकत्वेनतन्निवर्तकत्वं प्रकृतेचतादृशमेवविवक्षितमिति(ध्येयं)भावः । जगद्भ्रमेयुक्तंब्रह्मणोधिष्ठानत्वमित्याशेयनाधिष्ठानत्वेप्रयोजकांतरमाशंकते । (नन्विति) ॥ अथेति ॥ तत्र । अधिष्ठानत्वे ॥नत्विति ॥ येननिर्विशेषत्वेनाज्ञातविशेषत्वंनास्तीत्यधिष्ठानत्वाभावःस्यादित्यर्थः । ननुनात्रभ्रमविरोधिज्ञानाभावोऽस्ति अधिष्ठानचैतन्यरूपज्ञानस्यैवविश्वभ्रमविरोधित्वादितिचेत्तत्राह ॥ विश्वभ्रमेति ॥ अ

५६८

ततोभ्रमकालाज्ञाताधिष्ठानविशेषप्रमांविनाभ्रमानिवृत्तेश्च । (नन्विति)अथभ्रमविरोधिज्ञानाभावस्तत्रतंत्रं नतुविशेषाज्ञानं । विश्वभ्रमोपादानाज्ञानस्यचश्रवणादिजन्यमात्ममात्रविषयंवृत्तिज्ञानंविरोधिनतुचिद्रूपज्ञानमितिचेन्न । अस्याविद्याविषयभंगेनिरसिष्यमाणत्वात् । किंचात्मानात्मनोर्दृग्दृश्यत्वात्मत्वानात्मत्वादिनाभेदज्ञानान्नाधिष्ठानाध्यस्तभावः ।

स्येति ॥ चिद्रूपज्ञानस्यैवत्वन्मतेज्ञप्तिरूपमुख्यज्ञानत्वात्तदविरोधिनोऽज्ञानस्यमुख्याज्ञानत्वंनस्यात् । वृत्तेश्चज्ञायतेऽनयाचैतन्यमितिकरणव्युत्पत्त्याऽमुख्यज्ञानत्वांगीकारेणतस्याएववृत्तेर्मुख्याज्ञानविरोधित्वांगीकारेणमुख्यज्ञानत्वमेवस्यादित्यादिकंवक्ष्यतइत्यर्थः । आत्मानात्मनोर्विरुद्धधर्माधिकरणत्वेनप्रतीयमानत्वान्नानात्मनआत्मन्यध्यासइत्याह ॥ किंचेति ॥ दृग्दृश्यत्वादिरूपंयदात्मत्वानात्मत्वादिकंतदादिनेत्यर्थः । दृक्त्वरूपंयदात्मत्वं दृश्यत्वरूपंयदनात्मत्वमितिविवेकः । यद्वादृक्त्वदृश्य ॥२३५॥

त्वादिनाआत्मत्वानात्मत्वादिनेत्यर्थः । आत्मत्वानात्मत्वेविरुद्धेइत्यत्रसंमतिमाह ॥ उक्तंहीति ॥ तत्तेदंतेइति ॥ तद्देशकालसंबंधैतद्देशकालसंबंधावित्यर्थः । स्वस्यभावःस्वता अन्यस्यभावोऽन्यत्वं तवभावस्त्वत्ता ममभावोमत्ता । प्रतिद्वंद्वितया प्रतिस्पर्धितया । नन्वात्मत्वानात्मत्वयोर्भेदग्रहःकथमनेनलब्धइत्यतआह ॥ स्वयमात्मेति ॥ पर्ययौ पर्यायौ । तथाचस्वतान्यत्वयोरात्मानात्मरूपत्वाद्भेदेनग्रहोयुक्तइत्यर्थः । स्वरूपज्ञानमेवाधिष्ठानत्वेप्रयोजकं तच्चस्वप्रकाशत्वाद्ब्रह्मणोयुक्तमित्यत्रदूषणांतरमा

५६९

उक्तंहित्वयैव । "तत्तेदंतेस्वतान्यत्वेत्वत्तामत्तेपरस्परं । प्रतिद्वंद्वितयालोकेप्रसिद्धेनास्तिसंशय"इति । "स्वयमात्मेतिपर्यया"वितिच । अपिचाधिष्ठानतिरोधानंविनाध्यासासंभवस्यतवापिसंमतत्वात्प्रकाशमात्रस्वभावस्यचात्मनःतिरोधानेप्रकाशनिह्नवेनकथंतदधीनप्रकाशस्याविद्यादेरध्यस्तस्यप्रकाशः । किंचघटाद्यनुविद्धत्वेनाप्रतीतस्यात्मनःकथंतदधिष्ठानत्वं । नचसन्घटइतिस्फुरतिघटइतिचात्मातदनुविद्धतयाभातीतियुक्तं । चाक्षुषादिज्ञानेरूपादिही

वे

ह ॥ अपिचेति ॥ प्रकाशनिह्नवे(न) प्रकाशापलापे(न) प्रकाशमात्रस्वभावत्वापगतावितियावत् ॥ तदधीनेति ॥ आत्मप्रकाशाधीनेत्यर्थः । अविद्यादेःप्रातिभासिकत्वेनप्रतिभासशरीरत्वादविद्याप्रकाशस्यसाक्षिचैतन्यरूपत्वात्तस्याप्रकाशेऽविद्यादेःप्रकाशएवनसंभवतीत्यर्थः ॥ घटादीति ॥ इदंरजतमितिइदमंशानुविद्धतयारजतस्येवआत्माघटइतितदनुविद्धतयाप्रतीत्यभावादित्यर्थः ॥ भातीति ॥ सत्स्फुरणयोरात्मरूपत्वादितिभावः ॥ इत्युक्तत्वादिति ॥ रूपीघटइत्यादौरूपादिकमिवस

SGDF

न्घटइत्यत्रापिसत्ताघटनिष्ठैवप्रतीयते स्फुरतीत्यत्रापिज्ञानविषयत्वमेवघटेप्रतीयते नत्वधिष्ठानानुवेधइत्युक्तत्वादितिभावः । ननुचाक्षुषज्ञानेरूपादिहीनआत्माप्रतीयतएव घटादेरेवचाक्षुषप्रकाशाधीनत्वात् आत्मनस्सदर्थतयास्वतएवभानांगीकारेणचाक्षुषप्रकाशाधीनप्रकाशत्वाभावाद्युक्तोघटादेस्तदनुवेधइतिमंदाशंकामपाकरोति ॥ नचेति ॥ तत्संबंधेनेति ॥ स्वतःप्रकाशमानात्मसंबंधेनेत्यर्थः ॥ घटइति ॥ घटःस्फुरतीतिघटानुभवेघटानुविद्धत्वेनस्फुरणंप्रतीयतइत्ययुक्तं विज्ञायतेघटइत्यादाविवस्फुरतीत्यस्यापिघ(टज्ञानानु)टानुव्यवसायरूपत्वेनघटस्फुरणानुभवतयाघटानुभवत्वाभावान्नघटानुभवेस्फुरणानुविद्धतयाघटःप्रतीयतइत्य

नात्माप्रतीतेरित्युक्तत्वात्। नचस्वप्रकाशसदर्थभूतंघटाधिष्ठानंचैतन्यंस्वतएवभातीति युक्तं । घटस्यापितत्संबंधेनस्फुरणसंभवेवृत्तिवैयर्थ्यात् । घटःस्फुरतीत्यस्यचस्फुरणानुभवत्वेनघटानुभवत्वायोगात् ॥ नन्वथापिनप्रधानंभ्रमहेतुः किंतुतत्संस्कारःसचतत्प्रमयेवतद्भ्रमेणापि । अत्रचपूर्वपूर्वप्रपंचभ्रमअनादिः । नचप्रमाजन्यएवसंस्कारोभ्रमहेतुः ।

र्थः । विश्वंयदिकल्पितंस्यात्तदासत्यप्रधानोपेतंस्यादित्यत्राप्रयोजकत्वंशंकते ॥ नन्विति ॥ सचेति ॥ प्रधानसंस्कारस्यैवभ्रमहेतुत्वेनप्रधानस्यभ्रमहेतुत्वाभावात्संस्कारस्यचप्रधानप्रमयेवप्रधानभ्रमेणाप्युपपत्तेः । प्रधानसत्यत्वंनापेक्षितमित्यर्थः । ननुयथाजगद्भ्रमेप्रधानभ्रमजन्यसंस्कारःकारणं एवंप्रधानभ्रमेपितत्पूर्वप्रधानभ्रमजन्यसंस्कारःकारणं तत्राप्येवमित्यनवस्थेत्यतोभ्रमपरंपरायाअनादित्वान्नानवस्थेत्याह ॥ अत्रचेति ॥ प्रमेति ॥ प्रधानप्रमेत्यर्थः । तथासतिहिप्रधानस्यसत्त्वमपेक्षितंस्यादि

470

SGDF
Sri Gargeshwari Digital Foundation

त्यभिप्रायः ॥ सत्यपीति ॥ सत्यपिसंस्कारेयदितस्मिन्प्रधानप्रमाजन्यत्वाभावात्क्वचिद्भ्रमाभावोदृष्टःस्यात् तदैवपरंप्रधान प्रमाजन्यस्यैवसंस्कारस्यभ्रमहेतुत्वकल्पनयातत्सत्यत्वमपेक्षितंस्यादित्यर्थः । नन्वन्यत्रविद्यमानमेवान्यत्रारोप्यतइतिनियमे नप्रधानस्यसत्त्वमपेक्षितंस्यादित्याशंक्यनिराकरोति ॥ नचेति ॥ आवयोरिति ॥ शुक्तिरेवात्यंतासद्रजतात्मनाप्रतिभातीति (भवन्म)त्वन्मतं प्रातिभासिकमनिर्वचनीयंरजतंप्रतीयतइतिमन्मतं । उभयोर्मतेपिनतद्देशांतरादौसत् येनप्रधानसत्यत्वंस्या ५७१ दित्यर्थः ॥ एवमिति ॥ प्रधानज्ञानमेवसंस्कारद्वाराभ्रमहेतुः तच्चज्ञानंभ्रमरूपमपिसंभवतीतिनप्रधानस्यसत्यतासिद्धि

सत्यपिसंस्कारेप्रमाजन्यत्वाभावेनभ्रमाभावादर्शनात्। नचतार्किकस्येवाध्यस्तमेवदेशांतरादौसदि
सत्यपि त्यावयोर्मतं । मैवं । एवंसत्य(प्र)धिष्ठानधीरेवभ्रमहेतुः तद्धीश्चभ्रमरूपानादिरितिशून्यवादिरीत्याधि
ष्ठानस्याप्यसत्त्वापातेनाधिष्ठानत्वेनब्रह्मसदितित्वदुक्त्ययोगात्। अधिष्ठानवत्प्रधानस्याप्यबाधात्।
तथाच । "प्रधानमिवधीमात्रादधिष्ठानमपिभ्रमे । हेतुस्सुगतरीत्यास्यादबाधस्तुद्वयोस्समः" ॥

रित्यंगीकारेइत्यर्थः । धियश्चप्रमात्वेऽधिष्ठानसत्यतासिद्धिरित्यतआह ॥ तद्धीश्चेति ॥ अधिष्ठानधियोभ्रमरूपत्वेतत्राप्यधि ष्ठानांतरपरंपरयानवस्थापरिहारायानादिरित्युक्तं । इष्टापत्तिपरिहारायाधिष्ठानत्वेनेत्याद्युक्तं । नन्वधिष्ठानस्यबाधाभावात्सत्य त्वमितिचेत्तत्राह ॥ अधिष्ठानवदिति ॥ संगृह्णाति ॥ तथाचेति ॥ भ्रमेप्रधानमिवाधिष्ठानमपिसुगतरीत्याधीमात्रादेवहेतुः स्यात् अधिष्ठानज्ञानमेवहेतुःस्यादितियावत् । तथाचाधिष्ठानमप्यसत्स्यादितिभावः ॥ द्वयोरिति ॥ अधिष्ठानप्रधानयोरित्यर्थः ।

SGDF
Sri Gargeshwari Digital Foundation

एतत्प्रपंचस्यमिथ्यात्वेप्रोच्यमानेऽस्माभिरुक्तंएतत्प्रपंचस्यमिथ्यात्वेप्रधानभूतःप्रपंचःसत्योभविष्यतीति। त्वयातस्यापिभ्रमसिद्धत्वे नमिथ्यात्वांगीकारेत्वस्यैवप्रपंचस्यसत्यत्वंसिद्ध्यतीत्याह ॥ एतादिति॥ यथाशुक्तिरूप्यस्यमिथ्यात्वात्तदसाध्यार्थक्रियाकारिआपण स्थंरजतंयथासत्यमंगीक्रियते एवमस्यप्रपंचस्यमिथ्यात्वांगीकारेएतत्प्रपंचाऽसाध्यार्थक्रियाकारिप्रंपंचांतरमंगीकार्यं तस्यापिमि थ्यात्वांगीकारेऽर्थक्रियाकारित्वादिनाप्रमितस्यास्यैवप्रपंचस्यतात्विकत्वंस्यात्।कुतइतिचेत्“आत्मनआकाशस्संभूत”इ(त्यादिश्रु) तिश्रुतिसिद्धोत्पत्त्यादिकत्वात्। तथाचश्रुतिसिद्धस्यात्मनःस्वोचितदेशकालाद्युपाधौनिषेधायोगइवस्वोपाधौनिषेधायोगेनस्वोपा

एतत्प्रपंचासाध्यार्थक्रियाकारिणश्चतात्विकप्रपंचांतरस्याभावेस्वोचितार्थक्रियाकारिणः
श्रुत्यादिसिद्धोत्पत्त्यादिकस्यास्यैवात्मनइवस्वोपाधौनिषेधायोगेनतत्रतात्विकत्वापाताच्च।
[1]त्वन्मतेप्रातिभासिकरूप्येत्रैकालिकनिषेधस्यव्यावहारिकरूप्यविषयत्ववत्व्यावहारि
कप्रपंचेपिनेहनानेतित्रैकालिकनिषेधस्यपारमार्थिकप्रपंचांतराविषयत्वावश्यंभावाच ।

धा (वेवसत्यत्वापातात्) वसत्यत्वाभावात्। श्रुत्यादिसिद्धस्यापिमिथ्यात्वेआत्मनोपिमिथ्यात्वंस्यादित्यर्थः ॥ व्यावहारिके ति॥ आभासस्यप्रसक्त्याऽनाभासस्यनिषेधांगीकारादित्यर्थः ॥पारमार्थिकेति॥ अनाभासेत्यर्थः। नन्वाभासस्यप्रसक्त्याऽनाभा सस्यनिषेधइतिभासिमतेपूर्वोक्तदूषणमस्तु मयातुप्रातिभासिकस्यैवरजतस्यनिषेधोंगीक्रियते। नचप्रातिभासिकसत्त्ववतोनिषेधायो गःस्वरूपतोऽनिषेधेपिपारमार्थिकत्वाकारेणनिषेधांगीकारात्।तथाचनपारमार्थिकप्रपंचांतरविषयकत्वं“नेहनानास्ती” तिनिषेधस्य

1 एवं तर्हि मिथ्यात्वश्रुतिर्निर्विषया स्यादित्यत आह ॥ त्वन्मते इति ॥

५७२

किंत्वेतस्मिन्नेवप्रपंचेपारमार्थिकत्वविषयत्वमित्यतआह ॥ प्रातिभासिकस्यैवेति ॥ निरस्तमिति ॥ पारमार्थिकत्वरूपधर्मरहित स्यापिप्रपंचस्यब्रह्मवत्स्वरूपेणैवसत्त्वोपपत्तेरितिनिरस्तमित्यर्थः । प्रधानस्यासत्यत्वमंगीकृत्यतद्भ्रमजन्यसंस्कारस्यैवभ्रमहेतुत्वां गीकारेदोषांतरमाह ॥ कल्पाद्येति ॥ तत्पूर्वप्रधानरूपजगदंतराभावेनतद्भ्रमजन्यसंस्काराभावेनकल्पाद्यभ्रमायोगादित्यर्थः ॥ कल्पांतरीयेति ॥ कल्पांतरीयजगद्भ्रमजन्यसंस्कारादित्यर्थः । भ्रमोत्पत्तौ कल्पाद्यभ्रमोत्पत्तौ ॥ नारिकेलेति ॥ तस्य

५७३

[1]प्रातिभासिकस्यैवपारमार्थिकत्वाकारेणत्रैकालिकनिषेधइतितुनिरस्तं । कल्पाद्यभ्रमायोगाच्चकल्पां
तरीयसंस्काराद्भ्रमोत्पत्तौचनारिकेरद्वीपवासिनोगुंजापुंजादावद्यारोपःस्यात्। एतज्जन्मन्यननुभू
ततिक्तरसस्यापिबालस्यगुडादावास्यगतपित्तद्रव्यनिष्ठतिक्तत्वारोपस्तुअनन्यगतिकत्वाज्जन्मांतरी
यसंस्कारजन्यः । यद्वामाषराशिस्थमष्यांमाषाभेदारोपइवगृह्यमाणारोपोयंनतुसंस्कारजन्यः ।

जमांतरीयस्याद्यनुभवजन्यसंस्कारस्यानादौमनसिसत्त्वादित्यर्थः । ननुजन्मांतरीयसंस्कारस्याप्येतज्जन्मीयभ्रमहेतुत्वमवश्यंव क्तव्यं। अन्यथाजातमात्रस्यबालस्यगुडेतिक्तत्वारोपोनस्यात् अस्मिन्जन्मनितिक्तद्रव्यनिष्ठस्यतिक्तत्वस्याननुभूतत्वेनसंस्कारा भावात्। अतोजन्मांतरीयतिक्तरसानुभवजन्मसंस्कारोऽवश्यंभ्रमहेतुतयावक्तव्यएव। एवंजगद्भ्रमेपीत्यतआह ॥एतज्जन्मनीति॥ ॥ अनन्यगतिकत्वादिति ॥ नचैवंप्रकृतेप्यनन्यगतिकत्वंवाच्यं सत्यत्वेनैवोपपत्तेरितिभावः । स्यादेतदेवं यद्ययंतिक्तताभ्रमः

1 [illegible] ॥ प्रातिभासिकेति ॥ [illegible] पारमार्थिकत्वाकारेण [illegible] पारमार्थिकत्वेन [illegible] विशेषण [illegible] ॥

SGDF Sri Gurudeva Digital Foundation

स्मर्यमाणारोपःस्यात्तदैवैतज्जनकतयानन्यगतिकतयाजन्मांतरीयसंस्कारापेक्षास्यात् । नचैवं किंतुगृह्यमाणारोपोयं । तत्रचन संस्कारापेक्षेत्याह ॥ यद्वेति ॥ गृह्यमाणेति ॥ आस्यगतपित्तद्रव्यनिष्ठतिक्तिमानंगृहीत्वागुडेआरोप्यतइत्यर्थः । गृह्यमाणारोपेदृष्टांतःमाषेति। मष्यां मषीखंडे शांतांगारकाष्ठैकदेशोमषीखंडइत्युच्यते । यथामाषंगृहीत्वामाषराश्युपरिपतितेमषीखंडे माषवदेवपरिदृश्यमानेमाषाभेदआरोप्यतेतद्वदित्यर्थः । सत्यस्यप्रधानस्यभ्रमहेतुत्वमनंगीकुर्वतासंस्कारस्यभ्रमहेतुत्वमंगीकृतं तथाच तस्यैवसत्यत्वंस्यादित्याह ॥ किंचेति ॥ यदिसत्यःसंस्कारोभ्रमहेतुर्नस्यात्तर्हि मैत्रेसंस्कारोस्तीत्येवंचैत्रेणाध्यासःकृतः। तथाचचै

४७५

सेऽपि किंचचैत्रेणमैत्रेसंस्काराध्यासेऽपिमैत्रस्यभ्रमादर्शनात्जगद्भ्रमहेतुसंस्कारस्यसत्त्वंदुर्वारं ।
नचस्वेनाध्यस्तसंस्कारादेवभ्रमः भ्रमात्पूर्वंस्वस्यकार्यानुमेयसंस्काराध्यासनियमाभावात् ॥

त्राध्यस्तसंस्कारस्यमैत्रेविद्यमानत्वात् मैत्रस्यभ्रमःस्यात् । नह्येवंदृश्यतेऽतस्सत्यभूतसंस्कारस्यैवभ्रमहेतुत्वमित्यर्थः । ननुनसत्यसंस्कारस्यभ्रमहेतुत्वं नचोक्तातिप्रसंगः । मयिसंस्कारोऽस्तीतिस्वाध्यस्तसंस्कारस्यैवभ्रमहेतुत्वांगीकारेणान्याध्यस्तसंस्कारस्यतद्धेतुत्वागंनीकारादित्याशंक्यनिराकरोति ॥ नचेति ॥ तत्रस्वस्मिन्भ्रमइतिसंबंधः ॥ कदाचिन्मयिसंस्कारोस्तीतिबुद्धिपूर्वकंसंस्काराध्यासंकृतवतोऽनंतरंभ्रमोप्याहार्योभवत्येवातउक्तं नियमेति । अनाहार्यस्मर्यमाणनिरुपाधिकभ्रमात्पूर्वंसंस्कारस्यकारणत्वेनसत्त्वंवाच्यमेव । नतुतस्याऽध्यस्तत्वं संस्कारस्याज्ञातकरणत्वात् । ननुतर्हितत्सत्त्वंकथंज्ञातव्यमितिचेन्न । भ्रमरूपकार्येसतिअस्य

SGDF Sri Gargeshwari Digital Foundation

संस्कारःपूर्ववृत्तइतितस्यकार्यानुमेयत्वात्“(कार्योन्नेयधर्माणांयथाकार्यमुन्नयनादि)”तिवचनादितिभावः । यदिविश्वंकल्पितं स्यात्तदाप्रधानाधिष्ठानसादृश्योपेतंस्यान्नचतदंगीकर्तुंशक्यं । सादृश्यंहिगुणकर्मादिकृतंवाच्यं “(सामान्यान्येवभूयांसिगुणावयवकर्मणा)”मित्यादिवचनात् जगदारोपाधिष्ठानस्यब्रह्मणःप्रधानसादृश्यंवक्तव्यं तन्नसंभवति । गुणादिरहितेब्रह्मणिगुणादिकृतसादृश्यायोगात् । अतःप्रधानप्रतियोगिकसादृश्यस्यापेक्षिताधिष्ठानेऽभावान्नविश्वंकल्पितमितिआदौवक्तव्यं तदुपरिअस्मिंस्तर्केविवरणोक्तामिष्टापत्तिंव्यभिचारंचाशंक्यनिषेधति ॥ यत्तूक्तमिति ॥ विश्वस्यकल्पित(त्वपक्षेपि)त्वेपिप्रधानसादृश्यमधि

तरंगिणीः यत्तूक्तंविवरणेगुणादिहीनेब्रह्मणिगुणादिकृतसादृश्याभावेपिकेतकीगंधसदृशस्सर्पगंधइतिधीबलात्गंधइवेहापिसादृश्यांतरंवारक्तस्स्फटिकइत्यादिवत्सादृश्यंविनैवाध्यासोस्त्विवति । व

ष्ठानेस्त्येव । नचगुणादिकृतसादृश्यंनसंभवतिब्रह्मणोनिर्गुणत्वादितिवाच्यं । यथाकेतकीगंधसदृशःसर्पगंधइतिप्रतीतिबलात्सर्पगंधेकेतकीगंधसादृश्यंवर्ततइतिवक्तव्यं तन्नसंभवति। यथाकेतकीसर्पयोर्गंधरू(पगुणेनसा)पेणसादृश्यमस्ति तथाकेतकीगंधसर्पगंधयोर्नगुणकृतंसादृश्यमस्ति गुणेगुणानंगीकारात् नाप्यवयवकृतं गंधयोर्निरवयवत्वात् नापिकर्मकृतं गंधयोःकर्माभावात् अतस्तत्रकिंचिद्गुणादिकृतसादृश्यभिन्नंसादृश्यांतरंगंधेकल्पितमस्तीत्यंगीकृत्यकल्पितसादृश्येनयथाप्रतीतिर्भ्रमरूपायुक्तेतितार्किकैःकल्प्यते तथाप्रकृतेपिगुणादिहीनेब्रह्मणिवास्तवसादृश्याभावेपिसादृश्यांतरंकिंचित्कल्पनीयमितीष्टापत्तिः । अथवारक्तःस्फटिकइ

SGDF
Sri Gargeshwari Digital Foundation

स्य

त्यादौरक्तद्रव्यस्फटिकयोःसादृश्याभावेपितद्गतरक्तिमायथास्फटिकेआरोप्यते एवमिहापिसादृश्यंविनैवविश्वभ्रमोऽस्त्वितिव्यभि
चारइत्यर्थः ॥ इहेति ॥ जगद्भ्रमहेतुसादृश्यस्यकल्पितत्वांगीकारेऽविद्ययैवकल्पितत्वप्राप्त्याऽविद्यायाअपिकल्पितत्वेनसादृ
श्याधीनतयाअध्यासेनाविद्यायांसिद्धायांतदधीनसादृश्यसिद्धिस्तत्सिद्धौचाविद्याध्याससिद्धिरित्यन्योन्याश्रयइत्यर्थः । तथाच
नेष्टापत्तिरितिभावः । व्यभिचारंपरिहरति ॥ रक्तइति ॥ अभ्युपगमवादोयं । सिद्धांतेतस्यप्रतिबिंबत्वादितिध्येयं ॥ निरुपा
धिकइति ॥ निरुपाधिकानाहार्यभ्रमइत्यर्थः। जगद्भ्रमस्तुनिरुपाधिकएवेतिभावः । तथाचजगद्यदिनिरुपाधिककल्पितंस्यादिति

तन्न । इहकल्पितस्य/सादृश्यस्याप्यविद्याध्यासाधीनत्वेनान्योन्याश्रयात् । रक्तस्स्फटिकइत्यस्यसो
पाधिकभ्रमत्वेननिरुपाधिकेसादृश्यनियमाच्च । रक्तद्रव्यस्फटिकयोरपिद्रव्यत्वादिनासदृशत्वाच्च ॥
[1]नचदोषादिकंविनाभ्रमश्शंक्यः।अप्रामाण्यस्यस्वतस्त्वाद्यापातात् ॥ एवंद्रष्ट्रभावेपिनभ्रमश्शंक्यः।

तर्कस्याभिप्रेततयातत्रापादका(भावान्न)नागमान्नव्यभिचारइतिभावः । प्रकारांतरेणव्यभिचारंपरिहरति ॥ रक्तेति ॥ निरुपा
धिकत्वविशेषणस्यापादकेऽदानेपिनव्यभिचारः । नचसादृश्यंतत्रनास्तीतिवाच्यं । रक्तद्रव्यस्फटिकयोर्द्रव्यत्वादिनासादृश्यस
द्भावादितिभावः । यदिविश्वंकल्पितंस्यात्तदासत्यदोषयुतंस्यादितितर्केऽप्रयोजकत्वंनिरस्यति ॥ नचेति ॥ स्वतस्त्वेति ॥ ज्ञा
नसामग्र्यांदोषस्याप्रवेशेनज्ञानसामग्रीमात्रजन्यत्वापत्त्यास्वतस्त्वप्राप्त्यावेदांतजन्यब्रह्मज्ञानस्याप्यप्रामाण्यापातइत्यर्थः । यदि
विश्वंकल्पितंस्यात्तदाद्रष्टृपेतंस्यादितितर्केव्याप्तिमुपपादयति ॥ एवमिति ॥ समानेति ॥ भ्रमप्रमयोःसमानआश्रयः सचद्र

1 आदिपदेन असंसर्गाग्रहस्य ग्रहणम्।

ष्टैवेतिभावः।यदिविश्वंकल्पितंस्यात्तदासत्यदेहेंद्रियाद्युपेतंस्यादितितर्केऽप्रयोजकत्वंनिरस्यति॥एवमिति॥देहादीनांभ्रमप्रयोजक
त्वमुपपादयति॥प्रलयइति॥करणेति॥इंद्रियादिकरणजन्यत्वेनप्रसिद्धस्यभ्रमस्यइंद्रियाद्यभावेऽदर्शनादित्यर्थः।नचदेहादीनाम
भावेपिअज्ञानाख्यकारणसद्भावाद्भ्रमोऽस्त्वितिवाच्यं।तथात्वेप्रलयेप्यज्ञानस्यसत्त्वेनतदापिभ्रमप्रवाहापत्तेः।अतोयथाप्रमायाइंद्रि
यादिकरणजन्यत्वेनप्रसिद्धायाइंद्रियदेहाद्यभावेऽभावोदृष्टः एवंप्रलयेसत्यप्यज्ञानादौदेहाद्यभावेनभ्रमाभावदर्शनाद्देहेंद्रियादी
नामेवभ्रमजनकत्वनियमादिदानींदेहेंद्रियाद्यभावेपिविश्वभ्रमांगीकारेऽकारणकार्योत्पत्तिःस्यादितिभावः । ननुविश्वस्यभ्रांति

भ्रमस्यसमानाश्रयप्रमानिवर्त्यत्वेनज्ञानस्यज्ञातृसापेक्षत्वेनचद्रष्टुरवश्यंभावात् ॥एवंदेहेंद्रियाद्य
भावेपिनभ्रमश्शंक्यः । प्रलयेसत्यप्यज्ञानादौदेहादेरभावेनप्रमायाइवकरणजन्यभ्रमस्याप्यदर्श
नात् । नचरूप्याद्यध्यासेदोषादीनांदेहेंद्रियांतानांव्यावहारिकंवाकरणादिसमंवासत्त्वंतंत्रमि
तिजगदध्यासेपितथेतिवाच्यं। दोषादीनांव्यावहारिकसत्त्वस्याद्याप्यसिद्ध्यान्योन्याश्रयात् ।

कल्पितत्वेपारमार्थिकदोषयुक्तत्वंस्यादित्यापादनमयुक्तं । रूप्याद्यध्यासेदोषादीनांव्यावहारिकसत्त्वस्यकरणंयदिंद्रियंतत्समंयत्
सत्त्वंव्यावहारिकमेवसत्त्वंतस्यवातंत्रतायाःक्लृप्ततयाविश्वभ्रमेदोषादीनांकरणभूतेंद्रियसमंयत्सत्त्वंव्यावहारिकमेवसत्वंतदेवतंत्र
मस्त्वित्याशंक्यनिराकरोति ॥ नचेति ॥ करणादिसममिति ॥ व्यावहारिकमेवसत्त्वमित्यर्थः। एकस्यैवशब्दभेदेनव्यवहार
मात्रमितिद्रष्टव्यं ॥ अन्योन्येति ॥ जगदध्यासेसिद्धेतदंतर्गतदोषादीनांव्यावहारिकसत्वसिद्धिः तत्सिद्धौचसदृशसत्त्वोपेतैर्दो

SGDF

1 दोजस्य सत्वग्राहकविरोध एव दोजभावदृगरिकत्व साधक । तथा च नान्योन्याश्रयते त्यत आह ॥ पारमार्थिकेति ॥

विरह

षादिभिर्जगदध्याससिद्धिरित्यन्योन्याश्रयादित्यर्थः । ननुभवत्पक्षेपिजगदध्यासाभावसिद्धौतदंतर्गतदोषदेहेंद्रियादीनांपारमार्थि
कसत्वसिद्धिस्तत्सिद्धौचभवदुक्तप्रतिकूलतर्कसिध्याविपर्ययेपर्यवसानेनजगदध्यासाभावसिद्धिरित्यन्योन्याश्रयःसमानएवेत्यत
आह॥पारमार्थिकेति॥ औत्सर्गिकप्रामाण्येन प्रत्यक्षादिना तथाचदोषादीनांपारमार्थिकसत्त्वस्यजगदध्यासाभावसिद्ध्यधीनत्वा
भावेननास्मत्पक्षेऽन्योन्याश्रयइतिभावइतिसांप्रदायिकोवाक्यार्थः । करणादिसमसत्त्वंतंत्रमित्यत्रदोषमाह ॥ इहेति ॥ अध्या
सेकरणसमसत्त्वस्यतंत्रत्वमयुक्तं सादिरूप्यादिप्रतीतौकरणसद्भावेनतत्रदोषादेर्ज्ञानकरणसमसत्त्वसंभवेप्यज्ञानादिप्रतीतेस्साक्षि

818

[1] परमा(पारार्थिकस)र्थसत्त्वस्यत्वौत्सर्गिकप्रामाण्येनसिद्धत्वात् । इहसाक्षिरूपाज्ञानादिप्रती
रूप्याध तौकरणाभावाच्च । रूपाद्यध्यासेकरणादेरप्यधिष्ठानसमस(त्ताकत्वे)त्त्वेनेहापितथात्वापाता
च । दोषादेरध्यस्तत्वेतदभावस्यतात्विकत्वापातेनातात्विकेनचतात्विककार्यप्रतिबंधायोगेन — तरंगिणी
रूपतयाऽजन्यत्वेनतत्प्रतीतौकरणाभावात्करणसमसत्त्वंदोषदेहेंद्रियादीनांनसंभवतीत्यर्थः । रूप्याध्यासदृष्टांतेनजगदध्यासेदो
षादीनांकरणसमसत्त्वेप्रोच्यमानेदोषांतरमाह ॥ रूप्यादीति ॥ अधिष्ठानेति ॥ रूप्यभ्रमेपींद्रियादीनामधिष्ठानभूतशुक्तिस
मसत्ताकत्वदर्शनाज्जगद्भ्रमहेतुदोषादीनामपिअधिष्ठानभूतब्रह्मसमसत्ताकत्वप्राप्त्यापारमार्थिकसत्त्वसिद्ध्यापातादित्यर्थः । ननु
जगदध्यासहेतुर्दोषादिस्तात्विकोमाभूत् माभूच्चव्यावहारिकः प्रातिभासिकस्तुभविष्यतीत्यतआह ॥ दोषादेरिति ॥ अध्यस्त ॥ २४० ॥
त्वे कल्पिततयाप्रातिभासिकत्वे ॥ तात्विकत्वेति ॥ प्रतियोगितदभावयोर्भिन्नसत्ताकत्वस्यावश्यकत्वादितिभावः । अतात्वि

SGDF
Sri Gargeshwari Digital Foundation

केन प्रातिभासिकदोषेण ॥ तात्विकेति ॥ तात्विकस्यदोषाभावस्यकार्यंप्रामाण्यं ॥ दुष्टतयेति ॥ अनृतत्वव्याघातादिदोष युक्तत्वेनबौद्धकल्पितंयद्वेदजन्यंज्ञानंतस्येवेत्यर्थः। इदमत्राकूतं । यथावेदजन्यज्ञानेबौद्धकल्पितानृतत्वव्याघातादिदोषेणाप्रामाण्येशंकितेसतितत्रत्वयोच्यते: तत्रदोषाणांकल्पितत्वेनप्रातिभासिकतयातदभावस्यतात्विकत्वेनतात्विकदोषाभावेनस्वकार्यंप्रामाण्यमेवप्रयोजनीयं तत्रचातात्विकदोषाणांनप्रतिबंधकत्वं। अतात्विकंतात्विकस्यकार्येनप्रतिबंधकं । नहिवंध्यासुतःशक्तश्चैत्रवाचां निवारणइतिन्यायादिति। एवमिहापिदोषाणांप्रातिभासिकत्वेतदभावस्यतात्विकत्वप्राप्त्यातात्विकेनदोषाभावेनजगज्ज्ञानेप्रामाण्ये

दुष्टतयाबौद्धकल्पितवेदजन्यज्ञानस्येवजगज्ज्ञानस्यप्रामाण्यापाताच्च । दोषाद्यध्यासस्यापिदो
षांतरापेक्षत्वेनानवस्थाद्यापाताच्च।कस्यचिद्दोषाभावेप्यारोपेअप्रामाण्यस्यस्वतस्त्वंस्यात् ।

योजनीयेऽतात्विकदोषाणामप्रतिबंधकत्वमेव त्वदुक्तन्यायात् अतोजगज्ज्ञानस्यप्रामाण्यसिद्धिरिति।दोषाणांकल्पितत्वेनप्रातिभासिकत्वपक्षेदोषांतरमाह॥ दोषादीति ॥ ननुनानवस्थाकिंचिद्दूरंगत्वातत्रकस्यचित्पुरुषस्यदोषाभावेपिभ्रमांगीकारादित्यतआह ॥कस्यचिदिति॥आवयोर्मतेऽप्रामाण्यस्यपरतस्त्वेनदोषाभावेऽप्यप्रामाण्यांगीकारेतस्यस्वतस्त्वापत्त्यावेदजन्यज्ञानेप्यप्रामाण्यापातइतिभावः। ननुतथापिनानवस्था अविद्याख्यदोषाध्यासस्यानादित्वेनतत्रदोषापेक्षायाअभावात् अथवाऽप्रामाण्यस्यस्वतस्त्वापत्तिभियाऽविद्यारोपेऽविद्यायाएवदोषत्वांगीकारात्।नचात्माश्रयः। अविद्याख्यदोषस्यजगदध्यासनिर्वाहकत्वस्यस्वाध्यासनिर्वा

४७९

SGDF
Sri Gargeshwari Digital Foundation

हकत्वस्यचांगीकारेणदोषाभावादित्याशंक्यनिराकरोति ॥ नचेति ॥ अप्रामाण्यस्वतस्त्वापत्तिभियापक्षांतरमाह ॥ स्वनिर्वाहकत्वे नवेति ॥ तत्रदृष्टांतः भेदवदिति ॥ भेदस्यभेदिनोस्सकाशाद्भेदेऽनवस्थायांप्राप्तायांएकएवभेदो भेदिनोर्दंडदेवदत्तयोर्विशिष्टव्यवहारंभे दोभिन्नइतिस्वविशिष्टव्यवहारंचयथानिर्वहति तद्वदित्यर्थः ॥ ततइति ॥ अविद्यारूपदोषस्यानादित्वेनाधिष्ठानानपेक्षत्वात्स्वनिर्वाह कत्वाद्वामिथ्याभूतंस्वयमेवस्वस्याधिष्ठानंभवत्वितिब्रह्मरूपाधिष्ठानापेक्षापिनस्यादित्यर्थः ॥ विषयस्येति ॥ विषयस्यानादित्वेपितत्प्र तीतेर्जन्यतयादृष्टत्वादिहापिअविद्यारूपविषयस्यानादित्वेपितत्प्रतीतेर्दोषजन्यत्वमेववाच्यं । अन्यथातस्याः प्रतीतेरप्रामाण्यस्यै

नचानादित्वेनवा भेदवत्स्वनिर्वाहकत्वेनवाविद्याख्यदोषस्यतदनपेक्षा।[2] ततएवाधिष्ठानानपेक्षापातात्। विषयस्यानादित्वेपिप्रतीतेर्दोषाजन्यत्वे अप्रामाण्यायोगाच्च।[1] "(अविद्यारोपेतस्याएवदोषत्वेलाघवेनज गदारोपेपितस्याएवदोषत्वापाताच्च)" स्वनिर्वाहकत्वेभेदोभिन्नइतिवदज्ञानमज्ञातमितिव्यवहारसंभवेपि

वायोगादितिभावः । ननुव्यावहारिकस्थलएवेत्थंव्यवस्था प्रातिभासिकस्थलेतुप्रतीत्यतिरिक्तविषयसत्तायाएवाभावात्तस्याएवा नादित्वमंगीक्रियते अप्रामाण्यस्वतस्त्वंतुस्वनिर्वाहकत्वमंगीकृत्यपरिह्रियतेऽतोनोक्तदोषइत्यस्वरसादाह ॥ स्वनिर्वाहकत्वइति ॥ अत्रस्वनिर्वाहकत्वइत्यतः पूर्वंअविद्यारोपेतस्याएवदोषत्वेलाघवेनजगदारोपेपितस्याएवदोषत्वापाताच्चेतिक्काचित्कः पाठोदृश्यते । तत्राविद्यारोपेऽविद्यायाएवदोषत्वेजगदारोपेपिशुक्तिरजताद्यारोपेपितस्याएवदोषत्वापत्त्याकाचादेर्दोषत्वंनस्यादित्यर्थोद्रष्टव्यः । अत्रस्वनिर्वाहकत्वंनामस्वव्यवहारेस्वातिरिक्तानपेक्षत्वं यथाप्रमेयत्वंप्रमेयमिति । एवमज्ञानांतरमंतरेणअज्ञानमज्ञातमितिव्यव

१ तरंगिण्यां नास्ति । २ अनादित्वपक्षे अध्यासशब्देनार्थो वा ज्ञानं वा विवक्षितं नाद्य इत्याह ॥ तत एवेति ॥ नांत्य इत्याह ॥ विषयस्येति ॥ स्वनिर्वाहकत्वपक्षं निराकरोति ॥ स्वनिर्वाहकत्वे इति ॥

450

॥ २४१ ॥

हारोऽभूत् स्वज्ञानंप्रतिस्वस्यदोषत्वंतुनभवति । कुतइत्यतआह ॥ प्रतीतीति ॥ प्रतीतिमात्रशरीरंयत्स्वंअविद्या तद्विषयिणी याधीस्तत्रदोषतयाहेतुत्वेनत्वदंगीकृतेनप्राप्तंयत्स्वस्यस्वात्मापेक्षयापूर्वभावित्वंतदयोगादित्यर्थः । प्रतीतिमात्रकालत्वंनामार्थप्रती त्योरन्यूनानधिककालत्वं एवंचाविद्याप्रतीतिंप्रतिअविद्यारूपार्थस्यदोषतयाहेतुत्वेप्रोच्यमानेस्वस्मादपिस्वस्यपूर्ववृत्तित्वमायातं तच्चायुक्तमित्यर्थइत्याहुः । संप्रदायस्तुस्वनिर्वाहकत्वेनाविद्याप्रतीतौअविद्यायाएवदोषत्वेऽविद्यायाः प्रतीतिमात्रशरीरत्वेनप्रती तिंविनाकेवलायाः स्वस्याः कदाप्यभावादविद्याप्रतीतौदोषतयाऽविद्यापूर्वमस्तीत्युक्तेऽविद्याप्रतीतिरेवपूर्वमस्तीत्युक्तंस्यात् तथाचा

प्रतीतिमात्रशरीरस्वविषयधीहेतुत्वेनस्वस्यस्वस्मात्पूर्वभावित्वायोगाच्च ॥ बाधकज्ञानस्यापिबाध्यत्वेबाधपरंपरयानवस्था(दैव)यावक्ष्यमाणत्वाच्च ।

विद्याप्रतीत्यपेक्षयाऽविद्याप्रतीतेरेवपूर्वभावित्वप्राप्त्यात्माश्रयइत्यर्थः ॥ यदिविश्वंकल्पितंस्यात्तदासत्यभूतबाधकज्ञानोपेतंस्यादि तितर्केऽप्रयोजकता । विश्वस्यकल्पितत्वेपिबाधकज्ञानस्यनसत्यत्वं तस्यापिबाध्यत्वादित्याशंकायामाह ॥ बाधकेति ॥ तथाचा नवस्थाभियाकिंचिद्बाधकज्ञानंसत्यमंगीकर्तव्यमित्यर्थः । अत्रयत्परेणजल्पितं वेदांतजन्यचरमवृत्तेः कतकरजोवद्वेणुसंघर्षजाग्नि वच्चस्वपरबाधकत्वाभ्युपगमान्नानवस्थेति । तदयुक्तं । स्वेनस्वस्यबाधेबाधकत्वाभिमतस्यबाध्यत्वापातेनविरोधात् अस्मिन्नर्थे मानाभावाच्च दृष्टांतमात्रस्याप्रत्यायकत्वादित्येवमुत्तरत्रनिराकरिष्यामइत्यर्थः । जगदध्यासहेतुदोषादीनांव्यावहारिकत्वेदोषांत

451

SGDF Foundation

482

रमाह ॥ रूप्यादीति ॥ तदेवसत्त्वं दोषसमसत्त्वंव्यावहारिकसत्त्वमित्यर्थः । इहापि जगद्भ्रमेपि तथात्वापत्ते दोंषसमसत्ताक व्यावहारिकसत्तापत्तेः । तथाचरूप्याद्यध्यासेदोषादीनांव्यावहारिकंसत्त्वंदृष्टमितिजगदध्यासेपितथैवेतियदिकल्प्यते तदारूप्या द्यध्यासेऽधिष्ठानस्यापिशुक्तिशकलस्यदोषसमंव्यावहारिकंसत्त्वंत्वद्रीत्यैवदृष्टमितिजगदध्यासेऽधिष्ठानस्यापिब्रह्मणोदोषसमंव्या वहारिकंसत्त्वमेवस्यात् नपारमार्थिकंसत्त्वमितिभावः । ननुरूप्याध्यासेशुक्तेरधिष्ठानत्वेनाधिष्ठानज्ञानाबाध्यंव्यावहारिकस त्त्वंदृष्टं नहिशुक्तिगतंव्यावहारिकंसत्त्वंशुक्तिज्ञानेनबाध्यते तथातत्रदोषादीनामधिष्ठानज्ञानाबाध्यंव्यावहारिकंसत्त्वमस्ति नहि

रूप्याद्यध्यासेधिष्ठानस्यापितदेवसत्त्वंतंत्रमितीहाप्यधिष्ठानस्यापितथात्वापत्तेश्च । नचतत्रा धिष्ठानज्ञानाबाध्यंसत्वंतंत्रं दोषादीनांतुव्यावहारिकंतंत्रमितिवैरूप्यकल्पनमसतिबाधकेयुक्तं।

शुक्तिज्ञानेनरूप्यभ्रमहेतुदोषादिसत्त्वंबाध्यते तथाजगदध्यासाधिष्ठानेब्रह्मणिअधिष्ठानज्ञानाबाध्यंसत्त्वमस्ति नहिब्रह्मज्ञानेनब्रह्म गतंपारमार्थिकंसत्त्वंबाध्यते दोषादीनांतुअधिष्ठानज्ञानबाध्यंसत्त्वं तथाचब्रह्मणोजगदध्यासाधिष्ठानत्वेऽधिष्ठानभूतस्वज्ञानाबा ध्यसत्त्वंतंत्रं । एवंरजताध्यासेशुक्तेरधिष्ठानत्वेपि जगदध्यासेरूप्याद्यध्यासेचहेतुभूतदोषाणांव्यावहारिकसत्त्वंतंत्रमितिवैरूप्यं कल्प्यतइतिपारमार्थिकसत्त्वंसिद्ध्यतिब्रह्मणि तत्राबाध्यत्वरूपसत्त्वांगीकारादतोयुक्तंतस्याधिष्ठानब्रह्मगतत्वमित्याशंक्यनिराक रोति ॥ नचेति ॥ तत्र रूप्याद्यध्यासे ॥ वैरूप्येति ॥ अधिष्ठानज्ञानाबाध्यसत्त्वमधिष्ठानत्वेतंत्रं दोषादीनांव्यावहारिकसत्त्वं

SGDF
Sri Gargeshwari Digital Foundation

जगदध्यासेतंत्रमित्येतत्कल्पनमसतिबाधकेनयुक्तमित्यर्थः । नन्वसतिबाधकइत्युक्तं दोषादीनांमिथ्यात्वस्यैवबाधकत्वेनतदन्यथानुपपत्त्यादोषादीनांव्यावहारिकंसत्त्वंतंत्रतयांऽगीकर्तव्यमित्याशंक्यनिराकरोति ॥ नचेति ॥ इह जगदध्यासे ॥अन्योन्याश्रयादिति ॥ जगदध्याससिद्धौतदंतर्गतदोषादीनांमिथ्यात्वसिद्धिः । तत्सिद्धौचमिथ्याभूतदोषैर्जगदध्याससिद्ध्याव्यावहारिकसत्त्वसिद्धिरित्यन्योन्याश्रयादित्यर्थः । ननुविश्वंयदिकल्पितंस्यात्तदासत्यदोषादियुतंस्यादितितर्केऽप्रयोजकता । दोषाणा

नचेहदोषादीनांमिथ्यात्वमेवबाधकं । अन्योन्याश्रयात् । नचकतिपयाध्यासे
प्रातिभासिकाध्यासेसाद्यऽध्यासेवादोषादिसत्त्वंतंत्रं नत्वधिष्ठानेतरसर्वाध्यासे
व्यावहारिकाध्यासेवाअनाद्यध्यासेवेतियुक्तं । अधिष्ठानेतरसर्वाध्यासएवायु
क्तइत्युच्यमानत्वात् । लाघवेनप्रथमोपस्थितत्वेनचप्रवृत्तिमात्रधूममात्रेप्रति

मभावेपिभ्रमसंभवात् । नन्वध्यासमात्रेदोषसत्त्वमपेक्षितमितिचेत्तत्राह ॥ नचेति ॥ कतिपयाध्यासइति ॥ रूप्याद्यध्यासइत्यर्थः ॥ नत्वित्यादि ॥ प्रकृतोजगदध्यासस्त्वेतादृशइतिभावः । कुतोनचयुक्तमित्यतआह ॥ अधिष्ठानेति ॥ लाघवेनेति ॥ कतिपयाध्यासत्वापेक्षयाध्यासत्वस्यलघुत्वात् सर्वाध्याससिद्धितःप्रथमंरूप्यादिकतिपयाध्यासेध्यासत्वस्योपस्थितत्वात् । अन्यथारूप्याद्यध्यासेऽध्यासत्वस्यासिद्धौतस्यदृष्टांतत्वासंभवात् अतोऽध्यासत्वावच्छेदेनदोषत्वेनचकार्यकारणभावोवाच्यः नकतिप

483

SGDF
Sri Gargeshwari Digital Foundation

याध्यासत्वेनेतिनोक्तविभागोयुक्तइतिभावः । तत्रदृष्टांतःप्रवृत्तीति । यथासंवादिविसंवादिप्रवृत्तिमात्रेसंसर्गधियःकारणत्वं लाघवात् तथाचभ्रमात्प्रवृत्तिसिद्धिः यथावाधूममात्रेवह्नेःकारणत्वं लाघवात् तथाचपर्वतेधूमार्थिनोवह्निसिद्धिः तद्वदितिभावः ॥ अन्यथेति ॥ लाघवानादरइत्यर्थः ॥ संवादीति ॥ तथाचभ्रमात्प्रवृत्तिर्नस्यात् हेत्वभावादितिभावः ॥ अपर्वतीयेति ॥ तथाचपर्वतीयधूमार्थिनस्तदलाभःस्यात् हेत्वभावादितिभावः ॥ अनुमानेति ॥ अपर्वतीयधूमस्यैववह्निकार्यत्वेपर्वतोग्निमान्धू

वह्न्योरिव

संसर्गधीवह्न्योरिवाध्यासमात्रंप्रतितस्यतंत्रत्वाच्च । अन्यथासंसर्गधीवह्नीअपिसंवादिप्रवृत्त्यपर्वतीयधूमौप्रतिहेतूस्यातामित्यनुमानमात्रोच्छेदः । एवंसाधिष्ठानेध्यासेप्रातिभासिकाध्यासेवासाद्यध्यासेवाऽधिष्ठानसत्वंतंत्रं नतुसर्वाध्यासेव्यावहारिकाध्यासेवाअनाद्यध्यासेवेतिचस्यात् । तस्मादध्यासमात्रेधिष्ठानस्यदोषादीनांचाधिष्ठानज्ञानाबाध्यंसत्वंतंत्रमितिजगदध्यासहेतुदोषादयोब्रह्मज्ञानाबाध्याःस्युः ।

484

मवत्त्वादित्यत्रापर्वतीयधूमविवक्षायांस्वरूपासिद्धिः पर्वतीयधूमविवक्षायांवह्न्यकार्यत्वाद्विरुद्धतेत्येवंरीत्यानुमानमात्रोच्छेदप्रसंगइत्यर्थः । कतिपयाध्यासइत्यादेःप्रतिबंदीमाह ॥ एवंसाधिष्ठानेति ॥ रूप्याध्यासइत्यर्थः ॥ नन्विति ॥ जगदध्यासस्त्वेतादृशइतिभावः । तथाचदोषवदधिष्ठानसत्त्वमपिनस्यादितिब्रह्मोच्छेदइतिभावः । अधिष्ठानस्यदोषादीनांचसत्यत्वोपपादकंअनुगतमेकंतंत्रंवदन्दोषादिसत्यत्वोपपादनमुपसंहरति ॥ तस्मादिति ॥ अधिष्ठानस्येति ॥ रूप्यादिभ्रमाधिष्ठानभूतशुक्तेःकाचादेश्चशुक्तिज्ञानाबाध्यत्वादितिभावः ॥ ब्रह्मज्ञानेति ॥ अधिष्ठानभूतब्रह्मज्ञानाबाध्यसत्त्ववंतःस्युरेवेतिसत्यदोषाद्युपेतंस्यादि

॥ २४३ ॥

तिप्रतिकूलतर्कपराहतिःसुस्थैवेतिभावः । संगृह्णाति ॥ एवंचेति ॥ सर्वजगन्मिथ्यात्वसाधकानुमानस्यप्रतिकूलतर्कपराहतिमाह ॥ किंचेति ॥ रूप्यादेर्बाधेनयथाऽसत्त्वेपितज्ज्ञानेबाधाभावात्रजतज्ञानमासीदित्यनुभवेनचसत्यत्वं तथाजगतोऽसत्त्वेपितज्ज्ञानंसत्यमेवस्यादित्यर्थः । पुनःप्रतिकूलतर्कांतरमाह ॥ किंचेति ॥ तदभावार्थं बंधप्रतियोगिकात्यंताभावरूपनिवृत्त्यर्थं । निवृत्तिरूपध्वंसस्यमिथ्याभूतबंधप्रतियोगिकत्वस्यायोगेनअत्यंताभावएववाच्यः । तदर्थंचयत्नोनसंभवतिकुतइत्यतआह ॥ अत्यंताभा

एवंच"लोकेधिष्ठानवत्सत्योदोषादिर्भ्रमकारणं ॥ दृष्टोतोब्रह्मवत्सत्योदोषादिस्स्याज्जगद्भ्रमे" ॥ किंचार्थस्यासत्यत्वेपिज्ञानंसदेवेतिवक्ष्यमाणत्वाद्वित्तिरूपंतद्विशिष्टचिद्रूपंवाघटादिज्ञानंसत्यंस्यात् ॥ किंचबंधस्यात्यंताभावप्रतियोगित्वरूपमिथ्यात्ववत्त्वेतदभावार्थंयत्नोनस्यात् । अत्यंताभावस्यासाध्यत्वात् । नचपारमार्थिकत्वाकारेणात्यंताभावःस्वरूपेणतुनिवृत्तिरितियुक्तं।तस्यनिराकारेब्रह्मणीवस्वरूपाबाधेनाप्युपपत्तेः ।

485

वस्येति ॥ नित्यत्वादितिभावः । ननुप्रपंचस्यस्वरूपेणात्यंताभावोबंधनिवृत्तिरितिनोच्यते किंतुपारमार्थिकत्वाकारेणात्यंताभावःकथ्यते जगत्पारमार्थिकत्वाकारेणकालत्रयेपिनास्तीतियावत् । स्वरूपेणतुनिवृत्तिरूपध्वंसोस्त्येव । नचमिथ्याभूतस्यतदयोगः मिथ्याभूतस्यप्रातिभासिकस्यध्वंसायोगेपिव्यावहारिकस्यतत्संभवादतोयुक्तएवयत्नइत्याशंक्यनिषेधति ॥ नचेति ॥ ब्रह्मणोनिराकारतयापारमार्थिकत्वाकारेणात्यंताभावोस्ति विशिष्टनिषेधस्यविशेष्येबाधेविशेषणविषयकत्वेनब्रह्मणिपारमार्थिकं

SGDF
Foundation

सत्त्वंनास्तीतिलभ्यते । एवंचब्रह्मणिपारमार्थिकत्वस्यनिर्धर्मकतयाऽभावेपिस्वरूपतोननिवृत्तिः किंतुसत्त्वमेव एवंबंधस्यापि स्यादितिभावः ॥ गौरिति ॥ प्रकृतिराद्यंतशून्येत्यर्थः । स्वरूपेणनिवृत्त्यंगीकारेएतच्छ्रुतिविरोधापत्त्यातदनुसरणायेत्यर्थः । अनुवृत्तिः बंधस्य । बंधात्यंताभावस्यासाध्यत्वेपियत्नोघटतइत्याशंक्यनिषेधति ॥ नचेति ॥ तदिति ॥ बंधप्रतीतीत्यर्थः ॥ तस्याइतिं ॥ अर्थज्ञानात्मकोभयविधभ्रमांगीकारेणबंधप्रतीतेरपिमिथ्यात्वेनतन्निवृत्त्यर्थमपियत्नोनसंभवत्येव । नहिरूप्यनि

गौरनाद्यंतवतीत्यादिश्रुत्यनुसरणायपारमार्थिकत्वाकारेणनिवृत्तिःस्वरूपेणत्वनुवृत्तिरित्यापाताच्च । न चतत्प्रतीत्युच्छेदार्थंयत्नः तस्याअपिमिथ्यात्वात् । अन्यथामोक्षेपिबंधप्रतीत्यापत्त्याप्रातीतिकबंधापाता त् ॥ किंचबंधस्यब्रह्मण्यध्यस्तत्वेतन्निदिध्यासनसाध्यतत्साक्षात्कारनिवर्त्यत्वंश्रवणादिनियमादृष्टसापे क्षब्रह्मज्ञाननिवर्त्यत्वंचनस्यात् । नहिदेवतानिदिध्यासनसाध्यतत्साक्षात्कारनिवर्त्यंदुरितंतत्राध्यस्तं

वृत्त्यर्थंयत्नोस्तीतिभावः ॥ अन्यथेति ॥ बंधप्रतीतेर्मिथ्यात्वाभावेबंधप्रतीतेस्सत्यत्वप्राप्त्यानिवृत्त्ययोगेनतदुच्छेदार्थंयत्ना योगेनमोक्षेपिबंधप्रतीतिःस्यादित्यर्थः ॥ प्रातीतिकेति ॥ प्रतीतिविषयबंधेत्यर्थः । प्रतिकूलतर्कांतरमाह ॥ किंचेति ॥ तन्नि दिध्यासनेति ॥ ब्रह्मविषयकनिदिध्यासनेत्यर्थः । आद्येतर्केयद्यन्निदिध्यासनसाध्यसाक्षात्कारनिवर्त्यं तत्तत्रनाध्यस्तमिति ॥ २४४ ॥ व्यतिरेकव्याप्तिमुपपादयति ॥ नहीति ॥ तत्र देवतायां । द्वितीयतर्केयन्नियमादृष्टसापेक्षज्ञाननिवर्त्यंयत्तत्तत्रनाध्यस्तमिति

SGDF
Sri Gargeshwari Digital Foundation

सामान्यतोव्यतिरेकव्याप्तिमुपपादयति ॥ नवेति ॥ नियमजन्यमदृष्टंनियमादृष्टं । तत्र सेतौ । ननुद्वितीयतर्केइष्टापत्तिः ब्रह्मसाक्षात्कारेणबंधनिवृत्तिरूपेमोक्षेजननीयेसहकारितयाश्रवणादिनियमादृष्टापेक्षायाअभावात् श्रवणादिनियमजन्यादृष्ट मपिज्ञानवन्नमोक्षहेतुरितियावत् । तर्हिवैयर्थ्यमेवस्यादितिचेन्न । साक्षात्कारंप्रत्येवकारणत्वाभ्युपगमादित्याशंक्यनिषेधति ॥ नचेति ॥ अवघातेति ॥ सर्वत्रापिक्रियातन्नियमादृष्टयोःफलभेदएवदृष्टोस्ति यथा“(व्रीहीनवहंती)”त्यत्रावहननरूपक्रि यासाध्यंफलंवैतुष्यं अवहननेनैववैतुष्यंसंपाद्यं नतुनखविदलनादिनेत्येवंअवहननरूपक्रियानियमेनकिंचिदवांतरादृष्टंजायते 487

नवादूरगमनादिनियमादृष्टसापेक्षसेतुदर्शननिवर्त्यंदुरितंतत्राध्यस्तं । नच नियमादृष्टंनबंधनिवृत्तौहेतुः किंतुब्रह्मापरोक्षएवेतियुक्तं । अवघातसाध्यवै तुष्यान्यापूर्वस्येवश्रवणसाध्यापरोक्षान्यमुक्तेरेवतत्साध्यत्वात् । अन्यथा

तत्साध्यंवैतुष्यभिन्नंपरमापूर्वरूपंफलमस्तीत्येवंक्रियातन्नियमादृष्टयोःफलभेदोदृष्टः एवंश्रवणादिक्रियासाध्यंफलंब्रह्मापरोक्षं श्र वणादिनैवब्रह्मापरोक्षंसंपाद्यंनान्यथेत्येवंश्रवणादिरूपक्रियानियमेनकिंचिददृष्टंजायते तत्साध्यंफलंब्रह्मापरोक्षाद्भिन्नंमोक्षरूप मेवांगीकार्यमितिनेष्टापत्तिरित्यर्थः । तत्साध्यत्वात् । नियमादृष्टसाध्यत्वात् । ननुसर्वत्रनियमविधिस्थलेक्रियातन्नियमादृष्टयोः फलभेदेपिश्रवणादितन्नियमादृष्टयोरेकफलत्वमेवास्तु तथाचद्वितीयतर्केपुनरिष्टापत्तिरेवेत्यतआह ॥ अन्यथेति ॥ अन्यथे

SGDF
Sri Gargeshwari Digital Foundation

त्यस्यैवविवरणंश्रवणनियमादृष्टसाध्येसाक्षात्कारइति । अंगीकृतइतिशेषः । श्रवणादिरूपक्रियातन्नियमादृष्टयोस्साक्षात्काररूपमेकफलंप्रत्येवहेतुत्वांगीकारेनियमविधित्वमेवनस्यात् । "विधिरत्यंतमप्राप्तेनियमःपाक्षिकेसती"तिवचनात् "व्रीहीनवहंती"त्यत्रवितुषीभावरूपेफलेऽवहनननिरपेक्षनखविदलनादिरूपोपायांतरप्रसक्तौसत्यांअवहननेनैववितुषीभावंसंपादयेत्तेनाऽदृष्टंजायतइत्येवंनियमादृष्टंकल्प्यते एवंसाक्षात्काररूपेफलेश्रवणादिनिरपेक्षोपायांतरप्रसक्तौसत्यांश्रवणादिनैवसाक्षात्कारंसंपादयेदितिनियमेनकिंचिददृष्टंजायतइतिकल्पनीयं नचैवमस्ति श्रवणादिनिरपेक्षोपायांतरप्रसक्तेरेवाऽभावेनोपायांतरप्रसक्त्यधीननि

५१८

श्रवणनियमादृष्टसाध्येसाक्षात्कारेश्रवणनिरपेक्षस्योपायांतरस्याप्रसक्त्यातत्प्रसक्त्यधीननियमविध्ययोगात् । नचपरोक्षज्ञानमेवश्रवणादपरोक्षज्ञानंतुनियमादृष्टादितियुक्तं।श्रवणविधौपरोक्षज्ञानप्रवाहरूपनिदिध्यासनसाध्यापरोक्षज्ञानस्यैवदर्शिनोद्देशात्

यमविध्ययोगादित्यर्थः । श्रवणादिक्रियातन्नियमादृष्टयोःफलभेदात्द्वितीयतर्केपुनरिष्टापत्तिरित्याशंक्यनिराकरोति ॥ नचेति ॥ श्रवणादिति ॥ "आत्मावाअरेद्रष्टव्यःश्रोतव्योमंतव्योनिदिध्यासितव्य"इत्यत्रयादृशज्ञानमुद्दिश्यनिदिध्यासनंविहितं तादृशमेवज्ञानंदर्शिनानिर्दिश्यतादर्थ्येनश्रवणादिकमपिविधीयते अन्यथानिदिध्यासनापेक्षयादृशेरपरोक्षज्ञानोपस्थापकत्वंश्रवणाद्यपेक्षयापरोक्षज्ञानोपस्थापकत्वंचेतिद्वैरूप्यापत्तेः । अतःश्रवणविधेरप्यपरोक्षज्ञानार्थत्वमितिनफलभेदइतिनेष्टापत्तिरितिभावः । ननुनिदिध्यासनविधावपिश्रवणविधाविवपरोक्षज्ञानमेवदर्शिनोद्दिश्यतामित्यतउक्तं परोक्षेत्यादि । निदि ॥ २४५ ॥

ध्यासनस्यपरोक्षज्ञानप्रवाहरूपत्वात्परोक्षज्ञानफलकत्वंनसंभवतीत्यर्थः ॥ **साक्षात्कर्तव्यइति** ॥ " श्रोतव्यआत्मासाक्षात्कर्तव्य"इतिश्रवणादिविधेःसाक्षात्काररूपफलसमर्पकवाक्यांतरसद्भावात्तस्यसाक्षात्कारएवफलंनपरोक्षज्ञानमित्यर्थः ॥ त्वन्मतइति ॥ इदमत्राकूतं । नश्रवणविधौपरोक्षज्ञानस्योद्देश्यत्वं काम्यत्वमे(वह्यु)वोद्देश्यत्वं परोक्षज्ञानेचकामनानसंभवति । तथाहि । ब्रह्मज्ञानंमेभूयादितिहिकामनाकर्तव्या तत्रप्रष्टव्यं ब्रह्मज्ञानंज्ञातंनवा नचेत् ब्रह्मज्ञानंमेभूयादितिकामनायाअयोगः ब्रह्मज्ञानमितिव्यवहारस्यैवायोगात् आद्येज्ञानावच्छेदकतयाब्रह्मणोपिज्ञातत्वेनसुतरांकाम्यत्वायोगः सिद्धेइच्छाविरहादिति

५१९

साक्षात्कर्तव्यइतिश्रुत्यंतराच्च त्वन्मतेपरोक्षज्ञानेकामनायोगेनतस्योद्देश्यत्वायोगाच्च। आपरोक्ष्यस्यैवनियमादृष्टसाध्यत्वेपितत्साध्यदेवतापरोक्ष्यनिवर्त्यदुरितवदध्यस्तत्वायोगाच्च । किंचकल्पितत्वे स्वधीहेत्विंद्रि

भावः । नचभवन्मतेऽपरोक्षज्ञानस्यापिकाम्यत्वायोगः । तत्रापिप्रष्टव्यं अपरोक्षज्ञानमपिज्ञातंनवा नेतिपक्षेकामनाऽयोगः आद्येब्रह्मणोपिज्ञातत्वात्कामनाऽयोगइतिवक्तुंनयुज्यते परोक्षतोज्ञातेब्रह्मणिअपरोक्षज्ञानकामनायाःसंभवात् । नचैवंत्वया वक्तुंशक्यते अपरोक्षतोज्ञातेब्रह्मणिपरोक्षज्ञानकामनाऽसंभवादितिद्रष्टव्यं । श्रवणनियमादृष्टयोःसाक्षात्काररूपैकफलकत्वमंगीकृत्याप्याह ॥ आपरोक्ष्यस्यैवेति ॥ तत्साध्येति ॥ नियमादृष्टसाध्येत्यर्थः ॥ दुरितवदिति ॥ दुरितंयथादेवतायांनाऽध्यस्तंतथेत्यर्थः । मिथ्यात्वानुमानस्यप्रतिकूलतर्कांतरमाह ॥ किंचेति ॥ विश्वस्यकल्पितत्वेप्रतीतिमात्रशरीरत्वरूप

SGDF Foundation

प्रा(तीतिक)तिभासिकत्वापत्त्याज्ञानात्पूर्वमसत्त्वादि(तिभावः)त्यर्थः। स्वशब्देनप्रपंचोग्राह्यः ॥ प्रतिकर्मेति ॥ सर्वसर्वेणदृश्येते त्यतिप्रसंगभंजकेंद्रियसंनिकर्षायोगादि(तिभावः ।)त्यर्थः । प्रतिकूलतर्कांतरमाह ॥ किंचेति ॥ "यतोवा" इत्यादिकंतत्तत्सूत्र

यासन्निकर्षात्प्रतिकर्मव्यवस्थानयुक्तास्यात्।किंचयदिजगत्कल्पितंस्यात्तदात्वन्मतेपि "जन्माद्य स्ययत" इतिसूत्रे "यतोवे"त्यादिश्रुतौचजन्माद्युक्तिः, "ईक्षतेर्नाशब्दं" इतिसूत्रे "तदैक्षत" इत्या दिश्रुतौचईश्वरस्येक्षापूर्वककर्तृत्वोक्तिः, "लोकवत्तुलीलाकैवल्यं" इतिसूत्रे "आप्तकामस्यका स्पृहे "तिश्रुतौचप्रयोजनाभावेपिलीलयासृष्ट्याद्युक्तिः, "वैषम्यनैर्घृण्येनसापेक्षत्वात्" इतिसूत्रे "पुण्येनपुण्यंलोकंनयती"त्यादिश्रुतौचकर्मसापेक्षत्वेनावैषम्योक्तिः, "तेजोतस्तथाह्याह" इतिसूत्रे "वायोरग्नि"रित्यादिश्रुतौचतेजआदेर्वाय्वादिजन्यत्वोक्तिः, "विपर्ययेणतुक्रम" इतिसूत्रे "पृथि व्यप्सुप्रलीयत" इतिश्रुतौचपृथिव्यादीनामबादौलयोक्तिरित्याद्ययुक्तंस्यात् । नहिकल्पितस्यरू प्यादेर्जन्मादिकमीक्षापूर्वंसृष्टत्वंवा तद्भ्रांतेःप्रयोजनापेक्षावाजीवस्यसुखदुःखेश्वरादिर्विषयभ्रांत्ये श्वरस्यवैषम्यादिप्रसक्तिर्वा एकस्यकल्पितस्यकल्पितांतरादुत्पत्तिर्वा तत्रलयोवा दृष्टः युक्तोवा ।

विषयवाक्यंद्रष्टव्यं । कुतोऽयुक्तमित्यतस्तदुपपादयति ॥ नहीति ॥ नहिदृष्टोयुक्तोवेत्यन्वयः । लयशब्दानुसारेणपुल्लिंग प्रयोगइतिज्ञातव्यं । ननुकल्पितस्यापिप्रपंचस्यव्यावहारिकसत्त्वाभ्युपगमेनजन्माद्युक्तिःसंभवति रूप्यादेस्तुप्रातिभासिकत्वा

SGDF
Sri Gargeshwari Digital Foundation

त्तदभावइत्यतआह ॥ रूप्यादाविति ॥ तद्विशेषः कल्पितत्वविशेषः । तथाचजगतोऽध्यस्तत्वाज्जन्मादिकंनस्यादितिभावः । कुतोनतंत्रमित्यतआह ॥ ज्ञानेति ॥ वयमपिवदामः ज्ञाननिवर्त्यत्वेपिप्रातिभासिकत्वमेवतंत्रं नाध्यस्तत्वं तथाचजगतोऽप्रातिभासिकत्वाज्ज्ञाननिवर्त्यत्वमपिनस्यादितिभावः ॥ अनुमानेति ॥ अपर्वतीयधूमंप्रतिवह्नेर्जनकत्वापत्तौधूममात्रेवह्निव्याप्त्यसिद्ध्याऽनुमानमात्रोच्छेदःस्यादित्यर्थः । यदुक्तंतद्भ्रांतेःप्रयोजनापेक्षानदृष्टायुक्तावेति तदयुक्तं लोकेमायाविनोभ्रामयितुःप्रयोजनापेक्षादर्शनात् ईश्वरस्यापिमायाशबलस्यतथात्वेनप्रयोजनापेक्षाप्रसक्तौसत्यां "लोकवदि"तिसूत्रेणसमाधीय

रूप्यादौचजन्मेक्षापूर्वसृष्टत्वाभावेध्यस्तत्वमेवतंत्रं नतुतद्विशेषःप्रातिभासिकत्वंतंत्रं ज्ञाननिवर्त्यत्वेपि तस्यैवतंत्रत्वापातात् अनुमानमात्रोच्छेदस्योक्तत्वाच्च । नचेश्वरस्यमायाविवद्भ्रामयितृत्वात्प्रयोजनादि प्रसक्तिः। भ्रामयितुरीश्वरस्यापिसपरिकरस्यजीवैरध्यस्तत्वात् । नहीश्वरःस्वेनवाचिन्मात्रेणवाध्यस्तः ।

तइत्याशंक्यनिषेधति ॥ नचेति ॥ सपरिकरस्य देहादिविशिष्टस्य ॥ जीवैरिति ॥ तथाचाकाशादिभ्रामयितुरीश्वरस्यसिद्धौभौतिकदेहादिमतांजीवानांसिद्धिः जीवसिद्धौचजीवैरध्यस्तस्यसपरिकरस्येश्वरस्यसिद्धिरित्यन्योन्याश्रयइत्यर्थः । ननुनजीवैरीश्वरोध्यस्तः । येनाऽन्योन्याश्रयःस्यादित्यतआह ॥ नहीति ॥ ईश्वरस्यकल्पितत्वं(तावत्सि)तवसिद्धं जीवैरकल्पितत्वे न्या. श्री. ४२ स्वेनचिन्मात्रेणवाकल्पितत्वं । नाद्यः । स्वस्यस्वस्मात्पूर्ववृत्तित्वाभावात् । नद्वितीयः । चिन्मात्रस्यकल्पकत्वोपयुक्तदेहाद्यभावात् ।

५९१

SGDF
Sri Gargeshwari Digital Foundation

५९२

तथाचनताभ्यामीश्वरःकल्पितइत्यर्थः । नन्वीश्वरस्यकल्पकाभावेपिकल्पितत्वमस्त्वित्यतआह ॥ नचेति ॥ तथाचपरिशेषेणजीवकल्पितएवेश्वरोवाच्यः । तत्रचान्योन्याश्रयउक्तएवेतिभावः । एकस्यकल्पितस्यकल्पितांतरादुत्पत्तेरदर्शनाद्वायोरग्निरित्यादिश्रुतौतेजआदेर्वाय्वादिजन्यत्वोक्तिरयुक्तास्यात् । ततश्चश्रुतेर्निर्विषयत्वंस्यादित्युक्तमयुक्तं । कल्पितेनवास्तवोत्पत्तेरभावेपिवाय्वादिभ्योऽग्न्यादिकमुत्पद्यतइतिजीवानांभ्रमस्यविद्यमानत्वात् जीवभ्रमसिद्धार्थावलंबनेनसविषयत्वोपपत्तिरित्याशंक्यनिषेधति ॥ नचेति ॥ आदिकालीनवाय्वादेःप्रत्यक्षागोचरत्वेनतत्रप्रत्यक्षेणजन्यजनकभावभ्रमायोगादित्यर्थः । ननुजीवानामेतादृशभ्र

नचकल्पकंविनाकल्पना । नचजीवानांवाय्वादिभ्योऽग्न्याद्युत्पत्तिभ्रमोवास्ति यःश्रुतेरालबनंस्यात् । नचभ्रांतिंविनाकल्पितमस्ति । नचैतद्वाक्यजभ्रांतिसिद्धालंबनेनैवएतद्वाक्यस्यप्रामाण्यं।बौद्धागमस्यापितत्प्रसंगात्। त्वन्मतेभ्रांतिहेतूनांदेहेंद्रियादीनांपृथिव्यादिकार्यत्वात्।

माभावेपिवायोस्सकाशादग्न्युत्पत्तिःकल्पितास्ति तादृशकल्पितार्थविषयकतयाआलंबनवत्तोपपद्यतइत्यतआह ॥ नचेति ॥ ननुप्रत्यक्षेणैतादृशभ्रमासंभवेपिवायोरग्निरित्यादिवाक्येनैवअग्न्यादीनांजन्यजनकभावभ्रमोभवति तादृशभ्रमसिद्धार्थावलंबनेनैतद्वाक्यस्यप्रामाण्यमुपपद्यतइत्याशंक्यनिराकरोति ॥ नचेति ॥ बौद्धेति ॥ केशोल्लुंठनसप्तघटिकाभोजनप्रतिपादकबौद्धागमजन्यभ्रांतिसिद्धैतदर्थावलंबनेनैवबौद्धागमस्यापिप्रामाण्यंस्यादित्यर्थः । एतद्वाक्यजन्यभ्रांतिसिद्धार्थावलंबनेनैतद्वाक्यस्यप्रामाण्यमित्युक्तं तत्रपृच्छामः एतद्वाक्यजन्यभ्रांतिर्जीवानामुतेश्वरस्य नाद्यइत्याह ॥ त्वन्मतइति ॥ पृथिव्यादीति ॥ देहस्यपृ

॥ २४७ ॥

५९३

थिवीकार्यत्वात्इंद्रियाणांतेजःकार्यत्वादितिद्रष्टव्यं । वायोरग्निरित्यादिवाक्याद्देहादिमतोजीवस्यतथाविधभ्रांतिसिद्धौतत्प्रमाणकवाय्वादिस्वरूपसिद्धिः तत्सिद्धौचवाय्वाद्यारब्धजीवसिद्धिरित्यन्योन्याश्रयादित्यर्थः । एतद्वाक्यजन्येश्वरभ्रांतिसिद्धवाय्वादिकमेवैतद्वाक्यालंबनमितिद्वितीयोपिपक्षोनेत्याह ॥ ईश्वरस्यचेति ॥ देहादीति ॥ देहादीनांचपृथिव्यादिकार्यत्वादित्यपिद्रष्टव्यं । तथाचवायोरग्निरित्यादिवाक्याद्देहेंद्रियादिमतईश्वरस्यतथाविधभ्रांतिसिद्धौतत्प्रमाणकवाय्वादिस्वरूपसिद्धिः तत्सिद्धौचवाय्वाद्यारब्धदेहेंद्रियादिमदीश्वरसिद्धिरित्यन्योन्याश्रयइतिभावः । विश्वमिथ्यात्वसाधकानुमाननिराकरणमुपसंहरति ॥ त

ईश्वरस्यचाभ्रांतत्वात् । भ्रांतत्वेवातद्भ्रांतेरपिदेहादिकार्यत्वादितिदिक् । तस्मान्नानुमानं विश्वमिथ्यात्वेमानं । मिथ्यात्वहेतूनांप्रतिकूलतर्काः ॥ २५ ॥ नापिश्रुतिः । श्रुत्यास्वस्वरूपस्वप्रामाण्यतद्धेतुयोग्यतादेर्मिथ्यात्वाबोधनेप्रत्यक्षादिसिद्धतत्सत्यत्वोपजीवनेब्रह्मेतर

स्मादिति ॥ ७ ॥ मिथ्यात्वहेतूनांप्रतिकूलतर्कविवरणं ॥ २५ ॥ श्रुतिश्चात्रप्रमाणमितिसामान्येनोक्तांमिथ्यात्वश्रुतिंनिराकरोति ॥ नापिश्रुतिरिति ॥ तात्विकेविश्वमिथ्यात्वेश्रुतिरपिमानंनेत्यर्थः। "नेहनाने" तिश्रुतिःश्रोत्रप्रत्यक्षादिसिद्धस्वरूपस्वप्रामाण्यतद्धेतुयोग्यतादेर्मिथ्यात्वमबोधयित्वाप्रत्युतस्वस्वरूपादिसत्यत्वमुपजीव्यसर्वंमिथ्यात्वंबोधयति । उतस्वस्वरूपस्वप्रामाण्यतद्धेतुयोग्यतादेर्मिथ्यात्वंबोधयित्वासर्वंमिथ्यात्वंबोधयति । नाद्यइत्याह ॥ श्रुत्येति ॥ तत्सत्यत्वेति ॥ स्वस्वरू

SGDF Foundation

पादिसत्यत्वेत्यर्थः ॥ **सर्वेति** ॥ स्वस्वरूपादेर्मिथ्यात्वाबोधनादित्यर्थः । किंचसर्वंमिथ्यात्वंबोधयंत्याश्रुत्यासन्घटइत्यादिप्रत्यक्ष सिद्धंघटादिकंधर्मीकृत्यतत्रमिथ्यात्वंबोधनीयं । तन्नसंभवति । तदुपजीवनेनप्रवृत्तायाःश्रुतेस्तद्बाधनासामर्थ्यात् अतःप्रत्यक्षा दिसिद्धघटादिमिथ्यात्वासिद्धिः तदुपजीवनेनप्रवृत्तस्यापितद्बाधकत्वंकिंनस्यादित्यतआह ॥ **संनिपातेति** ॥ यत्सन्निपातेनय दुपजीवनेनलक्षणंस्वरूपंयस्यविधेः सविधिस्तस्यस्वोपजीव्यस्यविघातस्यानिमित्तमित्यर्थः । यदुपजीवनेनयत्प्रवर्तते सतस्यबाधको नेतियावत् । तथाहि शतानिसहस्राणीत्यत्रशतशब्दात्जसि "जश्शसोःशिः" इतिसूत्रेणजसश्शीत्यादेशे "शिसर्वनामस्थान" मिति(शिप्रत्ययस्यस)शेःसर्वनामस्वानसंज्ञायां "लशक्वतद्धित" इतिशकारलोपेशतइइतिजाते "नपुंसकस्यझलच" इतिसूत्रेणस

सर्वमिथ्यात्वासिद्धेः । सन्निपातलक्षणोविधिरनिमित्तंतद्विघातस्ये

तिमहाभाष्योक्तन्यायेनप्रत्यक्षादिसिद्धघटादिमिथ्यात्वासिद्धेश्च ।

र्वनामस्थानसंज्ञिकशिप्रत्ययेपरेनुमागमेशतन्इइतिजाते "सर्वनामस्थानेचाऽसंबुद्धौ" इत्युपधादीर्घेशतान्इशतानीतिभवति । त दिदमयुक्तं "ष्णांताषट्" षांतानांताचसंख्याषट्संज्ञास्यादितिनांतसंख्यावाचिशतन्शब्दस्यषट्संज्ञायां "षड्भ्योलुक्" षट्संज्ञके भ्यःपरयोर्जश्शसोर्लुक्स्यादितिशिप्रत्ययलोपेतन्निमित्तकदीर्घस्याप्यभावेशतन्सहस्रन्इत्येवस्यान्नतुशतानीत्यादीतिशंकायांअयं न्यायःप्रवृत्तः । नात्रशिप्रत्ययलोपः सर्वनामस्थानभूतशिप्रत्ययेपरेनुमागमस्यविहितत्वाच्छिप्रत्ययसन्नियोगेनप्राप्तोनुम् "ष्णां ताषडि" तिषट्संज्ञाद्वाराप्राप्तस्य "(षड्भ्य)" इतिशिप्रत्ययलोपस्यननिमित्तं । एवंचशिप्रत्ययलोपाभावेनतत्प्रयुक्तोपधादीर्घेसति

SGDF Sri Gargeshwari Digital Foundation

शतानीत्यादिभवतीत्युदाहरणंद्रष्टव्यं । नद्वितीयइत्याह ॥ बोधनइति ॥ श्रुतिबोध्यार्थस्य सर्वमिथ्यात्वस्य । कुतइत्यतआह ॥ शब्दबोध्यस्येति ॥ अर्थस्येत्यर्थः ॥शब्देति॥ शब्दस्वरूपेत्यर्थः ॥ नियमादिति ॥ अनेनविश्वमिथ्यात्वबोधकत्वेनाभिमता श्रुतिःस्वस्वरूपप्रामाण्ययोग्यतादिसमसत्ताकस्वबोध्यार्थयुक्ता प्रमाणशब्दत्वात्संमतवदित्यनुमानमुक्तंभवति । नन्वेवंचेत् तवैवंभविष्यतीतिस्वाप्नदेवतावाक्यंकिंचिदस्ति । तद्वाक्यस्वरूपंमिथ्यात्वान्नास्त्येव । तन्निष्ठेयोग्यताप्रामाण्येअप्यसतीएव बोध्यार्थश्चसन् अर्थक्रियाकारित्वानुभवात् एवंचतत्रप्रमाणशब्दत्वमस्ति स्वस्वरूपयोग्यतादिसमसत्ताकबोध्यार्थयुक्तत्वाभावाद्व्य

बोधनेश्रुतिबोध्यार्थस्यतात्विकत्वासिद्धेः । शब्दबोध्यस्यशब्दतत्प्रामाण्ययोग्यतादिनासमसत्ताकत्वनियमादित्युक्तत्वात् । सदर्थेस्वाप्नदेवतादिवाक्येपियोग्यताप्रामाण्येअपिसतीएव । शब्दस्वरूपमपिममसत्यं

भिचारइत्यतआह ॥ सदर्थइति ॥ स्वस्वरूपसत्त्वस्यपरासंमतत्वाद्योग्यताप्रामाण्येअपीत्युक्तं । वाक्यस्यसदर्थ(क)त्वांगीकारे योग्यताप्रामाण्ययोरपिसत्त्वंप्राप्तमेव परस्परान्वयाबाधरूपयोग्यतायाःप्रामाण्यस्यचार्थसत्ताघटितत्वात् । अतोनव्यभिचारइतिभावः । ननुयोग्यताप्रामाण्ययोस्सत्यत्वेनतत्समसत्ताकबोध्यार्थयुक्तत्वेपिस्वाप्नवाक्यस्वरूपस्यैवाभावेनतत्समसत्ताकबोध्यार्थयुक्तत्वंनास्तीतिपुनर्व्यभिचारइत्यतआह ॥ शब्दस्वरूपमिति ॥ तथाचममतेसाध्यस्यापिसत्त्वान्नव्यभिचारइतिभावः । ननुमद्रीत्यातावद्व्यभिचारःस्यादेवेत्यतःपूर्वंत्वयातत्रत्वद्रीत्याव्यभिचारेचोदितेतत्रसाध्योपपादनंकृतं वस्तुतस्तुतत्रत्वन्मतेहेतो

SGDF
Sri Gargeshwari Digital Foundation

५९६

रेवाभावान्नव्यभिचारइत्याह ॥ तवत्विति ॥ प्रमाणशब्दत्वादित्यस्यशब्दत्वेनप्रमाणत्वादित्यर्थः । त्वन्मतेतुस्वाप्नंदेवतावाक्यं शब्दत्वेननप्रमाणं सत्यपिशब्दत्वेप्रामाण्याभावात् । तथाहि । लौकिकेपौरुषेयवाक्येप्रामाण्यप्रयोजकत्वेनक्लृप्तायाआप्तेःस्वाप्नदे वतावाक्येऽभावात् तथावेदवाक्येप्रामाण्यप्रयोजकत्वेनक्लृप्तस्यापौरुषेयत्वस्याप्यभावात् । अतोहेतोरेवाभावान्नव्यभिचारइति भावः । तर्हिसदर्थकत्वंकथमितिपृच्छति ॥ किंत्विति ॥ उत्तरमाह ॥ यादृच्छिकेति ॥ भ्रांतप्रतारकवाक्यवद्यादृच्छिकसं वादि ततश्च" यज्जातीयानंतरंनियमेनकार्योत्पत्तिस्तदत्रसाधनंविवक्षित "मितिवचनादेतादृशकरणत्वगर्भप्रमाकरणत्वरूपंप्रामा ण्यंतत्रनास्तीतिनव्यभिचारइत्यर्थः । अस्तुवाप्रामाण्यं तथापितत्शब्दत्वेननप्रमाणं किंतुलिंगत्वेनैवेत्यतोपिनव्यभिचारइत्याह ॥

तवतुनतच्छब्दत्वेनमानं । आप्त्यपौरुषेयत्वयोरभावात् । किंतुया
दृच्छिकसंवादिवा उपश्रुतिवत्तादृशशब्दज्ञानंलिंगत्वेनप्रमाणंवा ।

तादृशेति ॥ अभिमतार्थसाधकस्वाप्नदेवतावाक्यजन्यज्ञानमित्यर्थः । तत्रदृष्टांतउपश्रुतिवदिति । अपभ्रष्टवाक्यवदित्यर्थः । यथा शकुनार्थकस्मिंश्चिद्गृहेतंडुलान्स्थापयित्वानिलीनस्सन्नवस्थितस्तद्गृहस्थैःस्वगृहकृत्याद्यर्थंशब्देप्रयुक्तेसतितंश्रुत्वाततःस्वाभिमतार्थ मनुमिमीते तत्रयथातद्वाक्यंनशब्दत्वेनस्वाभिमतार्थेप्रमाणं किंतुलिंगतयैव तथास्वाप्नदेवतावाक्यमपिलिंगत्वेनैवप्रमाणमित्यर्थः। तथाचतस्यप्रमाणत्वेप्यशब्दत्वान्नव्यभिचारइतिभावः । ननुश्रुत्यायोग्यतादीनांमिथ्यात्वबोधनेशब्दबोध्यस्यशब्दस्वरूपयोग्यता ॥ २४९ ॥
दिस(मानस)मसत्ताकत्वनियमाच्छ्रुतिबोध्यस्यसर्वमिथ्यात्वरूपार्थस्यतात्विकत्वासिद्धिरित्ययुक्तं । उक्तनियमस्यान्यत्रगामानये

त्यादिवाक्येसत्त्वेपिप्रकृतेऽभावात् योग्यतादेःश्रुतिबोध्यतात्विकमिथ्यात्वसमसत्ताकत्वेसत्यत्वप्राप्त्याताविकसर्वमिथ्यात्वश्रुति विरोधादित्याशंक्यनिषेधति ॥ नचेति ॥ स्वर्गेति ॥ यथा "स्वर्गकामोयजेते" त्यत्रसर्वेषांत्रिवर्णेतरेषामपिनयजनेऽधिकारोऽस्ति । किंत्वग्निश्च विद्याचाऽग्निविद्येयेषांस्तस्तेषामेवयागेधिकारः अग्निवेद विद्ययोश्चोपजीव्यत्वादग्निविद्ययोश्चत्रिवर्णेतरेषामभावान्नयागे धिकारइत्येवंस्वर्गकामइतिसामान्यतःश्रुतस्यापिअग्निविद्यावद्विषयकत्वेनसंकोचःक्रियते तद्वदित्यर्थः । षष्ठेप्रथमपादेविचारितं । "चातुर्वर्ण्यमविशेषादि "त्यत्र अग्निहोत्रादिषुकिंचतुर्वर्णानामधिकारउतापशूद्राणामितिसंशयेविधिवाक्येषुविशेषाश्रवणाच्चतुर्व

नचतात्विकसर्वमिथ्यात्वपरश्रुतिबलादिहसमसत्ताकत्वनियमभंगः । "स्वर्गकामोयजेते" त्यादिविधेरु
पजीव्याग्निविद्यावद्विषयकत्वेनेवद्वैतनिषेधस्यापिस्वोपजीव्ययोग्यतादीतरविषयकत्वेनसंकोचस्यवास्र
ष्ट्यादिश्रुतेरिवकल्पितविषयत्वस्यवोपपत्तौश्रुतेस्तात्विकसर्वमिथ्यात्वपरत्वकल्पनेऽन्योन्याश्रयात् ।

र्णानामितिपूर्वःपक्षः अग्निहोत्रादिकर्मणामग्निविद्यासापेक्षत्वादग्निविद्ययोश्चाधानोपनयनपूर्वकाध्ययनसाध्यत्वात्तयोश्च "वसंतेब्रा ह्मणोऽग्नीनादधीतग्रीष्मेराजन्यःशरदिवैश्यः" "वसंतेब्राह्मणमुपनयीतग्रीष्मेराजन्यंशरदिवैश्य "मितित्रिष्वेवदर्शनाच्छूद्रेष्वपित त्कल्पनेमानाभावादपशूद्राणामेवाधिकारइतिसिद्धांतः ॥ योग्यतादीति ॥ योग्यताद्यपेक्षयाइतरत्द्वितीयंनास्तीत्यर्थपरत्वमित्य र्थः ॥ सृष्ट्यादीति ॥ सृष्टिवाक्यस्ययथातवमतेकल्पितसृष्टिविषयत्वं तथाद्वैतनिषेधवाक्यस्यापिकल्पितोयोद्वैतनिषेधस्तद्विष यत्वमस्तु । तथाचसतिश्रुतिबोध्यार्थस्ययोग्यतादिसमानमसत्ताकत्वसिद्धिरित्यर्थः ॥ अन्योन्याश्रयादिति ॥ शब्दस्वरूपादेस्त

197

SCDF Foundation

दर्थस्यचसमसत्ताकत्वनियमत्यागेसतिबाधकाभावेसिद्धेश्रुत्यर्थस्यसर्वमिथ्यात्वस्यतात्विकत्वसिद्धिस्तत्सिद्धौचतद्बलादुक्तनियम त्यागइत्यन्योन्याश्रयादित्यर्थः । संगृह्णाति ॥ तस्मादिति ॥ तुल्यत्वात् तुल्यसत्ताकत्वात् शब्दस्वरूपंचग्राह्यं । नचेत् शब्दार्थतद्योग्यतयोःशब्दस्वरूपस्यचसत्यत्वाभावे ॥ वृषलोद्वाहेति ॥ वृषलोद्वाहेविहितमंत्रस्वरूपंतद्योग्यतादिकंचाऽसदेव अतःतत्‌नमानमित्यर्थः ॥ एवमिति ॥ यथास्वरूपयोग्यतादेर्मिथ्यात्वबोधनाबोधनपक्षयोर्मिथ्यात्वश्रुत्यनुपपत्तिस्तथेत्यर्थः ॥ स्वव्याघातइति ॥ द्वितीयमात्रनिषेधकत्वांगीकारात्द्वितीयाभावमपिनिषेधतिचेत्तर्हिस्वेतरद्वितीयाभावनिषेधरूपस्यद्वितीय

तस्मात्"शब्दार्थतद्योग्यतयोस्तुल्यत्वाद्योग्यतासती ॥ नचेद्वेदोप्रमाणंस्याद्वृषलोद्वाहमंत्रवत्॥"एवंश्रुतिः

स्वबोध्यंद्वितीयाभावमपिनिषेधतिचेत् स्वव्याघातः। नचेत्सर्वमिथ्यात्वासिद्धिरिति । किंचोक्तरीत्याश्रु

त्याप्यविद्याकार्यस्यविश्वस्यनस्वरूपेणत्रैकालिकनिषेधः । पारमार्थिकत्वेननिषेधस्तुनिर्धर्मकस्यात्मनोपि ।

स्यैवप्राप्तत्वात्स्वव्याघातइत्यर्थः ॥ सर्वेति ॥ ब्रह्मव्यतिरिक्तस्यसर्वस्यमिथ्यात्वंनसिद्ध्यति । ब्रह्मव्यतिरिक्तस्यद्विती(याभावरू) यस्याभावरूपद्वितीयस्यनिषेधाऽबोधनादित्यर्थः । त्रैकालिकनिषेधःकर्तुंशक्यतइतिशेषः । तथात्वेऽसद्विलक्षणस्वरूपांगीकार विरोधःस्यादित्याशयः । निर्धर्मकस्येतिहेतुगर्भं । आत्मनःपारमार्थिकत्वरूपधर्माभावेपिनमिथ्यात्वं । तद्वत्प्रपंचस्यापीत्यर्थः । किंच"नेहनाने"तिश्रुत्याप्रत्यक्षसिद्धप्रपंचस्यनमिथ्यात्वंबोधयितुंशक्यं प्रत्यक्षविरोधादेव । अतःप्रत्यक्षसिद्धप्रपंचभिन्नस्यैव कस्यचित्प्रपंचस्यनिषेधोस्तु नतुप्रत्यक्षसिद्धस्य । अतएतत्प्रपंचस्यसत्यत्वसिद्धिः। प्रत्यक्षविरोधोमयानाद्रियतइतिचेन्न । तथात्वे

५९४ ५९८

SGDF
Sri Gargeshwari Digital Foundation

“तत्त्वमसी”त्यादौप्रत्यक्षविरोधभीत्यातत्त्वंप(दवाच्यवि)दार्थविशिष्टैक्यपरत्वंविहायचिन्मात्रैक्यपरत्वमंगीकृतं तन्नस्यादित्याह ॥ अपिचेति॥प्रत्यक्षेति॥ “अविरुद्धविशेषणद्वयप्रभवत्वेपि(विरुद्धयो)विशिष्टयोर्द्वयोः ॥ घटतेनयदैकतातदासुतरांतद्विपरीतरूपयो”रितिवचनादितिभावः ॥ अन्यथेति ॥ नेहनानेतिश्रुत्याऽस्यैवप्रपंचस्यनिषेधःक्रियते नचप्रत्यक्षविरोधः श्रुतिसिद्धसत्त्वनिषेधरूपमिथ्यात्वस्यतात्विकत्वात् प्रत्यक्षगृहीतस्यतत्सत्त्वस्यातात्विकत्वेनविरोधाभावादित्यंगीकारइत्यर्थः । निषेधात् स

अपिच “तत्वमसी” त्यनेनप्रत्यक्षाविरोधायतत्त्वंपदलक्षितयोरैक्यमिवमिथ्यात्वश्रुत्यापितद्विरोधायप्रत्यक्षादिसिद्धादन्यस्यैवमिथ्यात्वंबोध्यमितिनतत्सिद्धविश्वमिथ्यात्वसिद्धिः । अन्यथा “नेहनाने”तिनिषेधाद्विश्वस्यात्यंतासत्त्वं तात्विकंख्यात्यन्यथानुपपत्तिसिद्धमसद्वैलक्षण्यंत्वतात्विकंस्यात् । किंचश्रुतेस्तात्पर्यंचैतन्यमात्रेवाद्वितीयाभावविशिष्टेवा तदुपलक्षितेवा । नाद्यः । विश्वमिथ्यात्वासिद्ध्याइष्टापत्तेः । तस्यस्वप्रकाशस्यनित्यसिद्धत्वेनश्रुते

त्त्वनिषेधात् । नन्वसच्चेन्नप्रतीयेतेतिख्यात्यन्यथानुपपत्त्याऽसद्वैलक्षण्यस्यसिद्धत्वात्तद्विरोधइत्यतआह ॥ ख्यातीति ॥ तथा चश्रुत्यन्यथानुपपत्तिसिद्धयोरप्यर्थयोस्तात्विकत्वातात्विकत्वविषयतयात्वन्मतेप्यविरोधःस्यादितिभावः ॥ इष्टापत्तेरिति ॥ नेहनानेतिश्रुतेश्चैतन्यमात्रपरत्वेनमिथ्यात्वेतात्पर्याभावेनमिथ्यात्वासाधकत्वादिष्टापत्तिरितिभावः । तस्य चिन्मात्रस्य ॥

SGDF
Sri Gargeshwari Digital Foundation

वैयर्थ्यादिति ॥ चिन्मात्रप्रतिपादकत्वांगीकारेश्रुतिवैयर्थ्यमेवस्यात् तस्यस्वप्रकाशत्वेननित्यसिद्धत्वादितिभावः ॥ काकेति ॥ यथोपलक्षणस्यकाकवद्गृहमितिकाकवत्त्वप्रकारकज्ञानहेतुत्वं तथेत्यर्थः । किंचद्वितीयाभावरूपोपलक्षणेनोपलक्ष्यंकिंशुद्धस्वरूपमात्रं विशिष्टंवा शुद्धगतंधर्मांतरंवेतिविकल्प्याद्यंनिराह ॥ चिन्मात्रस्येति ॥ उपलक्षणंविनैवस्वप्रकाशत्वेनतस्यनित्यसिद्धत्वादितिभावः । द्वितीयंनिराचष्टे ॥ अन्यस्येति ॥ शुद्धात्मनएवमुमुक्षुज्ञेयत्वेनविशिष्टस्यमुमुक्ष्वज्ञेयत्वाच्छास्त्रेणोपलक्षणद्वा

वैयर्थ्याच्च । नद्वितीयः । श्रुतेरखंडार्थत्वहानेः । अतएवनतृतीयः । काकवदितिवद्वितीयाभाववदिति सप्रकारज्ञानहेतुत्वेअखंडार्थत्वायोगात् । चिन्मात्रस्यनित्यसिद्धत्वेनान्यस्यचमुमुक्ष्वज्ञेयत्वेनकाकेनसंस्थानविशेषस्येवद्वितीयाभावेनोपलक्ष्यस्यान्यस्याभावेनतस्योपलक्षणत्वायोगाच्च । किंचश्रुतिबोध्यस्य विशेषणस्यवोपलक्षणस्यवाद्वितीयाभावस्यसत्त्वेअद्वैतहानिः। मिथ्यात्वेचदंडहीनेदंडीतिवाक्यवत्काकहीनेकाकवदित्यादिवाक्यवच्चाद्वैतवाक्यस्यातत्वावेदकतास्यात् । नचतत्रातात्पर्यान्नातत्वावेदकता ।

रापिशुद्धस्यैवबोधनीयत्वान्नविशिष्टस्योपलक्ष्यत्वमित्यर्थः । तृतीयंनिराकरोति ॥ काकेनेति ॥ अन्यस्य ब्रह्मगतविशेषांतरस्य तस्य द्वितीयाभावस्य ॥ अद्वैतवाक्यस्येति ॥ द्वितीयाभावबोधकस्येत्यर्थः ॥ तत्रेति ॥ मिथ्याभूतद्वितीयाभावबोधकत्वेपिद्वितीयाभावेतात्पर्याभावान्नातत्वावेदकत्वमित्यर्थः । तत्वावेदकत्वंनामतात्पर्येणतद्बोधकत्वंतन्नांगीकृतमितिभावः ॥ ॥ २५१ ॥

आद्येति॥ मिथ्याभूतद्वितीयाभावबोधकत्वेपितत्रतात्पर्याभावेचिन्मात्रबोधकत्वापत्त्यातत्रैवतात्पर्यप्राप्तेःकिंचेत्यादिनाविकल्पितपक्षेषुआद्यपक्षांतर्भावप्राप्त्यातत्रचनाद्यइत्यादिनादूषणद्वयमुक्तमेवेतिभावः ॥ अतात्पर्यमिति ॥ नेहनानेतिश्रुतेर्द्वितीयाभावेऽतात्पर्यमित्यर्थः ॥ तदिति ॥ मानांतरेत्यर्थः ॥ आत्मवपोत्खननादाविति ॥ "प्रजापतिरात्मनोवपामुदखिददि"त्यादौआंतरधातुविशेषभूतायावपायाःप्रजापतिनास्वशरीरान्निष्कासनंकृतमित्येवंरूपेवाक्यार्थेतात्पर्यंनास्ति । कुतः प्रजापतेरधुनापिजीवनग्राहकमानविरोधात् वपोत्खननेचमरणस्यैवप्राप्त्याजीवनस्यैवाऽनुपपत्तेरितिभावः ॥ यथाग्रहैकत्वादाविति ॥

आद्यपक्षांतर्भावापाताच्च । किंचातात्पर्यंहिमानांतरप्राप्त्यावा यथावायुक्षेपिष्ठत्वादौ तद्विरोधाद्वा यथात्मवपोत्खननादौउद्देश्यविशेषणत्वादिनावायथाग्रहैकत्वादौ । नाद्यः ।

तृतीयाध्यायेप्रथमपादेचिंतितं"एकत्वयुक्तमेकस्यश्रुतिसंयोगादि"त्यत्र ज्योतिष्टोमेश्रूयते "दशापवित्रेणग्रहंसंमार्ष्टीति" । दशापवित्रंवासःखंडः । ग्रहंयज्ञपात्रं । (तत्रसंशयःग्रहैकत्वंविवक्षितंनवेति । श्रु)ग्रहैकत्वंविवक्षितंनवेतिसंशयेश्रुतस्याविवक्षायांकारणाभावाद्विवक्षितमेवैकत्वमित्येकमेवग्रहंसंमार्ज्यादित्यर्थइतिपूर्वपक्षः । सिद्धांतस्तु । ग्रहैकत्वंविवक्षितंचेत्तर्हिसंमार्गवद्विधेयंवास्याद्ग्रहवदुद्देश्यंवाग्रहत्वव(दुद्देश्यवि)द्विशेषणंवा । नाद्यः । ग्रहमुद्दिश्यतत्रैकत्वसंमार्गयोर्द्वयोर्विधानेवाक्यभेदापत्तेः । नद्वितीयः । तथात्वेग्रहमेकत्वंचोद्दिश्यसंमार्गोविधीयतइतिवाक्यभेदएव ग्रहैकत्वस्यसंमार्गायोगेनवाक्यस्यबाधितार्थत्वप्रसंगाच्च।

SGDF Foundation

नतृतीयः । एकत्वविशिष्टंग्रहमुद्दिश्यसंमार्गोविधीयतइतिस्यात् । तन्नसंभवति । विशिष्टस्ययद्भवतितद्विशेषणस्यापीतिन्यायेनै कत्वेपिसंमार्गान्वयापत्त्याबाधापत्तेः"शोधनीयाग्रहास्सर्वेवासःखंडेनचार्त्विजे"तिवाक्यांतरविरोधाच्च । अतएकत्वमविवक्षित मितिद्वादशापिग्रहाःसंमार्जनीयाइति। एवंचग्रहैकत्वस्येवब्रह्मणिद्वितीयाभावस्यश्रुतत्वेपिविशेषणत्वेनतत्रश्रुतेस्तात्पर्यंनास्तीत्यर्थः ॥ त्वय्यैवेति ॥ अद्वैतश्रुतेरननुवादकत्वंवदतेत्यर्थः ॥ विरोधीति ॥ द्वितीयाभावबोधिकायानेहनानेतिश्रुतेरित्यर्थः ॥ तस्यै वेति ॥ द्वैतग्राहिप्रत्यक्षादेरेवद्वितीयाभावबोधकनेहनानेतिश्रुतिबाध्यत्वांगीकारेणदुर्बलतयातद्विरोधकत्वंनसंभवतीत्यर्थः॥ ना

त्वयैवद्वितीयाभावस्यमानांतराप्राप्त्युपगमात् । द्वितीयेपिविरोधिमानंनतावद्द्वैतग्राहिप्रत्य क्षादि तस्यैवत्वन्मतेश्रुतिबाध्यत्वात् नाप्यद्वैतवाक्यांतरं तस्याप्यात्ममात्रपरत्वेद्वितीया भावाविरोधित्वात् । नहिविशेष्यविषयं"अग्निहोत्रंजुहोती"तिवाक्यंविशिष्टविषयेण

पीति ॥ "नेहनाने"तिश्रुतेर्द्वितीयाभावेतात्पर्यांगीकारेद्वितीयाभावरूपद्वितीयस्यैवप्राप्तेस्तत्रचाद्वैतप्रतिपादकंयन्नेहनानेतिवा क्यभिन्नंवाक्यं"एकोद्रष्टाऽद्वैतोभवती"त्यादिरूपंतदेवविरोधिभूतंमानंभविष्यतीतितद्विरोधाद्वितीयाभावेनतात्पर्यमित्यर्थः ॥ तस्येति ॥ नेहनानेतिश्रुतेर्द्वितीयाभावरूपद्वितीयप्रतिपादकत्वेप्यद्वैतवाक्यांतरविरोधोनास्ति । तस्यापिचैतन्यमात्रपरत्वेनद्वि तीयनिषेधेऽतात्पर्यादित्यर्थः । तदेवोपपादयति ॥ नहीति ॥ अत्रविशेष्यविषयेण"अग्निहोत्रंजुहोती"तिवाक्येनविशिष्टविषयं

SGDF
Sri Gargeshwari Digital Foundation

“ दध्नाजुहोती”तिवाक्यंनविरुद्धमितियोज्यं । अग्निहोत्रवाक्येनधर्मिभूताग्निहोत्राख्यविशेष्यमात्रप्रतिपादकेनदध्याख्यगुण विशिष्टाग्निहोत्रप्रतिपादकस्यवाक्यस्यविरोधोनास्ति । देवदत्तोदंडीदेवदत्तइत्यनयोर्विरोधादर्शनात् तथानेहनानेतिवाक्यस्य द्वितीयाभावविशिष्टचैतन्यप्रतिपादकत्वेविशेष्यभूतचिन्मात्रप्रतिपादकाद्वैतवाक्यांतरेणविरोधोनास्तीत्यर्थः । यथास्थितयोजना यांविशेष्यविषयकविशिष्टविषयकयोर्वाक्ययोर्नविरोधइत्यत्रैवायंदृष्टांतइतिद्रष्टव्यं । तेनदृष्टांतदार्ष्टांतिकयोर्व्यत्यासशंकानवका शइतिसंप्रदायविदः ॥ द्वितीयेति ॥ अद्वैतवाक्यांतरस्यचैतन्येद्वितीयाभावेपितात्पर्यांगीकारेद्वितीयाभावविशिष्टचैतन्यप्रति

“ दध्नाजुहोती” तिवाक्येनविरुद्धं। द्वितीयाभावपरत्वेत्वेकविषयत्वेनसुतरामविरोधित्वात् ।
ननुस्वयमेवस्वविहितमपिद्वितीयाभावंद्वितीयत्वान्निषेधतीतिस्वविरोधादेवातात्पर्यमितिचेन्न ।

पादकत्वप्राप्त्यातेनद्वितीयाभावविशिष्टचैतन्यप्रतिपादकनेहनानेतिवाक्यस्यनविरोधः एकविषयकत्वादितिभावः । ननुनेहना नेतिश्रुतेर्द्वितीयाभावेऽतात्पर्यमानांतराप्राप्त्यामानांतरविरोधाद्वानोच्यते किंनाम स्वविरोधादेवेत्याशंकते ॥ नन्विति ॥ यथा घटोनास्तीत्यस्यघटनिषेधकरूपत्वेनघटाभावविधिरूपत्वं एवंनेहनानेतिवाक्येनद्वितीयमात्रनिषेधकेनद्वितीयाभावोविहितः । पुन स्तमपिनिषेधति । कुतः द्वितीयाभावस्यैवद्वितीयतयाप्राप्तेः अस्यचवाक्यस्यद्वितीयमात्रनिषेधकत्वादतस्स्वविहितद्वितीयाभाव निषेधकत्वेनस्वविरोधाद्वितीयाभावेनतात्पर्यमित्यर्थः । अतात्पर्यहेतुभूतःस्वविरोधोयथानास्तितथावाक्यार्थोवर्ण्यतामित्याह ॥

SGDF
Sri Gargeshwari Digital Foundation

निषेधस्येति ॥ नेहनानेतिवाक्यस्यस्वविहितोयोनिषेधोद्वितीयाभावरूपस्तदितरद्वितीयमात्रनिषेधकत्वमस्तु तथाचैवंस्वविहि
तेतरनिषेधकत्वेनश्रुतेःसंकोचोपपत्तेःक्वास्तिविरोधः येनातात्पर्यंस्यादित्यर्थः ॥ अन्यथेति ॥ निषेधस्यविहितेतरविषयकत्वमनं
गीकृत्यद्वितीयत्वाद्विहितमपिनिषेधतीतिविहितविषयकत्वस्याप्यंगीकारइत्यर्थः ॥ क्ङितिचेति ॥ गितिकितिङितिचप्रत्ययेपरेत
न्निमित्तकगुणवृद्धीनस्तइतिसुप्तिङ्कृत्तद्धितसाधारणोयःकित्प्रत्ययस्तन्निमित्तकगुणवृद्ध्योःसामान्येननिषेधःकृतः । अनंतरं"किति
च" कितितद्धितेपरेवृद्धिःस्यादितिविशेषविधिःकृतः । तथाच"क्ङितिचे"तिसाधारणकिन्निमित्तकवृद्धिप्रतिषेधोपितद्धितरूपकि

निषेधस्यस्वहितनिषेधेतरद्वितीयविषयत्वावश्यंभावात् । अन्यथा"क्ङितिचे"तिकिन्निमित्तकवृद्धिप्रतिषे
धोपिकिन्निमित्तकत्वा"त्कितिचे" तिसूत्रविहितकिद्विशेषनिमित्तकवृद्धिं"नहिंस्यादि"त्येतदपिहिंसात्वा
दग्नीषोमीयहिंसां" इदंवाअग्रेनैवकिंचनासीदि "त्येतदपि " सदेवे "त्यादिवाक्योक्तंब्रह्मापिप्रतिषेधेत् ।

द्विशेषनिमित्तकांकितिचेतिसूत्रविहितांवृद्धिमपिप्रतिषेधेत् । कितिचेतिविहिततद्धितकिन्निमित्तकवृद्धेरपिकिन्निमित्तकत्वात् ।
अतोविशेषसूत्रविहिततद्धितकिन्निमित्तकवृद्धिव्यतिरिक्तवृद्धिप्रतिषेधकत्वमेवक्ङितिचेतिसूत्रस्यांगीकृतंवैयाकरणैस्तद्वदिहापीत्य
र्थः । किद्विशेषः तद्धितकिद्रूपः ॥ हिंसामिति ॥ "अग्नीषोमीयंपशुमालभेते" तिवाक्यविहितामित्यर्थः ॥ सदेवेति ॥ ॥ २५३ ॥
"सदेवसोम्येदमग्रआसीदि"तिवाक्येऽस्तित्वेनविहितमित्यर्थः । ननूदाहृतस्थलेषुविधायकवाक्यांतरसद्भावाद्विहितेतरपरत्वं ।

नह्यत्रप्रकृतेद्वितीयाभावविधायकंवाक्यांतरमस्ति । येनविहितेतरपरत्वंस्यात् अतःस्वेनैवविहितइतिवाच्यं । तथाचस्वविहितस्यापि
द्वितीयाभावस्यद्वितीयत्वात्स्वेनैवनिषेधःप्राप्तएवेत्यतआह ॥ स्वविरोधोहीति ॥ वाक्यांतरोपस्थितिविलंबेनविलंबोपस्थिति
काद्वाक्यांतरविरोधादपिशीघ्रोपस्थितिकतयास्वविरोधस्ययत्नेनपरिहरणीयत्वंद्रष्टव्यं । तत्परिहारस्तुस्वविहितद्वितीयनिषेधेतर
द्वितीय(विषयकत्वे)निषेधकत्वेनैवकार्यइतिअतात्पर्यहेतुःस्वविरोधोनास्तीतिभावः । ननुयथावाक्यांतरतात्पर्यगोचरविरुद्धार्थ
परत्वएववाक्यांतरविरोधोदृष्टः । तथाएवंस्वस्यापिस्वतात्पर्यविषयीभू(तार्थनि)तनिषेधएवस्वविरोधःस्यात् । नचैवं किंतुद्विती

स्वविरोधोहिवाक्यांतरविरोधादपियत्नेनपरिहार्यः । अद्वैतवाक्यस्यद्वितीया
भावेअतात्पर्यादविरोधइतिचेन्न । द्वितीयाभावस्यस्वेननिषेधेसतिस्वविरोधादे
वतत्रातात्पर्यमतात्पर्येचसतिस्ववचनविरोधाभावान्निषेधइत्यन्योन्याश्रयात् ।

याभावे(तात्पर्याभावेनतस्य)वाक्यस्यनतात्पर्यं । तथाचतस्यद्वितीयत्वान्निषेधेपिनविरोधः । एवंचविहितेतरपरत्वेनभवदुक्तरी
त्याविरोधःकस्मात्परिहरणीयइतितटस्थःशंकते ॥ अद्वैतेति ॥ स्वविरोधादेवाऽतात्पर्यमितिपरोब्रूते । तत्रस्वविरोधमुपपाद्याऽ
तात्पर्येणैवस्वविरोधाभावोक्तावन्योन्याश्रयःस्यादित्याह ॥ द्वितीयाभावस्येति ॥ स्वेन "नेहनाने" तिवाक्येन । निषेधे
सति द्वितीयत्वान्निषेधेसति तत्र द्वितीयाभावे निषेधः द्वितीयाभावनिषेधः शब्देनप्रतिपादितस्यशब्देनपुनःनिषेधेविरोधकथं

SGPF Foundation

वोच्छिद्येतेत्याह ॥ अपिचेति ॥ मातृपदप्रापितंमातृत्वंमूकोहमितिवचनक्रियाप्रापितवचनक्रियाकर्तृत्वमपिवंध्यामूकपदाभ्यामे
वप्रतिषिध्यतेइतिवक्तुंशक्यत्वेनस्ववचनस्वक्रियाविरोधोनस्यादित्यर्थः । शब्दतःप्राप्तस्यपुनःशब्देनप्रतिषेधेऽतिप्रसंगांतरमाह
॥ षोडशीति ॥ "अतिरात्रेषोडशिनंगृह्णाति" "नातिरात्रेषोडशिनंगृह्णाती"त्यत्रविकल्पआश्रितः । अतिरात्रेषोडशिग्रहणंक
र्तव्यंनवेति सचविकल्पोष्टदोषयुक्तः अतएवएतादृशविकल्पाश्रयणंनकर्तव्यं किंनाम शब्दतःप्राप्तमतिरात्रेषोडशिग्रहणंनातिरा
त्रेषोडशिनमित्यनेननिषिध्यतइतिस्यादित्यर्थः । अष्टौदोषाश्चैते यथा"यवैर्यजेत" "व्रीहिभिर्यजेते"त्यत्रयदाव्रीहिवाक्योपादा

अपिचैवंममातावंध्यामूकोहमित्यादावपिविरोधोनस्यात् । सुवचंहितत्रापि
मात्रादिशब्दप्रापितमातृत्वादिकंवंध्यादिपदेनैवनिषिध्यतइति षोडशिग्रहणा
दावष्टदोषदुष्टोपिविकल्पश्चनस्यात् । अग्रहणवाक्येनग्रहणनिषेधापातात् ।

नंयववाक्यत्यागस्तदायववाक्येप्रतीतप्रामाण्यत्यागःअप्रामाण्यस्वीकारइतिदोषद्वयं पुनर्यववाक्यस्वीकारेपरित्यक्तप्रामाण्यस्वी
कारः स्वीकृताप्रामाण्यत्यागइतिदोषद्वयं । एवंमिलित्वायववाक्यसंबंधिदोषचतुष्टयं । यदायववाक्यस्वीकारोव्रीहिवाक्यत्या
गस्तदाव्रीहिवाक्येप्रतीतप्रामाण्यत्यागोऽप्रामाण्यस्वीकारइतिदोषद्वयं पुनर्व्रीहिवाक्यस्वीकारेपरित्यक्तप्रामाण्यस्वीकारः स्वीकृ
ताऽप्रामाण्यत्यागइतिदोषद्वयं । एवंमिलित्वाव्रीहिवाक्यसंबधिदोषचतुष्टयमित्येवमष्टदोषदुष्टोविकल्पोग्रहणाग्रहणवाक्येपियो
ज्यः । एतावताप्रबंधेनमानांतरप्राप्त्यातद्विरोधाद्वास्वविरोधाद्वाऽतात्पर्यमित्येतदयुक्तमित्युक्तं इदानींप्रकारांतरेणातात्पर्यंभ

SGDF
Sri Gargeshwari Digital Foundation

विष्यतीत्याशंक्यनिराकरोति ॥ प्रतियोगिनइति ॥ प्रतियोगिभूतस्यद्वितीयस्यमिथ्यात्वाद्वितीयाभावोपिमिथ्या । प्रागभावादिवत् । अतोद्वितीयाभावेश्रुतेर्नतात्पर्यमित्येतन्निरस्तं । प्रतियोगितदभावयोर्भिन्नसत्ताकत्वस्यावश्यकत्वेनप्रतियोगिनोमिथ्यात्वेतदभावस्यापिमिथ्यात्वायोगात् । अन्यथाऽविद्यानिवृत्तेःपंचमप्रकारताभ्युपगमवैयर्थ्यादितिभावः । स्वेनैवनिषिद्धस्यद्वितीयाभावस्यपुनर्विशेषणत्वादिनोपादानंनयुक्तमित्याह ॥ किंचेति ॥ तत्रदृष्टांतोद्वितीयस्येवेति । यथाश्रुत्यानिषिद्धंद्विती

प्रतियोगिनोद्वितीयस्यमिथ्यात्वात्तदभावोपिमिथ्येतितुनिरस्तं*। किंचस्वेनैवनिषिद्धस्यद्वितीयाभावस्यद्वितीयस्येवविशेषणत्वेनउपलक्षणत्वेनवापुनरुपादानमयुक्तं । नतृतीयः । ग्रहंसंमार्ष्टीत्यत्रसंमार्गस्येवेहाखंडार्थपरेविधेयांतरस्याभावेनविशेष्यस्यशास्त्रगम्यस्यचिन्मात्रस्याप्राप्ततयोद्देश्यत्वायोगेनचद्वितीयाभावस्योद्देश्यविशेषणत्वाभावादविवक्षाहेतोर्निर्ज्ञातविशेषणत्वस्याभावाच्च ।

यंपुनर्ब्रह्मविशेषणत्वादिनाश्रुतिर्नोपादत्तएवमित्यर्थः ॥ अखंडार्थेति ॥ विधेयधर्मांतरसद्भावेऽखंडार्थत्वभंगादित्यर्थः । "सिद्धंधर्मिणमुद्दिश्यसाध्यधर्मोविधीयते" इत्युक्तत्वेनउद्देश्यत्वेसिद्धत्वेनभाव्यं । तन्नसंभवति । शास्त्रैकसमधिगम्यस्यमानांतराप्राप्तेरित्याह ॥ विशेष्यस्येति ॥ अविवक्षेति ॥ अतात्पर्येत्यर्थः ॥ निर्ज्ञातेति ॥ नितरांज्ञातस्यसम्यङ्निर्णीतस्वरूपस्ययद्विशे

* सामान्यतोमिथ्यात्वभंगे ।

SGDF
Sri Gargeshwari Digital Foundation

षणं यद्विशेषणंविनाप्युद्देश्यसिद्धिरितियावत् । तद्विशेषणंनविवक्षितं यथाग्रहैकत्वं तद्वदिहाप्यशनायाद्यतीतंसत्यज्ञानादि रूपंयद्ब्रह्मस्वरूपंतन्ननिर्ज्ञातं अन्यथाश्रवणादिवैयर्थ्यात् अतस्तद्विशेषणमद्वितीयत्वादिकंविवक्षितमेव श्रुतितात्पर्यविषयीभूतमे वेत्यर्थः । तथाचअद्वितीयत्वादिकंनश्रुत्याविवक्षितं तात्पर्यविषयीभूतनंभवतीतियावत् । उद्देश्यविशेषणत्वात् ग्रहैकत्ववदित्य नुमानेनिर्ज्ञातविशेषणत्वमुपाधिरित्युक्तंभवति । द्वितीयाभावस्यमुमुक्षुजिज्ञासितत्वान्मोक्षपरेणशास्त्रेणावश्यंप्रतिपादनीयत्वा न्नाविवक्षितत्वमित्याह ॥ कर्मकांडादिति ॥ तत्प्रकारेति ॥ धर्मप्रकारेत्यर्थः । तत्प्रकारस्य ब्रह्मप्रकारस्य ॥ शब्दादिति ॥

कर्मकांडादापातप्रतीतधर्मेणपुंसातत्प्रकारविशेषस्येववेदांतादापातप्रतीतब्रह्मणामुमुक्षुणाप्यद्वि तीयत्वादितत्प्रकारस्यैवजिज्ञासितत्वाच्च शब्दाद्धीस्थस्यापिद्वितीयाभावस्यतात्पर्याविषयत्वे नद्वैतमानविरोधेनचात्मवपोत्खननादेरिवव्यावहारिकसत्त्वासिद्धेश्च । अवांतरतात्पर्यविषय त्वात्तत्सिद्धिरितिचेन्न । द्वितीयाभावस्योपक्रमेउपसंहारेचप्रतीतस्यप्राकरणिकत्वेनसुषुप्तौ

यथा"प्रजापतिरात्मनोवपामुदखिददि"ति(शब्दात्)प्रतीतमपिस्ववपोत्खननादिकंप्रजापतिजीवनग्राहकप्रमाणविरोधेनश्रुतेस्तत्र तात्पर्याभावाद्व्यावहारिकमपिनसिद्ध्यति किंतुप्रातिभासिकमेव । एवंनेहनानेतिवाक्यात्प्रतीतोपिद्वितीयाभावोद्वैतमानविरो धेनश्रुतेस्तत्रतात्पर्याभावाद्व्यावहारिकोनसिद्ध्येत् आत्मवपोत्खननवत्प्रातिभासिकएवस्यादितिभावः । ननुद्वितीयाभावेमहाता त्पर्याभावेप्यवांतरतात्पर्यसद्भावात्तत्सिद्धिरित्याशंकते ॥ अवांतरेति ॥ उपक्रमइति ॥ एकविज्ञानेनसर्वविज्ञानप्रतिज्ञायाउ

पक्रमात् "ऐतदात्म्यमिदंसर्वंतत्सत्यंसआत्मातत्त्वमसी"त्युपसंहारात् । तथाचद्वितीयाभावस्योपक्रमोपसंहारयोः श्रुतत्वेनतत्प्रक रणप्रतिपाद्यत्वादित्यर्थः ॥ फलवत्त्वेति ॥ त्वन्मतेसुषुप्तौनिष्प्रपंचतायाःपुरुषार्थत्वादित्यर्थः ॥ अन्यशेषत्वेति ॥ ब्रह्मविशे षणत्वादिनाप्रतिपादनेऽप्राधान्यप्राप्त्याप्राकरणिकत्वफलवत्त्वाभ्यांप्रतीतंद्वितीयाभावस्यमहातात्पर्यविषयत्वेनप्राधान्यंनस्यादि त्यर्थः । अन्यशेषत्वमंगीकृत्याप्याह ॥ प्रमाणेति ॥ तथाचद्वितीयाभावस्यात्मवत्तात्विकसत्त्वमवर्जनीयमेवेत्यर्थः । नन्ववांत रतात्पर्यविषयत्वेनावांतरसत्त्वंयद्व्यावहारिकत्वरूपं तदेवद्वितीयइवद्वितीयाभावेप्यायाति नतुतात्विकंसत्त्वमित्यतआह ॥ अवां

फलवत्त्वदर्शनेनचान्यशेषत्वायोगेनावांतरतात्पर्याविषयत्वात् स्वप्रकाशचैतन्यस्यचोक्तरीत्याप्रा सतयामहातात्पर्याविषयत्वाच्च प्रमाणावांतरतात्पर्यविषयस्यान्यशेषत्वेपिमहातात्पर्यविषयसम सत्ताकत्वनियमाच्च । अवांतरतात्पर्यविषयस्यद्वितीयाभावस्यद्वितीयवद्व्यावहारिकत्वेश्रुत्याप्रत्यक्षा दिबाधायोगाच्च । नहिकदापितदभावेतत्राप्रमितेतत्तत्रारोपितंतस्माद्वितीयाभावस्यमिथ्यात्वेश्रुते

तरेति ॥ श्रुत्येति ॥ प्रत्यक्षगृहीतप्रपंचस्यश्रुतिबोध्यस्यतदभावस्यचव्यावहारिकसत्त्वोपेततयासमसत्ताकार्थावगाहिनोःश्रुति प्रत्यक्षयोर्नबाध्यबाधकभावइत्यर्थः । तदेवोपपादयति ॥ नहीति ॥ तत्रा धिष्ठाने । अप्रमिते अतात्विके आरोपितं अतात्वि कं । लोकेरजताभावस्यशुक्तौतात्विकत्वाद्रजतंशुक्तावारोपितमित्युच्यते एवंद्वितीयाभावोब्रह्मणियदितात्विकःस्यात् तदैवद्वि तीयस्याऽतात्विकत्वंस्यात् । नचैवंत्वयोच्यतेद्वितीयतदभावयोःसमसत्ताकत्वांगीकारात् । अतोनतत्प्रतिपादकप्रत्यक्षश्रुत्योर्बा

SGDF Foundation

ध्यबाधकभावइत्यर्थः । विशेषणतयोपलक्षणतयावाश्रुतिबोध्यस्यद्वितीयाभावस्यसत्त्वेऽद्वैतहानिः । मिथ्यात्वेतत्प्रतिपादकश्रुते रतत्वावेदकत्वमित्युक्तमुपसंहरति ॥ तस्मादिति ॥ ७ ॥ सामान्यतोमिथ्यात्वश्रुतिनिरासविवरणं ॥ २६ ॥ "एकमे वाद्वितीय"मित्यादावद्वितीयमित्यादिशब्दैर्द्वितीयमात्रनिषेधाच्छ्रुतिर्मिथ्यात्वेमानमितियदुक्तंतन्निषेधति ॥ किंचेत्यादिना ॥ एकमेवेतीतिशब्दःप्रकारवाची । तथाच"एकोद्रष्टाऽद्वितीयोभवती"तिश्रुतिरप्युदाहर्तव्या । तेनाग्निमेण"सलिल"इत्यादिना नासंगतिः । ननूक्तविधयामिथ्यात्वस्यततोऽवगमात्कथंसातत्रनमानमित्यतआह ॥ शब्दस्येति ॥ कुतोनेत्यतआह॥ आज्यैः

रतत्वावेदकत्वप्रसंगोदुर्वारः । तस्मान्नमिथ्यात्वेश्रुतिर्मानं ॥ ॥ सामान्येनमिथ्यात्वश्रुति निरासः ॥ २६ ॥ किंचनतावदेकमेवाद्वितीयमित्यादिश्रुतिस्तत्रमानं । शब्दस्यहिनापात प्रतीतएवार्थः "आज्यैःस्तुवते" "आकाशादेवसमुत्पद्यंत"इत्यादेरपिचित्राज्याधिकरणा

स्तुवतइति ॥ चित्राज्याधिकरणेति ॥ चित्राधिकरणाज्याधिकरणेत्यर्थः । प्रथमाध्यायेचतुर्थपादेतृतीयाधिकरणेचिंतितं "चित्रयायजेतपशुकाम"इतिश्रूयते । तत्रचित्राशब्दोगुणविधिर्यागनामधेयंवेतिसंदेहेसंशये"अग्नीषोमीयंपशुमालभेते"तिविहितं पशुयागमत्रयजेतेत्यनूद्ययागसाधनीभूतपशौचित्रवर्णत्वस्त्रीत्वरूपोगुणोविधीयते । तथाचपशुकामश्चित्रयाचित्रवर्णयुतस्त्रीपशु नायागंकुर्यादित्यर्थइतिपूर्वःपक्षः । सिद्धांतस्तुचित्रत्वंस्त्रीत्वंचेतिद्वावेतौगुणौ । तयोर्द्वयोर्विधानेवाक्यभेदापत्तेः"प्राप्तेकर्मणिना

SGDF Sri Gargeshwari Digital Foundation

नेकोविधातुंशक्यतेगुण"इतिवचनात् । अथगुणद्वयविशिष्टपशुद्रव्यरूपंकारकंविधीयते तदागौरवंस्यात् चित्रात्वंविलक्षणद्रव्ये णोपपद्यते"दधिमधुघृतमापोधानास्तंडुलास्तत्संसृष्टंप्राजापत्य"मितिदध्यादीनिविचित्रद्रव्याणिषडाम्नातानि तस्माच्चित्रपदंयाग नामधेयं नतुचित्रस्त्रीपशुपरमिति उत्तरत्रपूर्वपक्षरीत्येत्यनंतरंचित्रस्त्रीपश्विितिचग्राह्यं । अन्यथाचित्राज्याधिकरणेत्युक्त्वापूर्व पक्ष रीत्याघृतेत्येवोक्तावत्यकौशलापत्तेरित्यवधेयं । प्रमाणलक्षणेनामधेयपादेचिंतितं।"आज्यैःस्तुवत"इति(स्तोत्रप्र)स्तुतिप्रकरणेश्रूय ते "पंचदशान्याज्यानी"त्यत्राज्यशब्दोगुणविधिःकर्मनामधेयंवेतिसंशयेरूढिप्राबल्यात्पंचदशत्वसंख्याविशिष्टघृतलक्षणोगुणो विधीयते । आज्यानांचपंचदशपात्रसंबंधेनपंचदशत्वमुपपद्यते । तथाचाज्यैःस्तुवतइत्यत्रापिप्रसिद्धमेवविवक्षितमितिपूर्वःपक्षः ।

काशाधिकरणपूर्वपक्षरीत्याघृतगगनाद्यर्थत्वस्यां"धोमणिमविंदत्"
"मृदब्रवीदि"त्यादेरपिप्रतीतार्थपरत्वस्यचप्रसंगेनमीमांसावैयर्थ्यात् ।

सिद्धांतस्तु । प्रकृतेस्तोत्रपरएवायमाज्यशब्दः । नरूढ्याप्रसिद्धघृतपरः ।तत्रपंचदशत्वस्याश्रयपात्रद्वारायोज्यत्वेनलक्षणापत्तेः। तथाचाज्यप्रकाशिकाभिःपंचदशस्तुतिभिरिष्टंकुर्युरितितदर्थः । तथाचाऽऽज्यैःस्तुवतइत्यत्राऽऽज्यशब्दःस्तोत्रपरएवेति ॥ आ काशाधिकरणेति ॥ ब्रह्ममीमांसायांप्रथमलक्षणेप्रथमपादेचिंतितं । "आकाशस्तल्लिंगादि"त्यत्र"सर्वाणिहवाइमानिभूतान्या काशादेवसमुत्पद्यंत"इत्यादावाकाशशब्दोभूतपरःपरमात्मपरोवेतिसंदेहेप्रसिद्धभूतपरएवेतिपूर्वपक्षेपरोवरीयस्त्वादिलिंगैःपरमा त्मपरएवेतिसिद्धांतितं॥ अंधइति ॥ तैत्तिरीयारण्यकेप्रथ(मप्रपाठके)माष्टकेपठ्यते"अंधोमणिमविंदत्-तमनंगुलिरावयत्-अग्री

SGDF
Sri Gargeshwari Digital Foundation

वः प्रत्यमुंचत-तमजिह्वोअसश्चते"ति । आवयत् वयबंधने तंतुनासूत्रितवान् प्रत्यमुंचत अमुंचत् । असश्चत प्राशंसत । अत्रवाक्यचतुष्टयस्यापातप्रतीतार्थोबाधितः । लोकेहिपुरुषश्चक्षुषामणिंदृष्ट्वातमंगुलिभिस्तंतुनास्वीयग्रीवायांप्रतिमुच्यजिह्वयाप्रशंसति । नचांधादेश्चक्षुरादिनादर्शनादिकंसंभवतीत्यर्थः । विचारितेसत्यबाधितार्थोऽवगम्यते । अनंगुलिः अंगुल्युपलक्षितप्राकृतहस्तरहितोभगवान् तंजीवं आवयत् संसारेणसम्यग्बबंध । तमजिह्वोभगवदधीनजिह्वोयंबद्धोऽसश्चत स्तोत्रमकरोत् श्रवणादिकंकृतवान् अनंतरंपूर्वंभगवदज्ञानेनांधो मणिंप्रधानं "मणिर्मुखंप्रधानंचेत्युत्तमस्यवचोभवेदि"तिवचनात् परमात्मानमविंदत विद

"बिभेत्यल्पश्रुताद्वेद"इतिस्मृतेश्च"कश्छंदसांयोगमावेदधीर"इतिश्रुत्याचस्वार्थस्यगहनत्वोक्तेश्च । किंतुमानांतरेणपूर्वोत्तरेणचाऽविरुद्धः । उक्तंहि । "शास्त्रंहिशब्दविज्ञानादसन्निकृष्टेर्थेविज्ञान"मित्यत्रवार्तिके "असन्निकृष्टवाचाचद्वयमत्रजिहासितं ।

ज्ञाने । पश्चात्तंज्ञानिनं अग्रीवः प्राकृतग्रीवोपलक्षितदेहरहितोभगवान् प्रत्यमुंचत । प्रत्यमोचयत्संसारादिति ॥ गहनत्वोक्तेश्चेति ॥ अतोनापातप्रतीतएवार्थइत्यन्वयः ॥ उक्तंहीति ॥ शास्त्रंलिलक्षयिषताभाष्यकारेणशबरस्वामिनेत्यर्थः । एवंशास्त्रलक्षणेकोऽसंनिकृष्टशब्दार्थइत्यतउक्तंवार्तिककृताअसन्निकृष्टेत्यादि । प्रमितोर्थोविपरीततयाप्रमितश्चार्थः सन्निकृष्टइत्युच्यते । तद्भिन्नेशब्दः प्रमाणं । तथाचाऽसन्निकृष्टेऽनधिगतेविपरीततयाज्ञातेचार्थेविषयेशब्दविज्ञानाच्छब्दश्रवणाज्ज्ञायमानंविज्ञानंयतत्

SGDF Sri Gargeshwari Digital Foundation

च्छास्त्रं । फलप्रामाण्यवादीचायं । जिहासितं व्यावर्तितं । ताद्रूप्येण स्वयंयथास्थितस्तद्रूपतया परिच्छेदोज्ञातज्ञापनं वि पर्ययतोपिवापरिच्छेदोविपरीतज्ञानंचव्यावर्तितमित्यर्थः । उक्तंचवार्तिकएवोत्तरत्र "प्रमितस्यप्रमाणेहिनापेक्षाजायतेपुनः । ता द्रूप्येणपरिच्छिन्नेप्रमाणंनिष्फलंपरं । विपरीतपरिच्छिन्नेनावकाशःपरस्यत्वि"ति । तथाचवि(रुद्धार्थ)परीतार्थवर्णनेविपरीतप्रमा जनकत्वप्राप्त्याशास्त्रत्वंनस्यादितिभावः । पूर्वोत्तराविरुद्धएवार्थोवर्णनीयइत्यत्रवाक्यांतरंपठति ॥ विषयेत्यादिना ॥ ननुमया पिएकमेवेत्यादेर्मानांतराविरुद्धएवार्थोवर्ण्यतइतिचेत्तत्राह ॥ अत्रचेति ॥ एकमेवेत्यादेःश्रुतेर्द्वितीयमात्रनिषेधेनमिथ्यात्वार्थ

ताद्रूप्येणपरिच्छेदस्तद्विपर्ययतोपिचे"ति । "विषयाविषयौज्ञात्वातेनोत्सर्गापवादयोः ।
बाधाबाधौविवेक्तव्यौनतुसामान्यदर्शनात्" । "अन्यएवैकदेशेनशास्त्रस्याऽर्थःप्रतीयते । अ
न्यश्चपरिपूर्णेनसमस्तांगोपसंहृता"विंतिच । उक्तंच । विरुद्धवत्प्रतीयंतेआगमायत्रवैमिथः ।
तत्रदृष्टानुसारेणतेषामर्थोन्ववेक्ष्यत"इति । अत्रचप्रत्यक्षादिविरोधःस्पष्टः । अत्रोक्तंखंडने ।

कत्वइत्यर्थः ॥ प्रत्यक्षेति ॥ सन्घटःघटपटौभिन्नावित्यादिप्रत्यक्षविरोधइत्यर्थः । प्रत्यक्षाविरोधंशंकते ॥ अत्रोक्तंखंडनइ ति॥ घटपटौभिन्नाविंतिप्रात्यक्षिकंज्ञानं"सर्वंखल्विदंब्रह्मे"त्यादिवाक्यजन्यघटपटादिसमस्तैक्यज्ञानस्यतदाबाधकंस्यात् यद्यैक्य ज्ञानात्स्वयंभिन्नंस्यात् नचैतदस्ति कुतइतिचेत् ऐक्यज्ञानप्रतियोगिकभेदावगाहिअन्यज्ज्ञानंतावन्नास्त्येव अतःस्वयमेवतदवगा हीतिवक्तव्यं । नचैतत्संभवति । प्रत्यक्षस्यनियतविषयकत्वेनघटपटभेदमात्रावगाहितयाऐक्यज्ञानप्रतियोगिकस्वधर्मिकभेदाव

SGDF
Sri Gargeshwari Digital Foundation

गाहनाक्षमत्वात् । अतऐक्यश्रुतिःस्वबाधनाययत्प्रवृत्तंघटपटौभिन्नावितिप्रत्यक्षंतेनसहादौएकीभवति । अनंतरंनिर्बाधासतीस्व विषययोर्भेदैक्ययोरप्यैक्यंगृह्णातीत्येवंसर्वाद्वैतेपर्यवस्यतीतिक्कप्रत्यक्षविरोधः । ननुनस्वयंनिर्बाधा प्रत्यक्षस्यैवबाधकत्वात् । नच नियतविषयकेणप्रत्यक्षेणश्रौतैक्यज्ञानप्रतियोगिकस्वधर्मिकभेदाग्रहणात्अन्यस्यचतद्ग्राहकस्याभावात्तेनैकीभूयस्वयंनिर्बाधास तीसर्वाद्वैतेपर्यवस्यतीत्युक्तमितिवाच्यं । बाधकभूतघटपटभेदग्राहिप्रत्यक्षंबाध्यादैक्यज्ञानाद्भिन्नमितिप्रत्यक्षरूपज्ञानांतरेणप्रत्य क्षैक्यज्ञानभेदग्रहांगीकारादितिचेन्न । बाध्यबाधकयोरैक्यज्ञानप्रत्यक्षयोर्भेदावगाहिनोज्ञानांतरस्यताभ्यांभेदाभावेतदुभयभेद

प्रत्यक्षंनियतविषयं तथाचघटपटौभिन्नावितिप्रत्यक्षज्ञानेनबाधकत्वेनाभिमतात्स्वस्माद्बाध्यत्वेना भिमतं श्रौतमैक्यज्ञानंभिन्नमित्यग्रहणात्तत्रलब्धपदा"सर्वंखल्विदंब्रह्मे"त्यात्मैक्यश्रुतिस्तयो स्तावदैक्यंगृह्णाति ।तथाचप्रत्यक्षधीस्स्वाभिन्नमैक्यज्ञानंनबाधते । एवंचनिर्बाधाश्रुतिस्सर्वाद्वैते

ग्राहकत्वा(योगा)भावात् । ताभ्यांस्वस्मिन्भेदग्रहस्यनियतविषयकेणस्वेनैवायोगात्। पुनरन्येनज्ञानेनतद्ग्रहेवाच्येऽनवस्थास्याद तोऽनवस्थाभयाद्यत्रबुद्धिपरंपराविच्छेदस्तत्रैवांत्यज्ञानेनियतविषयेस्वविषयभूतबाध्यबाधकज्ञानाभ्यांभेदस्याऽग्रहणात्तत्रैवैक्य ज्ञानंतेनचरमेणज्ञानांतरेणैकीभूयनिर्बाधंसत्सर्वाद्वैतेपर्यवस्यतीतिनप्रत्यक्षविरोधइत्याह ॥ प्रत्यक्षमित्यादिना ॥ नियतवि षयमिति ॥ घटपटभेदग्राहिप्रत्यक्षस्यश्रौतैक्यज्ञानस्यचभेदंनगृह्णाति स्वस्यस्वविषयकत्वात् ऐक्यज्ञानाविषयकत्वाच्चेत्यर्थः ॥ स्वाभिन्नमिति ॥ स्वस्मादगृहीतभेदमित्यर्थः ॥ नबाधतइति॥ अन्यथास्वस्यापिस्वेनबाधापत्तिरितिभावः॥ सर्वाद्वैतइति॥

SGDF Sri Gargeshwari Digital Foundation

ज्ञानैक्यद्वारातद्विषययोरप्यैक्यंगृह्णातीत्यर्थः । ननुप्रत्यक्षज्ञानंश्रौतैक्यज्ञानात्स्वस्यभेदंनैवगृह्णाति । ज्ञानांतरंतुतद्गोचरं स्वविषययोस्तयोर्भेदंग्रहीष्यतीत्यतआह ॥ नचेति ॥ कुतोनचेत्यतआह ॥ अनवस्थेति ॥ चरमज्ञानइति ॥ भेदग्राहिणि अंतिमेज्ञानांतरइत्यर्थः । स्वविषयात्स्वस्यभेदग्राहकस्यज्ञानांतरस्यानवस्थाभयेनानंगीकारादितिभावः ॥ बाधबुद्धिपरंपरेति ॥ भेदावगाहिज्ञानांतरपरंपरेत्यर्थः ॥ निवृत्ताविति ॥ अनवस्थयाबाधपरंपरायानिवृत्तौसत्यामित्यर्थः । पार्ष्णिग्राहैः पार्ष्णिगृ

पर्यवस्यति । नचबाध्यवाधकधियोर्ज्ञानांतरेणभेदग्रहः अनवस्थाभयाद्यत्रबुद्धिपरंपराविच्छेद स्तत्रैवचरमज्ञानेश्रुतेरवकाशात् । तदुक्तं । "सुदूरधावनश्रांताबाधबुद्धिपरंपरा । निवृत्तावद्व याम्नायैःपार्ष्णिग्राहैर्विजीयत"इति । तन्न । प्रत्यक्षादिप्रसक्तोहिभेदःनेहनानेत्यादिश्रुत्यानिषे ध्यः । अप्रसक्तप्रातिषेधायोगात् । तथाचयत्रयत्राद्वैतश्रुतिस्तिष्ठासतितत्रतत्रप्रागेवप्रत्यक्षादिना

ह्नंतीतिपार्ष्णिग्राहास्तैः पृष्ठतोगच्छद्भिरित्यर्थः । यथाकश्चिद्दूरधावनेनश्रांतःसन्निवृत्तःपार्ष्णिग्राहेणजीयतइतिप्रसिद्धं । तद्वदि तिभावः । निवृत्ताचेत्यपिपाठः । "एकमेवाद्वितीयंनेहनानास्तिकिंचने"त्यादिश्रुत्याघटपटादिभेदोनिषिद्ध्यतइत्युच्यते तत्रपृच्छा मः । अद्वैतबोधनात्पूर्वंघटपटादेर्भेदःप्रसक्तोनवेति । तत्राद्यएवांगीकार्यो नद्वितीयः कुतइत्यतआह ॥ अप्रसक्तेति ॥ आद्यपक्षांगीकारेपिकिंलब्धमित्यतआह ॥ तथाचेति ॥ यत्रयत्रेति ॥ घटपटविषयेवातत्प्रत्यक्षैक्यज्ञानविषयेवाताभ्यां

SGDF
Sri Gargeshwari Digital Foundation

ज्ञानांतरविषयेवातेभ्यःपुनर्ज्ञानांतरविषयेवेत्यर्थः ॥ यामिकगृहेचोरइवेति ॥ "यामिकोरात्रिजागर"इत्यभिधानात् जागरूकस्सन्रात्रौग्रामसंरक्षकोयामिकस्तद्गृहेयथाचोरस्यनावकाशः । एवंनेहनानेतिश्रुतिनिषेध्यभेदप्रसंजकत्वेनयामिकेप्रत्यक्षेजागरूकेसति भेदापहारित्वेनचोरभूतानेहनानेतिश्रुतिः कथमवकाशमासादयेदित्यर्थः । इममर्थंसंगृह्णाति ॥ एवंचेति ॥ अतत्वावेदकत्वाद्भेदग्राहिप्रत्यक्षंअप्रमाणमितिपूर्वमेवनिरस्तमितिहृदयं । किंचधर्मिभूतचरमधीसिद्धिकालएवतत्स्वरूपभेदस्यापि सिद्धत्वेनतत्राभेदश्रुतेर्नावकाशः ततश्चाऽनवस्थाभयाद्यत्रपरंपराविच्छेदस्तत्रैवचरमज्ञानेऐक्यश्रुतेरवकाशइतियदुक्तंतदसदित्या

भेदोग्राह्यइतिकथंयामिकगृहेचोरइवश्रुतिस्तत्रतिष्ठेत् । एवंच"प्रत्यक्षाप्रसक्तंचेदप्रसक्तनिषेधता। श्रुतेःस्यात्तत्प्रवृत्तंचेत्तद्बाधःसुस्थिरःश्रुतेः" । किंचचरमधीःप्रत्यक्षाद्यऽसिद्धाचेत् तदभेदःश्रुतेरपि दुर्ग्रहः । नहिश्रुतेर्घटादौतदभेदेचतात्पर्यं घटादेःप्राप्तत्वात् श्रौतस्यकिंचनादिशब्दस्यघटादावनुवाद

शयेनाह ॥ किंचेति ॥ चरमधीःप्रत्यक्षाद्यसिद्धातत्सिद्धावा नाद्यइत्याह ॥ चरमधीरिति ॥ भेदग्राहिणीचरमधीरित्यर्थः । तदभेदः चरमधियिनेहनानेतिश्रुतिजन्यज्ञानादभेदोऽस्मदादिभिःश्रुत्यापिदुर्ग्रहः धर्मिणएवानुपस्थितेरित्यर्थः।ननुचरमधियःप्रत्यक्षासिद्धत्वेपिसर्वाभेदादिविधायकनेहनानेतिश्रुतिस्थस्यकिंचनशब्दस्यघटादिसर्वप्रपंचप्रतिपादकत्वेन चरमधियोपितदंतर्गतत्वाच्छ्रौतकिंचनशब्देनैवतत्सिद्धिर्भविष्यति तदभेदश्चतयाबोध्यतइतिचेत्तत्राह॥नहीति॥प्राप्तत्वादिति॥ तथाचानुवादकत्वान्नत ॥ २५९ ॥

त्रतात्पर्यमितिभावः । ननुघटादेःप्रत्यक्षप्राप्तत्वेनतदंशेश्रौतकिंचनशब्दस्यानुवादकत्वेनतात्पर्याभावेपिचरमधियोप्राप्तत्वेनतदंशे श्रौतकिंचनशब्दस्याननुवादकत्वमेवास्त्वित्यतआह ॥श्रौतस्येति॥ वैरूप्येति ॥ सकृत्प्रयुक्तशब्दस्यासतिबाधकेएवंवैरूप्यकल्पनाऽयोगादित्यर्थः । तथाचानुवादकत्वविधायकत्वाभ्यांवाक्यभेदःस्यादितिभावः । द्वितीयेत्वाह ॥ अथेति ॥ तेनैवेति ॥ चरमधीस्वरूपग्राहकप्रत्यक्षेणेत्यर्थः । भेदस्यतत्स्वरूपत्वादितिभावः । कथंनावकाशइत्यतस्तदुपपादयति ॥ श्रुत्यापिहीति ॥ नेहनानेतिश्रुत्यापीत्यर्थः। अभिमतयोर्ज्ञानयोः । वस्तुगत्याबाध्यबाधकभावाभावादभिमतयोरित्युक्तं । इतरेतरभिन्नत्वेनोपस्थितयोरेवाभे

कता चरमबुद्ध्यादौतुविधायकतेत्युक्तौचवैरूप्यापातात् । अथचरमधीःप्रत्यक्षादिसिद्धा तर्हितद्भेदोपितेनैवसिद्धइतिनाद्वैतश्रुतेरवकाशः । श्रुत्यापिहिबाध्यबाधकत्वेनाभिमतयोरितरभिन्नत्वेनबुद्धिस्थयोरेवाभेदोबोध्यः । यस्यकस्यचिद्येनकेनचिदभेदबोधनेबाधकस्यबाध्याभेदासिद्धेः । एवंचो

दः कस्माद्बोध्यइत्यतआह ॥ यस्यकस्यचिदिति ॥ इदंबाधकंऐक्यज्ञानंबाध्याद्भेदज्ञानाद्भिन्नमित्युपस्थितौसत्यामेवतयोरभेदबोधनेबाधकस्यबाध्याभेदःसिद्ध्यति अन्यथाबाध्यंबाधकमित्यऽसंकीर्णव्यवहारायोगेनयस्यकस्यचिद्येनकेनचिदभेदइत्येवप्राप्त्याबाधकस्यबाध्याभेदासिद्धेरित्यर्थः ॥ एवंचेति ॥ बोधनीयाभेदयोर्बाध्यबाधकत्वेनाभिमतयोर्ज्ञानयोर्भेदप्रसक्तौतत्प्रमाणेनैवबाधः । अप्रसक्तौतुयस्यकस्यचिद्येनकेनचिदभेदबोधनापत्त्याबाधकस्यबाध्याभेदाचोदनादुभयतःपाशारज्जुर्गलबंधिकारज्जुरि

SGDF Foundation

त्यर्थः। यदुक्तमुक्तरीत्यानिर्बाधाश्रुतिः सर्वाद्वैतेपर्यवस्यतीति तदयुक्तमित्याशयेनविकल्पयति ॥ किंचेति ॥चरमज्ञानस्येत्यादि॥ निर्बाधाश्रुतिःसर्वाद्वैतेपर्यवस्यतीत्यस्यसर्वमिथ्यात्वंप्रतिपादयतीत्यर्थकथनमयुक्तं यथाऽद्वैतज्ञानस्यसर्वजगदंतर्गतत्वेनवस्तुगत्या स्वरूपतोमिथ्यात्वेपिव्यावहारिकसत्त्वेनप्रमात्वमंगीकृत्यतद्विषयस्याद्वैतस्यापहारोनत्वयांगीकृतः । एवंभेदज्ञानरूपचरमधि योपिजगदंतर्गतत्वेनवस्तुगत्यास्वरूपतोमिथ्यात्वेपिप्रमात्वोपपत्तेर्नेहनानेतिश्रुत्यातद्विषयभूतभेदापहारोऽयुक्तइत्यर्थः । उक्तरी त्यानिर्बाधाश्रुतिःसर्वाद्वैतेपर्यवस्यतीत्यस्यसर्वमिथ्यात्वंबोधयतीत्यर्थस्वीकारेऽतिप्रसंगमाह ॥ अन्यथेति ॥ श्रुतिरनुमानंवेत्य

भयतःपाशारज्जुः । किंचाऽद्वैतश्रुतेःकिंसर्वमिथ्यात्वेतात्पर्यमभेदेवा भेदनिषेधेवा । नाद्यः । चरम ज्ञानस्यवास्तवेमिथ्यात्वेप्रमितेप्यद्वैतज्ञानवद्व्यावहारिकसतःप्रमात्वसंभवेनश्रुत्यातद्विषयापहारा

स्यतज्जन्यंज्ञानमित्यर्थः । विमतं ब्रह्म सत्यज्ञानादिवाक्यस्य ब्रह्मसत्त्वंप्रतिपादयंश्चासत्त्वंगृहीत्वेत्यस्यतद्वाक्य*जन्यब्रह्मसत्त्वा वगाहिज्ञानस्येत्यर्थः । बाधकस्यप्रत्यक्षज्ञानस्याप्येतदादौयोज्यं । व्यावहारिकभेदमात्रेणबाध्यबाधकभावोममनसंमतइत्याशं कापरिहारायोक्तमंततइत्यादि । द्वैतप्रत्यक्षबाधकत्वेनत्वयोच्यमानस्य । एवंबाध्येनेत्येतदपिबाध्यत्वेनत्वयोच्यमानेनेतिव्या ख्येयं । द्वैतज्ञानेनपरमार्थतोऽभेदेपीत्यन्वयः । एवमैक्यवाक्यस्यभेदवाक्येनेत्यस्यापितेनैवान्वयः । ऐक्यवाक्यस्यजरद्गवा दिवाक्येनेतिपाठस्तुनयुक्तः। तत्रतयोःपरमार्थतोऽभेदसद्भावेपिव्यावहारिकभेदेनैक्यवाक्यस्यजरद्गवादिवाक्यबाधकत्वानंगीका

SGDF
Sri Gargeshwari Digital Foundation

रेणदृष्टांतीकरणायोगादितिध्येयं ॥ ऐक्यस्यचभेदेनेति ॥ अद्वैतज्ञानविषयस्यअद्वैतवाक्यप्रतिपाद्यस्यचैक्यस्यद्वैतज्ञानविषये णद्वैतवाक्यप्रतिपाद्येनचभेदेनपरमार्थतोऽभेदेपीत्यर्थः ॥ द्वैतज्ञानबाधकत्ववदिति॥ अद्वैतज्ञानस्येतिवर्तते। इदमुपलक्षणं । ऐक्यवाक्यस्यद्वैतवाक्यबाधकत्ववदैक्यस्यभेदबाधकत्ववदित्यपिद्रष्टव्यं । अन्यथान्यूनतापत्तेरितिध्येयं । व्यावहारिकत्वेनो

योगात् । अन्यथाइदंवाअग्रेनैवकिंचनासीदितिश्रुतिर्वाविमतंसत्प्रतीतत्वादित्याद्यनुमानंवाआ दौस्वबोधकस्यसत्यज्ञानादिवाक्यस्यासत्त्वंगृहीत्वानिर्बाधंसत्सर्वासत्त्वंबोधयेत्। नांत्यौ। अंततोद्वैत प्रत्यक्षबाधकस्याद्वैतज्ञानस्यबाध्येनद्वैतज्ञानेनऐक्यवाक्यस्यभेदवाक्येनऐक्यस्यचभेदेनपरमार्थतःअ भेदेपिभेदाभावेपिवाव्यावहारिकभेदमात्रेणद्वैतज्ञानबाधकत्ववत्बाधकस्यप्रत्यक्षज्ञानस्यापिबाध्येन श्रौतज्ञानेनपरमार्थतःअभेदेपिभेदाभावेपिवा व्यावहारिकभेदमात्रेणाद्वैतधीबाधकत्वोपपत्तेः । अन्यथा"आपोवाइदंसर्व"मितिश्रुतिर्वाविमतंजलाभिन्नंप्रतीतत्वाज्जलवदित्यनुमानंवाआदौस्वबा

क्तव्यवस्थामनंगीकृत्योक्तरीत्यानिर्बाधाश्रुतिः सर्वाद्वैतेपर्यवस्यतीत्यस्यसर्वाभेदेभेदनिषेधेवातात्पर्यमित्यर्थइत्यंगीकारेऽतिप्रसंग माह॥ अन्यथेति॥ श्रुतिरनुमानंवेत्यनयोस्तज्जन्यज्ञानमित्यर्थः। विमतं पृथिव्यादि । स्वबाधकस्य जलभेदग्राहिप्रत्यक्षज्ञानस्य

SGDF
Sri Gargeshwari Digital Foundation

बोधयेत् विषयीकुर्यात् । जलाभेदंबोधयेदित्येवोक्तेजगज्जनकत्वात्तल्लयाधिकरणत्वाच्चजलंब्रह्मतदभेदंबोधयेदितिप्राप्त्येष्टापत्तिः स्यादित्यतउक्तंप्रसिद्धेति । अन्यत्वेनप्रसिद्धेषुपृथिव्यादिषुजलाभेदमित्यर्थइत्यप्याहुः । यत्र घटपटादौ अभेदः सर्वाभेदः ॥ अन्यत्रेति॥ प्रत्यक्षाद्यगृहीतभेदस्यघटस्वरूपस्यघटस्वरूपेणपटस्वरूपस्यपटस्वरूपेणवाप्रत्यक्षाद्यगृहीतभेदस्यद्वैतवाक्यजन्यज्ञानस्वरूपस्यस्वरूपेणाऽभेदःकामंगृह्यतांननोहानिरित्यर्थः । स्वस्वरूपस्यस्वस्वरूपेणभेदग्राहिप्रत्यक्षादिप्रमाणाभावेनबाधकाभावात्तत्राऽभेदग्रहोऽस्माकमपिसंमतइतिभावः ॥ आद्यइति ॥ अद्वैतश्रुतेःसर्वमिथ्यात्वे तात्पर्यमितिप्रथमपक्षइत्यर्थः ॥ अयुक्त

धकस्यजलाभेदंगृहीत्वानिर्बाधंसत्प्रसिद्धजलाभेदंबोधयेत्। एवंचयत्रभेदःप्रत्यक्षसिद्धः नतत्राऽभेदःकदापिश्रुतितस्सुग्रहः । अन्यत्रकामंगृह्यतांननोहानिः । अपिचाद्येसर्वंखल्विदंब्रह्मेतिसामानाधिकरण्यमयुक्तं । अंत्ययोरिदंरूप्यंगौरोहमितिभ्रमाणांप्रमात्वंस्यात् । आत्मनिदेहाद्भेदस्यानृता

मिति ॥ सर्वंमिथ्येत्येवबोधनापत्त्यासर्वंब्रह्मेतिसामानाधिकरण्येनब्रह्माभेदबोधनमयुक्तमित्यर्थः ॥अंत्ययोरिति॥ अद्वैतश्रुतेः सर्वाभेदेवाभेदनिषेधेवातात्पर्यमितिद्वितीयतृतीयपक्षयोरित्यर्थः॥प्रमात्वमिति॥ श्रुतेःसर्वपदार्थानांसर्वाभेदादिबोधकत्वांगीकारेणइदंपदार्थेरूप्याभेदरूपार्थस्यआत्मनिचगौरदेहाभेदरूपार्थस्यचसत्त्वादित्यर्थः । अतिप्रसंगांतराण्याह॥ आत्मनीत्यादिना ॥ आत्मनि जीवे । देहाभेदस्यआत्मनिब्रह्मणिअनृताभेदस्यैवसत्त्वेनतद्भेदस्यचमिथ्यात्वात्तद्बोधकानां "स्वाच्छरीरात्प्रवृहेत्सएष

आत्मानेतिनेती"त्यादिवेदांतानामतत्वावेदकत्वेनाऽप्रामाण्यंस्यादित्यर्थः । तदभिन्नस्य ब्रह्मतदभेदादेः सर्वस्यापि घटाभिन्नस्य ब्रह्मणस्तदभेदस्यएवमादेःसर्वस्येतिसामानाधिकरण्यं ॥ सद्योमोक्षइति ॥ सकृज्ज्ञानेनैवमोक्षइत्यर्थः ॥ अभिन्नत्वेनेति ॥ परस्परमभिन्नत्वेनेत्यर्थः ॥ स्वक्रियेत्यादि ॥ स्वक्रियास्वन्यायस्ववचनविरोधानांसर्वेषामपिभेदघटितत्वेनसर्वाभेदांगीकारेसर्वसंकरापत्त्यातद्विरोधाःस्युरित्यर्थः । ननुवस्तुतोऽभेदेप्याविद्यकभेदसद्भावेनसुखदुःखादिव्यवस्थोपपत्त्यासर्वसंकराभावेन

दिव्यावृत्तेश्चबोधकानांवेदांतानामप्रामाण्यंचस्यात् । घटज्ञानेनैवतदभिन्नस्यब्रह्मतदभेदादेस्सर्वस्यापि वस्तुतोज्ञातत्वेनसार्वज्ञ्यंवेदांतानांवैयर्थ्यंसद्योमोक्षश्चस्यात् । सुखदुःखबंधमोक्षभेदाभेददूषणभूषणजयपराजयभ्रांतिप्रमादेरपिवस्तुतोऽभिन्नत्वेनसर्वसंकरापत्त्यास्वक्रियास्वन्यायस्ववचनविरोधाश्चस्युः। आविद्यकभेदेनसर्वस्यापिव्यवस्थेतिचेन्न । तस्याप्यनाविद्यकब्रह्माभिन्नत्वेनाविद्यकत्वायोगात् । काल्पनिकभेदेनवास्तवाभेदकार्यप्रतिबंधायोगाच्च । मोक्षेआविद्यकभेदाभावेनानंदस्यदुःखात्मकत्वेनापुमर्थत्वापाताच्च ।

नस्वक्रियादिविरोधइत्याशंकते ॥ आविद्यकभेदेनेति ॥ काल्पनिकभेदेनेत्यर्थः ॥ तस्यापीति ॥ व्यवस्थोपपादकस्यभेदस्यापीत्यर्थः । ब्रह्मणोप्याविद्यकत्वेतदभिन्नस्याविद्यकत्वंयुक्तमेवेत्याशंकापरिहारायोक्तं अनाविद्यकेति ॥ प्रतिबंधायोगादिति ॥ तथाचवास्तवाभेदकार्यभूतसर्वसंकरापत्तिर्दुर्वारेतिभावः ॥ मोक्षइति ॥ आविद्यकभेदेनसुखदुःखव्यवस्थांगीकारे

SGDF
Digital Foundation

मोक्षेऽविद्यायाअभावेनआविद्यकभेदाभावादानंदस्यापिदुःखात्मकत्वापत्त्याऽपुमर्थत्वंस्यादित्यर्थः । ननुमोक्षगतानंदस्यवस्तुग
त्यादुःखाभेदेपिवस्तुगत्यातस्यप्रतिकूलवेदनीयत्वाभावेनमोक्षस्यपुमर्थत्वमुपपद्यतइतिचेत्तत्राह ॥ सुखादाविति ॥ तदभेदे
दुःखाभेदे ॥ अभेदःदुःखाभेदः ॥ पर्यवस्येदिति ॥ भेदस्यैवनामांतरंस्यादित्यर्थः । तदसाधारणस्वभाववतएवतदभिन्नत्वा
त्तदभावेपितदभेदांगीकारेताद्दशाभेदोऽस्मदभिमतभेदस्यैवनामांतरंस्यादितिभावः । ननुमौक्तानंददुःखयोरनुकूलवेदनीयत्व
प्रतिकूलवेदनीयत्वरूपासाधारणधर्माभ्यांभेदमंगीकृत्यसत्त्वेनभेदोनास्तीतिसद्रूपमात्रेणैवभेदोनि(षिध्यते । अ)रस्यतेऽतोमौ

सुखादौनिरुपाधिकप्रतिकूलादिरूपदुःखाद्यसाधारणस्वभावाभावेपि तदभेदेपारिभाषिकोयमभेदो
भेदेपर्यवस्येत् । असाधारणरूपभेदमुपेत्यसद्रूपमात्रभेदनिषेधेत्विष्टापत्तिरप्रसक्तप्रतिषेधश्च । किंच
घटपटौभिन्नावितिज्ञानंस्वस्याद्वैतज्ञानादिनाभेदंविनानुपपत्तेस्तमाक्षिपतीतिनाद्वयश्रुतेरवकाशः ।

क्तानंदस्यसत्त्वेनाऽभेदेप्यसाधारणरूपभेदसद्भावान्नापुरुषार्थत्वप्रसंगइत्यतआह ॥ असाधारणेति ॥ रूपभेदं धर्मभेदं
॥ इष्टापत्तिरिति ॥ सर्वंसदितिसत्त्वेनाभेदस्यास्माभि(रप्यंगी)रंगीकारादित्यर्थः । अस्मन्मतेसत्त्वेनसादृश्याभेदएवस्यान्न
मुख्याभेदइत्यस्वरसादाह ॥ अप्रसक्तेति ॥ घटादिकमानंदादिकंवासन्नभवतीतिसत्त्वावच्छिन्नभेदस्यप्रसक्त्यभावेनस
द्रूपमात्रभेदस्यनिषेधेऽप्रसक्तनिषेधापत्तिरित्यर्थः । अर्थापत्त्याऽद्वैतश्रुतेरनवकाशइत्याह । किं(चघटपटौभिन्नावितिज्ञान
मिति)चेति ॥ भेदंविनेति ॥ भेदज्ञानाद्वैतज्ञानयोःस्वरूपैक्येतद्विषययोर्भेदाद्वैतयोश्चैक्येस्वस्यभेदज्ञानत्वमेवानुपपन्नमि

SGDF
Sri Gargeshwari Digital Foundation

त्यर्थः । तं स्वस्याऽद्वैतज्ञानाद्भेदं । भेदावगाहिनिचरमज्ञानेपिऐक्यज्ञानापेक्षयाभेदस्यैवार्थापत्त्याविषयीकरणान्नतत्राप्यद्वैतश्रुतेरवकाशइतिभावः ॥ यच्चोक्तमिति ॥ घटपटभेदज्ञानत्वान्यथानुपपत्त्यैवभेदज्ञानस्याद्वैतज्ञानाद्भेदसिद्ध्यानाद्वैतश्रुतेरवकाशइत्यर्थापत्तिपक्षेपियद्दूषणमुक्तंखंडनकारेणेत्यर्थः ॥ इयमर्थापत्तिरिति ॥ घटपटभेदज्ञानमद्वैतज्ञानाद्भेदंविनानुपपन्नमितिज्ञानमित्यर्थः । तथाचघटपटभेदज्ञानत्वान्यथानुपपत्तिज्ञानमद्वैतज्ञानाद्घटपटभेदज्ञानस्यभेदावगाह्यपिनस्वस्मिन्नद्वैतज्ञानप्रतियोगिकभेदमवगाहते स्वस्यस्वविषयकत्वाभावात् । ययोर्भेदंविनाऽनुपपत्तिर्गृहीता तयोरेवभेदोऽर्थापत्त्याभासते नानुपपत्तौ अनुपपत्तावनुपपत्त्यंतराग्रहात् अतोनेहनानेत्यद्वैतश्रुतिःस्वजन्यैक्यज्ञानस्यार्थापत्त्यातावदभेदंगृहीत्वानिर्बाधत्वाद्घटपटभेद

यच्चोक्तंइयमर्थापत्तिर्नस्वविषयेतिसैवद्वारमद्वयश्रुतेः । तदुक्तं । "आद्यधीवेद्यभेदीयाप्यन्यथानुपपन्नता । स्वज्ञानोपेक्षणादंतेबाधतेनाद्वयश्रुति" मिति । तन्न ।

ग्राहकादबिभ्यतीघटपटयोरप्यभेदमेवगृह्णातीत्येवंसर्वाद्वैतेपर्यवस्यतीतिभावः । खंडनकारःस्वोक्तार्थेस्वाचार्यसंमतिमाह ॥ तदुक्तमिति ॥ आद्यधीति ॥ घटपटौभिन्नावितिज्ञानंआद्यभेदधीः तद्वेद्योयोभेदः तदीयातत्संबंधिनीयाऽन्यथानुपपन्नता घटपटभेदज्ञानत्वान्यथानुपपत्तिरितियावत् । ज्ञानसंबंधिन्याअपितस्याज्ञानद्वारापरंपरयाभेदीयत्वात् साऽन्यथानुपपन्नता स्वज्ञानोपेक्षणात् स्वजन्यज्ञानेस्वविषयकत्वाभावेनोपेक्षणात् अद्वैतज्ञानप्रतियोगिकस्वनिष्ठभेदग्रहणेसामर्थ्यविधुरत्वादर्थापत्तिजन्यज्ञानमद्वैतज्ञानेनादावेकीभूतत्वादंतेऽर्थापत्त्यवतारानंतरमर्थापत्तिजन्यज्ञानस्याद्वैतज्ञानस्यचाभेदबोधनायप्रवृत्तांनेहनानेतिश्रुतिंन

SGDF
Sri Gargeshwari Digital Foundation

बाधते तथाचाद्वैतश्रुतिःसर्वाभेदेपर्यवस्यतीतिसंमतिश्लोकार्थः॥अर्थापत्तेरिति ॥ घटपटभेदज्ञानत्वान्यथानुपपत्तिजन्यज्ञानस्ये त्यर्थः ॥ इतरस्मादिति ॥ अद्वैतज्ञानादित्यर्थः । भेदाभावे स्वरूपतोविषयतश्चभेदाभावे ॥ त्वदुक्तरीत्येति ॥ अद्वैतश्रुतिः स्वजन्यैक्यज्ञानस्यार्थापत्तिजन्यज्ञानेनतावदभेदंगृहीत्वाघटपटभेदग्राहकादबिभ्यतीघटपटयोरप्यभेदमेवगृह्णीयादितित्वदुक्तरी त्येत्यर्थः ॥ तद्भेदस्यापीति ॥ अर्थापत्तेरद्वैतज्ञानात्स्वरूपतोविषयतश्चभेदस्यापीत्यर्थः ॥ अर्थापत्तिविषयत्वादि ति ॥ तथाचोपपाद्यस्यघटपटभेदस्ययावदुपपादकंअर्थापत्तेरद्वैतज्ञानाद्भेदादिकंतस्याप्यर्थापत्तिविषयत्वेनइयमर्थापत्तिर्नस्ववि

अर्थापत्तेरितरस्माद्भेदाभावेत्वदुक्तरीत्याघटपटभेदासिद्ध्यातद्भेदस्यापिघटपटभेदोपपादक
त्वेनाऽर्थापत्तिविषयत्वात् । उपपादकत्वंह्यर्थापत्तिविषयत्वेतंत्रं नत्वर्थापत्त्यसंबंधित्वं ।

षयेतिस्वज्ञानोपेक्षणादितिचयदुक्तंतदयुक्तमित्यर्थः । ननुप्रमाणेनप्रमेयसंबंध्येवार्थःसिद्ध्यति नतुप्रमाणसंबंधी चक्षुरादिना घटसंबंधिरूपपरिमाणादिसिद्धिवत्स्वसंबंधिरूपादेरसिद्धेः । अतोऽर्थापत्तिरूपप्रमाणाऽसंबंधित्वेसत्युपपादकत्वमेवार्थापत्तिविष यत्वेतंत्रमतोर्थापत्तिनिष्ठोऽद्वैतज्ञानप्रतियोगिकोभेदःकथमर्थापत्तिविषयइत्यतआह ॥ उपपादकत्वंहीति ॥ एवंचावांतरे णसंबंधित्वादर्शनेप्यर्थापत्तिविशेषेतस्यावश्यकत्वात्प्रकृतेचार्थापत्तावितरस्माद्भेदोघटपटभेदोपपादकत्वेनार्थापत्तिविषयइत्येवंक ल्प्यतइतिभावः । अर्थापत्त्यसंबंधित्वं । अर्थापत्त्यसंबंधित्वविशिष्टमुपपादकत्वमर्थापत्तिविषयत्वेनतंत्रमित्यर्थः । कुतोनतंत्रमि

त्यतोऽर्थापत्तिसंबंधिप्रमेयस्याप्यर्थापत्तिविषयतायास्त्वयांगीकृतत्वात् अन्यथातदपिनस्यादित्याह ॥ अन्यथेति ॥ दृगिति ॥ दृश्यमात्रस्यप्रपंचस्यदृक्संबंधान्यथानुपपत्त्याकल्प्यमानमध्यस्तत्वरूपंमिथ्यात्वंदृक्संबंधान्यथानुपपत्त्यातस्यामपिसिद्ध्यतीत्यं गीकृतंतन्नस्यादित्यर्थः ॥ ज्ञानेति ॥ ज्ञाननिवर्त्यत्वान्यथानुपपत्त्याप्रपंचेकल्प्यमानंमिथ्यात्वंज्ञाननिवर्त्यत्वान्यथानुपपत्तेरपिप्रपं चांतर्गतत्वेनज्ञाननिवर्त्यत्वात्तस्यामपिसिद्ध्यतीत्यंगीकृतंतदपिनस्यादित्यर्थः । अर्थापत्त्यसंबंधित्वविशिष्टोपपादकत्वस्याऽर्था पत्तिविषयत्वेतंत्रतायामतिप्रसंगांतरमाह॥ नेहनानेति॥ ननुब्रह्मणिनेहनानेतिभेदनिषेधस्यश्रौतत्वात्कथमियमन्यथानुपपत्तिः ।

अन्यथादृग्दृश्यसंबंधान्यथानुपपत्तिर्ज्ञाननिवर्त्यत्वान्यथानुपपत्तिश्चस्वामिथ्यात्वविषया
नस्यात् । नेहनानेतिब्रह्मणिभेदमात्रनिषेधान्यथानुपपत्तिश्चस्वाभेदविषयानस्यात् ।

तथाब्रह्मण्येवानेनसर्वाभेदस्यबोधनात्कथमयंभेदमात्रनिषेधः । घटपटाद्यभेदाबोधनादितिचेत् । सत्यं । ब्रह्मणिभेदनिषेधस्य श्रौतत्वेपिभेदमात्रनिषेधोयःसोन्यथानुपपत्तिलभ्यः । तथाहि । अनयाश्रुत्याब्रह्मणिस्वेतरसर्वघटपटादिप्रतियोगिकभेदनिषे धस्तावत्सिद्धः । तथाचयदभिन्नाभिन्नंयत्तत्तेनाभिन्नमितिव्याप्तिबलाद्घटाभिन्नब्रह्माभिन्नत्वात्पटस्यापिघटाभेदःसिद्ध्यतीत्येवं व्याप्तिबलेनघटपटाद्यभेदस्यसिद्ध्यमानत्वादन्यथानुपपत्तिश्चेत्युक्तमितिसंप्रदायविदः॥ स्वाभेदेति ॥ अर्थापत्तेःस्वविषयकत्वा भावेयद्यदभिन्नाभिन्नमितिभेदमात्रनिषेधरूपव्याप्त्यनुपपत्त्याएतदर्थापत्तीतरघटपटाभेदएवसिद्ध्येन्नार्थापत्तिसंबंध्यभेदः । ततश्च

SGDF
Sri Gurudeva Digital Foundation

तेनभेदमात्रनिषेधासिद्धिःस्यादितिभावः । नन्वस्माभिर्भेदनिषेधान्यथानुपपत्त्याघटपटाभेदोबोध्यतइतिनोच्यते । येनतुल्यन्यायतयास्वाभेदंबोधयंतीश्रुतिःस्वविषयास्यात् । किंतु“सर्वंसर्वस्मादभिन्न”मितिकाचिच्छ्रुतिरस्ति । तयैवब्रह्मण्यन्यथानुपपत्त्याभेदोबोध्यतइतिचेत्तत्राह ॥ नहीति ॥ घटःपटादभिन्नइतिविशेषश्रुतिस्तुदूरापास्तेतिहिशब्दार्थः ॥ सापीति ॥ सर्वंसर्वस्मादभिन्नमितिकल्प्यमानाश्रुतिरित्यर्थः। तत्र कल्प्यमानायांकस्यांचिच्छ्रुतौ। अर्थापत्त्यंतरमित्यादिब्रह्मणाभेदनिषेधकमित्यर्थः॥ तवापीति ॥ सुदूरधावनश्रांतेत्युक्तरीत्याऽस्माकमनवस्थादातुस्तवापीत्यर्थः । संगृह्णाति ॥ एवंचेति ॥ अर्थापत्तिरिति ॥ अस्मदु

नहिसर्वंसर्वस्मादभिन्नमितिकाचिच्छ्रुतिरस्ति । अस्तिचेदपिसापिस्वाभेदविषयान स्यात् । तथाचतत्रार्थापत्त्यंतरंश्रुत्यंतरंचवाच्यमितितवाप्यनवस्थास्यात् । एवंच “अर्थापत्तिस्स्वकीयंचभेदंगृह्णातितंविना । अयुक्तेस्तवदृग्दृश्यसंबंधानुपपत्तिवत्” ॥

क्तघटपटभेदज्ञानत्वान्यथानुपपत्तिजन्यज्ञानमित्यर्थः ॥ स्वकीयंचेति ॥ घटपटाद्यन्यदीयंभेदंअद्वैतज्ञानप्रतियोगिकंस्वकीयंच स्वरूपतोविषयेणच । कुतइत्यतआह॥ तंविनाऽयुक्तेरिति ॥ अर्थापत्तेरितरस्माद्भेदंविनात्वदुक्तरीत्याघटपटभेदासिद्ध्यातद्भेदस्यघटपटभेदोपपादकत्वायोगादर्थापत्तिभेदस्यापिविषयीभूतघटपटादिभेदोपपादकत्वादर्थापत्तिविषयकत्वमित्यर्थः । ननुप्रमाणेनप्रमेयसंबंध्यर्थस्तुसिद्ध्यति नप्रमाणसंबंधी । चक्षुषास्वीयरूपवदितिचेत्तत्राह ॥ तवेति ॥ तथाचतदपिनस्यादितिभावः।
पूर्वपक्षावसरेघटपटौभिन्नावितिप्रत्यक्षस्यनियतविषयकत्वेनबाधकेस्वस्मिन्बाध्यादैक्यज्ञानाद्भेदाग्रहणेपिज्ञानांतरेणबाध्यबाध

SGDF Sri Gargeshwari Digital Foundation

कयोर्भेदग्रहोभविष्यतीत्यस्माभिराशंकितेऽनवस्थोक्तातामिदानींपरिहरति ॥ कथंचेति ॥ साक्षिणा साक्षिरूपज्ञानांतरेण ॥ ग्रह णादिति ॥ स्वेनैवेतिशेषः ॥ अन्यथेति ॥ जीवस्वरूपभूतेसाक्षिणीतरभेदस्यस्वेनग्रहणानंगीकारइत्यर्थः ॥ संशयादिरिति ॥ अहंघटोवानवेतिसंशयोघटएवेतिविपर्ययोवास्यादित्यर्थः । उपसंहरति ॥ तस्मादिति ॥ सामान्येति ॥ सामान्येनद्वितीयमा त्रंनिषेद्धुंप्रवृत्ताया"एकमेवाद्वितीयंनेहनाने"तिश्रुतेरित्यर्थः ॥ विशेषविषयेणेति ॥ द्वितीयविशेषस्यघटादेःसत्त्वग्राहिणाप्र त्यक्षेणेत्यर्थः ॥ आहवनीयशास्त्रस्येति ॥ अधिकरणंतुपूर्वमुपन्यस्तंद्रष्टव्यं । तथाच "आहवनीयेजुहोती"तिहोममात्रंप्रत्या

कथंचमत्पक्षेऽनवस्था । घटतद्धीभेदग्राहिणास्वप्रकाशेनसाक्षिणास्वस्मिन्नितरभेदस्यापिग्रहणात् । अन्य थास्वस्यघटादिभ्योभेदसंशयादिःस्यात् । तस्मात्सामान्यविषयश्रुतेर्विशेषविषयेणप्रत्यक्षेणाहवनीयशास्त्र स्यपदशास्त्रेणेवसंकोचएवन्याय्यः । नतुप्रत्यक्षबाधकता । अन्यथानेतिनेतीत्यनियतविषयभेदश्रुतिःसर्वं

धारत्वेनप्राप्तस्याहवनीयस्य "पदेजुहोती" तिसोमक्रयणार्थंनीयमानायागोःपदेहोमविशेषविधायकशास्त्रविहितहोमेतरपरत्वंय था । एवंप्रत्यक्षादिप्रमाणगृहीतेतरसमाधिकरूपद्वितीयनिषेधपरत्वेनसंकोचएवन्याय्यो नतुसामान्यश्रुत्याविशेषविषयकप्रत्यक्ष स्यबाधः । तथात्वेआहवनीयशास्त्रेणैवपदशास्त्रस्यबाधापत्तेरित्यर्थः ॥ सामान्येनप्रवृत्तस्यप्रमाणस्यतद्विरोधिविशेषप्रमाणवि षयेतरविषयकत्वानंगीकारेऽतिप्रसंगमाह ॥ अन्यथेति ॥ अनियतविषयेति ॥ प्रतियोगिविशेषानुपादानेनानियतविषयत्वा

SGDF
Sri Gargeshwari Digital Foundation

द्घटोपिघटोनपटोपिपटोनततोऽभिन्नइत्यर्थसंभवेनसामान्यश्रुतिरित्यर्थः ॥ **सर्वमिति** ॥ घटोपिघटाद्भिन्नइतिसर्वंसर्वस्मादित्यर्थः ॥ **अद्वैतवाक्यवदिति** ॥ घटपटौभिन्नावितिबाधकत्वेनाभिमतात्प्रक्षज्ञानाद्बाध्यत्वेनाभिमतमैक्यज्ञानंभिन्नमित्यग्रहणात् । तत्रलब्धपदाश्रुतिस्तयोस्तावदैक्यंगृह्णाति । ततश्चनिर्बाधाश्रुतिःसर्वाद्वैतेपर्यवस्यतीतिन्यायेनेत्यर्थः ॥ **तज्ज्ञानतद्विषयाणांतेभ्योभेदमिति** ॥ अद्वैतवाक्यविषयकज्ञानादद्वैतवाक्यविषकज्ञानस्य अद्वैतवाक्यजन्यज्ञानादद्वैतवाक्यजन्यज्ञानस्य अद्वैतवाक्यादद्वैतवाक्यस्य अद्वैतज्ञानविषयादद्वैतादद्वैतस्यचेत्येवंतज्ज्ञानतद्विषयाणांतेभ्योभेदमित्यर्थः ॥ **आदाविति** ॥ स्वस्मिन्स्वाभेदग्राहकप्रमाणप्रवृत्तेःपूर्वमित्यर्थः ॥ **निर्बाधमिति** ॥ स्वस्मिन्स्वभेदग्राहकंप्रतिबाधकत्वेनाभिमतस्यस्वस्मिन्स्वा

सर्वस्माद्भिन्नमितिमद्वाक्यंवा अद्वैतवाक्यवत्तज्ज्ञानतद्विषयाणां
तेभ्योभेदमादौगृहीत्वानिर्बाधंसत्सर्वभेदेपर्यवस्यतीतिस्यात् ।

भेदग्राहकस्यप्रमाणस्यप्रथमप्रवृत्तेनस्वस्मिन्स्वभेदग्राहकेणैवबाधितत्वाद्भेदग्राहकंनेतिनेतीत्यादिकंनिर्बाधमित्यर्थः ॥ **सर्वभेदइति** ॥ घटात्पटस्यपटाद्घटस्येत्येवंसर्वभेदइत्यर्थः ॥ **स्यादिति** ॥ तथाचसामान्यविषयायानेतिनेतीतिश्रुतेर्विशेषविषयेण स्वस्मिन्स्वाभेदग्राहकेणप्रत्यक्षेणाहवनीयशास्त्रस्यपदशास्त्रेणेवसंकोचएवन्याय्यइत्येवसमाधानंवक्तव्यं । तदस्माकमपितुल्यमितिभावः । यदुक्तंसर्वंखल्विदंब्रह्मेत्याद्यद्वैतश्रुतिस्तज्ज्ञानंवानियतविषयकभेदग्राहिप्रत्यक्षेणादावैक्यंगृह्णाति । पश्चान्निर्बाधाश्रुतिःसर्वाद्वैतंबोधयतीति तदयुक्तं । शब्दतद्बुद्ध्योर्विरम्यव्यापारप्रसंगात् । तस्यचेतनधर्मत्वेनजडयोःशब्दतद्बुद्ध्योरयोगात् ।

अतोनक्रमेणाभेदबोधनंयुक्तमित्याह ॥ **किंचेति** ॥ स्थित्वास्थित्वार्थबोधनविषयीकरणादिरूपोव्यापारोविरम्यव्यापारः । उक्तदोषपरिहारमाशंकते ॥ **नन्विति** ॥ सर्वंखल्विदंब्रह्मेत्यादिश्रुतितस्तावत्घटपटादिसर्वाद्वैतविषयिणीबुद्धिरेकदैवभवति अतो नशब्दबुद्ध्योर्विरम्यव्यापारः एवंसर्वाभेदबोधनानंतरंतज्ज्ञानेघटपटौभिन्नावितिप्रत्यक्षबाधेनपुरुषाणामप्रामाण्यशंकायांश्रुतिस्तावत्प्रत्यक्षेणादावेकीभवति पश्चान्निर्बाधाश्रुतिःसर्वाद्वैतंबोधयति अतःप्रामाण्यंयुक्तमित्येवंतत्तद्विषयप्रत्यक्षबाधनिरासक्रमनिबंधनःप्रामाण्यग्रहक्रमःपुरुषाणामेवभवत्यतस्तेषामेवविरम्यव्यापारोनशब्दबुद्ध्योरितिभावः । यदुक्तंश्रुत्याघटपटादिसर्वा

किंचशब्दबुद्ध्योर्विरम्यव्यापारायोगान्नक्रमेणाभेदग्रहोयुक्तः । ननुयुगपदेवश्रुत्यासर्वाद्वैतविष
यतयाजातायांबुद्धावस्माकंतत्तद्विषयेषुप्रामाण्यबुद्धयएवक्रमिकाइतिचेन्मैवं । ब्रह्मणिसर्वाभेद
स्यैवश्रुतत्वात्तदन्यथानुपपत्त्याचघटपटाद्यभेदस्यकल्प्यत्वात् । प्रथमोपस्थितेभेदप्रसक्तिमतिच

भेदविषयिणीबुद्धिरेकदैवजायतइतितदयुक्तं । सर्वंखल्विदंब्रह्मेतिश्रुत्याआदौब्रह्मण्येवसर्वाभेदविषयिण्याबुद्धेर्जायमानत्वादनंतरंयद्यदभिन्नाभिन्नंतत्तेनाभिन्नमितिव्याप्त्यन्यथानुपपत्त्यैवघटपटाद्यभेदस्यकल्प्यमानत्वादतोघटपटादिसर्वाभेदविषयिणीबुद्धिःश्रुत्यैवादौभवतीत्युक्तमसदित्याह ॥ **मैवमित्यादिना** ॥ ननुतर्हिमास्तुघटपटाद्यभेदस्यश्रुत्याबोधः । ब्रह्मणिसर्वाभेदस्तावच्छ्रुत्याबोध्यते पश्चादन्यथानुपपत्त्याघटपटाद्यभेदोबोध्यतइत्येवांगीक्रियतइतिचेत्तत्राह ॥ **प्रथमेति** ॥ **भेदेति** ॥ घटादौब्रह्म

SGDF Foundation

भेदस्यप्रत्यक्षेणैवदृश्यमानत्वादित्यर्थः ॥ कल्पकाभेदइति ॥ उक्तव्याप्तिद्वाराघटाद्यभेदकल्पकेआदौश्रुत्याबोधितेब्रह्मणिस सर्वाभेदइत्यर्थः । ब्रह्मणिसर्वाभेदाभावेउक्तव्याप्त्यन्यथानुपपत्तेःपरेणवक्तुमशक्यत्वाद्धटपटाद्यभेदकल्पकत्वंतस्येतिभावः । न्याय्या न्यायप्राप्तावक्तव्या ॥ सएवेति ॥ घटपटाद्यभेदकल्पकोब्रह्मणिसर्वाभेदएवेत्यर्थः ॥ प्रत्यक्षेति ॥ घटादेःसर्वभेदग्राहकप्रत्यक्षेत्यर्थः ॥ कल्पनेति ॥ ब्रह्मणिसर्वाभेदमूलकोक्तव्याप्त्यन्यथानुपपत्तेरित्यर्थः । येन चरमबुद्ध्याद्यभेदकल्पनेन । तद्धा

कल्पकाभेदएवप्रथमंप्रामाण्यधीन्याय्या । सएवचप्रत्यक्षबाधितइतिकथंचरमबुद्धितद्विषयाद्यभेदकल्पना । येनतद्वारासर्वाभेदस्सिद्ध्येदितिदुर्वारःप्रत्यक्षबाधः । विस्तरस्तुखंडनखंडनेद्रष्टव्यः । तस्मात्प्रत्यक्षबाधाच्छ्रुतयोऽन्यपराइति ॥ ७ ॥ द्वैतप्रत्यक्षस्याद्वैतश्रुतिबाधकत्वखंडनभंगः॥२७॥ किंच "सलिलएकोद्रष्टाद्वैतोभवती" त्यत्रसलिलादिपदेन "सदेवसोम्येदमग्रआसीदि" त्यत्रकालप्रापकेणपूर्वेणाग्रपदेन"तदैक्षतनामरूपेव्याकरोदि"तीक्षणनामरूपात्मकप्रपंचप्रापकेणोत्तरेणचद्वैतवाक्येनविरोधः

रा चरमबुद्ध्याद्यभेदद्वारा । सर्वाभेदो घटपटाद्यभेदः । खंडनखंडनं विष्णुदासाचार्यकृतोग्रंथविशेषः । उपसंहरति ॥ तस्मादिति ॥ "एकमेवाद्वितीय"मित्यादिश्रुतयःसमाधिकराहित्यपराइत्यर्थः ॥ २७ ॥ ७ ॥ द्वैतप्रत्यक्षस्याद्वैतश्रुतिबाधकत्वखंडनभंगविवरणं ॥ २७ ॥ पूर्वमानांतराविरुद्धःपूर्वोत्तराविरुद्ध(श्चार्थोवर्णनीयइ)श्चशब्दार्थइत्युक्तं । तत्रैकमेवेतिश्रुतेर्मानांतरेणप्रत्यक्षेणविरोधमुक्त्वापूर्वोत्तरविरोधंचाह ॥ किंचेति ॥ बृहदारण्यकवाक्यमिदं । अद्वैतोभवतीत्यत्रद्वितीयमात्र

SGDF
Sri Gargeshwari Digital Foundation

निषेधेसलिलादिपदेनविरोधइतिसंबंधः । सदेवेतिछांदोग्यवाक्यं पूर्वेण एकमेवेत्यतःपूर्ववा(क्यस्थेन)क्येन । ननुद्वैतस्यसत्य त्वंनसिद्ध्यतीतिचेत्तत्राह ॥ प्रामाण्यस्येति ॥ लक्षणादिनेति ॥ विरुद्धधर्मप्रतिपादकवाक्यस्यभागत्यागलक्षणयाऽद्वैतप रत्वं ॥ अतात्विकेति ॥ अतात्विकभेदेत्यर्थः । तद्विरोधेन अद्वैतवाक्यविरोधेन ॥ विपरीतमिति ॥ अद्वैतवाक्य(स्यैवद्वै) स्यद्वैतवाक्यविरोधेनाप्रामाण्यादिकमित्यर्थः । ननुनिषेध्यभेदप्रापकतयापूर्वस्यभेदप्रत्यक्षादेःपरेणतन्निषेधकेनाद्वैतवाक्येनाप

प्रामाण्यस्यस्वतस्त्वेनाद्वैतवाक्येनाद्वैतस्येवद्वैतवाक्येनैवद्वैतस्यस(त्य)त्वासिद्धेः । यदिवा
विरोधायद्वैतवाक्यस्यलक्षणादिनाऽद्वैतपरत्वंवाऽतात्विकविषयत्वेनव्यवस्थावातद्विरोधे
नाप्रामाण्यंवा तदाविपरीतंकिंनस्यात् । अपच्छेदन्यायादेर्निरासात् । तेनपूर्वस्यद्वैतवा
क्यस्यबाधेपिपरस्याबाधाच्च । पूर्वस्याप्यनुपसंजातविरोधित्वादिनाप्राबल्यस्योक्तत्वाच्च ।

च्छेदन्यायेनबाधोस्त्वितिचेत्तत्राह ॥ अपच्छेदेति ॥ अत्रचाद्वैतागमस्यपूर्वंभेदप्रापकंवाक्यमुपजीव्यं । नह्यपच्छेदेपूर्वमुपजी व्यमितिनिरस्तमित्यर्थः । अपच्छेदन्यायमंगीकृत्याप्याह ॥ तेनेति ॥ परेणाभेदागमेनेत्यर्थः । अस्माभिरद्वैतवाक्यस्यपूर्वोक्त रद्वैतवाक्यविरोधउक्तोस्ति तत्रापच्छेदन्यायेनपरेणाद्वैतवाक्येनपूर्वस्यसदेवेत्यादेर्द्वैतवाक्यस्यबाधेपिपरस्योत्तरत्रतदैक्षतेत्यादेर्न बाधइत्यर्थः । पूर्वस्यापिद्वैतागमस्यनपरेणबाधइत्याह ॥ पूर्वस्यापीति ॥ नन्वनुवादकत्वान्नद्वैतागमानांसलिलेत्यादिपूर्वोक्त

SGDF
Sri Gargeshwari Digital Foundation

रवाक्यानांस्वार्थेतात्पर्यमित्यतआह ॥ नचेति ॥ मध्यस्थं संदष्टं ॥ उपांशुयाजेति ॥ द्वितीयाध्यायेद्वितीयपादेचिंतितं "पौर्णमासीवदुपांशुयागःस्यादि"त्यत्र दर्शपौर्णमासयोराम्नायते "जामिवाएतद्यज्ञस्यक्रियते यदन्वंचौपुरोडाशौ उपांशुयाजमंतरा यजति । विष्णुरुपांशुयष्टव्योऽजामित्वाय प्रजापतिरुपांशुयष्टव्योऽजामित्वाय अग्नीषोमावुपांशुयष्टव्यावजामित्वाये"ति । तत्रसंशयः । विष्णवादिवाक्येषुत्रिषुयागविधयः उपांशुयागवाक्यंतुतत्समुदायानुवादः उतोपांशुयागवाक्येयागविधिः विष्णवादिवाक्यत्रयंतदर्थवादइति । तत्रविष्णवादिवाक्येषुतव्यप्रत्ययश्रवणात् "यद्ध्रुवायामाज्य" मितिध्रुवाज्यरूपद्रव्यसत्त्वात्वि

नचसलिलसृष्टिकालेक्षणनामरूपव्याकर्तृत्वादिकंमानांतरप्राप्तं । येनतद्वाक्यमनुवादकंस्यात् । तस्माद्वैतवाक्यमध्यस्थमद्वैतवाक्यमुपांशुयाजवाक्यमध्यस्थविष्णवादिवाक्यवत् पूर्वोत्तरद्वैतवाक्यानुसारेणनेयं । किंचत्वया "यावत्किंचित्भवेदेत

ष्णवादिरूपदेवताश्रवणेनद्रव्यदेवतात्मकरूपलाभाच्चतेष्वेवविधयो नतूपांशुयागवाक्ये वर्तमानापदेशात् "ध्रौवंसाधारणद्रव्य" मितिसाधारणध्रौवाज्यरूपद्रव्यलाभेपिदेवतायाअलाभाच्चेतितद्यागत्रयसमुदायानुवादइतिपूर्वपक्षः । सिद्धांतस्तु जामितावाएतदित्याद्युपक्रमेपुरोडाशद्वयनैरंतर्यप्रयुक्तजामितादोषसंकीर्तनेनतन्निर्हरणायतदंतरालेपुरोडाशद्रव्यककर्मभिन्नंकिंचित्कर्मविधित्सितमितिप्रथममेवावगमात्जामितादोषोपसंहाराच्चतदुभयसंदष्टंविष्णवादिवाक्यंउपांशुयाजवाक्यविहितयागस्तावकतयार्थवादः । नचोपांशुयाजवाक्येविधिप्रत्ययोनश्रूयतइतिवाच्यं लकारव्यत्ययांगीकारात् । विष्णवादिवाक्यस्थतव्यप्रत्ययैतद्वा ॥ २६७ ॥

क्यस्थलटोर्वाविनिमयांगीकारात् । द्रव्यंतुध्रौवाज्यं मांत्रवर्णिकोविष्णवादिरेवदेवतेतिनरूपालाभः । यथोक्तं । "ध्रौवंसाधारणं द्रव्यंदेवतामांत्रवर्णिकी"ति ॥ इदंशब्देति ॥ इदमस्येतिव्याख्यानांतरमस्यनसंमतमित्याशयः । इदंएकमेव सदेव सच्छब्दोदितब्रह्मात्मकमेवासीदित्यर्थः । सदभेदेन सच्छब्दोदितब्रह्मात्मकत्वेन । तन्निषेधे द्वितीयस्यसत्त्वनिषेधे । ननुनव्याघातः

दिदंशब्दोदितंजगत् । इदंसर्वंपुरासृष्टेरेकमेवाद्वितीयकं । सदेवासीदि"तिव्याख्यातत्वात्सद्भेदेनसत्त्वमुक्त्वापुनरद्वितीयपदेन तन्निषेधेव्याघातः । नहिसदेवासीदित्यस्यासदासीदित्यर्थः । सद्व्यतिरेकेणनासीदित्यर्थोक्तौतु सविशेषणेहीतिन्यायेनसदात्मकत्वंस्यात् । किंचनतावदेकशब्देनमिथ्यात्वसिद्धिः । तस्यमानांतराविरुद्धानेकार्थत्वात् । "एकेमुख्यान्यकेवला" इत्यमरोक्तेः । "एकोगोत्रे" इत्यत्रैकशब्दोयमन्यप्रधानासहायसंख्याप्राथम्यसमानवाचीतिकैयटोक्तेश्च । "ष्णांताषडि"तिसूत्रेमहाभाष्येएकशब्दोयंबह्वर्थः । अस्तिसंख्यार्थः एकोद्वौबहवइति । अस्त्यऽसहायवाची एकाग्नयएकहलानीति अस्त्यन्यार्थे

अद्वितीयपदेनद्वितीयस्यसत्त्वनिषेधेपितदनुसारेणसदेवासीदित्यस्यापीदंसर्वमसदासीदित्यर्थोवर्ण्यतइतिमंदाशंकांपरिहरति ॥ नहीति ॥ सविशेषणेहीति ॥ जगतिनासीदित्युक्तासत्त्वस्यबाधितत्वात्सद्व्यतिरिक्तत्वमुपसंक्रामतीत्यर्थः ॥ सदात्मकत्वमिति ॥ सदात्मकतयाआसीदित्यर्थःस्यादित्यर्थः । किंचैकमेवाद्वितीयमित्यत्रमिथ्यात्वबोधकशब्दःकइतिविचारयति ॥ किंचेति ॥

SGDF Foundation

प्रजामिति ॥ एकादेवता प्रजांरक्षति एकाअन्या ऊर्जमन्नं रक्षतीत्यर्थः। एकः एकत्वसंख्याविशिष्टोभगवान् । अत्रसंख्यार्थकबहुशब्दप्रतिद्वंद्वीएकशब्दःसंख्यार्थक(एवेति)इतिभावः । एवमुपपादितान्एकशब्दार्थान्अन्यत्वादीन्प्रकृतेभगवतियोजयति ॥ संभवंतिचेति ॥ एकत्वसंख्येति ॥ एकत्वसंख्यारूपगुणविधिरित्यर्थः । ननुसंख्यादिरहितेगुणादावप्येकशब्द

प्रजामेकारक्षत्यूर्जमेकेत्याद्युक्तेश्च। "एकोबहूनांयोविदधातिकामानि"त्यादौसंख्यादौप्रयोगाच्च। संभवंतिचब्रह्मणिजीवादितोन्यत्वप्राधान्यप्राथम्यानि। सृष्ट्यादौसहायानपेक्षत्वं कुसमयप्राप्तनिर्गुणत्वनिषेधायैकत्वसंख्याविधिः। नानारूपेषुनिर्दोषत्वेनसमानत्वंच । मन्मतेएकंरूपमेकोभावइत्यादावपिसंख्यार्थएव । अतएवोत्तरत्रजीवादिष्वसंभावितजगत्स्रष्टृत्वादिनान्यत्वादिसमर्थनं। किंचत्वयापि"वृक्षस्यस्वगतोभेदःपत्रपुष्पफलादिभिः । वृक्षांतरात्सजातीयोविजातीयश्शिलादितः ॥ १ ॥ तथासद्वस्तुनोभेदत्रयंप्राप्तंनिवार्यते । ऐक्यावधारणद्वैतप्रतिषेधैस्त्रिभिःक्रमात् ॥ ॥ २ ॥" इतिवदतैकशब्दस्यस्वगतभेदनिषेधकत्वेनव्याख्याततत्वान्नतेनमिथ्यात्वसिद्धिः। अद्वितीय

प्रयोगान्नतदर्थकत्वमित्यतआह ॥ मन्मतइति ॥ गुणादिषट्कस्यनिर्गुणत्वप्रक्रियामनंगीकर्तुरित्यर्थः ॥ अतएवेति ॥ एकशब्दस्यान्यत्वाद्यर्थत्वादेवेत्यर्थः। द्वितीयाभावाद्यर्थत्वेतुविरोधिद्वितीयंनोच्येतेत्यर्थः ॥ जगदिति ॥ तेजःप्रभृतीत्यर्थः ॥ ऐ

SGDF
Sri Gargeshwari Digital Foundation

क्येति ॥ ऐक्यादिबोधकैस्त्रिभिरेकादिपदैः ॥ **कर्मधारयइति** ॥ द्वितीयंनभवतीत्यऽद्वितीयमितितत्पुरुषरूपकर्मधारयइ त्यर्थः ॥ **बहुव्रीहिर्वेति** ॥ नविद्यतेद्वितीयंयस्येतिबहुव्रीहिर्वेत्यर्थः ॥ **प्राथम्येनेति** ॥ नञ्द्वितीयपदयोःश्रूयमा णत्वेनतयोरेवसमासस्यप्रथमोपस्थितत्वेनमुख्यार्थकत्वात्तदपेक्षयाऽन्यपदार्थप्रधानत्वेनामुख्यतयातदनाश्रयणादित्यर्थः । अद्वि तीयमित्यत्र द्वितीयंनास्तीतिप्रसज्यप्रतिषेधार्थत्वेभगवद्विशेषणत्वाभावेनएकमेवेत्येतद्भगवत्परं अद्वितीयमित्येतज्जगदभा वप्रतिपादकमित्यर्थभेदेनवाक्यभेदःस्यात् अतःपर्युदासार्थत्वमाश्रयणीयं तथाचभगवद्विशेषणत्वोपपत्तिरित्याह ॥ द्वितीया

शब्दोपिकर्मधारयोबहुव्रीहिर्वा । आद्येब्रह्मद्वितीयंनचेत् । तृतीयंप्रथमंवास्यात् ।
नांत्यः । प्राथम्येनकर्मधारयेसंभवति जघन्यस्यबहुव्रीहेरयोगात् । द्वितीयादन्यद
द्वितीयमिति "अनपुंसकस्ये" त्यादाविव "नार्षेयंवृणीत" इत्यादाविवचपर्युदासार्थत्वे

दिति ॥ अनपुंसकस्येति ॥ यथा "सुडनपुंसकस्ये" त्यत्रसुट्सर्वनामस्थानसंज्ञोभवतिनपुंसकस्यतुनभवतीतिप्रसज्यप्रतिषेधार्थत्वे वाक्यभेदापत्त्यानपुंसकादन्यस्यशब्दस्यपुरतःप्राप्तःसुट्सर्वनामस्थानसंज्ञइतिपर्युदासाश्रयणेनैकवाक्यत्वमाश्रितंवैयाकरणैःतद्व दित्यर्थः ॥ **नार्षेयमिति** ॥ दशमाध्यायेऽष्टमपादे(प्रथमाधिकरणे)चिंतितं । चातुर्मास्येषुमहापितृयज्ञेश्रूयते "आश्रावयेतिच तुरक्षरं अस्तुश्रौषडितिचतुरक्षरं । यजेतिद्व्यक्षरं येयजामहइतिपंचाक्षरं द्व्यक्षरोवषट्कार" इत्यनंतरं "नार्षेयंवृणीतेनहोतार" मिति । तत्रसंदेहः । किमयंप्रतिषेधःपर्युदासोवेति । तत्रेष्टित्वाविशेषेणमहापितृयज्ञेदर्शपौर्णमासविध्यंतं*प्राप्तौआर्षेयहोतृवरणयोःसत्त्वे

SGDF
Sri Gargeshwari Digital Foundation

नतयोरप्यत्रप्राप्तौआर्षेयवरणंनकर्तव्यमित्ययंप्रतिषेधएवेतिपूर्वपक्षः । सिद्धांतस्तुपर्युदासएवेति । एकवाक्यत्वात् प्रतिषेधत्वेहि
पितृयज्ञेलोकतःशास्त्रतोवाआर्षेयादिवरणप्रसक्त्यभावेननिषेधोप्रसक्तस्यैवस्यात् ।अस्तुश्रौषडित्यादिमंत्राःकार्याः आर्षेयवरणंनका
र्यमितिवाक्यभेदापत्तेश्च । अतआर्षेयादिवरणभिन्नं आश्रावयेत्यादिमंत्राद्यंगजातंकार्यमित्येवंपर्युदासएवेति ॥ एकवाक्यत्वे
ति ॥ एकादिपदैरित्यर्थः ॥ वाक्यभेदेति ॥ एकमेवब्रह्मास्तिद्वितीयंनास्तीत्यर्थद्वयप्राप्त्यावाक्यभेदःस्यादित्यर्थः । अतोद्वि

नैकवाक्यत्वसंभवेप्रसज्यप्रतिषेधार्थत्वेनैकवाक्यभेदायोगाच्च । अघटंभूतलमितिवद्द्वितीयाभावे
नैवसद्द्वितीयत्वापाताच्च तस्यापिनिषेधेव्याघातात् । "आत्मावाइदमेकएवाग्रआसीन्नान्यत्किंचन
मिषदि"तिश्रुत्यंतरेन्यस्यसविशेषणेहीतिन्यायेननिमिषत्त्वेनैवनिषिद्धत्वेन "छागोवामंत्रवर्णादि"
तिन्यायेनेहापिमिषत्त्वेनैवनिषेद्धव्यतयास्वरूपेणैवनिषेधासिद्धेश्च । किंचनञाद्वितीयात्यंताभावो

तीयादन्यत्अद्वितीयमितिपर्युदासेंगीकार्येनद्वितीयाभावसिद्धिरितिभावः ॥ अघटमिति ॥ यथाघटाभावविशिष्टंभूतलमित्यत्र
घटाभावस्यसत्त्वंप्रतीयत एवंद्वितीयाभावविशिष्टस्यसत्त्वबोधनेविशेषणस्यद्वितीयाभावस्यसत्त्वमावश्यकमित्यर्थः । ननुविशे
षणीभूतद्वितीयाभावस्यापिद्वितीयत्वादेवनिषेधःकिंनक्रियतइतिचेत्तत्राह ॥ तस्यापीति ॥ प्रामाण्यस्यौत्सर्गिकत्वेनद्वितीयस्य
वियदादिनिषेधस्यसत्तांबोधयित्वापुनर्द्वितीयत्वेनतस्यापिनिषेधेव्याघातइत्यर्थः ॥ छागोवेति ॥ षष्ठाध्यायेऽष्टमपादेअंतिमा

धिकरणेचिंतितं"छागोवामंत्रवर्णादि"त्यत्र । ज्योतिष्टोमेश्रूयते "अग्नीषोमीयंपशुमालभेते"ति । तत्रायमापाततयाश्रुतःपशुः
यःकोपिवा छागोवेतिसंशयेविशेषाश्रवणाद्यःकोपीतिप्राप्ते "छागस्यवपायामेदसोनुब्रूहीत्याहे "तिमंत्रवर्णेविशिष्यछागोक्तेःछागए
वोपलब्धव्यइतिसिद्धांतः। यथोक्तं । "अग्निष्टोमपशुःकोपिछागोवेतिचसंशये । विशेषाश्रवणात्कोपिछागोमंत्रेविशेषणादि"ति
॥ इहापीति ॥ अद्वितीयमित्यत्रापिद्वितीयस्यमिषत्त्वेनैवनिषेधः । कुतः छागोवेतिन्यायेन"आत्मावा"इत्यादिवाक्यांतरेतथै
वनिषेधदर्शनादित्यर्थः ॥ अग्रइति ॥ अत्यंताभावस्यनित्यत्वेनसदासत्त्वादग्रइतिविशिष्योक्तिर्व्यर्थेत्यर्थः ॥ प्रागभावोक्ति

क्तौअग्रइतिव्यर्थं। नापिप्रागभावोक्ति मिथ्यात्वासिद्धेः। त्वन्मतेप्यविद्याकर्मादेस्तदा
सत्वाच्च । किंचद्वितीयशब्दस्सहायवाची । "असिद्वितीयोनुससारपांडव"मितिप्रयो
गात्"असिद्वितीयःअसिसहायइतिगम्यत"इतिमहाभाष्योक्तेश्च। तथाचाद्वितीयमस
हायमित्यर्थोस्तु। यद्वाद्वितीयशब्दःप्रकृतसमानएवद्वितीयेव्युत्पन्नः। नतुतत्रतस्यसंकोचः।

रिति ॥ अद्वितीयमित्यत्रनञाद्वितीयप्रतियोगिकप्रागभावोक्तिरित्यर्थः । अत्रचाग्रइतिपदंसार्थकं । प्रागभावस्याग्रएवसत्त्वादि
तिभावः ॥ मिथ्यात्वेति ॥ प्रागभावप्रतियोगित्वेनमिथ्यात्वस्याद्वितीयपदेनालाभादित्यर्थः॥ अविद्येति॥ तत्रप्रागभावप्रति
योगित्वाभावेनमिथ्यात्वाभावापत्तेरितिभावः। ननुप्रकृतसमानद्वितीयार्थकत्वव्याख्यानंसंकोचरूपमेव तस्यसामान्यतोद्वितीयमा
त्रनिषेधकत्वादित्यतआह ॥नत्विति॥ प्रकृतसमानद्वितीयेव्युत्पन्नतयावाचकएवनतुसंकोचइत्यर्थः । वाचकत्वज्ञापकबहुलप्रयो

गसद्भावादित्याह ॥लोकइति॥ प्रकृतसमानद्वितीयार्थत्वमनंगीकृत्यद्वितीयमात्रार्थकत्वेबाधकमाह ॥ द्वितीयशब्देनेति॥ स
र्वेति॥ सजातीयविजातीयसर्वेत्यर्थः ॥विजातीयेति ॥ विजातीयद्वितीयेत्यर्थः ॥ अभ्यधिकराहित्येति ॥ समनिषेधनकैमुत्य
लोके"अस्मिन्ग्रामेयमेकएवाद्वितीय"इति । स्मृतौच"एकएवाद्वितीयोसावश्वमेधःक्रतुष्वपि । एक
एवाद्वितीयोसौप्रणवोमंत्रउच्यत"इतिप्रयोगात् । महाभाष्येच"अस्यगोर्द्वितीयेनभाव्यमित्युक्ते
सदृशोगौरेवोपादीयतेनाश्वोनगर्दभ"इत्युक्तेश्च । शांकरभाष्येच"अस्यगौर्द्वितीयोन्वेष्टव्यइत्युक्ते
गौरेवद्वितीयोन्विष्यतेनाश्वःपुरुषोवे"त्युक्तेश्च । "समेद्वितीयशब्दःस्यादि"तिस्मृतेश्च । द्वितीयशब्दे
नद्वितीयमात्रोक्तौअद्वितीयशब्देनैवस्वेतरसर्वनिषेधसंभवेनसजातीयनिषेधकैवशब्दादिवैयर्थ्याच्च ।
तद्वैयर्थ्यायद्वितीयशब्दस्यविजातीयपरत्वेनसंकोचेचाग्रइत्यनेनाविरोधायसमद्वितीयपरत्वेनसंको
चःस्यात् । तथाचसमाभ्यधिकराहित्यमेवाद्वितीयशब्दार्थः । "नतत्समश्चाभ्यधिकश्चदृश्यत"इति
श्रुतेः"नत्वत्समोस्त्यभ्यधिक"इतिस्मृतेश्च । "एकएवाद्वितीयोभगवांस्तत्सदृशःपरोनास्ती"तिश्रुतौ
ज्ञानानंदाद्यभिन्नत्वादेकःसर्वोत्तमत्वतः । अद्वितीयोमहाविष्णुःपूर्णत्वात्पुरुषःस्मृतः ॥ १ ॥ भेदा
भेदनिवृत्त्यर्थमेवशब्दोवधारक"इतिस्मृतौचव्याख्याततत्वाच्च । द्वितीयाभावस्यभावाभावाभ्यांव्या
लब्धार्थोक्तिः द्वितीयाभावस्येति । द्वितीयाभावस्यसत्त्वेतस्यैवद्वितीयत्वात्द्वितीयमात्राभावासिद्धिः । असत्त्वेद्वितीयस्यसत्त्वेनतद

एकमेव.
१ । २८

SGDF
Sri Gargeshwari Digital Foundation

भावासिद्धिरित्यर्थः । अद्वितीयशब्दस्यसमराहित्यार्थकत्वमेवनतुद्वितीयमात्रनिषेधार्थकतेत्येतद्विष्णुदासाचार्यवचनसंमत्याद्रढयति ॥ उक्तंचेति ॥ संगृह्णाति ॥ तस्मादिति ॥ सविताएकएवाद्वितीयःप्रकाशादिनाऽसमइत्यर्थः ॥ एकमेवेति ॥ "सदेवसोम्येदमग्रआसीदेकमेवाद्वितीय"मित्यपिवाक्यमित्यर्थः । एकमेवाद्वितीयमित्यादेस्त्वद्रीत्यासजातीयनिषेधाद्यर्थकत्वमपि

घातेनाद्वितीयशब्दस्यतत्परत्वासंभवाच्च । उक्तंच । "यथाचोलनृपस्सम्राडद्वितीयोस्तिभूपतिः । इतितत्तुल्यनृपतिनिवारणपरंवचः । नतुतद्भ्रातृतत्पुत्रकलत्रादिनिवारक"मिति । तस्मात् एकएवाद्वितीयोसावाकाशेसवितेतिवत् । एकमेवाद्वितीयंसदग्रइत्यपियोज्यतां । किंच । अधिकंहिविजातीयंसजातीयंसमंभवेत् । गुणादिकंतुस्वगतंतद्भेदोत्रनिषिध्यते ॥ ७ ॥ एकमेवेतिश्रुत्यर्थः ॥ २८ ॥ नापि"नेहनानास्तिकिंचने"ति श्रुतिस्तत्रमानं । अत्रस्वगतभेदनिषेधात् नानाशब्दोहिनानात्वार्थः द्व्येकयोरित्यादिवद्भावप्रधानत्वात्

व्याख्येयमितिश्रद्धाचेद्द्वयमित्थंसजातीयादिनिषेधपरत्वेनव्याकुर्मइत्याह ॥ किंचेति ॥ तत्सजातीयंचनिषिध्यते । तेभ्योगुणादिभ्योभेदश्चनिषिध्यतइतियोज्यं ॥२८॥७॥ एकमेवाद्वितीयमितिश्रुत्यर्थविवरणं ॥२८॥ द्व्येकयोरिति॥ "द्व्येकयोर्द्विवचनैकवचने"द्वित्वैकत्वयोरेतेस्तइत्यर्थः । अत्रभावप्रधाननिर्देशाभावेद्व्येकेषामितिंस्यादितिभावः । मास्तुभावप्रधानोनिर्देशः नानाशब्द

SGDF
Sri Gargeshwari Digital Foundation

एवपृथक्त्ववाचीतिकैयटसंमतिमाह ॥ लोकइति ॥ ननुसमस्तजगन्निषेधेकिंबाधकमित्यतःपूर्वोक्तज्ञापकमाह॥ यदेवेहेति ॥
यदेवब्रह्मरूपमिहलोकेवर्तते तदेवामुत्रस्वर्गादौवर्तते तदेवेहाप्यस्तीतिइदमदःशब्दोदितलोकस्वरूपमंगीकृत्यतदुभयरूपलो
कस्थितब्रह्मणोऽभेदोक्तेः । अन्यथा सर्वजगन्निषेधांगीकारे इदंचादश्चलोकादि(किमपिनेत्येवश्रू)कंनेतिश्रूयेत उक्ति(सौष्ठ
वादि)सुष्ठुत्वादित्यर्थः ॥ गुरुतरविचित्रेति ॥ कार्यभेदेनेत्यादेस्तत्प्रसक्तेरित्यन्वयः । यथालोकेघटपटादिप्रासादादिनानावि

लोकेचनानाशब्दस्यपृथग्भाववाचित्वादितिकैयटोक्तेश्च । "यदेवेहतदमुत्रयदमुत्रतदन्विहे"तिपूर्व
वाक्येइदमाद्यर्थांगीकारेणतन्निष्ठब्रह्माभेदस्यैवउक्तेश्च । अन्यथाइदंचादश्चनेतिश्रूयते । नचस्वगतभे
दस्याप्रसक्तिः । जगज्जन्मादिकारणेब्रह्मणिगुरुतरविचित्रकार्यभेदेनअंतर्यामिणिचनियम्यानंत्येनस्था
नभेदेनच"यदेकमव्यक्तमनंतरूप"मितिअनेकत्वश्रुत्याचअवतारेषुप्रतिविग्रहंप्रत्यक्षादिनागुणगुण्या
दौचतार्किकभाट्टरीत्यागुणगुणित्वेनज्ञानानंदादौचापर्यायशब्दवाच्यत्वैकतरपरिशेषाभावादिना

जातीयकार्यभेदेनतत्कारणभेदः एवंविचित्रानेककार्यभेदेनतत्कारणेब्रह्मण्यपिभेदःप्रसक्तः । तथागजतुरगादिनियंतॄणांस्थलज
लादिभिन्नस्थानगतानांचलोकेभेदस्यदर्शनात् प्रकृते"यःपृथिवीमंतरोयमयती"त्यादिनियम्यानां"यःपृथिव्यांतिष्ठन्नि"त्यादिस्था
नानांचभेदस्यसत्त्वादनुमानेनभेदप्रसक्तिरस्त्वित्यर्थः । श्रुत्याप्रत्यक्षेणतत्प्रसक्तिरस्तीत्याह ॥ यदेकमिति ॥ अपर्यायेति ॥ ॥ २७१ ॥
घटपटयोरपर्यायशब्दवाच्यत्वेनभेदोस्ति अभेदेएकतरपरिशेषापत्त्याघटपटयोस्तदभावेनभेददर्शनाज्ज्ञानानंदादिगुणेष्वपिभेदप्र

सक्तिरित्यर्थः । जगज्जन्मादिकारणेगुरुतरविचित्रकार्यभेदेनेत्यादिविशिष्यतत्प्रसक्तिर्नकथ्यते किंनामेत्यतआह ॥ सर्वत्रेति ॥
जगज्जन्मादिकारणेब्रह्मणिअंतर्यामिणिअवतारेषुगुणगुण्यादौज्ञानानंदादौसर्वत्रापिश्रुतितात्पर्यापरिज्ञानेनस्वगतभेदप्रसक्तेः। केयं
श्रुतिर्यत्तात्पर्यापरिज्ञानेनतत्प्रसक्तिरित्यतउक्तं ॥ अन्योंतरइति ॥ अंतर्यामिणिप्रयुक्तान्यादिशब्दतात्पर्यापरिज्ञानेनतत्रभेदप्र
सक्तिरित्यर्थः । आदिपदेन"इंद्रोमायाभिःपुरुरूपईयते आनंदंब्रह्मणः यस्यज्ञानमयंतपः परास्यशक्तिः बृहंतोह्यस्मिन्गुणा"इ

सर्वत्रच"अन्योंतरआत्माप्राणमय"इत्यादिश्रुतितात्पर्याज्ञानेनचतत्प्रसक्तेः । किंचनेहेतिवाक्या
त्पूर्वंबृहदारण्यके "तस्मिंच्छुक्लमुतनीलमाहुःपिंगलंहरितंलोहितंचे"त्यादिनाभगवतोनेकरूपाणि
"यस्यानुवित्तःप्रतिबुद्धआत्मे"त्यादिनाज्ञानादिधर्माः काठकेच "गुहांप्रविश्यतिष्ठंतंयोभूतेभिर्व्य
जायते"त्यनेकावतारा "महांतंविभुमात्मान" मित्यादिनाचानेकधर्माश्चोक्ताइतिकथंतदप्रसक्तिः ।

त्यादिश्रुतिग्रहणं । एतत्तात्पर्यापरिज्ञानेनसर्वत्रावतारादिषुभेदप्रसक्तिर्द्रष्टव्येतिसांप्रदायिकोर्थः । अन्येतुसर्वत्रेत्यस्यस्वगतभेद
प्रतिपादकत्वेनापाततःप्रतीतासुश्रुतिष्वित्यर्थइत्याहुः । नेहनानेतिवाक्यस्यबृहदारण्यककाठकयोःसत्त्वादुभयत्रापिविशिष्यस्वग
तभेदप्रसक्तिमाह ॥ किंचेति ॥ ज्ञानादीति ॥ घटपटयोरिवभिन्नधर्माश्रयत्वाद्धर्मिणोपितत्प्रसक्तिरितिध्येयं । नचभिन्नरूपा
दिधर्माश्रयेपिघटेएकत्वदर्शनाद्धर्मभेदोनधर्मिभेदप्रयोजकइतिवाच्यं । तथापिसंदेहानिस्तारादितिद्रष्टव्यं । श्रुतिविशेषेस्वगतभेद

SGDF

निराकरणंतवापिसंमतमित्याह ॥ दृष्टश्चेति ॥ एकोदेवइति ॥ एकइत्यनेनस्वगतभेदस्यनिषेधस्त्वयाकृतोदृष्टश्चेत्यर्थः । भार
तेसमइत्यनेनस्वगतभेदनिषेधः ॥ अन्यथेति ॥ स्वगतभेदस्यसर्वथाप्रसक्त्यभावेब्रह्मणोपिनिर्भिन्नत्वरूपाखंडत्वप्रतिपादकस्याखं
डवादस्यानारंभःस्यादित्यर्थः । अनुभूतिः ब्रह्म।हेत्वंतरमाह॥उपाधीति॥ उपाधिभेदंविनाऽज्ञायमानभेदत्वादित्यर्थः। अनुभूतौभे

दृष्टश्चैकस्मिन्नेववृक्षेपत्रशाखादिवत्प्रसक्तस्यस्वगतभेदस्य"एकोदेवस्सर्वभूतेष्वि"त्यादिश्रुतौ"ब्रह्मादयोहि
भूतानितेषामंतर्गतोहरिः । समस्ससर्वभूतेषुयएवंवेदतत्ववित्"इतिमहाभारतेचनिषेधः । अन्यथापरपक्षे
प्यखंडवादानारंभःस्यात् । अनुभूतिर्ननाना अनुभूतित्वादुपाधिभेदमंतरेणाविभाव्यमानभेदत्वादित्याद्य
नुमानैःस्वगतभेदनिषेधश्चनस्यात् । "एकमेवाद्वितीय"मित्यादावेकपदेनस्वगतभेदनिषेधोक्तिश्चनस्यात् ।
प्रत्युतपरमतएवधर्माधर्मस्वर्गनरकाद्यंशे अप्रसक्तप्रतिषेधः । इहेतिचविशेषणान्ननानात्वमात्रनिषेधः ।

दोज्ञायमानःपटानुभूतिर्घटानुभूतिरित्युपाधिभेदेनैवज्ञायते नतमंतरेण अतःस्वतएवभेदेनैवाज्ञायमानत्वा(न्ननानेत्याशयः।)दित्य
र्थः।प्रत्युताऽस्मदुक्तमर्थमनंगीकृत्यसर्वजगन्निषेधांगीकारेतवैवाप्रसक्तप्रतिषेधइत्याह॥प्रत्युतेति॥नन्वस्तुनानाशब्दोभेदार्थः तथा
पिप्रतियोगिविशेषानुपादानाद्भेदमात्रंततःप्रतीयतइतिभेदमात्रनिषेधःपर्यवस्यतीत्यतआह॥इहेति॥ इदंशब्दएवप्रतियोगिविशे
षोपस्थापकइत्यर्थः।ननुसप्तम्यंतेदंशब्दस्याधिकरणपरत्वान्नतस्यप्रतियोग्युपस्थापकत्वमतोनिषेधप्रतियोगित्वेनजग(देवा)दन्वेती

SGDF
Sri Gargeshwari Digital Foundation

त्यतआह ॥इमाविति॥ स्निग्धौ स्नेहवंतौ।तत्रैकाधिकरण(कपरप्र)कैकप्रतियोगिकएवस्नेहःप्रतीयते नत्विदंशब्दनिर्दिष्टपुरुषद्वय भिन्नपुरुषप्रतियोगिकः अथास्मिन्ग्रामेनविरोधइत्यत्रएतद्ग्रामस्थाधिकरणकैतद्ग्रामस्थपुरुषप्रतियोगिकएवाविरोधःप्रतीयते नतुग्रा मांतरस्थपुरुषप्रतियोगिकइत्यर्थः । तथाचइहब्रह्मणीतिसप्तम्यास्तृतीयात्वेनविपरिणामः । इहब्रह्मणास्वप्रतियोगिकोभेदइति

इमौस्निग्धावस्मिन्ग्रामेनविरोधइत्यादाविवेदंशब्दोपात्तस्यब्रह्मणएवधर्मित्वेनप्रतियोगित्वेनचसंबंधसंभवेतदनुपात्तस्यधर्मित्वेनवाप्रतियोगित्वेनवासंबंधायोगात्। विधेयोद्देश्ययोर्नानात्वनिषेधतदाधारब्रह्मणोर्निषेध्यनिषेधयोर्नानात्वतदभावयोश्चभेदावश्यंभावाच्च । काठके "तंदेवास्सर्वेंअर्पितास्तदुनात्येतिकश्चने" तिपूर्वत्र "मध्यआत्मनितिष्ठती" ति "यथोदकंशुद्धेशुद्धमासिक्तंतादृगेवभवति । एवंमुनेर्विजानतआत्मा भवती" तिउत्तरत्रचभेदप्रमितेश्च। किंचनशब्दस्तुगुणगुण्यवयवावयवित्वादिप्रयुक्तानेकनानात्वाभिप्रायः।

यावत्नास्तीत्यर्थोद्रष्टव्यः । सर्वभेदनिषेधेस्वव्याहतिश्चेत्याह ॥ विधेयेति ॥ विधेयेननानात्वनिषेधेनउद्देश्यस्यतदाधारब्रह्मणो भेदावश्यंभावात् अन्यथाविधेयत्वोद्देश्यत्वयो(रेवायो)रयोगात्। तथानानात्वस्यनिषेध्यत्वंतदभावस्यनिषेधत्वंचभेदंविनानयुक्त मितिभावः । ननुतर्हीहब्रह्मणिअस्माद्ब्रह्मणःसकाशान्नानात्वंनास्तीत्येतावतैवपूर्णत्वात्किंचनशब्दोव्यर्थः तेनभेदमात्रनिषेधप्र तीतेरित्यतआह ॥ किंचनेति ॥ आदिशब्देनपृथिव्याद्यंतर्यामित्वादिसंग्रहः। ब्रह्मणिप्रसक्तानेकभेदपरएवकिंचनशब्दोनभेदमा

SGDF
Sri Gargeshwari Digital Foundation

त्रपरइत्यर्थः ॥ अन्यथेति ॥ किचनशब्दस्यसर्वभेदपरत्वेइत्यर्थः ॥ उक्तेति ॥ विधेयोद्देश्यादिभेदस्यावश्यकतयासर्वभेदनिषे
धेव्याघातइत्युक्तेत्यर्थः । एवंनानाशब्दस्यभेदपरत्वमंगीकृत्योपपादितं । इदानींभवितृप्राधान्येनभिन्नवस्तुवाचित्वमभ्युपेत्याह
॥ भवित्रिति ॥ प्रकृतेति ॥ पूर्वप्रकृतेत्यर्थः । इहब्रह्मणिधर्मावयवादिकंनानाभिन्नंनास्तीत्येवंपरएवनतुभिन्नजगन्मात्रप्रति
षेधपरइत्यर्थः। सर्वनाम्नःप्रकृतपरत्वेउदाहरणमाह॥सर्वेभ्यइति॥ तत्रसर्वशब्दस्यप्रकृतस्वर्गपरत्वमेवनपश्वादिसर्वपरत्वमित्य
र्थः। एतच्चोपपादितंप्राक्। उद्देश्यसमर्पकस्यप्रकृतपरत्वमुपपादयति॥व्रीहीनिति॥ "व्रीहीनवहंती"त्यत्रव्रीहीनुद्दिश्यावहननं

अन्यथाउक्तदोषात् । भवितृप्राधान्येपि(नानाशब्दस्य)किंचनशब्दप्रकृतधर्मादिपरएवसर्वनामत्वात् ।
सर्वेभ्यइत्यत्रसर्वशब्दवदुद्देश्यसमर्पकत्वाच्च । व्रीहीनवहंतीत्यत्रव्रीहिशब्दवद्व्यक्तिवाचित्वाच्च। "आग्ने
य्याऽऽग्नीध्रमुपतिष्ठत"इत्यत्राग्नेयीशब्दवत्। एवंधर्मान्पृथगितिविशेषशब्दसन्निहितसामान्यशब्दत्वाच्च।

विधीयते अत्रोद्देश्यसमर्पकंव्रीहिपदं "चतुरोमुष्टीन्निर्वपती"तिचतुर्मुष्टिनिर्वपनीयतयापूर्वंप्रकृताअपूर्वसाधनीभूताएवग्राह्यान
न्येगृहस्थाइतिनिर्णीतमित्यर्थः। व्यक्तिविशेषवाचिनःशब्दस्यप्रकृतपरत्वंदृष्टमित्याह ॥ आग्नेय्येति ॥ अग्निप्रकाशिकयाऋचा
आग्नीध्रंअग्निविशेषं । तृतीयाध्यायेद्वितीयपादेचिंतितं ज्योतिष्टोमे"अग्नआयाहिवीतयेगृणानोहव्यदातये ॥ निहोतासत्सिब
र्हिषी"त्याद्याःआग्नेय्यःऋचःसमाम्नाताः। तत्रैवश्रूयते "आग्नेय्याआग्नीध्रमुपतिष्ठत"इति। तत्रसंदेहः किंययाकयाचिदग्निप्रतिपा
दिकयाऋचाआग्नीध्रोपस्थानंकर्तव्यं उतप्रकृतानांमध्यएवययाकयाचिदिति । तृतीययाआग्नीध्रोपस्थानेकरणतयाआग्नेयीमंत्र

स्योक्तत्वेनविशेषानुपादानान्नप्रकृतपरत्वनियमइतिपूर्वःपक्षः । अग्निर्देवताअस्येत्येवंसर्वनामघटितोयौगिकोयमाग्नेयीशब्दःअग्न
आयाहीतिपूर्वप्रकृतामेवव्यक्तिमालंबते । सर्वनामशब्दानांतद्घटितशब्दानांचसंनिहितप्रकृतव्यक्तिपरत्वनिर्णयात् अतःप्रकृतयैव
आग्नेय्याऋचाआग्नीध्रोपस्थानंकर्तव्यमितिसिद्धांतः । विशेषशब्द(सन्निहितसा)समभिव्याहृतसामान्यशब्दस्यप्रकृतविशेषपर
त्वंदृष्टमित्याह ॥ घृतेति ॥ प्रमाणलक्षणेनामधेयपादेचिंतितं "संदिग्धेतुवाक्यशेषादि"त्यत्र "अक्ताःशर्कराउपदधाति तेजोवै
घृत"मितिश्रूयते तत्राक्ताइत्युक्तमंजनंद्रवद्रव्येणेतितावत्सिद्धं तद्द्रव्यंकिंतैलजलाद्यन्यतमत् उतघृतमितिसंदेहे अक्ताइतिसामा

घृतशब्दसन्निहिताक्तशब्दवत् । एवंच । "वाक्यशेषस्थधर्माख्यविशेषेपर्यवस्य
ति । किंचनेतिहिशब्दोयमक्ताशब्दोघृतेयथा" । तथाचेहब्रह्मणिकिंचनधर्मादि
कंनानानास्तीत्युक्तेधर्माणांनानात्वमेवनिषिद्धंस्यात् । सविशेषणेहीतिन्यायात्

न्यतःश्रवणाद्यत्किंचिज्जलाद्येवेतिप्राप्ते अंजनसाधनंद्रव्यंघृतमेव वाक्यशेषेतेजोवैघृतमितिविशेषतोघृतशब्दश्रवणात् । विशे
षशब्दसन्निहितसामान्यशब्दस्यप्रकृतविशेषपरत्वात् । अतोघृतेनैवांजनमितिसिद्धांतः । एवंधर्मानित्युक्तांयुक्तिंसंगृह्णाति ॥ ए
वंचेति ॥ एवंधर्माननितिवाक्यशेषस्यभगवद्धर्मरूपविशेषपरत्वेसतीत्यर्थः । एवमुपपादनेनसिद्धंवाक्यार्थमाह ॥ तथाचेति ॥
सविशेषणेहीति ॥ "सविशेषणेहिविधिनिषेधौविशेषणमुपसंक्रामतोविशेष्यबाध"इतिन्यायादितिभावः । विशिष्टविधेर्विशेष

SGDF

णोपसंक्रमणोदाहरणंदर्शयति ॥ लोहितेति ॥ ऋत्विजांप्रचरणस्यसिद्धतयावैयर्थ्येनाविधेयत्वात्तदुष्णीषस्यापिसिद्धतयावैयर्थ्ये
नाविधेयत्वात्प्रचरतांऋत्विजामुष्णीषेषुलोहितत्वंविधीयतइत्यर्थः । नन्वत्रविशेष्यबाधःकथमितिचेदुच्यते । "प्रत्याम्नानाच्चवै
यर्थ्यात्प्राप्तेरप्राप्तितस्तथा । बाधश्चतुर्विधःप्रोक्तः"इतिवचनात् अत्र सिद्धत्वेनवैयर्थ्याद्बाधोद्रष्टव्यः । विशिष्टनिषेधस्यविशेष
णोपसंक्रमणोदाहरणंदर्शयति ॥ नजीर्णेति ॥ जीर्णत्वमलवत्त्वविशिष्टवासोनिषेधेनग्नस्यैवान्वयापत्त्यातस्यबाधेनस्नातकवास

"लोहितोष्णीषाऋत्विजःप्रचरंति नजीर्णमलवद्वासाःस्नातकःस्यादि"त्यादौदर्शनाच्च। अतएवो
क्तं"विशेष्यंनाभिधागच्छेत्क्षीणशक्तिर्विशेषण"इति । "एकदेशापवादेनकल्प्यमानेचबाधके।
नसर्वबाधनंयुक्तमितिन्यायविदःस्थिता"इतिच ॥ धर्माणांस्वरूपेणनिषेधेहिनानेतिपृथगिति
चव्यर्थंस्यात्।तथाचात्रब्रह्मणोनिर्धर्मकत्वपक्षःधर्मधर्मिणोरत्यंतभेदपक्षःभेदाभेदपक्षश्चनिरस्तः।

सिजीर्णत्वरूपंमलवत्त्वरूपंविशेषणंनिषिध्यतइतिद्रष्टव्यं । अस्यविशेषणनिषेधोदाहरणत्वसमर्थनंमत्कृतकर्मनिर्णयटिप्पण्यांद्रष्ट
व्यं । एकदेशो विशेषणं ॥ सर्वेति ॥ विशिष्टेत्यर्थः । ननुयत्रविशेष्येबाधस्तत्रतथाऽस्तु प्रकृतेचतदभावात्कथमयंन्यायइत्य
तोऽत्रापिविशेष्येबाधंदर्शयति ॥ धर्माणामिति ॥ एवंधर्मानित्यत्रपृथगितीत्यर्थः ॥ तथाचेति ॥ धर्मानंगीकृत्यतत्रभेदमात्र
निषेधेसतीत्यर्थः।पूर्वंकिंचनशब्दःप्रकृतधर्मपरतयाव्याख्यातः इदानींत्वद्रीत्यासमस्तविश्वपरएवास्तु तथापिनमिथ्यात्वसिद्धिः।
नानाशब्दस्यविनेत्यर्थकत्वात् । तथाचकिंचनविश्वं इह अव्ययत्वात्ब्रह्मणा नानाविना नास्ति किंतुवह्निंविनाधूमोनास्तीत्या

SGDF
Sri Gargeshwari Digital Foundation

दाविवतदविनाभूतंतेनव्याप्तंसत्तिष्ठतिइत्यर्थोलभ्यतइत्यभिप्रेत्यनानाशब्दस्यविनार्थत्वेव्युत्पन्नत्वंकाशिकाभाष्यादिसंमत्योपपा
दयति ॥ किंचेति ॥ विनञ्भ्यामिति ॥ नसहेत्यर्थेनानाञौप्रत्ययौभवतइतिनसूत्रार्थः । किंतुविनञोरेवेदंविशेषणं नसहे
त्यर्थेअसहार्थेपृथग्भावरूपार्थइतियावत् वर्तमानाभ्यांतद्वाचिभ्यांविनञ्इत्येताभ्यांशब्दाभ्यांस्वार्थेअसहार्थइतियावत् नानाञौ

किंचत्वद्रीत्याकिंचनविश्वंनानानास्तीत्युक्तेप्यविनाभूतमस्तीत्येवार्थः । नानाशब्दोहि
विनेत्यर्थेवर्तते "विनञ्भ्यांनानाञौनसहे"तिसूत्रे "असहार्थेपृथग्भावेवर्तमानाभ्यांवि
नञ्भ्यांस्वार्थेनानाञौप्रत्ययौभवत"इतिवृत्तौ"नसहेतिप्रकृत्यर्थविशेषणमेतत् । विन
ञ्इत्येताभ्यांनसहार्थवाचिभ्यांनानाञौभवतः कस्मिन्नर्थे स्वार्थे" इतिमहाभाष्येचविना
नानाशब्दयोरेकार्थत्वोक्तेः । "पृथग्विनांतरेणर्तेहिरुङ्नानाचवर्जने"इत्यमरोक्तेश्च ।

प्रत्ययौभवतः तथाचवीत्यस्मात्पृथक्त्वरूपनसहार्थात्स्वार्थेनाप्रत्ययेविनेत्येतत्पृथग्भाववाचि। तथापृथक्त्वरूपनसहार्थात्नञः स्वा
र्थेनाञ्प्रत्ययेञकारलोपेञित्त्वात्तद्धितेष्वचामित्यादिवृद्धौप्रकृतिस्थञकारलोपेनानेतिसिद्ध्यति । तथाचनानाविनेत्यनयोरेकार्थत्वं
सिद्ध्यतीत्यर्थः । वृत्तौ काशिकायां नसहेत्यस्यनानाञ्प्रत्ययार्थत्वनिवारणायाहमहाभाष्यकारः ॥ नसहेतीति ॥ तदेवदर्शय
ति नसहवाचिभ्यांविनञ्इत्येताभ्यामिति । शंकते ॥ कस्मिन्निति ॥ तथात्वेप्रत्ययस्यनिरर्थकत्वंस्यादित्यर्थः । उत्तरमाह

SGDF
Sri Gargeshwari Digital Foundation

॥ स्वार्थइति ॥ प्रकृत्यर्थएवेत्यर्थः ॥ नानेति ॥ विष्णुंनानाविनान्योमोक्षदोनास्तीत्यर्थः ॥ अमरव्याख्यायामिति ॥ पृथग्विनेत्युदाहृतामरव्याख्यानावसरेतट्टीकायांपृथगित्यादेर्विनार्थत्वेउदाहरणानिप्रदर्श्यनानाशब्दस्यविनार्थत्वे"नानाविष्णु"मितिवाक्यमुदाहरणतयाप्रदर्शितमित्यर्थः । ननुकिंचनजगत्विनानास्तीत्येवप्राप्तं । ब्रह्मणाविनेतिप्रतियोगितयाब्रह्मणोन्वयः कुतइत्यतःस्मृतौमयाविनानास्तीत्युक्तत्वात्तत्समाख्ययाप्रतियोगित्वेनब्रह्मणएवान्वयइत्याशयेनाह॥ नतदिति ॥ यद्वासमग्रवाक्या
"नानाविष्णुं(विष्णुंनानामो)मोक्षदोनास्तिदेवः"इत्यमरव्याख्यायांनानाशब्दस्यविनार्थत्वेनोदाहृतत्वाच्च। "नतदस्तिविनायत्स्यान्मयाभूतंचराचर"मितिस्मृतेश्च । विनार्थस्यचनानाशब्दस्यसंबंधिशब्दतयाब्रह्मणएवप्रतिसंबंधित्वेनान्वयोपपत्तेश्च । नचधूमोग्निंविनानेत्युक्तेमिथ्येतिसिद्ध्यति । एवंच"नानेत्यस्यविनार्थत्वाद्विनाभूतंनिषिध्यते। अविनाभूतमस्तीतिसत्त्वैवार्थात्तुलभ्यते" । किंचविश्वंब्रह्मणिनास्तीत्युक्तेपिनमिथ्यात्वसिद्धिः। ब्रह्मणोन्यत्रस्वोपादानेप्रकृत्यादौसत्त्वसंभवात्। ब्रह्मचनोपादानमितिवक्ष्यते। अन्यथेहेतिर्थेइयंसमाख्येतिद्रष्टव्यं । ननुविनाशब्दस्यप्रतियोग्यपेक्षैवकुतः येनब्रह्मणःप्रतियोगित्वेनान्वयइत्यतःसंबंधिशब्दत्वादित्याह ॥ विनार्थस्येति ॥ ननुब्रह्मणाविनानास्तीयुक्तौतद्व्यतिरेकेणासत्त्वरूपंमिथ्यात्वमेवलभ्यतइतिचेत्तत्राह ॥ नचेति ॥ संगृह्णाति ॥ एवंचेति ॥ परोक्तार्थांगीकारेपिनमिथ्यात्वसिद्धिरित्याह ॥ किंचेति ॥ विशिष्यनिषेधःशेषविधिंगमयतीतिन्यायेनाह ॥ ब्रह्मणइति ॥ ननुस्वोपादानंब्रह्मैवतत्रैवचसत्त्वंनिषिध्यतइत्यतआह ॥ ब्रह्मेति ॥ अन्यथेति ॥ अन्यत्रसत्त्वाभिप्रायाभावे ॥ व्यर्थमिति ॥ किंचननास्तीत्येतावतापूर्णत्वादितिभावः । ननुइहब्रह्मणिकिंचननास्तीतिनिषेद्धुंनशक्यते "यस्मिन्द्यौ"रितिब्रह्मण्येवसत्त्वश्रवणादितिचेत् तर्हिस्वविरोधादेवतत्रब्रह्मणिनिषेधोपिकर्तुंनशक्यतइत्याह ॥ अथेति ॥ एतद्वाक्यस्य नेहनानेतिवाक्यस्य । उक्तमेवार्थंकारिकांतरेणसंगृह्णाति ॥ एवंचेति ॥ रामायणेसीतावाक्यं ॥ व्याख्यात्रेति ॥ अत्रयथाप्रभा

व्यर्थं । अथ"यस्मिन्द्यौःपृथिवीचे"त्यादिश्रुतेर्ब्रह्मण्यप्यास्तिविश्वं तर्हितद्विरोधादेवनतत्रतन्निषेधः। एतद्वाक्यस्यमिथ्यात्वाभिप्रायत्वेचबृहदारण्यके"यस्मिन्पंचपंचजनाआकाशश्चप्रतिष्ठित"इतिपूर्वेण "यएषोंतर्हृदयआकाशस्तस्मिन्शेतेसर्वस्यवशीसर्वस्येशानः सर्वस्याधिपतिःएषसर्वेश्वरएषभूताधिपतिरेषभूतपालएषसेतुर्विधरणएषांलोकानांसंभेदाये"त्युत्तरेण काठकेच"ईशानंभूतभव्यस्ये"तिपूर्वेण"ईशानोभूतभव्यस्ये"त्युत्तरेणचवाक्येनविरोधःस्यात्। एवंच "अनन्याराघवेणाहंभास्करेणप्रभायथा। व्याख्यात्रयादृशीतादृक्नेहनानेतिचश्रुतेः"। एतेन"मृत्योस्समृत्युमाप्नोतियइहनानेवपश्यती"तिपूर्ववाक्यमपिव्याख्यातं। तत्रचेवशब्दोभेदाभेदपरः। "भवेदेकत्रसंयोगइवशब्दोविरुद्धयोः।
भास्करेणानन्या तंविनानास्ति तथाऽहंराघवेणानन्यातंविनानास्मीतियादृशीव्याख्या तादृगेवनेहनानेतिश्रुतेश्चव्याख्येत्यर्थः। विरुद्धयोर्द्वयोरेकत्रसंयोगेइवशब्दइत्यन्वयः । अत्रनानाशब्दोत्तरंप्रयुक्तइवशब्दोनानात्वविरुद्धमनानात्वंसंगृह्णातीतिभावः

SGDF Foundation

॥ नत्विति ॥ त्वन्मतेभेददर्शिनएवानर्थकथनपरेयंश्रुतिः । तथाचइवशब्देनभेदाभेदाग्रहणेयोनानेवपश्यतीत्येवंभेदवद्दर्शिन
एवानर्थउक्तःस्यान्नतुवस्तुतोभेददर्शिनइतिपरानिष्टार्थःस्यादित्यर्थः ॥ द्वितीयेति ॥ सर्वस्यापिजडाजडस्यशरीरतयाब्रह्मकोटौ
निविष्टत्वात्द्वितीयंनास्तीत्यर्थः । अविद्यमानस्य जगदभावस्य ॥ अभिनिवेशेति ॥ यथामिथ्याभूतेऽनास्था एवंजगत्यप्य
धर्मयोरुपमायांवास्वल्पत्वेवाविवक्षित"इतिवचनात् । अन्यथायोनानेवपश्यतिनतुवस्तुतोनानेतिप
रानिष्टार्थःस्यात् । केचित्तुसर्वस्यापिजडाजडस्यब्रह्मशरीरत्वेनतद्विशेषणत्वाद्विशिष्टंब्रह्मद्वितीयर
हितमिति"एकमेवाद्वितीयंनेहनाने"त्यादिश्रुतेरर्थइत्याहुः।अन्येतुपरमते"सर्वगंधस्सर्वरस"इत्यादि
श्रुतिरिवाद्वितीयमित्यादिकमपिनाम्निब्रह्मत्वस्येवाविद्यमानस्योपासनार्थं।नत्वर्थतत्वनिष्ठमित्याहुः।
इतरेतुप्रपंचेभिनिवेशनिषेधपरातन्मिथ्यात्वश्रुतिरित्याहुः ॥ ७ ॥ नेहनानेतिश्रुत्यर्थः ॥ २९ ॥ नापि
"यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदि"तिश्रुतिस्तत्रमानं । अत्रहिपूर्वत्र"सयथासैंधवखिल्य"
नास्थाकार्येत्यर्थः। स्वोत्प्रेक्षिताएवपक्षाआहुरित्यन्यापदेशेनोक्ताइतिसंप्रदायविदः । तत्रद्वितीयपक्षे"नाविद्यमानंब्रुवतेवेदाध्या
तुंनवैदिका"इतिवचनात्उपासनार्थत्वमयुक्तं । तथात्वेसृष्ट्यादिवाक्यानामपितथात्वोपपत्त्यास्वोक्तार्थेतात्पर्याभावापत्तेरित्यस्व
रसोद्रष्टव्यः । तृतीयपक्षेऽपिमिथ्यात्वप्रतिपादनंविनापिअसारत्वादिज्ञापनेनापिअभिनिवेशाभावस्सिद्ध्येदित्यस्वरसोद्रष्टव्यइ
त्याहुः ॥७॥ नेहनानेतिश्रुत्यर्थविवरणं ॥२९॥ सैंधवखिल्यो लवणखंडः । तदाश्रयः उदकराश्याश्रयः । ननुसमुद्रशब्दस्य

SGDF
Sri Gargeshwari Digital Foundation

खातवाचित्वमयुक्तं "समुद्रंशोषयिष्यामिपद्भ्यांयातुंप्लवंगमा" इतिप्रयोगाज्जलराशिपरएवसमुद्रशब्दइत्यतःपूर्ववाक्यविरोधमाह ॥ पूर्वत्रेति ॥ तथापिसमुद्रशब्दस्यजलराशिवाचित्वेकिमायातमित्यतआह ॥ नचेति ॥ नचेश्वरेति ॥ तथाचसैंधवखिल्यस्थानीयस्यमुच्यमानजीवस्यापिनखातवरुणस्थानीयेश्वराभेदइत्यर्थः ॥ नापीति ॥ खातादिरूपेश्वरस्थितजलराशिरूपपूर्वमुक्तैर

इत्यादिनासैंधवखिल्यस्यसमुद्रइवविज्ञानघनजीवस्यब्रह्मणिस्थितिर्मोक्षइतिस्वमतमुक्तं । नह्यत्रोदकराशिस्समुद्रः किंतुतटाकादिवत्तदाश्रयःखातोवरुणोवा पूर्वत्र"सयथासर्वासामपांसमुद्रएकायन"मित्युक्तेः । नचाऽऽपएवाऽपामयनं । नचेश्वरस्थानीयाभ्यांखातवरुणाभ्यांसैंधवखिल्यस्याभेदः । नापिपूर्वमुक्तस्थानीयाभिरद्भिः । एतच्चजीवेशभेदवादेवक्ष्यते । उक्तंच । "समुद्रजलस्थानीयामुक्ताबहवःएकस्वभावा वरुणवदपांखातवद्वाअनंतोपारोभगवानि"ति । एवंश्रुतिःस्वमतमुक्त्वा "अविनाशीवाअरेऽयमात्मानुच्छित्तिधर्मे"तिवाक्येअविनाशीत्यनेनात्मनाशोमोक्षइतिबौद्धमतमनुच्छित्तिधर्मेत्यनेनाशेषविशेषगुणोच्छेदोमोक्षइतिवैशेषिकमतंचनिरस्याद्वितीयचिन्मात्रावशेषोमोक्षइतिमतेनिष्टंप्रसंजयितुं"यत्रहिद्वैतमिवभवतितदितरइतरंपश्यती"त्यादिनाप्रसंगांगव्यतिरेकव्या

न्या. श्री. ४७ पिनाभेदइत्यर्थः । तथाचसैंधवखिल्यस्यखातादिनातत्रत्यजलराशिनाचयथानाभेदस्तथाजीवस्यापीश्वरेणपूर्वमुक्तैश्चेतिभावः ॥ उक्तंचेति ॥ बृहदारण्यकभाष्यइत्यर्थः । अविनाशीवाइत्यादेरर्थो "ज्ञानरूपस्यविज्ञाननाशस्तन्नाशएवतु । इतिशून्यमतो

SGDF
Sri Gargeshwari Digital Foundation

च्छित्त्या" इत्याद्यनुव्याख्यानोक्तरीत्याद्रष्टव्यः ॥ अन्यथेति ॥ एवंयत्रत्वस्येतिवाक्यस्यपरमतनिरासकत्वाभावेवस्तुस्थितिमात्रकथनपरत्वेचेत्यर्थः ॥ धर्मेति ॥ नहिचिन्मात्रावस्थानरूपेमोक्षेत्वन्मतेऽनुच्छिन्नाधर्माःसंतीत्यर्थः ॥ अनुच्छित्तिरिति ॥ स्वरूपानाशस्तस्येतिभावः । ननुतर्हियत्रहीतिवाक्येनुपपत्तिरेवभवतां "यत्रहिद्वैतमिवे"तिश्रुतौइवशब्दमहिम्नाद्वैतस्यासत्त्वम

सिमुक्त्वा"यत्रत्वस्ये"त्यादिनायत्रयेषांमतेत्वात्ममात्रावशेषः तत् तर्हि केनकंपश्येत् नकेनापिकिंचित् । तथाचेष्टस्यरूपादेरीश्वरस्यस्वस्यचाज्ञानादंधादेरिवातिदुःखंमोक्षेस्यादित्यनिष्टप्रसंगोत्राभिप्रेतः। उक्तंहिमहाभारते"मग्नस्यहिपरेऽज्ञानेकिंनदुःखतरंभवेदि"ति । अन्यथानविद्यतेउच्छित्तिर्येषांते अनुच्छित्तयःअनुच्छित्तयोधर्मायस्यासावनुच्छित्तिधर्मेतिधर्मानुच्छित्त्युक्तिविरोधःस्यात् अनुच्छित्तिर्धर्मोयस्येतिविग्रहेचअविनाशीत्यनेनपुनरुक्तिः ।अनुच्छित्तिरित्येतावतैवपूर्णत्वेनधर्मशब्दवैयर्थ्यं च । यत्रहिद्वैतमिवेत्यत्रइवशब्दस्तुद्वैतस्यपरमतेमिथ्यात्वात् पररीत्याचापादनीयत्वा दल्पत्वाद्वा

वगम्यतइतिचेत्तत्राह ॥ यत्रहीति ॥ पररीत्येति ॥ "परसिद्धैर्दूषण"मित्युक्तत्वादितिभावः । तथाचयत्रमिथ्याभूतोपिभेदो भवति तत्रइतरइतरंपश्यतीत्यादियुज्यते यत्रनिवृत्ताविद्यावस्थायांसोपिनास्ति तदाकेनकंपश्येदित्यादिरर्थोद्रष्टव्यः ॥ अल्पत्वादिति ॥ यत्रहीतिवाक्येइवशब्दोऽल्पत्वार्थः । अस्वतंत्रोभेदोभवतीत्यर्थः । तदधीनः दुंदुभ्याद्यधीनः । एवंदार्ष्टांतिकेपी

तिभावः । केवलस्य अप्राकृतदेहेंद्रियादिमतः ॥ ज्ञानेति ॥ वृत्तिरूपज्ञानेत्यर्थः ॥ ७ ॥ यत्रत्वस्येतिश्रुत्यर्थविवरणं ॥ ३० ॥ य

पुराणे"दशरात्रैर्भुक्तमिवनसम्यक्स्वल्पभोजना"दिति । लोकेचअल्पज्ञेअयंविद्वानिवेतिप्रयोगाच्च । "इवोपमायांस्वल्पार्थे"इत्यमरोक्तेः "उपमार्थेतथाल्पत्वेइवशब्दःप्रयुज्यत"इतिवचनाच्च । अन्यथावाक्यशेषेसर्वतंपरादाद्योन्यत्रात्मनस्सर्वंवेदेतिसर्वाधारत्वोक्तिः सयथा । दुंदुभेर्हन्यमानस्यनबाह्यान्शब्दानितिसयथार्द्रैधाग्नेरभ्याहितस्यपृथग्धूमाइतिचभिन्नानांसमसत्ताकानांचदुंदुभितच्छब्दाग्निधूमादीनांदृष्टांतानामुक्तिश्चायुक्तास्यात् । नहिदुंदुभ्यादौतच्छब्दादिरध्यस्तः किंतु तदधीनः । अन्येतुमोक्षेदेहेंद्रियादिहीनस्यकेवलस्यात्मनएवभावात्सर्वविषयज्ञाननिषेधकमिदंवाक्यंनतुप्रपंचमिथ्यात्वपरमित्याहुः ॥ यत्रत्वस्येतिश्रुत्यर्थः ॥ ३० ॥ [1]नापि "यद्वैतं(न)पश्यतिपश्यन्वैतन्नपश्यतिनहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतेअविनाशित्वात्नतुतद्द्वितीयमस्तिततोऽन्यद्विभक्तंयत्पश्येदि"तिश्रुतिस्तत्रमानं । पूर्वत्रहि । "शुक्लस्यनीलस्यपिंगलस्यहरितस्यलोहितस्यपूर्णा" इतिनाडीस्थभगवन्मूर्तीनांविलक्षणरूपत्वमुक्तंतेनतद्रूपाणामभेदःप्राप्तः तथा "तद्वाअस्यैतदाप्तकाममात्मकाममकाममरूपमितिषष्ठयारूपरूपिभेदश्चतन्निरासार्थंभगवद्रूपादीनामभेदोऽत्रोच्यते । "हृदयंब्रह्मे"

त्तुजीवजडादिकंस्वस्माद्विभक्तंपश्येत्ततोऽन्यदित्युक्तेस्वस्मादविभक्तमेवविभक्तत्वेनपश्यतिभ्रांत्येति(तोसाविति)किंनस्यादित्या

1 बृहदारण्यकस्थमिदं वाक्यम्।

SGDF

शंकावारणायनहिद्रष्टुरीश्वरस्यदृष्टेर्विपरिलोपोविद्यतेनित्यत्वादित्युक्तमितियोज्यं। ननुद्वैतशब्दार्थभेदंप्रतिप्रतियोगित्वेनब्रह्मणोऽ
निर्देशात्कथंस्वस्माद्भिन्नमितिव्याख्यानमित्यतआह ॥ पश्यतीतिदर्शनकर्तुरेवेति ॥ दर्शनकर्तृत्वेनप्रकृतस्यैवेत्यर्थः ॥ पादि
न्यायेनेति ॥ चतुर्थाध्यायेप्रथमपादेचिंतितं"पदकर्माप्रयोजक"मित्यत्र । ज्योतिष्टोमे"अरुणयैकहायन्यापिंगाक्ष्यागवासोमंक्री
णाती"तिसोमक्रयणंप्रक्रम्यश्रूयते "षट्पदान्यनु(निष्क्रा)क्रामति सप्तमंपदमध्वर्युरंजलिनागृह्णाती"तिएकहायिन्याःगोःसोमक्रयण

तिश्रुत्या"तस्यैतदेवनिरुक्तंहृदय"मित्यादिश्रुत्याचब्रह्मणिप्रसिद्धेनहृदयननिमित्तकेन"हृ
दयस्यभवती" तिपूर्वत्रहृदयशब्देननिर्दिष्टंब्रह्मयत्स्वगुणादिकंद्वैतंस्वस्माद्भिन्नंनपश्यति त
द्वितीयंनास्ति द्वितीयत्वेननास्ति कुतःपश्यन्सर्वज्ञएवसन्नीश्वरोनपश्यति। नहिद्रष्टुरीश्वर
स्यदृष्टेर्विपरिलोपोबाधोविद्यतेनित्यत्वात्। यत्तुजीवजडादिकंस्वस्माद्विभक्तंपश्येत्तत्ततोऽ
न्यदितिश्रुत्यर्थप्रतीतेःपश्यतीतिदर्शनकर्तुरेवपादिन्यायेनयद्वैतमित्यत्रप्रतियोगित्वेनान्वयात् ।

देशंप्रतिनयनकालेषट्पदक्रमणानंतरंसप्तमंपदंयद्देशेभवतितद्देशगतपां(सून्)सुंअध्वर्युरंजलिनागृह्णातीत्यर्थः ।तत्रसंदेहः एकहाय
न्याःगोर्नयनंपदपांसुग्रहणार्थमुतसोमक्रयणार्थमिति । पूर्वपक्षस्तूभयार्थमिति । नचश्रुत्यासोमंक्रीणातीतिक्रयणार्थत्वस्यैवश्रव
णात्उभयार्थत्वेमानाभावः । क्रयणार्थस्यापितस्याःनयनस्यसंनिधानेनानुपपत्त्याचपदपांसुग्रहणार्थत्वस्यापिसंभवात् । तथाहि

SGDF
Sri Gargeshwari Digital Foundation

पदपांसुग्रहणंतावदावश्यकं "यर्हिहविर्धानेप्राचींप्रवर्तयेयुस्तर्हितेनाक्षमुपांज्यादि"तिसोमधारणार्थस्यशकटस्यहविर्धानसंज्ञिकस्य योक्षोदारुविशेषःतदंजनंपदपांसुनाकर्तव्यमितिविधानात् पदपांसूनांचपदिनींपदवतीं पदगताविति धातोर्गमनवतींगोव्यक्तिं विनानुपपत्तेर्नीयमानतयासन्निधानाद्योग्यत्वाच्चप्रकृताएकहायन्येवपदिनीसंबध्यते तस्मादुभयार्थमेवएकहायन्यानयनमिति । सिद्धांतस्तुप्रधानक्रयणार्थमेवनयनं पदपांसुग्रहणंत्वनुषंगसिद्धं अतोनतदर्थत्वंतस्यकल्प्यं । यथोक्तंतंत्ररत्ने "क्रयार्थायाःप्रसंगे नपांसुग्रहणसंभवात् । नदुर्बलप्रमाणेनकल्पनीयातदर्थते"ति । एवंचात्रपदिन्यायेनेत्यत्रपूर्वपक्षन्यायोत्राभिप्रेतः यथापूर्वपक्ष

यद्वैतमितियच्छब्दस्यनतुतदितिव्यवहिततच्छब्दान्वयस्तु "यत्तदोस्सा
कांक्षत्वादाकांक्षायाश्चसन्निधानाद्बलीयस्त्वाद्युक्तः । उक्तंहिजैमिनिसूत्रे
"आनंतर्यमचोदने"तिवार्तिकेच"यस्ययेनार्थसंबंधोदूरस्थेनापितेनसः ।

न्यायेनपदपांसुषुप्रकृताएकहायनीपदिनीसंबध्यते एवमिहापीत्यर्थः । यद्वापदिन्यायेनेत्यस्यपदसंबंधिन्यायेनेत्यर्थः । यथाज्योतिष्टोमेएकहायन्याःगोःसोमक्रयणार्थंनयनकालेआम्नायते "पदेजुहोती"ति सामान्येनश्रवणाद्यस्यकस्यचित्पशोः पदेजुहोतीतिशंकायांप्रकृतत्वादेकहायनीपदमेवात्रविवक्षितं नान्यस्येतिनिर्णीतमस्ति तन्न्यायेनेहापिदर्शनकर्तृत्वेनपूर्वप्रकृतोभगवानेवयद्वैतमित्यत्रभेदप्रतियोगित्वेनान्वेतीत्यर्थः । अत्रपदन्यायेनेतिपाठकल्पनंपदिन्यायार्थाज्ञानमूलकमित्युपेक्ष्यं । ननुभवत्पक्षेयच्छब्दस्यव्यवहितान्वयकल्पनमापद्यते । तथाचसन्निध्यभावोदोषइत्यतआह ॥ यद्वैतमितियच्छब्दस्येति ॥ आनंतर्यमिति ॥ तृती

SGDF
Sri Gargeshwari Digital Foundation

याध्यायेप्रथमपादेचिंतितं। दर्शपूर्णमासयोःश्रूयते "हस्तावववनेनिक्ते उलपराजिंस्तृणाती" ति। द्वौहस्तावववनेनिक्ते छांदसोलिंगव्य त्ययः। अवनेनिक्तौप्रक्षालितौकुर्यादितियावत् अनंतरमुलपराज्यास्तरणंकार्यमित्यर्थः। वेद्यामास्तरितुंसंपादिततृणस्तंबउलपरा जिः। एवंचयज्ञेहस्तप्रक्षालनानंतरंवेद्यामुलपराजिस्तरणंक्रियतेऽनंतरंकर्मकलापःक्रियतइत्यस्तिक्रमः। तत्रहस्तावनेजनमुलपरा ज्यास्तरणांगंउतकरिष्यमाणसकलकर्मांगमितिसंशयेहस्तानेजनानंतरमुलपराज्यास्तरणविधानेनानंतर्यलक्षणात्क्रमादुलपराज्यास्त रणांगमेवेतिप्राप्तेसिद्धांतितंजैमिनिना "आनंतर्यमचोदने"ति। आनंतर्यंसान्निध्यंअंगांगिभावेनान्वयस्यनाक्षेपकं। अन्यथागिरि

अर्थतोह्यसमर्थानामानंतर्यमकारण"मिति। अन्यथायद्विभक्तंतन्नास्तीत्येतावतापूर्णत्वेनशेषवैयर्थ्यं।
कथंचत्वत्पक्षेनित्येचैतन्यमात्रे"नहिद्रष्टुर्दृष्टेर्विपरिलोपः नहिघ्रातुर्घ्रातेर्विपरिलोपः नहिस्प्रष्टुःस्पृष्टेर्वि
परिलोप"इत्यादिनोक्तंदृष्टित्वघ्रातित्वस्पृष्टित्वादिकंद्रष्टृत्वादिसंबंधश्च। किंचपूर्वत्र "यथास्मिन्ना

भुक्तमग्निमाननेन। अंबरमंबुनिपत्रमरामतिःपीतमहीशगणस्यददाह। यस्यवधूस्तनयंगृहमब्जापातुसवःशिवलोचनवह्निरित्या दावपिपदानामानंतर्यसत्त्वेनांगांगिभावेनान्वयबोधप्रसंगादितिसूत्रार्थः। एवंचानंतर्यरूपक्रमस्याप्रयोजकत्वाद्धस्तानेजनंकरिष्य माणोलपराज्यास्तरणादिसमस्तकर्मांगमेवेति संबंधोयोग्यःसआश्रयणीयः॥ अर्थतइति॥ परस्परान्वयायोग्यार्थानांगिरिर्भु क्तमित्यादिपदानामित्यर्थः॥ अन्यथेति॥ अस्यवाक्यस्याद्वैतपरत्वइत्यर्थः। चैतन्यमात्रे ज्ञानस्वरूपमात्रे॥ दृष्टित्वेत्यादि॥

दृष्टित्वादिरूपज्ञानगतजातिविशेषाणां। ज्ञानमात्रस्वरूपेनिर्धर्मकेब्रह्मण्यभावादितिभावः॥ द्रष्टृत्वादीति॥ असंगेचैतन्य मात्रेद्रष्टुर्घ्रातुःस्प्रष्टुरित्याद्युक्तोद्रष्टृत्वादिसंबंधोऽयुक्तइत्यर्थः॥ नतुतद्द्वितीयमस्तीतिश्रुत्यर्थविवरणं॥ ३१॥ कृद्योगइति॥ आरंभणशब्दस्यल्युडंतत्वात्ल्युटश्चकृत्त्वादित्यर्थः। तथाचतद्योगेषष्ठीस्यान्नतृतीयेतिभावः। ननुकृद्योगेतृतीयाऽयोगः कुतः

काशेश्येनोवासुपर्णोवाविपरिपत्यश्रांतस्संहत्यपक्षौसल्लयायैवध्रियतेएवमेवायंपुरुष"इ
ति। "तद्यथाप्रियया स्त्रियासंपरिष्वक्तोनबाह्यंकिंचनवेदनांतरंएवमेवायंपुरुष"इतिभिन्न
स्यनीडश्येनस्त्रीपुरुषादिदृष्टांतोक्तिः"प्राज्ञेनात्मनासंपरिष्वक्त"इतिजीवेशभेदोक्तिश्चायु
क्तास्यादिति॥ नतुद्वितीयमस्तीतिश्रुत्यर्थः॥ ३१॥[1] नापि"वाचारंभणंविकारोनामधेय"
मितिश्रुतिस्तत्रमानं। वाचारंभणशब्दस्यमिथ्यात्वेरूढेरभावात्। आरभ्यतइत्यारंभण
मितियोगेपिकृद्योगेतृतीयायाअयोगात्। वाचारब्धकाव्यादेरिवमिथ्यात्वालाभाच्च।

"कर्तृकर्मणोःकृती"तिकृद्योगेकर्तरिकर्मणिचषष्ठीविहिता नतृतीयानिषिद्धाऽतःकृद्योगेपिकरणेतृतीयोपपद्यतइतिचेन्न। परेणहिहं तारामशरइतिवत्करणेकर्तृत्वोपचारमंगीकृत्यवागिंद्रियमेवसर्वजगत्कल्पकमित्यंगीकृतत्वेनकरणार्थकतृतीयायास्तन्मतेऽयोगात्। "कर्तृकरणयोस्तृतीये"तिकर्तर्यपितृतीयाविधानात्रामेणबाणेनहतोवालीत्यादिप्रयोगाच्चकर्त्रर्थकत्वेपिमन्मतेतृतीयोपपद्यतएवे

1 अद्वैतपरमिदं वाक्यम्

SGDF
Sri Gargeshwari Digital Foundation

तिशंकायाःसमाधानंविचार्यं ॥ वागालंबनमात्रमिति ॥ नतुवस्त्वस्तीत्यर्थः । काव्यादौवस्तुसत्त्वमस्तीतिहृदयं । यन्मिथ्याभूतं तत्रापिवागालंबनमात्रमितिशब्दःप्रयुज्यते जगत्यपिश्रुतौसप्रयुक्तोऽतोमिथ्यात्वस्यतेनलाभइत्यतआह ॥ अक्षरेति ॥ शब्देत्यर्थः ॥ इतिकरणःक्रियतइति ॥ इतिशब्दःप्रयुज्यतइत्यर्थः । प्रकारार्थः मृत्तिकात्वादिप्रकारार्थइत्यर्थः ॥ प्रकारस्येति ॥ अत्रह्यु वागालंबनमात्रमितिव्याख्यानेअश्रुतकल्पनात्अक्षरसाम्येननिर्वचनेपिमात्रशब्दाश्रवणात् । त्वयानाम धेयमित्यस्यापिनाममात्रंह्येतदितिव्याख्यातत्वेनपौनरुक्त्याच्च । मृत्तिकेत्यत्रार्थविवक्षायामितिशब्दवैय र्थ्याच्च । पदार्थविपर्यासेखल्वत्रेतिशब्दः सचशब्दप्रकरणेप्रसक्तंशब्दपदार्थकत्वंनिवार्यार्थपदार्थकत्वंव्य वस्थापयति यथा"नवेतिविभाषे"ति । अर्थप्रकरणेतुशब्दपदार्थकत्वंयथागौरित्ययमाहेति । उक्तंहिमहा भाष्ये । "नवेतिविभाषेत्यत्रइतिकरणःक्रियते सोर्थनिर्देशार्थोभविष्यति तद्यथागौरित्ययमाहेतिगोश ब्दादितिकरणःप्रयुज्यमानःगोशब्दंस्वस्मात्पदार्थात्प्रच्यावयतिसोस्मात्प्रच्युतश्शब्दपदार्थकस्संपद्यत" इति अत्रचार्थप्रकरणादेवार्थपदार्थकत्वेसिद्धेकिमितिशब्देन । नचात्रेतिशब्दःप्रकारार्थः । प्रकारस्यानुपा दानत्वात् । तदुक्तं"वाचारंभणमित्युक्तेमिथ्येत्यश्रुतकल्पनं । पुनरुक्तिर्नामधेयमितीत्यस्यनिरर्थते"ति । पादानस्यैवसत्यत्वमेकविज्ञानार्थः । नहिमृत्तिकादिगतोमृत्त्वादिःप्रकारोघटाद्युपादानं येनसोऽर्थोयुक्तःस्यादित्यर्थः । स्वमतेश्रुत्य र्थमाह ॥ तस्मादिति ॥ कृद्योगेतृतीयाऽयोगइतिदूषणंनास्मत्पक्षेप्राप्नोति समस्तपदत्वांगीकारेणवाचेत्यस्यतृतीयांतभिन्नपदत्वा

SGDF
Sri Gargeshwari Digital Foundation

नाश्रयणादित्याशयेनोक्तं ॥ वाचयेत्यादि ॥ कर्मणिघञिति ॥ विपूर्वात्करोतेःकर्मणिघञिअकारमात्रंविहायसर्वस्यापिलोपे ञित्त्वाद्धातोर्वृद्धौरपरत्वेचविकारशब्दोविकृतत्वार्थकइतिभावः । सत्यशब्दस्यनित्यार्थत्वेप्रयोगश्चोत्तरत्राऽस्तीत्यनुव्याख्यानानुसारेणोपपादयति ॥ नास्येति ॥ त्यबंतस्येति ॥ सदाशब्दात्त्यप्प्रत्ययेपकारलोपेदेत्याकारलोपेदस्यतत्वेसत्यशब्दोनित्यार्थक

तस्माद्वाचयावागिंद्रियेणारंभणंउत्पादनंयस्यसांकेतिकस्यभाषाशब्दस्यतन्नामधेयंविकारःकर्मणिघञ् विकृतं संस्कृतापभ्रंशरूपेणविक्रियमाणत्वात् । मृत्तिकेत्यादिसंस्कृतंनामधेयंतुसत्यंनित्यं "नास्यजरयैतज्जीर्यतेनवधेनास्यहन्यतेएतत्सत्यंब्रह्मपुरमिति एतच्छ्रुतावेवोत्तरत्रसत्यशब्दस्यनित्येप्रयोगात् । सदाशब्दात् "अव्ययात्त्य"बितित्यबंतस्यसत्यशब्दस्यनित्येप्रयोगसंभवाच्च "सनातनंसत्यमितिनित्यमेवोच्यतेबुधै" रितिवचनाच्च । इहविकृतत्वप्रतियोगिनएवसत्यशब्देनविवक्षणीयत्वाच्च । "टापंचापिहलंतानांयथावाचानिशादिशो" तिवचनाद्वाचारंभणमितिसमासस्साधुः । तस्मात्तत्सादृश्यादेकविज्ञानेनसर्वविज्ञानेमृत्पिंडमृण्मयादिदृष्टांताः प्रधानज्ञानादप्रधानज्ञानेसंस्कृतापभ्रंशदृष्टांतः भाषाशब्दज्ञानाद्धियत्फलंतच्चाधिकंचसार्वत्रिकव्यवहारादिकंसंस्कृतज्ञानाद्भवतीतितज्ज्ञोविद्वानित्युच्यते

इतिभावः ॥ विकृतत्वेति ॥ "वाचारंभण"मित्युक्तविकृतत्वेत्यर्थः । ननुवाचारंभणमितिकथंसमासः वागारंभणमितिस्यादित्यतआह ॥ टापंचापीति ॥ हलंताद्वाक्शब्दात्टापिवाचेत्याकारांतशब्दः तस्यचारंभणशब्देनसमासोयुक्तइत्यर्थः । प्रधानज्ञाना

SGDF
Sri Gargeshwari Digital Foundation

दप्रधानेज्ञानेसंस्कृतापभ्रंशेयोर्दृष्टांतत्वप्रतिपादनायवाचारंभणवाक्यमित्ययुक्तं । तत्रपूर्वदृष्टांतेषुयथासोम्येत्यादिवदत्रतदभावा दित्यतआह ॥ तदर्थमिति ॥ दृष्टांतत्वलाभार्थमित्यर्थः ॥ तनूर्वर्षिष्ठेत्यादिवदिति ॥ द्वितीयाध्यायेप्रथमपादेचिंतितं । ‘अनुषंगोवाक्यसमाप्तिः सर्वेषुतुल्ययोगत्वादि”त्यत्र । ज्योतिष्टोमेउपसद्धोमेयातेअग्नेऽयाशयातनूर्वर्षिष्ठागह्वरेष्ठोग्रंवचोअपावधी त्वेषंवचोअपावधीत्स्वाहयातेअग्नेरजाशयायातेअग्नेहराशयेतिमंत्रत्रयमाम्नायते । अयंमंत्रार्थः । अयसारजतेनहिरण्येननिर्मिताअ ग्नेस्तिस्रस्तनवोवेदप्रसिद्धाःताःप्रतिप्रार्थनंक्रियते हेस्वाहस्वीयमादत्तइतिस्वाह अग्ने या तेतव अयाशयाअयोनिर्मितातनूः या ते र जाशयारजतनिर्मितातनूः या ते हराशयाहिरण्यनिर्मितातनूः कथंभूतावर्षिष्ठाअभिलषितवर्षणशीला गह्वरेस्थानेतिष्ठतीतिगह्व

तदर्थं “यथासोम्ये” त्यादिकं “तनूर्वर्षिष्ठे” त्यादिवदनुषंजनीयं ।

रेष्ठा एतादृशीतनूः मे उग्रंवचः अशनायापिपासेतज्जन्यंदुःखमितियावत् त्वेषंवचः उपपातकमहापातकाद्येनः अपावधीत् नाशयत्विति । तथाचब्राह्मणं “उग्रंवचोपावधीत्स्वाहेतिअशनायापिपासेहवाउग्रंवचःएनोहवैत्वेषंवच”इति । तत्ररजाशयाहरा शयामंत्रयोःसाकांक्षयोःकिंलौकिकःशेषोऽध्याहार्य उतअयाशयामंत्रशेषस्तनूर्वर्षिष्ठेत्यादिरेवतयोरप्यनुषंगेणशेषइतिसंशयेलोके विवक्षानुसारेणानुषंगो नचैवमनुषंगःक्रमनियमवतिवेदे यदर्थंवाक्यशेषाम्नानं ततोन्यत्रतस्यनयनायोगात् तस्माल्लौकिकःशेषो ध्याहार्यइतिपूर्वपक्षः । वैदिकेवाक्यशेषेलभ्यमानेनलौकिकशेषोध्याहार्यः । शक्नोतिचायंसर्वैरन्वेतुं अन्वयकारणानामाकांक्षास न्निधियोग्यतानामविशेषात् व्यवधानेनसमाम्नातानामपिगिरिर्भुक्तमित्यादिवसंबद्धपदनिचयव्यवधानाभावेनबुद्धिविषयत्वरूप

सन्निधिसद्भावादानंतर्यस्याप्रयोजकत्वात् । तस्मात्तनूर्वर्षिष्ठेत्येतदाम्नातं“सर्वार्थ”मितिसर्वस्यैवायंशेषइतिसिद्धांतः । स्वमतमुपपा द्यपरपक्षेबाधकमाह ॥ कथंचेति ॥ एतेषांदृष्टांतानांत्वन्मतेउपादानोपादेयाभिप्रायत्वाद्ब्रह्मणश्चचिन्मात्रस्यजगदुपादानत्वाभावा दितिभावः। शुद्धस्योपादानत्वाभावेपिअविद्याविशिष्टस्यजगदुपादानत्वंयुक्तमित्याशंकते ॥ ब्रह्मेति ॥ प्रतिज्ञानादिति ॥ तथाचो पादानभूताविद्याविशिष्टब्रह्मज्ञानेनैवसर्वज्ञानंप्राप्तं नशुद्धज्ञानेन अतःप्रतिज्ञाहानिरित्यर्थः । ननूपादानभूताविद्याविशिष्टब्रह्मज्ञाने

कथंचविवर्तपक्षेमृत्पिंडमृण्मयादिदृष्टांताः।ब्रह्माविद्याविशिष्टंसदुपादानमपीतिचेत् न । मु मुक्षुज्ञेयशुद्धब्रह्मज्ञानेनैवसर्वविज्ञानप्रतिज्ञानात् । अन्यथाअविद्यायाअपि “येनाश्रुत” मि त्यादिप्रतिज्ञावाक्योक्तज्ञेयकोटित्वापातात् । अनाद्यविद्यादीन्प्रत्युपादानत्वायोगाच्च । उपादा नत्वाभिप्रायत्वेमृदाज्ञातयामृण्मयंविज्ञातंस्यादित्येतावतैवपूर्णत्वेनमृत्पिंडादिवाक्यत्रयेप्रत्येकं श्रुतानामेकशब्दपिंडशब्दसर्वशब्दानांवैयर्थ्याच्च । नहिसर्वंमृण्मयादिकमेकमृत्पिंडविकारः ।

नैवसर्वज्ञानंप्रतिज्ञातमितिचेत्तत्राह ॥ अन्यथेति ॥ किंचाविद्याविशिष्टब्रह्मणोविद्याद्युपादानत्वाभावेनब्रह्मज्ञानेनाविद्यादिज्ञाना भावापत्त्याउपादानोपादेयभावेनैकविज्ञानेनसर्वविज्ञानप्रतिज्ञाभग्नेत्याह ॥ अनादीति ॥ विगतप्रयोजनत्वमुपपाद्यविरुद्धप्रयो जनत्वमुपपादयति ॥ नहीति ॥ आदिपदाभ्यांलोहमणिविकारात्मकमन्यल्लोहमयमित्यस्यग्रहणं । नखनिकृंतनदृष्टांतस्त्वत्यंता

SGDF

संबद्धइत्याह ॥ नखेति ॥ किंचमृदातत्त्वेनविज्ञातयासर्वंमृण्मयंघटशरावोदंचनादिकंसर्वंविज्ञातंस्यादित्येतदयुक्तं । तथात्वेघट शरावादौमृत्त्वेनिश्चितेप्ययंघटोवाशरावोवाउदंचनंवाशरावएवेतिसंशयविपर्ययौनस्यातामित्याह ॥ मृत्त्वइति ॥ मृद्यध्यस्तत्वा दिति॥मृद्व्यतिरेकेणघटादेरभावादित्यर्थः । अधिष्ठानतत्वज्ञानेनाध्यस्तंनिवर्ततइतिलोकेदर्शनात्मृदादौघटादेरध्यासेमृत्त्वज्ञाना न्निवृत्तिःस्यात् नचैवमस्तीत्याह॥मृत्त्वेति॥ घटादीनांमृद्व्यतिरेकेणासत्त्वरूपंमृदध्यस्तत्वंकिंव्यवहारदशायामुच्यते तात्विकत्वद

नखनिकृंतनस्यांत्यावयवित्वेनोपादानत्वस्यैवासंभवाच्च । मृत्त्वेनिश्चितेपिघटादौसंशया दिदर्शनाच्च । नचघटादेरपिमृद्यध्यस्तत्वाद्विवर्तपक्षेपितदृष्टांतोयुक्तः । मृत्त्वज्ञानेपिघटा द्यनिवृत्तेः व्यवहारदशायांमृदादिवत्कारकव्यापारसाध्यस्यजलाहरणादिसमर्थस्यचा वस्थाविशेषरूपस्यघटादेरपिसत्त्वात् । तात्विकविवक्षायांतुमृदोपिसत्त्वोक्त्ययोगाच्च ।

शायांवा॥नाद्यइत्याह ॥ व्यवहारेति ॥ घटादेःसत्त्वोपपादकं मृदादिवदिति ॥कारकव्यापारेति॥ कुलालादिव्यापारेत्यर्थः ॥ अवस्थेति ॥ पृथुबुध्नोदराकारत्वावस्थाविशेषएवघटइत्यर्थः । मृद्व्यतिरेकेणासत्त्वेप्रागुक्तंकारकव्यापारसाध्यत्वमयुक्तंस्यादिति भावः । द्वितीयेत्वाह ॥ तात्विकेति ॥ तात्विकत्वदशायांमृदोपिब्रह्मण्यध्यस्तत्वेन ब्रह्मव्यतिरेकेणाभावात् उपादानत्वेन"मृ त्तिकैवसत्य"मितिमृदःसत्त्वोक्त्ययोगादित्यर्थः । एकविज्ञानेनसर्वविज्ञानस्याध्यस्तत्वाभिप्रायोनयुक्तः । अधिष्ठानतत्वज्ञानेना

SGDF Sri Gargeshwari Digital Foundation

ध्यस्तज्ञानस्यक्काप्यदर्शनात् । नहिशुक्तिज्ञोरजतज्ञइत्युच्यतइत्याह ॥ शुक्त्यादीति ॥ वाचस्पतिनेति ॥ शुक्त्यादितत्वज्ञानेनरूप्यादिज्ञानादर्शनादित्येतदसहमानेनेत्यर्थः ॥ साहीति ॥ आरोपितस्यरूप्यस्यतत्त्वमधिष्ठानभूताशुक्तिरेव । एवंब्रह्मणिज्ञातेसतितत्राध्यस्तंजगत्तत्वतोज्ञातंभवति तद्धितस्यतत्त्वं अतोऽधिष्ठानज्ञानेनाध्यस्तस्यतत्वतोज्ञानमेवैकविज्ञानेनसर्वविज्ञानशब्दार्थइत्यर्थः ॥ एवंहीति ॥ अधिष्ठानतत्त्वज्ञानेनाध्यस्तंतत्त्वतोज्ञातंभवतीत्युक्तेब्रह्मणएवाध्यस्तत्वेनब्रह्मज्ञानेनब्रह्मज्ञातंभवतीत्युक्तंस्यात्तच्चायुक्तमित्यर्थः । कुतइत्यतआह ॥ सर्वेति ॥ घटज्ञानेसतिघटस्यापिज्ञाततत्वादितिभावः । ननुनसर्वसाधार

शुक्त्यादितत्वज्ञानेनरूप्यादिज्ञानादर्शनाच्च । यत्तूक्तंवाचस्पतिना । शुक्तौज्ञातायांरूप्यंतत्वतोज्ञातं भवति । साहितस्यतत्त्वं । एवंब्रह्मज्ञानात्सर्वंतत्वतोज्ञातंभवतीतितन्न । एवंहिब्रह्मज्ञानेनब्रह्मैव ज्ञातंभवतीत्यर्थःस्यात् । तच्चनयुक्तं । सर्वसाधारण्यात् । स्वस्यस्वहेतुत्वायोगाच्च । "येनाश्रुतंश्रुतंभवत्यमतंमतमविज्ञातंविज्ञातमि"तिश्रुतिगताश्रुतादिपदायोगाच्च । किंचासाधारणंस्वरूपमसाधारण

ण्यंघटज्ञानस्यघटज्ञानंप्रत्यहेतुत्वादितिचेत्सममंप्रकृतेपीत्याह ॥ स्वस्येति ॥ ब्रह्मज्ञानस्यापिब्रह्मज्ञानंप्रत्यहेतुत्वमेव । अन्यथाआत्माश्रयादितिभावः ॥ येनेति ॥ येनब्रह्मणाश्रुतेनाश्रुतंजगत्तत्त्वंश्रुतंभवतीतितदर्थः । जगत्तत्त्वंचब्रह्मैव तथाचयेनश्रुतेनब्रह्मणाऽश्रुतमित्येतदेवविरुद्धत्वान्नसंभवतीत्यर्थः । ननुनेदंदूषणंयेनाश्रुतंजगत्तत्त्वंश्रुतंभवतीत्युक्तेनविरोधइत्यस्वरसादाह ॥ किंचेति ॥ असाधारणंस्वरूपमिति ॥ चाकचक्यस्यासाधारणस्वरूपंशुक्तित्वासाधारणधर्मोवातत्त्वं नतुभ्रमाधिष्ठानंतत्त्वमित्यु

SGDF
Sri Gargeshwari Digital Foundation

च्यतइतिभावः। कुतोनेत्यतआह ॥ तथात्वेहीति ॥ यदिभ्रमाधिष्ठानमेवतत्त्वं तर्ह्यानंदोब्रह्मतत्त्वंनस्यात्। आनंदस्यब्रह्मी यभ्रमाधिष्ठानत्वाभावात्। तथाशुक्तित्वंशुक्तेस्तत्त्वंनस्यात्। शुक्त्यारोपाधिष्ठानत्वाभावादित्यर्थः। एवंसत्यसाधारणस्वरूपा साधारणधर्मत्वरूपंतत्त्वलक्षणंरूप्यतत्त्वभूतायांशुक्तौनास्तीत्याह ॥ नचेति ॥ शुक्तिज्ञाननिवर्त्यस्येतिहेतुगर्भं। नहितज्ज्ञाननिव र्त्यतस्यस्वरूपंभवतीत्यर्थः। इतोपिनशुक्तिरारोप्यस्यरूप्यस्यासाधारणंस्वरूपंअतोनतत्वमित्याह ॥ नचेति ॥ एकस्यामेवशुक्तौवं

धर्मोवातत्वं। नतुभ्रमाधिष्ठानं। तथात्वेहिब्रह्माद्यनधिष्ठानमानंदः शुक्तित्वादिकं ब्रह्मशुक्त्यादितत्वं नस्यात्। नचशुक्तिःशुक्तिज्ञाननिवर्त्यस्यरूप्यस्यस्वरूपंधर्मोवा। नचानेकारोप्यानुगतमधिष्ठानमेकैक स्यारोपितस्याऽसाधारणं। किंचैवंशुक्तौरूप्यधीरानंदादौब्रह्मादिधीरिवप्रमास्यात्। तत्तत्वेतद्धीत्वात्। तस्मात्परमतेएकविज्ञानेनसर्वविज्ञानमयुक्तं। अस्मत्पक्षेतुप्रधानपुरुषज्ञानाह्वानपूजनादौलोकेजनपद स्सर्वोपिज्ञातआहुतइत्यादेःपुराणादौच"शशासपृथिवींसर्वांसशैलवनकाननां। नाशितापृथिवीसर्वाधार्त राष्ट्रेणदुर्नयै"रित्यादेश्चव्यवहारस्यदर्शनात्प्रधानभूतब्रह्मज्ञानादप्रधानभूतदेवतादिज्ञानफलसिद्धेस्तद्युक्तं

गाद्यनेकाध्यासोभवति। एवंचशुक्तिर्नारोप्यस्यरूप्यस्यतत्त्वं तस्याःवंगाद्यनेकासाधारणस्वरूपत्वाभावादित्यर्थः॥ किंचैवमिति॥ यदिरूप्यतत्त्वंशुक्तिःस्यात्तर्हिआनंदस्यब्रह्मतयाआनंदोब्रह्मेत्यानंदेब्रह्मतयाधीर्यथाप्रमा ब्रह्मतत्त्वेब्रह्मधीत्वात्। एवंशुक्तौरूप्य धीःप्रमास्यात् रूप्यतत्त्वेरूप्यधीत्वादित्यर्थः। तथाचशुक्त्यादिज्ञानेनरूप्यादिज्ञानादर्शनादित्युक्तंदूषणंयुक्तमेवेतिभावः।

ज्ञानादेव प्रधानभूतब्रह्मज्ञानादेव। सर्वेकामाः देवतादिज्ञानफलभूताः॥ तावानिति ॥ सर्ववेदेषुदेवताज्ञानकर्मादिफलतयाप्र मितंस्वर्गादिकंसर्वंब्रह्मप्राप्तियोग्यस्यापरोक्षज्ञानिनःफलेंतर्भवतीत्यर्थः ॥ एतेनेति ॥ एकविज्ञानेनसर्वविज्ञानस्यसादृश्यादिना न्यथैवोपपन्नत्वादित्यर्थः। केचित् रामानुजीयाः। अव्यक्तादिविशिष्टस्यअव्यक्ताधिष्ठानतयाऽव्यक्तशरीरस्यतदधिष्ठिताव्यक्तस्ये

"ज्ञानादेवसर्वेकामाःसंपद्यंत"इतिश्रुतेः। "तावान्सर्वेषुवेदेषुब्राह्मणस्यविजानत"इतिस्मृतेश्च। "यथा मृत्पिंडविज्ञानात्सादृश्यादेवमृण्मयाः। विज्ञायंतेतथाविष्णोस्सादृश्याज्जगदेवच। अनन्याधीनविज्ञा नादन्याधीनंतथैवच। मृदयोलोहनाम्नांहिज्ञानात्सांकेतिकंयथे"त्यादिस्मृतेश्च। एतेनैकविज्ञानेसर्ववि ज्ञानान्यथानुपपत्तिर्मिथ्यात्वेप्रमाणमितिनिरस्तं। केचित्तुसूक्ष्माव्यक्तादिविशिष्टब्रह्मणोमहदादिवि शिष्टात्मनापरिणामात्कार्यकारणयोश्चाभेदात्कार्यस्यकारणातिरेकेणासत्त्वपरेयंश्रुतिर्नतुमिथ्यात्व परेत्याहुः॥ ॥ वाचारंभणश्रुत्यर्थः॥ ३२ ॥ ॥[1]नापि"इदंसर्वंयदयमात्मे"त्यादिश्रुतिस्तत्रमानं। जडा जडयोरैक्यासंभवेनब्रह्मव्यतिरेकेणासत्त्वस्यात्राभिप्रेतत्वादितियुक्तं "सर्वेषुभूतेष्वेत"मितिश्रुतेः

तियावत्। महदादिविशिष्टात्मना महदाद्यधिष्ठितात्मना तदधिष्ठितमहदादिरूपेणेतियावत्॥ ७ ॥ वाचारंभणश्रुत्यर्थविव रणं ॥ ३२ ॥ कथमियंश्रुतिर्मिथ्यात्वेमानमित्यतआह ॥ जडाजडेति ॥ सर्वशब्दोक्तजडाजडयोरित्यर्थः। सर्वव्याप्त्यासर्व मात्मेति सामानाधिकरण्योपपत्तावित्यन्वयः। इदंसर्वमात्माआत्मनाव्याप्तमित्यर्थः। भगवतःसर्वव्याप्तत्वेश्रुतिः॥ सर्वेष्विति॥

1 बृहदारण्यकस्थमिदं वाक्यम्।

SGDF ... Foundation

व्याप्त्यासामानाधिकरण्यंकुतइत्यतआह ॥ सर्वमिति ॥ लवणंलवणेनव्याप्तमित्यर्थः । एवमेवोत्तरत्रापियोज्यं । आयुः घृतंघृतनि
मित्तकं । ब्राह्मणोमुखं मुखनिमित्तकः । राष्ट्रं राष्ट्राधारः । सर्वादेवताःसर्वदेवताश्रयः सर्वदेवतासन्निधिपात्रं ॥ प्रस्तरइति ॥ यथाय
जमानकार्यकारीप्रस्तरः एवंनऋतइतिश्रुतेस्तत्सिद्ध्याजगच्चेष्टादिकार्यकारित्वेनेत्यर्थः ॥ आदित्यइति ॥ यूपआदित्यः आदित्यवत्
आज्यांजननिमित्तौज्वल्येनआदित्यसदृशइत्यर्थः । एवंसारूप्येण सत्वादिसारूप्येण ॥ सामानाधिकरण्येति ॥ सर्वात्म

सर्वंजलंलवणमितिवत्सर्वव्याप्त्यावा साहिसर्वस्यकर्तेतिश्रुतेः "आयुर्वैघृतं ब्राह्मणोस्यमुख"मितिव
त्निमित्तत्वेनवा "यस्मिन्द्यौःपृथिवीचे"त्यादिश्रुतेः "राजाराष्ट्रं ब्राह्मणोवैसर्वादेवता"इतिवत्सर्वा
धारत्वेनवा "नऋतेत्वत्क्रियतेकिंचने"त्यादिश्रुते "यजमानःप्रस्तर"इतिवत् "तत्सिद्ध्यावा"(तत्कार्य
कारित्वेनवा) "आदित्योयूप"इतिवत्सारूप्येणवा सामानाधिकरण्योपपत्तौसर्वप्रमाणबाधितायाः
यःपुरुषःसस्थाणुरितिवत्यत्सर्वत्वेनप्रतीतंतदात्मन्यध्यस्तमितिपदद्वयलक्षणायाअयोगात् । उक्तंहि
महाभाष्ये "अंतरेणापिनिमित्तंनिमित्तार्थोवगम्यते । तद्यथाआयुर्वैघृतंदधित्रपुसंप्रत्यक्षोज्वरइति ।

नेतिसामानाधिकरण्योपपत्तावित्यन्वयः ॥ पदद्वयेति ॥ सर्वशब्दस्यप्रतीतत्वेलक्षणा आत्मशब्दस्यआत्मन्यध्यस्तत्वेलक्षणेति
पदद्वयलक्षणायाअयोगादित्यर्थः । इदंसर्वमात्मेतिसामानाधिकरण्यमात्मनिमित्तकत्वेनव्याख्यातं तदयुक्तं निमित्तवाचकपदाभा
वादित्यतोनिमित्तवाचकपदाभावेपितदर्थोवगम्यतइत्यत्रसंमतिमाह ॥ उक्तंहीति ॥ निमित्तं निमित्तवाचकंपदं । त्रपुसंउर्वारुकं

SGDF
Sri Gargeshwari Digital Foundation

दधिमंडंवा।ज्वरो ज्वरनिमित्तं।आदित्योयूपइत्यत्रआदित्यवदितिसारूप्यंसामानाधिकरण्यार्थः। एवंसर्वमात्माआत्मवदितिसारूप्येणसामानाधिकरण्योपपत्तिरित्युक्तं तदयुक्तं वत्यर्थकपदाश्रवणादित्यतोविनापिवतिंतदर्थोवगम्यतइत्येतत्संमत्याद्रढयति ॥ अंतरेणापीति ॥ वतिं वतिप्रयोगं। अतिदेशः तद्वदित्यतिदेशः।यद्यब्रह्मदत्तमुद्दिश्यहेब्रह्मदत्तेत्याह तर्हिब्रह्मदत्तवदिति तत्सारूप्यं अंतरेणापिवतिमतिदेशोगम्यते । अब्रह्मदत्तंब्रह्मदत्तइत्याहब्रह्मदत्तवदितिगम्यते" इति। "पुरुषएवेदंसर्वं पुरुषेणैवेदंसर्वंव्याप्तमातृणादाकरीषा"दितिश्रुतौ । "असतश्चसतश्चैवसर्वस्यप्रभवोव्ययः । सर्वस्यचसदा ज्ञानात्सर्वमेनंप्रचक्षते ।पुरुषएवेदंसर्वंभूतंभव्यंभवच्चयत् ।इत्युच्यतेतदीयत्वान्नतुसर्वस्वरूपत"इतिभारते "सर्वंसमाप्नोषिततोसिसर्व"इतिगीतायांचान्यथाव्याख्यातत्वाच्च। अन्यथा"इदंसर्व"मित्यस्य"सर्वंतंपरादाद्योन्यत्रात्मनस्सर्वंवेदेतिपूर्वेण"सयथादुंदुभे"रित्यादिनोत्तरेण"पुरुषएवेदंसर्वं" मित्यस्य"सभूमिंविश्वतोवृत्वे"तिपूर्वेण"उतामृतत्वस्येशान"इत्युत्तरेण"ब्रह्मैवेदंसर्व"मित्यस्य"अस्यांपृथिव्यांतेजोमयोमृतमयस्सयश्चायमप्सुतेजोमयोमृतमय"इत्यादिनापूर्वेण"सर्वंखल्विदंब्रह्मे"त्यस्य"ज्यायान्पृथिव्याज्यायानंतरिक्षा"दित्यादिनोत्तरेण" सर्वाणिभूतान्यात्मैवे "त्यस्य" सर्वभूतेषुचात्मान"मित्यादिनापूर्वेण"याथातथ्यगम्यतइत्यर्थः । अस्याःश्रुतेर्नत्वदुक्तोर्थः किंत्वस्मदुक्तएव तथैवप्रमाणांतरेणव्याख्यातत्वादित्याह ॥ पुरुषएवेदमित्यादिना ॥ परव्याख्यानेबाधकमाह ॥ अन्यथेति ॥ "इदंसर्वंयदयमात्मे" त्येवंजातीयानिवाक्यान्युदाहृत्यतत्रसर्वत्रापिपूर्वोत्तरवि

SGDF
Sri Gargeshwari Digital Foundation

रोधंदर्शयति ॥ पुरुषएवेदमित्यादिना ॥ ७ ॥ इदंसर्वंयदयमात्मेतिश्रुत्यर्थविवरणं ॥ ३३ ॥ यस्मादिति ॥ यस्माद्ब्र
ह्मणःपरमपरंचनेतिनञोनुषंगेणव्याख्यानान्मिथ्यात्वप्रतिपादकमिदंपरमतइतिज्ञातव्यं । तच्चपरंअस्वतंत्रमित्यर्थः । यस्मात्प
रंनेत्यत्रप्रमाणसंवादमाह ॥ पुरुषादिति ॥ अपरंत्वस्तीत्यत्रतमाह ॥ पादोस्येति ॥ तदधीनत्वेसतितत्सादृश्येनविश्वभूतान्ये
कःपादइत्यर्थः । अपरंनास्तीतिव्याख्यानेबाधकमाह ॥ नञोनुषंगस्येति ॥ नञनुवृत्तेरित्यर्थः । विरोधमेवोपपादयति

तोर्थान्व्यदधाच्छाश्वतीभ्य"इत्युत्तरेणचाविरोधः ॥ ७ ॥ इदंसर्वंयदयमात्मेत्यादिश्रुत्यर्थः ॥ ३३ ॥
"यस्मात्परंनापरमस्ती"तिश्रुतेरपियस्मात्परंनअपरंत्वस्तितच्चकिंचिदल्पमित्यर्थः । "पुरुषान्नपरंकिं
चित् पादोस्यविश्वाभूतानी"त्यादिश्रुतेः "वासुदेवात्परंनास्ती"त्यादिस्मृतेश्च । नञोनुषंगस्याकल्प्य
त्वाच्च।"तेनेदंपूर्णंपुरुषेणसर्वंततोयदुत्तरतर"मितिवाक्यशेषाच्च । विश्वस्यैवाभावेहिकिंतेनपूर्णंकस्मा
च्चतदुत्तरतरंस्यात् । यस्मान्नाणीयोनज्यायोस्ती"त्यत्र"अणोरणीयान्महतोमहीयानि"त्यादिश्रुत्यंतरा

॥ विश्वस्यैवेति ॥ तत् ब्रह्म । "यस्मात्परंनापरमस्तिकिंचिद्यस्मान्नज्यायोनाणीयोस्तिकश्चि"दित्यत्रयथाणुज्यायोरूपोभयपदार्थ
निषेधः तद्वदेवपूर्ववाक्येप्युभयनिषेधःकार्यः असतिज्ञापकेवैरूप्यायोगादित्यतस्तत्रोभयनिषेधज्ञापकमाह ॥ यस्मादिति ॥
॥ अणोरिति ॥ भगवतएवश्रुत्यंतरेऽणुत्वमहत्त्वोक्तेरत्रोभयनिषेधःकार्यएव । नचतथाऽपराभावप्रतिपादकंश्रुत्यंतरंनामा

स्तीतिभावः ॥ वाक्येति ॥ अपरस्यापिनिषेधे "तेनेद"मितिवाक्यशेषविरोधवदत्रोभयनिषेधेतदभावादित्यर्थः ॥ नञःश्रवणाच्चे
ति ॥ त्वन्मतेज्ञापकाभावेप्यनुषंगःकार्यः सचलज्जाकरइतिभावः ॥ ७ ॥ यस्मात्परंनेतिश्रुत्यर्थविवरणं ॥ ३४ ॥ सत्योपाधि
कृतत्वं सत्योपाधिजन्यत्वं । द्वितीये विकल्पइतिश्लोके । अनादिसत्यत्वं आद्यश्लोकेपंचविधभेदस्यानादित्वंद्वितीयश्लोकेसत्यत्व

द्वाक्यशेषाविरोधादुभयत्रापिनञःश्रवणाच्चोभयनिषेधः ॥ ७ ॥ यस्मात्परंनेतिश्रुत्यर्थः ॥ ३४ ॥ "प्रपंचो
यदिविद्येतनिवर्तेतनसंशयः । मायामात्रमिदंद्वैतमद्वैतंपरमार्थतः । विकल्पोविनिवर्तेतकल्पितोयदिके
नचित् । उपदेशादयंवादोज्ञातेद्वैतंनविद्यत"इत्यत्राप्याद्यश्लोकेभेदस्यभास्करादिमतप्राप्तंसत्योपाधि
कृतत्वंनिरस्यद्वितीयेमायावादप्राप्तमारोपितत्वंनिरस्यानादिसत्यत्वमेवोच्यते । यथा"तद्धैकआहुरि"
तिश्रुतौबौद्धमतप्राप्तमसत्कारणत्वंनिरस्य"सदेवे"त्यत्रसत्कारणत्वं । तथाहि । भेदप्रपंचो यदिविद्येत
उत्पद्येत तर्हिनिवर्तेत नचनिवर्तते मोक्षेपिभेदश्रुतेः । तस्मादनादिरित्यर्थः । विदसत्तायामितिहिधातुः ।

मितिविवेकः । नन्वनादिश्रुतेःकथमाधुनिकभास्करादिमतप्राप्तनिषेधकत्वं अदर्शनादित्यतआह ॥ यथेति ॥ बौद्धेति ॥ प्रवाहतो
ऽनादीतिपूरणीयं । श्लोकाभ्यांकथमनादित्वंसत्यत्वंलभ्यतइत्यतस्तौव्याख्यातुंप्रतिजानीते ॥ तथाहीति ॥ अनादिसत्यत्वमेवैतच्छ्लो
कप्रतिपाद्यतयाप्रसिद्धमित्यर्थः । आद्यश्लोकंव्याचष्टे ॥ भेदेति ॥ भेदरूपःप्रपंचः । विद्येतेत्यस्यउत्पद्येत्यर्थत्वंव्युत्पादयति ॥ विदेति ॥

SGDF Sri Gangadharan Digital Foundation

तर्हिंप्रकृतेकथमुत्पत्तिलाभइत्यतआह॥उपत्तिरपीति॥असतःसत्तासंबंधरूपत्वाज्जनेरितिभावः।ननुविद्यतेरुत्पत्त्यर्थत्वेपितत्राप्रयो
गादसाधुत्वमाशंक्यसत्तार्थस्यभवतेरुत्पत्तौप्रयोगदर्शनात्समानन्यायेनविदेरप्युत्पत्तौप्रयोगोनासाधुरित्यभिसंधायभावनार्थाधि
करणवार्तिकमुदाहरति॥तेनेति॥ यजेतेत्यादौधात्वर्थभूतयागातिरिक्ताप्रयत्नरूपाभावनालिङ्वाच्यतयांगीकार्या। अन्यथाधात्वर्थ
स्यैवभावनात्वेयागंभावयेदित्यादिप्रयोगायोगादित्याशयेनधात्वर्थातिरिक्ताप्रयत्नरूपालिङ्वाच्यास्तीत्याहानेनश्लोकेन। अयमर्थः।
येनकारणेनधात्वर्थस्यैवभावनात्वेयागंभावयेदित्यादिप्रयोगायोगः "भावनैवप्रयत्नात्मासवाख्यातस्यगोचर"इत्यादिवाक्यविरो

उत्पत्तिरपिचसत्तायोगएव। अस्तिचसत्तार्थस्यापिभवतेः"तेनभूतिषुकर्तृत्वंप्रतिपन्नस्यवस्तुनः।प्रयो
जकक्रियामाहुर्भावनांभावनाविद्"इत्यादावुत्पत्तौप्रयोगः। विद्लृलाभइतिवाधातुः । तथाचविद्येत

धश्च तेन कारणेन भूतिषु भवनेषुउत्पत्तिषु कर्तृत्वं प्रतिपन्नस्य प्राप्तस्य भवतःउत्पद्यमानस्येतियावत्। वस्तुनो यागादेः प्रयोजक
क्रियां उत्पत्त्यनुकूलव्यापारंप्रयत्नरूपं भावनास्वरूपविदःपरीक्षकाः लिङ्वाच्यांभावनांआहुरित्यर्थः। तथाचयजेतेत्यस्ययागंभावये
त्यागविषयकंयत्नंकुर्यादित्यर्थःपर्यवस्यतीतिज्ञातव्यं । एवंचात्रवार्तिकेउत्पद्यमानस्येतिवक्तव्येभूतिषुकर्तृत्वंप्रतिपन्नस्येतिप्रयोगा
द्भवतेरुत्पत्तौप्रयोगोवगम्यतइत्यर्थः। तथाचतन्न्यायेनविदेरुत्पत्तौप्रयोगोयुक्तइतिभावः। प्रकारांतरेणविद्येतेत्यस्य उत्पद्येतेतिव्या ॥ २८६ ॥
ख्यानमुपपादयति॥ विद्लृलाभइति ॥ लाभार्थकत्वेप्युत्पत्तिरर्थतयाकथमागतेत्यतआह ॥ उत्पत्तिरपीति ॥ पराभिमतार्थेबा

SGDF
Sri Gargeshwari Digital Foundation

धकमाह ॥ अस्तित्वेति ॥ विद्येतेत्यस्येतिशेषः॥ व्याप्त्यभावादिति ॥ गगनादौव्यभिचारादितिभाव । ननुनिवृत्तिप्रयोज कत्वेनोक्तस्यास्तित्वहेतोःश्रौतत्वेनतत्रनव्याप्त्यपेक्षेत्यतोमीमांसाग्रंथविरोधइत्याह ॥ अतएवेति ॥ श्रौतस्यापिहेतोर्व्याप्त्यभावे आभासत्वमेवभवतियतोऽतएवेत्यर्थः ॥ नह्यत्रानूयाजाइति ॥ अस्त्यत्रमीमांसासंप्रदायविशेषः । आतिथ्येष्टिर्नामकाचिदि ष्टिःउपभृन्नामकेष्टिप्रकृतिकाऽस्ति । तत्रचोपभृन्नामकेष्टौप्रयाजानुयाजसंज्ञकौयागौवर्तेते । तथा“अष्टावुपभृतिगृह्णाती”तिहो मास्तंस्रुवेस्रुचापात्रस्थमाज्यंअष्टवारंग्रहीतव्यमितिविहितं । एवंच“प्रकृतिवद्विकृतिःकर्तव्ये”तिन्यायेनआतिथ्येष्टावपित्वरांगव

लभ्येतउत्पद्येतेत्यर्थः। उत्पत्तिरपिहिस्वात्मनोलाभएव। अस्तित्वार्थत्वेतुयद्यदस्तितत्तन्निवर्त तइतिव्याप्त्यभावात्श्रौतस्तर्कआभासःस्यात्। अतएव“नह्यत्रानूयाजा”इतिश्रौतहेतौराण केव्याप्तिरुक्ता। ननूपाधिकृतंनचेत्किंतर्हिस्वतंत्रं नेत्याह । मायामात्रमीश्वरेच्छाधीनं माये तीश्वरेच्छोच्यतइतिवक्ष्यमाणत्वात्। विष्णोरिच्छावशत्वात्तुमायामात्र”मित्यादिस्मृतेश्च ।

दष्टगृहीताज्यत्वंप्राप्तं तत्रातिथ्येष्टाविदमाम्नायते“चतुर्गृहीतान्याज्यानिभवंति। नह्यत्रानुयाजान्यजन्भवती”ति । तथाचतु र्गृहीतान्याज्यानिभवंतिनह्यत्रानूयाजाइज्यंतइति । एवंचात्रनह्यत्रेतिहेतोरेवोक्त्याव्याप्तेरनुक्तत्वात्आतिथ्येष्टिःचतुर्गृहीताज्यव तीअष्टगृहीताज्यवतीनभवतीतियावत्। अनूयाजशून्यत्वात् । यत्रानुयाजाभावस्तत्राष्टगृहीताज्यवत्त्वाभावइतिश्रौतहेतोर्व्या प्तिः। राणकेशाबरभाष्यटीकायामुक्तेत्यर्थः। अन्यथातदुपपादनंव्यर्थंस्यादितिभावः। अर्थानुवादोयं वाक्यंतूदाहृतं । द्वितीयांत

मित्येतत्द्वितीयवाक्यादर्शनमूलकमितिज्ञातव्यं । मायामात्रमित्येतदवतारयति ॥ नन्विति ॥ पूर्वत्रेति ॥ प्रपंचइतिश्लोकापेक्षयापूर्वंमांडूकइत्यर्थः । इतोपिनमायाकल्पितत्वंमायामात्रशब्दार्थइत्याह ॥ प्रभवइति ॥ उत्तरत्रेति ॥ "कल्पितोयदिकेनचि"दित्यस्यकल्पितत्वनिराकरणपरतयाव्याख्यास्यमानत्वात्तद्विरोधइत्यर्थः ॥ सत्त्वोक्तेरिति ॥ सतांसत्त्ववतांसर्वभवानामि

पूर्वत्र "स्वप्नमायासरूपेति" "सृष्टिरन्यैर्विकल्पिते" त्यैंद्रजालिकत्वंमतांतरत्वेनोक्त्वा "इच्छामात्रंप्रभोस्सृष्टि"रितीश्वरेच्छाधीनत्वस्यस्वमतत्वेनोक्तेश्च । "प्रभवस्सर्वभावानांसतामितिविनिश्चय"इति पूर्वत्र "कल्पितोयदिकेनचि"दित्युत्तरत्रचसत्त्वोक्तेश्च । निवर्तेतेतितर्कस्यविपर्ययपर्यवसानलब्धानिवर्त्यत्वाविरुद्धार्थस्यैवेहवक्तव्यत्वाच्च तर्ह्यद्वैतस्सर्वभावानामितिश्रुतमद्वैतंकथमित्यतआह ॥ अद्वैतंपरमार्थतइति ॥ ल्यब्लोपनिमित्तापंचमी । *परमंस्वतंत्रमर्थमपेक्ष्यतत् । "स्वतंत्रंपरमार्थाख्य"

तिसर्वभावानांसत्त्वोक्तेरित्यर्थः ॥ अविरुद्धार्थस्येति ॥ सचाविरुद्धोऽर्थईश्वरेच्छाधीनत्वरूपएवनमायाकल्पितत्वरूपः । मायाकल्पितत्वमायारूपमात्रत्वस्यनिवर्त्यत्वनियतत्वेनानिवर्त्यत्वविरुद्धत्वादितिभावः ॥ इहेति ॥ द्वितीयार्धेमायामात्रशब्देनेत्यर्थः ॥ ल्यब्लोपेति ॥ ल्यब्लोपेकर्मण्यधिकरणेचपंचमीवाच्येतिवार्तिकादित्यर्थः । तदुदाहरणंतुप्रासादात्प्रेक्षतेआसनात्प्रेक्षतइति प्रासादमधिरुह्यप्रेक्षतेआसनेउपविश्यप्रेक्षतइतिततःप्रतीतेः ॥ तद्वत्अत्रापिकर्मणिपञ्चमीतिभावः ॥* (अत्रपातः)…. …. ….

* एतदनंतरंकेषांचिद्ग्रंगानांटिप्पणीनोपलभ्यते ।

SGDF
Sri Gargeshwari Digital Foundation

मितिस्मृतेः । परिभाषायाश्चकार्यार्थत्वेन"आणद्या"इत्यादाविवासतिबाधे"कृत्रिमाकृत्रिमयोःकृत्रि मेकार्यसंप्रत्यय"इतिन्यायेनपारिभाषिकस्यैवग्राह्यत्वात् । यववराहाद्यधिकरणन्यायेनशास्त्रेशास्त्रीयार्थस्यैवग्राह्यत्वाच्च । किंचास्तिस्वतंत्रेऽर्थेपिपरमत्वं । नचतात्त्विकेपिकॢप्तावयवशक्त्यैवकाल्पनिकादुत्तमार्थत्वेनैवपरमार्थशब्दसंभवेसमुदायशक्तिकल्पनायुक्ता । अतएवप्रोक्षण्यधिकरणेप्रोक्षणीशब्दस्यजलेयोगएव नतुरूढिरित्युक्तं । उक्तंचवार्तिके । "भवेतांयदिवृक्षस्यवाजिकर्णौकथंचन । अदृष्टांसमुदायस्यकश्शक्तिंजातुकल्पयेदि"ति ॥ स्वतंत्रएवचपरमत्वंमुख्यं । नचमुख्येसंभवत्यमुख्यंयुक्तं । परमार्थशब्दस्यतात्त्विकेयोगरूढ्यंगीकारेपिमानांतरैःपूर्वोत्तरवाक्यैश्चाविरोधाययोगेनस्वतंत्रपरत्वमेवयुक्तं । तथाचसर्वभावानांमध्येऽयमद्वितीयइत्युक्तेस्वातंत्र्यमेवसिद्ध्यतिनतुसर्वभावासत्त्वमित्यर्थः । केचित्तु "अनाशीपरमार्थःस्यादि"तिवचनादद्वैतंपरमार्थतइत्यस्याद्वितीयंब्रह्माविनाशीत्यर्थइत्याहुः । एवंभेदस्योपाधिकृतत्वंनिरस्यकल्पितत्वंनिरस्यति॥ विकल्पइति ॥ तर्कत्वान्नचनिवर्ततेतस्मान्नकल्पितइतिविपर्ययेपर्यवसातव्यं । तत्वेअज्ञातेतुद्वैतंनविद्यतइत्यर्थः । श्लोकयोरतर्करूपत्वेयदिशब्दद्वयंलिङ्प्रत्ययचतुष्टयंचव्यर्थंस्यात् । तदुक्तं । "इत्यत्रयदिशब्दौचनिवर्तेतेतिचद्वयं । विश्वस्यसत्यतामाहुःविद्येतोत्पत्तिमेवचे"ति । स्पष्टीकृतश्चायमर्थःश्रुत्यंतरे । "सोयंसत्यो"ह्यनादिश्चसादिश्चेन्नाशमाप्नुयात् ।

SGDF
Sri Gargeshwari Digital Foundation

नचनाशंप्रयात्येषःनचासौभ्रांतिकल्पितः। कल्पितश्चेन्निवर्तेतनचासौविनिवर्तते । द्वैतंनविद्यतइ
तितस्माद्ज्ञानिनांमतमि"ति । केचित्त्वेकस्मिन्नेवात्मानिदेहभेदेनदेवमनुष्यत्वादिरूपप्रपंचमिथ्या
त्वपरेयंश्रुतिरित्याहुः ॥ ७ ॥ मायामात्रमिदमितिश्रुत्यर्थः ॥ ३५ ॥ ७ ॥ यत्तुतत्वप्रदीपिकायां"स
त्यंज्ञानमनंत"मित्यनंतशब्दस्तत्रमानमित्युक्तं। तन्न। अंतशब्दोहिपरिच्छेदेव्युत्पन्नः। नतुपरिच्छि
न्ने। तथाचाभेदस्यापरिच्छेदरूपत्वेपियथादेशाद्यपरिच्छेदाभिप्रायेणाकाशोनंतइत्युक्तेदेशादेराका
शतुल्यतयासत्त्वेसत्येवतदपरिच्छेदमात्रंसिध्यति नतुदेशादेर्मिथ्यात्वं तथेहापिवस्तुनोघटादेर्जी
वचैतन्यवद्ब्रह्मतुल्यतयासत्त्वेसत्येव (प्रतीयमानभेदत्यागेन) "विरुद्धांशत्यागेन"ब्रह्मण्यभेदरूपं
वस्त्वपरिच्छेदमात्रंसिध्येत्। नतुवस्तुनोमिथ्यात्वं। जीवस्वरूपंसत्यंविश्वंतुमिथ्येतिविभागस्त्वद्या
प्यसिद्धः। वस्तुतस्त्वभेदोनापरिच्छेदः। परिच्छिन्नाद्भेदाभावेअपरिच्छिन्नत्वायोगात्। कालाप
रिच्छिन्नेपिपरमाण्वादौदेशपरिच्छेदेनपरिच्छिन्नत्वबुद्धिवत्उभयापरिच्छिन्नेगगनादौभेदमात्रेणप
रिच्छिन्नत्वबुद्धेरभावाच। अनंतपदेनैवपरिच्छिन्नाद्व्यावृत्तेस्त्वयैवोक्तत्वाच्च भिन्नइत्यर्थेपरिच्छिन्न
इत्यप्रयोगाच। तस्माद्देशकालगुणापरिच्छेदएवानंतशब्दार्थः ॥ ७ ॥ अनंतमितिश्रुत्यर्थः ॥ ३६॥ "इं
द्रोमायाभिःपुरुरूपईयत" इत्यत्रापीश्वरस्यविचित्रशक्तिभिर्मत्स्याद्यनेकरूपत्वमेवोच्यते । नत्वज्ञा

SGDF
Sri Gargeshwari Digital Foundation

नेनघटादिरूपत्वं। “रूपंरूपंप्रतिरूपोबभूवे”तिपूर्वोक्तानांजीवाख्यप्रातिबिंबानि प्रतिबिंबभूतभगवद्रू
पाणामेवेहरूपशब्देनप्रत्यभिज्ञानात् उत्तरत्रच “अयंवैहरयोयंवैदशचसहस्राणिचबहूनिचानंतानि
चे”तिहरिशब्दवाच्यविष्णुरूपाणांदशत्वादिनाबहुत्वोक्तेः। “तदेतद्ब्रह्मापूर्वमनपर”मित्यादिनाते
षांरूपाणांब्रह्मत्वोक्तेश्च। चिन्मात्रस्यैवनानारूपप्रपंचाधिष्ठानत्वेनपरमैश्वर्यवाचींद्रशब्दास्वारस्याच्च।
“मायांतुप्रकृतिंविद्यादि”त्यस्यापिमाययासन्निरुद्धइतिपूर्वोक्तायामायासाप्रकृतिः त्रिगुणात्मकंप्रधा
नमित्यर्थः। नतुयाप्रकृतिर्जगदुपादानंसामायामिथ्येति पूर्वनिर्दिष्टस्यमायाशब्दार्थस्यबुभुत्सितत्वा
त् प्राथम्येनमायायाएवोद्देश्यत्वाच्च। प्रकृतिशब्दस्यश्रुतिषुप्रधानेप्रसिद्धत्वाच्च। मायाशब्दस्यसत्ये
पिप्रयोगाच्च ॥ ७॥ इंद्रोमायाभिरित्यादिश्रुत्यर्थः ॥ ३७ ॥ यत्तुकौमुद्याम् “अतोन्यदार्त”मितिवाक्यं
तत्रमानमित्युक्तं। तत्त्वतितुच्छं। अत्रांतर्यामिणःप्रकृतत्वादेतच्छब्दस्यप्रकृतपरत्वात्। अन्यश
ब्दस्यच “एतद्ब्राह्मणादन्यमानयसमानमितरच्छयेनेने” त्यादाविवप्रकृतसमानजातीयान्यपरत्वा
त् ब्रह्मणोन्यज्जीवजातमार्तंदुःखीतिजीवभेदस्यैवोक्ते र्नहिजीवादन्यस्यार्तिः ॥ ७ ॥ अतोन्यदार्त
मितिश्रुत्यर्थः ॥ ३८ ॥ पुराणादिषुक्वचित्जगतोसत्वोक्तिरसाधुत्वात् “नाऽसत्पुरुषमाश्रये” दि
त्यादिवत्। “सद्भावेसाधुभावेचसदित्येतत्प्रयुज्यत” इति। “अश्रद्धयाहुतंदत्तंतपस्तसंकृतंचयत्।

SGDF
Sri Gargeshwari Digital Foundation

असदित्युच्यतेपार्थनचतत्प्रेत्यनोइहे" तिचगीतोक्तेः "सच्छब्दःसाधुवाचक" इतिविष्णुपुराणोक्ते
श्च । अस्वातंत्र्याद्वा "सत्त्वंस्वातंत्र्यमुद्दिष्टंनचकृष्णेनचापरे । अस्वातंत्र्यात्तदन्येषामसत्त्वंविद्धिभा
रते" तिभारतोक्तेः । अन्यथाअत्यंतासत्त्वापातात् अवस्तुत्वोक्तिः । अपारमार्थिकत्वोक्तिश्च परि
णामित्वाद्विनाशित्वाच्च "यत्तुकालांतरेणापिनान्यसंज्ञामुपैतिवै । परिणामादिसंभूतांतद्वस्तुनृपत
च्चकिं । अनाशीपरमार्थश्चप्राज्ञैरभ्युपगम्यते" इतिविष्णुपुराणोक्तेः । मिथ्यात्वोक्तिस्तुवृथात्वात्
"मिथ्यैषव्यवसायस्त"इत्यादिवत्सदोषत्वाद्वा । मिथ्योपपदात्कृञोभ्यासइतिसूत्रेवृत्तौपदंमिथ्याका
रयतेइत्युदाहृत्यस्वरादिदुष्टमसकृदुच्चारयतीत्यर्थइत्युक्तत्वात् न्यासेपदमंजर्यांच एतेनमिथ्याशब्द
स्यार्थमाचष्टइत्युक्तत्वात् । अतात्विकत्वोक्तिस्तुविकारित्वात् । "तद्वदेवास्थितंयत्तुतात्विकंतत्प्रच
क्षत" इतिकौर्मोक्तेः । अविद्यमानत्वोक्तिस्तुजीवसंबंधित्वेनाविद्यमानत्वात् । "अविद्यमानंजीव
स्यप्रतिभातितदीयवदि" तिस्कांदोक्तेः स्वप्नादिसाम्योक्तिस्त्वनित्यत्वादेः "अनित्यत्वविकारित्वपा
रतंत्र्यादिरूपतः । स्वप्नादिसाम्यंजगतोनतुबोधनिवर्त्यते" तिवचनात् । मायामयत्वोक्तिस्तुप्राकृत
त्वात् । "मायांतुप्रकृतिंविद्या" दितिश्रुतेः । "त्रिगुणाप्रकृतिर्मायातज्जत्वाद्विश्वमीदृशं । अनाद्यनं
तकालेषुमायेत्याहुर्विपश्चित" इतिस्मृतेश्च । अन्यथा "स्वप्नमायासरूपेतिसृष्टिरन्यैर्विकल्पिते" त्या

दिश्रुतिभि "र्नमायेत्यवधार्यता" मितिस्मृतिभि "र्वैधर्म्याच्चनस्वप्नादिवदि" तिसूत्रैस्तत्रैवपूर्वोत्तर
वाक्यैश्चविरोधात् ॥ ७ ॥ जगदसत्त्वादिवाचिपुराणार्थः ॥ ३९ ॥ नापिज्ञाननिवर्त्यत्वान्यथानुपप
त्तिस्तत्रमानं । नहिज्ञानमज्ञानस्यैवमिथ्याभूतस्यैववानिवर्तकमितिनियमः । ज्ञानमात्रेणज्ञानसमा
नविषयकाज्ञानानुपादानकस्यसत्यस्यतत्प्रागभावस्येश्वरज्ञानेनघटादेरुत्तरज्ञानेनपूर्वज्ञानस्यप्रत्यभि
ज्ञानादिनासंस्कारस्यविषयेदोषदर्शनेनरागादेःसुहृद्दर्शनेनदुःखादेर्गरुडध्यानादिनाविषादेः अग्नि
चित्कपिलादिदर्शनेनदुरितादेःसेत्वादिदर्शनेनब्रह्महत्यादेश्चनिवृत्तेः । ननुसेत्वादिदर्शनमज्ञाननिवृ
त्तिद्वारेणादृष्टद्वारेणवातन्निवर्तकं साक्षान्निवर्तकत्वेपिनज्ञानत्वेन किंतुविहितक्रियात्वेनेतिचेत् स
मंप्रकृतेपि श्रुतदर्शनत्यागेनतत्प्राप्तिस्तज्जन्यादृष्टंवानिवर्तकंचेदि हापिब्रह्मध्यानंतज्जन्यादृष्टंवानि
वर्तकमस्तु । "तस्याभिध्यानादि" त्यादिश्रुतेः । ननुसेतुदर्शनमात्रंननिवर्तकं । किंतुदूरागमनादि
विशिष्टमितिचेदिहापिब्रह्मज्ञानमात्रंननिवर्तकं किंतुनियमाधीतवेदांतश्रवणादिविशिष्टं भाषाप्र
बंधजन्येनानधीतवेदांतजन्येनअधीतवेदांतजन्येनाप्यसंभावनाविपरीतभावनाप्रबलारब्धकर्मादि
नाप्रतिबद्धेनतेनतदनिवृत्तेः अन्यथावेदांताध्ययनश्रवणादिनियमस्यासंभावनादिनिवर्तकमननादे
श्चवैयर्थ्यंस्यात् । प्रारब्धकर्मवशाज्जीवन्मुक्तस्यसंसारानुवृत्तिश्चनस्यात् । किंचलोकेअदृष्टत्वेपिवि

SGDF
Sri Gangeshwari Digital Foundation

पक्षेबाधकाभावात्श्रुतिबलात्सत्यस्यापिबंधस्यनिवृत्तिःकिंनस्यात् अन्यथालोकेअधिष्ठानतत्वेसा
क्षात्कृतेकर्मवशादपिनिरुपाधिकभ्रमानुवृत्तेर्जीवन्मुक्तिदशायांकर्मवशादनुवृत्तस्यजगतःसत्यतैव
स्यात्। अपिचलोकेकल्पितस्यनित्यनैमित्तिककर्मसाध्यांतःकरणशुद्ध्यजन्यज्ञाननिवर्त्यत्वनियमात्त
ज्जन्यज्ञाननिवर्त्यस्यप्रपंचस्यतज्जन्यदेवतादर्शननिवर्त्यदुरितवत्सत्यतैवस्यात् । अपिचकल्पितेसं
स्कारनिरपेक्षज्ञाननिवर्त्यतायाःसंस्कारसापेक्षगरुडभ्रमरादिज्ञानसंताननिवर्त्येविषकीटत्वादौचस
त्यतायादर्शनेनश्रवणादिजनितसंस्कारसापेक्षज्ञाननिवर्त्यस्यप्रपंचस्यसत्यतैवस्यात् । किंचलोकेनि
वृत्तिनिवर्त्ययोःसमानसत्ताकत्वनियमादज्ञाननिवृत्तिवदज्ञानमपितात्विकंस्यात् । प्रातिभासिकस्य
रूप्यस्यप्रध्वंसोव्यावहारिकश्चेत्तयोर्विरोधोनस्यात्। व्यावहारिकप्रातिभासिकयोःशुक्तिरूप्यभेदा
भेदयोरिवेत्युक्तं। किंचाज्ञानाज्ञेययोर्दोषाधिष्ठानयोश्चसमानसत्ताकत्वनियमात् । ब्रह्मवदज्ञानम
पिसत्यंस्यात् । किंचयथानादिभावरूपस्यान्यत्रादृष्टापिनिवृत्तिःश्रुतिबलात्तथासत्यस्यापिकिंन
स्यात्। किंचज्ञानमज्ञानस्यैवनिवर्तकमित्यत्रज्ञानंनामयदिज्ञप्तिस्तदाअसिद्धिः । त्वन्मतेज्ञप्तिरूपस्य
चैतन्यस्यबंधानिवर्तकत्वात्। बंधनिवर्तिकायाश्चवृत्तेरज्ञप्तित्वात् वृत्तिप्रतिबिंबितचैतन्यंज्ञप्तिः सा
चतन्निवर्तिकेतिचेत् न।मुक्तावानंदज्ञप्त्यभावापातात् साक्षिविषयसुखादावज्ञानापाताच्च । एतेन

॥ २९० ॥

SGDF
Sri Gargeshwari Digital Foundation

येनयत्प्रकाशतेतत्रसाज्ञप्तिः । एवंचघटादौवृत्तिप्रतिबिंबितचैतन्यंज्ञप्तिः सुखादौतुचैतन्यमात्रमि
तिनिरस्तं । मोक्षेआनंदप्रकाशस्यस्वरूपचैतन्यस्यतज्ज्ञप्तिरूपत्वेनतेनैवाज्ञानस्यानित्यनिवृत्त्यापातात्
ज्ञानकरणंचेन्नव्याप्तिः । शुक्त्यज्ञानस्यरूप्यस्यवाज्ञानकरणेननिवृत्तेरसंमतेः । नजानामीत्यज्ञानस्यज्ञ
प्तिविरोधित्वेनैवप्रतीतेश्च । एवमज्ञानंनामयदिज्ञानविरोधिभावरूपंसत्यंनतर्हिविश्वमिथ्यात्वसि
द्धिः । यदितुमिथ्या तर्हिनव्याप्तिः । शुक्तिज्ञाननिवर्त्यस्याज्ञानस्यशुक्तिवत्सत्यत्वात् । नहिबाधज्ञा
नेरूप्यमिथ्यात्ववत्शुक्त्यज्ञानमिथ्यात्वंभाति । प्रत्युतैतावंतंकालंशुक्त्यज्ञानमासीदितिसत्वमे
व । एवंयदिनिवृत्तिर्नामविनाशः तदाविरोधः । लोकेज्ञाननाश्येअज्ञानादौसत्यतायाएवमिथ्याभूते
रूप्यादौचज्ञाननाश्यत्वाभावस्यैवानुभवात् । नहिरूप्यंज्ञानेननष्टमितिबाधोस्ति यदितुनिवृत्तिर्नामप्र
तिपन्नोपाधौनिषेधस्तदासिद्धिः । "क्षीयंतेचाऽस्यकर्माणितस्मिन्दृष्टे" इत्यादिश्रुत्या "ज्ञानाग्निःसर्व
कर्माणिभस्मसात्कुरुतेतथे" त्यादिस्मृत्या "तदधिगमउत्तरपूर्वाघयोरश्लेषविनाशौतद्व्यपदेशादि"
त्यादिसूत्रैश्चबंधनाशस्यैवोक्तेः । अत्रयदुक्तंविवरणे ज्ञानेनसत्यस्यानिवृत्तिश्चेत्किंविषयेणसंबंधस्य
निवृत्तिः किंवाश्रयेण यद्वोभाभ्यां । नाद्यः । चित्रावयविनिनीलविशिष्टद्रव्यज्ञानेनतद्गतपीतिमा
देरनिवृत्तेः । नद्वितीयः । आत्मज्ञानेनतद्गतधर्माधर्माद्यनिवृत्तेः । नतृतीयः । शरीरज्ञानेनदेहात्मसं

SGDF
Sri Gargeshwari Digital Foundation

बंधानिवृत्तेरिति । तत्रब्रूमः । ज्ञानेनाज्ञानस्यारोपितस्यवाकस्यनिवृत्तिः । नतावद्विषयेणसंबंधस्य चैत्रनिष्ठमैत्रविषयकज्ञानेनमैत्रनिष्ठघटविषयकाज्ञानस्य इदमंशज्ञानेनतत्रारोपितरूप्यस्यचाप्यनिवृत्तेः । नाप्याश्रयेणसंबंधस्य चैत्रस्यघटज्ञानेनतदीयपटाज्ञानस्यात्मन्यारोपितदेहतादात्म्यस्यचानिवृत्तेः । नाप्युभाभ्यांसंबंधस्य । चैत्रनिष्ठमैत्रविषयकज्ञानेनमैत्रनिष्ठचैत्रविषयकाज्ञानस्यआत्मनिष्ठदेहविषयकज्ञानेनदेहात्मतादात्म्यादेश्चानिवृत्तेः । ननुज्ञानेनसमानाश्रयविषयकस्याज्ञानस्यनिवृत्ति र्निवृत्तेचाज्ञानेतत्कार्यंस्वयमेवनिवर्ततइतिचेन्न । चैत्रस्यशंखेश्वेतत्वानुमित्यातदीयश्वेतत्वविषयकाज्ञानस्यारोपितपीतत्वस्यवात्वन्मतेपिबिंबप्रतिबिंबयोरैक्यसाक्षात्कारेणैक्याज्ञानस्यारोपितभेदस्यवाअनिवृत्तेः । श्वेतत्वानुमित्यादिनातदज्ञाननिवृत्तौअज्ञानकार्यस्यारोपितपीतत्वादेरनुवृत्तिर्नस्यात् । भ्रमस्यसोपाधिकत्वेपिउपादाननिवृत्तौकार्यानुवृत्त्ययोगात् । किंचचैत्रस्येदानींतनेनघटसाक्षात्कारेणभविष्यद्घटसाक्षात्कारनिवर्त्याविद्यानिवृत्त्यापत्त्यासकृत्साक्षात्कृतस्यघटादेःसदाआपरोक्ष्यंस्यात् । नन्वज्ञानस्यैकत्वात् जडानावरकत्वाच्चघटादिज्ञानमज्ञाननिवर्तकमेवनेतिचेत् तर्हिबंधस्यज्ञाननिवर्त्यत्वेनदृष्टानुसारादज्ञानमयत्वमितिनस्यात् । ननुज्ञाननिवर्त्यस्यभ्रांत्यादेर्ज्ञानविरोधित्वंदृष्टमितिचेत् तर्हिबंधस्यदृष्टानुसारात्ज्ञानविरोधित्वंकल्प्यतां । नभावरूपाज्ञानत्वं नवामिथ्यात्वं । नहिभ्रांतिःस्वरूपेणमिथ्येत्यविद्यावादेवक्ष्यते । मिथ्याभूतस्यचरूप्यस्यज्ञाननिवर्त्यत्वमसंमतमित्युक्तं । अपिचचरमसाक्षात्कारेणजीवन्मुक्तिदशानुवृत्तस्याप्यविद्यालेशस्यवाऽज्ञानसंस्कारस्यवाऽऽरब्धकर्मादेर्वानिवृत्तिःकिंनस्यात् । ज्ञानस्यप्रागभावनिवर्तनइवाज्ञाननिवर्तनेप्यन्यानपेक्षत्वात् । तस्मात्त्वयाप्यज्ञानस्यारोपितस्यवाज्ञानविरोधिनएवज्ञानेननिवृत्तिर्विरोधश्चकार्योन्नेयइतिवाच्यं । सममेतन्ममापि । वस्तुतस्त्वीश्वरप्रसादादेवबंधनिवृत्तिः । "यस्यप्रसादात्परमार्तिरूपादस्मात्संसारान्मुच्यतेनापरेणे" त्यादिश्रुतेः "मत्प्रसादात्तरिष्यसी" त्यादिस्मृतेश्च । ज्ञानंतुप्रसादहेतुः । तदुक्तं । "यथादृष्टथाप्रसन्नःसत्राजाबंधापनोदकृत् । एवंदृष्टःसभगवान्कुर्याद्बंधविभेदन" मिति । "दृष्ट्वैवतंमुच्यत" इत्यवधारणमयोगव्यवच्छेदपरं । मोक्षहेतुप्रसादेन्ययोगव्यवच्छेदपरंवा । उक्तंहिविष्णुपुराणे । "एवंज्ञातेतुभगवाननादिःपुरुषोत्तमः । प्रसीदतिततस्तस्मिन्प्रसन्नेक्लेशसंक्षय" इति ॥ ७ ॥ ज्ञाननिवर्त्यत्वान्यथानुपपत्तिभंगः ॥ ४० ॥ नापि "प्राणावैसत्यंतेषामेषसत्य" इतिश्रुतार्थापत्तिस्तत्रमानं । राज[१]राजः देवदेवः मन्म[३]थमन्मथः "पवित्राणां[४]पवित्रंयोमंगलानांचमंगल" मित्यादौराजत्वदेवत्वादीनामिवप्राणादिसत्यत्वस्यज्ञानाबाध्यत्वेसत्येवापकृष्टत्वमात्रेणतदुपपत्तेः । नापि "सत्यंज्ञान" मित्यादौब्रह्मणःसत्यत्वलक्षणोक्त्यन्यथानुपपत्तिर्मानं । छांदोग्ये "तस्यहवाएत

SGDF
Digital Foundation

स्यब्रह्मणोनामसत्यमितितान्येतानित्रीण्यक्षराणिसत्-ति-यमितितद्यत्सत्तदमृतं अथयत्तितन्मर्त्यं अथयद्यं तेनोभेयच्छती” तिमुक्तामुक्तनियंतृत्वंसत्यत्वमित्युक्तेः। “सत्येप्रतिष्ठितःकृष्णःसत्यमस्मिन्प्रतिष्ठितं। सत्त्वासत्तेचगोविंदस्तस्मात्सत्यःसतांमत” इतिभारतोक्तेश्च । नचरूढ्यर्थश्रौतयोगत्यागः “यदाजिमीयुस्तदाज्यानामाज्यत्व” मित्यादाविवनिरवकाशश्रौतयोगबाधायोगात् । शास्त्रस्थावेतिन्यायेनासतिबाधकेवेदेवैदिकार्थस्यैवग्राह्यत्वाच्च । उक्तंचवार्तिके। “गौणंलाक्षणिकंवापिवाक्यभेदेनवास्वयं । वेदोयमाश्रयत्यर्थंकोनुतंप्रतिकूलयेदि” ति । किंच “विज्ञानमानंदंब्रह्मे” त्यत्र “सैषानंदस्ये” त्यादिश्रुत्युक्तमानुषाद्यानंदव्यावृत्तापरिच्छिन्नानंदत्ववदिहापिअन्यव्यावृत्तमनन्याधीनसत्यत्वंलक्षणमस्तु । नापि “विमुक्तश्चविमुच्यत” इतिश्रुत्याऽर्थापत्तिर्मानं । सज्जनस्यासत्संगादौर्जन्यस्यताम्रद्रवत्वादिवत्सत्यत्वेपि “सज्जनःसज्जनोजात” इतिवत्संसारस्यसत्यत्वेपिअस्वाभाविकत्वेनतदुपपत्तेः । भारते “उभेसत्येक्षत्रियाद्यप्रवृत्तेमोहोमृत्युःसंमतोयंकवीनां । प्रमादंवैमृत्युमहंब्रवीमितथाऽप्रमादादमृतत्वंब्रवीमी” तिसंसारःसत्योप्यज्ञानाधीनइत्युक्तेः । एवमन्यदपियोज्यमितिसत्यमेवजगदिति ॥ ७ ॥ सत्यस्यसत्यइत्यादिश्रुतार्थापत्तिभंगः ॥ ४१ ॥ यच्चबौद्धाभिमतक्षणिकत्वसिद्ध्यर्थमुक्तंविश्वस्यदृष्टिसृष्टिः । चैत्रेसुप्तेतद्देहादिकंतंप्रतिनास्त्येव । जाग्रतोमैत्रस्य

SGDF
Sri Gargeshwari Digital Foundation

तुतद्भ्रांत्याभाति । प्रत्यभिज्ञातुसोयंदीपइत्यादिवत्भ्रांतिरिति तन्न । "षडस्माकमनादय" इतिस्व
वचनेनबौद्धंप्रतिप्रत्यभिज्ञादिनाविश्वस्यस्थायित्वप्रतिपादकविवरणेनचाविरोधात् । दृगन्यस्यसर्वस्य
दृष्टिसृष्टित्वेतत्तत्कार्यस्यप्रतीतिमात्रशरीरत्वेननियततत्तत्कारणाजन्यत्वेश्रुतिषुस्वर्गाद्यर्थंज्योतिष्टो
मादिविधेर्ब्रह्मसाक्षात्कारार्थंश्रवणादिविधेराकाशादेर्वाय्वादिहेतुत्वोक्तेश्चायोगात् । तवापितृप्त्य
र्थंभोजनेपरप्रत्यायनाद्यर्थंशब्दोच्चारणादौचप्रवृत्त्ययोगेनस्वक्रियादिविरोधाच्च । यदितूक्तश्रुत्यादिक
मपिस्वाप्नश्रुत्यादितुल्यमितिनपर्यनुयोज्यं। तर्ह्यद्वैतश्रुतितन्मीमांसादिकमपितथेतिनतेनाद्वैतासिद्धिः
। दृष्टिसृष्टिपक्षेघटादेःज्ञानात्पूर्वमसत्त्वेनप्रतिकर्मव्यवस्थानुपपत्तेश्च । शुक्तीदमंशस्यापिरूप्यवदिदं
रूप्यमितिज्ञानात्प्रागसत्त्वेनसंप्रयोगादिहेतुत्रयजन्यत्वरूपस्याध्यासतटस्थलक्षणस्यसत्यस्यमिथ्या
वस्तुसंभेदावभासत्वरूपस्वरूपलक्षणस्यचायोगाच्च। इदंरूप्यमितिज्ञानकालेशुक्तित्वादेरभावेनाध्या
सस्यतदज्ञानकार्यत्वादिप्रक्रियाविरोधाच्च। इदंरूप्यमितिज्ञानयोर्भिन्नविषयत्वेनबाध्यबाधकभावानु
पपत्तेश्च रूप्यादिबाधस्यापिदृष्टिसृष्टित्वेनतेनरूप्यादेर्मिथ्यात्वासिद्धेश्च सुषुप्तिप्रलयादौजीवब्रह्मवि
भागस्याप्रतीतत्वेनाविद्यमानतयाप्रत्यहंप्रतिप्रलयंचमुक्तस्यपुनरावृत्त्यापाताच्च सुसंप्रतिसंस्कारादेर
प्यभावेनतस्यपुनरुद्बोधायोगाच्च । मोक्षस्यापिदृगन्यत्वेनस्वाप्नमोक्षवद्दृष्टिसृष्टिमात्रत्वापाताच्च चि

SGDF
Sri Gargeshwari Digital Foundation

न्मात्रस्यैवघटादिदृष्टित्वेतस्यसदाप्रतीत्यापत्त्याविशिष्टस्यतत्त्वेवाच्येतस्यापिविशिष्टस्यदृष्टिसृष्टि
त्वेनवस्थादिप्रसंगाच्च। उक्तन्यायेनदोषाज्ञानद्रष्टृदेहेंद्रियादीनामभावेभ्रांत्ययोगेनतेषामपिदृष्टिसृष्टि
त्वेनवस्थापाताच्च घटादेर्दृष्टिसृष्टिरित्यस्यापिदृष्टिसृष्टित्वेनघटादेरदृष्टिसृष्ट्यापाताच्च प्रत्यभिज्ञावि
रोधाच्च। दीपादौपरिमाणादिभेदकस्येवेहबाधकस्याभावात् तदभावेपिभ्रांतित्वेचघटादेरप्येकस्मिन्न
पिक्षणेभेदस्यात्मनोपिप्रतिक्षणंभेदस्यचप्रसंगात् सोयंदेवदत्तइत्यादिदृष्टांतेनतत्त्वमस्यादौजहदज
हल्लक्षणयैक्यपरत्वोक्त्ययोगाच्च। अत्रभेदस्यापिदृष्टिसृष्टित्वेनतज्ज्ञानस्यबाधकत्वायोगाच्च। "ध्रु
वाद्यौर्ध्रुवापृथिवीध्रुवासःपर्वताइमे। ध्रुवंविश्वमिदंजगदि"त्यादिश्रुतिविरोधाच्च भिन्नत्वेनप्रतीतस्यघ
टपटादेरभेदःअभिन्नत्वेनप्रतीतस्यघटस्यप्रतिक्षणंभेदइतिदृष्टहानादृष्टकल्पनापाताच्च। तस्मात्"नि
र्बाधप्रत्यभिज्ञानाद्ध्रुवंविश्वमितिश्रुतेः। स्वक्रियादिविरोधाच्चदृष्टिसृष्टिर्नयुज्यते" ॥ अस्मादात्मनः
सर्वेप्राणाःसर्वेलोकाःसर्वेवेदाःसर्वाणिभूतानिव्युच्चरंती"तिश्रुतावपिपूर्ववाक्ये "यत्रैषएतत्सुप्तोभू
दि"तिसुप्ताधारत्वेनोक्तस्यब्रह्मणःसर्वस्रष्टृतोच्यते। नतुसुप्तोत्थिताज्जीवात्प्राणादिसृष्टिः येनेयंदृष्टि
सृष्टौमानंस्यात् अन्यथावाक्यशेषे"नाड्योद्वासप्ततिसहस्राणिहृदयात्पुरीतत"मित्यादिनासुषुप्तौना
ड्याद्युक्तिः "यथोर्णनाभिः" "यथाऽग्नेःक्षुद्राविष्फुलिंगा"इत्याद्युक्तिः अत्रापिवाक्ये"सर्वेलोकाइत्या

द्युक्तिश्चायुक्तास्यात् नहिदृष्टिसृष्टिपक्षेसुषुप्तौनाड्यादिकमूर्णनाभ्यग्न्यादितःतंतुविष्फुलिंगजन्मवा
सुप्तोत्थितस्यसर्वलोकादिदृष्टिर्वास्ति नचोर्णनाभितंतवग्निविष्फुलिंगदृष्टांतोदृष्टिसृष्ट्यनुगुणइतिनक
ल्पितंजगदिति ॥ ७ ॥ दृष्टिसृष्टिभंगः ॥ ४२ ॥ यच्चेदमुच्यते"एकमेवचशरीरंसजीवमन्यानितुस्वा
प्नशरीरवन्निर्जीवानि कृत्स्नंचजगत्तदज्ञानकल्पितं बद्धमुक्तव्यवस्थातुनास्त्येव जीवस्यैकत्वात् गुरु
शिष्यादिव्यवस्थातुयावदविद्यंस्वप्नवद्युक्ता निवृत्तायांतुतस्यांनास्त्येवेति"। तन्न। तस्मिन्नेकस्मिन्जी
वेसुप्तेजगदप्रतीत्यापातात् दृष्टिसृष्टिपक्षेतस्यसुषुप्तावुद्बोधकस्यसंस्कारादेरप्यभावेनपुनरुद्बोधायो
गाच्च ममकल्पकत्वेतवमोक्षार्थंप्रवृत्त्ययोगेनतवैवकल्पकत्वेवाच्येस्मदादिबोधार्थंतवशब्दप्रयोग
रूपस्वक्रियाविरोधाच्च परमार्थतोमयानोच्यतइतिचेन्न। व्यवहारतउक्तावपिमूकोहमित्यादाविवस्व
क्रियाविरोधात्। नचस्वाप्नपुरुषवत्त्वत्कल्पितत्वादहंनपर्यनुयोज्यइतिवाच्यं अपर्यनुयोज्यत्वेनिर्मर्या
दतयाकथानधिकारापातात् सजीवशरीरइवान्यत्रापिप्रतिशरीरमहंदुःखीअहंसंसारीअहमस्वाप्स
मितिसंसाराद्याधारजीवात्मानुभवाच्च नचेयंधीभ्रांतित्वादेवनिर्जीवेष्वेवशरीरेषुयुक्ता तेषामयंदुः
खीत्यादिभ्रांतिविषयत्वेप्यहंदुःखीत्यादिभ्रांत्याधारत्वायोगात्। नहिस्वाप्नादिशरीराणितथाभ्राम्यं
ति। नचेयंधीःसर्वदेहानुगतचिन्मात्रस्यैवनतुजीवस्येतियुक्तं प्रतिबिंबरूपेजीवएवतदौचित्यात्। ननु

SGDF
Digital Foundation

जीवोनब्रह्मप्रतिबिंबादिः किंतुकौंतेयस्यैवराधेयत्ववत्ब्रह्मणएवजीवत्वं तच्चसर्वदेहगतमितिचेत्कथं
तर्हिशरीरांतराणांनिर्जीवत्वं वक्ष्यतेचकल्पितेनापिसंसारेणकदाप्यस्पृष्टचैतन्याभावेनित्यमुक्तत्वश्रु
तिविरोधः नापीयंधीः कल्पकजीवकल्पितजीवांतरस्यकल्पितस्यभ्रांत्याधारत्वायोगात्।अन्यथाअज्ञा
नभ्रांतिसम्यग्ज्ञानमोक्षाणामैकाधिकरण्यनियमेनबहुजीववादःस्यात्। कल्पितस्यजीवस्यकल्पकंप्रति
प्रत्यक्त्वायोगाच्च अप्रत्यक्त्वेनभासमानेचप्रत्यक्त्वारोपायोगात्। अन्यस्यचप्रत्यक्त्वेनानुभवितुश्चेत
नस्याभावात् तथानुभवापलापेचतस्याप्येकस्यजीवस्याद्वैतश्रुतेश्चासिद्धेः। ननुचोक्तादोषाएकशरीरै
कजीववादेनत्वनेकशरीरैकजीववादे तस्यसर्वत्रापिसत्त्वादितिचेन्न। तथात्वेननुसंधानेतंत्रस्यव्याव
हारिकजीवभेदस्याप्यभावेनयोगिनोनेकशरीरेष्विवतस्यसर्वशरीरगतदुःखाद्यनुसंधानापातात्। त
स्यशुकादिदेहस्थस्यतत्वज्ञानमोक्षावन्यदेहस्थस्यतुनतावितिबंधमोक्षादिसंकरापाताच्च। तस्यैवतमे
वप्रतिप्रत्यक्त्वपराक्त्वयोरयोगेनमैत्रंप्रतित्वमितिधीविषयस्यचैत्रस्यतमेवप्रत्यहमितिधीविषयत्वा
योगाच्च। किंचश्रुतिषु "अविद्यायामंतरेवर्तमाना" इत्यादावविद्या "रमणीयचरणा" इत्यादौकर्मबंधः
"सतिसंपद्यनविदु" रित्यादौसुषुप्तिः "वेदांतविज्ञानसुनिश्चितार्था" इत्यादौतत्वज्ञानं "परामृता
त्परिमुच्यंतिसर्वे" इत्यादौमुक्तिश्चचेतनधर्मःकथमनेकेषूच्येत। नह्यस्मिन्मतेचेतनबहुत्वंव्यावहारि

SGDF
Sri Gargeshwari Digital Foundation

कमप्यस्ति । नचमुक्तादिबहुत्वंप्राप्तं । येनश्रुतिरतत्परास्यात् किंचैकस्यैवजीवस्येश्वरादि
सर्वकल्पकत्वेजीवस्यकारणत्वंनिषिध्येश्वरस्यकारणत्वविधायकैरविद्यायाश्चिन्मात्राश्रितत्वभंगेव
क्ष्यमाणैःश्रुतिस्मृतिसूत्रैर्विरोधः किंचैवंसर्वज्ञत्वसर्वकर्तृत्वादिश्रुतीनांनिर्विषयत्वंस्यात् चिन्मात्रे
ज्ञत्वस्यैवाभावात् ईश्वरस्यचअयंसर्वज्ञइतिजीवेनकल्पितत्वेप्यहंसर्वज्ञइतिज्ञातृत्वाभावेन "तान्य
हंवेदसर्वाणी" त्याद्ययोगात् । जीवस्यचासार्वज्ञ्यादिनैवानुभवात् । अपिचयःकल्पकोजीवस्त
स्यापिभावितत्वज्ञानमुपदेशसाध्यं "आचार्यवान्पुरुषोवेदे" तिश्रुतेः । नचान्यस्तत्वविद्गुरुरस्ति ।
ननुस्वप्नवत्तत्ववित्त्वेनैवान्योगुरुःकल्पितइतिचेन्न । तत्वविद्गुरुःशिष्यायाद्वैतमुपदिशतीतिभ्रां
तेःकल्पकेजीवेप्रागेवजातत्वेनाद्वैतस्यज्ञाततयातद्वैवमोक्षापातात् तत्त्वविशेषवित्त्वेनगुरुकल्पना
कालएवतत्वस्यज्ञाततयापुनरुपदेशवैयर्थ्याच्च । गुरोःकल्पितत्वस्यापितत्वांतर्गतत्वेनकल्पना
कालएवगुरोःकल्पितत्वस्यानिश्चिततयाततश्श्रवणेप्रवृत्त्ययोगाच्च स्वप्नेतुशब्दविशेषवक्तृत्वेनैवगुरु
कल्पना नतूपदेशसाध्यज्ञानविषयतत्वविशेषवित्त्वेन नचप्रकृतेपितथा "यदेवभगवान्वेदतदेव
मेब्रूही" त्यादिश्रुतेः "उपदेक्ष्यंतितेज्ञानंज्ञानितस्तत्वदर्शिन" इत्यादिस्मृतेश्चायोगात् । किंच "स्वा
ध्यायप्रवचनाभ्यांनप्रमदितव्य" मित्यादिविधिरपिभावितत्वज्ञानंकल्पकंचेतनंप्रत्येव ।नचतस्यशि

SGDF
Sri Gargeshwari Digital Foundation

ष्यः स्वाज्ञानकल्पितइतिजानतस्तन्मोक्षार्थंप्रवचनेप्रवृत्तिर्युक्ता स्वप्नेतुकल्पितत्वाज्ञानात्प्रवृत्तिः ।
नचापरोक्षज्ञानाभावात्प्रवृत्तिः। दिङ्मोहादौपरोक्षज्ञानेनापितत्प्रतिबंधात् । नचसंस्कारवशात्प्र
वृत्तिः। नह्ययंवेगादिवद्बलात्प्रवर्तकःकिंतुतत्वनिश्चयप्रतिबंधद्वारा ततश्चभिक्षाटनादौकथंचित्प्रव
र्ततांनाम अद्वैतंबोधयंस्तुकथंतदनुसंधानहीनःस्यात् । नचायंस्वाप्नगुरुवत्कल्पितत्वादपर्यनुयोज्यः
कल्पकस्यैवगुरुत्वोक्तेः कल्पितत्वेपितत्त्वज्ञानहेतुत्वेनवेदस्यमीमांस्यत्ववत्गुरोरपिपर्यनुयोज्यत्वाच्च
अन्यथाकथासुसदुत्तराप्रतीतावहंत्वत्कल्पितोनपर्यनुयोज्यइत्येवोत्तरंस्यात्। एतेनयावदविद्यंस्वप्न
वद्व्यवस्थेतिनिरस्तं। इहकल्पकएवशिष्यत्वगुरुत्वयोरुक्तत्वेनस्वाप्नवैषम्यात् किंचसकल्पकोजीवइ
दानींनिश्चिताद्वैतो नवा। आद्येइदानींसंशयाद्यभावेनाद्वैतशास्त्रप्रणयनादिव्यर्थंस्यात्। अंत्येत्वद्वैत
शास्त्रंप्रमामूलंनस्यात् अपिचसोमुकइत्यनिश्चितो निश्चितोवा। नाद्यः। बह्वायाससाध्यमोक्षार्थंप्र
वृत्त्ययोगात् । नचाभिसंधिपूर्विकापीयंप्रवृत्तिःकल्पितत्वादपर्यनुयोज्या । कथासुस्वकीयाविरोधा
देरप्यनुद्भाव्यतापातात्। नद्वितीयः। त्वयाजीवन्मुक्तत्वेननिश्चितेष्वद्वैतिषुमृतेष्वपिविश्वभ्रमानुवृ
त्तिदर्शनेनसगुरुश्शिष्योवागुरुत्वेपिचैत्रोमैत्रोवेतिनिश्चेतुमशक्यत्वात् । ननुगुरुशिष्यादिशब्दैःके
नचित्क्रोडीकृतंचैतन्यमुच्यते निरस्तसमस्तभेदंवा। नाद्यः। तस्यमिथ्यात्वेनाकल्पकत्वात्। अंत्येक

थमनिश्चयः तस्यैकत्वादितिचेन्मैवं। भ्रमाधिष्ठानस्यचिन्मात्रस्यैकत्वेपितस्यमुखमात्रस्थानीयस्या
संसारित्वेनाकल्पकत्वात् । तस्यमोक्षार्थंप्रवृत्त्ययोगाच्च कल्पकानांचसंसारिणामनेकेषामुप
लंभेनायंसत्यःसंसारीत्यनिश्चयेनमुमुक्षुप्रवृत्त्ययोगात् । अपिचानादौसंसारेकस्यचित्तत्वज्ञानंमु
क्तिश्चाभून्नवा। आद्येइदानींसंसारोपलब्धिर्नस्यात् जीवांतराभावात्। नांत्यः। संप्रदायाभावेनोत्तर
त्रापितत्वज्ञानासंभवात्। तत्त्ववित्त्वेनकल्पितगुरुसंप्रदायस्यचनिरासात् । तत्त्ववित्त्वेनश्रुत्या
दिसिद्धानांशुकादीनांत्वदभिमतानांगौडपादादीनांचाभूतामुक्तिरन्यस्यभविष्यतीत्याशायोगा
च्च मोक्षशास्त्रप्रामाण्यात्सायुक्तेतिचे देवंयदिशास्त्रेश्रद्धातर्हि "तद्योयोदेवानांप्रत्यबुध्यतसए
वतदभवत्तथर्षीणांतथामनुष्याणांअजोह्येकोजुषमाणोनुशेतेजहात्येनांभुक्तभोगामजोन्यः बह
वोज्ञानतपसापूतामद्भावमागता" इत्यादिश्रुतिस्मृतिप्रामाण्यात्पूर्वमपिकेषांचिन्मुक्तिःकिंन
स्यात्। नहिप्रत्यक्षेणसुखदुःखाद्यनुसंधानाननुसंधानादिलिंगेन "चेतनश्चेतनाना" मित्यादिश्रु
त्या "इदंज्ञानमुपाश्रित्यममसाधर्म्यमागता" इत्यादिस्मृत्याचसिद्धेजीवभेदेबाधकमस्ति "अना
दिमाययासुप्तोयदाजीव" इत्यादिश्रुतावेकवचनंतु "यथानीतिपरोराजे" त्यादिवत् "स्वर्गकामो
यजेते" त्यादिवच्चयुक्तं। अन्यथा "इतिसृष्टौविनिश्चिता" इतिपूर्वेण "सपूज्यःसर्वभूताना" मि

SGDF

....नसंख्याज्ञानाभावविषयकत्वंमंतव्यं । ननुतत्रापिपरोक्षतयाज्ञातेऽपरोक्षज्ञानाभावविषयकत्वेनापिसावकाशत्वशंकापरिहारायशास्त्रार्थमपूर्वंनजानामीत्युदाहर्तव्यं । नित्यपरोक्षेचापूर्वादौअपरोक्षज्ञानप्रसक्तेरेवाभावेननापरोक्षज्ञानाभावविषयकत्व

त्युत्तेरणचजीवभेदवाक्येनविरोधात् । नचाविद्यैक्येनतदुपहितजीवस्यैकत्वेप्यंतःकरणोपहितानामनेकत्वात्बद्धमुक्तव्यवस्थेतिवाच्यं । जीवभावेंतःकरणोपाधेरपितंत्रत्वेबहुजीववादापातात् । अननुगमाच्च । अतंत्रत्वेदेहादिनिवृत्तिवदंतःकरणनिवृत्तेरप्यमुक्तित्वेनोक्तव्यवस्थायोगात् । एतेनैवहिरण्यगर्भएवब्रह्मप्रतिबिंबोमुख्योजीवः । अन्येतुतत्प्रतिबिंबभूताजीवाभासाःसंसारादिभाजइतिनिरस्तं । हिरण्यगर्भमुक्तितःप्राक्स्याप्यमुक्त्यापातात् । अतीतहिरण्यगर्भमुक्तेःश्रुत्यादिसिद्धत्वेनेदानींसंसार्युपलंभायोगाच्च । सादिहिरण्यगर्भप्रतिबिंबस्थस्यसंसारस्यसादित्वापाताच्च । नचातीतकल्पानामानंत्येनैकैकस्मिन्कल्पेएकैकस्यमुक्तावपिएकैकमाषापचयेमाषराश्यपचयवत्क्रमेणसर्वजीवमुक्तेरिदानींसंसारोपलंभोनस्यादितिबाधकं कल्पानंत्यात्क्षणानंत्यइवक्षणानंत्याज्जीवानंत्येतिशयस्य "अतीतानागताश्चैवयावंतःसहिताःक्षणाः । अतोप्यनंतगुणिताजीवानांराशयःपृथगि" त्यादिश्रुतिसिद्धत्वेनप्रतिक्षणमेकैकमुक्तावपीदानींसंसारोपलंभसंभवात् । तस्मात् "एकजीवमतंशब्दयुक्तिप्रत्यक्षबाधितं । तदप्रमाणतायांतुसोपिजीवेनसिद्ध्यति" ॥ तस्माज्जगन्नाविद्यकमिति ॥७॥ एकजीवाज्ञानक

SGDF
Sri Gargeshwari Digital Foundation

मस्यप्रत्यक्षस्येतिज्ञातव्यं । ननुजानन्नेवनजानामीतिब्रूतेपरपरीक्षार्थंनत्वज्ञानसद्भावादितिचेत् तथात्वेशास्त्रार्थाज्ञानेनगुरुशुश्रूषाश्रवणादौप्रवृत्तिरेवनस्यात् तदन्यथानुपपत्त्यातत्रभावरूपाज्ञानमेवाऽस्तीत्यंगीकार्यमितिसुधोक्तंद्रष्टव्यं । सौषुप्तिकानुभवः प्रमाणमितिसंबंधः । सौषुप्तिकानुभवस्याऽप्रामाणिकत्वशंकापरिहारायैतावंतमित्याद्युक्तं । परामर्शः स्मरणं । अनुमानानिचाऽत्रप्रमाणानिभवंतीत्याह ॥ तथाप्रमाणज्ञानमिति ॥ अत्रप्रमाणज्ञानमित्येवोक्तेवेदांतजन्यद्वितीयज्ञानमादाय बाधःस्यात् । तस्यप्रथमज्ञानरूपवस्तुपूर्वकत्वेपितस्यस्वविषयप्रकाशकत्वेनस्वविषयावरणत्वाभावात् अतोविवादगोचरापन्ने

लिपतत्वभंगः ॥४३॥ यच्चोक्तमनादिभावरूपत्वेसतिज्ञाननिवर्त्यत्वं भ्रमोपादानत्वंवाविद्यालक्षणं। प्रमाणंत्वहमज्ञोमामन्यंचनजानामित्वदुक्तमर्थंनजानामीत्यादिप्रत्यक्षं तथा एतावंतंकालंन किंचिदहमवेदिषमितिपरामर्शसिद्धसौषुप्तिकानुभवः। तथाप्रमाणज्ञानंस्वप्रागभावव्यतिरिक्त

तिवक्तव्यं । प्रमाणजन्यंचरमसाक्षात्काररूपंप्रथमज्ञानमित्यर्थः । साध्येस्वशब्देनपक्षभूतंप्रमाणज्ञानंग्राह्यं ॥ स्वप्रागभावमित्यादि ॥ अत्रस्वविषयावरणेत्याद्येवोक्तौप्रमाणज्ञानप्रागभावरूपवस्त्वंतरपूर्वकत्वमादायार्थांतरतास्यात्। तस्यापिस्वविषयावरणत्वात् । स्वविषयावरणशब्देनस्वसत्तादशायांकार्यानुत्पादप्रयोजकत्वस्यैवविवक्षितत्वात् । अतःकथंप्रमाणज्ञानप्रागभावस्य स्वपदोक्तप्रमाणज्ञानविषयभूतब्रह्मावरकत्वं अभावस्यावरकत्वानंगीकारादितिकुचोद्यानवकाशः। एवंचप्रमाणज्ञानप्रागभावस्यापिस्वसत्तादशायांकार्यानुत्पादप्रयोजकत्वेनस्वविषयावरणत्वात् आत्मनिष्ठत्वेनप्रमाणज्ञानसमानदेशत्वात् स्वेननिवर्त्यत्वाच्च

SGDF
Sri Gargeshwari Digital Foundation

ननुप्रमाणज्ञानप्रागभावस्यकथंप्रमाणज्ञाननिवर्त्यत्वं स्वजन्यध्वंसप्रतियोगित्वमेवहिस्वनिवर्त्यत्वं नहीदंप्रमाणज्ञानप्रागभावेयुक्तं।
अभावाभावस्यभावत्वेनप्रतियोगिनएवप्रागभावध्वंसरूपत्वेनप्रमाणज्ञानस्यैवप्रमाणज्ञानप्रागभावध्वंसरूपतयास्वस्यस्वजन्यत्वा
भावादितिचेत्सत्यं । अभावाभावोभावव्याप्यइतिमतेप्रागभावनिवृत्तेःप्रतियोग्यन्यत्वात्प्रमाणज्ञानजन्यध्वंसप्रतियोगित्वरूपं
स्वनिवर्त्यत्वंप्रमाणज्ञानप्रागभावेऽस्त्येवातःस्वप्रागभावव्यतिरिक्तेत्युक्तं । स्वविषयावरणपदत्यागेप्रमाणज्ञानोत्पादकादृष्टरूपव
स्त्वंतरपूर्वकत्वमादायार्थांतरतास्यात् । तस्यापिस्वप्रागभावव्यतिरिक्तत्वात् अदृष्टस्यफलनाश्यत्वेनप्रमाणज्ञानोत्पादकादृष्टस्य
प्रमाणज्ञाननाश्यत्वात् आत्मगतत्वेनप्रमाणज्ञानसमानदेशत्वाच्च । ततउक्तं ॥ स्वविषयावरणेति ॥ तस्यचोत्पत्त्यनुकूलत्वेन
स्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वंतरपूर्वकं अप्रकाशितार्थप्रकाशकत्वात्। अंधकारेप्रथमोत्पन्नप्रदीप
स्वसत्तादशायांकार्यानुत्पादप्रयोजकत्वरूपस्वविषयावरणत्वाभावान्नतदादायार्थांतरता । स्वनिवर्त्यपदत्यागेप्रमाणज्ञानोत्पत्ति
प्रतिबंधकादृष्टरूपवस्त्वंतरपूर्वकत्वमादायार्थांतरतास्यात् । तस्यापिस्वप्रागभावव्यतिरिक्तत्वात् स्वोत्पत्तिप्रतिबंधकत्वादेवस्वस
त्तादशायांप्रमाणज्ञानरूपकार्यानुत्पादप्रयोजकत्वेनस्वविषयावरणत्वात् आत्मनिष्ठत्वेनस्वदेशगतत्वाच्च । अतउक्तं ॥ स्वनिव
र्त्येति ॥ लोकेचप्रतिबंधकनिवृत्त्यनंतरमेवकार्योत्पत्तिदर्शनेन कार्येणप्रतिबंधकनिवृत्त्यभावेनप्रमाणज्ञानोत्पत्तिबंधकादृष्टस्यप्रमा
णज्ञाननिवर्त्यत्वाभावान्नतेनार्थांतरता । स्वदेशगतपदत्यागेविषये ज्ञाततावदज्ञाततापिकाचनतिष्ठति । एवंचविषयावर
कत्वेनविषयभूतब्रह्मगताज्ञातत्वस्यविषयभूतब्रह्मावरणत्वात् प्रमाणज्ञाननिवर्त्यत्वाच्च तेनार्थांतरतेत्यतउक्तं ॥ स्वदेशगतेति ॥

प्रमाणज्ञानस्यचात्मगतत्वात्तस्यचविषयगतत्वेनसमानदेशत्वाभावान्नार्थांतरता । वस्त्वंतरपदत्यागेस्वप्रागभावव्यतिरिक्तेत्यादि
विशेषणोपेतमिथ्याज्ञानपूर्वकत्वमादायार्थांतरतास्यादतोवस्त्वंतरपदं । अर्थज्ञानोभयविधभ्रमांगीकारेणमिथ्याज्ञानस्यावस्तुत्वा
न्नतेनार्थांतरतेतिसाध्येपदानांकृत्यंद्रष्टव्यं । हेतौतुअर्थप्रकाशकत्वादित्येवोक्तौ धारावाहिकद्वितीयादिज्ञानेव्यभिचारःस्यात्
तत्रप्रथमज्ञानेनैवाज्ञानस्यनिवृत्तत्वेनद्वितीयादिज्ञानेनतदनिवृत्तेःस्वनिवर्त्यवस्त्वंतरपूर्वकत्वाभावात् अतोप्रकाशितेत्युक्तं । अर्थ
पदंतुस्पष्टीकरणार्थं । दृष्टांतेसौराद्यालोकप्रदेशेप्रथमोत्पन्नप्रदीपप्रभायांसाध्यसाधनवैकल्यपरिहारायअंधकारइत्युक्तं । अंध
प्रभावदितिविवरणोक्तमनुमानं । स्वप्रागभावंस्वोत्पादकादृष्टंस्वप्रतिबंधकादृष्टंविषयगतमज्ञातत्वंचव्युद
सितुंसाध्यविशेषणानि। तथाचैत्रप्रमा चैत्रगतप्रमाप्रागभावातिरिक्तानादिनिवर्तिका प्रमात्वात् मैत्रप्रमाव
त्। विगीतोविभ्रमः एतज्जनकाबाध्यांतिरिक्तोपादानकः विभ्रमत्वात् सम्मतवदितितत्वप्रदीपिकोक्तानुमानं
कारोत्पन्नद्वितीयादिप्रभायांउभयवैकल्यपरिहारायप्रथमेत्युक्तं । अत्रपक्षेऽज्ञानमादायसाध्यपर्यवसानं दृष्टांतेंधकारमादायेति
विवेकः ॥ चैत्रप्रमेति ॥ अत्रपक्षेचैत्रप्रमाप्रागभावातिरिक्तानाद्यज्ञानमादायसाध्यपर्यवसानं दृष्टांतेचैत्रप्रमाप्रागभावातिरि
क्तमैत्रीयप्रमाप्रागभावमादायेतिद्रष्टव्यं। साध्येचैत्रप्रमेतिविशेषणमप्रसिद्धिवारणाय। दृष्टांतेमैत्रप्रमायां(प्रागभा)अभावव्यतिरि
क्तानादिनिवर्तकत्वस्यप्रतिवादिनोऽसंमतेः । प्रमाप्रागभावातिरिक्तेतिविशेषणंप्रागभावमादायसिद्धसाधनतावारणाय । पूर्वज्ञा
नंमिथ्यात्वज्ञानमादायसिद्धसाधनतावारणायानादीत्युक्तं ॥ विगीतोविभ्रमइति ॥ प्रपंचभ्रमइत्यर्थः ॥ एतज्जनकेति ॥

SGDF Sri Gargeshwari Digital Foundation

पक्षीभूतभ्रमजनकंयदबाध्यंतदतिरिक्तोपादानकइत्यर्थः । एतज्जनकाबाध्यातिरिक्तत्वंएतज्जनकाबाध्यभिन्नत्वं इदंचविशिष्ट
स्यएतज्जनकाबाध्यत्वस्याभावरूपं । एवंचदृष्टांतीभूतोयोरूप्यभ्रमस्तदुपादानेशुक्त्यज्ञानेऽबाध्यत्वरूपविशेष्यसत्त्वेपिएतज्जनक
त्वरूपविशेषणाभावेन पक्षीभूतभ्रमजनकेऽज्ञानेएतज्जनकत्वरूपविशेषणसत्त्वेपिबाध्यत्वाभावरूपविशेष्याभावेन विशिष्टाभावोऽ
नुगतः । दृष्टांतइवनविशेषणाभावमादायविशिष्टाभावसिद्धिः । पक्षीभूतभ्रमस्ययदुपादानंतस्यपक्षीभूतभ्रमजनकतयातत्रैत
ज्जनकातिरिक्तत्वस्यबाधितत्वादितिध्येयं । पक्षीभूतभ्रमेऽबाध्यातिरिक्तंबाध्यंयदज्ञानंतदुपादानकत्वमादायसाध्यसिद्धिः ।
दृष्टांतीभूतभ्रमेतुपक्षीभूतभ्रमजनकातिरिक्तशुक्त्यज्ञानोपादानकत्वमादायेतिविवेकः । बाध्योपादानकइत्येवोक्तेदृष्टांतेऽप्रसि

तथा "तमआसीदि" त्यादिश्रुतिः तथामिथ्याभूतस्यार्थज्ञानात्मकस्यभ्रमस्यकादाचित्कत्वेनसोपादा
नत्वात्भावरूपंकार्यानुगुणंमिथ्याभूतमुपादानमनवस्थापरिहारार्थमनाद्यंगीकार्यमित्याद्यर्थापत्तिश्च।

द्धिः प्रतिवादिनस्तदुपादानेबाध्यत्वासंमतेः अतोनञ्द्वयगर्भंसाध्यं तच्चविशेषणाभावेनोक्तरीत्यास्तीतिज्ञातव्यं । भावरूपा
विद्यासद्भावेश्रुतिंचाह ॥ तथातमइति ॥ तमोनीहारादिशब्दानांतन्मतेऽविद्यावाचकत्वादितिभावः । ननुतदुपादानंमिथ्या
भूतंकुतोंगीकरणीयं सत्यमेवकिंनस्यादित्यतउक्तं ॥ मिथ्याभूतस्येति ॥ भ्रमस्यतावन्मिथ्यात्वंसिद्धं तदुपादानस्याज्ञान
स्यसत्यत्वेसत्योपादानकत्वाद्भ्रमस्यापिसत्यत्वापत्तेरतोमिथ्याभूतभ्रमरूपकार्यानुगुणंमिथ्याभूतमेवांगीकार्यमितिभावः । एता
दृशाज्ञानस्यानादित्वंकुतोंगीकार्यमित्यतउक्तं ॥ अनवस्थेति ॥ तस्यसादित्वेपुनरज्ञानांतरपरंपरयाऽनवस्थास्यादित्यर्थः ।

SGDF
Sri Gargeshwari Digital Foundation

अहमज्ञइतिप्रत्यक्षंज्ञानाभावविषयकंकिंनस्यादित्याशंक्यनिषेधति ॥ नचेति ॥ नजानामीतिप्रत्यक्षं अहमज्ञइतिप्रत्यक्षं । ज्ञानाभावविषयकंकुतोनभवतीत्यतआह ॥ धर्मिणीति ॥ इदंवाक्यमित्थंसंप्रदायपरिशुद्ध्याकक्षाक्रमेणबुद्ध्याविविच्ययोज्यं । तथाहि । नजानामीत्यस्यमयिब्रह्मज्ञानंनास्तीत्यर्थः । तथाचास्यनज्ञानाभावविषयकत्वंयुज्यते । अत्रधर्मिभूतात्मज्ञानस्यैवसत्त्वादित्यादौवाच्यं । एतदुपरिशंका किमनेनधर्मिज्ञानोपपादनेनाजागलस्तनायितेन । एतावताऽज्ञइतिप्रत्यक्षस्यधर्मिज्ञानाभावविषयकत्वमुच्यतेयेनेदंदूषणंस्यात् किंतुब्रह्मविषयकज्ञानाभावविषयकत्वमिति। अस्तुतर्हिधर्मिणोज्ञातत्वाज्ञातत्वाभ्यांज्ञानाभावज्ञानायोगः । किंतुयदभावविषयकत्वंत्वयोच्यते तज्ज्ञानभावाभावाभ्यामेवास्यप्रत्यक्षस्यनतदभावविषयकत्वमित्याशयेनोक्तं

नचनजानामीतिप्रत्यक्षंज्ञानाभावविषयं । धर्मिण्यात्मनिप्रतियोगिनिचज्ञानेज्ञातेतस्यविषयनिरूप्यत्वेनविषयस्यापिज्ञाततयातज्ज्ञानाभावायोगात् । अज्ञातेतुहेत्वभावेनज्ञानाभावज्ञानायोगात् ।

॥ प्रतियोगिनिचेति ॥ नजानामीतिप्रत्यक्षस्यब्रह्मज्ञानाभावविषयकत्वंनवक्तुंशक्यते । तथाहि । अत्रप्रतियोगिभूतस्यब्रह्मज्ञानस्यज्ञानमस्ति नवा । नेतिपक्षेप्रतियोगिज्ञानाभावादेवज्ञानाभावज्ञानायोगः । आद्येब्रह्मज्ञानस्यज्ञातत्वेनतस्यविषयनिरूप्यत्वेनविषयभूतस्यब्रह्मणोज्ञातत्वाद्ब्रह्मविषयकज्ञानाभावायोगेनप्रत्यक्षस्यतद्विषयकत्वंनसंभवतीतिभावरूपाज्ञानविषयकत्वमेववाच्यमितिभावः । तत्रचनोक्तदोषावकाशः । तस्यभावत्वादेवप्रतियोगिज्ञानापेक्षायाअभावादितिज्ञातव्यं ॥ हेत्वभावेनेति ॥ अभावज्ञानहेतुभूतधर्मिप्रतियोगिज्ञानाभावेनेत्यर्थः । ननुज्ञानाभावज्ञानेप्रतियोगिनोब्रह्मज्ञानस्यज्ञानमस्त्येव ।

SGDF
Sri Gargeshwari Digital Foundation

नचब्रह्मज्ञानस्यविषयनिरूप्यत्वेनब्रह्मणोपिज्ञाततयातज्ज्ञानाभावज्ञानायोगइतिवाच्यं । विषयस्यब्रह्मणोपिसामान्याकारेण
ज्ञानांगीकारादित्याशंक्यनिषेधति ॥ नचेति ॥ अत्रसर्वत्रसामान्यविशेषशब्दौसामान्यविशेषाकारपरौ । अयमर्थः । ब्रह्मणः
सामान्यतोज्ञातत्वेपिकिमायातंप्रकृते । नह्यहमज्ञइतिप्रत्यक्षस्यसामान्येनब्रह्मज्ञानाभावविषयकत्वंयुक्तं । ब्रह्मज्ञानरूपप्रति
योगिनिरूपकस्यसामान्याकाररूपविषयस्यापिज्ञातत्वात् । ननुसामान्यतोज्ञातेतस्मिन्विशेषाकारज्ञानंनास्तीतिविशेषज्ञानाभा
वविषयकत्वमेवप्रत्यक्षस्योच्यते तत्राभावज्ञानविरोधिनोविशेषज्ञानविषयीभूतविशेषाकारस्याज्ञातत्वाद्विशेषज्ञानाभावोयुक्तएव ।

नचविषयोपिसामान्यतोज्ञायतइतियुक्तं । सामान्यस्यज्ञातत्वादेवतज्ज्ञानाभावायोगात् । वि
शेषज्ञानाभावेसत्यपिनिरूपकविशेषज्ञानाभावेनतन्निरूपितविशेषज्ञानाभावज्ञानायोगादिति ।

यच्चाऽस्तिसामान्याकारज्ञानं तत्नविशेषाकारज्ञानाभावविरोधीतिचेत् । सत्यं । सामान्यतोविषयस्यज्ञातत्वेतस्यतज्ज्ञानाभाव
विरोधित्वाद्विशेषज्ञानाभावःसंभवत्येव तथापितत्रैवायंविकल्पःप्रसरति । तथाहि । प्रतियोगिभूतंविशेषाकारज्ञानं ज्ञातंनवा ।
नेतिपक्षेविशेषज्ञानाभावंप्रतिप्रतियोगितयानिरूपकस्यविशेषज्ञानस्यज्ञानाभावेनतन्निरूपितविशेषज्ञानाभावज्ञानायोगात् । आ
द्येप्रतियोगिभूतविशेषाकारज्ञानेज्ञातेतस्यविषयनिरूप्यत्वेनविषयस्यविशेषाकारस्यापिज्ञातत्वाद्विशेषाकारज्ञानाभावज्ञानंनयुक्त ॥ २९९ ॥
मितिनप्रत्यक्षस्यतद्विषयकत्वमपितुभावरूपाज्ञानविषयकत्वमेवेतिभावः । एवंपूर्वपक्षेप्राप्तेसिद्धांताभिधानंप्रतिजानीते ॥

तत्रब्रूमइति ॥ आद्यलक्षणमव्याप्त्यसंभवातिव्याप्तिभिर्दूषयितुंआदावव्याप्तिंतावदाह ॥ आद्यइति सादीति ॥ शुक्त्यादेः
सादित्वात्तदवच्छिन्नचैतन्यावरकाज्ञानमपिसाद्येवेत्यनादित्वाभावादव्याप्तिरित्यर्थः । नचशुक्त्यवच्छिन्नचैतन्यावरकाज्ञानाना
मप्यनादित्वमेवेतिवाच्यं । तथात्वेशुक्त्यादेःसादित्वेनतदुत्पत्त्यपेक्षयापूर्वंनिर्विषयावरणापत्तेः । नचतदाशुद्धचैतन्यमात्रावरक
त्वमेवेतिवाच्यं । तथात्वेशुद्धचैतन्यावरकाज्ञानस्यमूलाज्ञानत्वापत्त्यारूप्यस्यतदुपादेयत्वेशुक्तिज्ञानेननिवृत्त्यापत्त्यामूलाज्ञान
स्यनष्टत्वात्सद्योमोक्षापत्तिरितिभावः ॥ उक्तत्वादिति॥ प्रतिकर्मव्यवस्थाभंगइतिशेषः । अनादित्वविशेषणस्याव्याप्तिमुक्त्वा

तत्रब्रूमः । आद्यलक्षणेअव्याप्तिः । सादिशुक्त्याद्यवच्छिन्नचैतन्यावरकाज्ञानानाम
नादित्वायोगस्योक्तत्वात् । आरोपिताभावोपादानाज्ञानेभावत्वाभावाच्च । अभाव
स्यभावोपादानकत्वेअसत्यस्यसत्योपादानकत्वापातात् । तस्याज्ञानानुपादानकत्वे

भावत्वरूपविशेषणस्याप्यव्याप्तिमाह ॥ आरोपितेति ॥ अज्ञानमभावोपादानमेवनभवति अभावस्यतन्मतेनिरुपादानत्वा
दित्यतउक्तमारोपितेति व्यावहारिकस्यकथंचित्तथात्वेपियदाघटवतिभूतलेघटाभावारोपोभवति तदारोप्यमात्रस्याज्ञानोपादान
कत्वमंगीकार्यं अन्यथाद्वितीयलक्षणस्यासंभवप्रसंगात् । अतस्तस्मिन्नारोपिताभावोपादानाज्ञानेभावत्वाभावादव्याप्तिःस्यादि
त्यर्थः । नन्वारोपिताभावोपिभावरूपाज्ञानोपादानकएवेतिनाव्याप्तिरितिचेत्तर्हिंअतिप्रसंगइत्याह ॥ अभावस्येति ॥ ननुय
द्यज्ञानोपादानकत्वमभावस्यस्यात् तदैवतदुपादानभूतेऽज्ञानेऽव्याप्तिःस्यात् । नचतदंगीक्रियतइतिचेत्तर्हिंघटवतिभूतलेआरो

SGDF
Foundation

पितस्यघटाभावस्यघटज्ञानेननिवृत्तिर्दृश्यते सानस्यात् यतोज्ञानमज्ञानस्यनिवर्तकमित्याह ॥ज्ञानान्नि(नानि)वृत्तिर्नस्यादिति॥
नचेष्टापत्तिरितिवाच्यं तथात्वेब्रह्मवत्सत्त्वापत्तेरितिद्रष्टव्यं । अनादित्वभावत्वयोर्विशेषणयोरव्याप्तिमुक्त्वाज्ञाननिवर्त्यत्वस्याप्य
व्याप्तिमाह ॥ शुद्धमिति॥ अस्मन्मतेपुंगतमेवतमः । परमतेविषयावरकतयाविषयगतं । एवंचब्रह्मावरकाज्ञानस्यज्ञाननिवर्त्यत्वं
नास्ति कुतः यतोब्रह्मज्ञाननिवर्त्यत्वमेवतस्यवक्तव्यं अब्रह्मज्ञानात्तन्निवृत्त्यनुपपत्तेः । तथाचब्रह्मज्ञानमेवतन्मतेनास्ति शुद्धब्रह्म
णोवृत्तिव्याप्यत्वाभावात् । अतोब्रह्मावरकाज्ञानेज्ञाननिवर्त्यत्वाभावादव्याप्तिरित्यर्थः ॥ जीवन्मुक्तीति ॥ जीवन्मुक्त्यनुवृ

ज्ञानान्निवृत्तिर्नस्यात् । शुद्धंब्रह्मवृत्तिव्याप्यमपिनेतिमतेतदज्ञाने,चरमसाक्षात्का
रानंतरभाविजीवन्मुक्त्यनुवृत्तेअज्ञाने,ऊर्ध्वाग्रत्वाद्यधिष्ठानत्वसाक्षात्कारानिव
र्तिजलस्थवृक्षाधोग्रत्वादिसोपाधिकभ्रमोपादानाज्ञानेचज्ञाननिवर्त्यत्वाभावाच्च ।

त्ताज्ञानस्यज्ञाननिवर्त्यत्वांगीकारेस्वकार्यारब्धकर्मादिभिःसहपूर्वेणचरमसाक्षात्कारेणनिवृत्त्यापत्त्याभिक्षाटनादौप्रवृत्तिर्नस्यात् ।
अतोज्ञाननिवर्त्यत्वाभावादव्याप्तिरित्यर्थः ॥ सोपाधिकेति ॥ वृक्षाधोग्रत्वादिसोपाधिकभ्रमोपादानाज्ञानेचाव्याप्तिः । तत्रज्ञा
ननिवर्त्यत्वाभावात् । अधिष्ठानतत्त्वसाक्षात्कारेणैवहितन्निवृत्तिर्वक्तव्या नचासौसंभवति अधिष्ठानभूतोयोवृक्ष स्तस्ययदूर्ध्वाग्र
त्वादितत्त्वं तत्साक्षात्कारेसत्यपिअज्ञानस्यानिवृत्तत्वात् तन्निवृत्तौचसोपाधिकभ्रमानुवृत्तिरेवनस्यादतस्तत्राव्याप्तिरित्यर्थः ।
जलस्येत्युक्त्याभ्रमोपाधिर्दर्शितः । शुद्धंब्रह्मवृत्तिव्याप्यंनेतिमतेब्रह्माज्ञानस्यब्रह्मज्ञाननिवर्त्यत्वाभावेपिब्रह्मभिन्नज्ञानेननिवृ

SGDF
Sri Gargeshwari Digital Foundation

त्तिरस्त्वित्यतआह ॥ नहीति ॥ तथाचब्रह्मज्ञानेनैवतन्निवृत्तिर्वक्तव्या तच्चत्वन्मतेनसंभवतीत्यर्थः । जीवन्मुक्त्यनुवृत्ताज्ञानेऽ व्याप्तिमुपपादयति ॥ जीवन्मुक्तीति ॥ पूर्वेणेति ॥ नोत्तरेणेत्यर्थः ॥ स्यादिति ॥ तथाचभिक्षाटनादौप्रवृत्तिर्नस्यादिति भावः । ननुनसोपाधिकभ्रमोपादानाज्ञानेऽव्याप्तिः । तत्त्वज्ञाननिवर्त्यत्वंहिलक्षणं तच्चसोपाधिकभ्रमाज्ञानस्याप्यस्ति । वृक्षा धोग्रत्वादेर्जलाद्युपाधिनिवृत्तिसचिवोर्ध्वाग्रत्वाद्यधिष्ठानतत्वज्ञाननिवर्त्यत्वादित्याशंक्यनिषेधति ॥ नचेति ॥ तस्येति ॥ यथा तत्त्वज्ञानस्यस्वप्रागभावनिवर्तनेऽन्यनिरपेक्षत्वं एवमज्ञाननिरसनेप्यन्यनिरपेक्षस्यैवकारणत्वंवाच्यमित्यर्थः । अन्यनिरपेक्षस्यै

नह्यब्रह्मज्ञानेनब्रह्माज्ञाननिवृत्तिः जीवन्मुक्त्यनुवृत्ताज्ञानस्यज्ञाननिवर्त्यत्वेचस्वकार्यैरारब्ध कर्मभिःसहपूर्वेणैवसाक्षात्कारेणनिवृत्तिःस्यात् । नचसोपाधिकभ्रमोपादानमज्ञानमुपा धिनिवृत्तिसचिवतत्वज्ञाननिवर्त्यं तस्यस्वप्रागभावंप्रतीवाज्ञानंप्रत्यप्यन्यनिरपेक्षस्यैवनि वर्तकत्वात् । नहिज्ञातेक्वाचिदपिनजानामीतिधीरस्ति। चैतन्याविद्यासंबधेतिव्याप्तिश्च ।

वाज्ञाननिवर्तकत्वमुपपादयति ॥ नहीति ॥ यदिज्ञानस्याज्ञाननिरसनेन्यापेक्षा तर्हिकदाचिद्वस्तुनिसुखादौज्ञातेकसतिसहक रिविलंबेननजानामीतिधीःस्यात् नह्येवमस्त्यतोज्ञानस्याज्ञाननिवर्तनेऽन्यापेक्षानास्तीत्यर्थः । एवंसतिप्रकृतेज्ञाननिवर्त्यत्वमि न्या. श्री. ५१ त्यत्रान्यनिरपेक्षतत्वज्ञानमात्रनिवर्त्यत्वमेवलक्षणतयाभिप्रेतमित्यवश्यंवाच्यं । सोपाधिकभ्रमोपादानाज्ञानेचोपाधिनिवृत्तिस चिवतत्वज्ञाननिवर्त्येतदभावादव्याप्तिर्वज्रलेपायितेतिभावः । अव्याप्तिमुक्त्वातिव्याप्तिमप्याह ॥ चैतन्येति ॥ चैतन्यातिरि

SGDF
Sri Gargeshwari Digital Foundation

क्तस्यसर्वस्यापिज्ञाननिवर्त्यत्वांगीकाराच्चैतन्याविद्यासंबंधस्यापिजगदंतःपातित्वाल्लक्षणस्यतत्रातिव्याप्तिरित्यर्थः । ननुतत्रना
तिव्याप्तिः साक्षाज्ज्ञाननिवर्त्यत्वस्यलक्षणतयाभिप्रेतत्वात् चैतन्याविद्यासंबंधस्यचाविद्यारूपसंबंधिनिवृत्तिद्वारैवज्ञानेननिवर्तमा
नत्वादित्यतआह ॥ **साक्षादिति** ॥ **अनादिपदेति** ॥ शुक्तिरूप्येऽतिव्याप्तिवारणायह्यनादिपदं साक्षाज्ज्ञाननिवर्त्यत्वाभि
प्रायेचशुक्तिरूप्यादेरप्यज्ञाननिवृत्तिद्वारानिवर्तमानत्वेनसाक्षाज्ज्ञाननिवर्त्यत्वाभावात्तेनैवातिव्याप्तिपरिहारेसति अनादीतिविशेष
णंव्यर्थमित्यर्थः ॥ **असंभवश्चेति** ॥ क्रमेणविशेषणानामसंभवमुपपादयितुमादावनादित्वविशेषणस्यासंभवमाह ॥ **कल्पित**

साक्षाज्ज्ञाननिवर्त्यत्वविवक्षायांचानादिपदवैयर्थ्यं असंभवश्च। कल्पितत्वेनदोषजन्य
धीमात्रशरीरस्याज्ञानस्यानादित्वायोगस्योक्तत्वात् ज्ञाननिवर्त्यस्याभावविलक्षणस्यरू
प्यवदनादित्वायोगाच्च । अज्ञानसंबंधोपिपक्षतुल्यः। नचाज्ञानत्वानधिकरणत्वमुपाधिः

त्वेनेति ॥ कथमज्ञानस्यदोषजन्यधीमात्रशरीरत्वमित्यतउक्तं ॥ **कल्पितत्वेनेति** ॥ प्रातिभासिकत्वेनेत्यर्थः ॥ **ज्ञानेति** ॥
तथाचअज्ञानंनानादि ज्ञानविलक्षणत्वेसत्यभावविलक्षणत्वाद्रूप्यवदित्यनुमानमुक्तंभवति । ब्रह्मज्ञानप्रागभावयोर्व्यभिचारवा
रणायविशेषणविशेष्यभागौ । ननुचैतन्याविद्यासंबंधेज्ञाननिवर्त्यत्वेसतिअभावविलक्षणत्वमस्ति अनादित्वमेवास्तीतिव्यभि
चारइत्यतआह ॥ **अज्ञानेति** ॥ अत्राप्यनेनैवहेतुनाऽनादित्वाभावोनुमीयतेऽतःपक्षतुल्यत्वान्नव्यभिचारइति । नहिपक्षेपक्षतु ॥ ३०१
ल्येवाव्यभिचारइतिपदार्थविदोमन्यंतइतिभावः ॥ **अज्ञानत्वेति** ॥ अनादित्वाभाववतिशुक्तिरूप्येसत्त्वात्साध्यव्यापकः

हेतुमतिपक्षेचाविद्यमानत्वात्साधनाव्यापकश्चेतिभावः ॥ **पक्षेतरत्वादिति** ॥ अज्ञानत्वाधिकरणत्वमेवाज्ञानत्वं तदन
धिकरणत्वंनामाज्ञानेतरत्वमेवेत्यर्थइत्याहुः । वस्तुतस्तुअनधिकरणत्वस्यकेवलान्वयितयासाधनव्यापकत्वादज्ञानेतिपदस्यपक्ष
मात्रव्यावर्तकत्वादुपाधेःपक्षमात्रव्यावर्तकविशेषणवत्त्वेनपक्षेतरत्वमित्यर्थः । पक्षेतरत्वंचानुमानमात्रोच्छेदकत्वान्नोपाधि
रित्याशयः ॥ **अवच्छिन्नेति** ॥ शुक्त्याद्यवच्छिन्नाज्ञानइत्यर्थः । अनादित्वाभावेसत्यपिअज्ञानत्वाधिकरणत्वस्यैवसत्वादिति
भावः ॥ **व्यतिरेकेति** ॥ साध्याभावाविनाभाव्यभावप्रतियोगिनएवोपाधित्वेनयत्राज्ञानत्वाधिकरणत्वंतत्रानादित्वमित्युपा

पक्षेतरत्वात्।अवच्छिन्नाज्ञानेसाध्याव्याप्तेश्च व्यतिरेकासिद्धेश्च। त्वन्मतेअज्ञानस्यभा
वाभावविलक्षणत्वेनभावत्वाभावाच्च। भावविलक्षणस्याभावत्वनियमेनभावविलक्ष
णेअभाववैलक्षण्यस्याप्ययोगाच्च । अपिचानादेरभावविलक्षणस्यात्मवदनिवर्त्यत्वं।

ध्यभावपुरस्सराव्याप्तिःसादिशुक्त्याद्यवच्छिन्नचैतन्यावरकाज्ञानेव्यभिचारादयुक्तेत्यर्थः । भावत्वविशेषणस्याप्यसंभवमाह
॥ **त्वन्मतइति** ॥ अनिर्वाच्यवादिनस्तवमतइत्यर्थः । ननुभावत्वस्यनासंभवः । लक्षणेभावशब्देनाभाववैलक्षण्यस्यैवविव
क्षितत्वादितिचेत्तत्राह ॥ **भावेति** ॥ अज्ञानंअभावविलक्षणंनभवति । अभावएवेतियावत् । भावविलक्षणत्वात्प्रागभावव
दित्यनुमानेव्याप्त्युपपादनायोक्तं ॥ **भावविलक्षणइति** ॥ परस्परविरुद्धयोरितिन्यायादितिभावः । तथाचभावशब्देनाभा
ववैलक्षण्यविवक्षायामप्यसंभवएवेतिभावः । ज्ञाननिवर्त्यत्वविशेषणस्याप्यसंभवमाह ॥ **अपिचेति** ॥ तथाचाज्ञानंननिवर्तते

SGDF

अनादित्वेसत्यभावविलक्षणत्वादात्मवदित्यनुमानमुक्तंभवति । घटतत्प्रागभावयोर्व्यभिचारवारणायविशेषणविशेष्यभागौ || || भावत्वेति || अनिवृत्तेआत्मनितयोःसत्त्वाद्धेतुमतिपक्षेचाभावादितिभावः || अत्यंताभावइति || जगदत्यंताभावइ त्यर्थः । अत्यंताभावस्यनित्यत्वेनानिवर्त्यत्वादसतश्चज्ञानेनानिवर्त्यत्वात्तयोश्चभावत्वस्यात्मत्वस्यचाभावादित्यर्थः । त्वन्मतेभाव त्वोपाधेरात्मनिनिर्धर्मकेसाध्याव्याप्तिश्चेत्याह || त्वन्मतइति || अज्ञानंननिवर्तते अनादित्वेसत्यभावविलक्षणत्वादित्यनुमाने विरोध्यसन्निपातउपाधिः साध्यव्यापकत्वात्पक्षेज्ञानस्यैवविरोधिनःसत्त्वेनसाधनाव्यापकत्वाच्च तथाचज्ञाननिवर्त्यत्वस्यना

नचभावत्वमात्मत्वंवोपाधिः । अत्यंताभावेअसतिचसाध्याव्याप्तेः । त्वन्मतेआत्मन्यप्य

भाववैलक्षण्यातिरेकेणभावत्वाभावाच्च । यदत्रोक्तंविवरणेनसादित्वमनादित्वंवाविना

शाविनाशयोर्निमित्तं किंतुविरोधिसन्निपातासन्निपातौ किंचानादिभावोननिवर्ततइति

संभवइतिविवरणोक्तंदूषयितुमनुवदति || यदत्रोक्तंविवरणइति || अनादित्वमविनाशेऽनिवर्त्यत्वेनिमित्तंप्रयोजकंनभ वति । किंनामविरोध्यसन्निपातएव विनाशकसामग्र्यसन्निधानमेवप्रयोजकमित्यर्थः । यथाविनाशेसादित्वंनप्रयोजकं किंनामवि रोधिसन्निपातएव विनाशकसामग्रीसान्निध्यमेवेतिदृष्टांतार्थमितिकेचित् । वस्तुतस्तुपरेणोपाधिमुक्त्वाप्रतिपक्षोन्नयनंकार्यं अ ज्ञानंनिवर्ततेविरोधिसन्निपातवत्त्वादिति । तत्रसादित्वमुपाधिरितिप्रतिपक्षोन्नयनमयुक्तमितिशंकायांतत्रेदमुच्यते । विनाशेनसा दित्वंप्रयोजकं किंतुविरोधिसन्निपातएवेति । तथाचोपाधिनाप्रतिपक्षोन्नयनंयुक्तमितिभावः । अनादिभावः अनादित्वेसति

S.M.S. SABHA LIBRARY BANGALORE NO. DATE

SGDF Sri Gargeshwari Digital Foundation

अभावविलक्षणः ॥ सामान्यव्याप्तेरिति ॥ समस्तानादिसङ्ग्राहकत्वादितिभावः । अज्ञानं अनाद्यज्ञानम् अज्ञानंज्ञाननिव
र्त्यंअनाद्यज्ञानत्वादितिप्रतिपक्षउक्तोभवति ॥ विशेषव्याप्तिरिति ॥ अनादिभावविशेषाज्ञाननिष्ठत्वादितिभावः । अस्मद
नुमानस्यप्रतिकूलतर्कपराहतिंप्रतिपक्षांतरंचाह ॥ अपिचेति ॥ अज्ञानंनिवर्ततेभावविलक्षणत्वात्प्रागभाववदितिप्रतिपक्षानु
मानंद्रष्टव्यं ॥ अनुमानादिति ॥ तथाचाज्ञानंविरोधिसन्निपातशून्यं अनादित्वेसतिभावत्वादित्यनुमानेनोपाधेरपिपक्षेसा
धनात्साधनव्यापकोयमुपाधिस्ततश्चानुमानस्यनिर्दोषत्वेनज्ञाननिवर्त्यत्वाभावस्यसिद्ध्याऽसंभवःसुस्थइतिभावः । किंचेत्या
सामान्यव्याप्तेरज्ञानंज्ञाननिवर्त्यमितिविशेषव्याप्तिर्बलीयसी अपिचाभाववैलक्षण्यादात्मवदनिवृत्तौभा
ववैलक्षण्यात्प्रागभाववन्निवृत्तिःकिंनस्यादिति तन्न । अनादिभावत्वेनैवविरोध्यसन्निपातस्याप्यनुमाना
त् । यःपर्वतःसोनग्निकइतिविशेषव्याप्तिरित्यतिप्रसंगाच्च । त्वदभिमतानाद्यज्ञानस्यज्ञाननिवर्त्यत्वेदृष्टांता
भावेनाज्ञानशब्देनसादिभ्रांत्यादिसाधारणज्ञानविरोधिमात्रस्यविवक्षणीयत्वेनविशेषव्याप्तित्वायोगाच्च ।
दिनोक्तंदूषयति ॥ यइति ॥ योधूमवान्सोग्निमानितिसामान्यव्याप्तेःधूमवद्विशेषपर्वतनिष्ठा यःपर्वतःसनिरग्निकइतिवि
शेषव्याप्तिर्बलवतीप्रसज्येत । तथाचपर्वतोग्निमानित्यस्यापिपर्वतोनिरग्निकःपर्वतत्वादितिप्रतिपक्षसंभवेनातिप्रसंगइतिभावः
॥ दृष्टांताभावेनेति ॥ अनाद्यज्ञानस्यैवपक्षत्वेनान्वयदृष्टांताभावादित्यर्थः । व्यतिरेकव्याप्तिश्चवक्रत्वादुपेक्षितेतिहृदयं ।
॥ अज्ञानशब्देनेति ॥ अयमर्थः । अत्रज्ञाननिवर्त्यतावच्छेदकंनानाद्यज्ञानत्वं । ज्ञाननिवर्त्येषुसाद्यज्ञानेषुअभावेनन्यूनवृ

SGDF
Sri Gargeshwari Digital Foundation

त्तित्वात् अतोनादित्वविशेषणंपरित्यज्याज्ञानत्वमेवनिवर्त्यतावच्छेदकमितिवक्तव्यं । नेदमपिसंभवति । ज्ञाननिवर्त्यत्वस्य भ्रांतावपिभावेनन्यूनवृत्तित्वात् अतोनाद्यज्ञानसाद्यज्ञानभ्रांतिसाधारणंज्ञाननिवर्त्यतावच्छेदकंज्ञानविरोधित्वमात्रंविवक्षणीयं । एवंचाज्ञानंज्ञाननिवर्त्यंज्ञानविरोधित्वादित्यनुमानंवाच्यं । तथाचयज्ज्ञानविरोधितज्ज्ञाननिवर्त्यमित्येवंव्याप्तिर्वाच्या । तथा चानादिसाद्यज्ञानभ्रांतिसाधारणत्वान्नेयमपिविशेषव्याप्तिः । नचज्ञानविरोधिविशेषभूतानाद्यज्ञाननिष्ठाव्याप्तिरितिवाच्यं । अन्वयेदृष्टांताभावादितिभावः । व्यतिरेकव्याप्तेरेवविशेषव्याप्तित्वोपपत्तेर्नेदंदूषणंसमीचीनमिति । अपिचेत्यादिनोक्तंदूष यति ॥ भावेति ॥ निवृत्तौ आपादितायामितिशेषः । तथाचात्यंताभावेध्वंसेचव्यभिचारः । तयोश्चनिवर्त्यत्वेप्रतियोग्युन्मज्ज

भाववैलक्षण्येननिवृत्तावत्यंताभावस्यध्वंसस्यचनिवृत्त्यापा
ताच । अविद्यानिवृत्तिरूपमोक्षाभावोपिमयैवापाद्यते ।

नापत्तिरितिध्येयं । तथाचाज्ञानंनज्ञाननिवर्त्यंअनादित्वेसत्यभावविलक्षणत्वादात्मवदित्यनुमानंसुस्थमितिभावः । ननुनैवम नुमातुंशक्यं "विश्वमायानिवृत्तिः तरत्यविद्या" मित्यादिज्ञाननिवर्त्यत्वप्रतिपादकश्रुतिबाधापत्तेरितिचेन्न । स्यादिदंदूषणंयदि साधनानुमानमस्माकमभिप्रेतंस्यात् नचैवं किंनामअनादित्वेसत्यभावविलक्षणत्वादात्मवदज्ञानस्यानिवर्त्यत्वंस्यात् । ततश्चासंभ वइत्यापाद्यमानत्वात् तत्रप्रमाणबाधादेरदूषणत्वादित्याशयेनाह ॥अविद्येति॥ अत्रादौमयैवापाद्यतइत्येतद्योजनीयं । मयाआ पाद्यतएव नसाध्यते येनप्रमाणबाधःस्यादितितदर्थः । तदुपर्येवमाशंका । ननुभवत्तर्कस्यप्रतितर्कपराहतिः । तथाहि । अनादि ॥ ३०२ ॥

त्वेसत्यभावविलक्षणत्वादज्ञानंज्ञाननिवर्त्यंनस्याद्यदि तर्ह्यविद्यानिवृत्तिरूपोमोक्षोनस्यात् । अस्तिचासौप्रमाणप्रमितोऽतोज्ञान निवर्त्यत्वमंगीकार्यं । ततश्चनासंभवइत्याशंकायामविद्येत्यादिकंसमग्रंवाक्यंयोजनीयं । तथाहि । नैतदेवंमयापाद्यते अपितुममा यमाशयः । अज्ञानस्यभावविलक्षणत्वात्प्रागभाववन्निवृत्तिर्यदिस्यात् तर्ह्यनादित्वेसत्यभावविलक्षणत्वादनिवृत्तिरपिस्यादित्यापा दितेअत्रेष्टापत्तिस्त्वयानाशंक्या । तथात्वेऽविद्यानिवृत्तिरूपोमोक्षोनस्यादितिमयैवापाद्यमानत्वादितिसंप्रदायविदः । प्रका रांतरेणज्ञाननिवर्त्यत्वस्यासंभवमाह ॥ प्रतीतीति ॥ अज्ञानस्यत्वन्मतेप्रातिभासिकत्वेनप्रतीतिमात्रशरीरतयायावत्प्रतीतिसत्त्व

प्रतीतिमात्रशरीरस्याज्ञानस्ययावत्स्वविषयधीरूपसाक्षिसत्त्वमनुवृत्तिनियमेननिवृत्त्य
योगाच्च। अज्ञानस्यात्यंताभावप्रतियोगित्वरूपमिथ्यात्ववतोनिवृत्त्ययोगस्योक्तत्वाच्च ।

मनुवृत्तिनियमात्प्रतीतिनिवृत्तिमंतरेणनिवर्तकाभावादज्ञानप्रतीतेश्चसाक्षिचैतन्यरूपत्वेनतस्यचनित्यत्वेननिवृत्त्यभावान्नज्ञाननि वर्त्यत्वमज्ञानस्येतिभावः । नन्वविद्यावृत्तिप्रतिबिंबितसाक्षिचैतन्यस्यैवाज्ञानप्रतीतिरूपत्वात्तस्यचविशिष्टजन्यत्वेननाशादज्ञान नाशोयुक्तएवेतिनज्ञाननिवर्त्यत्वस्यासंभवइत्यस्वरसात्प्रकारांतरेणअसंभवमाह ॥ अज्ञानस्येति ॥ अत्यंताभावेति ॥ तादृश मिथ्यात्ववतोरूप्यादेर्ज्ञाननिवर्त्यत्वाननुभवात् । नहिशुक्तिज्ञानेनरूप्यंनष्टमितिधीरस्तीतिज्ञाननिवर्त्यत्वभंगेउक्तत्वेनाज्ञानस्यापि तादृशमिथ्यात्ववतोज्ञानेननिवृत्तिरयुक्तेतिसुस्थोऽसंभवइतिभावः । एवमाद्यंलक्षणमव्याप्त्यादिनादूषयित्वाभ्रमोपादानत्वरूपं

SGPF Foundation

द्वितीयलक्षणमप्यव्याप्त्यादिनादूषयति ॥ द्वितीयलक्षणेपीति ॥ अज्ञानमेकमेवेतिमतेतस्यचरमसाक्षात्कारनिवर्त्यत्वेनशुक्त्या
दिप्रमानिवर्त्यत्वंनास्ति तथात्वेऽज्ञानस्यैकत्वेनतन्निवृत्तौसद्योमोक्षएवस्यादतउक्तं ॥ यावंतीति ॥ भ्रमनिवर्त्याज्ञानाभावात्प्र
मानिवर्त्यैत्युक्तं । नन्विदंरजतमितिभ्रमानंतरंजायमाननेदंरजतमितिप्रमानिवर्त्ययदज्ञानंशुक्त्यज्ञानं तत्रभ्रमोपादानत्वमस्त्येवे
तिनाव्याप्तिरित्यतउक्तम्॥अभ्रमपूर्वकेति॥भ्रमानंतरंजायमानाप्रमानभवतीत्यर्थः। तथाचादावेवेयंशुक्तिरितिजायमानायाप्रमा
तयाशुक्त्यज्ञानंनिवर्तते तस्मिन्नज्ञानेभ्रमस्यैवाभावेनभ्रमोपादानत्वाभावादव्याप्तिःस्यादित्यर्थः। नचभ्रमोपादानत्वयोग्यत्वंवि
वक्षितं अभ्रमपूर्वकप्रमानिवर्त्याज्ञानेसहकारिवैकल्यप्रयुक्तकार्यानुत्पादकत्वरूपंयोग्यत्वमस्त्येवेतिवाच्यं । योग्यताहिकिंचिदव

द्वितीयलक्षणेपियावंतिज्ञानानितावंत्यज्ञानानीतिमतेअभ्रमपूर्वकप्रमानिवर्त्याज्ञाने
अभावारोपनिवर्तकप्रमानिवर्त्याज्ञानेचाव्याप्तिः । अभावस्यनिरुपादानकत्वात् ।

च्छेदेनज्ञातव्या । प्रकृतेचयोग्यतावच्छेदकीभूतोधर्मोननिरूपयितुंशक्यः । नतावदज्ञानत्वंतस्येदानींनिरुच्यमानत्वात् । नचा
द्यंलक्षणमेवयोग्यतावच्छेदकमितिवाच्यं । तस्यदूषितत्वादितिद्रष्टव्यं । अतएवास्वरसादाह ॥ अभावारोपेति ॥ घटव
तिभूतलेआरोपितोघटाभावोघटप्रमयाघटाज्ञाननिवृत्तिद्वारानिवर्तते तस्मिन्नज्ञानेभ्रमोपादानत्वाभावादव्याप्तिःस्यादित्यर्थः ।
प्रमापदाभावेआरोपधारायांद्वितीयारोपेणपूर्वारोपोनिवर्तते । तत्रप्रथमारोपनिवर्तकद्वितीयारोपनिवर्त्याज्ञानाभावात्तत्राव्या
प्तिकथनमयुक्तंस्यादतउक्तं ॥ प्रमानिवर्त्यैति ॥ ननुतदप्यज्ञानंआरोपिताभावोपादानंभवत्वितिचेत्तत्राह ॥ अभावस्येति ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ सोपादानकत्वेपीति ॥ सोपादानकत्वांगीकारेपीत्यर्थः ॥ भावरूपेति ॥ तथात्वेअभावस्यापिभावोपादानकत्वाद्भाव त्वमेवस्यात् । असत्यस्यापिसत्योपादानकत्वप्रसंगादितिभावः । एवमव्याप्तिमुपपाद्यासंभवातिव्याप्तीमतभेदेनोपपादयति ॥ किंचेति ॥ अत्रमतत्रयमस्ति । माययैवसर्वजगदुपादानं ब्रह्मतुतदधिष्ठानमात्रमित्येकंमतं । मायावच्छिन्नंब्रह्मैवसर्वजगदु पादानं नकेवलंमाया नापिकेवलंब्रह्मेत्यपरंमतं । रज्ज्वाःसूत्रद्वयमिवमायाब्रह्मणीद्वेअपिप्रत्येकंजगदुपादानेइत्यन्यन्मतं । तत्राद्येमतेनासंभवः । मायाशब्दवाच्याज्ञानस्यैवसर्वजगदुपादानत्वांगीकारात् भ्रमस्यचजगदंतःपातित्वेनमायायांभ्रमोपा

सोपादानकत्वेपिभावरूपाज्ञानोपादानकत्वायोगात् । किंचब्रह्मजगदुपादानमायाधिष्ठानमितिपक्षे दोषाभावेपिमायावच्छिन्नंब्रह्मोपादानमितिपक्षेअसंभवः।रज्ज्वाःसूत्रद्वयमिवमायाब्रह्मणीउपादाने इतिपक्षेअतिव्याप्तिः । अपिचार्थज्ञानरूपस्यभ्रमस्यभावविलक्षणत्वेननिरुपादानत्वादसंभवः ।

दानत्वसंभवात् अतोद्वितीयमतेऽसंभवःस्यात् । मायावच्छिन्नब्रह्मणएवसर्वजगदुपादानत्वेनमायायांभ्रमोपादानत्वाभा वात् विशिष्टस्ययद्भवतीतिन्यायस्यचनिरासात् ब्रह्मण्यतिव्याप्तिश्चद्रष्टव्या । तृतीयेमतेऽसंभवाभावेपिब्रह्मण्यतिव्याप्तिः स्पष्टैवेत्यर्थः ॥ भावेति ॥ तथाचभ्रमोनिरुपादानकः भावविलक्षणत्वादभाववदित्यनुमानंद्रष्टव्यं । तथाचभ्रमस्यनिरुपा दानत्वादज्ञानेभ्रमोपादानत्वाभावादसंभवइत्यर्थः । ननुभ्रमस्यभावत्वेनभावविलक्षणत्वाभावात्स्वरूपासिद्धिरित्यतआह ॥

SGDF
Sri Gargeshwari Digital Foundation

नचेति ॥ भावेति ॥ अज्ञानस्यानिर्वचनीयत्वेनभावाभावविलक्षणत्वादितिभावः। तथापिकुतोनयुक्तमित्यतआह ॥ कार्येति ॥ तथाचभावविलक्षणाज्ञानकार्यस्यभाववैलक्षण्यमेवयुक्तमितिनस्वरूपासिद्धिरितिभावः। ननुभवदनुमानस्यभ्रमःसोपादानः अभावविलक्षणत्वाद्घटवदितिसत्प्रतिपक्षत्वान्नासंभवइत्यतआह ॥ सोपादानत्वेचेति ॥ तथाचभावत्वमत्रोपाधिः। घटादौसाध्यव्यापकत्वात् । हेतुमपिपक्षेभावविलक्षणाज्ञानोपादानेभावत्वाभावेनसाधनाव्यापकत्वाच्चेत्युक्तंभवति ॥ गौरवादिति ॥ अभावरूपत्वेनगौरवादितिभावः। इदानींभ्रमस्वरूपंविविच्यतस्याज्ञानोपादानत्वंदूषयति ॥ अपिचेति ॥ भ्रमशब्देनार्थोवि

नचभावविलक्षणाज्ञानोपादेयस्यभ्रमस्यभावत्वंयुक्तं । कार्यकारणयोरभेदात् । सोपादानत्वेचभावत्वमेवतंत्रं नत्वभावविलक्षणत्वं गौरवात् । अपिचार्थस्यमन्मतेअसत्त्वेनत्वन्मतेचसद्विलक्षणत्वेननिरुपादानत्वात् ।

वक्षितः तज्ज्ञानंवा नाद्यइत्याह ॥ अर्थस्येति ॥ तथाचार्थरूपोभ्रमोनिरुपादानः असत्त्वाच्छशशृंगवदित्यनुमानेननिरुपादानत्वसिद्धेरज्ञानेऽर्थरूपभ्रमोपादानत्वाभावान्मद्रीत्याऽसंभवइत्यर्थः । त्वद्रीत्यावाऽसंभवइत्याह ॥ त्वन्मतेचेति ॥ तथाचार्थरूपोभ्रमोनिरुपादानः सद्विलक्षणत्वादज्ञानवदित्यनुमानेननिरुपादानत्वसिद्धेरज्ञानेतदुपादानत्वाभावात्त्वद्रीत्याचासंभवइत्यर्थः । मायिनाऽर्थस्यासद्विलक्षणत्वांगीकारेणासत्त्वानंगीकारान्मद्रीत्यातन्मतेऽसत्त्वेननिरुपादानत्वानुमानायोगात्सद्विलक्षण

त्वेनेत्युक्तं । नद्वितीयइत्याह ॥ ज्ञानस्यात्विति ॥ त्वन्मतइति ॥ तथाचार्थज्ञानंनिरुपादानं सद्विलक्षणत्वादित्यनुमानेननिरुपादानत्वेसिद्धेऽज्ञानेतदुपादानत्वाभावात्त्वद्रीत्याऽसंभवइत्यर्थः । मद्रीत्याचासंभवइत्याह ॥ मन्मतेत्विति ॥ ॥ सत्त्वेनेति ॥ भ्रमआसीदित्यनुभवादित्यर्थः ॥ तत्प्रतीति ॥ भ्रमरूपज्ञानंप्रतीत्यर्थः । तार्किकरीत्या आत्मनःसमवायिकारणत्वेनोपादानत्वान्नाज्ञानोपादानकत्वं स्वरीत्यातु"धीर्भीरित्येतत्सर्वंमनएवे"तिश्रुतेरंतःकरणोपादानकत्वेनाज्ञानोपादानकत्वाभावादसंभवइत्यर्थः । मनस्यतिव्याप्तिश्च । नन्वर्थज्ञानात्मकोभ्रमःसोपादानोभवितुमर्हति । असद्विलक्ष

ज्ञानस्यतुत्वन्मतेसद्विलक्षणत्वेननिरुपादानत्वात् । मन्मतेतुसत्त्वेनतत्प्रत्यात्मनोंतःकरणस्यवोपादानत्वात्नाज्ञानमुपादानं । सोपादानत्वेकदाचित्सत्त्वमेवतंत्रं नत्वसद्विलक्षणत्वं । कदाचिदेवसत्त्वेनप्रतीयमानत्वंवा गौरवात् तुच्छस्यापिशब्दाभासादिनासत्त्वेनप्रतीतिसंभवाच्च ।

णत्वात् कदाचिदेवसत्त्वेनप्रतीयमानत्वात् घटवत् । कदाचिदेवेतिविशेषणंब्रह्मण्यतिव्याप्तिपरिहाराय । तथाचानेनानुमानेनसोपादानत्वसिद्धेर्नतदुपादानाज्ञानेऽसंभवइत्यतआह ॥ सोपादानत्वेचेति ॥ तथाचकदाचित्सत्त्वमुपाधिरित्युक्तंभवति । अर्थेउभयरीत्यासत्वाभावात्ज्ञानेत्वद्रीत्यासत्त्वाभावात्साधनाव्यापकइतिद्रष्टव्यं ॥ गौरवादिति ॥ कदाचित्सत्त्वापेक्षयाऽसद्विलक्षणत्वस्याभावरूपत्वेनगुरुत्वात् द्वितीयस्यशब्दतोऽपिगुरुत्वादितिभावः । सोपादानत्वसाधकत्वदुक्तद्वितीयहेतोस्तुच्छेव्यभिचारश्चेत्याह ॥ तुच्छस्यापीति ॥ यदुक्तंभ्रमरूपज्ञानस्वरूपस्यसत्त्वेनांतःकरणोपादानकतयानाज्ञानोपादानकत्वमिति तदयुक्तं ।

Sri Gargeshwari Digital Foundation

तथात्वेज्ञानस्यसत्त्वेऽर्थस्यरूप्यस्यापिसत्त्वापत्तेः विषयविषयिणोःसमानसत्ताकत्वनियमादित्याशंक्यनिषेधति ॥ नचेति ॥ कुतोनचेत्यतोविषयविषयिणोःसमानसत्ताकत्वनियमोनास्ति विषयस्यसत्त्वेपिविषयिणोमिथ्यात्वाद्व्यभिचारइत्याह ॥ मिथ्याभूतमिति ॥ एवमव्याख्यानेज्ञानसत्त्वेनार्थस्यापिसत्त्वेपरेणोक्तेऽज्ञानादेर्मिथ्याभूतत्वेपिविषयस्यब्रह्मणःसत्त्वोक्तेरसंगतत्वादितिध्येयमितिसंप्रदायविदः ॥ मिथ्याभूतमिति ॥ अज्ञानादित्रयस्यब्रह्मव्यतिरेकेणस्वरूपतोमिथ्यात्वादितिभावः । विषयिणःसत्त्वेपिविषयस्यमिथ्यात्वाच्चनोक्तनियमइत्याह ॥ संतमिति ॥ पूर्वंसामान्यनियमेव्यभिचारमुक्त्वाइदानींज्ञानस्यसत्त्वेऽर्थ

नचज्ञानस्यसत्वेर्थस्यापिसत्त्वप्रसंगः । मिथ्याभूतमज्ञानंवेदांततात्पर्यंचरमसाक्षात्कारंचप्रतिविषयस्यब्रह्मणःसत्ववत्संतंव्यवहारंपरोक्षज्ञानंचप्रतिविषयस्यखपुष्पादेरसत्ववत्सत्यसाक्षिवेद्याज्ञानादेर्मिथ्यात्ववचोपपत्तेः एतावंतंकालंरजतज्ञानमासीदितिज्ञानस्यसत्त्वानुसंधानाच्च असद्वैलक्षण्यमात्रेणसत्वानुसंधानेचसद्वैलक्षण्येननासीदित्यनुसंधानापातात् । अर्थेप्यासीदित्यनुसंधानापाताच्च ।

स्यापिसत्त्वमितिपरोक्तनियमएवव्यभिचारमाह ॥ सत्येति ॥ सत्यचैतन्यरूपत्वेनसत्यत्वादितिभावः । भ्रमरूपज्ञानस्वरूपस्यसत्त्वानंगीकारेतत्सत्त्वग्राहिणानुभवेनविरोधइत्याह ॥ एतावंतमिति ॥ नन्वासीदित्यनेननज्ञानस्यसत्त्वंविषयीक्रियते किंनामासद्वैलक्षण्यमात्रमित्याशंक्यातिप्रसंगमाह ॥ असद्वैलक्षण्यमात्रेणेति ॥ नसत्त्वेनेत्यर्थः ॥ सद्वैलक्षण्येति ॥ भ्रमरूपज्ञानस्यसदसद्विलक्षणत्वांगीकारादितिभावः । असद्वैलक्षण्यमात्रस्यसत्त्वानुसंधानप्रयोजकत्वेऽतिप्रसंगांतरमाह ॥ अर्थेपीति ॥

SGDF
Sri Gargeshwari Digital Foundation

रूप्येपीत्यर्थः। त्वन्मतेतस्यासद्विलक्षणस्वरूपत्वादितिभावः। तथाचैतावंतंकालंरूप्यमासीदित्यनुसंधानंस्यादितिभावः। नन्वारोपितार्थस्यक्वचित्सत्त्वमनुसंधीयतएव। एतावंतंकालंग्रीवास्थंमुखंआदर्शआसीदित्यनुसंधीयमानत्वादित्यतआह॥ एतावंतमिति॥ मुखंग्रीवास्थमेवमुखं॥ प्रतिबिंबस्येति॥ तथाचमुखमासीदित्यस्यमुखप्रतिबिंबआसीदित्यर्थः। नन्वेवंचेत्तर्हि प्रतिबिंबस्यापिमिथ्यात्वात्तत्रैवासीदित्यनुसंधानंप्राप्तमेवेतितत्राह॥ छायादिवदिति॥ अस्तुवाभ्रमस्वरूपंयत्किंचित्। तथाप्यज्ञानस्योपादानत्वंनास्तीत्यसंभवइत्याह॥ किंचेति॥ तथाचाज्ञानंनोपादानं भावविलक्षणत्वादभाववत् अज्ञानंनोपादानं

एतावंतंकालमिहादर्शेमुखमासीदित्यनुसंधानंतुप्रतिबिंबस्यछायादिवत्सत्यत्वात्। किंचअज्ञानस्यभावविलक्षणत्वात्सद्विलक्षणत्वाचनोपादानत्वं। अन्यथातत्वज्ञानप्रागभावएवभ्रमोपादानंस्यात्। उपादानत्वेचभावत्वंसत्त्वंचतंत्रं नत्वभावविलक्षणत्वमसद्विलक्षणत्वंवा गौरवात्

सद्विलक्षणत्वात् खपुष्पवदित्यनुमानद्वयमुक्तंभवति। आद्यानुमानेऽप्रयोजकत्वमतिप्रसंगेनपरिहरति॥ अन्यथेति॥ भावविलक्षणस्याप्युपादानत्वइत्यर्थः। ननुअज्ञानंउपादानं अभावविलक्षणत्वादसद्विलक्षणत्वाद्वा मृद्वदित्यनुमानाभ्यांभवदनुमाने सत्प्रतिपक्षतेत्याशंकायांभावत्वंसत्त्वंवाउपाधिः मृदादौसाध्यव्यापकत्वादनिर्वचनीयतयाभावाभावविलक्षणेअसद्विलक्षणेचाज्ञानेउक्तोपाध्योरभावेनसाधनाव्यापकत्वाच्चेत्याशयेनाह॥ उपादानत्वेचेति॥ गौरवादिति॥ अभावरूपत्वादितिभावः।

SGDF
Sri Gargeshwari Digital Foundation

एतावताप्रबंधेनाज्ञानेभ्रमोपादानत्वंनास्तीत्युपपाद्येदानीं भ्रमेऽज्ञानोपादानकत्वंनास्तीत्याह ॥ किंचेति ॥ यदिति ॥ मृद्घटइति
मृदनुविद्धतयाप्रतीयमानोघटोमृदुपादानकोदृष्टइत्यर्थः ॥ अज्ञानमितीति ॥ रूप्यमज्ञानंतज्ज्ञानंवाज्ञानमित्यज्ञानानुविद्धत
यानभाति येनतदुपादानकंस्यादित्यर्थः । यत्त्वित्यस्यतन्नेत्यनेनान्वयः । तदुक्तमनुवदति ॥ ज्ञानेति ॥ अनादित्वाद्यविशेषित
मित्यर्थः । अस्यलक्षणस्यप्रपंचेऽतिव्याप्तत्वात्तत्परिहारायविशेषणंदेयमेवेत्याशंक्यपरिहरति ॥ नचेति ॥ प्रपंचस्याज्ञानपरिणाम
त्वेपिकुतोऽज्ञानलक्षणस्यतत्कार्येनातिव्याप्तिरित्यतआह ॥ नहीति ॥ नहिपृथिव्यागंधवत्त्वंलक्षणमित्युक्तेघटेऽतिव्याप्तौकेनचि

किंचयद्यदनुविद्धतयाभाति तत्तदुपादानकं। नचरूप्यंतज्ज्ञानंवाअज्ञानमितिभाति। यत्तुज्ञाननिवर्त्यत्वमज्ञान
लक्षणं। नचप्रपंचेतिव्याप्तिः।तस्याज्ञानपरिणामत्वात्। नहिपृथिवीलक्षणस्यघटादावतिव्याप्तिरिति।तन्न।जीव
न्मुक्त्यनुवृत्ताज्ञानादावव्याप्त्यादेरुक्तत्वात्। यद्वावरूपाज्ञानंविप्रतिपन्नंतस्यशुक्तिरूप्यादिव्यावृत्तस्यकारणा
वस्थानाद्यज्ञानस्यैवलक्षणीयत्वेनरूपित्वस्यतेजोलक्षणत्वेतत्परिणामेऽप्यबादाविवास्यापिप्रपंचेतिव्याप्तेश्च ।

दुक्तायांतत्परिहारायकेनचिद्विशेषणंदीयते किंनामतस्यापिपृथिवीविकारत्वेनलक्ष्यांतर्गतत्वान्नातिव्याप्तिरित्येवसमाधीयते तद्व
दिहापिप्रपंचस्याज्ञानपरिणामत्वेनलक्ष्यांतर्गतत्वान्नातिव्याप्तिशंकेत्यर्थः ॥ जीवन्मुक्तीति ॥ भिक्षाटनाद्यन्यथानुपपत्त्येत्यर्थः।
आदिशब्देनाज्ञानसंस्कारारब्धकर्मग्रहणं ॥ विप्रतिपन्नमिति ॥ विषयावरकत्वानिर्वचनीयत्वादिनाविप्रतिपन्नमित्यर्थः ॥
शुक्तीति ॥ शुक्तिरूप्यादिकमज्ञाननिवृत्तिद्वाराज्ञाननिवर्त्यं तद्व्यावृत्तस्यसाक्षाज्ज्ञाननिवर्त्यस्येत्यर्थः॥ कारणेति॥ प्रपंचादिकार्यं

विहायकारणावस्थंयदनाद्यज्ञानं तस्यैवेहलक्षणीयत्वादित्यर्थः । अयमर्थः । ज्ञाननिवर्त्यत्वंहिकारणावस्थापन्नंयन्मूलाज्ञानंभाव
रूपंविवादास्पदं तस्यैवलक्षणं नतुसादिशुक्त्याद्यावरकाज्ञानादेः तथाचकारणावस्थस्यैवानाद्यज्ञानस्यलक्ष्यत्वेनतल्लक्षणस्यतत्प
रिणामेप्रपंचेऽतिव्याप्तिःस्यादेव यथा"अग्नेराप"इतिश्रुतेरबादिकारणावस्थापन्नस्यसूक्ष्मतेजसएवलिलक्षयिषितत्वेरूपित्वलक्षण
स्यतत्परिणामभूतेऽबादौअतिव्याप्तिःस्यादेव तद्वदित्यर्थः । भेदाभेदसद्भावात् । नन्वेवंपृथिव्यागंधोलक्षणमित्यत्रापिकार
णावस्थापन्नसूक्ष्मपृथिव्याएवलिलक्षयिषितत्वेघटादावतिव्याप्तिःस्यादेवेतिचेत् इष्टापत्तिरित्याह ॥ पृथिवीति ॥ ननुतर्हि
प्रपंचेऽतिव्याप्तिवारणायसाक्षाज्ज्ञाननिवर्त्यत्वंविवक्षितमितिचेन्न । तथापिज्ञानप्रागभावेतिव्याप्तिःस्यात् । तस्यसाक्षाज्ज्ञाननिव

पृथिवीलक्षणेपिकारणावस्थस्यैवलिलक्षयिषितत्वेघटादावतिव्याप्तिरेव साक्षात्पदप्रक्षेपेणोपादाननिवृत्ति
द्वारेणज्ञानेननिवर्त्येप्रपंचेतिव्याप्तिपरिहारेपि "अभावाभावोभावव्याप्य" इतिमतेज्ञानप्रागभावस्यापि

र्त्यत्वात् । ननुज्ञानप्रागभावेज्ञानजन्यध्वंसप्रतियोगित्वरूपंज्ञाननिवर्त्यत्वंनास्ति अभावाभावोभावएवेतिनियमात् । ज्ञान
स्यैवज्ञानप्रागभावध्वंसरूपत्वेनज्ञानस्यज्ञानाजनकत्वादितिचेत् अभावाभावोभावव्याप्तइतिमतेप्रागभावध्वंसस्यप्रतियोग्यतिरि
क्तत्वात् अन्यथातन्मतानाश्रयणेविवरणकारोक्तंयदाद्यानुमानं"प्रमाणज्ञानंस्वप्रागभावव्यतिरिक्ते"त्यादिकंतत्रस्वप्रागभावव्य
तिरिक्तेत्याद्यविशेषणंव्यर्थंस्यात् प्रागभावव्यावृत्त्यर्थंहितद्विशेषणं तद्व्यावृत्तेश्चस्वनिवर्त्यपदेनैवजातत्वात् । अतउक्तमताश्रयणे
नैवतद्विशेषणसार्थक्यंवाच्यं । तथाचज्ञाननिवर्त्यत्वस्यज्ञानप्रागभावेऽतिव्याप्तिःस्यादेवेतिनाविद्यालक्षणद्वयमपियुक्तमित्याह

SGPF
Sri Gangadhara ... Foundation

॥ साक्षादित्यादिना ॥ अविद्यालक्षणभंगविवरणं ॥ ४४ ॥ यच्चोक्तमहमज्ञइतिप्रत्यक्षंभावरूपाज्ञानसद्भावेमानमिति तदयुक्तं। तस्यज्ञानाभावविषयकत्वस्यत्वयाप्यवश्यंवाच्यत्वादित्यभिप्रेत्याह ॥ यच्चेत्यादिना ॥ अहमर्थस्येति ॥ अहमज्ञइति प्रतीतेःप्रामाण्यायज्ञानाभावविषयकत्वंत्वयापिवाच्यं अन्यथातस्याःप्रामाण्यमेवनस्यादितिभावः । अज्ञानानाश्रयेऽहमर्थेऽज्ञा नाश्रयत्वावगाहित्वादितिभावः । किंचनजानामीतिप्रतीतेर्ज्ञानाभावविषयकत्वंकुत्रचित्त्वयापिवाच्यं तन्न्यायेनज्ञानाभावविषयकत्वमेवसर्वत्रास्त्वित्याह ॥ साक्षीति ॥ साक्षिवेद्येप्रातिभासिके(शुक्तिरूप्यादौ)अज्ञानसुखादौशुक्तिरूप्यादौचभावरूपाज्ञा नंनांगीकृतं अज्ञानसुखाद्यावरकाज्ञानांगीकारेसाक्षिरूपशुद्धचैतन्यस्याज्ञानानिवर्तकत्वादंतःकरणवृत्तेरेवतन्निवर्तकत्वात्तस्याश्च सुखादिविषयेऽभावात्तन्निवृत्तिरेवनस्यात्। ततश्चतज्ज्ञानमेवनस्यात्। अतस्तदभावेसुखंनजानामीत्यादेर्भावरूपाज्ञानविषयकत्वेऽ प्रामाण्यप्राप्त्यातत्प्रामाण्यायज्ञानाभावविषयकत्वमेवांगीकार्यमितिभावः ॥ तथात्वाच्चेति ॥ ज्ञानाभावविषयकत्वस्यैववक्तव्य

साक्षात्तन्निवर्त्यत्वाच्च। अन्यथाविवरणाविद्यानुमानेआद्यविशेषणवैयर्थ्यं ॥७॥ अविद्यालक्षणभंगः ॥ ७ ॥४४॥ यच्चाज्ञानेप्रत्यक्षंमानमित्युक्तं तन्न। त्वन्मतेप्यहमर्थस्यभावरूपाज्ञानानाश्रयत्वेनाहमज्ञोहंनजानामीत्यादेःप्रामाण्यायज्ञानाभावविषयत्वावश्यंभावात्। साक्षिवेद्यसुखदुःखाज्ञानादौप्रातिभासिकेचभावरूपाज्ञानाभावेनसुखंनजानामिशुक्तिरूप्यंनजानामीत्यादेः ज्ञानाभावविषयत्वेवक्तव्येत्वदुक्तमर्थंनजानामीत्यादेरपितथात्वाच्च।

SGDF
Sri Gargeshwari Digital Foundation

त्वादित्यर्थः। किंचनजानामीतिप्रत्यक्षस्यसर्वत्रापिभावरूपाज्ञानविषयकत्वेपरोक्षतोज्ञातेपिधर्मादौनजानामीत्यनुभवःस्यात् भावरूपाज्ञानसद्भावात्। नचपरोक्षाज्ञानेनाज्ञानस्यनिवृत्तत्वात्तथाऽनुभवाभावइतिवाच्यं। त्वन्मतेपरोक्षवृत्तेरज्ञानानिवर्तकत्वात् तथात्वेऽज्ञानस्यनिवृत्तत्वेनापरोक्षचित्संबंधाद्विषयस्याप्यापरोक्ष्यंस्यात्। अतोज्ञानाभावविषयकत्वमेववाच्यं परोक्षज्ञानेनतुज्ञानाभावस्यनिवृत्तत्वान्नजानामीतिव्यवहाराभावोयुक्तः। तथाचतन्न्यायेनसर्वत्रापिज्ञानाभावविषयकत्वमस्त्वित्याशयेनाह॥ त्वन्मतइति॥ किंचत्वदुक्तमर्थंनजानामीत्यादेःप्रत्यक्षस्यज्ञानाभावविषयकत्वमेववाच्यं नभावरूपाज्ञानविषयकत्वं तथात्वेऽप्रामाण्या

त्वन्मतेपरोक्षवृत्तेर्विषयावरकाज्ञानानिवर्तकत्वेनपरोक्षतोज्ञातेपिनजानामीत्यनुभवापाताच्च। त्वन्मते जडावरकाज्ञानाभावेनत्वदुक्तमर्थंनजानामीत्यादेरपिप्रामाण्यायज्ञानाभावविषयत्वाच्च। नचजडेआवरणरूपातिशयाभावेपिविक्षेपरूपातिशयस्यसत्त्वादज्ञानविषयतास्तीतिनजानामीत्यनुभवइतिवाच्यं।

पत्तेः। त्वन्मतेअज्ञानस्यविषयावरकतयाविषयगतत्वांगीकारात् जडेचप्रकाशप्रसक्तेरेवाभावेनप्राप्तप्रकाशप्रतिबंधरूपावरणकृत्याभावेनभावरूपाज्ञानायोगात्। अतोभावरूपाज्ञानाभाववत्यर्थेतदवगाहित्वेप्रत्यक्षस्याप्रामाण्यापत्त्यातत्प्रामाण्यायज्ञानाभावविषयकत्वमेववाच्यमित्याह॥ त्वन्मतइति॥ जडेविषये। अज्ञानस्येतिशेषः। आवरणरूपोयोतिशयःफलंकृत्यमितियावत्॥ विक्षेपेति॥ तदाकारप्रतिभासरूपेत्यर्थः॥ नजानामीति॥ तथाचभावरूपाज्ञानविषयकत्वेनैवप्रामाण्यमस्त्वितिभावः

SGDF Sri Gargeshwari Digital Foundation

॥ विक्षेपेति ॥ घटाद्यतदाकारप्रतिभासरूपकार्यसद्भावेनतत्कारणतयाभावरूपाज्ञानसत्वमंगीकार्यं तथाचघटंनजानामीत्यनुभ
वःस्यादितिभावः । नन्विदमयुक्तं अपरोक्षतोघटत्वेनघटस्यज्ञातत्वेनयोग्यतानिश्चयात्तत्रप्रयुज्यमानंवाक्यंअयोग्यतानिश्चयेन
स्वार्थाबोधकमितिविक्षेपकारीनेतिचेत् सत्यं । एवंहीदंयोज्यं अपरोक्षतएकेनघटोघटत्वेनज्ञातः अयंघटइतिवाक्याभासाच्चविक्षे
परूपंकार्यं येनघटोऽपरोक्षतोघटत्वेनज्ञातस्तस्यायोग्यतानिश्चयाभावोनसंभवत्येव ततश्चघटेविक्षेपरूपकृत्यसद्भावेनाज्ञानस्थि
तिप्राप्त्यायेनघटत्वेनापरोक्षतोघटोज्ञातस्तस्यापिघटंनजानामीत्यनुभवःस्याद्विषयेऽज्ञानस्यसत्वादित्यर्थइत्याहुः । यस्यविक्षेपस्त

अपरोक्षतोघटत्वेनज्ञातेपिघटेऽयंपटइतिवाक्याभासाद्विक्षेपसद्भावेपिघटंनजानामीत्य
नुभवाभावात् । ननुजडेनजानामीत्यनुभवस्यजडावच्छिन्नंचैतन्यंविषयइतिचेन्न निरसि
ष्यमाणत्वात् वृत्तिःचिदुपरागार्थेतिमतेजडावच्छिन्नचैतन्यावरकाज्ञानस्याप्यभावाच्च ।

स्यभवत्येवायमनुभवः यस्यापरोक्षतोनिश्चयस्तस्यतुभवत्येवेतिकथमेतदितिविचार्यमस्ति ॥ जडेविषयेनजानामीति ॥ जडे
आवरणरूपकृत्याभावेनतत्राज्ञानाभावेपिजडावच्छिन्नचैतन्येएवमयाऽज्ञानांगीकारात्तस्यस्वप्रकाशत्वेनप्रकाशप्रसक्तौतत्प्रतिबं
धकतयावरणकृत्यसद्भावात् । तथाचत्वदुक्तमर्थंनजानामीत्यादेर्भावरूपाज्ञानविषयकत्वमेवसंभवतीतिभावः ॥ निरसिष्यमा
णत्वादिति ॥ अज्ञानसिद्धौजडसिद्ध्यातदवच्छिन्नचैतन्यसिद्धिः । तत्सिद्धौचतद्विषयाज्ञानसिद्धिरित्यन्योन्याश्रयत्वेनेत्यर्थः ॥ ३०९ ॥
॥ वृत्तिरिति ॥ अज्ञानावृतचैतन्यमेवाधिष्ठानंतस्यचासंगत्वेनविषयसंबंधाभावाद्वृत्तिश्चितोविषयोपरागमात्रमेवकरोति नाज्ञा

नंनाशयतीतिमतेजडावच्छिन्नेऽनावृतचैतन्येतदावरकाज्ञानाभावेनत्वदुक्तमर्थंनजानामीत्यादिप्रत्यक्षस्यज्ञानाभावविषयकत्वमेवे
तिवाच्यं अन्यथाऽप्रामाण्यापत्तेरित्यर्थः ॥ भावरूपेत्यादि ॥ अहमज्ञइतिभावरूपाज्ञानविषयकतयात्वदभिमतस्यप्रत्यक्षस्य
मयिज्ञानंनास्तीतिज्ञानाभावविषयकप्रत्यक्षस्यचनविषयभेदःप्रतीयते किंतुअघटंभूतलंभूतलेघटोनास्तीतिप्रत्यक्षयोर्यथाएकत्रघ
टाभावोविशेषणंभूतलंविशेष्यं अपरत्रतुभूतलंविशेषणंघटाभावोविशेष्यमितिविशेषणविशेष्यभावव्यत्यासएवप्रतीयते नविषयभे
दः एवमिहापिएकत्राज्ञानंविशेषणं आत्माविशेष्यः अपरत्रतुआत्माविशेषणं ज्ञानाभावोविशेष्यइतिविशेषणविशेष्यभावव्यत्या

भावरूपाज्ञानविषयत्वेनाभिमतस्याहमज्ञइतिज्ञानस्यज्ञानाभावविषयत्वेनाभिमतात्मयिज्ञानंनास्ती
तिज्ञानादघटंभूतलमितिज्ञानस्यभूतलेघटोनास्तीतिज्ञानादिवद्विशेषणविशेष्यभावव्यत्यासंविनाइच्छा
द्वेषाभावज्ञानयोरिवविषयभेदाप्रतीतेश्च । प्रतियोगिज्ञानाज्ञानाभ्यांज्ञानाभावज्ञानदूषणंतुस्वव्याहतं

सएवप्रतीयतेनविषयभेदः तत्रव्यतिरेकेणदृष्टांतः॥ इच्छेति ॥ यथाइच्छाद्वेषाभावज्ञानयोरिच्छाद्वेषाभावरूपोविषयभेदःप्रतीयते
तथानेत्यर्थः । एवंचाहमज्ञइतिप्रतीतेर्मयिज्ञानंनास्तीत्यत्रप्रतीयमानज्ञानाभावातिरिक्ताज्ञानविषयकत्वांगीकारेऽघटंभूतलमितिप्र
तीतेरपिभूतलेघटोनास्तीत्यत्रप्रतीयमानात्घटाभावादतिरिक्तएवाघटोविषयइत्यंगीक्रियतामित्यतिप्रसंगःसूचितोभवतीतिध्येयं
॥ प्रतियोगीति ॥ अहमज्ञइतिप्रतीतेर्ब्रह्मज्ञानाभावविषयकत्वेप्रतियोगिभूतज्ञानाज्ञानेज्ञानाभावज्ञानानुपपत्त्यातज्ज्ञानेवाच्येत

SGDF
Sri Gangadhar... Foundation

स्वविषयनिरूप्यत्वेनविषयस्यब्रह्मणोपिज्ञातत्वात्तज्ज्ञानाभावज्ञानायोगइतिदूषणमित्यर्थः। स्वव्याहतिमेवोपपादयति ॥ भावरूपेति ॥ इदानीमित्यादिविशेषणंब्रह्मज्ञानप्रागभावसत्वावश्यकत्वोपपादनायेतिज्ञातव्यं । ब्रह्मज्ञानप्रागभावाभावेब्रह्मज्ञानसद्भावप्राप्त्याइदानींवेदांतश्रवणादेर्वैयर्थ्यापातइत्याशयः । तथाचेदानींब्रह्मज्ञानप्रागभावोस्तीतिज्ञात्वैवकिलवेदांतश्रवणाद्यनुष्ठीयते तथाचप्रागभावस्यप्रतियोगिज्ञानाधीनज्ञानत्वेनप्रतियोगिभूतब्रह्मज्ञानज्ञानाभावेप्रागभावस्यज्ञातुमशक्यत्वात्तज्ज्ञानेवाच्येतस्यविषयनिरूप्यत्वेनब्रह्मणोपिज्ञातत्वात्तज्ज्ञानाभावज्ञानंनप्रत्यक्षेण येनप्रतियोगिज्ञानापेक्षास्यादितिस्वव्याहतमित्यर्थः । स्वव्याहति

भावरूपाज्ञानवादेपिइदानींवेदांतश्रवणादिसाध्यमोक्षहेतुब्रह्मज्ञानप्रागभावस्यसत्त्वेन
तज्ज्ञानस्यत्वयापिवक्तव्यत्वात् नचभावरूपाज्ञानेनलिंगेनज्ञानाभावानुमेतिवाच्यं ।

माशंक्यनिराकरोति॥ नचेति॥ अयमर्थः। ब्रह्मज्ञानाभावज्ञानंनप्रत्यक्षेण येनप्रतियोगिज्ञानापेक्षास्यात् किंत्वनुमानेन । नच तत्रलिंगाभावः भावरूपाज्ञानस्यैवलिंगत्वात् अभावप्रत्यक्षत्वावच्छेदेनैवप्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानस्यहेतुत्वं नाभावानुमित्यवच्छेदेनापि । अनुमितेर्व्यापकतावच्छेदकप्रकारकव्यापकज्ञानाधीनत्वेनायमभाववानित्यनुमितिःप्रतियोगिज्ञानाभावेपिभवत्येव तथाशब्दस्यापिशक्यतावच्छेदकप्रकारकज्ञानजनकत्वेनाभावइतिपदाज्जायमानेप्रतियोगिज्ञानानपेक्षणात् अतोहं ब्रह्मज्ञानाभाववान्अज्ञानवत्त्वादित्यनुमानेनज्ञानाभावानुमानांगीकारात् तत्रचप्रतियोगिज्ञानानपेक्षणात्नव्याहतिरितिभावः ।

SGDF
Sri Gargeshwari Digital Foundation

कुतोनवाच्यमितिचेदनुभवबाधादित्याह ॥ वृत्तीति ॥ प्रतियोगितदभावयोरेकेंद्रियग्राह्यत्वादितिभावः ॥ अनुपलब्ध्येति ॥ करणेनेत्यर्थः । षष्ठप्रमाणवादिभाट्टरीत्योक्तमितिध्येयं ॥ झडितीति ॥ "झडित्येवपरिज्ञानान्नलिंगोद्भवतामते" तिवचनात् । अनुमापकत्वांगीकारेऽनुभवविरोधइतिभावः ॥ त्वन्मतइति ॥ ज्ञानाभावःसर्वत्रानुमानवेद्यइतिवदताजडेतावज्ज्ञानाभावज्ञानंअनुमानेनेतिवक्तव्यं तच्चाऽयुक्तं जडेआवरणकृत्याभावेनभावरूपाज्ञानाख्यलिंगाभावादितिभावः । ननुतत्रापिविक्षेपाख्यकार्यसद्भावेनभावरूपाज्ञानसद्भावाज्ज्ञानाभावानुमानंसंभवत्येवेत्यस्वरसादाह ॥ अपरोक्षतइति ॥ भावरूपेति ॥ अपरोक्षभावरूपा

वृत्तिज्ञानस्यसाक्षिवेद्यत्वेनतदभावस्यापिदुःखाद्यभाववत्साक्षिणाअनुपलब्ध्यावाझडितिप्रतीतेः।
त्वन्मतेजडेभावरूपाज्ञानरूपलिंगाभावाच्च अपरोक्षतोज्ञातेभावरूपाज्ञानाभावेनतत्रपरोक्षज्ञानाभा
वासिद्ध्यापाताच्च । दुःखादौप्रातिभासिकेचभावरूपाज्ञानाभावेनदुःखादिज्ञानाभावप्रतीत्ययोगाच्च।

ज्ञानस्यतन्निवर्त्यत्वेनलिंगाभावादितिभावः । अपरोक्षतोज्ञातेज्ञानाभावएवनास्तीत्यतःपरोक्षेत्युक्तं । प्रातिभासिके रूप्यादौ प्रातिभासिकदुःखादिपदार्थस्यसाक्षिवेद्यत्वात्तद्विषयकाज्ञानांगीकारेतन्निवर्तकांतःकरणवृत्तेस्तत्राभावेनशुद्धचैतन्यस्यानिवर्तकतयाऽज्ञाननिवृत्त्ययोगेनप्रातिभासिकज्ञानाभावापत्तेःअतस्तत्रदुःखादिविषयकभावरूपाज्ञानवत्त्वादित्यनुमानेनदुःखादिज्ञानाभावप्रतिपत्त्ययोगइत्यर्थः।अतःसाक्षिप्रत्यक्षेणदुःखाभावप्रतिपत्तिर्वाच्या तत्रस्वव्याहतिरेवेतिभावः । अस्तुवानुमित्यैवज्ञानाभावज्ञानं तथापिस्वव्याहतिःस्यादेव।अहंज्ञानाभाववानित्यत्राधिकरणीभूतात्मज्ञानाभावेपक्षज्ञानाभावेनानुमित्यभावापत्तेस्तज्ज्ञानेवाच्येज्ञानसा

SGDF
Sri Gargeshwari Digital Foundation

मान्याभावानुमित्ययोगात् । ननुमास्तुधर्मिज्ञानं किंतेनब्रह्मविषयकज्ञानाभावानुमितिस्तावद्युक्तैवेतिचेत्तर्हिप्रतियोगिभूतब्रह्मज्ञान ज्ञानाभावेतदभावानुमित्ययोगात्तज्ज्ञानेवाच्येतस्यविषयनिरूपणत्वेनविषयस्यब्रह्मणोपिज्ञातत्वात्तद्विषयकज्ञानाभावानुमित्ययोगएव । नचप्रतियोगिज्ञानमभावप्रत्यक्षेहेतुर्नानुमित्यादावित्युक्तमितिवाच्यं। तत्रापिप्रतियोगिविशेषघटिताभावज्ञानमात्रेप्रतियोगिज्ञानस्यहेतुत्वमावश्यकमेवेतिकृतेचानुमितेर्ब्रह्मज्ञानाभावविषयकत्वेनप्रतियोगिविशेषघटिताभावविषयकत्वात्प्रतियोगिज्ञानस्यावश्यकत्वमेव। तथाचस्वव्याहतिरित्याशयेनाह॥ प्रतियोग्यादीति ॥ किंचैवंस्वव्याहत्याऽज्ञानज्ञानमपिदुर्घटंस्यात् । नचतस्यभा

प्रतियोग्यादिज्ञानाज्ञानाभ्यामनुमित्यापिज्ञानाभावस्यदुर्ग्रहत्वाच्च ।
अपिचभावरूपाज्ञानमपिनजानामीतिज्ञानविरोधित्वेनैवभाति।

वरूपत्वेनप्रतियोगिज्ञानापेक्षायाअभावात्कथंदौर्घट्यमितिवाच्यं अज्ञानंतावज्ज्ञानविरोधित्वेनैवप्रतीयतइतितवापिसंमतं एवंचप्रतियोगिज्ञानाज्ञानाभ्यांदौर्घट्याभावेपिविरोधनिरूपकीभूतज्ञानस्यज्ञानाज्ञानाभ्यामेवदौर्घट्यं विरोधनिरूपकीभूतस्यज्ञानस्याज्ञानेतन्निरूपितविरोधस्यैवज्ञातुमशक्यत्वेनतद्विरोध्यज्ञानज्ञानायोगः तज्ज्ञानेतुविरोधनिरूपकीभूतज्ञानविषयतयाब्रह्मणोपिज्ञातत्वाद्ब्रह्मज्ञानविरोध्यज्ञानस्यैवाभावेनाज्ञानस्यज्ञानायोगइतिस्वव्याहतिःस्यादेव । ननुस्यादिदंयद्यज्ञानंज्ञानविरोधित्वेनप्रतीयेत नचैवं अतोनदोषइत्याशंकायांअज्ञानस्यज्ञानविरोधित्वेनैवप्रतीतिंतावदुपपादयति ॥ अपिचेत्यादिना ॥ ज्ञानविरोधित्वेनै ॥ ३११ ॥

वेति ॥ नञोविरुद्धार्थत्वाज्ज्ञाधात्वर्थभूतज्ञानविरोधित्वंप्रतीयतइत्यर्थः । ननुयदाऽज्ञानंनजानामीतिप्रतीयते तदानञुल्लेखाज्ज्ञानविरोधित्वेनभानं । यदातुमुग्धोस्मीतिप्रतीयते तदाकथंज्ञानविरोधित्वेनभानं नञुल्लेखाभावादित्यतआह ॥ मुग्धोस्मीत्यादावपीति ॥ मोहोऽज्ञानंतद्वानस्मीत्यर्थः । यथाप्रलयादिशब्देषुनञोनुल्लेखेपिध्वंसोगम्यते एवमत्रापिनञोनुल्लेखेपिज्ञानविरोधित्वंप्रतीयतएवेत्यर्थः ॥ अतएवेति ॥ नञोनुल्लेखेपितदर्थस्यप्रतीयमानत्वादेवेत्यर्थः ॥ उक्तंचेति ॥ अज्ञानस्यज्ञानविरोधित्वेनप्रतीयमानत्वमित्यर्थः ॥ द्वयेति ॥ आश्रयविषयेत्यर्थः । ज्ञानपर्युदासेन ज्ञानविरोधेन । तथाचाश्रयविषयरूपद्वयसापेक्षंयज्ज्ञा

मुग्धोस्मीत्यादौतुप्रलयादिशब्देष्विवनञनुल्लेखमात्रं अतएवज्ञानाभावाभिप्रायेणापिमुग्धोस्मीत्युच्यते । उक्तंचविवरणे "अज्ञानमितिद्वयसापेक्षज्ञानपर्युदासेनाभिधानादिति" । अन्यथाह्यज्ञानस्यज्ञानविरो
ऽ धोप्रामाणिकःस्यात् । तथाचविरोधनिरूपकभूतज्ञानस्यज्ञानाज्ञानाभ्यामज्ञानस्यापिज्ञानंदुर्घटंस्यात् ।

नंतद्विरोधेनैवाज्ञानमुच्यतइत्यर्थः ॥ अन्यथेति ॥ अज्ञानस्यज्ञानविरोधित्वेनप्रतीत्यनंगीकारइत्यर्थः । अज्ञानस्यज्ञानविरोधः कुतइतिशंकायांतथाप्रतीतिरेवतत्रप्रमाणत्वेनवक्तव्या तदनंगीकारेविरोधोप्रामाणिकएवस्यादित्यर्थः ॥ तथाचेति ॥ एवमज्ञानस्यज्ञानविरोधित्वेनप्रतीयमानत्वेसिद्धेसतीत्यर्थः । ननुनाज्ञानंविरोधनिरूपकज्ञानज्ञाननियतज्ञानं अज्ञानमित्यादिशब्दैस्तत्प्रतीतौतन्नियमेपितमोनीहारादिशब्दैःसामान्यतस्तत्प्रतीतौविरोधस्यैवाप्रतीयमानत्वेनतन्निरूपकज्ञानज्ञानानपेक्षणादित्यतोत्रापिमु

SGDF
Foundation

ग्धोस्मीत्यादाविवनञोऽनुल्लेखमात्रमितिसमाधानेसत्येवसमाधानांतरमाह ॥ ज्ञानाभावोपीति ॥ यदाज्ञानाभावोपिज्ञानाभाव त्वेनैवप्रतीयते तदैवप्रतियोग्यादिज्ञानापेक्षानियमेपिप्रमेयत्वादिनारूपेणसामान्यतःप्रतीतौतदपेक्षाभावान्नत्वद्दूषणावकाशइत्य पिवक्तुंसुशकत्वादितिभावः। ननुयथानिपुणेकुशलशब्दोरूढएव नतुकुशंलातीतिव्युत्पत्त्यायौगिकः एवंनज्ञानमज्ञानमितिअज्ञान शब्दोनयौगिकः येनावयवार्थभूतज्ञानविरोधस्यभानमावश्यकंस्यात्। नचैवं किंतुरूढएवेत्याशंकापिनिरस्तेत्याह॥ एतेनेति ॥ एते नेत्युक्तंविशदयति ॥ वृत्तीति ॥ तद्विरुद्धत्वोपपादनायोक्तं ॥ वृत्तिज्ञाननिवर्त्यस्येति ॥ कॢप्तेति ॥ कुशलादिशब्देतु"निपु

ज्ञानाभावोपिहिप्रमेयत्वादिनाज्ञानेप्रतियोग्यादिज्ञानानपेक्षः। एतेननिपुणेकुशलादिशब्दवत्भा
वरूपज्ञानेअज्ञानशब्दोरूढइतिनिरस्तं।वृत्तिज्ञाननिवर्त्यस्याज्ञानस्यतद्विरुद्धत्वेनकॢप्तावयवशक्त्यै
वोपपत्तौसमुदायशक्तिकल्पकाभावात्। शब्दाप्रयोगेपिनजानामीतिप्रत्यक्षेणज्ञानविरोधप्रती
तेश्च। एवंच"अभावइवभावेपिज्ञानविरोधिता। नजानामीत्यतश्चोद्यपरिहारौसमौतयोः" ॥

णःकुशलःकृती"त्यभिधानेनसमुदायशक्तिःकॢप्ता योगस्तुकल्प्यइतितत्ररूढ्यायोगबाधः इहतुयोगएवकॢप्तोरूढिस्तुकल्प्या अतः प्रोक्षण्यधिकरणन्यायेनरूढ्यपेक्षयायोगएवप्रबलइतिविरोधभानमावश्यकमितिभावः। अस्त्वज्ञानशब्दोयौगिकोरूढोवा। अयं चविचारःशब्दएव यदातुप्रत्यक्षेणअज्ञानंप्रतीयते तदाकथमितिचे त्तदापिज्ञानविरोधित्वेनैवाऽज्ञानंप्रतीयतइत्याह ॥शब्देति॥ अन्यथाऽज्ञानस्यज्ञानविरोधोनसिध्येदितिभावः। संगृह्णाति ॥ एवंचेति ॥ भावे भावरूपाज्ञाने तयोः ज्ञानभावाभावयोरि

SGDF
Sri Gargeshwari Digital Foundation

त्यर्थः । प्रतियो(गीभूतज्ञान)गिज्ञानज्ञानभावाभावाभ्यांचोद्यपरिहारौ। किंचभावरूपाज्ञानस्यब्रह्मविषयकमज्ञानमितिसविषयता नुभूयमानत्वाच्चतत्रापिविकल्प्यदूषणीयमित्याह ॥ अपिचेति ॥ अज्ञानज्ञानेति ॥ विषयावच्छिन्नाज्ञानज्ञानायोगादित्यर्थः ॥ ज्ञानेचेति ॥ अवच्छेदकीभूतब्रह्मरूपविषयज्ञानइत्यर्थः ॥ अज्ञानस्येति ॥ ब्रह्मविषयकाज्ञानस्येत्यर्थः । उभयत्रापिपरिहार माशंकते ॥ नन्विति ॥ यदुक्तंयौगिकत्वेननञर्थविरोधनिरूपकीभूतज्ञानस्यज्ञानाज्ञानाभ्यांअज्ञानस्यज्ञानंदुर्घटमिति तत्रवदा मः । विरोधनिरूपकीभूतज्ञानज्ञानमस्तीति तत्रविरोधनिरूपकीभूतज्ञानविषयतयाब्रह्मणोपिज्ञातत्वाद्ब्रह्मज्ञानविरोध्यज्ञानस्यैवा

अपिचभावरूपाज्ञानावच्छेदकविषयस्याज्ञानेअज्ञानज्ञानायोगात्ज्ञानेचाज्ञानस्यै
वाभावात्कथंभावरूपाज्ञानज्ञानं । ननुविरोधनिरूपकज्ञानावच्छेदकस्यचविष
यस्यज्ञानंसाक्षिरूपमितिनतद्भावरूपाज्ञानविरोधि वृत्तेरेवतद्विरोधित्वादितिचेत्

भावेनाज्ञानज्ञानायोगइति । तत्रवदामः विरोधनिरूपकीभूतज्ञानावच्छेदकस्यब्रह्मणोज्ञानंसाक्षिरूपमस्त्येव। ननुतद्विरोध्यज्ञाना योगइतिचेन्न साक्षिचैतन्यस्याज्ञानस्फोरकत्वेनाज्ञानाविरोधित्वात् प्रमाणजन्यांतःकरणवृत्तेरेवतद्विरोधित्वात् तस्याश्चाभावात्। एवंचब्रह्मज्ञानस्यसाक्षिरूपस्यसत्वेपितदविरोध्यज्ञानसंभवादज्ञानज्ञानंयुक्तमेव तथाचनजानामीत्यस्यसाक्षिणाज्ञातेब्रह्मणिभाव रूपाज्ञानमस्तीत्यर्थः । तथाऽज्ञानशब्दरूढिपक्षेभावरूपाज्ञानावच्छेदकविषयज्ञानाज्ञानाभ्यांभावरूपाज्ञानज्ञानायोगइतियदु क्तं तत्रापिवदामः।अज्ञानावच्छेदकस्यब्रह्मरूपविषयस्यज्ञानंसाक्षिरूपमस्त्येव तच्चाज्ञानाविरोध्येव अतस्तदविरोध्यज्ञानज्ञानंयुक्त

SGDF Sri Gargeshwari Digital Foundation

मेव साक्षिविषयब्रह्मविषयकभावरूपमज्ञानमस्तीत्यर्थोपपत्तेरितिभावः ॥ सममिति ॥ प्रतियोगिभूतब्रह्मज्ञानज्ञानभावाभावा भ्यांनजानामीतिब्रह्मज्ञानाभावज्ञानंनसंभवतीतियदुक्तं तत्रवयमपिवदामः।प्रतियोगिभूतब्रह्मज्ञानज्ञानंसाक्षिरूपमिति। ननुतर्हिब्र ह्मज्ञानावच्छेदकीभूतस्यब्रह्मरूपविषयस्यापिज्ञातत्वात्तदज्ञानासंभवइतिचेन्न नजानामीत्यस्यवृत्तिज्ञानाभावविषयकत्वात् एवंचन जानामीत्यस्यास्मन्मतेपिसाक्षिणाज्ञातेब्रह्मणिप्रमाणजन्यवृत्तिज्ञानंनास्तीत्यर्थोपपत्तेरित्यर्थः। एवंप्रतिबंद्योत्तरमभिधायपरमुखेनैव समाधानंकथयति॥तस्मादिति॥ अवच्छेदकस्येति॥विरोधनिरूपकीभूतज्ञानावच्छेदकस्यब्रह्मरूपविषयस्येत्यर्थः।सामान्यतःसा

अ समं भावपक्षेपिअवच्छेदकस्यविषयस्यज्ञानंसाक्षिरूपं । नजानामीतिधीस्तु
वृत्तिज्ञानाभावविषयेतिसुवचत्वात् । तस्मात्त्वयाप्यवच्छेदकस्यविषयस्य
सामान्यतोज्ञानेपिविशेषेभावरूपाज्ञानमितिवाच्यं । तत्समंज्ञानाभावेपि।

मान्याकारे विशेषतः विशेषाकारे एवंचनजानामीत्यस्यसामान्यतोज्ञातेब्रह्मणिविशेषाकारविषयकंभावरूपाज्ञानमस्तीत्यर्थोवक्तव्यः ॥तत्सममिति॥एवमेवनजानामीत्यस्यसामान्यतोज्ञातेब्रह्मणिविशेषज्ञानंममनास्तीत्यर्थोपपत्तेरित्यर्थः।ननुतर्ह्यत्रापिदूषणमुक्तंवि शेषज्ञानाभावविषयकत्वेप्रतियोगिभूतस्यज्ञानस्यज्ञानमस्ति नवेति।नेतिपक्षेऽभावज्ञानायोगः।आद्येज्ञानावच्छेदकतयाविशेषस्यापि ज्ञातत्वेनतज्ज्ञानाभावस्यैवायोगेनतज्ज्ञानायोगइतीतिचेन्न।यदुक्तंत्वयाविशेषज्ञानज्ञानमस्ति नवेति तत्रनास्तीतिब्रूमः।तर्ह्यभावज्ञा नेप्रतियोगिज्ञानस्यहेतुत्वेनविशेषज्ञानाभावज्ञानेविशेषज्ञानरूपप्रतियोगिज्ञानस्यकारणत्वात्। तदभावेप्रतियोगिज्ञानाभावेनतद्वि

शेषज्ञानाभावज्ञानायोगइतिचेत्तत्राह ॥ तद्विशेषज्ञानाभावज्ञानंप्रतीति ॥ ब्रह्मगतविशेषाकारेत्यर्थः ॥ तत्सामान्येति ॥ निरूपणीयाभावप्रतियोगिज्ञानविषयीभूतविशेषसमानाधिकरणसामान्यधर्मविषयकंज्ञानमित्यर्थः । ननुविशेषज्ञानाभावंप्रति सामान्यज्ञानंनप्रतियोगिभूतमितिकथंतस्यविशेषज्ञानाभावज्ञानंप्रतिहेतुत्वंस्यादित्यतआह ॥ अन्वयेति ॥ ज्ञायमानविशेष ज्ञानाभावप्रतियोगिभूतविशेषज्ञानस्यज्ञानाभावेपिसामान्येनतज्ज्ञानेसत्येवविशेषज्ञानाभावज्ञानस्यानुभूयमानत्वादित्यर्थः ॥ न त्विति ॥ यस्यविशेषज्ञानस्याभावोनिरूप्यते तद्विशेषज्ञानमेवतदभावज्ञाने नहेतु र्येनतज्ज्ञानापेक्षास्यादित्यर्थः ॥ वक्ष्यतइ ति ॥ गुहायांकिंचिदस्तीतिसामान्यतोनिश्चयेसत्येवतत्किमितिविशेषेसंदेहोभवति तत्रतद्विशेषसंशयेतत्सामान्यनिश्चयस्यैवहे

तद्विशेषज्ञानाभावज्ञानंप्रतिचतत्सामान्यज्ञानमेवान्वयव्यति
रेकाभ्यांहेतुः नतुतद्विशेषज्ञानमित्यविद्याविषयभंगेवक्ष्यते ।

तुत्वं नतुविशेषनिश्चयस्यापि तथात्वेसंशयानुपपत्तेः एवंतद्विशेषज्ञानाभावज्ञानंप्रतितत्सामान्यज्ञानमेवहेतुः नतुतद्विशेषज्ञानं तथात्वेतद्विशेषज्ञानस्यैवसत्त्वेनविशेषज्ञानाभावस्यविरुद्धत्वेनायोगादित्यादिकंवक्ष्यतइत्यर्थः।पूर्वंनजानामीत्यस्यतद्विशेषज्ञानाभा वार्थत्वेऽस्माभिरभिहितेविशेषज्ञानस्यज्ञानमस्तिनवेतिपृष्टेनेतिपक्षमंगीकृत्यस्वेनसमाहितं। अपरेतुविशेषज्ञानज्ञानमस्त्येव तर्हितद वच्छेदकतयाविशेषस्यापिज्ञातत्वात्तदभावज्ञानायोगइतिचेन्न।विशेषज्ञानंनास्तीत्यस्यविशेषप्रकारकज्ञानंनास्तीत्यर्थः विशेषज्ञानंतु संसर्गमर्यादयास्तीत्यंगीक्रियते।एवंचतार्किकमतेदंडीत्यत्रसंसर्गमर्यादयासंसर्गस्यप्रतीतत्वेपिदंडीतिज्ञानंदंडसंबंधप्रकारकंनभवति

SGDF Sri Gangadharendra Saraswati Foundation

ततश्चसंबंधस्यस्वरूपेणज्ञानेसत्यपिसंबंधप्रकारकज्ञाननिषेधेनदोषः । एवंविशेषस्यस्वरूपेणज्ञानेपिविशेषप्रकारकज्ञाननिषेधएवक्रियते कुतइतिचेत्।विशेषप्रकारकज्ञानस्यैवसंशयादिविरोधित्वात्।तदपिकुतइतिचेत् विशेषप्रकारकसंशयादिविरोधित्वानंगीकारेसर्वत्रसंशयादिस्थलेप्रमेयत्वादिनासामान्याकारेणविशेषज्ञानसद्भावात्संशयादिकंनस्यात् अतःस्वरूपेणविशेषज्ञानेसत्यपिसंशयादिविरोधिभूतंयद्विशेषप्रकारकंज्ञानंतन्ममनास्तीतिनजानामीत्यस्यार्थइत्यंगीकारेनकोपिदोषइत्याहुरित्याह ॥ अपरेत्विति ॥ स्वरूपेणैवेति ॥ विशेषणतयाविशेष्यतयाचयन्नभासते तत्स्वरूपेणभासते संसर्गमर्यादयाभासतइतियावदित्यर्थः । तस्यैव विशेषप्रकारकज्ञानस्यैव । तदनंगीकारेबाधकमाह ॥ संभवतीति ॥ केचित्त्विति ॥ नज्ञानामीत्यस्यब्रह्मज्ञानंनास्तीतिविशेषविषय

अपरेतुविशेषस्यस्वरूपेणज्ञानेपिविशेषप्रकारकज्ञानंनिषिध्यते तस्यैवसंशयादिविरोधित्वात्।
संभवतिहिसर्वत्रप्रमेयत्वाद्याकारेणविशेषज्ञानमित्याहुः । केचित्तुकरतलामलकादिज्ञाने

कज्ञाननिषेधोनार्थः येनपूर्वोक्तविकल्पदूषणावकाशः किंतुब्रह्मज्ञानेविशेषविषयकत्वंनास्तीत्येवार्थः । अत्रचासाधारणधर्मोविशेषपदेनविवक्षितः तथाचज्ञानेऽसाधारणधर्मविषयकत्वंनास्तीतिनिषिध्यतइत्यर्थः । असाधारणधर्मत्वंनामकिमितिशंकायांशिष्यबुद्धिवैशद्यायतन्निर्वक्ति ॥ स्वेति ॥ ननुकुत्राप्यप्रसिद्धस्यशशशृंगादेर्निषेधायोगादेतादृशासाधारणधर्मविषयकत्वंकुत्रप्रसिद्धं यदिहज्ञानेनिषिध्यतइत्यतउक्तं ॥ करतलामलकादिज्ञानइति ॥ स्वेत्यादेरयमर्थः स्वशब्दःसमभिव्याहृतपरः तथाचस्वशब्देन करतलामलकादिज्ञानं तद्विषयःकरतलामलकादिः तदितरत्जगत् तत्प्रतियोगिकव्यावृत्त्यधिकरणंकरतलामलकादिकं तत्राधि

SGDF
Sri Gargeshwari Digital Foundation

करणतास्ति तदवच्छेदकीभूतोधर्मः करतलामलकत्वादिरसाधारणोधर्मइतियावत् तद्विषयकत्वंकरतलामलकादिज्ञानेस्ति । एव मिहापिस्वशब्देब्रह्मज्ञानंग्राह्यं तद्विषयभूतंयत्ब्रह्म तदितरत्जगत् तत्प्रतियोगिकव्यावृत्त्यधिकरणंब्रह्म तन्निष्ठाधिकरणतात्रच्छे दकीभूतोयोधर्मोसाधारणोब्रह्मत्वादिः तद्विषयकत्वंनिषिध्यतइत्यर्थः । अत्रस्वेत्यनुक्त्वाकरतलामलकादिज्ञानविषयेत्येवोक्तौक रतलामलकत्वविषयकत्वंब्रह्मज्ञानेनिषिध्यतइतिस्यात् । तच्चासंगतं । ब्रह्मज्ञानेत्येवोक्तौब्रह्मत्वादिविषयकत्वंब्रह्मज्ञानेनिषिध्यतइ तिस्यात् इदंचान्यत्राप्रसिद्धं अतःस्वेत्युक्तमितिमंतव्यं । साक्षादित्युक्तस्यकृत्यंवक्तुमाह ॥ **नचेति** ॥ **विशिष्टेति** ॥ अर्थवि

स्वविषयेतरप्रतियोगिकव्यावृत्त्यधिकरणतावच्छेदकधर्मविषयत्वादिकंप्रसिद्धमिहज्ञानेनिषि ध्यतइत्याहुः। अन्येतुसाक्षात्त्वदुक्तार्थविषयकंप्रमाणज्ञानंमयिनास्तीत्यर्थः। नचास्यैवाविशिष्ट विषयज्ञानस्यप्रमाणत्वात्तद्विशेषणतयार्थस्यापिप्रमाणेनाधिगमात्स्ववचनव्याघातइतिवा च्यं। अस्यसाक्षात्तद्विषयत्वाभावात् साक्षात्प्रमाणविषयत्वस्यैवचसत्त्वप्रयोजकत्वादित्याहुः।

शिष्टप्रमाणज्ञानविषयकस्याभावज्ञानस्येत्यर्थः ॥ **तद्विशेषणतयेति** ॥ तत्रविशिष्टार्थविषयेऽभावज्ञानेप्रमाणज्ञानविषयतये त्यर्थः ॥ **स्ववचनेति** ॥ अर्थविषयेप्रमाणज्ञानंनास्तीतियदाब्रूते तदापुनरेतज्ज्ञानरूपप्रमाणविषयत्वप्राप्त्यास्ववचनव्याघातइत्य र्थः ॥ **साक्षादिति** ॥ अस्मिन्नभावज्ञानेप्रमाणज्ञानस्यैवनिषेध्यतयासाक्षादविषयत्वादवच्छेदकतयार्थस्याविषयीकृतत्वान्नसाक्षा त्प्रमाणज्ञानविषयत्वमित्यर्थः । ननुयथाकथंचिदेतत्प्रमाणज्ञानविषयतयार्थस्यसत्वप्राप्तेःपुनःप्रमाणज्ञाननिषेधेस्ववचनव्याहति

SGDF
Sri Gargeshwari Digital Foundation

रेवेत्यतआह ॥ साक्षादिति ॥ अन्यथेदंरजतमितिज्ञानवानहमितिज्ञानद्वारानुव्यवसायरूपप्रमाणज्ञानविषयरूप्यस्यापिसत्वं सिद्ध्येदित्यर्थः। ज्ञानावच्छेदकस्यविषयस्याग्रहेपिज्ञानसंभवादभावग्रहोभविष्यतीतिवक्तुमाह॥ किंचेति॥ अज्ञानंअनुमित्यादिवृत्तिविषयोनवा नतावद्द्वितीयइत्याह ॥ अज्ञानमिति ॥ तत्र अज्ञानसद्भावे आदिपदेन"तमआसीदि"तिश्रुत्युक्तिर्ग्राह्या। स्वनिष्ठापरकीयाज्ञानधीःसेत्यर्थः । नस्यात् सर्वथाज्ञानाविषयत्वेशब्दवृत्तिविषयत्वंअनुभूयमानंनस्यादित्यर्थः । आद्येत्वाह ॥ वृत्ती

किंचाज्ञानंवृत्त्यग्राह्यंचेत् तत्रानुमानाद्युक्तिरयुक्तास्यात् । रहस्यंनजानासीत्यादिपरवाक्यात्स्वनिष्ठाज्ञानधीश्चनस्यात् । वृत्तिग्राह्यंचेत् तदवच्छेदकोविषयोपितयैवगृह्यनेन वा आद्येकथंतत्राज्ञानं त्वन्मतेपिवृत्तेरज्ञानविरोधित्वात् । नचपरोक्षवृत्तिरज्ञानविरोधिनीनेतियुक्तं । परोक्षतोपिज्ञातेकदापिनजानामीत्यननुभवात् । अज्ञानानिवृत्तौपरोक्षे

ति॥ तया स्वग्राहकवृत्त्या॥त्वन्मतइति॥ विषयस्यवृत्तिज्ञानविषयत्वात्वृत्तेरेवचाज्ञानविरोधित्वात्तद्विषयकाज्ञानंनसंभवतीत्यर्थः । नन्वर्थस्यवृत्तिग्राह्यत्वेपितत्राज्ञानंयुक्तं अज्ञानस्यप्रमाणजन्यपरोक्षवृत्तिविषयत्वेनतदवच्छेदकविषयस्यापिपरोक्षवृत्तिविषयत्वात् परोक्षवृत्तेश्चाऽज्ञानाविरोधित्वादित्याशंक्यनिषेधति ॥ नचेति ॥ अननुभवादिति ॥ तथाचपरोक्षवृत्तिरप्यज्ञानविरोधिन्येवेतिभावः। अपरोक्षवृत्तेरज्ञानविरोधित्वानंगीकारेदूषणांतरमाह ॥ अज्ञानानिवृत्ताविति ॥ परोक्षवृत्तेरज्ञानाविरोधित्वे ॥ ३१५ ॥

नपरोक्षवृत्तेःसकाशात्अज्ञानानिवृत्तावित्यर्थः ॥ व्यवहारादीति ॥ आदिपदेनसंस्कारग्रहणं व्यवहारादेरज्ञाननिवृत्तिकार्यत्वादितिभावः । तत्रापरोक्षवृत्त्यैवकेवलवृत्तिमात्रेण । तां अज्ञाननिवृत्तिं । ननुअपरोक्षस्थलेऽज्ञानानिवृत्त्यंगीकारेऽभिव्यक्तापरोक्षचित्संबंधाभावेनविषयस्यापरोक्ष्यंनसिद्ध्येदित्यतआह ॥ विषयस्येति ॥ चैतन्यविषयस्यापरोक्ष्यंचैतन्याभिव्यंजकत्वार्थंआवश्यकेनेंद्रियजन्यत्वप्रयुक्तेनवृत्तिगतेनसाक्षात्कारत्वविशेषेणैवोपपन्नमित्युक्तंदृश्यत्वभंगइत्यर्थः। परोक्षवृत्त्याज्ञानानिवृत्तौबाधकांतरमाह ॥ परोक्षवृत्त्येति ॥भ्रमेति॥ अज्ञानस्यैवानिवृत्तत्वेनभ्रमोपादानाज्ञानस्यसत्वादितिभावः। परोक्षवृत्त्याप्य

व्यवहाराद्ययोगाच्च । यदिचतत्राज्ञाननिवृत्तिंविनावृत्त्यैवव्यवहारसंस्कारादि तस्यपरोक्षेपितांविनावृत्त्यैवतत्स्यात्। विषयस्यापरोक्ष्यंत्वावश्यकाद्वृत्तिगतविशेषादेवेत्युक्तं। परोक्षवृत्त्या परोक्षभ्रमानिवृत्तिप्रसंगाच्च अनुमित्यावह्न्यज्ञानंशास्त्रश्रवणेनचधर्माद्यज्ञानंनिवृत्तमित्यनुभवाच्च। तस्यज्ञानाभावविषयत्वेचभावरूपाज्ञानंनसिद्ध्येत्। परोक्षतोज्ञानेप्यपरोक्षभ्रमोस्मन्मतेउपाध्यादिदोषाद्युक्तः

ज्ञाननिवृत्तेरनुभूयमानत्वात्तद्विरोधश्चेत्याह ॥ अनुमित्येति ॥ तस्येति ॥ अनुभवस्येत्यर्थः॥ ज्ञानाभावेति ॥ वह्निधर्मादिज्ञानाभावोनिवृत्तइतिवह्निधर्मादिज्ञानाभावविषयकत्वइत्यर्थः ॥ भावरूपेति ॥ भावरूपाज्ञानसाधकोयोनुभवःकथ्यते तस्यापिज्ञानाभावविषयकत्वस्यैववक्तुंशक्यत्वादितिभावः । ननुपरोक्षवृत्तेरज्ञाननिवर्त्तकत्वांगीकारेशंखःश्वेतःशंखत्वादित्यनुमितिरूपपरोक्षवृत्त्याभ्रमोपादानस्याज्ञानस्यनाशापत्त्याऽपरोक्षभ्रमानुवृत्तिर्नस्यादित्यतआह॥ परोक्षतइति ॥ उपाधीति ॥ असन्म

SGDF

तेभ्रमस्यांतःकरणरूपोपाध्युपादानकत्वेनाज्ञानानुपादानकत्वादित्यर्थः । प्रत्युतायंदोषस्त्वन्मतएवेत्याह ॥ त्वन्मतेत्विति ॥ स नस्यादिति ॥ परोक्षवृत्तेरज्ञाननिवर्तकत्वस्योपपादितत्वाच्छंखत्वानुमित्याश्वैत्याज्ञानस्यनष्टत्वात्सभ्रमोनस्यादितिमयैवत्वांप्र त्यापाद्यते नतवापादनावकाशइत्याशयः । अज्ञानविषयकानुमितिशाब्दवृत्त्यातदवच्छेदकोविषयोनगृह्यतइतिपक्षेआह ॥ अंत्य इति ॥ तद्वदेवेति ॥ अवच्छेदकीभूतविषयाग्रहणेपियथाभावरूपाज्ञानंगृहीतंतद्वदेवेत्यर्थः ॥अवच्छेदकेति॥ प्रतियोगितयाऽ वच्छेदकेत्यर्थः । एतावंतंकालंनकिंचिदहमवेदिषमितिपरामर्शसिद्धसौषुप्तिकानुभवोप्यत्रमानमित्युक्तं तद्दूषयति ॥ नकिंचिदि

त्वन्मतेतुभ्रमस्याज्ञानोपादानकत्वात्सनस्यादेव।अंत्येतद्वदेवविषयाग्रहणेपिज्ञानाभावावच्छेदकस्य ज्ञानस्यग्रहणसिद्धिः। नकिंचिदहमवेदिषमितिपरामर्शोपिएतावंतंकालंदुःखंनावेदिषंशुक्तिरूप्यंना वेदिषमित्यादिवत्ज्ञानाभावविषयः। नचतदाधर्म्यादिज्ञानाभावादभावज्ञानायोगः। भावरूपाज्ञा नस्याप्यज्ञानत्वेनप्रतीतौतदपेक्षणात्। यदिचविषयसामान्यविशेषितमेवज्ञानंसुषुप्तावज्ञाननिरूपकं

ति ॥ परामर्शः स्मरणंतत्र भावरूपाज्ञानांगीकारेदुःखादेरांतरपदार्थत्वेनतन्निवर्तकांतःकरणवृत्त्ययोगेनतदनिवृत्त्यापत्तेरुक्तत्वेन ज्ञानाभावविषयकत्वमेवतत्रेतिभावः । तदा सुषुप्त्यवस्थायां ॥ धर्म्यादीति ॥ तदानींसर्वज्ञानोपरमादितिभावः ॥ अयोग इति ॥ तथाचतदाज्ञानाभावानुभवान्नपरामर्शस्तद्विषयः किंत्वनुभूतभावरूपाज्ञानविषयएवेत्यर्थः । अज्ञानत्वेनप्रतीतौ ज्ञानवि रोधित्वेनप्रतीतावित्यर्थः । तदपेक्षणात् धर्म्यादिज्ञानापेक्षणात् तस्याप्याश्रयविषयद्वयसापेक्षज्ञानपर्युदासत्वादितिभावः।

SGDF
Sri Gargeshwari Digital Foundation

तथाचतदासर्वज्ञानोपरमाद्विरोधनिरूपकज्ञानविषयादेरप्रतीतेर्ज्ञानविरोधित्वेनभावरूपाज्ञानविषयकत्वमपिसौषुप्तिकानुभवस्यन युक्तमित्यवधेयं । अज्ञानविरोधनिरूपकंज्ञानविरोधित्वेनाज्ञानस्यप्रतीयमानत्वादज्ञाननिष्ठविरोधनिरूपकमित्यर्थः । तथाचविरोधनिरूपकंज्ञानंअज्ञानविषयंसामान्येनोल्लिखतीति नविशेषरूपेऽज्ञानविरोधइत्यर्थः ॥ तर्हीति ॥ अभावप्रतियोगिभूतंज्ञानमपिस्वविषयंसामान्येनोल्लिखदभावनिरूपकमित्यर्थः । तदासुषुप्त्यवस्थायांस्वरूपेणज्ञानविरोधित्वप्रकारौदासीन्येनेत्यर्थः । इदानीं जाग्रदवस्थायां ॥ प्रतियोगीति ॥ नकिंचिद्रूपेणेत्यर्थः ॥ अनुभूयतइति ॥ तथाचैतावंतंकालमित्यादिकंनस्मरण

तर्हितदेवतदाज्ञानाभावनिरूपकमस्तु । ननुतदास्वरूपेणानुभूतमज्ञानमिदानींप्रतियोगिविशेषावच्छेदेनानुभूयतइतिचेत् समंज्ञानाभावेपि । अभावस्यापिप्रमेयत्वादिनाज्ञानेतदनपेक्षणात् । यद्वानायंपरामर्शः किंत्वानुमानिको ज्ञानाभावानुभवः ।

रूपं येनसुषुप्तावविषयादिघटिताज्ञानविरोधित्वेनभावरूपाज्ञानानुभवानुपपत्तिः किंनामतदास्वरूपेणैवाज्ञानमनुभूतंइदानींप्रतियोगिविषयावच्छेदयुक्ततयानुभूयते अतोनोक्तदोषइत्यर्थः ॥ सममिति ॥ सुषुप्तौज्ञानाभावोपिस्वरूपेणैवानुभूतः इदानींप्रतियोगिविशेषावच्छेदयुक्ततयानुभूयतइतिसममित्यर्थः । नन्वभावस्यसंबंधिकत्वात्स्वरूपेणज्ञानमेवनास्तीत्यतआह ॥ अभावस्यापीति ॥ तदनपेक्षणात् प्रतियोग्याद्यनपेक्षणात् तथाचतद्वत्सुषुप्तावपिप्रतीतिर्युक्तेतिभावः । परामर्शः ज्ञानाभावस्मरणमि

SGDF
Sri Gargeshwari Digital Foundation

व्यतिरेक

त्यर्थः । ननुलिंगाभावान्नानुमानिकानुभवइत्यत आह ॥ अवस्थेति ॥ अवस्थाविशेषवत्त्वस्येत्यर्थः । जाग्रत्स्वप्नांतरकालिकाहंज्ञा
नाभाववान् अवस्थाविशेषवत्त्वात् यथाजाग्रदहमित्यवस्थाविशेषवत्त्वस्यलिंगत्वादित्यर्थः । लिंगांतरमाह ॥ **सामग्रीति** ॥ त
त्कालीनोहंज्ञानाभाववान् इंद्रियसंनिकर्षादिरूपतत्सामग्रीशून्यत्वादितिसामग्र्यभावस्यैवलिंगत्वादित्यर्थः। स्वरूपासिद्धोहेतुरित्य
तआह ॥इंद्रियसंप्रसादेनेति॥ सुषुप्तौस्थितस्येंद्रियाणिसम्यग्विकासविशेषरूपप्रमादवंतिभवंति । तेनसुषुप्ताविंद्रियोपरमरूपंका
र्यं तथाचसामग्र्याभावःसिद्धइत्यर्थः । लिंगांतरमाह ॥ प्रातरित्यादिना ॥ तथाचसुप्तौज्ञानंनानुभूतं स्मरणार्हतयाज्ञानतुल्ययो

**अवस्थाविशेषस्यवाइंद्रियसंप्रसादेनतदुपरमानुमानेसामग्र्यभावस्यवाप्रातर्गजाद्यभावइवतत्तु
ल्ययोगक्षेमेआत्मादौस्मर्यमाणेपिनियमेनास्मर्यमाणत्वस्यवालिंगत्वात् । त्वन्मतेप्यहमर्थांशेप
रामर्शत्वाभावात् । सुषुप्तावहमर्थाभावेनान्यानुभूतेअज्ञानांशेप्यहमर्थस्यपरामृष्टत्वायोगाच ।**

गक्षेमेआत्मादौस्मर्यमाणेपिनियमेनास्मर्यमाणात्मांतर्गतत्वाभावादित्यनुमानेनज्ञानाभावानुमानमित्यर्थः । हस्तिहस्तिपयोरुभयोर
नुभवेपितत्रैकस्मिन्दृष्टेपिसंस्कारानुद्बोधेनापरास्मरणदशायांतस्मिन्व्यभिचारवारणायनियमेनेत्युक्तं। प्रातःकालेराजद्वारिगजाभा
वमनुभूयाऽन्यत्रगतः पुनःसायंदृष्ट्वाप्रातरत्रगजोनाभूदितिप्रत्येति तत्रगजाभावज्ञानंनप्रत्यक्षेण प्रतियोगिनःपुरतस्सत्वात्। अत
उक्तलिंगेनैवतदभावानुमानंसिद्धमितिज्ञेयं ॥ त्वन्मतेपीति ॥ नकिंचिदहमवेदिषमित्यस्यनत्वन्मतेप्यहमर्थांशेस्मरणरूपत्वंयुक्तं
सुषुप्तौतद्विलयांगीकारेणाननुभूतत्वादित्यर्थः । किंचनकिंचिदहमवेदिषमितिअज्ञानांशेऽहमर्थस्यपरामर्शत्वंप्रतीयते तन्नयुक्तं सु

षुप्तावहमर्थस्याभावेनाज्ञानस्याहमर्थेनाननुभूतत्वात् । शुद्धचैतन्यमात्रेणैवतस्यानुभूतत्वादित्याह ॥ **सुषुप्ताविति** ॥ अन्येति ॥
अन्येन शुद्धचैतन्येनेत्यर्थः । परामृष्टत्वं स्मृतत्वं । किंचत्वन्मतेऽज्ञानस्मरणमेवायुक्तं तथाहिअज्ञानंकिंवृत्तिप्रतिबिंबितसाक्षि
वेद्यं शुद्धसाक्षिवेद्यंवा नाद्यइत्याह ॥ **सुषुप्ताविति** ॥ तद्वेद्यत्वापातेनेति ॥ वृत्तिप्रतिबिंबितसाक्षिवेद्यत्वापातेनेत्यर्थः । अ
स्त्वितिचेत्तत्राह ॥ वृत्त्यभावेति ॥ वृत्तेःकादाचित्कत्वादितिभावः ॥ असंदेहेति ॥ ज्ञातैकसत्वेनसंदेहादेस्तत्रायोगादितिभावः।
नचाविद्यावृत्तेरनित्यत्वात्तदुपहितसाक्षिरूपस्याज्ञानज्ञानस्याप्यनित्यत्वात्तस्यसंस्कारजनकत्वंभविष्यतीतिशंकापरिहारायवृत्त्य

**सुषुप्तावज्ञानस्याविद्यावृत्तिप्रतिबिंबितसाक्षिवेद्यत्वेजागरणादावपितद्वेद्यत्वापातेनवृत्त्य
भावदशायामज्ञानेऽसंदेहाद्यापत्त्याकेवलसाक्षिवेद्यत्वेवक्तव्येत्वन्मतेनित्यज्ञानस्यसंस्कारा
जनकत्वेनाज्ञानपरामर्शायोगाच । अन्यथातवापिसुषुप्तौज्ञानाभावोनसिद्ध्येत् । भावरू
पाज्ञानेनलिंगेनसोनुमीयतइतिचेन्न । त्वन्मतेजडेभावरूपाज्ञानाभावादित्युक्तत्वात् ।**

भावदशायामित्याद्युक्तमितिज्ञातव्यं । सुषुप्तौज्ञानंनास्तीतिजाग्रदवस्थायामनुमीयतइत्येवंआनुमानिकोज्ञानाभावानुभवइत्यनं
गीकारेबाधकमाह ॥ अन्यथेति ॥ तवापीति ॥ सुप्तौभावरूपाज्ञानवत्ज्ञानाभावोप्यस्ति सनसिद्ध्येत् । प्रतियोग्यादिज्ञाना
भावेनसुषुप्तौप्रत्यक्षेणतदनुभवायोगादितिभावः । शंकते ॥ भावरूपेति ॥ त्वन्मतेविषयसंबंध्यावरणत्वेनविषयनिष्ठत्वेनत
त्रैवजडेऽहमर्थेभावरूपाज्ञानालिंगेनज्ञानाभावानुमानंकार्यं तन्नसंभवतीत्याह ॥ त्वन्मतइति ॥ जडे विषये तदावरकतयेति

[1] सन्देहाद्यापत्त्या इति भाग

SGDF Foundation

यावत् आवरणकृत्याभावादितिभावः । तथाचाहंघटादिज्ञानाभाववान्तद्विषयकभावरूपाज्ञानवत्त्वादित्यत्रासिद्धिः । विक्षेपसद्भावाद्युक्तमेवाज्ञानमित्यस्वरसादाह ॥ साक्षीति ॥ इच्छादौ विषये । तदा सुषुप्तौ । इच्छादौभावरूपाज्ञानंनास्ति तथात्वेचैतन्यस्याज्ञानानिवर्तकत्वात् अंतःकरणवृत्तेश्चेच्छादावभावेनाज्ञानानिवृत्त्याकदापीच्छादिप्रकाशोनस्यात् । अतइच्छादौभावरूपाज्ञानरूपलिंगाभावात् । अहंइच्छाज्ञानाभाववान्तद्विषयकभावरूपाज्ञानवत्त्वादित्येवंतत्रज्ञानाभवोनसिद्ध्येदित्यर्थः । भावरूपाज्ञानेनद्विरोधिनोज्ञानस्याभावोनुमीयतइत्युक्तं तथाचैकस्यविरोधिनःपदार्थस्यानुभवेनतद्विरोधिनोऽपरस्यपदार्थस्याभावेनुमा

साक्षिवेद्यइच्छादौतदाज्ञानाभावासिद्ध्यापाताच्च । किंचैवंसुषुप्तिकालीनोरागाद्यभावो
नसिद्ध्येत् नहितदारागादिविरोधीद्वेषोस्ति येनाज्ञानेनज्ञानाभावइवद्वेषेणरागाभावोऽनु
मीयेत । नचज्ञानाभावादेवरागाद्यभावसिद्धिः । प्रकाशमानआत्मादौतदभावासिद्धेः ।

नंवदताविरोधिपदार्थाभावेतद्विरोध्यपरपदार्थानुभवःप्रयोजकइत्युक्तंस्यात् ॐमितिचेत्तत्राह ॥किंचेति॥ तस्मिन्सत्यभवतस्तदप्रयोजकत्वादितिभावेनतदुपपादयति॥नहीति ॥रागादीति॥तथाचाहंरागाद्यभाववान्रागादिज्ञानशून्यत्वादित्यनुमानेनरागाद्यभावसिद्धि र्नतुतद्विरोधिद्वेषसद्भावेनेत्यर्थः। इच्छापरपर्यायरागादेर्ज्ञानसाध्यत्वाद्वस्तुसिद्धेर्ज्ञानाधीनत्वाच्चेतिभावः। सुखादिवत्इच्छादावपिज्ञातैकसत्वेनप्रकाशमानत्वादुत्पत्त्यनंतरंज्ञानाभावस्यैवाभावेनहेतोःस्वरूपासिद्धिरित्याह॥प्रकाशमानेति॥आत्मादावित्यत्रादिपदेनेच्छादेर्ग्रहणं। तथाचोत्तरकालीनपरामर्शसिद्धसौषुप्तिकानुभवोनुभावरूपाज्ञानेमानमित्याशयः। भंगार्थमुपसंहरति

SGDF
Sri Gargeshwari Digital Foundation

॥ तस्मादिति ॥ उक्तप्रत्यक्षस्यभावरूपाज्ञानविषयत्वासमर्थनादित्यर्थः ॥ ७ ॥ भावरूपाज्ञानप्रत्यक्षभंगाविवरणं ॥४५॥
आद्यानुमानेसाध्यहेतुपक्षदृष्टांतान्विविच्यदूषयितुमादौतावत्त्वन्मतेपक्षालाभइत्याशयेनपक्षंविविच्यदूषयति॥यच्चेति॥ सुखादीति॥साक्षिरूपसुखादिप्रमायाअपिप्रमाणभूतज्ञानत्वेनपक्षकोटिनिविष्टत्वादितिभावः। तस्यस्वनिवृत्त्यवस्त्वंतरपूर्वकत्वंनास्तीत्याह ॥ तस्याइति ॥ साक्षिणोऽज्ञानसाधकत्वेनतदनिवर्त्तकत्वादित्यर्थः । उक्तदूषणपरिहारायपक्षंसंकोचयति ॥ वृत्तेरिति ॥ साक्षिरूपप्रमाणज्ञानभिन्नायाइत्यर्थः॥ बाधइति ॥ तस्याःस्वविषयेऽज्ञानानिवर्तकत्वात्परोक्षवृत्तौस्वविषयावरणस्यस्वनिवर्त्यत्वाभावाद्बा

तस्मान्नप्रत्यक्षंभावरूपाज्ञानेमानं ॥ ७ ॥ भावरूपाज्ञानप्रत्यक्षभंगः ॥ ४५ ॥ यच्चाद्यानुमानं तत्रसुखादिप्रमायांबाधः । तस्याःसाक्षिरूपत्वेनाज्ञानानिवर्तकत्वात् । वृत्तेःपक्षत्वेपिपरोक्षवृत्तौबाधः । तस्याःस्वविषयेअज्ञानानिवर्तकत्वेतद्विषयस्याभिव्यक्तापरोक्षैकरसचैतन्यसंभेदेनापरोक्षत्वापाताच्च । उक्तंचविवरणे । "विषयत्वंनानुमेयादौसुषुप्तिव्यावृत्ति"रिति ।

धइतिभावः। परोक्षवृत्तेरपिस्वविषयेऽज्ञाननिवर्त्तकत्वमंगीकृत्यबाधपरिहारेबाधकमाह ॥ तस्याइति ॥ तद्विषयस्य परोक्षवृत्तिविषयस्य ॥ संभेदेनेति ॥ संबंधेनेत्यर्थः। परोक्षवृत्तेःस्वविषयेऽज्ञानानिवर्त्तकत्वेसंमतिमाह ॥ उक्तंचेति ॥ विषयत्वंनानुमेयादौसुषुप्तिःव्यावृत्तिः साचाभावोनभवतीतिविवरणवाक्यंतस्यायमर्थः । सुषुप्तिरविद्या तथाचसुषुप्तिव्यावृत्तिरेवाज्ञाननिवृत्तिरेवलोकेघटादेर्विषयत्वं अभावोऽभावरूपाचसासुषुप्तिव्यावृत्तिरनुमेयादौपरोक्षस्थलेपरोक्षवृत्त्यानभवतीति उक्तदूषणपरिहारायपु

SGDF
Sri Gargeshwari Digital Foundation

नःपक्षंसंकोचयति॥अपरोक्षवृत्तेरिति॥ व्यभिचारइति॥अप्रकाशितार्थप्रकाशकत्वसत्वेपिउक्तरीत्यासाध्याभावादित्यर्थः। न
नुपरोक्षवृत्तिभिन्नत्वेसतीतिहेतुविशेषणान्नव्यभिचारइत्यत आह ॥तद्व्यावृत्त्यर्थमिति॥ अप्रयोजकत्वमिति ॥ यथाहेतुःपरोक्ष
वृत्तौविद्यमानोपिसाध्यंप्रत्यप्रयोजकः एवंपक्षेप्यप्रयोजकोस्त्वित्यर्थः ॥ सदर्थेति॥ सदर्थोविद्यमानार्थःधर्म्यंशः इदमंशरूपइति
यावत्। ननुइदमंशवृत्तिनिवर्त्त्याज्ञानस्यापिसत्वान्नबाधइत्यतआह ॥ तन्निवर्त्येति॥ नन्विदमंशाज्ञानस्यापिभ्रमोपादानत्वमेवे
तिनाव्याप्तिरित्यतआह ॥ नहीति ॥ सदर्थरूपाधिष्ठानाज्ञाने प्रत्युततज्ज्ञानस्यैवभ्रमहेतुत्वादित्यर्थः। एतद्दूषणपरिहारायपुनः

अपरोक्षवृत्तेःपक्षत्वेपिपरोक्षवृत्तौव्यभिचारः। तद्व्यावृत्त्यर्थंहेतुविशेषणेअप्रयोजकत्वं। सर्वभ्रमेष्वधि
ष्ठानत्वेनानुगतसदर्थविषयापरोक्षवृत्तौबाधश्च। तन्निवर्त्याज्ञानसद्भावेभ्रमोपादानत्वलक्षणस्यतत्राव्या
प्तिःस्यात्। नहिसदर्थरूपाधिष्ठानाज्ञानेकश्चिद्भ्रमः। तदन्यस्यपक्षत्वेधारावाहिकद्वितीयादिप्रमायांबाधो
सिद्धिश्च। स्वानिवर्त्यप्रथमप्रभाव्यवहितायास्तस्याःद्वितीयादिप्रभायाःतमःप्रतीवाज्ञानंप्रत्यनिवर्तकत्वात्।

पक्षंसंकोचयति॥तदन्यस्येति॥इदमंशापरोक्षवृत्तिभिन्नापरोक्षवृत्तिरूपप्रमाणज्ञानस्येत्यर्थः॥बाधमुपपादयति ॥ स्वेति॥तत्रादाव
ज्ञानं अनंतरंतन्निवर्तिकाप्रथमाप्रमा तन्निवर्तिकाचद्वितीयादिप्रमा एवंचसतिद्वितीयादिप्रमायाअपिपक्षनिविष्टत्वात्द्वितीयप्रमा
निवर्त्यायाप्रथमप्रमातयाद्वितीयादिप्रमायाव्यवहितत्वेनप्रथमप्रमानिवर्त्तनएवचरितार्थतयाप्रथमप्रमानिवर्त्याज्ञानानिवर्त्तकत्वा
द्बाधइत्यर्थः। तत्रदृष्टांतःद्वितीयादीति। तमोनिवर्त्तिकाप्रथमप्रभैव नद्वितीयादिप्रभातद्वदित्यर्थः॥ ननुनासिद्धिःद्वितीयादिप्रमा

णेपिअन्यान्यक्षणलवविशिष्टार्थप्रकाशकत्वेनाप्रकाशितार्थप्रकाशकत्वसद्भावादित्यतआह ॥ सूक्ष्मेति ॥ यथाऽऽहुः प्रत्यक्षेणसू
क्ष्मकालभेदानामनाकलनादिति। एतद्दूषणपरिहारायपुनरपिपक्षंसंकोचयति ॥तदन्यस्येति॥ द्वितीयादिप्रमाभिन्नापरोक्षप्रमारू
पज्ञानस्येत्यर्थः ॥ अनात्मेति ॥ जडेत्यर्थः। बाधमुपपादयति ॥ त्वन्मतइति ॥ तथाचजडविषयापरोक्षवृत्तेरपिपक्षत्वेन
तस्याःस्वनिवर्त्याज्ञानपूर्वकत्वाभावाद्बाधइत्यर्थः। बाधपरिहारंशंकते ॥ नन्विति ॥ तथाचघटाद्यवच्छिन्नचैतन्यावरकमित्यर्थः
॥ नबाधइति ॥ घटाद्यवच्छिन्नचैतन्येत्वज्ञानमस्तीतिस्वनिवर्त्याज्ञानपूर्वकत्वसद्भावान्नबाधइतिभावः ॥ तदभावादिति ॥

सूक्ष्मतत्तत्क्षणानामप्रत्यक्षत्वेनप्रकाशितप्रकाशकत्वाच्च। तदन्यस्यपक्षत्वेपिअना
त्मविषयापरोक्षवृत्तौबाधः। त्वन्मतेजडावरकाज्ञानाभावात्। ननुघटोयमित्यादि
वृत्तिरपितदवच्छिन्नचैतन्यविषयाअज्ञानमपितथेतिनबाधइतिचेन्न एकाज्ञानप
क्षेतदभावात् अवच्छिन्नस्याप्यस्वप्रकाशत्वेनाप्रसक्तप्रकाशतयावरणायोगाच्च।

घटोयमित्याद्यपरोक्षप्रमानिवर्त्यत्वमज्ञानस्यनास्ति तथात्वेऽज्ञानस्यैकत्वेनतन्निवृत्तौसद्योमोक्षापातइतिभावः। अपसरणादिपक्ष
स्यदूषितत्वादितिभावः ॥ अस्वप्रकाशत्वेनेति ॥ शुद्धचैतन्यस्यैवप्रकाशत्वादितिभावः ॥ अयोगाच्चेति ॥ तत्प्रतिबंधरूपाव
रणायोगाच्चेत्यर्थः। तथाचघटावच्छिन्नचैतन्येप्यज्ञानाभावादनात्मवृत्तौबाधस्तदवस्थइत्याशयः। घटोयमित्याद्यपरोक्षवृत्तेस्तद
वच्छिन्नचैतन्यविषयत्वमंगीकृत्याज्ञाननिवर्त्तकत्वंनसंभवतीत्युक्तं अधुनाघटोयमित्यादिवृत्तेश्चैतन्यविषयकत्वमेवनास्तीत्याह ॥

SGDF

रूपादीति॥स्वतो रूपादिहीनस्यघटाद्यवच्छिन्नस्यचैतन्यस्यचाक्षुषत्वमस्तु । चंद्रावच्छेदेनराहोरिवेत्यतउक्तमाकाशादिवदिति । स्वतो रूपादिहीनस्याप्याकाशस्यघटाद्यवच्छेदेनापिचाक्षुषतायाअदर्शनादित्यर्थः। राहोस्तुनीलरूपवत्त्वेननस्वतोनीरूपत्वमितिभावः । यथाघटाद्यनात्मविषयशाब्दज्ञानेनचैतन्यंविषयः तथातत्समानविषयेऽपरोक्षज्ञानेपीति आत्मविषयापरोक्षवृत्तौबाधस्तदवस्थएवेत्याह ॥ अयंघटइति ॥ तथाचोभयवृत्त्योःसाम्येपरोक्षवृत्तिवदपरोक्षवृत्तेरप्यज्ञानानिवर्त्तकत्वाद्बाधइतिभावः । एतद्दूष

रूपादिहीनस्यात्मनआकाशादिवद्घटाद्यवच्छिन्नस्यापिचाक्षुषत्वाद्ययोगस्योक्तत्वाच्च । अयंघटइति शब्दजन्येनघटमात्रविषयकज्ञानेनायंघटइत्यपरोक्षवृत्तेःविषयभेदाप्रतीतेश्च । आत्मविषयापरोक्षवृत्तेःपक्षत्वेप्यनात्मज्ञानेव्यभिचारः । आत्मविषयत्वेनहेतुविशेषणेदृष्टांतस्यसाधनवैकल्यमितिदिक् । साध्येप्याद्यंविशेषणंव्यर्थं । यतोज्ञानमज्ञानस्यैवनिवर्तकमितित्वन्मतेअभावनिवृत्तिरेवभावइतिमन्मतेचस्वनिवर्त्यविशेषणेनैवप्रागभावव्यावृत्तिसिद्धेरभावव्यतिरिक्तपदेनैवतद्व्यावृत्तिसिद्ध्या

णपरिहारायपुनरपिपक्षंसंकोचयति ॥ आत्मेति ॥ साचांततश्चरमवृत्तिरेवेतिभावः ॥ व्यभिचारइति ॥ त्वन्मतेजडावरकाज्ञानाभावेनसाध्याभावादित्यर्थः ॥ दृष्टांतस्येति ॥ अप्रकाशितार्थप्रकाशिकायांप्रदीपप्रभायांआत्मविषयकत्वाभावादित्यर्थः । एवंपक्षंदूषयित्वासाध्यंदूषयति ॥ साध्येपीति ॥ प्रागभावव्यावृत्त्यर्थंस्वप्रागभावव्यतिरिक्तेतिविशेषणमितिचेत्तत्राह ॥ यतइति ॥ प्रागभावस्याभिन्नत्वान्नज्ञाननिवर्त्यत्वमितिभावः॥ अभावेति ॥ प्रमाणज्ञानंस्वप्रागभावनिवृत्तिरेवनतुतन्निवर्त्त

SGDF
Sri Gargeshwari Digital Foundation

कमितिनप्रमाणज्ञानप्रागभावस्तन्निवर्त्यइत्यर्थः । नचाभावाभावोभावव्याप्यइतिमतानुसारेणप्रतियोग्यतिरिक्तांप्रागभावनिवृत्ति मंगीकृत्यैतदुक्तमितिवाच्यं । तन्मतस्याप्रामाणिकत्वादित्याशयात् ॥ शेषेति ॥ प्रागित्यस्यवैयर्थ्यादित्यर्थः । नचप्रागभावस्या पिध्वंसाद्यभावव्यतिरिक्तत्वेनपुनस्तमादायार्थांतरतेतिवाच्यं । सामान्येनप्रयुक्तपदस्यविशेषार्थपर्यवसानेनदूषणेऽतिप्रसंगइतिभा वः । नचाखंडाभावेनवैयर्थ्यमितिवाच्यं । तत्वनिर्णयकथायांलघुनानिर्देशेनसाध्यसिद्धौसंभवंत्यामखंडाभावांतर्भावेनसाध्यस्या निर्देष्टव्यत्वादित्याशयात् ॥ द्वितीयंचेति ॥ स्वविषयावरणपदमित्यर्थः । अज्ञानस्यनावरणत्वं तथाहि आवरणंह्याव्रियमाणेन

शेषवैयर्थ्याच्च । द्वितीयंचायुक्तं । जडेअज्ञानस्यानंगीकृतत्वात् । निर्विशेषचितश्चाज्ञा
नादिसाक्षितयाप्रकाशमानत्वेनाज्ञानस्यावरणत्वायोगात् । स्वोत्पादकादृष्टव्यावृत्तेरा
वरणपदेनैवसिद्ध्याशेषवैयर्थ्याच्च । ज्ञानमज्ञानस्यैवनिवर्तकमितित्वन्मतेस्वोत्पाद
कादृष्टस्यस्वनिवर्त्यपदेनैवव्यावृत्तिसिद्धेः । तृतीयंचायुक्तं । वृत्तिश्चिदुपरागार्थेतिमते

व्याप्तं तच्चाव्रियमाणं जडं चैतन्यगतविशेषोवा शुद्धचैतंन्यवा नाद्यइत्याह ॥ जडइति ॥ विषयइत्यर्थः । आवरणरूपतत्कृ त्याभावादितिभावः । नद्वितीयइत्याह ॥ निर्विशेषेति ॥ नतृतीयइत्याह ॥ चितश्चेति ॥ आवरणत्वेति ॥ तथाचत द्विशेषणविशिष्टंसाध्यंपक्षेबाधितमितिभावः । ननुस्वोत्पादकादृष्टव्यावृत्त्यर्थंतद्विशेषणमितिचेत्तत्राह ॥ स्वेति ॥ शेषेति ॥ स्व विषयेतिपदेत्यर्थः । स्वोत्पादकादृष्टव्यावृत्तेःस्वनिवर्त्यपदेनैवसिद्धेःस्वविषयावरणपदंव्यर्थमेवेत्याह ॥ स्वोत्पादकेति ॥ स्वो

SGDF
Sri Gargeshwari Digital Foundation

त्पादकादृष्टस्याज्ञानभिन्नत्वान्नज्ञानेनसाक्षात्तन्निवर्त्यत्वमित्यर्थः । वृत्तिश्चिदुपरागार्थेतिमतेचितोऽज्ञाननिवर्त्तकत्वेनपक्षीभूताया
वृत्तेरावरणनिवर्तकत्वाभावाद्बाधइत्यर्थः । मतांतरेपिबाधमुपपादयति ॥ घटाकारेति ॥ घटाकारतयातत्प्रतिबिंबितचैतन्येन
वाघटप्रकाशकस्यघटाधिष्ठानचैतन्यस्यावरणाभिभवरूपाभिव्यक्तेर्जातत्वेनपक्षीभूतस्यघटज्ञानरूपस्यघटाधिष्ठानचैतन्यस्यावरण
निवर्त्तकत्वंनास्तीत्यर्थः । ननुवृत्तिप्रतिबिंबितचैतन्यंवाघटप्रकाशकंज्ञानंपक्षत्वेनाभिसंहितं तच्चघटाधिष्ठानचैतन्यस्यावरणंनि
वर्त्तयतीतिनबाधइत्यतआह ॥ घटाकारेति ॥ मतस्यायोगादित्यन्वयः । तत्रहेतुराध्यासिकेति । त्वन्मतेज्ञानेज्ञेयस्याध्य

घटाकारवृत्त्यातत्प्रतिबिंबितचैतन्येनवाभिव्यक्तंघटा(विषया)धिष्ठानचैतन्यंघटप्रकाशक
मितिमतेचघटप्रकाशकज्ञानस्यघटाज्ञानानिवर्तकत्वात् घटाकारवृत्तिःतत्प्रतिबिंबितचैत
न्यंवाघटप्रकाशकमितिमतस्यचाध्यासिकसंबंधस्यातंत्रत्वापातेनायोगाच्चरमसाक्षात्कारो
त्पत्तिप्रतिबंधकादृष्टस्यतदनिवर्त्यत्वेमिथ्यात्वासिद्ध्यास्वनिवर्त्यपदेनतद्व्यावृत्त्यसिद्धेश्च ।

स्तत्वेनवृत्तेस्तत्प्रतिबिंबितचैतन्यस्यवाज्ञानत्वेतत्रघटाध्यासोवाच्यः सनयुक्तः त्वन्मतेज्ञानत्वेनाभिमतयोर्मिथ्यात्वेनघटाद्यधि
कसत्ताकत्वाभावात् । अतस्तयोर्ज्ञानत्वाभावेनवृत्त्याद्यभिव्यक्तस्यघटाधिष्ठानचैतन्यस्यैवज्ञानत्वेवाच्येतस्यचावरणभूताज्ञानानि
वर्त्तकत्वेनबाधएवेत्यर्थः । स्वप्रतिबंधकादृष्टंव्यावर्त्तयितुंतद्विशेषणमितिचेत्तत्राह ॥ चरमेति ॥ तदनिवर्त्यत्वइति ॥ ॥ ३२१ ॥
पक्षीभूतचरमसाक्षात्काररूपप्रमाणज्ञानानिवर्त्यत्वेज्ञाननिवर्त्यत्वाभावेनमिथ्यात्वासिद्ध्यातन्निवर्त्यत्वेवाच्येस्वनिवर्त्यपदेनतद्व्या

वृत्त्यसिद्धेश्चेत्यर्थः । नचचरमसाक्षात्कारप्रतिबंधकादृष्टेसतितदनिवृत्तिरितिप्रथमतन्निवृत्तिःकारणात्मनाऽवस्थितस्यप्रतिबंधका
दृष्टस्यज्ञाननिवर्त्यत्वाच्चमिथ्यात्वमपीतिवाच्यं । तावताज्ञाननिवर्त्यत्वापरिहारात् ॥ चतुर्थेचेति ॥ स्वदेशगतविशेषणमित्य
र्थः । प्रमाणज्ञानाज्ञानयोःसमानदेशत्वमेवनास्तीत्याह ॥ अज्ञानस्येति ॥ चिन्मात्रेति ॥ मुखमात्रस्थानीयंयज्जीवब्रह्मानु
स्यूतंचिन्मात्रंतदाश्रितत्वात् "आश्रयत्वविषयत्वभागिनीनिर्विशेषचितिरेवकेवले"तिवचनादित्यर्थः ॥ वृत्तेरित्यादि ॥ वृत्त्या
दिरूपस्यज्ञानस्याज्ञानाश्रयचिन्मात्रानाश्रितत्वादित्यर्थः । यत्राज्ञानंवर्ततेनतत्रप्रमाणज्ञानमितिभावः । किंचयद्विषयनिवृत्त्वां*

चतुर्थेचायुक्तं । अज्ञानस्याचिन्मात्राश्रितत्वाद्वृत्तेःतत्प्रतिबिंबितचैतन्यस्यवातदभिव्यक्ताधि
ष्ठानचैतन्यस्यवाप्रमाणज्ञानस्यतदनाश्रितत्वात् । त्वन्मतेपिविषयस्थाज्ञानस्यैवावरणत्वाच्च । अ
ज्ञातत्वस्यतद्विषयकज्ञानाभावरूपत्वेआद्यविशेषणेनैवव्यावृत्तिसिद्धेराविद्याविषयत्वरूपत्वेचा

दतोनतयोःसमानदेशत्वमित्याह ॥ त्वन्मतइति ॥ ननुविषयगताज्ञातत्वंव्युदसितुमेतद्विशेषणंसार्थकमितिचेत्तत्राह ॥ अ
ज्ञातत्वस्येति ॥ विषयेऽज्ञातत्वंकिंतद्विषयकज्ञानाभावरूपंवा ऽविद्याविषयत्वंवा । नाद्यइत्याह ॥ तद्विषयकेति ॥ तद्विषय
कज्ञानाभावरूपत्वमपिकिंज्ञानप्रागभावरूपत्वंज्ञानात्यंताभावरूपत्वंवा । नाद्यः। आद्यविशेषणेनैवतद्व्यावृत्तिसिद्धेः प्रागभावस्य
प्रतियोगिसमानदेशत्वेनस्वदेशगतपदेनापिव्यावृत्त्यसिद्धेश्च । नापिद्वितीयः । स्वप्रागभावव्यतिरिक्तेत्यत्रप्राक्पदवैयर्थ्यस्योक्त
त्वादभावव्यतिरिक्तपदेनैवतद्व्यावृत्तिसिद्धेरित्यर्थः । आद्येत्येतदुपलक्षणपरंस्वनिवर्त्यपदेनात्यंताभावव्यावृत्तिर्द्रष्टव्येत्याहुः ।

SGDF
Sri Gangadharendra Saraswati Digital Foundation

अंत्येत्वाह ॥ अविद्येति ॥ अविद्यास्वरूपस्यैवासिद्धौतद्विषयत्वमादायार्थांतरताप्रदानायोगेनैतदनुमानात्प्रागेवाविद्यायाःसिद्धत्वेनानुमानस्याधिगतार्थबोधकत्वेनाप्रामाण्यापत्त्यातत्रकिमर्थांतरतापरिहारायविशेषणदानक्लेशेनेत्यर्थः ॥ अन्यदिति ॥ स्वप्रागभावव्यतिरिक्तेत्यादिविशेषणमित्यर्थः । ननुप्रागभावादिव्यावृत्त्यर्थंतद्विशेषणमितिचेन्न । स्वविषयावरणपूर्वकमित्यनेनतद्व्यावृत्तिसिद्धेः । तत्कथमित्यतआह ॥ नहीति ॥ प्रमाप्रागभावइतिस्वप्रागभावव्यतिरिक्तपदव्यावर्त्यइत्यर्थः । प्रमेत्यादिस्वनिवर्त्यपदव्यावर्त्यइत्यर्थः ॥ अन्यत्किंचिदिति ॥ स्वदेशगतपदव्यावर्त्यमित्यर्थः । अज्ञानस्यैवावरणत्वेनाज्ञातत्वस्यावरण

ऽविद्यासिद्ध्याचतुर्थवैयर्थ्याच्च । किंचस्वविषयावरणपूर्वकमित्येतावतैवालं अन्यद्व्यर्थं । नहिप्रमाप्रागभावः प्रमोत्पत्तिप्रतिबंधकादृष्टंवाअज्ञानातिरिक्तमन्यत्किंचिद्वा आवरणं । तथात्वेतेनैवस्वप्रकाशब्रह्मावरणसंभवेनहेतोरप्रयोजकत्वापातात् ।

त्वाभावादितिभावः । ननुप्रमाप्रागभावादीनामावरणत्वेनतदादायार्थांतरतायाःस्वविषयावरणपूर्वकमित्यनेनावारणात्तदर्थंतद्विशेषणजातंसार्थकमेवेत्यतआह ॥ तथात्वइति ॥ तेनैवेति ॥ आवरणत्वेनत्वदभिमतप्रमाप्रागभावादिनेत्यर्थः ॥ अप्रयोजकत्वेति ॥ अप्रकाशितार्थप्रकाशकत्वस्यहेतोःप्रागभावादिव्यतिरिक्ताज्ञानाख्यावरणपूर्वकत्वरूपसाध्यंविनापिसत्वमस्त्वित्यप्रयोजकता । नचैतादृशाज्ञानाख्यावरणपूर्वकत्वरूपसाध्याभावेपिहेतूच्छित्तिरेवबाधिकेतिवाच्यं । अज्ञानव्यतिरिक्तंत्वदभिमतंयत्प्रागभावादिरूपमावरणंतेनैवहेतोरुपपत्तेस्तदुच्छित्त्यभावादित्यर्थः । स्वनिवर्त्यविशेषणस्यसार्थक्यमाशंक्यनिरा

SGDF
Sri Gargeshwari Digital Foundation

करोति ॥नचेति॥ अंधकारस्यप्रमाणविषयघटाद्यावरणत्वेपिप्रमाणज्ञाननिवर्त्यत्वाभावात्तदादायार्थांतरतेतिभावः ॥ तस्येति ॥
अंधकारस्येत्यर्थः ॥ प्रमामात्रेति ॥ अंधकारेसतितत्रत्यशुक्तिप्रमावातत्ररजतभ्रमोवानभवत्येवेतितस्यप्रमामात्रविषयावरण
त्वाभावात् । अत्रचस्वविषयावरणेत्यनेनप्रमामात्रविषयावरणत्वाभिधानान्नतदादायार्थांतरतेत्यर्थः । इदंहिविवरणोक्तमनुमानं
एतद्व्याख्यानावसरेत्वदीयेनप्रागभावादिव्यतिरिक्तवेदांतजन्यचरमसाक्षात्काररूपप्रमामात्रविषयावरणानाद्यज्ञानसिद्धिरित्युक्त
त्वादितिभावः । अविशेषितं विशेषणाविशिष्टं । विमतं गुणादिकं । गुण्यादिनेतिशेषः । विमतमभिन्नमित्यभेदमात्रेसाध्येतस्मि
नचतमोव्युदासायतृतीयं तस्यप्रमामात्रविषयावरणत्वाभावात् । नचव्यापकविशेषणानामु
द्देश्यप्रतीत्यर्थत्वाद्वैयर्थ्यमितिवाच्यं । यत्राविशेषितंसाध्यंप्रतिहेतोरप्रयोजकता विमतंभि
न्नाभिन्नंसमानाधिकृतत्वादित्यादौ तत्रैवविशिष्टप्रतीतेरुद्देष्टव्यत्वात् अन्यथाअतिप्रसंगात्
न्सत्यभवतस्तदप्रयोज्यत्वादितिन्यायेनाभेदेसत्यपिघटःकलशइतिसामानाधिकरण्यादर्शनादप्रयोजकत्वनिरासायभिन्नाभिन्नमि
तिविशिष्टधीस्तत्रोद्देश्याद्दृष्टा । नचैवंप्रकृते प्रागभावव्यतिरिक्तेत्यादिविशेषणंविहायस्वविषयावरणपूर्वकमित्यविशेषसाध्यकरणेऽ
प्रयोजकताऽस्ति येनात्रापिविशिष्टधीरुद्देश्येतिविशेषणसार्थक्यंस्यादित्यर्थः । अविशेषितसाध्यंप्रतिहेतोरप्रयोजकत्वाभावेपिवि
मतंउपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यमित्यादाविवविशिष्टधियउद्देश्यत्वान्नव्यापकगतविशेषणानांवैयर्थ्यमित्यंगी
कारेकुत्रापिव्यापकगतविशेषणवैयर्थ्यंनोद्भाव्येत तथाचपर्वतउष्णस्पर्शापाकजशुक्लभास्वररूपवद्वह्निमान्धूमवत्त्वादित्याद्यपि

SGDF
Sri Gargeshwari Digital Foundation

स्यादित्यतिप्रसंगइत्यर्थः । यथाउद्देश्यप्रतीत्यर्थत्वेनव्यापकगतविशेषणानामवैयर्थ्यं एवंहेतुविशेषणेपिवक्तुंशक्यत्वाद्व्यर्थविशेषणत्वस्यादूषणत्वमेवस्यादित्याह ॥ नीलधूमेति ॥ एवंसाध्यंदूषयित्वाहेतुंदूषयति ॥ हेताविति ॥ मात्रमित्यस्यैवविवरणंसाक्षादिति । तन्मतेद्वितीयादिज्ञानेसाक्षात् आद्येऽज्ञाननिवृत्तिद्वारापरंपरयेत्यर्थः ॥ दृष्टांतइति ॥ प्रभायांज्ञानत्वाभावेनसाधनवैकल्यादितिभावः॥असिद्धेरिति॥प्रमाणजन्येप्रमाणरूपेज्ञानेज्ञानहेतुत्वाभावरूपास्वरूपासिद्धिरित्यर्थः॥इंद्रियादाविति॥

नीलधूमकरणिका वह्निप्रमोद्देश्येत्यपिसुवचत्वेनहेतावपिव्यर्थविशेषणत्वस्यादोषत्वापाताच । हेतौचप्रकाशकत्वंज्ञानत्वंवा ज्ञानहेतुत्वंवा साक्षात्परंपरयाव्यवहारहेतुत्वमात्रंवातमोनिवर्तकत्वंवा आवरणनिवर्तकत्वंवा अज्ञानांधकारान्यतरनिवर्तकत्वंवा प्रकाशकशब्दवाच्यत्वमात्रंवा । नाद्यः । दृष्टांतेअभावात् । नद्वितीयः । असिद्धे रिंद्रियादौव्यभिचाराच । अतएवनतृतीयः । नचतुर्थः । अज्ञानांधकारानुगततमस्त्वाभावात्

ज्ञानहेतुत्वेसत्यपिस्वनिवर्त्यवस्त्वंतरपूर्वकत्वाभावात् नहिसाक्षादिंद्रियनिवर्त्यप्रागभावादिव्यतिरिक्तंवस्त्वंतरमस्ति । अज्ञानस्येंद्रियनिवर्त्यत्वेपिज्ञानद्वारैवनिवर्त्यत्वंनसाक्षात् । साक्षात्स्वनिवर्त्यत्वस्यैवात्रविवक्षितत्वादितिभावः ॥ अतएवेति ॥ इंद्रियादेःसाक्षाद्वस्तुव्यवहाराहेतुत्वेज्ञानद्वाराघटादिव्यवहारहेतुत्वेचसत्यपिउक्तसाध्याभावेनइंद्रियादौव्यभिचारादेवेत्यर्थः ॥ अज्ञाने

ति ॥ तमश्शब्देनाज्ञानविवक्षायांतन्निवर्त्तकत्वस्यदृष्टांतेप्रभायामभावात्साधनवैकल्यंस्यात् अंधकारविवक्षायांतन्निवर्त्तकत्वस्यपक्षेऽसिद्धिःस्यात् उभयानुगतस्यैकस्यतमस्त्वस्याभावादित्यर्थः । अज्ञाननिवर्त्तकत्वविवक्षायांदोषांतरमाह॥ साध्येति॥ अज्ञानस्येदानीमप्यसिद्धत्वेनतद्घटितहेतोरपिसंदिग्धत्वादितिभावः । आवरणशब्देनांधकारविवक्षायांस्वरूपासिद्धिः अज्ञानविवक्षायांसाधनवैकल्यं साध्यावैशिष्ट्यंच उभयानुगतंचैकमावरणत्वंनास्त्येवेत्यर्थः ॥ कुद्दालादाविति ॥ कुद्दालायाःशलाकादेरपिकुड्याद्यावरणनिवर्त्तकत्वेनअज्ञानपूर्वकत्वाभावाद्व्यभिचारइत्यर्थः ॥ साध्येति ॥ साध्यवत्तद्घटितहेतोरपिसंमुग्धत्वा

साध्यावैशिष्ट्याच । अतएवनपंचमः । कुद्दालादौव्यभिचाराच । नषष्ठः । साध्यावैशिष्ट्यादेव । नसप्तमः । शब्दसाम्येनैकसाध्यसाधनेपृथिव्यादेरपिगोत्वेनश्रृंगित्वसाधनापातात् । उक्तंचविवरणे । ज्ञानप्रकाश्यत्वादज्ञानविरोधिनोन्यदेवालोकप्रकाश्यत्वंतमोविरोधित्वंनामेति । एवंच । "पक्षदृष्टांतानुगतंप्रकाशत्वंनविद्यते । शब्दसाम्येनचेत्पृथ्व्यागो

दित्यर्थः ॥ नसप्तमइति ॥ ज्ञानप्रभयोर्नानुगतमेकप्रकारत्वमस्तीत्यर्थः । प्रकाशशब्दप्रयोगस्तावदस्तीतिचेत्तत्राह ॥ शब्देति ॥ आलोकसंवेदनयोःप्रकाशत्वेवैलक्षण्यमस्तीत्यत्रविवरणसंमतिमाह ॥ उक्तंचेति ॥ अज्ञानविरोधिनःअज्ञानविरोधित्वात् । ज्ञानप्रकाशिकत्वात्ज्ञाननिष्ठप्रकाशकत्वात्अन्यदेवतमोविरोधित्वरूपंआलोकनिष्ठंप्रकाशकत्वंनामेत्यर्थः । अंत्यपक्षदूषणंकारिकयासंगृह्णाति ॥ एवंचेति ॥ असिद्धिमप्याह ॥ किंचेति ॥ अध्यासेति ॥ प्रकाशमानस्यैवा

SGDF
Foundation

धिष्ठानत्वादितिभावः । ननुचिन्मात्रस्यसदाप्रकाशमानत्वेपितद्गतविशेषस्यसदाप्रकाशमानत्वाभावान्नसिद्धिरित्यतउक्तंप्रमाणस्येति । वेदांतजन्यचरमवृत्तिरूपस्येत्यर्थः ॥ चिदन्येति ॥ निष्प्रकारकत्वादितिभावः । प्रमाणज्ञानंस्वप्रागभावव्यतिरिक्तेत्यादिरूपायामस्यामेवानुमितौव्यभिचारंबाधंचवक्तुमाह ॥ किंचेति ॥ अस्यामेवानुमितौअप्रकाशितार्थप्रकाशकत्वंनास्त्युतास्तीतिविकल्प्याद्येदोषमाह ॥ अप्रकाशितेति ॥ विशेषणविशिष्टस्यहेतोरभावेप्रकाशितार्थप्रकाशकत्वमेवस्यात् तथाचानुमितिर्व्यर्था सिद्धसाधनतापत्तेः । विशेष्याभावाद्विशिष्टहेतोरभावेसर्वथाप्रकाशकत्वमेवनस्यात् तथाचाज्ञानसिद्धिरे

त्वाच्छृंगंसमापतेत्" ॥ किंचप्रमाणस्यचब्रह्मज्ञानस्यचिदन्याप्रकाशकत्वात्स्वप्रकाशचितश्चाध्यासाधिष्ठानत्वादिनासदाप्रकाशमानत्वेनाप्रकाशितत्वाभावात्तत्रहेतोरसिद्धिः । किंचास्या अनुमितेरप्रकाशितप्रकाशित्वाभावेप्रकाशितप्रकाशकत्वंवाअप्रकाशकत्वंवास्यादुभयथाप्यनुतिर्मिर्व्यर्था । तत्प्रकाशकत्वेचात्रैवबाधोव्यभिचारोवा । अस्यास्स्वविषयावरणानिवर्तकत्वात् ।

वनस्यात् । अनुमितेःसाध्याप्रकाशकत्वात् । अतोऽनुमितिर्व्यर्थास्यात् अनुमितेःसाध्यज्ञप्त्यर्थत्वादितिभावः । द्वितीयेदोषमाह ॥ तत्प्रकाशकत्वेचेति ॥ अनुमितेरप्रकाशितप्रकाशकत्वेचेत्यर्थः । अत्रापिप्रष्टव्यं इयमनुमितिःपक्षीभूतप्रमाणशब्देन विवक्षिता नवेति । नेतिपक्षेपक्षबहिर्भूतत्वादस्यामेवानुमितौव्यभिचारःस्यात् आद्येऽस्यानुमितेःपक्षांतर्भावाद्बाधःस्यादित्यर्थः । व्यभिचारंबाधंचसाध्याभावोपपादनेनोपपादयति ॥ अस्याइति ॥ अस्या अनुमितेः स्वविषयभूतंयदज्ञानंतदावरणनिवर्तक

SGDF
Sri Gargeshwari Digital Foundation

त्वंनास्तीत्यर्थः । कुतइत्यतआह ॥ नहीति ॥ हेतुंदूषयित्वेदानींदृष्टांतंदूषयति ॥ दृष्टांतेपीति ॥ नचद्वितीयादिप्रभायांउ
भयवैकल्यवारणायतद्विशेषणमितिवाच्यं। अंधकारइत्युक्त्यैवतन्निरासात्। नहिद्वितीयादिप्रभाअंधकारोत्पन्ना किंत्वाद्यैवेत्यर्थः
॥दृष्टिसृष्टीति॥ आवरणभूतांधकारस्यदृष्टिसृष्टत्वेनदृष्टिनिवृत्तावेवनिवृत्त्यंगीकारात्प्रभायांतन्निवर्त्तकत्वानंगीकारेणस्वनिवर्त्यव
स्त्वंतरपूर्वकत्वाभावात्साध्यवैकल्यं। प्रभायाअपिदृष्टिसृष्टत्वेनदृष्टेरेवार्थप्रकाशकतयाप्रभायांतदभावात्साधनवैकल्यंचेत्यर्थः। प्रति
पक्षंचाह ॥अनादित्वेसतीति ॥प्रमाणज्ञानमित्याद्यनुमानेनज्ञाननिवर्त्यमज्ञानंसाधितं तद्विरोधप्रमाणमेतैरनुमानैःसाध्यते अ
नह्यज्ञानावरणमज्ञानमस्ति । दृष्टांतेपिद्वितीयादिप्रभायाःअंधकारानुत्पन्नत्वेनप्रथमपदंव्यर्थं । दृष्टिसृष्टिपक्षेदृ
ष्टांतेउभयवैकल्यंच। अनादित्वेसतिभावत्वमभावविलक्षणत्वंवानानिवर्त्यनिष्ठमनादिभावमात्रवृत्तित्वात् ।
अनाद्यभावविलक्षणमात्रवृत्तित्वाद्वा आत्मवत् निवर्त्यत्वंवानानादिभावनिष्ठंनानाद्यभावाविलक्षणनिष्ठंवा
नादिभावत्वेसतिज्ञाननिवर्त्यत्वंलक्षणं तत्रानादिभावस्याज्ञानस्यज्ञाननिवर्त्यत्वंनास्तीतियदासाध्यते तदेदंस्वनिवर्त्यत्वघटितसाध्य
विरोधिभूतंसत्प्रतिपक्षरूपमितिद्रष्टव्यं । अज्ञानलक्षणांतर्गतंभावत्वंअभावनिवृत्तिरेवअज्ञानस्यभावाभावविलक्षणत्वादित्याशये
नाभावविलक्षणत्वंवेतिपक्षनिर्देशःकृतइतिध्येयं।तथाचानादित्वेसतिभावत्वंननिवर्त्यनिष्टं अनादिभावमात्रवृत्तित्वात् आत्मत्ववत्
अनादित्वेसत्यभावविलक्षणमात्रवृत्तित्वादात्मत्ववदित्यनुमानद्वयंद्रष्टव्यं । अनुमानद्वयेपिभावत्वस्यवाऽभावविलक्षणत्वस्यवाज्ञा
ननिवर्त्यघटादिनिष्ठत्वेनबाधवारणायानादित्वेसतीत्युक्तं । अनादित्वमात्रस्यनिवर्त्यप्रागभावनिष्ठतयाबाधवारणायभावत्वपदं ।

SGDF
Sri Gargeshwari Digital Foundation

आद्येहेतौप्रागभावत्वेव्यभिचारवारणायभावपदं । घटत्वेव्यभिचारवारणायानादिपदं। प्रमेयत्वेव्यभिचारवारणायमात्रपदं । द्वि
तीयहेतावपिवृत्तित्वमात्रंप्रागभावत्वेव्यभिचारीतिअतोभावपदं। प्रमेयत्वेव्यभिचारवारणायमात्रपदं । निवर्त्यत्वस्यघटादिनिष्ठत
याबाधवारणायानादिपदं। निवर्त्यत्वस्यप्रागभावनिष्ठतयाबाधवारणायभावपदमितिमंतव्यं । घटत्वेव्यभिचारवारणायानादिपदं
॥निवर्त्येति॥वृत्तित्वमात्रंआत्मत्वेव्यभिचारीतिनिवर्त्यपदं। प्रमेयत्ववारणायमात्रपदं। स्वविषयावरणत्वघटितसाध्यविरोधिप्रति
पक्षमाह ॥ अनादित्वमिति ॥ अनाद्यावरणंनास्तीत्यनेनानुमानेनसिद्धमितिद्रष्टव्यं । वृत्तित्वमात्रस्यांधकारेव्यभिचारित्वाद

निवर्त्यमात्रवृत्तित्वात् प्रागभावत्ववत् अनादित्वंवानावरणनिष्ठमनादिमात्रवृत्तित्वात् प्राग
भावत्ववत् प्रमाणज्ञानंवाअभावान्यानाद्यनिवर्तकं ज्ञानत्वाद्भ्रमवदित्यादिनासत्प्रतिपक्षताच ।

नादिपदं । प्रमेयत्ववारणायमात्रपदं । प्रतिपक्षत्वेविरोधिप्रमेयसाधकत्वमेवतंत्रं नसमानधर्मिकत्वं नवासाध्याभावसाधकत्वं
तथात्वेकेवलान्वयिन्यसत्प्रतिपक्षत्वाख्यरूपोपपादनंनस्यात् तत्रसत्प्रतिपक्षप्रसक्तेरेवाभावात् शब्दोभिधेयोनेतिसाधयितुमश
क्यत्वात् अतःसमानधर्मिकत्वादेरतंत्रत्वमुक्त्वाऽभिधेयत्वंकिंचिन्निष्ठात्यंताभावप्रतियोगीत्यादिरूपेणसत्प्रतिपक्षप्रसक्तिर्मणिकृ
तोपपादितातद्वदिहापीतिद्रष्टव्यं। समानधर्मिकत्वादेरावश्यकत्वेतादृशमपिसत्प्रतिपक्षमाह॥प्रमाणज्ञानंवेति ॥ प्रागभावरूपाना
दिनिवर्त्तकत्वेनत्राधवारणायाभावान्येत्युक्तं । प्रागभावव्यतिरिक्तानादिनिवर्त्तकत्वस्यपरेणसाधितत्वात्तस्यायंप्रतिपक्षइतिज्ञा

तव्यं । भ्रमस्यस्वप्रागभावव्यतिरिक्तानाद्यनिवर्त्तकत्वाद्दृष्टांतत्वमितिध्येयं। अप्रयोजकतांचाह॥ पूर्वमिति ॥ अप्रकाशितार्थस्यप्र
काशःपूर्वंप्रकाशाभावस्यसत्वादेवास्तुनतद्विषयकाप्रकाशशब्दवाच्यभावरूपाज्ञानसद्भावात्। तथाहियथाअकृतस्यघटादेःकृतिःपू
र्वंतद्विषयककृत्यभावादेव नतुघटादिविषयकभावरूपाकृतिसद्भावात्। यथाचास्मृतस्यघटादेःस्मृतिःपूर्वंतद्विषयकस्मृत्यभावादेव
नतुघटादिविषयकभावरूपास्मृतिसद्भावात्तथेहापि। अन्यथाऽज्ञानवद्भावरूपाकृत्यस्मृतीअप्यंगीकार्येप्रसज्येतेइत्यर्थः। किंचस्ववि
रोधिनिवर्त्तकत्वंचोपाधिरित्याह ॥ किंचेति ॥ आलोकप्रकाशइति ॥ दृष्टांतीभूतालोकरूपप्रकाशइत्यर्थः। तन्निवर्त्तकः स्ववि

पूर्वंकृत्यभावमात्रेणाकृतस्यकृतिवत्स्मृत्यभावमात्रेणास्मृतस्यस्मृतिवच्चपूर्वंप्रकाशाभावमात्रेणाप्र
काशितप्रकाशोपपत्तेरप्रयोजकत्वंच । किंचघटादिविषयआलोकप्रकाशस्तमोविरोधीतितन्निवर्तको
स्तु। ज्ञानप्रकाशस्तुनाज्ञानविरोधी घटाद्यधिष्ठानचैतन्यस्याज्ञानाविरोधित्वा द्वृत्तेस्त्वनधिष्ठानत्वेन

रोधितमोनिवर्त्तकः । ज्ञानप्रकाशः ज्ञानरूपप्रकाशः ॥नाज्ञानेति ॥ तथाचोक्तसाध्यवत्यालोकेस्वविरोधितमोनिवर्त्तकत्वसद्भा
वेनसाध्यव्यापकत्वात् पक्षीभूतेप्रमाणज्ञानेउक्तहेतुमतिस्वविरोधिनिवर्त्तकत्वरूपोपाध्यभावेनसाधनाव्यापकत्वाच्चायमुपाधिरि
तिभावः । ननुसाधनव्यापकोयमुपाधिःज्ञानस्याज्ञानविरोधित्वेनस्वविरोध्यज्ञाननिवर्त्तकत्वादितिचेत् अत्रप्रष्टव्यं अज्ञानविरो
धिज्ञानं किंघटाधिष्ठानचैतन्यं वृत्तिर्वा तत्प्रबिंबितचैतन्यंवा नाद्यइत्याह ॥ घटादीति ॥ अविरोधित्वेनतत्राज्ञानस्यनिवृत्त
त्वात्सर्वदासर्वेषांघटप्रकाशापातइत्यर्थः । नद्वितीयतृतीयावित्याह ॥ वृत्तेरिति ॥ उभयोरपिमिथ्यात्वेनअध्यस्ताधिकतत्वावे

SGDF
Sri Gangadhareshwar Digital Foundation

दकत्वाभावेनाज्ञानत्वादितिभावः ॥ तज्ज्ञानत्वेति ॥ घटादिज्ञानत्वाभावादित्यर्थः । अनधिष्ठानत्वेपितज्ज्ञानत्वमस्त्वित्यत
आह ॥ त्वन्मतइति ॥ ज्ञेयस्याधिष्ठानभूतेज्ञानएवाध्यासांगीकारादितिभावः । एवमाद्यानुमानंसविस्तरंनिरस्यचैत्रप्रमापक्ष
कानुमानमपिनिरस्यति ॥ द्वितीयेति ॥ बाधइति ॥ सुखादिप्रमाणामपिचैत्रप्रमात्वेनपक्षत्वात्तासुचैत्रप्रमाप्रागभावव्यतिरि
क्तानादिनिवर्त्तकत्वाभावाद्बाधइत्यर्थः । सुखादिविषयेभावरूपाज्ञानाभावादितिभावः ॥ तदिति ॥ चैत्रेत्यर्थः ॥ तदतिरि

तज्ज्ञानत्वाभावात् । त्वन्मतेहिज्ञानज्ञेययोराध्यासिकस्संबंधः । द्वितीयानुमानेप्युक्तरीत्यासुखा
दिप्रमासुबाधः । किंचसाध्येचैत्रगतत्वंकिंप्रमातत्प्रागभावयोरन्यतरविशेषणं तदतिरिक्तानादे
र्वा । नाद्यः । वृत्तेस्तत्प्रतिबिंबितचैतन्यस्यवाधिष्ठानचैतन्यस्यवाप्रमायाआत्मगतत्वाभावात् प्रमा
प्रागभावस्यचप्रतियोगिसामानाधिकरण्यात् । नद्वितीयः । दृष्टांतेसाध्याभावात् । मैत्रप्रमा
याःस्वसमानाधिकरणंस्वप्रागभावमज्ञानंचप्रतिनिवर्तकत्वेपिचैत्रगतानाद्यनिवर्तकत्वात्साध्ये

क्तेति ॥ चैत्रप्रमातत्प्रागभावातिरिक्तस्यानादेर्वाविशेषणमित्यर्थः ॥ वृत्तेरित्यादि ॥ मतभेदेनेतिज्ञेयं । प्रमायाः वृत्त्यादिरू
पायाःप्रमायाः ॥ आत्मेति ॥ वृत्तेस्तत्प्रतिबिंबितचैतन्यस्यचांतःकरणनिष्ठत्वेनाधिष्ठानचैतन्यस्यचसर्वथाऽवृत्तित्वेनात्मगतत्वा
भावादित्यर्थः । तथाचबाधइतिभावः । प्रागभावविशेषणत्वेदोषमाह ॥ प्रागभावस्येति ॥ प्रागभावस्यप्रतियोगिसमानदेशत्वे
नवृत्त्यादिरूपप्रमायाआत्मगतत्वाभावेनप्रागभावस्यापितद्गतत्वाभावाद्बाधएवेत्यर्थः । तदेवोपपादयति ॥ मैत्रेति ॥ मैत्रप्रमा

SGDF
Sri Gargeshwari Digital Foundation

याश्चैत्रगतःप्रमाप्रागभावातिरिक्तोयोनादिश्चैत्रीयाज्ञानाख्यस्तन्निवर्त्तकत्वाभावात्साध्यवैकल्यमित्यर्थः॥ प्रमापदेति ॥ चैत्रप्रमा प्रागभावातिरिक्तेतिसाध्यकरणेसमभिव्याहारादेवप्रमाप्रागभावातिरिक्तेतिप्राप्तेःप्रमापदमधिकमित्यर्थः । प्रतिरोधोद्विविधः ते नैवहेतुना हेत्वंतरेणचेति । तत्राद्यःप्रकरणसमइत्युच्यते द्वितीयःसत्प्रतिपक्षइत्युच्यतइतिटीकाकारैर्मिथ्यात्वानुमानखंडनटीका यामुक्तत्वात्तेनैवहेतुनाप्रतिरोधरूपप्रकरणसममाह ॥चैत्रप्रमेति॥ दृष्टांतेचैत्रीयाज्ञानाख्यानादिनिवर्त्तकत्वाभावेनसाध्यंद्रष्टव्यं। ननुप्रकरणसमानुमानेपिचैत्रासमवेतत्वमुपाधिः । तथाचैत्रप्रमाचैत्रीयप्रमाप्रागभावनिवर्त्तिकान प्रमात्वान्मैत्रप्रमावदित्यनुमाने

प्रमापदवैयर्थ्यंच । चैत्रप्रमाचैत्रगतस्याभावातिरिक्तस्यानादेःनिवर्तिकान प्रमात्वान्मैत्रप्रमावदिति प्रकरणसमताच । नचात्रोपाध्याभाससाम्येशंक्ये ।उक्तसाध्यानंगीकारेगौरवेणलाघवतर्कानुग्रहा

नचैत्रप्रमाप्रागभावस्यापिनिवर्त्यत्वंनस्यादित्याभाससाम्यमित्याशंक्यनिराकरोति ॥ नचेति ॥ उक्तेति ॥ हेतुभूतंप्रमात्वमंगी कृत्यप्रागभावातिरिक्तानाद्यनिवर्त्तकत्वंनस्यादित्यभावानाद्यज्ञानोभयनिवर्त्तकत्वरूपंसाध्याभावमंगीकृत्याप्रयोजकताशंकायांगौ रवापत्तेर्लाघवात्प्रागभावनिवर्त्तकत्वमंगीकृत्यानादिनिवर्त्तकत्वाभावएवसाध्यइतिलाघवतर्कानुग्रहसद्भावादुपाध्याभाससाम्ययो राभासत्वमेव"अनुकूलेनतर्केणसनाथेसतिसाधने । साध्यव्यापकताभंगात्पक्षेनोपाधिसंभवः" । उपाधेरात्मत्वेसाध्याव्यापक त्वंचद्रष्टव्यं । लाघवतर्केणाभावनिवर्त्तकत्वस्यसिद्धत्वात्तद्विरोधेनआभाससाम्यानुमानमाभासएवेतिभावः । एवंप्रकरणसमानु

SGDF
Sri Gargeshwari Digital Foundation

मानंसमर्थ्योपाधिमप्याह ॥ चैत्रगतेति ॥ दृष्टांतीकृतायांमैत्रप्रमायांचैत्रगतप्रमाप्रागभावातिरिक्तानादिनिवर्त्तकत्वमस्ति तथा चैत्रगतप्रमाप्रागभावातिरिक्तोयोऽभावःस्वप्रमाप्रागभावःतन्निवर्त्तकत्वंचास्तीतिसाध्यव्यापकः । साध्योपाध्योरनाद्यज्ञानाभाव घटितत्वेनभेदः । साध्यसमव्याप्तश्च हेतुमत्यांचैत्रप्रमायांचैत्रगतप्रमाप्रागभावातिरिक्ताभावनिवर्त्तकत्वंनास्ति प्रागभावव्यतिरिक्ताभावस्यप्रध्वंसादेरनिवर्त्यत्वात् साधनाव्यापकश्चेतिभावः । ननुजन्यपदार्थमात्रेचैत्रगतप्रमाप्रागभावातिरिक्तस्वप्रागभावनिवर्त्तकत्वस्यसत्वेनोपाधिसाध्ययोःसत्वाद्व्यतिरेकसहचारग्रहस्थलाभावेनसाध्याभावाविनाभाव्यभावत्वाभावान्नायमुपाधिरित्यतआ

चैत्रगतप्रमाभावातिरिक्ताभावनिर्वतकत्वं समव्याप्तोपाधिश्च व्यतिरेकोपसंहारस्थलं
चप्रागभावः चैत्रप्रमास्वप्रागभावातिरिक्ताभावनिवर्तिका प्रमात्वान्मैत्रप्रमावत् ।
घटः चैत्रेच्छावा चैत्रप्रमावा स्वप्रागभावातिरिक्तानादिनिवर्तिका घटत्वात् इच्छा
त्वाद्वा अप्रमात्वाद्वा घटांतरवत् मैत्रेच्छावद्वा मैत्राप्रमावद्वेत्याद्याभाससाम्यंच ।

ह ॥ व्यतिरेकेति ॥ प्रागभावस्यानादित्वेनतत्प्रतियोगिकप्रागभावाभावेनचैत्रप्रमाभावातिरिक्तप्रागभावनिवर्त्तकत्वाभावोस्ति। ततएवचैत्रगतप्रमाप्रागभावातिरिक्तानादिनिवर्त्तकत्वाभावोप्यस्तीत्यर्थः। आभाससाम्यंचाह ॥ चैत्रप्रमेति ॥ स्वशब्देनचैत्रप्रमागाह्या दृष्टांतेमैत्रप्रमायांचैत्रप्रमाप्रागभावातिरिक्तस्वप्रागभावनिवर्त्तकत्वेनसाध्यंद्रष्टव्यं । तथाचानेनानुमानेनचैत्रप्रमानिवर्त्याभावद्वयसिद्ध्यापत्तिरितिभावः ॥ घटइत्यादि ॥ अत्रापिस्वशब्देनपक्षीभूतोघटोग्राह्यः घटःस्वप्रागभावातिरिक्तानादेर्नि ॥ ३२७ ॥

वर्त्तकः घटत्वाद्घटांतरवदित्यनुमानेनस्वप्रागभावातिरिक्तंघटनिवर्त्यंकिंचिदनादिसिद्ध्येत् पक्षीभूतोयोघटस्तत्प्रागभावातिरिक्तस्वप्रागभावरूपानादिनिवर्त्तकत्वेनदृष्टांतेनसाध्यवैकल्यमितिद्रष्टव्यं । तथाचैत्रेच्छास्वप्रागभावातिरिक्तानादिनिवर्त्तिका इच्छात्वान्मैत्रेच्छावदित्यनुमानेनस्वप्रागभावातिरिक्तानादिभूतंकिंचिदिच्छानिवर्त्यमपिसिध्येत् । द्वेषस्तुनानादिः । दृष्टांतेपक्षीभूतेनप्रागभावातिरिक्तस्वप्रागभावस्यानादिभूतस्यभावादितिभावः । उपादाननिवर्त्तकत्वेनसाध्यंद्रष्टव्यं । तथाचैत्राप्रमास्वप्रागभावातिरिक्तानादेर्निवर्त्तिका अप्रमात्वान्मैत्राप्रमावदित्यनेनस्वप्रागभावातिरिक्तंकिंचिदनादिभूतंअप्रमानिवर्त्यमपिसिध्येत् । दृष्टां

किंचैवंविशिष्टव्यतिरेकिणः चैत्रप्रमाचैत्रनिष्ठत्वेसतिचैत्रप्रमाभावातिरिक्तानादिनि
वर्तकत्वानधिकरणं प्रमात्वान्मैत्रप्रमावदितिसाध्याभावेपिसुवचत्वात्स्वव्याघातः ।

तेपक्षिभूताप्रमाप्रागभावातिरिक्तस्वप्रागभावरूपानादिनिवर्त्तकत्वात्साध्यंद्रष्टव्यमितिविवेकः । स्वव्याघातंचाह ॥ किंचैवमिति ॥ एवंविशिष्टव्यतिरेकिणःचैत्रगतप्रमाप्रागभावातिरिक्तानादिनिवर्त्तकत्वरूपसाध्यस्याभावसाधनेपिसुवचत्वादित्यन्वयः ॥ चैत्रप्रमेत्यादि ॥ अयमर्थः चैत्रनिष्ठत्वेसतिचैत्रप्रमाभावव्यतिरिक्तानादिनिवर्त्तकत्वाधिकरणत्वंविशिष्टं एतदभावोदृष्टांतेमैत्रप्रमायांचैत्रप्रागभावातिरिक्तोयोऽनादिःस्वप्रागभावस्तन्निवर्त्तकत्वाधिकरणत्वरूपेविशेष्येसत्यपिचैत्रनिष्ठत्वरूपविशेषणाभावोस्ति । पक्षीभूतायांचैत्रप्रमायांचैत्रनिष्ठत्वरूपेविशेषणेसत्यपिचैत्रप्रमाप्रागभावातिरिक्तोयोऽनादिमैत्रप्रमाप्रागभावस्तन्निवर्त्त

SGDF

कत्वाधिकरणत्वरूपविशेष्याभावोस्तीतिविशिष्टाभावोनुगतइतिध्येयं। नन्वत्रचैत्रावृत्तित्वमुपाधिरित्यतआह ॥नचात्रेति॥ अय
मुपाधिः शंक्यमानचैत्रावृत्तित्वरूपउपाधिः। धर्मत्वादित्यनंतरंनिषिद्धत्वोपाधिवदितिदृष्टांतोद्रष्टव्यः। एतदुपाधित्वेसतिसाध्य
व्यापकत्वाधिकरणत्वस्यविशिष्टस्याभावोदृष्टांतेविशेषणाभावेनपक्षेविशेष्याभावेनद्रष्टव्यः ॥ अतएवेति ॥ विशिष्टव्यतिरेकि
णोऽतिप्रसंजकत्वादेवेत्यर्थः। विगीतोविभ्रमःएतज्जनकबाध्यातिरिक्तोपादानकःइत्याद्याभाससाम्यादेवेत्यर्थइत्यन्ये ॥ तृतीये
ति ॥ विगीतोविभ्रमएतज्जनकाबाध्यातिरिक्तोपादानकःविभ्रमत्वात्संमतवदित्यनुमानमित्यर्थः । पक्षत्वे पक्षबोधकविभ्रम

नचात्रोपाधिःशंक्यः । अयमुपाधिःएतदुपाधित्वेसतिसाध्यव्यापकत्वानधिकरणंधर्म
त्वादित्यादिनाविशिष्टव्यतिरेकिणैवसाध्याव्यापकत्वादेःसुसाधत्वात् । अतएवतृती
यानुमानंनिरस्तं। किंचभ्रांतेस्तद्विषयस्यवापक्षत्वेद्वितीयलक्षणभंगरीत्याबाधः। विगी
तोभ्रमःएतज्जनकबाध्यातिरिक्तोपादानकः विभ्रमत्वात्संमतवदितिप्रकरणसमताच।

शब्देनाभिप्रेतत्वे ॥ द्वितीयलक्षणभंगेति ॥ अर्थस्यमन्मतेऽसत्वेनत्वन्मतेचसद्विलक्षणत्वेननिरुपादानत्वात्भ्रांतिरूपज्ञा
नस्यतुत्वन्मतेसद्विलक्षणत्वेननिरुपादानत्वात्मन्मतेतुसत्वेनांतःकरणोपादानकत्वान्नाज्ञानमुपादानमित्युक्तरीत्येत्यर्थः । तेनै
वहेतुनाप्रतिरोधमाह ॥ विगीतइति ॥ एतज्जनकाबाध्यातिरिक्तोपादानकइत्यस्यएतज्जनकबाध्योपादानकइतिपर्यवसितार्थः।
तत्रप्रतिरोधउच्यते ॥ एतज्जनकेति ॥ एतज्जनकबाध्यातिरिक्तोपादानकइतिपाठः। दृष्टांतीकृतभ्रमोपादानशुक्त्यज्ञानेज्ञान

SGDF
Sri Gargeshwari Digital Foundation

निवर्त्यत्वाख्यबाध्यत्वरूपविशेष्यसत्वेपिएतज्जनकत्वरूपविशेषणाभावेनपक्षीभूतजगद्भ्रमजनकेचाज्ञानेएतज्जनकत्वरूपविशेषण सत्वेपिबाध्यत्वरूपविशेष्यस्यास्मद्रीत्याऽभावाद्विशिष्टाभावोनुगतइतिद्रष्टव्यं । एतज्जनकबाध्योपादानकोनेत्यपिक्काचित्कःपाठः । अत्रापिविशिष्टाभावोद्रष्टव्यः । अप्रयोजकत्वादिदूषणजातेनभावरूपाज्ञानसाधकानिनवीनानुमानान्यपिनिरस्तानिभवंतीत्याह ॥ एतेनेति ॥ प्रमामात्रपक्षीकारेईश्वरप्रमायाअपिपक्षकोटिनिवेशेतत्रकार्यत्वहेतोःस्वरूपासिद्ध्यापत्तेरनित्यप्रमेत्युक्तं । वेदांतजन्याचरमप्रमेत्यर्थः । दृष्टांतेस्वप्रागभावरूपानादित्वमादायसाध्यंद्रष्टव्यं ॥ भ्रमोत्तरेति ॥ अयंघटइत्यादिप्रमेत्यर्थः ।

एतेनविमताअनित्यप्रमाःस्वाभावातिरिक्तस्वविरोधिनिवर्तिका प्रमात्वात् भ्रमोत्तरप्रमावत् । ज्ञानत्वंस्वविषयावरणनिवर्तकनिष्ठं प्रकाशवृत्तित्वादालोकत्ववत् ।

पक्षीभूतप्रमाप्रागभावातिरिक्तःयःस्वविरोधिभ्रमस्तन्निवर्त्तकत्वंदृष्टांतेऽस्तिपक्षेतुस्वाभावातिरिक्तस्वविरोध्यज्ञाननिवर्त्तकत्वेनसाध्यपर्यवसानंद्रष्टव्यं । प्रमामात्रपक्षीकारेभ्रमोत्तरचरमप्रमायाअपिप्राप्त्यातस्याश्वस्वविरोधिभ्रमनिवर्त्तकत्वेनार्थांतरतावारणायभ्रमानुत्तरप्रमेत्युक्तं । प्रमामात्रस्यदृष्टांतत्वेतत्रप्रागभावातिरिक्तस्वविरोधिनिवर्त्तकत्वस्यप्रतिवादिनोसंमतेःसाध्यवैकल्यंस्यादित्यतोभ्रमोत्तरेत्युक्तं तथाचस्वविरोधिभ्रममादायदृष्टांतेउक्तसाध्यमस्तीतिध्येयं॥ स्वेति॥स्वशब्देनपक्षीभूतज्ञानाधिकरणं ज्ञानंतस्ययोविषयोब्रह्मतदावरणंयत्तन्निवर्त्तकंयज्ज्ञानंतन्निष्ठमित्यर्थः। अनेनज्ञाननिवर्त्यावरणसिद्धिः। तच्चाज्ञानमेवेतिभावः॥ आलो

SGDF
Sri Gargeshwari Digital Foundation

कत्ववदिति ॥ आलोकत्वस्यालोकवि षयावरणांधकारनिवर्त्तकालोकनिष्ठत्वादितिध्येयं ॥ अनित्यज्ञानमिति ॥ अनेन
भावरूपज्ञानविरोधिस्वदेशगताज्ञानसिद्धिरितिज्ञेयं । ज्ञानमात्रस्यपक्षत्वेनित्येश्वरज्ञानेस्वविरोध्यज्ञानसामानाधिकरण्याभावेन
बाधःस्यादतोऽनित्यज्ञानमित्युक्तं । इच्छामात्रस्यदृष्टांतत्वेईश्वरेच्छायाअपिप्राप्त्यातत्रस्वविरोधिद्वेषसामानाधिकरण्याभावेन
साध्यवैकल्यापत्तेरनित्येच्छावदित्युक्तं । स्वविरोधिप्रागभावसमानाधिकरणत्वेनार्थांतरतावारणायाभावत्वानधिकरणेत्युक्तं ।
स्वविषयकत्वादित्येवोक्तौईश्वरीयज्ञानेच्छयोर्व्यभिचारःस्यादतोऽनित्यत्वेसतीत्युक्तं । तावत्युक्तेज्ञानेच्छाप्रयत्नानांसविषयकत्वा

अनित्यज्ञानमभावत्वानधिकरणस्वविरोधिसमानाधिकरणं प्रयत्नान्यत्वेसत्यनित्यत्वेसतिस
विषयकत्वादनित्येच्छावत्। इच्छाहिस्वविरोधिद्वेषसमानाधिकरणाज्ञानविरोधी एवंचाज्ञानमि
त्यादिनवीनानुमानंनिरस्तं। अप्रयोजकत्वाद्यनिस्तारात् ॥ ७ ॥ अविद्यानुमानभंगः ॥ ४६ ॥

त्तन्मध्येज्ञानस्यपक्षत्वादिच्छायादृष्टांतत्वादुर्वरितेप्रयत्नेव्यभिचारःस्यात् । ज्ञानविरोध्यज्ञानवदिच्छाविरोधिद्वेषवत्प्रयत्नविरोधि
नोन्यस्याभावेनसाध्याभावात् । अतःप्रयत्नान्यत्वेसतीत्युक्तं । सविषयकत्वपदत्यागेघटादौव्यभिचारःस्यादित्यादिध्येयं । दृष्टां
तेसाध्यमुपपादयति ॥इच्छाहीति॥ पक्षेसाध्यपर्यवसानंदर्शयति ॥ज्ञानेति॥ एतेनेत्युक्तमेवविशदयति ॥अप्रयोजकत्वादीति॥
अनुकूलतर्काभावेनकार्यत्वहेतोरुक्तसाध्यंविनाप्युपपत्तेरप्रयोजकत्वस्य आदिपदेनचैत्रप्रमास्वप्रागभावातिरिक्ताभावनिवर्त्तिकाप्रमा ॥ ३२९ ॥
त्वान्मैत्रप्रमावदित्याभाससाम्यस्यचानिस्तारादित्यर्थः ॥ अविद्यानुमानभंगविवरणं ॥ ४६ ॥ नन्वनृतेनहिप्रत्यूढेत्य

त्रानृतशब्दवाच्यमिथ्याभूतज्ञानबद्धत्वंचेतनानांप्रतीयतइतिश्रुतिरेवाविद्यायांमानमित्यतआह ॥ अनृतेनहीति ॥ ऋतशब्द
स्य"ऋतंपिबंतौसुकृतस्यलोक"इत्यादौसत्कर्मपरत्वादनृतशब्दोदुष्कर्मपरइत्याह ॥ अनृतेति ॥ अनृतशब्दस्यपरिणामिपरत्वेप्र
माणमाह ॥ अनृतमिति ॥ "ऋगतावितिधातोस्तुपूर्वावगतवत्सदा । स्थितेर्ब्रह्मर्त्तमित्युक्तमनृतंपरिणामत"इतिस्मृतेरित्यर्थः।
तथाचानृतेनप्रकृत्यालिंगदेहरूपप्रकृत्यावाप्रत्यूढाबद्धाअसंतएतंब्रह्मलोकंनविंदंतीतिपूर्वेणसंबंधः । नन्वज्ञानेनावृतंज्ञानंअविद्या
यामंतरेवर्त्तमानाःनीहारेणप्रावृताःतमआसीदित्यादौमिथ्याभूताज्ञानमविद्यादिशब्दवाच्यंश्रूयतइत्यतआह ॥ अज्ञानेत्यादि ॥

" अनृतेनहिप्रत्यूढा " इत्यत्रानृतशब्दोदुष्कर्मपरः । परिणामिप्रधानपरोवा । "ऋतंपिबंता"
वित्यादौसत्कर्मणिऋतशब्ददर्शनात् । " ऋतंसत्यंतथाधर्म " इतिस्मृतेश्च । "अनृतंपरिणाम
त " इतिस्मृतेश्च । अज्ञानाविद्यानीहारादिशब्दाअपिप्रकृतिपराः । नचसामिथ्या । " त
मआसीत् " " गौरनाद्यंतवतीनित्यासततविक्रिये " त्यादिश्रुतिभिस्सत्यत्वान्नित्यत्वाच्च ।

नन्वस्तुतर्हिमिथ्याभूताप्रकृतिरविद्येत्यतआह ॥ नचेति ॥ उदाहृतवाक्येषुप्रकृतिमिथ्यात्वप्रतिपादकशब्दाभावादित्यर्थः ।
प्रत्युतवाक्यांतरेप्रकृतेःसत्यत्वमेवोच्यतइत्याह ॥ तमआसीदिति ॥ गौः प्रकृतिः अनाद्यंतवती आद्यंतवतीनभवतीत्यर्थः ।
अंतशून्यत्वोक्त्याज्ञाननिवर्त्यत्वाभावाख्यमिथ्यात्वाभावस्याभिधानादित्यर्थः । नित्यत्वात् ज्ञाननिवर्त्यत्वशून्यत्वात्सत्यत्वाच्च
नसामिथ्येत्यन्वयः । ननुतमआसीदित्यादिश्रुतीनांव्यावहारिकसत्वपरत्वस्यसद्वैलक्षण्यपरत्वस्यवोपपत्तेर्नपारमार्थिकसत्यत्वपर

SGDF

त्वमित्यतआह ॥ नचेति ॥ क्वचिदिति ॥ मममायादुरत्ययेत्यादौ शक्त्यादीत्यादिपदेनास्त्रमंत्रौषधादिग्रहणं । प्रकृत्यादिपर
त्वेज्ञापकमाह ॥ त्रिगुणेति ॥ ननु "भूयश्चांतेविश्वमायानिवृत्ति" रितिज्ञाननिवर्त्यत्वेनश्रुतायामायायामिथ्यात्वसिद्धिरित्यत
आह ॥ विश्वेति ॥ यद्यज्ञानंमायाशब्दार्थस्तर्हि "मायिनंतुमहेश्वर" मित्यादौमायित्वेनोद्दिष्टस्यब्रह्मणोऽज्ञानित्वप्राप्तेः । अस्त्विव

नचास्याःश्रुतेःअपूर्वपारमार्थिकसत्वपरत्वसंभवेव्यावहारिकसत्वपरत्वंवाअसद्वैलक्षण्य
परत्वंवायुक्तं । मायाशब्दोपिक्वचित्प्रकृतिपरः । क्वचिच्चविचित्रेश्वरशक्त्यादिपरः "त्रि
गुणात्मके" त्यादिस्मृतेः । "विश्वमायानिवृत्ति" रित्यादौनिवृत्तिस्तरणमेव । "मायामे
तांतरंतिते" इतिस्मृतेः । नह्यज्ञानंमायाशब्दार्थः । मायिनोब्रह्मणोऽज्ञानित्वेसर्वज्ञ
त्वनिरवद्यत्वादिश्रुतिविरोधात् । मायाशब्दस्यमयज्ञानइतिधातुजत्वाच्च । वेदनिघंटौ
मायावयुनंज्ञानमितिपाठाच्च । मायाविशब्दस्यविचित्रशक्तियुक्तइवाज्ञानिन्यप्रयोगाच्च ।

तिचेत्तत्राह ॥ मायिनइति ॥ मयज्ञानइत्यस्मादण्प्रत्ययेसतिनिष्पन्नमायाशब्दस्यज्ञानवाचित्वान्नाज्ञानंमायाशब्दार्थइत्याह
॥ मायाशब्दस्येति ॥ मयज्ञानइत्यस्मादण्प्रत्ययेणित्त्वादुपधावृद्धौस्त्रियांटापिसवर्णदीर्घेसतिमायेतिरूपंद्रष्टव्यं । यदिप्रयोग
वशान्मायाशब्दस्यविचित्रशक्त्यादिपरत्वं तर्हिंततएवाज्ञानादिपरत्वमस्त्वित्यतआह ॥ मायाविशब्दस्येति ॥ विचित्रशक्त्या

SGDF
Sri Gargeshwari Digital Foundation

दीत्यत्रादिशब्दोक्तार्थं दर्शयति ॥ योगमायामिति ॥ चेतने दुर्गायां ॥ वारिविक्षरे इति ॥ क्षरविनाशसंततदानयोरितिधातोः वारीणिविशेषतःक्षरतःदत्तइतिवारिविक्षरेइत्यर्थः।तत्रैव हरिवंशएव॥व्याख्यातत्वादिति॥आत्मशक्त्यामायाख्ययेत्यनेनेत्यर्थः। अतएवेत्युक्तंविशदयति ॥शुक्तीति॥ मिथ्याभूतेरूप्यादौरूप्यंमिथ्येतिवत्रूप्यंमायेतिमायाशब्दाप्रयोगादित्यर्थः। ननुमिथ्याभू

"योगमायांसमादिशदि" तिभागवते " ऋतेमायांविशालाक्षी " मितिरामायणेच " चेतनेजलं संस्तभ्यमायये " तिभारतेजलस्तंभनशक्तौचप्रयोगाच्च । हरिवंशे " मयश्चशंबरश्चैवमहामाया धरौतथा । पार्जन्यवारुणीमायेव्यधत्तांवारिविक्षरे " इतिपार्जन्यवरुणास्त्रयोर्मायाशब्दप्रयोगा च्च । तत्रैव "मायामास्थाययुध्यस्वे" तिप्रकृतमायायां " आस्थायतामसींविद्या "मितिविद्याशब्द प्रयोगाच्च । " एकस्त्वमेवभगवानिदमात्मशक्त्यामायाख्यये" तिभागवतेशक्तिर्मायेतिव्याख्यात त्वाच्च । अतएवनमिथ्याभूतंमायाशब्दार्थः । शुक्तिरूप्यादौतदप्रयोगात् । सत्यमंत्रौषधादिमत्येव मायाविशब्दप्रयोगाच्च । मायामृगस्यापिमारीचस्यकामरूपित्वेनरामशरवेध्यत्वेनचसत्यत्वात् ।

तमायोपेतेमायाविशब्दप्रयोगोदृश्यतइतिचेत्तत्राह ॥ सत्येति ॥ ननु"मायामृगंदयितयेप्सित"मित्यादौमारीचस्यमायामृगत्वमु च्यते तच्चमिथ्याभूतमेवेत्यतआह ॥मायामृगस्यापीति॥कामेति॥ तथाचमायामृगत्वंनमिथ्याभूतं।मनोजवःकामरूपमित्युक्त रूपविशिष्टासुरसिद्धिरेवेत्यर्थः ॥ रामशरेति ॥ "तेनाहतःशरवरेणे"तिरामशरवेध्यत्वोक्तेस्तस्यचमिथ्याभूतेऽसंभवादित्यर्थः।

SGDF
Sri Gargeshwari Digital Foundation

ननुदेवासुरसंग्रामादौमायाशस्त्रादिकंकथ्यते तच्चमिथ्याभूतमेवेत्यतआह ॥ देवासुरेति ॥ मायाशस्त्रादेर्मायाशब्दवाच्यमंत्रादिनिर्मितशस्त्रादेरित्यर्थः । ननुऐंद्रजालिकपुरुषेणमंत्रौषधादिनानिर्मितेमिथ्याभूतेसर्पादौमायाशब्दप्रयोगान्नतस्यसत्यत्वमित्यतआह ॥ मिथ्याभूतइति ॥ ऐंद्रजालिकादौमायाशब्दस्यामुख्यत्वाद्गौणत्वादित्यर्थः । गौणत्वेहेतुभूतमुख्यसंबंधस्योपपादनंमायाधीनेति । संग्रामादौनिर्मितस्यसत्यशस्त्रादिप्रतीतेर्मिथ्याभूतैंद्रजालिकसर्पादिप्रतीतेश्चमायाशब्दोक्तमंत्रौषधाद्यधीनत्वादित्यर्थः ॥ ज्ञाननिवर्त्यत्वोक्तीति ॥ "तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चांतेविश्वमायानिवृत्ति"रितिश्रुतावित्यर्थः । यद्यप्यत्रनिवृ

देवासुरसंग्रामादौचमायाशस्त्रादेः छेदाद्यर्थक्रियाकारित्वेनसत्यत्वात् । मि
थ्याभूतेऐंद्रजालिकादौमायाधीनप्रतीतिकत्वेनमायाशब्दस्यामुख्यत्वात् ।
नचमायायाःसत्यत्वेज्ञाननिवर्त्यत्वोक्तिविरोधः । सत्यस्यैवतन्निवर्त्यत्वात् ।

त्तिःस्मरणमेव"मायामेतांतरंती"तिस्मृतेरित्युक्तत्वादेषाशंकैवनोदेति तथापितत्रमायामेतामितिस्मृतौईश्वरीयबंधकशक्तितरणमेवाभिप्रेतं अत्रपुनःप्रकृतेर्विनाशएव सचप्रकृतेःसत्यत्वेनसंभवति सत्यस्यचानिवृत्तेरित्यर्थः । तथाचतदन्यथानुपपत्त्यामिथ्यात्वंकल्पनीयमित्यर्थः । अर्थापत्तेरन्यथोपपत्तिमाह ॥ सत्यस्यैवेति ॥ सत्यस्यैवज्ञाननिवर्त्यत्वं नमिथ्याभूतस्य रूप्यादौतददर्शनादितिप्राङ्गिपुणतरमुपपादितमितिभावः । श्रुत्यादौमायायाअविद्यात्वोक्त्यन्यथानुपपत्त्यामिथ्यात्वसिद्धिरित्यतआह ॥ ॥ ३३१ ॥

अतएवेति ॥ अतएवेत्युक्तमेवविशदयति ॥ विद्येति ॥ तच्चसत्यस्यैवास्तीत्यर्थः । ननु"दैवीह्येषागुणमयीमममाये"त्यादौएकस्याएवमायायाःपरस्परविरुद्धसत्वादिगुणत्रयात्मकत्वोक्त्यार्थादनिर्वचनीयत्वमेवावगम्यते अतोमिथ्यात्वसिद्धिरित्यतआह ॥ दैवीहीति ॥ सत्तानुगुणा सत्यत्वानुगुणासत्यत्वानुकूलैव नतुतत्प्रतिकूलेत्यर्थः । सत्वादीनांपरस्परंमिश्रत्वेनाविरोधःसिद्धएव । "अजामेकांलोहितशुक्लकृष्णांबह्वीःप्रजाजनयंतींसरूपा"मितितत्सामानाधिकरण्यश्रुतेरितिभावः । प्रत्युतगुणमयीत्युक्तंत्रिगुणात्मकत्वरूपंत्रैगुण्यंमायायाःसत्वएवयुक्तं नमिथ्यात्वे कुतइत्यतआह ॥ शुक्त्यादीति ॥ मिथ्याभूतइतिशेषः। ननुभवद्भिरपिमायायाः

अतएवनाविद्यात्वोक्तिविरोधः । विद्यानिवर्त्यत्वात् "दैवीह्येषागुणमयीमममा
ये" त्यादौगुणमयत्वाद्युक्तिरपिसत्वानुगुणैव शुक्त्याद्यज्ञानेरूप्यादौत्रिगुणत्वादर्श
नात् । तस्मान्नश्रुतिःसत्यप्रकृतीश्वरशक्त्याद्यतिरिक्तपराभिप्रेतानिर्वाच्याविद्याप
रा ॥ ७ ॥ श्रुतेरनिर्वाच्याविद्यापरत्वभंगः ॥ ४७ ॥ भ्रमोपादानत्वेनाविद्याकल्पनंतु

श्रुतिप्रतिपाद्यत्वांगीकारात्कथंतन्निराकरणमित्यतआह ॥ तस्मादिति ॥ शक्त्यादीत्यादिपदेनदुर्गामंत्रौषधादिग्रहणं। तथाचानेनास्मन्मतेश्रुतिःसत्यभूतप्रकृत्यादिपरेत्युक्तंभवति ॥ ७ ॥ श्रुतेरनिर्वाच्याविद्यापरत्वभंगविवरणं ॥४७॥ यदुक्तंमिथ्याभूतस्यभ्रमस्यकादाचित्कत्वेनसोपादानत्वात्तदनुगुणंमिथ्याभूतमुपादानमंगीकार्यं सैवाविद्येतिभ्रमोपादानत्वान्यथानुपपत्त्याऽविद्यासिद्धिरितिभावरूपाज्ञानसद्भावेऽर्थापत्तिःप्रमाणमिति तद्दूषयति ॥ भ्रमेति ॥ अत्रभ्रमपदेनज्ञानमर्थोवा नाद्यइत्याह ॥

SGDF

द्वितीयेति ॥ अंतःकरणस्यैवतदुपादानत्वसंभवेनार्थापत्तेरन्यथोपपत्तिरितिभावः । द्वितीयंनिराकरोति ॥ किंचेति॥ भवेदि
ति ॥ घटादौदृष्टत्वादित्यर्थः ।सोपादानत्वस्यसकर्तृकत्वव्याप्यत्वात्तदंगीकारेसकर्तृकत्वमप्यंगीकार्यंस्यात् ॐमितिचेत्तत्रप्रष्टव्यं
सकर्त्ताईश्वरोवा जीवोवा।नाद्यः शुक्तिरूप्यंकालत्रयेपिनास्तीतिजानतईश्वरस्यतत्स्रष्टृत्वायोगात्।नद्वितीयः अनुभवविरुद्धत्वा
दित्याशयेनाह ॥ नचेशइति ॥ भावरूपाज्ञानसाधकार्थापत्त्यंतरमाशंक्यनिराकरोति ॥ नापीति ॥ श्रौतेति ॥ "यतोवाइ
मानी"त्यत्रपंचम्याअपादानत्वमर्थः "अपादानेपंचमी"तिश्रवणात् उपादानत्वमेवास्यापादानत्वमिष्यते एवंश्रुतमुपादानत्वंनि
द्वितीयलक्षणनिरासेनैवनिरस्तं । किंचशुक्तिरूप्यमुपादानसहितंचेत्सकर्तृकंभवेत्। नचेशोजीवोवातस्य
कर्तेतियुज्यते। नापिनिर्विकारस्यब्रह्मणःश्रौतजगदुपादानत्वनिर्वाहायतत्कल्पनं । सत्यस्यत्रिगुणस्यप्रधान
स्यैवतदुपादानत्वेनश्रुत्यादिसिद्धत्वात् अविद्यायाअपिअनादित्वेननिरवयवतयाब्रह्मवदेवविकारायोगाच्च।
रवयवतयानिर्विकारस्यनयुक्तमितितन्निर्वाहायाविद्याकल्प्यते तत्संबंधाच्चयुक्तमुपादानत्वमित्यर्थः। जगदुपादानत्वान्यथानुपपत्तेर
न्यथोपपत्तिमाह ॥ सत्यस्येति ॥ तदिति ॥ जगदित्यर्थः। तथाचब्रह्मणउपादानत्वमेवाप्रामाणिकमित्याशयः। यतइतिश्रुतपं
चम्यर्थस्तु"अपादानत्वमेवास्ययद्युपादानतेष्यते। अंगीकृतंततपितृवन्नतुविश्वात्मनाभव"इत्यादिनोत्तरप्रस्थानोक्तरीत्याद्रष्टव्यः।
ननुप्रधानस्यसावयवत्वेऽनादित्वभंगः निरवयवत्वेपरिणामायोगइत्यतआह ॥ अविद्यायाइति॥ यद्धिसावयवंतद्विकृतंभवति
नत्वखंडं अविद्याचब्रह्मवदेवनिरंशाऽतस्तस्यांकल्पितायामपिनब्रह्मणोजगत्कारणत्वनिर्वाहः उभयोरप्यखंडत्वादितिभावः ।ब्र

SGDF Sri Gargeshwari Digital Foundation

ह्मणएवविवर्त्तेत्याद्यन्वयः । अयमर्थः । ब्रह्मणउपादानत्वेपिनाविद्याकल्प्या । नचनिर्विकारस्यतदयोगः अतात्विकविकारांगीका रात् तस्यचतात्त्विकाऽविकाराविरोधित्वात् । अतात्विकोविकारःकीदृशइतिचेत् शुक्त्यादीनांरजतंप्रतीवविवर्ताधिष्ठानत्वमेवेति नाविद्यातदर्थंकल्प्येति ॥ अन्यथेति ॥ अतात्विकस्यापितात्विकेनविरोधमंगीकृत्यब्रह्मणःतात्विकाविकारवतएवउपादानत्वायो गेनतदर्थमुपादानांतरभूताविद्याकल्पनइत्यर्थः ॥ अविद्यादेरिति ॥ आश्रयविषयसापेक्षत्वेनसद्वितीयत्वमविद्यास्वभावःब्रह्मण श्चाद्वितीयासहिष्णुत्वरूपमद्वितीयत्वंस्वभावः । एवंचसद्वितीयत्वस्वभावाविद्याधिकरणत्वंनाद्वितीयस्यब्रह्मणोयुक्तं तथात्वेस

किंचब्रह्मणउपादानत्वेपिनाविद्याकल्प्या । त्वद्रीत्याब्रह्मणएवतात्विकाविकाराविरुद्धे नातात्विकविकारेणशुक्त्यादिवत्विवर्ताधिष्ठानत्वरूपोपादानत्वोपपत्तेः । अन्यथाअ विद्यादेराश्रयसापेक्षस्यद्वितीयस्यतत्वतोऽद्वितीयात्ब्रह्मणोन्यदधिकरणंकल्प्यंस्यात् ।

द्वितीयत्वस्वभावाविद्यास्वाधिकरणब्रह्माद्वितीयत्वस्वभावंव्याहन्यात् । स्वेनैवसद्वितीयत्वात् अतोऽविद्यायाब्रह्मातिरिक्तमेवा धिकरणंकल्प्यंस्यात् तथाचतत्रत्वयावक्तव्यं ब्रह्मणोऽद्वितीयत्वंतात्विकं अविद्यायाःसद्वितीयत्वमतात्विकं एवंचतात्विकस्या तात्विकेनविरोधाभावान्नाधिकरणांतरंकल्प्यतइति । एवंप्रकृतेपिविरोधाभावान्नकारणांतरंकल्प्यमित्यर्थः । अन्येतुअन्यथेत्यस्य उपादानापेक्षस्यतात्विकब्रह्मातिरिक्तोपादानकल्पनायामित्यर्थः । अन्यत्सद्वितीयंअतात्विकमित्यर्थइत्याहुः । ननुवियदादिर्ब्र

SGDF
Sri Gargeshwari Digital Foundation

ह्मणोविवर्तोपिपरिणामभूतः परिणामस्यपरिणामिविनाऽयोगात् ब्रह्मणश्चापरिणामितयाऽविद्याकल्पनमित्यतआह ॥ नचेति ॥ ॥ सत्येति ॥ सत्यरूपांतरापत्तिरूपश्चासौपरिणामश्चसोस्यास्तीतिपरिणामीतदनपेक्षत्वादित्यर्थः । अविद्यायाःपरिणामित्वंतदा स्यात् यदिसत्यजगदाख्यरूपांतरापत्तिरूपःपरिणामःस्यात् । नचैवं जगतःसत्यत्वाभावादित्यभिप्रेत्यासत्यस्येत्युक्तं सत्यरूपांतरापत्तिरूपपरिणाम्यनपेक्षत्वादसत्यस्येत्यन्वयः । सत्यभूतपरिणामस्यैवस्वोचितपरिणाम्यपेक्षानत्वसत्यस्य अतोनपरिणामित्वेनाविद्याकल्पनमितिभावः ॥ कार्येति ॥ कार्यस्यघटादेर्व्यावहारिकस्यस्वसमानसत्ताकोपादानत्वदर्शनात्रूप्यादेरपिमिथ्यात्वे

नचपरिणामित्वेनाविद्याकल्पनं । असत्यस्यसत्यरूपांतरापत्तिरूपपरिणाम्यनपेक्षत्वात् । नचकार्यापेक्षितस्वसत्तासमानसत्ताकोपादानत्वेनतत्कल्पनं । विवर्ताधिष्ठानरूपोपादानेननिवृत्तोपादानाकांक्षस्यापिघटादिदृष्टांतेनोक्तोपादानकल्पनेघटादेःकार्यस्यस्वासमानसत्ताकोपादानानपेक्षत्वेनासमानसत्ताकस्यब्रह्मणोवियदादावनुपादानत्वापातात् ।

नसमानसत्ताकोपादानापेक्षत्वात्तदनुगुणंमिथ्याभूतमुपादानंअविद्याख्यंकल्पनीयमित्यर्थः । रूप्यादेःकिमुपादानमितिशंकायां विवर्ताधिष्ठानतयाब्रह्मैवोपादानमित्युक्त्याआकांक्षायानिवृत्तत्वात् । नचघटादेःस्वसमानसत्ताकोपादानकत्वदर्शनात्रूप्यादावपिस्वसमानसत्ताकमुपादानंकल्पनीयं तच्चाविद्येतिवाच्यं । तर्हिघटादेःस्वसमानसत्ताकोपादानापेक्षत्वदर्शनात्वियदादिकार्यासमसत्ताकस्यब्रह्मणोवियदादावुपादानत्वंत्वयोच्यमानंनस्यादित्यतिप्रसंगइत्यर्थः । यदिघटादिदृष्टांतेनरूप्यादेःस्वसमानसत्ता

कोपादानकत्वंकल्प्यते तर्हिघटादेःस्वसमानसत्ताकनिमित्तकारणकत्वदर्शनेनरूप्यादेरपिस्वसमानसत्ताकनिमित्तकारणत्वापत्त्या प्रातिभासिकंकिंचिन्निमित्तकारणमपिकल्प्यंस्यादित्याह ॥ रूप्यइति ॥ अर्थापत्त्यंतरमाशंक्यनिराकरोति ॥ नचेति ॥ जीवस्यापरिच्छिन्नानंदात्मकब्रह्माभिन्नत्वेनसर्वदानंदप्रकाशःस्यात् नचासावस्ति अतस्तदप्रकाशायतत्प्रतिबंधकतयाऽविद्याकल्प्यतइत्यर्थः । कुतोनचेत्यतआह ॥ भेदेनैवेति ॥ स्यादियंकल्पनापियद्यभेदएवजीवब्रह्मणोःस्यात् नचैवं किंतुभेदस्यैवसत्वेनापरिच्छिन्नानंदब्रह्मात्मकत्वस्यैवाभावेनतत्प्रकाशप्रसक्तेरेवाभावात् । तथाचतदप्रकाशायतत्कल्पनानायुक्तेतिभावः । अस्तुवाऽनव

रूप्येस्वसमानसत्ताकनिमित्तस्यापिकल्पनापाताच्च । नचजीवस्यानवच्छिन्नब्रह्मानंदाप्रकाशायतत्कल्पना । भेदेनैवतदुपपत्तेः । अनवच्छिन्नानंदस्यापिप्रकाशमानप्रत्यङ्मात्रत्वेनाप्रकाशानुपपत्तेश्च ॥ ७ ॥ अविद्यार्थापत्तिभंगः ॥ ४८ ॥ किंचत्वन्मतेअज्ञानस्याप्रामाणिकत्वात्कथंतत्रप्रमाणोक्तिः । "अविद्यायाअविद्यात्वइदमेव(ह्रिल)तुलक्षणं । मानापातासहिष्णुत्वमसाधारणमिष्यत"

च्छिन्नब्रह्मानंदात्मकत्वं तथापितदप्रकाशएवनयुक्तः अपरिच्छिन्नानंदस्यापिसर्वदाप्रकाशमानप्रत्यक्चैतन्यमात्रत्वेनाप्रकाशानुपपत्तेस्तदर्थमविद्याकल्पनमप्रामाणिकमित्याह ॥ अनवच्छिन्नेति ॥ ७ ॥ अविद्यार्थापत्तिभंगविवरणं ॥४८॥ ७ ॥अप्रामाणिकत्वादिति ॥ सत्वाभावेनप्रमाणावेद्यत्वादित्यर्थः । संमतिमाह ॥ अविद्यायाइति ॥ किंतदविद्यात्वमित्यतआह ॥ मानेति ॥ मानानामापातःप्राप्तिः तदसहिष्णुत्वंप्रमाणाविषयत्वमितियावत् इदमेवासाधारणंलक्षणमित्यर्थः ॥ तदुक्तीति ॥

SGDF

तस्यव्यावहारिकत्वाभावात्तत्रप्रमाणोक्तिरयुक्तेत्यर्थः । ननुतदपिव्यावहारिकमेवास्त्विवतिचेत्तत्राह ॥ नहीति ॥ उपादानोपादेययोरेकसत्ताकत्वनियमादितिभावः । ननुव्यावहारिकप्रमाणसिद्धत्वेविषयस्यापिव्यावहारिकसत्तयाभाव्यं प्रातिभासिकाज्ञानं प्रातिभासिकप्रमाणगम्यं अतस्तदुक्तिर्युक्तेतिचेत्तत्राह ॥ नचेति ॥ नन्वविद्यायाःप्रामाणिकत्वसत्वाभावेप्रमाणोक्तिर्युक्तेत्यत आह ॥ नचेति ॥ असद्व्यावृत्तीति ॥ तथाचतद्बोधनायप्रमाणोक्तिर्युक्तेत्यर्थः ॥ सुतरामिति ॥ दोषशंकाकलंकितप्रमा

इतिसुरेश्वरोक्तेः । नचाज्ञानस्यव्यावहारिकत्वात्तत्रतत्प्रमाणोक्तिः। प्रातिभासिकोपादानेप्रातिभासिकेअज्ञानेतदुक्त्ययुक्तेः । नहिव्यावहारिकंप्रातिभासिकंप्रत्युपादानं । नचप्रातिभासिकेमानमस्ति । नचसाक्षिसिद्धेऽज्ञानेप्रमाणैरसद्व्यावृत्तिमात्रंबोध्यतइतिवाच्यं । नित्यनिर्दोषसाक्षिवेद्यत्वेसुतरांप्रामाणिकत्वापातात् । तमआसीदित्यादौसत्त्वस्यैवबोधनाच्च । उक्तानुमानेषुतदप्रतीतेश्च ।

णवेद्यत्वरूपप्रामाणिकत्वापेक्षयासुतरामित्यर्थः ॥ आपातादिति ॥ तथाचमानापातासहिष्णुत्वाख्यासाधारणलक्षणहानिरितिभावः । किंचासद्व्यावृत्तिमात्रंबोध्यतइत्यत्राज्ञानस्यसत्वंनबोध्यते किंतुअसद्व्यावृत्तिरेवेत्यभिप्रायः । किंवाऽज्ञानस्वरूपमेवनबोध्यते । किंनामकेवलाऽसद्व्यावृत्तिरेवेति नाद्यइत्याह ॥ सत्वस्यैवेति ॥ नत्वसद्व्यावृत्तेरित्यर्थः । उक्तानुमानेषु अज्ञानस्वरूपसाधकेषु ॥ तदप्रतीतेरिति ॥ असद्व्यावृत्त्यप्रतीतेरित्यर्थः । ननूक्तानुमानैरज्ञानस्वरूपेऽसद्व्यावृत्तिर्बोध्यतयाविवक्षितेतिचेत्त

SGDF
Sri Gargeshwari Digital Foundation

त्राह ॥ नहीति ॥ अनुमितेर्व्यापकतावच्छेदकमात्रप्रकारकत्वादितिभावः । नद्वितीयइत्याह ॥ प्रमाणैरिति ॥ असद्व्यावृत्तेः केवलायाः । अभावबोधस्याधिकरणसापेक्षत्वादितिभावः । ननूक्तानुमानप्रमाणैरज्ञानस्वरूपमपिबोध्यतएव नचप्रामाणिकत्वाप त्त्यालक्षणविरोधः साक्षिवेद्यमेतदज्ञानमितिअन्यविषयत्वेनैवानुमानैर्बोधनेनसाक्षाद्बोधकत्वाभावात् साक्षात्प्रमाणबोध्यत्वस्यैव प्रामाणिकत्वप्रयोजकत्वात् अन्यथाव्यवसायद्वाराऽनुव्यवसायविषयस्यापिरूप्यस्यतदापत्तेरित्याशंक्यनिषेधति ॥ नचेति ॥ साक्षीति ॥ इदमज्ञानंसाक्षिविषयइतिअनुमानैरविषयीकरणादित्यर्थः ॥ भ्रमेति ॥ इदंरजतमितिज्ञानवानहमित्येवंभ्रमविष

नह्यनुमानंविवक्षापरतंत्रं । प्रमाणैरज्ञानस्वरूपाग्रहेतत्रासद्व्यावृत्तेर्दुर्बोधत्वाच । नचप्रमाणानिसाक्षिवेद्यत्वे नाविद्यांबोधयंति । येनभ्रमविषयत्वेनानुव्यवसायबोध्यस्यरूप्यादेरिवप्रामाणिकत्वंनस्यात् । नचप्रमाणानि प्रतिपन्नोपाधौनिषेधप्रतियोगित्वेनाविद्यांबोधयंति । येनतथाबाधगोचरस्यरूप्यादेरिवप्रामाणिकत्वंनस्यात् ।

यतयाऽनुव्यवसायबोध्यस्येत्यर्थः ॥ नस्यादिति ॥ तथाचाज्ञानस्वरूपस्यसाक्षादेवप्रमाणविषयत्वेंगीकार्येप्रामाणिकत्वापत्त्याल क्षणविरोधस्तदवस्थोतस्तत्रप्रमाणोक्तिरयुक्तेत्याशयः । नन्वविद्यायाअप्रामाणिकत्वेनसत्वाभावेपिप्रमाणविषयत्वंसंभवतिअप्रा माणिकत्वेविधिरूपतयाप्रमाणविषयत्वंनसंभवतीत्येवनिषेध्यतयातद्विषयत्वंतुस्यादेव अप्रामाणिकस्यापिरूप्यस्यनेदंरूप्यमितिबा धविषयत्वदर्शनादित्याशंक्याह ॥ नचेति ॥ तथा निषेधप्रतियोगित्वेन ॥ नस्यादिति ॥ अतःप्रामाणिकत्वमंगीकार्यं ततश्च लक्षणविरोधापत्त्याप्रमाणोक्तिरयुक्तेत्याशयः । ननुप्रमाणैरुक्तरूपेणाज्ञानस्याबोधनेपिज्ञाननिवर्त्यत्वेनबोधनादप्रामाणिकत्वेनमि

SGDF
Sri Gargeshwari Digital Foundation

थ्यात्वंदुर्वारं तथाचलक्षणविरोधइत्यतआह ॥ ज्ञाननिवर्त्यत्वेनेति ॥ ज्ञाननिवर्त्यत्वेनानित्यत्वस्यैवबोधनादित्यन्वयः । ना
प्रामाणिकत्वरूपमिथ्यात्वस्येत्येवकारार्थः । तत्रदृष्टांतःप्रकाशेति । नहिप्रकाशनिवर्त्यत्वेनांधकारस्यापिमिथ्यात्वंवाच्यं किंत्वनि
त्यत्वमेवेत्यर्थः । धीनाश्यत्वेत्वनित्यत्वमेवस्यान्नमृषात्मतेत्युक्तत्वादितिभावः । तथाचाज्ञानस्यप्रामाणिकत्वेंगीकार्येलक्षणविरोधा
पत्त्याप्रमाणोक्तिरयुक्तेतिसिद्धमितिभावः ॥ ७ ॥ सामान्येनाविद्यायांप्रमाणभंगविवरणं ॥ ४९ ॥ शुद्धेति ॥ मोक्षका
लीनेत्यर्थः । तेन चैतन्येन ॥ मोक्षेपीति ॥ अज्ञानप्रकाशिकायाश्रितःसत्वादित्यर्थः । तदा मोक्षावस्थायां । सा अविद्या ॥

ज्ञाननिवर्त्यत्वेनप्रकाशनिवर्त्यांधकारवदनित्यत्वस्यैवबोधनात् ॥७॥ सामान्येनाविद्याप्रमाणभंगः ॥ ४९ ॥
किंचाविद्याकिंशुद्धसाक्षिचैतन्येनैवभाति किंवृत्तिप्रतिबिंबितेनतेन। नाद्यः। निर्दोषचित्प्रकाश्यत्वेनाज्ञानस्य
पारमार्थिकत्वापातात्। मोक्षेपितत्प्रतीत्यापत्तेश्च। तदासानिवृत्तत्वान्नभातीतिचेन्न । प्रतीतिमात्रशरीरस्य
प्रतीत्यनुवृत्तौनिवृत्त्ययोगात् । एतेनाज्ञानस्यराहुवत्स्वावृतप्रकाशेनैवस्फुरणमितिनिरस्तं। नांत्यः। अज्ञानस्य

प्रतीतिमात्रेति ॥ अज्ञानस्यप्रातिभासिकत्वादित्यर्थः ॥ प्रतीत्यनुवृत्ताविति ॥ शुद्धचैतन्यरूपप्रतीतेर्मोक्षेप्यनुवृत्तत्वादि
त्यर्थः ॥ एतेनेति ॥ अज्ञानस्यशुद्धचैतन्यप्रकाश्यत्वेमोक्षेपितत्प्रतीतावापादितायांकेनचिदुक्तंअज्ञानंस्वावृतेनचैतन्यरूपप्रका
शेनैवस्फुरति नचैतददृष्टचरं राहोःस्वावृतचंद्रप्रकाशेनैवस्फुरणात् अतोमोक्षेस्वस्यनिवृत्तत्वेनस्वावृतप्रकाशाभावान्नस्फुरणमि
ति तदप्यनेनैवनिरस्तं । अज्ञानस्यप्रतीतिमात्रशरीरत्वेनप्रतीत्यनुवृत्तौतन्निवृत्तेरेवायोगात् । अतोमोक्षेपितत्प्रतीत्यापत्तिर्दुर्वारे

त्यर्थः ॥ कदाचिदिति ॥ वृत्तिविलंबेसतीत्यर्थः । तथाचवृत्तेःकादाचित्कत्वेनतत्प्रतिबिंबितचैतन्यस्यापिकादाचित्कत्वात्क
दाचिद्वृत्तिविलंबेसतिअनादितयापूर्वंविद्यमानस्याप्यज्ञानस्याप्रतीत्यापत्त्याज्ञातैकसत्वहानेरित्यर्थः। किंचवृत्तिप्रतिबिंबितचैतन्ये
नाज्ञानभानमंगीकुर्वाणंप्रतिप्रष्टव्यं वृत्तिशब्देनांतःकरणवृत्तिर्विवक्षिता अविद्यावृत्तिर्वा। नाद्यः अंतःकरणवृत्तेःप्रमाणजन्यत्वेने
हाप्यविद्यायाःप्रातिभासिकत्वेनेंद्रियसंनिकर्षाभावेनप्रमाणाभावात् । नद्वितीयः अविद्यावृत्तेर्दोषजन्यत्वेनेहस्वस्मिन्स्वस्यादोष
त्वेनाविद्यायामविद्यांतराभावात् । अतोवृत्तेरेवायोगेननवृत्तिप्रतिबिंबितचैतन्येनाविद्याभानमित्याह ॥ अंतःकरणेति ॥ किं

कदाचिदप्रतीत्यापातात् । अंतःकरणाविद्यावृत्त्योःप्रमाणदोषाभ्यांजन्यतयेहोभयाभावेनवृत्त्य
योगाच्च । वृत्तेरपिवृत्त्यंतरप्रतिबिंबितसाक्षिवेद्यत्वेनवस्थापातेनतदप्रतिबिंबिततद्वेद्यत्वेमोक्षेपिवृ
त्तिप्रतीत्यापाताच्च । प्रतिबिंबनोपाधित्वप्रयोजकस्यसत्त्वस्यअपारमार्थिकत्वेनप्रातीतिक्यावृत्तेः

चनवृत्तिप्रतिबिंबितचैतन्यमज्ञानभासकं वृत्तिस्वरूपेमानाभावात् । ननुतत्प्रतीतिरेवतत्रमानमितिचेत् तत्रवक्तव्यं किंवृत्तिरपिवृ
त्तिप्रतिबिंबितसाक्षिवेद्या उततदप्रतिबिंबितसाक्षिवेद्येति । नाद्यः अज्ञानाभासकवृत्तिभासकचैतन्यप्रतिबिंबनोपाधिभूतायाअ
पिवृत्तेर्वृत्तिप्रतिबिंबितसाक्षिवेद्यत्वेऽनवस्थास्यात् । नद्वितीयः वृत्तिभासकस्यवृत्तिप्रतिबिंबितशुद्धचैतन्यस्यमोक्षेपिसत्वेनतत्रापि
वृत्तिप्रतीत्यापातादित्याह ॥ वृत्तेरपीति ॥ अज्ञानस्यवृत्तिप्रतिबिंबितसाक्षिचैतन्यवेद्यत्वेदूषणांतरंचाह ॥ प्रतिबिंबितेति ॥
अविद्यावृत्तिप्रतिबिंबितसाक्षिवेद्यत्वमेवाज्ञानस्येतित्वन्मतं । नचतत्रदोषाभावः स्वस्मिन्स्वस्यैवदोषत्वात् तथाचाविद्यावृत्तेरपि

SGDF ... Foundation

प्रातीतिकत्वेनप्रातीतिक्यांप्रातिभासिक्यांअविद्यायांविषयेवर्त्तमानायावृत्तिस्तस्यामविद्यायामितियावत् चैतन्यप्रतिबिंबनंवदता तत्प्रतिबिंबनोपाधित्वप्रयोजकंसत्वंवाच्यं असतःशशशृंगादेःप्रतिबिंबनोपाधित्वाभावात् तच्चसत्वमपारमार्थिकमेव प्रातिभासिकमितियावत् प्रातिभासिकवृत्तौसत्वस्यापिप्रातिभासिकत्वात् एवंचाविद्यायांचैतन्यप्रतिबिंबनोपाधित्वप्रयोजकसत्वस्याविद्याप्रतीत्यधीनत्वेनान्योन्याश्रयः । साक्षिरूपाविद्याप्रतीतौसत्यांअविद्यासत्वसिद्धिः तस्याःप्रातिभासिकत्वेनप्रतीतेरेवतत्सत्वरूपत्वात् तत्सिद्धौचप्रतिबिंबनोपाधिभूतसत्वप्राप्त्यातत्रचैतन्यप्रतिबिंबनसंभवेनाविद्यावृत्तिप्रतिबिंबितचैतन्यरूपसाक्षिलक्षणा

प्रतीत्यधीनत्वेनान्योन्याश्रयाच्च ॥ ७ ॥ अविद्याप्रतीतिभंगः ॥ ५० ॥ अविद्याश्रयश्चदुर्वचः । यदत्रोक्तं विवरणे । चिन्मात्रमेवाज्ञानाश्रयः । तदन्यस्याज्ञानकल्पितत्वेनतदाश्रयत्वायोगात् । तदुक्तं । (आश्रयत्वविषयत्वभागिनीनिर्विशेषचितिरेवकेवला । पूर्वसिद्धतमसोहिपश्चिमोनाश्रयोभवतिनापिगोचर) इति ॥

विद्याप्रतीतिसिद्धिरिति तथाचाविद्याप्रतीतेरेवायुक्तत्वादविद्याऽप्रामाणिकीत्याशयः ॥ ७ ॥ अविद्याप्रतीतिभंगविवरणं ॥ ॥ ५० ॥ अविद्याश्रयश्चेति ॥ परमतइतिशेषः ॥ अत्रेति ॥ अज्ञानाश्रयःसुवचइत्याशयेनेत्यर्थः । चिन्मात्रं बिंबप्रतिबिंबभूतजीवब्रह्मानुस्यूतमुखमात्रस्थानीयंचिन्मात्रं । ननुजीवएवाज्ञानाश्रयःकिंनस्यादित्यतआह ॥ तदन्यस्येति ॥ चिन्मात्रान्यस्यजीवस्याज्ञानकल्पितत्वेनाज्ञानाश्रयत्वायोगात् । तथात्वेऽज्ञानसिद्धौतत्कल्पितजीवसिद्धिः तत्सिद्धौचतदाश्रिताज्ञानसिद्धिरित्यन्योन्याश्रयइत्यर्थः । जीवोऽज्ञानाश्रयोनेत्याह ॥पूर्वेति॥ तमसोऽज्ञानस्य । पश्चिमः कल्पितोजीवः गोचरः विषयः ।

SGDF Sri Gargeshwari Digital Foundation

ननूभयानुस्यूतचिन्मात्राश्रिताज्ञानस्यकथंप्रतिबिंबेजीवएवसंसारापादकत्वं बिंबेतदनुस्यूतचिन्मात्रेवातत्किंनस्यादित्यतआह ॥ दर्पणस्येति ॥ वक्ष्यमाणदूषणजातमेवकारिकयासंगृह्णाति ॥ विरोधादिति ॥ बाधादित्यत्रैवधर्मिमानेनेत्यस्यसंबंधः । तत्रादौविरोधादित्युक्तंहेतुमुपपादयति ॥ एकेति ॥ विरोधस्फोरणायेदंविशेषणं । चिन्मात्रस्यैवाज्ञानाश्रयत्वंवदताज्ञानस्यैवतदाश्रयत्वमुक्तंस्यात् चिन्मात्रस्यैवज्ञानाश्रयत्वात् तथाचैकविषययोर्ज्ञानाज्ञानयोर्विरुद्धत्वान्नाश्रयाश्रयिभावःसंभवति । तथा

दर्पणस्यमुखमात्रसंबंधेपिप्रतिमुखेमालिन्यवत्प्रतिबिंबेजीवेसंसारो नतुबिंबेब्रह्मणि । उपाधेःप्रतिबिंबपक्षपातित्वादिति । अत्रब्रूमः । विरोधाद्धर्मिमानेनबाधाच्छ्रुतिविरोधतः । भ्रांत्यैकाधिकरण्याचनाज्ञानंशुद्धचिद्गतं ॥ १ ॥ तथाहि । एकविषयज्ञानभावरूपाज्ञानयोःतमःप्रकाशयोरिवविरुद्धत्वात्नाश्रयाश्रयित्वं ।

चाज्ञानंज्ञानाश्रितंनभवति तद्विरुद्धत्वात् यत्यद्विरुद्धं तत्तदाश्रितंनभवति यथातमःप्रकाशाश्रितमितिसामान्यव्याप्तिमूलकानुमानमुक्तंभवति। नन्विदमयुक्तंघटतदत्यंताभावयोःपरस्परविरुद्धत्वेनघटात्यंताभावेघटविरुद्धत्वेसत्यपिघटाश्रितत्वस्यैवसत्वात् घटात्यंताभावोहिभूतलादाविवघटेप्यस्ति अन्यथाघटेसत्वप्रसंगादित्यतउक्तं ॥ तमःप्रकाशयोरिवेति ॥ नात्रविरोधःपरस्परविरहरूपोविवक्षितः किंनामतमःप्रकाशयोरिववध्यघातकभावरूपएव । अतोघटतदत्यंताभावयोर्वध्यघातकभावविरोधाभावात्

SGDF
Sri Gargeshwari Digital Foundation

नव्यभिचारइतिभावः । ननुवध्यघातकभावरूपविरोधःस्वरूपासिद्धिः चैतन्यरूपस्यज्ञानस्याज्ञाननिवर्तकत्वानंगीकारादित्यत आह ॥ नहीति ॥ अज्ञानस्यचैतन्यरूपज्ञानानिवर्त्यत्वेतस्याज्ञानत्वमेवनस्यात् ज्ञाननिवर्त्यत्वस्यैवाज्ञानलक्षणत्वादितिभावः । नन्वज्ञानस्यचैतन्यरूपज्ञाननिवर्त्यत्वाभावेपिनतस्याज्ञानत्वाभावः । वृत्तिरूपज्ञाननिवर्त्यत्वेनापिअज्ञानलक्षणवत्तयाऽज्ञानत्वोपपत्तेरित्याशंक्यपरिहरति ॥ नचेति ॥ वृत्तिज्ञानेति ॥ अंतःकरणवृत्तिरूपज्ञानेत्यर्थः ॥ उपचारादिति ॥ ज्ञाअवबोधन इतिधातोर्भावव्युत्पत्त्याज्ञप्तिरूपचैतन्यएवज्ञानत्वंमुख्यं अंतःकरणवृत्तौतुज्ञायतेचैतन्यमनयेतिकरणव्युत्पत्त्याज्ञानत्वमुपचरित

नहिज्ञानानिवर्त्यमज्ञानंभवति । नचवृत्तिज्ञाननिवर्त्यंतत् । विवरणेंतःकरणपरिणामे
ज्ञानत्वोपचारादित्युक्तत्वेनौपचारिकज्ञानविरोधिनोमुख्याज्ञानत्वायोगात् । अज्ञाना
विरोधित्वेचैतन्यस्यघटादिवज्ज्ञानत्वायोगाच्च । ज्ञानाज्ञानेहिज्ञातुरर्थप्रकाशाप्रकाशौ ।

मित्युक्तत्वादौपचारिकवृत्तिज्ञानविरोधिनोमुख्याज्ञानत्वमयुक्तं किंत्वौपचारिकाज्ञानत्वमेवस्यादित्यर्थः । किंचचैतन्यज्ञानत्वसिद्ध्यर्थमपितस्याज्ञाननिवर्तकत्वंवाच्यं अन्यथाविमतंचैतन्यंनज्ञानं अज्ञानाविरोधित्वाद्घटवदित्यनुमानेनतस्यज्ञानत्वमेवनस्यादित्यतआह ॥ अज्ञानेति ॥ तथाचाज्ञानत्वसिद्ध्यर्थंचैतन्यनिवर्त्यत्वेंगीकार्येनासिद्धिरित्याशयः । किंचज्ञानस्याज्ञाननिवर्तकतयाअनुभवसिद्धत्वाच्चतयोर्विरोधोंगीकार्यइत्याह ॥ ज्ञानेति ॥ ज्ञातुरर्थप्रकाशात्मकज्ञानस्यार्थाप्रकाशात्मकज्ञाननिवर्त

SGDF
Sri Gargeshwari Digital Foundation

कत्वमनुभवसिद्धमित्यर्थः । ननुचैतन्यंनज्ञानं अज्ञानाविरोधित्वादित्यत्राप्रयोजकता नचाज्ञानाविरोधित्वेज्ञानत्वमेवनस्यादि तिवाच्यं । हानोपादानादिव्यवहारंहेतुत्वेनतदुपपत्तेरित्याशंक्यनिराकरोति ॥ नचेति ॥ अज्ञानेति ॥ साक्षादितिशेषः ॥ तद्धेतुत्वेति ॥ व्यवहारहेतुत्वेत्यर्थः । तथाचज्ञानेनाज्ञाननिवृत्त्यनंतरमेवविषयेव्यवहारस्यानुभवसिद्धत्वात् । अन्यथातद्विरो धान्नाप्रयोजकतेतिभावः । दूषणांतरदानायासिद्धिमेवपुनराशंक्यनिराकरोति ॥ नचेति ॥ बुद्धि रंतःकरणवृत्तिः । कथंतर्ह्य ज्ञानेज्ञाननिवर्त्यत्वलक्षणयोगइत्यतआह ॥ ज्ञानकरणविरोध्येवेति ॥ नतुज्ञसीति ॥ चैतन्यंतुज्ञप्तिरूपं अतोनाज्ञानस्यत

नचतद्विरोधित्वेपिव्यवहारादिहेतुत्वात्ज्ञानत्वं। अज्ञाननिवर्तकस्यैवतद्धेतुत्वानुभवात्। नचविवर णेकरणव्युत्पत्त्याबुद्धिवृत्तिर्ज्ञानमित्युक्तत्वेनाज्ञानंज्ञानकरणविरोध्येवनतुज्ञप्तिविरोधीतिवाच्यं। न जानामीतिज्ञप्तिविरोधित्वेनानुभूयमानस्याज्ञानांतरत्वापातात्। साक्षिवेद्येसुखादावज्ञानादर्शनाच।

द्विरोधिज्ञाननिवर्त्यत्वसिद्धिरितिभावः । करणविरोधित्वेनाननुभूयमानस्यज्ञप्तिविरोधित्वेनैवानुभूयमानस्याज्ञानस्यदुरपह्नवत्वा न्नासिद्धिरित्याशयेनाह ॥ नजानामीति ॥ ज्ञाधात्वर्थभूतज्ञप्तिविरोधएवनज्ञाप्रतीयतइत्यर्थः । तथाचज्ञानकरणविरोधिनए वाज्ञानत्वेज्ञप्तिविरोधित्वेनानुभूयमानस्याज्ञानांतरत्वंस्यादित्यर्थः । अज्ञानस्यज्ञप्तिरूपज्ञानविरोधमनंगीकृत्यचैतन्यस्याज्ञाननिव र्तकत्वानंगीकारेसुखादावज्ञाननिवर्त्तकस्यान्यस्यांतःकरणवृत्तिरूपकरणस्याभावात्तत्राज्ञानानुभवःस्यादित्याह ॥ साक्षिवेद्य

SGDF
Sri Gargeshwari Digital Foundation

इति ॥ तस्माच्चैतन्यस्यैवाज्ञानविरोधित्वेंगीकार्येनासिद्धिरित्याशयः । यदुक्तंविरुद्धत्वेनाश्रयाश्रयिभावायोगइति तदयुक्तं विरोधस्तदास्याद्यदिज्ञानाज्ञानयोस्समसत्ताकत्वंस्यात् नचैवं चैतन्यरूपज्ञानस्यसत्यत्वात् तदाश्रिताज्ञानस्यमिथ्यात्वात् मिथ्याभूतंप्रतिसत्यस्याश्रयतायाःसौरप्रकाशदिवाभीतांधकारयोर्दर्शनेनविरोधाभावाद्युक्तएवाश्रयाश्रयिभावइत्याशंक्यनिराकरोति ॥ नचेति ॥ दिवाभीतः पेचकः । दिवाभीतःसौरालोकेंधकारमारोपयति सचांधकारोमिथ्याभूतः सत्यभूतसौरप्रकाशाश्रितइत्यर्थः । यदिदृष्टांतेश्रद्धा तर्हिंसौरप्रकाशस्यमिथ्याभूतदिवाभीतांधकारेणविरोधाभावेपिलोकसिद्धविरोधघटनायसौरप्रकाशसम

नचचैतन्याज्ञानयोःसौरप्रकाशदिवाभीतांधकारयोरिवतत्सत्यत्वमिथ्यात्वाभ्यामविरोधादाश्रयाश्रयितेतिवाच्यं। सौरप्रकाशविरुद्धतत्समसत्ताकतमोंतरस्येवचैतन्यप्रकाशविरुद्धतत्समसत्ताकाज्ञानांतरस्याभावेनातात्विकाज्ञानविरोधस्यैववाच्यत्वात् ।

सत्ताकंतद्विरुद्धांधकाररूपंतमोंतरमेवास्तीतिमिथ्याभूतेनांधकारेणाविरोधःकल्प्यते एवमिहापियदिचैतन्यप्रकाशविरुद्धंतत्समसत्ताकंअज्ञानांतरंस्या त्तदाऽतात्विकाज्ञानेनाविरोधःकल्प्यःस्या न्नचैवमस्ति चैतन्यप्रकाशविरुद्धतत्समसत्ताकाज्ञानांतराभावात् । अतोलोकानुभवसिद्धविरोधघटनायातात्विकाज्ञानेनैवविरोधेवाच्येविरुद्धत्वान्नाश्रयाश्रयिभावोयुक्तइत्युक्तंयुक्तमेवेत्याह ॥ सौरेत्यादिना ॥ अज्ञानांतरस्येति ॥ तत्सत्यत्वेतदेवसत्यभूतमज्ञानंजगत्कारणमस्तु किंमिथ्याभूततत्कल्पनयेतिभावः ॥

SGDF Sri Gargeshwari Digital Foundation

अन्यथेति ॥ भिन्नसत्ताकयोरविरोधमंगीकृत्याश्रयाश्रयिभावागीकारइत्यर्थः । आत्मन श्चैतन्यस्याधर्मिमानेनबाधादितिद्वितीयहेतुमुपपादयति ॥ किंचेति ॥ साक्षिबाधइति ॥ अहमर्थाश्रयत्वेनग्राहकसाक्षिणाबाधान्नाज्ञानंशुद्धचिद्गतमित्यर्थः । धर्मिग्राहकमानस्याप्रमाणस्यभ्रांतित्वान्नतद्बाधः शुद्धचिदज्ञानवादस्य । तथाहिआत्मनिस्थौल्याभावेपिवस्तुतःस्थौल्याश्रयेणदेहेनैक्यस्यात्मन्यध्यासाख्यनिमित्तसद्भावमंगीकृत्याहंस्थूलइतिप्रतीतेर्भ्रमत्वमंगीकार्यं एवंवस्तुतोहंकारस्याज्ञानाश्रयत्वाभावेपि

अन्यथातात्विकसुखरूपस्यात्मनोव्यावहारिकदुःखरूपतास्यात् । किंचाहमज्ञइतिधर्मिग्राहकसाक्षिबाधः । नचात्मनिस्थौल्याश्रयदेहैक्याध्यासादहंस्थूलइतिवदहंकारेअज्ञानाश्रयचिदैक्याध्यासाद्धादग्धृत्वायसोरेकाग्निसंबंधादयोदहतीतिवदज्ञानाहंकारयोरेकचि(ताव)दध्यासाद्वाहमज्ञइतिधीर्भ्रांतिरितिवाच्यं । अद्यापिचितोऽज्ञानाश्रयत्वासिद्ध्यान्योन्याश्रयात् ।

वास्तवतदाश्रयचिदैक्यस्याहंकारेऽध्यासादहमज्ञइतिप्रतीतिर्भ्रमरूपैव । यथावावस्तुतःकेवलायसोदाहकत्वाभावेपिदग्धृत्वस्यायसश्चैकाग्निसंबंधेननिमित्तेनअयोदहतीतिप्रतीतेर्भ्रांतित्वं तद्वत्अहमर्थस्यापिवस्तुतोऽज्ञानाश्रयत्वाभावेपिअज्ञानाहंकारयोरेकचिदध्यस्तत्वान्निमित्ताद्वाअहमज्ञइतिप्रतीतेर्भ्रांतित्वमेवातोनतद्बाधइत्याशंक्यनिराकरोति ॥ नचेति ॥ असिद्ध्येति ॥ अहमज्ञइतिधर्मिग्राहकमानाभावेअज्ञानस्यचैतन्याश्रितत्वसिद्धिः तत्सिद्धौचाहमज्ञइत्यस्यायोदहतीतिवत्गौणत्वेनाप्युपपन्नस्यचैत

SGDF
Sri Gargeshwari Digital Foundation

न्याश्रिताज्ञानकल्पनायामसाधकत्वसिद्धिरित्यर्थः । किंचाहमज्ञइत्यज्ञानग्राहकमानस्यसाक्षिरूपत्वान्नभ्रांतित्वंयुक्तं भ्रांतेर्दोष
जन्यत्वनियमात् नित्यज्ञानस्यसाक्षिणस्तदभावेनभ्रांतित्वायोगादित्याह ॥ दोषेति ॥ तथाचाहमज्ञइतिसाक्षिरूपंज्ञानंनभ्रां
तिः दोषाजन्यत्वाद्व्यतिरेकेणसंमतभ्रमवदित्यनुमानमुक्तंभवति । ननुअहमर्थाश्रितत्वेनाज्ञानग्राहकसाक्षिरूपज्ञानंदोषजन्यं
बाधयुक्तत्वादित्येवंबाधकेनदोषजन्यत्वस्याप्यनुमानात्स्वरूपासिद्धोहेतुरित्यतआह ॥ बाधकेति ॥ वस्तुतःसाक्षिज्ञानेबाधका
भावाद्बाधकाभिमतस्येत्युक्तं । बाधकज्ञानंहिअज्ञानरूपेधर्मिणिअहमर्थानाश्रितत्वग्राहीतिवक्तव्यं तत्रधर्मिज्ञानाभावेतदनुत्पत्ते

दोषाजन्यस्याहमज्ञइतिसाक्षिज्ञानस्यभ्रांतित्वायोगाच्च । बाधकाभिमतस्यैवधर्मिग्राहकैतद्बाधितत्वे
नैतद्बाधकाभावाच्च । मिथ्यारूप्येदमंशसंबंधवदध्यस्ताज्ञानसंबंधस्यापितद्ग्राहकेणैवग्राह्यत्वाच्च ।

धर्मिज्ञानेनभाव्यं धर्मिग्राहकंचप्रमाणमहमज्ञइतिसाक्षिरूपमेव । तेनचाहमाश्रितत्वेनैवाज्ञानंसिद्धमित्येवंबाधकत्वेनत्वदभिम
तस्यैवधर्मिग्राहकैतत्प्रमाणबाधितत्वेनधर्मिग्राहकस्यैतस्याहमज्ञइतिप्रमाणस्यबाधकाभावेनदोषजन्यत्वानुमानायोगादभ्रांतित्व
बाधकस्यदोषाजन्यत्वस्यस्वरूपासिद्ध्यभावादित्यर्थः । नन्वहमज्ञइतिधीर्नाज्ञानेसाक्षात्संबंधेनाहंकाराश्रितत्वंविषयीकरोति कु
तएतदितिचेत् अहंकारभिन्नचैतन्यएवाज्ञानस्यसाक्षात्संबंधग्राहकमानबाधितत्वादतोनविरोधइत्यतआह ॥ मिथ्यारूप्येति ॥
यत्रयतस्संबंधोगृह्यते सएवतत्रसाक्षात्संबंधइतिनाहंकारभिन्नेचैतन्येऽज्ञानस्यसाक्षात्संबंधसिद्धिरितिनतद्ग्राहकमानबाधइत्याहुः ।

अत्रमिथ्यारूप्येतिअध्यस्ताज्ञानेतिचपदास्वारस्यं । वस्तुतस्तुदग्धृत्वायसोरेकाग्निसंबंधादयोदहतीतिवदत्रापिअज्ञानाहंकार
योरेकचिदध्यासादहमज्ञइतिप्रतीतिर्भ्रांतिरित्युक्तमित्याह ॥ मिथ्येति ॥ दृष्टांतेसंभवति अयोदहतीतिप्रतीत्यपेक्षयापूर्वं
दग्धृत्वायसोरेकाग्निसंबंधरूपनिमित्तस्यसिद्धत्वात् नचैवंप्रकृतेसंभवति यथाइदंरजतमितिज्ञानेइदमंशःप्रतीयते तथारूप्येदमं
शसंबंधोपिप्रतीयते इदमंशःपूर्वसिद्धएवात्रप्रतीयते नतुरूप्येदमंशसंबंधःपूर्वसिद्धः रूप्यस्यमिथ्यात्वेनएतज्ज्ञानात्पूर्वंसंबंधस्या
ऽसत्वात् अतोमिथ्याभूतरूप्यग्राहकेणेदंरजतमितिज्ञानेनैवसंबंधःप्रतीयते एवमहमज्ञइतिभ्रांतिनिमित्तभूतोयोऽहंकाराज्ञानयो
रेकचित्संबंधःसःअहमज्ञइतिप्रतीत्यपेक्षयापूर्वंनसिद्धिः । रूप्येदमंशसंबंधवत्कल्पितत्वात् अतोहमज्ञइतिप्रतीत्यैवसिद्धइतिवा

अज्ञानाश्रयत्वधीबलादेवाहमर्थोकल्पितोवाऽविद्यायामनुपपत्तिरलंकारोवाऽस्तु ।
किंच "निरनिष्ठोनिरवद्यः शोकंमोहमत्येतिनित्यमुक्त" इत्यादिश्रुतिविरोधः ।

च्यं अहमर्थस्याहंकारचिदुभयसंवलनरूपत्वात् तत्रचाज्ञानसंबंधस्यचानयैवभ्रांत्याप्रतीतेः अतोऽज्ञानाहंकारयोरेकचित्संबंध
स्यानयैवप्रतीत्याकल्पितत्वान्नतन्निमित्तत्वमित्यर्थः । नन्वहमज्ञइतिप्रत्यक्षेणाहंकारस्याज्ञानाश्रयत्वप्रतीतेस्तद्विरोधइत्युक्तं । अ
हंकारस्याज्ञानकल्पितस्याज्ञानाश्रयत्वेऽन्योन्याश्रयादित्यतआह ॥ अज्ञानेति ॥ अकल्पितोऽज्ञानाकल्पितः तथाचनान्यो
न्याश्रयइतिभावः । अस्तुवाऽज्ञानकल्पितः तथापिनान्योन्याश्रयः अविद्यायांदौर्घट्यस्यभूषणत्वादित्याह ॥ अविद्यायामि
ति ॥ श्रुतिविरोधतइत्युक्तहेतुमुपपादयति ॥ किंचेति ॥ मौर्ख्यं मूर्खत्वं । ननु "निरवद्य" इत्यादौनिर्दोषत्वमेवोच्यते नत्व

SGDF Digital Foundation

ज्ञानराहित्यं अतःकथंश्रुतिविरोधइत्यतआह ॥ नहीति ॥ मोहं भ्रांतिं श्रुतिविरोधः चिद्रूपस्यब्रह्मणोऽज्ञानाश्रयत्वाभावप्रति पादकश्रुतिविरोधइत्यर्थः । येनतद्राहित्यमत्रनोच्यतइतिशंकास्यात् । अतोनिरवद्यइत्यनेनैवमौढ्यापरपर्यायाज्ञत्वरूपदोषाभा वोप्युक्तएवेतिभावः । किंचनित्यमुक्तइत्यनेनापिअज्ञानराहित्यमुच्यते तत्कथमितिचेत् बंधकीभूताज्ञानाश्रयस्यनित्यमुक्तत्वायो गादेवेत्याह ॥ नापीति ॥ निषेधइति ॥ मयात्वज्ञानरूपमवद्यमतात्विकमेवब्रह्मचैतन्यस्यांगीक्रियते अतोनश्रुतिविरोधइ

नहिमौ(ख्यं)ढ्यंनदोषः । नापिबंधकाज्ञानाश्रयोमुक्तः । नचतात्विकाविद्यादेरेवनिषे
धः । त्वन्मतेतस्याप्रसक्तेः । जीवेपितद्भावेनजीवब्रह्मणोःसावद्यत्वनिरवद्यत्वादि
व्यवस्थाश्रुतिविरोधाच्च । मुक्त्यन्वयिनिचिन्मात्रेजीवइवशोकस्यतात्विकस्याभावे
पिमोहवद्व्यावहारिकत्वापाताच्च । नचश्रुतौमोहशब्दस्तत्कार्यपरः । मुख्यार्थहानेः

त्यर्थः ॥ तस्येति ॥ तात्विकावद्यस्येत्यर्थः । ततश्चाप्रसक्तप्रतिपत्तिदोषइतिभावः ॥ जीवेपीति ॥ ब्रह्मवज्जीवेपितात्विकावि द्यादेरभावात् कुतइतिचेत् मिथ्यात्वांगीकारात् । अतोजीवब्रह्मणोस्तात्विकावद्याभावेनसाम्यादितिभावः । मोहशब्दोनाज्ञा नपरइत्यंगीकृत्यनिरवद्यपदेनैवाज्ञानंनिषिद्धमित्युक्तं । वस्तुतस्तुमोहशब्देनैवाज्ञानस्यनिषिद्धत्वान्नचिन्मात्रेतत्संभवः । नचपार मार्थिकमोहनिषेधपराश्रुतिः व्यावहारिकोमोहस्त्वस्त्येवेतिचेत्तत्राह ॥ मुक्तीति ॥ मोक्षकालीनेत्यर्थः । मोहवच्छोकादिकम

SGDF
Sri Gargeshwari Digital Foundation

पिजीवइवव्यावहारिकंचिन्मात्रेप्यंगीकार्यं श्रुतौशोकनिषेधस्यपारमार्थिकशोकादिनिषेधपरत्वसंभवादितिभावः ॥ तत्कार्येति ॥ अज्ञानकार्यशोकादिपरएव नत्वज्ञानपरः । तथाचनश्रुतौतन्निषेधलाभइतिनश्रुतिविरोधइत्याशयः ॥ मुख्यार्थेति ॥ अज्ञान रूपमोहशब्दमुख्यार्थेत्यर्थः ॥ पृथगिति ॥ तथाचपुनरुक्तिरितिभावः । इयंश्रुतिः अज्ञानाभावप्रतिपादिकाश्रुतिः । ननुचि न्मात्रपरेत्यर्थः । तथाचानुस्यूतचिन्मात्रेऽज्ञानांगीकारेनश्रुतिविरोधइत्याशयः ॥ जीवेपीति ॥ बिंबितब्रह्मणीत्यर्थः । ननुचि

तत्कार्यशोकादेःपृथगुक्तेश्च । नचेयंश्रुतिःबिंबस्थानीयब्रह्मपरा । जीवेप्यज्ञानाभावेनज्ञाज्ञावी शानीशावित्यादिश्रुतिषुजीवेअज्ञत्वोक्त्य(अज्ञानीशत्वोक्त्य)योगात् । यद्भावोमुक्तिस्तच्चिन्मात्रं सावद्यमन्यन्निरवद्यमित्यस्यविरोधाच्च । नचजीवस्यैवशुद्धस्याज्ञत्वेश्रुत्यार्थास्ति । किंचशुक्त्या द्यज्ञानवत्ज्ञातुरर्थाप्रकाशरूपमिदमप्यज्ञानंस्वकार्येणभ्रांतिसंसारादिनास्वनिवर्तकेनतत्वज्ञानेन स्वसमानयोगक्षेमेणज्ञानप्रागभावेनचसामानाधिकरण्यायज्ञात्रात्मनिष्ठं नतुज्ञानमात्राश्रितं ।

न्मात्रेज्ञानप्रतिपादकश्रुतेःजीवेऽज्ञानप्रतिपादिकायाज्ञाज्ञावित्यादिश्रुतेर्गौणार्थत्वंकल्प्यतइत्यतआह ॥ नचेति ॥ येनजीवाज्ञ त्वश्रुतिर्गौणीस्यादितिभावः । जीवस्येतिव्यतिरेकदृष्टांतः । भ्रांत्यैकाधिकरण्याच्चेत्युक्तहेतुमुपपादयति ॥ किंचशुक्तीत्यादि ना ॥ यथाशुक्त्यज्ञानंस्वकार्यभ्रांतिस्वनिवर्तकज्ञानज्ञानप्रागभावसमानाधिकरणं एवमेवेदमप्यज्ञानंज्ञात्रात्मनिष्ठंजीवनिष्ठमेव

SGDF
Sri Gargeshwari Digital Foundation

वक्तव्यं नतुज्ञानमात्राश्रितं ॥ उक्तंहीति ॥ अज्ञानभ्रांतिसम्यग्ज्ञानानामेकाश्रयत्वमित्यर्थः । ननुभ्रांत्यज्ञानयोर्ज्ञात्रात्मनिष्ठत्वेनसामानाधिकरण्यमेव । नचज्ञानरूपस्यचैतन्यस्यज्ञातृत्वायोगइतिवाच्यं । बुद्धिगतज्ञातृत्वाध्यासस्यचिन्मात्रेसत्वादित्याशंकते ॥ चिन्मात्रेपीति ॥ तस्येति ॥ ज्ञातृत्वाध्यासस्याविद्याकार्यत्वादित्यर्थः ॥ अन्योन्येति ॥ चिन्मात्रेऽज्ञानसिद्धौतत्कार्यज्ञातृत्वाध्याससिद्धिः तत्सिद्धौचज्ञानाज्ञानयोर्वैयधिकरण्यरूपबाधकपरिहारसिद्ध्याचिन्मात्रेऽज्ञानसिद्धिरित्यन्योन्याश्रय

उक्तंहिविवरणेपि जडस्यचाज्ञानाश्रयत्वेभ्रांतिसम्यग्ज्ञानयोरपितदाश्रयत्वप्रसंगादि
ति । चिन्मात्रेपिज्ञातृत्वाध्यासोस्तीतिचेन्न । तस्याविद्याधीनत्वेनान्योन्याश्रयात् ।
चैतन्येबुद्धिस्थकर्तृत्वाध्यासेनतत्स्थभोक्तृत्वाध्यासवत्बुद्धिस्थज्ञातृत्वाध्यासेनतत्स्थाज्ञ
त्वाध्यासापत्त्याबुद्धेरेवाज्ञानाश्रयत्वापाताच्च । देहादावपिज्ञातृत्वाध्याससद्भावाच्च ।

इत्यर्थः ॥ चैतन्यइति ॥ कर्तृत्वभोक्तृत्वयोरैकाधिकरण्यनियमाच्चैतन्येबुद्धिगतभोक्तृत्वाध्याससिध्यर्थंतत्रबुद्धिगतकर्तृत्वस्याप्यध्यासोयथांगीक्रियते तथाज्ञातृत्वाज्ञानाश्रयत्वयोरपिऐकाधिकरण्यनियमाच्चैतन्येबुद्धिगतज्ञातृत्वस्याध्याससिद्ध्यर्थंबुद्धिगतमेवाज्ञानमध्यस्यतामितिबुद्धिरेवाज्ञानाश्रयःस्यादित्यर्थः । यथोक्तंविवरणे अकर्तुर्भोगाभावात्भोक्तृत्वाध्यासःकर्तृत्वाध्यासमपेक्षतइति ॥ देहादाविति ॥ तथाचतत्राप्यज्ञानाध्यासःस्यादितिभावः । किंचचिन्मात्रेज्ञातृत्वाध्यासोस्तीत्येतदयुक्तमित्याह ॥ ॥ ३४१ ॥

बुद्ध्यवच्छिन्नएवेति ॥ जीवएवेत्यर्थः । बुद्ध्यवच्छिन्नचैतन्यस्यज्ञातृत्वादितिभावः । धर्माणां बुद्धिधर्माणां । तयोस्संबंधसद्भावादित्यर्थः । तदभावाज्ज्ञातृत्वाध्यासाभावात् । ननुबुद्धिधर्माणांज्ञातृत्वादीनांनतदवच्छिन्नचैतन्येऽध्यासः किंतुचैतन्यमात्रएव अतोयुक्तंतस्यज्ञातृत्वमित्यतआह ॥ तेषामिति ॥ जीवेति ॥ आरोपितज्ञातृत्वादिमतःचैतन्यस्यैवत्वन्मतेजीवत्वेनतत्राज्ञानांगीकारेजीवाज्ञानमतापत्त्याउभयानुस्यूतचिन्मात्राश्रितत्वमतंत्यक्तंस्यात्तथाचापसिद्धांतइतिभावः । नन्वज्ञानंनज्ञा

बुद्ध्यवच्छिन्नएवतद्धर्माणांज्ञातृत्वकर्तृत्वभोक्तृत्वादीनामध्यासेनचिन्मा
त्रेतदभावाच्च । तेषांचिन्मात्रएवाध्यासेतुज्ञातृत्वादिमत्येवाज्ञानांगी
कारेणजीवाज्ञानमतंस्यात् । नचशुक्त्यज्ञानमपिशुक्त्यवच्छिन्नचैत
न्यस्थमेव । अहंजानामीतिवदहंनजानामीतिज्ञातृस्थत्वानुभवात् ।

तृनिष्ठंशुक्त्यज्ञानस्यशुक्त्यवच्छिन्नचैतन्यगतत्वेनज्ञातृनिष्ठत्वाभावादित्याशंक्यनिराकरोति ॥ नचेति ॥ कुतोनचेत्यतउक्तं ॥ अहमिति ॥ यथाज्ञानेच्छयोर्ज्ञातृस्थत्वमनुभूयते एवंनशुक्तिंजानामीतिज्ञातृस्थत्वस्यैवानुभवादित्यर्थः । संसारतत्वज्ञानाभ्यामज्ञानस्यसामानाधिकरण्यदर्शनाच्चैतन्येऽज्ञानांगीकारेसंसारतत्वज्ञानेअपिचैतन्येस्यातामित्येतदयुक्तं विशेष्यभूतचिन्मात्रस्थमप्यज्ञानंविशिष्टेजीवएवसंसारहेतुः तथाविशिष्टोजीवोयस्तस्ययातत्वधीस्तद्धिरुद्धंचभवति । नचान्यगताज्ञानस्यान्यत्रसंसारहेतु

SGDF ... Foundation

त्वेघटादावपितद्धेतुत्वापत्तिरित्यतिप्रसंगइतिवाच्यं । विशेष्यविशिष्टभावस्यनियामकत्वादित्याशंक्यनिराकरोति ॥ नचेति ॥ विशिष्टे ब्रह्मण्यपीति । बिंबभूतइत्यर्थः । विशिष्टविशेष्यभावरूपस्यसंसारनियामकस्यबिंबेब्रह्मण्यपिसत्वादितिभावः । विशेष्यनिष्ठेनकारणेनविशिष्टेकार्यजननेऽतिप्रसंगमाह ॥ देहंप्रतीति ॥ अहंकारादिसंनिधानयुतोहिदेहः तथाचदेहंप्रतिविशेष्योयोऽहंकारस्तस्मिन्कर्त्तृत्वस्यत्वयांगीकारात्अहंकारविशिष्टेदेहेपितत्कार्यंभोक्तृत्वंस्यात् अकर्त्तुर्भोगाभावेनभोक्तृत्वेकर्त्तृत्वस्यप्रयो

नचविशेष्यविशिष्टभावस्यैवतंत्रत्वाद्विशेष्यस्थमज्ञानंविशिष्टेजीवेसंसारहेतुर्विशिष्टस्थ(स्य)तत्वधीविरुद्धंचेतिवाच्यं । विशिष्टेब्रह्मण्यपिसंसारापातात् । देहंप्रतिविशेष्याहंकारस्थकर्तृत्वेनदेहविशिष्टेभोक्तृत्वापाताच्च । विशेष्यस्थमुक्तेर्विशिष्टस्थसंसारविरोधापाताच्च । एतेनविशेष्यविशिष्टयोरध्यस्तमैक्यंतंत्रमितिनिरस्तं ।

जकत्वात् । अहंकारदेहयोर्विशेषणविशेष्यभावस्यनियामकस्यसत्वादित्यर्थः । देहविशिष्टेदेहरूपेविशिष्टइत्यर्थः । विशेष्यस्थाज्ञानस्यविशिष्टेसंसारापादकत्वेचिन्मात्रेनित्यमुक्तत्वसद्भावात्तस्यविशिष्टेसंसारविरोधित्वमपिस्यात्त्वदुक्तनियामकस्यसत्वादित्यतिप्रसंगइत्याह ॥ विशेष्यस्थेति ॥ एतेनेति ॥ विशेष्यस्थमप्यज्ञानंविशिष्टजीवएवसंसारहेतुः । नचातिप्रसंगः विशेष्यविशिष्टयोरध्यस्तैक्यस्यतंत्रस्यसत्वादितियत्तदप्येतेनैवनिरस्तं । विशेषणविशिष्टयोरध्यस्तैक्यरूपस्यसंसारप्राप्तिनियामकस्यविशिष्टेबिंब

SGDF
Sri Gargeshwari Digital Foundation

भूतेब्रह्मण्यसंसारापातादित्यर्थः । चैतन्यमात्रसंबंधिनोप्यज्ञानस्यविशिष्टेब्रह्मणिबिंबेनसंसारापादकत्वं किंतुजीवएव उपाधेः प्रतिबिंबपक्षपातित्वस्वाभाव्यादित्याशंक्यनिराकरोति ॥ नचेति ॥ किमुपाधेःप्रतिबिंबपक्षपातित्वस्वाभाव्यकल्पनया चिन्मात्र एवसंसारोंगीक्रियतां ननुतर्हिचैतन्यस्यनित्यमुक्तत्वश्रुतिविरोधइतिचेन्न चिन्मात्रेऽज्ञानांगीकारेपियःसर्वज्ञइत्यादिश्रुतिविरो धसाम्यात् ततश्चार्धजरतीयप्रक्रियानुपपत्तिरित्याह ॥ श्रुत्यादीति ॥ तथाचोपाधेःप्रतिबिंबपक्षपातित्वंनसंभवतीतिभावः । इतोपिनसंभवतीत्याह ॥ प्रतिबिंबस्येति ॥ स्यादेवंयदिचिन्मात्रजीवयोर्विशेष्यविशिष्टभावःस्यात् तर्ह्येवास्मान्नियामकादुपा

नचोपाधेःप्रतिबिंबपक्षपातित्वस्वाभाव्यात्जीवेसंसारइतिवाच्यं । श्रुत्यादिविरोधसा
म्येअर्धजरतीयायोगेनचिन्मात्रएवाज्ञानस्येवसंसारस्याप्यंगीकार्यत्वात् प्रतिबिंबस्य
च्छायादिवद्वस्त्वंतरत्वाच । अचाक्षुषस्यचैतन्यस्यगंधरसादिवत्प्रतिबिंबनानर्हत्वाच ।

धेःप्रतिबिंबेजीवएवसंसारापादकत्वंस्यात् । नचैवं जीवेशयोरत्यंतभेदेनप्रतिबिंबस्यजीवस्यच्छायादिवद्वस्त्वंतरत्वात् पृथक्प दार्थत्वात्विशिष्टविशेष्यभावएवायुक्तः तथाचोपाधेःप्रतिबिंबपक्षपातित्वमयुक्तं । किंचचैतन्यस्यप्रतिबिंबनंतदैवयुक्तंस्यात् । यदितच्चाक्षुषंस्यात् नचैवं अचाक्षुषत्वात् अचाक्षुषस्यगंधरसादेःप्रतिबिंबनादर्शनात् चाक्षुषस्यैवमुखादेर्लोहितरूपस्यचादर्शेस्फ टिकेप्रतिबिंबनदर्शनादित्याह ॥ अचाक्षुषस्येति ॥ नन्वचाक्षुषस्याप्याकाशस्यजलेप्रतिबिंबनंदृष्टमितिचेन्न । तत्रप्रभामंडल

SGDF
Sri Gargeshwari Digital Foundation

स्यैवप्रति बिंबनादित्युक्तत्वात् ॥ प्रतिबिंबत्वइति ॥ प्रतिबिंबस्योपाधिपरिणामत्वादितिभावः। अस्मद्रीत्येदंदूषणं। अज्ञानस्य प्रतिबिंबनोपाधित्वंचनसंभवतीत्याह ॥ सूर्यस्येति ॥ लोकेयत्प्रतिफलतितत्समानसत्ताकस्यैवोपाधित्वंदृष्टं सूर्यप्रतिफलनोपाधेर्जलस्यसूर्यसमसत्ताकत्वदर्शनात् ननुनदर्शनमात्रंप्रयोजकमितिचेन्न मरुमरीचिकाजलेषुप्रातिभासिकेषुसूर्यसमसत्ताकत्वाभावे नतत्रप्रतिफलनाभावात् एवंप्रकृतेऽज्ञानस्यचिदसमसत्ताकत्वेनचितंप्रत्युपाधित्वायोगादित्यर्थः । प्रतिबिंबनोपाधित्वप्रयोजकस्यस्वच्छद्रव्यत्वस्याज्ञानेऽभावेनाज्ञानंनप्रतिबिंबनोपाधिरित्याह ॥ अस्वच्छेति ॥ अन्यथापाषाणादावपिप्रतिफलनप्रसंगादि

प्रतिबिंबत्वेजीवस्यसादित्वाद्यापाताच्च । सूर्यस्यजलइवमरीचिकाजलेष्वप्रतिफलनेनचिदसमसत्ताकस्याज्ञानस्यचितंप्रत्युपाधित्वायोगाच्च। अस्वच्छद्रव्यस्याज्ञानस्यप्रतिबिंबनोपाधित्वायोगाच्च। अविद्यायाश्चिन्मात्राभिमुख्याभावाच्च। उपाधेरज्ञानस्याकाशाद्यात्मनापरिणामेप्रतिबिंबापायापाताच्च ।

तिभावः ॥ चिन्मात्रेति ॥ दर्पणाद्युपाधेर्बिंबाभिमुख्यदर्शनादिहचैतन्याविद्ययोरुभयोरपिसर्वगतत्वेनापरिच्छिन्नतयाऽविद्यायाश्चिन्मात्रंप्रतिप्राच्यत्वरूपस्यचितश्चाविद्यांप्रतिप्रतीचीनत्वरूपस्यचाभिमुख्यस्याभावाच्चनप्रातीतिकबिंबनोपाधित्वमविद्यायाइत्यर्थः ॥ उपाधेरिति ॥ जलाद्युपाधेर्नाशेनकर्दमात्मनापरिणामेतत्रत्यप्रतिबिंबापायोदृष्टः एवंजीवरूपप्रतिबिंबात्मनापरिणतस्याज्ञानस्यापरिच्छिन्नाकाशादिपरिणामार्थंसर्वेषामप्यविद्यांशानांविकृतत्वादाकाशाद्यात्मनाऽविद्यापरिणामेजीवाख्यप्र

तिबिंबापायापत्त्यानप्रतिबिंबपक्षपातितावचनंयुक्तमित्यर्थः। किंचादावुपाधिर्मुखमात्रंसंबद्धय्यप्रतिबिंबंसंपाद्यतत्पक्षपातीभवतीतिवक्तव्यं तदयुक्तं । मुखप्रतिमुखानुगतंमुखत्वसामान्यंतार्किकरीत्यास्तितदतिरिक्तंमुखमात्रंव्यक्त्यंतरमुपाधियोग्यंअप्रामाणिकमेवंप्रकृतेपीत्याह ॥ मुखेति ॥ दर्पणादिसंबंधात्पूर्वकालीनंमुखमात्रं ॥ स्वाश्रयएवेति ॥ अज्ञानंउपाधिविशेषभूतंचिन्मा

मुखप्रतिमुखानुगतमुखत्वातिरिक्तमुखमात्रत्वरूपव्यक्त्यंतरस्येवजीवब्रह्मानुगतचित्त्वातिरिक्तचिन्मात्ररूपस्याज्ञानाश्रयत्वयोग्यव्यक्त्यंतरस्यचाभावाच्च । अनादिभावोननिवर्ततइतिसामान्यव्याप्तेरज्ञानंज्ञाननिवर्त्यमितिविशेषव्याप्त्येवोपाधिःप्रतिबिंबपक्षपातीतिसामान्यव्याप्तेरज्ञानंस्वाश्रयएवभ्रांत्यादिहेतुरितिविशेषव्याप्त्याबाधाच्च । बंधस्यचिन्मात्राश्रितमोक्षसामानाधिकरण्याच्च । नचव्यक्त्यंतराभावेपिजीवाश्रितमेवाज्ञानं । चिदाश्रयत्वोक्तिस्तुचित्त्वस्याधिकरणतावच्छेदकत्वादितियुक्तं ।

त्रएवेत्यर्थः ॥ बंधस्येति ॥ सुखदुःखादिरूपबंधस्येत्यर्थः । बंधमोक्षयोःसामानाधिकरण्यनियमात्मोक्षस्यचिन्मात्रगतत्वेनाज्ञानकार्यसुखदुःखादिरूपबंधस्यापिचिन्मात्राश्रितत्वापत्त्यानप्रतिबिंबपक्षपातित्वमुपाधेरित्यर्थः ॥ व्यक्त्यंतरेति ॥ जीवब्रह्मानुस्यूतचिन्मात्ररूपव्यक्त्यंतरेत्यर्थः । ननुचिदाश्रितत्वोक्तिविरोधइत्यतआह ॥ चिदिति ॥ चित्त्वस्येति ॥ जीवेऽज्ञानाधि

SGDF
Foundation

करणत्वसद्भावेपितत्राज्ञानाधिकरणतावच्छेदकंनजीवत्वं किंतुचित्त्वमेव एवंचचित्त्वावच्छेदेनैवजीवेऽज्ञानमस्तीत्यभिप्रेत्याज्ञा नस्यचिदाश्रितत्वोक्तिरित्यर्थः । यथाकथंचिच्चित्त्वावच्छेदेनापिजीवएवाज्ञानमंगीकृतं तथाचाज्ञानकल्पितत्वेनाज्ञानसिद्ध्युत्तर कालीनत्वादज्ञानाश्रयत्वायोगः तथात्वेऽन्योन्याश्रयादिकंस्यादितिवक्ष्यतइत्याह ॥ अन्योन्येति ॥ ब्रह्मणीति ॥ बिंबइत्य र्थः । अज्ञानाधिकरणतायत्रनास्ति तत्रापिचित्त्वस्यसत्वेनाधिकवृत्तित्वान्नचित्त्वमज्ञानाधिकरणतावच्छेदकं एवंचचित्त्वावच्छेदे नजीवइवब्रह्मण्यपिसंसारापातइतिभावः । ननुनब्रह्मण्यपिसंसारापातःविशेष्यभूतचिन्मात्राश्रिताज्ञानेनविशिष्टेजीवएवसंसारां

अन्योन्याश्रयादेर्वक्ष्यमाणत्वात् । ब्रह्मण्यतिप्रसक्तस्यचित्त्वस्याधिकरणतानवच्छेदकत्वाच्च ।
चिन्मात्ररूपविशेष्यस्थाज्ञानेनविशिष्टेसंसारइतिचनिरस्तं । किंचोपाधेःप्रतिबिंबपक्षपा
तित्वंकिंतत्रस्वधर्मप्रतिभासकत्वं स्वकार्यप्रतिभासकत्वंवा स्वकार्यनिष्ठधर्मप्रतिभासकत्वंवा

गीकारात् विशेष्यविशिष्टभावस्यनियामकस्यसत्त्वादित्यतआह ॥ चिन्मात्रेति ॥ देहंप्रतिविशेष्याहंकारस्थकर्तृत्वेनदेहविशि ष्टेभोक्तृत्वापाताच्चेत्यतिप्रसंगेननिरस्तमित्याहुः । जीवाश्रितमज्ञानमितिपक्षदूषणावसरेचिन्मात्रस्थाज्ञानेनविशिष्टेसंसारइतिशं कायाएवानुदयादितियत्किंचिदेतत् । वस्तुतस्तुयदुक्तंबंधस्यचिन्मात्राश्रितमोक्षसामानाधिकरण्यनियमादिति तदयुक्तं मोक्ष स्यचिन्मात्राश्रितत्वेपितदाश्रिताज्ञानेनदुःखादिरूपोबंधोजीवेंगीक्रियते विशेष्यविशिष्टभावस्यनियामकत्वादित्येतदप्येतेनैवनि

SGDF Sri Gargeshwari Digital Foundation

रस्तं ब्रह्मणिबिंबेपिसंसारापातात् त्वदीयनियामकस्यसत्वात् तस्मादुपाधेःप्रतिबिंबपक्षपातितानियमोऽयुक्तएवेत्याशयेनाह ॥ चिन्मात्रेति ॥ प्रतिबिंबंप्रतीतीति ॥ जीवंप्रति प्रतिबिंबेप्रतीयमानानांसुषुप्त्याद्यनुगतानांतदनुवृत्तानांचधर्माणांप्रतिमुखगत मालिन्यादेर्दर्पणादिनिष्ठत्ववदज्ञाननिष्ठत्वाभावादित्याह ॥ मालिन्यादेरित्यादिना ॥ अविद्यादित्रयंजीवनिष्ठं । अविद्यायां त्वात्माश्रयान्नयुक्तमितिभावः । किंचोपाधावज्ञानेप्रतीयमानानांचधर्माणांनजीवनिष्ठत्वमित्याह ॥ ज्ञानेति ॥ ज्ञानंचक्रियाच

प्रतिबिंबंप्रतिस्वविषयाच्छादकत्वंवा । नाद्यः । मालिन्यादेर्दर्पणादिनिष्ठत्ववत्सुषुप्त्या
द्यनुवृत्तस्याविद्यारूपस्यवा विद्यावच्छिन्नत्वरूपस्यवा तत्प्रतिबिंबितत्वरूपस्यवा सुषु
प्त्याद्यननुवृत्तस्यकर्तृत्वप्रमातृत्वादिरूपस्यवा संसारस्याज्ञाननिष्ठत्वाभावात् । ज्ञानक्रि
यासंस्काराणांचत्वन्मतेअज्ञानस्थत्वेपिनित्यातींद्रियाणांतेषामात्मनिकदाप्यप्रतीतेः ।

ज्ञानक्रियेतदुभयजन्यसंस्काराणामित्यर्थः । सर्ववस्तूनामपिवासनाःसंत्येवेत्यावयोर्मतं अतएवाविद्यासंस्कारात्प्रवृत्तिरित्यादि त्वदीयोव्यवहारः । अस्मन्मतेपि "वासनाःसर्ववस्तूना" मितिभगवत्पादोक्तेः । क्रियाजन्यःसंस्कारोप्यस्त्येवनज्ञानजन्यएवेति नियमः । इयांस्तुविशेषः । तेसंस्कारास्तवमतेऽविद्यानिष्ठाः अस्मन्मतेतुअनादिमनोनिष्ठाइति । यथोक्तं "अनादिमनोगता" इ ति । अन्येत्विमंसिद्धांतमजानानाःज्ञानरूपायाक्रिहाधात्वर्थरूपातज्जन्यसंस्काराणांभावनारूपसंस्काराणामितिव्याचक्षते । अ

SGDF
Sri Gargeshwari Digital Foundation

प्रतीतौनिमित्तंनित्यातींद्रियाणामिति । आत्मनि प्रतिबिंबेजीवे । नन्वज्ञानस्यजीवेयावत्स्वनिष्ठधर्मप्रतिभासकत्वाभावेपिस्वनि ष्ठोयोभावरूपोधर्मस्तत्प्रतिभासकत्वंजीवेस्तीतितत्राह ॥ अविद्येति ॥ बंधिकाबंधकारणीभूता । भावव्युत्पत्त्याबंधो नतुकर्म व्युत्पत्त्याबद्धेत्यर्थः । तथाचाविद्यायाबंधकारणीभूतायाअस्तमयोमोक्षःसाऽविद्यासंसारःबंधइत्युच्यतइत्यर्थोद्रष्टव्यः ॥ विच्छेदादेरिति ॥ जीवब्रह्मणोरज्ञानोपाधिनाबिंबप्रतिबिंबभावइतिकेषांचित्पक्षः । घटाद्युपाधिनामहाकाशस्यघटावच्छिन्ना काशस्यचविच्छेदोभवति नबिंबप्रतिबिंबभावः एवंजीवेश्वरयोरज्ञानोपाधिनाविच्छेदमात्रंजायतइत्यन्येषांपक्षः । तत्रघटाद्युपा

"अविद्यास्तमयोमोक्षःसासंसारउदाहृत" इतित्वन्मतेपिअविद्याबंधिका बंधोवा नतुबद्धा । नद्वितीयः । विच्छेदादेरुपाधिकार्यस्यबिंबेमहाकाशे चदर्शना न्मुखस्यबिंबत्वादेःब्रह्मस्थसार्वज्ञादेश्चानौपाधिकत्वापाताच ।

धिकार्यभूतोयोविच्छेदोविभागःसमहाकाशैकदेशेघटावच्छिन्नेप्रतिबिंबस्थानीयएवनास्ति किंनाम बिंबस्थानीयेमहाकाशेप्यस्ति विच्छेदस्यद्विष्ठत्वात् अतआदिपदेनबिंबप्रतिबिंबभावग्रहणं ततश्चोपाधिकार्यप्रतिभासोनप्रतिबिंबएव किंनामबिंबेच बिंबत्वा देःसर्वज्ञत्वादेश्चोपाधिभूताज्ञानकार्यत्वात् । अतउपाधिकार्यस्योभयत्रापिदर्शनात् नोपाधेःप्रतिबिंबपक्षपातित्वमितिभावः । उपाधिनास्वकार्यंप्रतिबिंबएवावभास्यतइत्यंगीकारेबाधकमाह ॥ मुखेति ॥ उभयानुस्यूतमुखमात्रस्याबिंबनात् आदिपदेनप्र तिबिंबनस्येत्यर्थः ॥ ब्रह्मेति ॥ बिंबभूतेत्यर्थः ॥ अनौपाधिकत्वेति ॥ उपाधिकार्यत्वानंगीकारेणस्वाभाविकत्वोपपादनादि

त्यर्थः । ननुदर्पणाद्युपाधेःप्रतिबिंबस्थौल्यादिरूपकार्यप्रतिभासकत्वंदृष्टमितिचेन्न । प्रकृतेतत्साम्याभावादित्याह ॥ प्रतिमुखे ति ॥ तथाचयदुपाधिकार्यंविच्छेदादि नतत्प्रतिबिंबमात्रे यश्चप्रतिबिंबमात्रगतःसंसार स्तस्यानादित्वेननोपाधिकार्यत्वं तथात्वे संसारस्यसादित्वापातादितिभावः ॥ दर्पणघटादाविति ॥ प्रतिबिंबत्वोपाधौविच्छेदोपाधौवादर्पणेविच्छेदमात्रोपाधिभूतेघ टादौचस्वकार्यंयन्मालिन्यविच्छेदादिरूपंतन्निष्ठोयोधर्मस्तत्प्रतिभासकंनास्ति । बिंबभूतेघटाकाशेचदर्पणाद्युपाधिनास्वकार्यनिष्ठ

प्रतिमुखगतस्थौल्यादेरुपाधिकार्यत्वेपीहजीवगतस्यसंसारस्यानादित्वेनाकार्यत्वाच । नतृ तीयचतुर्थौ । दर्पणघटादावदृष्टेः । एवंबुद्धिरूपोपाधेरपिनप्रतिबिंबपक्षपातित्वं । तस्याप्र तिबिंबपक्षपातिजपाकुसुमस्थानीयत्वेनतत्पक्षपात्यादर्शस्थानीयत्वाभावात् । नन्वस्तुत र्हिचिन्मात्रस्यैवाज्ञानं संसारश्च तदन्यस्यमिथ्यात्वेनमोक्षसमानाधिकरणबंधायोगात् ।

धर्माप्रतिभासनेपीत्यर्थः । अज्ञानवद्बुद्धिरप्युपाधिःसोपाधिभूताबुद्धिश्चिन्मात्रसंबंधिनीसतीबिंबप्रतिबिंबभावंसंपाद्यप्रतिबिंबप क्षपातिनीभवतीतिकेषांचिन्मतं तद्दूषयति ॥ एवमिति ॥ तन्मतेउपाधिर्द्विविधः प्रतिबिंबपक्षपाती तदपक्षपातीचेति । तत्राद्यो दर्पणाद्युपाधिः द्वितीयस्तुजपाकुसुमादिःस्फटिकेलौहित्यंप्रदर्शयति तत्रस्फटिकोनजपाकुसुमप्रतिबिंबः एवंबुद्धिरूपोपाधिर्नप्र तिबिंबपक्षपातीतित्वदाचार्यैःस्वीकृतत्वेनतवतद्विरोधादित्याशयेनाह ॥ तस्येति ॥ यथोक्तंप्रतिमुखपक्ष्यादर्शःप्रतिबिंबापक्षपा

SGDF Foundation

अ.चिन्मा.
१।५१

तिनीबुद्धिरिति । तदन्यस्य जीवस्य । मोक्षेतिहेतुगर्भं मोक्षसमानाधिकरणएवहिबंधः मोक्षश्चचिन्मात्रान्वयी मिथ्याभूतेतद भावात् अतोबंधोपिचिन्मात्रान्वयीत्यर्थः । ननुचिन्मात्रस्यसंसारांगीकारेनित्यमुक्तत्वश्रुतिविरोधइत्यतआह ॥ नित्येति ॥ बिंबं मुखं ॥ घटेति ॥ अवच्छेदपक्षेघटोपाधिकंयत्परिच्छिन्नत्वंतत् अवच्छिन्नाकाशएवदृष्टं नाकाशमात्रे महाकाशइतियावत् । तथाबिंबप्रतिबिंबभावपक्षेदर्पणोपाधिकंमालिन्यंप्रतिबिंबएव नानुस्यूतमुखमात्रे एवमज्ञानरूपोपाधिकृतःसंसारःप्रतिबिंबएवयु

नित्यमुक्तत्वश्रुतिस्तुबिंबस्थानीयब्रह्मपरेतिचेन्न । घटदर्पणोपाधिकयोःपरिच्छिन्नत्वमा लिन्ययोरवच्छिन्नाकाशप्रतिबिंबयोरिवाकाशमात्रमुखमात्रयोरदर्शनेनावच्छेदपक्षेप्र तिबिंबपक्षेचास्यायोगात् । बिंबेब्रह्मणीवप्रतिबिंबेजीवेपिसंसाराभावेनजीवब्रह्मणोः संसारासंसारव्यवस्थाश्रुत्ययोगाच्च । नचतार्किकमतेआत्मनिदुःखाश्रयतादेहादिने वेहापिचिन्मात्रेसंसाराश्रयताजीवत्वेनावच्छिन्नातदभिप्रायाचश्रुतिरितिवाच्यं ।

क्तो नानुस्यूतचिन्मात्रइत्यर्थः ॥ अभावेनेति ॥ चिन्मात्रएवसंसारांगीकारादितिभावः ॥ तार्किकमतइति ॥ यथातार्किं कमतेव्याप्तोप्यात्मानघटाद्यवच्छिन्नोदुःखाद्याधारः किंतुदेहावच्छिन्नएव तत्रदुःखाद्याधारतावच्छेदकंदेहादिरितियावत् एवंचि न्मात्रेऽज्ञानमितिमतेपिअपरिच्छिन्नेचिन्मात्रेसंसाराश्रयताजीवेनावच्छिद्यते संसाराश्रयतावच्छेदकंजीवत्वमेव नब्रह्मत्वमित्या

SGDF
Sri Gargeshwari Digital Foundation

श्येनजीवेसंसारश्रुतिर्ब्रह्मणिचासंसारश्रुतिरुपपद्यतइत्यर्थः ॥ त्वन्मतइति ॥ यथातार्किकमतेदुःखाद्यधिकरणतावच्छेदकंदेहा दिरितिदुःखादिकंनदेहादौ किंतुतदवच्छिन्नएव एवंजीवत्वावच्छेदेनचिन्मात्रेदुःखान्वयोक्तौसंसाराद्यनर्थोनजीवे किंतुतदवच्छि न्नचैतन्यएवेतिचितएवान्वयेनस्वरूपस्यैवदूषितत्वात्तद्भावरूपायामुक्तेरपुरुषार्थत्वंस्यादित्यर्थः । ननुननित्यमुक्तत्वश्रुतेर्निर्विषय त्वं । बिंबस्थानीयब्रह्मपरत्वस्योक्तत्वादितिचेत्तत्राह ॥ नहीति ॥ बिंबभूतब्रह्माख्योयःकल्पितोविशिष्टःशबलःतद्विषयानभव

त्वन्मतेआत्मनइवात्रापिचितएवानर्थान्वयेनतद्भावरूपमुक्तेरपुमर्थत्वापातात् नित्यमुक्तत्वश्रुतेर्नि र्विषयत्वापाताच्च । नहिसाकल्पितविशिष्टविषया । अथनावच्छेदो नापिप्रतिबिंबनं । किंत्वविद्यया ब्रह्मणएवजीवत्वं । "राजसूनोःस्मृतिप्राप्तौव्याधभावोनिवर्तते । यथैवमात्मनोऽज्ञस्यतत्त्वमस्या दिवाक्यत "इतिवार्तिके । "कश्चित्तुकिलराजपुत्रोव्याधगृहेसंवर्धित "इत्यादिबृहदारण्यकभाष्ये चव्याधवर्धितराजपुत्रदृष्टांतोक्त्याब्रह्मैवस्वाविद्ययासंसरतिस्वविद्ययाचमुच्यतइतिस्वीकारात् ।

ति । तथात्वेतस्यकल्पितत्वेनज्ञाननिवर्त्यत्वनियमात्तन्नाशेनिर्विषयत्वापत्तिर्दुर्वारेत्यर्थः ॥ नापीति ॥ बिंबप्रतिबिंबानुस्यूतंचि न्मात्रमित्यादिप्रक्रियानांगीकृतेत्यर्थः । पक्षद्वयानंगीकारेकःपक्षोंगीकृतइतिपृच्छति ॥ किंत्विति ॥ उत्तरमाह ॥ अविद्यये ति ॥ राजसूनोरिति ॥ व्याधगेहेसंवर्धितस्यकस्यचिद्राजसूनोःत्वंराजसूनुरसि नव्याधइतिकेनचिदाप्तेनोक्तेपश्चात्तद्वाक्येना

SGDF
Sri Gargeshwari Digital Foundation

हंराजसूनुरस्मीतिस्वरूपस्यस्मृतिप्राप्तौअनुभवेसतीतियावत् व्याधभावोनिवर्त्तते एवमज्ञस्यजीवभावेनाज्ञत्वंप्राप्तस्यब्रह्मणस्तत्व मस्यादिवाक्यतःस्वस्वरूपज्ञानेजातेजीवभावोनिवर्ततइतिसुरेश्वरीयबृहदारण्यकवार्त्तिकार्थः । भाष्यं सांकरीयं । ननुब्रह्मणए वजीवत्वेसंसारास्पृष्टचैतन्याभावप्राप्त्यानित्यमुक्तत्वश्रुतिविरोधइत्यतआह ॥ नहीति ॥ तत्रैवेति ॥ जीवभावंप्राप्तएवब्रह्म णिसंसारःकदापिनास्तिकिंत्वाविद्यकएवेत्यभिप्रायेत्यर्थः । कल्पितोपियादृशोऽनर्थरूपइत्यन्वयः ॥ सदेति ॥ सर्वदातादृशबं

नित्यमुक्तत्वश्रुतिस्तुतत्रैवतत्वतःकदापिसंसाराभावाभिप्रायेतिचेन्न । यादृशःकल्पितोप्यनर्थरूपः ज्ञानेनोच्छेत्तव्योबंधःसदातद्भावस्यैवतच्छ्रुत्यर्थत्वेनकल्पितेनापिसंसारेणास्पृष्टचैतन्याभावेनित्य मुक्तत्वश्रुतेर्निर्विषयत्वापातात् । अन्यथामुक्तौशोकाभावश्रुतिरपिशोकस्यतात्विकनिषेधपरास्या त् । असर्वज्ञत्वेनानुभवसिद्धाज्जीवादन्यस्यचेतनस्याभावेनसार्वज्ञादिश्रुतेर्निर्विषयत्वापाताच्च ।

धाभावस्यैवनित्यमुक्तत्वश्रुत्यर्थत्वादितिभावः ॥ अन्यथेति ॥ संसारवत्यपिनित्यमुक्तत्वश्रुतेरुपपत्तौतन्न्यायेनशोकाभावश्रुते रपिशोकवत्येवतात्विकशोकाभावप्रतिपादनपरत्वेनोपपत्तेर्नतच्छ्रुतिबलान्मुक्तौशोकाभावश्रुतिरित्यर्थः । ननुजीवादन्यस्यचेतन स्याभावेपिनसार्वज्ञश्रुतेर्निर्विषयत्वं जीवविषयकत्वस्यैवोपपत्तेरित्यतउक्तमसर्वज्ञत्वेनानुभवसिद्धत्वादिति । तथाचब्रह्मैवस्वावि द्ययासंसरतीतिपक्षेजीवातिरिक्तस्यबिंबस्थानीयस्यब्रह्मणोभावाज्जीवस्यचासर्वज्ञत्वेनानुभूयमानत्वात्सर्वज्ञत्वस्येवासर्वज्ञत्वस्यापि

कल्पितत्वाकल्पितत्वाभ्यामपिव्यवस्थायाअसंभवादित्यर्थः ॥ ब्रह्मभावेति ॥ कल्पितेनापिसंसारेणास्पृष्टचैतन्यस्याभावेपिसं सारिप्राप्तिरेवमुक्तिरित्यापातेनेत्यर्थः । ननुबहुजीववादेपिबद्धमुक्तव्यवस्थायाःसत्वेनतत्रैतद्दूषणप्राप्तावपिनैकजीववादेयंदोषइ त्यतआह ॥ एकजीवेति ॥ ब्रह्मैवस्वाविद्ययाएकजीवभावंप्राप्तंयदा तदातस्मिन्पक्षेजीवातिरिक्तचैतन्यस्यैवाभावादित्यर्थः ॥

बहुजीववादेब्रह्मभावरूपमुक्तेरपुमर्थत्वापाताच्च । एकजीववादेपिजीवब्रह्मणोःसंसारासं साराद्व्यवस्थाश्रुतिविरोधाच्च । तयोर्व्यावहारिकभेदस्याप्यभावेनत्वन्मतेपितत्पराभिः "द्वासुपर्णा यआत्मनितिष्ठन्नि"त्यादिश्रुतिभिः " अन्यश्चपरमोराजन्तथान्यःपंचविंशकः । तान्यहंवेदसर्वाणिनत्वंवेत्थपरंतपे "त्यादिस्मृतिभिः " शारीरश्चोभयेपिहि भेदेनैनमधीयते भेदव्यपदेशाच्चान्य "इत्यादिसूत्रैः । " तस्माच्छारीरादन्यएवेश्वरःआत्मानौहितावुभौचे तनौ । एकःकर्ताभोक्ता अन्यस्तद्विपरीतोपहतपाप्मत्वादिगुण "इत्यादित्वद्भाष्यैस्तत्वज्ञानं संसरणेचावदातत्वश्यामत्वादिवत्नेतरेतरत्रावतिष्ठेतेइत्यादिविवरणादिग्रंथैश्चविरोधाच्च ।

तयोरिति ॥ जीवब्रह्मणोरित्यर्थः । एकजीववादइतिवर्तते । अद्वैतवादेपिव्यावहारिकभेदेनजीवान्यचैतन्यस्यसत्वेद्वासुपर्णे त्यादिभेदप्रतिपादकश्रुत्यादीनांतद्विषयत्वेनाविरोधःस्यादित्यर्थः । त्वन्मतेपिव्यावहारिकोपिभेदोनास्तीतिभेदश्रुत्यादिविरोधः स्यादित्यर्थः ॥ नेतरेतत्रेति ॥ बिंबप्रतिबिंबयोरभेदेपिबिंबेऽवदातत्वंप्रतिमुखेश्यामत्वंतुमुखइत्येवंअन्योन्यस्मिन्नावतिष्ठेते किं

SGDF Foundation

नामावदातत्वंमुखेश्यामत्वंप्रतिमुखइत्येवंनियतेएव व्यावहारिकभेदात् एवंतत्वज्ञानसंसारावपिनियतावेवेत्यर्थः । " उपाधिभेदाद्धटतइतिचेत्सस्वभावतः । अज्ञानतोवाद्वैतस्यसत्यतास्वतएवचेत् । अनवस्थितिरज्ञानहेतौवान्योन्यसिद्धिता । चक्रकापत्तिरथवे "त्युपाधिखंडनवाक्यंहृदिनिधायाह ॥ किंचेति ॥ ननिवर्त्तेतेति ॥ स्वाभाविकत्वेनसत्यत्वप्राप्त्यासत्यस्यचानिवृत्तिरितितेनांगीकृतत्वादित्यर्थः ॥ औपाधिकत्वे ॥ अज्ञानस्येतिशेषः । अज्ञानस्योपाधिकल्पितत्वइत्यर्थः ॥ ७ ॥ अज्ञानस्याविवरणोक्तचिन्मात्राश्रितत्वभंगविवरणं ॥ ५१ ॥ ७ ॥ सर्वज्ञत्वात् " यस्सर्वज्ञ "इत्यादौसर्वज्ञत्वेनप्रतिपादितत्वादित्य

किंचचिन्मात्रस्याज्ञानंस्वाभाविकंचेदानंदादिवन्ननिवर्तेत । औपाधिकत्वेउपाधिःसएवचेदात्माश्रयः । अन्यश्चेदन्योन्याश्रयश्चक्रकमनवस्थावेति ॥ ७ ॥ अज्ञानस्यविवरणोक्तचिन्मात्राश्रितत्वभंगः ॥ ५१ ॥ किंचत्वन्मतेशुद्धब्रह्मणश्चिन्मात्रत्वेपिश्रुत्यादौतस्यसर्वज्ञत्वात्कथमज्ञानं ।

र्थः । ननुमयाज्ञानरूपत्वांगीकारान्नसर्वज्ञातृत्वरूपंसार्वज्ञमंगीकृतमित्यतउक्तं चिन्मात्रत्वेपीति । त्वयातथांगीकारेपिश्रुत्याद्यनुसारेणसार्वज्ञमंगीकार्यमितिभावः । " अज्ञताऽखिलसंवेत्तुर्घटतेनकुतश्चने "तिभगवत्पादीयोक्तिं तथा " ननुसर्वज्ञस्याज्ञानं नघटतइत्यत्रनान्वयदृष्टांतः परमात्मानंविनाऽन्यस्यसर्वज्ञस्याभावात् नापिव्यतिरेकदृष्टांतः अज्ञानाश्रयस्यान्यस्यपरेणानभ्युपगमात्तत्कथमेतदिति । मैवं । योयत्रज्ञानवान्नासौतत्राज्ञानवानितिसामान्यव्याप्तेरविरोधादि "तिटीकाकारीयोपपादनंचहृदिनि

SGDF
Sri Gargeshwari Digital Foundation

धायसंगृह्णाति ॥ सर्वंहीति ॥ ननुबिंबभूतंब्रह्मसर्वज्ञं तच्चनाज्ञानाश्रयइत्याशंकते ॥ सविशेषमेवेति ॥ विशिष्टंशबलमि त्यर्थः ॥ तुरीयमिति ॥ जाग्रदाद्यवस्थातीतंशुद्धंतुरीयमितितदर्थः ॥ तच्छ्रुतेरिति ॥ सार्वज्ञश्रुतेरित्यर्थः ॥ भ्रांत्येति ॥ सर्वविषयकंभ्रमरूपमेवेतितदर्थः । सर्वविषयकज्ञानस्यभ्रांतिरूपत्वेप्रमाणतःसर्वज्ञत्वेवाविद्यासिद्धिमुपपादयति ॥ असंगेति ॥

" सर्वंहियोविजानीतेतस्यकुत्रापिनाज्ञता ॥ नहियोयद्विजानीतेसतत्राज्ञानवान्भवेत् " ॥ सविशेषमेवब्रह्मसर्वज्ञमितिचेन्न । " तुरीयंतत्सर्वदृक्सदे "तिशुद्धेतच्छ्रुतेः । एतेनसर्वज्ञत्वंभ्रांत्याप्रमाणतोवास्वरूपज्ञप्त्यावा त्रेधाप्यविद्यासिद्धिः । भ्रांतेःप्रमातृत्वादेश्चाविद्यामूलत्वात् । असंगस्वरूपज्ञप्तेश्चाविद्यांविनाविषयासंगतेः । उक्तंहि " स्वरूपतःप्रमाणैर्वासर्वज्ञत्वंद्विधास्थितं । तच्चोभयंविनाविद्यासंबंधंनैवसिद्ध्यती "तिनिरस्तं । अविद्यारहितेतुरीयेपिसार्वज्ञश्रुतेः । एकाश्रयैकविषयकज्ञानानयोर्विरोधस्यानुद्धाराच्च ।

प्रमाणतःस्वरूपप्रज्ञयावासर्वज्ञत्वमविद्यासंबंधसाक्षेपमित्यत्रसंमतिमाह ॥ उक्तंहीति ॥ एवंचब्रह्मनाज्ञानाश्रयः सर्वज्ञत्वादि त्यनुमानेविरुद्धतास्यात् सर्वज्ञत्वस्याज्ञानसापेक्षत्वादित्युक्तंभवति ॥ तुरीयेपीति ॥ तथाचतत्रश्रुतंसार्वज्ञ्यंनाविद्यासापेक्षमि त्यर्थः । सर्वज्ञत्वमंगीकृत्याविद्यांगीकारेविरोधश्चेत्याह ॥ एकाश्रयेति ॥ किंचविकल्पितपक्षत्रयमध्येस्वभावसिद्धप्रज्ञयैवसा

SGDF
Sri Gargeshwari Digital Foundation

र्वज्ञमित्यंगीकुर्मः । नचासंगायाज्ञप्तेर्नविषयेणस्वतःसंबंधइत्यविद्यासिद्धिरितिवाच्यं । असंगायाअपिस्वरूपज्ञप्तेःस्वतस्तावत्काल संबंधोस्तीत्यंगीकार्यं अन्यथाऽसत्वापत्तेः तथास्वतःसर्वदेशसंबंधोप्यंगीकार्यः अन्यथासर्वगतत्वाभावापत्तेः तद्वद्विषयैरपिस्वत एवसंबंधोपपत्तेः । यथावाअसंगायाअपिस्वरूपज्ञप्तेरविद्ययैवसंबंधोंगीकृतः नह्यविद्यासंबंधघटकाविद्यांतरमस्ति । स्वनिर्वाहक त्वकल्पनंतुस्वरूपसिध्युत्तरकालीनं तस्यैवेदानींसंदिह्यमानत्वात् अतस्तद्वदन्येनापिसंबंधोपपत्तेर्नसर्वज्ञत्वस्याज्ञानापेक्षेतिनविरु

स्वरूपज्ञप्तेःस्वतःसर्वकालाद्यसंबंधेअसत्त्वापातेनस्वतःसर्वसंबं
धाभावेअसर्वगतत्वापातेनचाविद्ययेवस्वतएवान्येनापिसंबंधो
पपत्तेश्च । असंगश्रुतेस्तुगतिरुक्ता । एतेनब्रह्मणोज्ञातृत्वमुपे
त्याज्ञानंवदंतोनिरस्ताः । तदुक्तं । " अज्ञताखिलसंवेत्तुर्घटते
नकुतश्चने "ति ॥ ७ ॥ सर्वज्ञस्याज्ञानाश्रयत्वभंगः ॥ ५२ ॥

द्धत्वमित्याशयेनाह ॥ स्वरूपज्ञप्तेरिति ॥ ननुतर्ह्यसंगत्वश्रुतिविरोधइत्यतआह ॥ असंगत्वेति ॥ उक्तेति ॥ तत्कृतलेपा भावपरतयेत्यर्थः । ज्ञातृत्वं सर्वज्ञत्वं ॥ निरस्ताइति ॥ सर्वंहियोविजानातिइत्यनुमानविरोधादित्यर्थः । इदंसर्वंभगवत्पादो क्तस्योपपादनंनोत्प्रेक्षितमितिज्ञापयति ॥ तदुक्तमिति ॥ ७ ॥ सर्वज्ञस्याज्ञानाश्रयत्वभंगविवरणं ॥ ५२ ॥ ननुसर्वज्ञ

स्यमायापिनसंभवतीतिचेत्तत्राह ॥ तस्याइति ॥ लीलोपकरणत्वेन ॥ लीलासाधनत्वेन । आवरकत्वाभावादित्यर्थः । अ दोषत्वात् सार्वज्ञाद्यविघातित्वादित्यर्थः ॥ अविद्यमानप्रदर्शनशक्तिरिति ॥ अविद्यमानप्रदर्शनेनपरव्यामोहनशक्तिरित्य र्थः ॥ सामान्येति ॥ अज्ञानस्वरूपस्यैवाभावइत्यर्थः । तस्मिन् लीलोपकरणेवस्तुनीत्यर्थः । मायानाज्ञानविशेषएव । ऐंद्र

एतेनमाभूद्ब्रह्मण्यविद्या । मायातुस्यात् । तस्यालीलोपकरणत्वेनादोषत्वादितिनिरस्तं । त
थाहि । साकिमज्ञानविशेषः किंवादेवासुरसंग्रामादौदेवादेर्बाह्यसाधनमनपेक्ष्यैववह्निजला
दिविचित्रसत्यवस्तुसर्जनशक्तिवच्छक्तिविशेषः । यद्वैंद्रजालिकस्येवाविद्यमानप्रदर्शनश
क्तिः । नाद्यः । उक्तरीत्यासामान्याभावेविशेषायोगात् । अज्ञानस्यलीलोपकरणत्वादर्शना
च्च । तस्मिन्मायाशब्दाप्रयोगाच्च । नह्यैंद्रजालिकोपिकस्यचिदज्ञानेनैंद्रजालंदर्शयति किंतुम
णिमंत्रादिनैव । नद्वितीयः इष्टापत्तेः । नतृतीयः व्यामोहनीयजीवादर्शनेव्यामोहनायोगात् ।

जालिकःपुमान्माययासर्पादिकंप्रदर्शयतीतितावद्व्यवहारोस्ति सनस्यात् कुतइत्यतआह ॥ नहीति ॥ कस्यचि द्वस्तुनः । व्या मोहकईश्वरोव्यामोहनीयंपश्यति नवा आद्येपिव्यामोहनीयजीवस्याकल्पितत्वाभावेनकल्पितत्वेवाच्येतान्कल्पितान्जीवान्किं स्वरूपेणपश्यति कल्पितत्वेनवा । व्यामोहनीयंनपश्यतीतिपक्षेत्वाह ॥ व्यामोहनीयेति ॥ व्यामोहनक्रियायाःकर्मकारकापे

SGDF

क्षत्वात्परस्मिन्नन्यथाबुद्धिजननरूपव्यामोहनस्यव्यामोहनीयदर्शनापेक्षत्वादित्यर्थः । आद्येपिप्रथमपक्षेआह ॥ कल्पितेति ॥ कल्पितानांदर्शनस्यभ्रांतिंविनाऽयोगात्भ्रांतिरंगीकार्या तस्याश्चाविद्याकार्यत्वादविद्याप्यंगीकार्यास्यात् तथाचमाभूद्ब्रह्मण्यविद्ये त्युक्तत्वेनस्ववचनविरोधापातादितिभावः । आद्येद्वितीयपक्षेत्वाह ॥ कल्पितत्वेनेति ॥ तद्व्यामोहनेति ॥ एतेमत्कल्पिता इतिजानन्नेवपुनस्तद्व्यामोहनेप्रवर्ततइत्येतददृष्टचरं । नहिस्वाप्नः पुरुषःकल्पितइतिजाग्रदवस्थायांजानन्पुनस्तद्व्यामोहनायप्रवर्त ते नवारज्जौसर्पःकल्पितइतिजानन्तद्बाधनायोद्यतदंडोदृश्यतइतिभावः । व्यामोहनायकल्पितत्वेनदर्शनांगीकारेपिपुनरविद्यां

कल्पिततद्दर्शनस्यचभ्रांतिंविनाऽयोगात् । कल्पितत्वेनतद्दर्शनेचतद्व्यामो
हनायोगात् । तस्यापिद्वितीयचंद्रदर्शनस्येवाविद्यांविनायोगाच्च । किं
चतस्याःशक्तेःसत्वेअद्वैतहानिः । जीवकल्पितत्वेतद्व्यामोहकत्वायोगः ।

गीकारप्राप्त्यामाभूद्ब्रह्मणीतिस्ववचनविरोधएवेत्याशयेनाह ॥ तस्यापीति ॥ अंगुल्यवष्टंभादिनाकल्पितएवद्वितीयश्चंद्रोभास तइत्येवंकल्पितत्वेनद्वितीयचंद्रदर्शनमपिअविद्यामूलकमेव सोपाधिकभ्रमत्वेनभ्रमस्याज्ञानकार्यतायाअंगीकार्यत्वात् तथेहापी त्यर्थः ॥ तस्याःशक्तेरिति ॥ अविद्यमानप्रदर्शनेनपरव्यामोहनशक्तेरित्यर्थः । साशक्तिःकिंसती कल्पितावा आद्येआह ॥ सत्वइति ॥ द्वितीयेपिकिंजीवकल्पिता उतब्रह्मकल्पिता नाद्यइत्याह ॥ जीवेति ॥ तदिति ॥ कल्पितत्वेजीवव्यामोहकत्वे

SGDF
Sri Gargeshwari Digital Foundation

त्यर्थः। ऐंद्रजालिकपुरुषकल्पितमायायाःस्वाश्रयमायाविव्यामोहकत्वादर्शनादत्रापितस्याःशक्तेर्जीवव्यामोहकत्वस्यैवायोगादिति भावः। नद्वितीयइत्याह ॥ ब्रह्मेति ॥ तस्येति ॥ कल्पनायाअज्ञानकार्यत्वात्ब्रह्मकल्पितत्वांगीकारेतस्याज्ञानप्राप्त्यापुनःस्व वचनविरोधएवेतिभावः ॥ ७ ॥ परोक्तब्रह्ममायित्वभंगविवरणं ॥ ५३ ॥ ७ ॥ जीवशब्देनचिन्मात्रंविवक्षितं भेदवि शिष्टोवा नाद्यइत्याह ॥ जीवशब्देनेति ॥ उक्तदोषादिति ॥ श्रुत्यादौतस्यसर्वज्ञत्वेनप्रतीतत्वादितिभावः। नद्वितीयइत्या

ब्रह्मकल्पितत्वेतस्याज्ञानावश्यंभावः ॥ ७ ॥ परोक्तब्रह्ममायित्वभंगः ॥ ५३ ॥ ७ ॥
यच्चोक्तंवाचस्पतिना जीवाश्रिताविद्येति। तन्न। जीवशब्देनचिन्मात्रलक्षणायामुक्तदो षात्। अविद्ययावाआविद्यकबुद्ध्यादिनावाऽवच्छिन्नस्यतत्प्रतिबिंबितस्यवाकल्पितभेद स्योक्तावन्योन्याश्रयात्। नचबीजांकुरन्यायेनासौनदोषः। तद्वदिहव्यक्तिभेदाभावात्।

ह ॥ अविद्ययेत्यादिना ॥ कल्पितभेदस्य कल्पितभेदविशिष्टस्य ॥ अन्योन्येति ॥ अविद्यासिद्धौतदवच्छिन्नतयातत्प्रति बिंबिततयावाकल्पितभेदस्यजीवस्यसिद्धिस्तत्सिद्धौचतदाश्रिततयाऽविद्यासिद्धिरित्यन्योन्याश्रयादित्यर्थः ॥ तद्वदिहेति ॥ तत्रव्यक्तिभेदान्नान्योन्याश्रयः अत्रत्वज्ञानव्यक्तेर्जीवव्यक्तेश्चैकत्वादन्योन्याश्रयःस्यादेवेत्यर्थः। ननुबीजांकुरादिस्थलेपिनव्य क्तिभेदः तत्तद्बीजव्यक्तयस्तत्तदंकुरव्यक्तयश्चसंताननिरूपकाः बीजपरंपराअंकुरपरंपराचसंतानः तथाचसंतानिव्यक्तिभेदाद

SGDF
Sri Gargeshwari Digital Foundation

न्योन्याश्रयाभावेपिसंतानद्वयविवक्षयान्योन्याश्रयोस्त्येवेत्यतआह ॥ संतानीति ॥ नह्येवंप्रकृतइतिभावः । आकाशे महाकाशे
महाकाशमुपलक्ष्यकाकवद्व्यावर्तयित्वा ॥ तेनेति ॥ पाश्चात्यःघटावच्छिन्नाकाशइत्युच्यतइत्यर्थः । तत्रसंमतिमाह ॥ स्वेनेति ॥
महाव्योम्निस्वेनकल्पितेदेशेएकदेशेघटादिकंसंबद्धं ननुजीवसिद्धाववियासिद्धिरितिनांगीकृतमित्यतउक्तंनिराश्रयेति । घटाका

संतानिव्यतिरेकेणचतत्रसंतानयोरन्योन्यापेक्षाभावात् । नचयथानिरंशेप्याकाशेघटस्तट
स्थएवतदुपलक्ष्यैकदेशंसंपाद्य तेनसंबध्यते तद्वदविद्यापितटस्थैवचिन्मात्रमुपलक्ष्यैकदेशरू
पजीवंसंपाद्यतत्रावतिष्ठतइतिनेतरेतराश्रयः । “ स्वेनैवकल्पितेदेशेव्योम्नियद्वद्घटादिकं ॥
तथाजीवाश्रयाविद्यांमन्यंतेज्ञानकोविदा ”इत्युक्तेरितिवाच्यं । निराश्रयाविद्यायोगेनजीव
सिद्धिस्तत्सिद्धौतदुपलक्षितजीवसिद्धिरित्यन्योन्याश्रयात् । त्वन्मतेगगनस्याप्यनित्यद्रव्यत्वे
नस्वतएवांशसंभवाच्च । नचजीवाविद्ययोरनादित्वेनोत्पत्तिज्ञप्तिप्रतिबंधादयमदोषः । यतः
“अविद्याजीवयोर्यत्रव्यपेक्षातन्निरोधकः ॥ अन्योन्यसंश्रयोनोचेदन्योन्याधीनताहृतिः” ॥

शसिद्धिंविनापिघटासिद्धिवत्जीवसिद्धिंविनाऽविद्यासिद्धेरभावादित्यर्थः । दृष्टांतोप्यसंप्रतिपन्नइत्याह ॥ त्वन्मतइति ॥ अ
नित्यद्रव्यंचभावत्वेसत्यात्मसंभूतत्वेनसिद्धमितिध्येयं । तथाचनिरंशेप्याकाशइत्युक्तमसदितिभावः । स्वतः घटादिसंबंधंविना ।

जीवस्त्वज्ञानसंबंधंविनानसिद्धइतिभावः । अयं अन्योन्याश्रयः । कारिकांव्याचष्टे ॥ अज्ञानेति ॥ नहीति ॥ किंचिदुप
काराभावेतदधीनतायाएवमृषात्वादितिभावः ॥ द्रव्यत्वेति ॥ द्रव्यत्वस्यजातित्वेनानादित्वेपिगुणवत्वरूपव्यंजकप्रयुक्तमित्यु
च्यतेतार्किकमते एवंजीवत्वमज्ञानप्रयुक्तमित्यर्थः । तस्यैव प्रयुक्त्यादेरेव । किंचविषमोयंदृष्टांतइत्याह ॥ द्रव्यत्वादाविति ॥
नत्विति ॥ यद्यपिगुणवत्त्वमपिद्रव्यत्वाधीनमेव तथापिद्रव्यत्वस्यजातिरूपत्वेनाखंडत्वात्तत्रव्यंजकंगुणवत्त्वं गुणवत्त्वस्योपा

अज्ञानजीवयोर्हिकुत्रापिविषयेऽन्योन्यापेक्षानचेदन्योन्याधीनताव्याहृतिः । नहिसर्वथातदनपेक्षं
तदधीनं । अथानादित्वेपिद्रव्यत्वगुणवत्त्वादिजातिव्यंजकयोरिवप्रयुक्त्यादावपेक्षा तर्ह्यन्योन्याश्र
यस्तस्यैवप्रतिबंधकः । द्रव्यत्वादौव्यंग्यमेवव्यंजकप्रयुक्तं नतुव्यंजकंव्यंग्यप्रयुक्तं । इहतुजीवब्रह्म
विभागस्याविद्यकत्वादविद्यायाश्चजीवाश्रितत्वात्जीवत्वाज्ञानेअन्योन्यप्रयुक्तेइतिप्रयुक्तेरेवप्रति
बंधः । एवंच “यद्युत्पत्तिज्ञप्तिमात्रप्रतिबंधेनदोषता ॥ तर्हिस्याचैत्रमैत्रादेरन्योन्यारोहणादिकं” ॥

धित्वेनतत्राखंडजातेरभावात्तद्व्यंजकंद्रव्यत्वमितितार्किकसिद्धांतइत्यवधेयं । तथाचतत्रनान्योन्यप्रयुक्तत्वमितिभावः । नन्वे
वंप्रकृतेपिजीवत्वमेवाज्ञानप्रयुक्तं नाज्ञानंजीवत्वप्रयुक्तमितिनान्योन्याश्रयइत्यतआह ॥ इहत्विति ॥ विभागस्येति ॥ वि
च्छेदपक्षाभिप्रायेणेदं अविद्याआदौनिरंशचैतन्यंसंबध्यविभागंसंपाद्यजीवत्वंसंपादयतीत्यंगीकारात् ॥ अन्योन्यारोहणादि
कमिति ॥ एकदैवेतिशेषः । अन्यथाकालभेदेनेष्टापत्तिःस्यादितिध्येयं । ननुप्रमेयत्वाभिधेयत्वयोरन्योन्यवृत्तित्वेपिनान्योन्या

SGDF
Foundation

श्रय एवमिहापीत्यतआह ॥ नचेति ॥ नहीत्यर्थः । येनादोषःस्यादितिभावः ॥ अन्यथेति ॥ अन्योन्यापेक्षायाअप्रमितत्वे प्यदोषत्वांगीकारइत्यर्थः । अन्योन्याश्रयपरिहारायजीवत्वप्रयोजकमज्ञानंजीवाश्रिताज्ञानकल्पितंचेच्चक्रकं । अज्ञानसिद्धौजी वसिद्धिस्ततसिद्धौतदाश्रिताज्ञानसिद्धिःसतिसिद्धौचाज्ञानसिद्धिरिति । अज्ञानांतरकल्पनेत्वनवस्थेत्यर्थः । अनवस्थापरिहारमाशं क्यनिराकरोति ॥ नचेति ॥ सिद्धविषयेति ॥ अनन्यथासिद्धवस्तुविषयेत्यर्थः । ननुब्रह्माभिन्नेजीवेऽहमज्ञइत्यनन्यथासि

नचप्रमेयत्वाभिधेयत्वादावन्योन्यवृत्तिवदिहान्योन्यापेक्षाप्रमिता । अन्यथाऽन्योन्याश्रया दिःक्वापिदोषोनस्यात् । जीवत्वप्रयोजकमज्ञानांतरंचेत् चक्रकमनवस्थावा । नचेयंपरंपरा सिद्धविषया । अहमज्ञइतिप्रतीतेःसत्यभेदेनैवोपपत्तेः । किंचजीवेश्वरयोर्जीवेश्वराभ्यांक ल्पितत्वेआत्माश्रयात् । ईश्वर(ब्रह्मजी)जीवकल्पितत्वेन्योन्याश्रयात् । तत्कल्पकस्यशुद्ध स्यब्रह्मणोज्ञानमावश्यकं । नचाविद्यायादौर्घट्यंभूषणं । तत्रलक्षणप्रमाणाद्युक्तययोगात् ।

द्धाज्ञानप्रतीत्यन्यथानुपपत्तेरियंपरंपरांगीकार्येतितत्राह ॥ अहमज्ञइतीति ॥ किंचाज्ञानस्यनजीवाश्रितत्वंयुक्तमित्याशयेनाह ॥ किंचेति ॥ जीवेश्वराभ्यामिति ॥ जीवस्यजीवेनईश्वरस्यचेश्वरेणकल्पितत्वइत्यर्थः ॥ ब्रह्मजीवेति ॥ जीवेश्वरयोरिति वर्तते । जीवस्यब्रह्मकल्पितत्वेब्रह्मणोजीवकल्पितत्वइत्यर्थः ॥ तत्कल्पकस्येति ॥ कल्पनायाअज्ञानकार्यत्वादितिभावः ।

SGDF Sri Gargeshwari Digital Foundation

दौर्घव्यं अन्योन्याश्रयादिदूषणजातेनदुर्घटत्वं । तत्रेत्यतःपूर्वंतथात्वइतिशेषः । तत्र दुर्घटाविद्यायां ॥ अयोगादिति ॥ तथा त्वेसुघटत्वापत्त्यादुर्घटत्वाभावादितिभावः ॥ निराश्रयत्वेति ॥ दौर्घव्यस्यभूषणत्वादितिभावः ॥ प्रतीतीति ॥ अस्यास्मिन्न ज्ञानमितिप्रतीत्यनुसारेणाश्रयविषयाद्यंगीकारेइत्यर्थः ॥ अहमर्थेति ॥ तथाचजीवाश्रितत्वंत्याज्यं अहमर्थाश्रितत्वानुभवादि तिभावः ॥ जडेति ॥ आवरणकृत्याभावेनजडविषयकाज्ञानानंगीकारवादोपित्याज्यः । घटंनजानामीत्यनुभवादित्यर्थः । अ

अविद्यायानिराश्रयत्वनिर्विषयत्वात्मस्वरूपत्वाद्यापाताच्च । प्रतीत्यनुसारेणाश्रयाद्यंगीकारेच घटमहंनजानामीतिप्रतीत्याहमर्थाश्रितत्वजडविषयत्वादिप्रसंगाच्च । अनादित्वादिनाऽनुपप त्तिपरिहारायोगाच्च । उत्तरास्फुरणेप्रकृतिसंवृत्यादेर्दौर्घव्यंभूषणमितिसुवचत्वेनसांख्यबौद्धा दिमतनिरासायोगाच्च । उक्तंच। " दुर्घटत्वंभूषणंचेत्स्यादविद्यात्वमात्मनः । अंधंतमोप्यलंका रोनित्यदुःखंशिरोमणि "रिति । एतेन " प्रश्नविश्रांति(हेतु)भूमित्वाच्चोद्यंतमसिनोचितं ।

विद्यायादुर्घटत्वस्यभूषणत्वांगीकारदूषणांतरमाह ॥ अनादित्वेति ॥ अविद्यायाअविद्यातिरिक्तकल्पितत्वांगीकारेऽन्योन्या श्रयानवस्थादिदोषेणानुपपन्नत्वेऽभिहितेऽनादित्वान्नदोषइत्येवंतत्रानुपपत्तिपरिहारःक्रियमाणोनुपपन्नःस्यात् अनुपपत्त्यादौर्दौ र्घव्यस्यभूषणत्वात् अनुपपत्तिपरिहारेचसुघटत्वापातादितिभावः ॥ प्रकृतीत्यादि ॥ अयमर्थःसांख्येनसदेवसोम्येत्यादिवाक्ये

SGDF
Sri Gargeshwari Digital Foundation

प्रकृतिरेवजगदुदयादिकारणत्वेनप्रतिपाद्येत्यभिहिते "ईक्षतेर्नाशब्द "मितित्वयादूषितेसतिसांख्यस्योत्तरापरिस्फूर्तौअस्मान्प्रति त्वद्वत्त्वांप्रतितेनापिप्रकृतेर्दौर्घव्यंभूषणमितिसुवचत्वेनतवतन्मतनिरासायोगात् । तथाबौद्धेनापिसंवृतेरेवजगत्कारणत्वेऽभिहि तेत्वद्दूषणेनसंवृतावनुपपन्नायांसत्यांतस्योत्तरास्फूर्तौदौर्घव्यंभूषणमित्युक्त्वासोपिकृतीस्यात् । अतस्तवतन्निरासायोगादिति । विश्रांति रुपशमः । तमसि अज्ञानविषये । तदेवविशदयति ॥ नेति ॥ तथाचाज्ञानविषयकप्रश्नाभावेअज्ञानदौर्घव्यमेवहेतु रितिभावः । एतेनेत्युक्तमेवविशदयति ॥ नहीति ॥ अज्ञमज्ञानवंतंप्रतिअप्रश्नःअज्ञानस्यदुर्घटत्वान्नभवति किंतुज्ञातुरेव तद्व

नबुद्धिमंतःपृच्छंतिनजानामीतिवादिनं "। इतिनिरस्तं।न
ह्यज्ञंप्रत्यप्रश्नोऽज्ञानस्यदौर्घव्यात् ज्ञानमेवाज्ञानमित्याद्युक्ता
वपिविरोधाद्यनुद्भावनापातात् । किंतुज्ञातुरेववक्तृत्वात्

क्तृत्वात् वक्तुरेवप्रष्टव्यत्वात् । अज्ञस्यचज्ञातृत्वाभावेनवक्तृत्वायोगादेवनतंप्रतिप्रश्नइत्यर्थः । ननुअज्ञानस्यदुर्घटत्वेनप्रश्नाभावे किंबाधकमित्यतआह ॥ ज्ञानमिति ॥ ज्ञानाज्ञानयोरभेदेकेनचिदुक्तेज्ञानाज्ञानयोःकथमभेदोविरोधादितितंप्रतिविरोधोद्भाव नंनस्यात् । दुर्घटत्वेनाज्ञानस्यप्रश्नाविषयत्वादितिभावः । ननुतर्ह्यज्ञंप्रत्यप्रश्नोज्ञानस्यदौर्घव्यान्नभवतीतिचे त्तर्हिकिंनिमित्तइति पृच्छति ॥ किंत्विति ॥ उत्तरमाह ॥ ज्ञातुरेवेति ॥ वक्तुरेवचप्रष्टव्यत्वादज्ञस्यचज्ञातृत्वाभावेनावक्तृत्वान्नतंप्रत्यप्रश्नइतिभा

वः ॥ ७ ॥ अज्ञानस्यवाचस्पत्युक्तजीवाश्रितत्वभंगविवरणं ॥ ७ ॥ ५४ ॥ चिन्मात्रमेवेति ॥ " आश्रयत्व विषयत्वभागिनीनिर्विशेषचितिरेवकेवले "त्युक्तेरितिभावः । ननुतस्याज्ञानकल्पितत्वेनान्योन्याश्रयान्नाज्ञानाश्रयत्वमितिशंका भासंनिराकरोति ॥ तस्येति ॥ नन्वज्ञानस्यावरणत्वेनावरणभूताज्ञानकृत्यस्यचिन्मात्रेऽभावेनकिमर्थमज्ञानस्यतद्विषयत्वमंगी कार्यमित्यतआह ॥ स्वप्रकाशेति ॥ आवरणकृत्येति ॥ आव्रियतेऽनेनेतिकरणव्युत्पत्त्याऽज्ञानमावरणशब्देनग्राह्यं तत्कृत्यं

॥ ७ ॥ अज्ञानस्यवाचस्पत्युक्तजीवाश्रितत्वभंगः ॥ ५४ ॥ अविद्याविषयोपिदुर्वचः । यदत्रो
क्तंविवरणे । अज्ञानस्यचिन्मात्रमेवविषयः । तस्याकल्पितत्वेनान्योन्याश्रयादिदोषाभावात् ।
? स्वप्रकाशत्वेनप्रसक्तप्रकाशेतस्मिन्नावरणकृत्यासंभवाच । नत्वन्यत् । तस्याज्ञानकल्पितत्वात् ।
जडत्वेनस्वयमेवप्रकाशहीनेआवरणकृत्याभावाचेति । अत्रब्रूमः । चिन्मात्रेप्यावरणकृत्यं

आवृत्तिः तथाचाज्ञानरूपावरणस्ययत्कृत्यंप्राप्तप्रकाशप्रतिबंधरूपावृत्तिस्तत्सद्भावादित्यर्थः । ननुजीवो जडंवाऽज्ञानविषयः किंनस्यादित्यतआह ॥ नत्वन्यदिति ॥ तथाचाज्ञानसिद्धौतत्कल्पितजीवसिद्धिः तत्सिद्धौचतद्विषयकाज्ञानसिद्धिरित्यन्यो न्याश्रयःस्यादितिभावः । जडविषयकाज्ञानानंगीकारएवहेत्वंतरमाह ॥ जडत्वेनेति ॥ अप्रकाशस्वरूपत्वेनेत्यर्थः ॥ आवर णकृत्येति ॥ अज्ञानरूपावरणस्ययत्कृत्यंप्राप्तप्रकाशप्रतिबंधरूपावृत्तिस्तदभावाचेत्यर्थः । सिद्धांतंप्रतिजानीते ॥अत्रब्रूमइति॥

SGDF
Sringeri Digital Foundation

आवरणकृत्यंआवरणस्यकृत्यंआवृतिरितियावत् । आवरणकृत्यरूपावृतिःकिंसिद्धप्रकाशलोपरूपावा असिद्धप्रकाशानुत्पत्तिर्वा नोभयमपीत्याह ॥ नतावदिति ॥ अंधकारेणक्रियमाणाआवृतिःआलोकरूपोयस्सिद्धोघटप्रकाशस्तल्लोपरूपा असिद्धउत्तरत्र जायमानोयःप्रकाशस्तदनुत्पत्तिरूपाचद्दष्टास्तीतिज्ञातव्यं । कुतोनोभयमपीत्यतआह ॥ स्वरूपेति ॥ नित्यसिद्धत्वान्नसिद्धप्रकाशलोपोयुक्तः नित्यसिद्धत्वादेवासिद्धप्रकाशएवनास्तीत्युक्तरूपावृतिद्वयंचिन्मात्रेनसंभवतीत्यर्थः । एतदन्यदेवकिंचिदावृत्तिशब्दार्थइतितत्राह ॥ एतदन्यस्येति ॥ सिद्धप्रकाशलोपासिद्धप्रकाशानुत्पत्तिव्यतिरिक्तस्येत्यर्थः । नन्वज्ञानेनक्रियमाणावृतिर्ना

नतावत्सिद्धप्रकाशलोपोसिद्धप्रकाशानुत्पत्तिर्वा । स्वरूपप्रकाशस्यनित्यसिद्धत्वात् । तदन्यस्यचस्वप्रकाशेतस्मिन्ननपेक्षितत्वात् । नापिसतोपिप्रकाशस्यविषयासंबंधः । ज्ञानस्यविषयसंबंधस्वभावत्वात् स्वयंज्ञानरूपत्वेनत्वन्मतेसंबंधानपेक्षणाच्च ।

मसतोपिब्रह्मरूपप्रकाशस्यविषयासंबंधएवेत्याशंक्यनिराकरोति ॥ नापीति ॥ विषयासंबंधइत्यत्रविषयशब्देनघटादिकंवा चैततन्यरूपंवा आद्येआह ॥ ज्ञानस्येति ॥ तथाचज्ञानस्यविषयसंबंधाभावेविषयसंबंधस्वभावत्वरूपज्ञानस्वरूपस्यैवहानिःस्यादित्यर्थः । यथोक्तं "विषयवर्जितःप्रकाशएवनभवति । घटवदिति" । द्वितीयेत्वाह ॥ स्वयमिति ॥ ज्ञानातिरिक्तविषयसद्भावेहितस्यविषयसंबंधापेक्षा नचैवं चैतन्यस्यस्वयमेवज्ञानरूपत्वेनस्वसंबंधानपेक्षत्वादित्यर्थः । अतस्सतोपिप्रकाशस्यघटादिचैतन्य

SGDF
Sri Gargeshwari Digital Foundation

रूपविषयासंबंधरूपाआवृतिरप्ययुक्तेतिभावः ॥ नापीति ॥ अज्ञानेसतिप्राकट्यापरपर्यायज्ञाततारूपज्ञानकार्यंनजायते अतो ज्ञाततारूपज्ञानकार्यप्रतिबंधएवअज्ञानसाध्याआवृतिरित्यर्थः ॥ चैतन्येति ॥ अभिव्यक्तचित्संबंधएवत्वन्मतेज्ञातता एवंचचैतन्यातिरिक्तस्यप्राकट्यस्याभावाच्चैतन्यस्यसदास्वप्रकाशत्वेनज्ञाततायाएवसत्वान्नतदाख्यकार्यप्रतिबंधरूपाआवृतिर्युक्तेत्यर्थः ॥ नास्तीति ॥ यथानास्तीत्यादिव्यवहारएवाज्ञानसाध्याआवृतिर्घटादौदृष्टा एवंचैतन्यंनास्तीत्यादिव्यवहारएवचैतन्येप्यज्ञानसा

नापिप्राकट्याख्यकार्यप्रतिबंधः । त्वन्मतेपिचैतन्यातिरिक्तस्यतस्याभावा
त् । नापिनास्तिनप्रकाशतइत्यादिव्यवहारः । व्यवहारोह्यभिज्ञाभिल
पनंवा । नाद्यः । नास्तीत्यादिभ्रांतेरावरणसाध्यत्वेनावरणत्वायोगात् ।
अतएवनांत्यः । तस्योक्तभ्रांतिसाध्यत्वेनभ्रांतिहेत्वावरणत्वायोगात् ।

ध्याआवृतिरित्यर्थः । अभिज्ञा ज्ञानं ॥ आवरणसाध्यत्वेनेति ॥ आवरणशब्दोभावसाधनः । तथाचावृतिसाध्यत्वेनेत्यर्थः । अयमभिप्रायः । प्रकाशमानेब्रह्मणिनास्तीत्यादिज्ञानंभ्रांतिरेव तथाचलोकेऽधिष्ठानावृत्यनंतरंभ्रांतिर्दृष्टा प्रकृतेचब्रह्मण्यज्ञानावृतेसतिपश्चात्तत्रनास्तीत्यादिभ्रांतिर्वाच्या । ततश्चभ्रांतेरावृतिसाध्यत्वेनआवृतित्वायोगादिति । अतएवेत्युक्तंविशदयति ॥ तस्येति ॥ आवरणत्वेति ॥ आवृतित्वेत्यर्थः । तथाचप्रकाशमानेब्रह्मणिनास्तीत्यादिव्यवहारस्याज्ञानकार्यावृतिसाध्यभ्रांति

SGDF
Sri Gargeshwari Digital Foundation

साध्यत्वेनभ्रांतिहेतुभूतावृतित्वायोगादितिभावः ॥ सुषुप्ताविति ॥ त्वन्मतेसुषुप्तावपिचैतन्यमावृतमित्यंगीकृतं तथाचात्रसु
षुप्तौनास्तीत्यादिव्यवहाराभावेनावृत्यभावापाताच्चेत्यर्थः ॥ नापीति ॥ चैतन्यमस्तीत्यादिव्यवहाराभावरूपावृतिश्चसुषुप्तावप्य
स्तीत्यर्थः । अत्रापिव्यवहारशब्देनाऽभिज्ञावाभिलपनंवा । आद्येपिस्वरूपाभिज्ञावा वृत्तिरूपावा । नाद्यइत्याह ॥ व्यवहारस्ये
ति ॥ अभिज्ञात्वे स्वरूपाभिज्ञात्वे ॥ इदानीमपीति ॥ चैतन्यमस्तिप्रकाशतइत्यादिस्वरूपज्ञानस्येदानीमपिसत्वेनतदभावरू

सुषुप्तौव्यवहाराभावेनानावरणापाताच्च । नाप्यस्तिप्रकाशतइत्यादिव्यवहाराभा
वः । व्यवहारस्याभिज्ञात्वेस्वरूपाभिज्ञायाइदानीमपिसत्त्वाद्वृत्तेश्चमोक्षेप्यसत्त्वा
त् । अभिलपनत्वेमोक्षेप्यावरणापातात् । नापि नास्तीत्यादिव्यवहारयोग्यत्व
मस्तीत्यादिव्यवहारायोग्यत्वंवा । तयोरप्यारोपितत्वेनावरणंविनाऽयोगात् ।

पाआवृतिरिदानीमपिनस्यादित्यर्थः । नेतरइत्याह ॥ वृत्तेश्चेति ॥ तथाचास्तीत्याद्यंतःकरणवृत्त्यभावस्याविद्यानिवृत्तिरूपमोक्षे
सत्वादज्ञानावृत्त्यापातादित्यर्थः । आवरणकृत्यभूतामावृतिंप्रकारांतरेणाशंक्यनिराकरोति ॥ नापीति ॥ तयोरपीति ॥ यो
ग्यत्वायोग्यत्वधर्मयोर्वास्तवयोर्ब्रह्मण्यभावेनारोपितत्वमेववाच्यं आरोपश्चावृतिसाध्यः । तथाचैतादृशधर्मद्वयस्यारोपितत्वेनारो
पस्यावरणमावृतिंविनाऽयोगेनतयोरावृतित्वायोगादित्यर्थः । यत्राद्वितीयत्वादिविशिष्टेसंशयादिकमावरणकल्पकमस्ति तत्रत्व

यानावरणंकल्प्यते यत्रतुचिन्मात्रेआवरणंकल्प्यते तत्रचसंशयादिकमावरणकल्पकं नास्तीत्याह ॥ अद्वितीयत्वादीति ॥
अस्त्यत्रसंप्रदायः। सर्वेषांमतेयोग्यत्वंफलोपधानेनैवमंतव्यं। एवंचप्रकृतेनास्तीत्याद्यपरोक्षव्यवहारेणफलोपधानेननास्तीत्याद्यपरो
क्षव्यवहारयोग्यत्वंकल्पनीयं । अत्राद्वितीयत्वादिविशिष्टेयोग्यत्वरूपावृतिकल्पकोक्तफलोपधानव्यवहारेपितत्कल्प्ययोग्यत्वायो
ग्यत्वादिरूपावृतिर्नकल्प्यतइत्यर्थः ॥ अवस्थेति ॥ जाग्रदादीत्यर्थः ॥ तदभावेनेति ॥ योग्यत्वायोग्यत्वरूपावृतिकल्पको
क्तफलोपधानरूपव्यवहाराभावेनेत्यर्थः । तथात्वेअधिष्ठानत्वादिकमेवनस्यादित्यर्थः । तत्कल्प्ययोः उक्तफलोपधानरूपव्यवहा

अद्वितीयत्वादिविशिष्टेतथाव्यवहारेपि अवस्थात्रमेप्यसंदिग्धाविपर्यस्तत्वेनप्रकाशमानात्मरू
पेअध्यासाधिष्ठानेसुखादिज्ञानरूपेचचिन्मात्रेतदभावेनतत्कल्प्ययोर्योग्यत्वायोग्यत्वयोरभावा
च्च । तयोरप्यवेद्यत्वेसत्यपरोक्षव्यवहारयोग्यत्वरूपस्वप्रकाशत्वविरुद्धत्वेनेदानीमप्यभावाच्च ।

रकल्प्ययोः उक्तायोग्यत्वादिरूपावृतेर्मोक्षकालेयथाऽभावस्तथेदानीमपितदभावोंगीकार्यएव अन्यथेदानीमपिनास्तीत्यादिव्यव
हारयोग्यत्वास्तीत्यादिव्यवहारायोग्यत्वरूपावृत्यंगीकारेइदानीमपित्वयाब्रह्मणःअस्तिप्रकाशतइत्यपरोक्षव्यवहारयोग्यत्वरूपस्व
प्रकाशत्वस्यांगीकृतत्वेनतद्विरोधःस्यादित्याह ॥ तयोरपीति ॥ योग्यत्वरूपावृत्योरित्यर्थः ॥ विरुद्धत्वेनेति ॥ अयोग्यत्व
रूपावृतेरभावरूपतयास्वप्रकाशत्वेनविरोधः योग्यत्वरूपावृतेस्तुतदभावव्याप्यतयास्वप्रकाशत्वेनविरोधइतिद्रष्टव्यं । ननुस्वप्र

SGDF Foundation

काशत्वलक्षणेनअस्तीत्यादिव्यवहारायोग्यत्वरूपावृत्यंगीकारेनविरोधः। अज्ञानावच्छेदकत्वंयदास्तिब्रह्मणस्तदाऽज्ञानावच्छेदेना
स्तीत्याद्यपरोक्षव्यवहारयोग्यत्वरूपंस्वप्रकाशत्वमस्ति । स्वरूपापेक्षयातुअस्तीत्यादिव्यवहारायोग्यत्वरूपावृतिरस्तीत्यंगीकारादि
त्याशंक्यनिराकरोति ॥ नचेति ॥ अज्ञानावच्छिन्नत्वेनेति ॥ अज्ञानमवच्छिन्नंयस्यावच्छेदकस्यतदज्ञानावच्छिन्नं । तत्वे
नअज्ञानावच्छेदकत्वेनेत्यर्थः । यद्वाऽज्ञानावच्छिन्नत्वेनाऽज्ञानावच्छेदेनेत्यर्थः । अतएवोत्तरत्रअज्ञानावच्छेदेनेत्येवव्यवहारः
॥ स्वरूपस्येति ॥ यत्स्वरूपेयोग्यत्वरूपावृतिरंगीकृतातस्यास्वप्रकाशत्वापातात् प्रत्युताज्ञानावच्छेदकत्वविशिष्टएवतदापातादि

नचाज्ञानावच्छिन्नत्वेनापरोक्षव्यवहारयोग्यत्वं स्वरूपेणतुतदयोग्यत्वमित्यविरो
धः स्वरूपस्यास्वप्रकाशत्वापातात् । नित्यातींद्रियस्याप्यज्ञानावच्छेदेनापरोक्षव्य
वहारयोग्यत्वेनस्वप्रकाशत्वापाताच्च । इच्छाद्यवच्छिन्नप्रकाशइवाज्ञानावच्छि
न्नप्रकाशेपिविशेष्यस्यापिप्रकाशेनेच्छादिवदेवाज्ञानस्याप्यावरणत्वायोगाच्च ।

त्यर्थः । किंचब्रह्मणोऽज्ञानावच्छेदकत्वमंगीकृत्यतदवच्छेदेनापरोक्षव्यवहारयोग्यत्वेनस्वप्रकाशत्वांगीकारेनित्यातींद्रियस्यापि
स्वप्रकाशत्वापातात् तस्यनित्यातींद्रियत्वेनैवस्वरूपेणास्तीत्याद्यपरोक्षव्यवहारायोग्यत्वेपिधर्मादिकंनजानामीतितद्विषयकाज्ञा
नस्यसाक्षिरूपत्वेनापरोक्षतयातदवच्छेदकतयातस्याप्यपरोक्षव्यवहारयोग्यत्वादित्याह ॥ नित्यातींद्रियस्यापीति ॥ एवम
ज्ञानकृत्यभूतावृत्यभावमुक्त्वाऽज्ञानस्यावरणत्वकथनमप्ययुक्तमित्याह ॥ इच्छादीति ॥ अयंभावः। लोकेतदेवावरकं यत्स्वाव

SGDF
Sri Gargeshwari Digital Foundation

वच्छिन्नप्रकाशविरोधि यथानेत्रपटलादि । तथाइष्टमितीच्छावच्छिन्नवस्तुप्रकाशविरोधित्वंइच्छायांनास्ति विशेष्यस्यप्रकाशमानत्वात् अतइच्छायानावरकत्वमित्यंगीकृतं । एवमज्ञानावच्छिन्नस्यप्रकाशेविशेष्यस्यापिब्रह्मणःप्रकाशान्नतदज्ञानंस्वावच्छिन्नप्रकाशविरोधीतिनतदावरकं । अन्यथाइच्छायाअप्यावरकत्वापातादिति । किंचसुखादीनांचिन्मात्रप्रकाश्यत्वंतावदंगीकृतं अन्यथातत्राज्ञानप्रसंगात् सुखादिप्रकाशकंचचिन्मात्रंअज्ञानावच्छिन्नमेवजातं तथाचसुखादिप्रकाशरूपस्यब्रह्मणोऽज्ञानावच्छिन्नत्वादिदानींसुखादिप्रकाशोनास्तीत्युक्तंस्यात् तथाचसुखादिकंनप्रकाशतइत्यनुभवःस्यात् । नचैवमस्ति अतःसुखादिकंप्रकाशतइ

सुखादेरज्ञानावच्छिन्नचित्प्रकाश्यत्वेसुखादिकंनप्रकाशतइत्यनुभवापातेनसु
खादिकंप्रकाशतइत्यनुभवार्थंचितोज्ञानानवच्छेदेनप्रकाशस्यांगीकार्यत्वाच ।
एतेनाज्ञानाविशेषितापरोक्षव्यवहारायोग्यत्वमावरणकृत्यमित्यपिनिरस्तं ।

त्यनुभवार्थंसुखादिप्रकाशरूपस्यब्रह्मणोऽज्ञानावच्छेदेनप्रकाशोंगीकार्यः। तथाचाज्ञानावच्छेदेनब्रह्मणोपरोक्षव्यवहारयोग्यत्वमितिविरोधपरिहारायोगेनव्यवहारयोग्यत्वरूपस्वप्रकाशत्वमपिव्यवहारायोग्यत्वरूपावृतिविरुद्धैवेत्याह ॥ सुखादेरिति ॥ एतेनेति ॥ अपरोक्षव्यवहारयोग्यत्वरूपस्वप्रकाशत्वेनसहव्यवहारायोग्यत्वस्यविरुद्धत्वेनेत्यर्थः । अपरोक्षव्यवहारायोग्यत्वमात्रस्यैवावृतित्वंब्रह्मणोप्यज्ञानावच्छेदेनापरोक्षव्यवहारयोग्यत्वेनेदानीमावृत्यभावापातात् । अतोऽज्ञानाविशेषितेतिव्यवहारो

SGDF
Sri Gargeshwari Digital Foundation

विशेषितः तथाचस्वरूपमात्रेणापरोक्षव्यवहारायोग्यत्वमेवावरणस्यावरकस्याज्ञानस्यकृत्यंआवृतिरित्यर्थः । नन्वावृतेर्नस्वप्रकाश त्वेनविरोधः । अस्तीत्याद्यपरोक्षव्यवहारयोग्यत्वरूपस्वप्रकाशत्वस्यसत्यत्वात् । अपरोक्षव्यवहारायोग्यत्वरूपाप्रकाशस्यावृत्या ख्यस्यारोपितत्वेनमिथ्यात्वात् । नह्यारोपितरूपेणवास्तवनीरूपत्वस्यविरोधोस्तीत्याशंक्यनिराकरोति ॥ नचोक्तेति ॥ अस्ती त्यपरोक्षव्यवहारःउक्तशब्दार्थः । अप्रकाशःआवृतिः ॥ सुखादीति ॥ सुखादिप्रकाशरूपेसाक्षिचैतन्येऽप्रकाशारोपोपिनसंभ वति येनसत्यत्वारोपितत्वाभ्यांविरोधपरिहारःस्यात् । कुतइतिचेदुच्यते । ज्ञानमेवहिप्रमेयसाधकं तथाचयथाशुक्तावशुक्त्यारो

नचोक्तयोग्यत्वायोग्यत्वरूपयोःप्रकाशाप्रकाशयोःसत्यत्वमिथ्या
श्यामवि त्वाभ्यांविरोधइतिवाच्यं । सुखादिस्फुरणंनप्रकाशतइत्यननुभ
वेनसुखादिसाक्षिणिचैतन्येआरोपितस्याप्यप्रकाशस्याभावात् ।

पोभवति कुतः इयंनशुक्तिरित्यनुभवादित्युच्यते एवंसुखादिस्फुरणरूपेचैतन्येऽप्रकाशारोपांगीकारेतत्साधकस्यसुखादिस्फुरणं नप्रकाशतइत्यनुभवस्यापातात् नचैवमारोपसाधकोनुभवोस्तीत्यर्थः । किंचारोपितेनव्यवहारायोग्यत्वरूपाप्रकाशाख्यावरणेन तत्कार्यंव्यवहाराद्यभावोनसंभवति वह्नौगुंजापुंजारोपेपितस्यस्पर्शेसतिवह्निकार्यमेवदाहादिकंदृश्यते नगुंजापुंजकार्यं तथाप्रकृ तेप्रकाशरूपेब्रह्मणिअयोग्यत्वरूपाप्रकाशारोपेपिप्रकाशकार्यंयत्आवरणनिवृत्तिद्वारानास्तीत्यादिभ्रांत्याद्यभावरूपंतदेवस्यादि ॥ ३५७ ॥

त्याह ॥ वह्नाविति ॥ किंचसामान्यतआरोपितानारोपितयोर्विरोधोनास्ति वास्तवशुक्तित्वमिथ्याशुक्तित्वयोर्विरोधाभावदर्श नात् वास्तवत्वेनसतोऽधिष्ठानप्रकाशस्यतुतदधिष्ठानकभ्रममात्रेणविरोधोस्ति शुक्तित्वेनरूपेणसम्यक्शुक्तिप्रकाशेसतितदधिष्ठा नकभ्रममात्राभावदर्शनात् अतोऽधिष्ठानत्वेनप्रकाशमानेऽप्रकाशारोपएवनसंभवतीतिसत्यत्वमिथ्यात्वाभ्यामविरोधकल्पनमयु क्तमित्याह ॥ सतइति ॥ अन्यथेति ॥ अधिष्ठानप्रकाशेपियद्यारोपोंगीक्रियते तर्ह्यारोपनिवर्तकांतराभावात्तन्निवृत्तिरेवन स्यादित्यर्थः । ननुस्वप्रकाशत्वावरणयोरेकत्रसामानाधिकरण्याभावेनसहानवस्थानरूपोविरोधोवाच्यः नचासौसंभवति तथाहि

वह्नाववह्नित्वारोपेपिवह्निकार्यस्येवाप्रकाशारोपेपिप्रकाशकार्यभ्रांत्याद्यभाव
स्यापाताच्च । सतःशुक्तित्वस्यारोपितेनाशुक्तित्वेनाविरोधेपिसतोऽधिष्ठानप्र
काशस्यारोपांतरेणेवाप्रकाशारोपेणापिविरोधाच्च। अन्यथातन्निवृत्तिर्नस्यात्।

अपरोक्षव्यवहारयोग्यत्वं अयोग्यत्वंयोग्यताभावः अभावश्चप्रागभावानधिकरणत्वं अपरोक्षव्यवहारायोग्यत्वंचावरणं अयो ग्यत्वंयोग्यताभावः अभावश्चप्रागभावोविवक्षितः तदत्यंताभावानधिकरणत्वतत्प्रागभावयोश्चनविरोधः एकस्मिन्नेवमृत्पिंडेघ टात्यंताभावानधिकरणत्वतत्प्रागभावयोश्चसहावस्थानदर्शनात् । एवंचतदत्यंताभावानधिकरणस्यैवतत्प्रागभावाधिकरणत्वनि यमात् अपरोक्षव्यवहारयोग्यतात्यंताभावानधिकरणत्वरूपस्वप्रकाशत्वस्यअपरोक्षव्यवहारयोग्यतारूपप्रकाशप्रागभावरूपावर

SGDF

णस्यचब्रह्मणिसमावेशसंभवात्कोविरोधइत्याशंक्यनिराकरोति ॥ नचेति ॥ अपरोक्षव्यवहारयोग्यत्वस्यस्वरूपप्रयुक्तस्यानादित्वे नतत्प्रागभावायोगादावरणस्यापरोक्षव्यवहारयोग्यताप्रागभावरूपतामंगीकृत्याविरोधकथनमयुक्तमित्याह ॥ स्वरूपेति ॥ बलात्कारेणाह ॥ इदानीमिति ॥ योग्यतात्यंताभावानधिकरणत्वेनस्वप्रकाशेब्रह्मणियोग्यताप्रागभावमादायाप्रकाशरूपावरणोक्तौवयमपिवदामः सामान्यतोपरोक्षव्यवहारयोग्यताभावएवावरणं अभावश्चध्वंसोपिविवक्षितः एवंचापरोक्षव्यवहारायोग्य

नचावेद्यत्वेसत्यपरोक्षव्यवहारयोग्यतात्यंताभावानधिकरणत्वंस्वप्रकाशत्वमुक्तयोग्यताप्रागभावश्चावरणमित्यविरोधः । स्वरूपप्रकाशप्रयुक्तयोग्यतायाअनादित्वात् । इदानींयोग्यतारूपप्रकाशस्यप्रागभावः मोक्षेतुध्वंसइतिमोक्षेप्यप्रकाशापाताच्च । भवतिहिदीपात्पूर्वमिवपश्चादप्यप्रकाशः । एवंच "स्वप्रभत्वेनापरोक्षव्यवहारार्हआत्मनि । तद्योग्यत्वाभावरूपमविद्यावरणंकथं" ॥

ताध्वंसस्याप्यावरणत्वा त्तस्यचनिरुक्तस्वप्रकाशत्वेनाविरोधात् । घटात्यंताभावानधिकरणस्यैवमृत्पिंडस्यघटप्रागभावाधिकरणत्ववत्तद्ध्वंसाधिकरणत्वदर्शनात् । तथाचेदानींयोग्यतारूपप्रकाशप्रागभावेनाप्रकाशरूपावरणसद्भावः मोक्षेतुयोग्यताध्वंसमादायतदाप्यप्रकाशःस्यात् आवरणंस्यादितियावदित्यर्थः । ननुप्रागभावदशायामेवाप्रकाशव्यवहारो नतुतद्ध्वंसदशायामित्यतआह ॥ भवतिहीति ॥ पूर्वं दीपप्रागभावदशायां । पश्चात् दीपध्वंसदशायां । संगृह्णाति ॥ एवंचेति ॥ स्वप्रभत्वेन स्व

SGDF Sri Gargeshwari Digital Foundation

प्रकाशत्वेन । व्यवहारार्हं व्यवहारयोग्ये अविद्यावरणं अविद्याकृत्यरूपाआवृतिः चैतन्यंआवृताभिमतकालेपिप्रकाशते स्वप्रकाशत्वाद्दीपवत् तथाचप्रकाशरूपचैतन्यस्यावृतत्वकथनंव्यर्थमित्याशयेनाह ॥ किंचेति ॥ दीपेति ॥ यथादीपावरकंघटादिदीपस्यघटादिविषयांतरसंबंधप्रतिबंधकं अन्यंप्रतिदीपकर्मकज्ञानजननप्रतिबंधकमेवदृष्टं नतुदीपंप्रत्येवदीपगतप्रकाशस्यापिप्रतिबंधकं घटावृतस्यापिदीपस्यघटांतःप्रकाशमानत्वात् । अन्यथाघटस्यदीपस्वरूपप्रकाशंप्रत्यपिप्रतिबंधकत्वमंगीकृत्यघटावृतो

किंचदीपावरकघटादिवच्चैतन्यावरकाविद्याचैतन्यस्यान्यसंबंधप्रतिबध्नातु । अन्यं
चप्रतिचैतन्यमाच्छादयतु नतुचैतन्यंप्रत्येव । चैतन्येउक्तयोग्यतारूपप्रकाशविरो
धिनी।नहिदीपोघटावृतोपिस्वयंनप्रकाशते तमःसंबंधापातात्। ननुकल्पितभेदंजी
वचैतन्यंप्रतिशुद्धचैतन्यमाच्छादयतीतिचेन्न । आवरणंविनाभेदकल्पनायोगात् ।

पिदीपोनप्रकाशतइत्यंगीकारेदीपस्वरूपेपितमस्संबंधापत्तेः। एवंप्रकृतेपीतिनप्रकाशरूपचैतन्यस्वरूपेआवरणमितिभावः। ननुघटादेर्दीपंप्रत्येवदीपप्रकाशविरोधित्वाभावेपिअन्यंप्रतितत्प्रकाशविरोधित्वंतावदस्त्येव। एवमज्ञानस्यचैतन्यंप्रत्येवचैतन्यप्रकाशविरोधित्वाभावेपिजीवचैतन्यंप्रतिशुद्धचैतन्याच्छादकत्वंयुक्तं । नचतयोश्चैतन्ययोरभेदात्स्वंप्रत्येवचस्वाच्छादकत्वंप्राप्तं तच्चायुक्तमितिवाच्यं तयोःकल्पितभेदसद्भावेनोपपत्तेरित्याशयेनशंकते ॥ नन्विति ॥ आवरणंविनेति ॥ आवृतिंविनेत्यर्थः । चै

SGDF
Sri Gargeshwari Digital Foundation

तन्यस्याव्रियमाणत्वेसिद्धेआवरणसिद्धिः तत्सिद्धौचतत्कल्पितभेदंजीवचैतन्यंप्रतिचिन्मात्रस्याव्रियमाणत्वसिद्धिरित्यन्योन्या
श्रयइत्यर्थः । किंचश्रवणादिसाध्यतत्वसाक्षात्कारेणयोमोक्षेभावीचिन्मात्रस्यैवचिन्मात्रंप्रतिप्रकाशःपरमपुरुषार्थरूपस्तदभावए
वसंसारदशायांआवरकाज्ञानेनसाधनीयोनतुकल्पितभेदंजीवंप्रतितदप्रकाशः । नहिमुक्तौजीवचैतन्यंप्रतिशुद्धचैतन्यप्रकाशोस्ति
तस्योपहितस्यतत्वज्ञाननिवर्त्यत्वेनोक्तपुरुषार्थभाक्त्वाभावादित्याह ॥ योमोक्षइति ॥ चैतन्यमावृताभिमतकालेपिप्रकाशते
स्वप्रकाशत्वाद्दीपवदित्यनुमानेस्वविषयकत्वमुपाधिरित्याशंक्यनिराकरोति ॥ नचेति ॥ नतथेति ॥ कर्तृकर्मविरोधादितिभा

**योमोक्षेभावीचिन्मात्रस्यैवचिन्मात्रंप्रतिप्रकाशस्तदभावस्यैवेदानीमज्ञानेनसा
धनीयत्वाच्च । नचदीपप्रकाशःआवृतोपिस्वविषयत्वात्प्रकाशते । ब्रह्मप्रकाश
स्तुनतथेतिनप्रकाशतइतिवाच्यं। मोक्षेप्यप्रकाशापातात्। अज्ञानवैयर्थ्याच्च ।**

वः । चैतन्येस्वविषयकत्वानंगीकारेमोक्षेचैतन्यप्रकाशएवनस्यात् चिन्मात्रेणस्वेनैवहिप्रकाशोवाच्यः सचायुक्तः कर्तृकर्मविरो
धात् । किंचस्वप्रकाशत्वेनस्वविषयकप्रकाशप्रसक्तौसत्यांतत्प्रतिबंधकत्वेनाज्ञानरूपमावरणंकल्प्यते चैतन्यस्यस्वविषयकत्वानं
गीकारेस्वप्रकाशत्वप्रयुक्तप्रकाशप्रसक्तेरेववक्तुमशक्यत्वेनावरकाज्ञानकल्पनावैयर्थ्यात् । अतःस्वविषयकत्वेचैतन्यस्यांगीकार्ये ॥ ३५९ ॥
साधनव्यापकत्वान्नायमुपाधिरित्याह ॥ मोक्षेपीत्यादिना ॥ ननूक्तरीत्याऽवरणकृत्यासंभवेनाज्ञानासंभवोनयुक्तः तस्यनजा

नामीतिसाक्षिसिद्धत्वात्। नचप्रकाशमानेचैतन्येऽज्ञानायोगइतिवाच्यं तस्यतत्स्फोरकत्वेनतदविरोधित्वात् । नचप्रकाशमानेऽ
ज्ञानमदृष्टचरमितिवाच्यं त्वदुक्तमर्थंनजानामीतिप्रकाशमानएवार्थेऽज्ञानदर्शनात् । कथमितिचेत् अत्रहिअज्ञानावच्छेदकस्या
र्थस्याज्ञानाभावेतदवच्छिन्नाज्ञानज्ञानायोगात् अर्थावच्छिन्नाज्ञानज्ञानेवाच्येऽर्थस्यापितदवच्छेदकतयाज्ञानेपितत्रार्थेऽज्ञानमनु
भूयतएव नचाज्ञानावच्छेदकस्याज्ञानेपितदवच्छिन्नाज्ञानज्ञानंसंभवत्येव कथमितिचेत् सामान्येनार्थत्वादिनाज्ञातेर्थेविशेषेणा
ज्ञानमंगीक्रियते तथाचयेनरूपेणार्थःप्रकाशते तेनैवरूपेणतद्विषयकाज्ञानानंगीकारात् तथाचप्रकाशमानेकथमज्ञानमितिवाच्यं।
सामान्यतोर्थस्यज्ञानानंगीकारेतदवच्छिन्नाज्ञानज्ञानायोगात् सामान्यतोर्थस्यज्ञानेंगीकार्येसामान्यस्यज्ञातत्वादेवाज्ञानानवच्छे
दकत्वेनाज्ञानावच्छेदकस्याप्यर्थेसामान्यस्यविशेषतएवज्ञानमंगीकार्यं । नचविशेषस्यापिज्ञातत्वादेवनाज्ञानावच्छेदकत्वंविरोधा
दितिवाच्यं विशेषज्ञानस्यसाक्षिरूपतांगीकारात् तस्यचाज्ञानाविरोधित्वात् अतःप्रकाशमानएवार्थगतेविशेषेऽज्ञानस्यदर्शनेनप्र
कृतेपिप्रकाशमानएवचैतन्येऽज्ञानमंगीकार्यं चैतन्यस्याज्ञानाविरोधित्वात् । नचचैतन्यस्यअज्ञानाविरोधित्वेऽज्ञाननिवृत्तिरेवन
स्यात् निवर्तकांतराभावादितिवाच्यं अविद्यानिवृत्तेरात्ममात्रविषयकनिष्प्रकारकचरमवृत्त्याख्यवृत्तिविशेषादेवोपपत्तेः । ननु
वृत्तिचितोरुभयोरपिआत्ममात्रविषयकत्वाविशेषात्वृत्तेरेवाज्ञानविरोधित्वंनचैतन्यस्येतिविशेषःकथं एकविषयकत्वाविशेषेपिए
कस्यविरोधित्वंअपरस्याविरोधित्वमित्यस्यविशेषस्यलोकेऽदर्शनादितिचेन्न । सौरालोकस्यायंघटइतिज्ञानस्यचघटविषयकत्वाविशे
षेपिसौरालोकस्यैवांधकारनिवर्तकत्वं नघटज्ञानस्य घटज्ञानेसत्यप्यंधकारानिवृत्तेः यथावासौरप्रकाशस्यबहिर्निःसृतचक्षुःकिर

SGDF

णरूपचाक्षुषप्रकाशस्यचघटविषयकत्वाविशेषेपिसौरप्रकाशस्यैवांधकारनिवर्तकत्वं नचाक्षुषप्रकाशस्य चाक्षुषप्रकाशेसत्यपिरात्रा वंधकारानिवृत्तेर्दृष्टत्वात् । नन्वेकविषयकज्ञानयोर्विरोधित्वाविरोधित्वेनदृष्टेइत्युच्यते सौरालोकस्तुनज्ञानं अतश्चदृष्टांतोनयु क्तइतिचेन्न । शंखगतश्वैत्यविषयकप्रत्यक्षस्यपैत्यभ्रमविरोधित्वेपिश्वैत्यानुमितेस्तददर्शनादेकविषयकत्वेपिवृत्तिचितोरज्ञानविरो

अथमतंसाक्षिणिप्रकाशमानेप्यज्ञानंयुक्तं । तस्यतत्स्फोरकत्वेनतदविरोधित्वात् । दृश्यते हित्वदुक्तमर्थंनजानामीतिप्रकाशमानएवाज्ञानं । अज्ञानावच्छेदकस्यविषयस्याज्ञानेतदव च्छिन्नाज्ञानज्ञानायोगात् । नचसामान्येनज्ञातेपिविशेषेणाज्ञानमितिवाच्यं । सामान्यस्य ज्ञातत्वादेवाज्ञानानवच्छेदकतयातदवच्छेदकस्यविशेषस्यैवज्ञातव्यत्वात् अविद्यानिवृत्ति स्त्वात्ममात्रविषयकाद्वृत्तिविशेषादेव । एकविषयत्वेपिवृत्तिचितोरज्ञानविरोधित्वाविरो धित्वेघटविषयकयोःसौरालोकज्ञानयोःसौरचाक्षुषप्रकाशयोर्वातमोविरोधित्वाविरोधि त्ववत् शंखेश्वैत्यप्रत्यक्षानुमित्योःपीतत्वभ्रमविरोधित्वाविरोधित्ववच्चयुक्तं । एवंचप्रकाश मानेआवरणकृत्याभावेप्यज्ञानमविरुद्धमितिममसिद्धांतरहस्यमिति । अत्रोच्यते ।

धाविरोधोपपत्तेः तथाचप्रकाशमानेचैतन्येआवरणकृत्याभावेपिअनुभवसिद्धत्वात्तत्राज्ञानमविरुद्धमित्यस्मत्सिद्धांतरहस्यमित्या शंकते ॥ अथमतमित्यादिना ॥ रहस्यमित्यंतेन ॥ सिद्धांताभिधानंप्रतिजानीते ॥ अत्रोच्यतइति ॥ जीवस्यब्रह्माभिन्न

SGDF Sri Gargeshwari Digital Foundation

त्वेनापरिच्छिन्नानंदस्येदानीमपिप्रकाशप्रसक्तौसत्यांतदप्रकाशार्थमेवत्वयाऽज्ञानस्यकल्पितत्वात्प्रकाशमानेधित्वेन*कल्प्यमानम ज्ञानंकथंप्रकाशमानेयुक्तंस्यात् तथाचप्रकाशमानेऽज्ञानमितित्वद्वचनमेवायुक्तमित्याह ॥ त्वयापीति ॥ ननुत्वदुक्तमर्थंनजाना मीत्यत्रभासमानएवविशेषेऽज्ञानंदृष्टमितिचेत्तत्राह ॥ अपिचेति ॥ सुखादिस्फुरणंचैतन्यमित्यर्थः । भासमानेचैतन्येतद्विषये तत् अज्ञानंत्वदुक्तमर्थंनजानामीत्यत्रभासमानएवाज्ञानमस्त्वित्यंगीकृत्योक्तं वस्तुतस्तुनतत्रापिभासमानएवार्थेऽज्ञानमित्याह ॥

त्वयाप्यनवच्छिन्नब्रह्मानंदाप्रकाशार्थमेवाज्ञानस्यकल्पितत्वेनकथंप्रकाशमानेअज्ञानं ।
अपिचत्वदुक्तोर्थोनप्रकाशतइत्यनुभवादस्तुतत्रभासमानेअज्ञानं। नचेहसुखादिस्फुरणं
नप्रकाशतइत्यनुभवोस्ति । येनभासमानेतत्स्यात् । किंचनतत्रापिभासमानेअज्ञानं गु
हास्थंतमश्छन्नमितिवत्त्वदुक्तंनजानामीत्यनावृतसामान्यावच्छेदेनैवाज्ञानानुभवात् ।

किंचेति ॥ तत्रापि त्वदुक्तमर्थंनजानामीत्यत्रापि ॥ गुहास्थमिति ॥ यथाहिगुहास्थंवस्तुतमसाच्छन्नमित्युक्तेगुहास्थंघटादि कंगुहास्थत्वेनैवरूपेणसामान्यतःप्रतीयते एवंचगुहास्थत्वेनरूपेणसामान्यतःप्रतीतएवघटादौविशेषेतमश्छन्नत्वमनुभूयते एवंत्व दुक्तमर्थंनजानामीत्यत्रापिअनावृतंअज्ञानानावृततयासदाप्रतीयमानंयदर्थत्वादिकंसामान्यंतदवच्छेदेनैवविशेषाज्ञानमनुभूयते । एवंचतद्विशेषाज्ञानज्ञानेतत्सामान्यज्ञानस्यैवहेतुत्वेनतस्यचसामान्याकारस्यप्रतीयमानत्वान्नतत्राज्ञानं किंतुविशेषएव तथाचय

SGDF
Sri Gargeshwari Digital Foundation

द्भासतेनतत्राज्ञानं यत्राज्ञानंसोर्थोनप्रकाशतइतिनभासमानेऽज्ञानमितिभावः । अज्ञानानुभवात् विशेषाज्ञानानुभवादित्यर्थः । विशेषाकारेणप्रकाशमानएवाज्ञानमितिवदतोबाधकमाह ॥ नहीति ॥ अज्ञानं अज्ञानावच्छेदकीभूतंवस्तु ॥ बुभुक्षेत्यादि ॥ बुभुक्षापिपासाद्यवच्छिन्नतत्तत्प्रातिस्विकरूपेणेत्यर्थः । त्वदुक्तमर्थंनजानामीत्यत्रविशेषरूपेणप्रकाशमानएवाज्ञानमितिवदतैवमनु वदितव्यं परबुभुक्षापिपासाविषयोऽर्थोयइममर्थमहंनजानामीति । अज्ञानावच्छेदकतयाबुभुक्षापिपासाविषयतद्विशेषरूपार्थानु वादःस्यात् नचैवं परचित्तस्थबुभुक्षाविषयार्थविशेषादेर्ज्ञातुमशक्यत्वादितिभावः । ननुतवच्छेदकविशेषस्याज्ञानेकथंतदवच्छि

नहिपरचित्तस्थमज्ञानंत्वयापिबुभुक्षापिपासादिप्रातिस्विकरूपेणानूद्यते। एवं
चतद्विशेषसंशयंप्रतितत्सामान्यनिश्चयइवतद्विशेषावच्छिन्नाज्ञानज्ञानंप्रति
तत्सामान्यज्ञानमेवहेतुः। तथादर्शनात्। नहिविशेषेज्ञातेतदज्ञानधीर्दृष्टा।

न्नाज्ञानज्ञानमुपपद्येतेत्यतआह ॥ एवंचेति ॥ तद्विशेषेति ॥ यथाऊर्ध्वपदार्थविशेषभूतस्थाण्वादिसंशयेऊर्ध्वपदार्थसामान्य निश्चयस्यैवहेतुत्वंनविशेषनिश्चयस्यापि तथात्वेतत्संशयस्यैवानुपपत्तेरित्यर्थः ॥ दर्शनादिति ॥ विशेषेतमश्छन्नत्वज्ञानंप्रतिगु हास्थत्वादिसामान्याकारेणज्ञानस्यहेतुत्वदर्शनादित्यर्थः । ननुविशेषावच्छिन्नाज्ञानज्ञानंप्रतिविशेषज्ञानमेवहेतुःकिंनस्यादित्यत आह ॥ नहीति ॥ ननुविशेषाज्ञानंप्रतिविशेषस्यैवावच्छेदकत्वेसामान्यस्यानवच्छेदकतयाकथंविशेषावच्छिन्नाज्ञानज्ञानंप्रति ॥ ३६१ ॥

सामान्यज्ञानंहेतुःस्यादित्यतआह ॥ अवच्छेदकेति ॥ अवच्छेदकज्ञानस्यावच्छिन्नज्ञानहेतुत्वंदंडीदेवदत्तइत्यादौदृष्टत्वादेवक ल्पनीयं प्रकृतेत्वज्ञानज्ञानंप्रतिअज्ञानानवच्छेदकस्यापिसामान्यस्यहेतुत्वंकल्पनीयं संशयस्थलेदर्शनबलादेवेत्यर्थः । नन्वज्ञाना नवच्छेदकत्वाविशेषात्सामान्यस्येवान्यस्यापिपदार्थस्यज्ञानंविशेषाज्ञानज्ञानेहेतुःस्यादित्यतिप्रसंगइतिचेत्तत्राह ॥ सामान्येति॥ यस्यपदार्थस्यविशेषरूपेणाज्ञानंतस्यैवसामान्यरूपेणज्ञानंविशेषाज्ञानज्ञानेहेतुरितिनियामकसद्भावान्नातिप्रसंगइत्यर्थः । अज्ञान

अवच्छेदकज्ञानस्यावच्छिन्नज्ञानहेतुतापिहिदर्शनादेवकल्प्या। सा
मान्यविशेषभावएवचनियामकइतिनातिप्रसंगः । युक्तंचद्वेषस्ये
ष्टत्वेपिद्विष्टस्येष्टत्वाभाववत् ईश्वरस्यास्मदादिभ्रांतिविषयविषयक
ज्ञानाभावेपिभ्रांते(तिविषयकज्ञाऽ)र्ज्ञानवदस्मदादीनांसर्वाज्ञानेपि

विषयीभूतस्यविशेषाकारस्यज्ञानाभावेपितद्विषयकाज्ञानस्यज्ञानंसंभवतीतिदर्शनादित्युक्तं नकेवलमेतावत् किंतुयुक्तंचेत्याह ॥ युक्तंचेति ॥ अज्ञानज्ञानमितिसंबंधः ॥ द्वेषस्येति ॥ चैत्रविषयकोद्वेषोमैत्रस्यइष्टः इच्छाविषयोभवति तथापियोद्विष्टोद्वे ष्यश्च तस्यमैत्रकर्तृकेच्छाविषयत्वाभावात्इष्टत्वद्विष्टत्वयोःपरस्परंविरोधादित्यर्थः ॥ अस्मदादीनामिति ॥ अस्मदादिभ्रांति विषयभूतरजतज्ञानवत्त्वेईश्वरस्यापिभ्रांत्यापत्तेरितिभावः ॥ सर्वेति ॥ ईश्वरज्ञानविषयीभूतसर्वस्यविशेषाकारेणज्ञानाभावेपी

SGDF
Foundation

त्यर्थः । तेनसर्वपदादिनासर्वज्ञानमस्माकमप्यस्तीतिनिरस्तं ॥ ईश्वरेति ॥ ईश्वरःसर्वज्ञइतिज्ञानस्यास्माकमपिसत्वादित्यर्थः ॥ अज्ञातेति ॥ अज्ञानविषयीभूतविशेषस्येत्यर्थः ॥ अज्ञानस्येति ॥ विशेषविषयकेत्यर्थः । तथाचयथेच्छाविषयोयोद्वेषस्तद्वि षयभूतस्यचैत्रस्यइच्छाविषयत्वरूपेष्टत्वाभावेपितद्विषयकद्वेषस्येच्छाविषयत्वरूपमिष्टत्वमस्ति यथाचेश्वरस्यास्मदादिभ्रमरूपज्ञा नविषयस्यरजतादेर्ज्ञानाभावेपिभ्रमरूपज्ञानविषयकज्ञानं यथावास्मदादेःसर्वविषयकज्ञानस्यविशेषाकारेणाभावेपिईश्वरःसर्वज्ञइ

ईश्वरसार्वज्ञज्ञानवच्चाज्ञातज्ञानाभावेप्यज्ञानज्ञानं। अन्यथा। "मोहभानार्थमज्ञानभानं यदिचकल्प्यते ॥ अज्ञातेमोहहानिश्चतदर्थंकिंनकल्प्यते" ॥ तथाहि। संयोगाद्यवच्छेद कस्यघटादेरज्ञानावच्छेदकतयाज्ञानेपिघटाद्यज्ञाननिवृत्तिंविनाऽवच्छिन्नसंयोगादिज्ञा नादर्शनेनप्रकृतेपिविषयावच्छिन्नाज्ञानज्ञानार्थंतदवच्छेदकविषयावरकाज्ञाननिवृत्तेर पिवक्तव्यत्वेनाज्ञानाविरोधिज्ञानवदज्ञानाविरोधिन्यज्ञाननिवृत्तिरपिस्वीकार्यास्यात्।

तिईश्वरीयसार्वज्ञज्ञानं एवमज्ञानविषयस्यापिविशेषाकारस्यज्ञानाभावेप्यज्ञानज्ञानंयुक्तमितिसमुदायार्थः ॥ अन्यथेति ॥ अ ज्ञानज्ञानार्थंअज्ञानावच्छेदकीभूतविशेषस्यापिज्ञातव्यत्वइत्यर्थः । मोहभानार्थं अज्ञानप्रतीत्यर्थं अज्ञातज्ञानं अज्ञानावच्छेद कीभूतविशेषज्ञानं अज्ञाते अज्ञानावच्छेदकीभूतविशेषे मोहहानिः अज्ञानहानिः तदर्थं मोहभानार्थं विशेषाज्ञानानिवृत्तौविशे षज्ञानाभावेनतदवच्छिन्नाज्ञानज्ञानायोगादितिभावः । कारिकांव्याचष्टे ॥ तथाहीत्यादिना ॥ अयमर्थः अज्ञानज्ञानार्थंयदि

SGDF
Sri Garga Iswari Digital Foundation

तदवच्छेदकीभूतविशेषाकारज्ञानंकल्प्यते तच्चज्ञानंसाक्षिरूपमितिअज्ञानाविरोधिज्ञानंकल्प्यते तर्ह्यज्ञानाविरोधिनीकाचिदज्ञा ननिवृत्तिरपिकल्प्यास्यात् तथाहिघटपटयोःसंयोगइत्यत्रघटावच्छिन्नसंयोगज्ञानेसंबंधितावच्छेदकसंबंधिज्ञानस्यकारणत्वात् । ननुघटादिकंनजानामीतिअज्ञानावच्छेदकतयायथाकथंचिद्धटज्ञानमस्तीतिचेत् तादृशेनघटज्ञानेनघटाज्ञाननिवृत्तेःघटाद्यज्ञाना निवृत्तौचघटादिज्ञानाभावप्राप्त्यातदवच्छिन्नसंयोगज्ञानायोगात् एवमज्ञानज्ञानार्थंविशेषज्ञानांगीकारेविशेषाज्ञाननिवृत्तिरप्यं गीकार्या तदज्ञानानिवृत्तौविशेषज्ञानाभावप्राप्त्यातदवच्छिन्नाज्ञानज्ञानायोगात् । अतोऽज्ञानभानार्थंअज्ञानावच्छेदकीभूतविशे

अथयथाऽन्यत्रावच्छिन्नसत्त्वस्यावच्छेदकसत्त्वसापेक्षत्वेप्यारोपितावच्छिन्नाभावस त्त्वस्यनारोपितसत्त्वसापेक्षत्वंविरोधात् । तथाविषयावच्छिन्नाज्ञानज्ञानस्यनविषया ज्ञाननिवृत्तिसापेक्षत्वं विरोधादितिचेत् तर्हिततएवतस्य नविषयज्ञानसापेक्षत्वमपि।

षाज्ञाननिवृत्तिरप्यंगीकार्या । ननुतर्हिविशेषाज्ञाननिवृत्त्यंगीकारेविशेषाज्ञानायोगोविरोधादितिचेन्न । अज्ञानाविरोधिज्ञानवत् अज्ञानाविरोधिनीअज्ञाननिवृत्तिरप्यंगीकार्यास्यादित्यतिप्रसंगइति । ननुविषयावच्छिन्नाज्ञानज्ञानस्यनविषयाज्ञाननिवृत्तिसापे क्षत्वं विरोधात् ननुघटाद्यवच्छिन्नसंयोगादिज्ञानेदर्शनादितिचेन्न तर्ह्येकत्रदृष्टंसर्वत्राप्यंगीकर्तुंशक्यते तथाहिलोकेदंडावच्छिन्नदे वदत्तसत्त्वस्यावच्छेदकदंडसत्त्वसापेक्षत्वदर्शनेप्यारोपितघटावच्छिन्नाभावसत्त्वंनावच्छेदकीभूतारोपितघटसापेक्षं विरोधात् आ रोपितघटसत्त्वाभावात् एवंप्रकृतेपीत्याशंकते ॥ अथेति ॥ तर्हीति ॥ एवंतर्हित्वदुक्तमर्थंनजानामीत्यत्रापिविशेषविषयका

SGDF
Sri Gargeshwari Digital Foundation

ज्ञानेपिनतदवच्छेदकविषयज्ञानसापेक्षत्वं विरोधादेव नहिविशेषतोज्ञानेतदज्ञानधीर्दृष्टेतिभावः ॥ ज्ञानांतरेति ॥ वृत्तिरूप
ज्ञानेत्यर्थः । अन्यत्र संयोगादिस्थले ॥ अवच्छिन्नज्ञानविरोधित्वेपीति ॥ अवच्छेदकज्ञानाभावेऽवच्छिन्नज्ञानाभावादि
तिभावः ॥ अज्ञानावच्छेदकज्ञानाभावस्येति ॥ अज्ञानावच्छेदकीभूतविशेषज्ञानाभावस्येत्यर्थः ॥ अवच्छिन्नज्ञानेति ॥
विशेषावच्छिन्नाज्ञानज्ञानेत्यर्थः । तथाचावच्छेदकीभूतविशेषज्ञानाभावेपिसामान्यतोज्ञानमात्रेणविशेषावच्छिन्नाज्ञानज्ञानसं

किंचाज्ञानस्यज्ञानांतरविरोधित्वेपिसाक्ष्यविरोधवत्(धित्ववत्)अन्यत्रावच्छेदकज्ञानाभावस्याव
च्छिन्नज्ञानविरोधित्वेपिअज्ञानावच्छेदकज्ञानाभावस्यावच्छिन्नज्ञानाविरोधःकिंनस्यात् । अज्ञानस्य
विषयविशेषावच्छेदासिद्धिस्तुतमसइवविशेषज्ञानानंतरमेतावंतंकालममुमर्थमित्थंनाज्ञासिषमित्य
नुभवांतरादितिज्ञेयं । यच्चोक्तंसाक्ष्यज्ञानस्फोरकत्वात्तदविरोधी । वृत्तिरेवतुविरोधिनीति तन्न ।

वात् । नह्येकत्रदृष्टमेवान्यत्रांगीकार्यमितिनियमस्तथात्वेवृत्तिवत्साक्षिणापिअज्ञानविरोधित्वंस्यादितिभावः । ननुसामान्यतएव
ज्ञानेसतिविशेषज्ञानाभावेपितदवच्छिन्नाज्ञानज्ञानांगीकारेऽज्ञानविषयतयाऽवच्छेदकीभूतोविशेषएतादृशइतिविशेषसिद्धिरेवन
स्यात् ज्ञायमानाज्ञानावच्छेदकतयाएतज्ज्ञानेनैवतत्सिद्धेर्वाच्यत्वात् तस्याश्चत्वयानंगीकारादित्याशंकमानंमंदंप्रत्याह ॥ अज्ञा
नस्येति ॥ अज्ञानविषयीभूतोयोविशेषस्तद्रूपावच्छेदकसिद्धिस्तुअनुभवांतरादित्यर्थः ॥ तमसइवेति ॥ यथातमसाआव्रिय

माणोविशेषस्तत्कालेतमोविषयत्वेनाज्ञायमानोपितमोनिवृत्त्यनंतरंपदार्थविशेषज्ञानानंतरंपदार्थःपूर्वंतमसाऽऽवृतोऽभूदितिज्ञानां
तरेणतमोविषयविशेषसिद्धिर्भवति एवमिहापिवृत्त्याऽज्ञाननिवृत्त्यनंतरंअज्ञानविषयविशेषज्ञानानंतरंअमुमर्थमेवंनाज्ञासिषमिति
ज्ञानांतरादज्ञानविषयविशेषसिद्धिर्भवतीत्यर्थः । चैतन्यस्य अज्ञानानावृतचैतन्यस्य ॥ तस्याइति ॥ एतन्मतेआवरणभूताज्ञा
नस्यैवाभावेनवृत्तेरज्ञानविरोधित्वोक्त्ययोगादितिभावः ॥ अज्ञानस्येति ॥ तथाचस्वविरोधिवृत्तिज्ञानाभावोयदातदाज्ञानमि

वृत्तिश्चैतन्यस्यविषयोपरागार्थेतिमतेतस्याअज्ञानानिवर्तकत्वात् अ
ज्ञानस्यस्वविरोधिज्ञानाभावव्यापकत्वेनमोक्षेप्यज्ञानापाताच्च । न
जानामीत्यज्ञानस्य ज्ञानसामान्यविरोधित्वानुभवाच्च । नजानामी
तिज्ञप्तिविरोधित्वस्यैवानुभवाच्च । त्वत्पक्षेचचैतन्यस्यैवज्ञप्तित्वात् ।

तिस्वविरोधिज्ञानाभावंप्रतिअज्ञानस्यव्यापकत्वान्मोक्षेचव्यापकीभूताज्ञानाभावाद्व्याप्यस्यज्ञानाभावस्याभावापत्त्यावृत्तिज्ञानापा
तादित्यर्थः ॥ विरोधित्वेति ॥ ज्ञाधात्वर्थभूतचैतन्यवृत्तिरूपज्ञानसामान्यविरोधएवानुभवेनप्रतीयते नतुवृत्तिज्ञानविरोधए
व तथाचचैतन्यस्यापिवृत्तिवदज्ञानविरोधित्वंस्यादित्यर्थः ॥ ज्ञप्तीति ॥ ज्ञाधातोर्जादेशविधानात्ज्ञाधात्वर्थभूतज्ञप्तिरेवभाव
व्युत्पत्त्याप्रतीयते तद्विरोधित्वंचनञर्थइत्यर्थः । ननुज्ञप्तिविरोधित्वानुभवेपितच्चैतन्यविरोधित्वालाभइत्यतआह ॥ त्वदिति ॥

SGDF

चैतन्येति ॥ चैतन्याख्यज्ञप्तिरूपमुख्यज्ञानाविरोधित्वादज्ञानंमुख्याज्ञानमेवनस्यात् चैतन्यंवामुख्यज्ञानंनस्यात् अमुख्यज्ञा नरूपवृत्तिविरोधित्वादमुख्याज्ञानमेवस्यादित्युक्तत्वादित्यर्थः । इतोपिचैतन्यस्याज्ञाननिवर्तकत्वंवाच्यं निवर्तकतावच्छेदकस द्भावादित्याह ॥ वृत्तेरिति ॥ अर्थप्रकाशकत्वंज्ञानत्वं । जातिविशेषोवृत्तित्वं ॥ तत्कार्येति ॥ भ्रांतीत्यर्थः ॥ सत्यत्वेति ॥ ज्ञानत्वेनज्ञाननिवर्त्यत्वाप्राप्त्याअज्ञानतत्कार्ययोर्मिथ्यात्वालाभादित्यर्थः । अर्थप्रकाशकत्वेन ज्ञानत्वेन । तत्वेन निवर्तकताव

चैतन्याज्ञानयोरविरोधेज्ञानत्वाज्ञानत्वायोगस्योक्तत्वाच्च।वृत्तेरप्यर्थप्रकाशकत्वंविनाजा तिविशेषेणैवाज्ञानतत्कार्यनिवर्तकत्वेइच्छादिनिवर्त्यद्वेषादिवत्सत्त्वापत्त्याशुक्त्यादि ज्ञानवदर्थप्रकाशत्वेनतन्निवर्तकेवक्तव्येचैतन्यस्यापितत्त्वेनतन्निवर्तकत्वावश्यंभावाच्च । त्वन्मतेनित्यातींद्रियेपरोक्षवृत्तौसत्यामपिअज्ञानानिवृत्त्यासुखादावपरोक्षवृत्त्यभावे पिस्फुरणमात्रेणाज्ञानादर्शनेनचान्वयव्यतिरेकाभ्यांस्फुरणस्यैवाज्ञानविरोधित्वाच्च ।

च्छेदकीभूतज्ञानत्वयुक्तत्वेन ॥ तन्निवर्त्तकत्वेति ॥ अज्ञाननिवर्त्तकत्वेत्यर्थः । किंचान्वयव्यतिरेकाभ्यांचैतन्यस्फुरणस्यैवा ज्ञानविरोधित्वं तथाहि चैतन्यस्फुरणाभावेनाज्ञाननिवृत्तिः नित्यातींद्रियेदर्शनात् तथापिचैतन्यस्फुरणेनाज्ञाननिवृत्तौअभि व्यक्तचित्संबंधप्राप्त्याधर्मादेरापरोक्ष्यापत्तेः ननुतत्राज्ञाननिवृत्त्यभावःस्फुरणाभावप्रयुक्तएव । कुतः वृत्त्यभावप्रयुक्तःकिंनस्या

SGDF
Sri Gargeshwari Digital Foundation

दित्यतोवृत्तेरप्रयोजकत्वंवक्तुमुक्तंपरोक्षवृत्तौसत्यामपीति । तथाचैतन्यस्फुरणेसतिअज्ञानाभावइत्यस्ति सुखादौदर्शनात् । ननु तत्राज्ञानाभावोऽपरोक्षवृत्तिप्रयुक्तएवकिंनस्यादित्यतउक्तमपरोक्षवृत्त्यभावेपीति । किंचचैतन्यस्फुरणस्याज्ञानविरोधित्वानंगीकारेआत्मास्वप्रकाशोभवितुमर्हतिस्वसत्तादशायामप्रकाशवैधुर्यात् दीपवदितिस्वप्रकाशत्वसाधनमयुक्तंस्यात् । तस्याज्ञानाविरोधित्वांगीकारेणस्वसत्तायामप्रकाशसंभवेनहेतोःस्वरूपासिद्ध्यापत्तेरित्याशयेनाह ॥ स्वसत्तायामिति ॥ वैषम्योक्तिश्चेति॥

स्वसत्तायामप्रकाशविरोधित्वेनात्मनःस्वप्रकाशत्वसाधनायोगाच्च वृत्तिचितोर्वैषम्योक्तिश्चायुक्ता । वृत्तिवत्साक्षिणोपिसमानविषयकाज्ञानविरोधित्वानुभवात् । अनुभूयतेह्यज्ञानविषयकानुमित्यादिरूपवृत्तिवदज्ञानविषयकसाक्षिणोप्यज्ञानविषयकाज्ञानविरोधित्वं

सौरालोकज्ञानादिदृष्टांतेनेत्यर्थः ॥ अनुभवादिति ॥ सुखादिविषयइत्यर्थः । ननुसाक्षिणोऽज्ञानसाधकत्वान्नतद्विरोधित्वमितिचेत्तत्राह ॥ अनुभूयतेहीति ॥ अज्ञानसाधकत्वेनाज्ञानविषयकयाऽनुमितिरूपवृत्त्याऽज्ञानज्ञानेसतिनाज्ञानविषयकाज्ञानमनुभूयते एवंचाज्ञानविषयकानुमितिवृत्तेर्यथाऽज्ञानविषयकाज्ञानविरोधित्वं एवंसाक्षिणोप्यज्ञानसाधकत्वेनाज्ञानविषकाज्ञानविरोधित्वमेवास्ति साक्षिसिद्धाज्ञानेऽज्ञानंनास्तीतियावत् सतिचैवंवृत्तिसाक्षिणोरज्ञानविरोधित्वसाम्यान्नतयोर्वैषम्यमित्यर्थः ।

SGDF
Sri Gargeshwari Digital Foundation

किंचसाक्षिवद्वृत्तेरप्यज्ञानाविरोधित्वाच्चसाम्यमित्याह ॥ साक्षिवच्चेति ॥ यथात्वयासाक्षिविषयाज्ञानविषयभूतोयोविशेषस्त द्विषयकंयदज्ञानंसाक्षिसिद्धमेवतदविरोधित्वमेवसाक्षिणःस्वीकृतं तस्याज्ञानसाधकत्वांगीकारात् एवमज्ञानसाधकानुमितिरूप वृत्तेरपिअनुमितिविषयाज्ञानविषयोयःपदार्थःतद्विषयकंयदज्ञानंअनुमितिविषयभूतमेवाज्ञानंतदविरोधित्वमेवास्ति अनुमितेरज्ञा नसाधकत्वांगीकारात् । अतोपिसाम्यमित्यर्थः । अन्यथा साक्षिणोऽज्ञानाविरोधित्वे । दुःखादौ अज्ञानापत्त्येतिशेषः ॥ मैत्र

साक्षिवच्चाज्ञानविषयकवृत्तेरप्यज्ञानविषयविषयकाज्ञानाविरोधित्वंच । अन्यथा साक्षिवेद्येचैत्रेच्छासुखदुःखादौमैत्रस्येवचैत्रस्याप्यज्ञानंस्यात् । एवंच । "साक्षीस्व विषयेज्ञानविरोधीनभवेद्यदि ॥ तद्वेद्येसुखदुःखादावज्ञानंकेनवार्यते " ॥ इच्छादौ सदाप्रकाशादज्ञानप्रसक्तिरेवनेतिचेत् तर्ह्यात्मन्यपिततएवतदप्रसक्तिःस्यात् ।

स्येवेति ॥ मैत्रस्ययथाऽज्ञानमस्तितथेत्यर्थः । सुखादिविषयेसाक्ष्यन्यस्याज्ञानविरोधिनोऽभावात् साक्षिणश्चतदविरोधित्वात् । चैत्रस्येवमैत्रस्याप्यज्ञत्वंस्यात् नोचेन्मैत्रस्याप्यज्ञानंनस्यादित्यर्थः । संगृह्णाति ॥ एवंचेति ॥ साक्षिणःस्वविषयविषयकाज्ञान विरोधित्वाभावेसुखादावज्ञानंकेनवार्यते तत्रवृत्तेरभावादितिभावः । ननुसाक्षिविषयेसुखादौअज्ञानप्रसक्तिरेवनास्तीतिनतद्वार कापेक्षा वृत्तिस्तुस्वविषयेप्रसक्ताज्ञाननिवर्तिकेतितयोर्वैषम्यमित्याशंकते ॥ इच्छादाविति ॥ विषये ॥ सदेति ॥ ज्ञातैकस ॥ ३६५ ॥

त्वादितिभावः । आत्मनि विषये । ततएव स्वप्रकाशत्वादेव तदप्रसक्तिःस्यात् अज्ञानाप्रसक्तिःस्यात् । तथाचवेदांतजन्यचरम वृत्तेरात्माज्ञाननिवर्तकत्वंत्वयोच्यमानंनस्यादितिभावः । तथाचात्मानाज्ञानप्रसक्तिमान् सदाप्रकाशमानत्वादिच्छादिवदित्यनु मानंद्रष्टव्यं । अत्रसाक्षिवेद्यत्वमुपाधिरित्याशंक्यनिराकरोति ॥ नचेति ॥ नसदाप्रकाशस्तंत्रमित्यर्थः । इच्छादौसाध्यव्याप कत्वात् । साधनाव्यापकत्वमाह ॥ आत्मात्विति ॥ तस्यसाक्षिरूपत्वेनतद्वेद्यत्वंनास्ति कर्तृकर्मविरोधादितिभावः । तर्हितं स्याप्रामाणिकत्वंनमंतव्यमित्याह ॥ किंत्विति ॥ स्वप्रकाशत्वेनतत्सिद्धिरितिभावः । तथाचआत्माऽज्ञानप्रसक्तिमान् साक्षि

नचसाक्षिवेद्यत्वंतदप्रसक्तौतंत्रं । आत्मातुनतद्वेद्यः किंतुचिद्रूपत्वात्प्र काशतएवेतियुक्तं । प्रकाशरूपेदीपेंधकारस्येवात्मन्यप्यज्ञानाप्रसक्तेर्न्या य्यत्वात् । अन्यथाघटादिरालोकमिवात्मापिस्वव्यवहारेज्ञानांतरमपेक्षेत ।

वेद्यत्वात् घटवदितिप्रतिपक्षउक्तोभवति । प्रतिपक्षानुमानेऽप्रकाशरूपत्वमुपाधिरित्याशयेनाह ॥ प्रकाशरूपइति ॥ तथाचै तदुपाधिविपर्ययेणसाध्याभावसाधनेस्थापनानुमानमेवपर्यवसितमितिध्येयं ॥ अन्यथेति ॥ वृत्तिचितोर्वैषम्यायात्मनोऽज्ञान विरोधित्वानंगीकारइत्यर्थः ॥ घटादिरिति ॥ यथाघटादेःस्वयमज्ञानाविरोधित्वात्स्वव्यवहारेस्वातिरिक्तालोकापेक्षास्त्येवंचि तोप्यज्ञानाविरोधित्वात्तत्राज्ञानप्राध्यास्वस्वरूपव्यवहारोनस्यात् तदर्थंस्वातिरिक्तसंविदंतरापेक्षास्यात् इदंतुसिद्धांतरहस्यविरु

SGDF

द्धं । स्वरूपप्रकाशेनैवतद्व्यवहारांगीकारात् अन्यथादृश्यत्वलक्षणस्यातिव्याप्तिप्रसंगादितिभावः । ननुवृत्तिचितोर्वैषम्यमेव न चसाक्षिणोपिसुखादिविषयाज्ञानविरोधित्वात्साम्यमितिवाच्यं सुखादेःकेवलचिद्वेद्यत्वाभावात् वृत्तिप्रतिबिंबितसाक्षिवेद्यत्वांगीकारात् तथाचसुखादिविषयेवृत्तिसहितस्यैवसाक्षिणोऽज्ञानविरोधित्वात् अस्माभिःकेवलशुद्धचैतन्यस्यैवाज्ञानाविरोधित्वस्योच्यमानत्वेनकेवलात्मविषयकाज्ञानांगीकारेनदोषइत्याशंक्यनिराकरोति ॥ नचेति ॥ तर्हिंशुद्धचैतन्यव्यवहारेसंविदंतरापेक्षास्यादितिदूषणेसत्येवदूषणांतरमाह ॥ असतइति ॥ सुखादेर्वृत्तिप्रतिबिंबितसाक्षिवेद्यत्वेसुखाद्युत्पत्त्यनंतरंतद्ग्रहणायवृत्तिविलं

नचसुखाद्यपिवृत्तिप्रतितिबिंबितसाक्षिणैववेद्यं नतुकेवलेनेतिकेवलोनाज्ञानविरोधीतिवाच्यं । असतःसाधकत्वभंगेकेवलसाक्षिवेद्यत्वोपपादनात् । अंतःकरणवृत्तेरिंद्रियादिव्यापारमविद्यावृत्तेश्चदोषंविनायोगाच ।

बेनविलंबापत्त्याकदाचित्संशयादिःस्यात् तथाचज्ञातैकसत्वहानिप्रसंगात् अतःकेवलचिद्वेद्यत्वंवाच्यमित्युपपादनस्यकृतत्वादित्यवधेयं । ततश्चशुद्धचितएवदुःखादिविषयेअज्ञानविरोधित्वप्राप्त्यानवृत्तिचितोर्वैषम्यमितिभावः । किंचसुखादेर्नांतःकरणवृत्तिप्रतितिंबितसाक्षिवेद्यत्वं तस्याइंद्रियव्यापाररूपप्रमाणजन्यत्वादांतरसुखादौचतदप्रवृत्तेः नापिसुखादेरविद्यावृत्तिप्रतिबिंबितसाक्षिवेद्यत्वं अविद्यावृत्तेर्दोषजन्यत्वनियमात्साक्षिणश्चनिर्दोषत्वात् अतःपरिशेषात्केवलचिद्वेद्यत्वमेववाच्यमित्याह॥ अंतःकर

SGDF
Sri Gargeshwari Digital Foundation

णेति ॥ अन्यथेति ॥ स्वसत्तायामप्रकाशविधुरेपिसुखादौवृत्त्यपेक्षायामित्यर्थः ॥ स्यादिति ॥ तथाचस्वव्यवहारेस्वाति रिक्तज्ञानांतरापेक्षास्यादितिभावः ॥ प्रतिबंदीनिरस्तेति ॥ सौरालोकज्ञानयोस्तमोविरुद्धत्वाविरुद्धत्ववत्वृत्तिचितोरज्ञानवि रोधित्वाविरोधित्वेयुक्तेइत्युक्ताप्रतिबंदी । सौरालोकज्ञानयोरिववृत्तिचितोरज्ञाननिवर्तनवैलक्षण्याभावेनसौरालोकज्ञानादिसा म्याभावात् साम्येहिप्रतिबंदीग्रहणमितिभावः । यदुक्तंदृश्यतेहित्वदुक्तमर्थंनजानामीतिप्रकाशमानएवाज्ञानं अज्ञानावच्छेदक

अन्यथाऽऽत्मापिवृत्तिप्रतिबिंबितेनैवस्वेन(तेन)सदाप्रकाशते नतुकेवलेनेतिस्या त् । एतेनसौरालोकज्ञानादिप्रतिबंदीनिरस्ता । एतेनैवसर्वंज्ञाततयावाऽज्ञाततया साक्षिविषयइतिनिरस्तं । अंधकारावृतवत्ज्ञानाभावावच्छेदकविषयवच्चाज्ञाना वच्छेदकस्याप्यप्रकाशेनसाक्षिवेद्यतायोगात् । अस्तुवावृत्तिरेवाज्ञानविरोधिनी

विषयस्याज्ञानेतदवच्छिन्नाज्ञानज्ञानायोगात् अतोऽज्ञानावच्छेदकीभूतोविषयःसाक्षिणाभासतइत्यंगीकार्यं ततश्चप्रकाशमानए वाज्ञानसिद्धिरितितद्दूषयति ॥ एतेनेति ॥ ज्ञाततयाज्ञानावच्छेदकत्वेनविशेषितएवसाक्षिविषयःअज्ञाततयाऽज्ञानावच्छेदक तयाविशेषितएवसाक्षिविषयः । तदेवविवृणोति ॥ अंधकारेति ॥ यथागुहास्थंतमश्छन्नमित्यत्रविशेषतोगुहास्थपदार्थाप्रकाशे पिगुहास्थत्वेनसामान्यतस्तदुपस्थितौतत्रयथातमश्छन्नत्वज्ञानमित्यर्थः । ज्ञानावच्छेदकीभूतोविषयोपिसाक्षिणाविशेषतोनभास

SGDF
Sri Gargeshwari Digital Foundation

तद्इत्येवंदृष्टांतेनाह ॥ ज्ञानेति ॥ ज्ञानावच्छिन्नाभावज्ञानंतावत्त्वयांगीकृतंपदार्थज्ञानाभावोप्यस्तीत्यादौ। एवंचतत्रयथाज्ञाना
वच्छेदकीभूतविषयस्यविशेषतोऽप्रकाशेपिसामान्यतस्तदुपस्थितौसत्यामेवपदार्थज्ञानाभावज्ञानंभवति एवंसामान्यतोऽवच्छेदक
ज्ञानेसत्येवतदवच्छिन्नाज्ञानज्ञानमनुभूयते अतोऽज्ञानावच्छेदकतयाविशेषाकारस्यसाक्षिवेद्यत्वाभावात्प्रकाशमानएवाज्ञानमि
त्युक्तमसदितिभावः ॥सेदानीमिति॥सत्यज्ञानादिरूपवेदांतवाक्यरूपजन्यायाःश्रवणादिरूपवृत्तेरिदानींसाक्षात्कारात्पूर्वमपि
सत्त्वेनाज्ञाननिवृत्त्यापत्त्यामोक्षापातेनसंसारोपलंभोनस्यादित्यर्थः॥ तत्रेति ॥ आत्मशब्दवाच्येचैतन्यइत्यर्थः । वृत्तिव्यावृत्तेः

तथाप्यात्मविषयासेदानीमप्यस्तीतिकथंतत्राज्ञानं । विवरणेजीवाकाराहं
वृत्तिपरिणतांतःकरणेनचजीवोऽभिव्यज्यते । अन्यथासुषुप्तेरित्युक्तेः । अ
यंघटइत्याद्यपरोक्षवृत्तेरपित्वन्मतेघटावच्छिन्नचिद्विषयत्वाच्च । अन्यथा

सत्त्वादितिभावः । आत्मविषयावृत्तिरिदानीमप्यस्तीत्यत्रविवरणसंमतिमाह ॥ विवरणइति ॥ जीवाकारेत्यादि ॥ जीववि
षयकाहंत्वप्रकाशकावृत्तिस्तदात्मनापरिणतंयदंतःकरणंतेनजीवोव्यज्यते अहमाकारांतःकरणपरिणामरूपज्ञानरूपयावृत्त्याजीव
विषयिण्याजीवोऽभिव्यज्यते जीवइतिव्यवहारविषयोभवतीत्यर्थः॥ अन्यथेति ॥ अहमाकारवृत्त्यभावदशायांसुषुप्तेरित्यर्थः ।
तथाचजीवस्यैवात्मत्वात्तद्विषयिणीवृत्तिःप्रत्यहमस्तीत्यर्थः । ननुजीवस्यविशिष्टत्वान्नचैतन्यविषयापरोक्षवृत्तिरस्तीतिचेत्तत्राह॥
अयंघटइतीति ॥ तथात्वेचैतन्यविषयिण्यपिवृत्तिरिदानीमप्यस्तीतितथाऽज्ञाननिवृत्तौमोक्षापातइतिभावः ॥ अन्यथेति ॥

अयंघटइतिवृत्तेर्घटावच्छिन्नचिद्विषयत्वाभावमंगीकृत्येदानींचैतन्यविषयकवृत्त्यभावांगीकारइत्यर्थः ॥ घटावरकेति ॥ यदिघ
टावरकमज्ञानंस्यात्तदाघटविषयिण्यावृत्त्याघटाज्ञाननिवृत्तिःस्यात् नचैवंघटादेरप्रकाशस्वरूपत्वेनआवरणकृत्याभावेनजडावर
काज्ञानांगीकारात् अतोघटावच्छिन्नएवघटाज्ञानमंगीकार्यं तथाचायंघटइतिवृत्तेर्घटावच्छिन्नचिद्विषयकत्वाभावेसमानविषयका
ज्ञानाभिभावकस्यान्यस्याभावेनघटादिव्यवहाराभावापत्त्याघटावच्छिन्नचिद्विषयत्वमवश्यमंगीकार्यमित्यर्थः । आत्मविषयिणी
वृत्तिरिदानीमप्यस्तीत्युपपादनायअहमिति । जीवविषयावृत्तिर्घटावच्छिन्नचैतन्यविषयाचवृत्तिरिदानीमस्तीत्युक्तं किंततः अ

घटावरकाज्ञानाभावेनायंघटइतिवृत्तेरज्ञानाभिभावकत्वंनस्यात्। नचविशिष्टचैतन्यरूपजी
वविषयावा घटावच्छिन्नचैतन्यविषयावा वृत्ति रज्ञानविषयभूतचिदविषयावा तदज्ञाना
विरोधिनीवेतियुक्तं । दंडीचैत्रइतिवृत्त्याचैत्राज्ञानानभिभवापातात् । आकाशस्यैवच
घटावच्छिन्नस्यघटाकाशत्वेघटाकाशेदृष्टे आकाशगतमहत्त्वाद्यदर्शनेपिआकाशमात्रंदृष्टमेव

ज्ञानविरोधिन्याश्चैतन्यवृत्तेःसत्त्वादज्ञाननिवृत्तिःस्यात् ततश्चसद्योमोक्षःस्यादितिचेन्न । विशिष्टचैतन्यरूपविशेष्यविषयकत्वा
भावात् चिन्मात्रविषयकाज्ञानविरोधित्वाभावाद्वानतयाऽज्ञाननिवृत्तिरित्याशंक्यनिराकरोति ॥ नचेति ॥ विशिष्टवृत्तेर्विशे
ष्याविषयकत्वेविशेष्यविषयकाज्ञानानिवर्तकत्वांगीकारेऽतिप्रसंगमाह ॥ दंडीचैत्रइति ॥ तथाचदंडीचैत्रइतिज्ञानानंतरंअयं
चैत्रोनवाअन्यएवेतिसंशयविपर्ययौस्यातामितिभावः । विशिष्टदर्शनेविशेष्यंदृष्टमित्यत्रोदाहरणमाह ॥ आकाशस्यैवचेति ॥

SGDF
Sri Gangadharendra ... Digital Foundation

महाकाशस्यैवेत्यर्थः । घटावच्छिन्नाकाशस्यैवघटाकाशत्वेतित्यन्वयः । घटावच्छिन्नोमहाकाशएवघटाकाशइत्युच्यतइतिमतेघ टावच्छिन्नेआकाशेविशिष्टेदृष्टेविशेष्यभूतंयदाकाशमात्रंमहाकाशरूपंतद्दृष्टमेव । ननुआकाशमात्रदर्शनेपितद्गतमहत्त्वादिनदृश्य तइतिचेत् मादर्शि आकाशमात्रदर्शनंतावदस्त्येवेत्यर्थः । ननुयदामहाकाशएवघटावच्छिन्नोभवति तदातस्मिन्दृष्टेतद्दृष्टंभवति यदातुमहाकाशांशएवघटावच्छिन्नाकाशइत्युच्यते तदाशांशिनोर्भेदात् । घटावच्छिन्नाकाशदर्शनेपिमहाकाशादर्शनंयुक्तमिति चेत्सत्यं एवंत्वयानांगीकृतमस्तीत्याह ॥ आकाशांशस्येति ॥ त्वयातुनैवमंगीकृतमितिवाक्यशेषः ॥ श्रवणादीति ॥ इदा

आकाशांशस्यघटाकाशत्वेतुघटाकाशदर्शनेपिमहाकाशादर्शनंयुक्तं ।
नचश्रवणादिजन्यावृत्तिरज्ञानविरोधिनीतियुक्तं। भ्रमकालीनापरोक्षज्ञा
नानधिकविषयज्ञानेनकारणांतरजन्येनाप्यविद्यानिवृत्तावतिप्रसंगात् ।

नींतनात्मवृत्तिस्तुनश्रवणादिजन्येतिनाज्ञानविरोधिनीश्रवणादिजन्याचवृत्तिश्चरमवृत्तिरेवेतिभावः ॥ भ्रमकालीनेति ॥ जग द्भ्रमकालीनंयदपरोक्षज्ञानंसन्घटइत्यादिसाक्षात्काररूपंतदपेक्षयानधिकविषयकंभ्रमप्रतीतसदर्थमात्रविषयकंतेनसमानविषयकं यच्चरमवृत्तिरूपंतेनेत्यर्थः ॥ कारणांतरेति ॥ भ्रमकालीनचैतन्यापरोक्षज्ञानमिंद्रियजन्यंचरमज्ञानंचवेदांतजन्यमितिकारण कृतमेववैषम्यंनविषयकृतमस्तीत्यर्थः ॥ अतिप्रसंगादिति ॥ विषयकृतवैषम्यरहितस्यापिकारणांतरजन्यत्वमात्रेणाविद्यानि

SGDF Sri Gargeshwari Digital Foundation

वर्तकत्वेऽपीतसाक्षात्कारस्यापिनपीतभ्रमनिवर्तकत्वं किंतुश्रवणादिजन्यपीतसाक्षात्कारस्यैवतथात्वमस्त्वितिअतिप्रसंगइत्यर्थः। तत्रवक्तव्यंतयोर्विषयकृतविशेषाभावेनकारणांतरजन्यत्वमात्रमप्रयोजकमिति । तत्प्रकृतेपिसमानमितिभावः । चरमवृत्तेर्भ्रम कालीनापरोक्षज्ञानानधिकविषयत्वेदूषणांतरमाह ॥ अनधिकेति ॥ श्रवणादिजन्यवृत्तेश्चरमवृत्त्यनधिकविषयायाअविद्यानि वर्तकत्वेदेवताश्रवणजन्यसाक्षात्कारनिवर्त्यदुरितवदिच्छानिवर्त्यद्वेषवच्चाज्ञानस्यसत्यत्वंस्यादित्याह ॥ सत्यत्वेति ॥ आत्ममा त्रं चैतन्यमात्रं। एतावत्पर्यंतं "निर्विशेषेस्वयंभातेकिमज्ञानावृतंभवे" दित्यनुव्याख्यानांशमुपपाद्य "मिथ्याविशेषोप्यज्ञानसि

अनधिकविषयत्वेश्रवणादिवैयर्थ्याच्च । सत्यत्वापाताच्च । तस्मान्नात्ममात्र
मज्ञानस्यविषयः। नापिदेहादिभेदो[1]वा भोक्तृत्वाद्यभावो[2]वा ब्रह्माभेदो[3]वा
द्वितीयमात्राभावो[4]वा तद्विशिष्टात्मा[5]वा तद्विषयः । तेषामात्ममात्रत्वे

द्धिमेवह्यपेक्षत" इत्यंशमुपपादयितुंमिथ्याविशेषानाशंक्यनिराकरोति ॥ नापीति ॥ देहेंद्रियादिभिरात्मनोभेदादिकमज्ञानावृ तंसदिदानींनभासते प्रत्युतेदानींआत्मनिदेहाद्यभेदोभोक्तृत्वकर्तृत्वादिकंब्रह्मभेदःद्वितीयंचभासतइत्यर्थः ॥ तद्विशिष्टेति ॥ देहादिभेदभोक्तृत्वाद्यभावविशिष्टआत्मैवाज्ञानविषयः तथाचाज्ञानावृतःसन्तथानभासते प्रत्युतदेहाद्यैक्यभोक्तृत्वादिविशिष्ट तयैवभासतइत्यर्थः । देहादिभेदादीनांआत्ममात्रत्वंवाविवक्षितंतद्भिन्नत्वंवा नाद्यइत्याह ॥ तेषामिति ॥ देहभेदादीनामित्य

SGDF
Sri Gargeshwari Digital Foundation

र्थः ॥ उक्तदोषादिति ॥ चैतन्यमात्रत्वेआवरणकृत्याभावादिरूपदोषस्योक्तत्वादित्यर्थः । द्वितीयेकिंतेषांसत्वंविवक्षितं उता विद्याकल्पितत्वं नाद्यइत्याह ॥ भिन्नत्वेसत्वइति ॥ द्वितीयंनिराह ॥ आविद्यकत्वइति ॥ तेषामाविद्यकत्वेसिद्धेतदावर काज्ञानसिद्धिः तत्सिद्धौचतेषामविद्याकल्पितत्वसिद्धिरित्यन्योन्याश्रयः अज्ञानव्यक्त्यंतरांगीकारेचक्रकादिरित्यर्थः । तेषांब्र ह्माभेदादीनांप्रकाशमानात्ममात्रत्वमंगीकृत्यकल्पितभेदमादायाज्ञानविषयत्वमुपपाद्यतइत्याशंक्यनिराकरोति ॥ नचेति ॥ प्र

उक्तदोषात् । भिन्नत्वेसत्त्वेऽद्वैतहानेः । आविद्यकत्वेन्योन्याश्रयादेः । नचब्रह्माभेदादेःप्रकाश मानात्ममात्रत्वेपिकल्पितेनभेदेनाज्ञातत्वं अधिष्ठानावरणंविनाभेदकल्पनायोगादित्युक्तत्वा त् । नचमिथ्याभूतेनापिभेदाभावेनद्वितीयाभावेनवोपलक्षितआत्माअज्ञानविषयः । तस्यस मानविषयज्ञाननिवर्त्यत्वेनवेदांतानामप्युपलक्षणरूपप्रकारयुक्तात्मपरत्वेनाखंडार्थत्वहानेः ।

काशमानेआत्मनिभेदकल्पनैवायुक्ता कल्पनायाअधिष्ठानावृत्तिंविनाऽयोगेनाधिष्ठानचैतन्यस्यसदाप्रकाशमानत्वेनाधिष्ठानावर णायोगेनभेदभ्रांतिरूपकल्पनाऽयोगादित्याह ॥ अधिष्ठानेति ॥ ननुदेहभेदादिविशिष्टस्यात्मनोनाज्ञानविषयत्वं किंतुतदुप लक्षितएवात्माऽज्ञानविषयः तथाचचैतन्यमात्रविषयकत्वपक्षोक्तदोषाभावइत्याशंक्यनिराकरोति ॥ नचेति ॥ कुतोनेत्यतआ ह ॥ तस्येति ॥ ननुवेदांतानांभेदाभावोपलक्षणरूपप्रकारयुक्तात्मपरत्वंकुतः येनाखंडार्थत्वहानिरित्यतआह ॥ तस्येत्यादिना ॥ ॥ ३६९ ॥

अज्ञानस्यभेदाभावोपलक्षितात्मविषयकत्वेनतद्विषयकज्ञाननिवर्त्यतायाएववक्तव्यत्वात् तथाचोपलक्षणरूपप्रकारपरत्वेनाखंडा र्थताहानिःस्यादेवेत्यर्थः ॥ अकाकइति ॥ उपलक्षणीभूतस्यप्रत्याय्यव्यावृत्तिसमयेसत्त्वाभावादकाकेगृहेकाकवदितिवाक्यंय थाऽप्रमाणमेवंउपलक्षणीभूतभेदाभावादेर्मिथ्यात्वेनब्रह्मण्यभावात्तद्बोधकवेदांतानामप्रामाण्यंस्यात् काकोपस्थाप्योत्तृणत्ववदी श्वरेतदभावादितिभावः ॥ प्रकाशमानस्येति ॥ लोकेज्ञानविषयस्यप्रकाशमानत्वंदृष्टं त्वयातुअप्रकाशमानस्यैवद्वितीयाभाव

अकाकेकाकवदितिवाक्यवदप्रामाण्यापाताच्च । प्रकाशमानस्यात्मनोऽ ज्ञानविषयत्वेअप्रकाशमानस्यद्वितीयाद्यभावस्योपलक्षणत्वेनतद्विषय त्वेचदृष्टहाना(दृष्टक)दिकल्पनापाताच्च । तस्मादात्मनःप्रकाशमानत्वाद न्यस्यचाविद्यकत्वान्नाविद्याविषयत्वं । तदुक्तं । "निर्विशेषेस्वयंभाते किमज्ञानावृतंभवेत् । मिथ्याविशेषोप्यज्ञानसिद्धिमेवह्यपेक्षते" इति ।

स्योपलक्षणत्वेनतटस्थतयाज्ञानविषयत्वस्वीकारादद्दृष्टकल्पनेत्यर्थः । भंगार्थमुपसंहरति ॥ तस्मादिति ॥ आत्मन श्चिन्मात्रस्य ॥ अन्यस्येति ॥ देहभेदादिरूपस्यात्मभिन्नस्यमिथ्याविशेषस्येत्यर्थः । तत्रानुव्याख्यानंसंवादयति ॥ तदुक्तमिति ॥ किंच विषयान्यूनपरिमाणस्यैवविषयाच्छादकत्वंदृष्टमतोविषयसंबंध्यावरणत्वेनत्वयोच्यमानायाःपरि[illegible]त्वायाअविद्यायाःकथमपरि

SGDF
Shri Gargeshwari Digital Foundation

च्छिन्नब्रह्मावरणत्वमित्याह ॥ किंचेति ॥ ननुन्यूनायाअंगुलेःस्वाधिकसूर्याच्छादकत्वदर्शनात्प्रकृतेन्यूनाप्यविद्यास्वाधिकब्रह्मावरणंभविष्यतीत्यतआह ॥ न्यूनापीति ॥ अंगुलेःपुरुषसंबंधिचक्षुराद्यावरणत्वेनविषयसंबंध्यावरणत्वाभावादित्यर्थः । एवमविद्यानिराकरणप्रसंगमुपसंहरन्नेवोत्तरग्रंथमुपक्षिपति ॥ तस्मादिति ॥ नतत्कार्यमिति ॥ अविद्याकार्यंनभवतीत्यर्थः ॥ ७ ॥ अविद्याविषयभंगविवरणं ॥ ५५॥ अहमर्थोनात्मातस्मिन्प्रकाशमानेप्यप्रकाशमानत्वादित्यनुमानेविशेषणासिद्धिंप

किंचन्यूनयाऽविद्ययाविषयसंबंधिन्याकथमधिकब्रह्मावरणं । न्यूनाप्यंगुलिरविषयसंबंधित्वादधिकसूर्याच्छादिका । तस्मादनिर्वाच्याविद्यायादुर्निरूपत्वादहंकारादिकंनतत्कार्यं ॥ ७ ॥ अविद्याविषयभंगः ॥ ५५ ॥ यदप्युच्यते अहमर्थोनात्मा पश्चात्परामर्शान्यथानुपपत्त्यासुषुप्तौस्वतःप्रकाशमानस्यात्मनःसद्भावेप्यनेवंविधस्याहमर्थस्याभावात् "अथातोहंकारादेशः अथातआत्मादेश" इतिश्रुतौपृथगुपदेशाच्च "महाभूतान्यहंकार" इतिस्मृतावहंकारस्यक्षेत्रज्ञात्पार्थक्येनक्षेत्रत्वोक्तेश्च।

रिहरति ॥ पश्चादिति ॥ परामर्शः स्मरणं । हेतौविशेष्यभागंदर्शयति ॥ अनेवंविधस्येति ॥ अप्रकाशमानस्येत्यर्थः । अनुमानानुग्राहिकांश्रुतिंचाह ॥ अथातइति ॥ छांदोग्येभूमप्रकरणे "यत्रनान्यत्पश्यती" त्याद्युक्त्वा "सएवाधस्तादि" त्यादिनाभूमानंसर्वात्मकत्वेनोक्त्वा "अथातोहंकारादेशःअहमेवाधस्तादि" त्यादिनाअहंकारंचनिरूप्य "अथातआत्मादेशःआत्मैवा ॥ ३७० ॥

धस्तादि"त्यादिनाऽहंकारादात्मनःपार्थक्येनोपदेशाच्चाहमर्थोनात्मा अन्यथातदनुपपत्तेरित्यर्थः। क्षेत्रज्ञात् जीवात् "क्षेत्रज्ञआत्मापुरुष" इत्यभिधानात् । अहंकारस्यचिदचित्संवलनात्मकत्वमुपपादयति ॥ तस्मादिति ॥ तत्रचित्संवलनोपपादनायाह ॥ अहमिति ॥ आत्मानुबंधीति ॥ तथाचात्मानुबंध्यनुभवाश्रयत्वस्याहंकारेप्रतीयमानत्वादहमर्थेचिद्भागोऽस्तीत्यर्थः । अचित्संवलनोपपादनायाह ॥ अनात्मानुबंधीति ॥ अनात्मत्वनियतंयत्कर्तृत्वंतस्याप्यत्रप्रतीयमानत्वादचित्संवलनमस्तीत्यर्थः ॥ अध्यस्तइति ॥ अनुभवितृत्वाद्याश्रयस्यशुद्धचिद्रूपत्वकेवलाचिद्रूपत्वयोरभावात्उभयसंवलनात्मकस्यतुसत्यत्वायोगादध्यस्तइत्य

तस्मादहमनुभवामीत्यात्मानुबंध्यनुभवस्याहंकर्तेत्यनात्मानुबंधिकर्तृत्वादेश्चाश्रयोहंकारःचिदचित्संवलनात्मकत्वादध्यस्तः । यदिचसुषुप्तावहमर्थःप्रकाशेत तर्हिस्मर्येतह्यस्तनइवाहंकारः । अनुभूतेस्स्मरणनियमाभावेपिस्मर्यमाणात्ममात्रत्वादिति ॥

र्थः । उक्तहेतौविशेष्यासिद्धिंपरिहरति ॥ यदिचेति ॥ ह्यस्तनइवेति ॥ पूर्वदिनानुभूताहमर्थइवेत्यर्थः । यथापूर्वदिनेऽहमित्यनुभूतोऽहमर्थोऽद्यस्मर्यते तथासुषुप्तौअहमर्थोऽनुभूतश्चेत्सुप्तोत्थितेनस्मर्येतेत्याशयः । नन्वहमस्वाप्समितिस्मर्यतइतिचेत् तदंशेऽनुभवरूपतायावक्ष्यमाणत्वात् । अनुभूतेस्स्मरणनियमाभावात्सुषुप्तावहमर्थानुभवेपिइदानींस्मरणाभावोयुक्तइत्यतआह ॥ अनुभूतइति ॥ स्मर्यमाणेति ॥ स्मर्यमाणात्ममात्रत्वांगीकारात्स्मर्यमाणात्मानतिभिन्नत्वांगीकारात् तथाचस्मरणमावश्यक

SGDF

मेव नस्मर्यतेच अतोऽप्रकाशरूपविशेष्यस्यनासिद्धिरित्यर्थः । इतियदप्युच्यतइत्यन्वयः । आत्माहमर्थयोरभेदवादिनंप्रतिआत्मनःप्रकाशेसतिअहमर्थस्याप्रकाशइत्येतदसिद्धमित्यभिसंधायाह ॥ तत्रेति ॥ आत्मनःस्वप्रकाशत्वात्प्रकाशः अहमर्थस्यान्यप्रकाशत्वादप्रकाशइत्यर्थः ॥ अद्यापीति ॥ अहमर्थस्यप्रकाशमावात्मान्यत्वसिद्धौसुषुप्तावप्रकाशसिद्धिः तत्सिद्धौचतथाविधात्मभिन्नत्वसिद्धिरित्यन्योन्याश्रयइत्यर्थः ॥ नापीति ॥ आत्मनःपरामर्शात्सुषुप्तौप्रकाशः अहमर्थस्यापरामर्शात्सुषुप्तावप्रकाश

तत्रनतावत्स्वप्रकाशत्वास्वप्रकाशत्वाभ्यांसुषुप्तावात्माहमर्थयोःप्रकाशाप्रकाशौ । अहमर्थःस्वप्रकाशात्मान्यइत्यस्याद्याप्यसिद्ध्याऽन्योन्याश्रयात् । नापिपरामर्शापरामर्शाभ्यां । अहमस्वाप्सं नकिंचिदहमवेदिषमित्यहमर्थस्यैवपरामर्शात् ॥ अहमर्थेपरामर्शोनचेत्सकथमात्मनि । अहंज्ञानान्नान्यआत्मपरामर्शोहिदृश्यते । अस्वाप्समित्यत्रापिउत्तमपुरुषप्रयोगयोग्याहमर्थस्यैवस्फुरणात् ।

इत्यर्थः । आत्मपरामर्शएवासिद्धइत्याह ॥ अहमिति ॥ अवेदिषमित्यत्राहमर्थस्यैवोत्तमपुरुषविषयत्वादित्यर्थः ॥ परामर्शादिति ॥ तथाचनतस्यपरामृश्यमानात्मान्यत्वमित्यर्थः । नन्वयमात्मनएवपरामर्शोनत्वहमर्थस्येत्याशंक्यतत्रदूषणंकारिकयैवसंगृह्णाति ॥ अहमर्थइति ॥ आत्मविषयेसपरामर्शःकथमित्यर्थः । नन्वहंज्ञानादन्यत्वमेवात्मपरामर्शस्य अस्वाप्समित्यत्राहमर्थाप्रतीतेः येनतद्विषयत्वंस्यादित्यतआह ॥ अस्वाप्समित्यत्रापीति ॥ अभिज्ञाभिलपनयोःसमानार्थत्वाज्ज्ञानप्रसंगेप्रयोगोदा ॥ ३७१ ॥

हरणंनासंगतमितिज्ञेयं । अहमर्थस्यैवपरामर्शविषयत्वमित्येतद्विवरणकारस्यापिसंमतमित्याह ॥ उक्तंचेति ॥ प्रत्यभिज्ञानं स्मरणरूपपरामर्शः ॥ शास्त्रेति ॥ तथाचतस्यास्मिन्परामर्शेभानमयुक्तमित्यर्थः । एवमहमर्थस्यैवपरामर्शविषयत्वमुपपाद्यविपक्षेबाधकमप्याह ॥ यदिचेति ॥ इदमर्थःपरागर्थः तद्व्यावृत्तःप्रत्यग्रूपः प्रत्यक्त्वमेवाहमर्थत्वंनततोभिन्नं तथाचयदिपरागर्थव्यावृत्तःप्रत्यगर्थरूपोहमर्थोनपरामृश्यते तर्ह्येतावंतंकालंसुप्तोऽहंवाप्रत्यगर्थोवेत्यर्थः । अन्यःपरागर्थोवेतिसंदेहःस्यात् नत्वहमेवे

उक्तंचविवरणेपि । "अंतःकरणविशिष्टएवात्मनिप्रत्यभिज्ञानंब्रूमो ननिष्कलंके तस्यमोक्षावस्थायिनःशास्त्रैकसमधिगम्यत्वा" दिति । यदिचेदमर्थव्यावृत्तोहमर्थोनपरामृश्येत तर्ह्येतावंतंकालंसुप्तोहंवाऽन्योवेतिसंशयादिस्यात् । न त्वहमेवेतिनिश्चयः । ननुपरामृश्यमानात्मनएवप्रत्यक्त्वात्तथानिश्चयइतिचेत्

तिनिश्चयः अन्यत्वाख्येदमर्थरूपपरागर्थव्यावृत्तेःसुप्तावभानात् । पुरुषत्वव्यावृत्त्यप्रतीतिदशायांपुरोवृत्तिनितत्कोटिकसंशयदर्शनात् । नह्येवंभवतिसंशयःकस्यचित् अतःसुप्ताविदमर्थव्यावृत्तंप्रत्यक्त्वरूपमहमर्थत्वमेवप्रतीयतइत्यंगीकार्यं ततश्चतस्यैवपरामर्शविषयत्वसिद्धिरितिभावः । ननुअहमर्थोनपरामृश्यते किंत्वात्मैकःसएवचप्रत्यगर्थः तथाचपरामृश्यमानात्मनिप्रत्यक्त्वनिश्चयान्नतद्विरुद्धापराक्त्वरूपान्यत्वकोटिकसंशयइतिशंकते ॥ नन्विति ॥ अहमर्थत्वमेवप्रत्यक्त्वं तथाचप्रत्यक्त्वनिश्चयए

SGDF Sri Gurudeva Digital Foundation

वाहंत्वनिश्चयइतिवक्तुंप्रत्यक्त्वंविकल्प्यदूषयति ॥ प्रत्यक्त्वमिति ॥ चिन्निर्भास्येति ॥ चिज्ज्ञानंतेननिर्भास्यंदृश्यपराग्भूतं जडंतत्प्रतिद्वंद्वितत्प्रतिकूलंयत्चित्त्वंतदेवप्रत्यक्त्वमित्यर्थः । अन्यत्वंपराक्त्वंतद्विरुद्धंयत्स्वत्वंतदेवप्रत्यक्त्वमित्यर्थः । आद्यआ ह ॥ चिदिति ॥ अहमर्थभिन्नपरागर्थविरोधिचित्त्वरूपप्रत्यगर्थपरामर्शांगीकारेचिदस्वपीदितिपरामर्शःस्यादित्यर्थः । द्वितीय आह ॥ स्वयमिति ॥ अहमर्थभिन्नपरागर्थभूतान्यत्वविरोधिस्वत्वरूपप्रत्यगर्थपरामर्शांगीकारेस्वयमस्वपीदितिपरामर्शःस्यादि

प्रत्यक्त्वंनतावत्चिन्निर्भास्यप्रतिद्वंद्विचित्त्वं अन्यत्वप्रतिद्वंद्विस्वत्वंवा चिदस्वपीदितिवा स्वयमस्वपीदितिवा परामर्शापातेनाहमितिपरामर्शा योगात् । घटादिःस्वस्माद्भिन्नोनेत्यादिप्रतीत्यात्मनीवघटादावपिस्वत्वस्य सत्त्वाच्च । नापियुष्मदर्थरूपपराग्व्यावृत्तत्वं अहमर्थस्यैवतद्व्यावृत्तेः ।

त्यर्थः । किंचस्वत्वरूपप्रत्यक्त्वस्यघटादावतिव्याप्तिश्चस्यात् नचतत्रस्वत्वाभावइतिवाच्यं । घटादिःस्वस्माद्भिन्नोनेत्यादिप्रती त्यास्वत्वस्यप्रतीयमानत्वात् अन्यथास्वस्मादित्यप्रयोगात् अतोघटादिरपिप्रत्यगर्थःस्यादित्याह ॥ घटादिरिति ॥ युष्मदर्थे ति ॥ पराग्व्यावृत्तत्वमेवप्रत्यक्त्वंपराक्त्वनिर्वचनाययुष्मदर्थेत्युक्तं । नेदमहमर्थव्यावृत्तमित्याह ॥ अहमर्थस्यैवेति ॥ तदि ति ॥ युष्मदर्थरूपपराग्विरुद्धत्वादित्यर्थः । किंचयुष्मदर्थभूतपराग्व्यावृत्तत्वरूपप्रत्यक्त्वस्यात्मन्यसंभवः अनावृतात्मचैतन्य

SGDF Sri Gargeshwari Digital Foundation

स्यव्याप्तत्वेनयुष्मदर्थत्वरूपपराक्त्वस्यैवसत्त्वेनतद्व्यावृत्तेरभावादित्याशयेनाह ॥ नहीति ॥ आत्मनोयुष्मदर्थत्वंविवरणेप्यु क्तमस्तीत्याह ॥ विवरणइति ॥ सर्वात्मकत्वात् अपरिच्छिन्नत्वात् । तर्हियुष्मदर्थव्यावृत्त्यवभासःकथमित्यतउक्तं ॥ अह मुपरागादिति ॥ देहांतरवस्थितत्वेनायुष्मदर्थाहंकाराभेदारोपादेवेत्यर्थः ॥ घट्टकुटीति ॥ केचिद्वणिजःशुल्कमदित्संतःशुल्क ग्रहणस्थलंवंचयित्वाऽन्येनपथाजिगमिषंतोविस्मृतमार्गाःयत्रघट्टेशुल्कग्राहिणीकुटीस्थिता तत्रैवप्रभातेसमागताः सोयंघट्टकुटीप्र भातवृत्तांतः । तथाचप्रकृतेऽहमर्थस्यपरामर्शविषयत्वंसिद्धमित्यवधेयं । तथाचसुषुप्तावप्रकाशमानत्वमसिद्धमितिभावः । ननु

नहित्वन्मतेआत्मनःपराग्व्यावृत्तिः । विवरणे "आत्मनःसर्वात्मकत्वान्नपराग्व्यावृत्तिरहमुपरा गादेवव्यावृत्त्यवभास" इत्युक्तेः । तस्मादहमर्थत्वमेवप्रत्यक्त्वंवाच्यमितिघट्टकुटीप्रभातवृत्तां तः । ननुनाहमंशेपरामर्शःकिंतुपरामृश्यमानआत्मा इदानींजातेनांतःकरणेनावच्छेदादहंत्वं प्राप्तस्तथानुभूयतइतिचेन्न । नकिंचिदहमवेदिषमित्यादावज्ञानाद्यंशेप्यपरामर्शत्वापातात् ।

नाहमर्थस्यपरामर्शविषयत्वं किंत्वाऽऽत्मनएवेत्याशंकते ॥ नन्विति ॥ नाहमंशइति ॥ आत्मांशेपरामर्शः अहमर्थेत्वनुभव इत्यर्थः । नन्वहमस्वाप्समित्यहंत्वाश्रयएवपरामृश्यते नात्मा तस्याहंत्वानाश्रयत्वादित्यतआह ॥ इदानीमिति ॥ जाग्रद्दशा यामित्यर्थः । सुप्तावहंकाराभावेनेदानींतस्योत्पन्नत्वादित्यवधेयं । अवच्छेदात् संबंधात् । तथा अहंत्वेन अनुभूयते ज्ञायते । तथाचनृसिंहाकारमिदंज्ञानमितिभावः ॥ नकिंचिदिति ॥ अविद्यायाःसुप्तौसद्भावात्तदंशेपरामर्शरूपत्वंतवापिसंमतंतन्नस्यादि

SGDF
Sri Gargeshwari Digital Foundation

तिभावः । कुतइत्यतआह ॥ नहीति ॥ अन्येति ॥ अहमर्थान्येत्यर्थः ॥ परामृश्यतइति ॥ येनसुप्तावपितथानुभवःसि ध्येदितिभावः ॥ अहमर्थेति ॥ तथाचनकिंचिदवेदिषमित्यहमर्थाश्रितत्वेनैवाज्ञानस्यपरामृश्यमानत्वात्सुप्तावपितथैवानुभवो वाच्यः सतुनसंभवति तदात्वयाऽहमर्थानंगीकारात् तथाचाहमर्थांशइवाज्ञानांशेप्यनुभवापत्त्यासुप्तावविद्यानसिध्येदितिसुप्ता वपिपरामर्शानुसारेणाहमर्थाश्रितत्वेनैवानुभवेवाच्येतदाप्यहमर्थसिद्ध्याऽस्मदिष्टसिद्धिरितिभावः । नाहमंशेपरामर्शइत्येतदसदि त्याह ॥ एतावंतमिति ॥ यथास्वप्नावस्थायामहमर्थसद्भावात्स्वप्नादुत्थितस्यस्वप्नंपश्यन्नहमासमित्यहमर्थविषयःपरामर्शोभव

नह्यज्ञानादिकंनिराश्रयमन्याश्रयंवापरामृश्यते किंत्वहमर्थाश्रयमेव ।
एतावंतंकालमहंस्वप्नंपश्यन्नासंजाग्रदासमित्यत्रैवाहमस्वाप्समित्यत्राप्यह
मंशेपरामर्शत्वानुभवाच्च । अन्यथायःपूर्वंदुःखीसोधुनासुखीजातइतिवत्

ति तस्मिंश्चपरामर्शेस्वप्नंपश्यन्नासमितिपरामर्शवानस्मीत्यनुव्यवसायेनाहमर्थविषयकपरामर्शत्वमनुभूयते यथावाजाग्रदवस्था यांअहमर्थसद्भावाज्जाग्रदहमासमितिजाग्रदनुभूताहमर्थविषयकःपरामर्शःजाग्रदंतरकालेभवति तस्मिंश्चपरामर्शेजाग्रदहमासमि तिपरामर्शवानस्मीत्यनुव्यवसायेनाहमर्थविषयकज्ञानेपरामर्शत्वमनुभूयते तथाऽहमस्वाप्समितिपरामर्शवानस्मीत्यनुव्यवसाये नाहमर्थविषयकज्ञानेपरामर्शत्वमनुभूयतेऽतोनाहमंशेपरामर्शइत्युक्तमसदितिभावः ॥ अन्यथेति ॥ अहमंशेपरामर्शत्वमनंगी

कृत्यानुभवत्वांगीकारइत्यर्थः ॥ मदन्यइति ॥ मदित्यहमर्थउच्यते अहमर्थान्यइत्यर्थः । अहमर्थेपरामर्शत्वानुभवादित्युक्तम सदित्याशंकते ॥ नन्विति ॥ परामृश्यमानोयआत्मातदैक्यारोपात्तज्ज्ञानेऽनुभवरूपेपरामर्शत्वस्यस्मृतित्वस्यअभिमानआरो पइत्यर्थः ॥ अपरामर्शइति ॥ अनुभवइत्यर्थः । परामर्शत्वेति स्मृतित्वेत्यर्थः । पुरोवृत्तिन्यारोपोयुक्तः अनुभवेस्मृतित्वारोप स्यकुत्राप्यदर्शनात् तथात्वेऽनुव्यवसायस्यप्रमात्वनियमभंगापातादित्याशयः ॥ सिद्धइति ॥ अहमर्थस्यपरामृश्यमानात्मत्वेतु

यःपूर्वंमदन्यःसुप्तःसोऽधुनाऽहंजातइतिधीःस्यात् । नन्वहंकारेपरामृश्यमानात्मैक्यारो
पात्तज्ज्ञानेपरामर्शत्वाभिमानइतिचेन्न । अपरामर्शेपरामर्शत्वारोपादर्शनात् । सिद्धेऽ
हमर्थस्यात्मान्यत्वेपरामृश्यमानात्मैक्यारोपः सिद्धेचतस्मिन्सुषुप्तावप्रकाशेनाहमर्थ
स्यात्मान्यत्वमितीतरेतराश्रयाच्च । अहमित्यतोऽन्यआत्मपरामर्शोनेत्युक्तत्वेनदृष्टहा
नादृष्टकल्पनापाताच्च । एतेनसुषुप्तावहमर्थप्रकाशेस्मर्यैतद्व्यस्तनइवाहंकार इतिनिरस्तं ।

वास्तवैक्यस्यैवप्राह्यानतयोरैक्यारोपःसंभवतीतिभावः ॥ सिद्धेचेति ॥ परामृश्यमानात्मैक्यारोपेसिद्धेतन्निबंधनाहमर्थानु भवेपिपरामर्शत्वाभिमानइतितस्यापरामृश्यमानत्वसिद्धौचसुषुप्तावप्रकाशमानत्वेनप्रकाशमानात्मान्यत्वसिद्धिरित्यर्थः । अहंज्ञा नस्यैवात्मपरामर्शरूपत्वानंगीकारेदृष्टहानादिकमित्याह ॥ अहमितीति ॥ दृष्टशब्दोऽनुभवसिद्धत्वपरः । अहमर्थस्यैवात्मत्वे नाऽहमर्थज्ञानस्यैवात्मपरामर्शत्वस्यानुभवसिद्धस्यहानंअहमित्यतोऽन्यआत्मपरामर्शइत्यनुभवासिद्धस्यकल्पनमित्यर्थः । अहं

SGDF Digital Foundation

कारःस्मर्येतेत्यत्र अहंशब्दोल्लेखिपरामर्शःस्यादित्यापाद्यते उताहमर्थविशेष्यकाहंत्वप्रकारकपरामर्शःस्यादिति । नाद्यइत्याह ॥ अहंशब्देति ॥ तदुल्लेखीति ॥ अहंशब्दोल्लेखिनामसविकल्पकंनास्तीत्यर्थः ॥ तदभावेति ॥ स्मृतेःसमानविषयकानुभव जन्यत्वादितिभावः । नन्वेतावतासुप्तावहमर्थप्रकाशोंगीकृतः तर्हिह्यस्तनेपिजाग्रदवस्थायामहमर्थानुभवसद्भावात्ह्यस्तनसुषुप्ति वैषम्यंनस्यादित्यतआह ॥ तावन्मात्रेणेति ॥ ह्यस्तनेऽहंशब्दोल्लेखिनामसविकल्पकमस्तिसुषुप्तौतन्नास्तीत्येतावन्मात्रेणैववैष

अहंशब्दोल्लेखिपरामर्शापादनेसुषुप्तौतदुल्लेख्यनुभवाभावादेवतदभावोपपत्तेः । तावन्मात्रेणचह्यस्तनवैषम्यात् । अहमर्थविशेष्यकस्याहंत्वप्रकारकस्यवापराम र्शस्यापादनेइष्टापत्तेः । स्मर्यतेहिएतावंतंकालंसुखमहमस्वाप्समितिसुषुप्तिका लीनसुखावच्छिन्नोऽहमर्थः । अन्यथास्मर्येतह्यस्तनइवात्मेतिचोद्यंनिरुत्तरंस्यात् ।

म्यमित्यर्थः । द्वितीयेत्विष्टापत्तिरित्याह ॥ अहमर्थेति ॥ इष्टापत्तिमेवोपपादयति ॥ स्मर्यतेहीति ॥ अहमर्थः अहंत्वप्रकार कइतिशेषः । ह्यस्तनवैषम्यमात्रेणाहमर्थेपरामर्शत्वाभावेआत्मांशेपिपरामर्शत्वंनस्यात् । यदिसुषुप्तावात्माप्रकाशेत तर्हिस्मर्येतह्य स्तनइवात्मेतिचोद्यमस्मदुक्तोत्तरान्योत्तरशून्यंस्यादित्याह ॥ अन्यथेति ॥ ह्यस्तनआत्मेवेतिसंबंधः । तत्रात्मशब्दोल्लेखिपराम र्शापादनेसुषुप्तौतदुल्लेख्यनुभवाभावादेवतदभावोपपत्तेः । आत्मविशेष्यकपरामर्शापादनेअस्वाप्समितितत्परामर्शसद्भावेनेष्टाप

SGDF Sri Gargeshwari Digital Foundation

त्तिरित्येवोत्तरंवाच्यं तदस्माकमपिसमानमित्यर्थः ॥ ननुतथापीति ॥ यदिसुषुप्तौअहमर्थःप्रकाशेत तर्हिएतावंतंकालमहमि
त्यभिमन्यमानआसमितिपरामर्शःस्यादित्यापाद्यतइत्याशंकते ॥ नन्विति ॥ अहमर्थेति ॥ अहमर्थप्रकाशेंगीक्रियमाणेतद
भिमानपरामर्शापादनस्यव्यधिकरणत्वात् नह्यस्माभिःसुषुप्तावहमर्थाभिमानप्रकाशउक्तइतिभावः ॥ अन्यथेति ॥ अहमर्थप्र
काशेनतदभिमानपरामर्शापादनेआत्मप्रकाशमात्रेणात्मेत्यभिमन्यमानआसमित्यभिमानपरामर्शःस्यादित्यापादयितुंशक्यत्वात्
तत्रव्यधिकरणत्वान्नैवमापादनंयुक्तमित्युत्तरमितिवाच्यं तन्ममापितुल्यमितिभावः।ननुसुषुप्तावहमर्थप्रकाशेनकिंचिदहमवेदिषमि

ननुतथाप्येतावंतंकालमहमित्यभिमन्यमानआसमितिपरामर्शःस्यादितिचेत् कर्णेस्पृष्टःकटिं
चालयसि। अहमर्थप्रकाशेनतदभिमानपरामर्शापादनस्यव्यधिकरणत्वात्। अन्यथातवाप्या
त्मेत्यभिमन्यमानआसमितिपरामर्शःस्यात् । तस्मात्सुषुप्तावहमर्थःप्रकाशतएव । नकिं
चिद्वेदिषमित्यज्ञानपरामर्शस्यत्वात्माद्यज्ञानादन्यदिवाहमर्थाज्ञानादन्यज्ञदेवाज्ञानंविषयः।

तिअर्थावच्छिन्नाज्ञानपरामर्शस्तावदनुभूयते सनस्यात् प्रकाशमानेऽहमर्थेऽज्ञानविरोधादितिचेत् तर्ह्यात्मनोपिसुषुप्तौप्रकाशेनकिं
चिदहमवेदिषमितिपरामर्शोनस्यात्। तस्याप्यज्ञानावच्छेदकत्वप्राप्त्याप्रकाशमानेआत्मनिअज्ञानायोगात्। आत्मान्यविषयकमे
वाज्ञानमितिचेत् तर्ह्यत्राप्यहमर्थान्यविषयकमेवाज्ञानमस्तु तथाचाहमर्थविषयकाज्ञानादन्यदेवघटादिप्रपंचविषयकमेवाज्ञानसु
षुप्तावनुभूतंसत्स्मर्यतेइत्याह ॥ नकिंचिदिति ॥ ननुआत्माज्ञानादन्यदिवेतिदृष्टांतअयुक्तः प्रकाशमानएवात्मन्यज्ञानांगीका

SGDF
Sri Gargeshwari Digital Foundation

रात् साक्षिणोऽज्ञानाविरोधित्वादित्यतआह ॥ अन्यथेति ॥ प्रकाशमानेऽज्ञानस्यविरुद्धत्वादित्यर्थः । साक्षिणोप्यज्ञानविरो
धितत्वमुपपादितमितिभावः ॥ अयमिति ॥ अयंपुमान्सुप्तोऽहमस्मीतिस्वात्मानंनविजानातीतिश्रुत्यासुप्तावहमर्थाज्ञानाभि
धानादित्यर्थः । नात्मानमितिश्रुतेःसुषुप्तावात्मज्ञानमपिनस्यादित्युक्ते तत्रत्वयावाच्यं एषाश्रुतिरात्मनिष्ठविशेषाज्ञानपरेति तदे
तदत्रापिसमं । अहमर्थनिष्ठविशेषाज्ञानपरानविजानातीतिश्रुतिरित्यपिसुवचत्वादित्यर्थः । अंतःकरणावच्छिन्नस्यस्मर्तृत्वानुरोधे

अन्यथाविरोधात् । यातुनविजानात्ययमहमस्मीतिसुषुप्तिविषयाश्रुतिः सापिनात्मानं
नपरांश्चेतिसुषुप्तावात्माज्ञानश्रुतिवद्विशेषाज्ञानपरा । किंच सौषुप्तिकाज्ञानादिस्मर्तृत्वं
किमनहमर्थस्याविद्यावच्छिन्नचैतन्यस्यांतःकरणावच्छिन्नस्याहमर्थस्यवा । नाद्यः । योह
मकार्षंसोहंसौषुप्तिकाज्ञानादिस्मरामीत्यबाधितानुभवात् । अंत्येत्वहमर्थस्यैवतदनु
भवितृत्वंवाच्यं । स्मृतिसंस्कारानुभवानामेकाधिकरणानामेवकार्यकारणभावात्

नतस्यैवतदनुभवितृत्वात्स्मर्तृत्वानुभवितृत्वयोरैकाधिकरण्यनियमादित्यर्थापत्त्याऽहमर्थसिद्धिरित्याह ॥ किंचेति ॥ अनहम
र्थस्य अहमर्थभिन्नस्य ॥ अविद्येति ॥ साक्षिचैतन्यस्येत्यर्थः । कुतोनाद्यइतिचेत् अहमर्थस्यैवस्मर्तृतायाःप्रत्यक्षसिद्धत्वादित्या
ह ॥ योहमिति ॥ नन्वंतःकरणावच्छिन्नस्याहमर्थस्यस्मर्तृत्वेऽनुभवितृत्वमपितस्यैवकुतइतिचेत्तत्राह ॥ स्मृतीति ॥ स्मर्तृत्वा ॥ ३७५ ॥

नुभवितृत्वयोरहमर्थनिष्ठत्वंप्रत्यभिज्ञाप्रत्यक्षसिद्धंचेत्याह ॥ योहमन्वभूवमिति ॥ ननुनप्रत्यभिज्ञाविरोधः अनुभवितृचैतन्य
स्यसर्वदासर्वगतत्वात् तथाचयोहमित्यनुभवितुश्चैतन्यस्यैवस्मर्तृत्वमंगीकृतं तस्यपूर्वदिनानुभवितृतयाद्वितीयदिनेस्मर्तृतयाचै
त्रादिदेहस्थितत्वात् तथाविद्यारूपोपाधेःचैतन्यसंबंध्यजीवत्वसंपादकस्यैकत्वेनतदवच्छिन्नोजीवश्चैकएव तथाचतस्यैवानुभवितृ
त्वंस्मर्तृत्वंचेतितयोरैकाधिकरण्यप्राह्यानप्रत्यभिज्ञाविरोधइत्याशंक्यनिराकरोति ॥ यद्यपीति ॥ तयो श्चैतन्यजीवयोः । अवि

योहमन्वभूवंसोहंस्मरामीतिप्रत्यभिज्ञानाच्चेति सुषुप्तावप्यहमर्थसिद्धिः । यद्यपिचैत्र
मैत्रादिसाधारणंचैतन्यमेकं जीवत्वोपाध्यविद्यैक्यात् जीवश्चैकः तथापितयोरस्मर्तृत्वा
त् । स्मर्तुश्चाहमर्थस्याविद्यावच्छिन्नानुभवितृचैतन्यादन्यत्वेननानुभवितृस्मर्त्रोरैक्यं ।

द्यावच्छिन्नादनुभवितृजीवादननुभवितृचैतन्यमात्राच्चेत्यर्थः । तथाचप्रत्यभिज्ञाविरोधस्तदवस्थएवेतिभावः । ननुपुनरनुभवितृ
स्मर्त्रोरैक्यमेव तथाहिअविद्याशुद्धचैतन्यंअवच्छिद्यजीवत्वंसंपादयति सएवानुभविता अंतःकरणंचाविद्यावच्छिन्नंजीवंसंबंध्यस्म
र्तृत्वंसंपादयति यथाहिमहाकाशसंबंधीमठोपाधिर्मठावच्छिन्नाकाशंकरोति मठांतर्गतोघटोपाधिर्मठाकाशसंबंधीसन् घटाकाशंक
रोति तथाचानुभवितुरविद्यावच्छिन्नजीवस्यैवांतःकरणावच्छिन्नाहमर्थत्वेनस्मर्तृत्वात्तयोरैकाधिकरण्येननप्रत्यभिज्ञाविरोधइत्या

SGDF
Sri Gangadharan Digital Foundation

शंक्यनिराकरोति ॥ यद्यपीति ॥ अविद्यावच्छिन्नचैतन्यंजीवमित्यर्थः। तर्हिंसुतरांअनुभवितृस्मर्त्रोर्भेदसिद्धिः अविद्यांतःकरणोपाधिभेदात् ताभ्यामुपधेययोःशुद्धचैतन्याविद्यावच्छिन्नयोश्च भेदात् यथाहिमठावच्छिन्नाकाशतदंतस्थघटावच्छिन्नाकाशयोर्भेदः उपाध्योर्मठघटयोर्भेदात् तदुपाधेययोः शुद्धमहाकाशमठाकाशयोर्भेदात् एवमिहाप्यनुभवितुरविद्यावच्छिन्नचैतन्यात्स्मर्तुरंतःकरणावच्छिन्नस्यभिन्नत्वेनप्रत्यभिज्ञाविरोधस्तरितुमशक्यइत्याह॥ तथापीति ॥ प्रवृत्त्ययोगइति ॥ प्रत्युताहमर्थस्यसुषुप्तौनाशा

यद्यप्यविद्याचैतन्यंप्रत्यवच्छेदिका।अंतःकरणंतुअविद्यावच्छिन्नचैतन्यंप्रत्येवावच्छेदकं नतुस्वातंत्र्येण। तथाप्यविद्यांतःकरणरूपोपाधिभेदेशुद्धचैतन्याविद्यावच्छिन्नचैतन्यरूपोपाधेयभेदेचसति मठाकाशतत्स्थघटाकाशयोरिवसुतरामुपहितभेदेनप्रत्यभिज्ञानविरोधोदुस्तरः। किंच सुषुप्तावहमर्थाभावेऽहंनिर्दुःखःस्यामितीच्छयासुषुप्तौप्रवृत्त्ययोगः। योऽहंसुषुप्तःसोहंजागर्मीतिप्रत्यभिज्ञाबाधश्च । योहंपूर्वेद्युरकार्षंसोहमद्यकरोमीतिप्रत्यभिज्ञानानुपपत्तिश्च। अहंकारव्यक्तिभेदात् कृतहानाकृताभ्यागमप्रसंगश्च।

दितिभावः ॥ योहमिति ॥ त्वन्मतेऽहमर्थस्यासुप्तत्वादितिभावः ॥ प्रत्यभिज्ञेति ॥ सुप्तिजागरयोरहमर्थैक्यावगाहिप्रत्यभिज्ञेत्यर्थः ॥ प्रत्यभिज्ञानेति ॥ त्वन्मतेऽहमर्थस्यैवकर्तृत्वात्कर्तृत्वाधिकरणयोःपूर्वतनाद्यतनयोरहमर्थयोरैक्यावगाहिप्रत्यभिज्ञेत्यर्थः। कथंतदनुपपत्तिरित्यतआह ॥ अहंकारेति ॥ पूर्वतनाहमर्थनाशेनपुनरद्यतनाहमर्थोत्पत्त्यंगीकारेणपूर्वतनाद्यतनाहं

SGDF Sri Gargeshwari Digital Foundation

कारव्यक्त्योर्भेदादित्यर्थः ॥ कर्तुरिति ॥ कर्तृत्वभोक्तृत्वयोरुभयोरपित्वन्मतेऽहमर्थनिष्ठत्वेनपूर्वतनकर्तुरिदानींतत्फलभोक्तुश्चा हमर्थस्यभिन्नत्वात्पूर्वतनाहमर्थस्यकृतहानिः अद्यतनाहमर्थस्यकर्माभावेपिभोगप्रसंगइत्यर्थः । ननुकर्तृभोक्त्रोश्चैतन्यानुगमेनाभे दोपपत्तेर्नकृतहानादीत्यतआह ॥ अभिन्नइति ॥ ननुचैतन्येवास्तवकर्तृत्वाद्यभावेपिआरोपितंकर्तृत्वमस्तीतितादृशकर्तृत्वोपेत चैतन्यानुगमेनाभेदसद्भावान्नकृतहानादीत्यतआह ॥ कर्तृत्वादिति ॥ स्थूलःकरोतीतिप्रतीतेरित्यर्थः । तथाचारोपितकर्तृत्व

कर्तुर्भोक्तुश्चाहमर्थस्यभिन्नत्वात् । अभिन्नेचैतन्येकर्तृत्वाद्यभावात् । कर्तृत्वाद्या रोपस्यचदेहादावपिसत्त्वात् । अहंकरोमीत्येवप्रतीत्याहमर्थान्यात्मनिकर्तृत्वारो पस्याप्यभावाच्च । किंच अहंकारएवक्रियाशक्त्याप्राणःविज्ञानशक्त्यामनइतिगी यतइतित्वन्मतं । तथाचसुषुप्तावहंकारविलयेप्राणकार्यश्वासादिनस्यात् ।

स्यातिप्रसंगेनाप्रयोजकत्वेननतेनव्यावहारिककर्तृभोक्तृभेदप्रमानिर्वाहः । गुंजापुंजेवह्नित्वारोपेणारोपितदाहकर्तृत्वसद्भावात्तेनापि वास्तवस्फोटादिरूपकार्यापत्तिरितिभावः ॥ अहमिति ॥ अहमर्थान्यस्मिन्चैतन्येकर्तृत्वारोपोनयुक्तः तथाहिचैतन्यंकर्तीति कदाप्यारोपादर्शनात् अहंकरोमीत्येवतदारोपोवाच्यः आरोपश्चप्रधानपूर्वकइतिमुख्यकर्तृत्वप्रत्ययोन्यत्रवक्तव्यः सचैतदन्यो नास्तीतिअयमेवमुख्यप्रत्ययइतिनतदारोपइतिभावः । अहंकारविलये क्रियाशक्तेरपिनाशेनप्राणस्यापिप्रविलयापत्त्येतिशेषः

SGDF
Sri Gargeshwari Digital Foundation

॥ नन्विति ॥ प्राणस्याहंकाराद्भेदइत्येकंमतं अभेदइत्यपरंमतमितिमतद्वयसत्वादेवमुक्तिः ॥ तल्लयोयुक्तइति ॥ तथाचतल्ल येपिप्राणकार्यश्वासाद्युपपत्तिरितिभावः । प्राणस्याहंकारभेदपक्षेआह ॥ प्राणस्येति ॥ प्राणेति ॥ चेष्टनेत्यर्थः । अहमर्थेचे ष्टाभावेनक्रियाकर्तृत्वाभावादितिभावः । अभेदपक्षेत्वाह ॥ अहमर्थत्वेति ॥ प्राणस्येतिवर्तते । स्वान्यथानुपपत्त्यासुषुप्तौप्राण स्यसत्वात्तदभिन्नाहमर्थस्यापिसत्वापत्त्यातदुल्लेखःस्यादित्यर्थः । स्वरूपतःसत्वेपितदुल्लेखःकिमर्थः नहियावदस्तितावतोल्लेखितव्य

ननुप्राणस्याहंकारात्भेदपक्षेअहंकारस्यलयोयुक्तः । अभेदपक्षेपिप्राणांशंविहायाविशिष्टांश स्यैवलयःकल्प्यतइतिचेत् । न । प्राणस्याहमर्थत्वाभावेकर्तृत्वस्यप्राणोपाधिकत्वेनाहंकर्तेतिबुद्ध्य योगात् । अहमर्थत्वेसुषुप्तावहमुल्लेखापातात् । किंच नसुषुप्तावंतःकरणस्यलयः "अथहैतत्पुरुषः स्वपिती"त्यारभ्य "गृहीतंचक्षुर्गृहीतंश्रोत्रंगृहीतंमन"इत्यादिश्रुतौवनआदीनामुपरमस्यैवोक्तेः ।

मित्यस्तिनियमइत्यस्वरसादाह ॥ किंचेति ॥ नसुषुप्ताविति ॥ नस्वरूपेणनाशः किंतूपरमएवेत्यर्थः । गृहीतं स्वव्यापारादु परतं ॥ उपरमस्यैवेति ॥ तथाचमनोगृहीतमितिसतोंतःकरणस्योपरमएवोक्तोनतुलयइत्यर्थः "अथातोऽहंकारादेशः अथात आत्मादेश" इति श्रुतौपृथगुक्तत्वाच्चाहंकारात्मनोर्भेदइत्युक्तमयुक्तं तथात्वेआत्मनोपिभूम्नोभेदेनोपदेशान्यथानुपपत्त्याआत्मा
पिभूम्नोभिन्नःस्यात् तस्माद्भेदोपदेशेपियथाभूमात्मनोरैक्यमेवांगीकृतं द्वयोःश्रुत्युक्तसार्वात्म्यानुपपत्तेः एवमात्माहंकारयोर्भेदोप

देशेसत्यपिऐक्यमेवास्तु तथाचभेदोपदेशोऽप्रयोजकइत्याह ॥ अथातइति ॥ ननुनोपदेशानुपपत्तिः ऐक्यार्थत्वेनान्यथासिद्ध त्वादितिशंकते ॥ नन्विति ॥ भूमात्मनोः परमात्मजीवात्मनोः ॥ प्रत्यक्षसिद्धयोरिति ॥ अन्योन्याभावप्रत्यक्षेऽधिकरण प्रत्यक्षस्यतंत्रत्वादत्रचजीवस्यप्रत्यक्षसिद्धत्वात्तद्भेदोपिप्रत्यक्षसिद्धएवेतिभावः ॥ पृथगिति ॥ "अप्राप्तेशास्त्रमर्थवदि" ति न्यायेनप्रत्यक्षसिद्धभेदोपदेशस्यव्यर्थत्वात्व्यर्थंसत्किंचिदिष्टंज्ञापयतीतिन्यायेनऐक्यार्थइत्यर्थः । ननुभेदोपदेशस्यव्यर्थस्यापि

"अथातआत्मादेश"इतिश्रुतौचात्मनस्त्वन्मते"सएवाधस्तादि"त्युपदिष्टेनभूम्नेवाहंकारे णाप्यैक्येपिपृथगुपदेशोयुक्तः । ननुभूमात्मनोर्भिन्नत्वेनप्रत्यक्षसिद्धयोःपृथगुपदेशऐक्या र्थः । द्वयोःसार्वात्म्यायोगात् । अहंकारस्यत्वात्मैकत्वेनप्रत्यक्षसिद्धस्यपृथगुपदेशोभेदार्थइ तिचेन्न।अहमर्थादन्यस्यात्मनःभूमाख्यब्रह्मभिन्नत्वेनप्रत्यक्षासिद्धत्वात्तयोरुपदेशोभेदार्थः ।

कथंभूमात्मनोरभेदज्ञापकमित्यतआह ॥ द्वयोरिति ॥ द्वयोः "सएवेदंसर्व" मित्याद्युक्तसार्वात्म्यस्यचश्रुतावुच्यमानत्वादि तिभावः ॥ पृथगिति ॥ पूर्वन्यायेनेतिभावः । अहंकारेसार्वात्म्योपदेशस्तुतदारोपाधिष्ठानात्मसंबंधेनोपचरितइतिज्ञातव्यं । आत्मनोजीवस्याहमित्यनुभवव्यतिरेकेणात्मनिप्रत्यक्षाप्रवृत्तेरित्यर्थः । उपदेशः पृथगुपदेशः ॥ भेदार्थइति ॥ तथाचभूमात्म नोर्भेदप्रतिपादकत्वोपपत्त्यात्वदिष्टव्याघातइतिभावः ॥ ब्रह्मेति ॥ भूमशब्दोक्तेत्यर्थः ॥ तयोरिति ॥ अहंकारभूम्नोःपृथगुप

SGDF

देशइत्यर्थः ॥ ऐक्यार्थइति ॥ उक्तन्यायादित्यर्थः । तथाचभूमाहंकारयोरप्यैक्यप्रतिपादकत्वोपपत्त्यातवात्यंतानिष्टप्राप्तिरिति भावः ॥ भूमेत्यादि ॥ अविद्याशब्देनमायापिग्राह्या । तथाचभूम्नोबिंबस्थानीयमायोपाधिकब्रह्मत्वात् अहंकारस्यप्रतिबिंबस्थानीयाविद्योपाधिकजीवत्वात्आत्मनश्चमुखमात्रस्थानीयब्रह्मजीवानुस्यूतचिन्मात्रत्वेन तत्प्रतिपादकत्वांगीकारेणत्वदभिप्रेतचिदचित्संवलनात्मकाहंकारप्रतिपादनप्रसक्तेरेवाभावेनतच्छ्रुतिबलादहमर्थस्यजीवात्मैक्यासिद्धिरित्यर्थः । द्वयोःसर्वात्म्यानुपपत्तेःपृ

अहमर्थस्यतुब्रह्माभिन्नत्वेनप्रत्यक्षसिद्धत्वात्तयोरुपदेशऐक्यार्थइतिवैपरीत्यापत्तेः । त्वत्पक्षेश्रुत्युक्तानांभूमाहंकारात्मनांबिंबप्रतिबिंबमुखस्थानीयाविद्योपाधिकब्रह्मजीवचिन्मात्रत्वसंभवे नाहंकारस्यजीवात्पार्थक्यासिद्धेश्च । "सएवेदंसर्वं" "आत्मैवेदंसर्व"मित्युपसंहाराणां"सएवाधस्तादहमेवाधस्तादात्मैवाधस्ता" दित्युपक्रमैः "सर्वंसमाप्नोषिततोऽसिसर्वं" इत्यादिस्मृतिभिश्चसर्वगतत्वपरत्वेनसार्वात्म्योपदेशाभावाच्च । सर्वगतत्वस्यचानेकेषुसंभवात् ।

थगुपदेशऐक्यार्थइत्युक्तंदूषयति ॥ सएवेति ॥ उपसंहाराणां भूमाहंकारात्मप्रकरणेषुश्रुतानामित्यर्थः॥ उपक्रमैरिति ॥ भूमप्रभृतीनामाधाराधेयभावेनसर्वगतत्वप्रतिपादकोपक्रमैःसर्वगतत्वपरत्वेनव्याख्येयत्वादित्यर्थः । उपक्रमस्यासंजातविरोधित्वेनप्रबलत्वात्तदनुरोधेनोपसंहाराणांनेयत्वादितिभावः । ननुभवत्पक्षेपिकथमनेकेषांसर्वगतत्वमित्यतआह ॥ सर्वगतत्वस्यचेति ॥

SGDF Sri Gargeshwari Digital Foundation

तार्किकादिमतेगगनादीनामनेकेषामपिसर्वगतत्वांगीकारादितिभावः ॥ भूमेति ॥ जीवब्रह्मणोरभेदप्रतिपादनायास्यप्रकरणस्य त्वन्मतेआरब्धत्वादितिभावः ॥ स्थूलारुंधतीन्यायेनेति ॥ यथाऽरुंधतींदर्शयितुंतत्समीपस्थाप्रत्यक्षसिद्धास्थूलतारकाइयमरुंधतीत्यभेदेनादावुपदिश्यते अनंतरंतस्यांबुद्धौप्रसृतायांपश्चान्नेयमरुंधती किंतुतत्समीपस्थेतिप्रदर्श्यते एवंप्रत्यक्षसिद्धाहंकारैक्यमपिद्वारत्वेनोपदिश्यतइत्यर्थः । ऐक्योक्तिः सार्वात्म्योपदेशेनेतिशेषः । आत्मनएव जीवस्यैव ॥ तदैक्येति ॥ भूमशब्दोक्तब्र

भूमात्मोपदेशाभ्यामेवब्रह्मात्मैक्यसिद्ध्यामध्येहंकारोपदेशवैयर्थ्याच्च । ननुपरोक्षस्यब्रह्मणआपरोक्ष्यायस्थूलारुंधतीन्यायेनाहंकारैक्योक्तिरितिचेन्न । त्वत्पक्षेप्रत्यगर्थरूपस्यात्मनएवापरोक्षैकरसत्वेन तदैक्योक्त्यैवापरोक्षसिद्ध्याअहंकारेअविद्यमानसार्वात्म्योक्त्ययोगात् । आत्मनआपरोक्ष्याभावेचात्मब्रह्मभेदस्यप्रत्यक्षत्वोक्त्ययोगात् ।

ह्मणइतिशेषः ॥ सिद्ध्येति ॥ ततश्चनद्वारापेक्षेतिभावः । अरुंधत्यास्तुसौक्ष्म्येणप्रत्यक्षसिद्धत्वाभावात्तत्रद्वारापेक्षेतिवैषम्यंज्ञातव्यं । नन्वात्मनआपरोक्ष्याभावादपरोक्षाहंकारोद्वारत्वेनोपदिश्यतइतिचेत्तत्राह ॥ उक्तीति ॥ आत्मनइति ॥ भूमात्मनोर्भिन्नत्वेनप्रत्यक्षसिद्धयोःपृथगुपदेशऐक्यार्थइत्यनेनेत्यर्थः । अन्योन्याभावप्रत्यक्षत्वेतंत्रस्याधिकरणप्रत्यक्षत्वस्यालाभादिति

SGDF
Sri Gargeshwari Digital Foundation

भावः । आत्मनोजीवस्यापरोक्ष्याभावेदूषणांतरमाह ॥ अपरोक्षेति ॥ द्वारभूतेत्यर्थः ॥ आपरोक्ष्यस्येति ॥ भूमाख्यब्रह्मण इतिशेषः ॥ उपदेशेनेति ॥ लब्धेनपरोक्षत्वेनेत्यर्थः ॥ हानीति ॥ बाधःसत्प्रतिपक्षोवास्यात्उभयथापित्वदिष्टासिद्धिरिति भावः । ननुभवन्मतेपिकथंब्रह्मभिन्नाहंकारस्यसर्वव्यापित्वंसंजाघटीतीत्यतआह ॥ श्रुत्यर्थस्त्विति ॥ तथाचाहंशब्दोऽनिरुद्ध परइतिभावः ॥ सैवहीति ॥ सत्याद्या अहमात्मांताःसापरदेवतैवतत्स्वरूपभूताएवेत्यर्थः । प्रत्युतप्रसिद्धाहंकार lक्षएवेयंश्रुतिर

अपरोक्षाहंकारैक्योपदेशलब्धापरोक्ष्यस्यपरोक्षात्मैक्योपदेशेनहान्यापाताच्च । श्रुत्यर्थस्तु भूमानारायणाख्यःस्यात्सएचाहंकृतिःस्मृतः । जीवस्थस्त्वनिरुद्धोयःसोहंकारइतीरितः । अणुरू पोपिभगवान्वासुदेवःपरोविभुः । आत्मेत्युक्तःसचव्यापी"त्यादिछांदोग्यभाष्योदाहृतस्मृत्याऽ वगंतव्यः । मोक्षधर्मेच "अनिरुद्धोहिलोकेषुमहानात्मापरात्परः । योसौव्यक्तत्वमापन्नोनिर्ममे चपितामहं । सोहंकारइतिप्रोक्तःसर्वतेजोमयोहिस"इति । सूत्रंच "सैवहिसत्यादय"इति ।

नुपपन्नेत्याह ॥ अन्यथेति ॥ ननुषट्प्रश्नोपनिषदिअहंकारश्चेत्यादिनाहमर्थस्यपृथिव्यादिवत्परमात्माश्रितत्वंप्रतीयते तत्अहम र्थापरपर्यायाहंकारस्यानिरुद्धत्वेविरुद्धमित्यतआह ॥ अहंकारश्चेति ॥ नत्वहमर्थःअस्मदभिप्रेतोजीवस्थोअनिरुद्धः । अहंकार स्यमहत्तत्वकार्यादित्वेप्रमाणमाह ॥ महत्तत्वादिति ॥ अतोभवःएतस्मात्त्रिविधाहंकारात्मनःप्रभृतीनांभवउत्पत्तिरित्यर्थः । अस्मदुक्तार्थमनंगीकृत्यमहाभूतान्यहंकारोबुद्धिरव्यक्तमेवचेतिस्मृतौअहंकारस्यक्षेत्रज्ञाज्जीवात्पार्थक्येनक्षेत्रत्वोक्त्यानाहमर्थोजी ॥ ३७९ ॥

वइत्यंगीकारेसंविद्रूपचैतन्यवाचिनोबुद्धिशब्दस्यबुद्धिरव्यक्तमेवचेतिक्षेत्रमध्येपाठात्संविदोपिक्षेत्रत्वापत्तिः । अतःतत्रबुद्धिश ब्दोनानार्थकइत्यंगीकार्यं । तदहंकारशब्देपिसममित्याह ॥ अन्यथेति ॥ अहंकारशब्दस्यनानार्थत्वमेवदर्शयति ॥ अहंकार शब्दस्येति ॥ देहेऽहंबुद्धाविति ॥ देहविषयेयाहंबुद्धिस्तत्रेत्यर्थः ॥ अहमर्थेति ॥ त्वदभिमतांतःकरणरूपाहमर्थेत्यर्थः ॥ अ

अन्यथाऽहंकारस्यव्याहृयुक्त्ययोगात् । अहंकारश्चाहंकर्तव्यंचेतिश्रुतौ "महाभूतान्यहंकार"इति स्मृतौचमहत्तत्वकार्यमनआदिकारणंवैकारिकादिभेदेनत्रिविधंचतत्वमुच्यते नत्वहमर्थः । "मह त्तत्वाद्विकुर्वाणाद्भगवद्वीर्यचोदितात् । क्रियाशक्तिरहंकारस्त्रिविधःसमपद्यत । वैकारिकस्तैजसश्चता मसश्चेत्यतोभवः ।मनसश्चेंद्रियाणांचभूतानांमहतामपी"त्यादिस्मृतेः । अन्यथासंविद्वाचिनोबुद्धिशब्द स्यबुद्धिरव्यक्तमेवचेतिक्षेत्रेप्रयोगात्संविदपिक्षेत्रंस्यात् । अहंकारशब्दस्यदंभाहंकारसंयुक्ताइत्यादौ देहेऽहंबुद्धौगर्वेचप्रयोगेण गर्वोऽभिमानोहंकारइत्यभिधानेनचाहमर्थवाचित्वनियमाभावाच्च ।

हंशब्देति ॥ कारशब्दरहितकेवलाहंशब्देत्यर्थः ॥ दकारांतेति ॥ अस्मदःत्वाहौसावित्यहादेशेसतिनिष्पन्नत्वादित्यर्थः । त स्मादहमनुभवामीत्यादिनाहमर्थेनुभवितृत्वकर्तृत्वरूपात्मानात्मधर्मदर्शनाच्चिदचित्संवलनसिद्धिरित्युक्तंदूषयति ॥ अहमर्थइ ति ॥ वक्ष्यमाणत्वात् उत्तरभंगस्यादावेवेतिशेषः । अस्तुवांतःकरणधर्मत्वंकर्तृत्वादेः तथाप्यहंकर्तेत्यत्रांतःकरणस्य अहमर्थभू

SGDF

तजीवस्वरूपानंतर्भावेनततोभिन्नत्वेपिअंतःकरणगतकर्तृत्वाख्यधर्ममात्रारोपेणैवाहंकर्तेतिप्रतीतिरस्तुनधर्म्यैक्यं यथाविदेहनिष्ठ गौरत्वादेरात्मन्यारोपेपिनदेहस्यात्मस्वरूपांतर्भावस्तद्वदित्याह ॥ अंतःकरणधर्मत्वेपीति ॥ ननुसर्वत्राहमर्थस्यजीवाख्यप्रत्य ज्ञात्रत्वेपरकीयेघटेघटशब्दवत्परकीयेहमर्थेऽहंशब्दस्यप्रत्ययप्रयोगौस्यातांनत्वयमितिधीःप्रयोगोवा अस्तिचायमितिधीःप्रयो

अहमर्थेहंशब्दप्रयोगेऽप्यहंकारशब्दाप्रयोगाच्च । आत्मवाचिनोऽहंशब्दस्यदकारांतास्मच्छब्दज त्वेनाहंकारतत्ववाचिनश्चमकारांताव्ययत्वेनभेदस्यस्पष्टत्वाच्च । अहमर्थेआत्मानात्मधर्मदर्शनं त्वसिद्धं कर्तृत्वादेरात्मधर्मत्वस्यवक्ष्यमाणत्वात्। अंतःकरणधर्मत्वेपिगौरोऽहमित्यादौदेहस्येवाहं कर्तेत्यत्राप्यंतःकरणस्याहमर्थानंतर्भावेपिधर्ममात्रारोपसंभवाच्च। यातुपरकीयाहमर्थेअयमिति धीःसाअहमर्थस्यैवप्रतिसंबंधिभेदेनेदमर्थत्वात्।नत्वहमर्थे अनात्मांशसद्भावात्। अन्यथापरात्म न्ययमितिधीर्नस्यात् । नचज्ञानानंदरूपआत्माहंजानाम्यहंसुखीत्यहमर्थाद्भेदेनभातीतियुक्तं ।

गश्च तेनज्ञायतेऽहमर्थेनात्मांशोस्तीति तत्राह ॥ यात्विति ॥ सत्यं सोपिवस्तुतोऽहमर्थएव तथापिस्वदेहापेक्षयातदीयदेहाख्य प्रतिसंबंधिभेदेनइदमर्थत्वात्परागर्थत्वात्अयमितिधीरित्यर्थः ॥ अयमिति ॥ अनात्मांशाभावादित्यर्थः । अहमर्थस्यात्मभिन्नत्वे प्रत्यक्षमाशंक्यनिराकरोति॥नचेति॥जानामिज्ञानवानित्यर्थः। अहमर्थस्यज्ञानसुखरूपात्माभिन्नत्वेतद्वत्त्वमहमर्थेप्रतीयमानमयुक्तं

SGDF
Sri Gargeshwari Digital Foundation

स्यात् तेनज्ञायते नाहमर्थःसुखादिरूपात्मेतीतिभावः॥अनयोरिति॥प्रकृतज्ञानानंदरूपआत्मा अहमर्थाद्भेदेनभातीत्येतदित्युक्तंभवति। ननुज्ञानसुखयोरहमर्थाश्रितत्वेनप्रतीतिर्भ्रांतिरितिचेत्तत्राह॥ अस्याइति॥ विरोधादिति॥अहंजानाम्यहंसुखीतिप्रतीत्यैवाहमर्थभेदेनात्माभातीत्युच्यते। इदानींतस्याभ्रांतित्वांगीकारेत्वदभिमतप्रमेयासिद्ध्याविरोधादित्यर्थः॥सर्वात्मकइति॥ अविद्यानावृतजीवचैतन्यस्यापरिच्छिन्नत्वेनसर्वगतत्वेनप्रत्यक्पराक्चभवति अहमर्थस्त्विदमर्थव्यावृत्तःपरागर्थव्यावृत्तःप्रत्यगर्थएवे

अहमर्थाश्रितत्वेनप्रतीयमानयोरनयोरात्मत्वायोगात्। अस्याःप्रतीते
भ्रांतित्वेचविरोधात्। नचात्मासर्वात्मकः अहमर्थस्त्विदमर्थव्यावृत्त
इतिवाच्यं।सर्वात्मकेऽहमर्थेआत्मनीवेदमर्थव्यावृत्तिधियोभ्रांतित्वो
पपत्तेः। यत्त्वहमर्थोनात्माअहंप्रत्ययविषयत्वाच्छरीरवदितितन्न।
त्वन्मतेऽहमर्थांतर्गताधिष्ठानभूतचितोपितत्प्रत्ययविषयत्वात्।

तियावत्।तथाचनात्माहमर्थयोरैक्यमितिभावः॥सर्वात्मकइति॥ यथाआत्मनःसर्वात्मकत्वेनइदमर्थव्यावृत्तिधियःप्रत्यक्त्वमात्रधियो भ्रांतित्वमुच्यते तथाहंकारस्यापिअहमेवेदंसर्वमितिसर्वात्मकत्वेनप्रतीतेऽहमर्थेपिइदमर्थव्यावृत्तिधियःप्रत्यक्त्वमात्रधियोभ्रांतित्वोपपत्तेरित्यर्थः। चिदचित्संवलनात्मकाहमर्थांतर्गतेऽचिद्भागारोपाधिष्ठानभूतेआत्मचैतन्यभागेऽहंप्रत्ययविषयेव्यभिचारइत्याह॥ त्वन्मतइति॥किंचेति॥ आत्मानात्मनोरन्योन्यात्मकतामन्योन्यधर्माश्चाध्यस्यसर्वेप्रमातृत्वभोक्तृत्वादिव्यवहाराःप्रव

SGDF
Sri Gargeshwari Digital Foundation

तंतइतिभाष्येइतरेतराध्यासंप्रतिपाद्यतत्रात्मन्यनात्मारोपोपपादनायगौरोहमित्याद्युदाहृतंतत् अहमर्थस्यात्मभिन्नत्वेऽयुक्तंस्यात् । अत्रगौरदेहैक्याध्यासोहमर्थएवप्राप्तो नात्मनीत्यर्थः ॥मानभूवमिति॥ माहंनभूवंअपितुभूयासमित्यर्थः । परमप्रेमास्पदत्वमात्मनउपपादयितुं इयंप्रतीतिरुदाहृता अनयाचाहमर्थस्यैवप्रेमास्पदत्वमनुमीयते अतोहमर्थस्यानात्मत्वेइदमयुक्तंस्यादित्यर्थः ॥ अहमर्थेति॥ आत्मास्वप्रकाशःस्वसत्तायांप्रकाशव्यतिरेकवैधुर्यात् अप्रकाशरहितत्वादितियावत् इत्यनेनात्मनःस्वप्रकाशत्वंसाधितं तत्रचहेतोःस्वरूपासिद्धिपरिहारायआत्मनःप्रकाशव्यतिरेकवैधुर्योपपादनायअहमितिसदाप्रकाशोपपादनंकृतं इदमप्यहमर्थ

किंच त्वयाऽऽत्मनोगौरोहमित्यनात्मारोपाधिष्ठानत्वंमानभूवंभूयासमित्यादिनापरमप्रेमास्पदत्वमहमर्थस्यस्वसत्तायांप्रकाशव्यतिरेकवैधुर्येणात्मनःस्वप्रकाशत्वंचोक्तं तत्सर्वमहमर्थस्यानात्मत्वे नयुक्तं । नचप्रेमास्पदात्मैक्या रोपादहमर्थेतद्धीः अन्योन्याश्रयात् ।

स्यानात्मत्वेऽयुक्तंस्यात् अहमर्थसंबंधिप्रकाशव्यतिरेकवैधुर्येणात्मनःस्वप्रकाशत्वसाधनस्याप्ययुक्तत्वादित्यर्थः । आत्मनःप्रेमास्पदत्वोपपादनायमानभूवमित्यहमर्थस्यप्रेमास्पदत्वोक्तिरयुक्तेतियदुक्तंतदयुक्तं परमप्रेमास्पदीभूतात्मैक्यारोपादहमर्थेपरमप्रेमास्पदत्वधियउपपत्तेरित्याशंक्यनिराकरोति ॥ नचेति ॥अन्योन्याश्रयादिति ॥ आत्मनःप्रेमास्पदत्वेसिद्धेतदैक्यारोपादहमर्थस्यप्रेमास्पदत्वारोपसिद्धिःतत्सिद्धौचात्मनःप्रेमास्पदत्वसिद्धिरित्यन्योन्याश्रयादित्यर्थः।नन्वात्मनःप्रेमास्पदत्वसिद्धिर्नाहमर्थस्यप्रेमास्पद

त्वारोपसिद्ध्यधीनाअतोनान्योन्याश्रयइत्यतआह ॥अहमर्थेति ॥ तथाचाहमर्थप्रेम्णोयोऽनुभवस्तद्व्यतिरिक्तात्मप्रेमानुभवाभावादात्मप्रेमास्पदत्वमहमर्थप्रेमास्पदत्वाधीनमित्यन्योन्याश्रयइत्यर्थइत्याहुः। संप्रदायस्तुअहमर्थेप्रेमास्पदत्वारोपसिद्धौप्रकारांतरेणात्मप्रेमास्पदत्वोपपादनासंभवात्तन्निबंधनात्मप्रेमास्पदत्वसिद्धिरित्यन्योन्याश्रयत्वोपपादनंपूर्वमेवकर्तव्यं।इतोप्यहमर्थेप्रेमास्पदत्वधीर्नभ्रांतिरित्याह॥ अहमर्थेति॥ अहमर्थप्रेम्णोनुभवस्यवक्तुमशक्यत्वादतोमानभूवमित्ययमेवात्मप्रेमानुभवइतिवाच्यं तथाचप्रधानाभावादस्यैवानुभवस्यानारोपत्वसिद्धिरित्यर्थः।किंचवस्तुतोप्रेमास्पदेऽहमर्थेप्रेमास्पदत्वारोपोनयुक्तः इच्छारोपःसाक्षिरूपोवा

अहमर्थप्रेम्णोऽन्यस्यात्मप्रेम्णोऽननुभावाच्च । अहितेहितबुद्ध्याप्रेमोत्पत्तावपिअप्रेमास्पदेतदास्पदतारोपस्यादर्शनाच्च । वाचस्पतिना "समारोप्यस्यरूपेणविषयोरूपवान्भवेत्॥विषयस्यतुरूपेणसमारोप्यंनरूपवदि"त्युक्तत्वेनाध्यस्तांतःकरणगताप्रेमास्पदत्वस्यैवात्मनिप्रतीत्यापत्तेश्च ।

च्यः सनयुक्तः तथात्वेसाक्षिणोभ्रमत्वापत्तेः । नन्वनिष्टसाधनेसर्पादौमालात्वभ्रमेणइदमिष्टसाधनंमालात्वादितीष्टसाधनताभ्रमानंतरंइष्टसाधनतायाअभावेपिइदंमेस्यादितीच्छानुभूयतइतिचेत्तत्राह ॥ अहितइति ॥ अनिष्टसाधनेइष्टसाधनताबुद्ध्याप्रेमोत्पत्तौसत्यामेववस्तुतःप्रेम्णःसत्वात्प्रेमानुभवोभवति अहितेप्रेमोत्पत्तिश्चभवति परंतुप्रेमाभावेप्रेमज्ञानंतुनभवत्येवेत्याशयः । आत्मरूपाधिष्ठानगतप्रेमास्पदत्वस्यआरोप्येंगीकारेवाचस्पतिग्रंथविरोधोतआरोप्यांतःकरणगताप्रेमास्पदत्वस्यैवात्मनिप्रतीत्यापत्तिरित्याह ॥ वाचस्पतिनेति ॥ अयंश्लोकःकल्पतरौव्याख्यातः समारोप्यस्य सर्पादे भीषणत्वादिरूपेणधर्मेण विषयोधिष्ठानभू

SGDF Foundation

तोरज्ज्वादिर्भीषणत्वादियुक्तोभवति विषयस्यरज्ज्वादेरूपेणपुरतोगम्यमानत्वादिनासमारोप्यंसर्पादिरूपवत्अभिगम्यमानंनभव तीत्यर्थः । अहमर्थेप्रेमास्पदत्वारोपहेतुं आत्मैक्यारोपंदूषयति ॥ त्वद्रीत्येति ॥ सुखविषयकानुभवरूपस्यसुखमनुभवामिसुखा नुभववानस्मि । अहमर्थाच्छेदेनेत्येवपाठः सुखानुभवादितिपाठस्तुचिंत्यः । तथाचात्मनोहमर्थाच्छेदेनप्रतीतेर्नतत्रतस्यारोपइत्यर्थः । बाह्यमतापत्तिः वेदबाह्योयोबौद्धःतन्मतापत्तिः । ननुप्रेमास्पदरूपात्मभूतवस्तुनाशांगीकारात्तन्मतस्यानिंद्यत्वं नमन्मतस्येत्यतः

त्वद्रीत्यासुखानुभवरूपस्यात्मनःअहंसुखमनुभवामीत्यहमर्थाच्छेदेनैवप्रतीतेश्च । किंच मोक्षेअहम र्थाभावेआत्मनाशोमोक्षइतिबाह्यमतापत्तिः । प्रेमास्पदस्याहमर्थस्यचत्वन्मतेपिनाशात् । तदन्यस्य शून्यादेस्तन्मतेऽप्यनाशात् । अपिचैवंअहंमुक्तःस्यामितीच्छानस्यात् । नन्वात्मनएवमुक्तिरिष्यते

प्रेमास्पदवस्तुनाशस्त्वन्मतेऽप्यविशिष्टइत्याह ॥ प्रेमास्पदस्येति ॥ वास्तवंनाहंकारस्यप्रेमास्पदत्वं किंतुआत्मैक्यारोपादहमर्थे तद्धीरित्येतद्दूषितमितिभावः । ननुमोक्षेप्रेमास्पदाहंकारनाशेपितदन्यस्यब्रह्मणोऽविनाशात्तद्भावस्यपुरुषार्थत्वमितिचेत्तर्हिंसमंशू न्यवादेपीत्याह ॥ तदन्यस्येति ॥ आत्मान्यस्येत्यर्थः । तद्भावएवतन्मतेपुरुषार्थइतिसाम्यमितिभावः । एवं अहमर्थस्यआत्मा न्यत्वे ॥ नस्यादिति ॥ अहमर्थस्यमुक्त्यनन्वयादित्यर्थः ॥ तदभेदेति ॥ मुक्तावप्यात्माभेदेत्यर्थः । तर्ह्यहंमुक्तःस्यामितीच्छा

SGDF
Sri Gargeshwari Digital Foundation

कथमित्यतआह ॥ अहंकारेत्विति ॥ तदैक्येति ॥ पुष्टत्वाश्रयशरीरैक्यारोपादित्यर्थः ॥ तदैक्येति ॥ सुख्यात्मैक्येत्यर्थः ॥ अन्योन्येति ॥ आत्माहमर्थयोर्भेदादीनामारोपसिद्धौउक्तेच्छायाअबाधकत्वसिद्धिः तदबाधकत्वसिद्धौभेदसिद्धिरित्यन्योन्याश्रयइत्यर्थः ॥ तत्रमामिति ॥ तथाचमांअहमितिअहमर्थस्यैवामृतत्वप्रार्थनश्रवणादात्मनएवमुक्तिरिष्यतइत्युक्तमसदिति भावः ॥ तत्रेति ॥ ऐक्यारोपादहंपुष्टःस्यामितीच्छायामपिकदाचिच्छरीरंपुष्टंस्यादितिमुख्येच्छाभवति तथाऐक्यारोपादेवशरी

अहंकारेतुतदभेदारोपान्मुक्तःस्यामितीच्छा यथाशरीरस्यैवपुष्टीच्छायामप्यात्मनितदैक्यारोपादहंपुष्टःस्यामितीच्छा यथाऽऽत्मनएवसुखेच्छायामपितदैक्यारोपाच्छरीरंसुखिस्यादितीच्छेतिचेन्न। अन्योन्याश्रयस्योक्तेः ।"तत्र मामममृतंकृधि" ज्योतिरहंविरजाविपाप्माभूयास" मित्यादिश्रुतिविरोधाच । तत्रशरीरंपुष्टंस्यादित्यपीच्छावत् अहंसुखीस्यामित्यपीच्छावच्चेहचिन्मात्रंमुक्तंस्यादितीच्छायाःकदाप्यदर्शनेनमुक्तेरनिष्टत्वापाताच्चायःकश्चिदात्मामुक्तःस्यादितीच्छयाचनमुमुक्षुप्रवृत्तिः ।

रंसुखिस्यादितीच्छायामपिकदाचिदहंसुखीस्यामीतीच्छाभवति तद्वत्मुक्त्यन्वय्यात्माभेदारोपेणाहंमुक्तःस्यामितीच्छायामपिकदाचिद्वाचिन्मात्रंमुक्तंस्यादितीच्छाप्रसज्येत तर्ह्येवंकदाचित्कस्यचिदिच्छादृष्टा अतोमुक्तेरनिष्टत्वापातात्आत्मसंबंधितयेच्छाविषयत्वाभावापातादित्यर्थः।ननुकश्चिदात्मामुक्तःस्यादित्यात्मसंबंधितयामुक्तेरिच्छाविषयत्वंसंभवतीतिचेत्तत्राह ॥कश्चिदात्मेति॥ कस्यचिदात्मनोमुक्तीच्छयामुमुक्षोःस्वस्यनप्रवृत्तिर्युक्तेत्यर्थः । नह्यन्यस्यस्वर्गेच्छयास्वस्ययागेप्रवृत्तिर्दृष्टेतिभावः । ननुममात्मा

SGDF
Sri Gargeshwari Digital Foundation

मुक्तः स्यादित्यात्मनोमुक्तीच्छासंभवतीतिचेत्तत्राह ॥ ममेति ॥ अहमर्थस्यैवेति ॥ तदतिरिक्तस्यचिन्मात्रस्यममात्मेत्यहमर्थ वाचिशब्दाविषयत्वादितिभावः । नन्वहंमुक्तःस्यामितीच्छानास्त्येव किंतुचिन्मुच्यतामित्यादिरूपैव एवमिच्छयैवमुमुक्षुप्रवृत्ति रितिमयाहिनियम्यतेइतिचेत्तत्राह ॥ नचेति ॥ कुतोननियंतुंशक्येत्यतआह ॥ बौद्धेति ॥ तथात्वेआत्मनाशोभूयादितिबौद्ध कल्पितमुक्तीच्छयाआत्मनाशस्यपुरुषार्थत्वापातात् तथाएकविंशतिसुखध्वंसोभूयादितितार्किककल्पितमुक्तीच्छयासुखनाशस्या पिपुरुषार्थत्वापातइत्यर्थः । अहमर्थस्यचिदचित्संवलनात्मकत्वेबाधकांतरंचाह ॥ किंचेति ॥ वस्तुगत्याऽहमर्थोस्मन्मतेआत्मैव

ममात्मामुक्तःस्यादितीच्छात्वहमर्थस्यैवमुक्तीच्छा । नचस्वतःपुरुषार्थइच्छानियंतुंशक्या बौ द्धतार्किकादिनियमितेच्छयाऽऽत्मनाशसुखनाशादेरपिपुमर्थत्वापातात् । किंचाहमर्थोऽतः करणगर्भितश्चेन्ममनइतिधीर्नस्यात् तदवच्छिन्नस्यपुनःतदनन्वयात् । किंचैवं मनःस्फुरतिम नोस्तीतिज्ञानादहमितिज्ञानस्यवैषम्यानुभवोनस्यात् चिदचित्संवलनविषयत्वाविशेषात्

तत्रत्वयांतःकरणरूपाचिद्भागांगीकारइत्यर्थः ॥ ममनइति ॥ ममेतिप्रतीयमानेऽहमर्थेमनसःप्रविष्टत्वात्ममनइतिप्रतीतिर्न स्यात् नहिदंडिनोदंडइतिप्रतीतिःसंभवतीत्यर्थः । एतदेवाह ॥ तदवच्छिन्नस्येति ॥ तद्विशिष्टस्येत्यर्थः । तथात्वेअवच्छेदक कोटौस्वस्यैवप्रवेशापत्त्याआत्माश्रयःस्यादितिभावः । कुतइत्यतआह ॥ चिदचिदिति ॥ मनःस्फुरतीत्यत्रमनसोऽचित्त्वात्स्फु रणस्यचित्त्वाच्चिदचित्संवलनसद्भावादहमर्थेपितत्संवलनस्यत्वयैवांगीकारात्तयोर्ज्ञानयोश्चिदचित्संवलनविषयकत्वाविशेषाद्वैषम्य

SGDF
Sri Gargeshwari Digital Foundation

मनुभूयमानंनस्यादित्यर्थः ॥ ध्वंशेति ॥ अधिष्ठानारोप्यरूपांशद्वयेत्यर्थः । ननुआरोप्यविषयकत्वमेवावश्यकंकिमधिष्ठानविष यकत्वेनेत्यतआह ॥ अन्यथेति ॥ ततःकिंप्रकृतइत्यतआह ॥ नचेति ॥ अधिष्ठानभूतचिदंशोनानुभूयतइत्याशयः । नन्वह मितिबुद्धेर्भ्रमत्वान्यथानुपपत्त्यैवाननुभूतमपिध्वंशत्वंकल्प्यतइत्यतआह ॥ यदीति ॥ तथाचात्मस्वरूपेपिचिदचित्संवलनापाते नतद्बुद्धेरपिभ्रमत्वापातइत्याशयः । नन्वत्रापिध्वंशत्वमनुभूयतएव अहंस्फुरामिअहमस्मीत्यत्रस्फुरणसदर्थयोश्चैतन्यस्वरूपत्वे

किंच सर्वोऽपिभ्रांतिर्ध्वंशविषया अन्यथानिरधिष्ठानभ्रमापातात् । नचाहमितिबुद्धे ध्वंशत्वमनुभूयते । यदिकल्प्यतेतदात्मेतिबुद्धेरपिध्वंशत्वंकल्प्यतां । ननुरूप्यंस्फुरति रूप्यमस्तीत्यत्रेवाहंस्फुराम्यहमस्मीतिध्वंशताभाति रूप्यभ्रमेत्विदमंशावच्छिन्नंस्फुरण मधिष्ठानमितीदंरूप्यमितिधीः इहतुस्फुरणमात्रमधिष्ठानमितिस्फुरामीत्येवधीरितिचेन्न ।

नाधिष्ठानांशत्वात् यथाहिरूप्यंस्फुरतिरूप्यमस्तीत्यत्रस्फुरणसदर्थयोरधिष्ठानत्वंदृष्टं तद्वत् । ननुतर्हितत्रयथाइदंरूप्यमितिधी र्भवति तथाहमिदमितिधीःस्यात् नतुस्फुरामीतिधीरितिचेन्न तत्ररूप्यंप्रतिशुद्धंस्फुरणंसदर्थश्चनाधिष्ठानं किंत्विदमंशावच्छिन्न मेव तत्रत्येदंरूप्यमितिधीर्भवति अत्रतुशुद्धचिदाख्यस्फुरणस्यैवाधिष्ठानत्वादहंस्फुरामीत्येवधीर्भवतीतिशंकते ॥ नन्विति ॥

SGDF
Sri Gangeshwari Digital Foundation

त्वन्मतइति ॥ अविद्यावृत्तिरूपभ्रमरूपज्ञानस्वरूपस्याप्यध्यस्तत्वेनारोप्याधिकसत्ताकत्वाभावान्नाधिष्ठानत्वमितिभावः । न
न्वविद्यावृत्तिरूपभ्रमरूपज्ञानस्याध्यस्तत्वेपिचैतन्यरूपस्फुरणस्यअहंज्ञानरूपस्यनतथात्वं अतोयुक्तमधिष्ठानत्वमितिचेन्न। चैतन्य
मात्रस्याहंज्ञानत्वेसुषुप्त्यादावप्यहमनुवृत्त्यापातेनाविद्यावृत्त्यवच्छिन्नचितएवाहंज्ञानत्वेनत्वयावाच्यत्वात्तस्यचाध्यस्तत्वेनानधि
ष्ठानत्वादितिभावः। लोकेऽधिष्ठानमारोप्यसंभिन्नत्वेनप्रतीयमानंदृष्टं नतुतद्भिन्नत्वेन प्रकृतेऽहंस्फुरामीत्यस्यस्फुरणत्रानहमित्य
र्थकत्वेनाश्रयाश्रयिभावप्रतीत्याऽहमर्थाद्भेदेनैवस्फुरणंभासेअहमिच्छामीत्यत्रयथाइच्छावत्त्वंप्रतीयते तद्वत् अतःस्फुरणंनाहम

त्वन्मतेभ्रमज्ञानस्याप्यध्यस्तत्वेनाधिष्ठानत्वायोगात्। अहमिच्छामीतिदंहस्फुरा
मीत्यहमर्थाद्भिन्नत्वेनभासमानस्यस्फुरणस्यतदैक्यारोपाधिष्ठानत्वायोगाच्च। बाधके
नबाधिष्यमाणस्याध्यस्तधर्मत्वेनभासमानस्यचास्तित्वस्याधिष्ठानत्वायोगाच्च। त्वद
भिप्रेतस्याहमित्यत्रैवांशद्वयमित्यस्यासिद्धेश्च । तस्मान्नाहमर्थस्यानात्मत्वेमानं।

र्थारोपाधिष्ठानं अन्यथेच्छायाअप्यहमर्थारोपाधिष्ठानत्वंस्यादित्याशयेनाह ॥ अहमिच्छामीतिवदति ॥ रूप्यमस्तीत्यत्रेवाह
मस्मीत्यत्रापिसदर्थोऽधिष्ठानत्वेनप्रतीयतइत्युक्तं तत्रदृष्टांतएवासंप्रतिपन्नइत्याह ॥ बाधकेनेति ॥ नेदंरूप्यंसदितिबाधकप्रत्यये
नेत्यर्थः। किंचाहमितिप्रतीतावेवचिद्रूपाधिष्ठानारोप्यांशद्वयमस्तीतित्वदभिप्रेतं तन्नप्राप्तं किंत्वहंस्फुरामीतिज्ञानएवद्व्यंशत्वं अ
तोहमितिज्ञानस्यद्व्यंशत्वोपपादनायाहंस्फुरामीत्यादौद्व्यंशत्वोपपादनमसंगतमित्याह ॥ त्वदभिप्रेतस्येति ॥ किंतर्ह्यहमर्थस्या

SGDF Sri Gargeshwari Digital Foundation

त्मत्वेप्रमाणमित्यतआह ॥ आत्मत्वेत्विति ॥ प्रत्यक्षं अहमज्ञइत्यादिकं ॥ तत्साधनेति ॥ योयत्फलसाधनकृत्याश्रयःसत
त्फलसंबंधवान् यथास्वर्गसाधनकृत्याश्रयोयजमानःस्वर्गफलान्वयीत्यर्थः । ननुपुत्रःपूतःस्यादितिपुत्रगतपूतत्वरूपफलोद्देशेन
पिताजातेष्टिकरणेप्रवर्तते तत्रपुत्रसंबंधिपूतत्वरूपफलसाधनीभूतकृत्याश्रयेपितरिपूतत्वरूपफलसंबंधाभावेनव्यभिचारःस्यादि
तिचेन्न । उत्तरभंगेवक्ष्यमाणरीत्यापुत्रगतंपूतत्वंनजातेष्टिफलं किंतुपूतपुत्रकत्वं तच्चपितृगतमेवेतिव्यभिचारशंकायाएवाभावात् ।
इममर्थमजानानाःकेचित्स्वसंबंधिफलसाधनकृत्याश्रयत्वंहेत्वर्थोविवक्षितोऽतोनपितरिव्यभिचारइत्याहुः । स्वर्गसाधनहोमादि
आत्मत्वेतुप्रत्यक्षंतावत् । अनुमानानिच अहमर्थःमोक्षान्वयी । तत्साधनकृत्याश्रयत्वात्सम्मतवत् । अहमर्थोऽन
र्थनिवृत्त्याश्रयः अनर्थाश्रयत्वात् सम्मतवत् । नचासिद्धिःअहमज्ञः अहंदुःखमनुभवामीत्यबाधितानुभवात् । अना
त्मत्वंनाहमर्थनिष्ठं अनात्ममात्रवृत्तित्वात् घटत्ववदित्यादीनि । श्रुतयश्च "कस्मिन्न्वहमुत्क्रांतउत्क्रांतोभविष्यामि
कस्मिन्वाप्रतिष्ठितेप्रतिष्ठास्यामीति सप्राणमसृजत हंताऽहमिमास्तिस्रोदेवता" इत्यादौजगत्कारणेसतिप्राणमन
कृत्याश्रयेऋत्विजिस्वर्गान्वयशून्येव्यभिचारःस्यादितिचेन्न । अपरिक्रीतसंबंधिकृत्याश्रयत्वादित्यर्थः । अपरिक्रीतःप्रधानोयजमा
नः ऋत्विजस्तुद्रव्यदानेनयजमानपरिक्रीतत्वान्नव्यभिचारइत्यवधेयं । अनर्थेत्यादिनामोक्षएवनामांतरेणनिर्दिष्टः । संमतवदि
ति अत्रयोयदाश्रयःसतन्निवृत्त्याश्रयः यथाघटाश्रयःकपालःतन्निवृत्त्याश्रयइतिद्रष्टव्यं । अनर्थाश्रयत्वहेतोरसिद्धिमाशंक्यनिरा
करोति ॥ नचेति ॥ अहमज्ञइत्यादि ॥ अज्ञानवैषयिकसुखादेरेवानर्थत्वादितिभावः । प्रमेयत्वादौव्यभिचारवारणायमात्र

SGDF
Sri Gargeshwari Digital Foundation

पदं। सति सच्छब्दवाच्येब्रह्मणि ॥ प्रागिति ॥ अहमर्थनाशवत्त्वेनत्वत्संमतेप्रलयकालेपीत्यर्थः। त्वन्मतेतुचिदचिद्रूपमनस्संव
लनात्मकाहमर्थस्यमनआदिसृष्ट्युत्तरकालीनत्वादितिभावः ॥ शुद्धेति ॥ तथाचनाहमर्थस्यात्मभिन्नत्वमितिभावः ॥ अनवद्य
स्येति ॥ त्वन्मतेऽहमर्थसंबंधस्यैवमुख्यावद्यत्वेननिरवद्यस्यब्रह्मणोऽहमित्यवेदितिश्रुत्युक्ताहमुल्लेखायोगादितिभावः ॥ मोक्षा

स्सृष्टेः प्रागेवाहंत्वोक्तेः।"तदात्मानमेवावेदहंब्रह्मास्मी"त्यत्रचावधारणेनशुद्धात्मनोऽहंत्वोक्तेः।
अनवद्यस्यब्रह्मणोहमुल्लेखोक्तेः । "अहमित्येवयोवेद्यःसजीवइतिकीर्तितः । सदुःखीससुखी
चैवसपात्रंबंधमोक्षयो"रितिश्रुतौमोक्षान्वयोक्तेश्च । स्मृतयश्च "मामेवयेप्रपद्यंतेमायामेतांत
रंतित"इतिस्वप्रपन्नमायानिरसनशक्तस्येश्वरस्याहमुल्लेखोक्तेः । "अहंकृत्स्नस्यजगतःप्रभवःप्र
लयस्तथे"त्यत्राहमर्थस्यमनआदिसर्वकारणत्वोक्तेः । "नचैवनभविष्यामःसर्वेवयमतःपर"मि
त्यत्रानिवृत्त्युक्तेः । "वेदैश्चसर्वैरहमेववेद्य"इत्यत्रसर्ववेदवेद्यत्वोक्तेः । "ततोमांतत्वतोज्ञात्वा
विशतेतदनंतर"मित्यत्रमुक्तप्राप्यत्वोक्तेः । "अहमात्मागुडाकेशे"त्यादावात्मत्वाद्युक्तेः ।

न्वयेति ॥ बंधान्वयोपिद्रष्टव्यः । अहमर्थस्यमायाकल्पितस्यमिथ्यात्वेनात्मभिन्नत्वेबाधकमाह ॥ मामेवेत्यादि ॥ स्वप्रपन्नमा ॥ ३८५ ॥
यानिरसनसमर्थस्यमायिकाहमर्थसंबंधोनयुक्तइतिभावः । अस्मदुक्तरीत्याऽहमर्थस्यात्मत्वांगीकारेतद्योहंसोसावित्यादौविशिष्टयो
रैक्यायोगात्पदद्वयस्यभागत्यागेनचैतन्यमात्रस्यलक्षणाजघन्यवृत्तिराश्रीयते इतःपरंसानाश्रयणीया अहमर्थस्यास्मदुक्तरीत्यात्म

त्वेनएकस्यायंशब्दस्यमुख्यार्थत्वेसंभवनपदद्वयस्यलक्षणाश्रयणंनत्वयाकार्यमित्याह ॥ एवंचेति ॥ नन्वथापिकर्तृत्वादिविशिष्ट
स्यैवात्मशब्दार्थत्वात्तदभेदायोगेनाहमर्थस्यैवात्मत्वेपितत्पदेलक्षणामयाकार्यैवेतिचेन्न "तदात्मानमेवावेदहंब्रह्मास्मी"तिशुद्धचैत
न्यस्यैवाहंत्वोक्तेर्नलक्षणाकार्येतिभावः । उत्तरत्रकारिकायामेतत्सूचनार्थमेवतदात्मानमितिश्रुतेरितिशुद्धचैतन्यस्यैवाहंत्वप्रतिपा
दिकाश्रुतिःसंगृहीतेतिद्रष्टव्यं । संगृह्णाति ॥ तस्मादिति ॥ अहमात्मेतीति ॥ "अहमात्मागुडाकेशे"त्यादिस्मृतेरित्यर्थः ॥

एवंचाहंब्रह्मास्मितद्योहंसोसावित्यादौपरेणापिलक्षणानाश्रयणीया । तस्मात् । "अज्ञोहमित्याद्य
ध्यक्षात्तदात्मानमितिश्रुतेः । अहमात्मेतिचस्मृत्याऽहंत्वंशुद्धात्मनःस्थितं" ॥ ६ ॥ अहमर्थस्याना
त्मत्वभंगः ॥ ५६ ॥ यच्चोच्यते जपाकुसुमस्थंलौहित्यंस्फटिकइवमनस्स्थंकर्तृत्वमात्मन्यध्यस्तं नतु
तात्विकं आत्मनोनिर्विकारत्वात् सुषुप्तौबुद्ध्यभावेनाकर्तृत्वदर्शनात् श्रुत्यादिविरोधाच्चेति ।

अहमर्थस्यानात्मत्वभंगविवरणं॥५६॥ निर्विकारत्वादिति॥ कर्तृत्वांगीकारेउच्चत्वादिविकारप्राप्तेरितिभावः। अंतःकरणे
सतिआत्मनःकर्तृत्वमित्यन्वयःस्पष्टएव। व्यतिरेकंचाह॥ सुषुप्ताविति॥ आत्मनःकर्तृत्वेतस्यसुप्तावपिसत्वात् तत्रापिकर्तृत्वापा
तइत्यर्थः। बुद्ध्यतेअनयेतिव्युत्पत्त्याबुद्धिरंतःकरणं॥श्रुत्यादीति॥ "विज्ञानंयज्ञंतनुतेकर्माणितनुतेपिचे"तिश्रुतौकरणव्युत्पत्त्या
विज्ञानशब्दोदितमनसएवकर्तृत्वप्रतीतेः। तथा"ससमानःसन्नुभौलोकावनुसंचरतिध्यायतीवलेलायतीवे"तिश्रुतौजीवस्यावास्तव

SGDF Foundation

कर्तृत्वप्रतीतेः । "अहंकारविमूढात्माकर्ताहमितिमन्यत" इतिस्पष्टस्मृतेश्चेत्यर्थः । आत्मनिकर्तृत्वाध्यासांगीकारेभ्रमस्थलेरक्तःस्फटिकइतिप्रतीतिर्भवति कदाचित्कुसुमंरक्तमितिसाक्षात्काररूपाप्रमाचभवति । यथावाइदंरजतमितिभ्रमोभवति आपणेकदाचिद्रजतप्रमाभवति एवमिहाप्यंतःकरणनिष्ठकर्तृत्वस्यात्मन्यध्यासांगीकारेरक्तःस्फटिकइतिवत्कदाचिच्चैतन्यंकर्त्रितिभ्रमःस्यात् रक्तंकुसुममितिवत्कदाचित्मनःकर्त्रितिप्रत्यक्षप्रमास्यात् । नचैवमस्ति । अतोनायंभ्रमइत्याशयेनाह ॥अत्रब्रूमइत्यादिना ॥प्रत्येकमिति॥प्रत्येकंस्फटिकेपुष्पेचरक्तत्वबुद्धिवच्चितिबुद्धौचकर्तृत्वसाक्षात्कारःकदाचनयदिभवेत्तर्ह्येवायंभ्रमः नचैवमस्तीतिकारिकाशेषः।

तत्रब्रूमः । "प्रत्येकंस्फटिकेपुष्पेभवेद्रक्तत्वबुद्धिवत् । चितिबुद्धौचकर्तृत्वसाक्षात्कारःकदाचन" । भवितव्यंहिबुद्धिस्थस्यकर्तृत्वस्यात्मन्यारोपेरक्तंकुसुममितिवत् कदाचिन्मनःकर्त्रिति प्रत्यक्षप्रमया रक्तःस्फटिकइतिवत्कदाचिच्चैतन्यंकर्त्रितिभ्रमेणच । नहिबुद्धिस्थंकर्तृत्वमप्रत्यक्षं ।

कारिकांव्याचष्टे ॥ भवितव्यंहीति ॥ ननुजपाकुसुमस्थलौहित्यस्यप्रत्यक्षत्ववत् बुद्धिनिष्ठकर्तृत्वस्याप्रत्यक्षत्वान्नैवमित्यतआह ॥ नहीति ॥ बुद्धिनिष्ठकर्तृत्वस्यापिसाक्षिवेद्यत्वादितिभावः । ननुरक्तःस्फटिकःरक्तंकुसुममितिवत्प्रतीतिद्वयापादनमयुक्तं वैषम्यात् तत्रह्यध्यस्यमानरक्तत्वातिरिक्तरक्तत्वाश्रयस्यकुसुमस्यभिन्नस्यसत्वेनधर्म्यैक्यारोपाभावेनधर्ममात्रारोपाद्रक्तद्वयप्रतीतिः इहतुकर्तृत्वादिविशिष्टांतःकरणस्यैवचिदात्मनाऽध्यासांगीकारेणधर्मिविशिष्टधर्म्यारोपस्यैवांगीकारादध्यस्यमानकर्तृत्वातिरिक्तकर्तृ ॥ ३८६ ॥

SGDF Sri Gargeshwari Digital Foundation

त्वाश्रयस्यांतःकरणांतरस्याभावेननकर्तृत्वद्वयप्रतीतिरितिशंकते ॥ नन्विति ॥ मनः कर्तृत्वादिविशिष्टंमनः । सोपाधिकेहिभ्र मेजपाकुसुमादिरूपोपाधिर्नस्फटिकात्मनाऽध्यस्यते किंतुतत्रतद्गतधर्मसदृशधर्मांतरं निरुपाधिकेतुभ्रमेभीषणत्वादियुक्तंसर्पादि कमेवरज्ज्वात्मनाऽऽरोप्यते नतुसर्पगतभीषणत्वातिरिक्तभीषणत्वांतरं । अत्रतुकर्तृत्वादिमदंतःकरणमेवचिदात्मतयाऽध्यस्यते न तुतद्गतकर्तृत्वसदृशकर्तृत्वांतरं । अतःसर्पाध्याससदृशोऽयंनिरुपाधिकएवभ्रमःस्यान्नसोपाधिकः । त्वयात्वयंभ्रमःसोपाधिकत

ननुमनश्चैतन्यात्मनाऽध्यस्तं कुसुमंतुनस्फटिकात्मनेतिवैषम्यमितिचेन्न अधिष्ठानात्मनाऽनध्य स्तंजपाकुसुमादिस्थानीयमुपाधिंविना भीषणत्वादियुक्तसर्पस्यरज्ज्वात्मनेवकर्तृत्वादियुक्तबुद्धेःचि दात्मनाऽध्यासेरज्जौभीषणत्वांतरस्येवात्मनिकर्तृत्वांतरस्यानध्यासेनतदध्यासस्यसोपाधिकत्वायो गात् । मनोनस्फुरणं किंतु स्फुरतीतितयोर्भेदधीदशायामपिप्रत्येकंकदापिकर्तृत्वाप्रतीतेश्च ।

यांगीकृत्यइत्यपसिद्धांतःस्यादित्याह ॥ अधिष्ठानेति ॥ नन्वयमपिसोपाधिकभ्रमएव नचोक्तरीत्याकर्तृत्वद्वयप्रतीतिप्रसंगइति वाच्यं । चिन्मनसोर्भेदाग्रहात्कर्तृत्वद्वयप्रतीत्यभावोपपत्तेरित्यतआह ॥ मनइति ॥ स्फुरणं चैतन्यं । स्फुरति चैतन्यविषयः। तयोः चिन्मनसो र्भेदग्रहदशायामपीत्यर्थः । यदुक्तंचिन्मनसोर्भेदाग्रहान्नकर्तृत्वद्वयप्रतीतिरिति तदयुक्तं भेदग्रहदशायामपिक र्तृत्वद्वयाप्रतीतेरितिव्यतिरेकव्यभिचारमुक्त्वाभेदाग्रहदशायामपिप्रतीतिद्वयसद्भावादन्वयव्यभिचारोपीत्याह ॥ इदंसर्पयोरि

SGDF
Sri Gargeshwari Digital Foundation

ति ॥ अभेदग्रहणेति ॥ भेदाग्रहणदशायामपीत्यर्थः । एवमुत्तरत्रापि । अयमितीदमंशापेक्षयाअंगुल्यानिर्दिश्यायंभीषणइति वदति सर्पोभीषणइतिचवदतिइत्यनुभवसिद्धमितिज्ञातव्यं । ननुमनश्चिदात्मनोरध्यासेपिसोपाधिकारोपएवायं तत्प्रयोजकस्या त्रसत्वादित्याशंक्यनिराकरोति ॥ नचेति ॥ उपाधे रंतःकरणस्य । तथाचसोपाधिकत्वासंभवेपीत्यर्थः ॥ अधिष्ठानेत्यादि ॥ पुष्पस्यतद्रक्तत्वस्यचव्यावहारिकत्वेनाधिष्ठानभूतस्फटिकसमसत्ताकत्वात् तथाऽध्यस्यमानप्रातिभासिकस्फटिकगतरक्तत्वापेक्ष

इदंसर्पयोःशरीरात्मनोश्चाभेदग्रहणदशायामप्ययंभीषणःसर्पोभीषणः अहंगौरःशरीरंगौरमितिवत् मनश्चितोरभेदग्रहदशायामपिस्फुरणंकर्तृमनःकर्त्रितिधीप्रसंगाच्च । नचोपाधेरधिष्ठानात्मनाऽध्यासे प्युपाधेस्तद्धर्मस्यवाऽधिष्ठानसमसत्ताकत्वंवाऽध्यस्यमानादधिकसत्ताकत्वंवा सोपाधिकत्वेतंत्रमिति वाच्यं । आद्ये त्वन्मतेबुद्धेस्तत्कर्तृत्वस्यचचित्समसत्ताकत्वाभावेनसोपाधिकत्वायोगात् । द्वितीये

याऽधिकसत्ताकत्वाच्चसोपाधिकभ्रमत्वमित्यर्थः । नन्विदंप्रकृतेकथमस्तीतिचेत् उच्यते । अविद्यावच्छिन्नचैतन्यांतःकरणनिष्ठ कर्तृत्वाध्यासाधिष्ठानत्वेनतस्यव्यावहारिकतयोपाधिभूतबुद्धेस्तत्कर्तृत्वस्यचाधिष्ठानसमसत्ताकत्वादिकंज्ञातव्यं । अविद्यावच्छि न्नस्यचैतन्यस्यस्वयंकल्पितत्वेनाधिष्ठानत्वायोगाच्चितएवाधिष्ठानत्वंवाच्यं तथाचनैतत्प्रयोजकलाभइत्याह ॥ आद्यइति ॥ द्वि तीयइति ॥ बुद्धिरूपोपाधिधर्मभूतंकर्तृत्वमात्मन्यध्यस्यतइत्युच्यते तत्राध्यस्यमानंयदात्मकर्तृत्वंतच्चेद्व्यावहारिकंस्यात्तर्हिबु

द्धिरूपोपाधेस्तद्धर्मभूतकर्तृत्वस्यचाध्यस्यमानादधिकसत्ताकत्वंवाच्यं ततश्चतयोःपारमार्थिकत्वप्रसंगः । बुद्धेस्तत्कर्तृत्वस्यचव्या वहारिकत्वांगीकारेऽध्यस्यमानाधिकसत्ताकत्वायात्मगतकर्तृत्वस्यवाप्रातिभासिकत्वमंगीकार्यंस्यात् । नचेष्टापत्तिरितिवाच्यं बा धकप्रत्ययाभावादित्याशयः ॥ उभयत्रापीति ॥ प्रयोजकद्वयपक्षेपीत्यर्थः । क्षीररूपोपाधेस्तद्धर्मभूतक्षीरत्वस्यचव्यावहारिक त्वेनाधिष्ठाननीरसमसत्ताकत्वादध्यस्यमानप्रातिभासिकनीरगतक्षीरत्वापेक्षयाऽधिकसत्ताकत्वेनसोपाधिकभ्रमत्वप्रयोजकसद्भा वान्निरुपाधिकभ्रमतयांगीकृतस्यापिनीरेक्षीरत्वाध्यासस्यसोपाधिकत्वापातादितिभावः। बुद्धिश्चिद्रागरहितांतःकरणवृत्तिविशेषः।

बुद्धिगतकर्तृत्वस्यपारमार्थिकतायावा आत्मस्थकर्तृत्वस्यप्रातिभासिकतायावा प्रसंगात् । उ भयत्रापिनीरेक्षीरत्वाध्यासस्यापिसोपाधिकत्वापाताच्च । एतेनकर्तृत्वंबुद्धिगतमहमर्थेऽहम र्थगतंवाऽऽत्मन्यध्यस्यते ततश्चचैतन्यंकर्त्रितिमनःकर्त्रितिचप्रतीत्यभावोयुक्तइतिनिरस्तं ।

तथाचकेवलंबुद्धिगतंकर्तृत्वंचिदचित्संवलनरूपेऽहमर्थेआरोप्यते अहमर्थनिष्ठंवाशुद्धात्मन्यारोप्यतइत्यर्थः ॥ ततश्चेति ॥ बुद्धि गतमहमर्थेआरोप्यतइतिपक्षेआरोपितकर्तृत्वस्यमनसिसत्वेनमनःकर्त्रितिप्रतीतिसंभवेपिचैतन्येआरोपितकर्तृत्वस्याप्यभावेननचै तन्यंकर्त्रितिप्रतीतिःसंभवति तथाचप्रतीत्यभावोनयुक्तइत्यत्रप्रतीतिद्वयाभावोयुक्तइत्यर्थः । तथाचैकसत्वेपिद्वयंनास्तीतिद्वित्वाव च्छिन्नाभावइतिज्ञातव्यं। तेनपक्षद्वयेपिमनःकर्त्रितिप्रतीतिसंभवात्कथंमनःकर्त्रितिप्रतीत्यभावोक्तिरितिनिरस्तं। एतेनेत्युक्तंविशद

SGDF
Foundation

यति॥आद्यइत्यादिना॥ बुद्धिगतंकर्तृत्वमहमर्थेआरोप्यतइत्याद्यपक्षेबुद्धिःकर्त्रीमनःकर्त्रितिप्रतीतिद्वयंस्यादेवेतिदूषणेसत्येवदूष णांतरमिदमितिज्ञातव्यं । अहमर्थगतंकर्तृत्वमात्मन्यध्यस्यतइतिद्वितीयपक्षेचैतन्यंकर्तृमनःकर्त्रितिप्रतीतिद्वयंस्यादेवेतिदूषणेस त्येवदूषणांतरमाह ॥ द्वितीयइति ॥ नन्वहंकर्तेतिप्रतीत्यन्यथानुपपत्त्याऽऽत्मनिकर्तृत्वाध्यासोंऽगीकार्यइत्यतउक्तमहमर्थस्थेने ति ॥ अनध्यस्तेति ॥ तत्रैववास्तवकर्तृत्वांगीकारादितिभावः । कर्तृत्वेपिकरणत्वमौपचारिकमितिनवक्तव्यमित्याशयेनोक्तंप्र

आद्ये आत्मन्यारोपितस्याप्यनर्थाभावेनबुद्धेरेवाहमर्थस्यैववाबंधमोक्षापातात्। द्वितीयेऽहमर्थस्थे नानध्यस्तकर्तृत्वेनैवाहंकर्तेतिप्रतीत्युपपत्त्याऽऽत्मनितदध्यासासिद्धेः। किंच मनसःकर्तृत्वेऽपिक रणत्वप्रसिद्धिविरोधः । अपिच "कर्ताशास्त्रार्थवत्त्वादि"त्यधिकरणेत्वयापिसांख्यरीत्याबुद्धेःक र्तृत्वेप्राप्तेजीवस्येतिसिद्धांतितत्वेन तद्विरोधः । बुद्ध्यात्मनोरविवेकस्यसांख्यमतेपिसत्वात् । किं च "बंधस्यतदपायेनकृतेस्तत्फलभाक्तया । सामानाधिकरण्याचनबुद्धेःकर्तृतामता"॥ तथाहि ।

सिद्धीति । करणत्वेनसर्वैर्ज्ञायमानत्वादित्यर्थः । उपलब्धिंप्रतिकरणत्वेपिअन्यत्रकर्तृत्वंयुक्तमितिचेन्न । चक्षुरादिवत्करणेमनसि द्वैविध्यकल्पनानुपपत्तेरितिभावः । अंतःकरणगतमेवकर्तृत्वमित्यंगीकारेदूषणांतरमाह ॥ अपिचेति ॥ ननुकर्तृत्वाश्रयबुद्ध्यवि वेकमात्रेणजीवस्यकर्तृत्वंमयासिद्धांतितमितिचेत्तत्राह ॥ बुद्ध्यात्मनोरिति ॥ तथाचत्वन्मतेतदधिकरणसिद्धांतानुत्थानप्रसंग

SGDF Sri Gargeshwari Digital Foundation

इतिभावः । फलभोक्ताफलभोक्तृत्वंतयेत्यर्थः । बंधस्यतदपायेनसामानाधिकरण्यादित्येतद्व्याचष्टे ॥ कर्तृत्वेति ॥ स्यादिति ॥ तथाचनात्मनोमोक्षःस्यात् । तथाच "सपात्रबंधमोक्षयो" रितिवचनविरोधइतिभावः । ननुकर्तृत्वादिरूपबंधस्यबुद्धिगतत्वेप्यज्ञानरूपबंधस्यात्मगतत्वान्मोक्षसामानाधिकरण्यमस्तीतिचेत्तत्राह ॥अज्ञानमपिहीति॥ अज्ञानंतस्वरूपेणबंधः किंतुदुःखादिभोक्तृत्वादिरूपानर्थापादकतया तथाचदुःखादिभोक्तृत्वाद्यनर्थरूपमुख्यबंधस्यबुद्धिगतत्वाद्बुद्धेरेवमोक्षापातइतिभावः॥मिथ्येति॥ तथाचबुद्धिगतभोक्तृत्वादेर्जीवेआरोपितत्वेनमिथ्याभूतभोक्तृत्वरूपाऽनर्थस्यजीवएवसद्भावाद्बंधमोक्षयोःसामानाधिकरण्यंयुक्त

कर्तृत्वभोक्तृत्वाद्यनर्थरूपोबंधोबुद्धिगतश्चेत् ततोमोक्षोपितद्गतःस्यात् बंधमोक्षयोःसामानाधिकरण्यात् । अज्ञानमपिहिदुःखादिभोगद्वारैवानर्थः । नचबुद्धिगतंसत्यंभोक्तृत्वादिकंनानर्थः किंतु तदुपाधिकंमिथ्याभोक्तृत्वादिकमितिवाच्यं एतत्कल्पनायाःकर्तृत्वाध्याससिद्ध्यधीनत्वेनान्योन्याश्रयात् । मोक्षस्यसत्यस्यैवपुरुषार्थत्ववत् भोक्तृत्वादिरूपबंधस्यापिसत्यस्यैवानर्थत्वाच ।

मितिभावः ॥ एतदिति ॥ कल्पितोऽनर्थोऽस्तीतिकल्पनायाइत्यर्थः ॥अन्योन्येति॥ कर्तृत्वाध्याससिद्धौमिथ्याभूतकर्तृत्वाद्बंधत्वसिद्धिः तत्सिद्धौचमिथ्याभूतबंधमोक्षयोर्जीवेसामानाधिकरण्यस्यसंभवेनतद्विरोधाभावाद्बुद्धेरेवसत्यभूतकर्तृत्वाद्युपपत्तेरात्मनितदध्याससिद्धिरित्यन्योन्याश्रयादित्यर्थः ॥ सत्यस्यैवेति ॥ अन्यथास्वाप्नब्रह्महत्यादेरप्यनर्थत्वापातइतिभावः। सत्यभूतानर्थस्यचबुद्धिनिष्ठत्वेनमोक्षस्यचात्मनिष्ठत्वेनबंधमोक्षयोःसामानाधिकरण्यायोगएवेतिध्येयं। ननुकर्तृत्वादिबंधवन्मोक्षस्यापिकल्पि

SGDF
Sri Gargeshwari Digital Foundation

तस्यैवपुरुषार्थत्वादात्मनिबंधमोक्षयोःसामानाधिकरण्योपपत्तिरितिशंकांभट्टवार्तिकसंमत्यापरिहरति ॥ तदुक्तमिति ॥ स्वप्नसुखवन्मोक्षसुखस्यापिकल्पितत्वमंगीकुर्वाणंबौद्धंप्रत्युच्यते ॥ नहीति ॥ नहिस्वप्नसुखार्थंकश्चिद्यत्नंकरोति यदृच्छयानिद्रायांस्वप्नस्यस्वतएवलभ्यमानत्वेनतत्सुखस्यापितथात्वात् । अतोमोक्षसुखस्यापिकल्पितत्वेनतस्यापिस्वतएवयदृच्छयालभ्यमानत्वसंभवात्साधनानुष्ठानंविहायतूष्णीमासीतेत्यर्थः । मिथ्याभूतभोक्तृत्वकर्तृत्वादेरनर्थस्यजीवेसद्भावमंगीकृत्यबंधमोक्षसामानाधिकरण्यांगीकारेस्थूलःकरोमीत्यादिप्रतीतेर्देहस्यापिमिथ्याभूतकर्तृत्वभोक्तृत्वादिरूपानर्थान्वयप्राप्तौमोक्षस्यापातइत्याह॥ स्थूलइति ॥

तदुक्तंवार्तिकेबौद्धंप्रति । “नहिस्वप्नसुखाद्यर्थंधर्मेकश्चित्प्रवर्तते । यादृच्छिकत्वात्स्वप्नस्यतूष्णीमासीतपंडित” इति । स्थूलःकरोमिस्थूलोहंभुंजइत्यादिप्रतीत्यादेहस्याप्यनर्थान्वयापाताच्च । नापिबुद्ध्युपाधिकमात्मस्थंभोक्तृत्वादिकमनर्थः नतुदेहस्थमितिवाच्यं । अनर्थाश्रयस्यात्मनोऽनर्थकोटित्वायोगात् ।

अनर्थःआत्मनइतिशेषः।तथाचतद्गतएवबंधोमोक्षश्चनदेहगतइतिभावः॥ अनर्थकोटित्वेति ॥ बुद्ध्युपाधिकात्मस्थभोक्तृत्वस्यात्मनोनर्थत्वेआत्मनोप्यनर्थकोटिनिवेशापत्तेरात्माश्रयः तथाऽनर्थहानेःपुरुषार्थत्वादात्मनोपितत्कोटिनिविष्टत्वेनतद्धानिरपिपुरुषार्थःस्यादितिभावः । किंचबुद्धिगतभोक्तृत्वादेःशुद्धात्मन्यध्यासांगीकारेआत्मनिभोक्तृत्वादिप्रतीत्याभवितव्यं । अस्तीतिचेत्भ्रमकालेप्रमाकालेवाभ्रमकालेचेदहंभोक्तेत्यहमर्थनिष्ठत्वेनैवभोक्तृत्वंप्रतीयते नशुद्धात्मनि प्रमाकालेचेत्बुद्धिर्भोक्त्रीतिप्रतीयेत ततः

SGDF
Sri Gargeshwari Digital Foundation

शुद्धात्मनितद्भ्रमोनयुक्तइत्याह ॥ भ्रमकालइति ॥ कृतेस्तत्फलभोक्तृतयासामानाधिकरण्याच्चेत्युक्तंहेतुंविवृणोति ॥ अपिचे
ति ॥ कुतइत्यतआह ॥ शास्त्रफलमिति ॥ पूर्वतंत्रेतृतीयाध्यायस्थंसूत्रं "शास्त्रफलंप्रयोक्तरितस्मात्स्वयंप्रयोगःस्यादि"ति ।
अस्यार्थः विधिनिषेधात्मकशास्त्रफलंस्वर्गनरकादि प्रयोक्तरिकर्मप्रयोरि तत्साधनकर्मकृतिमतियजमानएव।तस्मात्स्वयमेवयजमा
नोंगप्रधानेषुकर्तास्यादिति । साधनकृतिः साधनविषयकप्रयत्नः ॥ अन्यथेति ॥ साधनकृतेःफलभाक्त्वेनसामानाधिकरण्या

भ्रमकालेऽहंभोक्तेतिप्रमाकालेतुबुद्धिर्भोक्त्रीत्येवप्रतीत्याशुद्धात्मनिकदापितद्प्रतीतेश्च ।
अपिच मनसःश्रवणादिकर्तृत्वेतत्फलंमोक्षोपितस्यैवस्यात् "शास्त्रफलंप्रयोक्तरी"ति
न्यायेनयस्मिन्साधनकृतिः तस्यैवफलभाक्त्वात् अन्यथाकृतहानाकृताभ्यागमापातात् ।

भावमंगीकृत्यबुद्धेरेवकर्तृत्वादिकंआत्मनएवमोक्षइत्यंगीकारेबुद्धिकृतश्रवणादेर्हानिःवैयर्थ्यंफलाभावात् श्रवणादिकर्तृत्वाभावेपि
आत्मनोमोक्षागमइत्यदृष्टकल्पनास्यादित्यर्थः । ननुशास्त्रफलंप्रयोक्तरीतिननियमः"पुत्रेजातेइष्टिंकुर्या"दित्येवंपुत्रपूतत्वोद्देशेन
नजातेष्टिःपितुर्विधीयते तथापितुःस्वर्गप्राप्त्यर्थंपुत्रंप्रतिश्राद्धंविधीयते एवंजातेष्टिकृतेःपूतत्वरूपफलेनसामानाधिकरण्यंनास्ति पू
तत्वरूपफलस्यपुत्रगतत्वात् तथास्वर्गरूपफलस्यापिपितृगतस्यनपुत्रगतश्राद्धमितिसामानाधिकरण्यमितिव्यभिचारमित्याशंक्या

SGDF
Sri Gargeshwari Digital Foundation

ह ॥ जातेष्टाविति ॥ पित्रर्थोयःपुत्रःतद्गतंपूतत्वादिकंतदनुष्ठातुर्जातेष्ट्यनुष्ठातुःपितुरेवफलं । कुतइत्यतआह ॥ तेनेति ॥ जातेष्टिकर्त्रापित्राममपुत्रस्यपूतत्वार्थमिष्टिंकरिष्यइतिसंकल्पकरणादित्यर्थः । तथाचपूतपुत्रकत्वंपितुरेवफलं । ममपूतपुत्रकत्वार्थंइष्टिंकरिष्यइत्यपिसंकल्पःकार्यः तेनचपुत्रेपिपूतत्वंसंपाद्यते । एवंस्वर्गगामिपितृकत्वंश्राद्धकर्तुरेवफलमितियुक्तं शास्त्रफलंप्रयोक्तरीतिन्यायेनकृतेःफलभाक्त्वेनसामानाधिकरण्यमितिभावः । ननुपुत्रस्यपित्रर्थत्वेनपूतपुत्रकत्वंपितुरेवफलं तेनतदुद्देशादित्युक्तं एवमिहापिआत्मनोंतःकरणार्थत्वेनमुक्तात्मकत्वमपिअंतःकरणस्यैव तेनांतःकरणेनात्ममोक्षोद्देशादित्यहमपिवदिष्यामीतिचेत् मै

जातेष्टावपिपित्रर्थपुत्रगतंपूतत्वादिकंतदनुष्ठातुःपितुरेवफलं तेनतदुद्देशात् । नचात्रात्मांतःकरणार्थः येनात्मगतोमोक्षोमनसउद्देश्यःस्यात् । आर्त्विज्यादेरपिदक्षिणैवफलं । नन्वारोपितमेववाआत्मारोपितमेववाकर्तृत्वंफलान्वयेतंत्रमितिचेन्न ।

वमप्रामाणिकंभाषिष्ठाइत्याह ॥ नचेति ॥ अंतःकरणार्थः तादृँआत्मकोनचेत्यर्थः । प्रत्युतांतःकरणमेवात्मार्थमितिद्रष्टव्यं । ननुयागविषयककृतिमतांऋत्विजांस्वर्गफलाभावेनव्यभिचारान्नकृतेःफलभाक्त्वेनसामानाधिकरण्यमित्यतआह ॥ आर्त्विज्यादेरिति ॥ आर्त्विज्यस्यस्वर्गःफलमेवनभवति द्रव्यदानेनयजमानपरिक्रीततयायागकर्तॄणांतेषांदक्षिणायाएवफलत्वात् अतोनव्यभिचारइत्यर्थः । कर्तृत्वस्यफलभाक्त्वेनसामानाधिकरण्यंशंकते ॥ नन्विति ॥ आरोपितमेवेति ॥ आत्मेतिविशेषणरहितमित्यर्थः । तथाचजीवेकर्तृत्वसद्भावेनमोक्षोपितस्यैवेतिभावः । बंधमोक्षयोःसामानाधिकरण्यायपूर्वंशंकितं कृतिफलयोःसामाना

SGDF
Sri Gargeshwari Digital Foundation

धिकरण्यायेहपुनराशंकेतिभेदः ॥ निरस्तत्वादिति ॥ आरोपितकर्तृत्वस्यफलभाक्त्वान्वयेतंत्रत्वेतस्यस्थूलःकरोमीतिप्रतीत्यादे हादावपिसत्वात्फलभाक्त्वान्वयप्रसंगःआत्मारोपितकर्तृत्वस्यफलान्वयतंत्रत्वेकर्तृत्वाध्यासेसिद्धेआरोपितस्यापिकर्तृत्वस्यफलान्व यप्रयोजकत्वसिद्धिस्तत्सिद्धौचकृतिफलयोःसामानाधिकरण्याव्यभिचारात्कर्तृत्वाध्याससिद्धिरित्यन्योन्याश्रयइत्येवंनिरस्तत्वादि तिभावः । आरोपितकर्तृत्वस्यवाऽऽत्मारोपितकर्तृत्वस्यवाभावेनफलान्वयइतिव्यतिरेकव्याप्तिःसंभवतिव्यभिचारइत्याह ॥ स

निरस्तत्वात् । सत्यकर्तृत्ववत्याबुद्धेःसांसारिकफलभोक्तृत्वापाताच्च । नचोभयंतंत्रं अननुगमात् । अ पिच कृतिकर्मत्वकरणत्वादीनांमनसिश्रुतेः बुद्ध्यभावेपिकर्तृत्वश्रुतेर्बुद्धेर्नकर्तृता । श्रूयतेहि "तन्मनो कुरुते"त्यादौमनसःकृतिकर्मत्वं तथा "शृण्वंतःश्रोत्रेणविद्वांसोमनसे"त्यादिश्रुतौ "शरीरवाङ्मनो भिर्यत्कर्मप्रारभतेनर"इत्यादिस्मृतौचकरणत्वं "तथामनउदक्रामत्मीलितइवाश्नन्पिबन्नास्तैवे"त्या दौमनसउत्क्रमणेऽप्यात्मनःकर्तृत्वं तथा "एतंप्राणमयमात्मानमुपसंक्रम्य" "एतंमनोमयमात्मान मुपसंक्रम्य इमांल्लोकान्नीकामरूप्यनुसंचरन्नि"त्यादौत्वद्रीत्याप्राणाद्यतिक्रमणेपिसंचरणादिकर्तृत्वं

त्येति ॥ फलभोक्तृत्वाच्चेत्येवपाठः । नन्वात्मनिफलान्वयेआरोपितकर्तृत्वंतंत्रं । बुद्धौचफलभोक्तृत्वान्वयेसत्यभूतंकर्तृत्वंतंत्रमि त्याशंक्यानुगमेननिराकरोति ॥ नचेति ॥ अन्यान्यत्वेनक्रोडीकारइतिचेन्न । गौरवात् । अन्योन्याभावस्यधर्मिस्वरूपत्वेनपु नरननुगमएवेति । अतएवास्वरसादाह ॥ अपिचेति ॥ बुद्ध्यभावेपि संसारदशायांकर्तृत्वश्रुतेरित्यर्थमभिप्रेत्याह ॥ तथेति ॥

SGDF
Sri Gargeshwari Digital Foundation

बुद्ध्यभावेपिपरममुक्तिदशायांपर्यटनादिकर्तृत्वश्रुतेरित्यप्यर्थमभिप्रेत्याह ॥ तथेति ॥ यद्यप्यत्रसतत्रेत्यादिकमेवोदाहर्तव्यं तथा पिपरममुक्तित्वज्ञापनार्थंपरंज्योतिरित्यादिपूर्ववाक्योदाहरणमितिज्ञातव्यं । "प्रत्यक्षैषाकर्तृताजीवसंस्थातथागमादनुमानाच्चस र्वपूर्णः–प्रमाणंतत्रयंचाविरोधेनैकत्रस्थ"मितिमहाभारततात्पर्यनिर्णयहटवादीयवचनंहृदिनिधायतदर्थमेवकारिकयासंगृह्णाति ॥ अपिचेति ॥ अनेनप्रत्यक्षैषेतिवाक्योक्तंप्रत्यक्षादिकंविवृतंभवति । श्लोकंव्याकुर्वन्नेवप्रत्यक्षादीनामप्रामाण्यंकिंनस्यादित्याशं

तथा परंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यतेसतत्रपर्यैतिजक्षन्क्रीडन्रममा
ण"इत्यादौस्वरूपाविर्भावरूपपरममुक्तावपिकर्तृत्वं। अपिच "अहंकरोमीत्यध्य
क्षात्फलभाक्त्वादिलिंगतः। कर्ताऽऽत्मेत्यादिवाक्याच्चस्थितंकर्तृत्वमात्मनः"॥

कांचनिरस्करोति ॥ नचेति ॥ प्रत्यक्षेणानुमानैःसिद्धेआत्मनःकर्तृत्वादावित्यन्वयः । विमतः अहमर्थभिन्नत्वादिनाविमति विषयीभूतः । संमतवत् यजमानवत् आदिशब्दोक्तलिंगंदर्शयति ॥ अज्ञानमित्यादिना ॥ आत्ममात्राश्रिताज्ञानसामाना धिकरण्यसिद्धौआत्मनएवज्ञातृत्वप्राप्त्यातत्प्रयुक्तंकर्तृत्वमपितस्यैवसेत्स्यतीतिभावः। संमतो निगडः । आदिशब्दोदितेश्वरकर्तृ त्वप्रतिपादकंश्रुतिवाक्यंदर्शयति ॥ आनंदेति ॥ कर्ताविज्ञानात्मायोवेदेतिजीवकर्तृत्वश्रुतेरानंदभुगित्यादीश्वरकर्तृत्वश्रुतेश्च

प्रत्यक्षप्राप्तजीवेश्वरकर्तृत्वानुवादपरत्वान्नस्वार्थेतात्पर्यमितिबाधकमाशंक्यनिराकरोति ॥ नचेति ॥ अहमर्थान्यात्माजीवः । नहिअहंकर्तेतिप्रत्यक्षप्रतीतिंविहायतदन्यात्मकर्तृत्वंप्रत्यक्षप्राप्तं येनश्रुतिरनुवादःस्यात् अहंकर्तेतिप्रत्यक्षंचनात्मकर्तृतावगा हि त्वन्मतेस्याहमर्थभिन्नत्वादितिभावः । नन्वात्मचैतन्यस्यनिर्धर्मकत्वान्नतस्यकर्तृत्वमित्याशंक्यनिराकरोति ॥ नचेति ॥

नचाहंकरोमीत्यादिप्रत्यक्षेण विमतआत्मामोक्षसाधनविषयकृतिमान् तत्फलान्वयित्वात् सम्मतवत्।
अज्ञानंज्ञानसमानाधिकरणं ज्ञाननिवर्त्यत्वात् ज्ञानप्रागभाववत्। दुःखादिभोगःमोक्षसमानाधिकरणः
बंधत्वात्सम्मतवदित्याद्यनुमानैः"कर्ताविज्ञानात्मायोवेदेदंजिघ्राणीतिसआत्मा आनंदभुक्तथाप्राज्ञ"इ
त्यादिश्रुतिभिश्चासिद्धेआत्मनःकर्तृत्वादौबाधकमस्ति । नचश्रुतिरनुवादः अहमर्थान्यात्मस्यकर्तृत्वस्य
"नामरूपेव्याकरोत्सहिसर्वस्यकर्ते"त्यादिश्रुत्युक्तेश्वरस्यकर्तृत्वस्यचप्रत्यक्षेणाप्राप्तेः। नचनिर्धर्मकत्वंबाध
कं निर्धर्मकत्वरूपधर्मभावाभावाभ्यांव्याघातात् ज्ञानत्ववत् सौषुप्तिकाज्ञानादिसाक्षित्ववत् बुद्धिंप्रति
बुद्ध्यविशिष्टस्यज्ञातृत्ववच्च । सत्यस्यासत्यस्यवाज्ञातृत्वादेरप्यात्मन्येवसंभवाच्च। नापिनिष्क्रियत्वंबाधकं

निर्धर्मकत्वेति ॥ ब्रह्मणिनिर्धर्मकत्वरूपधर्मसद्भावेनिर्धर्मकत्वोक्तिव्याघातः । तदभावेसधर्मकत्वस्यैवप्राप्त्यानिर्धर्मकत्वोक्ति व्याघातइत्यर्थः । ज्ञानत्वादिधर्मवत्ज्ञानकर्तृत्वादिधर्मांगीकारे बाधकाभावान्ननिर्धर्मकत्वंब्रह्मणइत्याह ॥ ज्ञानत्ववदिति ॥ बुद्ध्यविशिष्टस्येति ॥ बुद्धिविशिष्टस्यैवबुद्धिज्ञातृत्वेआत्माश्रयापातादितिभावः ॥ निष्क्रियत्वमिति ॥ कर्तृत्वांगीकारेक्रि

SGDF
Foundation

यावेशप्राप्तेरितिभावः । निष्क्रियत्वंबाधकमित्यत्रात्मनोधात्वर्थक्रियाशून्यत्वंअभिप्रेतं परिस्पंदशून्यत्वंवा नाद्यइत्याह ॥ क्रियायाइति ॥ अस्त्यादीति ॥ अस्तिब्रह्मेतिचेद्वेदेत्यादिवाक्यादितिभावः ॥ अप्रयोजकत्वादिति ॥ ब्रह्मणः परिस्पंदरूपक्रियाभावेपिज्ञानादिरूपक्रियानिमित्तंज्ञातृत्वादिकंकिंनस्यात् । ज्ञानादीनामपरिस्पंदरूपत्वेनविरोधाभावादितिभावः ॥ निर्विकारत्वमिति ॥ कर्तृत्वांगीकारेविकारप्राप्तेरितिभावः । आत्मनोज्ञानरूपगुणाश्रयत्वेनज्ञातृत्वांगीकारेद्रव्यांतरत्वापत्तिरू

क्रियायाधात्वर्थत्वेआत्मन्यप्यस्त्यादिधात्वर्थसत्तादेःसत्त्वेनासिद्धेः । परिस्पंदत्वेज्ञानादीनामपरिस्पंदत्वेनाप्रयोजकत्वात्। नापिनिर्विकारत्वंबाधकं आकाशस्यसंयोगाद्याश्रयत्वइवात्मनोऽज्ञानतद्ध्वंसाद्याश्रयत्वइवचज्ञानरूपगुणाश्रयत्वेपिद्रव्यांतरत्वापत्तिरूपविकारानापातात्। नचसुषुप्तौमनसोऽभावेकर्तृत्वाद्यदर्शनंबाधकं तदाऽप्युच्छ्वासादिकर्तृत्वदर्शनात् । "सुप्तोभूर्भूरित्येवप्रश्वसिती"त्यादिश्रुतेश्च ।

पविकाराप्राप्तेः यथाह्याकाशस्यसंयोगाद्याश्रयत्वेपिनद्रव्यांतरत्वापत्तिरूपोविकारः यथावाऽऽत्मनस्त्वन्मतेऽज्ञानरूपबंधतद्ध्वंसरूपमुक्त्याश्रयत्वेपिनद्रव्यांतरत्वापत्तिरूपोविकारित्वं तद्वदित्याह ॥ आकाशस्येति ॥ सुषुप्ताविति ॥ मनसोऽभावेमनसोभावदशायांसुषुप्तावित्यन्वयः । तथाचात्मनःकर्तृत्वांगीकारेतस्यसुषुप्तावपिसत्वेनतत्रापिकर्तृत्वापातइत्यत्रेष्टापत्तिरित्यर्थः । ॥ ३९२ ॥
किंचमनसोऽभावेकर्तृत्वाद्यदर्शनंनमनसःकर्तृत्वंगमयति किंतुनिमित्तत्वमेव निमित्तकारणव्यतिरेकेणापिकार्यादर्शनसंभवात्।

SGDF
Sri Gargeshwari Digital Foundation

नहिदंडाभावेघटादर्शनंदंडस्यकर्तृत्वंगमयतीतिभावेनाह ॥ देहादिवदिति ॥ देहाभावेकर्तृत्वादर्शनाद्देहस्यापिकर्तृत्वापातइति भावः ॥ श्रुतिरिति ॥ "विज्ञानंयज्ञंतनुतेकर्माणीति" श्रुतौविज्ञानशब्दोक्तमनसःकर्तृत्वप्रतीतेरित्यर्थः । ननु "कामःसं कल्प"इत्यादिश्रुतौकामादीनांमनआद्यात्मकत्वंकथ्यते मनआद्यात्मकत्वंचतत्कर्तृत्वमेवेति मनसःकर्तृत्वसिद्धिरितिचेत्तत्राह ॥ कामइति ॥ श्रुतेर्मनःकारणत्वपरत्वादित्यर्थः । श्रुत्या श्रुत्यंतरसंवादेन । तथाचकामादीनांमनआद्यभेदोक्तिःश्रुत्यंतरानुसारे

देहादिवन्मनसोनिमित्तत्वेनापितदुपपत्तेश्च । नापिश्रुतिर्बाधिका "विज्ञानंयज्ञंतनुत"इति श्रुतेः"विज्ञानंब्रह्मचेद्वेदतस्माच्चेन्नप्रमाद्यति । शरीरेपाप्मनोहित्वासर्वान्कामान्समश्नुत"इत्या दिवाक्यशेषेणब्रह्मपरत्वात्।"कामःसंकल्प"इत्यारभ्य"एतत्सर्वंमनएवे"तिश्रुतेः"मनसावाअ ग्रेसंकल्पयती"त्यादिश्रुत्यामनःकरणकत्वपरत्वात् । "आत्मेंद्रियमनोयुक्तंभोक्तेत्याहुर्मनी षिण"इतिश्रुतेरात्मनोभोक्तृत्वेदेहादिवन्मनसःसहकारितेत्येवंपरत्वात् । "ध्यायतीवलेलाय तीवे"त्यादिश्रुताविवशब्दस्यपरतंत्रप्रभौप्रभुरिवेतिवत् जीवस्यकर्तृत्वस्येश्वरतंत्रत्वपरत्वात् ।

णमनसःकारणत्वपरैव नकर्तृत्वपरेत्यर्थः ॥ युक्तमिति ॥ जीवमित्यर्थः । अनयाकेवलस्यात्मनोभोक्तृत्वाभावावगमान्मनोयु क्तस्यैवचतदवगमेनावश्यकत्वान्मनसएवभोक्तृत्वमवगम्यतइतिभावः ॥ सहकारितेति ॥ आत्मशब्दोदितदेहादिसाधारण मनस्सहकारेणात्मनोभोक्तृत्वमुच्यतएव नतुमनसोभोक्तृत्वं । तथात्वेदेहेंद्रिययोरपिभोक्तृत्वापत्तेरितिभावः । ननुध्यायतीवेति

SGDF
Sri Gargeshwari Digital Foundation

श्रुतौइवशब्दश्रवणात् अहंकारविमूढःसन्स्वातंत्र्येणाहंकर्तेतिमन्यतइत्येवंजीवेस्वातंत्र्येणकर्तृत्वनिवारकत्वादित्यर्थः । ननुवस्तु तोकर्ताजीवआत्मानंकर्तारंविमूढःसन्मन्यतइतिकर्तृत्वमात्रनिवारकत्वंकिंनस्यादित्यतआह ॥ तत्रैवंसतीति ॥ आत्मानंकेवलं ईश्वरानियतंकर्तारंयःपश्यतिनसपश्यतीतिईश्वरानियतकर्तृत्वंमन्यमानस्यैवनिंदनात् । सर्वथाकर्तृत्वनिषेधेतुकेवलपदवैयर्थ्यादि तिभावः । उदाहृतश्रुतिस्मृतीनामस्मदुक्तार्थमनंगीकृत्यजीवकर्तृत्वनिषेधकत्वांगीकारेबाधकमाह ॥ अन्यथेति ॥ उक्तेति ॥

"अहंकारविमूढात्माकर्ताहमितिमन्यत" इतिस्मृतेरपिजीवेस्वातंत्र्यनिषेधकत्वात् "तत्रैवंसतिकर्तारमात्मनःकेवलंतुयः॥ पश्यत्यकृबुद्धित्वान्नसपश्यती" त्यादिवाक्य शेषात् । अन्यथोक्तश्रुत्यादिविरोधात् । नचकर्तृत्वस्यक्लेशसंबंधान्नश्रुतिस्तत्परा द र्शपूर्णमासादावप्यतात्पर्यापातात् । लीलादेरुच्छ्वासादेश्चाकरणएवक्लेशदर्शनाच्च ।

कर्ताविज्ञानात्मायोवेदेदंजिघ्राणीत्याद्युदाहृतनिरवकाशश्रुतिविरोधादित्यर्थः ॥ क्लेशसंबंधादिति ॥ क्लेशनियतत्वादित्यर्थः । श्रुतिः ईश्वरादिकर्तृत्वप्रतिपादिका ॥ दर्शेति ॥ "दर्शपूर्णमासाभ्या" मितिश्रुतेरपिस्वार्थतात्पर्यंनस्यात् । तत्रापियागादिकरणे बह्वायासेनक्लेशसद्भावादित्यर्थः । किंचनकर्तृत्वंक्लेशव्याप्तं किंतुलीलायाअकरणेश्वासादेश्चाकरणएवक्लेशदर्शनात् कर्तृत्वाभाव एवक्लेशव्याप्तइत्याह ॥ लीलादेरिति ॥ किंचकर्तृत्वस्यनक्लेशेनसंबंधः प्रत्युतफलसंबंधएवश्रूयतेऽतःश्रुतेःस्वार्थेतात्पर्यमवश्यमं

SGDF
Sri Gargeshwari Digital Foundation

गीकार्यमितिउक्तश्रुत्यादिबलादात्मनएवकर्तृत्वसिद्धिर्नान्यस्येतिभावेनाह ॥ यदावाइति ॥ फलेति ॥ स्वस्थतयाऽवस्थानरू
पेत्यर्थः॥ ७ ॥ कर्तृत्वाध्यासभंगविवरणं ॥५७॥ आत्मानात्मनोरन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्यसर्वेप्रमातृत्वादिव्यव
हाराःप्रवर्ततेइतिपरभाषितमितरेतराध्यासंदूषयितुमनुवदति ॥ यच्चोच्यतइति ॥ तद्धर्माः देहधर्माःब्राह्मण्यकारणत्वाद्याः
आत्मनिदेहैक्यतद्धर्मयोरध्यासेप्रत्यक्षंप्रमाणयति ॥ अहंब्राह्मणइति ॥ ब्राह्मण्यस्यदेहधर्मत्वेनात्मनितदध्यासोदेहैक्याध्यासंवि

"यदावैकरोत्यथनिस्तिष्ठतीति" श्रुत्यैवकर्तृत्वस्यफलसंबंधोक्तेश्चेति ॥ ७ ॥ कर्तृ
त्वाध्यासभंगः ॥५७॥ यच्चोच्यते(आत्मनिदेहेंद्रियाद्यैक्यंतद्धर्मांश्चाध्यस्यंते)दे
हेंद्रियादेरात्मन्यैक्यंतद्धर्मांश्चाध्यस्यंते तत्रचाहंब्रह्मणोऽहंकाणइत्यादिप्रत्यक्षं

नानसंभवतीतितदैक्याध्याससिद्धिरित्यर्थः । आत्मनींद्रियैक्यतद्धर्मयोरध्यासेप्रत्यक्षंप्रमाणयति ॥ अहंकाणइति ॥ अस्त्यत्र
संप्रदायः अक्षिसंबंधीयःकृष्णताराद्यसंबद्धत्वादिरूपोविकारविशेषःसकाणशब्दार्थः अयंचचक्षुर्धर्मः अतएवब्राह्मणस्याक्षिका
णमितिप्रयोगः । तथा "येनांगविकार" इतिसूत्रे अक्ष्णाकाणइत्युदाहृत्यविकृताक्षिमानित्यर्थइतिकाशिकायामुक्तत्वात् । एवंचा
त्राहं काणइत्यात्मनिइंद्रियधर्मरूपकाणत्वाध्यासः इंद्रियैक्याध्यासंविनानसंभवतीतितदैक्याध्याससिद्धिरित्यर्थः ॥ ब्राह्मणो

SGDF
Sri Gargeshwari Digital Foundation

यजेतेति ॥ ब्राह्मण्याद्याश्रयस्यशरीरस्यजडत्वेनानियोज्यत्वात्तदैक्याध्यासवानात्मैवनियुज्यतइति । देहैक्याध्यासेऽर्थापत्तिं
चाह ॥ देहेति ॥ अनात्मत्वेनेति ॥ आत्मभिन्नत्वेनेत्यर्थः ॥ देहात्मैक्यस्येति ॥ किंतुदेहाहमर्थैक्यविषयत्वमेवेति आत्म
निदेहैक्याध्यासेनेदंप्रत्यक्षंप्रमाणमित्यर्थः । चिदचित्संवलनस्यदूषितत्वादहमर्थेब्राह्मण्यादिविशिष्टदेहैक्याध्यासेआत्मन्यपिसप्रा
प्तएवेतिशंकानवकाशइतिहृदयं । अस्तुदेहात्मैक्याध्यासः तथापिनतत्रप्रत्यक्षंप्रमाणमितित्वयावक्तुंशक्यमित्याह ॥ देहेति ॥
तद्विरोधीति ॥ देहात्मैक्यावगाहिप्रत्यक्षविरोधीत्यर्थः । अयमभिसंधिः । पूर्वंतावत्प्रत्यक्षस्यजात्याउपक्रमादिन्यायैश्चप्राबल्यंसम

"ब्राह्मणोयजेते"त्यादिश्रुतिर्देहाद्यैक्याध्यासाभावेसुषुप्तौप्रमातृत्वाद्यदर्शनात्तदन्यथानु
पपत्तिश्चमानमिति तन्न त्वन्मतेऽहमर्थस्यानात्मत्वेनाहंब्राह्मणइत्यादेर्देहात्मैक्याविषयत्वा
त् । देहात्मैक्यस्यप्रत्यक्षत्वेतद्विरोध्यनुमानाद्यप्रामाण्यस्योक्तत्वेनतद्भेदासिद्ध्यापत्तेश्च ।

र्थ्यतद्विरोध्यनुमानादेरेवाप्रामाण्यमित्युक्तं एवंचेहदेहात्मैक्यस्यप्रत्यक्षसिद्धत्वेकदापितद्भेदसिद्धिर्नस्यात् तत्सिद्धिर्हिदेहादीनां
व्यावृत्तत्वात्सूत्रानुस्यूतमणिवदात्मनोनुवृत्तत्वात् । व्यावृत्तत्वानुवृत्तत्वरूपविरुद्धधर्माधिकरणत्वरूपानुमानेन"अस्तीत्येवोपल
ब्धव्य"इत्यागमेनचवक्तव्या । देहात्मैक्यस्यप्रत्यक्षप्रमाणस्यपूर्वप्राबल्यस्यसमर्थितत्वेनप्रबलतयातद्विरुद्धानुमानागमयोरेवाप्रा
माण्यापत्त्याब्रह्मज्ञानात्पूर्वंव्यवहारदशायामिदानींतद्भेदसिद्धिरेवनस्यात् । ननुचंद्रपरिमाणप्रत्यक्षस्येवदेहात्मैक्यप्रत्यक्षस्यापिअ

SGDF
Sri Gargeshwari Digital Foundation

परीक्षितत्वेनपरीक्षितानुमानादिनैवबाधःकिंनस्यादितिचेन्न । चंद्रपरिमाणप्रत्यक्षस्यदूरादिदोषेणस्वार्थनिश्चयपराङ्मुखस्ययुक्तो न्येनबाधः नचेहतथाऽस्ति ब्रह्मज्ञानात्प्राक् व्यवहारदशायांत्वन्मतेबाधाभावात् तदंगीकारेब्रह्मज्ञानेतरज्ञानबाध्यत्वेनप्रातिभासिकत्वापत्त्यास्वार्थसाधनायप्रमाणत्वेनप्रत्यक्षोक्त्ययोगात् । नहिप्रातिभासिकरूप्यावगाहिप्रत्यक्षंकेनचिद्रूप्यसिद्ध्येप्रमाणत्वेनोदाह्रियते अतोऽनुमानागमाभ्यांइदानींतद्भेदसिद्धिःसर्वसंमतानस्यात् अतोनतत्रप्रत्यक्षंप्रमाणमिति ॥ **परस्परमिति** ॥ त्वया युगपदेवात्मनिदेहाद्यैक्याध्यासांगीकारेणदेहादिंद्रियमन्यत्इंद्रियादेहोऽन्यइतिभेदस्यैवदर्शनात् देहोहमिंद्रियमित्येकदैवदेहा

परस्परंभिन्नत्वेननिश्चितानांदेहेंद्रियादीनांयुगपदेकात्मैक्याध्यासा
योगाच्च । त्वन्मतेदेहात्मनोर्भेदस्याध्यस्तत्वेनजीवब्रह्मणोरिवत

द्यैक्याध्यासायोगात् नहिभिन्नत्वेननिश्चितयोर्वंगरजतयोरेकदैवशुक्तिकायामेवारोपोदृष्टइत्यर्थः । ननुदेहादिंद्रियमन्यत्इंद्रियादेहोन्यइतिभेदबुद्ध्यादेहोहमिंद्रियमित्यैक्याध्यासासंभवेपिब्राह्मणात्काणोन्यःकाणाद्ब्राह्मणोन्यइतिभेदबुद्ध्यभावेनब्राह्मणोऽहं काणइत्येकदाऐक्याध्यासःसंभवतीतिचेन्न ब्राह्मणस्याक्षिकाणमितिकाणब्राह्मणयोर्भेदस्यापिप्रत्यक्षत्वेनएवमप्यारोपस्यासंभवात् अतएव“येनांगविकार”इत्यत्रायमक्ष्णाकाणइतिकाशिकायामुदाहृतत्वेनब्राह्मणकाणयोरपिभेदस्यैवावगमादित्यालोचनीयं ॥ त्वन्मतइति ॥ भेदमात्रस्याध्यस्तत्ववादिनस्तत्वमतइत्यर्थः ॥ जीवब्रह्मणोरिवदेहात्मनोर्भेदस्याप्यध्यस्तत्वेनेतिपूर्वेणैवसंबंधः ॥

SGDF
Sri Gargeshwari Digital Foundation

अभेदाध्यासायोगादिति ॥ अभेदस्यसत्यत्वंस्यादित्यर्थः। परस्परविरुद्धयोरितिन्यायादितिभावः । ननुभेदस्याध्यस्तत्वेप्यभे
दोस्तु उभयोरपिदृश्यत्वेनमिथ्यात्वात् भेदाभेदयोर्मिथ्यात्वेप्येतावानेवविशेषोंगीक्रियते यदत्रदेहात्मनोरभेदोव्यवहारकालीनेन
परीक्षितप्रमाणभावेनव्यावृत्तत्वानुवृत्तत्वरूपानुमानादिना ब्रह्मज्ञानेतरेणबाध्यते भेदस्तुब्रह्मज्ञानरूपचरमवृत्त्येतीत्यतआह ॥
मिथ्यात्वंहीत्याहुः ॥ यद्वातदेवोपपादयति ॥ मिथ्यात्वंहीत्यादिना ॥ शुक्तिज्ञानेनरूप्यमेवबाध्यते नतुतदत्यंताभावः ए
वंचाधिष्ठानभूतशुक्तिज्ञानाबाध्यात्यंताभावप्रतियोगित्वंरूप्येऽस्तीत्यर्थः । नन्वत्यंताभावेऽधिष्ठानज्ञानाबाध्यत्वंकुतोविशेषणंदी

त्राभेदाध्यासायोगाच्च । मिथ्यात्वंहिअधिष्ठानज्ञानाबाध्यात्यंताभावप्रतियोगित्वं तद्बाध्यात्यंताभा
वप्रतियोगित्वस्यसत्त्वेपिसंभवात् । अभेदश्चभेदात्यंताभावइतिकथंभेदमिथ्यात्वेअभेदःसत्योनस्यात् ।

यतइत्यतआह ॥ तद्बाध्येति ॥ अधिष्ठानज्ञानबाध्येत्यर्थः ॥ सत्वेपीति ॥ अत्यंताभावप्रतियोगिनइतिशेषः । रूपवतिघटे
अधिष्ठानज्ञानबाध्यस्यरूपात्यंताभावस्यसत्वेपिप्रतियोगिनोरूपस्यसत्यत्वदर्शनेनजगतोब्रह्मज्ञानाबाध्यात्यंताभावप्रतियोगित्वमे
वमिथ्यात्वंवाच्यमित्यर्थः । ननुभेदमिथ्यात्वसिद्ध्यर्थंभेदात्यंताभावस्याधिष्ठानज्ञानाबाध्यत्वेपिअभेदस्याध्यस्तत्वमस्तु नह्यभेदो
भेदात्यंताभावः येनाधिष्ठानज्ञानाबाध्यतयासत्यःस्यादित्यतोऽभेदोभेदात्यंताभावोभवत्येवेत्याह ॥ अभेदश्चेति ॥ सत्योन
स्यादिति ॥ परस्परविरुद्धयोरितिन्यायादितिभावः । तथाचदेहात्मभेदस्यमिथ्यात्वंवदताऽधिष्ठानभूतात्मज्ञानाबाध्यात्यंता

भावप्रतियोगित्वेवाच्येऽभेदस्यभेदात्यंताभावरूपत्वेनाधिष्ठानज्ञानाबाध्यत्वप्राप्त्यादेहात्माभेदस्यसत्यत्वमेववाच्यमितितस्याध्य
स्तत्वोक्त्ययोगइतिभावः । एतदुपलक्षणंदेहात्मनोरभेदस्याध्यस्तत्वंवदताअधिष्ठानज्ञानाबाध्यात्यंताभावप्रतियोगित्वेवाच्येभेद
स्याभेदात्यंताभावरूपत्वेनाधिष्ठानज्ञानाबाध्यत्वप्राप्त्याऽभेदस्याध्यस्तत्वेकथंदेहात्मनोर्भेदःसत्योनस्यादितिभेदमात्रस्यमिथ्यात्वां
गीकारोनयुक्तइत्यपिद्रष्टव्यं । ननुभेदस्यमिथ्यात्वेपिअभेदस्यसत्यत्वंकुतःपरस्परविरुद्धयोरितिन्यायादितिचेन्न । अयंन्यायोय

नचदेहस्यस्वरूपेणैवाध्यस्तत्वात्देहादात्मनोनभेदोनाप्यभेदइतिवाच्यं अध्यस्तादपिरूप्याच्छु
क्तेःस्वज्ञानाबाध्यस्यबाधगोचरस्यभेदस्यदर्शनात् । किंच "अहंगेहीतिवच्चाहंदेहीत्येवप्रतीयते ॥
नतुदेहोऽहमस्मीतिकदाचित्कस्यचिन्मतिः ॥ १ ॥ ब्राह्मणोऽहंमनुष्योऽहमित्यादिस्तुप्रमैवनः ॥

त्रधर्मीसन् तत्रैव नहिवंध्यासुतस्यश्यामत्वाभावेगौरत्वंसत्यं एवंप्रकृतेदेहस्यरूप्यवत्स्वरूपेणैवबाध्यत्वात्तत्रभेदाभेदयोरुभयोर
पिमिथ्यात्वमेवेत्याशंक्यनिराकरोति ॥ नचेति ॥ स्वज्ञानेति ॥ शुक्तिज्ञानबाध्यस्येत्यर्थः । तत्रहेतुर्बाधगोचरस्येति । तथाचय
थारूप्यस्यस्वरूपेणैवशुक्तावध्यस्तत्वेपितत्प्रतियोगिकोभेदःशुक्तौमिथ्याभूतोदृष्टः । अत्यंताभाववद्भेदेपिप्रतियोगिसत्वनियमा
भावात् एवंदेहस्यापिस्वरूपेणाध्यासेपिआत्मनितद्भेदोस्तु तथाचदेहस्यस्वरूपेणाध्यस्तत्वात्तत्रभेदाभेदयोरुभयोरपिमिथ्यात्वमि

SGDF
Sri Gurgaonwari Digital Foundation

त्युक्तमसत् एवंचतस्यमिथ्यात्वांगीकारेऽभेदस्यसत्यत्वापादनंयुक्तमेवेतिभावः । कथंप्रमेत्यतआह ॥ देहभेदयुतइति ॥ तथा चाऽहंब्राह्मणइत्यस्यब्राह्मण्योपेतदेहवानित्यर्थोद्रष्टव्यः । आद्यश्लोकंव्याचष्टे ॥ प्रतीयतेहीति ॥ श्लोकेदेहीत्येवप्रतीयतइत्युप लक्षणं इंद्रियभेदोपिप्रतीयते । अतोनेंद्रियैक्याध्यासइत्यपिद्रष्टव्यमित्याह ॥ मममनइत्यादि ॥ द्वितीयकारिकांव्याचष्टे ॥ आत्मनीति ॥ देहभेदयुतइत्यस्यार्थमाह ॥देहविशेषेति॥ वेदाधिकारसंपादकेत्यर्थः। भेदशब्दार्थोविशेषेति । युतइत्यस्यार्थो

देहभेदयुतोयस्माद्ब्राह्मणादिपदोदितः ॥ २ ॥ कृशोहंकृष्णइत्यादौकार्श्यादिर्देहसंस्थितः ॥ पुत्रादिस्थितकार्श्यादिवदात्मन्युपचर्यते" ॥ ३ ॥ प्रतीयतेहिममगृहंममक्षेत्रमितिवन्ममदेहःमम मनः ममचक्षुरिति भेदः॥ आत्मनीति ॥ अहंब्राह्मणोऽहंमनुष्यइत्यादिस्तुप्रमा देहविशेषविशिष्टएवहिब्राह्मणादिशब्दार्थः नतुदेहविशेषः देहोब्राह्मणइतिकदाऽप्यप्रतीतेः । अंधोऽहमित्यादिधीःप्रमैव चक्षुःश्रोत्रादिहीनस्यैवांधबधिरादित्वात् । कृष्णोहमित्यादावपिकृष्णत्वादिकंरज्जौसर्पस्थभीषणत्वादिकमिवधर्मैक्येनसहाध्यस्यतेकिंवास्फटिकेजपाकुसुमलौहित्यमिव

विशिष्टइति । चेतनइत्यर्थः। नन्वंधइतिचक्षूराहित्यरूपांधत्वस्यदेहधर्मत्वेनतस्यात्मन्यध्यासेदेहैक्याध्यासोपिसिद्धएवेत्यतःकारिकोक्तमुपलक्षणपरमित्याशयेनाह ॥अंधोऽहमिति॥ कथंप्रमेत्यतआह ॥चक्षुःश्रोत्रादिहीनस्यैवेति॥ चक्षुःश्रोत्रादिरहितचेतनस्यैवेत्यर्थः। नतुदेहस्येत्येवार्थः॥शवदेहेंधबधिरादिशब्दाप्रयोगादितिभावः॥तृतीयकारिकांव्याचष्टे॥कृष्णोहमिति॥सहेति॥

SGDF Sri Gargeshwari Digital Foundation

धर्मविशिष्टधर्मैक्यारोपइत्यर्थः ॥ तेनविनैवेति ॥ धर्मैक्याध्यासंविनाधर्ममात्रारोपइत्यर्थः ॥ उक्तत्वादिति ॥ अहंगेहीतिवच्चा हंदेहीत्येवप्रतीयतइतिधर्मिभेदस्यप्रत्यक्षसिद्धत्वमुक्तमस्तीत्यर्थः ॥ तद्वदेवेति ॥ तत्रयथारक्तःस्फटिकःकुसुमंरक्तमितिप्रतीतिद्व यमस्ति तथादेहःकृशःअहंकृशइतिप्रतीतिद्वयाभावादित्यर्थः । ननुकृशोहंकृष्णोहमितिप्रतीतेःकागतिरित्यतोनात्रतथाप्रतीति रस्ति किंतुगौणव्यवहारमात्रमित्याशयेनाह ॥ कृशोहमिति ॥ इत्यादिस्तु व्यवहारइतिशेषः । कर्दमलिप्ते स्वस्मिन् । ननुपु त्रेकृशेऽहंकृशइतितथाकर्दमलिप्तेस्वस्मिन्नहंकृष्णइत्येतन्नव्यवहारमात्रं किंतुस्वस्मिन्कार्श्याद्यारोपरूपंज्ञानमित्याशंक्यनिराकरो

तेनविनैव।नाद्यः। धर्मैक्याध्यासाभावस्योक्तत्वात्। नांत्यः। तद्वदेवकार्श्यादिद्वयप्रती त्यापत्तेः । कृशोहंकृष्णोहमित्यादिस्तुपुत्रेकृशेऽहंकृशइतिवत् कर्दमलिप्तेऽहंकृष्णइ तिवचगौणः। नचायमप्यध्यासः पुत्रात्कर्दमात्स्वस्यस्पष्टंभेदप्रतीतेः । अन्यथामंचाः क्रोशंतीत्यादिरप्यध्यासःस्यात् । पुत्रकार्श्येनदुःखंतुतस्यात्यंतप्रेमास्पदत्वात् ।

ति ॥ नचायमिति ॥ अन्यथेति ॥ कृशोऽहमित्यादेर्गौणत्वमनंगीकृत्याध्यासत्वांगीकारेमंचाःक्रोशंतिमार्गाश्चलंतिचित्रभि त्तिलिखितेसिंहेऽयंसिंहइत्यादिरपिलक्षणानामकवृत्त्यभावपक्षेव्यवहारमात्रमेवनज्ञानमित्यंगीकृतं तदपिनस्यात् तत्रापिमंचादौ क्रोशनाद्यध्यासस्यवक्तुंशक्यत्वादित्यर्थः । तत्रपुरुषभेदस्यमंचेषुस्पष्टत्वान्नतत्रक्रोशनाध्यासइतियदि तर्हितत्प्रकृतेपिसममिति भावः। ननुपुत्रकार्श्यस्यस्वस्मिन्नध्यासाभावेकथंतेनदुःखंस्वस्यभवतीतिचेत्तत्राह ॥ पुत्रकार्श्येनेति ॥ वैपरीत्यमाशंक्यनिराक

SGDF
Sri Gargeshwari Digital Foundation

रोति ॥ नचेति ॥ शिलापुत्रिका पाषाणमयीप्रतिमा तथाचपुत्रादिस्थितकार्श्यादिवत् अहंकृशइत्यादेर्व्यवहारमात्रत्वांगीकारेअयंशिलापुत्रिकायादेहइतिवत् ममदेहइत्ययमपिगौणोव्यवहारएवस्यान्नप्रतीतिरित्यर्थः । एकत्रमुख्यत्वेनक्लृप्तस्यैवान्यत्राप्यसतिबाधकेमुख्यत्वमेवकल्प्यं गौणत्वेनैकत्रक्लृप्तस्यचान्यत्राप्यसतिबाधकेगौणत्वमेवेत्याह ॥ममेति॥ इत्यस्यप्रयोगस्यमुख्यतायाःक्लृप्तत्वात् इतरजन्यव्यवहारेपिमुख्यत्वमित्यर्थः । पुत्रकार्श्येपुत्रेकृशेसतिक्रियमाणोहंकृशइत्यादिव्यवहारइत्यर्थः । ननुशिलापुत्रि

नचकृशोऽहमित्यैक्यप्रतीत्याशिलापुत्रिकायादेहइतिवत् ममदेहइत्ययमेवगौणइतिवाच्यं ममदेहइत्यस्यदेहात्मविवेकिनिमुख्यतायाःकृशोहमित्यस्यचपुत्रकार्श्येगौणतायाश्चक्लृप्तत्वात्। तत्रभेदधीःस्पष्टेतिचेदिहापि तथा पश्वादीनामपिदेहात्मभेदसाक्षात्कारस्यांगीकार्यत्वात्। तदुक्तं "जातमात्राम्मृगागावोहस्तिनःपक्षिणोझषाः। भयाभयस्वभोगादौकारणानिविजानते॥ अस्मृतौपूर्वदेहस्यविज्ञानंतत्कथंभवेदि"ति। तथाहि जातमात्रस्यपश्वादेःस्तन्यपानादौप्रवृत्त्यादिहेतोरिष्टसाधनत्वाद्यनुमितेर्हेतुः यत्स्तन्यपानंतदिष्टसाधनं

कायादेहइत्यत्रगौणत्वदर्शनादत्रापितथाऽस्त्वितिचेत् भ्रांतोसि यदितत्रशिलापुत्रिकायाममदेहप्रतीतिःस्यात् तदैवममदेहइतिप्रतीतेरपिगौणत्वंकल्पयामः । नचैवं तस्यजडत्वेनममदेहइतितस्याःप्रतीत्यभावात् अयंशिलापुत्रिकायादेहइत्येवहिव्यवहारइतिभावः ॥ तत्रेति ॥ विवेकिनांव्यवहारेपुत्रकार्श्येनक्रियमाणव्यवहारेचेत्यर्थः । अतस्तत्र*मुख्यवामुख्येइतिशेषः ॥ तथेति ॥ भेदधीःस्पष्टेत्यर्थः । तदेवोपपादयति ॥ पश्वादीनामिति ॥ जातमात्राएवनव्यापारांतरंकृतवंतः अस्मिन्जन्मनिव्याप्त्यनुसंधा

नरहिताइत्यर्थः॥ यथेदमिति ॥ प्राग्भवेमत्कृतस्तनपानमित्यर्थः॥ यथेदमिति ॥ प्राग्भवेमत्कृतनेत्रांतःकडूयनमित्यर्थः ॥ नदेहांतरास्मृतौयुक्तेति ॥ स्वीयदेहांतरेत्यर्थः। तथाचयथेदमितिदृष्टांतस्मरणस्यसामानाधिकरण्यरूपव्याप्तिस्मरणस्यचप्राचीनस्वीयशरीरांतरस्मरणंविनाऽयोगेनस्वात्मनस्ततोभेदसिद्धिरितिभावः। ततोभेदधीरेवप्रत्यक्षेणभवतीतिशेषः। नप्तॄन्पौत्रपुत्रान् ।

यथेदं यन्नेत्रस्यांतःशंकुकंडूयनंतदनिष्टसाधनं यथेदमित्यादिव्याप्तिस्मृतिस्तावन्नदेहांतरास्मृतौयुक्ता नचममप्राग्देहांतरमभूदितिस्मरतःस्वस्यैतद्देहैक्यधीः किंत्वनेकमणिष्वनुस्यूतंसूत्रमिवानेकदेहेष्वनुस्यूतमात्मानंपश्यतस्ततोभेदधीरेव । किंच योहंबाल्येपितरावन्वभूवंसोहंस्थविरःनप्तॄन्पश्यामीति योहंस्वप्नेव्याघ्रदेहःसोहमिदानींमनुष्यदेहइतिचदेहभेदधीपूर्वकंस्वस्यैक्यमनुसंदधानःकथंततोभेदंनजानीयात्। नचेयंविरुद्धधर्मरूपलिंगजन्याभेदधीः परोक्षेतिनैक्यापरोक्षभ्रमविरोधिनीतिवाच्यं

अनुसंदधानः प्रत्यभिजानन् ततो देहात् ॥ विरुद्धधर्मेति ॥ व्यावृत्तत्वानुवृत्तत्वरूपविरुद्धधर्मेत्यर्थः। अयंभावः यदुक्तमनेकमणिष्वनुस्यूतसूत्रमिवानेकदेहेष्वनुस्यूतमात्मानंपश्यतःयोऽहंबाल्यइतिप्रत्यभिज्ञावतश्चततोभेदधीरेवेति तदयुक्तं ममदेहइत्यस्याप्रतीतेर्व्यावृत्तत्वानुवृत्तत्वरूपविरुद्धधर्माधिकरणत्वरूपलिंगजत्वेनपरोक्षतयाकृशोऽहमित्यादिदेहात्मैक्यापरोक्षभ्रमनिवर्तक

SGDF Foundation

त्वंनास्ति श्वेतत्वानुमितेःपैत्यापरोक्षभ्रमनिवर्तकत्वादर्शनादिति ॥ प्रत्यक्षेधर्मिणीति ॥ भेदकधर्मसाक्षात्कारोपपादनायेदं । अयमत्रसंप्रदायैकगम्योविशेषः । प्रत्यक्षेधर्मिणिभेदकविरुद्धधर्मसाक्षात्कारोभेदसाक्षात्कारनियतएव कुतइतिचेत् समानेविषये ऽनुमितिसामग्रीतःप्रत्यक्षसामग्र्याःप्रबलत्वात् । यथाहिप्रत्यक्षेधर्मिणिऊर्ध्वपदार्थेपुरुषत्वव्याप्यकरादिमानयमितिपरामर्शः पुरुषत्वानुमितिसामग्रीतत्प्रत्यक्षसामग्रीचभवति तत्रकिंपुरुषत्वानुमित्योत्पत्तव्यं उतपुरुषत्वप्रत्यक्षेणेतिविचारेपुरुषत्वरूपैकविषयएव प्रवृत्तयोरनुमितिप्रत्यक्षसामग्र्योर्मध्येऽनुमितिसामग्रीतःप्रत्यक्षसामग्र्याबलवत्त्वात्प्रत्यक्षमेवोत्पद्यते नत्वनुमितिः वह्निव्याप्यधूमवानितिपरामर्शः । स्वानुव्यवसायरूपप्रत्यक्षसामग्रीभवति वन्ह्यनुमितिसामग्रीच । तत्रपरामर्शप्रत्यक्षवह्निरूपभिन्नविषयेप्रव

प्रत्यक्षेधर्मिणिभेदकसाक्षात्कारस्य भेदसाक्षात्कारव्याप्तत्वात् ।

र्तमानयोःसामग्र्योर्मध्येऽनुमितिसामग्र्याबलवत्त्वादनुमितिरेवोत्पद्यते नपरामर्शप्रत्यक्षं । नन्वेवंपुरुषत्वव्याप्यकरादिमानयमिति परामर्शःस्वप्रत्यक्षसामग्रीअनुमितिसामग्रीचभवतीतिभिन्नविषयत्वसद्भावात्पुरुषत्वानुमितिरेवस्यादिचेन्न । प्रत्यक्षसामग्र्याःप्रतिबंधकत्वेनानुमित्यजननादित्याद्यालोचनीयं । एवंचप्रत्यक्षेदेहात्मरूपेधर्मिणिव्यावृत्तत्वानुवृत्तत्वरूपभेदकधर्मसाक्षात्कारस्यभेदप्रत्यक्षसामग्रीत्वाद्भेदसाक्षात्कारएवजायतइतिअपरोक्षैक्यभ्रमविरोधित्वमेवेतिभावः । "अज्ञताचाल्पशक्तिश्चदुःखित्वंस्वल्पकर्तृता । सर्वज्ञतादीशगुणविरुद्धाह्यनुभूतिगा"इत्यत्रसार्वज्ञ्यादिगुणविरुद्धमज्ञत्वादिगुणजातंस्वात्मन्यनुभवंस्ततोभेदंप्रत्येत्येव यत्रा

SGDF
Sri Gargeshwari Digital Foundation

पिप्रत्यक्षेधर्मिणिभेदकधर्मसाक्षात्कारस्यभेदसाक्षात्कारव्याप्यत्वादितीदमेवोपपादनंद्रष्टव्यं ॥ इहचेति ॥ व्यावृत्तत्वेनधीस्थोयःस्वदेहादिःतद्भेदकस्येत्यर्थः तथाचतद्व्याप्यआत्मनिदेहभेदोपिप्रत्यक्षसिद्धइतिभावः। अस्तुवाभेदसाक्षात्काराभावः तथापिकेवलंव्यावर्तकधर्मसाक्षात्कारएवदेहात्मैक्यापरोक्षभ्रमविरोधीभेदव्यवहारस्यौपचारिकत्वविरोधीचभविष्यतीत्याह ॥ व्यावर्तकेति ॥ यद्धीर्यत्रप्रतिबंधिकातत्सामग्र्यपितत्रप्रतिबंधिकेतिन्यायादितिभावः। ननुनविरोधिधर्मसाक्षात्कारस्यभ्रमविरोधित्वंभ्रमविरोधिभूतोर्ध्वाग्रत्वादिरूपवृक्षत्वसाक्षात्कारेपिअधोग्रत्वादिभ्रमानुवृत्तिरेवास्ति अतस्तद्वदस्यापिसोपाधिकभ्रमत्वा

इहचव्यावृत्तत्वेनधीस्थदेहादिभेदकस्यानुवृत्तत्वस्यात्मनिप्रत्यभिज्ञाप्रत्यक्षसिद्धत्वात्
व्यावर्तकसाक्षात्कारस्यैवैक्यापरोक्षभ्रमेण भेदव्यवहारस्यौपचारिकत्वेनचसहविरो
धाच्च। नचायंभ्रमःसोपाधिकः येनाधिष्ठानतत्वसाक्षात्कारेपिस्यात्। यातुश्रुतिरुक्ता।

द्व्यावर्तकधर्मसाक्षात्कारमात्रस्यनैक्यभ्रमविरोधितत्वमित्याशंक्यनिराकरोति ॥ नचेति ॥ अयं कृशोऽहंब्राह्मणोऽहमित्यादिःप्रकृतः। प्रतीतिद्वयाभावादितिकेचित्। संप्रदायस्तु"ब्राह्मणोहंमनुष्योहमित्यादिस्तुप्रमैवनः। देहभेदयुतोयस्माद्ब्राह्मणादिपदोदित इत्युक्तरीत्याऽयंभ्रमएवनभवति दूरेसोपाधिकत्वमितिभावः। ननुसोपाधिकत्वभ्रमस्थलेविरोधिसाक्षात्कारेपिभ्रमानुवृत्ते स्तन्निवृत्तिःकदेतिचेत् उपाधिनिवृत्तिसचिवाधिष्ठानसाक्षात्कारएवेतिवदामः जलाद्युपाधिनाशेसतिवृक्षाधोऽग्रत्वादिभ्रमनिवृत्तेरनुभवसिद्धत्वादित्यवधेयं ॥ श्रुतिरुक्तेति ॥ देहैक्याध्याससद्भावे"ब्राह्मणोयजेते"तियाश्रुतिरुक्तेत्यर्थः। लक्षणयाब्राह्म

SGDF
Sri Gargeshwari Digital Foundation

णशब्दार्थइतिसंबंधः । तदर्थः ब्राह्मणशब्दार्थः ॥ लक्षणेति ॥ लक्षणायाअयोगादित्यर्थः । “नविधौपरःशब्दार्थ” इतिवचनात् “ब्राह्मणोयजेते” त्यस्यापिविधिवाक्यत्वेनतत्रलक्षणयाव्याख्यानायोगादितिभावः । ब्राह्मणदेहैक्याध्यासवतोयागाधिकारित्व स्यैतच्छ्रुत्यर्थत्वेदूषणमाह ॥ त्वयेति ॥ विकलेषु व्यंगेषु । सकलेषु दृढांगेषुसत्सु ॥ भाषितत्वेनेति ॥ भाष्येउक्तत्वेनेत्यर्थः ॥ भृत्यमित्रादाविति ॥ अत्याप्तेसकलेविकलेवाऽहमेवसकलइत्याद्यध्याससद्भावादित्यर्थः । मित्रग्रहणस्यउत्तरातिप्रसंगकथने

तत्रकिंलक्षणयादेहविशेषैक्याध्यासवान्ब्राह्मणशब्दार्थइतिभावः किंवादेहविशेषसंब
द्धएवतदर्थः संबंधस्त्वन्यस्यासंभवादैक्याध्यासरूपइति । यद्वा देहविशेषएवतदर्थः आ
त्मातुदेहैक्याध्यासात्प्रवर्ततइति । नाद्यः । विधौलक्षणायोगात् त्वयापुत्रभार्यादिषुवि
कलेषुसकलेषुवाअहमेवविकलःसकलोवेत्यध्यस्यतीति भाषितत्वेनन्यायसाम्येनभृत्य
मित्रादावपितस्यसत्त्वेनशूद्रस्वामिनोब्राह्मणादेर्यागाद्यनधिकारापाताच्च । ब्राह्मणादि
कमित्रस्यशूद्रस्याप्यधिकारापत्तेश्च । नचस्वकर्मार्जितेनदेहविशेषेणैक्याध्यासवांस्तदर्थः

उपयोगः ॥ शूद्रस्वामिनइति ॥ शूद्रंप्रतिस्वामिनःशूद्रभृत्यकस्येत्यर्थः । तथाचब्राह्मणदेहैक्याध्यासवतोयागाधिकारित्वेशूद्र देहैक्याध्यासवतोब्राह्मणस्यानधिकारापाताच्चेत्यर्थः ॥ब्राह्मणादीति॥ ब्राह्मणादिवर्णत्रयंमित्रंयस्येत्यर्थः । तत्रापिब्राह्मणादिदेहे व्यंगेसांगेवाऽहमेवव्यंगइत्याद्यध्यासेनब्राह्मणदेहैक्याध्याससद्भावाद्ब्राह्मणमित्रस्यशूद्रस्याप्यधिकारापातादितिभावः । तदर्थः ब्रा ह्मणशब्दार्थः । भृत्यमित्रादिदेहानांस्वकर्मार्जितत्वाभावान्नोक्तातिप्रसंगइतिभावः ॥ आवश्यकत्वेनेति ॥ देहैक्याध्यासस्यैवा धिकारप्रयोजकत्वंवदतोपिकर्मणआवश्यकत्वादित्यर्थः ॥ आर्जनस्यैवेति ॥ तथाचस्वकर्मणादेहविशेषार्जनवानेवब्राह्मणश ब्दार्थोनत्वैक्याध्यासोपीत्यर्थः । ततश्चनेयंश्रुतिरध्यासेमानमितिभावः ॥ देहैक्येति ॥ सुप्तस्यज्ञानमात्रविलोपेनब्राह्मणादिदेहै क्याध्यासस्याभावात् तथाजीवन्मुक्तस्यदेहात्मविवेकसद्भावेनारोपितब्राह्मण्यस्याभावेनसुप्तजीवन्मुक्तयोःशिरश्छेदेब्रह्महत्यादि महापातकाभावप्रसंगइतिभावः ॥ कदाचिदिति ॥ तथाचकदाचिदैक्याध्यासवतएवब्राह्मणशब्दार्थत्वेनसुप्तजीवन्मुक्तयोरपिक

आवश्यकत्वेनस्वकर्मणादेहविशेषार्जनस्यैवतदर्थत्वोपपत्तेश्च । सुप्तस्यजीवन्मुक्त
स्यचदेहैक्याध्यासाभावेन “ब्राह्मणोनहंतव्य” इत्यादेस्तद्विषयकत्वापाताच्च । ना
पिकदाचिदध्यासवांस्तदर्थः महापातकेननष्टब्राह्मण्यस्याप्यधिकारापाताच्च ।
जन्मारभ्यजीवन्मुक्तस्योक्तनिषेधाविषयत्वापाताच्च । अतएव नद्वितीयः ।

दाचिदैक्याध्याससद्भावेनब्राह्मण्यसद्भावेननिषेधविषयत्वसंभवान्नोक्तातिप्रसंगइतिभावः ॥ नष्टेति ॥ “मासेनशूद्रोभवतिब्रा ह्मणःक्षीरविक्रयात् । तत्कालएवचंडालोब्राह्मणोब्रह्महत्यये” तिमनुस्मरणादित्यर्थः ॥ आपातादिति ॥ महापातकाभावदशा यांअध्याससद्भावादित्यर्थः ॥ जन्मारभ्येति ॥ तस्यजन्मारभ्यदेहात्मभेदज्ञानित्वेनअधिकारप्रयोजकस्यकदाचिदध्यासस्याप्य भावेनतद्धननेप्रत्यवायाभावापातादितिभावः । अतएवेत्युक्तमेवविशदयति ॥ संयोगस्येति ॥ ब्राह्मणादिदेहविशेषसंबंधस्य

SGDF

न्यस्यासंभवादध्यासरूपएवसइत्यधिकारप्रयोजकीभूतःसंबंध्योसरूपएवनान्यइत्युक्तं तत्राध्यासातिरिक्तोऽन्यएवसंबंधःसंभव
तीत्याशयेनपरिशेषंकरोति ॥ संयोगस्येति ॥ सर्वेषुदेहेषु शूद्रादिदेहेषु । ततश्चशूद्रादेरप्यधिकारापातइतिभावः ॥ स्वेति ॥
तस्यद्विष्ठत्वेनभृत्यदेहेपिसत्वेनतस्याप्यधिकारापातइतिभावः ॥ इच्छेति ॥ स्वेच्छानुसारित्वरूपसंबंधस्येत्यर्थः ॥ आतुरा
दिति ॥ ब्राह्मणानामातुरतादशायांदेहस्येच्छानुसारिताभावेनानधिकारापातादितिभावः । नचातुराणांविधिनिषेधविषयत्वमेव
नास्तीतीष्टापत्तिरितिवाच्यं । तथात्वेतद्धननेप्रत्यवायाभावापातात् । तथा"स्मर्तव्यःसततंविष्णुर्विस्मर्तव्योनजातुचित् । आ

संयोगस्यात्मविभुत्वपक्षेसर्वदेहेषुस्वस्वामिभावस्यचभृत्यदेहेसत्त्वेपिइच्छानुविधायि
त्वस्यचात्यातुरादिदेहेष्वसत्त्वेऽपिसाक्षात्स्वस्वामिभावस्यवा तदिंद्रियाश्रयत्वस्यवा
साक्षात्तत्प्रयत्नजन्यक्रियाश्रयत्वस्यवा तद्भोगायतनत्वस्यवा तत्कर्मार्जितत्वस्यवा

धिव्याधिनिमित्तेनविक्षिप्तमनसोपितु । गुणानांस्मरणाशक्तौविष्णोर्ब्रह्मत्वमेवतु । स्मर्तव्यंसततंतत्तुनकदाचित्परित्यजेदि"त्या
दिवचनेनतस्यापिविष्णुस्मरणादिविधिविषयत्वेनतत्राधिकारसद्भावात्तद्देहस्यचेच्छाननुसारित्वेनाधिकारप्रयोजकसंबंधाभावाद
नधिकारापातइतिविशेषोद्रष्टव्यः । साक्षादित्यादेःसंभवादित्यनेनान्वयः । स्वस्वामिभावसंबंधस्यभृत्यदेहेपिसत्वेनसाक्षादित्यु
क्तं । देहांतस्थआत्मास्वदेहंप्रत्येवसाक्षात्स्वामीभृत्यादिदेहंप्रतितुतस्यस्वदेहानुकूलतयास्वदेहद्वारैवसंबंधोनसाक्षादितिभावः ॥
तदिंद्रियेति ॥ तज्ज्ञानजनकेंद्रियाश्रयत्वंदेहस्यास्तीत्यर्थः । शरीरद्वाराप्रयत्नजन्यचेष्टादिक्रियाश्रयत्वस्यघटादावपिसत्वात्सा

SGDF
Sri Gargeshwari Digital Foundation

क्षादित्युक्तं स्वशरीरस्यैवसाक्षात्प्रयत्नजन्यक्रियाश्रयत्वंनान्यस्येतिभावः ॥ संबंधांतरस्येति ॥ इदंचसाक्षात्स्वस्वामिभावादि संबंधपंचकंनभृत्यदेहातिप्रसक्तं आतुरादिदेहसाधारणसंबंधांतरमेवाधिकारप्रयोजकमस्तीतिनाध्यस्तत्वंदेहात्मनोःसंबंधइतिभावः । संबंधांतरंवदद्भिरपिनाध्यासरूपःसंबंधःत्यक्तुंशक्यते तथाहिसाक्षात्प्रयत्नजन्यक्रियाश्रयत्वंसंबंधइत्युक्तं तत्रप्रयत्नस्यसाक्षादेतदीयत्वमेवकुतइतिशंकायांप्रयत्नात्मनोरैक्यभ्रमएवसंबंधइतिवक्तव्यमितिचेन्न । प्रयत्नात्मनोरैक्याध्यासांगीकारेऽहंकृतिरितिप्रतीत्यापत्तेरित्याह ॥ नचेति ॥ किंचप्रयत्नादावपिनात्मैक्यभ्रमएवसंबंधःकिंत्वित्यतआह ॥ आत्मेति ॥ तार्किकादिरीत्ये

संबंधांतरस्यसंभवात् । नचप्रयत्नादावप्यात्मैक्यभ्रमएवसंबंधः अहंकृतिरित्यप्रतीतेः । आत्मसमवायस्यात्मायुतसिद्धेर्वा संबंधांतरस्यसत्त्वाच्च । नचानतिप्रसंगायस्वस्वामिभावादिरैक्याध्यासरूपमूलसंबंधाधीनः वैपरीत्यस्यापिसुवचत्वात् तत्कर्मार्जितत्वस्यैवमूलसंबंधत्वाच्च।

तिशेषः । समवायानंगीकारिवादिमतेनाह ॥ अयुतसिद्धेर्वेति ॥ अंगुलीद्वयवद्भेदेनानुपलभ्यमानत्वस्येत्यर्थः । तादात्म्यस्येति यावत् । अस्मदभिप्रेतएवताट्टशसंबंधेतार्किकाणांसमवायसंज्ञेतिद्रष्टव्यं । ननुसाक्षात्स्वस्वामिभावादिपंचकेपिसाक्षात्स्वस्वामिभावःतदिंद्रियाश्रयत्वादिकंवाऽस्यैवदेहस्यकुतःभृत्यदेहादावपिकिंनस्यादित्यतिप्रसंगशंकायांतत्रमूलसंबंधतयाऐक्याध्यासएववाच्यइतिचेन्न । देहैक्याध्यासेपिकिंमूलमितिशंकायांस्वस्वामिभावादिसंबंधस्यैवमूलत्वोपपत्तेरितिवैपरीत्यस्यापिवक्तुंशक्यत्वातूइत्याह ॥ नचेति ॥ किंचस्वस्वामिभावादिसंबंधचतुष्टयेतत्कर्मार्जितत्वमेवमूलसंबंधोस्त्वित्याह ॥ तत्कर्मेति ॥ तदीयकर्मेत्यर्थः।

SGDF
Sri Gargeshwari Digital Foundation

ननुदेहस्यतदीयत्वेयदितत्कर्मार्जितत्वंमूलसंबंधस्तदाकर्मणामेतदीयत्वंकुतइतिपृष्टेतदीयशरीरजन्यत्वादितिवाच्यं एवंचशरीरस्यैतदीयत्वेसिद्धेकर्मणामेतदीयत्वसिद्ध्यातत्कर्मार्जितत्वरूपमूलसंबंधसिद्धिस्तत्सिद्धौचशरीरस्यतदीयत्वसिद्धिरित्यन्योन्याश्रयः स्यादित्यतआह ॥ कर्मणामिति ॥ इदानींतनकर्मणांतदीयत्वस्यएतदीयपूर्वकर्माधीनत्वात् तदीयपूर्वप्रयत्नजन्यत्वादुपपत्तेः पूर्वकर्मपूर्वप्रयत्नयोरपितदीयत्वंतत्पूर्वकर्मतत्पूर्वप्रयत्नाधीनमित्यंगीकारात् नचैवमनवस्था प्रामाणिकत्वादित्याशयेनोक्तमनादीति । यथोक्तंभगवतासूत्रकारेण“नकर्माविभागादितिचेन्नानादित्वादि”ति । ननुतत्कर्मार्जितत्वंशरीरस्यतदीयत्वेमूलसंबंधइत्युक्तमयुक्तं “पुत्रकामःपुत्रकामेष्ट्यायजेते”तिवचनात्पुत्रकामेष्टिरूपंयत्पितृकर्मतत्पुत्रशरीरार्जकंभवति तत्रपुत्रशरीरेपितृकर्मा

कर्मणांतदीयत्वंचानादिपूर्वपूर्वतदीयकर्माधीनंवा तदाश्रितप्रयत्नजन्यत्वाधीनंवा नतुतदीयशरीरजन्यत्वाधीनमितिनान्योन्याश्रयः । पुत्रकामेष्टिकर्मापिनपुत्रशरीरार्जकं किंतु ग्रामकामेष्टिवत्पुत्रकर्मार्जितस्य

र्जितत्वसद्भावेपिपुत्रशरीरस्यपुत्रीयत्वेनपित्रीयत्वाभावाद्व्यभिचारइत्यतआह ॥ पुत्रकामेष्टीति ॥ अयमर्थः । पुत्रकामेष्टिरूपं यत्पितृकर्मतदर्जितंपुत्रशरीरंनभवति किंतुस्वकीयकर्मार्जितमेव अतोहेतोरेवाभावान्नव्यभिचारः तर्हिपुत्रकामेष्टिकर्मणोवैयर्थ्यमापन्नमितिचेन्न पुत्रकर्मणाउत्पन्नेपुत्रेपित्रीयत्वरूपोयःपितृसंबंधस्तन्मात्रार्जकत्वांगीकारात् तत्रदृष्टांतोग्रामकामेष्टिवदिति । यथा“ग्रामकामइष्टिंकुर्यादि”तिश्रूयते तत्रग्रामकामेष्टिफलंनग्रामोत्पत्तिः । तस्यएतदीयेष्टितःपूर्वमेवसिद्धत्वात् किंतुसिद्धेग्रामेएतदीयत्वमात्रंइष्टिफलमितिमीमांसकैःसिद्धांतितत्वेनेहापिस्वकर्मणैवसिद्धेपुत्रशरीरेएतदीयत्वमात्रस्यैवपुत्रकामेष्टिफलत्वोपपत्तेः ।

अन्यथाग्रामोत्पत्तेरेवग्रामकामेष्टिफलत्वापत्तेरिति । अत्रयद्यपिग्रामादेःस्वतःसिद्धत्वेनतत्स्वामित्वमेवतत्रेष्ट्याजायते इहतुपुत्रशरीरस्यपुत्रकामेष्टिंतदीयंकर्मचविनाऽनुपपत्त्यापुत्रशरीरस्यतदीयत्वस्यचेत्युभयस्यापिपुत्रकामेष्टिफलत्वादितिसुपरिहरमेवदूषणं तथापिप्रौढिवादेनेदंदूषणमुक्तमितिज्ञातव्यं ॥तस्येति॥ देहविशेषस्यैवश्रौतब्राह्मणशब्दार्थत्वेतस्यैवनियोज्यत्वप्राप्तेः । नचेष्टापत्तिः तस्यजडत्वेनानियोज्यत्वादितिभावः । किंचदेहविशेषस्यैवब्राह्मणशब्दार्थत्वेलौकिकप्रयोगविरोधश्चेत्याह ॥ विशेषेति ॥ युक्ते चेतनइतिशेषः ॥ प्रयोगेणेति ॥ अयंदेहीब्राह्मणइतिप्रयोगादित्यर्थः ॥ अतदर्थत्वादिति ॥ ब्राह्मणशब्दार्थत्वाभावादिति

तस्यस्वसंबंधमात्रार्जकं।नतृतीयः।तस्यजडत्वादिनाअनियोज्यत्वात् देहविशेषयुक्तएवब्राह्मणशब्दप्रयोगेणदेहस्यातदर्थत्वाच । अनेन“सर्वाण्यपिविधिनिषेधशास्त्राण्यध्यासमूलानी”तिपरभाष्यंनिरस्तं। नापिप्रमातृत्वाद्यन्यथानुपपत्त्याध्याससिद्धिः तदभावेपिसुषुप्तावज्ञानादिज्ञातृत्वस्यदर्शनात्

भावः ॥ एतेनेति ॥ ब्राह्मणोयजेतेतिविधिनिषेधात्मकशास्त्रस्याध्यासमूलकत्वस्यदूषितत्वेनेत्यर्थः । देहात्मैक्याध्यासाभावेप्रमातृत्वाद्यदर्शनात् तदन्यथानुपपत्तिश्चदेहात्मैक्याध्यासेमानमित्युक्तमाशंक्यनिराकरोति ॥ नापीति ॥ कुतोनेत्यतआह ॥ तदभावेपीति ॥ प्रमातृत्वस्याध्यासमूलकत्वेसुषुप्तावध्यासाभावेनकिंचिदवेदिषमितिपरामर्शसिद्धाज्ञानप्रमातृत्वमात्मनोऽनुपपन्नंस्यादित्यर्थः । किंचप्रमातृत्वादावपिपूर्वमस्मदुक्तंयत्तत्कर्मार्जितत्वं तदेवप्रयोजकं जाग्रदादौघटादिप्रमातृत्वदशायांतस्यस

SGDF Foundation

त्वात् नदेहात्मैक्याध्यासः प्रमातृत्वापेक्षयानियतपूर्वक्षणेब्राह्मणोहमित्याद्यैक्याध्यासनियमाननुभवादित्याह ॥ जागरणादा वपीति ॥ अवस्थात्रयेपीत्यर्थः । त्वदुक्तंतुनावस्थात्रयगतंप्रमातृत्वंप्रतिसाधारण्येनप्रयोजकमितिभावः ॥ एतेनेति ॥ सुषुप्तौ देहैक्याध्यासाभावेपिअज्ञानप्रमातृत्वसद्भावेनाध्यासस्यप्रमातृत्वप्रयोजकत्वाभावादितिभावः नन्वेवंमहताप्रबंधेनदेहात्मभेदस्य प्रत्यक्षत्वोपपादनमयुक्तं तथात्वेचार्वाकादेर्देहैक्यसाक्षात्कारोनस्यात् तथाचतन्मूलकःसंसारस्तेषांनस्यादित्यतआह ॥ चार्वाका देस्त्विति ॥ भ्रमेऽनुमितिरूपइत्यर्थः । तथाचतेषामपिदेहात्मभेदसाक्षात्कारएवास्ति देहात्मैक्यज्ञानंतुनप्रत्यक्षजन्यं किंतुपरि

जागरणादावपिघटादिप्रमातृत्वदशायांतत्कर्मार्जितत्ववत् तदैक्याध्यासस्यस
दाऽभावाच्च। एतेनप्रमातृत्वादिकमध्यासमूलमितिपरभाष्यंनिरस्तं । चार्वाका
देस्त्वनुमानाभासादिजन्येपिदेहात्मभ्रमेधर्माद्यभावभ्रमइवप्रत्यक्षत्वाभिमानः

दृश्यमानोदेहएवात्मा तद्व्यतिरेकेणादर्शनात् यत्रोपलभ्यतेतन्नास्तीत्याद्यनुमानाभासजन्यमेव तत्रचप्रत्यक्षत्वाभिमानस्तेषा यथा हिआनुमानिकार्थप्रतियोगिकतयाऽनुमानवेद्येधर्माद्यभावेप्रत्यक्षत्वाभिमानस्तेषामस्ति तद्वदित्यर्थः । ननुभवद्रीत्यातेषामपिदेहा त्मभेदसाक्षात्कारसत्वेलैंगिकमपितदभेदज्ञानंचार्वाकस्यकथमुत्पद्यतइतिचेत् सन्घटइत्यादिसत्यताग्राहिप्रत्यक्षसद्भावेपियथाद्द श्यत्वादिनातवमिथ्यात्वधीस्तथेतिगृहाण । ननुचार्वाकस्यानुमानममानमितिकथमनुमानादिनातस्यदेहात्मैक्यज्ञानंजायतइति

SGDF
Sri Gargeshwari Digital Foundation

चेन्न । तन्मतेऽनादिसंभावनायाएवानुमानस्थानीयत्वात् यथाह“धूमादिज्ञानानंतरंवन्ह्यादौप्रवृत्तिश्चसंभावनामात्रादि”ति । न नुप्रत्यक्षैकप्रामाण्यवादिनातेन संभावनावाकथंप्रमाणतयांगीकृतमितिचेन्न । संभावनापिनतन्मतेप्रमाणं किंनामोत्कटकोटिकःसंशयएव संशयस्तुनःप्रमाणमिति तदंगीकारादित्यालोचनीयं । ननुदेहात्मैक्याध्यासाभावेदेहानुकूलेरागस्तत्प्रतिकूलेचद्वेषोऽनुभवसिद्धोनस्यात् नचेष्टापत्तिरितिवाच्यं तथात्वेसंसाराभावप्रसंगात् तस्यैवचसंसारहेतुत्वादितिचेन्न । पुत्रानुकूलप्रतिकूलयोःपितूरागद्वेषवत्परमप्रेमास्पदत्वेनोपपत्तेः नहिपितुःपुत्रशरीरस्वदेहैक्याध्यासोस्तीत्याशयेनाह ॥ **संसारहेतुरिति** ॥ ननुप्रेमास्पदात्मैक्यारोपादेवदेहस्यप्रेमास्पदत्वमपीतिचेन्न स्वस्वभोगायतनत्वादिनाऽन्यथैवोपपत्तेरितिध्येयं । ननुदेहात्मैक्याध्यासाभावेंऽगु

संसारहेतुः देहानुकूलादौरागादिरपिपुत्रानुकूलादाविवदेहस्यप्रेमास्पदत्वात् । अंगुल्या देहंप्रदर्श्यायमहमित्युक्तिरपिअंगारंप्रदर्श्यायंवह्निरितिवत् पृथग्दर्शयितुमशक्यत्वात्

ल्यास्वहृदयदेहंनिर्दिश्यायमहमित्युक्तिर्नस्यात् अस्तिचासौ अतस्तदन्यथानुपपत्त्यादेहात्मैक्याध्याससिद्धिरित्यतस्तदुक्तेरन्यथासिद्धिंदर्शयति ॥ अंगुल्येति ॥ अंगारमिति ॥ यद्यप्यंगारोवह्निः यथांऽगारानपोह्यभस्मनिजुहुयादितिप्रयोगात् तथापिप्रकृतेतदसंभवात् अत्रांऽगारशब्देनांगारव्याप्तंकाष्ठंग्राह्यं ॥ पृथगिति ॥ यथाकाष्ठव्याप्तोवह्निःकाष्ठाद्भेदेनविविच्यप्रदर्शयितुंनशक्यते एवंदेहाद्विविच्यात्मनःपृथग्दर्शयितुमशक्यत्वादेवतदुक्ति र्नतुदेहात्मैक्याध्यासादित्यर्थः । ननुलोकानांदेहात्मैक्याध्यासाभावे“तंस्वाच्छरीरात्प्रवृहेन्मुंजादिवेषीकांधैर्येणे”तिकाठकेतंजीवंस्वात्स्वकीयात्शरीरात्प्रवृहेत्विविच्यजानीयादितिदेहात्मभे

SGDF
Sri Gargeshwari Digital Foundation

दोविधीयते भेदस्यचैक्यनिषेधरूपत्वात् देहात्मैक्याध्यासाभावेश्रुतेरप्रसक्तप्रतिषेधकत्वापत्तेः । तथा"तेवैविदंत्यतितरंतिचदेव मायांनैषांममाहमितिधीःश्वशृगालभक्ष्य"इत्यादिस्मृतीनामप्यप्रसक्तप्रतिषेधकत्वापत्तिः । ममाहमितिधीप्रसक्तेरेवाभावात् अतो देहात्मैक्याध्यासएवास्तिनतद्भेदप्रत्यक्षमित्याशंक्याह ॥ श्रुतिष्विति ॥ बहुवचनमाद्यर्थे । श्रुतिस्मृत्यादिष्वित्यर्थः । देहात्मैक्यनिषेधोपिचार्वाकादिवादिप्राप्तत्वादुपपद्यते तेषांतत्प्राप्तिश्चानुमानाभासादित्युक्तमेव । ननुवादिप्राप्तनिषेधकत्वंश्रुतेःकुत्रदृष्टमित्यतउक्तं ॥ असत्कारणत्वेति ॥ कुतस्तुखलुसोम्यैवंस्यात्कथमसतःसज्जायेते"तिश्रुत्याशून्यवादिप्राप्तमसत्कारणत्वंनिषि

श्रुतिषुदेहात्मैक्यनिषेधोप्यसत्कारणत्वनिषेधवत् कुवादिप्राप्तत्वात् व्यवहारपर्यंतंस्फुटतरभेद
ज्ञानाभावाच्च । दृश्यंतेहियमलयोर्व्यावर्तकंपश्यंतोपिव्यवहर्तुमशक्ताः । उक्तंच "व्याप्तत्वादात्म
नोदेहेव्यवहारेष्वपाटवात् । भेदज्ञानेपिचांगारवह्निवत्स्वाविविक्तवत् ॥ १ ॥ भवंतिव्यवहाराच

ध्यते तद्वदित्यर्थः । समयानामपिप्रवाहतोऽनादित्वान्नात्रकश्चित्क्षुद्रोपद्रवः । किंच "स्वाच्छरीरात्प्रवृहेदि"त्यस्यस्फुटतरंविविच्यजानीयादित्यर्थः । तथास्मृतेरपिएषांममाहमितिधीर्नास्ति स्फुटतरविवेकाभावज्ञानंनास्तिकिंतुस्फुटतरविवेकज्ञानमेवास्तीति यावत् तेवैविदंतीत्येवार्थः तथाचश्रुतिषुदेहात्मैक्यनिषेधःस्फुटतरभेदाभावज्ञानस्यप्रसक्तत्वाद्युज्यतइत्याशयेनाह ॥ व्यवहारपर्यंतमिति ॥ श्रुतिषुदेहात्मैक्यनिषेधइत्यन्वयः । ननुप्रत्यक्षतोभेदज्ञानसद्भावेततएवव्यवहारोपिकिंनस्यादित्यतआह ॥ दृश्यंतेहीति ॥ अंगारवह्निवत् काष्ठव्याप्तवह्निवत् । ननुज्ञानमेवव्यवहारकारणं तच्चेदस्तिकथंतर्हिव्यवहारेष्वपाटवमित्यतआह

॥ नहीति ॥ यथाऽनुभवतोऽनुभवानुसारेणयमलयोर्भेदंपश्यंतोमात्रादयःकथमेतौभिन्नाववगंतव्याविति पृष्टाःसंतएवमितिस्वप्रत्यक्षानुसारेणनपरान्प्रतिप्रतिपादयितुंक्षमंतइत्यनुभवसिद्धमित्यर्थः । उत्तरप्रबंधमुपक्षिपन्देहात्मैक्याध्यासनिराकरणमुपसंहरति ॥ तस्मादिति ॥ देहादेः सर्वस्यजगतः ॥७॥ देहात्मैक्याध्यासभंगविवरणं ॥५८॥ प्रपंचेऽनिर्वाच्यत्वंनास्तीतिवक्तुं पराभिमतदृष्टांतेशुक्तिरूप्यादौलक्षणप्रमाणयोरभावान्नानिर्वाच्यत्वमित्यभिसंधायपरपक्षंप्रस्तौति ॥ यच्चोक्तमित्यादिना ॥ नि

नहिप्रत्यक्षगानपि । अर्थान्यथानुभवतःप्रतिपादयितुंक्षमा"इति ॥ २ ॥ तस्माद्देहादेरा
त्मैक्येनस्वरूपेणचानध्यस्तत्वाज्जगत्सत्यमेवनत्वनिर्वाच्यमिति ॥ ७ ॥ देहात्मैक्याध्या
सभंगः ॥ ५८ ॥ यच्चोक्तंयद्यप्यनिर्वाच्यत्वंननिरुक्तिविरहः इदंरूप्यमितिनिरुक्तेः । अत
एव ननिरुक्तिनिमित्तस्यज्ञानस्यार्थस्यवाविरहः निमित्तंविनाकार्यायोगात् । नापितयोः

रुक्तिविरहइति ॥ वचपरिभाषणइतिधातोः नितरांउक्तिःपरिभाषणाख्यव्यवहाररूपातद्विरहइत्यर्थः । तथाचानिर्वाच्यत्वंनामाव्यवह्रियमाणत्वमित्यभिप्रेतमितिज्ञातव्यं । निरुक्तेः व्यवहारादित्यर्थः । तथाचरूप्यादावव्यवह्रियमाणत्वंनास्तीत्यसंभवइति भावः । साक्षान्निरुक्तिरूपव्यवहारनिमित्ताभिप्रायेणज्ञानस्येत्युक्तं । परंपरयातदभिप्रायेणअर्थस्येत्युक्तं तस्यज्ञानद्वारानिमित्तत्वादितिभावः । अतएवेत्युक्तंविशदयति ॥ निमित्तंविनेति ॥ इदंरूप्यमितिनिरुक्तिरूपकार्यस्यप्रत्यक्षसिद्धत्वान्निमित्तमपिज्ञाना

SGDF Foundation

दिकंकल्पनीयमितितद्विरहस्यासंभवइतिभावः । तयो रूप्यज्ञानतदर्थभूतरूप्ययोः । अर्थज्ञानात्मकोभयविधभ्रमांगीकारेणोभयोरप्यनिर्वाच्यत्वादितिभावः ॥ सदसदिति ॥ सच्चतदसच्चसदसत् तद्रूपंयद्विशिष्टंतद्विलक्षणत्वमित्यर्थः॥ सदेकेति॥ सदेकस्वभावेप्रपंचेसदसद्रूपविशिष्टवैलक्षण्यस्यप्रतिवाद्यंगीकृतत्वेनास्मदभिमतानिर्वाच्यत्वासिद्धिरितिभावः ॥सदसद्रूपत्वेपीति॥ सद्वैलक्षण्यस्योक्त्याऽसत्वस्याऽसद्वैलक्षण्यस्योक्त्याचसत्वस्यैवप्राप्त्याप्रपंचेसदसद्रूपत्वेऽप्युक्तलक्षणोपपत्त्यास्मदभिमतानिर्वाच्य

सदसद्रूपविशिष्टविलक्षणत्वं सदेकरूपत्वेपि तदुपपत्तेः । नापिसद्विलक्ष
णत्वेसत्यसद्विलक्षणत्वं सदसद्रूपत्वेऽप्युपपत्तेः । नापिसद्विलक्षणत्वेसत्य
सद्विलक्षणत्वेसतिसदसद्विलक्षणत्वं सतोपिसदंतरविलक्षणत्वात् । नापि
सत्वेसत्यसत्त्वरूपविशिष्टस्यविरहः केवलसत्त्वेऽप्युपपत्तेः । नापिसत्त्वराहि
त्येसत्यसत्त्वविरहः सदसत्त्वेप्युपपत्तेः । तथापिसत्त्वेनासत्त्वेनसदसत्त्वेनच

त्वासिद्धिरितिभावः॥ सतोपीति ॥ तथाचसद्विलक्षणत्वांशःपरस्येष्टएवेत्यर्थः। असद्वैलक्षण्यंत्वंगीकृतमेवास्ति । सदसद्रूपवस्तुनोप्रसिद्धत्वेतद्वैलक्षण्यस्यापिपरेणांगीकृतत्वेननैतादृशानिर्वाच्यत्वंप्रतिवाद्यनिष्टमित्यर्थः। अन्योन्याभावगर्भलक्षणंदूषयित्वा तद्रीत्यैवात्यंताभावगर्भमपिलक्षणंदूषयति ॥ नापीति ॥ सत्वेसत्यसत्सद्रूपंयदसत् तत्वरूपंयद्विशिष्टंतद्विरहइत्यर्थः ॥ केवलेति ॥ प्रपंचेकेवलसत्वस्यैवांगीकारेणसत्वेसत्यसत्वरूपविशिष्टविरहस्यप्रतिवादिनःसिद्धत्वादितिभावः ॥ सदसत्त्वेपीति ॥

SGDF
Sri Gargeshwari Digital Foundation

सत्वराहित्योक्त्याऽसत्वस्यअसत्वविरहोक्त्याचसत्वस्यैवप्राप्त्यासदसद्रूपत्वेऽप्युक्तलक्षणोपपत्त्याऽस्मदभिमतानिर्वाच्यत्वासिद्धि
रितिभावः ॥ विचारासहत्वमिति ॥ "प्रत्येकंसदसत्त्वाभ्यांविचारपदवींनयत् । गाहतेतदनिर्वाच्यमाहुर्वेदांतवादिन" इतिवच
नादितिभावः । लक्षणप्रमाणाभ्यामेववस्तुसिद्धेरनिर्वाच्यत्वलक्षणंनिर्धार्यतत्रप्रमाणंचाह ॥ प्रमाणंत्वत्रेति ॥ विमतं शुक्तिरू
प्यंप्रपंचश्च ॥ रहितमिति ॥ सत्वादिनाविचारासहमित्यर्थः । निरुक्तानिर्वाच्यत्वस्यैवानुमानसाध्यत्वादितिभावः । अन्वयदृ

विचारासहत्वंवाबाध्यत्वंवाऽनिर्वाच्यत्वं प्रमाणंतत्र । विमतंसत्त्वरहितत्वेसत्य
सत्त्वरहितत्वेसतिसदसत्त्वरहितं बाध्यत्वात् दोषप्रयुक्तभानत्वादित्यादिव्यतिरे
कि । नचाप्रसिद्धविशेषणत्वं सत्त्वासत्त्वेसमानाधिकरणात्यंताभावप्रतियोगिनी
धर्मत्वाद्रूपरसवत् । सत्वमसत्वानधिकरणानिष्ठं असत्त्वंवासत्त्वानधिकरणानिष्ठं

ष्टांतालाभादाह ॥ व्यतिरेकीति ॥ तथाचानिर्वाच्यत्वरहितेब्रह्मणिव्यतिरेकव्याप्तिग्रहइतिभावः । निरुक्तानिर्वाच्यत्वरूपसाध्य
स्यकुत्राप्यप्रसिद्धत्वेनानुमानस्याप्यप्रसिद्धविशेषणत्वंआशंक्यसामान्यप्रसिद्धिमाह ॥ नचेति ॥ समानाधिकरणेति ॥ एकध
र्मिनिष्ठेत्यर्थः ॥ असत्वमिति ॥ अत्रासत्वाधिकरणमनिष्टमितिनपर्यवसानंकार्यं किंतुसत्वंअसत्वानधिकरणेऽनिष्टंनास्तीत्यर्थः ।
एवंचसत्वस्यासत्वानधिकरणेऽभावसिद्धौअसत्वाभावसामानाधिकरण्यप्राप्त्यासत्वासत्वरहितस्यवस्तुनःसामान्यतः सिद्धिरितिद्र

SGDF
Sri Gargeshwari Digital Foundation

ष्टव्यं । एवमसत्वपक्षकानुमानमपिद्रष्टव्यं ॥ रूपवदिति ॥ रूपादेःअसत्वानधिकरणवाय्वाद्यनिष्टत्वात् सत्वानधिकरणशशवि षाणाद्यनिष्टत्वाच्चसाध्यमस्तीतिद्रष्टव्यं ॥ प्रवृत्तीति ॥ पूर्वंअसच्चेन्नप्रतीयेतेतिख्यात्यन्यथानुपपत्त्याऽसद्वैलक्षण्यसिद्धिरुक्ता । इदानींरूप्यमसच्चेन्नतत्रप्रवर्तेत प्रवर्ततेच तस्मान्नासदित्येवंप्रवृत्त्यन्यथानुपपत्त्याऽसद्वैलक्षण्यंसाधितमितिभेदः । एवंप्राप्तेसिद्धां ताभिधानंप्रतिजानीते॥ अत्रब्रूमइति ॥ सदसद्वैलक्षण्यरूपानिर्वाच्यत्वशरीरेप्रविष्टेसत्वासत्वेप्रकारनवकेनविकल्प्यदूषयति ॥

धर्मत्वाद्रूपवदितिवासामान्यतस्तत्सिद्धेः । किंच सच्चेन्नबाध्येतासच्चेन्नप्रतीयेतेतिख्यातिबाधा न्यथानुपपत्तिः प्रवृत्तिबाधान्यथानुपपत्तिश्चात्रमानमिति । अत्रब्रूमः । अत्रसत्त्वासत्त्वेसत्ता जातितद्भावौवा अर्थक्रियाहेतुत्वाहेतुत्वे[२]वा अबाध्यत्वबाध्यत्वे[३]वा प्रामाणिकत्वाप्रामाणिकत्वे [४]वा अशून्यत्वशून्यत्वेवा ब्रह्मत्वशून्यत्वेवा अबाध्यत्वशून्यत्वेवा प्रामाणिकत्वशून्यत्वेर्वापरेणांगी कृतेसत्त्वासत्त्वेवा। नाद्यद्वितीयौ शुद्धात्मनिसद्वैलक्षण्यस्यप्रपंचेतदभावस्यचापातात् । नतृतीयः

अत्रसत्त्वासत्त्वेइत्यादिना ॥ परेणेति ॥ त्वदपेक्षयापरेणप्रतिवादिनामयेत्यर्थः ॥ शुद्धात्मनीति ॥ शुद्धात्मनिसत्ता जातिरूपसत्वस्यअर्थक्रियाकारित्वरूपसत्वस्यचाभावेशुद्धात्मनोपिसद्वैलक्षण्यस्यापातात् प्रपंचेसत्ताजातेरर्थक्रियाकारित्वरूपस त्वस्यैवसद्भावेनसद्वैलक्षण्याभावापातादित्यर्थः । तथाचसद्विलक्षणतयात्वदभीष्टस्यप्रपंचस्यसत्वापत्तिः सत्वेनत्वदभीष्टस्यचब्र

ह्मणःसद्वैलक्षण्यापत्तिरितिभावः ॥ तुच्छस्यापीति ॥ शशविषाणादेरत्यंतासतस्त्वयासद्वैलक्षण्यंअबाध्यत्वंचांगीकृतमस्ति त स्यप्रतिपन्नोपाधेरेवाभावेनप्रतिपन्नोपाधौत्रैकालिकनिषेधप्रतियोगित्वरूपबाध्यत्वानंगीकारात् एवंचतुच्छेऽप्यबाध्यत्वरूपसत्वस्यै वप्राप्त्यातस्यसद्वैलक्षण्यायोगात् एवंबाध्यत्वमसत्वमित्यंगीकारेऽनिर्वाच्यस्यापिरूप्यस्यबाध्यत्वांगीकारेणतत्रासत्वस्यैवप्राप्त्या त्वदभिमतासद्वैलक्षण्यस्यायोगादित्यर्थः । अतएवेत्युक्तंविशदयति ॥ अनिर्वाच्यस्येति ॥ रूप्यस्येत्यर्थः । त्वन्मतेरूप्येप्राति भासिकतयाऽप्रमाणभूताविद्यावृत्तिप्रतिबिंबितसाक्षिचैतन्यवेद्यत्वेनप्रमाणभूतांतःकरणवृत्तेस्तत्रत्वयाऽनंगीकारेणाप्रामाणिकत्वां

त्वन्मतेतुच्छस्याप्यबाध्यत्वेनतत्रसद्वैलक्षण्यस्यानिर्वाच्यस्यचबाध्यत्वेनतत्रासद्वैल क्षण्यस्यचायोगात् । अतएव नचतुर्थः अनिर्वाच्यस्याप्रामाणिकत्वेनतत्रासद्वैल क्षण्यायोगात् । नचपंचमः अनिर्वाच्यस्याशून्यत्वेन तत्रसद्वैलक्षण्यायोगात् । न षष्ठः ममापिप्रपंचेतस्येष्टत्वात् । नसप्तमः तयोरविरोधेनसत्त्वासत्त्वरूपत्वायोगात्

गीकारादित्यर्थः । एवंचाप्रामाणिकत्वमसत्वंचेदनिर्वाच्यरूप्यस्याप्यप्रामाणिकत्वेनासत्वस्यैवप्राप्तत्वात् त्वदभिमतासद्वैलक्षण्या योगादितिभावः ॥ अशून्यत्वेनेति ॥ प्रातिभासिकत्वांगीकारादित्यर्थः । एवंचाशून्यत्वसत्वंचेदनिर्वाच्येरूप्येऽशून्यत्वस्यत्वयां ऽगीकृतत्वेनसत्वापत्त्यात्वदभिमतसद्वैलक्षण्यायोगादित्यर्थः ॥ इष्टत्वादिति ॥ ब्रह्मत्वमेवसत्वंचेद्ब्रह्मरूपसद्वैलक्षण्यस्यशून्य रूपासद्वैलक्षण्यस्यप्रपंचेऽस्माभिरंगीकारान्नेदमनिष्टमितिभावः ॥ तयोरिति ॥ अबाध्यत्वशून्यत्वयोरित्यर्थः ॥ अविरोधेने

SGDF Foundation

ति ॥ शून्यस्यप्रतिपन्नोपाध्यभावेनतद्धटितबाध्यत्वानंगीकारात् शून्येऽबाध्यत्वशून्यत्वयोःसहावस्थानप्राप्त्यासत्वासत्वयोश्चा
वि पालांगनंविरोधस्यप्रसिद्धत्वेनाविरुद्धयोरनयोर्विरुद्धसत्वासत्वरूपत्वायोगादित्यर्थः । किंचाबाध्यत्वरहितत्वेसतिशून्यत्वरहि
तत्वंअनिर्वाच्यत्वमित्यत्राबाध्यत्वाभावएवानिर्वाच्यत्वमस्तु ब्रह्मशून्ययोश्चाबाध्यत्वेनातिव्याप्त्यभावात् अतोविशेष्यभागवैय
र्थ्यमित्याशयेनाह॥ अबाध्यत्वाभावस्यैवेति ॥अत्रेति॥ अस्मिन्सप्तमपक्षइत्यर्थः । निरुपाख्यं सर्वथाऽज्ञायमानमित्यर्थः ।

अबाध्यत्वाभावस्यैवलक्षणत्वोपपत्त्याव्यर्थविशेष्यत्व ाच्च । किंचात्रशून्यंकिंविवक्षितं निरुपाख्यं वा निस्स्वरूपंवा । नाद्यः असत्ख्यातिवादेपिरूप्यादौतद्वैलक्षण्यस्येष्टत्वात् । नद्वितीयः मिथ्यात्वभंगोक्तरीत्यात्वन्मतेपिरूप्यादेःस्वरूपेणत्रैकालिकनिषेधेननिस्स्वरूपात् । अतएव नाष्टमः

असदिति ॥ त्वयाहिशून्यवाद्यभिमतंयदसत्वंतद्वैलक्षण्यमेवतंप्रतिरूप्यादौवक्तव्यं तत्रनिरुपाख्यरूपासद्वैलक्षण्यंरूप्यादेःशू
न्यवादिनाऽप्यंगीकृतमस्ति । कथमित्यतउक्तं ॥ असत्ख्यातिवादइति ॥ असदेवरूप्यंज्ञायतइतिवादइत्यर्थः । एवंशुक्तिरू
प्यादावज्ञायमानवैलक्षण्यरूपासद्वैलक्षण्यस्यशून्यवादिनोपीष्टत्वादितिभावः ॥उक्तरीत्येति॥ रूप्यादेःपारमार्थिकत्वाकारेणनि
षेधेंऽगीक्रियमाणेब्रह्मवत्सद्रूपत्वेनाप्युपपत्तेः अतःस्वरूपेणनिषेधेंऽगीक्रियमाणेनिस्स्वरूपत्वमेवांगीकृतमितिनिस्स्वरूपवैलक्षण्य

SGDF
Sri Gargeshwari Digital Foundation

रूपासद्वैलक्षण्यंनसिध्यतीत्यर्थः ॥उक्तरीत्येति॥ रूप्यादेरपिनिस्स्वरूपत्वरूपशून्यत्वसद्भावेनशून्यवैलक्षण्यरूपासद्वैलक्षण्यायोगादित्यर्थः॥ स्वीकारादिति ॥ "त्रिकालसर्वदेशीयनिषेधाप्रतियोगिता । सत्तोच्यतेऽध्यस्ततुच्छेतंप्रतिप्रतियोगिनी" इत्युक्तत्वादितिभावः । किमेतावतासमानिष्टमित्यतआह॥त्वन्मतइति॥ तथाचानिर्वाच्यस्यरूप्यस्यसार्वदेशिकसार्वकालिकनिषेधप्रतियोगित्वांगीकारेणासत्वस्यैवप्राप्त्यातद्वैलक्षण्यायोगादितिभावः । अस्तुवासत्वंयत्किंचित् तथापितद्वैलक्षण्यंनरूप्यप्रपंचयोर्वक्तुंशक्यं

उक्तरीत्यारूप्यादावप्यसद्वैलक्षण्यायोगात् । न नवमः मयात्रिकालसर्वदेशीयनिषेधाप्रतियोगित्वप्रतियोगित्वेसत्त्वासत्त्वेइतिस्वीकारात् । त्वन्मतेचानिर्वाच्यस्यतत्प्रतियोगित्वात् । किंच रूप्यादौघटादौचप्रातिभासिकस्यव्यावहारिकस्यचसत्त्वस्यसद्भावात्कथंसद्विलक्षणत्वं पारमार्थिकसद्वैलक्षण्यंविवक्षितंचेत् पारमार्थिकत्वस्यबाध्यत्वाभावरूपतयालाघवाद्बाध्यत्वमेवानिर्वाच्यत्वंस्यात् । किंच

प्रातिभासिकव्यावहारिकसत्वयोरंगीकारादित्याह ॥किंचेति॥ लाघवादिति ॥पारमार्थिकसद्वैलक्षण्यंनामाबाध्यवैलक्षण्यमेव तदपेक्षयाबाध्यत्वस्यैवलघुत्वेनतदेवानिर्वाच्यत्वंस्यात् ब्रह्मशून्ययोश्चाबाध्यत्वेनलक्षणस्यातिव्याप्त्यभावात् अतोसद्वैलक्षण्यविशेषवैयर्थ्यमितिभावः । सत्वराहित्योक्तौमेमातावंध्येतिवत्स्ववचनव्याघातइत्याशयेनाह ॥ किंचेति ॥ सत्वासत्वराहित्यंवदन्प्रष्टव्योजायते ॥ सत्वासत्वेकीदृशेविवक्षितेइति ॥ मयापरस्परप्रतिक्षेपसत्वासत्वांगीकारात् मदनभिमतेअन्येपरस्परप्रतिषेधा

SGDF
Sri Gargeshwari Digital Foundation

नात्मकेपारिभाषिकेब्रह्मत्वशशशृंगत्वादिरूपेतयोराहित्यंविवक्षित मुतमदभिमतयोःसत्वासत्वयोराहित्यं नाद्यः पारिभाषिकंयत् ब्रह्मत्वाख्यंसत्वंयच्चशशशृंगत्वाख्यमसत्वं तद्राहित्यस्यमयाप्रपंचेऽप्यंगीकारेणेष्टापत्तेरित्याह ॥ मदनभिमतयोरिति ॥ नद्वितीयइत्याह ॥ मदभिमतयोरिति ॥ परस्परप्रतिषेधात्मकयोरित्यर्थः ॥ लाघवादिति ॥ परस्परप्रतिषेधात्मकंसत्वमसत्वंच नास्तीतिवदतापरस्परविरहानात्मकेसत्वासत्वेभावरूपेलोकविलक्षणेवर्तेतेइत्यंगीकृतंस्यात् एवमंगीकुर्वताऽपित्वयालोकेसत्वासत्व

मदनभिमतयोःपरस्परनिषेधा नात्मकयोःपारिभाषिकयोःसत्त्वासत्त्वयोराहित्यवि
वक्षायामिष्टापत्तिः।मदभिमतयोराहित्यविवक्षायांतु मयालाघवादावश्यकत्वाच्च
(च्चाऽसत्वाभावएवसत्वमिति)सत्त्वाभावएवासत्त्वमितिस्वीकारात्। "द्वौनञौप्र
कृतमर्थंसातिशयंगमयत"इतिन्यायेनैकतरनिषेधस्यान्यतरविधिरूपत्वात् मातावं
ध्येतिवद्व्याघातः । एतेनासद्वैलक्षण्येनसत्त्वसाधनेआत्मत्वमुपाधिरितिनिरस्तं ।

योर्विरहरूपत्वस्यप्रसिद्धेर्लोकप्रसिद्ध्युलंघनस्यचपरीक्षकेणकर्तुमशक्यत्वाल्लोकसिद्धेपरस्परविरहरूपेसत्वासत्वेअपिपृथगंगीकार्ये अतस्तवगौरवं ममतुसत्वमसत्वाभावएव नतुत्वन्मतइवतदविरोध्यपिकिंचिदस्तीत्यतोलाघवमित्यर्थः ॥ आवश्यकत्वादिति ॥ असत्वप्रतिषेधानात्मकंभावरूपंसत्वमंगीकृत्यापिलोकप्रसिद्धिसंरक्षणायासत्वाभावरूपसत्वांगीकारस्तवाप्यावश्यकएव एवंचाव ॥ ४०७ ॥
श्यकत्वादसत्वाभावरूपमेवसत्वमस्त्वित्यर्थः । ननुअनेनममकोदोषउक्तःस्यादितिचेत् व्याघातइत्याह ॥ द्वौनञाविति ॥ अ

सत्वनिषेधापेक्षयैवद्वौनञावितिन्यायोनतुसत्वनिषेधापेक्षया तत्रतुपरस्परविरहरूपयोरितिन्यायोद्रष्टव्यः । तथाचद्वौनञाविति न्यायेनासत्वस्यनिषेधेसत्वस्यैवप्राप्त्यापुनःसत्वनिषेधेमेमातावंध्येतिवत्स्ववचनव्याघातइत्यर्थः ॥ असदिति ॥ द्वौनञावितिन्यायेनाऽसद्वैलक्षण्योक्तौसत्वमेवप्राप्नोतीत्यस्मदुक्तेरभिप्रायमज्ञात्वा । इदंसत् असद्विलक्षणत्वादित्यनुमानमुक्त्वातत्रात्मत्वमुपाधिरित्याह तदप्येतेनैवनिरस्तमित्यर्थः । एतेनेत्युक्तंविशदयति ॥ असदिति ॥ किंचप्रागसद्वैलक्षण्येनसत्वंसाध्यतएव कोदोषः नचात्मत्वमुपाधिरित्युक्तमितिवाच्यं लोकेसाध्येप्रयोजकतयाक्लृप्तएवोपाधिर्वाच्यो नान्यः लोकेहिभावत्वेतद्विरुद्धाभाववैलक्ष

असद्वैलक्षण्यमेवसत्त्वरूपमितिव्याहृतेरेवोक्त्यातेनतदसाधनात् । सत्त्वेत
द्विरुद्धवैलक्षण्यस्येवात्मत्वस्यतंत्रत्वेनाक्लृप्तत्वाच्च । एतेनानिर्वाच्यवादेवि
रोधोसिद्धइतिनिरस्तं अन्योन्याश्रयात् । अन्यथा मातावंध्येतिवादेविरो

ण्यं घटत्वेतद्विरुद्धाघटवैलक्षण्यमेवतंत्रत्वेनक्लृप्तं एवंचतत्वेतद्विरुद्धवैलक्षण्यस्यैवप्रयोजकत्वेनदृष्टत्वादि हापितद्विरुद्धासद्वैलक्षण्यस्यैवप्रयोजकत्वेनावश्यमंगीकार्यत्वात् तद्वदात्मत्वस्यप्रयोजकत्वेनाक्लृप्तत्वान्नात्मत्वंसत्वेप्रयोजकापरपर्यायउपाधिरित्याह ॥ सत्वइति ॥ अनिर्वाच्यवादइति ॥ सत्वासत्वयोर्नपरस्परविरहात्मकतयाविरोधोस्ति अनिर्वाच्यरूपतृतीयकोट्यंगीकारेणैवपरस्परविरहात्मकत्वरूपविरोधस्यैवासिद्धेरित्यर्थः । एतेनेत्युक्तंविवृणोति ॥ अन्योन्येति ॥ अनिर्वाच्यरूपतृतीयकोटिसिद्धौ

SGDF
Foundation

विरोधाभावसिद्धिः तत्सिद्धौचानिर्वाच्यसिद्धिरित्यन्योन्याश्रयादित्यर्थः ॥ असिद्धइति ॥ स्यादिति ॥ मातृत्वोक्तौपुत्रवत्प्रा ह्यापुनर्वंध्येत्युक्तौव्याघातः वंध्यात्वोक्तौपुत्राभावत्वप्राह्यापुनर्मातृत्वोक्तौव्याघातइतिमातृत्ववंध्यात्वयोरपिविरोधोनसिध्येत् तत्रवंध्यामातृविलक्षणरूपतृतीयकोट्यंगीकारेणविरोधस्यपरिहर्तुंशक्यत्वात् अप्रामाणिकत्वस्यचोभयत्रसाम्यादितिभावः ॥ अ तात्विकत्वादिति ॥ असत्वनिषेधेसत्वप्राह्यापुनःसद्वैलक्षण्योक्तावपिनव्याघातः सद्वैलक्षण्यस्यातात्विकत्वात् एवंसत्वनिषेधे परस्परविरुद्धयोरितिन्यायेनासत्वप्राह्यापुनरसद्वैलक्षण्योक्तावपिनव्याघातः असद्वैलक्षण्यस्यातात्विकत्वादित्यर्थः । ननुरूप्येस

धोऽसिद्धइतिस्यात् । ननुनिषेधसमुच्चयस्यातात्विकान्नविरोधः
सदादिवैलक्षण्योक्तिस्तुतत्तत्प्रतियोगिदुर्निरूपत्वमात्रप्रकटनाय

द्वैलक्षण्यस्यासद्वैलक्षण्यरूपनिषेधसमुच्चयस्यातात्विकत्वेरूप्येख्यातिबाधान्यथानुपपत्त्यातयोःसाधनमयुक्तंस्यात् नह्यतात्विकसा धनायप्रमाणोपन्यासोयुक्तइत्यतआह ॥ सदादिवैलक्षण्योक्तिस्त्विति ॥ सदादिवैलक्षण्यसाधकख्यातिबाधान्यथानुपपत्ति रूपप्रमाणोक्तिस्त्वित्यर्थः । तत्तत्प्रतियोगिनःरूप्यसत्वादिनिषेधप्रतियोगिनःसत्वादेरित्यर्थः । तथाचसच्चेन्नबाध्येत असच्चेन्नप्रती येत प्रतीयतेबाध्यतेच तस्मात्सत्वेनासत्वेनचतत्स्वरूपंदुर्निरूपं अतःसदसद्वैलक्षण्यरूपानिर्वाच्यत्वव्यवहारइत्यत्रैवार्थापत्तेस्ता त्पर्यं नतुरूप्येसद्वैलक्षण्यासद्वैलक्षण्ययोःसत्वइत्याशयः । ननुरूप्यस्यसत्वासत्वाभ्यांदुर्निरूप्यत्वमात्रेणसदादिवैलक्षण्योक्तिर्वा

SGDF
Sri Gargeshwari Digital Foundation

कुतः ख्यात्यन्यथानुपपत्त्यासत्वस्यबाधान्यथानुपपत्त्याऽसत्वस्यसंभवेनसदसदात्मकत्वसंभवादित्यतआह ॥ नहीति ॥ स्वतः स्वरूपतःरूपंधर्मः । तथाचरूप्यस्यस्वरूपतएवदुर्निरूपत्वात्तत्रसत्वमसत्वंसदसदात्मकत्वंवातद्वैलक्षण्यंवाकिमपिरूपंवास्तवं नास्ति येनसदसदात्मकत्वेनाप्युपपत्तिःशंक्येतेतिभावः । एवंचरूप्यंसत्वासत्वादिवास्तवंकिंचिद्रूपरहितंस्वरूपेणदुर्निरूपत्वादित्यनुमानमुक्तंभवतीतिज्ञातव्यं । सत्वादिराहित्यस्यसदादिवैलक्षण्यस्यअनिर्वाच्यत्वेरूप्यादेःसदादिवैलक्षण्यरूपानिर्वाच्यत्वोक्ताविवत्यर्थः ॥ निषेधायोगादिति ॥ रूप्यादाविवाविद्यानिवृत्तावपिसत्वादेर्दुर्निरूपत्वमात्रेणसदसद्वैलक्षण्यरूपानिर्वाच्यत्वस्यैववक्तुं

नहिस्वरूपतोदुर्निरूपस्यकिंचिदपिरूपंवास्तवमस्तीतिचेन्न सत्त्वादिराहित्यस्याताात्विकत्वेपिसत्त्वादेर्दुर्निरूपत्वमात्रेणानिर्वाच्यत्वेपंचमप्रकाराविद्यानिवृत्तौ "नानिर्वाच्यश्चतत्क्षय" इत्यनिर्वाच्यत्वनिषेधायोगात् सत्वादिवत्तद्राहित्यस्याप्यतात्विकत्वेसत्त्वादौप्रमाणनिरासेनतद्राहित्येतदुक्तेरयोगाच्च विधिसमुच्चयस्यैवातात्विकत्वान्नविरोधइतिसुवचत्वाच्च । किंच निषेधसमुच्चयस्यातात्विकत्वं

शक्यत्वा "न्नानिर्वाच्यश्चतत्क्षय" इत्यनिर्वाच्यत्वनिषेधायोगादित्यर्थः ॥ सत्वादिवदिति ॥ रूप्यादेःसत्वादौप्रमाणंनास्ति प्रत्युततद्वैलक्षण्यएव ख्यातिबाधान्यथानुपपत्तिरूपप्रमाणमस्तीत्युक्त्ययोगात्उभयोरप्यतात्विकत्वाविशेषेएकत्रप्रमाणंनास्त्यपरत्रतदस्तीत्युक्त्ययोगादितिभावः ॥ विधीति ॥ अर्थापत्त्यासदसद्वैलक्षण्योक्तौविरोधेअभिहितेनिषेधसमुच्चयस्याताात्विकत्वान्नविरोधइतियथोच्यते तथावयमपिवदामः त्वदीयार्थापत्त्यासदसदात्मकत्वमेवास्तु नचविरोधइतिवाच्यं तात्विकत्वेहिविरोधःवि

SGDF
Sri Gargeshwari Digital Foundation

धिसमुच्चयस्यास्माभिरतात्विकत्वांगीकारेणविरोधाभावादितिवक्तुंसुशकत्वादितिभावः ॥ उभयातात्विकत्वेनेति ॥ सत्व निषेधासत्वनिषेधयोरुभयोरप्यतात्विकत्वेननिषेधसमुच्चयोऽप्यतात्विकइत्यर्थः । एकस्यसत्वनिषेधस्यवाअसत्वनिषेधस्यवाऽता त्विकत्वेननिषेधसमुच्चयोऽप्यतात्विकएव एकसत्वेपिद्वयमिहनास्तीतिप्रतीतिसिद्धव्यासज्यवृत्तिप्रतियोगिकाभावाभिप्रायेणेदं ॥ उभयेति ॥ सत्वासत्वयोरुभयोरपितात्विकत्वंयथाविरुद्धं एवमुभयोरतात्विकत्वमपिविरुद्धमेवेत्यर्थः ॥ विधीति ॥ नि षेधसमुच्चयस्यातात्विकत्वेतत्प्रतियोगिनःसदसदात्मकत्वरूपविधिसमुच्चयस्यतात्विकत्वंस्यात् परस्परविरुद्धयोरितिन्यायादिति

किमुभयातात्विकत्वेन एकैकातात्विकत्वेनवा।नाद्यः।उभयतात्विकत्ववदुभयातात्विकत्वस्यापिविरु
द्धत्वा द्विधिसमुच्चयस्यतात्विकत्वापातेनप्रतियोगिदुर्निरूपत्वस्यायोगाच्च । अतएव नद्वितीयः ।
तत्प्रतियोगिनएकस्यविधेस्तात्विकत्वापातात् । अतात्विकंहितात्विकात्यंताभावप्रतियोगीत्युक्तं ।

भावः ॥ प्रतियोगीति ॥ विधिसमुच्चयस्यतात्विकत्वेनिषेधप्रतियोगिनस्तस्यसदसत्त्वस्यसुनिरूपत्वात्तत्प्रतियोगिदुर्निरूपत्वमा त्रप्रकटनायसदादिवैलक्षण्योक्तिरित्यस्यायोगादित्यर्थः । अतएवेत्युक्तमेवविशदयति ॥ तत्प्रतियोगिनइति ॥ एकातात्विकत्वे ननिषेधसमुच्चयस्यातात्विकत्वेयन्निषेधस्तात्विकःतत्प्रतियोगिनोऽतात्विकत्वेपियन्निषेधोऽतात्विकस्तत्प्रतियोगिनोविधिरूपधर्मे स्यतात्विकत्वंस्यादित्यर्थः । कुतइत्यतआह ॥ अतात्विकंहीति ॥ तात्विकपदंकिमर्थमितिचेदुच्यते अतात्विकात्यंताभावप्रति

योगित्वमेवातात्विकत्वंचेत्तर्हितात्विकेब्रह्मण्यप्यतात्विकात्यंताभावप्रतियोगित्वसत्वेनातात्विकत्वापत्तेः । अतस्तात्विकात्यंताभा वप्रतियोगित्वंवाच्यं । एवंचप्रकृतेयदासत्वनिषेधस्यातात्विकत्वं तदातात्विकात्यंताभावप्रतियोगित्वंवाच्यं सत्वनिषेधात्यंताभाव श्चसत्वमेव अभावाभावस्यभावत्वात् तथाचतत्वनिषेधस्यातात्विकत्वेतस्यसत्वनिषेधस्यतात्विकात्यंताभावप्रतियोगित्वेवाच्येत दत्यंताभावरूपस्यसत्वस्यतात्विकत्वसिद्धिरित्यर्थः। रूप्यंवास्तवसत्वादिकिंचिद्रूपरहितं स्वरूपतोदुर्निरूपत्वादित्यनुमानेदोषमाह ॥किंचेति ॥अनैकांत्यस्यसिद्धसाधनस्यचेति ॥ अयमत्रविवेकः।हेतूकृतंस्वरूपतोदुर्निरूपत्वंअतात्विकं तात्विकंवा नाद्यःब्रह्म

किंच हेतूकृतस्यस्वरूपतोदुर्निरूपत्वस्यसाध्यस्यवास्तवरूपाभावस्य
चातात्विकत्वेनैकांत्यस्यसिद्धसाधनस्यचापत्त्या तयोस्तात्विकत्वाव
श्यंभावाद्विरोधः । अपिच स्वरूपतोदुर्निरूपस्येत्यत्रकिमिदंदुर्निरूपत्वं

णिव्यभिचारात् वस्तुतोब्रह्मस्वरूपस्यसुनिरूपत्वेनाऽतात्विकस्यस्वरूपतोदुर्निरूपत्वस्यहेतोःसद्भावेनवास्तवरूपाभावरूपसाध्य स्याभावात् एवमेववास्तवरूपाभावरूपंयत्साध्यंतदप्यतात्विकं तात्विकंवा नाद्यः अतात्विकवास्तवरूपाभावसाधनेसिद्धसाधनात् वास्तवरूपस्यैवतात्विकत्वसिद्धेः अतोहेतुसाध्ययोरुभयोरपितात्विकत्वेऽवश्यंवाच्येतात्विकहेतुसाध्यवत्वेनैवस्वरूपतःसुनिरूपत्व प्राप्त्याहेतुसाध्यवत्त्वरूपवास्तवरूपस्यैवप्राप्त्याचहेतुवाक्यप्रतिज्ञावाक्ययोःहेतुवाक्यप्रतिज्ञावाक्याभ्यांविरोधइत्यर्थः॥इत्यत्रेति॥

SGDF Foundation

स्वरूपतोदुर्निरूपस्यवास्तवंरूपंकिमपिनास्तीत्यत्रोक्तमिदंदुर्निरूपत्वंकिंसत्वादिनाकेनापिप्रकारेणेतिविवक्षतमित्यर्थः ॥ प्रकारान्येति ॥ केनापिप्रकारेणदुर्निरूपत्वमित्यनेनप्रकारेणसुनिरूपत्वेपिकेनापिप्रकारेणदुर्निरूपत्वमित्येतत्प्रकारान्यप्रकारेणदुर्निरूपत्वंविवक्षितंवेत्यर्थः ॥ दुर्निरूपत्वमिति ॥ केनापिप्रकारेणदुर्निरूपत्वमित्यनेनप्रकारेणदुर्निरूपत्वंविवक्षितं सुनिरूपत्वंवा आद्येसत्वादिनासुनिरूपत्वात्केनापिप्रकारेणदुर्निरूपत्वव्याघातः । द्वितीयेकेनापिप्रकारेणदुर्निरूपत्वप्राप्त्याकेनापिप्रकारेणदुर्निरूप

केनापिप्रकारेणवा केनापिप्रकारेणदुर्निरूपत्वमित्येतत्प्रकारान्यप्रकारेणवा सत्त्वासत्त्वाभ्यांवा । नाद्यः । केनापिप्रकारेणदुर्निरूपत्वमित्यनेनप्रकारेणदुर्निरूपत्वादुर्निरूपत्वाभ्यांव्याघातात् । अतएव नद्वितीयः । केनापिप्रकारेणदुर्निरूपत्वमित्येतदन्यप्रकारेणदुर्निरूपत्वस्यकेनापिप्रकारेणदुर्निरूपत्वमित्यस्मादन्यत्वंवा दसतोसत्त्वेनेव

त्वव्याघातएवेत्यर्थः । अतएवेत्युक्तंविशदयति ॥ दुर्निरूपत्वस्येति ॥ दुर्निरूपत्वप्रकारस्य ॥ केनापिप्रकारेणदुर्निरूपत्वमित्यस्मादन्यत्वादिति ॥ केनापिप्रकारेणदुर्निरूपत्वमित्यस्मादेवप्रकारोऽन्यःसुनिरूपः तथात्वेऽन्येनप्रकारेणसुनिरूपत्वप्राप्त्याकेनापिप्रकारेणदुर्निरूपंनभवतीतियावदित्यर्थः । तथाचकेनापिप्रकारेणदुर्निरूपत्वमित्येतस्मात्प्रकारादन्योयःकेनापिप्रकारेणदुर्निरूपत्वमित्येतदन्यप्रकारेणदुर्निरूपत्वरूपःप्रकारस्तेनैवप्रकारेणसुनिरूपत्वात्केनापिप्रकारेणदुर्निरूपत्वमित्येतत्प्रकारान्यप्रकारे

SGDF
Sri Gargeshwari Digital Foundation

गदुर्निरूपत्वमयुक्तं उक्तप्रकारादप्यन्योयःप्रकारःअसतोऽसत्वरूपस्तेनैवसुनिरूपत्वात्तथाकल्पितस्यापिरूप्यस्यउक्तप्रकारान्योयः प्रकारोमिथ्यात्वादिस्तेनैवसुनिरूपत्वादित्यर्थः । कल्पितेमिथ्यात्वरूपःप्रकारोऽप्रामाणिकइतिनमंतव्यं बाधबाध्यत्वादित्याशयेनो क्तं ॥ बाधवेद्येनेति ॥ तस्येति ॥ सत्वासत्वाभ्यांदुर्निरूपत्वेसदादिवैलक्षण्यस्यवास्तवत्वमेवस्या त्तथाचसत्वादिनादुर्निरूप त्वस्यसदादिवैलक्षण्यवास्तवत्वंप्रत्येवहेतुत्वेनतद्वैलक्षण्यावास्तवत्वाहेतुत्वादित्यर्थः । सत्वादिराहित्यनिर्वाच्यत्वसाधकानुमानेना प्रसिद्धिः सत्वासत्वाभावयोरप्येकत्रसंभवात् नचविरुद्धयोरेकत्रसत्वमयुक्तमितिवाच्यं । यथाहिध्वंसानुपलक्षिताध्वंसास्पृष्टाया सत्तातद्योगित्वंनित्यत्वं ध्वंसोपलक्षितसत्तायोगित्वमेवचानित्यत्वं एतादृशयोश्चनित्यत्वानित्यत्वयोर्नसामान्येसमावेशोस्ति तत्र

कल्पितस्यापिबाधवेद्येनमिथ्यात्वादिनासुनिरूपत्वाच नतृतीयः। तस्यसदसद्वैलक्षण्यावास्तवत्वाहेतुत्वात् ।

सत्ताजातेरेवाभावेतद्धटितनित्यत्वाद्यभावात् यथावाउत्तरावधिराहित्यंनित्यत्वंभावान्यायानिवृत्तिस्तद्वत्त्वमनित्यत्वं घटादिप्रति योगिकध्वंसस्यभावत्वाभावात् एवंचैतादृशयोर्वैवक्षिकयोर्नित्यत्वानित्यत्वयोर्नप्रागभावेसमावेशोस्ति उत्तरावधेरेवसत्वेनतद्राहि त्यरूपनित्यत्वाभावात् तथाप्रतियोगाख्यभावस्यैवप्रागभावनिवृत्तिरूपत्वेनभावान्यनिवृत्तिमत्त्वरूपानित्यत्वस्याप्यभावात् एवंच यथानित्यत्वानित्यत्वयोःपरस्परपरिहारेणैवलोकेसत्वेपिसामान्यादौतदुभयाभावोदृष्टः एवंसत्वासत्वयोःपरस्परपरिहारेणैवलोके सत्वेपिक्कचित्पदार्थविशेषेतयोरभावोपिकिंनस्यात् एवंचसामान्यतःसत्वासत्वरहितवस्तुसिद्धिरितिकेनचिदुक्तमाशंक्यनिषेधति

SGDF
Sri Gargeshwari Digital Foundation

॥ नचेति ॥ उक्तयो स्त्वयानिरुक्तयोः । तथाचतयोर्विरोधएवनास्तीतिभावः । तर्हिंप्रकृतेपितथाऽस्त्वितिनवाच्यमित्याह ॥ सत्वासत्वयोरस्त्विवति ॥ तदात्मकत्वात् भावाभावात्मकत्वेनविरुद्धत्वादित्यर्थः । तथाचनतदभावयोःएकत्रसमावेशोयुक्तइतिभावः । सामान्यादौनित्यत्वानित्यत्वाभाववद्युक्तमितिचेन्न । त्वयानित्यत्वादिकंवैवक्षिकंनिरुच्यतदभावःसामान्यादौउक्तःवस्तुतस्तुध्वंसाप्रतियोगित्वतत्प्रतियोगित्वरूपनित्यत्वानित्यत्वयोरपिपरस्परविरहरूपतयाविरोधस्यैवसत्वेनतदभावयोरपिनैकत्रस

नचध्वंसानुपलक्षितोपलक्षितसत्तायोगित्वरूपयोर्नित्यत्वानित्यत्वयोःसत्ताहीनेसामान्यादावभाववदुत्तरावधिराहित्यभावान्यनिवृत्तिमत्त्वरूपयोर्नित्यत्वानित्यत्वयोःप्रागभावेअभाववद्वाक्वचित्सत्तासत्त्वयोरभावःस्यादिति केनचिदुक्तंयुक्तं उक्तयोर्नित्यत्वानित्यत्वयोर्भावाभावानात्मकत्वात् सत्त्वासत्त्वयोस्तुतदात्मकत्वात् प्रागभावसामान्याद्यनुगतयोर्ध्वंसाप्रतियोगित्वप्रतियोगित्वयोरेवनित्यत्वानित्यत्वरूपत्वाच्च । प्रागभावस्यापिप्रतियोग्येवध्वंसः भावस्याभावोनिवृत्तिरभावस्यतुभावएवेतिस्वीकारात् ।

मावेशइत्याशयेनाह ॥ सामान्येति ॥ ध्वंसाप्रतियोगित्वरूपनित्यत्वंसामान्ये ध्वंसप्रतियोगित्वरूपमनित्यत्वं प्रागभावइतिविवेकः । ननुप्रागभावेध्वंसप्रतियोगित्वरूपमनित्यत्वंनास्ति अभावप्रतियोगिकाभावांतरानभ्युपगमादित्यतआह ॥ प्रागभावस्यापीति ॥ स्वप्रतियोगिकाभावांतरशून्यस्यापीत्यर्थः । तदेवविशदयति ॥ भावस्येति ॥ भावस्यघटादेर्निवृत्तिरभावएवध्वं

सएव अभावस्यप्रागभावस्यनिवृत्तिस्तुभावएव प्रतियोगिरूपैव नततोऽन्येतिध्वंसप्रतियोगित्वरूपानित्यत्वंप्रागभावेऽस्तीत्यर्थः । अस्मदुक्तरीत्यानित्यत्वानित्यत्वयोःपरस्परविरहात्मकत्वमनभिधायनित्यानित्यत्वेवैवक्षिकेनिरुच्यसामान्यादौतदुभयाभाववत्सत्वासत्वयोरपिक्वचिदभावांगीकारेऽतिप्रसंगइत्याह ॥ अन्यथेति ॥ तर्ह्येकत्रैवरूप्येसत्वासत्वेअप्यंगीकार्येस्यातां तथाचसदसदात्मकत्वेनाप्युपपत्तिरस्तु नचविरोधः यथाध्वंसोपलक्षितसत्ताराहित्यंनित्यत्वं ध्वंसानुपलक्षितसत्ताराहित्यंचानित्यत्वं तयोश्चसामान्येसमावेशोस्ति तत्रसत्तायाएवाभावेनउक्तनित्यत्वानित्यत्वयोस्तत्रसत्वेनविरोधाभावात् तद्वद्रूप्येपिसत्वासत्वयोरुपपत्तेरिति

अन्यथा ध्वंसोपलक्षितानुपलक्षितसत्ताराहित्यरूपयोर्नित्यत्वानित्यत्वयोःसामान्यादौभाववदेकत्रसत्त्वासत्त्वेस्यातामितिस्यात् । नचाध्यस्तेनित्यत्वानित्यत्वयोरिवसत्त्वासत्त्वयोरप्यभावौनविरुद्धौ धर्मिणएवकल्पितत्वेनविरुद्धयोरपिधर्मयोरभावादितिवाच्यं त्वन्मतेकल्पितस्यानित्यत्वात्कल्पितत्वरूपहेतोर्विरुद्धधर्माभावरूप

भावः । सत्वासत्वोभयाभावसाधनेव्याघातइत्यत्रपरिहारांतरमाशंक्यनिराकरोति ॥ नचेति ॥ नित्यत्वेति ॥ यथाकल्पितेरूप्येनित्यत्वानित्यत्वयोरभावोनविरुद्धः धर्मिणएवाभावेनविरुद्धयोर्धर्मयोरप्यभावादित्यर्थः । विरुद्धयोः सत्वासत्वयोः विरुद्धयोरपिधर्मयोरभावादित्यस्यकस्यापिधर्मस्याभावादित्यर्थः । तथाचरूप्यंविरुद्धेनअविरुद्धेनवाकेनापिधर्मेणशून्यं स्वरूपेणकल्पितत्वादित्यनुमानमुक्तंभवति । नित्यत्वानित्यत्वयोरिवेतिदृष्टांतएवत्वन्मतेऽसिद्धइत्याह ॥ त्वन्मतइति ॥ विरुद्धधर्माभाव

SGDF
Sri Gurgaonkar Digital Foundation

रूपसाध्यस्येति ॥ कस्यापिधर्मस्याभावरूपधर्मस्येत्यर्थः ॥ व्याघाताच्चेति ॥ कल्पितेतस्मिन्सधर्मकत्वस्यप्राप्त्याकस्यापिधर्मस्याभावोविरुद्धइत्यर्थः । ननुकल्पितेरूप्येउक्तहेतुसाध्ययोर्भावेतयोरेवधर्मयोःसद्भावस्तत्राभावेकल्पितत्वरूपहेतोःसाध्यस्यचाभावेन तन्न्यायेनान्येषामपिधर्माणांसत्वप्राप्त्याव्याघातइत्ययुक्तंकल्पितत्वहेतोर्विरुद्धधर्माभावरूपसाध्यस्यचसत्वंनित्यत्वं यथाधर्मिसत्तासापेक्षं तथाधर्मिसत्तासापेक्षंनभवतीतितयोःसत्वंयुक्तं इतरेषांतुधर्मिसत्वापेक्षत्वान्नतन्न्यायेनसत्वोक्तिर्युक्तेतिचेत् तर्हिसत्वरूपध

साध्यस्यच भावाभावाभ्यांव्याघाताच्च।अथकल्पितत्वादिकंनित्यत्वादिवन्नधर्मिसत्त्वापेक्षंतर्ह्यसत्त्वमपितथा । अन्यथा तुच्छस्याप्यसद्वहिर्भावः कल्पितस्यापिदृश्यादृश्यबाध्याबाध्यदुर्निरूपसुनिरूपबहिर्भावोपिस्यात् । नचतार्किकमतेसंयोगतदत्यंताभावयोरिव भट्टमतेभेदाभेदयोरिवच सत्त्वासत्त्वाभावयोरप्यविरोधोस्त्वितिवाच्यं

र्मस्यधर्मिसत्वसापेक्षत्वेनाभावेपिअसत्वस्यतथात्वाभावाद्रूप्येऽसत्वमस्तु तद्वैलक्षण्यंकुतोऽगीकार्यमित्याह ॥ अथेति॥ असत्वस्यापिधर्मिसत्तासापेक्षत्वेदोषमाह॥ अन्यथेति ॥ असद्बहिर्भावःस्यादित्यन्वयः । तत्रासत्वंनस्यादित्यर्थः। तुच्छस्यधर्मिणएवाभावादितिभावः । विरुद्धयोरपिधर्मयोरभावांगीकारेदोषमाह ॥ कल्पितस्यापीति ॥ तथाचत्वदभिप्रेतंदृश्यत्वंबाध्यत्वंसत्वादिनादुर्निरूपत्वंचनस्यादित्यर्थः । प्रकारांतरेणसत्वासत्वाभावयोरविरोधमाशंक्यनिराकरोति ॥ नचेति ॥ सत्वासत्वाभावयोः सद्वै

लक्षण्यासद्वैलक्षण्ययोः ॥ तद्वदेवेति ॥ तथाचसदसदात्मकत्वमेवयुक्तमितिभावः ॥ तथात्वेइति ॥ अविरोधोपपादकस्यकालरूपावच्छेदकभेदस्यसत्वेसत्वासत्वयोरप्यविरोधइष्टएवेतिअविरोधापातादित्यापादनमयुक्तमित्यर्थः । तमेवदर्शयति ॥ स्वेति ॥ स्वयंयस्मिन्कालेस्तितदवच्छेदेनेत्यर्थः ॥ समइति ॥ सत्वासत्वयोरपिकालरूपावच्छेदकभेदेनाविरोधःसमएवेतिसत्वा

तद्वदेवसत्त्वासत्त्वयोरेवाविरोधापातात् । अथसंयोगतदत्यंताभावादाववच्छेदकभेदेनाविरोधः सत्त्वासत्त्वयोरपितथात्वेइष्टापत्तिः। स्वकालाद्यवच्छेदेनसत्त्वस्यान्यकालाद्यवच्छेदेनासत्त्वस्यचेष्टत्वादितिचेत् समःसमाधिः। स्वकालाद्यवच्छेदेनासद्वैलक्षण्यस्यकालांतराद्यवच्छेदेनसद्वैलक्षण्यस्यचेष्टत्वात् । तस्मात्सत्त्वासत्त्वात्यंताभावावेकत्रविरुद्धौ । अपिच सत्त्वादिनाविचारासहत्वं किं[१]सत्त्वाद्यनधिकरणत्वं सत्त्वात्यंताभावाधिकरणत्वं[२]वा सद्रूपत्वाद्यभावो[३]वा सत्त्वादेरित्थमितिनिर्वक्तुमशक्यत्वं[४]वा सत्त्वादिनाप्रमाणगोचरत्वं[५]वा । नाद्यः ।

सत्वयोरप्यविरोधोस्त्वित्युक्तेऽस्माकमपीष्टापत्तिरित्यर्थः । तदेवदर्शयति ॥ स्वेति ॥ स्वाधिकरणकालेस्वस्यसत्वेनतत्रासद्वैलक्षण्यस्यासत्वाभावस्यसद्भावादित्यर्थः । सद्वैलक्षण्यस्य सत्वाभावस्य सत्वासत्वाभावयोर्विरोधोपपादनमुपसंहरति ॥तस्मादिति॥ तथाचनिषेधसमुच्चयस्यातात्विकत्वान्नविरोधइत्येतदयुक्तमितिभावः ॥ सत्वादिनेति ॥ सत्वादिप्रकारकप्रमाणागोचरत्वमित्य

SGDF
Foundation

र्थः । असत्वानधिकरणत्वस्यासत्यतिव्याप्तिः तस्यस्वरूपतएवाभावेनासत्वाभावानधिकरणत्वादित्याह ॥ असतइति ॥ किंच सत्वानधिकरणत्वमित्यत्रतात्विकसत्वानधिकरणत्वंविवक्षितं उतातात्विकसत्वानधिकरणत्वं धर्मिसमसत्वानधिकरणत्वंवा ना द्यइत्याह ॥ सत्पदेति ॥ तात्विकसत्वरूपधर्मांगीकारेप्रवृत्तिनिमित्तसद्भावेनसत्पदवाच्यत्वमेवस्यान्नलक्ष्यत्वमित्याशयेनोक्तं ॥ सत्पदलक्ष्यस्येति ॥ नद्वितीयोऽसंभवापत्तेरित्याह ॥ अतात्विकमिति ॥ व्यावहारिकंप्रातिभासिकमित्यर्थः । अनिर्वाच्य स्य गगनादेःरूप्यादेश्च। नतृतीयः ब्रह्मण्यतिव्याप्तेः । धर्मिसमसत्वस्यतात्विकस्यब्रह्मण्यभावेनतदनधिकरणत्वसद्भावादित्याह

असतोप्यसत्त्वरूपधर्मानधिकरणत्वात् सत्पदलक्ष्यस्यनिर्धर्मकस्यब्रह्मणोपिस्वरूपातिरिक्तं तात्विकंसत्त्वंप्रत्यनधिकरणत्वाच अतात्विकंसत्त्वंप्रतित्वनिर्वाच्यस्याप्यधिकरणत्वात् ध र्मिसमसत्त्वंप्रतिचब्रह्मणोप्यनधिकरणत्वात् अनिर्वाच्यस्याप्यधिकरणत्वाच्च । नद्वितीयः ।

॥ धर्मीति ॥ अनिर्वाच्येऽसंभवश्चधर्मिसमस्यानिर्वाच्यसत्वस्यप्रातिभासिकत्वाद्यपरपर्यायस्यतत्राविसत्वेनधर्मिसमसत्ताकसत्वं प्रत्यधिकरणत्वेनतदनधिकरणत्वाभावादित्याह ॥ अनिर्वाच्यस्येति ॥ धर्मवत्त्वादेरेवेति ॥ नचतुच्छब्रह्मणोरतिव्याप्तिरिति वाच्यं तयोर्निर्धर्मकत्वांगीकारात् धर्मवत्त्वस्यचानिर्वाच्यमात्रनिष्ठत्वादितिभावः । आदिपदेनबाध्यत्वसंग्रहः तुच्छब्रह्मणोश्चाबा ध्यत्वादितिद्रष्टव्यं । तथाचोक्तनिर्वचनप्रयासोव्यर्थइतिभावः । ननुसत्वात्यंताभावाधिकरणत्वस्यसत्वादिधर्मशून्येब्रह्मण्यति

॥४१३॥

व्याप्तिः असत्वात्यंताभावानधिकरणत्वस्यनीरूपतयाऽसत्वरूपधर्मानधिकरणेतुच्छेऽतिव्याप्तिश्चकस्मान्नदीयतइत्यतउक्तं ॥ नि र्धर्मकइत्यादि ॥ तुच्छेपीति ॥ असतिचसचेतसांमूकतायाएवशरणत्वादितिभावः । अनुपदमेवातिव्याप्तेरपिवक्ष्यमाणत्वा त्कथंचिदित्युक्तं । ब्रह्मण्यतिव्याप्तिमेवाह ॥ निर्विशेषत्वेति ॥ निर्धर्मकत्वाद्ब्रह्मणि सत्वंनास्तीत्येवसत्वावगाहित्वेंऽगीकृतेसतित दत्यंताभावाधिकरणत्वंदुर्वारमेव। नचनिर्विशेषत्वप्रतिपादकश्रुत्याब्रह्मणिधर्ममात्रनिषेधान्नसत्वासत्वात्यंताभावाधिकरणमपीति

निर्धर्मकेब्रह्मणिसत्त्ववत्तदत्यंताभावोपि न तुच्छेप्यसत्त्ववत्तदत्यंताभावो पिनेतिकथंचिदतिव्याप्तिनिरासेपितुच्छब्रह्मणोर्निर्धर्मकत्वेनधर्मवत्त्वादेरेवा निर्वाच्यलक्षणत्वापातात् निर्विशेषत्वश्रुत्यापिव्याघातेन धर्ममात्रनिषे धायोगेन ब्रह्मणिसत्त्वराहित्येतदत्यंताभावस्यदुर्वारत्वाच्च । नतृतीयः ।

वाच्यं । निर्विशेषत्वश्रुतेर्धर्ममात्रनिषेधपरत्वांगीकारेनिर्विशेषत्वरूपधर्मस्यैवप्रतिपादनेनश्रुतेःस्वव्याघातप्रसंगात् अतस्तत्परिहा रायभावरूपविशेषाभावेऽपिअभावरूपोविशेषोस्तीतिश्रुत्यर्थस्त्वयावर्णनीयः तथाचातिव्याप्तिरितिभावः। सत्वराहित्येइत्येवपाठः। अंगीकृतेसतीतिशेषः । नतृतीयः ब्रह्मण्यतिव्याप्तेः ब्रह्मणिनिर्धर्मकेसत्वस्याभावेनसद्रूपत्वस्याप्यभावात् सद्रूपत्वेसत्वस्यैवप्रयो जकत्वादित्याह ॥ ब्रह्मणीति ॥ ननुसत्ताजातिरहितस्यापिसामान्यादेःसद्रूपत्ववत्सत्वरहितस्यापिब्रह्मणःसद्रूपत्वंकिंनस्यात्

SGDF
Sri Gangadhar Digital Foundation

तथाचनातिव्याप्तिरित्यतउक्तं ॥ सामान्यादेरपीति ॥ अबाध्यत्ववत्त्वेनैवेति ॥ अबाध्यत्वरूपसत्ववत्त्वेनैवेत्यर्थः । तथा चसामान्यादेःसत्ताजात्यभावेपिअबाध्यत्वरूपसत्वसद्भावादेवसद्रूपत्वंनान्यथेत्यर्थः । ब्रह्मणःसद्रूपत्वांगीकारेबाधकमाह ॥ ब्रह्म णइति ॥ लाक्षणिकत्वेति ॥ नहिसत्पदलक्ष्यस्यसद्रूपत्वंसंभवति गंगापदलक्ष्यस्यतीरस्यगंगात्वाभावात् तथात्वेगंगापदलक्ष्य त्वमेवनस्यात् एवंचसत्पदलक्ष्यतयांगीकृतस्यब्रह्मणःसद्रूपत्वाभावादतिव्याप्तिःस्यादेवेत्यर्थः ॥ त्वन्मतइति ॥ तथाचब्रह्मण्य

सामान्यादेरप्यबाध्यत्ववत्त्वेनैवाबाध्यात्मकसद्रूपतयाब्रह्मणःसत्त्वाभावेसद्रूपत्वायोगात् ब्रह्म णःसद्रूपत्वेश्रौतसत्पदस्यलाक्षणिकत्वायोगाच्च । नचतुर्थः । त्वन्मतेब्रह्मण्यपिसत्त्वस्येत्थमितिदु र्वचत्वात् । नपंचमः । अखंडार्थनिष्ठवेदांतैकवेद्यस्यब्रह्मणोपिसत्त्वप्रकारकप्रमाणागोचरत्वात् । अपिच सत्त्वादिराहित्यंनतावत्प्रातिभासिकं रूप्यप्रपंचयोर्ब्रह्मवत्पारमार्थिकत्वापातात् ।

तिव्याप्तिरितिभावः ॥ अखंडार्थेति ॥ ब्रह्मणःसत्वप्रकारकप्रमाणगोचरत्वेवेदांतानांसप्रकारकब्रह्मज्ञानजनकत्वापत्त्यानिर्विशे षार्थनिष्ठत्वरूपाखंडार्थत्वहानिरित्यर्थः । सत्वासत्वराहित्यरूपमनिर्वचनीयत्वंचेत्तर्हिसत्वराहित्यंकीदृशंविवक्षितमितिप्रष्टव्यं किं प्रातिभासिकं किंवाधर्मिसमसत्ताकं अथवाव्यावहारिकं यद्वापारमार्थिकं नाद्यइत्याह ॥ अपिचेति ॥ रूप्येति ॥ प्रतियोगि तदभावयोर्भिन्नसत्ताकत्वनियमादनिर्वाच्यतयाभिमतयोरूप्यप्रपंचयोःसत्वराहित्यस्यप्रातिभासिकत्वेब्रह्मणीवसत्वंपारमार्थिकं ॥ ४१४ ॥

स्यादितिभावः । व्यावहारिकंसत्वंतुपारमार्थिकसत्वकोटिनिविष्टमितिपारमार्थिकत्वापातादित्येवोक्तमितिहृदयं । तथाचरूप्यप्र पंचौपारमार्थिकसत्वोपेतौ प्रातिभासिकसत्वराहित्योपेतत्वात् यत्प्रातिभासिकयदभावयुक्तं तत्पारमार्थिकतत्प्रतियोगियुक्तं य थाघटयुक्तंभूतलमित्यनुमानमुक्तंभवति । नद्वितीयइत्याह ॥ नापीति ॥ सत्वराहित्यस्यनरूप्यरूपधर्मिसमसत्ताकत्वंरूप्यग तस्यसत्वराहित्यस्यनास्तिनासीन्नभविष्यतीतिबाधबोध्यस्यत्वन्मतेव्यावहारिकत्वेनभ्रांतिसिद्धेनप्रातिभासिकेनरूप्येणसाम्यायो गात् एवंप्रपंचगतंसत्वादिराहित्यमपिनप्रपंचरूपधर्मिसमसत्ताकं तस्यनास्तिनासीन्नभविष्यतीतिवेदांतजन्यचरमसाक्षात्काररूप

नापिधर्मिसमसत्ताकं बाधबोध्यस्यभ्रांतिसिद्धेनसाम्यायोगात् । नापि व्यावहारिकं जगतिव्यावहारिकत्वेरूप्येप्रातिभासिकत्वापातेनोक्त दोषात् । रूप्येव्यावहारिकत्वेचजगतिपारमार्थिकत्वापातेनाद्वैतहानेः ।

बाधबाध्यस्यपारमार्थिकत्वेनभ्रांतिसिद्धेनव्यावहारिकेणजगतासाम्यायोगादित्यर्थः । नापितृतीयइत्याह ॥ नापीति ॥ प्रपंच रूप्ययोरनिर्वाच्यत्वेपिप्रपंचापेक्षयारूप्यस्यनिकृष्टतयावांतरवैलक्षण्यांगीकारेणसत्वराहित्यस्यजगतिव्यावहारिकत्वेरूप्येतस्यप्रा तिभासिकत्वापत्तेः अस्त्वितिचेन्न रूप्यगतसत्वराहित्यस्यबाधबाध्यस्यप्रातिभासिकेनरूप्येणसाम्यायोगात् तथात्वेबाधबाध्यत्वं नस्यादितिभावः । रूप्यगतसत्वराहित्यस्यबाधबाध्यत्वान्यथानुपपत्त्याव्यावहारिकत्वमंगीक्रियतइतिचेन्न तथात्वेरूप्यापेक्षयाप्र पंचस्याधिकत्वात्तत्रसत्वराहित्यस्यपारमार्थिकत्वापातात् नचेष्टापत्ति रद्वैतहानेरित्याह ॥ रूप्यइति ॥ चतुर्थपक्षमतिदेशेनदू

SGDF Foundation

षयति ॥ अतएवेति ॥ रूप्यप्रपंचयोःसत्वराहित्यंनपारमार्थिकं अद्वैतहानेरेवेत्यर्थः । रूप्यगतस्यैवसत्वराहित्यस्यपारमार्थिक त्वांगीकारेदोषांतरमाह ॥ नहीति ॥ सत्वराहित्याख्यस्यैववास्तवरूपस्यांगीकारात्स्ववचनविरोधइत्यर्थः । "नचकयापियुक्त्या मानेनवाभेदनिराकरणंभवति अंगीक्रियमाणत्वादि"तिभगवत्पादवाक्यंमनसिनिधायाह ॥ किंचेति ॥ अभावाभावोभावएवत द्व्याप्तोवेतिमतद्वयसद्भावादाह ॥सदसद्भिन्नत्वरूपामिति॥तद्व्याप्तमिति॥ सदसद्भिन्नत्वव्याप्तमित्यर्थः। ननुनसदसद्वैलक्षण्य

अतएव सत्त्वादिराहित्यंनपारमार्थिकं नहिस्वरूपतोदुर्निरूपस्यकिंचिदपिरूपंवास्तवमस्तीतिस्ववच नविरोधाच्च । किंच श्रुत्यायुक्त्याचभेदंनिराकुर्वताकथंसदसद्भिन्नत्वरूपंतद्व्याप्तंवाऽनिर्वाच्यत्वंसम र्थ्यते । बाध्यत्वंअनिर्वाच्यत्वमितितुमिथ्यात्वभंगएवनिरस्तं ॥ ७ ॥ अनिर्वाच्यलक्षणभंगः ॥५९॥

मनिर्वाच्यत्वं किंनाम बाध्यत्वमेवेतिचेत्तत्राह॥बाध्यत्वमिति॥ मिथ्यात्वभंगएवेति ॥ बाध्यत्वंहित्रैकालिकनिषेधप्रतियो गित्वं तत्रत्रैकालिकनिषेधस्यतात्विकत्वेऽद्वैतहानेः प्रातिभासिकत्वेसिद्धसाधनात् व्यावहारिकत्वेपितस्यबाध्यत्वेनतात्विकसत्वा विरोधित्वेनार्थांतरात् अद्वैतश्रुतेरतत्वावेदकत्वापाताच्चेतिमिथ्यात्वभंगएवनिरस्तमित्यर्थः ॥ ७ ॥ ७ ॥ अनिर्वाच्यत्वलक्ष णभंगविवरणं ॥ ५९ ॥

SGDF Sri Gargeshwari Digital Foundation

अनुमानंचायुक्तं मिथ्यात्वभंगेउक्तरीत्यांऽशेसिद्धसाधनात् अप्रसिद्धविशेषणत्वाच्च उक्तरीत्याव्या
घाताच्च ब्रह्मवत्सत्वराहित्येऽप्यनिर्वाच्यत्वाभावोपपत्त्याऽर्थांतरत्वाच्च सत्त्वादिराहित्यस्यप्रातिभा
सिकत्वादिपक्षेषुदोषस्योक्तत्वाच्च भेदनिरासानुपपत्तेरुक्तत्वात् वक्ष्यमाणरीत्याभ्रांतिबाधयोरन्यथै
वोपपत्त्याविमतंसदसदात्मकंबाध्यत्वाद्व्यतिरेकेणात्मवदित्याद्याभाससाम्याच्च असदेवरजतंप्रत्य
भादितिप्रत्यक्षबाधाच्च । नचैवंमिथ्यैवरूप्यमभादितिप्रत्यक्षेणानिर्वाच्यत्वसिद्धिः मिथ्याशब्दस्या
सत्पर्यायत्वात् विमतंअसत् सत्त्वानधिकरणत्वात् नृशृंगवदितिसत्प्रतिपक्षत्वाच्च । नचसत्त्वाभा
वमात्रेणासदितिधीः त्वत्पक्षेज्ञानेपिसत्वाभावेनासदितिधीप्रसंगात् असत्त्वाभावेनसदितिधीप्रसं
गाच्च नृशृंगाद्यसत्त्वबुद्धितोस्यावैलक्षण्याननुभवाच्च । किंचोक्तेषुसत्त्वासत्त्वपक्षेष्वाद्यद्वितीययोः
जगतिसत्त्वराहित्यांशे रूप्यादावसत्त्वराहित्यांशे तृतीयचतुर्थयोरुभयत्रापिअसत्वराहित्यांशे पं
चमेउभयत्रापिसत्त्वराहित्यांशे सप्तमाष्टमनवमेष्वप्युक्तन्यायेनोभयत्राप्यसत्त्वराहित्यांशेबाधः ।
षष्ठेत्वबाध्यत्वरूपसत्त्वेनोपपत्त्याऽर्थांतरं सामान्यतोऽनिर्वाच्यसाधकानुमानेष्वप्युक्तरीत्याव्या
घातार्थांतरादिकं । किंचोक्तसत्त्वासत्त्वपक्षेषुषष्ठान्येष्वंशेबाधः । षष्ठेऽर्थांतरं । सत्त्वासत्त्वेसमाना
धिकरणात्यंताभावप्रतियोगिनीनभवतः परस्परात्यंताभावत्वात् घटत्वाघटत्ववत् । असत्त्वंसत्त्वा

SGDF
Sri Gargeshwari Digital Foundation

नधिकरणानिष्ठंन तत्प्रतिषेधरूपत्वात् यथा अनित्यत्वंनित्यत्वानधिकरणानिष्ठंन । एवंसत्वंपक्षी
कृत्यापिप्रयोक्तव्यमितिसत्प्रतिपक्षत्वं । घटत्वाघटत्वे समानाधिकरणात्यंताभावप्रतियोगिनी धर्म
त्वाद्रूपरसवत्।कल्पितत्वमकल्पितत्वानधिकरणानिष्ठं धर्मत्वाद्रूपरसवदित्याभाससाम्यंच परस्परप्र
तिषेधानात्मकत्वमुपाधिश्च।एवंच"अविरुद्धौरूपरसौसत्त्वासत्त्वेविरोधिनी॥अन्यथासदसद्रूपंस्यात्किं
चिद्रसरूपवत्"॥किंचाद्येसद्विलक्षणत्वासद्विलक्षणत्वकल्पितत्वाकल्पितत्वदृश्यत्वादृश्यत्वदुर्निरूप
त्वादुर्निरूपत्वादौद्वितीयतृतीययोर्यथाक्रममसद्वैलक्षण्येसद्वैलक्षण्येचत्रिष्वपिज्ञेयत्वव्यावहार्यत्वादौ
व्यभिचारः। नचौपाधिकधर्माणामुपाध्यनतिरेकाज्ज्ञानत्वमेवज्ञेयत्वमिति तदप्यत्यंताभावप्रतियोगी
तिवाच्यं तथात्वेदृक्त्वमेवदृश्यत्वमभिधानत्वादिकमेवाभिधेयत्वादिकमितिब्रह्मणएवदृश्यत्वं नतु
जडस्य ब्रह्मणइवचघटादेरप्यवाच्यत्वमित्याद्यतिप्रसंगात् आवाभ्यांषट्पदार्थनियमस्यानंगीकारा
च्च वैशेषिकैरप्यौपाधिकधर्माणामभावेसामान्येंऽतर्भावइतिवा उपाध्यनतिरेकेपिघटाद्येवकार्यंनत्वा
काशादीतिव्यवस्थित्यर्थंयस्योपाधिनासंबंधोनतत्रैवौपाधिकधर्मात्यंताभावइतिवा स्वीकृतत्वेनानैकां
त्यतादवस्थ्याच्च।नचज्ञेयत्वाद्यपिस्वनिष्ठात्यंताभावप्रतियोगि अन्यथाऽऽत्माश्रयादितिनव्यभिचार
इतिवाच्यं सत्त्वादेरप्यसत्त्वाद्यनधिकरणत्वात् सत्त्वादिरूपविशेषनिष्ठात्यंताभावप्रतियोगित्वसि

SGDF
Sri Gargeshwari Digital Foundation

द्ध्यासामान्यतःसिद्ध्युक्त्ययोगात् सद्वैलक्षण्यमिथ्यात्वदृश्यत्वादिवच्छब्दप्रतिपाद्यत्वादेरप्यनन्य
थासिद्धधीबलेनस्ववृत्तित्वाच्च अत्यंताभावप्रतियोगित्वेऽव्यभिचारस्यदुर्वारत्वाच्च।नचशब्दबोध्यत्वा
द्यपिनिर्धर्मकात्मनिष्ठात्यंताभावप्रतियोगि आत्मशब्देनैवप्रतिपाद्यतयाव्याघातात् सत्त्वासत्त्वयो
रपितन्निष्ठात्यंताभावप्रतियोगित्वेनार्थांतरत्वाच्च। यदिचसर्वधर्मराहित्यश्रुत्याऽऽत्मनिसत्त्ववत्तद
त्यंताभावोपिनेतिनार्थांतरं तर्हिशब्दबोध्यत्वात्यंताभावोपिनतत्रेत्यनैकांत्यतादवस्थ्यं। नचसत्त्वम
मसत्त्वानधिकरणानात्मनिष्ठात्यंताभावप्रतियोगि अनात्मनिष्ठात्यंताभावप्रतियोगित्वादसत्त्वव
दितिप्रयोगान्नात्मन्यर्थांतरमितिवाच्यं व्याघाताद्यनिस्तारात् अत्यंताभावस्यप्रामाणिकत्वेअपसि
द्धांतस्याऽप्रामाणिकत्वेचासिद्धसाधनस्यापाताच्च। अयंचदोषःपूर्वत्रापिद्रष्टव्यः। कल्पितत्वमकल्पि
तत्वानधिकरणानात्मनिष्ठात्यंताभावप्रतियोगि अनात्मनिष्ठात्यंताभावप्रतियोगित्वादकल्पितत्व
वदित्याभाससाम्याच्च आत्मनइवानात्मनोपिसत्त्वासत्त्वराहित्येऽप्यनिर्वाच्यत्वाभावोपपत्त्याऽ
र्थांतरत्वाच्च मिथ्यात्वेत्वद्रीत्याव्यभिचाराच्च। तस्मादप्रसिद्धविशेषणत्वंदुर्वारं।एतेन सत्ख्यातिवा
दिनंप्रतिअसद्विलक्षणंविमतंसद्विलक्षणंबाध्यत्वात् शुक्तिरजतत्वसंसर्गवत्इत्यसत्ख्यातिवादिनं
चप्रतिसद्विलक्षणंविमतमसद्विलक्षणमपरोक्षधीविषयत्वात् घटवदितिप्रयोगान्नाप्रसिद्धविशेषण

SGDF
Sri Gargeshwari Digital Foundation

त्वादिकं पक्षधर्मताबलाच्चानिर्वाच्यसिद्धिरितिनवीनोक्तंनिरस्तं व्याघातबाधाद्यनिस्तारात् ॥ अनि
र्वाच्यसाधकानुमानभंगः ॥ ६० ॥ अर्थापत्तावपिसच्चेन्नबाध्येतेत्यत्र किमिदंसत् सत्ताजातिमद्वा[१]
अर्थक्रियाकारिवा[२] अबाध्यंवा[३] अबाध्यत्वावच्छेदकावच्छिन्नंवा[४] प्रामाणिकंवा नाद्यद्वितीयौ त्वन्म
तेप्रपंचेव्यभिचारात् व्यवहारदशायांनबाध्येतेत्यापादनेच "नेहनाने" तिबाधेनजगतोऽनिर्वाच्य
त्वासिद्धेः व्यवहारदशायामेवजगतियौक्तिकादिबाधस्यदर्शनाच्च प्रत्यक्षबाधस्यचपरोक्षाध्यस्तेअप
रोक्षाध्यस्तेनभोनैल्यादौचाभावात् सत्तादिराहित्येपिब्रह्मवदनिर्वाच्यत्वाभावोपपत्तेश्च व्यवहा
रदशायांबाध्यस्यापिरूप्यस्याद्वैतवत्पारमार्थिकत्वोपपत्तेश्च । नतृतीयः यदबाध्यंतदबाध्यमितिसा
ध्यावैशिष्ट्यात् व्यवहारस्यापाद्यत्वेचबाध्यत्वेनैवासद्व्यावृत्तेरपिसिद्ध्याशेषवैयर्थ्यात् । अतएव
नचतुर्थःप्रामाणिकत्वादन्यस्यतदवच्छेदकस्याभावाच्च । नपंचमः बाध्यस्यापिबाध्यत्वाकारेणप्रामा
णिकत्वात् सत्त्वेनप्रामाणिकत्वविवक्षायामात्माश्रयापातात् मानांतराप्राप्तस्यतत्त्वावेदकश्रुतिवे
द्यत्वेनप्रामाणिकस्यब्रह्मनिर्विशेषत्वादेरपित्वन्मतेब्रह्मान्यत्वेन बाध्यत्वेनव्यभिचाराच्च अबाध्ये
अविद्यादिसाधकतयास्वतःप्रकाशमानेचिन्मात्रेवैयर्थ्येनप्रमाणाप्रवृत्त्याप्रामाणिकत्वस्यबाध्यत्वेनै
वव्याप्तत्वाच्च रूप्यादिबाधकस्यातत्वावेदकत्वेनतदप्रामाणिकतानापादकत्वाच्च । अतत्वावेदक

व्यावहारिकप्रमाणबाधितस्यापिरूप्यादेरद्वैतवत्स्वतःप्रामाण्यप्रयुक्तपारमार्थिकत्वोपपत्तेः । नचा
स्यतत्त्वावेदकाद्वैतश्रुतिबाधः तस्याःभेदश्रुतिवत् प्रत्यक्षप्राप्तव्यावहारिकरूप्यनिषेधानुवादित्वोपप
त्तेः।एतेनासतएवविलक्षणमिहसद्विवक्षितमितिकेनचिदुक्तंनिरस्तं । अवधारणस्यसदसद्विलक्षणं
नचेदित्यर्थकत्वेनप्रतियोग्यप्रसिद्ध्यापादकासिद्धेः बाधेनैवानिर्वाच्यत्वसिद्ध्याख्यात्युक्त्ययोगाच्च ।
सदसद्विलक्षणंनचेदित्यत्रसत्किंविवक्षितमितिपूर्वविकल्पप्रसरेणघट्टकुटीप्रभातवृत्तांतापाताच्च ।
एवंनबाध्येतेत्यत्रबाधःकिंज्ञानेननिवृत्तिः प्रतिपन्नोपाधौत्रैकालिकनिषेधोवा नोभयमपि मिथ्यात्व
भंगेउक्तरीत्या आद्येइष्टापत्ते द्वितीयेअसद्विलक्षणत्वपक्षेबाध्यतेचेतिविपर्ययापर्यवसानात् । एव
मसच्चेदित्यत्रासत् किंसत्तादिहीनं[१] बाध्यंवा[२] निरुपाख्यंवा[३] निरुपाख्यत्वावच्छेदकावच्छिन्नंवा[४] नि
स्स्वरूपंवा[५] । नाद्यः सत्तादिहीनस्यात्मादेःप्रतीत्याव्यभिचारा द्रूप्यादौतस्मादसन्नभवतीतिविपर्य
यापर्यवसानाच्च । अतएव नद्वितीयः । नतृतीयः निरुपाख्यंचेन्नख्यायेतेतिसाध्यावैशिष्ट्यात् । न
चतुर्थः निस्स्वरूपत्वाद्यन्यस्यतस्याभावादसतएवख्यात्यंगीकारेणापादकासिद्धेश्च । नपंचमः । पार
मार्थिकत्वाकारेणत्रैकालिकनिषेधप्रतियोगित्वस्यनिर्धर्मकेब्रह्मण्यपिसत्त्वेनानिर्वाच्यस्यस्वरूपेणत
त्प्रतियोगित्वेवाच्येशशशृंगादेरपीतोऽन्यस्यनिस्स्वरूपत्वस्याभावेन तस्मादसन्नभवतीतिविपर्यया

SGDF Sri Gurudev Digital Foundation

पर्यवसानात् । किंचासत्त्वंयदिसत्त्वाभावतद्व्याप्यान्यतरत्तर्ह्यनिर्वाच्यख्यातौनाविपर्ययेपर्यवसानं अन्यच्चेदिष्टापत्तिः। एवं नप्रतीयेतेत्यत्र किंप्रतीतिमात्रंविवक्षितं सत्त्वेनप्रतीतिर्वा अपरोक्षप्रतीतिर्वा सत्त्वेनापरोक्षप्रतीतिर्वा । नाद्यः असतोप्रतीतावसद्वैलक्षण्यज्ञानायोगात् असत्प्रतीतिनिरासानुप पत्तेश्च असत्पदस्यानर्थकत्वेप्रयुक्तपदानांसंभूयकारित्वेनासन्नप्रतीयतइतिवाक्यस्याबोधकत्वापाता च्च असतोसत्त्वेनाप्रतीतावसद्व्यवहारानुपपत्तेश्च। तदुक्तं "असद्विलक्षणज्ञस्यैज्ञातव्यमसदेवहि ॥ त स्मादसत्प्रतीतिश्चकथंतेननिवार्यत" इति। द्वितीयेपि साकिंप्रमारूपानिषिध्यते भ्रमरूपवा । नाद्यः इ ष्टापत्तेः। नद्वितीयः उक्तन्यायेनासतःप्रतीतिसिद्धौसतोसत्त्वेनेवारूप्यस्यचरूप्यत्वेनेवभ्रांतित्वादे वासतःसत्त्वेनप्रतीत्युपपत्तेः । तदुक्तं "असतःसत्त्वप्रतीतिःसतोऽसत्त्वप्रतीतिरित्यन्यथाप्रतीतेरेव भ्रांतित्वादि" ति । येनपुंसाशशशृंगाभावोननिश्चितः तस्यशशशृंगमस्तीतिवाक्याभासाज्ज्ञानोत्प त्तेश्च । नह्यत्र "घढधषि" त्यादिनिरर्थकेष्विवपदार्थधीरेववा "कुंडमजाजिन" मित्याद्यपार्थकेष्वि वान्वयधीर्वानास्ति विपरीतबोधकेषुयोग्यताभावेपिअयोग्यत्वज्ञानाभावमात्रेणयोग्यताभ्रमेणवा आकांक्षासन्निधिभ्यांज्ञानोत्पत्तेरनुभवात्। अन्यथाप्रवृत्त्यादेरयोगात्। योग्यताहीनाद्वाक्याज्ज्ञा नानुत्पत्तौचतद्धीनात्प्रतिवादिवाक्याद्धीरेवनस्यादितिकथाबधिरकलहःस्यात्। ननुशशशृंगादिश

SGDF
Sri Gargeshwari Digital Foundation

ब्दाद्विकल्पमात्रमेवजायते उक्तंहि योगसूत्रे "शब्दज्ञानानुपातीवस्तुशून्योविकल्प" इतीतिचेन्न वि
कल्पस्येच्छादिवज्ज्ञानान्यवृत्त्यंतरत्वेऽनुभवविरोधात् प्रवृत्त्ययोगाच्च। नहिशशशृंगस्यासत्त्वाज्ञान
दशायांतदस्तित्वज्ञानस्यगोशृंगास्तित्वज्ञानान्मात्रयापिविशेषोनुभूयते असतिवृत्त्यंतरवज्ज्ञानस्यै
वोपपत्तेश्च। अन्यथा शुक्तिरूप्यादेरपिविकल्पमात्रं नतुप्रतीतिरितिस्यात् विकल्पस्यज्ञानविशेष
त्वेत्विष्टापत्तिः। वस्तुशून्यइतिचकोर्थः किंकिमप्यनुल्लिखन्निति असदेवोल्लिखन्नितिवा। आद्ये अनु
भवविरोधः व्यवहारानुपपत्तिश्च। नह्ययंघटादिवत्किमप्यनुल्लिखन्ननुभूयते। द्वितीये सिद्धंनःस
मीहितं। नचेयमपिधीरनिर्वाच्यविषया। निस्स्वरूपस्यशशशृंगादेरप्यनिर्वाच्यत्वेहिरूप्यादेःकुतोवै
लक्षण्यमाशास्यते निरुपाख्यादितिचेन्न तस्यदुर्बोधत्वादित्युक्तत्वात् तादृशाद्वैलक्षण्यस्येष्टत्वाच्च
अत्यंतासत्यपिज्ञानमर्थेशब्दःकरोतिहीति त्वन्मतेपितत्राध्यस्तस्यास्तित्वस्यानिर्वाच्यत्वेपिशशशृं
गमसदितिवाक्यइवशशशृंगमस्तीतिवाक्येशशशृंगशब्देनासतएवप्रतीतेश्च "तद्धैकआहुरसदेवे
दमग्रआसीदि" तिश्रुत्याऽप्यसतःसत्त्वप्रतीतेश्च। एतेन शशशृंगशब्दोनिश्चितानन्वयत्वादपार्थक
इतिचिंतामण्युक्तंनिरस्तं। अपार्थकशब्देनाप्रत्यायकोक्तावनन्वयानिश्चयदशायांप्रवृत्तिपर्यंतप्रती
त्यनुभवविरोधात् तेनात्यंतिकनिषेधयोग्याप्रतीतौअसच्छशशृंगमित्यादौसमभिव्याहृतस्यासत्पद

स्यानन्वयापाताच्च । असत्प्रत्यायकत्वोक्तौचेष्टापत्तेः । एतेनैव शशशृंगादिशब्दानांसंगतिग्रहणा
संभवादबोधकतेत्यात्मतत्वविवेकोक्तंनिरस्तं । यौगिकशब्दानामवयवसंगत्यतिरेकेणपृथक्संगत्य
नपेक्षतयासतोवाऽसतोवाऽर्थस्यबोधनसंभवात् । एतेनैव शशशृंगशब्दस्यशशेशृंगाभावोऽर्थइ
तिवार्तिकोक्तंनिरस्तं । तत्रतस्याशक्तेः नास्तीत्यस्यपौनरुक्त्यापाताच्च । नतृतीयः यदसत्तन्नप्रतीय
तइतिव्याप्तिज्ञानस्यप्रत्यक्षतावश्यंभावात् शशशृंगाद्यत्यंताभावस्याप्रत्यक्षत्वापातेनासतोसत्त्वा
सिद्धेश्च । नचतुर्थः भ्रांतित्वादेवतदुपपत्तेः सन्मात्राविषयकंअपरोक्षज्ञानमपरोक्षभ्रमोवाअसद्विष
यकः सत्वानधिकरणविषयकत्वादसद्विषयकपरोक्षज्ञानवदित्याद्यनुमानैरप्यसतोपरोक्षप्रतीतिसि
द्धेश्च । नन्वसतोपरोक्षधीश्चेत् शशशृंगादेरपिसास्यात् नचासद्विशेषस्यसा सद्विशेषत्वेअसत्त्वा
योगादितिचेन्न दुष्टेंद्रियस्यरूप्यसंस्कारसाचिव्यवत् शशशृंगादिसंस्कारसाचिव्याभावात् असतः
सत्यादसत्त्वरूपेण सद्वैलक्षण्यरूपेणापरोक्षप्रतीत्यविषयत्वरूपेण नृशृंगशशशृंगादीनामेवान्योन्यं
नृशृंगादिशब्दैरेवपरोक्षप्रतीतिव्यवहारविषयत्वरूपेणशशशृंगस्यैवकदाचिदेवपरोक्षप्रतीतिविष
यत्वरूपेणच विशेषेणेवानेनापिबौद्धेनसत्त्वानपेक्षेणविशेषेणासत्त्वाव्याघाताच्च । एतेन सर्वसाम
र्थ्यहीनस्यासतःसताज्ञानेनासंबंधाद्विषयत्वरूपधर्मानाश्रयत्वात् भातिज्ञायतइतिकर्तृत्वकर्मत्वाद्य

योगाच्च नापरोक्षधीरितिनिरस्तं । अतीतादेःस्मृत्यनुमित्यादिकंप्रतिविषयत्वादिवदसतोसद्वैलक्षण्यं
प्रतिप्रतियोगित्ववद्व्यवहारंपरोक्षज्ञानंचप्रतिविषयत्वकर्तृत्वकर्मत्वादिवदपरोक्षप्रतीत्यविषयत्वरूप
साध्यवत्सर्वसामर्थ्यवैधुर्यरूपसाधनवच्चापरोक्षभ्रांतिविषयत्वस्याप्युपपत्तेः । यदितत्रानुमित्या
दावेवतद्विषयकत्वं नत्वतीत्यादौविषयत्वं तर्हीहापितथास्तु तत्सत्वानपेक्षंचेदिदमपितथा नहिस
त्त्वेनभ्रांतिःसत्त्वसापेक्षा अन्यथासद्विलक्षणत्वेपिसानस्यात् संबंधादावसद्वैलक्षण्यादपिलाघवेन
सत्वस्यैवतंत्रत्वात् दुष्टाच्छब्दादसतिसत्वेपरोक्षभ्रांतिवद्दुष्टादिंद्रियात्सत्वेनापरोक्षभ्रांत्युपपत्तौ
परोक्षप्रतीतिस्वीकारेणापरोक्षप्रतीतिनिषेधेविशेषहेत्वभावाच्च । एतेन प्रवृत्तिविषयत्वान्यथानुप
पत्त्याअसद्वैलक्षण्यसिद्धिरितिनिरस्तं । इदमंशस्यासद्रूप्यात्मनाप्रतीतत्वमात्रेणतदर्थिप्रवृत्तिविष
यत्वोपपत्तेः । नचापरोक्षज्ञानस्यार्थेनेंद्रियसन्निकर्षेणचजन्यत्वादसतश्चहेतुत्वसन्निकर्षयोरयोगान्ना
परोक्षधीरितिवाच्यं अपरोक्षप्रमायाएवार्थादिजन्यत्वाद्रूप्यसंस्कारसचिवस्यदुष्टेंद्रियस्याधिष्ठान
सन्निकर्षादेवाधिष्ठानस्यासद्रजतात्मनाप्रतीत्युपपत्तेश्च अन्यथाऽनिर्वाच्यपक्षेप्ययंदोषःस्यात् । न
हिधीमात्रशरीरंरूप्यंस्वज्ञानात्प्रागस्ति । किंचानिदंरूपेप्रातिभासिकेचरूप्येयदिदंत्वंयच्चव्यावहा
रिकत्वंभाति तदुभयंनतावत्सत् नाप्यनिर्वाच्यं तथात्वेहितस्यासद्वैलक्षण्यार्थंप्रातिभासिक

SGDF Digital Foundation

सत्त्वायचसत्त्वप्रतीत्याभाव्यमेवंतदपिसत्वमनिर्वाच्यंचेत्तस्यापिसत्त्वप्रतीत्याभाव्यमित्यनवस्थापा
तात् तस्मादिदंत्वव्यावहारिकत्वयोरसत्वंवाच्यं । एवं रूप्यमसद्विलक्षणंधीकालेऽस्तिचेत्तस्यस्वरू
पेणत्रैकालिकनिषेधायोगादिदंत्वाकारेणवापारमार्थिकत्वाकारेणवानिषेधोवाच्यः तयोरप्यसद्विल
क्षणत्वेस्वरूपेणनिषेधायोगात्पारमार्थिकत्वाकारेणनिषेधेचानवस्थानात्तयोरसत्त्वंवाच्यं तेचसत्त्वे
नापरोक्षेइतिकथमसतःसत्वेनापरोक्षज्ञानाभावः । तदुक्तं "अन्यथात्वमसत्तस्माद्भ्रांतावेवप्रतीयते ।
सत्त्वस्यासतएवंहिस्वीकार्यैवप्रतीतता ॥ १ ॥ तस्यानिर्वचनीयत्वेस्यादेवह्यनवस्थिति"रिति ॥ टी
कायांत्विदंत्वसत्त्वयोःसत्त्वायोगादनिर्वाच्यत्वेचतथैवप्रतीतौप्रवृत्त्ययोगात्सत्वेनभानेचतस्मिन्न
पिसत्त्वे सत्त्वादिविकल्पप्रसरेणानवस्थानादिदंत्वव्यावहारिकत्वयोरसत्वमित्युक्तं । नचतत्रत्व
त्पक्षेप्यसतिरूप्येयत्सत्त्वंभाति तस्यसत्त्वायोगादसत्त्वेचतथैवभानेप्रवृत्त्ययोगात् सत्त्वेनभानेचत
स्मिन्नपिसत्त्वेउक्तविकल्पप्रसरेणानवस्थेतिवाच्यं परमतेऽनिर्वाच्यसत्त्वस्यसत्त्वेनाभानेप्रातिभासि
कत्वासिद्धिवत् मन्मतेअसतःसत्त्वस्यसत्वेनाप्रतीतावसत्त्वासिद्धेरभावात् । किंच प्रत्येकंसत्त्वास
त्त्वयोरनुपपत्तौसदसदात्मकमस्तु निषेधसमुच्चयवत्विधिसमुच्चयस्याप्यतात्त्विकत्वेनाविरोधसंभ
वात् । एवंचतुर्थप्रकाराकल्पनाल्लाघवं त्वत्पक्षेअसदेवरूप्यमभादितिबाधकस्यसद्वैलक्षण्यमिवात्रा

SGDF
Sri Gargeshwari Digital Foundation

पिसद्रूप्यमितिभ्रमस्यासद्वैलक्षण्यंविषयोस्तु । यद्वा त्वत्पक्षेसदसद्विलक्षणेरूप्येऽनिर्वाच्यंसत्त्वमि वात्रापिसदसदात्मकेरूप्येसदसदात्मकंसत्त्वंभ्रांतौप्रतीयतां। भ्रांतित्वेचत्वत्पक्षेऽनिर्वाच्यविषयत्व मिवात्रापिसदसद्विषयत्वंतंत्रमस्तु। अन्यथा नित्यकाम्येपिनित्यत्वादेःप्रत्येकमनुपपत्त्याभिन्नाभिन्नेच गुणगुण्यादौभेदादेःप्रत्येकमनुपपत्त्योभयबहिर्भावःस्यात्। किंचासद्विलक्षणंचेन्नबाध्येत सद्विलक्षणं चेन्नप्रतीयेतेत्यर्थापत्त्यानिर्वाच्यत्वाभावएवकिंनस्यात् । नचाबाधाप्रतीत्योःसत्त्वासत्त्वेतंत्रे लाघवा त् नत्वसद्विलक्षणत्वसद्विलक्षणत्वे गौरवादितियुक्तं। अबाधाप्रतीतीप्रति प्रतियोगिन्योर्बाधप्रती त्योरेवहिप्रथमंप्रयोजकंचिंत्यतांप्रथमोपस्थितत्वात् कल्पकत्वाच्च। भावप्रयोजकाभावादेवाभावोप पत्तौप्रयोजकांतरस्यानन्वेषणीयत्वाच्च। बाधप्रतीत्योश्चासत्त्वसत्त्वेतंत्रे लाघवात् नतुसद्विलक्षणत्वा सद्विसक्षणत्वे गौरवात् । तथाचाबाधाप्रतीतीप्रत्यसद्विलक्षणत्वसद्विलक्षणत्वेतंत्रे। एवंचोक्तरीत्या सत्त्वात्प्रतीतिरसत्त्वाद्बाधइतिविधिसमुच्चयःस्यात् । नृशृंगादौसद्वैलक्षण्यवदसत्त्वस्यभावेपिबाधा भावः प्रसक्त्यभावात्। एवंचासद्विलक्षणंचेन्नबाधःस्यात् सद्विलक्षणंचेन्नभायादितिभवत्वनिर्वाच्य विलक्षणं॥ अनिर्वाच्यसाधकख्यातिबाधान्यथानुपपत्तिभंगः ॥ ६१ ॥ नन्वत्यंतासत्त्वेकथंनिषेधप्रति योगित्वं तथाचात्यंतिकनिषेधप्रतियोगित्वरूपबाध्यत्वमेवसत्यसतिचानुपपद्यमानमनिर्वाच्यत्वंक

SGDF
Sri Gargeshwari Digital Foundation

ल्पयतीति नवीनाइतिचेन्न किमिहकथं असत्त्वस्यात्यंतिकनिषेधप्रतियोगित्वरूपत्वेन तदप्रतिक्षेप
कत्वात् प्रागभावादिदशायामसतएवघटादेस्तत्प्रतियोगित्वदर्शनेनतस्यरूपादिवद्धर्मिसत्त्वानपेक्ष
त्वाच्च असत्त्वाभावादपिलघुत्वेनतत्रसत्त्वस्यतंत्रतयातद्धीनस्यानिर्वाच्यस्याप्रतियोगित्वापाताच्च
त्वन्मतेऽप्यसतोसद्वैलक्षण्यंप्रतिप्रतियोगित्वाच्च असतोपि“नासदासीदि”तिश्रौतनिषेधप्रतियोगि
त्वाच्च । यदिचकुत्रचित्कदाचित्सतएवासत्त्वं तर्हिकुत्रचित्कदाचिदसतएवसत्त्वमितिनित्यसर्वग
तानांसत्त्वंनस्यात् । आत्यंतिकंसत्त्वमसत्त्वानिरपेक्षंचेदात्यंतिकमसत्त्वमपिसत्त्वनिरपेक्षं अन्यथा
ध्वंसःस्वाधिकरणेप्रतियोगिसत्त्वापेक्षइत्यत्यंताभावोपितथास्यात् । अत्यंताभावश्चस्वकालेप्रतियो
गिसत्त्वापेक्षइतिध्वंसोपितथास्यात् । प्रतियोगिनोसत्त्वेपिप्रतियोगित्वस्यसत्त्वंचध्वंसादिदशायां
प्रतियोगिनोऽवर्तमानत्वेपिप्रतियोगित्वस्यवर्तमानत्ववत् शशशृंगादेरसत्त्वेपिपरोक्षज्ञानादिकंप्रति
विषयत्वस्यसत्त्ववत् असद्वैलक्षण्यंप्रतिप्रतियोगित्वस्यसत्त्ववत् त्वत्पक्षेप्रतियोगिनःसद्विलक्षणत्वे
पिबाधगोचरस्यनिषेधप्रतियोगित्वस्यसत्त्ववच्चयुक्तं । यदितुतत्रप्रतियोगित्वविषयत्वे नधर्मिसत्त्वा
पेक्षे तर्हीहापितथा । यदिचतत्रध्वंसादौतत्प्रतियोगिकत्वमेववर्तमानमसद्विषयकज्ञानेचतद्विषयक
त्वमेवसत् असद्वैलक्षण्येचतत्प्रतियोगित्वमेवसत् नतुप्रतियोगित्वंवर्तमानंसद्वानवाविषयत्वंसत्

तर्हीहाप्यत्यंताभावेतत्प्रतियोगिकत्वंसत् नतुप्रतियोगित्वमित्यस्तु । नचाभावविरहत्वंप्रतियोगित्वं
सादृश्यपृथक्त्वादिप्रतियोगिष्वव्याप्तेः येनासतःप्रतियोगित्वंनस्यात् । किंतु तज्ज्ञानहेतुज्ञानविशेष
विषयत्वंतच्चासतोप्यस्ति अन्यथा अभावावधित्वंप्रतियोगित्वमितिनिरवधिकोऽत्यंताभावोनिष्प्र
तियोगिकःस्यात् । एतेन प्रतियोगिस्मृतिरूपहेत्वभावादसत्प्रतियोगिकाभावधीरयुक्तेतिनिरस्तं । श
ब्दाभासादिनाऽनुभूतस्यस्मृतिसंभवात् भ्रमविषयवच्चप्रतियोगिनोप्रामाणिकत्वेपिभ्रमवदभावस्य
प्रामाणिकत्वंयुक्तं । नहिप्रमाणस्पृष्टत्वमेवतत् असतोप्यसत्त्वेनतत्स्पृष्टत्वात् । किंतु सत्त्वेन । नन्व
थापियोग्यानुपलब्ध्याअभावोग्राह्यः योग्यताचप्रतियोगितद्व्याप्येतरप्रतियोग्युपलंभकसामग्री अ
सतिचप्रमासामग्रीनास्तीतिदोषसहितज्ञानसामग्रीरूपासावाच्या तस्यांचसत्यांनासतोऽनुपलंभः
उपलंभस्यैवसत्त्वात् अनुपलंभदशायांचतज्ज्ञानसामग्रीरूपायोग्यतैवनास्तीतिकथमसदभावधीः
“दुष्टोपलंभसामग्रीशशशृंगादियोग्यता । तस्यांनानुपलंभोस्तिनास्तिसानुपलंभन”इतिकुसुमां
जल्युक्तेरितिचेन्न याह्यनुपलब्धिर्यत्रयत्सत्त्वविरोधिनी तस्याएवयोग्यानुपलब्धित्वात् तस्याश्चा
सत्यपिभावात् शृंगानुपलब्धिर्हिमहत्त्वेसत्युद्भूतरूपशृंगसत्त्वविरोधिनी नहिप्रतियोगिप्रत्यक्षत्वं
भावप्रत्यक्षत्वेतंत्रं स्तंभेपिशाचान्योन्याभावस्याप्रत्यक्षत्वापातात् जलपरमाणौपृथिवीत्वाभाव

॥४२१॥

SGDF Digital Foundation

स्यप्रत्यक्षत्वप्रसंगाच्च । कथमन्यथाशशश्रृंगंनास्तीत्यबाधितधीः । नचशशेश्रृंगंनास्तीत्यर्थइतिचिंता
मण्युक्तंयुक्तं शशश्रृंगोल्लिखिताभ्रूरित्यादावप्रसिद्धविशेषणत्वोक्त्ययोगात् गविशशश्रृंगंनास्ती
त्यधिकरणांतरोपादानाच्च शशेश्रृंगंनास्तीत्यर्थकल्पनेपिभूतलेघटोनास्तीतिवदसतःसंसर्गस्यनिषे
ध्यकोटिनिवेशाच्च अन्यथा संसर्गस्यसत्त्वापातात् गोश्रृंगंनास्तीतिवत् विशिष्टप्रतियोगित्वप्रती
तेरुक्तरीत्याबाधकाभावेनान्यथाव्याख्यानायोगाच्च । एतेन नप्रतियोगिधीमात्रमभावधीहेतुः त
न्निर्विकल्पकादप्यभावधीप्रसंगात् किंतु प्रतियोगितावच्छेदकावच्छिन्नतद्धीः नचशशीयत्वावच्छि
न्नश्रृंगधीरस्तीतिसामग्र्यभावादेवबाधकान्नव्यधिकरणधर्मावच्छिन्नभावधीरितिचिंतामण्युक्तंनिर
स्तं । शब्दाभासादिनातद्धीसंभवात् । अन्यथा तंतुषुपटोनास्तीत्यस्यापितंतुसमवेतपटत्वंनास्तीत्य
र्थइतिप्रागभावादेरपिस्वसमानकालीनप्रतियोगित्वंस्यात् । एतेनैव ससमभावोनास्तीत्यादेःद्रव्या
दिषल्लक्षणात्यंताभावेभावत्वसामानाधिकरण्यंनास्तीत्यर्थइतिनिरस्तं । शुक्तिरूप्यतादात्म्यवत्सं
सर्गवच्चात्यंतासतोपिससमपदार्थादेःपररीत्याप्रसक्तस्यनिषेधसंभवेकुसृष्टिकल्पनायोगात् । किंचेह
भूतलेघटोनास्तीतिधियःसंसर्गाभावोविषयः नतुघटाभावः इहभूतलेघटोनास्तीत्यत्रसंयोगोनिषि
ध्यतइत्युदयनोक्तेः भूतलेघटोस्तीतिबुद्धेस्तत्संबंधविषयत्वेननास्तीतिबुद्धेरपितदभावविषयत्वाच्च ।

SGDF
Sri Gargeshwari Digital Foundation

किंच नतावदयंघटप्रागभावोध्वंसोवा प्रतियोगिसमानकालीनत्वात् । नाप्यत्यंताभावः कदाचित्त त्रघटस्यसत्त्वात् । यदिचैतत्कालावच्छेदेनात्यंताभाव स्तर्ह्यत्यंताभावातिरिक्तःप्रागभावादिर्नसिद्ध्येत् । संयोगस्यतु भूतत्वेध्वंसःभावित्वेप्रागभावः कदाप्यभावेत्वत्यंताभावइत्यसतःसंसर्गस्यप्रतियोगित्वसिद्धिः।नचघटेसन्नेवसंसर्गइहनिषेध्यः तस्यापिघटतुल्यत्वेनप्रागभावादिविकल्पप्रसरात्।यत्तूक्तंवर्धमानेघटात्यंताभावएवायंघटकालेत्वसंबंधान्नभाति घटात्यंताभावस्यभूतलेनसहसंबंधश्चतत्संयोगध्वंसादिः अथवा प्रतियोगिभेदेनैवप्रतियोगितावच्छेदकभेदेनाप्यभावभेदात् संयुक्तघटाभावोऽयंविशिष्टांतराभाववदुत्पादविनाशशीलोऽन्यएवेति तत्रनाद्यः अभावाधिकरणयोःसंबंधांतरमंतरेणतदुपश्लिष्टस्वभावरूपक्लृप्तसंबंधत्यागेनसंयोगध्वंसादेःसंबंधत्वकल्पनेआवश्यकसंयोगध्वंसादेरेवतद्धीविषयत्वोपपत्तेः। अन्यथा घटस्यकपालेष्वत्यंताभावएवघटकालेत्वाश्रयाश्रयिभावध्वंसादिरूपसंबंधाभावादप्रतीतिरिति घटात्यंताभावःकेवलान्वयीस्यात् । नद्वितीयः संयोगस्यानिषेध्यकोटित्वादिष्टसिद्धेः दंडेसत्यपिपुरुषाभावेनदंड्यभाववद्भूतलघटसंयोगेसत्यपिघटाभावेनसंयुक्ताभावस्यादर्शनेनक्लृप्तैःसंयोगध्वंसादिभिरेवसर्वोपपत्तौउत्पादविनाशशीलसंयुक्ताभावांतरकल्पनायोगाच्च । तस्मादसतोऽपिनिषेध्यत्वंयुक्तं ॥ ७ ॥ अनिर्वाच्यत्वसाधकनिषेधप्रतियोगित्वान्यथानुपपत्ति

SGDF
Sri Gargeshwari Digital Foundation

भंगः ॥ ६२ ॥ नापि "नासदासीन्नोसदासी त्तमआसीदि" तिश्रुत्यर्थापत्तिरनिर्वाच्येमानं तत्रहिस
दसच्छब्दौपंचभूतपरौ प्रसिद्धपरत्वे "नासदासी" दित्यस्याप्रसक्तप्रतिषेधत्वापातात् तदानीमित्य
स्यवैयर्थ्याच्च । नोसदासीदित्यनेनैवसिद्धत्वेननासीद्रजइत्यादेर्वैयर्थ्याच्च "नसत्तन्नासदुच्यत" इत्या
दौभूतेप्रयोगाच्च "यदन्यद्वायोश्चांतरिक्षाच्चैतत्सदितिवायुरंतरिक्षंचासदि" तिश्रुतेश्च । अन्यथा
"आनीदवात" मितिवाक्यशेषोक्तप्रलयेसद्ब्रह्माप्यनिर्वाच्यंस्यात् । ख्यात्यंतरभंगस्त्वन्यत्रद्रष्टव्यः
॥ ७ ॥ श्रुत्यर्थापत्तिभंगः ॥ ६३ ॥ तस्मादनिर्वाच्यख्यात्यसंभवात् उद्बुद्धरूप्यसंस्कारसाचिवंदुष्टेंद्रि
यंस्वसन्निकृष्टंशुक्तीदमंशमत्यंतासद्रूप्यात्मनागृह्णातीत्यन्यथाख्यातिरेवयुक्ता । रूप्यस्यासत्त्वेचास
देवरूप्यमभादिति प्रत्यक्षं विमतमसत् सत्त्वानधिकरणत्वान्नृशृंगवत् अप्रमाअसद्विषयिका स
त्त्वानधिकरणविषयकत्वात् सन्मात्राविषयकत्वेसति सविषयकत्वाच्च असद्विषयकपरोक्षज्ञानव
दित्याद्यनुमानंचमानं । नचैवमसत्ख्यात्यापत्तिः मन्मतेरूप्यस्यासत्त्वेपीदमंशस्यसत्त्वेनबाह्यमतइ
वेदंरूप्यमितिज्ञानेभातस्यसर्वस्याप्यसत्त्वाभावात् । अन्यथा अद्वैतिमतेपि सदन्यप्रतीतेरसतश्चप
रोक्षप्रतीतेस्तार्किकमते शुक्तिः(क्ती)रूप्यंचेत्युभयतादात्म्यस्यवा संसर्गस्यवाऽसतएवप्रतीतेर्बाह्यम
तापत्तिः । ननूभयंतादात्म्यंचेत्यतोधिकस्यतस्याभावात्तयोश्चसत्त्वान्नासतःख्यातिरितिचेन्न रूप्य

॥ ४२३ ॥

तादात्म्यस्यरूप्यत्वसंसर्गस्यचेदमंशनिष्ठत्वेनाग्रहणेइदंरूप्यंचेतिज्ञानाकारापातेनेदंरूप्यत्वेनज्ञात
मित्यनुव्यवसायायोगात् पुरोवर्तिनिष्ठाभेदाग्रहेप्रवृत्त्यनुपपत्तेश्च सन्मात्रविषयकत्वेअप्रामाण्यायो
गाच्च । नचतथात्वेपितदभाववतितत्प्रकारकत्वरूपमप्रामाणंयमविरुद्धमितिवाच्यं तत्प्रकारकत्वस्या
पितद्वैशिष्ट्यविषयकत्वरूपत्वेनासतइदंरूप्यत्ववैशिष्ट्यस्यप्रतीतेर्दुर्वारत्वात् । नचतद्विशेषणज्ञान
जन्यत्वंतत्प्रकारकत्वं तस्यापितद्वैशिष्ट्यविषयकत्वव्याप्तत्वात् तद्वैशिष्ट्यस्याभानेऽनुव्यवसायवि
रोधस्योक्तत्वाच्च । ईश्वरज्ञानस्यनिष्प्रकारकत्वेन निर्विकल्पकत्वापाताच्चेति ॥ ७ ॥ स्वाभिमतान्य
थाख्यातिसमर्थनं ॥ ६४ ॥ यच्चेदमुच्यते अध्यस्तमज्ञानोपादानकं तत्वज्ञाननाश्यंचेति तन्न तथात्वे
रूप्यमुत्पन्नंनष्टंचेतिधीप्रसंगेनत्रैकालिकनिषेधायोगात् । नचार्थक्रियाकारित्वादिरूपलौकिकपार
मार्थिकत्वाकारेणतथानिषेधः रूप्यंनासीदस्तिभविष्यतीतिस्वरूपेणैवनिषेधात् पारमार्थिकत्वस्या
पिरूप्यवत्प्रतीतत्वेनतत्कालेसत्त्वाच्च । नाप्ययंनिषेधआपणस्थरूप्यस्य "नेहनानास्ती" तिनिषेधा
यतात्विकप्रपंचांतरापातात् तस्याप्रसक्तेश्च । अन्यथाऽन्यथाख्यात्यापत्तेः । आभासस्यप्रसक्तिरेव
पारमार्थिकस्यनिषेधेतंत्रमितिचेन्न यत्प्रतीतंतन्नास्तीत्यनुभवविरोधात् प्रतिपन्नोपाधावनिषिद्धस्या
भासस्यमिथ्यात्वासिद्धेश्च । निवृत्तिज्ञानइवत्रैकालिकनिषेधज्ञानेऽपिप्रसक्तस्याभासस्यनिषेधसंभ

SGDF

वेनिषेधंप्रत्यवच्छेदकमधीस्थंपारमार्थिकमनवच्छेदकस्याभासस्यधीस्तुनिषेधधीहेतुरितिवैयधिकर ण्यकल्पनायोगाच्च अनारोपपूर्वकनिषेधस्यानुपपत्तेश्च। नच तत्रापिबुद्धिपूर्वकारोपकल्पना यस्यारोपस्तस्यैवनिषेधइतिमतेनिषेधस्यप्रसक्त्यर्थंबुद्धिपूर्वकारोपकल्पनेऽपित्वन्मतेतदयोगात् घटेस्मृतेतदारोपंविनैवेहघटोनास्तीतिज्ञानस्यानुभवात्। नचाभासप्रसक्त्याऽनाभासस्यापिप्रसक्तिः आभासइत्यप्रसक्तेः। नचरजतत्वाकारेणानाभासस्यापिप्रसक्तिः आभासानाभासानुगतसामान्याभावात् फलबलेनव्याप्तिज्ञानेसामान्यस्यप्रत्यासत्तित्वेपि अतिप्रसंगेनान्यत्रतदभावाच्च। किंचाध्यस्तंनसोपादानकं सकर्तृत्वस्याप्यापातात् अविद्यालक्षणभंगेऽध्यस्तस्याज्ञानोपादानकतयानिरासाच्च। इदंरूप्यमितिरूप्यानुविद्धस्येदमंशस्यैवदोषादिवशात् सत्याविकाराविरोधेनरूप्यात्मनामिथ्याविकाररूपविवर्तसंभवेतदननुविद्धस्याज्ञानस्योपादानत्वायोगाच्च परोक्षधीरप्यज्ञानविरोधिनीत्युक्तत्वेन श्वेतत्वेनानुमितेशंखेश्वैत्याज्ञानाभावेनपीतत्वभ्रमायोगाच्च त्वन्मतेबिंबप्रतिबिंबयोरैक्यस्यप्रत्यक्षतयाऐक्याज्ञानाभावेनोपाधिवशादपितत्रभेदभ्रमायोगाच्च घटत्वेनसाक्षात्कृतेघटेघटत्वाज्ञानाभावेनपटोऽयमितिवाक्याभासाक्रमानुत्पत्तिप्रसंगाच्च। अयंघटइत्यत्राग्निनासिंचेदितिवदन्वयविरोधिनोधर्मस्यानुपादानेनान्वयधीर्युक्तैव साक्षिवेद्येऽज्ञानसुखादावज्ञानाभावेन तत्रज्ञानाभाव

SGDF
Sri Gargeshwari Digital Foundation

त्वदुःखाभावत्वादिभ्रमायोगाच्च । परोक्षतत्वज्ञानस्याज्ञाननिवर्तकत्वेशंखेश्वैत्यानुमित्याऽप्यज्ञानानि
वृत्तौभ्रमानुत्पत्त्यापातात् अपरोक्षतत्वज्ञानस्यच परोक्षेअभावेनपरोक्षाध्यासस्यानिवृत्त्यापाताच्चरू
प्यंदृष्ट्वाऽधिष्ठानतत्वज्ञानंविनानिवृत्तस्यपुंसोऽज्ञाननिवृत्त्यभावेनमिथ्यात्वेनाधिष्ठानतत्वज्ञानैकनिव
र्त्ययोरूप्यज्ञानाकाराविद्यापरिणामयोर्निवृत्त्यभावेनरूप्यधीसामग्रीसद्भावेनरूप्यप्रतीतेर्दुर्वारत्वाच्च।
नचसर्वज्ञानानांस्वगोचरशूरत्वाद्यथाभ्रांतितदर्थौऽगीकार्यइतियुक्तं अर्थतत्वव्यवस्थापकस्यबाधस्यै
वानुसर्तव्यत्वेनानेवंविधस्यभ्रमस्यातथात्वात् अन्यथातदर्थस्यतात्विकत्वापातात् ॥७॥आविद्यकर
जतोत्पत्तिभंगः॥६५॥यच्चेदमुच्यते अधिष्ठानांशेइंद्रियजन्यांतःकरणवृत्तिरध्यस्तांशेतदजन्याविद्या
वृत्तिरितिज्ञानद्वयं नचैवमख्यात्यापत्तिः तादात्म्यस्यापिभानादिति तन्न त्वन्मतेइदमंशस्याप्यध्यस्तत्वे
नेदमितिज्ञानंद्व्यात्मकमिदंरूप्यमितिज्ञानंत्र्यात्मकं स्वाप्नशुक्त्यादाविदंरूप्यमितिज्ञानंचतुरात्मकमि
तिप्रसंगात् शंखेपीतत्वंपश्यामीतिपीतत्वांशेचाक्षुषत्वादिजातिविशेषस्यानुव्यवसायाच्च रूप्यज्ञा
नस्याविद्यावृत्तित्वेनप्रातिभासिकत्वेप्रतिभासावश्यंभावादध्यस्तविषयकज्ञानस्यचाध्यस्तत्वानिय
मादविद्यावृत्तेरप्यविद्यावृत्त्यंतरप्रतिबिंबितचैतन्यवेद्यत्वमेवंतस्यतस्यापीत्यनवस्थानाच्च अज्ञानस्य
रूप्याकारज्ञानात्मनापरिणामेरूप्यमितिप्रतीतेर्ज्ञानगताकारेणैवोपपत्तेः भ्रमस्यचातीतादिज्ञानवद्

SGDF
Sri Gargeshwari Digital Foundation

र्थाभावेऽपिसंभवाद्रूप्याकाराविद्यावृत्तिवैयर्थ्याच्च दोषाणांस्वाश्रयजन्यएवातिशयहेतुत्वेनेंद्रियदो
षप्रयुक्तभ्रमत्वाश्रयेकरणांतराजन्येचरूप्यज्ञानेइंद्रियकरणकत्वस्यदुर्वारत्वाच्च । अन्यथा त्वचाशं
खंचक्षुषाचशुक्तिसादृश्यंज्ञातवानिमीलितनेत्रस्यनेत्रगतदोषात् पीतत्वरूप्यादिभ्रमःस्यात् रूप्येद
मंशयोस्तादात्म्यभानेनाख्यातिवैषम्येपिज्ञानैक्यानुभवविरोधस्याख्यातिपक्षदोषस्यसाम्याच्च । ए
तेन विषययोरध्यस्तेनाभेदेनैकत्वापन्नत्वात् ज्ञानयोरप्यैक्यमुपचरितमितिनिरस्तं । ज्ञानैक्यानु
भवविरोधात् एकविषयकधारावाहिकज्ञानानामप्यैक्यानुभवापाताच्च कल्पितस्यार्थैक्यस्यज्ञानै
क्योपचाराहेतुत्वाच्च । एतेन यथेदमंशावच्छिन्नचैतन्याविद्याविवर्तत्वाद्रूप्यमिदंत्वेनभाति तथेदं
वृत्त्यवच्छिन्नचैतन्याविद्याविवर्तत्वाद्रूप्यज्ञानमिदंज्ञानत्वेनभातीतिनिरस्तं। बाधकालेऽर्थयोरिवज्ञा
नयोरपिभेदधीप्रसंगात् इदंवृत्तेर्ज्ञातैकसत्त्वेनतदवच्छिन्नचैतन्येऽज्ञानाभावाच्च शुक्तितत्वंजानतः
इदंवृत्तितत्वंचाजानतःपुंसःरूप्यनिवृत्तावपितज्ज्ञानानुवृत्तिप्रसंगाच्च अबाधितज्ञानैक्यानुभवविरो
धाच्च । नचेंद्रियेणाध्यस्तस्यासंप्रयोगोबाधकः तस्यप्रमायामेवापेक्षितत्वेनाप्रमायांदोषमपेक्ष्यैवेंद्रि
यस्यहेतुत्वोपपत्तेः रूप्यंप्रत्यप्यंगुल्यग्रनिर्देशचेलांचलबंधनादिनाशुक्तेरेवाधिष्ठानत्वेनतदवच्छिन्न
चैतन्यस्यानधिष्ठानत्वाच्च। नचाविद्यावृत्तेर्ज्ञानत्वाभावाज्ज्ञानैक्यधीः परोक्षाध्यासेचैतन्यप्रतिफल

नाभावेनाध्यस्तांशेजानामीत्यनु(व्यवसाया)भवायोगात् ज्ञानेअपवादादप्रामाण्यमित्यस्यायोगाच्च
विवरणेंऽतःकरणपरिणामेज्ञानत्वोपचारादित्युक्त्यातद्वृत्तावपिज्ञप्तित्वाभावाच्च प्रकाशकचैतन्यस्य
प्रतिफलनोपाधित्वस्यचाविद्यावृत्तावपिसत्त्वात् अज्ञाननिवर्तकत्वस्यचधारावाहिकद्वितीयाद्यंतः
करणवृत्तावप्यभावात्। नचवृत्तिभेदेपीदंरूप्ययोरिदमंशावच्छिन्नसाक्षिवेद्यत्वेनफलैक्येनज्ञानैक्य
धीः परोक्षभ्रमेअपरोक्षैकरसचैतन्यरूपफलैक्याभावात् त्वन्मतेइदंरूप्ययोर्यथाक्रममिदंरूप्याका
रांतःकरणाविद्यावृत्तिप्रतिबिंबिताभ्यांवातदभिव्यक्ताभ्यामिदमंशानवच्छिन्नतदवच्छिन्नाभ्यामि
दमंशरूप्याधिष्ठानचैतन्याभ्यांवावेद्यत्वेनावच्छिन्नस्यफलस्याभिन्नत्वाच्च। अफलचिन्मात्राभेदस्यच
सर्वत्रसत्वात्। नहिरूप्यंप्रतीवेदमंशंप्रत्यपीदमंशावच्छिन्नचैतन्यमधिष्ठानं आत्माश्रयात्। नापी
दमंशंप्रतीवरूप्यंप्रत्यपीदमंशानवच्छिन्नमधिष्ठानं इदंरूप्यमितिधीविरोधात्। एतेनेदमंशावच्छिन्न
चैतन्यस्यैवेदंवृत्तौरूप्यवृत्तौचप्रतिफलनात् ज्ञानैक्यमितिनिरस्तं । क्रमिकयोरिदमितिज्ञानयोरप्यै
क्यापातात् समूहालंबनज्ञानस्यापिभेदापाताच्च तस्यातदाकाररूप्यवृत्तौप्रतिफलनायोगाच्च। अन्य
थारूप्याधिष्ठानेदंवृत्तिप्रतिफलितचितैवरूप्यप्रतीतिसंभवाद्रूप्याकाराविद्यावृत्तिर्व्यर्था तस्माज्ज्ञा
नैक्यानुभवविरोधोदुष्परिहरः।तिक्तोगुडइत्यादावपिमधुरोगुडः सुरभिचंदनमित्यादाविवज्ञा(मा)

SGDF
Digital Foundation

नांतरोपनीतविशेषणविषयकमेकमेवज्ञानं । तस्माच्छुक्तिरूप्याद्यपिनानिर्वाच्यं सुतरांजगदिति
पारमार्थिकमेवतादिति ॥ ७ ॥ भ्रमस्याद्वैत्यभिमतज्ञानद्वयात्मकत्वभंगः ॥ ६६ ॥ यच्चेदमुच्यते ब्रह्म
पारमार्थिकंसत् जगद्व्यावहारिकं शुक्तिरूप्यादिप्रातिभासिकमितिसत्त्रिविधमिति तन्न स्वाप्नशु
क्तौचाध्यस्तरूप्यादेरुपसंग्रहायप्रातिभासिकादपिनिकृष्टस्यसत्त्वस्यपंचमप्रकारस्याव्यावहारिक
स्याज्ञानध्वंसस्यचोपसंग्रहायापारमार्थिकस्यव्यावहारिकादप्युत्कृष्टस्यसत्त्वस्यचवाच्यत्वेनत्रैवि
ध्यायोगात् । किंचायंविभागोनतावत्तात्विकः ब्रह्मैवतात्विकमित्यस्यभंगात् । नाप्यतात्विकः ता
त्विकस्यब्रह्मणोऽतात्त्विकत्वात् । शुक्तेरूप्यादिवबाधगम्यस्याविभागस्यतात्त्विकत्वावश्यंभावात् ।
अन्यथा विभागश्रुतेरतत्वावेदकत्वंस्यात् । एवंच अयंविभागःसत्यश्चे दपसिद्धांतआपतेत् । मिथ्या
चेत्कृतकृत्योऽहंत्वयैवस्वोक्तदूषणात् । “व्यावहारिकसत्योपिबाध्योऽबाध्योऽथवाभवेत् । उक्तोदो
षश्चोभयत्रसर्वमेतेनदूषितं” संभवतिहिविश्वमिथ्यात्वब्रह्मनिर्विशेषत्वादावप्येवंविकल्प्यदूषणं ।
अपिच किमत्रपरमार्थसदेवसत् इतरद्वयंसद्विलक्षणमेवसत्त्वेनभ्रांतिबाधविलंबाविलंबाभ्यांतद्भेद
इत्यभिप्रेतं किंवा सत्येवावांतरभेदइति नाद्यः त्वन्मतेरूप्याभावेरूप्यधियइवसत्त्वाभावेसत्त्वबुद्धे
रयोगात् उत्पत्त्यादौलाघवेनकदाचित्सत्त्वस्यैवतंत्रतयासत्त्वहीनस्यरूप्यादेरुत्पत्त्याद्ययोगाच्च व्या

॥ ४२६ ॥

SGDF
Sri Gargeshwari Digital Foundation

वहारिकेप्रातिभासिकादर्थगतविशेषाभावेतत्रार्थक्रियादेःश्रुतीनांव्यावहारिकविषयत्वेनप्रामाण्य
स्यचायोगाच्च। दीर्घभ्रांतिहेतुत्वे नभोनैल्यभ्रमहेतोरिवाप्रामाण्यातिशयएवस्यात्। नांत्यः।असतः
साधकत्वभंगेआरोपितानारोपितानुगतंसामान्यंनास्तीत्युक्तत्वात्। व्यावहारिकस्यचानारोपित
विशेषत्वेऽस्मदभिमतसिद्धेः। किंचपारमार्थिकापारमार्थिकयोर्नतावद्बाधाबाधाभ्यांभेदः मिथ्यात्व
भंगेउक्तरीत्याऽध्यस्तेपिस्वरूपाबाधस्यब्रह्मण्यप्याकारबाधस्यसत्त्वात् जगद्बाधकस्यचसप्रकारकत्वे
तस्यैवप्रकारस्याबाध्यत्वापातात्। निष्प्रकारकत्वेचबाधकत्वायोगात् व्यावहारिकप्रातिभासिकयो
रपिनतावन्मायिकत्वाविद्यकत्वाभ्यांभेदः मायाविद्ययोस्तदभावात् मायिकस्यैंद्रजालिकादेःप्राति
भासिकत्वाच्च असाधारणस्याविद्यकस्यदुःखादेर्व्यावहारिकत्वाच्च त्वयैवमायाविद्याभेदस्यनिरासा
च्च नाप्यर्थक्रियाकारित्वतदभावाभ्यामादानादिनिर्वाहकत्वतदभावाभ्यांवाभेदः अर्थगतविशेषा
भावेतदयोगात् स्वाप्नेपिकुंभादौस्वाप्नजलाहरणाद्यर्थक्रियाकारित्वादेःसत्त्वाच्च। व्यावहारिकस्य
तस्याविवक्षायांचात्माश्रयात्। नापिब्रह्मधीबाध्यत्वतदन्यधीबाध्यत्वाभ्यांभेदः त्वन्मतेरूप्यादेरपि
शुक्त्यवच्छिन्नब्रह्मधीबाध्यत्वात्। ब्रह्मण्यध्यस्तस्यप्रातिभासिकस्यक्षणिकत्वादेरपिब्रह्मधीबाध्य
त्वाच्च। नापिब्रह्मप्रमाबाध्यत्वतदन्यप्रमाबाध्यत्वाभ्यांभेदः त्वन्मतेब्रह्मज्ञानस्यैवप्रमात्वात्। नापि

SGDF
Sri Gargeshwari Digital Foundation

प्रमाबाध्यत्वभ्रांतिबाध्यत्वाभ्यां भेदः भ्रांतिबाध्यत्वस्यब्रह्मण्यपिसत्त्वात् । नापिशुद्धब्रह्मधीबाध्यत्वतदन्यधीबाध्यत्वाभ्यां भेदः शुद्धशब्देनभ्रांतिदशायाज्ञाताधिष्ठानभूतविशेष्यमात्रोक्तौतज्ज्ञानस्याबाधकत्वात् तत्कालाज्ञातेनद्वितीयाभावादिनाविशिष्टस्योपलक्षितस्यचोक्तौवेदांतानामखंडार्थत्वहानेः द्वितीयाभावादेःपारमार्थिकत्वापाताच्च । एतेन महावाक्यजन्यधीबाध्यत्वतदन्यधीबाध्यत्वाभ्यांवा चरमधीबाध्यत्वतदन्यधीबाध्यत्वाभ्यांवाभेदइतिनिरस्तं । महावाक्यजन्यस्यचरमस्यचाखंडार्थवेदांतजन्यतयानिष्प्रकारकत्वेनबाधकत्वायोगात् । सप्रकारकत्वेच तस्यप्रकारस्यतात्विकत्वापत्तेः । अतएवच ननिष्प्रकारकबाध्यत्वसप्रकारकबाध्यत्वाभ्यां भेदः । नापिपारमार्थिकविषयधीबाध्यत्वव्यावहारिकविषयधीबाध्यत्वाभ्यां भेदः अन्योन्याश्रयात् नाप्यन्योन्येतरत्वाभ्यां भेदः भेदकाभावइतरेतरत्वस्यैवायोगात् अन्योन्याश्रयाच्च । तस्माज्जगतःसत्यत्वात्समन्वयाध्यायोक्तन्यायैःसत्यजगत्कर्तृत्वाद्यनंतगुणेब्रह्मणिवेदांताःप्रमाणमिति ॥ ७ ॥ सत्तात्रैविध्यभंगः ॥ ६७ ॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्याणांश्रीमद्ब्रह्मण्यतीर्थपूज्यपादानांशिष्येण व्यासयतिनासंगृहीतेन्यायामृतेप्रथमःपरिच्छेदः ॥ १ ॥ ७ ॥ ॥ ॥ ॥ ॥

अयं ग्रंथः कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण मुंबय्यां निर्णयसागरमुद्रणालये मुद्रयित्वा प्रकाशितः । शाकः १८२९ सन १९०७.

SGDF
Sri Gangeshwari Digital Foundation

॥ इतिश्रीमन्न्यायामृतेप्रथमःपरिच्छेदः ॥

SGDF
Sri Gargeshwari Digital Foundation

श्रीमन्न्यायामृते द्वितीयपरिच्छेदः प्रारभ्यते

श्रीमन्न्यायामृतप्रारम्भः

श्रीरस्येदं पुस्तकं वासिस्य ।

श्रीनासयगस्येदं पुस्तकं नान्यस्य भवेत् ।
अतो नान्यो ह्यधिकारी स्यात्स्पर्शने ग्रहणे वा ।

694 Z 7961 090889

694 Z 7961 090889

694 Z 7961 090889

694 Z 7961 090889

694 Z 7961 090889

694 Z 7961 090889

694 Z 7908 090889

694 Z 7961 090889

651 Z 0381 090889

694 Z 7853 080889
694 Z 7937 090889

30-3-1992

651 Z 0381 090889

694 Z 7958 090889
694 Z 8015 090889

SGDF
Sri Gargeswari Digital Foundation

॥ अथश्रीमन्न्यायामृतेद्वितीयःपरिच्छेदः ॥

SGDF
Sri Gargeshwari Digital Foundation

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ समस्तवेदसंवेद्यंवेदव्यासंगुणार्णवं ॥ विवृणोमि प्रणम्याहंपरिच्छेदंद्वितीयकं ॥ १ ॥ पूर्वपरिच्छेदांतेयदुक्तमनंतगुणेब्रह्मणिवेदांताःप्रमाणमिति तदाऽऽक्षिपति॥नन्वेतदिति॥ एकंपदार्थनिष्ठं अपरंवाक्यार्थनिष्ठमित्यन्वयः ॥ पदार्थनिष्ठमपिद्विविधमित्याह ॥ यथेति ॥ "यत्सर्वज्ञ" इत्यादिवाक्यानां सार्वज्ञादिप्रतिपादनपराणामपिसार्वज्ञादीनांमायामयत्वेनमिथ्यात्वात्सत्यज्ञानादिरूपेब्रह्मण्येवतात्पर्यमित्यर्थः । अतएवस्वरूप

श्रीगुरुभ्योनमः॥नन्वेतदयुक्तं द्विविधंहिवेदांतवाक्यं एकंपदार्थनिष्ठं
यथा "सत्यंज्ञान" मित्यादितत्पदार्थपरं, "योयंविज्ञानमय" इत्यादि
त्वंपदार्थपरंच|अपरमैक्यरूपवाक्यार्थनिष्ठं यथा "तत्त्वमसी" त्यादि|
द्वयमप्यखंडार्थनिष्ठं । यद्यप्यखंडार्थनिष्ठत्वं नतावन्निर्भेदार्थनिष्ठत्वं

मात्रप्रतिपादनपरंसत्यादिवाक्यमेवोदाहृतं ॥ योयमिति ॥ त्वंपदार्थेपिदुःखादिप्रतिपादनपराणामपिवाक्यानांस्वार्थेतात्पर्या भावादितिभावः ॥ द्वयमपीति ॥ पदार्थनिष्ठंवाक्यार्थनिष्ठंचेतिद्वयमपीत्यर्थः । निर्भेदार्थनिष्ठत्वमित्यत्रभेदाभावस्यशब्दबो ध्यत्वंविवक्षितं उतभेदाभावस्यस्वरूपतोब्रह्मणिसत्वमात्रमभिप्रेतं नतुशब्दबोध्यत्वं । एवंचवस्तुतोयन्निर्भेदंब्रह्मतन्निष्ठत्वमिति विवक्षितं । आद्येपिकिंभेदाभवाविशिष्टार्थप्रतिपादकत्वमभिप्रेतं उतभेदाभावोपलक्षितार्थप्रतिपादकत्वं । नो(भावपी)भयमपी

SGDF ... Digital Foundation

त्याह ॥ भेदाभावेति ॥ सखंडार्थत्वेति ॥ यथानिर्घटंभूतलमित्यत्रघटाभावप्रकारकज्ञानजनकत्वं एवंविशेषणोपलक्षणरूप प्रकारयुक्तार्थबोधकत्वेनसप्रकारकज्ञानजनकत्वापत्त्यासखंडार्थत्वापत्तेरित्यर्थः। नांत्यः सगुणवाक्येष्वतिव्याप्तेरित्याह ॥स्वरूपस त्वेति ॥ वस्तुगत्यानिर्भेदंयद्ब्रह्मतन्निष्ठत्वेनतस्मिन्गुणसंसर्गप्रतिपादकत्वेनेत्यर्थः । भेदाभावस्यशब्दबोध्यत्वपक्षे स्वरूपसत्वा भिप्रायपक्षेचदोषमाह ॥ प्रकृष्टेति ॥ प्रकृष्टादिलक्षणवाक्यस्यप्रश्नोत्तरयोर्वैयधिकरण्यान्यथानुपपत्त्याचंद्रस्वरूपमात्रप्रतिपाद

भेदाभावविशिष्टत्वरूपस्य तदुपलक्षितत्वरूपस्यवा निर्भेदत्वस्यशब्दबोध्यत्वेऽभिप्रेतेनिर्घटं
भूतलमित्यादिवत्सखंडार्थत्वापत्तेः। स्वरूपसत्त्वमात्रेऽभिप्रेतेचसखंडार्थानांसगुणवाक्या
नामपि वस्तुगत्यानिर्भेदब्रह्मनिष्ठत्वेनाखंडार्थत्वापातात्। प्रकृष्टप्रकाशादिवाक्येष्वव्याप्ते
श्च। अतएवननिर्विशेषार्थनिष्ठत्वंतत्। नाप्यपर्यायशब्दानांप्रातिपदिकार्थमात्रपर्यवसायित्वं

कत्वेनाखंडार्थत्वात्प्रकृष्टादिवाक्यस्यचभेदाभावविशिष्टार्थप्रतिपादकत्वंनास्ति । नहिचंद्रभेदाभावप्रकारकंज्ञानंप्रकृष्टादिवाक्या द्भवति तथायत्स्वरूपसन्निर्भेदंतत्प्रतिपादकत्वंनास्ति वस्तुगत्याचंद्रस्वरूपस्येतरभिन्नत्वादतोऽव्याप्तिरित्यर्थः ॥ अतएवेति ॥ विशेषाभावविशिष्टत्वरूपस्य तदुपलक्षितस्वरूपस्यवाशब्दबोध्यत्वाभिप्राये स्वरूपसत्त्वाभिप्रायेचदोषस्योक्तत्वादित्यर्थः ॥ घटः कलशइत्यादावेकार्थपरतयाघटप्रातिपदिकार्थमात्रपरत्वेनाखंडार्थनिष्ठत्वंचस्यात् तच्चपरेषांनसंमतं लक्षणवाक्यस्यैवप्रश्नोत्तरवै

यधिकरण्यान्यथानुपपत्त्यातथाभावाभ्युपगमात् । अतस्तत्रातिव्याप्तिवारणायापर्यायशब्दानामित्युक्तं ॥ पयःपावकेति ॥ अ नेकप्रातिपदिकार्थपरत्वादस्यालक्ष्यत्वं, धर्मिभेदप्रतिपादकस्याखंडार्थत्वायोगात्। नहिधर्मधर्मिभावा(भेदा)सहमखंडत्वंधर्मिभेदस हमित्यंगीकारात् । कीदृशौपयःपावकावितिप्रश्नेऽस्यलक्षणवाक्यस्यप्रवृत्तत्वेनप्रश्नोत्तरयोर्वैयधिकरण्यान्यथानुपपत्त्यापयःपाव करूपप्रातिपदिकार्थमात्रपर्यवसायित्वमस्तीत्यतिव्याप्तिरित्यर्थः ॥ एकविशेष्येति ॥ शीतोष्णस्पर्शवंतौपयःपावकावितिवा क्यस्यतुपयःपावकरूपानेकविशेष्यपरत्वान्नातिव्याप्तिरित्यर्थः ॥ नीलमिति ॥ उत्पलेनैल्यसंसर्गबोधकत्वेनास्यसखंडार्थत्वेना

पयःपावकरूपानेकप्रातिपदिकार्थमात्रपर्यवसायिनिशीतोष्णस्पर्शवंतौ पयःपावका
वित्यादावतिव्याप्तेः। नाप्येकविशेष्यपरत्वं नीलमुत्पलमित्यादावतिव्याप्तेरिष्टापत्तेश्च।
तथाप्यपर्यायशब्दानां संसर्गागोचरप्रमाजनकत्वं वा तेषामेकप्रातिपदिकार्थमात्रपर्य
वसायित्वंवा अखंडार्थत्वं । उक्तंहि "संसर्गासंगिसम्यग्धीहेतुतायागिरामियं ॥

लक्ष्यत्वादुत्पलरूपैकविशेष्यप्रतिपादकत्वेनतत्रातिव्याप्तिःस्यादित्यर्थः । ननुप्रश्नोत्तरयोर्वैयधिकरण्यान्यथानुपपत्त्यालक्षणवा क्यत्वावच्छिन्नस्याखंडार्थत्वांगीकारादस्यापिलक्षणवाक्यत्वेनाखंडार्थत्वाल्लक्ष्यत्वमेवेतिचेन्न नीलत्वस्यमषीखंडादावपिसत्त्वेना तिव्याप्ततयालक्षणत्वाभावेनास्यलक्षणवाक्यत्वाभावादितिध्येयं ॥ इष्टापत्तेश्चेति ॥ समस्तवेदानामनंतगुणाकरभगवद्रूपैक विशेष्यप्रतिपादकत्वरूपाखंडार्थत्वस्यास्माभिरंगीकारादित्यर्थः ॥ तथापीत्यादि ॥ निर्विकल्पकज्ञानजनकत्वमित्यर्थः । अत्रे

SGDF ... Foundation

दमालोचनीयं ॥ घटःकलशइत्यादौसंसर्गाप्रतिपादकेवाक्येलक्षणवाक्यत्वाभावेनसखंडार्थेऽतिव्याप्तिवारणायापर्यायशब्दानामित्युक्तं । नन्वेवंचेदप्राप्तयोःप्राप्तिःसंयोगइतिसंयोगलक्षणवाक्यंतावदखंडार्थं । लक्षणवाक्यत्वादेव तत्राव्याप्तिः संयोगरूपसंसर्गस्यैवात्रलक्ष्यत्वेनतद्गोचरप्रमाजनकत्वेनसंसर्गागोचरप्रमाजनकत्वाभावादितिचेन्न । संसर्गशब्देनपदार्थसंसर्गस्यैवविवक्षितत्वात् तथाचनाव्याप्तिः । अस्यसंयोगलक्षणवाक्यस्यलक्ष्यभूतसंसर्गप्रमाजनकत्वेपिअप्राप्तयोःप्राप्तिरितिपदद्वयार्थनिरूपितपरस्परसंसर्गप्रमाजनकत्वंनास्ति । लक्षणवाक्यत्वेनस्वरूपमात्रेतात्पर्येणसंसर्गेतात्पर्याभावेनतत्प्रमाजनकत्वानंगीकारात् । अन्यथाप्रश्नोत्तरयोर्वैयधिकरण्यापत्तेः । अतोनाव्याप्तिः । अपर्यायशब्दानांपदार्थप्रतियोगिकसंसर्गागोचरज्ञानजनकत्वमखंडार्थत्वमित्येवोक्तौगौरश्वोघटइत्यादिपदैःपदार्थस्मृतिर्भवतीतितार्किकैरंगीकृतत्वाद्गवादिपदैर्गवादिरूपार्थस्मृतिर्भवति साचतत्तत्पदानुभवजन्यास्मृतिस्तत्तत्पदार्थमात्रविषयिणी नतुतत्संसर्गविषयिणी एवंचापर्यायाणांतत्तद्गवादिपदानांपदार्थसंसर्गागोचरस्मृतिरूपज्ञानजनकत्वेनाखंडार्थत्वापत्तेः ततश्चगवादिपदसमुदायेऽतिव्याप्तिः । अलक्ष्यत्वंचलक्षणवाक्यत्वाभावात् अतःप्रमापदं । तत्रापियथार्थानुभवःप्रमा तत्रयाथार्थ्यंनविवक्षितं संसर्गागोचरस्यानुभवस्यनिर्विकल्पकरूपत्वेनतस्ययाथार्थ्यनियमात् एवमपि निर्विकल्पकसद्भावपक्षेसंसर्गागोचरानुभवजनकेंद्रियेऽतिव्याप्तिःस्यादतःशब्दानामित्युक्तं । नन्वत्रबहुवचनंकिमर्थमितिचेत् अत्रकेचित् धवखदिरपलाशाइतिद्वंद्ववाक्येभेदेद्वंद्वइत्युक्तत्वेनभेदप्रतिपादकतयाऽनेकप्रातिपदिकतयावासखंडार्थत्वेनालक्ष्येसंसर्गाप्रतिपादकेउक्तलक्षणसद्भावेनातिव्याप्तिःस्यादतःशब्दानामितिबहुवचनं तदर्थश्चसंभूयैकार्थप्रतिपादकत्वं एवंचतत्रसंभूयैकार्थप्रतिपादकत्वाभावान्नातिव्याप्तिरित्याहुः । तत्समीचीनमिवनभाति इतरेतरयोगेद्वंद्वइत्यंगीकारेणशक्त्यालक्षणयावाधवखदिरादावितरेतरसाहित्यरूपसंसर्गस्यैवप्रतीत्यापदार्थसंसर्गागोचरानुभवजनकत्वरूपलक्षणस्यैवाभावाद्बहुवचनंव्यर्थमेवस्यात् । संप्रदायस्तु बहुवचनाभावेपंकजमानयेतिवाक्यैकदेशभूतेयौगिकेपंकजपदेऽतिव्याप्तिःस्यात् तथाहि पंकजानयपदयोरुभयोर्मिलितयोरेवसंसर्गप्रतिपादकत्वं नैकस्यपंकजपदस्य एवंचप्रकृतोयःपदार्थःपद्मरूपआनयनरूपश्चतन्निरूपितोयःसंसर्गस्तदगोचरानुभवजनकत्वमेकस्मिन्पंकजपदेऽस्तीत्यतिव्याप्तिः । ननुपंकजपदस्यकथमनुभवजनकत्वं तार्किकमतेपदानांप्रत्यक्षानुमानानुभूतपदार्थस्मृतिजनकत्वमेव वाक्यस्यतुसंसर्गानुभवजनकत्वमेव अतएवयथार्थानुभवरूपप्रमाकरणंआकांक्षादिमत्पदसमुदायात्मकमाप्तवाक्यमेवेत्यंगीकृतमतःकथमेतदितिचेन्न । अभिप्रायानवबोधात् अस्माभिरितरपदानिविहायपंकजपदएवातिव्याप्तिरभिधीयते तच्चयौगिकत्वेनवाक्यरूपं एवंचपंकजपदंपंकजनिकर्तृत्वरूपसंसर्गानुभावकमेव एवंचप्रकृतपदार्थप्रतियोगिकसंसर्गागोचरानुभवजनकत्वंपंकजपदेऽतिव्याप्तमतःशब्दानामितिबहुवचनं तथाचापर्यायशब्दानांप्रकृतपदार्थप्रतियोगिकसंसर्गागोचरानुभवजनकत्वमखंडार्थत्वमितिलक्षणंपर्यवसितं । नन्वेवमपर्यायपदंव्यर्थं घटःकलशइत्यत्रसंसर्गाप्रतिपादकवाक्येघटादिपदानां प्रकृतपदार्थप्रतियोगिकसंसर्गागोचरानुभवजनकत्वंनास्ति पदानांस्मारकत्वादतस्तत्रातिव्याप्तेरभावादितिचेन्न । घटादिशब्दा अपियौगिकाएव प्रकृतिप्रत्ययविभागेनसर्वेपिशब्दाव्युत्पन्नाएवेतिपक्षसद्भावात् अतःपंकजादिपदवत्घटकलशादिपदानामपि प्रकृतिप्रत्ययार्थभूतस्वार्थसंसर्गानुभावकत्वेनप्रकृतपदार्थप्रतियोगिकसंसर्गागोचरानुभवजनकत्वमस्त्येवेत्यतिव्याप्तिवारणायाप

SGDF Foundation

र्यायपदमितिसर्वमनवद्यं ॥ ७ ॥ वस्तुतोऽखंडार्थपदानामपिशबलेगृहीतसंगतिकत्वेनविशिष्टार्थवाचकत्वात्प्रातिपदिकार्थमात्र वाचकत्वमसंभवीत्यतःपर्यवसायित्वमित्युक्तं अतस्तेषामपिलक्षणयातत्परत्वमस्तीत्यर्थः । गिरां अपर्यायशब्दानां या संसर्गासं गिसम्यग्धीहेतुता इयमखंडार्थताउक्तेत्यन्वयः ॥ तदिति ॥ तासांगिरामपर्यायशब्दानांब्रह्मप्रातिपदिकार्थतातत्पर्यपर्यवसायित्वं

उक्ताखंडार्थतायद्वातत्प्रातिपदिकार्थते"ति । तत्रपदार्थनिष्ठस्यवाक्यस्याखंडार्थत्वे सत्या दिवाक्यंअखंडार्थनिष्ठं ब्रह्मप्रातिपदिकार्थमात्रनिष्ठंवा लक्षणवाक्यत्वात् तन्मात्रप्रश्नो त्तरत्वाद्वा प्रकृष्टप्रकाशश्चंद्रइतिवाक्यवदित्यनुमानंमानं ॥ नचाद्वितीयहेतोरसिद्धिः "ब्रह्मविदाप्नोतिपर" मित्युक्तब्रह्मप्रातिपदिकार्थमात्रेबुभुत्सितेऽस्यप्रवृत्तेः । नचहेतुद्वये पिदृष्टांतःसाध्यविकलः । प्रकृष्टादिवाक्यंचंद्रप्रातिपदिकार्थमात्रनिष्ठं तन्मात्रप्रश्नोत्तर त्वात्संमतवदितितत्सिद्धेः । नहिकश्चंद्रइतिचंद्रप्रातिपदिकार्थमात्रेपृष्टेऽन्यद्वक्तुमुचितं ।

वाऽखंडार्थतोक्तेत्यर्थः । तत्र अखंडार्थत्वेऽनुमानंमानमितिसंबंधः ॥ संमतवदिति ॥ कोघटइतिप्रश्नोत्तरभूतंअयंघटइत्यादि वाक्यंसंमतशब्दार्थः ॥ यद्यत्प्रश्नोत्तरंतत्तत्प्रातिपदिकार्थमात्रपरमितिसामान्यव्या(प्ताविदं)प्तिमदिदं दृष्टांतकथनमितिध्येयं । हे तोरप्रयोजकतांपरिहरति ॥ नहीति ॥ अन्यथाप्रश्नोत्तरयोर्वैयधिकरण्यप्रसंगइतिभावः । ननुसास्नादिमान्गौरित्यादिलक्षणवा

क्येव्यभिचारशंकांपरिहरति ॥ सास्नेति ॥ अखंडार्थत्वेत्विति ॥ अनुमानमुच्यतइतिशेषः ॥ अकार्यकारणेत्यादि ॥ निष्ठत्वं प्रतिपादकत्वं । भिन्नप्रवृत्तिनिमित्तानांशब्दानामेकस्मिन्नर्थेवृत्तिरेकविभक्त्यंतपदवाच्यत्वंवासमानाधिकरणत्वं । मृद्घ टइतिसमानाधिकरणप्रयोगेकार्यकारणभावरूपसंसर्गप्रतिपाद (कत्वेनस) केसखंडार्थेव्यभिचारवारणायअकार्यकारणद्रव्यनि ष्ठत्वेसतीत्युक्तं । तर्हिनीलोघटइतिवाक्येव्यभिचारः । ननुनीलगुणस्यघटकार्यत्वात्कार्यकारणभावोपेतघटरूपद्रव्यप्रतिपादक

सास्नादिमान्गौरित्याद्यपिलक्षणवाक्यंपृष्टगवादिप्रातिपदिकार्थमात्रपरमितिनव्यभि चारः । ऐक्यपरस्यवाक्यस्याखंडार्थत्वेतु तत्त्वमसीत्यादिवाक्यं अखंडार्थनिष्ठं आत्मस्व रूपमात्रनिष्ठंवा अकार्यकारणद्रव्यमात्रनिष्ठत्वेसति समानाधिकरणत्वात् तन्मात्रप्रश्नो त्तरत्वाद्वा सोयंदेवदत्तइतिवाक्यवत् । नचांत्यहेतोरसिद्धिः कोऽहमित्यात्मस्वरूपमात्रे बुभुत्सितेऽस्यप्रवृत्तेः । नचहेतुद्वयेपिदृष्टांतःसाध्यविकलः कोऽयमितिदेवदत्तस्वरूपमात्रे पृष्टेऽस्यप्रवृत्तेः । विपक्षेप्रश्नोत्तरयोर्वैयधिकरण्यप्रसंगोबाधकइति ॥ अत्रब्रूमः ।

मेवैतद्वाक्यमितिचेन्न । गुणगुणिनोरभेदपक्षाश्रयेणतार्किकाभिमतकार्यकारणभावानंगीकारात् । धर्मधर्मिभावरूपसंबंधबोध नेनलक्षणवाक्यत्वाभावेनवासखंडार्थत्वाच्चातोमात्रपदं। तत्रचनैल्यरूपगुणस्यापिप्रतिपादनान्नव्यभिचारः। देवदत्तस्यदृष्टइतिवा क्येउपादानोपादेयभावरूपकार्यकारणभावरहितद्रव्यमात्रप्रतिपादकेदेवदत्तसंबंधप्रतिपादकत्वेनसखंडार्थेव्यभिचारवारणायस

मानाधिकरणपदं । बुभुत्सिते श्वेतकेतुनेतिशेषः । संसर्गागोचरप्रमाजनकत्वमितियथाश्रुतलक्षणमेवदूषयति ॥ आद्यइति ॥ अस्मत्कृतपूर्वविवक्षोपरिनेदंदूषणमितिध्येयं ॥ **संसर्गलक्षणेति** ॥ संयोगलक्षणेत्यर्थः । लक्ष्यस्यैवसंसर्गरूपत्वेनतद्गोचरप्रमाजनकत्वादितिभावः ॥ **पदस्मारितेति** ॥ तथाचनाव्याप्तिः अप्राप्तयोःप्राप्तिरितिपदद्वयस्मारितपदार्थसंसर्गप्रतिपादकत्वेनतदगोचरप्रमाजनकत्वाभावादितिभावः ॥ **विषमिति** ॥ स्वमित्रस्यशत्रुगृहभोजनप्रसक्तिंदृष्ट्वाप्रयुक्तेविषंभुंक्ष्वेत्याप्तवाक्येवस्तुग

आद्यलक्षणे संसर्गशब्देनसंसर्गमात्रोक्तौ “अप्राप्तयोःप्राप्तिःसंयोग” इत्यादिसंसर्गलक्षणवाक्येअव्याप्तिः । पदस्मारितपदार्थसंसर्गोक्तौतु विषंभुंक्ष्वेत्यादावतिव्याप्तिः तस्यपदस्मारितपदार्थसंसर्गाप्रमापकत्वात् । नचेदमपि “द्विषदन्नंनभोक्तव्यमि” तिशास्त्रमूलकत्वात्

त्यासंसर्गप्रतिपादकत्वेनलक्षणवाक्यत्वाभावेनवासखंडार्थइत्यर्थः । तामेवोपपादयति ॥ **तस्येति** ॥ विषंभुंक्ष्वेतिवाक्यस्यात्रत्यपदस्मारितपदार्थसंसर्गोयःविषकर्मकभोजनरूपःतत्प्रमापकत्वाभावात् ॥ **शास्त्रीयेत्यादि** ॥ द्विषदन्नकर्मकंभोजनंनकर्तव्यमित्येतादृशसंसर्गप्रमापकत्वेननातिव्याप्तिरित्यर्थः ॥ **अस्येति** ॥ अयमिदानींममप्रसक्तंशत्रुगृहभोजनंदृष्ट्वामह्यंक्रुद्धोवर्तते आप्तत्वेसतिप्रमाणविरुद्धकर्तव्यतावादित्वात् तस्माद्द्विषदन्नंनभोक्तव्यमित्यभिप्रायेणैवंप्रयुक्तवान् तस्मान्मयानकर्तव्यमित्येवंयुक्ति

मूलत्वेनेत्यर्थः ॥ **अशास्त्रेति** ॥ शास्त्रानुपस्थितिदशायामियमतिव्याप्तिर्द्रष्टव्या ॥ **प्रतिपिपादयिषितेति** ॥ तथाचनातिव्याप्तिः प्रतिपादयितुमिष्टोयःपदार्थसंसर्गःद्विषदन्नंनभोक्तव्यमित्येवंरूपस्तद्गोचरप्रमाजनकत्वसद्भावेनत्रिषंभुंक्ष्वेतिवाक्येनाऽतिव्याप्तिरितिभावः । अत्रप्रतिपिपादयिषितत्वंपदार्थानांकिंस्वरूपेणविवक्षितं उतसंसर्गप्रतियोगित्वेन नाद्यइत्याशयेनाह ॥ **चंद्रेति** ॥ **प्रश्नेति** ॥ कश्चंद्रःकिंब्रह्मेतिप्रश्नहेतुभूतोयःसंशयस्तद्धर्मित्वेनेत्यर्थः । द्वितीयमाशंक्याह ॥ **संसर्गेति** ॥ संसर्गप्रतियो

शास्त्रीयपदस्मारितपदार्थसंसर्गप्रमापकं अस्ययुक्तिमूलत्वेनाशास्त्रमूलत्वात् । प्रतिपिपादयिषितपदार्थसंसर्गोक्तौच चंद्रब्रह्मादिशब्दार्थानां प्रश्नहेतुसंशयधर्मित्वेनप्रागेवसामान्यतोज्ञाततयास्वरूपेणाप्रतिपिपादयिषितत्वात् । संसर्गप्रतियोगित्वेनतु प्रतिपिपादयिषितत्वेविवक्षिते संसर्गाप्रमापकत्वासंभवात् । किंच शीतोष्णस्पर्शवंतौपयःपावकावित्यादौत्वद्रीत्यासंसर्गाप्रतिपादकेऽनेकप्रातिपदिकार्थमात्रपरेऽतिव्याप्तिः ।

गित्वेनपदार्थानांप्रतिपादयितुमिष्टत्वेसंसर्गस्यतात्पर्यविषयत्वप्राप्त्यातत्प्रमाजननस्यैवप्राप्तेःपुनस्तदप्रमापकत्वोक्तौविरोधइत्यर्थः॥ **त्वद्रीत्येति** ॥ लक्षणवाक्यत्वेनप्रश्नोत्तरयोर्वैयधिकरण्यभियात्वन्मतेप्रतिपिपादयिषितपदार्थसंसर्गोयोलक्षणत्वरूपस्तदप्रतिपादकइत्यर्थः । अलक्ष्यत्वोपपादनायाह ॥ **अनेकेति** ॥ अनेकप्रातिपदिकार्थपरत्वेपिअखंडार्थत्वंकुतोनास्तियेनालक्ष्यत्वमित्य

SGDF Foundation

तआह ॥ नहीति ॥ अखंडत्वंधर्मधर्मिभावेनतयोर्भेदंयदानसहते तदाधर्मिभेदंनसहतइतिकिंवाच्यमित्यर्थः ॥ यौगिकेति ॥ उपगोरपत्यंपुमान्औपगवःकइत्येवंयौगिकोयऔपगवादिस्तत्प्रश्नस्योत्तरभूतइत्यर्थः ॥ अनेकेति ॥ अनेकेअर्थाःवृक्षगजतुरगाद्याःतदात्मकंयद्वनंसेनादिःतत्प्रश्नःकिंवनंकासेनेत्यादिरूपः तत्प्रश्नोत्तरेइत्यर्थः । इत्यादावित्यादिपदेनएकदेशस्थगजतुरगरथाद्याःसेनेतिवाक्यंग्राह्यं । तथाचलक्षणवाक्यत्वेनश्यामत्वादिरूपलक्षणसंसर्गेतात्पर्याभावेनाखंडार्थत्वेपिऔपगवसेनादिरूपध

नहि(च)धर्मधर्मिभावासहमखंडार्थत्वंधर्मिभेदसहं । किंच यौगिकार्थौपगवादिप्रश्नोत्तरेश्या
मोदीर्घोलोहिताक्षऔपगवइत्यादौअनेकार्थात्मकवनसेनादिप्रश्नोत्तरे "एकदेशस्थावृक्षावन"
मित्यादौचसखंडार्थेलक्षणवाक्येतिव्याप्तिः । प्रकृष्टादिवाक्येपिसंसृष्टार्थत्वस्यवक्ष्यमाणत्वे
नासंभवश्च । अतएवांत्यंलक्षणमप्ययुक्तं असंभवात् सखंडार्थलक्षणवाक्येऽतिव्याप्तेश्च ।

र्मिणामेवसंसृष्टार्थरूपत्वेनसखंडार्थत्वादलक्ष्यमेवेतितत्रातिव्याप्तिः प्रश्नोत्तरयोर्वैयधिकरण्यभियाऔपगवादौश्यामत्वादिसंसर्गेतात्पर्याभावेनसंसर्गागोचरप्रमाजनकत्वसद्भावादतिव्याप्तिरित्यर्थः ॥ असंभवइति ॥ संसर्गागोचरप्रमाजनकत्वाभावादितिभावः । अतएवेत्युक्तंविशदयति ॥ असंभवादिति ॥ प्रकृष्टादिवाक्येसंसृष्टार्थत्वस्यवक्ष्यमाणत्वेनप्रातिपदिकार्थमात्रपरत्वाभावादितिभावः ॥ सखंडार्थेति ॥ सखंडार्थस्ययल्लक्षणवाक्यमितिषष्ठीतत्पुरुषः । तथाचौपगवादिरूपसखंडार्थस्ययल्लक्षणवा

क्यंश्यामोदीर्घइत्यादिरूपंतस्यलक्षणवाक्यत्वादेवऔपगवादिरूपसखंडप्रातिपदिकार्थमात्रपरत्वेनातिव्याप्तिरित्यर्थः । अनंतादिशब्दानामपर्यायत्वाभावात्तेषुतद्धटितोक्तलक्षणाव्याप्तिरित्याशयेनाह ॥ प्रवृत्तिनिमित्तेति ॥ लोकेप्रवृत्तिनिमित्तभेदेसतिअपर्यायत्वंघटपटादिशब्दानांदृष्टं नतुप्रवृत्तिनिमित्ताभेदइत्यर्थः । नन्वत्राप्यनंतत्वादिरूपप्रवृत्तिनिमित्तभेदसद्भावादनंतादिशब्दानांअपर्यायत्वमित्यतआह ॥ तद्भेदस्त्विहेति ॥ प्रवृत्तिनिमित्तभेदइत्यर्थः । कुतोनास्तीत्यतआह ॥ अनंतत्वादीनामिति ॥ तथाचसर्वेषामनंतत्वसत्यत्वादीनांकेवलशुद्धब्रह्मात्मसत्वेनसत्यत्वानंतत्वादिरूपप्रवृत्तिनिमित्तभेदाभावान्नापर्यायत्वमि

किंच प्रवृत्तिनिमित्ताभेदश्चेन्नापर्यायत्वं तद्भेदस्त्वि
हनास्ति अनंतत्वादीनांशुद्धादन्यत्रासंभवात् अनं
तादिशब्दानांलक्षणयाऽखंडार्थत्वेचशुद्धेतदसिद्धेः ।

त्यर्थः । ननुसत्यानंतादिशब्दानांशबलेगृहीतसंगतिकत्वेनसत्यत्वानंतत्वादिविशिष्टवाच्यार्थभेदसद्भावेनप्रवृत्तिनिमित्तभेदसद्भावान्नपर्यायत्वं । तेषांचलक्षणयाशुद्धब्रह्मपरत्वान्नाखंडार्थत्वहानिरित्यतआह ॥ अनंतादीति ॥ शुद्धेतदसिद्धेरिति ॥ अनंतत्वादिकंहित्वन्मतेशुद्धस्यैवलक्षणं मोक्षजनकज्ञानविषयस्यैवब्रह्मणःपृष्टत्वात्तस्यैवचसत्यादिवाक्येनोच्यमानत्वात् तथाचानंतादिशब्दानांलक्षणयाचिन्मात्रपरत्वेशुद्धेऽनंतत्वादीनांलक्षणानामसंभवएवस्यात् गंगापदलक्ष्येतीरेगंगात्वाभाववदनंतादिपद

नि

तत्वादीति

SGDF Sri Gargeshwari Digital Foundation

लक्ष्येशुद्धेऽनंतत्वादीनामयोगादितिभावः ॥ १ ॥ ७ ॥ **अखंडार्थत्वलक्षणभंगविवरणं** ॥ ७ ॥ **अप्रसिद्धेति** ॥ संसर्गागोचरप्रमाजनकत्वरूपसाध्यस्यकुत्राप्यप्रसिद्धत्वादितिभावः । प्रत्यक्षादौसाध्यप्रसिद्धिर्भविष्यतीतिचेत्तत्राह ॥ **प्रत्यक्षादिनापीति** ॥ निर्विकल्पकस्याप्रामाणिकत्वादितिभावः। यदिसत्यत्वादीनांलक्षणत्वंस्यात् तदैवसत्यज्ञानादिवाक्यानांलक्षणवाक्यत्वंतदेवायुक्तं परजातिरूपसत्तायाःअपरजातिरूपज्ञानत्वादेश्चब्रह्मव्यतिरिक्तेजगत्यपिसत्त्वेनातिव्याप्ततयाऽलक्षणत्वात् ततश्चलक्षण

॥ ७ ॥ अखंडार्थत्वलक्षणभंगः ॥ १ ॥ ७ ॥ आद्यानुमानेचाप्रसिद्धविशेषणत्वं प्रत्यक्षादिनापीदमित्थमितिसप्रकारकज्ञानस्यैवोत्पत्तेः। असिद्धिश्च । सत्यत्वज्ञानत्वादेः परापरजातित्वेतस्याब्रह्मण्यपिसत्त्वेनातिव्याप्तेः । अजातित्वेपिब्रह्मण्यपितस्यतात्विकस्य धर्मिज्ञानाबाध्यस्यचासंभवात् अतात्विकस्य व्यावहारिकस्यचानात्मन्यपि सत्त्वात् विरुद्धत्वंच असाधारणधर्मरूपलक्षणपरवाक्यत्वस्यसखंडार्थत्वेनैवव्याप्तेः ।

वाक्यत्वहेतोरसिद्धिरित्याशयेनाह ॥ **सत्यत्वेति** ॥ ननुसत्यत्वादिकंनसत्ताजात्यादिरूपं किंनाम अबाध्यत्वादिरूपमन्यदेव लक्षणत्वेनविवक्षितं तत्तुनातिव्याप्तमितिचेत् तत्किंतात्विकंवा धर्मिज्ञानाबाध्यंवा अतात्विकंवा। नाद्यद्वितीयौ ब्रह्मणिविद्यमानस्याबाध्यत्वादिरूपसत्यत्वस्यातात्विकत्वाद्धर्मिज्ञानबाध्यत्वाच्च अतोसंभवएवस्यात् । नांत्यः व्यावहारिकत्वापरपर्यायातात्विकाबाध्यत्वादिरूपसत्त्वस्याऽनात्मन्यपिसत्वेनातिव्याप्तेरलक्षणत्वादतोऽसिद्धिर्दुर्वारेत्याह ॥ **अजातित्वेपीत्यादिना** ॥

विरुद्धत्वंस्फोरयितुंअसाधारणधर्मरूपेत्युक्तं तथाचसाध्याभावेनैवव्याप्तत्वाद्विरुद्धत्वमित्यर्थः । ननुलक्षणंद्विविधं स्वरूपमतिरिक्तंचेति । तत्रस्वरूपलक्षणंलक्ष्यानतिरिक्तमेव तथाचतत्परत्वेलक्ष्यपरत्वमेवप्राप्तमितिनाखंडार्थत्वविरोधइत्याशंक्यनिराकरोति ॥ **नचेति** ॥ लक्ष्यमात्रत्वे लक्ष्येणनिर्विशेषात्यंताभेदे । तथाचलक्ष्यलक्षणभावार्थस्वरूपातिरेकेंऽगीक्रियमाणेसखंडार्थत्वप्राप्त्याविरुद्धत्वमेवेतिभावः । ननुस्वरूपलक्षणस्यकथंलक्ष्यातिरिक्तत्वमित्यतआह ॥ **अतिरेकेपीति** ॥ यावत्पर्यंतंलक्ष्यमस्तितावत्पर्यंतंसत्त्वेनस्वरूपलक्षणत्वसंभवादित्यर्थः । ननुसत्यज्ञानादिवाक्येनब्रह्मस्वरूपबोधनायोदाहरणत्वेनलक्षणमुपादीयते पश्चाद्द्वारभूतंतल्लक्षणंपरित्यज्यब्रह्मस्वरूपमात्रमेवबोध्यतइतितत्रातात्पर्यान्नद्वारिणोऽखंडार्थत्वविरोधीत्याशंक्यनिराकरोति ॥ **नचेति** ॥ **वक्ष्यमाणेति** ॥ सामान्यतोपिब्रह्मस्वरूपाज्ञानेतद्धर्मिकसंशयाद्ययोगेनकिंब्रह्मेतिप्रश्नाद्ययोगादित्यादिवक्ष्यमाणरीत्येत्यर्थः । लक्षणात् द्वारत्वेनोच्यमानात् । अज्ञातस्वरूपस्यैवद्वारेणबोध्यत्वादितिभावः ॥ **नहेतुरिति** ॥ येनतस्यसखंडार्थ

नचस्वरूपलक्षणस्यलक्ष्यानतिरेकात्तत्परत्वमखंडार्थत्वाविरोधि । तस्यलक्ष्यमात्रत्वेलक्ष्यलक्षणभावायोगात् अतिरेकेपियावल्लक्ष्यभावित्वादिनैव स्वरूपलक्षणत्वोपपत्तेश्च । नचद्वारत्वेनलक्षणपरत्वंद्वारिणोऽखंडत्वा(डार्थ)त्वाविरोधि वक्ष्यमाणरीत्यालक्षणात्प्रागेवसामान्यतोज्ञातेस्वरूपमात्रेतस्यद्वारत्वायोगात् । नचलक्षणपरत्वंनहेतुःकिंत्वतत्परत्वेपितत्प्रत्यायकत्वमात्रमितिवाच्यं ।

SGDF

त्वेनैवव्याख्याविरुद्धत्वंस्यादितिभावः । लक्षणपरत्वाभावेपिलक्षणप्रत्यायकत्वादखंडार्थत्वमितिवक्तुंनशक्यते नीलमुत्पलमित्य
त्राऽतिव्याप्तत्वेननीलत्वस्यालक्षणत्वेनैतद्वाक्यस्यलक्षणपरत्वाभावाल्लक्षणप्रत्यायकत्वसद्भावेनाखंडार्थत्वाभावाद्व्यभिचारःस्या
त् । नचातत्परस्यतत्प्रत्यायकत्वंकथमितिवाच्यं । तात्पर्यभ्रमादिनोपपत्तेरित्याह ॥ अलक्षणेति ॥ एवंविरुद्धत्वमुक्त्वानैकां
त्यंचाह ॥ सखंडेति ॥ वनादीनांसंसृष्टरूपत्वादित्यर्थः ॥ किमिति ॥ कश्चंद्रइतिचंद्रस्वरूपमात्रेपृष्टेप्रवृत्तस्यप्रकृष्टादिलक्षण
वाक्यस्यस्वार्थेतात्पर्याभावेपिकिंचंद्रलक्षणमित्यसाधारणधर्मस्यैवप्रश्नेसतिप्रवृत्तस्यप्रकृष्टादिवाक्यस्यलक्षणपरत्वावश्यंभावाद्व्य

अलक्षणवाक्यस्यापितात्पर्यभ्रमादिनालक्षणप्रत्यायकत्वसंभवेनव्यभिचा
रात् । सखंडवनादिलक्षणवाक्येकिंचंद्रलक्षणमित्यसाधारणधर्मप्रश्नोत्तरे
प्रकृष्टादिवाक्येचव्यभिचारश्च । नचाखंडलक्षणवाक्यत्वंहेतुः असिद्धेः ।

भिचारःस्यादेवेत्यर्थः ॥ अखंडेति ॥ अखंडस्ययल्लक्षणंतद्वाक्यत्वंहेतुत्वेनविवक्षितं तथाचसखंडवनादिलक्षणवाक्येनव्यभि
चारइतिभावः ॥ असिद्धेरिति ॥ ब्रह्मस्वरूपमात्रस्यसिद्धत्वान्नस्वरूपमात्रेप्रश्नः अन्यथाप्रश्नस्यैवासंभवात् अतःकैर्विशेषणै
र्विशिष्टंब्रह्मेत्येवंसखंडस्यैवब्रह्मणःप्रश्नेसत्यादिवाक्यस्यप्रवृत्तत्वेनअखंडलक्षणवाक्यत्वंवक्ष्यमाणरीत्यासिद्धमित्यर्थः । ननुकिं
चंद्रलक्षणमित्यसाधारणधर्मप्रश्नोत्तरेप्रकृष्टादिवाक्येनव्यभिचारः तस्यापिचंद्रस्वरूपमात्रएवतात्पर्यांगीकारेणलक्षणपरवाक्य

त्वरूपहेतोरेवाऽभावादित्यतआह ॥ नचेति ॥ प्रश्नोत्तरयोर्वैयधिकरण्यान्यथानुपपत्तिरूपयुक्त्यैवलक्षणपरत्वस्यसिद्धत्वादि
त्यर्थः । ननुकिंचंद्रलक्षणमित्यसाधारणधर्मप्रश्नोत्तरेप्रकृष्टादिवाक्येव्यभिचारस्तदास्यात् यदिकिंचंद्रलक्षणमित्यसाधारणधर्म
प्रश्नस्येदमुत्तरंस्यात् नचैवं उत्तरत्वेप्रश्नविशेष्यविशेष्यकत्वस्यैवतंत्रत्वात् अत्रप्रश्नस्यचंद्रलक्षणविशेष्यकत्वात् प्रकृष्टप्रकाशश्चं
द्रइतिवाक्यस्यचचंद्रविशेष्यकत्वात् । अतोनाऽत्रव्यभिचारइत्यतआह ॥ नचेति ॥ तन्मूलेति ॥ प्रश्नमूलभूतेत्यर्थः । तथाच
चंद्रविशेष्यकेऽस्मिन्वाक्येप्रयुक्तेपिकिंचंद्रलक्षणमितिप्रश्नहेतुभूतसंशयस्यनिवर्तमानत्वेनोत्तरत्वंयुक्तमितिस्यादेवव्यभिचारइति

नचधर्मेपृष्टेस्वरूपमात्रंवक्तुमुचितं । नचप्रश्नविशेष्यविशेष्यकत्वंउत्तरत्वेतंत्रं किंतुतन्मूलसंशयविरो
धित्वं । बाधश्च धर्मिज्ञानाधीनसप्रकारकसंशयादिनिवर्तकंमोक्षहेतुंसप्रकारकंब्रह्मज्ञानंप्रतिसाधनत्वेनवे
दांतविचारविधानान्यथानुपपत्त्याबलवत्यावेदांतवाक्येसाध्याभावनिश्चयात् । सत्प्रतिपक्षत्वंच सत्यादि
वाक्यतात्पर्यविषयःसंसृष्टरूपःसंसर्गरूपोवा प्रमाणवाक्यतात्पर्यविषयत्वात् संमतवत् । सत्यादिवाक्यं

भावः । वेदांतवाक्येसाध्याभावनिश्चायकान्यथानुपपत्तेर्बाधकत्वोपयुक्तंबलवत्त्वमुपपादयितुमुक्तं ॥ धर्मिज्ञानेत्यादि ॥ "भि-
द्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः" इतिप्रमाणेनब्रह्मज्ञानस्यसंशयनिरासकत्वेनप्रमितत्वात्सप्रकारकसंशयनिवर्तकंचज्ञानंसप्रका
रकमेव नधर्मिज्ञानमात्रं तस्यपूर्वमेवसिद्धत्वादित्याशयेनोक्तं ॥ धर्मिज्ञानेति ॥ संशयादिनिवृत्त्यापिकिंप्रयोजनमितिनवाच्य
मित्याशयेनोक्तं ॥ मोक्षहेतुमिति ॥ साध्येति ॥ संसर्गप्रकारकज्ञानजनकत्वस्यैवनिश्चयादित्यर्थः ॥ संमतवदिति ॥ अ

SGDF
Sri Gangadhar Digital Foundation

ग्निहोत्रादिवाक्यतात्पर्यविषयवदित्यर्थः । परेणसार्वज्ञादिधर्मसंसर्गस्यवेदतात्पर्यविषयशुद्धब्रह्मज्ञानबाध्यत्वेनमिथ्यात्वांगीकारा दाह ॥ स्वतात्पर्यविषयेत्यादि ॥ ननुविषंभुंक्ष्वेतिप्रमाणवाक्येस्वतात्पर्यविषयभूतंयज्ज्ञानं द्विषदन्नंनभोक्तव्यमितिज्ञानंतेना बाध्यो यःसंसर्गःविषकर्मकभोजनक्रियारूपसंसर्गस्तत्रतात्पर्याभावेनतत्परत्वाभावाद्व्यभिचारःस्यादतआह ॥ स्वकरणकेत्यादि॥ तथाचनव्यभिचारः स्वतात्पर्यविषयज्ञानाबाध्यसंसर्गःविषकर्मकभोजनक्रियासंसर्गरूपोवा(च्यार्थ)क्यार्थसंसर्गोनविवक्षितः येन

स्वतात्पर्यविषयज्ञानाबाध्यसंसर्गपरं स्वतात्पर्यविषयज्ञाना बाध्यस्वकरणकप्रमितिविषयपदार्थनिरूप्यसंसर्गपरंवा प्रमा णवाक्यत्वात् ज्योतिष्टोमादिवाक्यवत्। विषंभुंक्ष्वेत्यादौवा च्यार्थसंसर्गपरत्वाभावेप्युक्तसाध्यसद्भावान्नव्यभिचारः ।

तत्परत्वाभावेनव्यभिचारश्चोद्येत किंनाम तस्मिन्स्वतात्पर्यविषयज्ञानाबाध्यसंसर्गेस्वकरणकेत्यादिकंविशेषणंविवक्षितं तथाचा ऽस्यवाक्यस्यलिंगत्वेनएतद्वाक्यकरणिकायाप्रमितिर्द्विषदन्नंनभोक्तव्यमित्येवंरूपा तद्विषयायेपदार्थाःशास्त्रीयपदार्थास्तन्निरू प्योयःसंसर्गस्तत्परत्वसद्भावेननव्यभिचारइत्यर्थः । नन्वेवंखंच्छिद्रंकोकिलःपिकइत्यादिपर्यायशब्दप्रतिपादकेप्रमाणवाक्येसंस ॥ ४३७ ॥

र्गपरत्वस्यैवाऽभावेनोक्तसाध्याभावाद्व्यभिचारइत्यतआह ॥ खंच्छिद्रमिति ॥ तत्रापिच्छिद्रशब्दवाच्येखशब्दवाच्यत्वंकोकि लशब्दवाच्येपिकशब्दवाच्यत्वमेवविधीयतइतितत्रापिवाच्यार्थसंसर्गपरत्वस्यसत्वान्नव्यभिचारइत्यर्थः । किंचप्रकृष्टवाक्यस्यमु ख्यवृत्त्याऽखंडार्थत्वंउतभागत्यागलक्षणयावा लक्षणापिअन्वयानुपपत्त्यातात्पर्यानुपपत्त्यावा। नाद्यः मुख्यवृत्त्यासखंडार्थस्यैवप्र

खंच्छिद्रंकोकिलःपिकइत्यादावपिअनतिभिन्नार्थत्वेसामानाधिकरण्यायोगेनच्छिद्रकोकिलादीनां खपिकादिशब्दवाच्यत्वसंसर्गपरत्वात्नतत्रापिव्यभिचारः । यद्वावेदांतजन्यप्रमासप्रकारि का विचारजन्यज्ञानत्वात् संशयविरोधित्वाच्च कर्मकांडजन्यज्ञानवत् । वेदांतजन्याप्रमा ब्रह्मनिष्ठप्रकारविषया ब्रह्मधर्मिकसंशयविरोधिज्ञानत्वात् ब्रह्मविचारजन्यज्ञानत्वाच्च यदेवं तदेवं यथाकर्मकांडविचारजन्यनिश्चयइत्यादिनाप्रतिरोधात् । दृष्टांतस्यसाध्यवैकल्यंच । तथाहि प्रकृष्टादिवाक्यस्याखंडार्थत्वंनतावन्मुख्यवृत्त्या । लक्षणापिनतावत्गंगायांघोषइत्यादाविवान्वया नुपपत्त्या चंद्रादौप्रकृष्टेनगुणरूपेणद्रव्यरूपेणवाप्रकाशेनसंबंधस्यसत्वात् चंद्रेप्रकृष्टप्रकाशादेःस त्वात् । नापियष्टीःप्रवेशयेत्यादाविवतात्पर्यानुपपत्त्याकश्चंद्रइतिस्वरूपमात्रस्यपृष्टत्वादितिवाच्यं ।

तिपादकत्वेनअखंडार्थानुपस्थितेः । द्वितीयेनप्रथमइत्याह ॥ चंद्रादाविति ॥ प्रकाशोगुणइतिद्रव्यमितिचमतद्वयसद्भावादा ह ॥ गुणेत्यादि ॥ द्वितीयेद्वितीयमाशंक्यनिराकरोति ॥ नापीति॥ तात्पर्यानुपपत्तिमुपपादयति ॥ कश्चंद्रइति ॥ तथाचस्व

SGDF Foundation

रूपमात्रएवतात्पर्यं । अन्यथाप्रश्नोत्तरयोर्वैयधिकरण्यंस्यादितिभावः । स्यादियंतात्पर्यानुपपत्त्यालक्षणा यदिचंद्रस्वरूपमात्रवि
षयःप्रश्नःस्यान्नचैवं कुतइत्यतआह ॥ अस्तीति ॥ चंद्रस्वरूपमात्रप्रश्नमंगीकुर्वताचंद्रस्वरूपंनज्ञातमित्येववक्तव्यं ज्ञातमित्यं
गीकारेतत्रसंदेहायोगेनप्रश्नस्यैवायोगात् ओमितिचेत्तत्राह ॥ अस्तीति ॥ तत्र चंद्रविषये । धर्मीचंद्रः । बुभुत्सायाः तत्स्वरू
पंबोद्धुमिच्छायाः । चंद्रशब्दार्थाज्ञानेनस्वरूपमात्रप्रश्नांगीकारेदूषणांतरमाह ॥ चंद्रेति ॥ कश्चंद्रइतिचंद्रशब्देसुइतिप्रथमावि

अस्तिकश्चिचंद्रशब्दस्यार्थइत्यज्ञानेतत्रधर्मिज्ञानसाध्यायाबुभुत्सायाः
संदेहस्यचानुपपत्तेः । चंद्रशब्दस्यप्रातिपदिकत्वानिश्चयेनसुब्विभ
क्तिप्रयोगायोगाच्च चंद्रइत्यनूद्यकइतिप्रश्नायोगाच्च । नह्यज्ञातमनुवा
दार्हं । असंकीर्णचंद्रस्वरूपंनज्ञातमितिचेत् । न चंद्रस्वरूपद्वयाभावात् ।

भक्तिःप्रयुज्यते सोरुत्वेविसर्गेचसतिचंद्रइतिजातत्वात् । सुब्विभक्तिश्चङ्याप्प्रातिपदिकात् इत्यधिकृत्यस्वौजसमौडित्यादि
नाप्रातिपदिकोपर्येवविहिता प्रातिपदिकत्वंचार्थवत्त्वगर्भं "अर्थवदधातुरप्रत्ययःप्रातिपदिक" मितिसूत्रात् अतःकश्चंद्रेत्यस्यप्रा
तिपदिकत्वाज्ञानेसुब्विभक्तिप्रयोगएवनस्यात् प्रेक्षावत्प्रयोगस्यज्ञानपूर्वकत्वात् अतःकश्चंद्रइतिपृष्टवतश्चंद्रशब्दार्थज्ञानमस्तीत्यं
गीकार्यमित्यर्थः । चंद्रस्वरूपाज्ञानेऽनुवादःकुतोनयुक्तइत्यतआह ॥ नहीति ॥ स्वरूपद्वयेति ॥ संकीर्णासंकीर्णचंद्रस्वरूपद्वये ॥ ४३८ ॥

त्यर्थः ॥ तदेवेति ॥ धर्मित्वेनज्ञातमेवेत्यर्थः ॥ असंकीर्णत्वेनेति ॥ इतरव्यावृत्तत्वेनेत्यर्थः ॥ अन्यतरेति ॥ व्यावर्त
कधर्मवैशिष्ट्यंवातत्साध्यव्यावृत्तिवैशिष्ट्यंवाऽसंकीर्णत्वमित्यर्थः ॥ विशिष्टेति ॥ तथाचकश्चंद्रइत्यस्यनिरुक्तासंकीर्णचंद्रस्व
रूपंकिमितिप्रश्नार्थःस्यात् तथाचप्रश्नस्यविशिष्टपरत्वमेवेतिसाध्यवैकल्यमितिभावः । उक्तप्रमेयंश्लोकद्वयेनसंगृह्णाति ॥ एवंचे
ति ॥ एवंकश्चंद्रइतिप्रश्नस्याखंडार्थविषयत्वंनिराकृत्यप्रश्नस्यतदभावादेवप्रकृष्टप्रकाशइत्यादिप्रतिवचनमपिनाखंडार्थप्रतिपादन

तदेवस्वरूपमसंकीर्णत्वेननज्ञातमितिचेत्न असंकीर्णत्वस्यव्यावर्तकवैशिष्ट्यव्यावृत्तिवैशिष्ट्ययो
रन्यतररूपत्वेनप्रश्नस्यविशिष्टपरत्वापातात् । एवंच "सामान्यतोपिनज्ञातोधर्मीचंद्रोयदातदा ।
नबुभुत्सानसंदेहोनानुवादश्चयुज्यते । तस्माचंद्रस्येतरस्माद्भेदकोधर्मएवहि । पृष्टस्तस्मात्प्रकृष्टा
दिवाक्यंनाखंडगोचरं" । एवंप्रतिवचनस्यप्रकृष्टत्वादिविशिष्टेतात्पर्याभावेतात्पर्यतोयःकश्चिच्चं
द्रइत्येवबोधनात् अतात्पर्यविषयस्यचप्रतीतस्यत्यक्तत्वात् वस्तुतोयस्यकस्यापिचंद्रत्वंस्यात् ।

परमित्याह ॥ एवमित्यादिना ॥ तात्पर्यतइति ॥ यस्मिन्कस्मिंश्चिच्चंद्रस्वरूपएवतात्पर्यापत्तेरित्यर्थः । बोधनात् बोधापत्तेः ।
ननूक्तवाक्यस्यप्रकर्षादिविशिष्टेतात्पर्याभावेपितद्वाक्यात्प्रकर्षादिविशिष्टएवतात्पर्यंप्रतीयतेऽतःकथमुच्यतेयःकश्चिच्चंद्रइत्येवबो
धःस्यादितितत्राह ॥ अतात्पर्येति ॥ प्रतीतस्य प्रकृष्टत्वादेः ॥ वस्तुतइति ॥ वस्तुतोयःकश्चित्तस्यैवचंद्रत्वंस्यात् । प्रकृष्ट

SGDF
Sri Gangadharendra Digital Foundation

त्वादिविशिष्टस्यचंद्रत्वसिद्धिश्चानुभवसिद्धासानस्यादितिभावः । इष्टापत्तिरितिचेत्तत्राह ॥ तात्पर्यैति ॥ अयंप्रकृष्टत्वादिलक्ष
णविशिष्टश्चंद्रइत्यऽत्रप्रकृष्टत्वादिविशिष्टत्वरूपंलक्षणमुद्देश्यंचंद्रइतिलक्ष्यंविधेयमित्यस्ति अयंविभागस्तात्पर्यविषयेऽखंडेनस्यात्
अखंडेविभागांगीकारेचतन्नियततद्भेदस्यापिप्राप्तेरितिभावः । ततोपिकिमित्यतआह ॥ तात्पर्यतइति ॥ यत्किंचिदितिज्ञानेस

तात्पर्यविषयेऽखंडेऽयंचंद्रइतिलक्षणलक्ष्यरूपोद्देश्यविधेयविभागाभावे
नतात्पर्यतोयत्किंचिदित्येवबोधना(त्तेन)(चंद्रत्वेन)चंद्रबुभुत्सानिवृत्त्यभा
वात्कश्चंद्रइतिप्रश्नस्योत्तरंचनस्यात् । सर्वेषामपिलक्षणवाक्यतात्पर्य
जन्यज्ञानानांवस्तुगत्यापरस्परभिन्नतत्तत्प्रातिपदिकार्थविषयत्वेपिप्रकार
भेदाभावेनतेनतेनभिन्नभिन्नप्रकारकतत्तत्संदेहनिवृत्तिश्चनस्यात्।प्रकृष्टा
दिपदवैयर्थ्यंचस्यात्। व्यावर्त्यभेदेनसार्थक्यमित्येतन्निरसिष्यते । एतेन

त्यपिचंद्रत्वेनबुभुत्साप्रश्नयोरनुच्छेदात्प्रकृष्टादिवाक्यस्यतदुत्तरत्वंचनस्यादित्यर्थः ॥ लक्षणेति ॥ गोघटादिसमस्तपदार्थलक्ष
णेत्यर्थः । तेनतेन सास्नादिमानित्यादिलक्षणवाक्येनइयंगौर्नवाऽयंघटोनवेत्यादिभिन्नभिन्नप्रकारकसंशयनिवृत्तिरनुभूयमाना
नस्यात् । कुतइत्यतउक्तं॥प्रकारेति ॥ भिन्नभिन्नप्रकारविषयकत्वाभावेनेत्यर्थः । प्रकारभेदावगाहित्वेलक्षणवाक्यानामखंडार्थ

त्वंव्याहन्येतेत्याशयः ॥ प्रश्नोत्तरेइति ॥ प्रश्नोत्तरयोर्वैयधिकरण्यान्यथानुपपत्त्याविशिष्टपरत्वंविहायचंद्रप्रातिपदिकार्थमात्रप
रत्वंतावत्सिद्धमस्ति तत्रावाभ्यांचंद्रप्रातिपदिकार्थएवकइतिविचार्यंभवति । तत्रप्रकृष्टप्रकाशत्वरूपविशेषणविशिष्टएवतावन्नचं
द्रप्रातिपदिकार्थः । तथात्वेप्रकृष्टप्रकाशश्चंद्रइत्यनयोःपर्यायत्वापत्त्यासहप्रयोगायोगात् अतःप्रकृष्टत्वादिविशेषणसाधारणविशे
ष्यभूतव्यक्तिमात्रमेवचंद्रप्रातिपदिकार्थइतिवक्तव्यं तथाचविशेष्यव्यक्तिमात्रस्यचाखंडत्वेनप्रश्नोत्तरयोरखंडार्थत्वसिद्धिरितिकेन

प्रश्नोत्तरेतावच्चंद्रप्रातिपदिकार्थमात्रविषये । प्रकृष्टादिविशेषणाश्रयभूताचासाधारणीविशे
ष्यव्यक्तिःचंद्रप्रातिपदिकार्थः । नतुतद्विशिष्टा । प्रकृष्टप्रकाशश्चंद्रइतिसहप्रयोगाद्ययोगात्
विशेष्यव्यक्तिश्चाखंडेतिअखंडार्थपरेप्रश्नोत्तरेइतिनिरस्तं अस्याएवासाधारणव्यक्तेर्व्यावर्त
कादिवैशिष्ट्यरूपेणासाधारण्येनाज्ञानेपिचंद्रप्रातिपदिकार्थत्वादिरूपेणप्रागेवज्ञातत्वात् ।

चिदुक्तंयुक्ततरमप्येतेनैवनिरस्तमित्यर्थः ॥ अस्याएवेति ॥ सत्यमेवंविशेष्यव्यक्तिरेवचंद्रप्रातिपदिकार्थइति तथापिप्रश्नस्यना
खंडार्थत्वं एतस्याएवसाधारणव्यक्तेर्व्यावर्तकवैशिष्ट्यरूपेणव्यावृत्तिवैशिष्ट्यरूपेणचाऽसाधारण्येनाज्ञानेपितत्रचंद्रप्रातिपदिका
र्थत्वरूपधर्मस्यैवसत्वेनतादृशधर्मवत्तयापूर्वंज्ञातत्वेनप्रश्नस्याखंडार्थत्वाभावात् एवंचकश्चंद्रइतिप्रश्नस्यचंद्रप्रातिपदिकार्थत्वविशि
ष्टःकिंलक्षणविशिष्टइत्यर्थकत्वेनविशिष्टपरएवप्रश्नइत्यर्थः । ननुतर्ह्युत्तरासंगतिः तत्रहिप्रकृष्टप्रकाशइतिलक्षणमुद्दिश्यचंद्रत्वंवि

SGDF
Foundation

धेयमितिप्रतीयते चंद्रत्वंचचंद्रप्रातिपदिकार्थत्वरूपं तथाचप्रकृष्टप्रकाशश्चंद्रप्रातिपदिकार्थइतिविधानंनसंभवति प्रकृष्टत्वादौ विशेषणेचंद्रप्रातिपदिकार्थत्वान्व(यबोधादि)याभावादितिचेत्तत्राह ॥ एवंचेति ॥ यथागामानयेत्यत्रआनयनान्वयस्यगोत्वेऽसंभवात्तदाश्रयव्यक्तावेवानयनान्वयोंगीकृतोस्ति एतावतागोत्वंनत्यज्यते तस्योद्देश्यतावच्छेदकत्वेनविवक्षितत्वात् एवंप्रकृष्टप्रकाशत्वविशिष्टेचंद्रप्रातिपदिकार्थत्वबोधनेपिप्रकृष्टत्वादौतदन्वयाभावेपिप्रकृष्टप्रकाशत्वादिकंनत्यज्यते उद्देश्यंयद्विशिष्टंतस्याऽवच्छेदकत्वेनविवक्षितत्वादित्यर्थः ॥ तद्वदेवेति ॥ प्रश्नवदेवेत्यर्थः । क्वचिदुद्देश्यतावच्छेदकीभूतलक्षण(स्यापिवि)स्यविधेये

एवंच गामानयेत्यादौगोत्वस्यानयनेनेवप्रकृष्टत्वादेर्विधेयेनचंद्रप्रातिपदिकार्थत्वेनानन्वयेपिउद्देश्यत्वावच्छेदकत्वेनविवक्षितत्वात्तद्वदेवविशिष्टार्थत्वंदुर्वारं । अस्तिचपृथिवीत्ववतीपृथिवीत्यादौ पृथिवीत्वस्यविधेयेनपृथिवीशब्दार्थत्वेनान्वयः । नहिपृथिवीत्वंनपृथिवीप्रातिपदिकार्थः सहप्रयोगस्तुपृथिवीशब्दस्यतच्छब्देनव्यवहर्तव्यतापरत्वात् ।

नान्वयोस्तीत्याह ॥ अस्तिचेति ॥ पृथिवीत्ववतीव्यक्तिःपृथिवीपृथिवीशब्दवाच्या पृथिवीप्रातिपदिकार्थइतियावत् । नन्वत्रोद्देश्यतावच्छेदकेपृथिवीत्वेकथंपृथिवीशब्दार्थत्वान्वयइत्यतआह ॥ नहीति ॥ ननुपृथिवीत्वस्यापिपृथिवीशब्दार्थत्वेपृथिवीपृथिवीत्ववतीशब्दयोःपर्यायत्वापत्त्यापृथिवीत्ववतीपृथिवीतिसहप्रयोगोनस्यात् । पृथिवीत्ववतीपृथिवीत्ववतीतिप्रयोगायोगादित्यतआह ॥ सहेति ॥ तथाचपृथिवीत्ववतीपृथिवीपृथिवीतिव्यवहर्तव्येत्यर्थः । अयंन्यायःप्रमाणमित्यादौसर्वत्रापिद्रष्टव्यः ।

SGDF Sri Gargeshwari Digital Foundation

नन्वथापिव्यावर्तकादिधर्मविशिष्टपरत्वंप्रश्नादेःकथं किंतुनक्षत्रादिव्यावर्तकधर्ममात्रविषये व्यावृत्तिरूपधर्ममात्रविषयेवा प्रश्नो स्त्वित्याशंकांनक्षत्रादिव्यतिरेकमात्रस्यापिसिद्धत्वान्नव्यतिरेकमात्रइतिभगवत्पादवाक्यंमनसिनिधायपरिहरन्नुपसंहरति ॥ त स्मादिति ॥ संशयादिधर्मिणश्चंद्रस्यप्रागेवज्ञातत्वादित्यन्वयः । तथाचनचंद्रस्वरूपमात्रेप्रश्नइत्याशयः । चंद्रस्वरूपमात्रवत्न क्षत्रादिव्यावर्त्तकधर्मस्यापिघटत्वादौतदधीनव्यावृत्तेश्चघटादौज्ञातत्वान्नतदुभयमात्रेप्रश्नः किंतुतद्व्यावर्त्तकधर्मविशिष्टंतत्साध्य

तस्माद्धर्मिणश्चंद्रस्य, सामान्यतोनक्षत्रादिव्यावर्तकव्यावृत्तिरूपधर्मस्यच, घटादौ प्रागेवज्ञातत्वाद्विशिष्टविषयेएवप्रश्नोत्तरे । तत्रयदिप्रष्टुर्व्यावृत्तिवैशिष्ट्यमेवसा क्षाद्बुभुत्सितंतदा वक्ताव्यावृत्तेरस्मादस्माचव्यावृत्तइति साक्षाज्जन्मशतेनापिदुर्बो धत्वात्धूमेउक्तेऽग्निमिवव्यावर्तकेउक्तेव्यावृत्तिंज्ञास्यतीतिभावेनव्यावर्तकवैशिष्ट्य मेवतात्पर्यतःप्रतिपादयति । नह्यग्निबोधनार्थस्यधूमोस्तीतिवाक्यस्यनधूमेतात्पर्यं

व्यावृत्तिविशिष्टंवाचंद्रस्वरूपंकिमितिविशिष्टविषयएवप्रश्नः तथाचोत्तरमपिविशिष्टविषयमेवेत्यर्थः । ननुयदाव्यावृत्तिविशिष्ट विषयकःप्रश्नस्तदाप्रकृष्टत्वादिरूपव्यावर्तकधर्मकथनमसंगतमितिमंदाशंकायामाह ॥ तत्रेति ॥ साक्षादिति ॥ व्यावर्तकध र्मवैशिष्ट्यकथनंविनेत्यर्थः । व्यावृत्तेर्दुर्बोधत्वात्बोधयितुमशक्यत्वादित्यन्वयः । ननुतर्हिव्यावर्तकधर्मोक्तौव्यावृत्तिःकथंसु बोधेत्यतआह ॥ धूमेइति ॥ ननुव्यावर्तकधर्मकथनपरस्यप्रकृष्टादिवाक्यस्यव्यावृत्तिबोधनएवतात्पर्यान्नव्यावर्तकधर्मेतात्पर्य

SGDF
Sri Gargeshwari Digital Foundation

मित्यतआह ॥ नहीति ॥ यागाक्षेपकस्येति ॥ "यदाग्नेयोऽष्टाकपाल" इत्यत्रद्रव्यदेवतास्वरूपाभिधानेनयागआक्षिप्यते एवंचयागबुबोधयिषयोच्चरितस्यापिवाक्यस्यद्रव्यदेवतासंबंधेपितात्पर्यमस्त्येवतद्वदित्यर्थः । अशक्या व्यावृत्तिः ॥ सुतरामिति ॥ व्यावर्तकवैशिष्ट्यस्यसाक्षात्पृष्टत्वादित्यर्थः । इतोपिनस्वरूपमात्रप्रश्नइत्याह ॥ असाधारणेति ॥ किंलक्षणकइति ॥ किंलक्षणकश्चंद्रइत्यसाधारणधर्मविषयकप्रश्नस्ययादृशंउत्तरंतादृशोत्तरस्यात्रापिसत्त्वादित्यादिद्रष्टव्यं "कतरकतमौजातिपरिप्र

नवायागाक्षेपकस्य "यदाग्नेयादि" वाक्यस्यनद्रव्यदेवतासंबंधे । यदितुप्रष्टुैर्वव्यावृत्तिःप्रतियोगिनामानंत्येनसाक्षात्प्रष्टुंवक्तुंचाशक्येतिज्ञात्वाकश्चंद्रइत्यनयावाचोभंग्याकैर्विशेषणैर्विशिष्टइति पृष्टं तदासुतरांप्रश्नोत्तरेव्यावर्तकवैशिष्ट्यपरेइतिनकाप्यखंडार्थत्वं । असाधारणधर्मरूपलक्षणप्रश्नोह्ययं किंलक्षणकश्चंद्रइतिअसाधारणधर्मविषयकस्यकतमश्चंद्रइतिजातिविषयस्यअनयोः कतरश्चंद्रइतिगुणक्रियाजातिभिःपृथक्करणरूपनिर्धारणविषयस्यचप्रश्नस्योत्तरइवात्रापिप्रतिवचनेलक्षणोक्तेः प्रश्नेपिप्रकृष्टोवाप्रकाशोवेत्यादिधर्मविषयविकल्पसूचककिंशब्दप्रयोगाच्च । एतेन ।

श्ने" "द्वयोरेकस्यडतरच्" इतिसूत्रद्वयंमनसिनिधायाह ॥ कतमइत्यादि ॥ जातिविषयस्य प्रश्नोत्तरइवेतिसंबंधः तथाचकश्चंद्रइतिप्रश्नोऽसाधारणधर्मविषयोभवितुमर्हति तादृशप्रश्नोत्तरसमानोत्तरवत्त्वात् किंलक्षणकश्चंद्रइतिप्रश्नोत्तरवदित्यनुमानंद्र ॥ ४४१ ॥
ष्टव्यं । नन्वसाधारणधर्मसूचकपदवत्त्वमुपाधिरित्यतआह ॥ प्रश्नेपीति ॥ प्रकृष्टोवा प्रकाशरूपोवा प्रकृष्टप्रकाशरूपोवेति ध

र्मविषयविकल्पसूचककिंशब्दप्रयोगादित्यर्थः । तथाचसाधनव्यापकत्वान्नायमुपाधिरितिभावः ॥ धर्मवाचीति ॥ यदिकश्चंद्रइत्ययंधर्मविषयकःप्रश्नःस्यात्तर्हिप्रश्नवाक्येकश्चंद्रधर्मइतिधर्मवाचिपदंश्रूयेत तन्नास्तीत्यतोनायंधर्मविषयःप्रश्नः किंतुस्वरूपमात्रविषयएवेत्येतदप्येतेनैवनिरस्तं । किंशब्दस्यैवधर्मबुभुत्सासूचकत्वादित्यर्थः । प्रत्युतप्रश्नेसाक्षाद्धर्मपदसत्त्वेऽनिष्टमापद्यतइत्याह ॥ तथात्वइति ॥ चंद्रधर्मस्यसामान्यतोऽज्ञानेकश्चंद्रधर्मइतिजिज्ञासाद्ययोगात् । कश्चंद्रधर्मइतिप्रश्नस्यचंद्रधर्मेव्यावृत्तिवैशिष्ट्यंवाव्यावर्तकवैशिष्ट्यंवाविषयः उत्तरवाक्येचचंद्रधर्मस्यैवव्यावृत्तिर्व्यावर्तकंवावाच्यं पृष्टप्रतिवचनस्यैववक्राऽपेक्षितप्रश्नेधर्मवाचिपदंनेतिनिरस्तं। तथात्वे चंद्रधर्मस्यैवलक्षणीयत्वापत्त्यातस्यानपेक्षितत्वात् चंद्रप्रातिपदिकार्थस्यसामान्यतोज्ञातत्वेनतद्बुभुत्सायोगात् । लक्षणयावाप्रश्नस्यचंद्रपदस्यैवचंद्रासाधारणधर्मपरत्वस्यकल्प्यत्वाच्च । यद्वा लक्षणवाक्यंअनुमानत्वेनाप्तवाक्यत्वेनवाचंद्रव्यवहारकर्तव्यतावैशिष्ट्यपरमस्तुत्वात् नतुचंद्रव्यावर्तकंप्रकृष्टप्रकाशादिकं अनपेक्षितत्वादित्यर्थः । असाधारणधर्मरूपलक्षणप्रश्नोह्ययमित्यत्रहेत्वंतरमाह ॥ चंद्रेति ॥ अतःकश्चंद्रद्रइत्ययमसाधारणधर्मएवेतिभावः । प्रश्नेअसाधारणधर्मवाचिपदंनेत्यत्रपरिहारांतरमाह॥ चंद्रेति ॥ अतश्चंद्रव्यरूपमात्रेप्रश्नायोगेनधर्मवाचिपदाभावेपितद्विषयकत्वंप्रश्नस्यकल्पनीयमितिभावः । ननुकथमसाधारणधर्मरूपलक्षणप्रश्नोयं तत्सूचकपदाभावादित्यतआह ॥ लक्षणयावेति ॥ ननुप्रश्नप्रतिवचनवैयधिकरण्यान्यथानुपपत्त्याचंद्रस्वरूपज्ञापनमे

SCDF

वैतदित्यतआह ॥ चंद्रेति ॥ तथाचनस्वरूपमात्रेप्रश्नइतिभावः । ननुप्रकृष्टत्वादिविशिष्टेचंद्रव्यवहारःकर्तव्यइत्येतदयुक्तं चंद्रव्यवहारोनाम चंद्ररूपार्थविशिष्टोव्यवहारः तत्रपृच्छामः चंद्ररूपोर्थोज्ञातोनवेति । आद्येवाक्यवैयर्थ्यं द्वितीयेतुचंद्ररूपार्थस्यैवाज्ञानेविशेषणज्ञानाभावात्तद्विशिष्टव्यवहारस्यकर्तव्यताबोधनमपिकर्तुंनशक्यतेऽतःकथमेतदित्यतआह ॥ चंद्रव्यवहारशब्देनचेति ॥ तथाचप्रकृष्टादिविशिष्टस्वरूपेचंद्रशब्दोव्यवहर्तव्यइत्यर्थः । नन्वेतावताचंद्रशब्दव्यवहारस्यकर्तव्यतालक्षण

[1] चंद्रस्वरूपस्यप्रत्यक्षेणैवज्ञातत्वात्। चंद्रव्यवहारशब्देनचचंद्रशब्दविशेषितोव्यवहारोविवक्ष्यते। न तुचंद्ररूपार्थविशेषितः येनतज्ज्ञानेवाक्यवैयर्थ्यंतदज्ञानेतुतस्यकर्तव्यताबोधनमशक्यमितिशंक्येत। नचैवंवृद्धव्यवहारादेवव्युत्पत्तिसंभवात्लक्षणवाक्यंव्यर्थं। शृंगग्राहिकयोपदेशवदस्यापिव्युत्पत्तावुपायांतरत्वात्। एतेन मानांतरासिद्धंवैशिष्ट्यमखंडचंद्रसिद्धावुपायमात्रमितिकल्पतरूक्तंनिरस्तं।

वाक्येनज्ञाप्यतइत्युक्त्याव्युत्पत्त्यर्थंलक्षणवाक्यमित्युक्तंस्यात् ओमितिचेत् वृद्धव्यवहारादेवव्युत्पत्त्युपपत्तौलक्षणवाक्यस्यवैयर्थ्यादित्याशंक्यनिषेधति ॥ नचैवमिति ॥ अस्यापि लक्षणवाक्यस्यापि । आप्तवाक्यत्वेनबोधकत्वस्योक्तत्वादित्यर्थः ॥ उपायांतरत्वादिति ॥ "शक्तिग्रहंव्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च । वाक्यस्यशेषाद्विवृतेर्वदंतिसांनिध्यतःसिद्धपदस्यवृद्धा" इतिवचनादितिभावः ॥ मानांतरेति ॥ ज्योतिर्मंडलदर्शनेनतत्रत्यचंद्रतद्गतप्रकाशयोर्योग्यतयाप्रश्नसमयेप्रत्यक्षे

1. विजयीन्द्रतीर्थीये एतत्वाक्यो अस्त्येव ॥

SGDF Sri Gargeshwari Digital Foundation

णतदुभयवैशिष्ट्यस्यसिद्धत्वेनापूर्वताया अभावान्नतद्वैशिष्ट्यंलक्षणवाक्येनबोध्यते किंनाम चंद्रसिद्धौचंद्रस्वरूपज्ञानेद्वारतया द्वारत्वेनोपायमात्रेतस्मिंस्तात्पर्यंनास्तीत्येतदप्यनेनैवनिरस्तं । सामान्यतःसिद्धत्वेपिविशेषतोव्यावर्तकस्यवाव्यावृत्तेर्वाव्यवहार कर्तव्यतायावावैशिष्ट्यस्यप्रत्यक्षेणासिद्धत्वेनशब्देनैवबोध्यतयालक्षणवाक्यस्यतत्रतात्पर्यसद्भावस्योपपादितत्वादित्यर्थः । दूष णांतरंचाह ॥ मानांतरेणेति ॥ चंद्रप्रातिपदिकार्थत्वरूपप्रकाशवैशिष्ट्ययोःसामानाधिकरण्यग्रहेप्रत्यक्षस्यासामर्थ्यादित्यर्थः ॥

मानांतरेणचंद्रप्रातिपदिकार्थःप्रकृष्टत्वादिविशिष्टइत्यज्ञानात् अस्मिन्ज्योतिर्मंडलेकश्चं द्रइतिपृच्छताचंद्रस्वरूपस्यप्रत्यक्षेणसुतरांज्ञातत्वाच्च । तस्मात्साध्यवैकल्यंदुष्परिहरमि त्याद्यानुमानमयुक्तं । तथा द्वितीयमपि अप्रसिद्धविशेषणत्वबाधसत्प्रतिपक्षत्वदृष्टां तसाध्यवैकल्यादिदोषात् प्रकृष्टादिवाक्ये उक्तरीत्यासत्यादिवाक्येपिबुभुत्साद्यनुपप त्त्याब्रह्मस्वरूपमात्रप्रश्नोत्तरत्वस्यासिद्धेश्च । इहचकश्चंद्रइतिवत्क्लृप्तस्यप्रश्नस्याभावात्

सुतरामिति ॥ तथाचोपायात्पूर्वमेवोपेयचंद्रस्वरूपस्यसिद्धत्वान्नोपायोपेयभावइतिभावः । आद्यानुमानं सत्यादिवाक्यस्याखं डार्थत्वसाधकंलक्षणवाक्यत्वानुमानमित्यर्थः ॥ **द्वितीयमिति** ॥ तत्प्रश्नोत्तरत्वादितिद्वितीयानुमानमपीत्यर्थः । असिद्धिंचाह ॥ **प्रकृष्टादीति** ॥ प्रकृष्टादिवाक्येउक्ता या रीतिस्तयेत्यर्थः ॥ **बुभुत्सेति** ॥ धर्मिज्ञानसाध्येतिशेषः । ननुकिंब्रह्मेतिस्वरूप मात्रस्यपृष्टत्वात्तन्मात्रप्रश्नोत्तरत्वंनासिद्धमितिचेत्तत्राह ॥ **इहचेति** ॥ सत्यादिवाक्यइत्यर्थः ॥ **क्लृप्तस्येति** ॥ लोकेयथाकश्चं

S.M.S.A. SABHA LIBRARY BANGALORE NO. DATE
SGDF Sri Gargeshwari Digital Foundation

द्र इतिक्रियमाणःप्रश्नःक्लृप्तोस्ति तथात्रोपनिषदिक्लृप्तःश्रूयमाणःप्रश्नोनास्तीत्यर्थः । क्लृप्तस्याभावेपिस्वरूपमात्रविषयःप्रश्नःकल्प्यत इतिचेत्तत्राह ॥ कल्प्यस्यचेति ॥ स्वरूपमात्रविषयप्रश्नंपरिकल्प्यतदुत्तरभूतसत्यादिवाक्यस्यापिप्रश्नोत्तरवैयधिकरण्यान्यथा नुपपत्त्यास्वरूपमात्रेतात्पर्यंप्रकल्प्यसत्यत्वादावतात्पर्यंकुतःकल्पनीयं सत्यादिधर्मप्रतिपादकक्लृप्तोत्तरानुसारेणमोक्षसाधनज्ञान विषयंब्रह्मकिंविशेषणविशिष्टमितिधर्मविषयएवप्रश्नःकल्प्यतामित्यर्थः । किंचतत्पदार्थशोधकसत्यादिवाक्यवत्त्वंपदार्थशोधक

कल्प्यस्यचक्लृप्तोत्तरानुसारेणधर्मविषयकस्यैवकल्प्यत्वाच्च । कतमआत्मे त्यत्रकतरःसआत्मेत्यत्रचत्वंपदार्थप्रश्ने “वाबहूनांजातिपरिप्रश्नेडतमच्, द्वयोरेकस्यनिर्धारणेडतरच्” इतिसूत्राभ्यांजात्याद्यर्थकतमादिशब्दप्रयोगे णतत्प्रतिवचनेयोयंविज्ञानमयइत्यादौपक्षत्वेनत्वदभिमतेहेतोरसिद्धेश्च ।

स्य “योयंविज्ञानमय” इत्यादिवाक्यस्यापिअखंडार्थत्वसाधनंत्वदभिप्रेतं तत्रतन्मात्रप्रश्नोत्तरत्वहेतोरसिद्धिः सत्यादिवाक्येक्लृ प्तप्रश्नाभावेनस्वरूपमात्रविषयकप्रश्नकल्पनेनकथंचिद्भागेऽसिद्ध्यभावेपि “योयंविज्ञानमय” इत्यादिवाक्यमूलभूतःप्रश्नोधर्मवि षयएवक्लृप्तोस्तीतिनत्वंपदार्थस्वरूपमात्रप्रश्नोत्तरत्वं “विज्ञानमय” इत्यादिवाक्यस्यातोभागासिद्धिरित्याह ॥ कतमआत्मेत्य ॥ ४४३ ॥ त्रेत्यादिना ॥ बहूनामिति ॥ बहूनांजातिपरिप्रश्नेडतमच्प्रत्ययोवाविकल्पेनभवतीत्यर्थः । तत्प्रश्नोत्तरत्वंसखंडार्थत्वेनैवव्या

प्तमितिविरुद्धंचेत्याह ॥ किंचेति ॥ ननुनिर्धारितैकप्रकारकत्वाभावेपितत्प्रश्नोत्तरत्वसंभवान्नविरुद्धमित्यतआह ॥ यदिचेति ॥ अन्यथा प्रश्नादधिकविषयकत्वाभावेपितत्प्रश्नोत्तरत्वेअनैकांत्यंचाह ॥ किंकरोतीति ॥ कर्मप्रश्नोत्तरेआनेयप्रश्नोत्तरेइत्येवमा दिषुप्रश्नोत्तरेष्वित्यर्थः । ननुतत्रापिकर्मानयनस्वरूपमात्रविषयत्वसद्भावेनाखंडार्थत्वसद्भावान्नव्यभिचारइत्यतआह ॥ नहीति ॥

किंच सर्वस्याप्युत्तरस्यप्रष्टृनिर्धारितप्रश्नधर्मिनिष्ठनिर्धारितैकप्रकारपरत्वाद्विरुद्धोहेतुः । यदिचोत्त रजन्यंज्ञानंनिष्प्रकारकंस्यात् तेनसप्रकारकसंदेहनिवृत्तिर्नस्यात् यदिचोत्तरंप्रश्नादधिकविषयंनस्या त्तर्ह्युत्तरमेवनस्यात् । अन्यथा प्रश्नएवोत्तरंस्यात् किंकरोतिकिमानेयंइत्यादिप्रश्नोत्तरेषु अध्ययनं करोति गामानयेत्यादिषुव्यभिचाराच्च । नहितान्यप्यध्ययनत्वगोत्वादित्यागेनलक्षणयाकर्मादिमा त्रपराणि । एतेन सत्यादिवाक्यार्थः ब्रह्मप्रातिपदिकार्थमात्रंतन्मात्रप्रश्नोत्तरवाक्यार्थत्वादिति न्यायदीपावल्युक्तंव्यतिरेक्यनुमानंनिरस्तं । किंचैकप्रातिपदिकार्थप्रश्नोत्तरत्वेनकथमखंडार्थत्वं ।

एतेनेति ॥ असिद्ध्यादिदोषेणेत्यर्थः । सत्यादिवाक्यपक्षकानुमानंविहायतदर्थपक्षकानुमानंकरोति ॥ सत्यादिवाक्यार्थइति ॥ ब्रह्मप्रातिपदिकार्थमात्रस्यसाध्यस्यदृष्टांतालाभादाह ॥ व्यतिरेकीति ॥ घटादिर्व्यतिरेकदृष्टांतइत्यर्थः ॥ एकेति ॥ स्वरूपा ख्यैकप्रातिपदिकार्थमात्रप्रश्नोत्तरत्वेनाखंडार्थत्वंनसिद्ध्यति । स्वरूपातिरिक्तानामपिप्रातिपदिकार्थानांबहूनांसत्त्वेनप्रातिपदिका

SGDF ... Digital Foundation

र्थस्यैवविशिष्टत्वादित्यर्थः । तदेवदर्शयति ॥ स्वार्थइति ॥ स्वार्थोविशेषणंगोत्वादि । द्रव्यंगवादि । लिंगंपुंस्त्वादि । संख्या एकत्वादिरूपा । कर्मादयःकर्मादिषट्कारकाणि । नाम्नोगवादिनाम्नोगवादिप्रातिपदिकस्येतियावत् ॥ आद्यमिति ॥ तन्मते संख्याकारकयोःस्वादिप्रत्ययार्थत्वेनप्रातिपदिकार्थत्वानंगीकारादितिभावः । मते प्रातिपदिकार्थस्यैवविशिष्टत्वादित्यन्वयः ॥ अन्वितेति ॥ इतरान्वितस्वार्थएवपदानांशक्त्यंगीकारेणप्रातिपदिकार्थस्ययोग्येतरान्वितत्वेनविशिष्टत्वादित्यर्थः ॥ अभिहि

"स्वार्थोद्रव्यंतथालिंगंसंख्याकर्मादयोपिच । नामार्थपंचकंप्राहुराद्यंत्रिकमथापर" इतिवैयाकरणमते त्वदेकदेशिभिःमयाप्राभाकरैश्चस्वीकृतान्विताभिधानमते अभिहितान्वयपक्षेपि जातिविशिष्टायांव्यक्तौशक्तिरितितार्किकमतेच प्रातिपदिकार्थस्यैवविशिष्टत्वात् । जातावेवशक्तिर्व्यक्तिस्तुलक्ष्येतिभाट्टानांतवचमते ब्रह्मप्रातिपदिकस्यैवयौगिकत्वेनतदर्थस्यविशिष्टत्वात् ।

तेति ॥ अन्विताभिधानमनंगीकृत्यपदैरभिहिताःपदार्थाएवान्वयंबोधयन्तीतिपक्षेपितार्किकमतेजातिविशिष्टायांव्यक्तावेवशक्तिरित्यंगीकारेणजातिविशिष्टार्थानामेवपदैरभिहितत्वात्प्रातिपदिकार्थस्यविशिष्टत्वमित्यर्थः ॥ लक्ष्येति ॥ गामानयेत्युक्तेकेवलगोत्वस्यानयनासंभवेनतदाश्रयभूताव्यक्तिर्लक्ष्यतइत्यर्थः ॥ तवचमतइति ॥ तथाचजातिमात्रस्यैवप्रातिपदिकार्थत्वेनप्रातिपदिकार्थस्ययद्यपिविशिष्टत्वंनास्तीत्यर्थः । तथापिप्रकारांतरेणप्रकृतब्रह्मप्रातिपदिकार्थस्यविशिष्टत्वमेवेत्याह ॥ ब्रह्मेति ॥ ननु

SGDF Sri Gargeshwari Digital Foundation

प्रातिपदिकार्थस्यविशिष्टत्वेपिउत्तरमितरांशंविहायप्रातिपदिकार्थस्थविशेष्यांशमात्रपरमितिचेत्तत्राह ॥ नचेति ॥ प्रातिपदिकार्थेविशिष्टइत्यर्थः । अन्यथाप्रश्नोत्तरयोर्वैयधिकरण्यंस्यादितिभावः । नन्वखंडार्थत्वानंगीकारेबाधकसद्भावान्नाप्रयोजकत्वमित्यतआह ॥ विपक्षइति ॥ ब्रह्मेति ॥ अधिकप्रकाराद्युक्तौचप्रश्नोत्तरयोर्वैयधिकरण्यंस्यादितिभावः ॥ अभेदेति ॥ सखंडार्थत्वेभिन्नप्रकारांगीकारप्राप्त्याऽभेदविधायकवाक्यविरोधापत्तेरखंडार्थत्वमंगीकार्यमित्यर्थः ॥ भेदनिषेधकेति ॥ उदरंब्रह्मभि

नचप्रातिपदिकार्थेपृष्टेतदेकदेशोक्तिर्युक्ता । किंचाप्रयोजकाहेतवः तथाहि विपक्षेबाधकं किंब्रह्मस्वरूपमात्रस्यैवबुभुत्सितत्वं "एकधैवानुद्रष्टव्य" मित्याद्यभेदविधायकवाक्यंवा "उदरमंतरं कुरुत" इतिभेदनिषेधकवाक्यंवा "केवलोनिर्गुणश्चे" त्यादिगुणनिषेधकवाक्यंवा "एकमेवाद्वितीय" मित्यादिद्वितीयमात्रनिषेधकवाक्यंवा सर्वतोनवच्छिन्नवस्तुपरानंतब्रह्मशब्दोवा ।

न्नंकुरुतेभिन्नप्रकारयुक्ततयाजानातीतियावत् । अथतस्यभयंभवतीतिनिंदयाभेदनिषेधावगमात्सखंडार्थत्वेतद्विरोधादित्यर्थः । गुणवत्त्वरूपसखंडार्थत्वांगीकारेकेवलोनिर्गुणश्चेत्यादिवाक्यंबाधकं सद्वितीयत्वरूपसखंडार्थत्वांगीकारेब्रह्मव्यतिरिक्तद्वितीयमात्रनिषेधकंवाक्यमेवबाधकमित्यर्थः ॥ सर्वतोऽनवच्छिन्नेति ॥ सर्वस्माद्व्यावृत्तेत्यर्थः । वस्त्वानंत्यपरस्यअनंतशब्दस्यसर्वाभेदार्थत्वात् । ब्रह्मशब्दस्यापिदेशतःकालतोवृद्ध्यर्थकत्वेनवस्तुतोवृद्धेःपूर्णत्वस्यवस्त्वभेदरूपत्वातसखंडार्थत्वांगीकारेगुणादिभेद

SGDF
Sri Gargeshwari Digital Foundation

प्राह्यासर्वतोऽव्यावृत्तवस्तुपरानंतब्रह्मशब्दविरोधःस्यादतोऽखंडार्थत्वमितिवाविपक्षेबाधकमित्यर्थः ॥ निरस्तत्वादिति ॥ सिद्धत्वात्स्वरूपस्यनतन्मात्रेबुभुत्सेत्यर्थः । किंचास्तुवातुष्यत्वितिन्यायेनस्वरूपमात्रेबुभुत्सा तथापिविशेषणांशेपिबुभुत्सायाः स्वारसिक्याअसंभवेपिसत्यज्ञानादिविशेषणानांसत्यादिवाक्येविद्यमानत्वेनतत्सार्थक्यायकीदृशंब्रह्मेत्याकांक्षोत्थापनीया । यथा हि "वायव्यंश्वेतमालभेत वायुर्वैक्षेपिष्ठादेवते" तिस्तुतिसहितविधिवाक्येषुवायुदेवताकपश्वालंभनंकार्यमितिविधानेनाकांक्षानिवृत्तौसत्यामपिक्षेपिष्ठत्वादीनामुत्तरवाक्येवायुदेवताविशेषणानांसत्त्वेनतदर्थंकीदृशीवायुदेवतायद्देवताकोयागःकार्यइत्याकांक्षामु

नाद्यः निरस्तत्वात् सत्यादिवाक्येसत्सुविशेषणेषुसत्स्तुतिकविधिवाक्येप्राशस्त्यइवरक्तपटन्या येनाकांक्षायाउत्थापनीयत्वाच । उक्तंहि "आकांक्षणीयाभावनिमित्तोह्याकांक्षाभाव" इति ।

त्थाप्यार्थवादिवाक्योक्तविशेषणेनप्राशस्त्यंप्रतिपाद्यते । यथाहिरक्तःपटोभवतीत्यत्रपटोभवतीत्येतावतैवपूर्णत्वेपिकीदृशःपटोभवतीत्याकांक्षामुत्थाप्यरक्तपदंसार्थकंक्रियतेतद्वदित्येवंसत्स्तुतिकविधिवाक्यइवप्रकृतेपिसंभवादित्याह ॥ सत्यादीति ॥ सत्यादिवाक्येविद्यमानेषुविशेषणेषुआकांक्षायाउत्थापनीयत्वादित्यन्वयः । तत्रदृष्टांतोरक्तपटन्यायेनसत्स्तुतिकविधिवाक्यइवेति ॥ आकांक्षणीयेति ॥ आकांक्षायाअभावोह्याकांक्षणीयपदाभावनिमित्तकएव तत्सद्भावात्पुनरप्याकांक्षोत्थापनीयैवेतिनाकांक्षाभावइत्यर्थः । अंगीकृत्येदमुक्तं वस्तुतस्तुमुमुक्षोःप्रकारएवबुभुत्सोचिता नस्वरूपमात्रे कुतः पूर्वोत्तरवाक्येषुसप्रकारकज्ञानस्यै

वमोक्षहेतुत्वप्रतिपादनात् प्रकारबुभुत्सायाअभावेउत्तरत्रतदुक्त्ययोगादित्याह ॥ सप्रकारकेति ॥ ब्रह्मज्ञानंपरप्राप्तिहेतुरित्युक्तसप्रकारकस्यैवब्रह्मज्ञानस्यमोक्षहेतुत्वंप्रतीयतइत्यर्थः । ब्रह्मविदाप्नोतीत्युक्तेसप्रकारकब्रह्मज्ञानस्यैवमोक्षहेतुत्वंकथंप्रतीयते मयोच्यतेनिष्प्रकारकस्यैवब्रह्मज्ञानस्यमोक्षहेतुत्वंप्रतीयतइति तत्रोक्तं ॥ निष्प्रकारकेति ॥ वेदांतजन्यज्ञानस्यनिष्प्रकारकतायाअद्याप्यसिद्धत्वादित्यर्थः ॥ एवमिति ॥ सहस्रशीर्षत्वादिनापूर्वोक्तप्रकारेणेत्यर्थः ॥ योवेदेति ॥ गुहानिहितत्वप्रकार

निष्प्रकारकज्ञानस्याद्याप्यसिद्ध्यासप्रकारकज्ञानस्यैवमोक्षहेतुताया "ब्रह्मविदाप्नोतिपर" मित्यनेन प्रतीत्या "तमेवंविद्वानमृतइहभवती" त्यादिश्रुत्या "योवेदनिहितंगुहाया" मित्युत्तरवाक्येनचोक्त्याचमुमुक्षोःप्रकारएवधर्मिज्ञानसाध्यबुभुत्सौचित्याच । निर्गुणवाक्यवत्सगुणवाक्यस्यापिब्रह्मबुभुत्सायां कर्मकांडस्यचकर्मबुभुत्सायां वैद्यादिशास्त्रस्याप्यौषधादिबुभुत्सायां प्रवृत्ततयालक्षणया सगुणवाक्यमप्यखंडब्रह्मपरं कर्मकांडमप्यखंडकर्मपरं वैद्यादिशास्त्रमप्यखंडौषधादिपरमित्यापाताच ।

कज्ञानवतः "सोऽश्नुतेसर्वानि" तिमोक्षोक्तेरित्यर्थः ॥ धर्मिज्ञानेति ॥ अनेनस्वरूपमात्रेबुभुत्सानास्ती(तिसूचितंभ)त्युक्तंभवति । ब्रह्मस्वरूपबुभुत्सायामेवप्रवृत्तत्वादखंडस्वरूपमात्रपरमित्यंगीकारेऽतिप्रसंगमाह ॥ निर्गुणेति ॥ सगुणवाक्यस्यब्रह्मबुभुत्सायांप्रवृत्तत्वेदृष्टांतोनिर्गुणवाक्यवदिति । कर्मकांडस्य कर्मलक्षणकथनपरस्य । वैद्यादिशास्त्रस्य औषधादिलक्षणकथनपरस्य ॥ आपातादिति ॥ अन्यथाप्रश्नोत्तरयोर्वैयधिकरण्यंस्यादितिभावः । ननुकर्मकांडादेःसर्वस्यापिसमस्तवेदांतवन्नाखंड

SGDF
Foundation

कर्मादिस्वरूपमात्रपरत्वं सर्वस्यापिकर्मादिलक्षणाऽप्रतिपादकत्वात् यथेष्टवाक्यानांकर्मादिलक्षणाप्रतिपादनपराणामपिसत्त्वेनते षामखंडकर्मादिस्वरूपपरत्वाभावादितिचेत्तत्राह ॥ अस्तिचेति ॥ धर्मइवेति ॥ चोदनालक्षणेकर्मणीत्यर्थः ॥ अलक्षणरूप मिति ॥ सयथाशकुनिरित्यादिकमित्यर्थः । तथाचसमस्तवेदांतानामखंडार्थत्वहानिरितिभावः ॥ नमध्यमाइति ॥ आद्यंत पक्षव्यतिरिक्ताइत्यर्थः । एकधैवेत्यादीनामभेदविधायकानांभेदनिषेधकानांगुणनिषेधकानांद्वितीयमात्रप्रतिषेधकानांचवाक्या नांअभेदभेदाभावनिर्गुणत्वद्वितीयमात्राभावविशिष्टपरत्वंवाविवक्षितं लक्षणयाऽखंडचिन्मात्रपरत्वंवा नाद्यइत्याह ॥ तेषांचे

अस्तिचधर्मइवब्रह्मण्यप्यलक्षणरूपंवाक्यं ।नमध्यमाः तेषांचैक्यभेदाभावादिविशिष्टार्थपरत्वे वेदांतमात्रस्याखंडार्थत्वासिद्धेः । सत्यशुद्धान्यमिथ्याविशिष्टार्थपरत्वेप्रामाण्यायोगाच्च । ते षामेवलक्षणयाऽखंडार्थतासत्यादिवाक्यस्यतुसत्यत्वादिविशिष्टार्थपरतेतिवैपरीत्यापाताच्च ।

ति ॥ प्रामाण्येति ॥ अतत्वावेदकत्वेनाप्रामाण्यंस्यादितिभावः । भेदाभावादिविशिष्टार्थपरत्वेदूषणांतरमाह ॥ तेषामिति ॥ यथाऽभेदविधायकादिविशिष्टपरवाक्यविरोधेनसत्यादिवाक्यानांयथालक्षणयाखंडार्थपरत्वमुच्यते एवंसत्यत्वादिविशिष्टब्रह्मप्र तिपादनपराणांसत्यादिवाक्यानामेवस्वार्थेतात्पर्यमंगीकृत्यैतद्विरुद्धत्वादेकधैवेत्यादीनामेवलक्षणयाऽखंडार्थत्वमस्तु नैक्यभेदा भावादिविशिष्टपरत्वमितिवैपरीत्यापाताच्चेत्यर्थः । ननुसत्यादिवाक्यस्यमुमुक्षुज्ञेयशुद्धपरत्वाल्लक्षणयाखंडार्थपरत्वं मुमुक्ष्वज्ञेया

SGDF
Sri Gargeshwari Digital Foundation

शुद्धब्रह्मपरत्वेनएकधेत्यादीनामैक्यभेदाभावादिविशिष्टप्रतिपादनपराणांनाखंडार्थत्वमितिनवैपरीत्यमितिचेत्तत्राह ॥ उभयो रिति ॥ उपनिषद्गतत्वेनेतिशेषः । ननूभयोर्मुमुक्षुज्ञेयब्रह्मपरत्वाविशेषेपिअभेदभेदाभावनिर्गुणत्वद्वितीयाभावादिविशिष्टत्वेनै वब्रह्ममुमुक्षुणाज्ञातव्यं अभावरूपधर्माणामखंडार्थत्वाविरोधित्वात् "अभावरूपधर्मानाद्वैतंघ्नंती" तिमंडनमिश्रवचनात् नतु भावरूपधर्मवत्त्वेन तस्याखंडार्थत्वविरोधित्वात् अतोभावरूपधर्मप्रतिपादनपराणांसत्यादिवाक्यानामेवस्वार्थेतात्पर्याभावमंगी कृत्यलक्षणयाचिन्मात्रपरत्वमेववाच्यमितिनवैपरीत्यमित्याशंक्याह ॥ नचेति ॥ ब्रह्मणोऽखंडत्वस्यविवादापन्नत्वदशायामि

उभयोरपिमुमुक्षुज्ञेयब्रह्मपरत्वाविशेषात् । नचास्यांदशायांब्रह्मण्यभावरूपएवधर्मोमुमुक्षुणाज्ञेयो नतुभावरूपइतिसिद्धं।तेषांलक्षणयाऽखंडार्थत्वेतु नतद्विरोधेनविशिष्टार्थस्यसत्यादिवाक्यस्यमुख्या र्थत्यागः विशेष्यपरस्यविशिष्टपरेणाविरोधात् । ननुऐक्यादेर्द्वारत्वेनोपादानाद्विरोधइतिचेन्न

त्यर्थः । अभेदादिप्रतिपादनपराणांएकधैवेत्यादीनांलक्षणयाचिन्मात्रपरत्वमितिद्वितीयपक्षमाशंक्यनिराकरोति ॥ तेषामिति॥ तद्विरोधेनेति ॥ विशेष्यमात्रपरैकधैवेत्यादिवाक्यविरोधेनेत्यर्थः । कुतोनमुख्यार्थत्यागइत्यतआह ॥ विशेष्येति ॥ नहिदे वदत्तो दंडीदेवदत्तइत्यनयोर्वाक्ययोर्विरोधोस्तीतिभावः । नन्वेकधैवेत्यादेर्विशेष्यमात्रपरत्वेपिअभेदभेदाभावादेर्द्वारत्वेनश्रु त्याउपादानेनात्यागात्सत्यादिवाक्यस्यविशिष्टपरत्वेतद्विरोधःस्यादितिशंकते ॥ नन्विति ॥ द्वारभूतस्यैक्यादेःकिंमिथ्यात्वम

SGDF
Sri Gargeshwari Digital Foundation

भिप्रेतंउतसत्यत्वमितिविकल्प्योभयत्रदोषमाह ॥ द्वारीभूतस्येति ॥ ननुद्वारीभूतस्यैक्यादेःसत्यत्वेपिब्रह्माभिन्नत्वान्नापसिद्धां तइत्यतआह ॥ द्वारत्वेति ॥ अभेदेद्वारद्वारिभावानुपपत्तिरितिभावः । एवंतर्ह्यनेनैवन्यायेनसत्यादिवाक्यस्यलक्षणयाचिन्मा त्रपरत्वेपिद्वारत्वेनसत्यत्वादेरुपादानेनात्यागादेतद्विरोधेनस्वार्थेतात्पर्याभावोस्त्वित्याह ॥ अत्रापीति ॥ सत्यादिवाक्येपीत्य र्थः । सर्वतोऽव्यावृत्तवस्तुपरानंतब्रह्मशब्दविरोधान्नसखंडार्थत्वमित्यंत्यपक्षंदूषयति ॥ नांत्यइति ॥ अविरोधित्वादिति ॥

द्वारीभूतस्यब्रह्मान्यस्यऐक्यादेर्मिथ्यात्वेसत्यत्वादिधर्मपारमार्थ्याविरोधित्वात् सत्यत्वेचाप सिद्धांतात् द्वारत्वानुपपत्तेर्वक्ष्यमाणत्वाच । अत्रापिसत्यत्वादेर्द्वारत्वेनोपादानेनतेषामेवैतद्विरो धापाताच । नांत्यः त्वन्मतेऽनंतब्रह्मशब्दयोरपिलक्षणयाविशेष्यमात्रपरत्वेनाविरोधित्वात् "अथकस्मादुच्यतेब्रह्मेतिबृहंतोह्यस्मिन्गुणा" इतिश्रुत्या "महद्गुणत्वाद्यमनंतमाहु" रित्यादिस्मृ त्याच ताभ्यांसद्गुणत्वस्यैवसिद्धेश्च । प्रतिकूलतर्कपराहतिश्च । तथाहि द्विविधमपिवेदांतवा क्यंतदृष्टांतीभूतंप्रकृष्टादिवाक्यंसोयमित्यादिवाक्यंचयदिसंसृष्टार्थनस्यात् वाक्यमेवनस्यात्

ब्रह्मणःसत्यत्वादिवैशिष्ट्यमंगीकृत्यसखंडार्थत्वांगीकारेतद्विरोधोनास्ति तयोरपिलक्षणयाचिन्मात्रपरत्वेनसर्वतोऽव्यावृत्तवस्तुप्र तिपादनतात्पर्याभावादितिभावः । किंचानंतब्रह्मशब्दयोर्नाखंडत्वसाधकत्वमित्याह ॥ अथेति ॥ ताभ्यां अनंतब्रह्मशब्दा भ्यां तथाचविपक्षेबाधकाभावादप्रयोजकत्वंदुर्वारमिति द्विविधं पदार्थनिष्ठंवाक्यार्थनिष्ठंच । तदृष्टांतीभूतं उभयोरपिवाक्य योरखंडार्थत्वेदृष्टांतीभूतमित्यर्थः । कुतइत्यतआह ॥ आकांक्षेति ॥ आकांक्षायोग्यतासंनिधिमतांपदानांसमूहोवाक्यं आ कांक्षादित्रयंचान्वयापरपर्यायसंसर्गगर्भं सत्यादिवाक्यस्यचसंसृष्टार्थत्वाभावेतद्गर्भाकांक्षाद्यभावेनवाक्यत्वमेवनस्यादित्यर्थः । तत्राकांक्षायाःकथमन्वयगर्भत्वमित्यतआह ॥ आकांक्षाहीति ॥ अभिधानं अन्वयबोधनं । नन्वेवंगौरश्वःपुरुषोहस्तीगौःक मैत्वमानयनंकृतिरित्यादावप्यन्वयबोधनस्यापर्यवसानादाकांक्षास्यादित्यतोऽपर्यवसानशब्दार्थमाह ॥ यस्यचेति ॥ स्वार्थेन्व यः । नन्वेवंचेत् "अहोविमलंजलंनद्याःकच्छेमहिषश्चरती" त्यत्रयदानदीपदंकच्छान्वयपरतयाप्रयुज्यतेतदातत्राव्याप्तिः नदी

आकांक्षासंनिधियोग्यतानामभावात् । आकांक्षाह्य भिधानापर्यवसानं । यस्यचयेनविनानस्वार्थान्व यानुभावकत्वंतदेवचतस्यापर्यवसानं । संनिधिस्त्व

पदस्यकच्छपदेनविनापिजलपदेनस्वार्थान्वयानुभावकत्वेननिरुक्तापर्यवसानंनास्तीत्यव्याप्तिःस्यादितिचेन्न । स्वार्थशब्देनोक्तान्व येतात्पर्यविषयीभूतेतिविशेषणदानात् नदीपदस्यजलपदेनस्वार्थान्वयानुभावकत्वेपितस्यतात्पर्यविषयीभूतत्वाभावात् । कच्छ पदेनान्वयस्यैवतात्पर्यविषयीभूतत्वात् । तथाचनदीपदस्यकच्छपदेनविनातात्पर्यविषयीभूतान्वयानुभावकत्वाभावरूपापर्यवसा नसद्भावान्नाव्याप्तिरित्यर्थः । संनिधिरपिअन्वयगर्भेत्याह ॥ संनिधिस्त्विति ॥ प्रहरेप्रहरेउच्चार्यमाणवाक्याज्जायमानान्वयप्र

SGDF ... Foundation

तियोग्युपस्थितेरपिसंनिधित्ववारणायोक्तं ॥ अव्यवधानेनेति ॥ योग्यतापिसंसर्गगर्भेत्याह ॥ योग्यताचेति ॥ अयमत्रसंप्रदायः । इतरपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यंताभावाप्रतियोगित्वंयोग्यता अस्तिचेयंपयसासिंचेदितिवाक्ये इतरपदार्थसंसर्गः सेकक्रियाकरणरूपः तस्मिन्जलरूपापरपदार्थनिष्ठात्यंताभावाप्रतियोगित्वमस्ति जलेसेकक्रियाकरणत्वंनास्तीत्यप्रतीतेः । अग्निनासिंचेदित्यत्रनास्ति अग्नौसेकक्रियाकरणत्वंनास्तीतिप्रतीत्यासेकक्रियाकरणत्वरूपेतरपदार्थसंसर्गस्यअग्निरूपापरपदार्थनिष्ठात्यंताभावप्रतियोगित्वात् । अत्रधूमवन्ह्योःसामान्यव्याप्तिवत्सर्वसेकव्यक्तौसामान्यतःपयसासमंयोग्यताविवक्षिता एवंचाव्याप्तिः

व्यवधानेनन्वयप्रतियोग्युपस्थितिः । योग्यताचइतरपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यंताभावप्रतियोगितावच्छेदकधर्मशून्यत्वं ।

एतत्सेकक्रियाव्यक्तिविशेषसंसर्गेइतरपदार्थरूपकाशीस्थपयोनिष्ठात्यंताभावप्रतियोगित्वस्यैवसत्वात् । काशीस्थजलेएतत्सेकक्रियाकरणत्वंनास्तीतिप्रतीतेरतउक्तं प्रतियोगितावच्छेदकधर्मशून्यत्वमिति । यथाऽयोग्येवाक्येसेकक्रियासंसर्गेऽग्निरूपापरपदार्थनिष्ठोयोत्यंताभावःसेकक्रियासंसर्गात्यंताभावस्तत्प्रतियोगितावच्छेदकोयोधर्मःसंसर्गत्वरूपः अग्नौसेकक्रियासंसर्गोनास्तीतिसामान्यतःसंसर्गात्यंताभावप्रतीतेः तादृशधर्मशून्यत्वंनास्ति योग्येवाक्येतुसेकक्रियासंसर्गेजलरूपापरपदार्थनिष्ठोयोत्यंताभावःसामान्यतःसेकक्रियासंसर्गात्यंताभावोनभवति किंतूदासीनात्यंताभावस्तत्प्रतियोगितावच्छेदकधर्मशून्यत्वमस्ति संसर्गत्वस्यप्रति

SGDF
Sri Gargeshwari Digital Foundation

योगितानवच्छेदकत्वात् । तत्प्रतियोगितावच्छेदकंतदास्यात् यदिजलेसेकक्रियासंसर्गोनास्तीतिसामान्यात्यंताभावप्रतीतिःस्या
त् नचैवमस्त्यतोनाव्याप्तिः । नन्वथाप्यव्याप्तिरेवसेकक्रियाव्यक्तिविशेषसंसर्गेकाशीस्थजलनिष्ठात्यंताभावप्रतियोगितावच्छेद
कोयोधर्मःएतत्सेकक्रियासंसर्गत्वरूपस्तद्वत्त्वमेवास्ति नतुतच्छून्यत्वं काशीस्थजलेएतत्सेकक्रियासंसर्गोनास्तीतिप्रतीतेरितिचेत्
उच्यते अत्रसंसर्गपदंसंसर्गत्वपरं अवच्छेदकधर्मपदेनचअवच्छेदकस्यधर्मःअवच्छेदकत्वंविवक्षितं एवंचइतरपदार्थसंसर्गत्वेअप
रपदार्थनिष्ठात्यंताभावप्रतियोगितावच्छेदकत्वाभावोयोग्यतेत्यर्थःपर्यवसितः। अग्नौसेकक्रियासंसर्गोनास्तीतिप्रतीत्यासामान्यतः
सेकक्रियासंसर्गत्वस्यैवाग्निनिष्ठात्यंताभावप्रतियोगितावच्छेदकत्वात् इहतुसामान्यतोजलेसेकक्रियासंसर्गोनास्तीतिप्रतीत्यभावे

प्रमाणाबाधोयोग्यतेतिचेन्न पदार्थमात्राबाधस्यवाक्याभासेपिसत्वात् ।
संसर्गाबाधस्यचेहाप्यभावात् । तात्पर्यविषयाबाधोयोग्यतेतिचेन्न

नसामान्यतःसेकक्रियासंसर्गत्वस्यजलनिष्ठात्यंताभावप्रतियोगितावच्छेदकत्वाभावात् । अतःसामान्यधर्मस्यैवसामान्यात्यंताभा
वप्रतियोगितावच्छेदक(त्वस्य)त्वाभावस्यविवक्षितत्वान्नविशेषधर्मविशेषात्यंताभावंचादा(यनाव्या)याव्याप्तिर्देयेतिभावः । ननु
योग्यतानान्वयगर्भेत्याशंकते ॥ **प्रमाणेति** ॥ प्रमाणाबाधःकिंपदार्थमात्राणांउतसंसर्गस्यापि । नाद्यइत्याह ॥ **पदार्थेति** ॥
वाक्याभासेपीति ॥ अग्निनासिंचेदित्यत्रापिअग्न्यादिपदार्थानामबाधितत्वादतिव्याप्तिरित्यर्थः ॥ **इहापीति** ॥ सत्यत्वादि
संसर्गस्यत्वयाबाधितत्वांगीकारादित्यर्थः । पुनरपियोग्यता नान्वयगर्भेत्याशंकते ॥ **तात्पर्येति** ॥ अयोग्यस्थलेऽग्निकरणकसे

SGDF
Sri Gargeshwari Digital Foundation

कक्रियासंसर्गएवतात्पर्यविषयःसचबाधितएवेतिभावः । तात्पर्यविषयोपिपदार्थोवावाक्यार्थोवा नाद्यइत्याह ॥ पदार्थेति ॥
संसर्गाबाधस्त्विहनास्तीतिभावः । ननुपदार्थमात्रेपिवाक्यतात्पर्यंयुक्तमित्याशंकते ॥ नन्विति ॥ अन्यैः विशेषणैः ॥ समासे
रिति ॥ योसिद्धस्तद्बोधनेनैववाक्यस्यसमाप्तत्वादित्यर्थः ॥ उक्तरीत्येति ॥ यत्रपदार्थःप्रमितस्तत्रसइतरपदार्थविशिष्टःप्रति

पदार्थमात्रेवाक्यतात्पर्यायोगात्। ननुयत्रपदार्थःप्रमितःतत्रसइतरपदार्थविशिष्टःप्रतिपाद्यः
यत्रत्वज्ञातःतत्रसनान्यैःशक्योविशेष्टुमितितत्रसएवप्रतिपाद्यः । प्रमितेचतस्मिन्वाक्यस
मासैर्नविशिष्टपरत्वमितिचेन्न उक्तरीत्याचंद्रब्रह्मादिप्रातिपदिकार्थानांसामान्यतोज्ञातत्वे
नेतरव्यावृत्त्यर्थंप्रकृष्टत्वसत्यत्वादिनाविशिष्यैवबोध्यत्वात्। वेदांतानांनिर्विषयत्वंचस्यात्।
अखंडवाक्यार्थस्यस्वप्रकाशस्यचिन्मात्रस्याविद्या(द्य)ध्यासाधिष्ठानत्वेनतत्साक्षित्वेनचनि
त्यसिद्धत्वात् । निर्निमित्तंसर्ववेदांतानांमुख्यार्थत्यागश्चस्यात् एकरसत्वादिश्रुतीनामपि

पाद्यइत्युक्तत्वेनप्रश्नधर्मित्वादिनाचंद्रादिप्रातिपदिकार्थस्यापिसामान्यतोजातत्वेनेतरव्यावृत्त्यर्थंप्रकृष्टत्वादीतरपदार्थविशिष्टत्वेनै
वतद्बोधनमावश्यकमित्यर्थः ॥ नित्यसिद्धत्वादिति ॥ अप्राप्तएवशास्त्रस्यार्थवत्त्वात् अज्ञातस्यैवविषयत्वादितिभावः । ननु
ननिर्निमित्तंमुख्यार्थस्त्यज्यतेएकरसत्वादिश्रुतीनामेवसत्यत्वादिवैशिष्ट्यरूपमुख्यार्थत्यागेनिमित्तत्वादितिचेत्तत्राह॥ एकरसत्वे

ति ॥ विशेष्येति ॥ लक्षणयाचिन्मात्रपरत्वेनेत्यर्थः ॥ मुख्यार्थेति ॥ सत्यत्वादिवैशिष्ट्यरूपमुख्यार्थांगीकारेबाधकाभा
वादित्यर्थः । तस्य विचारविधेः ॥ आपातदर्शनजन्येति ॥ समानधर्मदर्शनजन्येत्यर्थः । निष्प्रकारकेब्रह्मण्येतादृशविचार

विशेष्यमात्रपरत्वेनमुख्यार्थबाधकाभावात् । वेदांतजन्यज्ञानंचनिष्प्रकारकंचेत्ज्ञानमे
वनस्यात् ज्ञानस्येच्छादेरिवसविषयकत्ववत्सप्रकारकत्वस्यापिनियतत्वात् कंचित्प्रकारं
विनावस्तुनोबुद्धावनारोहाच्च । इदमित्थमितिहिधीः। वेदांतानामबुभुत्सितार्थत्वंचस्या
त् बुभुत्सायाधर्मिज्ञानाधीनत्वात्। “श्रोतव्योमंतव्य” इतिविचारविधिश्चायुक्तःस्यात्
तस्याप्यापातदर्शनजन्यसंशयनिवर्तकसप्रकारकनिश्चयार्थत्वात्। शुद्धब्रह्मविचारकाणा
माद्याध्यायतृतीयपादीयाधिकरणानांअनारंभश्चस्यात् । विषयादिपंचकाभावात् । वि
शिष्याज्ञातोहिविषयः साधारणधर्मधीजन्यश्चसंशयः मिथ्यासत्यैकप्रकारावलंबिनौचपू
र्वपक्षसिद्धांतौ एकतरप्रकारनिर्धारणाधीनंचप्रयोजनं तच्चपंचकंनिर्विशेषेकथंस्यात्। “ब्र
ह्मविदाप्नोती” तिपूर्ववाक्यएवब्रह्मणःसामान्येनज्ञाततयासत्यादिवाक्यवैयर्थ्यंचस्यात्।

विध्यप्रवृत्तेरितिभावः । कुतइत्यतआह ॥ विषयादीति ॥ “विषयोविशयश्चैवपूर्वपक्षस्तथोत्तरः । प्रयोजनंचवक्तव्यंपूर्वसि

SGDF

द्धांतपक्षयो” रित्युक्तत्वेनप्रकृतेतदभावादित्यर्थः ॥ यस्यकस्यचिदिति ॥ सत्यत्वादिविशिष्टस्यब्रह्मत्वज्ञानंयदनुभवसिद्धंतन्न स्यादित्यर्थः । दूषणांतरंचाह ॥ तात्पर्येति ॥ विभागो भेदः ॥ तेनचेति ॥ यत्किंचिदितिबोधनेन । पूर्वमेवयत्किंचिदिति ज्ञानेसत्येवबुभुत्साप्रश्नयोरुदयात् तात्पर्यतोयत्किंचिदित्येवबोधकस्यसत्यत्वादिवाक्यस्यब्रह्मबुभुत्साप्रश्नौप्रतिहेतुभूतज्ञानादन धिकविषयकत्वेनसत्यादिवाक्यंब्रह्मबुभुत्सानिवर्तकंब्रह्मप्रश्नोत्तरंचनस्यादित्यर्थः । यदुक्तंतात्पर्यविषयस्याखंडार्थत्वेत्यादि तद

सत्यादिवाक्यस्यसत्यत्वादिविशिष्टेतात्पर्याभावेतात्पर्यतोयत्किंचिद्ब्रह्मेत्येवबोधनाद्यस्यक स्यचिद्ब्रह्मत्वंचस्यात् । तात्पर्यविषयस्याखंडार्थत्वेनइदंब्रह्मेतिलक्षणलक्ष्यरूपोद्देश्यविधे य(भावा)(विभागा)भावेनतात्पर्यतोयत्किंचिदित्येवबोधनात् । तेनचब्रह्मबुभुत्सानिवृत्त्य भावात् किंब्रह्मेतिप्रश्नोत्तरंचनस्यात् । नचोद्देश्यविधेयभावेऽसत्यपिअप्राप्तविधेयमात्र परत्वादखंडार्थत्वाहानिः विधेयस्यापिस्वरूपेणज्ञातत्वेनोद्देश्यसंसृष्टतयैवबोधनीयतया

युक्तं इदंब्रह्मेत्युद्देश्यविधेयभावांगीकारात्। नचाखंडेउद्देश्यविधेयविभागायोगइत्युक्तमितिवाच्यं अप्राप्तंयद्ब्रह्मस्वरूपंतन्मात्रस्यै वविधेयत्वांगीकारात् तस्यचाखंडत्वादित्याशंक्यनिराकरोति ॥ नचेति ॥ विधेयस्य ब्रह्मस्वरूपस्य ॥ स्वरूपेण ॥ विशेषणा विशिष्टतया । तथाचस्वरूपमात्रस्यस्वप्रकाशत्वादिनानित्यसिद्धत्वेनविधेयत्वाभावादितिभावः ॥ उद्देश्येति ॥ यत्सत्यंतद्ब्रह्मे

SGDF
Sri Gargeshwari Digital Foundation

तिउद्देश्यभूतलक्षणसंसृष्टतयेत्यर्थः ॥ वाक्यांतरवदिति ॥ संसर्गबोधकनीलोत्पलादिवाक्यवदित्यर्थः । शक्त्याजायमाना न्वयप्रतियोग्युपस्थितेर्लक्षणात्ववारणायाशक्येत्युक्तं । गौणीवृत्त्याजायमानान्वयप्रतियोग्युपस्थितेर्लक्षणात्ववारणायासदृशे त्युक्तं ॥ असंभवादिति ॥ लक्ष्यार्थस्यब्रह्मण्यन्वयप्रतियोगित्वेनोपस्थित्यभावेनलक्षणायाअयोगात् अन्वयप्रतियोगित्वेनत दुपस्थितौचसखंडार्थत्वापत्तिरितिभावः ॥ लक्षणाबीजेति ॥ यदनुपपत्त्यायत्कल्प्यतेतस्यतदुपपादकतायारात्रिभोजनादौदृष्ट

वाक्यांतरवत्सखंडार्थत्वापातात् । उक्तंहि "किंचिद्विधीयतेऽनूद्यवाक्येनेतिसतांस्थितिः ।
सत्यज्ञानादिवाक्येनकथ्यतांकिंविधीयते । अज्ञातंबोध्यतेकिंचित्वाक्येनेतिसतांस्थितिः ।
सत्यज्ञानादिशब्दैस्तुकिमज्ञातंप्रबोध्यत" इति । सत्यादिपदानांलक्षणाचनस्यात् अश क्यासदृशान्वयप्रतियोग्युपस्थितिर्लक्षणेतिपक्षेलक्षणायाएवासंभवात् । शक्यसंबंधो लक्षणेतिपक्षेऽन्वयानुपपत्तिरूपलक्षणाबीजाभावात् । सत्यादिपदानांपर्यायत्वंचस्यात् ।

त्वात् प्रतीतान्वयानुपपत्त्याकल्प्यमानलक्षणायाअमुख्यार्थान्वयमादायपूर्वप्रतीतान्वयोपपादकत्वंचगंगायांघोषइत्यादौदृष्टं इह चसत्यत्वाद्यन्वयानुपपत्त्याकल्प्यमानचिन्मात्रलक्षणायानपूर्वप्रतीतान्वयोपपादकत्वमस्ति पूर्वप्रतीतसत्यत्वान्वयस्यसर्वथापरि त्यक्तत्वादितिभावः ॥ पर्यायत्वमिति ॥ घटःकलशइतिवत्प्रवृत्तिनिमित्तभेदाभावादितिभावः । सत्यादिपदानांलक्ष्यार्थाभे

SGDF
Sri Gargeshwari Digital Foundation

देपिपरापरजातिरूपवाच्यार्थभेदसद्भावान्नपर्यायत्वमित्याशंक्यनिराकरोति ॥ नचेति ॥ कुंभादीति ॥ घटादीत्यर्थः । परा व्यापकजातिःसत्यशब्दार्थः । अंतःकरणेत्यादिचिद्विशेषविशेषणं तथाचांतःकरणवृत्तिलक्षणंयदुपधानमुपाधिःतल्लब्धभेदोयःक श्चिद्विशेषःस्वरूपज्ञानभिन्नांतःकरणवृत्तिविशेषःतदनुगतंज्ञानत्वं स्वरूपानंदव्यतिरिक्तोवैषयिकानंदस्तदनुगतमानंदरूपंसामा न्यंचापरजातिस्तद्वाचिनौज्ञानानंदशब्दावित्यर्थः ॥ एवंचेति ॥ घटःपृथिवीद्रव्यमित्यादिशब्दानामिवविशेष्याभेदोपिवा

नचकुंभाद्यनुगतसत्तापरजातिः । अंतःकरणवृत्त्युपधानलब्धभेदचिदानंदविशेषानु गतेज्ञानत्वानंदत्वेचापरजाती । एवंच सत्यज्ञानानंदशब्दानांलक्ष्यार्थाभेदेपिक्रमे णोक्तजातिवाचित्वान्नपर्यायतेतिकल्पतरूक्तंयुक्तं । कुंभाद्यनुगतसत्तायाब्रह्मलक्षण त्वायोगात् । मिथ्यासत्यानुगतसत्तासामान्याभावाच्च । तयाऽनृताद्व्यावृत्त्यसिद्धेश्च ।

च्यः जातिरूपप्रकारभेदान्नसत्यादिपदानांपर्यायत्वमित्यर्थः ॥ कुंभेति ॥ सत्यंज्ञानमित्यत्रसत्यशब्दोक्तसत्तायाब्रह्मलक्षणत्व स्यत्वयाप्यंगीकारान्नतस्याःकुंभादिसाधारण्यं तथात्वेब्रह्मलक्षणस्यातिव्याप्तिःस्यात् तथाचनसत्यशब्दस्यकुंभादिब्रह्मसाधारण सत्ताजातिवाचित्वमित्यर्थः ॥ मिथ्येति ॥ कुंभादिषुब्रह्मणिचानुगतंएकसत्वसामान्यंनास्ति कुंभादीनांमिथ्यात्वादित्यर्थः । ॥ ४५१ ॥
कुंभादिब्रह्मानुगतसत्त्वसामान्यस्यसत्यशब्दाभिधेयत्वेदोषमाह ॥ तयेति ॥ अनृतसाधारणस्यानृतादिव्यावर्तकत्वायोगादि

तिभावः । कुंभादिसाधारणसत्ताजातिःसत्त्वपदेनोच्यतइत्यंगीकारेकालत्रयाबाध्यत्वरूपंपारमार्थिकंसत्त्वं "सत्यंज्ञान" मिति श्रुतौसत्यपदेनोक्तमितित्वन्मतहानिःस्यादित्याह ॥ कालत्रयेति ॥ किंचज्ञानत्वंनजातिः तदाधारानेकव्यक्त्यभावात् । न चांतःकरणोपाधिकज्ञानान्यनंतानिसंतीतिवाच्यं । ज्ञानत्वादेर्ब्रह्मलक्षणत्वेनधर्मिभूतब्रह्मसमसत्ताकव्यक्तिभेदस्यैववक्तव्यत्वा त् औपाधिकव्यक्तिभेदमात्रेणजातित्वेआकाशत्वादेरपिजातित्वापत्तिः घटाद्युपाधिभिन्नाकाशानांबहूनांसत्वादित्याह ॥ धर्मी

कालत्रयाबाध्यत्वरूपंपारमार्थिकंसत्त्वंब्रह्मणिश्रौतमितित्वन्मतभंगाच्च । धर्मिसमसत्ताक भेदंविनौपाधिकभेदमात्रेणाऽऽकाशत्वादेरिवज्ञानत्वादेरपिजातित्वायोगाच्च । योगेवाज्ञा नत्वादेर्धर्मिसमसत्ताकभेदवदुपहितवृत्तित्वेचशुद्धलक्षणत्वायोगात् । एतेन सत्वादि विशिष्टशबलब्रह्मवाचिनांसत्यादिशब्दानांशुद्धब्रह्मणिलक्षणेतिनपर्यायत्वमितिनिरस्तं ।

ति ॥ योगेवेति ॥ जातित्वयोगेवातदुपपत्त्यर्थंधर्मिसमसत्ताकभेदवदुपहितवृत्तिरूपज्ञानवृत्तित्वेंगीक्रियमाणेज्ञानत्वस्यातिव्या प्त्यापत्त्यातस्यब्रह्मलक्षणत्वायोगादित्यर्थः ॥ सत्वादीति ॥ कल्पतरुकारेणसत्यादिशब्दानांसत्तादिजातिवाचित्वमुक्तं अनेन तुसत्त्वादिविशिष्टशबलब्रह्मवाचित्वमुच्यतइतिभेदः । यथोक्तंसंक्षेपशारीरके "रूप्यादौमेसत्यतातावदेकाप्रत्यग्ज्ञात्रेसत्यताका चिदन्या । तत्संपर्कात्सत्यतातत्रचान्याव्युत्पन्नोयंसत्यशब्दस्तुतत्रे" ति । तत्र शबले । सत्यत्वादेरित्यादिपदेनज्ञानत्वानंतत्व

SGDF

योर्ग्रहणं । तस्यैव शबलस्यैव । तथाचतस्यैवात्रप्रतिपाद्यत्वंस्यादित्यर्थः ॥ नत्विति ॥ नचेष्टापत्तिः मोक्षजनकज्ञानविषयशुद्ध
ब्रह्मपरत्वादस्यवाक्यस्येतिभावः । पर्यायत्वोपपादनमुपसंहरति ॥ तस्मादिति ॥ ननुनपदांतरवैयर्थ्यं । यथाहिउच्चैरित्यत्रउच्चैस्
सुइतिस्थिते "अव्ययादाप्सुप" इतिअव्ययात्परस्यसोर्लुकिरुत्वेविसर्गेचसतिउच्चैरितिजातमस्ति तत्रसुइतिप्रथमायानकिमपिप्र
योजनमस्ति रामइत्यादौकर्तृत्वार्थवदत्रकर्तृत्वादेस्तदर्थस्याभावात् अतउच्चैस्स्वरूपप्रातिपदिकार्थमात्रेएवप्रथमा एवंचप्रथमायाः
अनृतास्वप्रकाशपरिच्छिन्नरूपेशबलेसत्यत्वादेरयोगात् । योगेवातस्यैवानृतादिव्यावृत्तिःस्यान्नतुशु
द्धस्य । तस्मात्सत्यत्वादीनांशुद्धादन्यत्रासंभवात्सत्यादिवाक्यस्यलक्षणयाऽखंडार्थत्वेचशुद्धेतद
सिद्धेःपर्यायत्वंदुर्वारं । पदांतरवैयर्थ्यंचस्यात् । नचप्रातिपदिकप्रथमयोरिवैकार्थ्येपिपदांतरावैयर्थ्य
मितिवाच्यं तत्रमहाभाष्यएव "किंपुनरत्रप्रथमये" तिवैयर्थ्यमाशंक्य "ग्रामउच्चैस्तेस्वंग्रामउच्चैस्त
वस्व" मित्यत्र "सपूर्वायाःप्रथमाया" इत्येषविधिर्यथास्यादित्यर्थवत्त्वोक्तेः । नचप्रतिपदमारोपिता
सत्यत्वादिव्यावृत्तिरूपफलभेदादवैयर्थ्यं व्यावर्तकस्यसत्यत्वादेस्तात्पर्यतोऽनर्पणेव्यावृत्त्यसिद्धेः ।
कर्तृत्वार्थायोगेनप्रातिपदिकमात्रार्थत्वेनप्रातिपदिकप्रथमयोरैकार्थ्येपिप्रयोजनांतराभावेपिउच्चैरित्यत्रसुइतिप्रथमांव्यर्थामप्यंगी
कृत्यतल्लोपोंगीकृतः तद्वदिहापिऐक्यार्थेपिनपदांतरवैयर्थ्यमित्याशंक्यनिराकरोति ॥ नचेति ॥ तत्र प्रातिपदिकप्रथमयोरैका
र्थ्यविषये । महाभाष्यएवार्थवत्त्वोक्तेरित्यन्वयः । अत्र प्रातिपदिकार्थे ॥ सपूर्वायाइति ॥ "सपूर्वायाःप्रथमायाविभाषा" वि

SGDF
Sri Gargeshwari Digital Foundation

द्यमानपूर्वात्प्रथमांतात्परयोर्युष्मदस्मदोः तेमेइत्येतावादेशौविकल्पेनभवतइतिसूत्रार्थः । प्रातिपदिकार्थेप्रथमानव्यर्था । कर्तृत्वार्था योगेपिग्रामउच्चैस्तेस्वमित्यत्रउच्चैरित्येतत्परस्ययुष्मदः तवेत्यस्यतेइत्यादे(शप्राप्त्यर्थ)शार्थत्वात् उच्चैरित्यत्रप्रातिपदिकार्थेप्रथमानं गीकारेतस्यप्रथमांतत्वाभावेनपूर्वंविद्यमानग्रामपदादुच्चैरित्यस्मात्परयुष्मदस्तवेत्यस्यतेइत्यादेशायोगेनग्रामउच्चैस्तेइतिप्रयोगाद्य योगात् । अतस्तत्रप्रातिपदिकार्थेपिप्रथमांऽगीकृता । ग्रामउच्चैरित्यत्रोच्चैरित्यस्यप्रथमांतत्वेहिततः परस्यतवेत्यस्यतेइत्यादेशोविभा षाभवतीतिप्रयोजनवत्त्वेनप्रथमायानवैयर्थ्यमितिभावः । युष्मदस्मदादेशस्य "सपूर्वाया" इत्यनेनसूत्रेणविकल्पेनविहितत्वात् ग्रा

नचसत्यत्वादेरतात्पर्यविषयत्वेपिलक्षणातःप्रागभिधाकालेप्रतीतिमात्रेणतत्सिद्धिः नद्यांघो षइत्यत्रतीरस्यानदीतः "यजमानःप्रस्तर" इत्यत्रप्रस्तरस्यायजमानाच्चव्यावृत्त्यापातात् ।

मउच्चैस्तवस्वमित्युक्तं । प्रतिपदं फलभेदादित्यन्वयः । अनर्पणे लक्ष्यब्रह्मणीतिशेषः । अर्पणेतुसखंडार्थत्वमितिभावः ॥ अता त्पर्येति ॥ लक्ष्यार्थब्रह्मण्यनर्पणेपीत्यर्थः ॥ अभिधाकालइति ॥ सत्यत्वविशिष्टरूपमुख्यार्थोपस्थितिकालेसत्यत्वादेर्ब्रह्मणि प्रतीत्यातन्मात्रेणसत्यत्वादिव्यावृत्तिसिद्धिरित्यर्थः । अत्रविशिष्टस्यैवानृतादिव्यावृत्तिःस्यात्नतुशुद्धस्येत्युक्तदूषणेसत्येवदूषणांत रमाह ॥ नद्यामिति ॥ लक्षणातःप्रागभिधाकालेकुत्रचित्प्रतीतिमात्रेणलक्ष्येव्यावृत्तिबोधांगीकारेनद्यांघोषइत्यत्रलक्षणातःप्रा क्अभि(धा)धयामुख्यार्थोपस्थितिकालेतात्पर्यविषयस्यनदीत्वस्यप्रवाहेप्रतीतत्वाल्लक्ष्येतीरेपिअनदीव्यावृत्तिबुद्धिःस्यात् । तथाय

SGDF
Sri Gargeshwari Digital Foundation

जमानःप्रस्तरइत्यत्रापितत्सिद्धिरूपगौणार्थोपस्थितेःपूर्वंमुख्यार्थोपस्थितिकालेप्रस्तरेऽतात्पर्यविषयस्ययजमानत्वस्यप्रतीत्यातन्मा त्रेणायजमानात्व्यावृत्तिःस्यादित्यतिप्रसंगइत्यर्थः ॥ अतात्पर्याविशेषेइति ॥ सत्यपदयजमानपदयोःसत्यत्वयजमानत्ववैशि ष्ट्येनब्रह्मप्रस्तरबोधनेतात्पर्याभावेसमानेसतीत्यर्थः । व्यावहारिकं अतोनसत्यत्वव्यावर्तकत्वंतस्येतिभावः । प्रातिभासिकं । अतोनतस्यायजमानव्यावर्तकत्वमितिभावः ॥ नचमुक्तमिति ॥ विशेषहेत्वभावादितिभावः । ननुव्यावहारिकप्रमाणसिद्ध

नचातात्पर्याविशेषेपिसत्यत्वादिकंव्यावहारिकं यजमानत्वादिकंतुप्रातिभासिकमितियुक्तं नचौप निषदेब्रह्मणिसत्यत्वादिकंप्रत्यक्षादिप्राप्तं येनव्यावहारिकंस्यात् । नचतत्वपरात्प्रतीतंव्यावहारिकं व्यावहारिकपरात्तुप्रतीतंप्रातिभासिकमितिव्यवस्था "असद्वाइदमग्रआसीदि"तितत्त्वपरेणप्रतीत स्यमूलकारणासत्त्वस्यव्यावहारिकत्वापातात्।नचसत्यत्वादिकंतत्त्वावेदकबाधितत्वात्व्यावहारिकं

त्वाद्ब्रह्मसत्यत्वंव्यावहारिकमितिचेत्तत्राह ॥ नचेति ॥ तत्सत्यत्वस्यप्रत्यक्षादिनाऽप्राप्तौऔपनिषदत्वंहेतुरितिद्रष्टव्यं । विशेष हेतुंशंकते ॥ तत्त्वेति ॥ वेदांतानांतत्त्वपरत्वात्तत्त्वावेदकवेदांतात्प्रतीतंसत्यत्वंव्यावहारिकं यजमानःप्रस्तरइत्यादेस्तुकर्मकांड स्थत्वेनातत्त्वावेदकत्वात्तादृशवाक्यात्प्रतीतंयजमानत्वंप्रातिभासिकमितिअसत्यत्वादिव्यावृत्तिरयजमानत्वंव्यावृत्त्यभावश्चयुक्त इत्यर्थः । तत्त्वपरात्प्रतीतस्यव्यावहारिकत्वेऽतिप्रसंगमाह ॥ असद्वाइति ॥ तत्त्वावेदकेति ॥ नेहनानेतिश्रुतिरूपतत्त्वावेद

कप्रमाणेत्यर्थः ॥ व्यावहारिकेति ॥ प्रत्यक्षादिप्रमाणेत्यर्थः ॥ तत्त्वेति ॥ तत्त्वावेदकस्य"नेहनाने"तिवाक्यस्यापित्वन्मतेल क्षणयाचिन्मात्रपरत्वेनसत्यत्वादिवैशिष्ट्यबाधकत्वायोगात् । नहिदेवदत्तइतिवाक्यंदंडीतिवाक्यबोध्यदंडित्वस्यबाधकमितिभा वः । यदप्युक्तं व्यावहारिकबाधितत्वाद्यजमानत्वादिकंप्रातिभासिकमिति तदयुक्तं भेदग्राहिणाव्यावहारिकत्वेनत्वदभिमतेन प्रत्यक्षेणेदानींबाधितस्याप्यद्वैतस्यपारमार्थिकत्वांगीकारा त्तद्वद्व्यावहारिकप्रत्यक्षादिबाधितस्यापियजमानत्वादेःपारमार्थिकत्वा

यजमानत्वादिकंतुव्यावहारिकबाधितत्वात्प्रातिभासिकमितियुक्तं तत्त्वावेदकस्यापिविशेष्यमा त्रपरत्वेनसत्यत्वाद्यबाधकत्वात् व्यावहारिकबाधितस्याद्वैतवत्पारमार्थिकत्वोपपत्तेश्च । नचलक्षणा बीजेमुख्यार्थबाधकेतुल्येपिसत्यादिपदस्यवाच्यार्थेऽवांतरतात्पर्यंयजमानपदस्यतुतन्नेत्यत्रहेतुरस्ति येनोक्तव्यवस्थास्यात् । किंच व्यावृत्तयःसत्यामिथ्यावा आद्येव्यावर्तकानामपिसत्त्वंस्यात् व्याव हारिकैर्व्यावर्तकैःपारमार्थिकव्यावृत्त्यसिद्धेः । किंच तासांब्रह्माभेदेब्रह्मपदेनैवतत्सिद्धेरितरवैयर्थ्य

पातादित्याह ॥ व्यावहारिकेति ॥ ननुसत्यादिपदस्यलक्ष्येब्रह्मणिमहातात्पर्येपि वाच्यार्थेसत्यत्वादौअवांतरतात्पर्यसद्भावेन व्यावहारिकत्वंयजमानपदस्यप्रस्तराधिकरणकेयजमानत्वेऽवांतरतात्पर्याभावात्तत्प्रातिभासिकमित्युच्यतइतिचेत्तत्राह ॥ नचेति ॥ आद्यइति ॥ व्यावृत्तिव्यावर्तकयोरेकसत्ताकत्वनियमादितिभावः । ननुव्यावहारिकसत्ताकत्वांगीकारादिष्टापत्तिरितिचेत्त त्राह ॥ व्यावहारिकैरिति ॥ असिद्धेरिति ॥ नचेष्टापत्तिरितिवाच्यं । अनृतव्यावृत्तेस्तात्विकत्वांगीकारादितिभावः । तासां

SGDF Foundation

सत्यभूतानांअसत्यत्वादिव्यावृत्तीनां तत्सिद्धेः असत्यत्वादिव्यावृत्तिसिद्धेः सत्यादिपदवैयर्थ्यमित्यर्थः । व्यावृत्तीनांसत्यत्वे ब्रह्माभेदेत्वयांगीक्रियमाणेव्यावर्तकानामपिसत्यत्वंब्रह्माभिन्नत्वंस्यात् व्यावृत्तिव्यावर्तकयोःसमानन्यायत्वादित्याह ॥ व्यावर्त्तकेति ॥ अन्योन्यमिति ॥ असत्यव्यावृत्तेरज्ञानव्यावृत्त्याऽज्ञानव्यावृत्तेरसत्यव्यावृत्त्येत्यन्योन्यमभेदेसतीत्यर्थः ॥ अद्वैत

व्यावर्तकधर्माणामपिसत्त्वंब्रह्माभिन्नत्वंचस्यात् अविशेषात् । एवंव्यावृत्तीनामन्योन्यमभेदेसत्यपदेनैवाज्ञानादिव्यावृत्तिसिद्धेर्ज्ञानादिपदवैयर्थ्यं । तासांब्रह्मणापरस्परंभेदेचाद्वैतहानिः अभावद्वैतस्यनिरासात् । नांत्यः शुक्तेःशुक्तितोव्यावृत्तेर्मिथ्यात्वेशुक्तित्वस्यशुक्तिसमानसत्ताकत्ववदनृतव्यावृत्तेर्मिथ्यात्वेऽनृतत्वस्यब्रह्मसमसत्ताकत्वापातात् । तत्वजिज्ञासुंमुमुक्षुंप्रतिमिथ्याबोधनायोगात् । नचानृतत्वादिभ्रांतिनिवृत्त्यर्थंतद्बोधनं अधिष्ठानब्रह्मतत्वज्ञानेनैवतन्निवृत्तिसंभवेभ्रांत्यंतरोत्पादायोगात् ।

हानिरिति ॥ सत्यत्वांगीकारादितिभावः । ननुव्यावृत्तेरभावरूपत्वात्सत्यत्वेब्रह्मभिन्नत्वेचनाद्वैतहानिः । "अभावरूपधर्माना द्वैतंघ्नंती" तिमंडनोक्तेरितिचेत्तत्राह ॥ अभावेति ॥ शुक्तिसमेति ॥ शुक्तिरूपधर्मिसमसत्यत्ववदित्यर्थः ॥ मिथ्येति ॥ व्यावृत्तिरूपमिथ्याभूतार्थेत्यर्थः ॥ तद्बोधनमिति ॥ सत्यादिपदेनानृतव्यावृत्तिबोधनंक्रियतइत्यर्थः ॥ भ्रांत्यंतरेति ॥ तत्त्व ॥ ४५४ ॥

जिज्ञासुंमुमुक्षुंप्रतीतिवर्तते मुमुक्षोर्ब्रह्मणिअनृतत्वादिभ्रांतौसत्यांअधिष्ठानब्रह्मतत्त्वज्ञानेनैवसाभ्रांतिर्निवर्तनीया नतुसत्यादिपदैरसत्यादिव्यावृत्तिबोधनेन व्यावृत्तेरपिमिथ्यात्वात्तद्बोधनेनपूर्वभ्रांतिनिवृत्तावपिभ्रांत्यंतरोत्पत्तिरेवस्यात् । नह्येवं मुमुक्षुंप्रतिश्रुत्याभ्रांत्यंतरोत्पादनंयुक्तमित्यर्थः । तत्रदृष्टांतमाह ॥ नहीति ॥ पुंस्त्वस्येत्यनंतरंअधिष्ठानतत्त्वज्ञान(मनु)मुत्पाद्येतिशेषः । तेनोत्तरज्ञानेनपूर्वज्ञाननिवृत्तेर्दर्शनात्कथमेतदितिचोद्यानवकाशः । तथाचायमर्थः वल्मीकेकस्यचित्स्थाणुत्वभ्रांतिर्जाता साऽधिष्ठानतत्त्वज्ञानमुत्पाद्यनिवर्तनीया तदर्थंतत्रपुंस्त्वोपदेशेनाधिष्ठानतत्त्वज्ञानमनुत्पाद्यस्थाणुत्वभ्रांतिंनिवर्तयन्कश्चिदाप्तोद्दश्य

नहिवल्मीकेस्थाणुत्वभ्रांतिःपुंस्त्वस्योपदेशेननिवर्त्या किंतुवल्मीकत्वस्य । नचात्मनिकल्पितेनापिब्राह्मण्येनमिथ्याशंकिताब्राह्मण्यस्येवव्यावहारिक्याव्यावृत्त्याप्रातिभासिकानृतत्वभ्रांतिनिवृत्तिरितिवाच्यं

ते प्रत्युतभ्रांत्यंतरोत्पत्तिरेवस्यान्नाधिष्ठानतत्त्वज्ञानं सत्यभूतवल्मीकत्वोपदेशेसतिअधिष्ठानतत्त्वज्ञानोत्पत्त्याभ्रांतिर्निवृत्ताभवति । एवंमुमुक्षोर्ब्रह्मणिजाताअनृतत्त्वादिभ्रांतिःसत्यभूताधिष्ठानब्रह्मतत्त्वज्ञानोत्पादनेनैवनिवर्तनीया नत्वनृतव्यावृत्तिबोधनरूपभ्रांत्यंतरोत्पादनेन तेनाधिष्ठानतत्त्वज्ञानाजननादितिभावः ॥ आत्मनीति ॥ जीवइत्यर्थः । यथाकस्यचिज्जीवेमिथ्याभूताऽब्राह्मण्यशंकायामयंब्राह्मणइतिकल्पितब्राह्मण्योपदेशेनापिसाऽब्राह्मण्यशंकानिवर्तते प्रकृतेतुअनृतव्यावृत्तेर्व्यावहारिकत्वा

SGDF Sri Ganeshdutt... Foundation

त्तद्बोधनेनप्रातिभासिकानृतत्वादिभ्रांतिनिवृत्तिःसुतरांभविष्यतीतिभावः । दृष्टांतएवासंप्रतिपन्नइत्याह ॥ ब्राह्मण्यस्येति ॥ ब्राह्मण्यंनाम "देहभेदयुतोयस्माद्ब्राह्मणादिपदोदित" इत्युक्तरीत्यादेहविशेषसंबंधरूपत्वं जातिविशेषोवा। नाद्यः। देहविशेषसंबंधवत्त्वरूपब्राह्मण्यस्यजीवेसत्त्वेनकल्पितत्वायोगात् तथाचकल्पितेनापिब्राह्मण्येनेत्युक्तमसत् । नद्वितीयः । मन्मतेजातेरप्रामाणिकत्वेनजातिविशेषरूपब्राह्मण्याभावरूपंयदब्राह्मण्यंतस्यैवजीवेसत्यत्वेनब्राह्मण्यस्यैवकल्पितत्वेनमिथ्याशंकिताऽब्राह्मण्यस्येत्युक्तमसदितिभावः । असद्व्यावृत्तेर्व्यावहारिकत्वेदोषांतरमाह ॥ असदिति ॥ नन्वसद्व्यावृत्तेर्व्यावहारिकत्वेअसद्वाइत्यादिश्रु

ब्राह्मण्यस्यदेहविशेषसंबंधित्वेआत्मनिब्राह्मण्यस्यजातिविशेषत्वेऽब्राह्मण्यस्यसत्यत्वेनद्व योःकल्पितत्वायोगात् । असद्व्यावृत्तेर्व्यावहारिकत्वेऽनपोदितप्रामाण्येन "असद्वाइदमग्र आसीदि" तिवाक्येनासत्त्वस्यपारमार्थिकत्वापत्तेश्च । ननुमीमांसकमतेऽनृतस्याप्यर्थ वादार्थस्यसत्येप्राशस्त्येइवमिथ्याभूतानामपिव्यावृत्तीनांसत्येब्रह्मणिद्वारत्वेनबोधनंयुक्तं

तिसिद्धासत्त्वस्यपारमार्थिकत्वंकुतः प्रतियोगितदभावयोर्भिन्नसत्ताकत्वनियमादितिचेन्न असत्त्वस्यप्रातिभासिकत्वेपितदुपपत्तेरित्यतउक्तं ॥ अनपोदितेति ॥ श्रुतिसिद्धस्यप्रातिभासिकत्वेप्रातिभासिकस्यबाधितत्वनियमेनतद्बोधकश्रुतेरप्रामाण्यंस्यान्नतद्युक्तं श्रुतिप्रामाण्यस्यानपोदितत्वादित्यर्थः । व्यावृत्तीनांमिथ्यात्वेतत्त्वजिज्ञासुंमुमुक्षुंप्रतिमिथ्याबोधनायोगादित्युक्तमयुक्तमित्याशंकते ॥ नन्विति ॥ बोधनं मुमुक्षुंप्रतीतिशेषः । मिथ्याभूतस्यसत्यार्थबोधनेकथंद्वारत्वमित्यतउक्तं ॥ मीमांसकमतइ

ति ॥ "सोरोदीत्तद्रुद्रस्यरुद्रत्वंयदश्र्वासीत्तद्रजतमभवदि" त्यर्थवादतःप्रतीतस्यरुद्ररोदेसतियदश्रुगलितंतदेवरजतंजातमित्येवंबाधितार्थस्यसत्येसुवर्णप्राशस्त्येद्वारत्वंतथेत्यर्थः ॥ उक्तंहीति ॥ व्यावृत्तीनांद्वारत्वमित्यर्थः । स्थूलारुंधत्यादिस्थूलेपिपूर्वमज्ञातस्वरूपंद्वारेणज्ञाप्यमानंदृष्टं नह्येवंप्रकृतेसंभवति ब्रह्मणःपूर्वमेवज्ञाततयातज्ज्ञानेव्यावृत्तीनांद्वारत्वायोगादित्याह ॥ ब्रह्मस्वरूपेति ॥ श्रुतिंविनेति ॥ सत्यादिपदबोध्यव्यावृत्तिरूपद्वारंविनेत्यर्थः ॥ पूर्वेति ॥ सत्यज्ञानादिवाक्यात्पूर्ववाक्यइत्यर्थः । सा

उक्तंहि "सत्यादिशब्दाअसत्यादिव्यावृत्तिद्वारालक्ष्येब्रह्मणिपर्यवस्यंती" तिचेन्न ब्रह्म स्वरूपमात्रस्यश्रुतिंविनाप्रागेवाविद्याद्यध्यासाधिष्ठानत्वादिनाज्ञातस्यपुनरपि "ब्रह्मवि दाप्नोती" तिपूर्ववाक्येसामान्यतोऽत्रचसत्वादिशब्दैःसत्यत्वादिविशिष्टतया (व्यावृ त्तिविशिष्टतयाच)ज्ञातत्वेनतज्ज्ञानस्यव्यावृत्तिज्ञानासाध्यत्वात् । व्यावृत्तिज्ञानस्यै वचधर्मिज्ञानसाध्यत्वेनवैपरीत्यापाताच्च । शाब्देऽर्थेआर्थिकार्थस्यद्वारत्वानुपपत्तेश्च।

मान्यतोज्ञातत्वेनेत्यन्वयः । अत्रच सत्यादिवाक्येच । तज्ज्ञानस्य स्वरूपमात्रज्ञानस्य । तथाचस्वरूपमात्रबोधनेव्यावृत्तीनांद्वारत्वमयुक्तमितिभावः ॥ व्यावृत्तीति ॥ अभावज्ञानेऽधिकरणज्ञानस्यकारणत्वादितिभावः ॥ वैपरीत्येति ॥ व्यावृत्तिस्वरूपबोधनएवब्रह्मस्वरूपबोधनस्यद्वारत्वापातादित्यर्थः । इतोपिनब्रह्मस्वरूपबोधनेव्यावृत्तेर्द्वारत्वमित्याह ॥ शाब्दइति ॥ ब्र

SGDF
Foundation

ह्मणःशब्दलक्ष्यतयाशब्दार्थत्वात्तत्रशब्दार्थएवद्वारत्वेनवाच्यः । नतुव्यावृत्तिः । आदौसत्यादिपदैःसत्यत्वादिविशिष्टंबोध्यते अनंतरंनिर्गुणश्रुत्यन्यथानुपपत्त्यातत्परित्यागेनकल्प्यमानायाअनृतादिव्यावृत्तेःअशाब्दत्वात् "यश्चार्थार्दर्थोनसचोदनार्थ" इतिन्यायात् अतोनशाब्देर्थेआर्थिकार्थस्यद्वारत्वंयुक्तमितिभावः । किंचानेनैवन्यायेननीलोत्पलमित्यादेरप्यखंडार्थत्वंस्यात् । नचनीलत्वसंसर्गबोधनान्नाखंडार्थत्वमितिवाच्यं तत्रापिनीलपदस्यननीलत्वसंसर्गबोधनेतात्पर्यं किंतुअनीलव्यावृत्तिबोधनद्वारास्वरूपमात्रबोधनएवेतिवक्तुंसुवचत्वादित्याह ॥ नीलमिति ॥ किंचप्रकृतज्ञानेपिव्यावृत्तीनांद्वारत्वंवदताब्रह्मस्वरूपेपूर्वाज्ञा

नीलमुत्पलमित्यादेरपिअनीलव्यावृत्तिद्वारास्वरूपमात्रपरत्वमित्यापाताच्च । नचप्रागज्ञातोव्यावृत्त्याज्ञाप्योविशेषस्त्वन्मतेऽस्ति । नचप्राग्ब्रह्मणोज्ञानेऽप्यन्याविषयकंतज्ज्ञानमसिद्धमितिवाच्यं ।

तःकश्चनविशेषोव्यावृत्त्याज्ञाप्यतइतिवक्तव्यं अन्यथास्वरूपमात्रस्यसिद्धत्वेनतत्रद्वारानपेक्षणात् तथाचपूर्वमज्ञातस्यद्वारीभूतव्यावृत्त्याज्ञापनीयस्यविशेषस्यत्वन्मतेऽभावान्नव्यावृत्तेर्द्वारत्वमित्याशयेनाह ॥ नचेति ॥ प्राक् द्वारभूतव्यावृत्तिबोधनात्प्राक् ॥ अन्येति ॥ अन्याविषयकंयद्ब्रह्मज्ञानंनिष्प्रकारकं तदसिद्धं अतस्तत्रव्यावृत्तेर्द्वारत्वमित्यर्थः । व्यावृत्तिबोधात्प्राक्अध्यासाधिष्ठानत्वादिनारूपेणविद्यमानंचब्रह्मज्ञानंनान्याविषयकं । अधिष्ठानत्वादिधर्मावगाहित्वेनान्यविषयकत्वादितिभावः । अन्याविषयकब्रह्मज्ञानेव्यावृत्तेर्द्वारत्वंवदतातावदन्याविषयकंब्रह्मज्ञानंनामकिमितिवक्तव्यं ब्रह्मज्ञानमन्याविषयकंचेत् तत्रध्वंसो

SGDF Sri Gargeshwari Digital Foundation

स्ति अन्याविषयकंब्रह्मज्ञानंव्यावृत्त्याभवतिअन्यज्ञानंनभवतिअन्याज्ञानंभवतीतियावदितिपर्यवसितव्यं तत्रव्यावृत्तेःकिंब्रह्मज्ञानेद्वारत्वंअन्याज्ञानेवा। नाद्यः तस्यपूर्वमेवसिद्धत्वेनतत्रद्वारत्वायोगात् व्यावृत्तिज्ञानस्यधर्मिज्ञानसाध्यत्वेनव्यावर्त्यस्यस्वरूपस्य ज्ञानमेवव्यावृत्तिज्ञानेद्वारमितिवैपरीत्यापाताच्च अतोद्वितीयपक्षएवस्वीकार्यइत्याह ॥ व्यावृत्तीति ॥ व्यावर्त्यज्ञानं स्वरूप ज्ञानं। अस्तुतर्हिव्यावृत्तेरन्याज्ञानएवद्वारत्वमित्यतआह ॥ प्राचीनइति ॥ द्वारीभूतव्यावृत्तिज्ञानात्प्राचीनेइदानींविद्यमाने सतीतियावत्। अयंभावः। व्यावृत्तेरन्याज्ञानेपिद्वारत्वंनयुक्तं व्यावृत्तिबोधात्प्रागप्यन्याज्ञानसद्भावात् तथाहि। सन्घटइत्यादि

व्यावृत्तिज्ञानस्यान्याज्ञानेद्वारत्वापत्त्याब्रह्मज्ञानेद्वारत्वायोगात्।
व्यावर्त्यज्ञानंव्यावृत्तिज्ञानेद्वारमितिवैपरीत्यापाताच्च।प्राचीनेब्रह्मा
ज्ञाननिवर्तकेब्राह्मापरोक्षज्ञानेतदज्ञानकार्यस्यान्यस्यभानायोगाच्च।

ब्रह्मापरोक्षज्ञानंतावदिदानींव्यावृत्तिबोधात्प्रागप्यस्ति ब्रह्मापरोक्षज्ञानंचाज्ञाननिवर्तकं (यतोज्ञानमज्ञानस्यनिवर्तक)मित्यंगीकारात् एवंचेदानींतनेनापिब्रह्मापरोक्षज्ञानेनाज्ञाननिवृत्तिःस्यात् ततश्चोपादानभूताज्ञाननिवृत्त्यातत्कार्यस्यापिअन्यस्यनिवृत्तिः
न्या० ७७ स्यात् ततश्चान्यस्येदानीमपिभानाभावसंभवेनअन्याज्ञानस्यव्यावृत्तिबोधात्प्रागेवसिद्धतयानतत्रव्यावृत्तेर्द्वारत्वसित्यापाद्यदूषण मितिसंप्रदायविदः। सत्यादिपदबोधितायाअसत्त्वादिव्यावृत्तेरन्याज्ञानेद्वारत्वोक्तौब्रह्मज्ञानार्थत्वाभावप्रसंगः। इष्टापत्तिरि

SGDF
Sri Gargeshwari Digital Foundation

तिचेत्तत्राह ॥ ब्रह्मेति ॥ सविशेषत्वमिति ॥ सत्यपदेनासत्यव्यावृत्तिद्वारायद्बोधितंब्रह्मस्वरूपंतदेवज्ञानपदेनाज्ञानव्यावृत्तिद्वाराबोध्यतइत्यंगीकारेसविशेषत्वमित्यर्थः । नन्वाद्यपक्षएवांगीक्रियते तर्हिज्ञानादिपदवैयर्थ्यमित्युक्तमितिचेन्न । कदाचिद्ब्रह्मस्वरूपंअनृतव्यावृत्तिबोधनद्वारासत्यशब्देनबोध्यते कदाचिच्चाज्ञानव्यावृत्तिद्वाराज्ञानशब्देन एवंकदाचिदनंतादिपदेनेत्येवंब्रह्मस्वरूपबोधनेद्वाराणांव्यावृत्तीनांविकल्पांगीकारान्नज्ञानादिपदवैयर्थ्यमित्याशंक्यनिषेधति ॥ नचेति ॥ नित्यवदिति ॥

ब्रह्मप्रातिपदिकार्थबुभुत्सायामेतद्वाक्यंप्रवृत्तमितिस्वप्रक्रियाविरोधाच्च । किंच सत्यशब्देनासद्व्यावृत्तिद्वारायद्बोधितंतदेवज्ञानादिपदेनाज्ञानादिव्यावृत्तिद्वाराबोध्यतेऽन्यद्वा । आद्ये ज्ञानादिपदवैयर्थ्यं । द्वितीये सविशेषत्वं । नचद्वारविकल्पः सत्यादिशब्दानांनित्यवच्छ्रवणात् । एकस्मिन्प्रयोगेव्रीहियवयोरिवैकस्मिन्वाक्येसत्याद्यनेकपदोपादानायोगाच्च ।

विकल्पप्रतिद्वंद्विनित्यंतद्वत् वाशब्दादिराहित्येनश्रवणादित्यर्थः । सत्यादिवाक्येव्रीहियवादिवाक्यइवविकल्पसूचकपदाभावादितिभावः । किंचनद्वारविकल्पोयुक्तः । तथाहिव्रीहियवादिविकल्पस्थलेयदाव्रीहिपुरोडाशानुष्ठानं तदानयवोपादानं यवपुरोडाशानुष्ठानकालेचनव्रीह्युपादानमितिदर्शनेनैकस्मिन्ननुष्ठानेउभयोपादानंतावन्नास्ति तद्वदिहाप्येकस्मिन्वाक्येऽनेकोपादानमयुक्तमित्याह ॥ एकस्मिन्निति ॥ मीमांसकप्रसिद्ध्याप्रयोगःअनुष्ठानं अत्रप्रयोगस्थानीयंचसत्यादिवाक्यं । किंचनद्वाराणांविकल्पो

युक्तः विकल्पप्रयोजकंह्येककार्यकारित्वं तच्चाऽस्तिव्रीहियवयोः तयोरेकयागस्वरूपनिर्वर्तकत्वात् नचैतदस्तिप्रकृते । सत्यादिपदबोध्यासत्यादिव्यावृत्तिप्रयोजनानांअनृतत्वादिभ्रांतिनिवृत्तिरूपकार्याणांभिन्नभिन्नत्वेनसत्यादिपदबोध्यव्यावृत्तीनांएककार्यकारित्वाभावादतोनविकल्पोयुक्तइत्याह ॥ अनृतत्वादीति ॥ ननुसमुच्चितानामेवसत्यादिपदबोध्यानांव्यावृत्तीनांब्रह्मस्वरूपबोधनेद्वारत्वांगीकारान्नपदांतरवैयर्थ्यमित्याशंक्यनिराकरोति ॥ नापीति ॥ अबोधनेपीति ॥ सत्यपदाभावादितिभावः ॥

अनृतत्वादिभ्रांतिनिवृत्तिरूपदृष्टकार्याणांभिन्नत्वेनव्रीहियवादिवद्विकल्पप्रयोजकस्यैककार्यत्वस्याभावाच्च । नापिसमुच्चितद्वारत्वं "विज्ञानमानंदंब्रह्मे" त्यादौअनृतव्यावृत्तेरबोधनेपिब्रह्मप्रतीतेः । "आनंदादयःप्रधानस्ये" तिसूत्रेत्वद्भाष्योक्तन्यायेनोपासनायांशाखांतरोक्तगुणोपसंहारेपिब्रह्म

प्रतीतेरिति ॥ तथाचतत्रसत्यज्ञानादिवाक्योक्तद्वारसमुच्चयाभावेपिब्रह्मप्रतीत्यानसमुच्चितद्वारत्वमित्युक्तनियमइतिभावः । ननु "विज्ञानमानंदंब्रह्मरातिर्दातुःपरायण" मितिबृहदारण्यकेऽनृतव्यावृत्तिरूपद्वारलाभायसत्यंज्ञानमितितैत्तिरीयशाखोक्तसत्यपदस्योपसंहारःकार्यइतिचेन्न । सगुणेब्रह्मण्युपासनार्थंशाखांतरोक्तगुणोपसंहारेपिनिर्गुणब्रह्मप्रमितौवाक्येनजननीयायांशाखांतरोक्तपदानपेक्षत्वात् कुतएतदितिचेत् त्वद्भाष्येतथाभाषितत्वादित्याह ॥ आनंदादयइति ॥ प्रधानस्यसगुणस्यब्रह्मणउपास

SGDF Foundation

नार्थमेवआनंदादयोगुणाउपसंहर्तव्या नतुप्रधानस्यनिर्गुणस्यब्रह्मणःप्रमितौशाखांतरीयपदापेक्षेतितदीयःसूत्रार्थः ॥ प्रमिताविति ॥ उपासनायामिथ्यात्वेनाविद्यमानगुणविषयकत्वात्प्रमितेस्तुतदभावादितिभावः । ननुशाखांतरोक्तगुणोपसंहारंविनाउपासनायाअसिद्धिवत्पदांतरंविनाब्रह्मप्रमित्यसिद्धेस्तत्सिद्ध्यर्थेपदांतरोपसंहारोप्यत्रापेक्ष्यतइत्यतआह ॥ सत्यादीति ॥ गुणोपसंहारस्यतत्तद्गुणोपासनार्थत्ववत्पदांतरस्यतत्तत्प्रकारकप्रमित्यर्थत्वानंगीकारात्विशेष्यमात्रसिद्धेश्चलक्षणयैकेनापिपदेनसंभवान्नपदांतरोपसंहारापेक्षेत्यर्थः । ननुश्रृंगग्राहिकयाब्रह्मणोनुद्देश्यत्वाल्लक्षणमुखेनतदुपदेष्टव्यं सत्यत्वादिकंचनप्रत्येकंब्रह्मलक्षणं घ

-प्रमितौवाक्यस्यशाखांतरानपेक्षत्वाच्च सत्यादिपदानांप्रत्येकंलक्षकत्वेनप्रत्येकंलक्ष्यब्रह्मबोधकत्वाच्च सत्यत्वादेःप्रत्येकंलक्षणत्वाच्च । नहिप्रकृष्टत्वादिकमिवसत्यत्वादिकंप्रत्येकमतिव्याप्तं तस्मान्नव्यावृत्तिर्द्वारं । एतेन चंद्रंशाखेवब्रह्मव्यावृत्तिर्द्वारतयाबोधयतीतिनिरस्तं ।

टादावतिव्याप्तेरतःसमुच्चितमेवलक्षणमतःसमुच्चि(ताएवव्यावृत्तयोद्वा)तमेवव्यावृत्तितयाद्वारमित्यतआह ॥सत्यत्वादेरिति॥ ननुसत्यत्वादेर्घटादावपिसत्वेनातिव्याप्तत्वान्नप्रत्येकंब्रह्मलक्षणत्वमितिचेत्तत्राह ॥ नहीति ॥ यथाप्रकृष्टत्वादिकमतिव्याप्तत्वात्तन्नप्रत्येकंलक्षणं किंतुमिलितमेव एवंसत्वादीनांप्रत्येकंब्रह्मलक्षणत्वेपिनातिव्याप्तिः । अत्रह्यबाध्यत्वादिरूपपारमार्थिकत्वमेवसत्वशब्दार्थोनतुकुंभाद्यनुगताजातिरतोनतस्यातिव्याप्तिप्रसक्तिः। एवंज्ञानादिपदेपिबोद्धव्यमितिभावः ॥ एतेनेति ॥ प्रत्येकं

SGDF
Sri Gargeshwari Digital Foundation

समुच्चितानांवाव्यावृत्तीनामद्वारत्वेनेत्यर्थः । ब्रह्मेतिद्वितीयांतं । द्वारतया द्वारीभूय ॥ उपलक्षणतयेति ॥ नविशेषणतया येनसखंडार्थत्वंस्यादितिभावः । एतेनेत्युक्तंविशदयति ॥ काकवदिति ॥ उपलक्षणस्यैवप्रकारत्वादितिभावः ॥ ज्ञातत्वेने ति ॥ अविद्याद्यध्यासाधिष्ठानत्वादिनेत्यर्थः । स्वप्रतिपादितेव्यावृत्तेर्द्वारत्वाभावरूपार्थेऽनुव्याख्यानंसंमतित्वेनोदाहरति ॥ तदुक्तमिति ॥ अत्रव्यावृत्तेर्द्वारत्वनिराकरणाप्रतीतेर्व्यावृत्त्येतिपदंव्याचष्टे ॥ व्यावृत्त्येति ॥ तदुपदेशइति ॥ स्वतंत्राया

एतेन सत्यत्वादिकंव्यावृत्तिर्वाब्रह्मबोधनेउपलक्षणतयोपादीयतइतिनिरस्तं काकवद्गृहमित्यादिवत् सखंडार्थत्वापत्तेः उपलक्षणात्प्रागेवब्रह्मणोज्ञातत्वेनोपलक्ष्यत्वायोगाच्च । तदुक्तं "सत्यज्ञानादिके प्येवंनव्यावृत्त्याप्रयोजनं। व्यावर्त्यस्याविशेषत्वेतदखंडंचखंडित" मिति। व्यावृत्त्याद्वारभूतयेत्यर्थः। टीकायांतु व्यावृत्तिःकिंब्रह्मविशेषणत्वेनबोध्या स्वतंत्रावा आद्येसखंडत्वं अंत्येब्रह्मजिज्ञासुंप्र तितदुपदेशोसंगतइतिव्याख्यातं । नचात्रव्यावृत्तिवैशिष्ट्यस्यार्थिकत्वेनशाब्दार्थस्यनसखंडत्वं

व्यावृत्तेरुपदेशइत्यर्थः । तत्रप्राप्तानुपपत्तिपरिहारेणतद्व्याख्यानमुपपादयति ॥ नचेति ॥ यदुक्तंव्यावृत्तेर्ब्रह्मविशेषणत्वेनबोध नेब्रह्मणःसखंडत्वमिति तदयुक्तं सत्यादिपदैस्तावत्सत्यत्वादिविशिष्टंबोध्यते तच्चनिर्गुणत्वश्रुतिविरुद्धमितितदन्यथानुपपत्त्या कल्प्यमानायाव्यावृत्तेःशाब्दत्वाभावेनआर्थिकत्वात् । आर्थिकव्यावृत्त्यासत्यादिपदैर्लक्षणयाबोधितब्रह्मस्वरूपमात्रस्यसखंडत्वा

SGDF
Sri Gargeshwari Digital Foundation

योगात् । शाब्दबोधेशब्दवृत्त्युपस्थापितार्थस्यैवविशेषणत्वात् । अतआद्येसखंडत्वमित्येतदयुक्तमित्यर्थः ॥ अर्थादिति ॥ अर्थादन्यथानुपपत्त्याप्राप्तोयोर्थःसचोदनार्थोवाक्यार्थोनेत्यर्थः ॥ मानांतरादिति ॥ अपोहोऽन्यापोहोमानांतरात्अन्यथानुपपत्तिरूपात्प्रतीयते नशब्दवृत्त्या यतस्तेनकारणेनापोहःशाब्दोनभवतीत्यर्थः ॥ आर्थिकेनापीति ॥ शाब्दज्ञानस्यआर्थिकविशेषणाविषयत्वेपिशब्दबोध्यस्यब्रह्मणोवस्तुगत्याऽन्यथानुपपत्तिरूपमानांतरलभ्यविशेषणवत्त्वेननिर्विशेषत्वरूपाखंडार्थत्वहानिरेवे

"यश्चार्थादर्थोनसचोदनार्थ" इतिन्यायात् "मानांतरादपोहस्तुनशाब्दस्तेनसस्मृत" इतिसुरेश्वरोक्तेश्चेतिवाच्यं आर्थिकेनापिविशेषणेनब्रह्मणोऽखंडत्वहानेः। अनंतशब्देनांतवद्व्यावृत्तेःसाक्षादुक्तेश्च शब्दस्यव्यावर्तकवैशिष्ट्यातात्पर्येआर्थिकव्यावृत्त्यऽसिद्धेरुक्तत्वाच्च । एतेन "लक्ष्यार्थभेदाभावेपिव्यवच्छेद्य(स्यभे)विभेदतः । विज्ञानानंदपदयोःपर्यायव्यर्थतेकुत" इत्यानंदबोधोक्तमपास्तं ।

तिटीकाभिप्रायः ॥ साक्षादुक्तेश्चेति ॥ उक्तंचैतत्तैत्तिरीयवार्त्तिके "अनंतेनांतवद्वस्तुव्यावृत्त्यैवविशेषित"मिति। बोध्यतइतिशेषः । किंचव्यावृत्तेर्ब्रह्मविशेषणत्वेनबोधपक्षेआर्थिकव्यावृत्त्यासखंडार्थत्वाभावेपिसत्यादिपदस्यव्यावर्तकसत्यत्वाद्यनर्पणेऽसत्यत्वादिव्यावर्तकत्वानुपपत्तेस्तदर्थंसत्यत्वादिविशेषणेंऽगीकार्येसखंडत्वमितिटीकार्थइत्याशयेनाह ॥ शब्दस्येति ॥ एतेनेति ॥ तात्पर्यतोव्यावर्तकवैशिष्ट्यार्पणंविनाव्यावृत्तिसिद्ध्यभावेनेत्यर्थः ॥ लक्ष्यार्थेति ॥ विज्ञानानंदपदयोर्लक्ष्यार्थभेदाभावेपितद्व्य ॥ ४५९ ॥

वच्छेद्यस्यअज्ञानत्वव्यावृत्तेरनानंदत्वव्यावृत्तेश्चभेदतइत्यर्थः । तथाचाज्ञानत्वानानंदत्वव्यावृत्त्योर्भिन्नयोःसत्त्वान्नपर्यायत्वं नापिव्यर्थत्वं । अज्ञानत्वादिव्यावृत्त्याव्यवच्छेद्यस्यअज्ञानत्वादिभ्रमस्यभिन्नस्यसत्त्वेनफलभेदादित्यर्थः । वेदांतानामखंडार्थत्वेपदांतरवैयर्थ्यपरिहारप्रकारंदूषयितुमनुवदति ॥ नवीनास्त्विति ॥ सत्यादिपदानांतावल्लक्षणयाब्रह्मबोधकत्वमस्ति तत्रलक्षणापदसमुदायएवांगीकृता नैकस्मिन्पदे अतःसमुदितानामेवसत्यादिपदानांलक्षकत्वान्नपदांतराणांवैयर्थ्यं । ननुपदसमुदायेलक्षणाकुत्रदृष्टेतिचेन्न गंभीरायांनद्यांघोषइत्यत्रगंभीरनदीपदयोर्विशेषणविशेष्यभावेनादावन्वयबोधानंतरंसमुदितयोर्गंभीरनदी

नवीनास्तु गंभीरायांनद्यांघोषइत्यत्रगंभीरनद्योरन्योन्यमन्वयबोधानंतरंगंभीरनदीपदयोरिवसमुदितानांसत्यादिपदानांलक्षकत्वान्नवैयर्थ्यं।

पदयोरेवतीरलक्षकत्वमंगीकृत्यपदांतरवैयर्थ्यंपरिह्रियते तत्राप्येकस्यैवपदस्यलक्षकत्वमंगीकृत्यपदांतरवैयर्थ्यांगीकारेउद्देश्यायाः गंभीरनदीसंबंधितीरप्रतीतेरभावप्रसंगात् एवंप्रकृतेपीत्याह ॥ गंभीरायामिति ॥ गंभीरनदीपदयोरन्योन्यमन्वयबोधानंतरमित्येतदुत्तरत्रदार्ष्टांतिकेएतन्न्यायासंभवमुपपादयितुमितिद्रष्टव्यं । वाक्यस्यलक्षकत्वादित्यनुक्त्वासमुदितानामित्युक्तौकिंनिमित्तं एवमपिवाक्यस्यैवलक्षकत्वप्राप्तेरितिचेत्न गंभीरायांनद्यांघोषइत्यत्रवाक्यलक्षकत्वोक्तौतदंतर्गतघोषपदस्यापिलक्षकत्वापत्तेः । तच्चानिष्टं घोषपदस्यमुख्यार्थात्यागात् गंभीरनदीपदयोर्लक्षकत्वोक्तौचपदसमुदायस्यलाक्षणिकत्वलाभइतिसंप्रदायोवगं

SGDF
Sri Gangadhar Digital Foundation

तव्यः ॥ एकैकस्यैवेति ॥ गंभीरपदस्यवा नदीपदस्यवेत्यर्थः ॥ शक्यासंबंधिनइति ॥ उद्देश्यप्रतीतिविषयगंभीरनदीसंबंधितीरस्यनदीपदशक्यकेवलनदीसंबंधित्वाभावात् गंभीरपदशक्यकेवलगंभीरसंबंधित्वाभावाच्चेत्यर्थः ॥ तत्रेति ॥ गंभीरायां नद्यांघोषइत्यत्रादौगंभीरनदीपदयोरन्योन्यमन्वयबोधवदिहसत्यज्ञानपदयोस्तदभावादित्यर्थः । सत्यंज्ञानमनंतमितिपदानांत्रयाणांसमुदितानांलक्षकत्वोक्तौयत्रैतत्पदत्रयंतत्रैवलक्षणयाब्रह्मोपस्थितिरन्यत्रतुनास्तीत्युक्तंस्यात् अस्त्वितिचेत्तत्राह ॥ सत्य

त(त्रा)स्याप्येकैकस्यैवलक्षकत्वेशक्यासंबंधिनोगंभीरनदीतीरस्याप्रतीतिप्रसंगादित्याहुः । तन्न । तत्रगंभीरनद्योरिवेहसत्यज्ञानयोरन्योन्यमन्वयाबोधनात् । "सत्यंज्ञानं" "विज्ञानमानंदंब्रह्मे"त्यादाव(न्यो)न्यानपेक्षाणामेवसत्यादिपदानांब्रह्मलक्षकत्वदर्शनाच्च । गंभीरपदेनगंभीरसंबंधितीरस्येवइहपदांतरेणाधिकस्यालाभाच्च । तत्रापिगंभीरनद्योरन्वयबोधानंतरंगंभीरान्वितनदीबोधकेनदीपदएवलक्षणयासर्वोपपत्तौपदद्वयेएकस्यालक्षणायालक्षणाद्वयस्यवाऽकल्प्यत्वाच्च ।

मिति ॥ अन्येति ॥ अनंतानंदपदेत्यर्थः । विज्ञानमानंदमित्यत्रसत्यपदानपेक्षाणांविज्ञानादिपदानामित्यपिद्रष्टव्यं । "आनंदादयःप्रधानस्ये"तिसूत्रेत्वद्भाष्योक्तन्यायेनपदांतरोपसंहारस्यानंगीकारादितिभावः । ननुयत्रवाक्येयावंतिपदानितत्रतावतांपदानांसमुदायस्यलक्षकत्वमंगीकृतमितिनदोषइत्यस्वरसादाह ॥ गंभीरेति ॥ तथाचदृष्टांतवैषम्यमितिभावः ॥ गंभीरान्वितनदीबोधकइति ॥ पदानामन्विताभिधानांगीकारादितिभावः ॥ सर्वेति ॥ गंभीरनदीसंबंधितीरप्रतीत्युपपत्तावित्यर्थः । पद

द्वयेएकस्यालक्षणायावापदद्वयेलक्षणाद्वयस्यवेतिमतभेदेनोक्तमितिज्ञातव्यं । किंचपदसमुदायेलक्षणांगीकारेवाक्येलक्षणांगीकारप्राप्त्यालक्षणायाःपदवृत्तित्वसाधकानुमानविरोधइत्याह ॥ लक्षणापिहीति ॥ एवमन्यत्रापीति ॥ दार्ष्टांतिकेपिसत्यान्वितार्थबोधकेज्ञानपदएवलक्षणाऽस्तुनपदसमुदायइत्यर्थः । ननु "गच्छगच्छसिचेत्कांतपंथानःसंतुतेशिवाः । भूयान्ममापितत्रैवजन्मयत्रगतोभवानि" तिवाक्येनप्रियायामरणंप्रतीयते तत्रलक्षणैवेतिवक्तव्यं तद्वाचकपदाभावात् अतःपदसमुदायेलक्षणा

लक्षणापिहिपदवृत्तिःवृत्तित्वात्शक्तिवत् । एवमन्यत्राप्यूह्यं । "गच्छगच्छसिचेत्कांते" त्यत्रतुजन्मनामृत्यनुमितिः । प्रियामृतिहेतुत्वाच्चगमनंनकार्यमित्यनुमितानुमितिरेव, नतुवाक्येलक्षणा । अनन्यलभ्योहिशब्दार्थः । विषंभुंक्ष्वेत्यादावपिप्रकृताच्छत्रुगृहभोजनात्विषभक्षणस्येष्टसाधनतोक्त्याभोजनस्यानिष्टसाधनताआक्षिप्यते नतुवाक्येनभोजनाकर्तव्यतालक्ष्यते ।

सिद्धिरितिचेत्तत्राह ॥ गच्छेति ॥ अनुमितमर्थंलिंगीकृत्यपुनर्जायमानानुमितेरनुमितानुमितित्वं । नन्वनुमितिलभ्येप्यर्थेलक्षणाप्यस्त्वित्यतआह ॥ अनन्येति ॥ शब्दार्थः शब्दवृत्तिलभ्यार्थः । अन्यथाअपूर्वताभंगइतिभावः । ननुविषंभुंक्ष्वेतिवाक्येनद्विषदन्नंभोक्तव्यमितिज्ञानंजायते तथाचवाक्येलक्षणासिद्धिः एवंसत्यज्ञानादिवाक्येपीत्याह ॥ विषमिति ॥ प्रकृतात् प्रसक्तात् ॥ भोजनादिति ॥ भोजनापेक्षयेत्यर्थः ॥ उक्त्येति ॥ इष्टसाधनत्वोक्त्यन्यथानुपपत्त्येत्यर्थः ॥ नत्विति ॥ अनन्य

SGDF
Sri Gangadhar Digital Foundation

लभ्योहिशब्दार्थइतिभावः। भोजनस्य शत्रुगृहभोजनस्य। अस्तुवाविषंभुंक्ष्वेत्यत्रवाक्येलक्षणा तथापितन्मध्येएकंपदंवाचकमेवांगीक्रियते नसर्वेषामपिपदानामेकार्थलक्षकत्वं नहिसत्यादिवाक्येत्वयैवंवक्तुंशक्यमित्याह ॥ यद्वेति ॥ विधिप्रत्ययः भुंक्ष्वेत्यत्रविद्यमानोलोड्रूपः। निषेधे कर्तव्यत्वनिषेधे। मुख्यएवेति। तथाचानिष्टसाधनंभोजनंनकर्तव्यमितिवाक्यार्थोद्रष्टव्यः। "क्रुधद्रुहेर्ष्यासूयार्थानांयंप्रतिकोप" इतिक्रुधधातुयोगेचतुर्थीविधानान्मह्यंक्रुद्धइत्युक्तं ॥ अनुमितिरेवेति ॥ अनुमितंक्रोधं

यद्वातत्रविषशब्देनानिष्टसाधनेविधिप्रत्ययेनचनिषेधेलक्षितेनिषेध्येभोजनेभुजिधातुर्मुख्यएवेतिन
सर्वपदानामेकार्थलक्षकता। वस्तुतस्त्वयमिदानींमह्यंक्रुद्धःआसत्वेसतिप्रमाणविरुद्धकर्तव्यताभि
धायित्वात्। क्रोधश्चास्यसंनिहितभोजनादेव। दृष्टहेतुत्यागेनादृष्टकल्पनायोगात्। अतोमयेदंनकार्य
मित्यनुमितिरेवात्रनलक्षणा। अर्धमंतर्गृहमर्धंबहिर्गृहमित्यत्रापिधूमेनाग्निरिवार्धस्यांतस्त्वेसतिअ
र्धस्यबहिष्ट्वेनवाक्यार्थेनांतरालप्रदेशआक्षिप्यते नतुसमुदायेलक्षणा। अनन्यलभ्यत्वाभावात्।

हेतूकृत्याकर्तव्यत्वानुमितिरित्यर्थः ॥ नलक्षणेति ॥ अनन्यलक्ष्यत्वाभावादितिभावः। ननुलोकेअर्धमंतर्गृहंअर्धंबहिर्गृहमित्युच्यते वेदेपि "अर्धमंतर्वेदिमातव्यमर्धंबहिर्वेदी" ति। उभयत्रापिगृहांतरालप्रदेशोवेद्यंतरालप्रदेशश्चवाक्येनलक्ष्यमाणोदृष्टइतिवाक्यलक्षणेतिचेत्तत्राह ॥ अर्धमिति ॥ देवदत्तस्यअर्धमर्धभागः अंतर्गृहंगृहस्यांतरस्ति अर्धंबहिर्गृहंगृहाद्बहिरस्तीत्यर्थः।

अंतस्त्वेनांतर्विद्यमानत्वेनबहिष्ट्वेनबहिर्विद्यमानत्वेन आक्षिप्यते अर्धस्यांतस्त्वंअर्धस्यबहिष्ट्वमंतरालप्रदेशंविनानुपपद्यमानंतंगमयतीत्यर्थः ॥ एवमिति ॥ मापनेक्रियमाणेसति अर्धंवेद्यंतर्यथास्यादर्धंवेद्याबहिर्यथास्यात्तथामातव्यमित्यर्थः ॥ नेयमिति ॥ तत्राप्यर्धस्यांतस्त्वेनअर्धस्यबहिष्ट्वेनवेद्यंतरालप्रदेशआक्षिप्यते नतुपदसमुदायेलक्षणेत्यर्थः। किंचवैदिकोदाहरणस्थलेपिनसर्वपदसमुदायवाक्यस्यलक्षकता एकस्यमातव्यमितिपदस्यमुख्यार्थांगीकारात् सत्यादिवाक्येत्वयैवमंगीकर्तुमशक्यत्वादित्याह ॥ तत्रापीति ॥ ननुवायुर्वैक्षेपिष्ठादेवतेत्याद्यर्थवादेप्राशस्त्यप्रतिपत्तयेवाक्यएवलक्षणांगीकार्या प्रत्येकंपदात्तदनुपस्थितेरित्याशं

एव(मर्धमंतर्वेदिमातव्यमर्धंबहिर्वेदी)तिवैदिकोदाहरणमपिनेयं। तत्राप्यंततोलिंङादे
रभिधायकत्वाच्च। "वायुर्वैक्षेपिष्ठे" त्याद्यार्थवादिकपदसंघस्याप्यावयोर्मतेकर्मणिक्षि
प्रदेवताप्रसादहेतुत्वरूपतत्तत्पदार्थसंसर्गबोधकत्वमेव नतुतदन्यप्राशस्त्यलक्षकत्वं।

क्याह ॥ वायुर्वाइति ॥ नत्विति ॥ पदार्थसंसर्गातिरिक्तस्यप्राशस्त्यस्याभावादित्यर्थः। अयमाशयः "वायव्यंश्वेतमालभेतभूतिकामोवायुर्वैक्षेपिष्ठादेवता वायुमेवस्वेनभागधेयेनोपधावतिसएवैनंभूतिंगमयती" त्यर्थवादस्यायमर्थः वायुःशीघ्रतमादेवतातंवायुंप्रतियजमानःस्वेनदत्तेनहविर्लक्षणेनभागेनगच्छति स्वयमेवयजमानोहविर्भागरूपेणदेवतांप्रतिगच्छति सएवयजमानंभूतिंगमयति यथाकश्चिद्गृहस्थोभ्यागतायसत्कारंकरोतितद्वदिति। अत्रवायूद्देश्यकस्यहविस्त्यागलक्षणस्ययागस्यक्षिप्रफलप्रद

SGDF
Sri Gargeshwari Digital Foundation

वायुप्रसादहेतुत्वमेवप्राशस्त्यं इदंचतत्तत्पदार्थसंसर्गरूपमेवेति । नन्वर्थवादेदेवताप्रसादहेतुत्वंकर्मणोनोच्यते अतस्तदतिरिक्तप्राशस्त्यलक्षकत्वमर्थवादवाक्यस्यांगीकार्यमित्यतआह ॥ किंचेति ॥ तादृशस्थलेलिंङाद्यभिधेयकार्यान्वयानुपपत्त्याहिप्राशस्त्यलक्षणांगीकार्या एवंचतत्रैकस्यलिङः कार्यवाचकत्वांगीकारान्नसर्वपदानांलक्षकत्वमंगीक्रियते नचेहसत्यादिवाक्येतथांगीकर्तुंशक्यमितिभावः । ननुसर्वपदानांलक्षकत्वेपिसत्यादिवाक्यस्याननुभावकत्वंकुतः लक्षकपदानामपिलक्ष्यार्थानुभावकत्वांगीकारादित्यतउक्तं ॥ लक्षकपदान्यननुभावकानीतिपक्षइति ॥ ननुमयापिसत्यज्ञानादिवाक्ये लक्ष्यपरस्यब्रह्मपदस्यवाचकत्वांगी

किंचतत्रलिंङाद्यभिधेयकार्यान्वयानुपपत्तिरिवेहसर्वपदानामपिलक्षकत्वान्नाभिधेयान्वयानुपपत्तिरूपंलक्षणाबीजमस्ति । अपिचसर्वपदानांलक्षकत्वेलक्षकपदान्यननुभावकानीतिपक्षेसत्यादिवाक्यस्यानुभावकत्वंनस्यात् । यदिचलक्ष्यपरंब्रह्मपदंवाचकंतर्हियौगिकंतदेवसखंडार्थंस्यात् ।

कारान्नसर्वपदानामपिलक्षकत्वमंगीकृतमितिचेत्तत्राह ॥ यदिंचेति ॥ ननुब्रह्मपदस्यधर्मसंसर्गाप्रतिपादकत्वात्तद्वाच्यत्वांगीकारेकथंसखंडार्थत्वमित्यतउक्तं ॥ यौगिकमिति ॥ "अथकस्मादुच्यतेब्रह्मेतिबृहंतोह्यस्मिन्गुणा" इतिश्रुत्यातस्ययोगवृत्त्यागुणसंसर्गप्रतिपादकत्वावगमादितिभावः । किंचब्रह्मपदमयौगिकमेवास्तु तथापिसखंडार्थत्वमेव । तथाहि सत्यादिपदेषुमुख्यार्थतयावधृतब्रह्मशब्दार्थान्वयानुपपत्तिर्नास्ति अस्तिवा। आद्ये नतर्हिंतेषुलक्षणा तद्बीजाभावात् । यदिसास्ति तर्हिंब्रह्मपदेसत्यादि

SGDF
Sri Gargeshwari Digital Foundation

पदान्वितार्थबोधकत्वमावश्यकंस्यात् अन्वयाबोधेप्रसक्तेतद्बोधोपपत्त्यर्थमेवसत्यादिपदेषुलक्षणायाःकल्पितत्वात् अतोब्रह्मपदं सत्यादिपदांतरान्वितस्वार्थपरं तथाचसखंडार्थमेवेत्याह ॥ ब्रह्मपदस्येति ॥ नन्वभिधेयान्वयानुपपत्त्यैवनलक्षणा तथात्वेयष्टीः प्रवेशयेत्यादौतदभावप्रसंगात् किंनाम तात्पर्यानुपपत्त्यापि प्रकृतेचस्वरूपमात्रतात्पर्यस्यसर्वपदानांलक्षणांविनाऽसंभवात्सर्वप दानामपिलक्षकत्वमेव नाभिधेयान्वयानुपपत्त्यालक्षणायामिवकस्यचित्पदस्यवाचकत्वावश्यंभावइत्याशंक्यनिराकरोति ॥ नचे ति ॥ यष्टीःप्रवेशयेत्यादावपिनतात्पर्यानुपपत्त्यालक्षणा किंत्वन्यथानुपपत्त्यैवेत्याह ॥ तत्रापीति ॥ प्रकृतानां भोजनप्रकरण

ब्रह्मपदस्यपदार्थांतरान्वयार्थमेवलक्षणाश्रयणेनपदार्थांतरान्वितस्वार्थपरंचस्यात् ।
नच "यष्टीःप्रवेशये" त्यादाविवतात्पर्यानुपपत्त्यैवलक्षणानत्वन्वयानुपपत्त्येतिवा
च्यं । तत्रापिभोजनादिकर्तृत्वेनप्रकृतानांप्रवेशनान्वयानुपपत्तेरेवतद्बीजत्वात् ।

प्रसक्तानां । ननुकथमत्रान्वयानुपपत्त्यालक्षणा गंगायांघोषइत्यादौसमभिव्याहृतपदार्थान्वयानुपपत्त्यालक्षणादृष्टा ॥ यष्टीःप्रवे शयेत्यत्रचभोक्तृपदसमभिव्याहाराभावेनसमभिव्याहृतपदार्थान्वयानुपपत्तिर्नास्तीतिचेत् ॥ अस्त्यत्रसंप्रदायविशेषः ॥ यथागं
न्या० ७८ गायांघोषइत्यत्रसमभिव्याहृतपदार्थान्वयस्यप्रत्यक्षबाधितत्वाल्लक्षणा एवमिहापिसमभिव्याहृतपदार्थान्वयस्ययष्टिकर्मकप्रवेशन क्रियांसंसर्गस्यप्रकरणबाधितत्वेनान्वयानुपपत्त्यैवलक्षणा । तथाचभोजनादिकर्तृत्वेनप्रकृतानांप्रवेशनेनान्वयानुपपत्तेरेवतद्बी
या

SGDF
Sri Gargeshwari Digital Foundation

जत्वादिति ।वाक्यमित्थंयोज्यं । अत्रयष्टिकर्मकप्रवेशनक्रियासंसर्गरूपपदार्थसंसर्गस्येतिशेषः । एवंचयष्टिकर्मकप्रवेशनक्रियासं
सर्गरूपसमभिव्याहृतपदार्थान्वयस्यभोजनकर्तृत्वेनप्रकृतायेभोक्तारःतत्कर्मकप्रवेशनान्वयेनप्रकरणसिद्धेनानुपपत्तेर्बाधस्यसत्त्वे
नसमभिव्याहृतपदार्थान्वयानुपपत्तेरेवलक्षणाबीजत्वादितिभावः । किंचस्वरूपमात्रेतात्पर्यसिद्धौतदन्यथानुपपत्त्यासत्यादिपदा
नांलक्षणास्यात् नचैवमस्तीत्याह ॥ इहेति ॥ पदार्थमात्रस्यसिद्धत्वेनतत्प्रतीतीच्छयोच्चरितत्वरूपतात्पर्यस्यतत्रायोगादित्यर्थः
॥ एतेनेति ॥ स्वरूपमात्रेतात्पर्यायोगवत्स्वरूपमात्रेवाक्यप्रामाण्यस्याप्ययोगेनेत्यर्थः ॥ वाक्येति ॥ "केवलोनिर्गुणश्चे"

इहप्राप्तेपदार्थमात्रेतात्पर्यायोगादित्युक्तत्वाच । एतेनवाक्यप्रामाण्यानुपपत्तिर्लक्षणा
बीजमितिनिरस्तं । वाक्यस्यान्वयलक्षकतातुनसंमता । अन्विताभिधानांगीकारात् ।

तिश्रुतिसिद्धंब्रह्मसत्यत्वादिविशिष्टतयाबोधयतोवाक्यस्यप्रामाण्यानुपपत्तेस्तदन्यथानुपपत्त्यासत्यादिपदानांस्वरूपमात्रेलक्षणेत्य
र्थः ॥ निरस्तमिति ॥ प्रामाण्यस्यानुपपत्त्याहितदुपपादकंकल्प्यं नचपदार्थमात्रलक्षणयावाक्यप्रामाण्यमुपपद्यते पदार्थमात्र
स्यान्यतएवसिद्धत्वेनानधिगतार्थगंतृत्वरूपप्रामाण्यायोगात् बाधितेपिपदार्थमात्रस्यसत्वाच्चेत्यर्थः । ननुगामानयेतिवाक्येनगो
कर्मकानयनक्रियाकःसंसर्गोलक्ष्यते । अन्यथातदनुपस्थितिरेवस्यात् अतोवाक्येलक्षणासिद्धिरितिचेत्तत्राह ॥ वाक्यस्येति ॥ ॥ ४६३ ॥
तर्हिकथंतद्बोधइत्यतआह ॥ अन्वितेति ॥ पदानामितरान्वितस्वार्थएवशक्त्यंगीकारेणान्वयस्यापिपदशक्तिविषयत्वेनलक्ष्य

त्वाभावादित्यर्थः ॥ अभिहितेति ॥ पदैरभिहिताःअन्योन्यान्विताःपदार्थाएवान्योन्यमन्वयंबोधयंतीत्यंगीकारेणान्वितपदा
र्थानामेवपदैरभिहितत्वांगीकारात्तन्मतेपिनान्वयोलक्ष्यइत्यर्थः । अन्वयोलक्ष्यतइतिपक्षेपिनवाक्यस्यान्वयलक्षकत्वं किंनाम
पदस्यैवेत्याह ॥ अन्वयइति ॥ नन्वेकेनैवपदेनकथमन्वयबोधइत्यतउक्तं ॥ पदांतरैरिति ॥ प्रतियोगीति ॥ अन्वयनिरू
पकपदार्थेत्यर्थः । अस्तुवाक्यस्यलक्षकत्वं तथापिप्रकृतेसत्यादिवाक्येतन्नसंभवति तथाहि गामानयेत्यस्माद्गोकर्मकानयनक्रिया

अभिहितान्वयवादिभिस्तार्किकैरप्यन्वयेलक्षणानंगीकाराच । अन्वयोलक्ष्यतइतिपक्षेपिपदांतरैः
प्रतियोग्युपस्थितौप्रधानस्यैकपदस्यअन्वयलक्षकत्वोपपत्तेश्च । गामानयेत्यस्मात्गामानयशुक्लांदं
डेनेतिवाक्यस्येवेहपदांतरप्रयुक्तस्यअधिकलक्षकत्वाभावाच । अस्तुवान्यत्रपदसंघेलक्षणा इह
तुन तथाहि यदिकृत्स्नंसत्यादिवाक्यंलक्षकंतर्हितस्यविशिष्टार्थत्वेऽनंतब्रह्मशब्दविरोधोक्तिः ।

कसंसर्गलक्षकात्गामानयशुक्लांदंडेनेत्यधिकपदप्रयोगेसतिशुक्लगोकर्मकदंडकरणकानयनक्रियाकसंसर्गोधिकःप्रतीयते प्रकृतेतु
"विज्ञानमानंदंब्रह्मे" तिवाक्यापेक्षयाऽधिकपदांतरयुक्तस्यापिसत्यज्ञानादिवाक्यस्यस्वरूपमात्रबोधकत्वेनाधिकलक्षकत्वाभावा
द्वाक्येलक्षणांगीकारोवृथैवेत्याह ॥ गामानयेत्यस्मादिति ॥ इह सत्यज्ञानादिवाक्ये ॥ तर्हितस्येति ॥ सर्वेषांसत्यादिपदा
नांलक्षकत्वात्तन्मध्यगतयोरनंतब्रह्मशब्दयोरपिलक्षणयास्वरूपमात्रपरत्वेनसर्वतोव्यावृत्तवस्तुपरत्वाभावात्तस्यसत्यज्ञानादिबा

SGDF

क्यस्यसत्यत्वादिविशिष्टार्थप्रतिपादकत्वेऽनंतब्रह्मशब्दयोर्बाधकत्वायोगेनतच्छब्दविरोधोक्तिरयुक्तास्यादित्यर्थः ॥ सत्यादीति ॥ व्यावर्तकस्यसत्यत्वादेर्ब्रह्मण्यबोधनेतस्मिन्ननृतादिव्यावृत्त्यसिद्धेरित्यर्थः ॥ विज्ञानमिति ॥ विज्ञानादिपदानांविज्ञानस्वरूपाद्यबोधकत्वादितिभावः ॥ एकमेवेति ॥ एकादिपदानांविज्ञानस्वरूपत्वाद्यबोधकविशेष्यमात्रपरत्वेननानात्वानिषेधकत्वादित्य

सत्यादिपदैरनृतादिव्यवच्छेदोक्तिः "विज्ञानमानंदंब्रह्मसत्यंज्ञान" मित्यादिश्रुतिर्ब्रह्मणोविज्ञानाद्यात्मकत्वेप्रमाणमित्युक्तिः "एकमेवाद्वितीय" मित्यादौसजातीयविजातीयस्वगतनानात्वनिषेधोक्तिरित्याद्ययुक्तंस्यात् । सत्वाद्युद्देशेनब्रह्मत्वाविधानाद्ब्रह्मबुभुत्सानिवृत्तिश्चनस्यात् । सगुणसप्रपंचवाक्ययोरपिलक्षणयाऽखंडार्थपरत्वसंभवेनसगुणनिर्गुणादिविद्याविभागःनिर्गुणादिवाक्यैःसगुणादिवाक्यानांबाधइत्यादिचासंगतंस्यात् । "तदैक्षत सएषोऽनंत" इत्यादीनामपिवाक्यलक्षणयाऽखंडपरत्वेनेक्षणादौतात्पर्याभावेनेक्षणानंतत्वादिलिंगैःप्रधानाकाशादिनिरासकेसत्याद्यधिकरणानारंभश्चस्यात् ।

र्थः ॥ सत्यादीति ॥ बुभुत्साप्रयोजकधर्मिज्ञानानधिकविषयकत्वात्सत्यज्ञानादिवाक्यजन्यज्ञानस्येत्यर्थः ॥ सगुणेत्यादि ॥ एकार्थत्वेनाविरोधादितिभावः ॥ तदैक्षतेत्यादि ॥ "सदेवसोम्येदमग्रआसीदेकमेवाद्वितीयंतदैक्षततत्तेजोऽसृजते" त्यत्रस

SGDF Sri Gargeshwari Digital Foundation

च्छब्दंप्रधानंब्रह्मवेतिविशयेप्रधानमेवेतिप्राप्तेसच्छब्दनिर्दिष्टेईक्षणकर्तृत्वश्रवणात्तस्यचजडेऽसंभवाद्ब्रह्मैवसच्छब्दमितीक्षत्यधिकरणेनिर्णीतं । तथा "सर्वाणिहवाइमानिभूतान्याकाशादेवसमुत्पद्यंतेसएषोनंत" इत्यत्रआकाशो भूतंपरमात्मावेतिसंशयेभूतमितिप्राप्तेऽनंतत्वादिलिंगेनपरमात्मैवेत्याकाशाधिकरणेनिर्णीतं तदेतत्सर्वमप्ययुक्तंस्यात् । "तदैक्षत सएषोनंत" इत्यादीनामपिवाक्यानांलक्षणयाचिन्मात्रपरत्वेनईक्षणानंतत्वादि(धर्मबोधनेतात्पर्याभावादितिभावः)लिंगानर्पकत्वादितिभावः । कृत्स्नस्यापिवेदां

कृत्स्नस्यब्रह्मकांडस्यवाक्यलक्षणयाशून्यादिपरत्वं कृत्स्नस्यचकर्मकांडस्यचैत्यवंदनादिपरत्वं निर्विशेषधर्मिपरत्वंवास्यादित्यलं । तस्मादखंडार्थत्वेपदांतरवैयर्थ्यंदुर्वारं ॥
अपिच सत्यानंदादिपदलक्ष्यत्वेब्रह्मणोनदीपदलक्ष्यस्यतीरस्यानदीत्ववदसत्यत्वानानंदत्वादिकंस्यादितिशून्यवादापत्तिः । मुक्तिश्चापुमर्थःस्यात् । आनंदानुभवाभावात् ।

तस्यलक्षणयाचिन्मात्रपरत्वेऽतिप्रसंगावाह ॥ कृत्स्नस्येति ॥ शून्यादीति ॥ तत्वतयाशून्यवाद्याद्यभिमतशून्यादिपरत्वंस्यादित्यर्थः ॥ चैत्येति ॥ कर्तव्यत्वेनबौद्धाभिमतचैत्यवंदनादिपरत्वंस्यादित्यर्थः । एवमखंडार्थत्वेपदांतरवैयर्थ्यमुपपाद्योपसंहरति ॥ तस्मादिति ॥ अनानंदत्वादिकमित्यनेनाज्ञानत्वादिसंग्रहः ॥ आनंदेति ॥ ब्रह्मणअनानंदत्वस्याननुभवत्वस्यचप्राप्तौतद्भावरूपायांमुक्तावानंदतदनुभवयोरभावापातेनतार्किकाभिमतमुक्तिवदपुरुषार्थत्वंस्यादित्यर्थः । ननुब्रह्मणःसत्यादिपदलक्ष्य

SGDF
Sri Gargeshwari Digital Foundation

त्वेपिनासत्यत्वादिकं । ननुतर्हिंनदीपदलक्ष्यस्यापितीरस्यनदीत्वंस्यादितिचेन्न वैषम्यात् नदीत्ववाचिनानदीशब्देनतदाश्रयसंबंधिनएवलक्ष्यत्वं अतस्तीरेननदीत्वं इहतुसत्तादिजातिवाचिनासत्यादिपदेनतदाश्रयव्यक्तेरेवलक्षणाऽतोब्रह्मणःसत्तासंबंधःसिध्यतीतिनतस्यासत्यत्वादिकमित्याशंकते ॥ नन्विति ॥ तदाश्रयव्यक्तेरिति ॥ नदीत्वाश्रयनदीव्यक्तेरित्यर्थः ॥ तदाश्रयेति ॥ नदीत्वाश्रयनदीव्यक्तिसंबंधिनस्तीरस्येत्यर्थः ॥ सन्घटइत्यादाविति ॥ यथासन्घटइत्यादौसच्छब्दस्यसत्ताजातिवाचित्वमेवं

ननुननदीशब्देननदीत्ववाचिनातदाश्रयव्यक्तेर्लक्षणा किंतुतदाश्रयव्यक्तिसंबधिनस्तीरस्येतितस्यानदीत्वं इहतुसन्घटइत्यादाविवसत्तादिजातिवाचिभिःसत्यादिशब्दैःतदाश्रयव्यक्तेरेवलक्षणा एवंचसत्वसंबंधस्याशाब्दत्वेपितीरस्य नद्येवब्रह्मणोपिघटस्येवसत्तयासंबंधःसिध्यति मुख्यार्थासंबंधेलक्षणायोगात् ।

सत्तादिजातिवाचिभिःसत्यादिपदैरित्यर्थः ॥ तदाश्रयेति ॥ सत्ताश्रयेत्यर्थः ॥ सत्वसंबंधस्येति ॥ यथानदीत्वस्यैवनदीशब्दबोध्यत्वेननदीतीरसंबंधस्यशब्दबोध्यत्वाभावेपितीरस्यमुख्यार्थभूतनदीत्वाश्रयनदीसंबंधाभावेलक्षणायाअयोगेनलक्षणाहेतुत्वेननदीतीरयोःसंसर्गःसिद्ध्यति यथावासन्घटइत्यत्रसत्ताजातेःसच्छब्दार्थत्वेनघटेसत्वसंबंधस्यशब्दबोध्यत्वाभावेपिसच्छब्दमुख्यार्थभूतस्यसत्त्वस्यव्यक्तिसंबंधाभावेलक्षणायाअयोगेनलक्षणाहेतुत्वेन घटेसत्वसंबंधःसिध्यति एवंप्रकृतेपिसत्यादिपदैःसत्ता

जात्यादेरेववाच्यत्वेनब्रह्मव्यक्तौतत्संबंधस्यशब्दबोध्यत्वाभावेपिसत्यपदमुख्यार्थभूतसत्तासंबंधस्यव्यक्तावभावेलक्षणायाअयोगेनमुख्यार्थभूतसत्तासंबंधस्यलक्षणाहेतुतयाऽवश्यंवाच्यत्वेनब्रह्मणःसत्वसंबंधसिद्ध्या नासत्वादिकमित्यर्थः । ननुजातिव्यक्त्योःकःसंबंधः । आवयोर्मतेसमवायाभावादित्यतआह ॥ जातीति ॥ ननुजातिव्यक्त्योस्तादात्म्येजातेर्वाच्यत्वेव्यक्तेरपिवाच्यत्वप्राप्तिस्तदाश्रयव्यक्तेरित्यादिव्यवहारानुपपत्तिश्चेतिचेन्न । भेदाभेदांगीकारेणव्यवस्थोपपत्तेरितिभावः । सत्ताजातिवाचिभिःसत्यादिपदैरित्यनेनतार्किकरीत्याजातिविशिष्टायांव्यक्तौशक्तिरित्यंगीकृत्यनदीत्वविशिष्टनदीवाचकस्यनदीशब्दस्यतदितरतीरादि

जातिव्यक्त्योश्चतादात्म्यसंबंधात् उक्तंहि "सत्वादीनांहिजातीनांव्यक्तितादात्म्यदर्शनात् । लक्ष्यव्यक्तिरपिब्रह्मसत्वादिनजहातिन;" इतीतिचेन्न । व्यक्तिःशब्दार्थइतिमते सद्व्यक्तितोन्यस्यैवलक्षणीयत्वेनब्रह्मणःसत्त्वासिद्धेः । — कल्पतरुः

लक्षकत्ववत्सत्यशब्दस्यापिसत्वविशिष्टसद्व्यक्तिवाचकत्वमंगीकृत्यब्रह्मलक्षकत्वमंगीक्रियतइत्यभिप्रेतं उतजातौशक्तिरितिभाट्टरीत्यासत्यशब्दस्यसत्ताजातिमात्रवाचकत्वमंगीकृत्यतदतिरिक्तव्यक्तिलक्षकत्वमभिप्रेतं । आद्येआह ॥ व्यक्तिरिति ॥ जातिविशिष्टव्यक्तिरित्यर्थः । सत्यशब्दस्यसत्ताविशिष्टसद्व्यक्तिवाचकत्वमंगीकृत्यब्रह्मणस्तत्पदलक्ष्यत्वांगीकारेतस्यसद्व्यक्तित्वंनसिद्ध्यति ब्रह्मणःसद्व्यक्तित्वेसच्छब्दवाच्यत्वप्राप्त्यासच्छब्दलक्ष्यत्वंनस्यात् । अतःसत्यशब्देनब्रह्मणोलक्ष्यत्वंवदतातस्यसद्व्यक्तिभिन्नत्वं

SGDF
Sri Gurgadhari Digital Foundation

गीकार्येब्रह्मणःसत्वासिद्धिरितिभावः। एवमेवानंदत्वाद्यसिद्धिरपिद्रष्टव्या। जातिविशिष्टव्यक्तौशक्तिरितिपक्षेपिब्रह्मणोलक्ष्यत्वेपि नानानंदत्वादिकमितिशंकते ॥ नन्विति ॥ जहदिति ॥ गंगात्वविशिष्टगंगारूपंस्वार्थंजहतोगंगापदस्यस्वार्थभिन्नेतीरेलक्षणे तितत्रनगंगात्वादिकमितिभावः ॥ जहदजहदिति ॥ आनंदादिपदानांयःआनंदत्वादिविशिष्टानंदादिरूपःस्वार्थःतत्रानंदत्वा दिजातिरूपैकदेशंजहतीतदेकदेशभूतानंदादिव्यक्तिमजहतीआनंदादिपदस्यस्वार्थैकदेशभूतायांआनंदव्यक्तौलक्षणांगीक्रियते। आनंदव्यक्तिरेवचब्रह्मेतितस्यनानानंदत्वादिकमित्यर्थः। विशिष्टवाचकशब्देनैकदेशलक्षणायांविशिष्टैकदेशभावएवसंबंधइत्य

ननुगंगाशब्देजहल्लक्षणा। आनंदादिशब्देषुतुजात्यंशत्यागेपिव्यक्त्यंशत्यागायो
गात्जहदजहल्लक्षणेतिकथमनानंदत्वापत्तिरितिचेन्न तत्रानंदत्वजातेरसत्वेत
द्व्यक्तेरानंदव्यक्तित्वासिद्धेः। तत्सत्यत्वस्यचौपनिषदेब्रह्मण्यशब्देनासिद्धेः। — तत्रैतौ पूर्वं

नेनोक्तंभवतीतिद्रष्टव्यं ॥ तत्रेति ॥ लक्ष्यभूतानंदव्यक्तावित्यर्थः ॥ असत्वइति ॥ जात्यंशत्यागादितिभावः ॥ असिद्धेरि ति ॥ आनंदत्वजात्याधारस्यैवानंदव्यक्तित्वादितिभावः। ननुब्रह्मण्यानंदत्वजातिरप्यस्त्येवेतिचेत्तत्राह ॥ तत्सत्यत्वस्यचेति ॥ अशब्देनेति ॥ शब्दातिरिक्तप्रमाणेनेत्यर्थः। तत्रहेतुरौपनिषदइति शब्दस्तुविज्ञानमानंदमित्यादिरधुनापिब्रह्मण्यानंदत्वादि जातिबोधकत्वेविवादापन्नइतिभावः। प्रवृत्तिनिमित्तसद्भावेनानंदपदवाच्यत्वापत्तिश्चेत्यपिद्रष्टव्यं। भट्टादिरीत्यासत्तादिजाति

SGDF
Sri Gargeshwari Digital Foundation

मात्रवाचित्वंसत्यादिशब्दानामंगीकृत्यतदाश्रयब्रह्मव्यक्तौलक्षणांगीक्रियतइतिद्वितीयपक्षेदोषमाह ॥ जातिरिति ॥ अस्मिन्प क्षेपिलक्ष्यस्यब्रह्मणःसत्वादिकंनसिद्ध्यत्येव तथाहि इदंतावद्भवान्पृष्टोव्याचष्टां सन्घटइत्यादिवाक्यंसखंडार्थं सत्यादिवाक्यंतु अखंडार्थमितिविभागःकिंनिमित्तकइति तत्रसत्पदेनघटेसत्तावैशिष्ट्यंप्रतीयते अत्रतुसत्यपदेनसत्यत्ववैशिष्ट्यंनप्रतीयतेअतोविभा गोयुक्तइतिचेन्न (जातेरेवशब्दबोध्यत्वेनतेनव्यक्तौतत्संबंधाप्रतीतेरुभयत्रापिसाम्यात् ॥ ननुस्वार्थासंबंधेलक्षणायाअयोगेनजा

जातिःशब्दार्थइतिमतेपिसन्घटइत्यादावपिशब्देनसत्तावैशिष्ट्याप्रतीतेःलक्ष णाहेतुत्वेनप्रतीतेश्चेहापिसत्वेनतद्विशिष्टार्थमिदंत्वखंडार्थमितिविभागायोगे नविभागार्थंसन्घटइत्यादितोविशेषेणसत्यादिशब्दानांलक्षकत्वार्थंचनद्यांघो षइत्यादाविवजात्याश्रयव्यक्तिसंबंधित्वेनैवब्रह्मणोलक्षणीयत्वेनसत्वासिद्धेः ।

तिवाचकसत्यपदस्यतदाश्रयघटव्यक्तौलक्षणासिध्यर्थंसत्वसंबंध) (अननुभवात् । जातेरेवशब्दबोध्यत्वेनतेनव्यक्तौलक्षणासि द्ध्यर्थं)सत्वसंबंधप्रतीतिरंगीकार्येतिचेत् । समंप्रकृतेपि । एवंसतिसन्घटइत्यस्यसखंडार्थत्वंसत्यंज्ञानमित्यादेरखंडार्थत्वमितिवि भागार्थं तथाभाट्टैर्व्यक्तिमात्रलक्षकत्वेनांगीकृतस्यापिनद्यांमीनःसन्घटइत्यादेःनद्यांघोषइत्यस्मान्मुख्यार्थत्वस्वीकारेणतदपेक्षया लाक्षणिकत्वेनस्वीकृतानांनद्यांघोषःसत्यंज्ञानमित्यादीनांविशेषतोलक्षकत्वार्थंचजात्याश्रयव्यक्तिसंबंधित्वेनैवसत्यादिपदैर्ब्रह्मणो

SGDF
Sri Gargeshwari Digital Foundation

लक्षणीयत्वेवाच्येतीरेगंगात्वाभावइवब्रह्मणःसत्वाद्यसिद्धिरेवेतिभावः । सत्तादिजातिवाचकैरपिसत्यादिपदैर्व्यक्तिमात्रंनलक्ष्य
ते किंनाम सत्तादिजातिविशिष्टव्यक्तिरेव एवंचलक्ष्यस्यापिब्रह्मणःसत्वादिसंबंधस्यशब्दबोध्यत्वात्सत्वादिकंसिध्यतीतिकेनचि
दुक्तमाशंक्यनिराकरोति ॥ एतेनेति ॥ गुणविशिष्टेति ॥ अश्वव्यक्तिमात्रस्यलक्ष्यत्वेतुतत्रशोणिमगुणोनसिध्येदितिभावः
॥ बहुव्रीहाविति ॥ लंबकर्णमानयेत्यत्रेत्यर्थः ॥ तद्विशिष्टइति ॥ अन्यथादेवदत्तमात्रानयनप्रसंगेनकर्णादेरानयनान्वयो

एतेनयथाशोणिमगुणवाचिनःशोणशब्दस्य(तद्विशिष्टःपदार्थोलक्ष्यः)गुणविशिष्टाऽश्वव्यक्ति
र्लक्ष्या यथावातद्गुणसंविज्ञानबहुव्रीहौकर्णादिवाचिनःकर्णादिशब्दस्यतद्विशिष्टोऽन्यपदार्थो
लक्ष्यः तथासत्तादिवाचिनांसत्यादिशब्दानांसत्तादिविशिष्टोलक्ष्यइतिसत्तादिसंबंधःशाब्द
एवेतिनिरस्तं । लक्ष्यस्यतात्पर्यविषयस्याविशिष्टत्वापातात् । नचसन्घटइत्यादौविशिष्टंलक्ष्यं

नस्यादितिभावः । एतेनेत्युक्तंविशदयति ॥ लक्ष्यस्येति ॥ सत्यादिपदैःसत्वादिविशिष्टस्यैवलक्ष्यत्वेलक्ष्यार्थस्यैवविशिष्टत्वेनस
खंडार्थत्वापातादित्यर्थः । तथाचलक्ष्यस्यब्रह्मणोविशिष्टत्वपरिहारायतस्यसद्व्यक्तिसंबंधित्वेनैवलक्ष्यत्वेवाच्येतीरस्यगंगात्वाभावव
त्ब्रह्मणःसत्वासिद्धिरेवेतिभावः । सन्घटइत्यादेः सत्यंज्ञानमित्यादेश्च सखंडार्थत्वाखंडार्थत्वविभागमाशंक्यपरिहरति ॥ नचे
ति ॥ विशिष्टं सत्वविशिष्टघटरूपव्यक्तिरितियावत् । नव्यक्तिमात्रंयेनतस्याप्यखंडार्थत्वंस्यादितिभावः । इह सत्यज्ञानादिवा

क्ये । तेन व्यक्तिमात्रस्यलक्ष्यत्वेन । इह सत्यज्ञानादिवाक्ये । शब्दस्य सत्यादिपदस्य । तर्हिलक्ष्येसत्वसंबंधस्याशाब्दत्वाद्ब्र
ह्मणिसत्यत्वंनसिध्येदित्यतआह ॥ लक्षणेति ॥ मुख्यार्थसंबंधाभावेलक्षणायाअयोगेनलक्षणाहेतुत्वेनब्रह्मणिसत्यशब्दमुख्या
र्थभूतसत्वसंबंधसिद्धिरितिलक्ष्यार्थेब्रह्मणितीरेगंगात्वाभावइवनसत्वाद्यभावइत्यर्थः । एवंचसन्घटःसत्यंज्ञानमित्यादीनांलक्षक
त्वेसमानेपिविशिष्टाविशिष्टलक्षकत्वेनसखंडार्थत्वाखंडार्थत्वविभागइतिभावः ॥ लक्षणायाइति ॥ औपनिषदेब्रह्मणिमानांतरे
णसत्वासिद्धेः । सत्यपदस्यचलाक्षणिकत्वेनतत्रसत्वाप्रतिपादकत्वात् । लक्षणाहेतुत्वेनतत्सिद्ध्युक्तौसन्घटइत्यादाविवातात्विक

इहतुव्यक्तिमात्रं । तेनेहशब्दस्याखंडार्थत्वंलक्षणाहेतुत्वेनब्रह्मणस्सत्त्वसिद्धिश्चेतिवाच्यं । लक्ष
णायाघटादाविवातात्विकसत्त्वसंबंधेनाप्युपपत्तेः । श्रुतेरेववाच्येसत्त्वेपितात्पर्येतुसखंडार्थत्वं ।

सत्वसंबंधेनापिलक्षणोपपत्तेर्नब्रह्मणिवास्तवसत्वसिद्धिरितिभावः । ननुब्रह्मणिसत्वसिद्धिर्नलक्षणाहेतुत्वेनोच्यते येनाऽतात्वि
कसत्वसंबंधेनाप्युपपत्तिःस्यात् नापिमानांतरेणतत्सिद्धिरुच्यते येनऔपनिषदत्वान्नमानांतरेणतत्सिद्धिरितिदूषणावकाशः किं
नाम सत्यमित्यादिश्रुतेरेवब्रह्मस्वरूपइवसत्यादिपदवाच्यस्यसत्यत्वस्यलक्ष्येब्रह्मणिसत्वेपितात्पर्यंकथ्यते अतोलक्ष्यस्यापिब्रह्मणः
सत्वसिद्धिरित्यतआह ॥ श्रुतेरेवेति ॥ सत्यंज्ञानमितिश्रुतेरेवेत्यर्थः ॥ वाच्येसत्वेपीति ॥ सत्ताजातेरेवसत्यशब्दार्थत्वात्स
त्यादिपदवाच्यसत्वस्यलक्ष्येब्रह्मणिसत्वेपीत्यर्थः ॥ सखंडार्थत्वमिति ॥ ब्रह्मस्वरूपइवतत्सत्वेपितात्पर्यांगीकारेणोभयत्रापि

SGDF
Foundation

तात्पर्यग्राह्याप्रातिपदिकार्थमात्रपरत्वरूपाखंडार्थत्वहानिःसत्वसंसर्गप्रतिपादकत्वेनसखंडार्थत्वंचेत्यर्थः ॥ अनुगतसत्तैवेति ॥ परसामान्यभूतासत्तैवेत्यर्थः ॥ वाच्येति ॥ जातेरेवशब्दार्थत्वेनब्रह्मणश्चसत्ताजात्यभिन्नत्वात्सत्यपदवाच्यमेवब्रह्मस्यान्नतुलक्ष्यमितिवाच्यातिरिक्तलक्ष्याभावापातादित्यर्थः ॥ ब्रह्मणइति ॥ जातेर्व्यक्त्यधीनत्वदर्शनाद्ब्रह्मणोपिजातित्वेव्यक्त्यधीनत्वेनपारतंत्र्यापत्तेरितिभावः ॥ सत्तावदिति ॥ सत्ताजातितुल्यंब्रह्म नतुसत्ताजातिरेव अतोनपारतंत्र्यादिदोषइतिभावः । स

नचानुगतसत्तैवब्रह्मेतिसत्तासंबंधाभावेपिसत्स्यादितिवाच्यं । वाच्यातिरिक्तलक्ष्याभावापातात् । ब्रह्मणःपरतंत्रत्वादिरूपजातित्वायोगाच्च । एतेनब्रह्मस्वरूपातिरिक्तसत्ताहीनमपिसत्तावत्सत्स्वभावमितिनिरस्तं । सच्छब्दस्यतत्रलाक्षणिकत्वात् । सत्तायामिवचमानांतराप्रवृत्तेर्ब्रह्मणःसत्स्वभावत्वेमानाभावात् ।

त्स्वभावमिति । तथाचलक्ष्यस्यापिब्रह्मणःसत्स्वभावत्वात्सत्वाद्युपपत्तिरितिभावः । सच्छब्दस्येति । गंगापदलक्ष्येतीरेगंगात्वाभावइवसत्ताजातिवाचिसत्यपदलक्ष्येब्रह्मणिसत्वासिद्धिरितिभावः । ननुस्वरूपातिरिक्तसत्ताहीनमपिसत्तावत्सत्स्वभावंअतःसत्वसिद्धिरितिचेत्तत्राह ॥ सत्तायामिवेति ॥ व्यतिरेकदृष्टांतः सत्ताजातिरहितस्यापिब्रह्मणःसत्स्वभावत्वेमानाभावात् । नचसत्तावदुपपत्तिरितिवाच्यं सत्द्रव्यंसन्गुणःसत्कर्मेत्यनुगतव्यवहारबलेनसर्वत्रानुगतासत्तांगीकार्या सत्तायांचनसत्तांगीकार्या

SGDF Sri Gargeshwari Digital Foundation

धर्मस्यधर्मसत्तानवस्थापत्तेरतःसत्तारहितापिसत्तासद्रूपेत्यंगीकार्यमितिप्रमाणवत् औपनिषदेब्रह्मणिसत्तारहितेपिसत्स्वभावत्वसा
धर्कमानांतरंनास्तीत्यर्थः । एतावत्पर्यंतंजातिःसत्यशब्दार्थइतिमतमंगीकृत्यदूषणमुक्तं इदानींतुसत्वंजातिरेवनभवतीत्याह ॥
कथंचेति ॥ सद्व्यक्तेरिति ॥ परमार्थसद्व्यक्तेरेकत्वेनतत्रजात्ययोगादित्यर्थः । अपरमार्थसतांबहूनांविद्यमानत्वेनजातित्वोपप
त्तेःपरिहारायोक्तं ॥ परमार्थसतिमुख्यस्येति ॥ सत्तादिजातीति ॥ सत्त्वतद्व्याप्यद्रव्यत्वद्रव्यव्याप्यकुंभत्वरूपजात्याख्य
मुख्यार्थबोधनद्वारेत्यर्थः ॥ एकामिति ॥ तथाचकुंभव्यक्तेःसद्द्रव्यादिपदलक्ष्यत्वेपितस्याःसद्रूपत्वादिकंयथा एवंयद्यपिसत्या

कथंचपरमार्थसतिमुख्यस्यसत्यशब्दस्यजातिवाचिता सद्व्यक्तेरेकत्वात् । एतेनसद्द्रव्यंकुंभइ
तिपदानितत्तज्जातिद्वाराएकांकुंभव्यक्तिमिव सत्यादिपदान्यपि सत्तादिजातिद्वाराएकामे
वानंदव्यक्तिंलक्षयंतीतिकल्पतरूक्तंनिरस्तं । तद्वदेवातात्विकसत्तादिविशिष्टार्थत्वापातात् ।

दिपदानिब्रह्मलक्षयंति तथापिब्रह्मणःसदानंदादिरूपत्वंयुक्तं लक्ष्यार्थस्यैकत्वेपिवाच्यार्थभेदादपर्यायत्वंचयुक्तमित्यर्थः । एतेने
त्युक्तंविशदयति ॥ तद्वदेवेति ॥ कुंभव्यक्तेःसदादिशब्दलक्ष्यत्वेपिसत्वादिवैशिष्ट्यंअतात्विकमेवप्रतीयते एवंप्रकृतेब्रह्मणःस
त्यादिपदलक्ष्यत्वेनतात्विकसत्वाभावेपिअतात्विकसत्वादिवैशिष्ट्यमेवस्यात् तथाचातात्विकसत्वादिवैशिष्ट्यप्रतिपादकत्वाद्वेदां
तानांअतत्वावेदकत्वंस्यादितिभावः । कथंचपरमार्थसतिमुख्यस्यसत्यशब्दस्यजातिवाचितातद्व्यक्तेरेकत्वादित्युक्तदूषणमपिएते

SGDF
Sri Gargeshwari Digital Foundation

नेत्यनेनातिदिष्टंद्रष्टव्यं । संगृह्णाति ॥ एवंचेति ॥ स्वाभिमतेति ॥ सत्यादिपदैर्ब्रह्मणितात्पर्यतःसत्यत्वाद्यनर्पणमिच्छतःशून्यसदृशब्रह्मसिद्धिरेवाभिमतेत्यर्थः । भंगार्थमुपसंहरति ॥ तस्मादिति ॥ शून्यवादापत्तेरित्यर्थः ॥ ७ ॥ सत्यज्ञानादिवाक्यानामखंडार्थत्वभंगविवरणं ॥ २ ॥ उक्ताप्रसिद्धेति ॥ प्रत्यक्षादिनापीदमित्थमितिसप्रकारकज्ञानस्यैवोत्पत्तेःसंसर्ग

एवंच "सौगतोक्तस्वाभिमतशून्यतासिद्धयेपरैः । सत्यज्ञानादिवाक्यानांलक्षणोक्तापरात्मनि" । तस्मात्सत्यज्ञानादिवाक्यानांनाखंडार्थत्वं॥ सत्यज्ञानादिवाक्यानामखंडार्थत्वानुमानभंगः ॥ २ ॥ ७ ॥ तत्त्वमस्यादिवाक्यस्याऽखंडार्थत्वानुमानेअप्ययुक्ते । उक्ताप्रसिद्धविशेषणत्वबाधप्रतिरोधाप्रयोजकत्वप्रतिकूलतर्कपराहत्यादिदोषात् । उक्तरीत्यांऽत्यहेतोरसिद्धेश्च । उभयत्रापिदृष्टांतस्यसाध्यवैकल्याच ।

गोचरप्रमाजनकत्वरूपाखंडार्थत्वंकुत्राप्यप्रसिद्धमित्युक्तेत्यर्थः । कोहमित्यात्मस्वरूपमात्रेबुभुत्सितेसतितत्त्वमसीत्यस्यप्रवृत्तेर्नतन्मात्रप्रश्नोत्तरत्वस्यासिद्धिरित्यतआह ॥ उक्तरीत्येति ॥ स्वरूपमात्रस्यसिद्धत्वान्नस्वरूपमात्रेप्रश्नइत्याद्युक्तरीत्येत्यर्थः । ॥ ४६९ ॥
वाक्यमात्रस्यसंसर्गपरत्वात्सोयंदेवदत्तइत्यादेरपितथात्वात्तत्रसाध्यवैकल्यमित्याह ॥ उभयत्रापीति ॥ अकार्येत्याद्यनुमानेत

न्मात्रप्रश्नोत्तरत्वानुमानेचेत्यर्थः । सोऽयंदेवदत्तइत्यादेरखंडार्थत्वान्नसाध्यवैकल्यमित्याशंकते ॥ नन्विति ॥ तत्कालादेरपीति ॥ तद्देशकालादिविशिष्टस्यएतद्देशकालादिवैशिष्ट्यबोधनेतद्देशकालादेस्तावद्विशेषणत्वंप्रतीयते विधेयान्वय्येवचविशेषणं तथाचैतद्देशकालादिवैशिष्ट्यस्यविधेयत्वेनतद्देशकालयोर्विधेयभूतैतद्देशकालान्वयाभावेविशेषणत्वायोगेनतदन्यथानुपपत्त्याविधेयान्वयित्वेवाच्येतद्देशकालयोरपीदानींसत्वापत्तिरित्यर्थः । एतद्देशेतद्देशस्यसत्वापत्तिरादिशब्दार्थः । एवमेवएतत्कालादेरि

ननुसोयमित्यत्रकिंतद्देशकालादिविशिष्टस्यैतद्देशकालादिवैशिष्ट्यंबोध्यते एतद्देशकालादिविशिष्टस्यतद्देशकालादिवैशिष्ट्यंवा विशिष्टद्वयैक्यंवा । नाद्यः एतत्कालादिविशिष्टस्यप्रत्यक्षत्वेनाऽनुपदेश्यत्वात् । तत्कालादेरपीदानींसत्वापत्तेश्च । नद्वितीयः एतत्कालादेस्तदासत्वापातात् । नतृतीयः विशेषणभेदेविशिष्टाभेदायोगात् । विशिष्टंहियदिविशेषणविशेष्यसंबंधरूपं तदाविशेषणभेदेन ।

त्यस्यापिउपपादनंद्रष्टव्यं । तद्देशेएतद्देशसत्वापत्तिरादिशब्दार्थः ॥ विशेषणभेदइति ॥ यदाह्यविरुद्धदंडकुंडलादिविशेषणभेदेनविशिष्टभेदआवश्यकस्तदातदेतद्देशकालरूपविरुद्धविशेषणभेदेनविशिष्टभेदःसुतरामावश्यकइत्यर्थः । तदुक्तंसंक्षेपशारीरके "अविरुद्धविशेषणद्वयप्रभवत्वेपिविशिष्टयोर्द्वयोः ॥ घटतेनयदैकतातदासुतरांतद्विपरीतरूपयो" रिति । विशिष्टंविशेषणविशेष्यतत्संबंधात्मकं अतिरिक्तंचेतिपक्षद्वयेपि विशेषणभेदेविशिष्टभेदएवेत्याह ॥ विशिष्टंहीत्यादिना ॥ विशेषणभेदेने

SGDF Sri Gangadharan Digital Foundation

ति ॥ विशेषणस्यैवविशिष्टत्वेनतद्भेदएवविशिष्टभेदइत्यर्थः । पदार्थांतरं विशेषणाद्यतिरिक्तं । अत्रतद्देशकालविशिष्टस्यएत द्देशकालवैशिष्ट्य मेतद्देशकालविशिष्टस्यतद्देशकालवैशिष्ट्यमित्येवमादिरूपेणनबोध्यते येनोक्तदोषः किंनाम तदेतद्देशकालसं बंधरूपयोस्तत्तेदंतयोर्बाल्ययौवनयोरिवश्यामरक्तरूपयोरिवचैकविशेष्यमात्रवृत्तित्वमेवसोयमितिवाक्यार्थः । नचविशिष्टैक्यता त्पर्याभावेनविशेष्यैक्यमात्रपरत्वप्राप्त्याऽखंडार्थपरत्वमेवप्राप्तमितिवाच्यं । तथात्वेनीलोत्पलमित्यादेरपिभिन्नप्रवृत्तिनिमित्तक

यदितुपदार्थांतरं तदापिविशेष्यभेदेनेवविशेषणभेदेनापितद्भेदआवश्यकः तस्मात्सोयमि त्यादिवाक्यंलक्षणयाऽखंडार्थमितिचेत् ॥ ७ ॥ उच्यते अस्तुतावदनुभवकालसंबंधएवत त्ता तथापिबाल्ययौवनयोरिवश्यामरक्तरूपयोरिवचतदेतद्देशकालसंबंधरूपयोस्तत्तेदंत योःपरस्परमनन्वयेपिएकविशेषणविशिष्टेइतरस्यावृत्तावपिएकविशेष्यवृत्तित्वंतावदस्ति।

शब्दानामेकविशेष्यवृत्तित्वसद्भावेनाखंडार्थत्वापातादतोनतत्कालादेरपीदानींसत्वापत्तिरित्यादिदोषइत्यभिनवसमाधानमाह ॥ उच्यतइति ॥ अस्तुतावदिति ॥ अनुभवकालध्वंसएवतत्तेतिटीकाकारोक्तवस्तुस्थितौसत्यामपीत्यर्थः । तर्हितद्विशिष्टस्यए तद्देशकालवैशिष्ट्यबोधनेनुभवकालस्यापीदानींसत्वापत्तिस्तथावैपरीत्यमपीत्याशंकायामाह ॥ तथापीति ॥ तत्तेदंतयो र्विशे (ष्यान्ययो)षणयो रनन्वयेपि विधेयानन्वयेपि । इतरस्य विशेषणस्य । तदेतत्कालसंबंधरूपयोस्तत्तेदंतयोरेकविशेष्यवृत्तित्वा

SGDF
Sri Gargeshwari Digital Foundation

भावेपूर्वोत्तरकालद्वयासंबंधप्राप्त्यादेवदत्तादिपदार्थानांक्षणिकत्वापत्तेस्तदेतत्कालयोरेकविशेष्यवृत्तित्वंतावदंगीकार्यमित्याशयेनाह ॥ कालद्वयेति ॥ तदेतद्देशसंबंधयोरपिएकविशेष्यवृत्तित्वमंगीकार्यमनुभवसिद्धत्वादित्याह ॥ देशद्वयेति ॥ नन्वेकस्मिन्विशेष्येवस्तुगत्याकालद्वयसंबंधस्यदेशद्वयसंबंधस्यचसत्वेपिसोयमितिपदद्वयस्यनतद्बोधकत्वं सोयमितिपदद्वयस्यदेशकालसंबंधस्यएकविशेष्यवृत्तित्वबोधनेशक्त्यभावः । अतःपूर्वकालादिविशिष्टस्यएतत्कालादिवैशिष्ट्यमेवतदर्थइतितद्बोधयदिदंवाक्यं

कालद्वयासंबंधिपदार्थानांक्षणिकत्वापातात् । देशद्वयसंबंधस्यापिकालभेदेनानुभवात् । सोयमितिपदद्वयंचतत्तेदंतयोरेकवृत्तित्वबोधनेशक्तं । समानाधिकरणत्वात् । भिन्नप्रवृत्तिनिमित्तानामेकस्मिन्नर्थेवृत्तिर्हिसामानाधिकरण्यं । नचविशेष्यस्यतत्तेदंतान्वयपरमपीदंवाक्यंविशिष्टस्यतदन्वयपरंनेत्येतावताऽखंडार्थं । नीलमुत्पलमित्यादेरप्यखंडार्थत्वापातात् ।

विरुद्धार्थमेवापन्नमित्यतआह ॥ सोयमितीति ॥ समानाधिकरणत्वेनकथंतयोरेकविशेष्यवृत्तित्वलाभइत्यतआह ॥ भिन्नेति ॥ अर्थे विशेष्ये । तत्तेदंतान्वयपरं तदेतद्देशकालसंबंधमात्रबोधनपरं ॥ विशिष्टस्येति ॥ तद्देशकालविशिष्टस्यएतद्देशकालवैशिष्ट्यान्वयपरंनभवतीत्यर्थः ॥ इत्येतावतेति ॥ विशेष्यमात्रवृत्तित्वबोधनादित्यर्थः । एकविशेष्यमात्रवृत्तित्वेनाखंडार्थत्वांगीकारेऽतिप्रसंगमाह ॥ नीलमिति ॥ नीलत्वोत्पलत्वरूपभिन्नप्रवृत्तिनिमित्तकशब्दयोरेकविशेष्यमात्रवृत्तित्वसद्भावादित्यर्थः ।

SGDF
Sri Gargeshwari Digital Foundation

संगृह्णाति ॥ एवंचेति ॥ योगस्य संबंधस्य । तद्रूपयोस्तत्तेदंतयोरितियावत् । तदुक्तौ सोयमितिपदद्वयेनएकस्मिन्विशेष्येकालद्वयसंबंधमात्रस्यशक्त्याबोधने । धर्मसंसर्गः कालद्वयसंबंधः । विशेषिते विशिष्टे । सर्वं नीलोत्पलमित्यादिवाक्यं । तथा । अखंडार्थं ॥ विशेष्यस्येति ॥ केनचिदखंडार्थत्वेयुक्तिरुक्ता तद्देशकालविशिष्टस्यएतद्देशकालवैशिष्ट्यंनबोध्यते येनसखंडार्थत्वंस्यात् नचतद्देशकालविशिष्टस्यैतद्देशकालवैशिष्ट्याबोधनेनकालद्वयासंबंधित्वादस्यक्षणिकत्वापातइतिवाच्यं सोयमित्यादे

एवंच"कालद्वयेनयोगस्यक्रमेणस्थायिवस्तुनि । नैल्यरक्तत्ववत्सत्वात्तदुक्तौका विरुद्धता ॥ विशेष्येधर्मसंसर्गपरंचापिविशेषिते ॥ तत्परंनेत्यखंडार्थंस्याचेत्स वंतथाभवेत्"। एतेनविशेष्यस्यकालद्वयसंबंधेनैवक्षणिकत्वानापत्तेर्विशिष्टस्य तत्संबंधोनाऽपेक्षितइतिनिरस्तं । मयापिविशेष्यएवकालद्वयसंबंधस्योक्तेः ।

विंशेष्यस्वरूपमात्रबोधकत्वांगीकारेणविशेष्यस्वरूपमात्रस्यचकालद्वयसंबंधित्वेनोक्तदोषाभावात् तथाचविशेष्यमात्रबोधकत्वे नाखंडार्थत्वमिति। एतेनेत्युक्तमेवविशदयति ॥ मयापीति ॥ त्वदुक्तरीत्यैवेतिशेषः । नचैतावताऽखंडार्थत्वापत्तिःविशेष्येकालद्वयसंबंधमात्रपरत्वेपिविशिष्टेतत्परत्वाभावादितिवाच्यं नीलोत्पलमित्यादेरपिअखंडार्थत्वापातादित्युक्तत्वादितिभावः । ननुसोयमितिएकस्मिन्विशेष्येकालद्वयसंबंधबोधनमप्ययुक्तमेव देवदत्तस्वरूपमात्रस्यबुभुत्सितत्वेनतस्यैववक्तव्यत्वात् अन्यथाप्रश्नोत्तर ॥ ४७१ ॥

योर्वैयधिकरण्यंस्यादित्यतआह ॥ देवदत्तेति ॥ यदुक्तंसोयमितिपदद्वयंतत्तेदंतयोरेकविशेष्यवृत्तित्वत्रोधनेशक्तमिति तदयुक्तं अनुभवकालसंबंधरूपतत्तायाअतीतत्वात् । तत्तावाचिनःसइतिपदस्यअनुभवकालसंबंधेलक्षणैवप्राप्ता नशक्तिरित्याशंक्यनिराकरोति ॥ नचेति ॥ घटइति ॥ नष्टोघटइत्यत्रापिघटस्यातीतत्वेनघटपदस्यापितत्रलक्षणास्यादितिभावः ॥ स्वार्थात्यागादिति ॥ सोयमित्यनेनानुभवकालसंबंधलक्षणतत्तारूपस्वार्थस्यसोयमितिवाक्यप्रयोगकालेतीतस्याप्यत्यागात् । विशेष्यमात्रेतत्त

देवदत्तस्वरूपमात्रंबुभुत्सितमितितुनिरसिष्यते । नचतत्तायाअतीतत्वमात्रेणतत्पदस्यल क्षणा । घटोनष्टइत्यादाविवातीततत्तारूपस्वार्थात्यागात् । अन्यथातत्तादेरतात्पर्यविषय त्वेसोयमित्यनेनदेवदत्तस्यकालद्वयसंबंधोनसिध्येत् । तस्मादेकविशेषणविशिष्टेविशे षणांतरान्वयाबोधकमपीदंवाक्यंविशेष्यस्यक्रामिकधर्मद्वयान्वयपरत्वात्सखंडार्थमेव ।

त्संबंधस्यसद्भावादित्यर्थः । अन्यथेत्यस्यैवविवरणं ॥ तत्तादेरतात्पर्यविषयत्वइति ॥ अतीततत्तारूपस्वार्थेतात्पर्याभावेसोयमितिवाक्यप्रयोगकालेत्यागेसतीत्यर्थःनसिद्ध्येत् ततश्चकालद्वयासंबंधिदेवदत्तस्वरूपस्यक्षणिकत्वापातइत्यर्थः । एवंतदेतद्देशकालसंबंधरूपतत्तेदंतयोरेकविशेष्यमात्रवृत्तित्वेऽखंडार्थत्वंनास्तीत्युपसंहरति ॥ तस्मादिति ॥ विशेष्यस्य विशेष्यस्वरूपमात्रस्य ॥ क्रमिकेति ॥ बाल्ययौवनवत्क्रमिकतदेतद्देशकालसंबंधद्वयसद्भावेपितात्पर्यसद्भावात्सखंडार्थत्वमेवेत्यर्थः । समाधानां

२ "कालद्वयसम्बन्धो" इति पूर्णपाठः

SGDF Sri Gargeshwari Digital Foundation

तरमुत्प्रेक्षयति ॥ किंचेति ॥ त्वदुपन्यस्तइति ॥ ननुसोयमित्यत्रेत्यादिनात्वदुपन्यस्तइत्यर्थः । ननुकथंनदोषः तद्देशकाल
विशिष्टेएतद्देशकालवैशिष्ट्यबोधनेतद्देशकालयोर्विधेयान्वयित्वरूपविशेषणत्वेवक्तव्येतद्देशकालयोरिदानींसत्वापातइत्याशंक्य
तयोरिदानीमभावेपिविशेषणत्वमुपपद्यतइत्याशयेनस्वमतेविशेषणत्वंनिर्वक्ति ॥ तत्तादेरिति ॥ यथादंडीदेवदत्तइत्यत्रदंडा
न्विततयाज्ञातएवदंडिनितात्पर्यविषयीभूतस्यदेवदत्तत्वस्यादंडिव्यावृत्तेर्वाबोधोभवतीतिदंडोविशेषणं । नन्वेवंकाकान्विततया
ज्ञातेगेहेदेवदत्तीयत्वान्वयधीर्भवतीतिउपलक्षणस्यापिकाकस्यविशेषणत्वापत्तिरतउक्तं ॥ यदन्विततयाज्ञातएवेति ॥ तत्र

किंच त्वदुपन्यस्तेपक्षत्रयेपिनदोषः । तत्तादेरतीतत्वेपियदन्विततयाज्ञातएवतात्पर्य
विषयीभूतेतरान्वयधीःतत्वरूपस्यविशेषणत्वस्यसंभवात् । नचविधेयान्वय्येवविशे
षणं। शब्दोऽनित्यइत्यादौशब्दत्वादावव्याप्तेः । नापिविधेयान्वयकालेसदेवविशेषणं ।

काकान्विततयाज्ञातएवनेतरान्वयधीः । किंतुकाकस्यगतत्वेनतदुपस्थाप्योत्तृणत्वादिविशिष्टइतिनातिव्याप्तिरितिभावः । एवंच
प्रकृतेतद्देशकालयोरतीतत्वेपितदन्विततयाज्ञातएवएतद्देशकालान्वयधीर्भवतीतियुक्तंतयोरिदानीमभावेपिविशेषणत्वमितिध्ये
यं ॥ विधेयेति ॥ तथाचनतद्देशकालयोर्विशेषणत्वमितिभावः ॥ अव्याप्तेरिति ॥ शब्दत्वेशब्दविधेयभूतानित्यत्वान्वया
भावादितिभावः ॥ विधेयेति ॥ तथाचशब्दत्वेनाव्याप्तिः विधेयान्वयकालेसत्वात् प्रकृतेतुविधेयैतद्देशकालान्वयकालेतद्देश

SGDF
Sri Gargeshwari Digital Foundation

कालयोरभावान्नविशेषणत्वमितिभावः ॥ दंडीति ॥ विधेययोःप्रागभावध्वंसयोःकालेदंडसंबंधस्यासत्वादितिभावः ॥ गृहेति ॥ विधेयस्यदेवदत्तीयगृहत्वस्यकालेविद्यमानेकाकादावित्यर्थः ॥ विधेयेति ॥ "प्रतियोगितानिरूपकत्वं" अवच्छेदकत्वंनामअ न्यूनानधिकदेशकालवृत्तित्वं । दंडीदेवदत्तइत्यत्रविधेयोयोदंडिनिदेवदत्तत्वान्वयःतत्प्रतियोगिता दंडिनितिष्ठति तदवच्छेदको दंडइतिभवतिदंडोविशेषणं तथास्वप्रत्याय्यायाव्यावृत्तिःअदंडिव्यावृत्तिस्तदधिकरणतादंडिन्यस्ति तदवच्छेदकत्वंदंडस्यास्ति तथागृहनिष्ठेपिकाकेविधेयंयद्देवदत्तीयगृहत्वं तदन्वयप्रतियोगित्वंदेवदत्तगृहेऽस्ति । तदवच्छेदकत्वंतथास्वप्रत्याय्यायाव्यावृ

दंडीभविष्यतिदंडीनास्तीत्यादावव्याप्तेः । गृहनिष्ठेकाकादावतिव्याप्तेश्च । नापिविधेयान्वयप्रतियोगितावच्छेदकंवा स्वप्रत्याय्यव्यावृत्त्यधिकरणतावच्छेदकंवा विशेषणं । अवच्छेदकत्वस्यान्यूनानधिकदेशकालत्वरूपत्वे तस्यसास्नादिमान्गौरित्यादिषु लक्ष्यतावच्छेदकरूपविशेषणेषुसत्वेपि

त्तिरदेवदत्तगृहव्यावृत्तिस्तदधिकरणतावच्छेदकत्वंचास्तीतिविशेषणत्वमेवाभिप्रेतं । एवंचतद्देशकालयोस्तुदेवदत्तेविधेयभूतैतद्देशकालान्वयप्रतियोगितास्वप्रत्याय्यव्यावृत्त्यधिकरणताचास्ति तदवच्छेदकत्वंनास्ति प्रतियोगित्वव्यावृत्त्योरिदानीमपिसत्वेनतद्देशकालयोश्चेदानीमभावेनतन्न्यूनकालवृत्तित्वादितिध्येयं । तद्देशकालयोरप्यवच्छेदकत्वमस्तीत्याशयेनाह ॥ अवच्छेदकत्वस्येति ॥ कालत्वमितिबहुव्रीहिः ॥ लक्ष्यतेति ॥ सास्नादिमत्पिंडनिष्ठलक्ष्यतावच्छेदकेष्वित्यर्थः । विशेषणेषु गोत्वादिषु ।

SGDF
Sri Gargeshwari Digital Foundation

विधेयभूतगोत्वान्वयप्रतियोगितायत्रास्ति सास्नादिमत्पिंडे तदन्यूनानधिकदेशकालवृत्तित्वाद्गोत्वस्य । तथास्वप्रत्याय्या याऽ
गोव्यावृत्तिस्तदधिकरणताऽन्यूनानधिकदेशकालवृत्तित्वाच्चेत्यर्थः ॥ गौःशुक्लेति ॥ अत्रशुक्लत्वलक्षणस्यगोत्वंनलक्ष्यतावच्छे
दकं शुक्लत्वस्यबकादावतिव्याप्तत्वात् अतोऽत्रगोत्वंनलक्ष्यतावच्छेदकरूपमित्यर्थः । अव्याप्तिमेवोपपादयति ॥ नहीति ॥
विधेयभूतशुक्लान्वयप्रतियोगिताऽशुक्लव्यावृत्तिर्वायत्रदेशेकृष्णायांगविनास्ति तत्रापिगोत्वस्यविद्यमानत्वेनाधिकदेशवृत्तितयाऽ
न्यूनानधिकदेशवृत्तित्वरूपावच्छेदकत्वाभावात् ॥ इहापीति ॥ तद्देशकालान्विततयाज्ञातएवैतद्देशकालान्वयधीर्भवत्येवेत्ये
गौःशुक्लाइत्यादावव्याप्तेः । नहिगोत्वंशुक्लान्वयप्रतियोगित्वेनाशुक्लव्यावृत्त्यावाअन्यू
नानधिकदेशं। अवच्छेदकत्वस्ययद्वत्तयाज्ञातएवयदन्वयधीस्तत्वरूपत्वेचेहाप्यवच्छेदक
स्यसत्वात् । नहिकाकोपस्थापितसंस्थानवत्तयाज्ञातएवदेवदत्तीयत्वधीवद्देवदत्तगृह
व्यावृत्तिधीवचतत्तोपस्थापितधर्मांतरवत्तयाज्ञातएवेदंत्वधीः । अनिदंव्यावृत्तिधीर्वा,
तादृशावच्छेदकत्वगर्भंविधेयान्वयप्रतियोगितावच्छेदकत्वादिरूपमपिविशेषणत्वमस्तीत्याशयः । नन्वेतादृशावच्छेदकत्वमपिप्र
कृतेनास्ति तथाहि यथाकाकान्विततयाज्ञातएवगृहेनदेवदत्तीयत्वादिधीः किंतुकाकोपस्थापितसंस्थानविशेषवत्तयाज्ञातएवातो
नकाकोऽवच्छेदकएवंप्रकृतेपितद्देशकालसंबंधरूपतत्तोपस्थापितएवदेवदत्तेनैतद्देशकालान्वयधीः किंनाम तत्तोपस्थापितधर्मां ॥ ४७३ ॥
तरवत्तयाज्ञातएवातो नतत्तायाअवच्छेदकत्वमित्यतआह ॥ नहीति ॥ स्वप्रत्याय्येतिद्वितीयलक्षणाभिप्रायेणादेवदत्तगृहव्या

वृत्तिधीवच्चेत्युक्तं एवमुत्तरत्रापि ॥ किंत्विति ॥ प्रकृतेतादृशधर्मांतराभावादितिभावः । संस्थानविशेषः आकारविशेषः ॥
तत्रेति ॥ तत्ताविशिष्टेइदंतासंबंधस्यप्रत्यक्षसिद्धत्वाभावेनोपदेश्यत्वेपितत्तोपस्थापितदेवदत्तसंस्थानविशेषवतिइदंत्वादिसंबंध
स्यप्रत्यक्षत्वेनानुपदेश्यत्वादित्यर्थः ॥ तस्मादिति ॥ विधेयान्वयित्वस्यविधेयान्वयकालेसत्वस्यचविशेषणत्वाप्रयोजकत्वादित्य
र्थः । वर्तमानं गृहनिष्ठंकाकादिकं ॥ सदिति ॥ वर्तमानमवर्तमानंवाभवतुयदिसमानाधिकरणं । यदन्विततयाज्ञातएवेत्या
किंतुतत्तावत्तयाज्ञातएव । नचात्रापितत्तोपस्थापितदेवदत्तसंस्थानविशेषवत्तयाज्ञातएवेदंत्वा
दिधीः । तत्रेदंतादिसंबंधस्यप्रत्यक्षत्वेनानुपदेश्यत्वात् । तस्मादतीतमपियदन्विततयाज्ञातएवे
त्याद्युक्तलक्षणयुक्तंचेद्विशेषणमेव । तदयुक्तंचेद्वर्तमानमप्यविशेषणमेव । अतएवाहुः सदसद्वा
समानाधिकरणंविशेषणमिति । तस्मात्पक्षत्रयेपिनदोषः । नचाद्येवाक्यवैयर्थ्यं। इदंतावैशिष्ट्यस्य
प्रत्यक्षत्वेपितत्ताविशिष्टेतस्याप्रत्यक्षत्वात् । नचाद्यद्वितीययोर्बुभुत्सितस्याभेदस्यसाक्षादलाभः ।
द्युक्तलक्षणवच्चेतियावत् । तर्हितद्विशेषणमेवेतितदर्थः ॥ पक्षत्रयेपीति ॥ तत्तान्विततयाज्ञातएवेदंतान्वयोबोध्यते इदंता
न्विततयाज्ञातएवतत्तान्वयोबोध्यते उभयान्विततयाज्ञातएवाभेदान्वयधीरिति तद्देशकालयोरिदानींसत्वापत्तिरित्यादिदोषोने
त्यर्थः ॥ आद्यइति ॥ तत्ताविशिष्टेइदंतावैशिष्ट्यबोधनपक्षेइदंतावैशिष्ट्यस्यप्रत्यक्षसिद्धत्वेनानुपदेश्यत्वात्सोयमितिवाक्यंव्य
र्थमित्यर्थः । तत्ताविशिष्टे तत्तान्विततयाज्ञाते ॥ साक्षादिति ॥ तत्तेदंताविशिष्टयोरभेदबोधनरूपतृतीयपक्षेयथासाक्षादभे

SGDF ... Foundation

दोलभ्यते । नैवमाद्यद्वितीयपक्षयोः । तत्ताविशिष्टेइदंतावैशिष्ट्यस्यइदंताविशिष्टेतत्तावैशिष्ट्यस्यबोधनेत्वभेदोऽर्थादेवलभ्यते
नसाक्षादित्यर्थः । किमभेदस्यसाक्षाद्बोधनेन यदिपरस्यभेदभ्रमनिरासायेदंवाक्यंस्यात् तर्ह्येवससाक्षाद्बोध्यःस्यात् नचैवंकिंना
म पुरोवृत्तिनिएतद्देशकालविशिष्टस्तद्देशकालविशिष्टोनवेत्यभिप्रायेणकोयमितिपृष्टेसोयमितिवचनेनतत्ताद्यवैशिष्ट्यभ्रमोनिव
र्ततएवेतिभावेनाह ॥ पुरोवर्तिनीति ॥ अयंसवानवेति ॥ अयं एतद्देशकालविशिष्टः । सवानवा तद्देशकालविशिष्टोनवे
त्यर्थः । सोयमित्यत्रअयंसइत्युद्देश्यविधेयभावः । यदातुसःअयंनवेत्यभिप्रायेणप्रश्नस्तदापीदंताद्यवैशिष्ट्यभ्रमनिरासायसोय

पुरोवर्तिनितत्ताद्यवैशिष्ट्यभ्रमनिरासायायंसवानवेत्यभिप्रायेणकोय
मितिप्रश्नेसोयमित्युक्तेः।भेदभ्रमेनिरसितव्येपिअभेदोक्त्येवाभेदको
क्त्यापिसाक्षाद्भेदभ्रमनिवृत्तेश्च । अभेदस्यबुभुत्सितत्वेपिवाक्यस्या

मितियथास्थितएवउद्देश्यविधेयभावइतिद्रष्टव्यं । अस्तुवासाक्षाद्भेदभ्रमनिरासायैवेदंवाक्यं तर्हि(द्वितीयतृतीयप)प्रथमद्वितीय
पक्षयोरभेदकधर्मस्यैवोक्त्यासाक्षादभेदानुक्तेःकथंतद्भ्रमनिवृत्तिरित्यतआह ॥ भेदभ्रमइति ॥ अभेदकेति ॥ तद्देशकालवि
शिष्टस्यैतद्देशकालवैशिष्ट्यरूपाभेदव्याप्यधर्मेत्यर्थः । किंचाभेदस्यबुभुत्सितत्वस्यसाक्षादलाभइतिवदताअभेदस्यबुभुत्सितत्वं
यद्यंगीक्रियते तर्ह्युत्तरत्रसोयमित्यत्राभेदविशिष्टतयैवबोधनंकार्यं अन्यथातद्बुभुत्साऽनिवृत्तेः एवंचाभेदरूपसंसर्गपरत्वात्सखं

SGDF
Sri Gargeshwari Digital Foundation

डार्थत्वमेवेत्याह ॥ अभेदस्येति ॥ तृतीयइति ॥ विशिष्टद्वयमनूद्याभेदमात्रबोधनपक्षे ॥ विशेषणेति ॥ तद्देशकालरूप विशेषणेत्यर्थः । अस्यतर्कस्यव्यभिचारमाशंक्यनिराकरोति ॥ नचेति ॥ आपादकस्यैवाभावान्नव्यभिचारइत्याह ॥ तत्रापी ति ॥ तथाचतत्रवैशिष्टैक्यमेवनास्तीत्यर्थः ॥ दृष्टांताभावादिनेति ॥ यदिविशिष्टैक्यंस्यात् । तर्हिविशेषणैक्यंस्यादित्यापा दनायोगः । धूमवदग्निमतोर्विशेष्यैक्यमात्रेणविशिष्टैक्याभावेनविशिष्टैक्योपेतस्थलस्यैवाभावादित्याशंक्यनिराकरोति ॥ नचे

भेदविशिष्टपरत्वेनसखंडार्थत्वापत्तेश्च । ननुतृतीयेविशिष्टैक्येविशे षणैक्यंस्यात्। नचधूमवदग्निमतोरैक्येपिधूमाग्न्योर्भेदोदृष्टइतिवाच्यं। तत्रापिविशेष्यस्यैवैक्यात् । नचतर्हिदृष्टांताभावाद्विशिष्टैक्येनविशे षणैक्यापादनायोगः। अग्निमतोऽग्निमतैक्येऽग्नेरग्निनैक्यदर्शनात् ।

ति ॥ दृष्टांतोस्तीत्याह ॥ अग्निमतइति ॥ विशिष्टैक्येविशेषणैक्यंस्यादित्येवापाद्यते नतुविशिष्टद्वयैक्येविशेषणद्वयैक्यंस्या दिति तत्रायंदृष्टांतः । अग्निमतोऽग्निमतैक्यंतावदस्ति स्वस्यस्वेनैक्यसद्भावात् विशेषणस्याप्येकत्वेनविशेषणैक्यमप्यस्त्येव प्र

न्या० ८०

कृतेतुविशिष्टद्वयमस्तीतितस्यैक्येविशेषणद्वयस्याप्यैक्यापत्तिरितिभावः । किंचनविशिष्टैक्यबोधनंयुक्तं विशिष्टंहिविशेषणादि समुदायात्मकं समुदायश्चसमुदाय्यनतिरिक्तः एवंचसमुदायिरूपविशेषणयोस्तत्तेदंतयोर्भिन्नत्वेनतदवच्छिन्नसमुदायरूपविशिष्ट

SGDF
Sri Gargeshwari Digital Foundation

स्यापिभेदएव अतस्तदैक्यापादनंव्याहतमित्याह ॥ समुदायीति ॥ विवक्षितत्वादिति ॥ यथागामानयेत्यत्रगोत्वस्यानयनानन्वयेपिगोत्वंतद्व्यक्तौनपरित्यज्यते तदप्युद्देश्यतावच्छेदकत्वेनविवक्षितमेव एवंविशिष्टस्यविशेष्याद्यनतिरिक्तत्वेनविशेष्यरूपविशिष्टैक्येपिनतद्विशेषणयोरैक्यान्वयः गोत्वस्यानयनेनेव परंतुतत्तेदंतारूपविशेषणेनत्यज्येते उद्देश्यतावच्छेदकत्वेनविवक्षितत्वादित्यर्थः । तर्हिविशिष्टाभेदोनप्राप्तइतिचेत्तत्राह ॥ तस्यैवेति ॥ उद्देश्यतावच्छेदकीभूततत्तादियुक्तविशेष्याभेदएवविशि

समुदायिरूपविशेषणभेदेसमुदायैक्यस्यव्याहतत्वाच्चेतिचेन्न । विशिष्टमपदार्थांतरमितिमतेविशेष्यस्यैवैक्याधिकरणत्वेपिधर्मयोरप्युद्देश्यतावच्छेदकत्वेनविशेषणत्वात् तस्यैवचविशिष्टाभेदशब्दार्थत्वात् । पदार्थांतरमित्यावयोर्मतेतुधूमाद्ययोर्भेदेपिधूमवानग्निमानित्यबाधितसामानाधिकरण्यधीबलेनविशिष्टयोरभेदस्यापिसत्वात् ।

ष्टाभेदशब्दार्थः नचैतावतोद्देश्यतावच्छेदकस्याप्यैक्यान्वयः तथाचविशेषणैक्यापादनंनयुक्तमितिभावः । पदार्थांतरं विशेषणाद्यतिरिक्तं ॥ सामानाधिकरण्येति ॥ धूमवत्त्वाग्निमत्त्वरूपभिन्नप्रवृत्तिनिमित्तकयोर्धूमवदग्निमच्छब्दयोरेकस्मिन्विशेष्येवृत्तिरूपसामानाधिकरण्येत्यर्थः । तथाचावयोर्मतेव्यभिचारापादनमयुक्तमितिभावः । विशेषणभेदस्यविशिष्टैक्यविरोधित्वेइदंरूप्यमित्यत्रापिइदंत्वरूप्यत्वविशेषणभेदसद्भावेनइदंत्वरूप्यत्वाधारयोरभेदाप्रतीत्याऽभेदग्रहरूपकारणाभावेनरूप्यार्थिनःपुरोव

र्तिनिप्रवृत्तिरेवनस्यादित्याह ॥ अन्यथेति ॥ कुतइत्यतआह ॥ तत्तेति ॥ तथाचतत्तोपलक्षितत्वेदंतोपलक्षितत्वरूपविशेषणभेदात्तद्विशिष्टयो(रप्यै)रैक्यायोगेनतत्तेदंतोपलक्षितयोरभेदोबोध्यतइतित्वन्मतमयुक्तंस्यादित्यर्थः । एवंसतिपक्षत्रयेपिनदोषइतिभावः । एवंप्रकारद्वयेनसमाधानमुक्त्वारामानुजीयरीत्यापिसमाधानमाह ॥ अस्तुवेत्यादिना ॥ एतावतेति ॥ तत्का

अन्यथाइदंरूप्यमित्युक्तेपुरोवर्तिनिरूप्याभेदाप्रतीतेःरूप्यार्थिनःपुरोवर्तिनिप्रवृत्तिश्चनस्यात् । तत्तेदंतोपलक्षितैक्यबोधनमितित्वन्मतंचायुक्तंस्यात् । तत्तेदंतोपलक्षितत्वरूपविशेषणभेदाद्विशिष्टभेदात् । अस्तुवा तत्तेदंतयोर्मध्येएकस्योपलक्षणत्वं तथापीदंताविशिष्टस्योपलक्षणीभूततत्कालसंबंधोवा तत्तोपलक्षिताभेदोवा तत्ताविशिष्टस्योपलक्षणीभूतेदंतासंबंधोवा इदंतोपलक्षिताभेदोवा बोध्यतां । नचैतावतावाक्यस्याखंडार्थत्वं । उपलक्षणस्यकाकादेःस्वयंप्रकारत्वेनप्रका(रांत)रोपस्थापकत्वेनवानिष्प्रकारकत्वरूपाखंडार्थत्वविरोधित्वात् । एकस्योपलक्षणत्वेप्यन्यस्यविशेषणत्वाच्च । नाप्युपलक्षणत्वमात्रेणतद्वाचिशब्दानांलाक्षणिकत्वं ।

लसंबंधादेरुपलक्षणमात्रत्वेनविशेष्येऽबोधनादितिभावः । उपलक्षणस्यैवप्रकारत्वेनतद्बोधकतयावाक्यस्यनिष्प्रकारकत्वरूपाखंडार्थत्वाभावइत्याह ॥ उपलक्षणस्येति ॥ प्रकारांतरं संस्थानविशेषरूपं ॥ अन्यस्येति ॥ इदंताविशिष्टस्योपलक्षणीभूतत

SGDF Foundation

त्कालसंबंधादिबोधनेनेदंत्वस्यैवप्रकारस्यसत्वादित्यर्थः । ननुतत्तादेरुपलक्षणत्वेतद्वाचिनस्तत्तादिपदस्यलाक्षणिकत्वंस्यात् तयो रैक्यात् तथाचजघन्यवृत्त्यावाक्यार्थवर्णनमयुक्तमित्यतआह ॥ वृत्तीति ॥ पदवृत्तिविशेषेत्यर्थः । तथाचलक्षणायाःपदधर्म त्वादुपलक्षणत्वस्यचार्थगतत्वान्नतयोरैक्यमितिभावः। अर्थस्योपलक्षणत्वेपिशब्दस्यमुख्यत्वदर्शनाच्चनतयोरैक्यमित्याह ॥ दृश्य तेहीति ॥ अभावः प्रागभावादिः । भिन्नविभक्त्यंतपदवाच्यत्वाज्जटानामुपलक्षणत्वमितिध्येयं ॥ अलाक्षणिकत्वं ॥ स्वार्थ

वृत्तिविशेषरूपलक्षणायाव्यावर्तकविशेषरूपोपलक्षणस्यचभिन्नत्वात् । दृश्यतेहि घटस्याभावः जटाभिस्तापसइत्यादावभावादिकंप्रतिघटादेरुपलक्षणत्वेपिघटादिश ब्दस्यालाक्षणिकत्वं । दृश्यतेचदंड्यभिप्रायेणप्रयुक्तेदंडमानयेत्यत्रदंडशब्दस्यदंडि निलाक्षणिकत्वेपिदंडस्याऽनुपलक्षणत्वं । वरंचोभयपदलक्षणातएकपदलक्षणा ।

वाचकत्वमेवास्तीत्यर्थः । शब्दस्यलाक्षणिकत्वेप्यर्थस्यविशेषणत्वदर्शनाच्च नतयोरैक्यमित्याह ॥ दृश्यतेचेति ॥ अनुपलक्ष णत्वमिति ॥ दंडेविशेषणतायाएवसर्वैरंगीकारादितिभावः । उपलक्षणत्वलक्षणयोरैक्यमंगीकृत्यउपलक्षणपरपदेलक्षणामंगी कृत्याप्याह ॥ वरंचेति ॥ त्वयातत्तेदंताशब्दयोःउभयोरपिलाक्षणिकत्वमंगीकृतंअतस्तल्लज्जाकरं मयातुइदंताविशिष्टस्यतत्तोप लक्षिताभेदांगीकारेणएकस्यपदस्यमुख्यत्वमंगीकृत्यापरस्यैकस्यैवपदस्यलाक्षणिकत्वांगीकारादिदमेववरमित्यर्थः । किंचोपलक्षण

SGDF Sri Gargeshwari Digital Foundation

स्यकाकादेःकदाचित्स्वसंबद्धगृहंप्रत्युपलक्षकत्वंदृष्टं इदंताविशिष्टेतत्ताउपलक्षणंचेत् कदाचिद्वाइदंताविशिष्टेतत्तासंबंधेनभाव्यं
तत्ताविशिष्टेइदंताउपलक्षणंचेत्तत्ताविशिष्टेकदाचिद्वाइदंतासंबंधेनभाव्यं नचतदस्तीत्यतोनतयोर्मध्यएकस्योपलक्षणत्वपक्षोयु
क्तइत्याशंक्यनिराकरोति ॥ नचेति ॥ तेप्रतीति ॥ इदंताविशिष्टस्वरूपंतत्ताविशिष्टस्वरूपंचप्रतीत्यर्थः । तयोः इदंताविशि
ष्टतत्ताविशिष्टस्वरूपयोः । ताभ्यां तत्तेदंताभ्यां ॥ विशेष्यद्वारेति ॥ विशिष्टयोर्भेदेपिइदंताविशिष्टेयद्विशेष्यंदेवदत्तस्वरूपं
तत्रतत्तासंबंधात्स्वविशेष्यसंबद्धत्वरूपंइदंताविशिष्टस्यतत्तयासहसंबंधोस्त्येव । एवंतत्ताविशिष्टस्याप्युक्तरीत्याविशेष्यद्वारकप

नचेदंताविशिष्टस्यतत्तयातत्ताविशिष्टस्यचेदंतयाकदाप्यसंबंधान्नतेप्रतिततयोरुपलक्षणतेतिवाच्यं । तयो
स्ताभ्यांविशेष्यद्वारासंबंधात्। परंपरासंबंधिनोप्युपलक्षणत्वात्। यद्वेदंतोपलक्षितस्यतत्तावैशिष्ट्यं तत्ता
विशिष्टाभेदोवा तत्तोपलक्षितस्येदंतावैशिष्ट्यंवा इदंताविशिष्टाभेदोवा बोध्यतां । ननुयद्यपीदंतयात
त्तयावोपलक्षितस्यविशेष्यस्यतत्तावैशिष्ट्यंवाइदंतावैशिष्ट्यंवायुक्तं विशेष्येविशेषणांतरान्वयात् ।

रंपरासंबंधोस्त्येवेत्यर्थः । नन्वेवंतत्ताविशिष्टेदंताविशिष्टयोस्तत्तेदंताभ्यामुक्तरीत्यापरंपरासंबंधेपिसाक्षात्संबंधस्यैवोपलक्षणत्वेत
त्त्वेनतस्यात्राभावात्कथमुपलक्षणत्वमित्यतआह ॥ परंपरेति ॥ उपलक्ष्यसंबंधित्वमेवोपलक्षणस्यापेक्षितं नतुसाक्षात् गौरवा
दित्यर्थः । अस्तुवेत्यादिनाविशिष्टमुद्दिश्योपलक्षणसंबधादिर्विधीयतामित्युक्तं इदानींतूपलक्षितमुद्दिश्यविशेषणसंबंधोविधीय
तामतोपिनदोषइत्याह ॥ यद्वेति ॥ एतत्पक्षोपरिशंकते ॥ नन्विति ॥ विशेष्यइति ॥ इदंतोपलक्षितेतत्तारूपविशेषणांतरा

SGDF
Sri Gargeshwari Digital Foundation

न्वयात् तत्तोपलक्षितेवाइदंतारूपविशेषणांतरान्वयादित्यर्थः ॥ अभेदपक्षौत्विति ॥ इदंतोपलक्षितस्यतत्ताविशिष्टाभेदःतत्तोपलक्षितस्यइदंताविशिष्टाभेदःइत्यभेदपक्षावित्यर्थः । कुतोनयुक्तावित्यतआह ॥ अनुवृत्तेति ॥ अनुगतेत्यर्थः । इदंतोपलक्षितस्यानुगतस्यविशेष्यमात्रस्यतत्ताविशिष्टेनव्यावृत्तेनाभेदोनसंभवति एवंतत्तोपलक्षितस्यविशेष्यस्यानुगतस्यव्यावृत्तेनेदंताविशिष्टेनाभेदोनसंभवतीत्यर्थः । अनुवृत्तव्यावृत्तयोरभेदायोगादित्ययुक्तं व्यावृत्ताग्निमत्त्वसत्वासत्वदशायांव्यावृत्तव्यक्तिसदसद्भावदशायांव्यावृत्तघटसदसद्भावदशायामप्यनुगतानांपर्वतजातिमृदांतैरभेददर्शनाद्व्यभिचारइत्यतआह ॥ अनुवृत्तेति ॥ न

अभेदपक्षौतुनयुक्तौ अनुवृत्तव्यावृत्तयोर्विशेष्यविशिष्टयोरभेदायोगादितिचेन्न । समवायस्थाने भेदाभेदावित्यावयोर्मतेऽनुवृत्तव्यावृत्तयोरपितयोःपर्वतोग्निमानितिधीबलाज्जातिव्यक्त्योरिवमृद्घटयोरिवचाभेदस्यापिसत्वात् । अन्यथापर्वतोऽग्निमानितिलैंगिकीधीरपिनिर्विकल्पिकास्यात् ।

नुअग्निमद्व्यक्तिघटैःपर्वतादीनांनाभेदः मयाऽयुतसिद्धिमंगीकृत्यसमवायांगीकारेणाभेदाभावात् अग्निमानित्यत्राग्निसंयोगवानित्यर्थः । एवंचजातिव्यक्त्योरिवमृद्घटयोरिवचपर्वताग्निसंयोगयोरपिसमवायएवसंबंधः एवंचनव्यभिचारइत्यतउक्तं ॥ समवायेति ॥ यत्रत्वयासमवायोंगीक्रियतेतत्रमयाभेदाभेदांगीकारादित्यर्थः ॥ अन्यथेति ॥ विशेष्यस्यविशिष्टेनाभेदानंगीकारेपर्वतो ॥ ४७७ ॥
ऽग्निमानित्यत्रपर्वतेऽग्निसंसर्गःसिद्ध्यतीतिसर्वसंमतंतन्नस्यात् विशेष्यस्यपर्वतस्यविशिष्टादग्निमतःसकाशाद्भेदांगीकारेलैंगिकीधी

रनुमितिर्निर्विकल्पिकापर्वतस्याग्निसंसर्गाविषयिणीस्यादित्यर्थः । अत्रप्रसिद्धंसंसर्गाविषयकत्वप्रयुक्तंनिष्प्रकारकत्वरूपनिर्विकल्पकत्वंनापाद्यं किंनाम संसर्गाविषयकत्वमात्रमेव अन्यथापर्वतोऽग्निमानित्यत्रपर्वतत्वाधारःपर्वतोऽग्निमानितिहिप्रतीयते तथाचात्रसंसर्गाविषयकत्वेपिपर्वतत्वरूपप्रकारस्यैवप्रतीत्योक्तनिर्विकल्पकत्वापादनायोगादितिमंतव्यं । नन्विदंतोपलक्षिततत्ताविशिष्टयोर्भिन्नत्वात्तयोरभेदबोधनंनयुक्तमित्यतआह ॥ केवलेति ॥ भेदवतिअभेदबोधनाद्बिभ्यतातत्ताद्युपलक्षितेविशेष्येदेवदत्तेअभेदोबोध्यतइतिकथमंगीकर्तुंशक्यं देवदत्तपिंडेपिभेदसद्भावादित्यर्थः । तदुपपादनायोक्तं ॥ परिणामिनीति ॥ प्रतिक्षणंवि

केवलाभेदस्तुपरिणामिनिदेवदत्तपिंडेपिनास्त्येव । यद्वातत्तोपलक्षितस्यइदंतोपलक्षितेनवा इदंतोपलक्षितस्यतत्तोपलक्षितेनवा ऐक्यंबोध्यतां । नचैतावताऽखंडार्थत्वादिकमित्युक्तं ।

कारवतीत्यर्थः । तत्रभेदसद्भावेप्यभेदबोधनंयुक्तं मयाभेदाभेदांगीकारेणकेवलभेदानंगीकारादितियदिब्रूयात् तर्हिप्रकृतेपीदं समानं इदंतोपलक्षिततत्ताविशिष्टयोरपिभेदाभेदांगीकारेणकेवलभेदानंगीकारादितिभावः । पूर्वमेकस्यविशेषणत्वमपरस्योपलक्षणत्वमित्यभिप्रेत्योपपादनंकृतं इदानींतूभयोरप्युपलक्षणत्वमभिप्रेतमित्याह ॥ यद्वेति ॥ ननुतत्तेदंतयोरुभयोरप्युपलक्षणत्वांगीकारेविशेष्यमात्राभेदबोधनप्राप्त्याऽखंडार्थत्वापत्तिरित्यतआह ॥ नचेति ॥ इत्युक्तमिति ॥ तत्तोपलक्षितत्वादेरेवप्र

SGDF Foundation

कारत्वादितिभावः । स्वोत्प्रेक्षितमर्थंमूलारूढंकरोति ॥ तदेतदिति ॥ उक्तमिति ॥ तत्वोद्योतेभगवत्पादैरित्यर्थः ॥ अनित्ये
ति ॥ अनित्याभ्यांइदानीमविद्यमानाभ्यांदेशकालाभ्यांस्वकालेयःसंबंधःतद्देशकालोपलक्षितत्वादिरूपःतस्यदेवदत्तेसत्वात्सोयं
देवदत्तइत्यादिवाक्यंतत्वमस्यादिवाक्यस्याखंडार्थतायांउपमा दृष्टांतो नभवतीत्यर्थोद्रष्टव्यः ॥ एवंचेति ॥ तथाचतद्देशकाल
ध्वंसविशिष्टेएतद्देशकालवैशिष्ट्यंबोध्यते तद्देशकालध्वंसरूपतत्तायाइदानींसत्वेनविधेयान्वयित्वरूपविशेषणत्वस्यैवसत्वेनोक्तदो

तदेतदभिप्रेत्योक्तं "अनित्यदेशकालसंबंधस्यसत्वान्नसोयंदेवदत्तइत्याद्युपमाचे" ति टी
कायांतुतद्देशकालसंबंधमात्रंनतत्ता किंतुतद्ध्वंसः सचेदानीमस्ति । एवंचपक्षत्रयेपिन
दोषइत्युक्तं तद्वस्तुस्थितिप्रदर्शनार्थं । तत्तेदंतयोर्नकेवलंबाल्ययौवनवत्सामानाधिकर
ण्यमात्रं किंतुनीलत्वोत्पलत्ववत्समानकालत्वमपीतिप्रदर्शनार्थंच । नतुसखंडार्थत्वार्थं ।

षाभावात् । तथाएतद्देशकालविशिष्टस्तद्देशकालध्वंसविशिष्टः तद्देशकालध्वंसविशिष्टएतद्देशकालविशिष्टश्चाभिन्नइत्येवंपक्षत्रयां
गीकारेपिनदोषइत्यर्थः ॥ वस्तुस्थितीति ॥ वस्तुगत्यातद्देशकालध्वंसएवतत्तेतिस्वमतेवस्तुस्थितिप्रदर्शनार्थमेवोक्तं नतुसोय
मितिवाक्यस्यसखंडार्थत्वायेत्यर्थः ॥ सामानाधिकरण्यमात्रमिति ॥ दैशिकंसामानाधिकरण्यमित्यर्थः ॥ समानकालिक
त्वमिति ॥ इदंतायास्तद्देशकालध्वंसस्यचकालिकमपिसामानाधिकरण्यमितिप्रदर्शनार्थंचेत्यर्थः । तर्हिसोयमितिवाक्यस्यकथं ॥ ४७८ ॥

SGDF
Sri Gargeshwari Digital Foundation

सखंडार्थत्वमुपपादनीयमित्यतआह ॥ उक्तरीत्येति ॥ अस्मदुक्तपक्षत्रयेणेत्यर्थः ॥ तद्देशेति ॥ मधुरासंबंधःकाशीसंबंधःअ
ष्टमीसंबंधःपौर्णमासीसंबंधःइत्यादिपरोदाहृतवाक्यं । एतेनतद्देशकालसंबंधःएतद्देशकालसंबंधइत्यत्रापितत्तेदंतयोःप्रवेशात्कथं
टीकोक्तप्रकाराप्रसरोक्तिरितिशंकानवकाशः । अत्रत्ययोस्तदेतत्पदयोर्देशकालविशेषार्थत्वादितिध्येयं । अयमर्थः परेणतत्वमस्यादि
वाक्यस्याखंडार्थत्वेसोयमित्येवंतत्तेदंतेविहायमधुरासंबंधइत्याद्युदाहृतं तत्रमधुरादेशसंबंधेकाशीसंबंधबोधनेमधुरायाअपिकाशी
संबंधापत्तिः एवंवैपरीत्येनापिद्रष्टव्यं एवमष्टमीकालसंबंधस्यपौर्णमासीकालसंबंधबोधनेअष्टमीकालस्यापिपौर्णमासीकालसंबंधाप

उक्तरीत्यान्यथापितत्सिद्धेः । परेणतद्देशकालसंबद्धएतद्देशकालसंबद्ध
इत्यस्मिन्नुदाहृतेटीकोक्तप्रकाराप्रसराच्च । युक्तंचानुभवकालध्वंसए
वतत्तेति । अन्यथापूर्वकालविषयेनुभवेपिस्मृताविवतत्तोल्लेखःस्यात् ।

त्तिरतोलक्षणयाविशेष्यैक्यमात्रपरत्वमेवेतिपरेणोदाहृतमस्ति तत्रास्मदुक्तप्रकारःसंभवति । मधुराष्टमीरूपदेशकालोपलक्षितेका
शीपौर्णमासीरूपदेशकालसंबंधेनउपलक्षणादिरूपप्रकारयुक्तत्वेनसखंडार्थत्वमुपपद्यते । अत्रचतत्तादेरनुप्रवेशाभावेनतद्देशकाल
ध्वंसमादायोपपादनाप्रसरादितिध्येयं । अस्त्वेवंतत्वोद्योतटीकावस्तुस्थितिकथनपरेति तत्रतत्तानामकिंभवदुक्तरीत्याअनुभव
कालसंबंधः उतअनुभवकालध्वंसइतिचिंतायांटीकोक्तमेवतत्तास्वरूपंसाधिवत्याह ॥ युक्तंचेति ॥ अन्यथेति ॥ अनुभवका
लसंबंधस्यैवतत्तात्वइत्यर्थः ॥ पूर्वकालेति ॥ पूर्वकालस्यैववस्तुविषयेऽनुभवेपीत्यर्थः ॥ स्यादिति ॥ अनुभवकालसंबंधरूपत

स्थ

SGDF
Sri Gargeshwari Digital Foundation

त्तायाःसत्वादित्यर्थः । ननुस्मृतेःसंस्कारजन्यत्वात्तत्तोल्लेखित्वं अनुभवस्यतदजन्यत्वातत्तानुल्लेखित्वमितिकारणकृतवैषम्यस्यस त्वात् तथाऽयमित्यनुभवकालेविद्यमानोयोवर्तमानकालरूपोविषयस्तस्यस्मृतिकालेऽतीतत्वेनविषयसत्वासत्वकृतवैषम्यस्यापिस त्वादित्यतआह ॥ स्मृत्यनुभवयोरिति ॥ सतः विद्यमानस्य ॥ विषयकृतेति ॥ अर्थविषयीकरणकृतवैषम्याभावादित्यर्थः। यद्यपिस्मृत्यनुभवयोःकारणकृतवैषम्यमस्ति तथाप्यनुभवकालेविद्यमानकालस्यस्मृतिकालेवस्तुगत्याऽतीतत्वेपितत्रातीतत्वंस्मृ तौत्वन्मतेनभासते अतीतत्वस्यतत्ताशब्दार्थत्वाभावात् प्रत्युतसघटइतिस्मृतौत्वन्मतेऽनुभवकालसंबंधएवप्रतीयते सचानुभवे

स्मृत्यनुभवयोःसंस्कारजन्यत्वाजन्यत्वाभ्यांभेदेपिअनुभवकालेस तःकालस्यस्मृतिकालेवस्तुगत्यातीतत्वेपिचविषयकृतवैलक्षण्याभा वात्।तत्तामात्रेचस्मृतेरननुभूतविषयत्वमिष्टमेव। नचातिप्रसंगः।

प्यस्तीतिस्मृत्यनुभवयोरर्थविषयीकारित्वांशेवैषम्याभावेनस्मृताविवानुभवेपितत्तोल्लेखःस्यादेवेतिभावः । नन्वनुभवकालध्वंस स्तत्तेतिमतेयद्यपिनस्मृताविवानुभवेपितत्तोल्लेखस्तथापिस्मृतौतत्ताभानंनसंभवति अननुभूतत्वात् तन्मतेचानुभवकालसंबंधस्यै वतत्तात्वात्तस्यचवस्तुगत्याऽतीतत्वस्याभानादनुभवविषयीकृतपूर्वकालसंबंधरूपतत्ताविषयकत्वंस्मृतेर्युक्तमित्यतआह ॥ तत्ता मात्रेचेति ॥ अतिप्रसंगइति ॥ घटस्मृतौनतावत्तत्तैवविषयः अपितुपटोपिविषयःस्यात् अननुभूतत्वाविशेषादित्यतिप्रसंगइ ॥ ४७९ ॥

त्यर्थः ॥ अनुभवेति ॥ अननुभूतोप्यनुभवकालध्वंसएवप्रतीयते नान्यः कुतः अनुभवकालध्वंसत्वादेव नचघटकालोपिप्रती यतामितिवाच्यं स्मृतिविषयकानुभवरूपाऽनुव्यवसायेनस्मृतौअनुभूतकालध्वंसस्याननुभूतस्यापिविषयीकरणेनाननुभूतैताव न्मात्रविषयकत्वस्येष्टत्वादितिभावः ॥ पूर्वकालेति ॥ अनुभवकालेत्यर्थः । कुतोवक्तव्यमित्यतआह ॥ तत्रेति ॥ उल्लेखादि ति॥तथाचैतन्मतेभूतत्वविषयकत्वमिवअनुभवकालध्वंसस्तत्तेतिमतेपिस्मृतेरननुभूतविषयकत्वमिष्टमेवेत्यर्थः॥ पूर्वकालेति॥

अनुभवबलेनानुभूतकालध्वंसत्वस्यतंत्रत्वात्। पूर्वकालसंबंधस्तत्तेतिमतेपिह्यननुभूता पिभूतताभातीतिवक्तव्यं । ततत्रतदातथासीदितिस्मृतौअननुभूतस्यभूतत्वस्योल्ले खात्।ननुपूर्वकालध्वंसविशिष्टोमध्येप्यस्ति इदंताविशिष्टस्तुमध्येनेतिकथंतयोरभेदः। नचेदंतानैतत्कालसंबंधःकिंतुतत्प्रागभावः। तद्विशिष्टश्चमध्येप्यस्तीतिवाच्यं। पूर्वका लध्वंसविशिष्टस्येदानींसत्वेपिएतत्कालप्रागभावविशिष्टस्येदानीमभावादितिचेन्न।अ नुवृत्तव्यावृत्तयोरभेदस्यविशेष्यमात्रस्यैक्येपितत्तादेर्विशेषणत्वस्यचसमर्थितत्वात्।

पूर्वघटिकाध्वंसविशिष्टोदेवदत्तोमध्येयाद्वितीयघटिकातस्यामस्ति । तृतीयघटिकाख्यैतत्कालसंबंधरूपेदंताविशिष्टस्तुमध्येनास्ती तिकथंतयोरभेदइत्यर्थः । तयोः तत्तेदंताविशिष्टयोः । तत्प्रागभावः एतत्कालसंबंधप्रागभावः । इदानींसत्वेपि तृतीयघटिका यांसत्वेपीत्यर्थः ॥ एतत्कालेति ॥ तृतीयघटिकाप्रागभावविशिष्टस्यतृतीयघटिकायामभावादित्यर्थः ॥ अनुवृत्तेति ॥ पूर्व

SGDF Sri Gangadhar Digital Foundation

कालध्वंसविशिष्टस्यानुवृत्तत्वेपिइदंताविशिष्टस्यव्यावृत्तस्यमध्येऽभावेपिव्यावृत्तानुवृत्तयोरैक्यंमृद्धटइत्यादावस्त्येव । अथवापू
र्वकालध्वंसविशिष्टेदंताविशिष्टयोर्नैक्यं किंनामविशेष्यमात्रैक्यमेव । तच्चमध्येप्यस्ति नचविशेषणयोःत्यागादखंडार्थत्वमिति
वाच्यं विशेष्यमात्रैक्येपिउद्देश्यतावच्छेदकत्वेनतत्तादेर्विशेषणत्वस्यसमर्थितत्वादित्यर्थः । नचायमितिप्रागभावइतिटीकाकारै
रुक्तत्वेनपूर्वकालध्वंसविशिष्टस्येदानींसत्वेप्येतत्कालप्रागभावविशिष्टस्येदानीमभावात्कथमितिवाच्यं। यथाहिप्रध्वंसोहितथोच्यत
इतितत्तायाअनुभवकालध्वंसरूपत्वमंगीकृत्यउक्तपक्षत्रयेपिदोषाभावोपपादनं एवंअयमितिप्रागभावइत्येवमिदंत्वस्यापिएतत्का

किंच त्वन्मतेसोयंदेवदत्तइतिवाक्यस्यकिंदेवदत्तस्वरूपमात्रेतात्पर्यं। तत्तेदंतोपलक्षिताभेदविशिष्टेवा
उक्ताभेदोपलक्षितेवा । नाद्यः । तस्यप्रत्यक्षसिद्धत्वात् । अन्यथाधर्मिज्ञानाभावेनतत्रबुभुत्सानुवाद

लसंबंधप्रागभावरूपत्वमंगीकृत्यापिपक्षत्रयेदोषाभावादित्याशयात् । इदंतायाएतद्देशकालप्रागभावरूपत्वविवक्षायांतत्तायाध्वंस
रूपत्वंनविवक्षितं किंनामानुभवकालसंबंधरूपत्वमेव एवंतत्तायाध्वंसरूपत्वविवक्षायांइदंत्वंएतत्कालप्रागभावरूपत्वेननविवक्षितं
तथाचतत्तायाध्वंसरूपत्वमंगीकृत्यपूर्वकालध्वंसविशिष्टस्यइदानींसत्वाभिप्रायेइदंत्वंनासैतत्कालसंबंधरूपत्वेनविवक्षितमितिनदो
षइतिध्येयं । एवंस्वमतेबाधकमुद्धृत्यपरपक्षेबाधकमाह ॥ किंचेत्यादिना ॥ तात्पर्यं लक्षणयेतिशेषः ॥ उक्ताभेदेति ॥ तत्ते ॥ ४८० ॥
दंतोपलक्षिताभेदोपलक्षितइत्यर्थः । तस्य देवदत्तस्वरूपमात्रस्य । अन्यथा देवदत्तस्वरूपमात्रस्यासिद्धत्वे ॥ अनुवादेति ॥

नह्यज्ञातमनुवादार्हमितिभावः ॥ भेदभ्रमेति ॥ अधिष्ठानज्ञानाभावादितिभावः । अभेदबोधनमनंगीकृत्यस्वरूपमात्रबोधनां
गीकारेबाधकमाह ॥ अभेदेति एकेनैवेति ॥ सोयमित्यत्रेतिशेषः ॥ पूर्णत्वेनेति ॥ स्वरूपमात्रबोधनस्येतिशेषः । ननुनप
दांतरवैयर्थ्यं वाक्यस्थपदस्यैवलक्षकत्वांगीकारात् अतएकपदस्यलक्षकत्वांगीकारेतस्यवाक्यस्थत्वाभावेनतदर्थंसोयमितिपदद्वयं
ततश्चलक्षकत्वसिद्धिरित्याशंक्यनिराकरोति ॥ नचेति ॥ देवदत्तपदेनैवेति ॥ सोयमित्यत्रत्यान्यतरपदसहितेनेतिशेषः ।
तथाचसदेवदत्तइतिवा अयंदेवदत्तइतिवापूर्णत्वेनवाक्यत्वसिद्ध्यालाक्षणिकत्वसिद्धौतृतीयंपदंव्यर्थमितिभावः । तथाचानभिमत

भेदभ्रमाद्ययोगात् । अभेदाबोधनेभेदारोपनिवृत्त्ययोगाच्च । एकेनैवपदेनपूर्णत्वेनपदांतर
वैयर्थ्याच्च । नचलक्षणार्थंसोयमितिपदद्वयं । देवदत्तपदेनैवपूर्णत्वात् । सएवकुंडल्ययं
देवदत्तइत्यादौसोयमितिपदद्वयेनैवलक्षणासिद्धौपदांतरवैयर्थ्याच्च । नद्वितीयतृतीयौ ।

तृतीयपदव्यावृत्त्यर्थोत्रैवकारइत्युक्तंभवति। एवकारस्यानभिमतव्यावृत्त्यर्थत्वंच"नरंचनारायणमेवचादा"वित्यत्रप्रसिद्धमितिसं
प्रदायविदः । ननुनपदांतरवैयर्थ्यं विरुद्धाकारवाचिपदद्वयसामानाधिकरण्याधीनत्वाल्लक्षणायाः तथाचायंदेवदत्तइतिवासदेव
दत्तइतिवाउक्तौविरुद्धाकारप्रतिपादकपदद्वयसामानाधिकरण्यासिद्ध्यालक्षकत्वानुपपत्तेस्तदर्थंसोयमितिपदद्वयंसार्थकमितिचेत्त
त्राह ॥ सएवेति ॥ यःपूर्वंकुंडलीसएवायंदेवदत्तइतिवाक्ये सोयमितिपदद्वयेनैवविरुद्धाकारप्रतिपादकपदद्वयसामानाधिकर

SGPF

ण्यसिद्ध्यालक्षकत्वोपपत्तौकुंडल्यादिपदवैयर्थ्यमित्यर्थः ॥ समानेति ॥ सोयमितितदिदंपदाभ्यामित्यर्थः । अभेदरूपसंसर्गस्यापिप्रातिपदिकार्थत्वान्नतद्बोधनेऽखंडार्थत्वहानिरित्यतउक्तंप्रातिपदिकार्थेतरेति । नन्वभेदरूपसंसर्गबोधकत्वेपिनाखंडार्थत्वहानिः गामानयेत्यादाविवक्रियाकारकभावान्वयएवसंसर्गस्तद्बोधकस्यैवसखंडार्थत्वमित्यंगीकारेणाभेदरूपसंसर्गस्यातथात्वान्नाखंडार्थत्वहानिरित्यतआह ॥ नहीति ॥ क्रियाकारकभावरूपान्वयइत्यर्थः ॥ इत्यादेरपीति ॥ क्रियाकारकभावरूपान्वयाप्रतिपादकत्वादित्यर्थः । ननुभावभेदाभावमात्रेणाखंडार्थत्वंविवक्षितं नीलमुत्पलमित्यादौतुनीलत्वोत्पलत्वरूपभावरूपधर्मभेदात्

समानविभक्तिकपदद्वयेनप्रातिपदिकार्थेतरस्याभेदरूपसंसर्गस्यबोधनेऽखंडार्थत्वहानेः ।
नहिक्रियाकारकभावान्वयएवसंसर्गः । नीलमुत्पलंनिर्घटंभूतलंघटःपटोनेत्यादेरप्यखं
डार्थत्वापातात् । नचभावांशभेदाभावमात्रेणाखंडार्थत्वमित्यानंदबोधोक्तंयुक्तं ।

निर्घटमित्यादौतुघटध्वंसपटान्योन्याभावसंसर्गप्रतिपादनेपिघटत्वभूतलत्वघटत्वपटत्वरूपभावपदार्थसंसर्गस्यापिभानात्सखंडार्थत्वं सोयमित्यत्रतुअभेदसंसर्गस्यभानेपिअखंडार्थत्वमेव भावांशेदेवदत्तस्वरूपेभेदरूपसंसर्गाबोधनादित्याशंक्यनिराकरोति ॥ नचेति ॥ एवंवदतात्वयास्वोचितप्रातिपदिकार्थव्यतिरिक्ताभेदरूपसंसर्गगोचरत्वेपितदितरस्यभावांशेभेदरूपसंसर्गस्याबोधकत्वेनाखंडार्थत्वं तथास्वोचितप्रातिपदिकार्थव्यतिरिक्ताभेदरूपसंसर्गगोचरत्वेपितदितरक्रियाकारकभावरूपसंसर्गाप्रतिपादनाद ॥ ४८१ ॥

खंडार्थत्वमित्युक्तंभवति तथाचस्वोचितसंसर्गान्यसंसर्गाबोधकत्वमखंडार्थत्वमितिपर्यवसितंस्यात् ॐमितिचेत्तर्हिनीलमुत्पलमित्यादावपिस्वोचितोयोनीलोत्पलत्वादिसंसर्गस्तदन्योयःसंसर्गोगोकर्मकानयनक्रियाकारकादिसमस्तसंसर्गस्तद्बोधकत्वसद्भावादखंडार्थत्वापातइत्याह ॥ स्वोचितेति ॥ तृतीयेदोषांतरमाह ॥ उपलक्षणेनेति ॥ तत्तेदंताभ्यामुपलक्ष्यंयद्देवदत्तस्वरूपंतस्ययोऽभेदस्तेनोपलक्षणीयंयद्देवदत्तस्वरूपंतस्याभेदरूपादुपलक्षणात्पूर्वमेवनिश्चितत्वेनतत्सिद्ध्यर्थमभेदरूपोपलक्षणापेक्षायाअभावे

स्वोचितसंसर्गान्यसंसर्गाबोधकत्वस्यसर्वत्रसत्वात् । उपलक्षणेनाभेदेनोपलक्ष्यस्य
देवदत्तस्यप्रागेवनिश्चितत्वेनतस्योपलक्षणत्वायोगाच्च। देवदत्तेदेवदत्ताभेदस्यप्रत्यक्ष
सिद्धत्वाच्च । तस्मादभेदोनसिद्धइतिचेत् । तस्मादितिकोर्थः किंतत्ताविशिष्टादिति
किंवातत्तोपलक्षितादिति यद्वातच्छब्देनविवक्षितात्स्वरूपमात्रादिति । नाद्यद्वि
तीयौ । सखंडार्थत्वापातात् । उक्तरीत्योपलक्ष्याकाराभावेनोपलक्षणत्वायोगाच्च ।

नतस्योपलक्षणत्वायोगाच्चेत्यर्थः । ननुदेवदत्तस्वरूपमात्रस्योपलक्षणात्प्राक्सिद्धत्वेपिअभिन्नस्वरूपस्यासिद्धत्वात्तत्सिद्ध्यर्थमुपलक्षणापेक्षेत्यतआह ॥ देवदत्तेति ॥ देवदत्तेनाभिन्नंयद्देवदत्तस्वरूपंतस्यापिप्रत्यक्षतएवसिद्धत्वादित्यर्थः । वस्तुतोऽभिन्नदेवदत्तस्वरूपस्यसिद्धावपितस्मादभिन्नत्वमसिद्धमित्यतआह ॥ तस्मादिति ॥ तत्ताविशिष्टात्तत्तोपलक्षिताद्वाऽभेदोनसिद्धइतितस्मादभेदएववाक्येनबोधनीयः तथाचसखंडार्थत्वमित्यर्थः । द्वितीयेदोषांतरमाह ॥ उक्तरीत्येति ॥ काकादेरुपलक्ष्येगृहेसं

SGDF Foundation

स्थानरूपाकारविशेषोपस्थापकत्वेनोपलक्षकत्वंदृष्टं प्रकृतेचतत्तादिनोपलक्षितआकारविशेषःस्वरूपमात्रेनास्ति तथात्वेसखंडार्थत्वापत्तेः । अतउपलक्षणत्वायोगइत्यर्थः ॥ दत्तोत्तरत्वादिति ॥ तच्छब्देनविवक्षितात्स्वरूपमात्रादभेदोनसिद्धइतिस्वरूपमात्राभेदएवबोध्यतइतिवक्तव्यं तदयुक्तं (देवदत्तेदेवदत्ताभेदस्यप्रत्यक्षसिद्धत्वेनानुपदेश्यत्वादितिदत्तोत्तरत्वादित्यर्थः) । स्वरूपाभेदस्यसिद्धत्वादित्यर्थः । संगृह्णाति ॥ एवंचेति ॥ किंचसोयमितिशाब्दप्रत्यभिज्ञायाःप्रत्यक्षप्रत्यभिज्ञासमानविषयकत्वा

नतृतीयः दत्तोत्तरत्वात् । एवंच "प्रत्यक्षत्वाद्देवदत्तस्वरूपंनैवबोध्यते । सोयमित्यादिवाक्येनकिंत्वैक्यादिविशेषितं" । अपिच सोयमितिप्रत्यक्षप्रत्यभिज्ञातावन्नाखंडार्थविषया । तत्रशब्दवृत्तेर्लक्षणायाअयोगात् । तत्तेदंतादेरभेदस्यचप्रकारस्योल्लेखानुभवाच्च । तदनुल्लेखेप्रत्यभिज्ञायाअभिज्ञातोविशेषोनस्यात् ।

त्प्रत्यक्षप्रत्यभिज्ञायाश्चसप्रकारकत्वेनसखंडार्थत्वाच्छाब्दप्रत्यभिज्ञायाअपितथात्वं स्वप्रत्यभिज्ञावगतस्यैवपरंप्रतिवाक्येनबोधनादित्याह ॥ अपिचेति ॥ नाखंडार्थेति ॥ लक्षणयाखंडार्थविषयेत्यर्थः । कुतोनेत्यतआह ॥ तत्रेति ॥ प्रत्यक्षइत्यर्थः ॥ अनुभवादिति ॥ तत्वेनेदंत्वेनतदभेदेनचदेवदत्तप्रत्यभिज्ञानमितिप्रत्यभिज्ञानुव्यवसायेतृतीयार्थोल्लेखात्प्रत्यभिज्ञायास्तत्तादिप्रकारकत्वमवसीयतइत्यर्थः ॥ तदनुल्लेखइति ॥ तत्ताविशिष्टाभेदरूपप्रकारानुल्लेखेऽयमित्येवप्रत्यभिज्ञाकारापत्त्याअयमित्य

SGDF
Sri Gargeshwari Digital Foundation

भिज्ञातोभेदोनस्यात् अधिकविषयकत्वाभांवादित्यर्थः । ततःकिमित्यतआह ॥ तथाचेति ॥ ननुप्रत्यक्षप्रत्यभिज्ञायाःसप्रकारकत्वेशाब्दप्रत्यभिज्ञायाअपितथात्वंकुतइत्यतआह ॥ स्वेति ॥ स्वप्रत्यक्षप्रत्यभिज्ञेत्यर्थः ॥ परंप्रतीति ॥ वाक्येनेतिशेषः । सोयमित्यादिवाक्यस्याखंडार्थत्वाभावोपपादनेनसिद्धंसाध्यवैकल्यमुपसंहरति ॥ तस्मादिति ॥ किंचत्वन्मतेसोयंदेवदत्तइत्यादिवाक्यस्येत्यादिनोक्तंप्रमेयंदार्ष्टांतिकेतत्वमस्यादिवाक्येप्यतिदिशति ॥ किंचेत्यादिना ॥ तत्वमसिवाक्यस्याभेदविशिष्टेतात्प

तथाचशाब्दप्रत्यभिज्ञापितथा । स्वप्रत्यभिज्ञावगतस्यैवपरंप्रतिबोधनात् तस्मात्दुष्परिहरंसाध्य वैकल्यं । किंच तत्वमसीत्यस्याभेदविशिष्टे तदुपलक्षितेवातात्पर्यंचेदुक्तरीत्याअभेदरूपसंसर्गबोधनेनसखंडार्थत्वं । किंच चिन्मात्रस्यचिन्मात्रेणाभेदबोधनेइष्टापत्तिरप्रसक्तनिषेधश्च । तत्पदादिवाच्यसार्वज्ञाद्युपलक्षिताभेदबोधनेतुसखंडार्थत्वं । सार्वज्ञादेःप्रकारत्वेनानुप्रवेशात् ।

र्यं तदुपलक्षितेवा । केवलचिन्मात्राभेदेवा (सार्वज्ञाद्युपलक्षिताभेदेवा) चैतन्यमात्रेवा । नाद्यद्वितीयावित्याह ॥ तत्वमसीत्यस्येति ॥ उक्तरीत्येति ॥ अभेदाबोधनेभेदारोपनिवृत्त्ययोगादित्यर्थः । नतृतीयइत्याह ॥ किंचेति ॥ इष्टापत्तिरिति ॥ चिन्मात्रस्यचिन्मात्रेणाभेदस्यास्माकमपिइष्टत्वात् अभेदरूपसंसर्गबोधनेनसखंडार्थत्वाच्चेत्यर्थः ॥ अप्रसक्तेति ॥ चिन्मात्रस्वरूपेभेदस्याप्रसक्तत्वादित्यर्थः । उक्तदूषणपरिहारायाह ॥ तत्पदादीति ॥ कुतइत्यतआह ॥ सार्वज्ञादेरिति ॥ सार्वज्ञाद्युपल

SGDF
Sri Gargeshwari Digital Foundation

क्षितत्वस्येत्यर्थः । नचतुर्थइत्याह ॥ चैतन्येति ॥ चिन्मात्रेणाभेदादिबोधने नतात्पर्यंतत्वमसिवाक्यस्य किंनाम केवलचैत
न्यमात्रपरत्वमेवोच्यतेचेदित्यर्थः । उपदेश स्तत्वमसीत्यादिः । चैतन्यमात्रपरत्वेदूषणकथनायोत्तरोग्रंथः । वाक्यात् चैतन्य
मात्रबोधकतत्वमसिवाक्यात् । उक्तरीत्येत्युक्तमेवदर्शयति ॥ तस्याइति ॥ अधिकेति ॥ चैतन्यमात्रातिरिक्ताधिकबोधनेतु

चैतन्यमात्रपरत्वंचेत् । तस्यस्वप्रकाशस्यनित्यसिद्धतयोपदेशवैयर्थ्यं वाक्यात्प्राक्चैत
न्याज्ञानेउक्तरीत्यातत्रबुभुत्साचनस्यात् । तस्याधर्मिज्ञानसाध्यत्वात् भेदभ्रमश्चनस्यात् ।
अधिष्ठानज्ञानाभावात् । महावाक्येनभेदभ्रांतिनिवृत्तिश्चनस्यात् । भ्रमकालज्ञाता
धिष्ठानादधिकाबोधनात् । महावाक्यस्यावांतरवाक्येनगतार्थत्वंचस्यात् । तत्पदार्थ
शोधकेन "सत्यंज्ञान" मित्यादिनात्वंपदार्थशोधकेन (योऽयंविज्ञानमय) इत्यादिनाचा
वांतरवाक्येनलक्षणयाशुद्धचैतन्यबोधनात् । महावाक्यएवानेकपदवैयर्थ्यंचस्यात् ।

सखंडार्थत्वमितिभावः । महावाक्यस्य तत्वमसीत्यस्य । अवांतरवाक्येन सत्यज्ञानादिवाक्येन । कुतोगतार्थत्वमित्यतोलक्षण
याशुद्धचैतन्यमात्रबोधकत्वादुभयोरित्याह ॥ तत्पदार्थेति ॥ सार्वज्ञादिवाक्यंमिथ्याभूतसार्वज्ञादिप्रतिपादनपरत्वेनैक्यबोध ॥ ४८३ ॥
नविरोधित्वान्नशुद्धब्रह्मप्रतिपादकं सत्यादिवाक्यंतुसत्यादिरूपशुद्धब्रह्मस्वरूपमात्रप्रतिपादकंनाभेदबोधनविरोधीतितत्पदार्थ

शोधकमित्युच्यते एवंजीवेदुःखित्वादिप्रतिपादकवाक्यंऐक्यबोधनविरोधि योयमित्यादिकंतुविज्ञानादिरूपस्वरूपमात्रप्रतिपाद
कंतदविरोधीतित्वंपदार्थशोधकमित्युच्यतेइत्यर्थः । ननुभेदभ्रमनिरासायतत्वमसीतिमहावाक्येऽनेकपदाभावेएकपदजन्यज्ञाने
नकथंभेदभ्रमनिवृत्तिरितिशंकते ॥ कथमिति ॥ अधिकार्थबोधनाद्वाक्येनभेदभ्रमनिवृत्तिर्भविष्यतीत्यतउक्तं ॥ अधिकार्था
बोधनइति ॥ तद्बोधनेतुनचैतन्यमात्रपरत्वंसखंडार्थत्वापत्तेरितिभावः । ननुमहावाक्ये नपदानांवैयर्थ्यं तस्याद्दष्टद्वाराभेदभ्र
मनिवर्तकत्वात् अद्दष्टस्यचैकपदजन्यज्ञानेनानुत्पत्तेरित्यतआह ॥ नहीति ॥ अप्रामाणिकत्वादितिभावः । ननुवाक्यस्यपदा

एकेनैवपदेनलक्षणयाशुद्धबोधनात्कथंतेनभेदभ्रमनिरासइतिचेत् । अधिकार्था
बोधनेवाक्येनापिकथं । नहिवाक्यमद्दष्टद्वाराभ्रमनिवर्तकं । नचतात्पर्याविषये
णाप्यभेदेनतन्निवृत्तिः । अतिप्रसंगात् । नचैकस्यपदस्यलाक्षणिकत्वायपदांतरं ।

नांयद्यपिलक्षणयाचिन्मात्रएवतात्पर्यं नत्वभेदे तर्हिभेदभ्रमनिवृत्तिर्नस्यादितिचेत् तात्पर्याविषयीभूताभेदबोधनेनापिभवतीति
वदामइत्यतआह॥नचेति॥अतिप्रसंगादिति॥ "यजमानःप्रस्तर" इत्यादिवाक्यानामपिगौणीवृत्त्यातत्सिद्ध्यादावेवतात्पर्येण
यजमानप्रस्तरयोरभेदतात्पर्याभावादतात्पर्यविषयेणाप्यभेदेनतदुभयभेदनिवृत्तिःस्यादितिभावः । ननुमहावाक्येअधिकबोधना
र्थंनानेकपदानि किंत्वेकस्यपदस्यसहायार्थमित्यतआह॥ नचेति ॥ पदांतरप्रयोगेकथमेकस्यपदस्यलाक्षणिकत्वसिद्धिरित्यतआह॥

SGDF Foundation

तत्वमिति ॥ अनेनमहावाक्येनैक्यंनबोध्यते किंतुचैतन्यस्वरूपमेवबोध्यतइत्युच्यते तत्रसहायांतरानपेक्षचैतन्यपदप्रक्षेपेणैववि
वक्षितशुद्धचैतन्यस्वरूपसिद्धौविरुद्धार्थवाचिपदद्वयसामानाधिकरण्याधीनत्वंलक्षणायाःप्रकल्प्यतत्त्वमितिपदद्वयेनलक्षणयाशु
द्धचैतन्यबोधनमित्यादिक्लेशोनानुसर्तव्यइत्याह॥चैतन्येति॥ एकस्यपदस्यसहायार्थमेवपदांतरं नतुस्वार्थार्पणायेत्यंगीकारेदूषण
माह॥गंगायामिति॥अभेदेति॥ यदन्यथानुपपत्त्यायत्कल्प्यते तस्यतदुपपादकत्वमितिरात्रिभोजनादौदृष्टत्वात्प्रकृतेसार्वज्ञदुः

तत्वमितिविरुद्धार्थवाचिपदद्वयस्यसामानाधिकरण्याधीनत्वाल्लक्षणायाइतिविवरणोक्तंयुक्तं । चैत
न्यपदेनैवविवक्षितसिद्धौतत्वमितिलाक्षणिकपदद्वयेनतद्बोधनक्लेशायोगात् । गंगायांघोषइत्यत्रा
पिघोषपदंगंगाशब्दस्यलाक्षणिकत्वाय नतुस्वार्थार्पणायेत्यापाताच्च।अभेदरूपान्वयाबोधनेपदद्वयसा
मानाधिकरण्यस्यलक्षणाकल्पकत्वायोगाच्च। सदेवेत्यादिपूर्ववाक्येलक्षितचिन्मात्रस्यप्रकृतवाचिना

खाद्युपेतयोरन्वयरूपमुख्यार्थबोधकत्वेननिर्णीतस्यतत्त्वमितिपदद्वयसामानाधिकरण्यस्याऽन्यथानुपपत्त्याकल्प्यमानाशुद्धचै
तन्यलक्षणामुख्यार्थबाधेसतिचैतन्यस्यचैतन्येनाभेदरूपामुख्यान्वयमादायपदद्वयसामानाधिकरण्यमुपपादयतीतिवक्तव्यं। न
ह्येवंत्वयांगीकृतंचैतन्यमात्रबोधकत्वांगीकारेणाभेदरूपसंसर्गबोधकत्वानंगीकारात् तथात्वेसखंडार्थत्वापत्तेः तथाचपदद्वयसामा
नाधिकरण्यस्यलक्षणाकल्पकत्वमेवनसंभवतीत्यर्थः। एकस्मिन्नपिपदेलक्षणायाएवायोगेनतदर्थंपदांतरमर्थवदित्याह ॥सदेवेति॥

SGDF
Sri Gargeshwari Digital Foundation

तस्यापिलक्षणयाचिन्मात्रेतात्पर्यादित्यर्थः ॥ तत्पदेनेति ॥ चिन्मात्रंयदिनबुद्धिस्थं तर्हिलक्ष्यार्थज्ञानाभावादेवालक्षणा यदि बुद्धिस्थं तर्हितदितिपदेनशक्त्यैवतत्प्रतिपादनमस्तु नलक्षणया। सर्वनाम्नांबुद्धिस्थतयाप्रकृतार्थबोधनेशक्तत्वादितिभावः । लक्ष णायाविरुद्धार्थवाचिपदद्वयसामानाधिकरण्याधीनत्वात् । एकपदस्यलाक्षणिकत्वायपदांतरमित्युक्तेदृष्टांतेसोयमितिवाक्येसए वकुंडल्ययंदेवदत्तइत्यादौसोयमितिपदद्वयेनैवलक्षणासिद्धौपदांतरवैयर्थ्यमितिदूषणमुक्तं तदेतदत्रापिसममित्याह॥सवाइति॥ इदमपिवाक्यंसआत्माजीवइत्यभेदबोधनेतत्वमसीतिमहावाक्यतुल्यं। तत्रसआत्मेतिविरुद्धार्थवाचिपदद्वयसामानाधिकरण्येनैव

तत्पदेनलक्षणांविनैवपरामर्शसंभवाच्च । "सवाएषमहानजआत्मे" त्यादिमहावाक्येलक्ष णायाःसआत्मेतिपदद्वयसामानाधिकरण्येनैवसिध्यापदांतरवैयर्थ्याच्च । वाच्यार्थभेदग्रा ह्यतत्वावेदकप्रत्यक्षबाधकेनतत्वावेदकेनाद्वैतवाक्येनतयोरेवतात्विकाभेदबोधनसंभवेनल क्षणायाअनपेक्षितत्वाच्च । एतेनवाक्यस्थपदस्यैवलक्षकत्वादनेकपदोपादानमितिनिरस्तं ।

चैतन्यलक्षणायाःसिद्ध्या "एषमहानज" इतिपदांतराणांवैयर्थ्याच्चेत्यर्थः । किंचलक्षणैवनांगीकार्या। सार्वज्ञदुःखादिविशिष्टयो स्तत्त्वंपदवाच्यार्थयोरेवतत्वमसीतिवाक्येनाभेदोबोध्यतइत्यस्तु। नचभेदग्राहिप्रत्यक्षविरोधः तत्वावेदकाद्वैतवाक्यविरोधित्वेनभे दग्राहिप्रत्यक्षस्यातत्वावेदकत्वोपपत्तेः "नेहनाने" तिजगन्मिथ्यात्वश्रुतेःसन्घटइत्यादिप्रत्यक्षबाधेऽभिहिते तत्वावेदकश्रुतिवि रोधेनप्रत्यक्षस्यातत्वावेदकतायास्त्वयैवोच्यमानत्वेनतद्रीत्याऽत्राप्युपपत्तेरित्याह ॥ वाच्यार्थेति ॥ एतेनेत्युक्तंविशदयति ॥

SGDF
Sri Gargeshwari Digital Foundation

अन्वयेति ॥ एकस्यैवपदस्यलक्षकत्वेऽन्वयानुपपत्तिरुपलक्षणाबीजाभावेनतदर्थमेववाक्यस्थत्वमपेक्षितं । तच्च (सवाएषमहानजआत्मे)तिमहावाक्येसआत्मेतिपदद्वयेनैवभविष्यतीतिपदांतरोपादानंव्यर्थमितिभावः । किंचतत्वमसिवाक्येपित्वमसीत्युक्तेपिवाक्यस्थत्वसिद्ध्यालक्षणोपपत्तौतत्पदवैयर्थ्यमित्याह ॥ त्वमसीति ॥ यदुक्तंचैतन्यमात्रबोधकत्वेनमहावाक्यस्यावांतरवाक्येनगतार्थत्वंचस्यादिति तदयुक्तं चैतन्यमात्रबोधकत्वेनप्रमेयतोविशेषाभावेपिफलतोविशेषोस्ति तथाहि यथासोयंदेवदत्तइतिप्रत्यक्षप्रत्यभिज्ञायाःशाब्द्यावाऽयंदेवदत्तइत्यभिज्ञायाःप्रमेयतोनविशेषोस्ति प्रत्यभिज्ञाविषयस्यदेवदत्तैक्यस्याऽभिज्ञायांप्रतीयमानत्वात् नह्यभिज्ञायांस्वस्यस्वेनैक्यंभाति । नवाऽभिज्ञयाऽविषयीकृतंप्रत्यभिज्ञयाविषयीक्रियमाणंदेवदत्तस्यस्वेनैक्यांतरमस्ति

अन्वयानुपपत्तिरूपलक्षणाबीजार्थमेववाक्यस्थत्वस्यापेक्षणात् त्वमसीत्युक्तेपिवाक्यस्थत्वसिद्धेश्च ।

येनप्रमेयतोविशेषःस्यात् । नन्वेकस्यकालद्वयसंबंधोऽभिज्ञयाऽविषयीकृतःप्रत्यभिज्ञयाविषयीक्रियते अयंदेवदत्तइतिअभिज्ञयादेवदत्तैक्यस्यविषयीकरणेपिनकालद्वयसंबंधोविषयीक्रियते एककालसंबंधस्यैवविषयीकरणादितिचेत् न एकस्मिन्नेवदेवदत्तेकालभेदेनोत्पन्नाभ्यांअयंदेवदत्तअयंदेवदत्तइत्यभिज्ञाभ्यांऐक्यस्यदेवदत्तेकालद्वयसंबंधस्यचसिद्धेः तथाचप्रत्यभिज्ञायांसइत्यस्याप्ययमित्येवार्थः अतोऽभिज्ञाप्रत्यभिज्ञयोःकालद्वयसंबंधिपदार्थैक्यविषयकत्वेनप्रमेयतोनविशेषः तथापिफलतोविशेषोऽस्ति प्रत्यभिज्ञायाभेदभ्रमनिवर्तकत्वात् अभिज्ञायास्तदभावात् । ननुप्रमेयतोविशेषाभावेभेदभ्रमानिवर्तकत्वमेवप्रत्यभिज्ञायाःकुतइ

तिचेन्न प्रत्यभिज्ञायाअभिज्ञाभ्यांप्रमेयतोविशेषाभावेपिदेवदत्तेकालद्वयसंबंधावगाहित्वंएकस्यैवप्रत्यभिज्ञारूपज्ञानस्यास्ति अभिज्ञयोस्तुद्वयोःकालद्वयसंबंधावगाहित्वं अतोभेदभ्रमनिवर्तकत्वं एवंतत्वमसिवाक्यस्य (सत्यंज्ञानं) (यःसर्वज्ञः) (ससुखी) त्याद्यवांतरवाक्यात्महावाक्यस्थपदानांअवांतरवाक्यस्थपदाच्चनप्रमेयतोविशेषः सर्वेषामपिलक्षणयाचैतन्यमात्रबोधकत्वात् तथापिसार्वज्ञदुःखाद्युपलक्षितचैतन्ययोर्वस्तुतोभेदेपिविशकलितंयत्सार्वज्ञदुःखाद्युपलक्षितचैतन्यरूपतत्त्वंपदार्थबोधकंवाक्यंत

एतेनयदुक्तंविवरणे अभिज्ञातःप्रत्यभिज्ञायाःशाब्द्यावाप्रत्यभिज्ञायास्तावन्नप्रमेयतोविशेषः । अभिज्ञयाज्ञातस्यैवदेवदत्तैक्यस्यप्रत्यभिज्ञयाग्रहणात् । नहिदेवदत्तस्यस्वेनैक्यमभिज्ञायांनभाति । नचानभिज्ञातंप्रत्यभिज्ञयाज्ञेयंदेवदत्तस्यस्वेनैक्यांतरमस्ति । एकस्यकालद्वयसंबंधःप्रत्यभिज्ञागोचरइतिचेन्न । ऐक्यस्यकालद्वयसंबंधस्यचाभिज्ञाभ्यामेवसिद्धेः तस्मात्प्रमेयतोनविशेषः किंतुफलतः

ज्जन्यज्ञानस्यनभेदभ्रमनिवर्तकत्वं किंतुतत्त्वमसीतिमहावाक्यजन्यज्ञानस्यैव कुतः एकस्यैवतस्यज्ञानस्यउपलक्षणीभूतसार्वज्ञदुःखादिरूपधर्मद्वयपरामर्शेनचैतन्यैक्यावगाहित्वात् अतःफलतोविशेषसद्भावान्नमहावाक्यस्यावांतरवाक्येनगतार्थत्वमितिविवरणोक्तमप्येतेनैवनिरस्तमित्याह ॥ एतेनयदुक्तंविवरणइत्यादिना ॥ उक्तरीत्यास्पष्टोऽर्थः । द्वयोः अभिज्ञाप्रत्यभिज्ञ

SGDF
Sri Gangadharendra Digital Foundation

योः अविशिष्टेपि समानेपि । प्रत्यभिज्ञायाः । एकस्याएवेतिशेषः ॥ परामर्शित्वेनेति ॥ कालद्वयसंबंधावगाहित्वेनेत्यर्थः । नन्वभिज्ञावगतमात्रबोधकत्वेनप्रत्यभिज्ञायाअनधिगतार्थगंतृत्वरूपप्रामाण्यंनस्यादित्यतआह ॥ ततएवेति ॥ अर्थवादवाक्यवदनधिगतार्थत्वाभावेपिसप्रयोजनत्वात्प्रामाण्यमित्यर्थः ॥ तत्त्वमसिवाक्यस्येति ॥ तत्त्वमसिवाक्यजन्यस्यैकस्यैवज्ञानस्येत्यर्थः ॥ धर्मद्वयपरामर्शित्वेनेति ॥ तत्त्वंपदाभ्यांउपलक्षणभूतसार्वज्ञदुःखादिपरामर्शेनअसीतितदुपलक्षितचैतन्यैक्यावगा

कालद्वयसंबंधिपदार्थैक्यविषयत्वेद्वयोरविशिष्टेपिप्रत्यभिज्ञायाएवकालद्वयपरामर्शित्वेनपदार्थभेदभ्रमनिवर्तकत्वात् ततएवचप्रामाण्यमपि । एवंच तत्वमसिवाक्यस्यसत्यज्ञानादिवाक्यात्तत्पदाच्चप्रमेयतोऽविशेषेपिधर्मद्वयपरामर्शित्वेनभेदभ्रमनिवर्तकत्वात्प्रामाण्यं । उक्तंहि "सिद्धंतुनिवर्तकत्वादि" ति । तन्निरस्तं ।

हित्वादित्यर्थः । इदंचविशकलिततत्त्वंपदार्थबोधकवाक्यजन्यज्ञानयोरपिसमं । तत्रापिवाक्येसार्वज्ञदुःखाद्युपलक्षितचैतन्ययोः प्रतिपादनात् तयोरैक्यस्यापिसत्वादितिनप्रमेयतोविशेषइत्याशयः । (भामत्या) स्वोक्तार्थेसंमतित्वेनोदाहृतंवाक्यंस्वोक्तार्थेसंमतित्वेनाहविवरणकारः ॥ उक्तंहीति ॥ सिद्धं अवांतरवाक्यमहावाक्ययोरगतार्थत्वंसिद्धं प्रमेयतोविशेषाभावेपिफलतोविशेषसद्भावादित्याशयेनोक्तं ॥ निवर्तकत्वादिति ॥ भेदभ्रमनिवर्तकत्वादित्यर्थः । अभिज्ञाभ्यांप्रत्यभिज्ञायाःप्रमेयतएवभेदो ॥ ४८६ ॥

स्तीत्याशयेनोक्तंएतेनेत्युक्तंविशदयति ॥ अभिज्ञाभ्यामिति ॥ प्रत्यभिज्ञयेवेति ॥ सोयमितिप्रत्यभिज्ञायाएकस्मिन्नेवाधिकरणेकालद्वयसंबंधइत्येवमाकारेणवाकालद्वयसंबंधाधारएकइत्येवमाकारेणवायथाऽर्थोगृह्यते एवमभिज्ञाभ्यां अग्रहणादित्यर्थः । यथाह्येकस्मिन्नेवधूमेकालव्यवधानेनजातयोःधूमोवह्न्यव्यभिचारीवह्निसहचारीतिचविशकलितव्यभिचाराभावसहचारज्ञानयोस्तदुभयसामानाधिकरण्याविषयकत्वेनव्याप्त्यविषयकत्वादव्याप्यत्वभ्रमानिवर्तकत्वं वह्निव्याप्यधूमवानयमितिविशिष्टज्ञानाजनकत्वंचस्यात् वह्निव्याप्यधूमवानयमितिविशिष्टज्ञानस्यतुतदुभयसामानाधिकरण्यरूपव्याप्तिविषयकत्वेनअविशकलिततदु

अभिज्ञाभ्यांवस्तुतएकस्मिन्कालद्वयसंबंधस्यदेवदत्ताभेदस्यचदेवदत्तेग्रहणेपिप्रत्यभिज्ञयेवएकस्मिन्कालद्वयसंबंधइतिवाकालद्वयसंबंधाधारएकइतिवाग्रहणेनप्रत्यभिज्ञायाःप्रमेयतएवभेदात् । नहीदमितिज्ञानंवस्तुतःशुक्तौशुक्त्यभेदग्राह्यपीयंशुक्तिरितिज्ञानवत्इदंत्वशुक्तित्वाधारएकइत्याकारं ।

भयविषयकत्वादव्याप्यत्वभ्रमनिवर्तकत्वं तद्वत् अभिज्ञाभ्यांवस्तुगत्याएकस्मिन्कालद्वयसंबंधग्रहणेपिनताभ्यांकालद्वयस्यसामानाधिकरण्यंगृह्यते प्रत्यभिज्ञयात्वेकाधिकरणत्वरूपंकालद्वयस्यसामानाधिकरण्यंगृह्यतइतिप्रत्यभिज्ञायाअभिज्ञाभ्यांप्रमेयतएवभेदइतिभावइतिसंप्रदायः ॥ इयंशुक्तिरिति ॥ यथेयंशुक्तिरितिज्ञानेइदंत्वशुक्तित्वयोरैकाधिकरण्यरूपसामानाधिकरण्यावगाहित्वमस्ति एवंइदमितिज्ञानस्यवस्तुगत्याशुक्तौशुक्त्यभेदावगाहित्वेपिइदंत्वशुक्तित्वयोःसामानाधिकरण्यावगाहित्वंनास्तीत्य

र्थः । एवमुक्तरीत्याअभिज्ञाभ्यांप्रत्यभिज्ञायाःप्रमेयतोविशेषाभावेफलतोपिविशेषोनसंभवति तत्रनिमित्ताभावादित्याह ॥ अन्यथेति ॥ भेदभ्रमनिवर्तकत्वमपिनस्यादितिभावः । नन्वेकस्याअपिप्रत्यभिज्ञायाःकालद्वयपरामर्शित्वेनभेदभ्रमनिवर्तकत्वमुपपद्यतइतिचेत्तत्राह ॥ कालद्वयेति ॥ भेदभ्रमकालेपीति ॥ अयमिहसंप्रदायः एकस्यैवज्ञानस्यकालद्वयपरामर्शिकत्वस्यभ्रमनिवृत्तिप्रयोजकत्वेअयंसनेतिभेदभ्रमकालेपियथाकथंचित्कालद्वयपरामर्शसत्वात्तेनापिभेदभ्रमेणभेदभ्रमनिवृत्तिःस्यात् । अतस्तस्याप्रयोजकत्वादुक्तरीत्याप्रमेयतएवविशेषोवाच्यइत्यर्थः ॥ एवमिति ॥ विशकलिततत्त्वंपदार्थभूतसार्वज्ञदुःखाद्युपल

अन्यथाफलतोपिविशेषोनस्यात्।कालद्वयपरामर्शमात्रेणभेदभ्रमनिवृत्तौभेदभ्रमकाले
पितस्यसत्वात्तेननिवृत्तिःस्यात् । एवंतत्त्वमसीत्यत्रापीतिदिक् । एतेन "उपाधिभेद
भिन्नार्थोयेनैकःप्रतिपाद्यते । तदपिस्यादखंडार्थंमहत्खंकुंभखंयथे" तिकल्पतरूक्तं ।

क्षितचैतन्यप्रतिपादकवाक्यजन्यज्ञानयोःस्वविषयेवस्तुतोऽभेदसद्भावेपिसार्वज्ञाद्युपलक्षितत्वदुःखाद्युपलक्षितत्वयोरभेदसामानाधिकरण्यानवगाहित्वात्तत्वमसीतिवाक्यजन्यैकज्ञानस्यतदवगाहनाद्भेदभ्रमनिवर्तकत्वमितिप्रमेयतएवविशेषःप्राप्तइत्यर्थः ॥ इतिदिगिति ॥ यदुक्तंततएवप्रामाण्यमपीति तदयुक्तं नहिफलवत्त्वंप्रामाण्यं । तृणादिज्ञानेअव्याप्तेः । यथोक्तं । (फलवत्त्वं नचास्माभिःप्रामाण्यंहिविवक्षितं । तृणादिदर्शनेकिंचफलवत्त्वंनिगद्यत) इति इतिदिगर्थोद्रष्टव्यः ॥ उपाधिभेदेति ॥ तत्वमस्यादिमहावाक्यस्याखंडार्थत्वेऽनुमानंश्लोकेनोच्यते येन तत्वमस्यादिवाक्येन अंतःकरणाद्युपाधिभेदभिन्नार्थोजीवोब्रह्मणाएक

इतिप्रतिपाद्यते तदप्यखंडार्थं । कुंभखं घटाकाशः महत्खं महाकाशः इतिवाक्यंयथेत्यर्थः । घटोपाधिंविहायआकाशस्वरूपैकतायास्तत्राभिप्रेतत्वादितिध्येयं।तथाचतत्त्वमसिवाक्यंअखंडार्थं उपाधिभेदभिन्नैक्यार्थप्रतिपादकत्वात् घटाकाशोमहाकाशइतिवाक्यवदित्यनुमानमुक्तंभवति । तदुक्तंवार्तिके"घटाकाशोमहाकाशइत्युक्तेचैक्यधीर्यथे"ति ॥ सत्येति ॥ पदार्थनिष्ठवाक्यस्याखंडार्थत्वेअनुमानमनेनश्लोकेनोच्यते सत्यज्ञानादिगीः सत्यज्ञानादिवाक्यं एतत्संसर्गव्यतिरेकिणिअर्थे सत्यत्वादिसंसर्गशून्येऽर्थे प्रमाणं । मानत्वात् प्रमाणत्वात् प्रत्यक्षादिप्रमाणवदित्यर्थः । नयनादौप्रकृतसत्यत्वज्ञानत्वानंतत्वादिसंसर्गशून्येघटादौमा

"सत्यज्ञानादिगीरेतत्संसर्गव्यतिरेकिणि । अर्थेप्रमाणंमानत्वान्नयनादिप्रमाणव"दितिचित्सुखोक्तं
चानुमानंनिरस्तं । अप्रसिद्धविशेषणत्वादिदोषजातात् । एकत्वप्रतिपादकत्वरूपस्याद्यहेतोःसखं
डार्थत्वेनैवव्याप्ततयाविरुद्धत्वाच्च । आकाशेंशःस्वाभाविकइतिवक्ष्यमाणत्वेनसाधनवैकल्याच्च ।

नत्वमस्ति । पक्षेतुसत्यत्वादिसंसर्गशून्येचैतन्यरूपाखंडार्थेमानत्वेनसाध्यंपर्यवसितव्यं ॥ अप्रसिद्धेति ॥ निर्विकल्पकानंगीकारात्प्रत्यक्षादिप्रमाणत्रयेणापिइदमित्थमित्यादिसप्रकारकज्ञानस्यैवोत्पत्त्यापूर्वानुमानसाध्याखंडार्थत्वस्यद्वितीयानुमानाभिप्रेताखंडार्थत्वस्यचकुत्राप्यप्रसिद्धत्वादितिभावः ॥ एकत्वेति ॥ एकत्वाधारेत्यर्थः । तथाचोपाधिभेदभिन्नोयःएक(त्वसंख्याधा)त्वाधारभूतोर्थःतत्प्रतिपादकत्वादित्यर्थःस्यात् एवंचैकत्वसंख्यासंसर्गस्यप्रतिपादनात्सखंडार्थत्वमेवेत्यर्थः ॥ आकाशेंऽशइति ॥ तथाचघटाकाशरूपांशस्यस्वाभाविकत्वेनौपाधिकत्वाभावात्कुंभखंमहत्खमितिवाक्यस्यनोपाधिभिन्नैकार्थप्रतिपादकत्वमस्तीतिसा

SGDF Foundation

धनवैकल्यमित्यर्थः ॥ घटाकाशइति ॥ कोघटाकाशइतिपृष्टेभेदभ्रमनिरासायघटाकाशोमहाकाशइतिकथ्यते । अत्रापिप्रश्नोत्तरयोर्वैयधिकरण्यान्यथानुपपत्त्याआकाशस्वरूपमात्रपरत्वेनाऽखंडार्थत्वमंगीकार्यमितिहित्वदभिप्रेतं । तन्नयुक्तं । घटाकाशमहाकाशयोःभेदभ्रमेणकोघटाकाशइतिपृष्टेभेदभ्रमनिरासायघटाकाशोमहाकाशइतिवाक्यंप्रवर्तते तत्रस्वरूपमात्रबोधनेभेदभ्रमनिरासायोगादधिकोऽभेदरूपःसंसर्गोबोध्यतइत्यवश्यंवाच्यं । एवंचसाध्यवैकल्यमित्यर्थः । संसर्गिणि पदार्थपरब्रह्मरूपे । तथा

घटाकाशोमहाकाशइत्यत्रापिआकाशस्वरूपमात्रबोधनेभेदभ्रमनिरासायोगेनाधिकस्य बोध्यत्वेनसाध्यवैकल्याच । द्वितीयहेतौसंसर्गादन्यस्मिन्संसर्गिण्यपिप्रामाण्यस्यमन्मतेपिसत्वेनसिद्धसाधनाच । श्लोकस्यअग्निहोत्रादिगीरिति सत्यज्ञानादिगीरेतत्पदार्थव्यतिरेकिणीत्यपिपठितुंशक्यत्वेनाभाससाम्याच । तस्माद्वेदांताःसगुणब्रह्मपराइतिब्रह्मानंतगुणमिति ॥ ७ ॥ तत्वमस्यादिवाक्यस्याखंडार्थत्वानुमानभंगः ॥ ३ ॥ ७ ॥

चसत्यज्ञानादिगीरेत(त्पदार्थव्य)त्संसर्गव्यतिरेकिणिअर्थेप्रमाणमितिमांप्रतिसाधनेसिद्धसाधनमित्यर्थः ॥ आभासेति ॥ तथाचाखंडकर्मपरत्वमपिस्यादितिभावः । उत्तरग्रंथमुपक्षिपन्नखंडार्थत्वनिराकरणेनसिद्धमर्थमुपसंहरति ॥ तस्मादिति ॥ तत्वमस्यादिवाक्यस्याखंडार्थत्वानुमानभंगविवरणम् ॥ ३ ॥

SGDF Sri Gargeshwari Digital Foundation

सरोजनिष्ठासत्तायोगाभावप्रतियोगित्वं

सरोजत्वसमानाधिकरणसत्तायोगाभावप्रतियोगित्वं

सरोजनिष्ठसरोजत्वसमानाधिकरणसत्तायोगाभावप्रतियोगित्वमेव अवच्छेदः



$$p^2+q^2 = (p+q)^2 - 2pq$$

$$(a-b)^2 = (a+b)^2 - 4ab$$

$$a^4+b^4 = (a^2+b^2)^2 - 4ab$$

असत्तायोगाभावप्रतियोगित्वरूपो अवच्छेदः

असत्तायोगस्य योऽभावः तत्प्रतियोगि असत्तायोग एव न तु नैल्यादि नैल्यादेः सरोजादौ सत्त्वे असत्तायोगस्याभावस्तत्र भवतीति ॥

तादृशोऽसत्तायोग अवच्छेदः ॥

~~असत्तायोगाभावप्रतियोगित्वमेव अवच्छेदो वाक्यार्थः ॥~~

४ सांकेते शङ्खस्तु पाण्डुर एवेत्यत्र शङ्खे विशेष्ये पाण्डुरत्वतादात्म्यावच्छेदः इतरत्र अन्ययोग व्यावृत्तिः पदेरेव गृह्यते ।

५ सांकेते अत एव व्याप्तिविवक्षोदाहरणं कृतं इति न ज्ञायते

न्यायामृतमाधुरीस्वा विजयः

तथाहि ब्रह्मणोधर्माःकिंसाधकाभावान्नसंति उतबाधकसद्भावात् । नाद्यः "बृहंतोह्यस्मिन्गुणाः प रास्यशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानबलाक्रियाच सत्यकामःसत्यसंकल्प" इत्यादिश्रुतीनां । "ब्रह्मेशानादिभिर्देवैःसमेतैर्यद्गुणांशकः । नावसाययितुंशक्योव्याचक्षाणैश्चसर्वदा मय्यनंतगुणे नंते तेजोबलैश्वर्यमहावबोधसद्वीर्यशक्त्यादिगुणैकराशिः । परःपराणा" मित्यादिस्मृतीनां । "अं तस्तद्धर्मोपदेशात् अंतर्याम्यधिदैवादिषुतद्धर्मव्यपदेशात् अदृश्यत्वादिगुणकोधर्मोक्तेः सर्वधर्मो पपत्तेश्च" । इत्यादीनांनिर्णायकसूत्राणां ब्रह्मधर्मिसत्तासमानसत्ताकधर्मवत् उक्तसत्ताकभा वरूपधर्मवद्वा यावत्स्वस्वरूपमनुवर्तमानधर्मवद्वा उक्तविशेषणवद्भावरूपधर्मवद्वा स्वज्ञानाबाध्य भावरूपधर्मवद्वा । धर्मैर्भावरूपैर्धर्मैर्वाहीनंनावतिष्ठते पदार्थत्वात् भावत्वात् अभावविलक्षणत्वा द्वा घटवत् । ब्रह्मस्वज्ञानाबाध्यप्रकारवत् । स्वारोपितव्यावर्तकस्वज्ञानाबाध्यप्रकारवद्वा । अधिष्ठा नत्वाच्छुक्तिवत् । ब्रह्म स्वज्ञानाबाध्यदुःखव्यावृत्तिमत् । स्वज्ञानाबाध्यदुःखव्यावर्तकधर्मवद्वा । दुःखानात्मकत्वात् घटवत् । ब्रह्म स्वज्ञानाबाध्यप्रकारकज्ञानविशेष्यं । संदिग्धत्वात् विचार्यत्वा त् निर्णेतव्यत्वाच स्थाणुवत् । ब्रह्म वेदांततात्पर्यगोचरप्रकारवत् । वेदांतविचारविषयत्वात् यदे

* इतआरभ्यआदशमभंगसमाप्तिव्याख्यानोलभ्यते ।

७८ पत्रान्तरं पुनर्व्याख्यानं वर्तते ।
२७ पत्रेषु व्याख्या नास्ति

SGDF
Sri Gargeshwari Digital Foundation

वंतदेवं यथाकर्मकांडविचारविषयोधर्मः ईश्वरःसदाऽवाप्तसमस्तकल्याणगुणः । सदातत्प्रेप्सुत्वे सतितत्रशक्तत्वात् । योयदायत्प्रेप्सुत्वेसतियत्रशक्तःसतदातद्वान् यथाचैत्रः ईश्वरःसदात्यक्तस मस्तदोषः सदातज्जिहासुत्वेसतितत्त्यागेशक्तत्वात् योयदायज्जिहासुत्वेसतियत्त्यागेशक्तः सतदा त्यक्ततद्दोषः यथाचैत्रः । तत्प्रेप्सादिकंचप्रेक्षावत्त्वादिनाविपक्षेऽधिष्ठानत्वसंदिग्धत्वादिकंनस्यादि त्याद्यनुकूलतर्कसनाथानुमानानांचसत्वात् । नचानवस्थानिरासायकश्चिद्धर्मोनिर्धर्मकइतितत्राद्य हेतोर्व्यभिचारः । साध्याभावरूपस्यनिर्धर्मकत्वस्यपदार्थत्वात्मकस्यहेतुरूपस्यचधर्मस्यभावाभावा भ्यांव्याघातात् । प्रमेयत्वाभिधेयत्वादीनामबाधितानुभवबलेनत्वदभिमतमिथ्यात्वदृश्यत्वादिव त्स्ववृत्तित्वाच्च । गोत्वादेरपिगोव्यक्तिरेववागोत्वंवातंस्वाश्रयव्यक्तिंप्रतिअन्यस्माद्व्यावर्तकत्वंवा व्यावर्तकमितिवद्दुःखानात्मकत्वस्यतत्रव्यभिचारः । नचश्रुतिःसगुणब्रह्मपरा नतुपरब्रह्मपरेतिवा च्यं । सगुणातिरिक्तस्यपरस्याद्याप्यसिद्धेः । त्वत्पक्षेपितात्त्विकगुणवद्व्यक्त्यंतराभावाच्च । परःपरा णामित्यादिस्मृतौपरात्परत्वोक्तेश्च । अन्यथा "सदेवसोम्येदं असद्वाइदमग्र" इतिसदसच्छ्रुतीअ पिपरापरब्रह्मविषये । ग्रहणाग्रहणश्रुतीअपिपरापरयागविषयेस्यातां । "असन्नेवसभवतिअसद्ब्र ह्मेतिवेदचे" दितिश्रुतिरपिनासत्वनिंदार्था किंतुशून्यतापत्तिरूपपरममोक्षपरेतिस्यात् । नचेदानीं

सगुणंदशांतरेतुनिर्गुणं । तथात्वेपिगुणानामनित्यत्वमात्रापत्त्यात्वदभिमतमिथ्यात्वासिद्धेः । "ज्ञानं नित्यंक्रियानित्याबलंनित्यंपरात्मनः । एषनित्योमहिमाब्राह्मणस्ये" त्यादिश्रुतेश्च । "एषनित्य" इ तिश्रुतिश्चब्रह्मपरा । पूर्वत्र "नावेदविन्मनुतेतंबृहंत" मितिब्रह्मणःप्रकृतत्वात् । उत्तरत्र "नकर्म णावर्धतेनोकनीयान् । तस्यैवात्मापदवित्तंविदित्वानलिप्यतेकर्मणापापकेने" तिब्रह्मलिंगात् । बृ हदारण्यके "सर्वस्यवशीसर्वस्येशानःसर्वस्याधिपतिःसनसाधुनाकर्मणाभूयान्नोएवासाधुनाकनी यान् । एषसर्वेश्वरएषभूताधिपतिःएषभूतपाल" इत्यादिनाब्रह्मोक्त्वातत्रसंमतित्वेनतदेतदृचाभ्यु क्तमिति "एषनित्य" इत्यादिमंत्रस्योदाहृतत्वाच्च । अन्यथाब्रह्मेदानींसद्दशांतरेत्वसदितिस्यात् । नचौ पाधिकाधर्माः औपाधिकत्वस्यसोपाधिकाध्यस्तत्वरूपत्वेश्रुत्यप्रामाण्यापातात् । वक्ष्यमाणसत्यत्वश्रु तिविरोधाच्च । उपाधिकृतत्वरूपत्वेतूक्तनित्यत्वश्रुतिविरोधात् अंतःकरणादिरूपोपाधिसृष्टेःप्रागे वेक्षितृत्वातिश्रुतेश्च । "स्वाभाविकीज्ञानबलक्रियाचे" त्यादिश्रुतेश्च । नचयोगलब्धयोगिशक्त्यादिवैष म्यमात्रेणतदुक्तिः । संकोचकाभावेनोक्तनित्यत्वश्रुत्यनुसारेणस्वाभाविकज्ञानसमभिव्याहारेणचो पाधिमात्रनिषेधात् । अन्यथाब्रह्मणःसत्वमौपाधिकं असत्वंतुस्वाभाविकमितिस्यात् । नचातात्वि कागुणाःश्रुत्यागुणमात्रोक्त्यातात्विकत्वानुक्तेरितिवाच्यं । नित्यत्वोक्तिसामर्थ्यात्विषयाबाधल

SGDF Digital Foundation

क्षणप्रामाण्यस्यौत्सर्गिकत्वात् "सत्यःसोअस्यमहिमे" त्यादिश्रुतेश्चतत्सिद्धेः। अन्यथा "सत्यंज्ञानं त त्वमसी" त्यादिश्रुत्युक्तंब्रह्मसत्त्वैक्यादिकमपितात्विकंनस्यात्। निर्गुणश्रुतिविरोधस्तूद्धरिष्यते। किंचतद्विरोधेपिश्रुतेर्नातात्विकविषयतायुक्ता। उक्तंहि। "कोहिमीमांसकोब्रूयाद्विरोधेशास्त्रयोर्मिथः। एकंप्रमाणमितरत्त्वप्रमाणंभवेदि" ति। तथाहिपूर्वतंत्रेप्राप्तबाधोप्राप्तबाधश्चेतिद्विविधोबाधउक्तः तत्र दाशमिकेप्राप्तबाधेप्रकृतिवत्कुर्यादित्यादिरूपस्यप्राप्तस्यचोदकादेःकृष्णलादाववघातवर्जमित्यादिरूपःसंकोचएव। एवंतार्तीयेप्यप्राप्तबाधे गार्हपत्यमितिद्वितीयाश्रुत्यनुसारेणेंद्रशब्दप्रयुक्तमंत्रलिंगस्य गार्हपत्येगौणत्वादिकमेव। एवंव्याकरणेपिपरेणपूर्वस्यनित्येनानित्यस्यअंतरंगेणबहिरंगस्यप्रतिपदोक्तेनलक्षणोक्तस्येत्यादिर्बाधउक्तः। तत्रापिसंकोचएव। एवंब्रह्ममीमांसायामपि "विकारशब्दान्नेतिचेन्नप्राचुर्यात् उपदेशभेदान्नेतिचेन्नोभयस्मिन्नप्यविरोधात्। गौण्यसंभवादि" त्यादौशास्त्रयोर्विरोधे तात्विकार्थांतरपरत्वमेवोक्तं नत्वारोपितार्थत्वं। अन्यथेक्षत्याद्यधिकरणेषुसिद्धांतसाधकानांईक्षणादीनांसांख्याद्यभिमतप्रधानादावारोपसंभवात्क्वापिसिद्धांतोनसिध्येदितिसर्वमपिशास्त्रमुन्मूलितंस्यात्। किंचदशमे विकृतिभूतमहापितृयज्ञप्रकरणस्थे "नार्षेयंवृणीत" इत्यादिवाक्येप्रकृतिवत्कुर्यादार्षेयवरणवर्जमितिमहापितृयज्ञीयप्रकृतिवच्छब्दैकवाक्यतयापर्युसादार्थत्वमेवेत्युक्त्वा

SGDF
Sri Gargeshwari Digital Foundation

यत्रप्रकृतिभूतदर्शपूर्णमासप्रकरणस्थाज्यभागविधायकवाक्यसंनिहिते "नतौपशौकरोती" त्या
दौपाशुकप्रकृतिवच्छब्दैकवाक्यत्वायोगेननञःपर्युदासार्थत्वासंभवात्प्रकृतिवत्कुर्यादाज्यभागौतु
नकुर्यादितिवाक्यभेदेनप्रसज्यप्रतिषेधार्थत्वमेवयुक्तं तत्रपशावाज्यभागयोरन्येनाप्रसक्तेः शास्त्र
प्रसक्तस्यचसर्वथाबाधायोगात्विकल्पइत्युक्तं । एवंचयदाप्रतिषेधोन्नीतप्रसक्तेरपिनसर्वथाबाधः
तदाकिमुवक्तव्यंप्रत्यक्षसगुणशास्त्रप्रमितानांगुणानांनसर्वथाबाधइति ननुनिर्गुणवाक्येननिषेद्धुंस
गुणवाक्यस्यानुवादकत्वेनैकवाक्यत्वसंभवेवाक्यभेदेनगुणप्रापकतानयुक्तेतिचेन्न । सत्यकामत्वा
दीनामन्यतोप्राप्तेः । श्रुतिप्राप्तस्यचश्रुत्यानिषेधेऽहिंसावाक्यमग्नीषोमीयहिंसायाःअग्रहणवाक्यं
चषोडशिग्रहणस्यअसद्वाइत्यादिवाक्यंचब्रह्मसत्वस्यभेदवाक्यंचैक्यस्यनिषेधकंस्यादित्युक्तत्वात्।
किंच "मृडमृदे" त्यादिविधि "नेक्त्वासेडिति" निषेधस्येवसगुणवाक्यमेवनिर्गुणवाक्यस्यबाधकं
किंनस्यात्। नचजगत्कर्तृत्वेनाक्षिप्तस्यसार्वज्ञादेर्निषेधायानुवादः । श्रुत्याक्षिप्तस्यपुनःश्रुत्यानिषे
धायोगात्।अन्यथाश्रुतेनज्ञाननिवर्त्यत्वेनजगदारोपाधिष्ठानत्वेन "सएवेदंसर्वं आत्मैवेदंसर्व" मिति
श्रुतेनजीवब्रह्मणोःसार्वात्म्येनचाक्षिप्तंसर्वमिथ्यात्वंब्रह्मसत्वंजीवब्रह्मैक्यंच "विश्वंसत्य" मित्यनेन
"असद्वाइद" मित्यनेन "द्वासुपर्णे" त्यनेनचनिषेद्धुं "नेहनाने" त्यनेनसत्यंज्ञानमित्यनेनतत्वमसीत्यनेन

SGDF
Sri Gargeshwari Digital Foundation

चानूद्यतइतिस्यात्।किंच श्रुत्याक्षिप्तस्यसार्वज्ञादेःश्रुत्यानिषेधेपिश्रुतस्यसर्वकर्तृत्वादेःकथंनिषेधः । किं चाद्वैतश्रुते निर्गुणश्रुत्यंतरस्यवा तात्पर्यापरिज्ञानप्राप्तंनिर्गुणत्वमेवसगुणवाक्येननिषेद्धुंसगुणवा क्येनानूद्यतइतिकिंनस्यात् । "वैगुण्यमेवपश्यंतिनगुणा(न्विनि)निनियुंजत" इतिभारतोक्तेः । किंच निर्गुणवाक्यएव "साक्षीचेते" त्यादिनाद्रष्टृत्वादिगुणविधानान्नतेनतन्निषेधइतिननदर्थंसार्व ज्ञादिवाक्यमनुवादकं । अन्यथासार्वज्ञादेर्व्यावहारिकंसत्वमपिनस्यात् । नहिनिषिद्धेब्राह्मणहन नादौअवांतरमपितात्पर्यं । नचौपनिषदस्यब्रह्मणःसार्वज्ञादिकमनुमानादिसिद्धं । ननुसगुणवाक्यं "वाचंधेनुमुपासीते" त्यादिवदुपासनार्थं । उपासनायाःकर्तव्यत्वेगुणेषुचतात्पर्यैवाक्यभेदादितिचे न्न । "उपासनायाःकार्यत्वेविष्णोरात्मत्वएवच ॥ उभयत्रापितात्पर्यमात्मोपासादिकेविधा" वि तिस्मृतिविरोधात् । "यःसर्वज्ञ" इत्यादौउपासनाविधेरश्रवणाच्च । कल्पनस्यचनिर्गुणवाक्येपिश क्यत्वात्।किंच"आत्मेत्येवोपासीत अथयोऽन्यांदेवतामुपास्ते" इत्यादावद्वैतस्याप्युपास्यत्वंश्रूयते । किंच त्वयैवतृतीयस्यतृतीयेपादे "आनंदादय" इतिसूत्रे"आनंदंब्रह्मे"त्यादिश्रुतिसिद्धाआनंदादयः "व्यतिहार" इतिसूत्रे "तद्योह" मितिश्रुत्युक्तंजीवस्येश्वरत्वमीश्वरस्यचजीवत्वमुपास्यमित्युक्तं। तथा "उत्तरस्मिंस्तापनीयेशैब्यप्रश्नेथकाठके ॥ मांडूकादौचसर्वत्रनिर्गुणोपास्तिरीरिते" तिनिर्गुणं

ब्रह्माप्युपास्यमित्युक्तं । एवंचोपास्यत्वेप्यानंदादेरिवऐक्यस्येवनिर्गुणब्रह्मणइवचसत्यकामत्वादेर पितात्विकतास्तु । भाषितंहित्वयैव "व्यतिहार" इतिसूत्रेयथाध्यानार्थेपिसत्यकामत्वाद्युपदेशेत द्गुणईश्वरःसिध्यति तद्वदैक्यमिति। भामत्यांच तादात्म्यदार्ढ्यंतुभवन्नोपेक्षामहे। सत्यकामादिगुणो पदेशइवतद्गुणेश्वरसिद्धेरिति । नचानंदादिवाक्यसत्यकामादिवाक्ययोर्मानांतराविरोधेतदप्राप्तौ उपासनाविध्यश्रवणेनिर्गुणश्रुतिविरोधेचतुल्येपिआनंदादयोवास्तवाःसत्यकामादयस्तुवाग्धेनुत्वा दिवत्पुंतंत्रावा व्यावहारिकावेतियुक्तं । यदिचानंदादयःस्वरूपभूताइतिनानिर्गुणश्रुतिविरोधः त र्हिबलशक्त्यादयोपितथैव । "ज्ञानात्मकोभगवान्बलात्मकोभगवानि" त्यादिश्रुतेः । "समस्तक ल्याणगुणात्मक" इत्यादिस्मृतेश्च । ननुनिर्गुणाद्युपासनंभ्रमोपिमणिप्रभायांमणिभ्रमइवफलसंवा दि।उक्तंहि "स्वयंभ्रमोपिसंवादीयथासम्यक्फलप्रदः। ब्रह्मतत्वोपासनापितथामुक्तिफलप्रदे" ति। नचैवंब्रह्मासिद्धिः उपासनस्यभ्रमत्वेपिशब्दजन्यस्यज्ञानस्यप्रमात्वा।दितिचेन्न । प्रकृतेपितथात्वोपप त्तेः । मणिप्रभायांमणित्वस्येवब्रह्मणोमिथ्यात्वाभावेनध्यानस्यापिसत्यब्रह्मविषयत्वाच्च । नचब्र ह्मविषयशाब्दधीजन्यस्यतदपरोक्षधीजनकस्यचब्रह्मध्यानस्याब्रह्मविषयतायुक्ता । ब्रह्मज्ञानहेतू नांश्रवणादीनामपितथात्वापातात् । "ईक्षतिकर्मे" तिसूत्रे "ईक्षणध्यानयोरेकःकार्यकारणभूत

SGDF Digital Foundation

योः ॥ अर्थऔत्सर्गिकंतत्वविषयत्वंतथेक्षते” रितिभामत्यां “परात्परंपुरिशयंपुरुषमीक्षत” इति
ईक्षणकर्मणःपरब्रह्मणएव “परंपुरुषमभिध्यायीते” तिध्यातव्यत्वोक्त्यातद्विरोधाच्च । ननुऐक्या
द्युपासनंपरोक्षप्रमाप्रवाहरूपं नतु “वाचंधेनुमुपासीते” त्यादाविवज्ञानविजातीयंवृत्त्यंतरंबुद्धिपूर्व
कारोपोवेतिचेत् समंप्रकृतेपि । नचैक्यादिकंध्येयंज्ञेयंच सार्वज्ञादिकंतुध्येयमेवेतियुक्तं । तत्र “त
त्वमसी” त्यादेरिवेहाप्यविधिरूपस्यवस्तुतत्वनिष्ठस्य “यःसर्वज्ञ” इत्यादेःसत्वेनविशेषहेत्वभा
वात् । ब्रह्मणोजगत्कर्तृत्वादिनारोप्योपास्यत्वेनास्तिब्रह्मवाक्यानामिवब्रह्मण्यपिकारणवाक्यानां
समन्वयस्यावक्तव्यत्वेनसमन्वयाध्यायानारंभापाताच्च । “यआत्मापहतपाप्मे” त्यारभ्य “सत्य
कामःसत्यसंकल्पःसोन्वेष्टव्यःसविजिज्ञासितव्य” इतिसत्यकामत्वादीनामपहतपाप्मत्वादिभिः
सहजिज्ञास्यत्वश्रवणाच्च । अपहतपाप्मत्वादीनामप्युपास्यत्वेतस्यभूताकाशेपि(संभवेन)सत्वेन
दहराकाशस्यब्रह्मत्वप्रतिपादकदहराधिकरणविरोधः । “एषसर्वेश्वरएषभूताधिपति” रित्यादिध
र्मानुक्त्वातेषां “तमेतंवेदानुवचनेनब्राह्मणाविविदिषंती” तिमुमुक्षुज्ञेयत्वोक्तेश्च । “यःसर्वज्ञःस
र्वविद्यस्यैषमहिमाभुवी” त्याद्युक्त्वा “तद्विज्ञानेनपरिपश्यंतिधीरा” इत्यपरोक्षप्रमाविषयत्वोक्ते
श्च । “तुरीयंतत्सर्वदृक्सदे” तितुरीयेसार्वज्ञश्रवणाच्च । “सत्यःसोअस्यमहिमे” त्यादौसाक्षात्सत्य

1 तस्याप्युपास्य त्वेनिर्धर्माः

SGDF
Sri Gargeshwari Digital Foundation

त्वश्रुतेश्च । अत्रहोममात्रानुवादेनआहवनीयस्येवसइतिश्रुत्युक्तमहिममात्रानुवादेनसत्यत्वस्यवि
धानात् । “सत्यःसोअस्ये” त्यादेरैंद्रसूक्तस्थत्वेपि “तत्त्वायामि” “सुवीर्यंतद्ब्रह्मपूर्वचित्तय” इति
ब्रह्मश्रुत्या “इंद्रःसूर्यमरोचयत् इंद्रेहविश्वाभुवनानियेमिर” इत्यादिसूर्यप्रकाशकत्वादिलिंगैश्चज्यो
तिरधिकरणन्यायेनसूक्तस्यपरमेश्वरपरत्वात् । इयंश्रुतिर्व्यावहारिकसत्वपराचेद्ब्रह्मसत्वश्रुतिरपि
प्रातिभासिकसत्वपराऽस्तु । नचात्रमानांतरप्राप्तिरस्ति । अत्रनिर्गुणवाक्यंबाधकंचेत् तत्राप्यस
द्वाइत्यादिवाक्यंबाधकं । तत्अव्यक्तत्वाद्यभिप्रायंचेत् इदमपित्रैगुण्यराहित्याद्यभिप्रायं । यदिच
ब्रह्मभ्रमाधिष्ठानत्वात्सत् तर्हिततएवसविशेषं । नचनिर्गुणस्यारोपरूपोपासनाविषयत्वेतज्ज्ञाना
न्मुक्त्ययोगः । धर्मिज्ञानाधीनसंदेहसापेक्षवेदांतविचारसाध्यसप्रकारकज्ञानस्यैवमोचकत्वोक्तेः ।
उपासनांतराणामिवश्रुतिबलादेवविचित्रफलत्वोपपत्तेश्च । सगुणेपिसाम्यापत्तेश्च[1] । “पृथगात्मान”
मित्यादिश्रुतिषु “योमामशेषदोषोज्झंगुणसर्वस्वबृंहितं । जानात्यस्मैप्रसन्नोहंदद्यांमुक्तिंनचान्यथा ॥
भोक्तारंयज्ञतपसांसर्व(भूत)लोकमहेश्वरं । सुहृदंसर्वभूतानांज्ञात्वामांशांतिमृच्छती” त्यादि
स्मृतिषुचसविशेषज्ञानादेवमोक्षोक्तेः । तस्यतथोपासनाकर्तव्यतापरत्वेसगुणोपासनाविधिशेषा
न्या० ८३ र्थवादत्वेवानिर्गुणज्ञानान्मुक्तिश्रुतिरपितथास्यात् । एतेन “एषनित्योमहिमाब्राह्मणस्य सत्यःसो

1 निर्गुणोपास्तेरपि आरोपरूपत्वेन यथा न मोचकत्वं तथा सगुणेऽपीति भावः ॥

SGDF
Sri Gargeshwari Digital Foundation

अस्यमहिमे" त्यादेरपितथोपासनापरत्वादिकंनिरस्तं । श्रूयतेचनिर्गुणज्ञानस्यापिफलांतरं "सयो
हवैतत्परमंब्रह्मवेदनास्याब्रह्मवित्कुलेभवति यएवंवेदाहंब्रह्मास्मीतितस्यहनदेवाश्चनाभूत्याईशत"
इत्यादौ श्रुतिबलान्निर्गुणज्ञानस्यसंयोगपृथक्त्वन्यायेनमुक्तिरपिफलंचेत् सगुणज्ञानस्यापितथास्तु ।
नचसगुणज्ञानाच्छुतामुक्तिरवांतरा । "पुण्यपापेविधूये" तिसर्वकर्मनिवृत्त्युक्तेः । अन्यथानिर्गुण
ज्ञानाच्छुताप्यवांतरैव । परममुक्तिस्तु "असन्नेवसभवती" तिश्रुत्युक्ताशून्यतापत्तिरितिस्यात् । एते
नसगुणवाक्यंनिष्प्रपंचप्रकरणस्थंचेन्निषेधायानुवादकं उपासनाप्रकरणस्थंचेदुपासनार्थमितिनिरस्तं ।
गुणविशेषविधिसंनिहितस्यसामान्यनिषेधकस्यनिष्प्रपंचवाक्यस्यविहितगुणानिषेधकत्वात् प्राप्त्य
भावेनसगुणवाक्यस्याननुवादकत्वाच्च । अन्यथा "असद्वाइदमग्रआसीत्" "इदंवाअग्रेनैवकिंचना
सीदि" तिसर्वनिषेधप्रकरणस्थं "रसोवैस" इत्यादिकमपिनिषेधायब्रह्मानुवादकंस्यात् । उपासनाप्रकर
णस्थत्वमात्रेणचोपास्यत्वेउद्गीथोपासनाप्रकरणस्थस्य "सएषोऽनंत" इतिश्रुतानंतत्वादेरपिभूताका
शेउपासनामात्रमितिसुवचत्वेनाकाशाद्यधिकरणेषुअनंतत्वादिलिंगैर्ब्रह्मत्वोक्त्ययोगाच्च । अनुपा
स्तिप्रकरणेपिसत्यकामत्वादेःश्रवणाच्च । यदिच "वेधाद्यर्थभेदादि" तिसूत्रेत्वद्भाष्योक्तरीत्यायथासर्वं
प्रविध्येत्यादिमंत्राणामुपासनाप्रकरणादुत्कर्षः । तथानंतादिवाक्यस्यापि । यदिवाऽनंतादिवाक्य

स्योपास्यत्वेवस्तुत्वेचतात्पर्यं तर्हिसगुणवाक्यस्यापितथास्तु । तस्मान्नासदुपासनार्थागुणोक्तिः ।
अन्यथासार्वज्ञादिकंवाग्धेनुत्वादिवत्प्रातीतिकमेवस्यात् । किंचनक्काप्यसदुपासना ॥ "नाविद्यमा
नंब्रुवतेवेदाध्यातुंनवैदिकाः" । "नचरमंत्यहोअसदुपासनयात्महन" इत्यादिस्मृतिभिः "अचेतना
सत्यायोग्यान्यनुपास्यान्यफलत्वविपर्ययाभ्या" मितिसांकर्षणसूत्रेणचतन्निषेधात् । "वाचंधेनु"
मित्यत्रापिधेनुमिवायतिमितिश्रुत्यंतराद्धेनुशब्दोगौणः । "योषितमग्निंध्यायीते" त्यत्रापि "रेतो
जुह्वती" तिश्रुतेर्योषितोरेतोरूपाहुत्याधारत्वादग्निशब्दोगौणः । छांदोग्यभाष्यरीत्यायौगिकोवा
नत्वारोपः । "नामब्रह्मे" त्युपासीतेत्यत्रापि "नामाभिमानिनीचोषास्तस्यांब्रह्महरिंस्मरेदि" त्यादि
स्मृतेःब्रह्माधिष्ठानेनामादौब्रह्मशब्दः । नामेतिप्रथमावा वनंवसतिमारुतइत्यादिवत्ससम्यर्थे ब्रह्मे
तिप्रथमावा "ब्राह्मणोस्यमुख" मितिवत्पंचम्यर्थे सुपांसुलुगित्यादिसूत्रात् । अन्यथा "श्रुतंह्येव
मेभगवद्दृशेभ्यस्तरतिशोकमात्मविदि" तिपृष्टवंतंनारदंप्रतिअनात्मोपास्त्युक्तिरयुक्तास्यात् । प्र
तिमायामपिदेवताधिष्ठानत्वबुद्धितएवफलं नतुदेवतात्वबुद्धितः । "शिलादेवइतिज्ञानंभौमइज्य
धी" रित्यादिनातन्निषेधात् । यथाचा "न्यदेवतद्विदितादि" तिश्रुतावश्रौतज्ञानस्यकार्त्स्न्येनज्ञान
स्यवानिषेधः । तथा "तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासत" इतिश्रुतावपिअश्रौतध्यानस्यकार्त्स्न्येन

SGDF

ध्यानस्यवानिषेधः । अन्यथा "तस्याभिध्यानादि" तिश्रुतिविरोधात् तस्मात्साधकाभावादित्या
द्योनयुक्तः । नापिबाधकसद्भावादितिद्वितीयः । सामान्यतोमिथ्यात्वश्रुतिभंगेअखंडार्थत्वभंगेचो
क्तन्यायेनाद्वैतश्रुत्यादीनामबाधकत्वात् । नापिनिर्गुणवाक्यंबाधकं । वैपरीत्यस्यापिसुवचत्वात् ।
नचनिषेधत्वादिनातत्प्रबलं । असद्वाइत्यादिवाक्यस्यसदेवेत्यादिवाक्यात्प्राबल्यापत्तेरित्युक्तत्वा
त् । अपच्छेदन्यायस्यचनिरासात् । नचनिर्गुणत्वंपुरुषार्थः येनतद्वाक्यंतत्परंस्यात् । किंतुगुणितै
व । नचनिर्गुणज्ञानस्यमोचकत्वात्फलवत्संनिधावितिन्यायेनसगुणवाक्यंतदनुगुणंनेयमितियुक्तं ।
सगुणज्ञानस्यैवमोचकत्वोक्तेः । तस्मात्सगुणत्वनिर्गुणत्वयोर्विरोधेनसमुच्चयायोगात् अनुष्ठानइवच
वस्तुनिविकल्पासंभवात् एकेनान्यस्यप्रतीतार्थत्यागरूपेबाधेवक्तव्येनिर्गुणवाक्यस्यैवसयुक्तः नतुप्र
बलस्यसगुणवाक्यस्य । तस्यप्राबल्यंचउपक्रमाधिकरणन्यायेनाऽनुपसंजातविरोधित्वात् लिंगाच्छ्रु
तेरिवशीघ्रगामित्वाच्च । निर्गुणश्रुतिर्हिप्रतियोगिप्रतीत्यपेक्षयाविलंबते । "पदेजुहोती" तिवद्विशेष
विषयत्वाच्च । सार्वज्ञश्रुतिर्हिविशिष्यसार्वज्ञादिपरा निर्गुणश्रुतिस्तुसामान्येनगुणानिषेधिका ।
"दीक्षणीयायामनुब्रूयादि" तिवत्निरवकाशत्वाच्च । निर्गुणश्रुतिर्हि "देहात्मशक्तिस्वगुणैर्निगूढां
दैवीह्येषागुणमयी" त्यादिश्रुतिस्मृतिष्विवसत्वादिगुणेसावकाशा । बहुत्वाच्च । निर्गुणशब्देतरे

SGDF
Sri Gargeshwari Digital Foundation

सर्वेंपिहिशब्दाःस्वनिमित्तगुणार्थकाः । धर्मिग्राहकत्वेनोपजीव्यत्वाच्च । प्रवृत्तिनिमित्तापेक्षैर्हिब्रह्मा
दिशब्दैर्धर्मिणंनिर्दिश्यतत्रधर्मानिषेध्याः सचोद्देश्यविशेषणत्वाद्ग्रहैकत्ववत्निमित्तमविवक्षितं ।
ग्रहैकत्वनयेउद्देश्यस्वरूपेलब्धेपियदधिकंतस्यैवाविवक्षेतिस्थितिः। अन्यथाग्रहत्वस्याप्यविवक्षास्या
त्। अतएवोक्तंहविरार्तिनयेमृष्यामहेहविषाविशेषणमिति। लक्षकेणापिहिशब्देनइतरव्यावृत्तम
संकीर्णमेवस्वरूपमुद्देष्टव्यं । अन्यथायत्रक्वचनधर्मनिषेधःस्यात् । किंचनिर्गुणवाक्यस्यछागपशुन्या
येन "त्रैगुण्यवर्जितं विनाहेयैर्गुणादिभि" रित्यादिविशेषोपसंहारोस्तु । नचैवं "नहिंस्यादि" त्य
स्यापि "ब्राह्मणोनहंतव्य" इत्यत्रोपसंहारात्व्यर्थहिंसाननिषिध्येतेतिवाच्यं । सार्वज्ञादिगुणेष्वि
वव्यर्थहिंसायांविध्यभावात् । एतेन "त्रैगुण्यवर्जित" मित्यादेरेवकाकेभ्योदधिरक्ष्यतामित्यादिव
त्सामान्यपरतास्त्वितिनिरस्तं । अत्रसार्वज्ञादिश्रुतिभिरिवतत्रमानांतरेणविरोधाभावात् प्रत्यु
ततदानुगुण्यात् । किंच "एवंधर्मान्पृथक्पश्यन्नि" तिश्रुतौ "सविशेषणेही" तिन्यायेनगुणानांपा
र्थक्यस्यैवनिषेधात् । तत्समाख्यानादन्यत्रापितथैवनिषेधोयुक्तः । पार्थक्याभावेपिचविशेषबला
देवज्ञानानंदयोरिवैकतरपरिशेषाभावोयुक्तः । अन्यथानंदस्फुरणाभावान्मुक्तिरपुमर्थःस्यात् । अ
पिच "साक्षीचेताकेवलोनिर्गुण" इतिवाक्यात्पूर्वत्रोत्तरत्रचगुणोक्तेस्तन्मध्यस्थंनिर्गुणवाक्यंउपां

SGDF
Sri Gargeshwari Digital Foundation

शुयाजन्यायेनतदनुगुणंनेयं। किंचनिर्गुणशब्देनगुणमात्रनिषेधोऽयुक्तः साक्षीचेतेत्यादिभिर्द्रष्टृत्वा
दिविधानेनव्याघातादितिसंकोचोस्तु साक्षित्वादेरतात्विकत्वादविरोधइतितुनिरस्तं। उक्तंच "यु
क्तोऽयुक्तश्चयत्रार्थआगमस्यप्रतीयते । स्यात्तत्रयुक्तएवार्थोनावाक्यायुक्तिरिष्यत" इति। एवंच
उपक्रमादिन्यायेनश्रुतिलिंगनयात्तथा। विशेषसामान्यनयाद्यायान्निरवकाशतः ॥ १ ॥ बाहुल्य
न्यायतश्चोपजीव्यत्वन्यायतस्तथा। पशुच्छागनयाच्चैवसविशेषनयात्तथा ॥ २ ॥ उपांशुयाजन्या
येनयुक्तायुक्तनयात्तथा। आद्दतत्वात्सूत्रकृताप्रबलासगुणश्रुतिः ॥ ३ ॥ तस्मादहिंसावाक्यमग्नी
षोमीयेतरहिंसायाइवनिर्गुणवाक्यंश्रौतसार्वज्ञादीतरतर्काभासप्राप्तहेयसुखादिगुणानांनिषेधक
मितिनतद्बाधकं। एवंच "हिंसाऽहिंसावाक्यसाम्याद्गुणिनिर्गुणवाक्ययोः। अविरोधेप्यमानत्वंब्रू
षेसौगतसौहृदात्" ॥ १ ॥ नाप्यनुभूतिर्निर्विशेषाअनुभूतित्वादितिव्यतिरेक्यनुमानंबाधकं । अ
प्रसिद्धविशेषणत्वस्वव्याघातश्रुतिबाधाभाससाम्याप्रयोजकत्वप्रतिकूलतर्कपराहत्यादिदोषात् ।
नापिभिन्नत्वेऽभिन्नत्वेचधर्मत्वानुपपत्तिः। एवमसंबद्धत्वेधर्मत्वायोगः संबद्धत्वेसंबंधस्यापिसंबंधां
तरमित्यनवस्थेतिनब्रह्मधर्मवदित्यादिकुतर्काबाधकाः । धर्माभावरूपधर्मभावाभावाभ्यांव्याघाता
त्। अभेदेपिज्ञानानंदयोरेकतरपरिशेषाभाववद्विशेषबलादेवधर्मधर्मिभावोपपत्तेश्च । संबंधस्या

पिमिथ्यात्वादिवत्स्वनिर्वाहकत्वाच्च । अन्यथानंदस्यज्ञानमात्रत्वेदुःखज्ञानमप्यानंदःस्यात् । भिन्न
त्वेऽखंडार्थत्वहानिः । एवंब्रह्मजगदभिन्नंचेन्मिथ्यास्यात् भिन्नंचेद्भेदस्यसत्यत्वमित्यादितर्कबाधात्
त्वदभिप्रेतंब्रह्मापिनसिध्येत्। श्रुतिबाधात्तर्काणामाभासत्वंत्विहापिसमं । एवंच "शुष्कतर्कैःश्रौ
तगुणबाधेब्रह्मापिबाधितं । भवेच्छ्रुत्याशुष्कतर्कधिक्कारस्तुद्वयोःसमः" ॥ १ ॥ किंचनिर्विशेषत्वरूप
विशेषभावाभावाभ्यांमूकोहमितिवत्स्वव्याघातः। यदिनिर्विशेषत्वरूपविशेषोप्यनेनैवनिषिध्य
ते तर्हीयमपिवचनक्रियामूकइत्यनेनैवनिषिध्यतइतिसमं । तदुक्तं "निर्विशेषत्वमेतेनमूकोहमि
तिवद्भवेदि" ति । किंचब्रह्मणःशून्यादनिर्वाच्याच्चतत्वतोविशेषाभावेतत्वतस्तदेवस्यात् । भावे
तुसविशेषत्वं । किंचब्रह्मणोनिर्विशेषत्वेवेदांतविचारविषयत्वमयुक्तं। तदुक्तं "इदमित्थमितिज्ञा
नंजिज्ञासायाःप्रयोजनं । इत्थंभावोहिधर्मोस्यनचेन्नप्रतियोगिते" ति । किंचब्रह्मणिधर्मारोपार्थमे
वकेचिद्धर्माःसत्याःस्वीकार्याः इदंत्वादिनाज्ञातएवशुक्त्यादौधर्मांतरारोपात्। तदुक्तं "धर्मारोपोपि
सामान्यधर्मादीनांहिदर्शने। सर्वधर्मविहीनस्यधर्मारोपःक्वदृश्यत" इति । अभावरूपधर्माःसंती
तिचेन्नाभावत्वंतत्रहेतुः अतिप्रसंगात्। किंतुप्रामाणिकत्वं तच्चभावेष्वपिसमं। यदिचाभावोब्र
ह्माभिन्नःयदिवापंचमप्रकारोनतुसन्निति सदद्वैताविरोधी तर्हिभावोपितथास्तु। तस्मात् "ब्रूतेऽस

SGDF

तोपिमोहादीन्दोषान्विष्णोर्गुणान्सतः । निह्नुतेपरमेतत्वेद्वेषादेवासुरोजनः ॥ १ ॥ तस्माद्ब्रह्मसगु
णमेवेति ॥ ७ ॥ ब्रह्मणोनिर्गुणत्वभंगः ॥ ४ ॥ किंचनिर्विशेषेकिंप्रमाणं । नचतत्स्वतःसिद्धं । निर
स्तत्वात् । यद्यद्विप्रतिपन्नंतत्सर्वमपिस्वतःसिद्धमितिसुवचत्वाच्च । विप्रतिपत्त्ययोगाच्च । शास्त्रवैय
र्थ्याच्च । नचाज्ञाननिवृत्त्यर्थंशास्त्रं । अज्ञानाविरोधिन्याःस्वतःसिद्धेर्घटादावपिसुवचत्वात् । नचतत्र
प्रत्यक्षंमानं । अपसिद्धान्तात् "नेंद्रियाणिनानुमान" मित्यादिश्रुतेश्च । शास्त्रवैयर्थ्याच्च । अतए
वनानुमानं व्याप्त्याव्यापकतावच्छेदकाविशिष्टत्वेनपक्षधर्मतयाचपक्षसंसृष्टत्वेनसिद्ध्यातेननिर्विशे
षासिद्धेश्च । नापिपदरूपःशब्दस्तत्रमानं । गुणक्रियाजातिरूपनिमित्ताभावेनमुख्यवृत्तेरयोगात् ।
अस्वीकाराच्च । वैदिकशब्दस्यडित्थादिवत्सांकेतिकत्वायोगाच्च । आरोपितनिमित्तविशिष्टविषय
प्रतीतेश्चनिर्विशेषेप्रामाण्यायोगात् । गौण्याश्चमुख्यार्थगुणयुक्ततयैवस्वार्थोपस्थापकत्वात् । लक्ष
णायाश्चशक्यार्थसंबंधितावच्छेदकरूपवत्तयैवस्वार्थोपस्थापकत्वात् । पदस्यान्वयप्रतियोगितावच्छे
दकरूपेणैवस्वार्थोपस्थापकतयानिर्विशेषवृत्तिमात्रायोगाच्च । अतएवनोपनिषद्वाक्यरूपःशब्दस्तत्र
मानं । असंसर्गत्वात् । धर्मिज्ञानाधीनविचारजन्यंनिर्धारितैककोट्यवलंबिनंसप्रकारकनिश्चयंप्रत्ये
वतस्यहेतुत्वाच्च । निष्प्रकारकज्ञानंनेत्युक्तत्वाच्च । निर्विशेषविषयकज्ञानस्यानिष्प्रकारकत्वेतेननि

SGDF
Sri Gargeshwari Digital Foundation

र्विशेषत्वासिद्ध्यातत्सिद्ध्यर्थमेवविशेषाभावरूपविशेषविषयकत्वस्यावश्यकत्वाच्च । तस्मात्सगुण
मेवब्रह्मेति ॥ ७ ॥ निर्गुणेप्रमाणभंगः ॥ ८ ॥ एतेनब्रह्मणोनिराकारत्वमपिनिरस्तं । "आदित्यवर्णं
तमसःपरस्तात् । यदापश्यःपश्यतेरुग्मवर्णं "ऋतंसत्यंपरंब्रह्मपुरुषंकृष्णपिंगलं । विश्वतश्चक्षुः ।
सहस्रशीर्षापुरुषः । सहस्रशीर्षंदेवंविश्वाक्षंविश्वशंभुवं । यदेकमव्यक्तमनंतरूपं" इत्यादिश्रुति
भिः । "पश्यमेपार्थरूपाणिशतशोऽथसहस्रशः । नानाविधानिदिव्यानिनानावर्णाकृतीनिच । स
र्वतःपाणिपादंतत्सर्वतोक्षिशिरोमुख" मित्यादिस्मृतिभिः । तदनुगृहीतैःब्रह्म । सविग्रहंस्रष्टृत्वात्
पालयितृत्वाद्वेदोपदेष्टृत्वादित्याद्यनुमानैश्चाकारसिद्धेः । विग्रहंविनापिनित्यज्ञानेनैवकर्तृत्वेज्ञाने
च्छेअपिविनानित्यप्रयत्नेनैवतत्स्यात् । किंचकुलालादौनशरीरंज्ञानाद्युपक्षीणं किंतुज्ञानादिकमेवश
रीरचेष्टोपक्षीणं । अतएव "विकरणत्वान्नेतिचेत्तदुक्त" मितिसूत्रेईश्वरस्यकर्तृत्वार्थं "बुद्धिमान्म
नोवान्अंगप्रत्यंगवानि" तिश्रुत्यासकरणत्वमुक्तं । किंच "तदेवानुप्राविशत्" "ब्रह्मविदाप्नोतिप
र" मित्यादिश्रुतिसिद्धंसर्वगतस्यब्रह्मणःप्रवेष्टृत्वंगम्यत्वमित्यादिनविग्रहविशेषंविनायुक्तं । नचश्रु
तिरवांतरब्रह्मपरावा रूपोपासनापरावा आरोपितरूपपरावेतियुक्तं । "आदित्यवर्ण" मित्यत्र
प्रकृत्याख्यतमःपरत्वोक्तेः । "यएषोंतरादित्येहिरण्मयःपुरुषोदृश्यते" इत्यत्रचवर्तमानत्वेनापरो

SGDF
Sri Gargeshwari Digital Foundation

क्षज्ञानविषयत्वोक्तेश्च। नहि "योषित्यग्निस्त्वंदृश्यत" इत्युच्यते। "सहस्रशीर्षे"त्यत्र "तमेवंविद्वानमृत इहभवती"ति "यदापश्य" इत्यत्रच "तदाविद्वान्पुण्यपापेविधूये"ति "नसंदृशेतिष्ठतिरूपमस्ये"त्यत्रच "यएनंविदुरमृतास्तेभवंती"ति तज्ज्ञानस्यमोचकत्वोक्तेश्च। "देवाअप्यस्यरूपस्यनित्यंदर्शनकांक्षिण" इत्युक्तरूपस्य "ज्ञातुंद्रष्टुंचतत्वेनप्रवेष्टुंचपरंतपे"तिस्मृतौमुक्तगम्यत्वाद्युक्तेश्च। अतएवेदंरूपंनभौतिकं प्राकृतंअनित्यंवा। "नाभ्याआसीदंतरिक्ष"मित्यादौभूतकारणत्वस्य "तमसःपरस्तादि"तिश्रुतौतमसः परत्वस्य "सर्वतःपाणिपादंत"दितिस्मृतौच "नसत्तन्नासदुच्यत" इति पूर्वत्राभौतिकत्वस्य "तमसःपर मुच्यत" इति परत्राप्राकृतत्वस्यचोक्तेः। "एकोनारायणआसीन्नब्रह्मानचशंकर" इत्यादिषुमहाप्रलये स्थित्युक्तेश्च। प्रलयेविग्रहरहितचेतनमात्रसत्वस्यसर्वसाधारण्यात्। विग्रहानित्यत्वे "नित्योनित्यानां चेतनश्चेतनाना"मितिविशेषोक्त्ययोगात्। "पुराकल्पापायेस्वकृतमुदरीकृत्यविकृत"मित्यादौसाक्षा न्महाप्रलयेस्थित्युक्तेश्च। "पश्यंत्यदोरूपमदभ्रचक्षुषःसहस्रपादोरुभुजाननाद्भुत"मित्यारभ्य "एतन्ना नावताराणांनिधानंबीजमव्यय"मित्यत्र "सर्वेनित्याःशाश्वताश्चदेहास्तस्यमहात्मनः। परमानंदसंदो हाज्ञानमात्राश्चसर्वशः" इत्यादौचसाक्षान्नित्यत्वाद्युक्तेश्च। अतएवनजडंनापिततोभिन्नं। "आनंदरू पममृतंयद्विभाति आप्रणखात्सर्वएवानंदः मोदोदक्षिणःपक्षः यदात्मकोभगवांस्तदात्मिकाव्यक्तिः।

किमात्मकोभगवान्ज्ञानात्मकऐश्वर्यात्मक" इत्यादिश्रुतेः। भेदाभावेप्यहिकुंडलाधिकरणन्याये नविशेषबलाद्विग्रहवत्त्वोपपत्तेश्च। "आत्मनिचैवंविचित्राश्चही"तिसूत्रे "विचित्रशक्तिःपुरुषःपुरा ण"इत्यादिश्रुतिभिर्विचित्रशक्तेरुक्तत्वेनआनंदस्यनित्यत्ववदपराधीनत्ववचाविग्रहवत्त्वस्यापिसं भवाच्च। "नैषातर्केणमतिरापनेये"त्यादिश्रुतिभिस्तर्कागम्यत्वोक्तेश्च। पिशाचादिवदंतर्धानशक्त्या नुपलंभसंभवाच्च। नचाऽपाणिपादइत्यादिविरोधः। "अदुःखमसुखंसमंनप्रज्ञानघन"मितिसुखज्ञा ननिषेधकवाक्यवत्प्राकृतावयवादिनिषेधपरत्वात्। अन्यथोक्तश्रुतिस्मृतिभिःपश्यतिशृणोतीत्या दिवाक्यशेषेणचविरोधात्। "अरूपोप्राकृतत्वाचे"त्यादिस्मृत्यैवारूपश्रुतिगत्युक्तेश्च। विग्रहवत्त्वेन दुःखंचेत्स्रष्टृत्वादिनापितत्स्यात्। स्वतंत्रत्वादिनासमाधिरपिसमः [1]। अप्राकृतानंदमयविग्रहस्यदुः खाभावादिनैवव्यासेश्च। सर्वैरपीश्वरेलीलाविग्रहांगीकाराच्च। नचभगवद्विग्रहस्यमहत्त्वविशिष्ट रूपवत्त्वसावयवत्वादिनाऽनित्यत्वंशंक्यं। उक्तश्रुत्यादिविरोधात्। प्राकृतत्वस्योपाधित्वाच्च। निरवयवविशेषस्यैवज्ञानानंदादिविशेषस्यैवचसावयवविशेषस्यापिश्रुत्यादिबलान्नित्यत्वोपपत्तेश्च। किंचावयवशब्देनोपादानोक्तावसिद्धिः एकदेशोक्तौगगनात्मादौव्यभिचारः। नचोपादानातिरि क्तएकदेशएवनास्ति। पटादावुपादानतंतवन्यस्यहस्तावितस्त्यादिपरिमाणस्यैकदेशस्यानुभवात्।

1 तथा च देहवत्त्वेन दुःखं चेत्स्रष्टृत्वेन न तत्कुतः। स्वतन्त्रतया ... तुल्योऽस्त्य ... हि॥ इति ...

SGDF Digital Foundation

विस्तृतंचैतदन्यत्र । नित्यस्यगगनादेरपिसंयोगित्वेनैकदेशसाधनाच्च । अन्यथाकाशेपक्षिसंयोगतदत्यंताभावयोः आलोकेत्रसरेणुसंयोगतदत्यंताभावयोः आत्मनिचसुखदुःखयोर्देशभेदेनप्रतीतिर्नस्यात् । एतेनैकदेशाभावेपिसंयोगादेःस्वात्यंताभावसामानाधिकरण्यात्तथाधीरितिनिरस्तं । यत्र देशेसंयोगस्तत्रैवतदभावप्रतीत्यापत्तेः । "गौरनाद्यंतवती" त्यादिश्रुत्याअनादिनित्यायाअपिप्रकृतेःसत्वरजस्तमोरूपैकदेशदर्शनाच्च । त्वन्मतेप्यनाद्यविद्यायाउपादानत्वायअनणुत्वेसतिपरिच्छिन्नत्वायत्रिगुणत्वायजीवन्मुक्तौलेशानुवृत्त्यर्थंचैकदेशस्यवक्तव्यत्वाच्च । जीवानामपिद्रोणंबृहस्पतेर्भागंद्रौणिंरुद्रांशसंभवं । दुर्वासाःशंकरस्यांशइत्यादिनांशोक्तेश्च । "यस्यायुतायुतांशेपिविश्वशक्तिरवस्थिता । परब्रह्मस्वरूपस्यप्रणमामितमव्ययं । विष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगदि" त्यादावीश्वरस्याप्यंशोक्तेश्च । नचायमौपाधिकोंशः । नचेदुपाधीतिन्यायेनस्वाभाविकांशाभावेतदयोगात् । एतेनसावयवत्वादिनाभगवल्लोकादेरनित्यत्वसाधनमप्यपास्तं । "अतोहिवैष्णवालोकानित्यास्तेचेतनात्मकाः । मत्प्रसादात्परांशांतिंस्थानंप्राप्स्यसिशाश्वत" मित्याद्यागमविरोधात् । तस्मात्सगुणंसाकारंचब्रह्मेति ॥ ७ ॥ ब्रह्मणोनिराकारत्वभंगः ॥ ६ ॥ ७ ॥ यच्चेदमुच्यते ब्रह्मज्ञानानंदात्मकमद्वितीयंनित्यंसाक्षिरूपंच नतुज्ञानादिगुणकमिति । तत्रपरमतेज्ञानत्वंकिंजातिविशेषः ।

उपाधिरेव नीयतामः

SGDF
Sri Gargeshwari Digital Foundation

18.3.41 morning 9.30 am

न्यायामृतद्वितीयपरिच्छेदे [illegible]

[illegible] ೭೦ ಪುಟದ ೪೦೮ ೪ ನೇ ಶ್ಲೋಕದ ಲ್ಲಿ

ಶ್ಲೋಕ — [illegible] 498

~~देहवत्त्वेनदुःखं~~

देहवत्त्वेनदुःखं चेत्साम्य

त्वेन न तत्कृतः । स्वतंत्रत्व

समाधिस्तु उ –पोऽस्य प्रभु

यत्राहि, Page 498

೪೦೮ ೪ನೇ [illegible]

साक्षाद्व्यवहारजनकत्वंवा जडविरोधित्वंवा जडव्यावृत्तत्वंवा अज्ञानविरोधित्वंवा अर्थप्रकाशात्म कत्वंवा परांगीकृतंवा। नाद्यः। वृत्तिप्रतिबिंबितज्ञानाभासेषुतत्संभवेप्यखंडेस्वरूपज्ञानेतदयोगात्। नद्वितीयः। फलोपधानस्यसुषुप्त्यादावभावात्। शक्त्यादिरूपस्वरूपयोग्यतायाअपिमुक्तावभावात्। नतृतीयः। स्वरूपज्ञानस्यानित्यत्वेनतद्विरुद्धस्यजडस्यनित्यनिवृत्त्यापातात्। नचतुर्थः। "सत्यंज्ञान"मित्यत्रजडव्यावृत्तेरार्थिकत्वोक्त्ययोगात्। किंचजडत्वस्याज्ञातृत्वादिरूपत्वेऽसंभवः। अज्ञानत्वरूपत्वेत्वन्योन्याश्रयः। नपंचमः। अज्ञानस्यनित्यनिवृत्त्यापातात्। द्वितीयादिषुज्ञानत्वस्यकारणत्वादिवत् व्यवहाराद्यन्यतमोपाधिकत्वेनब्रह्मणोज्ञानस्वभावत्वायोगाच्च। नषष्ठः। मोक्षेअन्यार्थोल्लेखाभावात् स्वरूपोल्लेखेचस्वविषयत्वापातात्। नसप्तमः। परांगीकृतायाजातेर्व्यवहारहेतुत्वादेर्वात्वन्मतेऽसंभवात्। एवंच "अर्थप्रकाशरूपत्वंज्ञानत्वंब्रह्मणःकथं। अन्यार्थाभावतोमोक्षेस्वेनस्वस्याप्यवेदनात्" ॥१॥

किंचेदमानंदत्वंजातिविशेषोवा अनुकूलतयावेदनीयत्वंवा अनुकूलवेदनरूपत्वंवा अनुकूलत्वमात्रंवा विज्ञानात्मकत्वमेववा दुःखविरोधिस्वरूपत्वंवा दुःखाभावोपलक्षितस्वरूपत्वंवा परांगीकृतंवा। नाद्यः। अखंडस्वरूपानंदेतदयोगात्। नद्वितीयः। मोक्षेवेदितुरभावात्। आत्मनोऽवेद्यत्वाच्च। किंचानुकूल्यंकिंचित्सापेक्षं नचान्यंप्रतितद्युक्तमितिस्वंप्रत्येववक्तव्यत्वेनसविशेषत्वापातः। अतएवनतृ

1 ब्रह्मण्येऽप्यज्ञातृत्वात् ।

SGDF
Sri Gargeshwari Digital Foundation

तीयः । अपिचवेदनस्वभावादधिकस्यानुकूल्यस्यस्वाभाविकत्वे(सखंडार्थत्वापातः)ऽखंडार्थत्वाभावा
पातः । औपाधिकत्वेकदाचिदानंदनिवृत्त्यापातः । नचतुर्थः । उक्तरीत्यानुकूल्यासंभवात् । एतेननि
रुपाधिकेष्टत्वमानंदत्वमितिनिरस्तं । नपंचमः । दुःखादिज्ञानस्याप्यानंदत्वापातात् । विषयानुल्ले
खिज्ञानंतथेतिचेन्न । विरोधात् । "विज्ञानमानंदंब्रह्मे" त्यादौविज्ञानपदेनैवदुःखव्यावृत्तिसिद्ध्यानं
दपदवैयर्थ्याच्च । नषष्ठः । विरोधस्यनिवर्तकत्वादिरूपत्वेदुःखस्यानित्यानिवृत्त्यापत्तेः । तादात्म्यायो
ग्यत्वरूपत्वेघटादेरप्यानंदत्वापातात् । "विज्ञानमानंदंब्रह्मे" त्यादौदुःखव्यावृत्तेरार्थिकत्वोक्त्ययो
गाच्च । नसप्तमः । वैशेषिकमोक्षवत्त्वदुक्तस्यदुःखस्याभावेसत्यपिआनंदाभावेनापुमर्थत्वस्यत्वन्मोक्षे
प्यापातात् । नाष्टमः । परांगीकृतस्यनिरुपाध्यनुकूलतयावेदनीयत्वादेस्त्वन्मतेऽसंभवात् । यदिचा
नंदत्वादेर्दुर्निरूपत्वेपितदधिकरणंब्रह्माबाध्यमानंदाद्यात्मकंच तर्हिसत्यत्वादेर्दुर्निरूपत्वेपितदधि
करणंजगदप्यबाध्यंसदात्मकंचस्यात् । एवंच "निरुपाध्यनुकूलत्ववेदनीयंसुखंमतं । निर्विशेषम
वेद्यंचकथंब्रह्मसुखात्मकं" ॥ १ ॥ किंचेदमद्वितीयत्वं द्वितीयाभावविशिष्टत्वंवा तदुपलक्षितत्वं
वा । नाद्यः । द्वितीयाभावस्यप्रामाणिकत्वेतेनैवअप्रामाणिकत्वेद्वितीयेनैवसद्वितीयत्वापातात् । न
चाऽभावस्यप्रामाणिकत्वेपिप्राभाकरमतइवाऽधिकरणमात्रत्वाददोषः । "अनुपलब्धिगम्योऽभा

व" इत्यादित्वन्मतभंगात् । अनृतव्यावृत्तेरपिब्रह्ममात्रत्वेनभेदसत्यत्वापाताच्च । प्राभाकरमतेपि
प्रतियोगिमदधिकरणव्यावृत्त्यर्थंकैवल्यादिविशेषितस्यैवाधिकरणस्याभावत्वाच्च नचेत्तन्मतेप्यनुप
पत्तिरेव । अन्यथागुणगुण्यभेदमतेशौक्ल्यादेरिवशक्त्यादिभावधर्माणामपिब्रह्ममात्रत्वंस्यात् । न
चभावरूपद्वितीयाभावविशिष्टत्वमद्वितीयत्वं तथाचाभावस्यद्वितीयस्यप्रामाणिकत्वेप्यदोषइति
वाच्यं । दृश्यस्याप्यभावस्येवश्रुत्यादिसिद्धस्यधर्माधर्मादिरूपभावस्यापिमिथ्यात्वायोगादित्युक्त
त्वात् । अतएवनांत्यः । उपलक्षणस्याप्यभावस्याप्रामाणिकत्वेतत्प्रतियोगिनोद्वितीयस्यप्रामाणिक
त्वावश्यंभावात् । किंचाभावस्यप्रागभावादित्वेद्वितीयस्यानित्यत्वमात्रंस्यान्नतुमिथ्यात्वं । अत्यं
ताभावत्वेउपलक्षणत्वमयावद्द्रव्यभावित्वेनचेदत्यंताभावत्वहानिः । वेदांततात्पर्यविषयत्वादि
कार्यानन्वयित्वेनचेदत्यंताभावासिद्धिः । किंचाप्रामाणिकेनद्वितीयाभावेनेवद्वितीयेनाप्युपलक्षित
त्वसंभवात्तेनसद्वितीयंकिंनस्यात् । एवंच "द्वैताभावस्तात्विकश्चेत्तेनस्यात्सद्वितीयता । अता
त्विकश्चेत्द्वैतेनसद्वितीयत्वमापतेत्" । किंचेदंनित्यत्वंयद्ब्रह्मणएवाभिमतं सर्वकालसंबंधित्वंवा
कालावच्छेदराहित्यंवा ध्वंसाप्रतियोगित्वंवा उभयावधिराहित्यंवा । नाद्यौ अविद्यायांकालेचाऽ
तिव्याप्तेः । सापिहिसर्वकालोपादानत्वात्तत्संबंधिनी । इदानीमेवनान्यदेत्येवंरूपतदवच्छेदरहि

1 कैवल्यविशेषणेऽप्यनुपपत्त्याभावे

SGDF
Sri Gangadhar Digital Foundation

ताच । नतृतीयः । ध्वंसेऽतिव्याप्तेः । ननुध्वंसोपिध्वंसप्रतियोगी प्रतियोग्यनुन्मज्जनंतुप्रागभाव
निवृत्तिरूपस्यघटस्यनिवृत्तावपिप्रागभावानुन्मज्जनवत्युक्तमितिचेन्न । एवंसतिमोक्षेप्यात्मान्यस्य
कस्यचिद्ध्वंसस्यवक्तव्यतयालाघवार्थंआद्यध्वंसनित्यतायाएवयुक्तत्वात् । नचध्वंसस्यनित्यत्वेपिभा
वेषुब्रह्मैवनित्यमित्यस्याहानिरितिवाच्यं । निष्प्रतियोगिकत्वेनभावस्यध्वंसत्वादेर्नित्यत्वावश्यं
भावात् । नचतुर्थः । एवंपरिभाषायामपिब्रह्मणएवनित्यत्वमित्येतत्फलस्यमुक्तावन्याभावस्यासि
द्धेः । एवंच "कालेकालापरिच्छिन्नेध्वंसेचाध्वंसयोगिनि । नित्येसतिकथंनित्यंब्रह्मैवेतिमतंतव"
॥ १ ॥ कथंचदृग्रूपस्यात्मनःसाक्षात्द्रष्टृत्वरूपंसाक्षित्वं । "साक्षाद्द्रष्टरिसंज्ञाया" मितिहिसूत्रं ।
बुद्ध्युपाधिकस्यापिद्रष्टृत्वस्यसुषुप्त्यादावभावात् । बुद्धेःसाक्ष्यधीनसिद्धिकप्रातीतिकाविद्याकार्य
त्वेनचक्रकाश्रयत्वाच्च । किंचसाक्षीकिंजीवकोटि ब्रह्मकोटिर्वा उभयानुगतंचिन्मात्रंवा । नाद्यः ।
जीवोबुद्ध्युपाधिकोऽणुरितिपक्षेइदमंशावच्छिन्नचिद्वेद्यस्यशुक्तिरूप्यादेःसाक्षिवेद्यत्वायोगात्[1] । च
क्रकाच । "अज्ञानोपाधिकःसर्वगत" इतिपक्षेपिअज्ञानस्यसाक्ष्यधीनसिद्धिकत्वेनाऽन्योन्याश्रयात् ।
नद्वितीयः । तेनब्रह्मणएवसाक्षिवेद्यसुखदुःखादिधीः नतुजीवस्येतिवैपरीत्यापातात् । अन्यथाऽनव
च्छिन्नानंदधीरपिजीवस्यस्यात् । नचब्रह्मचैतन्यंघटादिप्रकाशकमितिमतेऽज्ञानाभिभवद्वारातस्य

1 इदमंशावच्छिन्नचितः जीवस्य साक्षित्व[illegible] [illegible]ात् ।

SGDF Sri Gargeshwari Digital Foundation

जीवचैतन्याभेदाभिव्यंजकांतःकरणवृत्तिरिवेहतादृशीवृत्तिरस्ति। नतृतीयः। ईश्वरेणेवचिन्मात्रे णापिसांसारिकदुःखस्यतद्गतत्वेनाऽग्रहणेपियद्भावोमुक्तिस्तस्यचिन्मात्रस्यदुःखाद्युल्लेखरूपोपप्लवा पातात्। सुप्तमैत्रंप्रतिमैत्रीयाज्ञानादेर्मैत्रीयतयेवजाग्रच्चैत्रीयदुःखादेरपिचैत्रीयतयासुप्तमैत्रंप्रति प्रतीतिप्रसंगेनमैत्रस्यैतावंतंकालंदुःखंनावेदिषमितिपरामर्शायोगाच्च। नापिसाक्षात्कर्तव्याकारा विद्यावृत्तिप्रतिफलितंचैतन्यंसाक्षीसुषुप्तौचाज्ञानाद्याकाराविद्यावृत्तिर्नास्तीतिवाच्यं। दुःखादेः स्वानंतरभाव्यविद्यावृत्तिप्रतिफलितचिद्वेद्यत्वेज्ञातैकसत्वायोगात्। अविद्यावित्तेरपिसाक्ष्यधीन सिद्धिकत्वेनान्योन्याश्रयाच्च। विस्तृतंचैतदसतःसाधकत्वभंगे ॥ ६ ॥ परमतेब्रह्मणोज्ञानत्वानंद त्वाद्वितीयत्वनित्यत्वसाक्षित्वभंगः ॥ ७ ॥ यच्चेदमुच्यते ब्रह्मजगतउपादानत्वेसतिकर्त्रित्यभिन्न निमित्तोपादानंजगदिति। तन्न। यतः "विकारवत्कारणत्वमुपादानत्वमुच्यते। निर्विकारतयावे दसिद्धेब्रह्मणितत्कथं" ॥ १ ॥ परिणामापरपर्यायविकारवत्त्वंह्युपादानत्वं तच्चब्रह्मणि "निर्विका रोऽक्षरःशुद्ध" इत्यादिश्रुतिविरुद्धं। ननुविवरणेरज्ञ्वाःसूत्रद्वयवन्मायाविशिष्टंब्रह्मजगत्कारणमि तिवा मायाशक्तिमद्ब्रह्मकारणमितिवा जगदुपादानमायाश्रयतयाब्रह्मकारणमितिवेतिमतत्रयमु क्तं। तत्राद्येरज्ञ्वाःसूत्रेइवमायाब्रह्मणीउपादाने निर्विकारश्रुतिस्तुकेवलब्रह्मपरेतिविवक्षितं। द्वि

SGDF
Sri Gargeshwari Digital Foundation

तीयेमायोपरागाद्ब्रह्मविकारि निर्विकारश्रुतिस्तुतदनुपरक्ताभिप्रायेतिविवक्षितं । तृतीयेतंतुद्वारां
ऽशुःपटस्येवमायाद्वाराब्रह्मोपादानंश्रुतिस्तुअद्वारकविकारनिषेधिकेतिविवक्षितमितिचेन्न। आद्येमा
यावत्तंतुवच्चब्रह्मापिविकारीतिविशिष्यब्रह्मणोनिर्विकारत्वोक्त्ययोगात् । किंचपरमार्थसज्ज्ञाना
नंदस्वभावस्यब्रह्मणोऽप्युपादानत्वेकार्यमपितथास्यात् । अविद्योपादानत्वेपिसितासितसूत्रकार्ये
पटेसितत्ववज्जगतिपरमार्थसत्वादेरपिदुर्वारत्वात् । नह्युपादानस्वभावस्योपादेयेधीमात्रं । अवि
द्यास्वभावस्याऽनिर्वाच्यत्वस्याऽपिप्रपंचेधीमात्रत्वापातात् । सन्मात्रोपादानकत्वंसत्वेतंत्रंचेत् अ
निर्वाच्यत्वमपिनस्यात् । तन्मात्रोपादानकत्वाभावात् । द्वितीयेमायाख्यहेतूपरागभावाभावा
भ्यांविकारभावाभावविवक्षाचेत् मृदादिसाधारण्यं । मायाविशिष्टंब्रह्मविकारिनिर्विकारश्रुति
स्तुविशेष्याभिप्रायेतिविवक्षायांतुविशिष्टस्यब्रह्मत्वेनिर्विकारश्रुतिविरोधः । अब्रह्मत्वे ननोहा
निः । एतेन प्रकृतिविशिष्टंब्रह्मोपादानमितिनिरस्तं । विस्तृतंचैतदन्यत्र । किंच विशिष्टस्यमृदा
दिवद्धर्मिसमसत्ताकरूपांतरापत्तिरूपपरिणामाद्विवर्तमतहानिःस्यात् । विशिष्टस्यपरिणामःशुद्ध
स्यतुविवर्तइतिचेत् तर्हिशुद्धेपिविवर्तार्थंआरोपितविकारस्यावश्यकत्वान्निर्विकारश्रुतेस्तत्परत्वंन
स्यात् । श्रुतिर्विशेष्यस्यैवतात्विकविकाराभावपराचेत् विशिष्टेविकारोक्तिरयुक्तास्यात् । तत्वतो

निर्विकारेआरोपितविकाराविरोधात् । तृतीयोप्ययुक्तः अंशोस्तंतुंप्रतीवब्रह्मणःअनादिमायांप्रति
उपादानत्वाभावात् । भ्रमाधिष्ठानत्वमुपादानत्वमितिचेत् न उपादानेमृदादौभ्रमाधिष्ठानत्वस्यभ्र
माधिष्ठानेचशुक्त्यादौउपादानत्वस्यचाऽव्यवहारात् । पारिभाषिकोपादानत्वस्यचाऽनुपादानत्वेप
र्यवसानात् । एतेनाऽसत्यरूपांतरापत्तिर्विवर्तः सत्यरूपांतरापत्तिस्तुपरिणामः रूपांतरापत्तिमा
त्रं उपादानत्वं । तच्चब्रह्मणोविवर्तरूपविशेषेणाप्युपपन्नं । निर्विकारश्रुतिस्तुतात्विकविकाराभा
वाभिप्राया । ब्रह्मचाज्ञातंप्रपंचरूपेणविवर्तइतिअज्ञानमपिपरिणामितयोपादानांतर्गतं । रूप्यम
पिशुक्तिविवर्तत्वादज्ञानपरिणामत्वाच्चोभयोपादनकमितिनिरस्तं । त्वयापिमिथ्याभूतस्यमिथ्याभू
तमेवोपादानमन्वेषणीयं सत्यत्वेकार्यस्याऽपिकारणस्वभावतयासत्यत्वप्रसंगइतिवदतासत्यस्यास
त्यरूपापत्तेर्निषेधात् । सत्यारोपितधूमानुगतधूमत्वसामान्यस्येवसत्यासत्यरूपांतरापत्त्यनुगतोपादा
नत्वसामान्यस्याप्यभावाच्च । शुक्तिब्रह्मणोरेवरूप्याकाशाद्युपादानत्वसंभवेअविद्यान्वयव्यतिरे
कयोर्निमित्तत्वेनाप्युपपत्तेरविद्योपादानत्वकल्पनायोगाच्च । नचपरिणामित्वेनाविद्याकल्पनं । अस
त्यस्यरूप्यादेःसत्यरूपापत्तिमत्परिणाम्यपेक्षाभावात् । विकारित्वेनाविद्याकल्पनंतुतत्वतोनिर्वि
कारेब्रह्मणिअतात्विकविकारांगीकारात्परेणैवनिरस्तं । नचकार्यापेक्षितस्वसमानसत्ताकोपादानत्वे

SGDF

नाविद्याकल्पनं। अविद्यार्थापत्तिभंगेनिरस्तत्वात्। किंच रूप्येपिरूप्यमिदमितिप्रतीतेःअविद्यावि
कारभूतंरूप्यंइदंरूप्यतादात्म्यंवाऽस्तु। इदमोरूप्यरूपापत्तिरूपोविकारस्तुकथं। नहीदंरूप्यरूपमा
पन्नमितिधीरस्ति। नचारोपितमप्यारोपंविनायुक्तं । एतेनरूपांतरापत्तिप्रतीतिविषयत्वंउपादान
त्वं प्रतीतेःप्रमात्वाप्रमात्वाभ्यांपरिणामविवर्ताविितिनिरस्तं। शुक्तिर्वाब्रह्मवारूप्यत्वंवाआकाशत्वं
वाआपन्नमित्यप्रतीतेः । (सच्चत्यच्चाभवदि)त्यादिश्रुतेश्चात्माश्रयप्रसंगेनस्वजन्यरूपांतरापत्तिधीवि
षयत्वप्रत्यायकत्वायोगात् । एतेनरूपांतराभेदधीविषयत्वंवा कार्याभेदधीविषयत्वंवोपादानत्वं ।
प्रतीतेःप्रमात्वाप्रमात्वाभ्यांपरिणामविवर्ताविितिनिरस्तं। आद्ये तत्त्वंपदार्थयोःक्षीरनीरयोःखंडगो
त्वयोश्चोपादानोपादेयत्वापातात् । द्वितीये सदृशेसंनिहितेनिमित्तेपिकार्याभेदभ्रमसंभवेनाति
व्याप्तेः । तस्मादकारणस्यातीतादेरत्यंतासतश्चभ्रमाधिष्ठानत्वदर्शनात्भ्रमाधिष्ठानेचशुक्त्यादौका
रणत्वोपादानत्वयोरव्यवहारात्नपरपक्षेभ्रमाधिष्ठानस्यब्रह्मणउपादानत्वकारणत्वे । ननुमायोपा
दानं ईश्वरोनिमित्तं शुद्धंब्रह्माधिष्ठानमितिचेन्न। अभिन्ननिमित्तोपादानत्वाभावेनत्वन्मतेतदर्थस्य
प्रकृत्यधिकरणादेरनुपपत्तेः ॥ ७ ॥ ब्रह्मणउपादानत्वभंगः ॥ ८ ॥ किंचेदंकर्तृत्वंकिंपरिभाषयाशु
क्त्यादिवदधिष्ठानत्वमात्रं भ्रांतवदध्यासद्रष्टृत्वंवा मायाविवद्व्यामोहकत्वंवा कुलालादिवदुपादा

SGDF
Sri Gargeshwari Digital Foundation

नादिगोचरप्रयत्नादिमत्त्वंवा । नाद्यः । त्वन्मतेऽधिष्ठानत्वातिरिक्तोपादानत्वाभावेनकर्तृत्वोपादान त्वयोःसामानाधिकरण्योक्त्ययोगात् । "तदैक्षतनामरूपेव्याकरोदि" त्यादिश्रुत्यनुपपत्तेश्च । नहि चेतनोऽचेतनोवास्वस्मिन्नारोपितंसंकल्प्यकरोति । अतएवनद्वितीयः । भ्रांतस्यप्रेक्षापूर्वकारोपितकर्तृत्वाभावात् । ब्रह्मणोऽभ्रांतत्वेनाकर्तृत्वस्य जीवस्यभ्रांतत्वेनजगत्कर्तृत्वस्यचापातात् । नचेष्टापत्तिः । श्रुत्यादिविरोधात् । जगतईश्वरंमुक्त्वासंसारिणउत्पत्त्यादिसंभावयितुमपिनशक्यमित्यादित्वद्भाष्यविरोधाच्च । ननुशुद्धस्याभ्रांतत्वेपिमायाशबलितःकर्तेश्वरोभ्रांतइतिचेन्न । ईश्वरस्यभ्रांतत्वेजीववत्संसाराद्यापातेनबहुश्रुत्यादिविरोधात् । किंचपक्षद्वयेपि(वैषम्यनैर्घृण्येनसापेक्षत्वादि)त्यादिसूत्रेषुकर्मसापेक्षत्वेनवैषम्यादिपरिहारोनयुक्तःस्यात् । अधिष्ठान(त्वादिना)त्वेनतदप्रसक्तेः । नतृतीयः । व्यामोहनीयजीवादर्शनेव्यामोहकत्वायोगात् । दर्शनेचभ्रांतत्वापत्तेः । व्यामोहकत्वस्यापिआरोपितत्वेनान्योन्याश्रयाच्च । (नामरूपेव्याकरवाणी)त्यादिश्रुत्यनुपपत्तेश्च । नहिमायावीगजादिंकरवाणीतिसंकल्प्यकरोति किंतुदर्शयानीतिसंकल्प्यदर्शयति । किंचपक्षत्रयेपिजन्मादिसूत्रेऽर्थलब्धसार्वज्ञादिस्फोरणार्थंशास्त्रयोनिसूत्रमितियत्परमतंतद्भंगःस्यात् । भ्रमाधिष्ठानत्वादिनासार्वज्ञालाभात् । नचतुर्थः । कल्पितत्वेतस्यायोगात् । नहिघटादिंकुलालेनेवकल्पितंरू

SGDF
Sri Gargeshwari Digital Foundation

ष्यादिभ्रांतेनवान्येनवाक्रियते । विस्तृतंचैतत्पुरस्तात् । तस्मात् “अधिष्ठानेतथाभ्रांतेभ्रामकेनचकर्तृ ता । लौकिकीकृतिमत्तातुनदृष्टारोपितंप्रति” ॥ ७ ॥ परमतेब्रह्मणोनिमित्तत्वभंगः ॥ ९ ॥ किंचो पादानत्वे नतावत् “आत्मनआकाशःसंभूतः” “यतोवा” इत्यादिपंचमीश्रुतिर्मानं तस्याअनेका र्थत्वात् । अपादानार्थत्वेपि “ध्रुवमपायेऽपादान” मित्यनेनाऽपादानसंज्ञासंभवाच्च । “जनिकर्त्तु” रित्यनेनापादानसंज्ञायामपिवृत्तौ “पुत्रात्प्रमोदोजायत” इत्यस्याप्युदाहृतत्वात् । न्यासेपिप्रकृति पदंहेतुमात्रपरमित्याश्रित्यअसतिप्रकृतिग्रहणेउपादानस्यैवस्यात् । प्रत्यासत्ते, नैंतरस्य प्रकृतिग्रह णात् । सर्वस्यकारणस्यभवतीतिप्रकृतिपदंपुत्रात्प्रमोदोजायतइत्यादावनुपादानेप्यपादानसंज्ञार्थ मित्युक्तत्वात् । “श्रृंगाच्छरोजायतेगोलोमाविलोमभ्योदूर्वाजायंत” इत्यादावपिशरांकुरंप्रत्युपा दानभूतोयःश्रृंगैकदेशःतत्संसृष्टंश्रृंगैकदेशांतरंशरांकुरनिमित्तमस्ति । माषांकुरोपादानभूतोयस्तु षांतरवस्थितोमाषभागस्तत्संसृष्टोमाषांकुरनिमित्तभूतस्तुषभागइवापरिणतश्रृंगभागस्यानुभवा त्तदेवश्रृंगादितिपंचम्यंतेनोच्यते । अतएवमहाभाष्ये “अयमपियोगःशक्योऽवक्तुं । गोलोमावि लोमभ्योदूर्वाजायंते । अपक्रामंतितास्तेभ्य” इत्यादिनालोमादीनांदूर्वादीन्प्रत्यवधित्वात् “ध्रुवम पायेऽपादान” मित्यनेनैवाऽपादानसंज्ञासिद्धेरिदंसूत्रंप्रत्याख्यातं । कैयटेपि यथाबिलाद्दीर्घभोगो

भोगीनिष्क्रामन्नप्यविच्छेदात्तत्रोपलभ्यतेतथादूर्वाअपीत्यादिनाऽवधित्वमेवोपपादितं । तदुक्तं “श्रृंगाच्छरोऽविलोमभ्योदूर्वागोमयतस्तथा । वृश्चिकश्चेत्येवमाद्येष्वपादानत्वमिष्यत” इति । अ तएवाकाशाद्वायुरित्याद्युपादानपंचमीसाहचर्यात्आत्मनइत्यप्युपादानपंचमीतिनिरस्तं । आका शादित्यादावपिनिमित्तांशस्यैवपंचमीनिर्देशात् । अन्यथासंभूतइत्ययुक्तं । नहिशुक्तेरूप्यंसंभूत मित्युच्यते । नापि “सोकामयतबहुस्यांप्रजायेयेति सतपोऽतप्यत सतपस्तप्त्वा इदंसर्वमसृजत यदिदंकिंच तत्सृष्ट्वातदेवानुप्राविशत् तदनुप्रविश्यसच्चत्यच्चाभवदि” तिश्रुतिस्तत्रमानं । सदादिभ वनस्यजगत्सृष्टितदनुप्रवेशानंतरभावित्वेनजगत्सृष्टित्वानुपपत्त्यापरमेश्वरस्यसत्वादिगुणाभिव्य क्तिपरत्वात् । अन्यथाभवदित्ययुक्तं । नहिशुक्तीरूप्यमभवदित्युच्यते । मूर्तामूर्तात्मकप्रपंचस्य सदसत्पदाभ्यामेवोक्तत्वेन “निरुक्तंचानिरुक्तंच निलयनंचानिलयनंचे” त्यादिवाक्यशेषस्थनिरु क्तादिपदवैयर्थ्यंच । “सोकामयतबहुस्या” मित्यादितुपरमेश्वरस्य “अजायमानोबहुधाविजायते यदेकमव्यक्तमनंतरूप” मित्यादिश्रुतिसिद्धतत्तदनंतपदार्थप्रेरकानंतरूपैर्बहुभावसंकल्पमाह । न चस्वस्याऽनंतरूपैर्बहुभावंसंकल्प्य “इदंसर्वमसृजते” तिप्रपंचसर्जनानुपपत्तिः । नियामकरूपैर्ब हुभावस्यनियम्यसापेक्षत्वात्नियम्यंसर्वंसृष्ट्वानियामकरूपैःप्रवेशोक्त्युपपत्तेः । उक्तंहि “बहुस्या

SGDF

मितिसंकल्प्यतेजःप्रभृतिसर्जनं । गुरुःस्यामितिसंकल्प्यशिष्यसंपादनादिवदि" ति । अन्यथास्या
मितिसत्वोक्तिरयुक्ता । स्यामितिसंकल्पितस्यसत्त्यदादिभवनस्य "सच्चत्यच्चाभवदि" त्यनेनैवो
क्तत्वेनेदंसर्वमसृजतेत्यादिवैयर्थ्यंच । सृष्टेःपूर्वमंतःकरणाभावेनतद्विशिष्टाहमर्थाभावादुत्तमपुरु
षानुपपत्तिश्च । एतेन "तदैक्षतबहुस्यांप्रजायेये" त्येतदपिव्याख्यातं । किंचतत्तेजोसृजतेतियत्तेजः
प्रभृतिसृज्यंतत्तदात्मनाहित्वयाबहुभावोवाच्यः । तेजःप्रभृतिचचेतनं "तत्तेजऐक्षत तदपोसृजत
ताआपऐक्षंत ताअन्नमसृजंततिस्रोदेवता" इतिईक्षितृत्वस्रष्टृत्वदेवतात्वादीनांश्रवणात् । नचचे
तनंप्रतिउपादानतातवापीष्टा । एतेनैव "असद्वाइदमग्रआसीत्ततोवैसदजायततदात्मानंस्वयम
कुरुते" त्येतदपिव्याख्यातं । "तदात्मानंसृजाम्यहं संभवामियुगेयुगे" इत्यादिवदुपपत्तेः । नह्य
त्रात्मानमाकाशाद्यात्मनाऽकुरुतेतिश्रूयते अन्यथाअकुरुतेतिसत्वोक्तिरयुक्ता । किंचपरमते "त
तोवैसदजायते" तिपूर्ववाक्येनैवतच्छब्दनिर्दिष्टाद्ब्रह्मणःप्रपंचोत्पत्तेःसिद्धत्वात् "तदात्मान" मि
तिव्यर्थं । नापि "सर्वाणिहवाइमानिभूतानिआकाशादेवसमुत्पद्यंतेआकाशंप्रत्यस्तंयंती" तिब्रह्म
ण्येवसृष्टिलयोक्तिस्तत्रमानं निमित्तेकार्यस्यलयाभावादितियुक्तं । निमित्तेप्यूर्णनाभौतंतोर्लयदर्श
नात् । ब्रह्मणोऽप्यूर्णनाभिवदेवसंहर्तृत्वस्य "यथोर्णनाभिरित्यादिश्रुतिसिद्धत्वात् । नचोर्णनाभि

SGDF
Sri Gargeshwari Digital Foundation

रपितंतुकोशादीन्प्रत्युपादानं। ऊर्णनाभिनाशेपितंतूपलंभात्। नचदधिकुंडलंवाक्षीरंस्वर्णंवाप्रत्य
स्तंयातीत्युच्यते। नापि "यथोर्णनाभिःसृजतेगृह्णतेच यथासतःपुरुषात्केशलोमानि ससर्जमाता
पितृवदि" त्यादिदृष्टांतकथनादुपादानता। ऊर्णनाभिदेहधातुविशेषस्यैवतंतूपादानत्वात् केशादी
न्जडोपादानकान्प्रतिचेतनस्यनिमित्तमात्रत्वात्। पितृदेहधातोःपुत्रदेहंप्रत्युपादानत्वेपिपितृचेतन
स्यनिमित्तमात्रत्वात्। नाप्येकमेवाद्वितीयमितिवस्त्वंतरनिषेधादात्मनएवोपादानत्वं। त्वन्मतेप्य
विद्यादेःसत्वात्। "यद्भूतयोनि" मितियोनिशब्दस्तु "योनिष्टइंद्रसदने" इत्यादिप्रयोगान्नोपादा
नत्वेनियतइतिपरैरप्यंगीकृतं। नाप्येकविज्ञानेनसर्वविज्ञानानुपपत्तिरुपादानत्वेमानं सादृश्यप्रा
धान्याभ्यामेवतदुपपत्तेरुक्तत्वात्। नापि "सर्वंखल्विदंब्रह्मे" त्यादिसामानाधिकरण्यानुपपत्तिस्त
त्रमानं। सर्वंसमाप्नोषिततोसिसर्व" इतिस्मृत्यैवान्यथाव्याख्यातत्वात्। प्रकृत्यधिकरणंतुभाष्य
एवाऽन्यथाव्याख्यातं। एतेनब्रह्मणएवपरिणामइतिभास्करादिमतमपास्तं। नापिमहाभूतानिस
द्वस्तुप्रकृतिकानिसत्स्वभावानुरक्तत्वेसतिविविधविकारत्वात्। मृदनुस्यूतघटादिवदितिविवरणो
न्या० ८५ क्तमनुमानंमानं। विवर्तमतेउपादानतानयुक्तेत्युक्तत्वात्। सत्प्रधानप्रकृतिकत्वस्यमन्मतेपिसत्वा

SGDF
Sri Gargeshwari Digital Foundation

च खंडोगौर्मुंडोगौरिरितिगोस्वभावानुरक्तेखंडादौव्यभिचाराच । सदनुपादानकत्वेपिसद्ब्रह्मेतिवत्स तीपृथिवीत्यादिप्रतीतेरुपपत्त्याऽप्रयोजकत्वाच । अत्रेदानींसन्घटइतिवत्अत्रेदानीमसन्घटइत्य पिप्रतीत्याघटादेःअसन्नृशृंगंअसत्खपुष्पमित्यादिप्रतीत्यान्नृशृंगादीनामप्यसदुपादानकत्वापाताच । ब्रह्मनद्रव्योपादानंचेतनत्वाच्चैत्रवत् । जगन्नानंदप्रकृतिकं तत्स्वभावाननुरक्तत्वात् यद्यत्स्वभावा ननुरक्तंनतत्तत्प्रकृतिकं । यथाघटस्वभावाननुरक्तःपटोनघटोपादानकइत्यादिनासत्प्रतिपक्षत्वाच । यच्चजगदभिन्ननिमित्तोपादनकंप्रेक्षापूर्वजनितकार्यत्वात् सुखदुःखादिवदितिविवरणोक्तमनुमानं । तन्न विवर्तमतेउपादानत्वानुपपत्तेरुक्तत्वात् । कार्यत्वादित्येतावतएवहेतुत्वसंभवाच । त्वन्मतेदुः खादीनांअंतःकरणोपादानकत्वेनसाध्यवैकल्याच । जगदुपादानंनकर्तृद्रव्योपादानत्वान्मृद्वत् । ज गत्कर्तावानद्रव्योपादानंकर्तृत्वात्कुलालवदित्यादिनासत्प्रतिपक्षत्वाच । एतेनविमतमभिन्ननिमि त्तोपादनकंकार्यत्वात् सर्वकार्यनिमित्तकालघटसंयोगवदितिनिरस्तं । तस्माद्ब्रह्मजगत्कर्तृत्वादिनै वश्रुत्यादिवेद्यं नतूपादानत्वेनेति ॥ ९ ॥ ब्रह्मणउपादानत्वेप्रमाणभंगः ॥ १० ॥ यच्चेदमुच्यते । ब्रह्म

॥ तच्चेति ॥ स्वप्रकाशत्वमित्यर्थः ॥ वृत्त्यव्याप्यत्वमिति ॥ वृत्त्यविषयत्वमित्यर्थः ॥ उक्तरीत्येति ॥ ब्रह्मणोवृत्तिविषय त्वाभावेब्रह्मविचारयतोर्गुरुशिष्ययोर्मौनंमौढ्यंचस्यादित्युक्तरीत्येत्यर्थः । तथाचलक्षणस्यब्रह्मण्यसंभवइत्यर्थः ॥ फलेति ॥ ब्र ह्मचैतन्यस्यस्वप्रकाशरूपत्वेनप्रकाशरूपेप्रकाशांतरानुदयेनज्ञाततारूपफलाव्याप्यत्वसद्भावादित्यर्थः ॥ नापीति ॥ अतीतादौ विशेष्याभावान्नातिव्याप्तिरितिभावः । घटादिप्रपंचेतुविशेषणाभावप्रयुक्तविशिष्टाभावेनस्वप्रकाशत्वाभावोद्रष्टव्यः ॥ व्यवहारे

नवेद्यं स्वप्रकाशत्वात् तच्च यद्यपिनवृत्त्यव्याप्यत्वं दृश्यत्वभंगेउक्तरीत्याऽसंभवात् । नापिफलाव्या प्यत्वं । अतीतादौनित्यातींद्रियेचातिव्याप्तेः । नाप्यवेद्यत्वेसत्यपरोक्षव्यवहारविषयत्वं । सुषुप्तिप्रल यादौव्यवहाराभावेनाव्याप्तेः । नाप्यवेद्यत्वेसत्यपरोक्षव्यवहारविषयतायोग्यत्वं मोक्षेयोग्यतारूपध र्मस्याप्यभावात् । तथाप्यवेद्यत्वेसत्यपरोक्षव्यवहारविषयत्वयोग्यतात्यंताभावानधिकरणत्वंतत् ।

ति ॥ तथाचसुषुप्त्यादौविद्यमानेब्रह्मचैतन्येव्यवहारस्यैवाऽभावेनापरोक्षव्यवहारविषयत्वाभावादव्याप्तिरित्यर्थः ॥ योग्यत्व मिति ॥ सुप्त्यादौविद्यमानेब्रह्मचैतन्येऽपरोक्षव्यवहारविषयत्वयोग्यतायाःसत्वान्नाव्याप्तिरित्यर्थः । तथापिमुक्तिकालीनेब्रह्म चैतन्येशक्त्यादिरूपयोग्यताख्यधर्माभावेनाव्याप्तिरित्याह ॥ मोक्षइति ॥ अत्यंताभावेति ॥ मोक्षेयोग्यतायाअभावेपितद त्यंताभावोपिनास्ति योग्यतावत्तदत्यंताभावस्यापिधर्मत्वात् । एवंचयोग्यतात्यंताभावानधिकरणत्वस्यसत्वान्नमोक्षकालीनात्मन्य

SGDF Sri Gurgunkari Digital Foundation

व्याप्तिरितिभावः । वस्तुसिद्धेर्लक्षणप्रमाणाधीनत्वात्स्वप्रकाशत्वस्यलक्षणमुक्त्वातत्रप्रमाणंचाह ॥ प्रमाणंचात्रेति ॥ स्वप्रकाशेति ॥ अवेद्येत्यर्थः ॥ व्यतिरेकीति ॥ व्यतिरेकव्याप्तौचघटादिर्दृष्टांतइतिभावः ॥ किंचिन्निष्ठेति ॥ यन्निष्ठात्यंताभावप्रतियोगितदेवावेद्यरूपंस्वप्रकाशमेवाऽऽयास्यतीतिभावः । नन्वनेनानुमानेनानुभूतेःस्वप्रकाशत्वसिद्धावप्यात्मनःस्वप्रकाशत्वमसिद्धमित्यतआह ॥ आत्माचेति ॥ योग्यतात्यंताभावानधिकरणत्वस्यापिमुक्तात्मन्यभावादव्याप्तिरित्याह ॥ त्वन्मत

प्रमाणंचात्रअनुभूतिःस्वप्रकाशा अनुभूतित्वादितिव्यतिरेकि । नचाप्रसिद्धविशेषणता । वेद्यत्वंकिंचिन्निष्ठात्यंताभावप्रतियोगि धर्मत्वाच्छौक्ल्यवदितिसामान्यतस्तत्सिद्धेः । आत्माचानुभूतिरूपइति । तन्न त्वन्मतेआत्मनिसत्वाद्यनधिकरणत्वरूपानिर्वाच्यत्वस्येवमोक्षेयोग्यतात्यंताभावानधिकरणत्वरूपस्यवा ऽनधिकरणत्वोपलक्षितत्वरूपस्यवाधर्मस्याप्यभावात् ।

इति ॥ अनधिकरणत्वरूपस्य तद्वैशिष्ट्यरूपस्य । नन्वात्मनियोग्यतात्यंताभावानधिकरणत्वस्यैवसत्वेनतदभावःकथंवक्तुंशक्यते येनासंभवःस्यात् तथाचमुक्तात्मा । योग्यतात्यंताभावानधिकरणत्वाभाववान्नभवति योग्यतात्यंताभावानधिकरणत्वात् योयदनधिकरणं सतदनधिकरणत्वाभाववान्नभवति यथारूपानधिकरणंवायू रूपानधिकरणत्वाभाववान्नेतिसामान्यव्याप्तिमूलकानुमानेनयोग्यताभावानधिकरणत्वाभावस्याऽभावसिद्धेःकथमव्याप्तिरित्यतउक्तं ॥ सत्वादीति ॥ यथात्वन्मतेआत्मनो

SGDF
Sri Gargeshwari Digital Foundation

निर्धर्मकत्वात्तत्रसत्वंनास्ति असत्वंचनास्ति तावतासत्वानधिकरणत्वमसत्वानधिकरणत्वंचतत्रवक्तुंनशक्यते तथात्वेऽनिर्वाच्यल क्षणस्यब्रह्मण्यतिव्याप्तिप्रसंगात् एवंब्रह्मणियोग्यतात्यंताभावाधिकरणत्वंयोग्यतात्यंताभावानधिकरणत्वंचनास्त्येवेत्यव्याप्तिरेव तथाचोक्तानुमानेसामान्यव्याप्तौसत्वाद्यनधिकरणत्ववत्यात्मनिव्यभिचारान्नाव्याप्तिपरिहारायोक्तलक्षणाभावस्यानुमानतोव्या प्तिर्दृढेतिभावः । उक्तलक्षणस्यासंभवंचाह ॥ किंचेति ॥ स्वेति ॥ तथाचात्मनियोग्यता तदत्यंताभावश्चास्तीतिवक्तव्यं तथा चात्मनियोग्यतात्यंताभावानधिकरणत्वमसंभवीत्यर्थः । ननुनासंभवःयोग्यतायामिथ्यात्वेनतदत्यंताभावोयोब्रह्मण्यस्ति सपार

किंच । त्वन्मतेब्रह्मणियोग्यतापिमिथ्या मिथ्यात्वंचस्वसमानाधिकरणात्यंताभाव
प्रतियोगित्वं तथाचतदत्यंताभावानधिकरणत्वमसंभवि । नचव्यावहारिकोयोग्य
तात्यंताभावोब्रह्मणिनेतिवाच्यं । अत्यंताभावस्यब्रह्मान्यत्वेनव्यावहारिकत्वात् ।

मार्थिकएव योग्यतात्यंताभावानधिकरणत्वमित्यत्रव्यावहारिकोयोयोग्यतात्यंताभावस्तदनधिकरणत्वंविवक्षितं तस्यचात्मनिस त्वान्नासंभवइत्याशंक्यनिषेधति ॥ नचेति ॥ अत्यंताभावस्येति ॥ योग्यतायामिथ्यात्वेनयस्तदत्यंताभावोऽस्ति सपारमा र्थिकइतिवक्तुंनशक्यते कुतः तस्यब्रह्मभिन्नत्वेनव्यावहारिकत्वावश्यंभावात् । योग्यतात्यंताभावस्यविशिष्टस्यब्रह्मात्मकत्वेयो ग्यतायाअपिब्रह्मात्मकत्वापत्त्यामिथ्यात्वोक्त्ययोगात् । तथाचब्रह्मणियोग्यतात्यंताभावस्यव्यावहारिकत्वेऽवश्यंवाच्येव्यावहा

SGDF
Sri Gargeshwari Digital Foundation

रिकयोग्यताभावाधिकरणत्वस्यैवप्राप्त्यातदनधिकरणत्वस्यासंभवएवेत्यर्थः । अवेद्यत्वेसत्यऽपरोक्षव्यवहारविषयत्वमित्यत्रोभय
मपिदुर्वचनमित्याशयेनतावदवेद्यत्वंननिर्वक्तुंशक्यमित्याह ॥ किंचेत्यादिना ॥ असंभवादिति ॥ ब्रह्मणोवृत्त्यव्याप्यत्वे ब्र
ह्मविचारयतोर्गुरुशिष्ययोर्मौनंमौढ्यंचस्यादितिभावः ॥ दृश्यत्वभंगइति ॥ वृत्तिप्रतिबिंबितचैतन्येतदभिव्यक्ताधिष्ठानचैत
न्येज्ञाततारूपफलस्यविकल्प्यतत्रखंडितत्वेनप्रातिभासिकेरूप्यादौसर्वत्रापिव्यावहारिकेघटादिप्रपंचेफलाव्याप्यत्वसद्भावेनाति

किंचेदमवेद्यत्वंनतावद्वृत्त्यव्याप्यत्वं असंभवात् । नापिफलाव्याप्यत्वं दृश्यत्वभंगे
उक्तरीत्याप्रातिभासिकेरूप्यादौव्यावहारिकेअविद्यांतःकरणतद्धर्मसुखादौघटादौ
चलक्षणस्यातिव्याप्तेः तत्रोक्तरीत्यैवब्रह्मणोपिचरमवृत्तिप्रतिबिंबितचिद्रूपफलव्या
प्यत्वेनासंभवाच । एतेनफलव्याप्यत्वंवृत्तिप्रतिबिंबितचिज्जन्यातिशययोगित्वं

व्याप्तेरित्यर्थः ॥ तत्रेति ॥ कल्पितभेदेनजीवब्रह्मणोर्ज्ञातृज्ञेयभाववत्ब्रह्मणोपिस्वाकारवृत्तिप्रतिफलितचिद्विषयत्वाच्च अन्य
थातयातदज्ञाननिवृत्त्ययोगादितिदृश्यत्वभंगेउक्तरीत्याअधिकारिणोजायमाना या ब्रह्माकारवेदांतजन्याचरमवृत्तिस्तत्प्रतिबिं
बिता या चित् तद्रूपंयत्फलंतत्संबंधसद्भावेनफलाव्याप्यत्वाभावादसंभवइत्यर्थः । फलाव्याप्यत्वरूपावेद्यत्वस्यब्रह्मण्यसंभव ॥ ५०७ ॥
परिहारप्रकारमनूद्यदूषयति ॥ एतेनेति ॥ ननुतथापिब्रह्मणिस्वाकारवेदांतजन्यवृत्तिप्रतिबिंबितचिज्जन्योयोऽतिशयोऽविद्या

रूपावरणभंगोव्यवहारोवातद्योगित्वमेवाऽस्तीतिपुनरसंभवएवस्यादतआह ॥ अतिशयश्चेति ॥ भग्नेति ॥ भग्नावरणा या
चित्अधिष्ठानचैतन्यंतत्संबंधइत्यर्थः ॥ घटादाविति ॥ तथाचफलाव्याप्यत्वरूपावेद्यत्वलक्षणस्यनातिव्याप्तिरितिभावः ॥
नत्विति ॥ ब्रह्मणःचैतन्यरूपत्वेनतत्रपुनरधिष्ठानचित्संबंधाभावेनस्वाकारवृत्तिप्रतिबिंबितचिज्जन्यभग्नावरणचित्संबंधरूपाति
शययोगित्वरूपफलव्याप्यत्वाभावेनफलाव्याप्यत्वरूपावेद्यत्वसद्भावान्नाव्याप्तिरितिभावः । वृत्त्याऽभिव्यक्तेतिसंबंधः ॥ नन्वि

अतिशयश्चनावरणभंगः नापिव्यवहारः किंतुभग्नावरणचित्संबंधः सचघटादावस्ति
नत्वात्मनि । यद्वाफलव्याप्यत्वंवृत्त्यातत्प्रतिफलितचितावाऽभिव्यक्ताधिष्ठानचिद्वि
षयत्वं तच्चतज्जन्यव्यवहारयोगित्वं तच्चघटादावस्ति नत्वात्मनीतिनिरस्तं । घटादौवृ
त्तिविषयत्वमेव नतुतत्प्रतिफलितचिद्विषयत्वं नवातदभिव्यक्ताधिष्ठानचिद्विषयत्व
मित्युक्तत्वात् । एतेनैवचिद्रूपज्ञानाविषयत्वमवेद्यत्वं रूप्यादिरपिसाक्षिविषयएव ।

ति ॥ स्वाकारवृत्त्याप्यभिव्यक्ताधिष्ठानचिद्विषयत्वाभावान्नासंभवइत्यर्थः । एतेनेत्युक्तमेवविशदयति ॥ घटादाविति ॥ त
थाचघटादावपिफलाव्याप्यत्वसद्भावादतिव्याप्तिरितिभावः ॥ चिद्रूपेति ॥ घटादौतुचैतन्यरूपज्ञानविषयत्वस्यैवसत्वान्नाऽवे
द्यत्वलक्षणस्यातिव्याप्तिरितिभावः । ननुरूप्यादावतिव्याप्तिरितितत्राह ॥ रूप्यादिरपीति ॥ तथाचात्रापिसाक्षिविषयत्वस

SGDF Sri Gargeshwari Digital Foundation

द्भावान्नातिव्याप्तिरित्यर्थः । नन्वेवंचिद्रूपज्ञानाविषयत्वमेवावेद्यत्वमस्तु चैतन्याख्यज्ञानाविषयत्वरूपावेद्यत्वस्यघटादौरूप्यादौ चकुत्राप्यतिव्याप्त्यभावात्स्वप्रकाशत्वलक्षणेऽपरोक्षव्यवहारविषयत्वरूपविशेष्यांशोव्यर्थः । व्यावर्त्याभावादित्यतआह ॥ लक्षणइति ॥ नित्यातींद्रियेचिद्रूपज्ञानाविषयत्वमस्ति अन्यथाऽपरोक्षचित्संबंधाद्विषयस्याऽप्यपरोक्षापत्तेः । अतस्तत्रातिवाप्तिवारणायविशेष्यभागइत्यर्थः ॥ घटादाविति ॥ दृश्यत्वभंगेचैतन्यरूपज्ञानस्यखंडितत्वेनचिद्रूपज्ञानाविषयत्वरूपावेद्यत्वस्यघ

लक्षणेविशेष्यंतुनित्यातींद्रियेष्वनतिव्याप्त्यर्थमितिनिरस्तं । घटादावतिव्याप्तेः । चित्सुखेनतत्स्वभावस्यापिस्फुरणस्यतद्विषयत्वमित्युक्तत्वेनअसंभवाच्च । ननुतर्हिचिदकर्मत्वमवेद्यता चित्सुखेनैवचिताश्चिद्विषयत्वमुपेत्यतदकर्मत्वोक्तेरितिचेत् कर्मत्वंकिंकारकविशेषत्वं तज्जन्यातिशयवत्त्वंवा परसमवेतक्रियाफलशालित्वंवा ।

टादावपिसत्वेनातिव्याप्तिरित्यर्थः ॥ तत्स्वभावस्यापीति ॥ चैतन्यरूपज्ञानस्वभावस्यापिस्फुरणस्यब्रह्मरूपज्ञानस्य । तद्विषयत्वंचिद्रूपज्ञानविषयत्वं । तथाचचिद्रूपज्ञानाविषयत्वस्यब्रह्मण्यभावादसंभवइत्यर्थः ॥ उपेत्येति ॥ कर्मत्वातिरिक्तंविषयत्वमंगीकृत्येत्यर्थः ॥ अकर्मत्वेति ॥ कर्मत्वंकारकविशेषः । क्रियाजनकंकारकं ब्रह्मरूपज्ञानस्यनित्यत्वेनब्रह्मरूपविषयस्यनतत्कर्मत्वमितियुक्तंब्रह्मणश्चिदकर्मत्वरूपमवेद्यत्वमित्यर्थः । परसमवेतत्वंक्रियाविशेषणं । परःकर्ता तत्समवेतायाक्रिया तज्जन्यंयत्फलं

तच्छालित्वमित्यर्थः । वृत्तिप्रतिबिंबितचैतन्यस्यवातदभिव्यक्ताधिष्ठानचैतन्यस्यवाऽवच्छिन्नस्यज्ञानत्वेनपराभिमतस्यजन्यत्वेनतत्प्रतिघटादेःकारकत्वेनकर्मत्वंसंभवत्येवेतिनचिदकर्मत्वस्यघटादावतिव्याप्तिरतउक्तं ॥ अनवच्छिन्नमिति ॥ अविद्ययानावृतंसर्वगतमनवच्छिन्नंचैतन्यंज्ञानमितिपक्षेतस्यनित्यत्वादित्यर्थः । अत्रनित्यमित्यस्यनित्यंविद्यमानमनादीत्यर्थः । नित्यंनित्यत्वेनसाधितानादिताकमित्यर्थइत्यन्ये । स्वाकारवृत्तिप्रतिबिंबितचैतन्यस्यावच्छिन्नस्यजन्यत्वेनतत्प्रतिवेदांतजन्यापरोक्षचरमवृत्तिविषयस्यब्रह्मणोपिस्वावच्छिन्नंचैतन्यंप्रतिघटस्यैवकारकत्वेनचिदकर्मत्वाभावादतिव्याप्तिरित्याह ॥ स्वेति ॥ ननुचरमवृत्ति

नाद्यः अनवच्छिन्नंनित्यंचैतन्यंप्रतिघटादेरप्यकारकत्वात् । स्वाकारवृत्तिप्रतिबिंबितंतुप्रतिघटतद्रूपादेरिवापरोक्षचरमवृत्तिव्याप्यस्यब्रह्मणोपिकारकत्वावश्यंभावात्। नद्वितीयः ब्रह्मण्यप्युक्त(रीत्याप्र)न्यायेनप्रतिफलितचित्फलभूतावरणभंगरूपस्यतदभिव्यक्तचिज्जन्यव्यवहाररूपस्यवातिशयस्यसत्वात् ।

नंब्रह्माकारा ब्रह्मणोनिराकारत्वात् अतउक्तं रूपादेरिवेति ॥ निराकारंयद्रूपरसादितदाकारावृत्तिर्यथांगीकृता एवंवेदांतजन्यचरमवृत्तेरपिनिराकारब्रह्माकारत्वंयुक्तमित्यर्थः । ब्रह्मण्यतिशयस्यसत्वादित्यन्वयः ॥ उक्त(न्यायेनेति ॥)रीत्येति ॥ कल्पितभेदेनजीवब्रह्मणोर्ज्ञातृज्ञेयभाववद्ब्रह्मणोपिस्वाकारवृत्तिप्रतिबिंबितचिद्विषयत्वंसंभवत्येव अन्यथातयातदज्ञाननिवृत्त्ययोगादितिदृश्यत्वनिरुक्तिभंगेउक्तरीत्येत्यर्थः ॥ प्रतिफलितेति ॥ स्वाकारवेदांतजन्यवृत्तिप्रतिफलितेत्यर्थः । तथाचचिज्जन्या

SGDF Sri Gangadhar Digital Foundation

तिशयवत्त्वाभावरूपचिदकर्मत्वरूपावेद्यत्वस्यब्रह्मण्यसंभवइतिभावः । ननुचिज्जन्यातिशयोज्ञाततारूपएवविवक्षितः सचब्रह्मणिनास्ति अतींद्रियत्वात् एवंचचिज्जन्यज्ञाततारूपातिशयवत्त्वाभावरूपचिदकर्मत्वरूपावेद्यत्वस्यनब्रह्मण्यसंभवइत्यतआह ॥ तदन्यस्येति ॥ आवरणभंगातिरिक्तज्ञाततारूपातिशयस्येत्यर्थः ॥ घटादावपीति ॥ ज्ञाततायाअप्रामाणिकत्वेनब्रह्मणीवघटादावपिनिरुक्तावेद्यत्वसद्भावादतिव्याप्तिरित्यर्थः । जडेऽतिव्याप्तिरित्याह ॥ शुद्धेति ॥ चैतन्यफलरूपज्ञानस्यसर्वत्रव्याप्तत्वेनपरसमवेतत्वाभावात् । क्रियांकुर्वद्धिकारकमित्युक्तत्वेनकारकजन्यायाएवक्रियात्वात् शुद्धचितश्चतदभावेनक्रियात्वा

तदन्यस्यचघटादावप्यभावात् । नतृतीयः शुद्धचितोसमवेतत्वादक्रियात्वाचतत्फलशालिनोपिजडस्याकर्मत्वापातात् । प्रतिबिंबितचितितुसमवेतत्वादेःसत्वेपिब्रह्मणोपिचरमवृत्तिप्रतिफलितचित्फलभूतावरणभंगादिशालित्वाच्च । एतेनज्ञप्त्यविषयत्वमवेद्यत्वं

भावात्परसमवेतक्रियाजन्यफलशालित्वरूपकर्मत्वस्यजडेप्यभावेनचिदकर्मत्वसद्भावादतिव्याप्तिरित्यर्थः । ननुशुद्धचितःसमवेतत्वाद्यभावेपि वृत्तिप्रतिबिंबितचैतन्यस्यपरस्मिन्ज्ञातरिवृत्तिवत्समवेतत्वात्कर्मादिकारकजन्यत्वेनक्रियात्वाच्चतज्जन्यव्यवहारादिरूपफलशालित्वसद्भावेनघटेकर्मत्वसद्भावान्नचिदकर्मत्वलक्षणस्यातिव्याप्तिरितिचेत्तर्हि ब्रह्मणोपिस्वाकारचरमवृत्तिप्रतिफलितचैतन्यस्यपरसमवेतत्वात्क्रियात्वाच्चतज्जन्यावरणभंगव्यवहाररूपफलशालित्वेनकर्मत्वाच्चिदकर्मत्वरूपावेद्यत्वस्यब्रह्मण्यसंभवइत्याह ॥ प्रतिबिंबितचितित्विति ॥ ज्ञप्तिः चैतन्यरूपा । ननुब्रह्मणोपिवृत्तिरूपज्ञप्तिविषयत्वसत्वादसंभवइत्यत

SGDF Sri Gargeshwari Digital Foundation

आह ॥ वृत्तिस्त्विति ॥ घटादावपिज्ञप्त्यविषयत्वसद्भावादतिव्याप्तिरित्यत आह ॥ घटादाविति ॥ ज्ञप्तीति ॥ चैतन्यरूप ज्ञप्तीत्यर्थः । अप्रामाणिकत्वादितिभावः । विषयापरोक्ष्यंतुचैतन्याभिव्यंजकत्वार्थमावश्यकेनवृत्तिगतविशेषेणैवोपपन्नमितिध्येयं । अवेद्यत्वनिरुक्तिखंडनेनलब्धमर्थमाह ॥ तस्मादिति ॥ अयमिति ॥ यद्विषयत्वंस्वप्रकाशत्वमित्यर्थः ॥ अपरोक्षोयमित्याकारइति ॥ अपरोक्षत्वप्रकारकात्मविशेष्यकव्यवहारएवाऽपरोक्षव्यवहारइत्यर्थः ॥ धर्माधर्मादाविति ॥ योगीश्वराणांयोगजधर्मप्रत्यासत्याजन्यंयदपरोक्षज्ञानं तज्जन्योयोयोगीश्वरीयव्यवहार स्तद्विषयत्वात् तथाऽस्माकंजायमानंयत्धर्मादिक

वृत्तिस्तुनज्ञप्तिरितिनिरस्तं । घटादौवृत्त्यन्यज्ञप्त्यभावस्योक्तत्वात् । तस्मादवेद्यत्वंदुर्वचं । कश्चायमपरोक्षव्यवहारः अपरोक्षज्ञानजन्योवा अपरोक्षवस्तुविषयोवा अपरोक्षोयमित्याकारोवा।नाद्यःधर्माधर्मादावप्यपरोक्षेणयोगजज्ञानेनानुव्यवसायेनव्याप्तिज्ञानेनचजन्यव्यवहारस्यसत्वेनातिव्याप्तेः।

मनुमित्याशास्त्रतोवाजानामीत्येवमनुव्यवसायरूपापरोक्षज्ञानं तथायत्प्रमेयंतदभिधेयमितिसर्वोपसंहारेणव्याप्तिज्ञानरूपंअपरोक्षज्ञानं तज्जन्यव्यवहारविषयत्वस्यधर्मादावपिसत्वेनस्वप्रकाशत्वप्रसंगादतिव्याप्तिरित्यर्थः । अपरोक्षेणेत्येतत्योगजन्यज्ञानेनेत्यादित्रयाणामपिविशेषणं । नन्वपरोक्षज्ञानजन्योव्यवहारइत्यत्रापरोक्षज्ञानशब्देनलौकिकप्रत्यासत्त्याजन्यसाक्षात्कारएवविवक्षितः । तज्जन्यव्यवहारोधर्मादौनास्ति योगिनांजायमानस्यधर्मादिसाक्षात्कारस्ययोगजधर्मप्रत्यासत्तिरूपालौकिकसंनिकर्षजन्य

SGDF
Sri Gargeshwari Digital Foundation

त्वात् अस्मदादीनांजायमानानुव्यवसायरूपस्यव्याप्तिज्ञानरूपस्यचसाक्षात्कारस्यज्ञानलक्षणप्रत्यासत्तिजन्यत्वान्नातिव्याप्तिः ।
घटादौत्वेतादृशापरोक्षज्ञानजन्यव्यवहारविषयत्वसत्वेपिअवेद्यत्वरूपविशेषणाभावेनस्वप्रकाशत्वाभावसद्भावात् तत्रव्यवहारज
नकापरोक्षज्ञानेऽलौकिकप्रत्यासत्त्यजन्यत्वंनामकिमित्यतस्तत्स्वरूपंनिरुच्यदर्शयति ॥ अनागतेति ॥ अनागतगोचरोयःसाक्षा
त्कारस्तज्जनिकायाप्रत्यासत्तिर्ज्ञानसामान्ययोगजधर्मरूपालौकिकप्रत्यासत्ति स्तदजन्योयोजन्यसाक्षात्कारः लौकिकप्रत्यासत्ति
जन्यसाक्षात्कारः सएवापरोक्षज्ञानशब्देनविवक्षितइत्यर्थः । अत्रानागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्योयःसाक्षात्कारःई

अपरोक्षज्ञानशब्देनानागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्यजन्यसाक्षा
त्कारविवक्षायांचात्मस्वरूपज्ञानस्यानित्यत्वेनासंभवात् । विषयगतापरोक्षव्य
वहारहेतुसाक्षात्कारविवक्षायांतुसाक्षिवेद्येरूप्यादौचाविद्यादौचातिव्याप्तेः ।

श्वरसाक्षात्कारस्तज्जन्यव्यवहारविषयेधर्मादौस्वप्रकाशत्वपरिहारायजन्येतिसाक्षात्कारविशेषणं ॥ आत्मेति ॥ आत्मस्वरूपज्ञान
स्यनित्यत्वेनउक्तप्रत्यासत्त्यजन्यजन्यसाक्षात्कारत्वाभावेनतज्जन्यव्यवहारविषयत्वमात्मनिनास्तीत्यपरोक्षव्यवहारविषयत्वरूप
स्वप्रकाशत्वलक्षणस्यासंभवइत्यर्थः । नन्वपरोक्षज्ञानशब्देनविषयनिष्ठोयोऽपरोक्षव्यवहारस्तद्धेतुभूतसाक्षात्कारएवविवक्षितः
एवंचधर्मादौनातिव्याप्तिः । योगजज्ञानानुव्यवसायेऽव्याप्तिज्ञानरूपसाक्षात्काराणांअलौकिकप्रत्यासत्तिजन्यतयाविषयेऽपरोक्ष ॥ ५१० ॥
व्यवहारहेतुत्वाभावादित्याशंक्याह ॥ विषयेति ॥ साक्षिरूपसाक्षात्कारस्यस्वविषयभूतरूप्याविद्यागतापरोक्षव्यवहारहेतुत्वेन

विषयगतापरोक्षव्यवहारहेतुसाक्षात्कारजन्यव्यवहारविषयत्वंरूप्यादीनामप्यस्तीतितेषामपिस्वप्रकाशत्वप्राप्त्याऽतिव्याप्तेरित्य
र्थः ॥ वस्तुनइति ॥ अपरोक्षवस्तुविषयोव्यवहारोहिअपरोक्षव्यवहारइत्यत्रवस्तुनोऽपरोक्षत्वंनामअपरोक्षज्ञानविषयत्वं तथा
चात्मनःस्वप्रकाशत्वंनामाऽपरोक्षज्ञानविषयतयाऽपरोक्षभूतंयदात्मरूपंवस्तुतद्विषयव्यवहारविषयत्वंवाच्यं एवंचात्मरूपवस्तु
नोऽपरोक्षज्ञानविषयत्वेनघटादिवद्वेद्यत्वापत्त्याऽवेद्यत्वेसतीत्यनेनव्याघातइत्यर्थः ॥ तस्यैवेति ॥ अवेद्यत्वेसत्यपरोक्षज्ञानवि
षयत्वस्यैवलक्षणत्वोपपत्तौज्ञानापरोक्ष्येणविषयापरोक्ष्यंसंपाद्यअपरोक्षवस्तुविषयकव्यवहारयोग्यत्वरूपलक्षणकरणरूपकुसृष्टिवै

द्वितीयेवस्तुनआपरोक्ष्यंअपरोक्षज्ञानविषयत्वंचेदात्मापिघटादिवद्वेद्यः
स्यात् । तस्यैवलक्षणत्वोपपत्त्याकुसृष्टिवैयर्थ्यंच। अपरोक्षव्यवहारवि
षयत्वंचेत्वस्तुव्यवहारयोरापरोक्ष्येन्योन्यसापेक्षत्वादन्योन्याश्रयः ।

यर्थ्यादित्यर्थः । साक्षिवेद्यरूप्यादावतिव्याप्तिस्तूभयथापिसमैवेतिभावः । ननुवस्तुनआपरोक्ष्यंनामापरोक्षज्ञानविषयत्वमिति
नोच्यते येनोक्तकुसृष्टिवैयर्थ्यापत्तिः किंनामापरोक्षव्यवहारविषयत्वमेवेति तथाचापरोक्षव्यवहारविषयत्वेनापरोक्षभूतवस्तुव्य
वहारविषयत्वंस्वप्रकाशत्वंचेत्तर्हि(वस्त्वापरोक्ष्यसिद्धौअपरोक्षवस्तुविषयकत्वेनव्यवहारस्यापरोक्षत्वसिद्धिः । तत्सिद्धौचाऽपरोक्ष
व्यवहारविषयत्वेनवस्त्वापरोक्ष्यसिद्धिरित्यन्योन्याश्रयः)इतिपाठांतरं। व्यवहारापरोक्ष्यसिद्धौवस्त्वापरोक्ष्यसिद्धिः(वस्त्वापरोक्ष्य
सिद्धौचव्यवहारापरोक्ष्यसिद्धिरित्यन्योन्याश्रयः)स्यादित्याह ॥ अपरोक्षेति ॥ आपरोक्ष्ये विषये । वस्तुव्यवहारयोरन्योन्य

SGDF Foundation

सापेक्षत्वेनेत्यर्थः ॥ इत्याकारत्वेति ॥ अपरोक्षत्वप्रकारकत्वायोगादित्यर्थः । तदुपपादनायनिराकारेति अखंडार्थेतिचहेतुद्वयं । एवमपरोक्षव्यवहारविषयत्वंप्रकारत्रयेणविकल्प्यदूषयित्वा अस्तुवायत्किंचित्तथाप्यवेद्यत्वेसत्यपरोक्षव्यवहारविषयत्वरूपस्वप्रकाशत्वस्याभावेऽतिव्याप्तिरित्याह ॥ अभावइति ॥ नन्वभावस्यानुपलब्ध्यानुमेयत्वेनापरोक्षव्यवहारविषयत्वाभावात्कथमतिव्याप्तिरित्यतस्तदुपपादयति ॥ अस्तिहीति ॥ अवेद्यत्वांशमुपपादयति ॥ सचेति ॥ फलाव्याप्यत्वरूपमवेद्यत्वं

नतृतीयः निराकारशुद्धब्रह्मविषयस्याऽखंडार्थनिष्ठवेदांतजन्यस्यचव्यवहारस्यापरोक्षइत्याकारत्वायोगात् । अभावेऽतिव्याप्तेश्च । अस्तिहिगजइवगजाभावेप्यपरोक्षइतिलोकव्यवहारः । सचावेद्यः । त्वयैवनाभावस्यप्रत्यक्षत्वं किंत्वनुपलब्धिगम्यत्वमितिफलव्याप्यत्वनिषेधात् । यदिचापरोक्षज्ञानंअपरोक्षव्यवहारशब्दार्थः तदास्वव्याहतिः । किंचअपरोक्षव्यवहारयोग्यत्वंनतावत्सर्वान्प्रति।

तत्रास्तीत्यर्थः । कथमित्यतस्तदुपपादयति ॥ त्वयैवेति ॥ नाभावस्येति ॥ प्रत्यक्षत्वाभावेनफलीभूतापरोक्षचित्संबंधाभावादित्यर्थः । ननुलोकव्यवहारानुसारेणापरोक्षव्यवहारविषयत्वेसत्यपिप्रकृतेऽस्माभिरपरोक्षव्यवहारशब्देनापरोक्षज्ञानविषयत्वमेव विवक्षितं एवंचानुपलब्धिगम्याभावेऽपरोक्षज्ञानविषयत्वरूपापरोक्षव्यवहारोनास्तीतिनतत्रातिव्याप्तिरित्यतआह॥ यदिचेति ॥ अपरोक्षज्ञानाविषयत्वरूपमवेद्यत्वमंगीकृत्यपुनरपरोक्षव्यवहारशब्देनापरोक्षज्ञानविषयत्वांगीकारेस्वव्याहतिःस्यादित्यर्थः ॥ ॥ ५११ ॥

चैत्रस्येति ॥ घटाद्यधिष्ठानचैतन्यंघटादिप्रकाशकमित्युच्यते तत्रघटविषयकचैत्रस्थवृत्त्यादिनाघटाधिष्ठानचैतन्यरूपज्ञानस्यचैत्रंप्रत्यपरोक्षव्यवहारयोग्यत्वेसत्यपिमैत्रंप्रतितदभावेनचैत्रस्थज्ञानरूपस्यघटा (धिष्ठानचै)वच्छिन्नचैतन्यस्यसर्वान्प्रत्यपरोक्षव्यवहारविषयत्वाभावेनस्वप्रकाशत्वंनस्यादित्यर्थः ॥ ज्ञानंप्रतीति ॥ घटाधिष्ठानचितंप्रतीत्यर्थः । तथाचचैतन्यरूपज्ञानकर्तृकापरोक्षव्यवहारविषयत्वमितियावत् ॥ तस्येति ॥ घटाधिष्ठानचैतन्यस्यापरोक्षव्यवहारकर्तृत्वाभावादुक्तलक्षणस्यासंभवइत्यर्थः ॥ ज्ञानेति ॥ ज्ञानाश्रयोयोजीवात्मा तत्कर्तृकव्यवहारविषयत्वमधिष्ठानचैतन्यस्यास्तीति युक्तंतस्यस्वप्रकाशत्वमित्यर्थः । चैत

चैत्रस्यज्ञानेमैत्रंप्रतितदभावात् । नापिज्ञानंप्रति तस्याव्यवहर्तृत्वात् । नापिज्ञानाश्रयंप्रति चितोनाश्रितत्वात् । किंचावेद्य(त्वेसत्यप)स्यापरोक्षव्यवहारविषयत्वंव्याहतं । तदपरोक्षव्यवहारेतद्विषयकस्फुरणस्यहेतुत्वात्

न्यस्यैवज्ञानत्वेनानवच्छिन्नस्यतस्यकुत्राप्यनाश्रितत्वादाऽऽत्मनस्तदाश्रयत्वमयुक्तमित्याह ॥ चितइति ॥ वृत्तिप्रतिबिंबितचैतन्यस्यवा घटाधिष्ठानचैतन्यस्यवा परिच्छिन्नत्वेनयुक्तंजीवात्मनस्तदाश्रयत्वमित्यस्वरसादाह ॥ किंचेति ॥ लक्षणांशयोर्व्याहतिरित्यर्थः । व्याहतत्वमेवोपपादयति ॥ तदिति ॥ स्फुरणस्य ज्ञानस्य । तथाचावेद्यत्वोक्त्यातद्विषयकस्फुरणाभावप्राप्तेस्तादृशापरोक्षव्यवहारायोगेनतद्विषयकत्वकथनंव्याहतमित्यर्थः । ननुचैतन्यरूपस्फुरणस्यचैतन्यरूपस्फुरणविषयकत्वाभावेपि चैतन्य

SGDF Foundation

रूपस्फुरणविषयकापरोक्षांतःकरणवृत्तिरेवतदपरोक्षव्यवहारहेतुर्भविष्यति अथवा तद्विषयकापरोक्षवृत्त्यभावेपिस्फुरणाविषयकं स्फुरणमेवस्वभावविशेषादपरोक्षव्यवहारहेतुर्भविष्यतीतिचेत्तर्हिसर्वत्रैकरूप्यायघटादावप्यपरोक्षव्यवहारहेतुत्वेनचैतन्यकल्पनं व्यर्थं तत्रापिघटविषयकापरोक्षवृत्तिरेववा स्वाविषयकोघटएववास्वभावविशेषादेवाऽपरोक्षव्यवहारहेतुरस्त्वित्याह॥ यदिचेत्यादि॥ अस्फुरणेति॥अतस्तत्रापरोक्षव्यवहारायतत्रस्फुरणांतरापेक्षा नतुघटएवतद्धेतुरित्यर्थः। तद्रूपं स्फुरणरूपं। अतोनतत्रस्फु

यदिचस्फुरणाविषयेपिस्फुरणेतद्विषयकापरोक्षवृत्तिर्वा तदविषयकंस्फुरणमेववा स्वभावभेदादेवअपरोक्षस्वव्यवहारहेतुस्तर्ह्यवैरूप्यायघटादावपितथैवस्यात् । ननुघटादिकमस्फुरणरूपंस्फुरणंतुतद्रूपमितिचेत् (आत्मातुस्फुरणरूपइतिचेत्) सत्यं तावतास्फुरणेस्फुरणांतरंनापे(क्ष्यतां)क्षितं नतुक्लृप्तंतद्विषयकत्वमपि । अन्यथाप्रमेयत्वमपिस्ववृत्तिंविनैवस्वास्मिन्प्रमेयव्यवहारंकुर्यादितिकेवलान्वयिनस्यात् ।

रणांतरापेक्षेत्यर्थः ॥ तावतेति ॥ स्फुरणरूपत्वेनेत्यर्थः ॥ नापेक्षितमिति ॥ अनवस्थाभयादितिभावः ॥ क्लृप्तमिति ॥ व्यवहारजनकत्वेनक्लृप्तमित्यर्थः । ननुभेदाभावात्तद्विषयत्वमपित्यज्यतइतिचेन्न । कल्पितभेदसद्भावात् वृत्तिप्रतिबिंबितस्यविषयित्वं घटाधिष्ठानस्यविषयत्वमित्युपपत्तेः ॥ अन्यथेति ॥ तद्व्यवहारजनकत्वेनक्लृप्तस्यतद्विषयत्वस्यस्फुरणेऽनंगीकारे । प्रमेयत्वेप्रमेयत्वस्यवृत्तिमंगीकृत्यप्रमेयत्वंप्रमेयमितिस्वस्मिन्व्यवहारकारणत्वंसर्वांगीकृतंनस्यात् तत्रापिस्ववृत्तिंविनैवप्रमेयव्यव

SGDF
Sri Gargeshwari Digital Foundation

हारनिर्वाहकत्वमस्तु ततश्चप्रमेयत्वेप्रमेयत्वाभावप्राप्त्यातस्यकेवलान्वयित्वंनस्यादित्यर्थः । स्वस्मिन्स्वस्यवृत्त्यभावेनस्वविषयकत्वाभावमंगीकृत्यस्वस्मिन्स्वकार्यजनकत्वांगीकारेगतौगत्यभावेनगतेर्गतिविषयकत्वाभावेपिस्वकार्यंयद्ग्रामपुरुषसंयोगरूपंतत्स्वस्मिन्नपिकुर्यादित्याह ॥ ग्रामइति ॥ ननुभवद्भिःसत्ताजातौसत्तांतराभावेनस्वविषयत्वाभावेपिसत्ताप्रतीतिःस्वस्मिन्व्यवहारकारित्वंसत्तायाअंगीकृतं तद्वत्स्यादित्यतआह ॥ अस्मन्मतइति ॥ नास्मन्मतेसत्वंनामसत्ताजातिः किंनामाबाध्यत्वरूपं तस्य

गतिरपिग्रामइवस्वस्मिन्नपिस्वकार्यंकुर्यात् । अस्मन्मतेऽबाध्यत्वरूपसत्वस्यस्ववृत्तित्वादेवसत्तास्तीतिव्यवहारः। एतेनचिद्विषयस्वरूपत्वमेवस्वप्रकाशत्वं चिदन्यत्सर्वमपिदृश्यत्वनिरुक्तिप्रस्तावे उक्तन्यायेनचिद्वेद्यमेव । चित्तुनस्ववेद्या । स्वात्मनिवृत्तिविरोधात् । नहिछिदाछेद्याभवतीतिनिरस्तं। मिथ्यात्वानुमित्यादेःस्वविषयकत्ववदुपपत्तेः। अन्यथाचितिःस्वात्मनिव्यवहारमपिनजनयेत्

स्ववृत्तित्वमंगीकृत्यैवव्यवहारहेतुत्वमस्माभिरंगीकृतमितिनास्मत्प्रतिबंदीत्यर्थः । तुच्छवारणायस्वरूपत्वमित्युक्तं । अस्यनकुत्राप्यतिव्याप्तिरित्याह ॥ चित्त्विति ॥ चित्तु चित्स्वरूपंत्वित्यर्थः । कुतइत्यतआह ॥ स्वात्मनीति ॥ क्रियायाःस्वभिन्नकर्त्राद्युपेतत्वनियमात् चैतन्यरूपक्रियायामेककर्तृकर्मत्वयोर्विरोधादित्यर्थः । क्रियायाःकर्मत्वंविरुद्धमित्यत्रोदाहरणमाह ॥ नहीति॥ एतेनेत्युक्तंविशदयति ॥ मिथ्यात्वेति ॥ उपपत्तेरिति ॥ चितोपिचिद्विषयत्वोपपत्तेरित्यर्थः ॥ अन्यथेति ॥ चितेःस्ववि

SGDF
Sri Gargeshwari Digital Foundation

षयकत्वानंगीकारइत्यर्थः । व्यवहारं स्वकर्मकव्यवहारं । तर्हिंच्छिदायाअपिच्छेद्यत्वंस्यादितिचेत्तत्राह ॥ नहीति ॥ च्छिदायाअपिछेद्यत्वमंगीकुर्मो यदिछिदाकार्यद्वैधीभावःच्छिदायांदृश्येत प्रकृतेतुचैतन्याख्यज्ञानरूपक्रियायाःकार्यंव्यवहारःक्रियायामेवदृश्यतइतिस्वविषयकत्वमंगीकर्तव्यमित्यर्थः ॥ स्वावच्छिन्नेति ॥ स्वव्यावर्तितेत्यर्थः । स्वविषयकेतियावत् ॥ संविदिति ॥ संविदंतरेत्यर्थः । शब्दभेदएव अर्थस्त्वेकएवेतिद्रष्टव्यं । इदंलक्षणद्वयंपूर्वंदृश्यत्वनिरुक्तिभंगविवरणेव्याख्यातं

नहिछिदाकार्यंच्छिदायांदृश्यते । नापिस्वव्यवहारेस्वातिरिक्तसंविदनपेक्षत्वंवा स्वव्यवहारेस्वावच्छिन्नसंवि(त्सापे)दनपेक्षत्वंवास्वप्रकाशत्वं । अस्यस्ववेद्यत्वेप्युपपत्त्यासंमतत्वात् । स्वविषयत्वं विनास्वव्यवहारहेतुत्वायोगादित्युक्तत्वाच । किंचस्वप्रकाशत्वंआत्मस्वरूपमेववातद्धर्मोवा नाद्यः इष्टापत्तेः । नांत्यः । तात्विकस्यतस्याभावेनस्वप्रकाशत्वस्याताात्विकत्वापत्त्यातत्साधकानुमानादे

॥स्ववेद्यत्वेपीति॥ एतादृशस्वप्रकाशत्वेनब्रह्मणःसर्वथाऽवेद्यत्वंकुतःस्ववेद्यत्वरूपस्वप्रकाशत्वसद्भावेप्यनयोर्लक्षणयोरुपपत्त्याऽस्माकंसंमतत्वादित्यर्थः ॥ स्वविषयत्वमिति ॥ स्वव्यवहारेस्वातिरिक्तसंविदनपेक्षत्वोक्त्यास्वाख्यसंविदएवस्वव्यवहारजनकत्वमुक्तंस्यात् तच्चस्वविषयत्वरूपस्ववेद्यत्वंविनानसंभवतीत्युक्तत्वेनतस्यचत्वयानंगीकारान्नस्वव्यवहारहेतुत्वंयुक्तमित्यर्थः ॥ अभावेनेति ॥ अन्यथानिर्गुणश्रुतिविरोधादित्यर्थः ॥ तत्साधकेति ॥ स्वप्रकाशत्वसाधकानुभूतित्वाद्यनुमानादेरित्यर्थः ॥ ॥ ५१३ ॥

बाधादिति ॥ मिथ्याभूतार्थावगाहित्वादितिभावः ॥ ७ ॥ स्वप्रकाशत्वलक्षणभंगविवरणं ॥ ११ ॥ ७ ॥ वेद्यत्वमिति ॥ पक्षीभूतंवेद्यत्वमित्यर्थः ॥ अर्थांतरत्वादिति ॥ अनुभूतिःस्वप्रकाशेत्यत्राप्रसिद्धिवारणायहीदमनुमानंप्रवृत्तं अत्रसामान्यतः वृत्तिव्याप्यत्वंकिंचिदवेद्यत्वंवस्तुसिद्धं । नहिअनुभूतित्वादितिपूर्वानुमानेवृत्त्यव्याप्यत्वरूपंयदवेद्यत्वंतद्रूपंयत्स्वप्रकाशत्वंतत्साध्यं । येनतेनानुमानेनतस्यसामान्यप्रसिद्ध्युक्तिःसंमतास्यात् । तथात्वेऽनुभूतिपदोक्तस्यब्रह्मणोपिवेदांतजन्यचरमवृत्तिविषयत्वेनवृत्तिव्याप्यत्वात्तदव्याप्यत्वरूपावेद्यत्वसाधनेबाधःस्यादितिभावः ॥ तस्येति ॥ फलव्याप्यत्वस्यकिंचिन्निष्ठात्यंताभावप्रति

बाधात् ॥ ७ ॥ स्वप्रकाशत्वलक्षणभंगः ॥ ११ ॥ यच्चानुभूतित्वहेतौसाध्यप्रसिध्यर्थंधर्म[1] त्वादित्यनुमानं तत्रवेद्यत्वंवृत्तिव्याप्यत्वंवा फलव्याप्यत्वंवा चिद्विषयत्वंवा अस्वप्रकाशत्वंवा । नाद्यः अर्थांतरत्वात् नहिपूर्वानुमानएतदभावःसाध्यः । नद्वितीयः तस्यममघटादौतवशुक्तिरूप्यादौधर्मादौचपक्षेतरव्यक्तिविशेषेसिद्धत्वेनासाधारणानैकांत्यात् ।

योगित्वसाधनेफलाव्याप्यत्वरूपस्वत्वप्रकाशत्वसिद्ध्यापूर्वानुमानेऽप्रसिद्धविशेषणत्वाभावेपिअसाधारण्यंस्यात् । उक्तरीत्याफलस्याधिष्ठानचैतन्यरूपस्याप्रामाणिकत्वस्योक्तत्वेनअपरोक्षेघटादावभावेनफलाव्याप्यत्वसद्भावात्त्वत्पक्षेशुक्तिरूप्यादौप्रातिभासिकेंतःकरणवृत्तिप्रतिबिंबितचैतन्याभिव्यक्ताधिष्ठानचैतन्यरूपफलाभावेनफलाव्याप्यत्वसद्भावात्त्वन्मतेधर्मादौपरोक्षेफलाभावेनतदव्याप्यत्वसद्भावेनतस्मिन्सपक्षेऽनुभूतित्वहेतोरवर्तमानत्वादसाधारण्यमित्यर्थः ॥ व्यक्तिविशेषइति ॥ तथाचनतत्र

1 [illegible]

SGDF

सामान्यप्रसिद्ध्यपेक्षेत्यर्थः । नन्ववेद्यत्वेसत्यपरोक्षव्यवहारविषयत्वस्यविशिष्टस्यपूर्वानुमानेसाध्यत्वात्तच्चनव्यक्तिविशेषेसिद्धं । घटादौरूप्यादौचविशेषणाभावात् धर्मादौविशेष्याभावात् । अतोनासाधारण्यमित्याशंक्यनिराकरोति ॥ नचेति ॥ तर्ह्यप्रसिद्धविशेषणत्वंस्यादेवसामान्यतोऽप्रसिद्धावपिविशिष्टाप्रसिद्धेरनुगतत्वादित्याह ॥ तस्येति ॥ ननुनाप्रसिद्धविशेषणत्वं । फलाव्याप्यत्वरूपावेद्यत्वाख्यस्वप्रकाशत्वस्यैवसाध्यत्वेनतस्यसामान्यतःप्रसिद्धत्वात् । नचघटादौमद्रीत्या त्वद्रीत्यारूप्यादौव्यक्तिविशेषेतस्यसिद्धत्वेनासाधारण्यमितिवाच्यं । किंचित्प्रत्यपिफलाव्याप्यत्वरूपावेद्यत्वस्यैवसाध्यत्वात् मन्मतेघटादौतदभावात्

नचपूर्वत्रावेद्यत्वेसत्यपरोक्षव्यवहारविषयत्वंसाध्यं तच्चनव्यक्तिविशेषेसिद्धमितिवाच्यं । तस्यसामान्यतोप्यप्रसिद्ध्याऽप्रसिद्धविशेषणत्वात् । नचपूर्वत्र किंचित्प्रत्यपिफलाव्याप्यत्वंसाध्यं धर्मादिश्चयोगिनंप्रतिफलव्याप्यः । अविद्यावृत्तिप्रतिफलितचिदपिसाध्यत्वात्फलामितिशुक्तिरूप्याद्यपिफलव्याप्यमेव

धर्मादेश्चयोगिनंप्रतिफलव्याप्यत्वेनफलाव्याप्यत्वाभावात् । शुक्तिरूप्यादेरप्यविद्यावृत्तिप्रतिफलितचिद्वेद्यत्वेनफलव्याप्यतया फलाव्याप्यत्वाभावात् । नन्वविद्यावृत्तिप्रतिबिंबितचैतन्यस्यकथंफलत्वं अधिष्ठानचैतन्यस्यैवफलत्वादितिचेन्न फलंनामसाध्यं कार्यमितियावत् यथोक्तंतर्कभाषायां प्रमैवफलंसाध्यमित्यर्थइति । एवंचवृत्तिप्रतिबिंबितचैतन्यस्यापिजन्यत्वेनसाध्यत्वात्फलत्वेनरूप्यादौतद्व्याप्यत्वसद्भावान्नासाधारण्यमित्याशंक्यनिराकरोति ॥ नचेति ॥ ननुस्वप्रकाशत्वानुमानेफलाव्याप्यत्वरूपवि

SGDF
Sri Gargeshwari Digital Foundation

शेषणसिद्धावपिनविशिष्टस्वप्रकाशत्वसिद्धिरित्यतआह ॥ अवेद्यत्वेति ॥ विशेष्यभागानंतर्भावेनैवस्वप्रकाशत्वलक्षणकरणा ज्ञासिद्धिरितिभावः ॥ उक्तन्यायेनेति ॥ ब्रह्मणोपिस्वाकारवृत्तिप्रतिबिंबितचिद्रूपफलव्याप्यत्वेनतदभावरूपस्वप्रकाशत्वसा धनेबाधादित्यर्थः । तृतीयपक्षे धर्मत्वानुमाने चिद्विषयत्वरूपवेद्यत्वस्यपक्षत्वेपूर्वत्रचिदविषयत्वरूपावेद्यत्वाख्यस्वप्रकाशत्वंसा ध्यंस्यात् तत्रपृच्छामः किंवृत्तिप्रतिफलितचिदविषयत्वंविवक्षितं उतशुद्धचिदविषयत्वंवा। आद्येबाधइत्याह॥ उक्तरीत्येति ॥ स्वाकारवृत्तिप्रतिफलितेत्यर्थः । नद्वितीयः घटादावसाधारण्यादित्याह ॥ शुद्धेति ॥ प्रतियोगीति ॥ धर्मत्वानुमानेऽस्वप्र

अवेद्यत्वमात्रंचस्वप्रकाशत्वमितिवाच्यं । उक्तन्यायेनफलव्याप्येब्रह्मणितदभावस्यबा धात् । नतृतीयः । उक्तरीत्याप्रतिफलितचिद्विषयत्वस्यब्रह्मण्यपिभावात् । शुद्धचिद्वि षयत्वस्यचघटादावप्यभावेनासाधारण्यात् । नचतुर्थः प्रतियोग्यप्रसिद्ध्याश्रयासिद्धेः ।

काशत्वस्यपक्षत्वेस्वप्रकाशत्वरूपप्रतियोगिनएवाप्रसिद्ध्याऽस्वप्रकाशत्वस्यापिज्ञातुमशक्यत्वेनाश्रयाज्ञानासिद्धेरित्यर्थः । किंच यदिस्वप्रकाशत्वरूपसाध्याभावरूपंअस्वप्रकाशत्वंपक्षीकृत्यपूर्वानुमानसाध्यस्यस्वप्रकाशत्वस्यप्रसिद्धिरुच्यते तर्ह्यप्रसिद्धविशेष णमात्रोच्छेदरूपातिप्रसंगःस्यात् भूःशशविषाणोल्लिखिताभूत्वादित्यत्रापिअशशविषाणोल्लिखितत्वंकिंचिन्निष्ठात्यंताभावप्रतियो गि धर्मत्वादित्येवंपूर्वानुमानसाध्याभावंपक्षीकृत्यसाधयितुंशक्यत्वेनशशविषाणोल्लिखितत्वप्रसिद्धेरपिसामान्यतोवक्तुंशक्य

SGDF
Sri Gargeshwari Digital Foundation

त्वादित्याह ॥ सर्वत्रेति ॥ अनिर्वाच्यत्वभंगइति ॥ शब्दप्रतिपाद्यत्वरूपेधर्मेकेवलान्वयिनिकिंचिन्निष्ठात्यंताभावप्रतियोगित्वरूपसाध्याभावाद्व्यभिचारः । नचात्माश्रयप्रसंगेनस्ववृत्तित्वाभावेनसाध्यसद्भावान्नव्यभिचारइतिवाच्यं । मिथ्यात्वदृश्यत्वादिवच्छब्दप्रतिपाद्यत्वादेरप्यनन्यथासिद्धधीबलेनस्ववृत्तित्वस्यनिर्वाच्यत्वभंगेउक्तत्वादित्यर्थः । अत्यंताभावप्रतियोगित्वरूपेधर्मेव्यभिचारंचाह ॥ किंचेति ॥ तत्रेति ॥ तर्ह्यत्यंताभावप्रतियोगित्वस्यकेवलान्वयित्वप्राप्त्याऽत्यंताभावप्रतियोगित्वरूपधर्मेसाध्याभावेनधर्मत्वहेतोस्तत्रैवव्यभिचारइत्यर्थः ॥ यतइति ॥ यस्मिन्धर्मेऽत्यंताभावप्रतियोगित्वंनास्ति तस्यैवकेवलान्व

सर्वत्रैवंसाध्याभावंपक्षीकृत्यसुसाधत्वेनातिप्रसंगाच्च । किंचधर्मत्वस्यानिर्वाच्यत्वभंगेउक्तरीत्याशब्दप्रतिपाद्यत्वादिषुकेवलान्वयिधर्मेषुव्यभिचारः । किंचात्यंताभावप्रतियोगित्वंकुतश्चिन्नव्यावर्ततेचेत्तत्रैवव्यभिचारः । व्यावर्ततेचेद्यतोव्यावर्ततेतत्रैवधर्मिव्यभिचारः । अपिच घटादाविवस्वप्रकाशत्वविरोधिनोव्यावहारिकस्यवेद्यत्वस्यसत्वेपितदत्यंताभावसंभवेनार्थांतरं ।

यित्वप्राप्त्याऽत्यंताभावप्रतियोगित्वरूपएवधर्मेसाध्याभावेनधर्मत्वहेतोस्तत्रैवव्यभिचारइत्यर्थः ॥ धर्मइति ॥ ननुयतोऽत्यंताभावप्रतियोगित्वंव्यावर्तते । तस्यदैवात्धर्मित्वेतत्रधर्मित्वेधर्मत्वहेतोर्नव्यभिचारइतिचेन्न । धर्मधर्मिभावस्यकामगामित्वेनधर्मिणोपिधर्मत्वादितिभावः । स्वप्रकाशत्वानुमानेऽर्थांतरंचाह ॥ अपिचेति ॥ ब्रह्मणोवेद्यत्वात्यंताभावरूपस्वप्रकाशत्वसाधनेऽर्थांतरता तथाहि त्वन्मतेव्यावहारिकंवेद्यत्वंब्रह्मणितावदस्ति तादृशंचवेद्यत्वंअवेद्यत्वरूपस्वप्रकाशत्वविरोधितयाघटादौदृष्टं

॥ ५१५ ॥

धर्मे

तथाविधवेद्यत्वस्यब्रह्मणिसत्त्वेपिपुनस्तत्रवेद्यत्वात्यंताभावरूपस्वप्रकाशत्वसाधनेतस्यपारिभाषिकत्वप्राप्त्यातस्याऽस्माकमपीष्टत्वेनार्थांतरतेत्यर्थः ॥ धर्मीति ॥ ब्रह्मणिचवेद्यत्वस्यसत्वेपितस्यव्यावहारिकतयाधर्मिसमसत्ताकत्वाभावान्नतस्यस्वप्रकाशत्वविरोधित्वं घटादौधर्मिसमसत्ताकवेद्यत्वस्यैवस्वप्रकाशत्वविरोधितयादृष्टत्वात् । अतोनार्थांतरमित्यर्थः ॥ तन्निरासेति ॥ ब्रह्मणिवृत्तिव्याप्यत्वफलव्याप्यत्वयोःसद्भावेतयोरवेद्यत्वरूपस्वप्रकाशत्वविरोधात्तन्निरासःक्रियते सनस्यात् तत्रापिघटादाविवधर्मिसमसत्ताकवृत्तिव्याप्यत्वादेरेवस्वप्रकाशत्वविरोधित्वाद्ब्रह्मणिचव्यावहारिकतयाधर्मिसमसत्ताकवृत्तिव्याप्यत्वादेरभावेनस्वप्र

नचघटादौधर्मिसमसत्ताकमेववेद्यत्वंतद्विरोधि तथात्वेआत्मनिवृत्तिव्याप्यत्ववत्फलव्याप्यत्वस्यव्यावहारिकत्वेपिस्वप्रकाशत्वोपपत्त्यातन्निरासवैयर्थ्यात् । अतएवायंघटःएतद्घटान्यत्वेसतिवेद्यत्वानधिकरणान्यःपदार्थत्वादित्यादि

काशत्वोपपत्तेस्तन्निरासस्यव्यर्थत्वादित्यर्थः । ततश्चधर्मिसमसत्ताकत्वविशेषणमदत्वा व्यावहारिकस्यापिवृत्तिव्याप्यत्वादेःस्वप्रकाशत्वविरोधित्वंवक्तव्यं तथाचप्रकृतेपिव्यावहारिकस्यवेद्यत्वस्यापिस्वप्रकाशत्वविरोधित्वात्तत्सत्त्वेपितदत्यंताभावरूपस्वप्रकाशत्वसाधनेतस्यपारिभाषिकत्वापत्त्याऽर्थांतरतेतिभावः । सामान्यतोऽवेद्यत्वरूपस्वप्रकाशत्वप्रसिद्धिसाधकानुमानमाशंक्यनिराकरोति ॥ अतएवेति ॥ अयंघटइति ॥ अत्रसत्यंतंवेद्यत्वविशेषणं तथाचैतद्घटान्यत्वविशिष्टवेद्यत्वेत्यर्थः । अत्रपटोदृष्टांतः एवंसतिवेद्यत्वाधिकरणस्यापिपक्षीभूतघटस्यएतद्घटान्यत्वविशिष्टवेद्यत्वानधिकरणत्वेनतदन्यत्वमादायदृष्टांतेपटेसाध्यप्रसिद्धिः

SGPF Foundation

पक्षेतुनैवंसाध्यपर्यवसानं । एतद्धटान्यत्वविशिष्टवेद्यत्वानधिकरणंपक्षीभूतोघटएव तत्रतदन्यत्वस्यबाधात् अतएतद्धटान्यत्व विशिष्टवेद्यत्वानधिकरणंकिंचिदस्ति तदन्यत्वमादायपक्षेसाध्यपर्यवसानं । एवंचयदेतद्धटान्यत्वविशिष्टंवेद्यत्वानधिकरणंकिंचित् तदेवावेद्यरूपस्वप्रकाशमायास्यतीतिद्रष्टव्यं अत्रवेद्यत्वानधिकरणान्यइत्येवकृतेवेद्यत्वाधिकरणत्वस्यकेवलान्वयित्वेनवेद्यत्वानधिकरणत्वस्याप्रसिद्धत्वेनतदन्यत्वरूपसाध्यमप्रसिद्धमित्यतःसत्यंतं । तथाचैतद्धटान्यत्वविशिष्टवेद्यत्वानधिकरणंचपक्षीभूतोघटएवप्रसिद्धः तदन्यत्वरूपसाध्यमपिपटेप्रसिद्धमितिभावः ॥ महाविद्ययेति ॥ नन्वस्यानुमानस्यमहाविद्यासाधक

महाविद्ययासाध्यप्रसिद्धिरितिनिरस्तं । वेद्यत्वानिरुक्तेः ।
अयंघटःएतद्धटत्वेसतिवेद्यत्वानधिकरणान्यत्वानधिकरणं ।

त्वाभावान्महाविद्ययासाध्यप्रसिद्धिरित्येतदसंबंधमितिचेन्न । महाविद्यासाधकानुमानसदृशानुमानेनेत्यर्थः । विशिष्टव्यतिरेक्यनुमानेनेतियावत् । मायिमतेमहाविद्येतिविशिष्टव्यतिरेकिणःसंकेतइत्यप्याहुः । क्वचित्तुइत्यादिनासाध्यप्रसिद्धिरित्येवपाठः । अतएवेत्युक्तंविशदयति ॥ वेद्यत्वेति ॥ एतद्धटत्वेसतीति ॥ एतद्धटत्वविशिष्टेत्यर्थः । अत्रापिपटोदृष्टांतः एतद्विशेषणाभावेऽप्रसिद्धिः वेद्यत्वस्यकेवलान्वयित्वेनतदनधिकरणत्वस्यैवाप्रसिद्ध्यातद्धटितसाध्यस्याप्रसिद्धत्वात् तथापटेव्यभिचारश्चस्यात् तत्र पदार्थत्वसद्भावेपितस्यवेद्यत्वेनवेद्यत्वानधिकरणान्यत्वघटिततयातत्वानधिकरणत्वरूपसाध्याभावात् । अतएतद्धटत्वेसतीत्युक्तं ।

SGDF
Sri Gargeshwari Digital Foundation

एवंचैतद्धटत्वविशिष्टवेद्यत्वानधिकरणंपटएवेतिनसाध्याप्रसिद्धिः नवाव्यभिचारः एतद्धटत्वविशिष्टवेद्यत्वानधिकरणेपटेतदन्यत्वाभावेनतदन्यत्वानधिकरणत्वरूपसाध्यस्यापिसत्वात् । अतोनव्यभिचारः ॥ प्रकरणसमेति ॥ वेद्यत्वानधिकरणान्यत्वरूपसाध्याभावस्यापि तेनैवहेतुनासाधयितुंशक्यत्वादित्यर्थः । अत्रकेचित् पूर्वानुमानसाध्याभावस्यैवात्रसाधनीयत्वेनतदर्थंएतद्धटान्यत्वेसतीतिपाठंवदंति तन्न तथात्वेपुनःपटएवव्यभिचारापत्तेः उक्तरीत्याएतद्धटान्यत्वविशिष्टवेद्यत्वानधिकरणंपक्षीभूतोघटएव। तदन्यत्वस्यैवपटेसद्भावेनतदन्यत्वानधिकरणत्वाभावादित्यवधेयं। स्वरूपासिद्धत्वमेवदर्शयति॥ अखंडेति॥ अनुभूतिरूपशु

पदार्थत्वादितिप्रकरणसमत्वाच्च । तस्मादप्रसिद्धविशेषणत्वंदुर्वारं । त्वदभिमतंजातिरूपमनुभूतित्वंशुद्धचैतन्येऽसिद्धंच । अखंडार्थभंगेउक्तरीत्याजातेर्धर्मिसमसत्ताकभेदवद्व्यक्तिसापेक्षत्वात् ।

द्धब्रह्मव्यक्तेरेकत्वेनतत्रानुभूतित्वस्याजातित्वात् । नचात्रापिघटाद्यवच्छिन्नचैतन्यरूपज्ञानान्यनेकानिसंतीतिवाच्यं। जातेर्धर्मिसमसत्ताकभेदवद्व्यक्तिसापेक्षत्वनियमात् अन्यथाआकाशत्वस्यापिजातित्वापत्तेः औपाधिकाकाशरूपव्यक्तीनांबहूनांतत्रापिसत्वात् अतोधर्मिसमसत्ताकएवव्यक्तिभेदोवाच्यः तथाचाकाशत्वंनजातिः औपाधिकाकाशानांधर्मिभूतस्वाभाविकाकाशसमसत्ताकव्यक्तिभेदवत्त्वाभावात् एवंप्रकृतेप्यवच्छिन्नचैतन्यव्यक्तिभेदस्यौपाधिकत्वेनानुभूतित्वजातिधर्मिभूतशुद्धब्रह्मसमसत्ताकत्वाभावात् । अतोनाऽनुभूतित्वंजातिः । एवंचजातित्वेनत्वदभिमतस्यानुभूतित्वहेतोःपक्षीभूतेऽनुभूतिशब्दाभिधेयेशुद्धब्रह्मण्यभावात्स्व

SGDF
Sri Gargeshwari Digital Foundation

रूपासिद्धिरितिभावः ॥ अनुभाव्यादीति ॥ विषयाद्यभावादित्यर्थः । आत्मरूपज्ञानस्यविषयाद्यभावाज्ज्ञानत्वमेवनास्तिघट
वदित्यर्थः ॥ विपक्षादव्यावृत्तमिति ॥ अनैकांतिकमित्यर्थः । तस्य अनुभूतित्वहेतोः । अनात्मनि वृत्तिरूपज्ञाने ॥ तत्रैवे
ति ॥ पक्षबहिर्भूतेपरोक्षानुभवइत्यर्थः । ननुनव्यभिचारः परोक्षज्ञानभिन्नत्वेसतीतिविशेषणात् यद्वाअनुभूतित्वादित्यस्यचिद्रू
पानुभवत्वादित्यर्थस्यविवक्षितत्वादित्यतआह ॥ तन्निरासार्थमिति ॥ आद्येपरोक्षज्ञानेविद्यमानमनुभूतित्वंयथातत्रनस्वप्रका

जडत्वभंगेउक्तरीत्याऽनुभाव्याद्यभावेऽनुभूतित्वासंभवाच्च । विपक्षादव्यावृत्तंचानुभूतित्वं। तस्या
नुभूतिशब्दवाच्येऽनात्मनिसत्वात् । किंचवृत्तिरूपस्यपरोक्षानुभवस्यपक्षत्वेबाधः । अपरोक्षस्यच
पक्षत्वेतत्रैवव्यभिचारः । तन्निरासार्थेहेतुविशेषणेनुभूतिशब्देनचिद्रूपज्ञानोक्तौचाप्रयोजकत्वं ।
अपिचदुःखादिवत्स्मृतिवत्परोक्षानुभववच्चापरोक्षानुभवमप्यपरोक्षतोजानामि मामहंजानामि
स्वात्मानंजानामीत्याऽऽत्मनोवेद्यत्वग्राहिणाप्रत्यक्षेण "तदात्मानमेवावेदि" त्यादिश्रुत्याचबाधः ।

शत्वंसाधयति एवंपक्षेपिनसाधयेत् द्वितीयेतुहेतुरस्तुसाध्यंमास्त्वित्यप्रयोजकतेत्यर्थः । प्रत्यक्षश्रुतिभ्यांबाधंचाह ॥अपिचेति॥
दुःखादिवदित्यादिवतित्रयंच्छलार्थं दुःखादेरिवस्मृतेरिवपरोक्षानुभवस्येवचआत्मनोपीत्यन्वयः । प्रत्यक्षानुव्यवसायाकारप्रदर्श
नं ॥ अपरोक्षेत्यादि ॥ ननुनप्रत्यक्षबाधः अपरोक्षानुभवंजानामीतिप्रत्यक्षेणापरोक्षानुभवस्यापरोक्षवृत्तिवेद्यत्वमेवविषयीक्रि
यते नतुज्ञानविषयत्वं वृत्तेरज्ञानत्वात् अथवाव्यवहारविषयत्वमात्रमेवप्रतीयते नज्ञानवेद्यत्वं अतोनावेद्यत्वरूपस्वप्रकाशत्वसा

धनेतद्बाधइत्याशंक्यनिराकरोति ॥ नचात्रेति ॥ ज्ञप्तीति ॥ ज्ञाधातोर्ज्ञप्त्यर्थत्वादितिभावः । दृष्टांतग्रहणाभिप्रायमाह ॥
दुःखमिति ॥ यदिजानामीत्यत्रापरोक्षानुभवस्यापरोक्षवृत्तिवेद्यत्वमपरोक्षव्यवहारविषयत्वंवाप्रतीयतइत्यंगीक्रियते तर्हिदुःखं
जानामीत्यत्रापरोक्षवृत्तिविषयत्वमपरोक्षव्यवहारविषयत्वंवादुखादेःप्रतीयते नतुसाक्ष्यनुभवविषयत्वमित्यपिस्यादित्यर्थः । नचे
ष्टापत्तिः वृत्तिविलंबेकदाचिद्दुःखज्ञानविलंबापातादितिभावः । अनुभूतेरनुभवावेद्यत्वरूपस्वप्रकाशत्वसाधकानुमानंअनुभववे

नचात्रापरोक्षवृत्तिवेद्यत्वंवाऽपरोक्षव्यवहारविषयत्वंवाभातीतियुक्तं । जानामीतिज्ञप्तिविषयत्व
स्यैवानुभवात् । दुःखंजानामीत्यादावपितथात्वापाताच्च । अनुभूतिःस्फुरणविषयः । अपरोक्ष
व्यवहारविषयत्वात् घटवत् । चैत्रीयानुभूतिः चैत्रापरोक्षव्यवहारयोग्यापरोक्षज्ञप्तिविषयःचैत्रा
परोक्षव्यवहारविषयत्वात् घटवत् । चैत्रीयानुभूतिः चैत्रापरोक्षव्यवहारयोग्यापरोक्षज्ञप्त्यविष
योनावतिष्ठतेचैत्रंप्रत्यप्रकाशमानत्वरहितत्वात् चैत्रेच्छावदितिसत्प्रतिपक्षत्वंच । अप्रयोजकत्वंच ।

द्यत्वरूपास्वप्रकाशत्वसाधकानुमानेनसत्प्रतिपक्षितमित्याह ॥ अनुभूतिरिति ॥ स्फुरणं अपरोक्षानुभवः ॥ व्यवहारयोग्ये
ति ॥ व्यवहारजननयोग्येत्यर्थः । क्वचित्तथैवपाठः । पूर्वानुमानयोःकदाचिदपरोक्षानुभवविषयत्वस्यापिसाध्यार्थत्वोपपत्तेःतृ
तीयानुमानं । अत्रनन्द्वयेनसदातद्विषयत्वंलभ्यतइतिध्येयं । अनुमानद्वयेपि अपरोक्षव्यवहारयोग्येतिविशेषणंस्वरूपकथनं ।

SGDF Foundation

नचांत्यानुमानेसाध्यावैशिष्ट्यं । अपरोक्षव्यवहारजननयोग्यत्वविशिष्टस्यसाध्यत्वादितिज्ञेयं । ननुनाप्रयोजकता अनुकूलतर्क सद्भावात् तथाहि अवेद्यत्वरूपस्वप्रकाशत्वानंगीकारेऽनुभूतिरूपस्यात्मनोवेद्यत्वमुक्तंस्यात् तत्रपरवेद्यत्वमभिप्रेतं स्ववेद्यत्वंवा नाद्यइत्याह ॥ नन्वनुभूतिरूपस्येति ॥ अनवस्थेति ॥ अनुभवावेदकस्यपरस्यानुभवस्यापिपुनरन्येनवेद्यत्वेऽनवस्थास्यादि त्यर्थः । दूषणांतरंचाह ॥ परेति ॥ आत्मनि विषये । आदिपदेनविपर्ययः ॥ स्यादिति ॥ अनुभूतिरूपात्मनिश्चायकानुभ वाभावादितिभावः । इष्टापत्तिपरिहारायाह ॥ नचेति ॥ नहीत्यर्थः । नद्वितीयः क्रियायाःकर्तृत्वविरोधादित्याह ॥ स्ववेद्य

नन्वनुभूतिरूपस्यात्मनःपरवेद्यत्वेऽनवस्थास्यात् पराभावदशायामात्मनिसं
शयादिश्चस्यात्। नचात्मनिअहमनहंवेतिकश्चित्संदिग्धे। नापिनाहमेवेतिवि
पर्यस्यति। स्ववेद्यत्वंतुविरुद्धं तस्मान्नाप्रयोजकतेतिचेन्न। त्वन्मतेसंदेहाद्यविष
यस्याहमर्थस्यानात्मत्वात्। तदन्यस्मिंश्चशब्दैकगम्यात्मनिसंदेहादेःसत्वात्।

त्वंत्विति ॥ तत्राद्यपक्षंतावदंगीकुर्मः नचानवस्था बुभुत्साभावेनकस्यचिदनुभवस्यस्ववेद्यत्वांगीकारेणवातत्परिहारसंभवात् यदत्रोक्तंपराभावदशायामात्मनिसंशयादिःस्यादिति तत्रेष्टापत्तिः । नन्वहमनहंवेतिसंशयादिरात्मनिनदृष्टइतिचेत्तत्राह ॥ त्वन्मतइति ॥ तथाचात्मनिसंशयाद्यभावोपपादनायास्योदाहरणमयुक्तमितिभावः । अहमर्थात्मनितुसंशयादिकमस्त्येवेत्याह ॥ तदिति ॥ शब्देति ॥ उपदेशाद्यभावदशायांसंदेहोस्त्येवेत्यर्थः । तथाचयत्रसंदेहादिकंनास्तिसअहमर्थस्त्वन्मतेआत्मभिन्न

SGDF
Sri Gargeshwari Digital Foundation

एव । यत्रत्वात्मनिसंदेहःसनत्वन्मते । अतइष्टापत्तिरित्यर्थः । एवंप्रौढवादेनोक्त्वाद्वितीयपक्षमंगीकृत्याह ॥ किंचेति ॥स्वस्य अनुभूतिरूपसाक्षात्कारस्य । तथाचसाक्षात्कारेविषयस्यकारणत्वादात्मसाक्षात्कारस्यस्वविषयकत्वेस्वस्यस्वजन्यत्वप्राप्त्यात्माश्रये णासंभवादित्यर्थः ॥ स्वजनकेति ॥ साक्षात्कारजनकेत्यर्थः । स्वस्यस्वविषयकत्वेस्वस्यस्वजनकेंद्रियसंनिकर्षार्थंस्वस्यस्वापेक्ष यापूर्ववृत्तित्वंवाच्यं तच्चात्माश्रयेणायुक्तमित्यर्थः ॥ विषयेति ॥ विषयविषयिभावस्यसंबंधस्यसंयोगादिवद्विष्ठत्वात् । आत्म

किंचस्ववेद्यत्वंकिमितिविरुद्धं किंसाक्षात्कारस्यविषयजन्यत्वात्स्वस्यचस्वजन्यत्वा संभवात् किंवासाक्षात्कारेस्वजनकेंद्रियसंनिकृष्टस्यैवविषयत्वात्स्वजनकसंनिक र्षकालेचस्वस्याभावात् यद्वाविषयविषयिभावसंबंधस्योभयनिष्ठत्वात् अथवा ज्ञानस्यैवज्ञेयत्वेविरुद्धस्यक्रियायाएवकर्मत्वस्यापातात् । आहोस्वित्विषयिण एवविषयत्वेकर्तुरेवकर्मत्वापातात् । तस्यचान्यत्वगर्भितस्यैकस्मिन्नसंभवात् ।

नःस्वविषयकत्वेविषयविषयिभावरूपद्विष्ठसंबंधाभावादित्यर्थः । ज्ञेयत्वे स्ववेद्यत्वे ॥ विरुद्धस्येति ॥ क्रियात्वकर्मत्वयोःसहा नवस्थितत्वेनविरुद्धत्वंद्रष्टव्यं। विषयिणः विषयीकर्तुर्ज्ञानस्य विषयत्वेस्ववेद्यत्वे॥तस्यचेति॥परसमवेतक्रियाजन्यफलशालित्वरू पस्यकर्मत्वस्यकर्तृत्वस्यचैकस्मिन्ज्ञानेऽसंभवादित्यर्थः ॥ अन्यत्वेति ॥ परशब्दस्यस्वभिन्नार्थकत्वात्तस्यचात्माश्रयप्रसंगेनकर्त्र

SGDF
Sri Gargeshwari Digital Foundation

न्यत्वेतात्पर्यादित्यर्थः । आत्मस्वरूपज्ञानस्य चैतन्यरूपज्ञानस्य ॥ ईश्वरज्ञानवदिति ॥ तार्किकरीत्याज्ञाननित्यत्वेसंभाव
नायोक्तं ॥ नित्यत्वेनेति ॥ तथाचविषयजन्यत्वस्यस्वजनकसंनिकर्षापेक्षायाश्चाभावादित्यर्थः ॥ अन्यथेति ॥ नित्यत्वेनावि
रोधमनंगीकृत्यसाक्षात्कारस्यविषयजन्यत्वादिनास्वविषयकत्वनिराकरणेसाक्षात्कारस्यस्वविषयकत्वाभावेपिव्यवहारहेतुत्वमंगी
कृतं तदपिनस्यात् व्यवहारहेतुसाक्षात्कारस्यापिव्यवहारविषयजन्यत्वनियमेनस्वव्यवहारहेतुसाक्षात्कारस्यापिस्वव्यवहारविष
यजन्यत्वावश्यंभावेनस्वजन्यत्वंवक्तव्यं तच्चात्माश्रयेणविरुद्धमित्यादिदोषःसमइत्यर्थः ॥ अतीतेत्यादि ॥ अतीतादित्रयवि

नाद्यद्वितीयौ स्वप्रकाशस्यात्मस्वरूपज्ञानस्येश्वरज्ञानवन्नित्यत्वेनाविरोधात् । अन्य
थास्वव्यवहारहेतुसाक्षात्कारस्यापिस्वजन्यत्वादिनियमात्तवापितुल्योदोषः । न
तृतीयः अतीतारोपितात्यंतासतांज्ञानदर्शनेनतस्योभयनिष्ठत्वाभावात् । नचतु
र्थः कृतिविशेषस्यकार्यत्ववत्इच्छाविशेषस्यचेष्टत्ववत्व्यवहृतेश्चव्यवहार्यत्ववत्

षयकज्ञानादेरित्यर्थः । स्वमतेआरोपितस्यात्यंतासत्वेपिपररीत्यापृथगुक्तिः ॥ उभयेति ॥ ज्ञानकालेऽतीतादिरूपविषयाभावे
पिस्थितस्यविषयविषयिभावस्यद्विष्ठत्वासंभवादित्यर्थः । क्रियात्वकर्मत्वयोःसमावेशसद्भावान्नविरोधइत्याह ॥ कृतीति ॥ य
थापुण्यसाधनीभूतकाशीनिवासरूपोयत्नविशेषोगमनादिप्रयत्नसाध्यइत्येवंकृतिविशेषस्यापिकार्यत्वंकृतिविषयत्वरूपकर्मत्वमस्ति ॥ ५१९ ॥
तद्वदित्यर्थः ॥ इच्छेति ॥ अस्माकंधर्ममार्गएवेच्छाभूयादितीच्छाविशेषस्यापीच्छाविषयत्वरूपेष्टत्ववदित्यर्थः । व्यवहृते र्व्य

वहारस्य । व्यवहार्यत्ववत् व्यवहृतिशब्देनेतिशेषः । अभिधायाः वाचकत्वरूपशक्तेः ॥ स्वेति ॥ अभिधाशब्देनेत्यर्थः । वाच
कस्यापिवाच्यत्ववदितियावत् ॥ व्याप्तिज्ञानस्येति ॥ तस्यापिदृश्यत्वेनस्वविषयकत्वात् । अन्यथासर्वोपसंहारवतीव्याप्तिर्न
सिद्ध्येदित्यर्थः ॥ मिथ्यात्वेति ॥ अन्यथाऽनुमितिमिथ्यात्वालाभेनब्रह्मातिरिक्तसर्वमिथ्यात्वंनसिध्येदितिभावः ॥ उपपत्ते
रिति ॥ एकक्रियायाअपिकर्मत्वोपपत्तेर्विरोधासिद्धिरितिभावः ॥ अज्ञस्यैवेति ॥ अज्ञानंविषयीकर्तुरित्यर्थः । अज्ञेयत्वस्य

अभिधेतिशब्दगतायाअभिधायाःस्वाभिधेयत्ववत्वृत्तिरूपस्ययदृश्यंतन्मिथ्येतिव्याप्तिज्ञानस्यमि
थ्यात्वानुमितेश्चस्वविषयत्ववच्चोपपत्तेः । नपंचमः अज्ञस्यैवब्रह्मणोज्ञेयत्वस्यविषयिण्याएवमिथ्या
त्वानुमितेःस्वविषयकत्वस्यअभिधायकस्यैवशब्दशब्दस्यस्वाभिधेयत्वस्यचदर्शनेनमामहंजानामीत्य
नुभवेन “तदात्मानमेवावेदि” तिश्रुत्याचकर्तुरेवकर्मत्वासिद्धौपरसमवेतक्रियाफलशालित्वरूपा
न्यत्वगर्भितस्वकपोलकल्पितलक्षणत्यागेनक्रियाविषयत्वादिरूपस्यान्यस्यैवलक्षणस्यकल्प्यत्वात् ।

अज्ञानकर्मत्वस्य । “आश्रयत्वविषयत्वभागिनी” तिवचनादितिभावः । विषयिण्याः मिथ्यात्वंविषयीकुर्वंत्याः ॥ शब्दशब्द
स्येति ॥ शब्दइतिशब्दस्येत्यर्थः । ननुकर्तुरेवकर्मत्वेकर्त्रन्यत्वगर्भितकर्मलक्षणविरोधइत्यतआह ॥ परेति ॥ तर्हिकिंकर्मलक्ष
णमित्यतआह ॥ क्रियेति ॥ कर्तुरपिज्ञानरूपक्रियाविषयत्वसंभवेनेदंकर्तुःकर्मत्वोक्त्यविरोधीतिध्येयं । नचासनादिक्रियावि
षयेआधारेपिकर्मत्वप्रसंगइतिवाच्यं । आधारस्याविषयत्वात् । अन्यथास्थाल्यादेरपिपाकविषयत्वापातादितिद्रष्टव्यं । यदुक्तं

SGDF

क्रियात्वकर्मत्वयोरविरोधोपपादनायकृतिविशेषस्यकार्यत्ववदित्यादितत्रशंकते ॥ नन्विति । कृत्याद्यन्तरमिति ॥ स्वभिन्नकृ
तीच्छाविषयइत्यर्थः । एवंचक्रियात्वकर्मत्वयोरेकत्रैवसमावेशेनेदमुदाहरणमितिभावः । परमुखेनैवोत्तरंवाचयितुंप्रतिवंदींगृह्णा
ति ॥ गत्यादाविति ॥ गत्याद्यंतरेति ॥ स्वभिन्नगत्याद्यंतरेत्यर्थः । यदुक्तंकृत्यादिःकृत्याद्यंतरंप्रत्येवविषयइति तन्नयुक्तं ।
लोकेगत्यादिक्रियायाःस्वविषयत्वादर्शनात् स्वभिन्नस्वसजातीयगत्याद्यंतरविषयत्वस्याप्यदर्शनात् । कृत्यादेस्त्वयोच्यमानंस्व

ननुकृत्यादिःकृत्याद्यंतरंप्रत्येवविषयःनतुस्वंप्रतीतिचेन्न । गत्यादौगत्याद्यंतरविषयत्वस्याप्यदर्शना
त् । यदिचवस्तूनांविचित्रस्वभावत्वात्गत्यादावदृष्टमपिकृत्यादौस्वसजातीयविषयत्वं तर्हितत
एवानुभूतेःस्वविषयत्वमप्यस्तु । अन्यथास्वस्यस्वस्मिन्व्यवहारजनकत्वमपिनस्यादित्युक्तं । व्याप्ति
ज्ञानमिथ्यात्वानुमित्यादेश्चस्वाविषयत्वेसर्वोपसंहारवतीव्याप्तिरनुमितिमिथ्यात्वंचनसिध्येत् ।

भिन्नकृत्याद्यंतरविषयत्वमपिनस्यादित्यर्थः । तत्रोत्तरमाशंकते ॥ यदिचेति ॥ विचित्रेति ॥ नहिसर्वैर्भावैरेकविधैर्भाव्यमि
तिनियमोस्तीत्यर्थः ॥ सजातीयेति ॥ कृत्याद्यंतरेत्यर्थः । अनुभूतेः अनुभूतिरूपक्रियायाः । स्वविषयत्वं स्वकर्मकत्वं । अ
न्यथा स्वविषयकत्वाभावे । व्यवहारजनकत्वं त्वदंगीकृतमित्यर्थः ॥ इत्युक्तमिति ॥ तद्व्यवहारजनकत्वमस्तीतिचेन्न । तत्र
स्वविषयकत्वस्यैवाभावात् । कुतइतिचेत्तत्राह ॥ व्याप्तिज्ञानेति ॥ नन्वेतदयुक्तं । यथाहि मन्मतेचितश्चिदविषयत्वेपिनत

SGDF Sri Gargeshwari Digital Foundation

त्सिद्ध्यभावः वृत्तिव्याप्यत्वमात्रेणतदुपपत्तेः एवंव्याप्तिज्ञानादेःस्वविषयकत्वाभावेपिसर्वोपसंहारवतीव्याप्तिरुपायांतरेणसिद्धा भविष्यतीतिचेत्तत्राह ॥ नहीति ॥ एवंव्याप्तिज्ञानादेःस्वविषयकत्वाभावेसर्वोपसंहारवद्व्याप्त्याद्यसिद्धिरूपंदूषणमनादृत्यस्वाविषयकस्यापिव्याप्तिज्ञानादेःचिद्वत्स्वस्मिन्व्यवहारहेतुत्वमात्रमेवांगीक्रियते नस्वविषयकत्वमित्याशंक्यनिषेधति ॥ नचेति ॥ तदविषयकस्यापितद्व्यवहारहेतुत्वेऽतिप्रसंगमाह ॥ घटादीति ॥ तस्मि न्घटे । तद्धेतुत्वं व्यवहारहेतुत्वं । तद्विषयकत्वं घटविषयकत्वं । तथाचघटाविषयकस्यैवघटज्ञानस्यघटव्यवहारहेतुत्वमस्त्वित्यतिप्रसंगइत्यर्थः । किंचयद्दृश्यंतन्मिथ्येतिव्याप्तिज्ञा

नहिचितश्चिदविषयत्वेपिवृत्तिव्याप्यत्वमात्रेणसिद्ध्यादिवत्व्याप्तिविषयवृत्तेःस्वाविषयत्वेपिसर्वोपसंहारयुक्तव्याप्तिसिद्धावन्यउपायोस्ति । नचव्याप्तिज्ञानादेःस्वस्मिन्स्वव्यवहारहेतुत्वमेव नतुस्वविषयत्वमितिवाच्यं । घटादिज्ञानस्यापितस्मिंस्तद्धेतुत्वमेव नतुतद्विषयत्वमित्यापातात् । व्याप्तिज्ञानादेरपिव्याप्यताद्यवच्छेदकावच्छिन्नत्वाच्च ।

नस्यदृश्यत्वरूपव्याप्यतावच्छेदकावच्छिन्नविषयकत्वात्व्याप्तिज्ञानस्यापिदृश्यत्वावच्छिन्नस्वविषयकत्वमेव अन्यथाव्याप्तिज्ञाने दृश्यत्वाभावेऽप्रामाणिकत्वापत्त्यातदसिद्धिप्रसंगात् । एवंमिथ्यात्वानुमितेरपिव्यापकतावच्छेदकावच्छिन्नविषयकत्वादनुमितेरपिमिथ्यात्वरूपव्यापकतावच्छेदकावच्छिन्नत्वात्स्वविषयकत्वमेव अन्यथाअनुमितेःस्वस्मिन्मिथ्यात्वविषयकत्वाभावेब्रह्मव्यतिरिक्तसर्वमिथ्यात्वसाधकत्वंनस्यादित्याह ॥ व्याप्तिज्ञानादेरपीति ॥ यद्दृश्यंतन्मिथ्येतिज्ञानस्यस्वविषयत्वेऽनुभवंचसाधक

SGDF
Sri Gargeshwari Digital Foundation

माह ॥ घटइति ॥ अनुभवाद नुव्यवसायात् । संगृह्णाति ॥ एवंचेति ॥ मामहंजानामीतिप्रत्यक्षेणतथा (तदात्मानमेवावेदिति) श्रुत्येतिसंबंधः । ननुज्ञप्तिरूपक्रियायांकर्तुरेवकर्मत्वांगीकारेगमनादिक्रियायामपिकर्तुरेवकर्मतास्यादित्यतोज्ञप्तिक्रियावैषम्यमाह ॥ गमनादौत्विति ॥ अन्यथा कर्तुःकर्मत्वानंगीकारे ॥ शब्देति ॥ शब्दःइममर्थमभिधत्तइत्यभिधानरूपक्रियाकर्तुरेवशब्दशब्दस्यस्ववाच्यत्वदर्शनेनकर्मत्वंदृष्टंतन्नस्यादित्यर्थः । तामेवाह ॥ अवेद्यत्वइति ॥ ब्रह्मणइतिशेषः । यद्यवेद्य

घटोज्ञातइतिवत्सर्वोपसंहारवतीव्याप्तिर्ज्ञातेत्यनुभवाच्च । एवंच "जानामिमामहमि
तितदात्मानमवेदि" ति । प्रत्यक्षेणतथाश्रुत्याज्ञप्तौकर्तुश्चकर्मता ॥ १ ॥ गमनादौत्वदृष्ट
त्वान्नकर्तुःकर्मतेष्यते ॥ अन्यथाशब्दशब्दादेःस्ववाच्यत्वादिकंकथं ॥ २ ॥ प्रतिकूलतर्क
पराहतिश्च अवेद्यत्वेऽवेद्यत्वसाधकप्रमाणवेद्यत्वावेद्यत्वाभ्यांव्याघातात् । वेदांतानां
ब्रह्मणिप्रामाण्यायोगाच्च । ब्रह्मविचारविधिवैयर्थ्याच्च । ब्रह्माज्ञाननिवृत्त्ययोगाच्च ।

त्वरूपंस्वप्रकाशत्वमंगीक्रियते तर्हितत्रपृच्छामः ब्रह्म अवेद्यत्वसाधकप्रमाणवेद्यं नवा आद्येब्रह्मणोऽवेद्यत्ववचनंव्याहतं द्वितीयेब्रह्मणोऽवेद्यत्वसाधकप्रमाणवेद्यत्वाभावेतस्यावेद्यत्वासिद्ध्याऽवेद्यत्ववचनंव्याहतमित्यर्थः ॥ प्रामाण्येति ॥ ब्रह्मणोऽवेद्यत्वेवेदांतानांब्रह्मप्रमाजनकत्वरूपंप्रामाण्यंनस्यादित्यर्थः । किंचब्रह्मणोऽवेद्यत्वेब्रह्मविचारविधिवैयर्थ्यंस्यात् ब्रह्माज्ञाननिवृत्तिश्चनस्यादित्याह ॥ ब्रह्मविचारेत्यादिना ॥ ननुब्रह्मणोऽवेद्यत्वेवेदांतानांब्रह्मणिप्रामाण्यायोगइत्युक्तमयुक्तं । तत्प्रमाजनकत्वे

नतत्प्रामाण्याभावेपितदज्ञाननिवर्तकत्वमात्रेणप्रामाण्यमुपपद्यतइत्येतदेतेनैवनिरस्तं । तद्विषयकत्वाभावेतदज्ञाननिवर्तकत्वायोगात् अतद्विषयकज्ञानेनतदज्ञाननिवृत्तौघटज्ञानेनापिनिवर्तेतेत्यतिप्रसंगस्योक्तत्वादित्याशयेनाह ॥ एतेनेति ॥ आत्मनोऽवेद्यत्वेतदसिद्धिरेवस्यादित्याह ॥ आत्मनइति ॥ ननुस्वतःसिद्धइत्यस्यस्वेनैवज्ञातइत्यर्थत्वेहिस्वविषयत्वमापाद्येत किंतुस्वविषयकत्वाभावेपिस्वजन्यव्यवहारयोग्यत्वांगीकारात्स्वतःसिद्धइत्यस्यस्वजन्यव्यवहारयोग्यइत्येवार्थोविवक्षितइतिनस्वविषयत्वा

एतेनतदज्ञाननिवर्तकत्वात्तत्रतत्प्रामाण्यमितिनिरस्तं । आत्मनोप्यसिद्धि
प्रसंगाच्च । स्वतःसिद्धइतिचेत् स्वतइतिकोर्थः किंस्वेनैवेति किंवाप्रमाणंवि
नैवेति । नाद्यः स्वविषयत्वापातात् । नचसिद्धइत्यस्यज्ञातइतिनार्थः किंतु
व्यवहारयोग्यइतीतिवाच्यं । ज्ञातत्वातिरेकेणव्यवहारयोग्यत्वाभावात् ।

पातइत्याशंक्यनिषेधति ॥ नचेति व्यवहारेति ॥ स्वजन्यव्यवहारेत्यर्थः ॥ ज्ञातत्वातिरेकेणेति ॥ ज्ञातत्वव्यतिरेकेणेत्यर्थः ॥ यथाहिवह्निव्यतिरेकेणधूमोनास्तीत्युक्तेधूमस्थितिप्रयोजकत्वंवह्नेर्लभ्यते । एवंज्ञातत्वव्यतिरेकेणव्यवहारयोग्यत्वंनास्तीतिव्यवहारयोग्यतास्थितौज्ञातत्वस्यप्रयोजकत्वेनतदभावेव्यवहारयोग्यत्वमेवनस्यादित्यर्थइतिसंप्रदायः । तथाचज्ञातत्वातिरेकेणव्यवहारयोग्यत्वाभावादित्यनेनज्ञातत्वव्यवहारयोग्यत्वयोरभेदप्रतीतिःपरास्तेतिध्येयं । किंचयदिस्वजन्यव्यवहारयोग्यत्वात्स्वतःसिद्धत्वं

SGDF
Foundation

तर्हिंमुक्त्यवस्थायांस्वतःसिद्धिर्नस्यात् तदायोग्यतारूपधर्माभावादित्याह ॥ मुक्ताविति ॥ अन्यथेति ॥ सिद्ध्युपायभूतप्र
माणेनविनैववस्तुसिद्धौ ॥ सर्वमिति ॥ वेदांतानांब्रह्मणिप्रामाण्यंब्रह्मविचारविधिर्ब्रह्माज्ञाननिवृत्तिश्चेतिसर्वमित्यर्थः ॥ स
त्वादिति ॥ चैतन्यादिरूपफलस्याप्रामाणिकत्वेनफलाव्याप्यत्वस्यघटादावपिसुवचत्वादितिभावः । वित्तेःस्ववेद्यत्वाभावेवि
त्तित्वंनस्यादित्युक्तमप्रयोजकत्वपरिहारायोपपादयति ॥ भुक्तेःसभोज्यत्ववदिति ॥ भोज्यरूपविषयसाहित्यनियमवदित्य

मुक्तौयोग्यतायाअप्यभावेनात्मनस्तदास्वतःसिद्ध्यभावापाताच्च । नांत्यः सिद्ध्युपायस्यानुप
न्यासात् । अन्यथानृशृंगादेरपिसिद्ध्यापातात् । ननुवृत्तिव्याप्यत्वात्सर्वंयुक्तं । अवेद्यत्वं
तुफलाव्याप्यत्वमितिचेन्न । एतादृशावेद्यत्वस्यघटादावपिसत्वात् । किंचात्मस्वरूपभूतवि
त्तेःस्ववेद्यत्वाभावेवित्तित्वंस्वव्यवहारहेतुत्वंस्वस्मिन्संशयादिविरोधित्वंचनस्यात् । भुक्तेः
सभोज्यत्ववत्वित्तेःसवेद्यत्वनियमा न्मुक्तौचवेद्यांतराभावात् । उक्तंचैतज्जडत्वहेतुभंगे ॥

र्थः । अस्तुसवेद्यत्वमितिचेत्तत्राह ॥ मुक्तौचेति ॥ तथाचात्मस्वरूपवित्तेःमुक्तौपराभावेनतद्विषयकत्वायोगात्स्वविषयकत्व
स्यचानंगीकाराज्ज्ञानत्वमेवनस्याद्घटवदित्यर्थः ॥ उक्तंचेति ॥ ज्ञातृज्ञेयविहीनंतेब्रह्मज्ञानात्मकंयदि ॥ भोक्तृभोज्यविहीनापि
भवेत्तर्हिंभुजिक्रियेत्युक्तमित्यर्थः ॥ आत्मस्वरूपवित्तेःस्ववेद्यत्वाभावेस्वव्यवहारहेतुत्वंस्वस्मिन्संशयादिविरोधित्वंचनस्यादित्यु

SGDF
Sri Gargeshwari Digital Foundation

क्तमुपपादयति ॥ वित्तेरिति ॥ ननुतद्विषयत्वाभावेपिस्वस्मिन्व्यवहारहेतुत्वंस्वनिर्वाहकत्वादुपपद्यतइत्यन्यथासिद्धिमाशंक्य निराकरोति ॥ नचेति ॥ स्वनिर्वाहकत्वोक्त्यैवैकस्यांक्रियायांकर्तृत्वकर्मत्वयोःप्राप्तिरित्याह ॥ स्वेति ॥ ननुस्वनिर्वाहकत्वे नप्रसिद्धोऽध्ययनविधि स्तथातत्त्वेनप्रसिद्धादीपप्रभावाऽध्येतव्यत्वविधानरूपंअंधकारनिवर्तनरूपंचस्वकार्यमन्यत्रेवस्वस्मिन्न पिकरोति तथापिनस्वकर्मकत्वं एवमिहाप्यात्मरूपवित्तेःस्वस्मिन्व्यवहारादिकर्तृत्वेनस्वनिर्वाहकत्वेपिनस्वकर्मकत्वमित्यत

वित्तेस्तद्व्यवहारादिहेतुत्वेतत्संशयादिविरोधित्वेचतद्विषयत्वस्यतंत्रत्वात् । नचस्वकर्म कत्वाभावेपिस्वनिर्वाहकत्वात्स्वस्मिन्स्वव्यवहारादिकंकुर्यादितिवाच्यं स्वनिर्वाहकश ब्देनैवनिर्वाह्यत्वनिर्वाहकत्वरूपयोर्निर्वहणक्रियाकर्मत्वकर्तृत्वयोरुक्तेः । स्वनिर्वाहक मध्ययनविधिदीपप्रभादिकमपिअन्यस्मिन्निवस्वस्मिन्स्वकार्यकारिचेत्स्वविषयमेव ।

आह ॥ स्वनिर्वाहकमिति ॥ स्वस्मिन्निति ॥ अध्ययनविधिःस्वस्याध्येतव्यत्वंविधत्ते प्रभाचस्वस्मिन्नप्यंधकारसंबंधंनिवर्त यतीत्यर्थः । ननुस्वस्मिन्स्वकार्यकरणे नस्वविषयकत्वंतंत्रं यथा"गाङ्कुटादिभ्य"इतिसूत्रेकुटआदिर्येषांकुटादिगणस्थानांतेभ्यःकु टादिभ्यःकिंचित्कार्यंविहितं तत्रबहुव्रीहेःसमस्यमानपदार्थातिरिक्तान्यपदार्थमात्रविषयकत्वेनकुटादिभ्यइतिबहुव्रीहेरपिकुटादि

न्या० ८८ रूपान्यपदार्थमात्रविषयकत्वमेव नकुटविषयकत्वं कुरूणांक्षेत्रमित्यत्रकुरूणामिवकुटस्याप्युपलक्षणमात्रत्वात् एवंचायंबहुव्रीहि

SGDF
Sri Gargeshwari Digital Foundation

र्यंतस्वकार्यंविहितमस्ति तत्स्वाविषयेपिकुटेकुटादाविवकरोत्येव एवमात्मरूपंज्ञानंस्वाविषयकमपिस्वस्मिन्व्यवहारादिरूपंकार्यंक रिष्यत्येवेत्याशंक्य तदप्येतेनैवनिरस्तमित्याह ॥ एतेनेति ॥ एतेनेत्युक्तमेवविशदयति ॥ बहुव्रीहेरिति ॥ बहुव्रीहावन्यप दार्थस्तावत्समुदायएव तत्रचबहुव्रीहेःसमुदायरूपेऽन्यपदार्थेशक्तिर्वालक्षणावास्तु तथापिबहुव्रीहिःस्वाविषयेकार्यंनकरोत्येव कुटादिभ्यइत्यत्राप्यन्यपदार्थरूपसमुदायांतर्गतकुटादिवत् कुटस्यापितत्समुदायांतर्गतत्वेनशक्त्यालक्षणयावाबहुव्रीहिविषयत्वमे

एतेनयथा “गाङ्कुटादिभ्य” इत्यत्रबहुव्रीहिःस्वाविषयेपिकुटेस्वकार्यंकरोतितथेहापीतिखंडनोक्तं निरस्तं। बहुव्रीहेरन्यपदार्थेशक्तिरितिवैयाकरणादिमतेलक्षणेति तार्किकादिमतेवाचैत्रशाला स्थाआनीयंतामित्यत्रोपलक्षणस्यापिचैत्रस्यशालास्थस्यतच्छब्दविषयत्ववत् कुटस्यापिकुटादित्व वत् अन्यपदार्थभूतसमुदायांतर्गतस्यशक्त्यालक्षणयावाबहुव्रीहिविषयत्वेनतदविषयत्वासंमतेः।

व समुदायेनसमुदायिनांसंबंधादित्यर्थः । मतेवा कुटादिवदन्यपदार्थभूतसमुदायांतर्गतस्यकुटस्यापिकुटादिवत् शक्त्या लक्षण यावा बहुव्रीहिविषयत्वेनेत्यन्वयः । ननुतद्गुणसंविज्ञानबहुव्रीहौतस्यान्यपदार्थस्ययेगुणाअवयवादयस्तेषांकार्येसंविज्ञानंआनय नादिक्रियान्वयोभवति गुणान्विनागुणिनआनयनाद्ययोगात् नचेहकुटिःकुटादेरवयवादिर्भवति अतःकथंतस्यबहुव्रीहिविषय त्वमितिशंकांकैयटोदाहृतन्यायेनपरिहरति ॥ चैत्रेति ॥ तद्गुणसंविज्ञानेत्यत्रगुणशब्देन नावयवादिरेवविवक्षितः अपितूपल ॥ ५२३ ॥

क्षणादिसाधारणंव्यावर्तकमात्रं तथाचचैत्रशालास्थाब्राह्मणाआनीयंतामित्युक्ते चैत्रोपियदिब्राह्मणोभवतिस्वशालास्थश्च तदा सोप्यानीयतएव एवंकुटादीन्प्रत्युपलक्षणस्यापिकुटेःकुटादिकार्येंतर्भावःस्यादेव समुदायेनसमुदायिनांसंबंधादित्यर्थः । अन्यप दार्थःसमुदायःसचबहुव्रीहिसमासार्थइत्यत्रसंमतिमाह ॥ उक्तंहीति ॥ उद्भूतानामवयवानांभेदोविशेषएवसमुदायः माषा दिसमुदायेतथादर्शनात् सचबहुव्रीहिसमासार्थइत्यर्थः ॥ स्वस्मिन्निति ॥ व्यवहारजननेसंशयादिनिवर्तनेचेत्यर्थः ॥ पक्षाद

तरंगिणी ५ उक्तंहिकैयटे “उद्भूतावयवभेदःसमुदायःसमासार्थ” इति । नचज्ञानस्यस्वस्माद न्यत्रव्यवहारादिजननेतद्विषयत्वंतंत्रं । स्वस्मिंस्तुस्वाभेदएवेतियुक्तं । पक्षादन्यत्रै वायंनियमइतिसर्वत्रसुवचत्वात्। दुःखादिविषयकस्यद्वेषस्यस्वाभेदेसत्यपिस्वविषय कत्वव्यतिरेकेणदुःखादाविवस्वस्मिन्निवृत्तिहेतुतायाइच्छाविरोधित्वस्यचादर्शनाच्च ।

न्यत्रेति ॥ ज्ञानंस्वविषयकं। स्वस्मिन्व्यवहारादिजनकत्वादित्यस्माभिरुक्तेस्वस्मादन्यत्रैवव्यवहारादिजननेस्वविषयकत्वंतंत्रं । नतुस्वस्मिन्नित्युक्त्यापक्षादन्यत्रैवायंनियमइत्युक्तंस्यात् तथाचधूमाग्न्योःसाहचर्यनियमःपक्षादन्यत्रैवनतुपक्षइत्यपिवक्तुंशक्य त्वेनातिप्रसंगइत्यर्थः ॥ दुःखादीति ॥ अन्यत्रस्वकार्यजननेतद्विषयकत्वंप्रयोजकं स्वस्मिन्कार्यजननेतुस्वाभेदएवप्रयोजकश्चे त्तर्हि दुःखविषयकत्वाद्द्वेषस्यद्वेषकार्यभूता निवृत्तिर्दुःखेभवतिदुःखद्वेषाद्दुःखंनिवर्ततइतियावत् एवंद्वेषःस्वस्मिन्नपिस्वकार्यभूतां

SGDF Foundation

निवृत्तिंकुर्यात् स्वाभेदस्यसत्वात् । नचेष्टापत्तिः दुःखद्वेषविषयेकस्यापिनिवृत्त्यभावात् । तथादुःखद्वेषेदुःखेच्छानिवर्तकत्वरूपमिच्छाविरोधित्वमस्ति द्वेषेणदुःखेच्छायाअनुत्पत्तेः एवंस्वाभेदस्यस्वस्मिन्सत्वात्स्वस्मिन्नपिस्वस्येच्छानिवर्तकत्वंस्यात् नचेष्टापत्तिः । अस्मिन्पापिष्ठेद्वेषएवास्माकमभिवर्धतामितिद्वेषेइच्छायाएवदर्शनेनद्वेषस्यतद्विरोधित्वाभावात् । एवंचस्वस्मिन्नपिव्यवहारजननेस्वविषयकत्वस्यतंत्रत्वेतुनदोषः । द्वेषस्यस्वविषयकत्वाभावेनस्वस्मिन्निवृत्त्यभावस्यइच्छाविरोधित्वाभावस्यचोपपत्तेरित्यर्थः । स्वस्मिन्स्वकार्यजननेस्वविषयकत्वंविहायस्वाभेदमात्रस्यप्रयोजकत्वेऽतिप्रसंगानाह ॥ ब्रह्माज्ञानस्येत्यादिनाग्रंथेन॥

तरंगिणीग्रंथ — ब्रह्माज्ञानस्यचस्वाभेदेसत्यपिस्वविषयकत्वव्यतिरेकेणब्रह्मणीवस्वस्मिन्प्रकाशप्रतिबंधकत्वादेरदर्शनाच । स्मरणरूपस्यपरोक्षानुभवरूपस्यचवृत्तिज्ञानस्यस्वाभेदेसत्यपिस्वविषयकत्वव्यतिरेकेणस्वविषयइवस्वस्मिन्व्यवहारादिहेतुतायाअदर्शनाच ।

ब्रह्माज्ञानस्ययथास्वविषयेब्रह्मणिप्रकाशप्रतिबंधरूपस्वकार्यकारित्वं एवंस्वाभेदस्यसद्भावात्स्वस्मिन्प्रकाशप्रतिबंधक(त्वाभावसं)त्वसंभवादितिभावः ॥ स्मरणेत्यादि ॥ स्मरणस्यवृत्तिरूपस्यपरोक्षानुभवस्यचस्वविषयेव्यवहारादिरूपस्वकार्यकारित्ववत्स्वस्मिन्नपिव्यवहारादिकंकुर्यात् स्वाभेदसद्भावात् स्वविषयकत्वस्यतंत्रत्वेतुतदभावान्नोक्तदोषइत्यर्थः । अपरोक्षानुभवस्यैवोक्तौपरमतेचैतन्यस्यैवापरोक्षानुभवरूपत्वात्तस्यचस्वाभेदप्रयुक्तंस्वस्मिन्स्वव्यवहारहेतुत्वंपरेणांगीकृतमेवेतिइष्टापत्तिरेवस्यात् । अतः

SGDF Sri Gargeshwari Digital Foundation

परोक्षानुभवरूपस्यवृत्तिज्ञानस्येत्युक्तं । नन्वत्रापीष्टापत्तिः चिद्वद्वृत्तिज्ञानस्यापिस्वस्मिन्स्वव्यवहारहेतुत्वांगीकारादितिचेत्तत्राह ॥ वृत्तेरपीति ॥ स्वप्रकाशत्वंस्यात् तद्वदेवेतिवर्तते । नचात्रापीष्टापत्तिः । वृत्तिज्ञानस्यजडत्वेनस्वप्रकाशत्वानंगीकारात् एतावंतंकालंसुखमहमस्वाप्समितिपरामर्शरूपस्वप्रकाशत्वसाधकयुक्तेस्तत्राप्रवर्तनादितिभावः । ननुस्वाभेदप्रयुक्तस्वस्मिन्स्वकार्यकारित्वनियमश्चैतन्यरूपज्ञप्तावेवोच्यतेऽतोनोक्तातिप्रसंगसंघइत्यतआह ॥ मैत्रेति ॥ चैत्रमैत्रावुभावपियदासुप्तौ तदामैत्रचैतन्यरूपज्ञानस्यचैत्रचैतन्यरूपज्ञानेनपारमार्थिकाभेदसद्भावाच्चैत्रचैतन्येमैत्रचैतन्यंसुषुप्तौस्वकार्यंव्यवहारंकुर्यात् नचकल्पितभे

वृत्तेरपिचिद्वत्स्वव्यवहारादिहेतुत्वेस्वप्रकाशत्वंस्यात् । मैत्रचैतन्य
स्यचैत्रचैतन्येनपारमार्थिकाभेदेसुषुप्तौभेदकल्पनाराहित्येचसत्यपि
तद्विषयकत्वव्यतिरेकेणतद्व्यवहारादिहेतुत्वव्यतिरेकस्यदर्शनाच ।

दसद्भावान्नव्यवहारादीतिवाच्यं । भेदकल्पनानिमित्तस्याऽविद्यादेःसुप्तौनिवृत्तत्वेनकल्पितभेदस्याभावात् । नचतदापिव्यवहारादिकंभवतीतीष्टापत्तिरितिवाच्यं । तथात्वेसुप्तोत्थितस्यमैत्रचैतन्यस्यएतावंतंकालंअहंचैत्रचैतन्यंव्यवहरमाणआसमितिपरामर्शःस्यात् नचैवमस्ति । अतस्त्वयाऽकामेनापिसुषुप्तौमैत्रचैतन्यस्यचैत्रचैतन्यस्यविषयकत्वाभावान्नव्यवहारइत्येवंस्वस्मिन्स्वव्यवहारजननेपिस्वविषयकत्वमेवप्रयोजकत्वेनस्वीकार्यं । नस्वाभेदइत्यर्थः । एवंस्वविषयकत्वानंगीकारेऽतिप्रसंगसंघमभिधायात्मरूप

SGDF
Sri Gargeshwari Digital Foundation

ज्ञानस्यस्वविषयकत्वेनिरवकाशमनुभवंप्रमाणयति ॥ स्वात्मानमिति ॥ उक्तातिप्रसंगसंघंसंगृह्णाति ॥ एवंचेति ॥ अयंका
रिकार्थः ज्ञानंस्वाविषये स्वस्मिन्स्वविषयकत्वंविहायेतियावत् स्वाभेदमात्रेणस्वकार्यंव्यवहारादिकंस्वस्मिंश्चेद्यदिकुर्या त्तदा
द्वेषाज्ञानादिस्मरणादिकमपिआत्मनिस्वस्मिन्निवृत्त्यादिप्रकाशप्रतिबंधादिरूपंस्वकार्यंकुर्यादित्यर्थः । नन्वेतावताप्रबंधेनोपपादि
तंस्वविषयकत्वमात्मरूपज्ञानस्यस्यात् तथाप्यवेद्यत्वंयुक्तं स्वकर्मकत्वाभावात् तस्यैवचावेद्यत्वविरोधित्वात् नचविषयत्वमेवक
र्मत्वमितिवाच्यं तयोर्भेदात् स्वव्यवहारजननयोग्यत्वंहिस्वविषयकत्वं कर्मत्वंचकारकविशेषत्वं चैतन्यरूपज्ञानस्यचनित्यस्यस्व

स्वात्मानंजानामीतिस्वविषयकत्वस्यानुभवाच्च । एवंच "कुर्यात्स्वकार्यंस्वस्मिंश्चेज्ज्ञानंस्वाविष
येतदा । द्वेषाज्ञानादिकंकुर्यात्स्वकार्यमपिचाऽऽत्मनि" ॥ १ ॥ स्वविषयकत्वेपिस्वकर्मकत्वाभा
वादवेद्यत्वमितितुनिरस्तं । घटःस्वप्रकाशःघटत्वात् व्यतिरेकेणपटवदित्याभाससाम्यंच ।

कर्मकत्वंनयुक्तं स्वस्यैवक्रियात्वेनक्रियाजनकत्वरूपकारकविशेषत्वाख्यकर्मत्वायोगादित्यतआह ॥ स्वेति ॥ निरस्तमिति ॥
साक्षाद्व्यवहारजननयोग्यत्वरूपविषयत्वस्यैवकर्मत्वशब्दार्थत्वात् । कारकविशेषत्वादिरूपकर्मत्वस्यस्वकपोलकल्पितत्वात् । अ
थवाक्रियाविषयत्वमेवकर्मत्वं इदंचस्वविषयकत्वेप्युपपन्नमितिपूर्वमुक्तत्वा दितिभावः । अनुभूतिःस्वप्रकाशा अनुभूतित्वादित्यस्य
प्रतिकूलतर्कपराहतिमभिधायाभाससाम्यंचाह ॥ घटइति ॥ आभाससाम्यानुमानेदूषणमाशंक्यतत्साम्यमनुभूतित्वानुमानस्य

दर्शयति ॥ नन्वित्यादिना ॥ बाधइति ॥ तत्रावेद्यत्वरूपस्यस्वप्रकाशत्वस्यविरुद्धत्वादितिभावः । एतदुपपादनार्थमेवचक्षु
रादिसिद्धस्येत्युक्तं ॥ अन्यथेति ॥ चक्षुराद्यसिद्धस्यकस्यचिद्घटस्यपक्षत्वेतस्याप्रामाणिकत्वादाश्रयासिद्धिरित्यर्थः ॥ इहापी
ति ॥ अनुभूतित्वानुमानेपीत्यर्थः ॥ बाधइति ॥ तस्यजडत्वेनस्वप्रकाशत्वस्यत्वत्पक्षेबाधितत्वादित्यर्थः ॥ अन्यथेति ॥
तदतिरिक्तचैतन्यरूपानुभवस्यपक्षत्वेतस्याऽप्रामाणिकतायाःपूर्वमुक्तत्वेनाऽऽश्रयासिद्धिरित्यर्थइतिसंप्रदायः । पुनर्ज्ञानस्यस्वप्र
काशत्वसाधकानुमानद्वयमाशंक्यप्रकरणसमत्वेनदूषयति ॥ त्वज्ज्ञानमिति ॥ अत्रवेद्यत्वानधिकरणमित्येवोक्तावप्रसिद्धिः

ननुचक्षुरादिसिद्धस्यपक्षत्वेबाधः अन्यथाआश्रयासिद्धिरितिचेत् इहापिवृत्तेः
पक्षत्वेबाधः अन्यथाआश्रयासिद्धिरितिसमं ॥ त्वज्ज्ञानंतवापरोक्षव्यवहार
योग्यत्वेसतिवेद्यत्वानधिकरणंज्ञानत्वात्मदीयज्ञानवदितिस्वप्रकाशत्वानुमाने

वेद्यत्वस्यकेवलान्वयित्वेनतदनधिकरणत्वस्याप्रसिद्धेः । अतउक्तमपरोक्षव्यवहारयोग्यत्वेसतीति । तथापिदृष्टांतेमदीयज्ञानेम
दीयापरोक्षज्ञानेमदीयापरोक्षव्यवहारयोग्यत्वविशिष्टवेद्यत्वस्यैवसत्वात्तदनधिकरणत्वंपुनरप्रसिद्धमतस्तवेत्युक्तं । एवंचत्वदी
यापरोक्षव्यवहारयोग्यत्वेसतिवेद्यत्वस्यविशिष्टस्याभावोदृष्टांतेविशेषणाभावमादायविशिष्टाभावरूपसाध्यपर्यवसानं । पक्षेतुवे
द्यत्वरूपविशेष्याभावमादायावेद्यत्वरूपस्वप्रकाशत्वेनविशिष्टाभावरूपसाध्यपर्यवसानंद्रष्टव्यं । स्वप्रकाशत्वानुमाने अवेद्यत्व

SGDF

रूपस्वप्रकाशत्वानुमाने ॥ त्वज्ज्ञानमिति ॥ अवेद्यत्वानधिकरणमित्येवोक्तेमदीयज्ञानस्यत्वज्ज्ञानेनावेद्यत्वात्तदनधिकरणत्वंदृष्टांतेऽप्रसिद्धमतःसत्यंतंविशेषणं एवंचतवापरोक्षव्यवहारयोग्यत्वेसतिअवेद्यत्वरूपस्यविशिष्टस्याभावोदृष्टांतेविशेषणाभावेनपक्षेत्ववेद्यत्वरूपस्वप्रकाशत्वाख्यविशेष्याभावेनेतिद्रष्टव्यं । ज्ञानानि घटानुभवरूपाणि अत्राप्यप्रसिद्धिपरिहारायसत्यंतं अयंचविशिष्टाभावोदृष्टांतेविशेषणाभावेनपक्षेतुविशेष्याभावेनावेद्यत्वरूपस्वप्रकाशत्वमादायसाध्यपर्यवसानं ॥ चिद्विषयत्वेति ॥

त्वज्ज्ञानंतवापरोक्षव्यवहारयोग्यत्वेसतिअवेद्यत्वानधिकरणं । ज्ञाजत्वान्मदीय
ज्ञानवदितिप्रकरणसमता । विवादपदानिज्ञानानिघटज्ञानान्यत्वेसतिवेद्यत्वान
धिकरणानि । ज्ञानत्वात् । घटज्ञानवदित्यत्रापिविवादपदानिज्ञानानि घटज्ञाना
न्यत्वेसतिचिदविषयत्वानधिकरणानिज्ञानत्वात्घटज्ञानवदितिप्रकरणसमतैव।
एतेनात्मनोपिस्वप्रकाशत्वंनिरस्तं । चितएवास्वप्रकाशत्वेचिद्रूपत्वेनतदसिद्धेः ।

चिद्रूपज्ञानाविषयत्वरूपस्वप्रकाशत्वानधिकरणानीत्यर्थः । एतावत्युक्तेदृष्टांतेअप्रसिद्धिः उक्तरीत्याचैतन्यस्यैवाप्रामाणिकत्वेन तदविषयत्वस्यैवसत्वेनतदनधिकरणत्वमप्रसिद्धमतःसत्यंतं । एवंचघटज्ञानान्यत्वेसतिचिदविषयत्वरूपविशिष्टस्याभावोदृष्टांते ॥ ५२६ ॥
विशेषणाभावेन पक्षेतुचिदविषयत्वाख्यावेद्यत्वरूपविशेष्याभावेनपर्यवसानंद्रष्टव्यं । एतेनेत्युक्तमेवविशदयति ॥ चितएवेति ॥

SGDF Sri Gargeshwari Digital Foundation

उक्तरीत्याचिद्रूपज्ञानस्यैवस्वप्रकाशत्वासंभवेनतद्रूपस्यात्मनोपिस्वप्रकाशत्वमसिद्धमित्यर्थः ॥ परपक्षेइति ॥ आत्मनोज्ञानरूपत्वमेवनसंभवति । ज्ञातृज्ञेयशून्यत्वात् । अतःस्वप्रकाशत्वमयुक्तमित्यर्थः ॥ ज्ञातृत्वेति ॥ आत्मनस्त्वन्मतेचिद्रूपत्वेनविज्ञातेतिश्रुतौज्ञातृत्वोक्तिरयुक्तास्यात् विशेषानंगीकारात् अतस्तदन्यथानुपपत्त्यानस्वप्रकाशत्वमितिभावः । पुनरपिचैतन्यरूपज्ञानस्यस्वप्रकाशत्वसाधकंविद्यासागरोक्तमनुमानमाशंक्यनिराकरोति ॥ एतेनेति ॥ यद्यपितन्मतेचैतन्यस्यैवज्ञानत्वेनतदाश्रयत्वंनात्मनोयुक्तं विशेषानंगीकारात् तथाप्याश्रयत्वानुवादःपररीत्येतिद्रष्टव्यं । वस्तुतस्तुचैतन्यरूपज्ञानस्यस्वविषयत्वंनभव

परपक्षेआत्मनिचित्त्वायोगस्योक्तत्वाच । "विज्ञाताप्रज्ञाते" तिज्ञातृत्व
श्रुतेश्च । एतेनविमतंज्ञानंभिन्नाश्रयविषयंज्ञानत्वाज्ज्ञानांतरवत् । वि
मतंनस्वाश्रयविषयंगुणत्वात्अग्नेरौष्ण्यवदितिविद्यासागरोक्तंनिरस्तं ।

तीतितात्पर्यार्थः । भिन्नाश्रयविषयं आश्रयविषययोर्भेदोस्तिविषयत्वोपेताश्रययुतंनभवति ज्ञानाश्रयस्यात्मनोज्ञानविषयत्वंनास्ति तथाचावेद्यत्वरूपस्वप्रकाशत्वसिद्धिः । ज्ञानांतरवत् वृत्तिरूपज्ञानवत् तत्राश्रयविषययोर्भेदएवास्ति आत्मनआश्रयत्वात् घटादेर्विषयत्वादितिभावः ॥ विमतमिति ॥ चैतन्यरूपज्ञानंचस्वाश्रयंनविषयीकरोति विषयीकरणरूपस्वकार्यंस्वाश्रये नकरोतीत्यर्थः । तथाचावेद्यत्वरूपस्वप्रकाशत्वसिद्धिः ॥ अग्नेरिति ॥ औष्ण्यस्यस्वाश्रयाग्निविषयत्वंनास्ति । दाहादिरूपस्वकार्यं

SGDF
Sri Gargeshwari Digital Foundation

स्वाश्रयेअग्नौउष्णस्पर्शोनकरोतीत्यर्थः ॥ प्रत्यक्षेति ॥ आश्रयविषययोरैक्यावगाहिप्रत्यक्षेत्यर्थः ॥ अज्ञानइवेति ॥ ज्ञानत्वे प्याश्रयविषययोरैक्यमेवास्तु । नन्वाश्रयविषययोरैक्यंकुत्राप्यदृष्टंकथंज्ञानेकल्पयितुंशक्यमित्यतउक्तं ॥ अज्ञानइवेति ॥ "आश्रयत्वविषयत्वभागिनीनिर्विशेषचितिरेवकेवले" तिवचनादितिभावः । अंतःकरणेत्यादिकंसाध्याभावोपपादनाय । तत्रा पिस्वप्रकाशत्वेनोक्तसाध्यसद्भावज्ञापनायशब्दादिजन्येत्युक्तं । धीर्भीरित्येतत्सर्वंमनएवेतिशब्दजन्यांतःकरणाकारावृत्तिर्भवति

मामहंजानामीतिप्रत्यक्षबाधात् । अज्ञानइवज्ञानेपिआश्रयविषययोरैक्योपपत्त्याऽप्रयोजकत्वा च । अंतःकरणविषयिण्यामंतःकरणाश्रितायांशब्दादिजन्यवृत्तौआद्यस्यव्यभिचाराच । द्वि तीयस्यापिदीपगतभास्वररूपस्यघटइवदीपेप्यंधकारविरोधित्वेनतद्विषयतयातत्रव्यभिचाराच । त्वन्मतेतस्यागुणत्वाच । नापि "अत्रायंपुरुषःस्वयंज्योति" रितिश्रुतिःआत्मनःस्वप्रकाशत्वेमानं ।

साचांतःकरणाश्रिताभवति । एवंचतस्यांवृत्तौज्ञानत्वसद्भावेपिभिन्नाश्रयविषयत्वाभावादाद्यहेतोर्व्यभिचारइत्यर्थः ॥ भास्वरे ति ॥ शुक्लभास्वरेत्यर्थः । यथागुणभूतंदीपगतंशुक्लभास्वररूपंअन्यत्रघटादौस्वकार्यमंधकारनिवर्तनंकरोति एवंस्वाश्रयेदीपेप्यं धकारंनिवर्तयतीत्येवंस्वाश्रयविषयत्वस्यैवसत्वाद्व्यभिचारादित्यर्थः । द्वितीयहेतोःस्वरूपासिद्धिंचाह ॥ त्वन्मतइति ॥ विम तंपक्षीभूतंज्ञानंवृत्तिरूपंचेत्तर्हितस्यांतःकरणपरिणामत्वेनमृत्परिणामभूतघटादिवत्द्रव्यत्वाद्गुणत्वमसिद्धं चैतन्यरूपंचेत्तस्यब्रह्म

रूपत्वेनद्रव्यत्वात्सुतरांगुणत्वमसिद्धमित्यर्थइतिसंप्रदायः । अत्र सुषुप्तौ । पूर्वपक्षिणोज्योतिःशब्दःप्रकाशपरइत्यभिमतः एवं चायंपुरुषः । परमात्मासुषुप्तौस्वयंज्योतिःस्वप्रकाशइत्यर्थः । नेयंश्रुतिरात्मनःस्वप्रकाशत्वेमानं तत्रज्योतिःशब्दस्यज्ञानसाधन परत्वात् तथाचात्मैवास्येतिपूर्ववाक्योक्तमस्येत्येतदनुवर्त्य अयंपुरुषःपूर्वमात्मशब्दोक्तोभगवान्अस्यजीवस्यस्वयंस्वयमेवज्योति

तथाहि "अस्तमितआदित्येयाज्ञवल्क्ये" त्यादिना "किंज्योतिरयंपुरुष" इत्यंतेनज्ञानसा धनालोकाद्यभावेजीवस्यकिंज्ञानसाधनमितिपृष्टे "आत्मैवास्यज्योति" रित्युपक्रांतआ त्मातावत्परमात्मैव । "स्वप्नेनशारीरमभिप्रहत्यासुप्तःसुप्तानभिचाकशीती" त्यादित ल्लिंगात् । द्युभ्वाद्यधिकरणन्यायेनात्मशब्दस्यतत्रैवमुख्यत्वाच्च । तथाचात्रायंपुरुषइत्यु पसंहारोप्यस्येत्यस्यानुषंगेणायमीश्वरोस्यजीवस्यस्वयमेवज्योतिर्ज्ञानहेतुरित्येवंपरः । अस्मिन्नेवप्रकरणे "वाचैवायंज्योतिषास्ते" इतिज्योतिःशब्दस्यज्ञानसाधनेप्रयोगात् ।

र्ज्ञानसाधनमित्युपसंहारवाक्यार्थइत्यभिप्रेत्यपूर्वमात्मशब्दनिर्दिष्टस्यपरमात्मत्वंतावदुपपादयति ॥ अस्तमितइत्यादिना ॥ ननुपरमात्मनोजीवंप्रतिज्ञानसाधनत्वमनेनकथमुच्यते तद्वाचकपदाभावादित्यतउक्तं ॥ अस्येत्यस्येति ॥ ननुतमोविरोधिनि ज्योतिषिरूढस्यज्योतिःशब्दस्याज्ञानविरोधिज्ञानार्थकत्वमेव नतुज्ञानसाधनार्थकत्वमित्यतआह ॥ अस्मिन्नेवेति ॥ ननु "आ

SGDF
Sri Gurgeshwari Digital Foundation

दित्येनैवायंज्योतिषास्ते चंद्रमसैवायंज्योतिषास्त” इतिवाक्यद्वयंविहायवाचैवेतिवाक्यंकस्मादुदाहृतमितिचेदुच्यते आदित्यचं द्रमसोर्यावद्द्रव्यभाविप्रकाशरूपत्वेनतद्वाक्यगतज्योतिःशब्दस्यप्रकाशपरत्वस्याप्युपपत्त्याआदित्यादिरूपेणज्योतिषाप्रकाशेनास्त इत्यर्थोपपत्त्याज्योतिःशब्दस्यज्ञानसाधनपरत्वज्ञापकत्वाभावात् । अतोऽप्रकाशरूपवाग्ज्योतिष्ट्वप्रतिपादकंवाक्यमुदाहृतं तत्र ज्योतिःशब्दोज्ञानसाधनपरएवेतिसंप्रदायः । ज्योतिःशब्दस्यप्रकाशपरत्वेबाधकंचाह ॥ स्वप्रकाशत्वेति ॥ पुरुषस्यसदास्व प्रकाशत्वेनात्रायमितिश्रुतौविशिष्यसुषुप्तौप्रकाशत्वोक्तिर्व्यर्थेत्यर्थः । अस्तुवाज्योतिःशब्दोज्ञानपरएव तथाप्यत्रात्मनःस्वविष

स्वप्रकाशत्वपरत्वेसदास्वप्रकाशत्वेनश्रुतावत्रेत्यस्यवैयर्थ्याच्च । आत्मैवास्येतिषष्ठ्यास्व विषयत्वस्यैवोक्तेश्च । “स्वयंदासास्तपस्विन” इत्यादाविवान्यावेद्यत्वपरत्वेचामुख्यार्थ त्वापातात् । वेद्येपिप्रदीपादौस्वविषयप्रकाशत्वमात्रेणलोकेस्वप्रकाशपदप्रयोगाच्च ।

यकत्वमेवोक्तं नप्रकाशत्वं कथमितिचेत् आत्मैवास्येतिवाक्येनास्यपुरुषस्यविषयेआत्मास्वयमेवज्योतिर्ज्ञानमितिषष्ठ्यास्वविषय कत्वस्यैवोक्तत्वादित्याह ॥ आत्मैवेति ॥ ननु “स्वयंदासास्तपस्विन” इत्यत्रस्वस्यस्वसेवानिबंधनस्वदासत्वस्यविरुद्धत्वादन्य दासशून्यत्वएवस्वयंदासाइत्यस्यतात्पर्यं एवमिहापिस्वयंज्योतिरित्यस्यान्यावेद्यत्वएवतात्पर्यं नतुस्वविषयकत्वेविरोधादितिचे न्न । अपदार्थत्वेनामुख्यार्थत्वादित्याह ॥ स्वयंदासाइति ॥ किंचास्तुस्वयंदासाइत्यत्रत्वदुक्तार्थःप्रमितत्वा न्नप्रकृते । कुतइ त्यतआह ॥ वेद्येपीति ॥ अन्यावेद्यत्वमात्रेणलोकेस्वप्रकाशपदप्रयोगोनदृष्टः किंनामान्येनचक्षुरादिनावेद्येपिप्रदीपादौस्ववि

SGDF Sri Gargeshwari Digital Foundation

षयप्रकाशत्वमात्रेणस्वप्रकाशपदप्रयोगादित्यर्थः । ननुदीपादौस्वप्रकाशपदप्रयोगेनस्वविषयप्रकाशत्वंनिमित्तं । किंनाम सजातीयप्रकाशाप्रकाश्यत्वमेवनिमित्तमित्याशंकते ॥ तत्रापीति ॥ कुतइत्यतआह ॥ नहीति ॥ घटप्रकाशघटज्ञानेदीपेवाघटत्वजात्याक्रांतत्वाभावेनघटसजातीयत्वाभावात्घटेपिस्वसजातीयप्रकाशाप्रकाश्यत्वसद्भावात्स्वप्रकाशत्वापत्तेरित्यर्थः । अत्रसाध्यभूतंस्वप्रकाशत्वंअवेद्यत्वंवा सजातीयप्रकाशाप्रकाश्यत्वंवा स्वविषयकप्रकाशत्वंवा नाद्यइत्याह ॥ तत्रेति ॥ साध्येति ॥

तत्रापिसजातीयप्रकाशाप्रकाश्यत्वंनिमित्तमितिचेन्न । घटादेरपिस्वप्रकाशत्वापातात् । नहिघटादिज्ञानेदीपेवाघटत्वादिकमस्ति । यच्चोक्तंविवरणे आत्मास्वप्रकाशःस्वसत्तायांप्रकाशव्यतिरेकविधुरत्वात् । प्रकाशाश्रयत्वात्प्रकाशकर्तृत्वात्प्रदीपवदित्यनुमानत्रयं । तत्र साध्यंअवेद्यत्वंचेत् दृष्टांतस्यसाध्यवैकल्यं । सजातीयप्रकाशाप्रकाश्यत्वंचेत् अर्थांतरं । घटादिवदप्रकाशत्वेप्युपपत्तेः । स्वविषयप्रकाशत्वंचेत् । अपसिद्धांतः सिद्धसाधनंच ।

प्रदीपस्यापिचक्षुरादिवेद्यत्वादितिभावः । नद्वितीयइत्याह ॥ सजातीयेति ॥ अर्थांतरमेवाह ॥ घटादिवदिति ॥ सजातीयप्रकाशाप्रकाश्यत्वेपिघटादिवदप्रकाशत्वस्यैवसंभवात्घटादिसाधारणमेतादृशस्वप्रकाशत्वंसाध्यतेचेत्तर्हितस्यपारिभाषिकत्वापत्तिरित्यर्थः । तृतीयेत्वाह ॥ स्वेति ॥ क्रियायाःकर्मत्वानंगीकारादित्यर्थः ॥ सिद्धेति ॥ एतादृशस्वप्रकाशत्वस्यास्माकंसिद्ध

SGDF
Sri Gargeshwari Digital Foundation

त्वादित्यर्थः । स्वसत्तायांप्रकाशव्यतिरेकवैधुर्योपपादनायज्ञातैकसतीत्युक्तं ॥ व्यभिचारइति ॥ दुःखादेःस्वप्रकाशत्वाभावादितिभावः । असिद्धिमेवोपपादयति ॥ त्वन्मतइति ॥ त्वन्मतेआत्मनःस्वप्रकाशत्वेनप्रकाशाश्रयत्वप्रकाशकर्तृत्वयोरभावादसिद्धिरित्यर्थः ॥ निरस्तंचेति ॥ पक्षेप्रकाशकर्तृत्वंनामाज्ञाननिवर्तकत्वं दीपेत्वंधकारनिवर्तकत्वमित्येवंपक्षदृष्टांतानुगतंप्रकाशत्वंनविद्यते ॥ शब्दसाम्येनचेत्पृथ्व्यागोत्वाच्छृंगसमापतेदितिनिरस्तमित्यर्थः ॥ स्वोत्पत्तीति ॥ आत्मनउत्पत्त्यभावादुत्पत्तिपदंस्थितिपरं यथाऽदित्यप्रकाशस्यादित्येनसहैवस्थितत्वात्आदित्यःस्वोत्पत्त्यनंतरमुत्पद्यमानप्रकाशाश्रयोनभवतीतिदृष्टां

किंचाद्यस्यज्ञातैकसतिदुःखादौव्यभिचारः । अंत्ययोर्वाद्यसिद्धिः । त्वन्मतेआत्मनःप्रकाशत्वात् । निरस्तंचाविद्यानुमानभंगेज्ञानप्रभानुगतंप्रकाशत्वं । यदप्युक्तंविवरणे । आत्मा नस्वोत्पत्त्यनंतरं उत्पद्यमानप्रकाशाश्रयः प्रकाशाश्रयत्वादादित्यादिवदिति तत्रास्माकंसिद्धसाधनं तवासिद्धिश्च।

तउपपादनं पक्षीभूतआत्मातुस्थित्यनंतरंउत्पद्यमानप्रकाशाश्रयइतितार्किकादिभिरुच्यते तादृशोनभवति । प्रकाशरूपत्वादितिस्वप्रकाशत्वसिद्धिः ॥ तत्रास्माकमिति ॥ उत्पद्यमानप्रकाशाश्रयोनभवतीत्युक्तेसिद्धसाधनता नित्यप्रकाशाश्रयत्वांगीकारेणोत्पत्त्यनंतरमुत्पद्यमानप्रकाशाश्रयत्वाभावस्यसिद्धत्वादित्यर्थः । किंचात्मनस्त्वयाप्रकाशरूपत्वांगीकारेणप्रकाशाश्रयत्वानंगीकारात्हेतोःस्वरूपासिद्धिःस्यादित्याह ॥ तवेति ॥ अस्माभिःप्रकाशरूपस्यापिप्रकाशाश्रयत्वस्यविशेषबलेनांगीकारात्तवे

त्युक्तं । निर्विशेषवादिनइत्यर्थः ॥ विवादेति ॥ आत्मरूपासंविदित्यर्थः ॥ स्वेति ॥ स्वसमानाधिकरणंस्वसमानकालीनंस्वगोचरंयज्ज्ञानंतद्विरहप्रयुक्तोयोव्यवहाराभावस्तद्वतीनभवतीत्यर्थः । स्वगोचरज्ञानविरहप्रयुक्तव्यतिरेकप्रतियोगिव्यवहाररहितानभवति स्वगोचरज्ञानविरहेपिस्वव्यवहारोभवतीतियावत् । ततश्चस्वव्यवहारेसंविदंतरानपेक्षत्वरूपस्वप्रकाशत्वसिद्धिरितिभावः । पूर्वकालीनज्ञानाभावेपिइदानींतनज्ञानेनव्यवहारस्यजायमानत्वात्पूर्वकालीनस्वगोचरज्ञानविरहप्रयुक्ताव्यवहाराभावस्यसिद्धत्वात्सिद्धसाधनतास्यादतःस्वसमानकालीनेत्युक्तं । तथापि स्वसमानकालीनस्वगोचरयज्ञदत्तीयज्ञानविरहेपिदेवदत्तस्य

एतेनविवादाध्यासितासंवित्स्वसमानाश्रयस्वसमानकालीनस्वगोचरज्ञानविरहप्रयुक्ताव्यवहारानभवति । संवित्त्वात् । अनंतरंव्यवह्रियमाणसंविद्वत्इत्यानंदबोधोक्तंनिरस्तं । स्ववेद्यत्वेप्युपपत्त्यास्माकंसिद्धसाधनात् ।

व्यवहारोदेवदत्तीयज्ञानेनभवत्येवेतियज्ञदत्तीयज्ञानविरहप्रयुक्तव्यवहाराभावस्यसिद्धत्वात्पुनःसिद्धसाधनतास्यादतःस्वसमानाश्रयेत्युक्तं ॥ अनंतरमिति ॥ आदौव्यवसायस्तदनंतरंअनुव्यवसायस्तदनंतरंव्यवसायेव्यवहारोभवति एवंचव्यवसायानंतरभाव्यनुव्यवसायानंतरंव्यवह्रियमाणव्यवसायरूपसंविद्वदित्यर्थः । तत्रस्वगोचरानुव्यवसायरूपज्ञानप्रयुक्तव्यवहारस्यैवसत्वेनस्वगोचरज्ञानविरहप्रयुक्ताव्यवहारोनास्तीतिद्रष्टव्यं ॥ स्ववेद्यत्वेपीति ॥ ब्रह्मणःस्ववेद्यत्वेपिस्वगोचरज्ञानप्रयुक्तव्यवहारस्यै

SGDF

वास्माभिरंगीकारेणस्वगोचरज्ञानविरहप्रयुक्ताव्यवहाराभावस्यास्माकंसिद्धत्वेनसिद्धसाधनादित्यर्थः । ननुब्रह्मणोऽन्यावेद्यत्व रूपस्वप्रकाशत्वे "यतोवाचोनिवर्तंत" इत्यादिश्रुतिरेवप्रमाणमितिचेत्तत्राह ॥ ब्रह्मणइति ॥ क्रियात्वादिहेतूनांत्रयाणामपि प्रत्येकंप्रत्येकंसाध्यद्वयेपिहेतुत्वमितिद्रष्टव्यं । प्रकाशत्वादिहेतुद्वयस्यप्रदीपगतभास्वररूपेस्वविषयत्वाभावरूपसाध्याभावेनव्य भिचारादाह ॥ स्वाविषयत्वेसतिस्वजातीयाविषयइति ॥ स्वविषयत्वांगीकारेणस्वजातीयाविषयत्वस्यममसिद्धत्वात्सिद्ध

ब्रह्मणोऽवेद्यत्वश्रुतिस्तुसाकल्येनावेद्यत्वपरेतिदृश्यत्वभंगएवोक्तं एतेनैवानुभूतिर्नस्ववि
ष(योवा)यावास्वाविषयत्वेसतिस्वजातीयाविष(योवा)यावा । क्रियात्वात् च्छिदावत् ।
प्रकाशत्वादा ऽऽलोकवत् । वस्तुत्वात् घटवत् । चैत्रीयानुभवोवा चैत्रीयापरोक्षव्यवहा
रयोग्यानुभवोवा नचैत्रीयापरोक्षानुभवविषयः । अनुभवत्वात् मैत्रानुभववदित्यादी
नि नवीनानुमानानिनिरस्तानि । असिद्ध्यनैकांतिकत्वबाधसत्प्रतिपक्षाद्युक्तदोषात् ।

साधनतास्यादतःस्वाविषयत्वेसतीत्युक्तं । च्छिदा लोकघटेषुस्वाविषयत्वेसतिस्वसजातीयच्छिदांतरालोकांतरघटांतराविषयत्व सद्भावात्साध्यंद्रष्टव्यं । दृष्टांतेमैत्रीयानुभवेमैत्रीयापरोक्षानुभवविषयत्वस्यैवसत्वात्साध्यवैकल्यंस्यादित्यतःसाध्येमैत्रीयेतिविशे षणं ॥ असिद्धीत्यादि ॥ क्रियात्ववस्तुत्वयोःकृतीच्छाव्यवहृत्यादिषुद्वितीयसाध्याभावाद्व्यभिचारः तेषांसजातीयकृत्याद्यंतर

विषयत्वस्योक्तत्वात् । प्रकाशत्वस्यसर्वज्ञानंप्रकाशइत्यादिशब्दजन्यवृत्तिज्ञानेस्वविषयकत्वसद्भावेनसाध्यद्वयस्याप्यभावाद्व्यभि चारः। क्रियात्वहेतोरसिद्धिश्च क्रियांकुर्वद्धिकारकमितिवचनेनकारकजन्यायाएवक्रियात्वादात्मानुभूतौचतदयोगात् । तद्व्यवहा रजनकत्वान्यथानुपपत्त्यास्वविषयकत्वस्यसमर्थितत्वाद्बाधः । अनुभूतिःस्वविषयिणीस्वव्यवहारजनकत्वादिति प्रतिपक्षोद्रष्ट व्यः । ज्ञानंनित्यंततएवस्वविषयकत्वात्स्वप्रकाशं ततश्चस्वप्रकाशेननित्येनस्वगुणभूतज्ञानेनयावद्द्रव्यभाविनात्यंताभिन्नत्वादा त्मनःस्ववेद्यत्वरूपस्वप्रकाशत्वसिद्धिरित्युपसंहरति ॥ तस्मादित्यादिना ॥ नित्यज्ञानंस्वविषयंनित्यज्ञानत्वादितिवक्ष्यमाणा

तस्माज्ज्ञानस्यभाट्टरीत्याज्ञाततानुमेयत्वेऽतीतंजानामीत्यनुभवस्याहंसुखीतिवत्अहंजानामीत्यप
रोक्षानुभवस्यचायोगात् । प्राभाकररीत्यायंघटइतिजन्यज्ञानस्यैवस्वप्रकाशत्वेविमतंनस्वविषयं

नुमानेस्वरूपासिद्धिपरिहारायपरिशेषेणनित्यज्ञानंकिंचिदंगीकार्यमितिसाधयति ॥ ज्ञानस्येत्यादिना ॥ ज्ञानग्रहान्यथानुपप त्त्याकिंचिन्नित्यज्ञानमंगीकर्तव्यं । ननुनित्यज्ञानाभावेपि ज्ञानग्रहोभाट्टरीत्या अयंज्ञानवान् ज्ञाततावत्त्वादितिज्ञातताऌिंगकानु मानेनभविष्यति प्राभाकरैर्यएवव्यवसायःसएवानुव्यवसायइत्यंगीकारेणअयंघटइतिजन्यज्ञानस्यैवतन्मतेस्वप्रकाशत्वात्तद्रीत्या स्वेनैववा स्वग्रहोभविष्यति यद्वातार्किकरीत्याघटज्ञानवानहमितिमानसानुव्यवसायेनज्ञानग्रहोभविष्यतीतिचेत्तत्राह ॥ भाट्ट रीत्येत्यादिना ॥ अतीतमिति ॥ असतिधर्मिणिधर्मजननानंगीकारेणतत्रज्ञाततारूपलिंगाभावादितिभावः ॥ अपरोक्षेति॥

SGDF

ज्ञानस्यज्ञाततालिंगानुमेयत्वेपरोक्षत्वप्राप्त्याऽहंसुखीतिवदहंजानामीतिज्ञानेऽपरोक्षत्वावगाह्यनुभवविरोधइत्यर्थः । विमतं अयं
घटइतिजन्यज्ञानं ॥ तदसन्निकृष्टेति ॥ ज्ञानेनसाक्षादिंद्रियस्यसन्निकर्षाभावादितिभावः । अयंपटइतिपटविषयिण्यांपटप्रमा
यांव्यभिचारवारणायतदसंनिकृष्टकरणजन्येत्युक्तं पटप्रमायाश्चपटसन्निकृष्टकरणजन्यत्वान्नव्यभिचारः । रजतासन्निकृष्टकर
णजन्येइदंरजतमितिरजतोल्लेखितयारजतविषयकेव्यभिचारवारणायप्रमात्वादित्युक्तं ॥ क्रमेति ॥ यएवव्यवसायःसएवानु
व्यवसायइत्यंगीकारेणायंघटइतिव्यवसायस्यैवघटमनुभवामीत्यनुव्यवसायरूपत्वेनतयोर्ज्ञानयोःक्रमानुभवायोगादितिभावः ।

तदसंनिकृष्टकरणजन्यप्रमात्वादित्याद्यनुमानेनअयंघटःघटमनुभवामी
तिज्ञानयोःक्रमानुभवेनचविरोधात् । तार्किकरीत्यानुव्यवसायस्यापिपर
प्रकाश्यत्वेज्ञानस्यप्रत्यक्षात्मविशेषगुणत्वेनइच्छादिवदवश्यवेद्यत्वात् ,

तार्किकेणत्वयाज्ञानमात्रस्यस्वप्रकाशत्वानंगीकारेणज्ञानज्ञानरूपानुव्यवसायस्यापिपरप्रकाश्यत्वमेवावश्यंवाच्यं तत्रवक्तव्यं ज्ञा
नज्ञानरूपानुव्यवसायस्यापिकिमबुभुत्सितग्राह्यत्वमभिप्रेतं बुभुत्सितग्राह्यत्वंवा नाद्योऽनवस्थानादित्याशयेनाह ॥ अनुव्यव
सायस्यापिपरप्रकाश्यत्वइति ॥ अवश्यवेद्यत्वादिति ॥ अबुभुत्सितग्राह्यत्वादित्यर्थः । अनवस्थानादित्यन्वयः । तत
श्चतस्याप्यबुभुत्सितग्राह्यत्वेनपुनरन्येनवेद्यत्वावश्यंभावादनवस्थास्यात् ततश्चसुप्तिमूर्च्छाविलोपःस्यादितिभावः । आत्मगुणस्य

SGDF
Sri Gargeshwari Digital Foundation

संख्यादेरबुभुत्सितग्राह्यत्वाभावाद्विशेषपदं । आत्मविशेषगुणानामतींद्रियाणांधर्माधर्मभावनासंस्काराणां अबुभुत्सितग्राह्यत्वाभावात्प्रत्यक्षेत्युक्तं द्वितीयेत्वाह ॥ बुभुत्सितेति ॥ बोद्धुमिच्छाहिबुभुत्सा एवंचेच्छायाज्ञानरूपधर्मिज्ञानसाध्यत्वेनतज्ज्ञाने वाच्येतस्यापिपुनर्बुभुत्सितग्राह्यत्वाद्बुभुत्सायाश्चपुनर्धर्मिज्ञानसाध्यत्वादनवस्थास्यादित्यर्थः । नन्वियंपरंपराऽनुभवसिद्धत्वेन प्रामाणिकत्वादवश्यमंगीकार्येतिचेत्तत्राह ॥ अयमिति ॥ ज्ञानद्वयेति ॥ व्यवसायानुव्यवसायरूपज्ञानद्वयेत्यर्थः । तस्मादु

बुभुत्सितग्राह्यत्वेधर्मिज्ञानंविनाबुभुत्सायाएवायोगेनानवस्थानात् अयंघटः
घटंजानामीतिज्ञानद्वयातिरिक्तज्ञानधारानुभवेनानुभवविरोधात् । चैत्र
दुःखादिकंचैत्रीयनित्यापरोक्षज्ञानविषयः तंप्रतिज्ञातैकसत्वात् यद्यंप्रतिज्ञा
तैकसत्तत्तदीयनित्यज्ञानविषयः यथेश्वरप्रयत्नइत्यादिनानित्यज्ञानसिद्धौ

क्तानवस्थापरिहारायकिंचिज्ज्ञानंनित्यमंगीकार्यमितिभावः । एवंपरिशेषेणभाट्टैःप्राभाकरैस्तार्किकैश्चनित्यज्ञानमंगीकार्यमित्यभिधायतत्रानुमानंचाह ॥ चैत्रेति ॥ ईश्वरेति ॥ नित्यस्येश्वरप्रयत्नस्येश्वरंप्रतिज्ञातैकसत्वातूईश्वरीयनित्यापरोक्षज्ञानविषयत्वमित्यर्थः । ननुसुखोत्पत्तिक्षणएवकिंचिज्ज्ञानमुत्पन्नं तेनैवसुखादिकंगृह्यते एवंसुखादिनासहैवोत्पन्नेनज्ञानेनैवसुखादेर्ज्ञातैकसत्वोपपत्तेर्नतद्ग्राहकज्ञाननित्यत्वापेक्षा एवंचज्ञातैकसत्वस्यनित्यापरोक्षज्ञानविषयत्वेऽसामर्थ्यादप्रयोजकतेतिचेन्न । सुखादिरूपविष

SGDF
Sri Gargeshwari Digital Foundation

योत्पत्त्यनंतरमेवतत्संनिकृष्टकरणेनज्ञानोत्पत्तेरवश्यंवाच्यत्वेनसहोत्पत्तेरेवोपयोगान्नासामर्थ्यमितिभावः । नन्वस्त्वेवंनित्यज्ञान सिद्धिः तथापितस्यापिपुनरन्येनवेद्यत्वावश्यंभावादनवस्थास्यादित्यतःआत्मनोनित्यगुणभूतंतज्ज्ञानंस्ववेद्यत्वरूपस्वप्रकाशत्वव दित्याह ॥ तत्स्वविषयमिति ॥ स्ववेद्यत्वरूपस्वप्रकाशत्ववदित्यर्थः । यन्नित्यंज्ञानंपरिशेषेणसिद्धंतत्स्वविषयमित्यर्थः ॥ स्वेति ॥ स्वधर्मिकेत्यर्थः ॥ असिद्धिरिति ॥ स्वव्यवहारजननेस्वसंशयविपर्ययनिवर्तनेचज्ञानांतरापेक्षांगीक्रियते तत्रापि पुनर्व्यवहारादिजननेज्ञानांतरापेक्षांगीक्रियतइत्येवंज्ञानधारांगीकारादित्यर्थः । कुतोनासिद्धिरित्यतोऽयंघटोघटमहंजानामीति

तत्स्वविषयं नित्यज्ञानत्वात् स्वव्यवहारेऽन्यानपेक्षत्वात् स्वसंशयादिविरोधित्वाच्च ईश्वरज्ञानवत् । नचद्वितीयादावसिद्धिः । ज्ञानधारानुभवादित्याद्यनुमानैःचैत्र स्योक्तज्ञानाभावेसुप्तोत्थितस्यपरामर्शोनस्यादित्याद्यनुकूलतर्कसनाथैर्विरोधात् ।

ज्ञानद्वयातिरिक्तज्ञानधारानुभवादित्यर्थः ॥ ज्ञानधारेति ॥ हेतुत्रयमंगीकृत्यस्वविषयत्वानंगीकारेऽनुकूलतर्कमाह ॥ चैत्र स्येति ॥ उक्तज्ञानाभावइति ॥ स्वविषयकनित्यज्ञानाभावइत्यर्थः । नित्यज्ञानमंगीकृत्यतस्यस्वविषयकत्वरूपस्वप्रकाशत्वा नंगीकारइतियावत् । परामर्शः स्मरणं । एतावंतंकालमहंसुखमनुभवन्नासमितिसुप्तोत्थितस्यसुखानुभवस्मरणान्यथानुपपत्त्यासु खानुभवस्तावदस्ति सचेंद्रियाद्युपरमेणतदजन्यत्वान्नित्यः तद्ग्राहकंचनानुभवांतरमस्तीतितत्स्वविषयकतयास्वप्रकाशमंगीकार्य मित्यर्थः॥नन्वेतादृशनित्यज्ञानस्यस्वविषयकत्वेनस्वप्रकाशत्वंकुतः अद्वैतिरीत्याआत्मस्वरूपभूतस्यतस्यज्ञानस्यावेद्यत्वेनैवस्वप्रका

SGDF
Sri Gargeshwari Digital Foundation

शत्वंकिंनस्यादित्यतआह ॥ अद्वैतीति ॥ अवेद्यत्वेस्वविषयकत्वाभावरूपस्वप्रकाशत्वे ॥ दोषाणामिति ॥ स्वव्यवहारजनकत्वाभावप्रसंगादिरूपदोषाणामित्यर्थः । साक्षिरूपात्मगुणभूतस्यनित्यज्ञानस्यस्ववेद्यत्वरूपस्वप्रकाशत्वसिद्धौयावद्द्रव्यभावितयाऽखंडितेनतेनात्यंताभिन्नतयाआत्मनोपिस्ववेद्यत्वरूपस्वप्रकाशत्वंसिद्धमित्याह ॥ आत्मापीत्यादिना ॥ आत्मापियावद्द्रव्यभाविनातेनाऽभिन्नत्वात्मामहंजानामीत्यनुभवाच्चअनुमानैश्च स्ववेद्यत्वरूपस्वप्रकाशत्ववानितिसंबंधः ॥ अभिन्नत्वादि

अद्वैतिरीत्यात्मरूपस्यज्ञानस्यावेद्यत्वेचदोषाणामुक्तत्वात्आत्मनोनित्यगुणभूतंज्ञानंस्ववेद्यत्वरूपस्वप्रकाशत्ववत्।आत्मापियावद्द्रव्यभाविनातेनाभिन्नत्वात्मामहंजानामीत्यनुभवात्। आत्मरूपासंवित्।स्वविषयः।स्वजन्यव्यवहारविषयत्वात्स्वसत्तायामप्रकाशमानत्वरहितत्वात् योयज्जन्यव्यवहारविषयादिःसतद्विषयोयथाघटः। आत्मरूपासंवित्स्वविषयिणी ।स्वसमानाधिकरणस्वसमानकालीनसत्वप्रकारकस्वविशेष्यकसंशयविरोधित्वात्

ति ॥ खंडितेभेदऐक्यंचेत्युक्तत्वेनतदभावादत्यंताभेदएवेत्यर्थः । यद्वामामहमित्येतदप्यत्यंताभेदसाधकमेव तत्रचानुभवात्सर्वंदेतिशेषः ॥ यज्जन्येति ॥ यज्ज्ञानजन्येत्यर्थः । यच्चतज्ज्ञानंचेतियज्ज्ञानं । तद्विषयः तज्ज्ञानविषयः । पूर्वानुमानेनसंविदोविषयत्वंप्रसाध्यतस्याएवेदानींविषयित्वंचसाधयति ॥ आत्मरूपेति ॥ सत्वेति ॥ आत्मास्तिनवेत्येवंसत्वप्रकारकस्वधर्मि

SGDF
Sri Gargeshwari Digital Foundation

कसंशयविरोधित्वादित्यर्थः । आत्मरूपायाःसंविदःपटादिधर्मिकसंशयविरोधित्वाभावादसिद्धिरतःस्वविशेष्यकेत्युक्तं आत्मधर्मिकोयोयंआत्माआनंदरूपोनवेत्याद्यानंदत्वादिप्रकारकसंशयस्तद्विरोधित्वाभावात्सत्वप्रकारकेत्युक्तं । सत्वप्रकारकात्मधर्मिकोयःसंशयःपुरुषांतरीयःस्वस्यैवभिन्नकालीनश्च तद्विरोधित्वाभावात्स्वसमानाधिकरणेत्याद्युक्तं ॥ उक्तविशेषणवदिति ॥ स्वसमानाधिकरणेत्याद्युक्तविशेषणवदित्यर्थः । नन्वात्मनिअहमनहंवेत्यादिसंशयस्य नाहमितिविपर्ययस्यचाभावेनआत्मरूपायाःसंविदःसंशयविपर्ययसामानाधिकरण्याभावादाह ॥ स्वेति ॥ स्वापरोक्षेति ॥ स्वजन्यापरोक्षव्यवहारयोग्येत्यर्थः । य

उक्तविशेषणवद्विपर्ययविरोधित्वात् । यद्यद्विशेष्यकोक्तसंशयादिविरोधितत्तद्विषयकं यथाघटसंवित् । स्वसमानाधिकरणपदस्थानेस्वापरोक्षव्यवहारयोग्येतिवावक्तव्यं ।

द्यात्मनिसंशयविपर्ययौस्यातांतर्हिसंशयंवाविपर्ययंवाऽपरोक्षतोजानामीतिव्यवहारःस्यादेवेत्येवं स्वजन्यापरोक्षव्यवहारयोग्यत्वमस्त्येवेतिनदोषइत्यर्थः । ननुहेतौव्याप्तिग्रहोपयुक्तविशेषणस्यैवदेयत्वेनस्वविशेष्यकेत्यादिविशेषणानांउक्तरीत्याऽसिद्धिवारकतयावैयर्थ्यमितिचेन्न । प्रकृतेपिव्याप्तिग्रहौपयिकत्वमेवोच्यते नासिद्धिवारकत्वं तथाहि संशयविरोधित्वंकुत्राप्यप्रसिद्धं । नचघटादिज्ञानेप्रसिद्धमितिवाच्यं । तस्यापियस्मिन्नात्मनिस्वयंवर्तते तद्भिन्नाधिकरणकभिन्नकालीनान्यप्रकारकपटादिधर्मिकसंशयविरोधित्वाभावेनाप्रसिद्धिरेवस्यादतःतत्परिहारायैवैतानिविशेषणानीतिरूपादिषुपंचसुमध्यइत्यस्येवनासिद्धिवारकत

यावैयर्थ्यशंकेत्याह ॥ अयंघटइत्यादीति ॥ स्वप्रकाशेनयावद्द्रव्यभाविनातेनज्ञानेनात्यंताभिन्नत्वादात्मास्वप्रकाशइत्यत्रदृष्टांतमाह ॥ स्वप्रकाशेति ॥ यावद्द्रव्यभावीतिपूर्वंपूरणीयं । स्वप्रकाशभूतायावद्द्रव्यभाविनीयादीप्तिस्तयाऽत्यंताभिन्नोदीपःस्ववेद्यत्वरूपस्वप्रकाशत्वात्भवति तद्वदित्यर्थः । दीप्त्यात्मकेतिपाठः । दीप्त्याश्रयेतिपाठेतुविशेषबलादाश्रयत्वोक्तिरित्यवधेयं । "त

संख्यावि

अयंघटइत्यादिज्ञानमपिघटेव्यधिकरणादिसंशयविरोधीतिव्याप्तिग्रहणार्थमेवहेतुविशेषणानिनत्वसिद्धिवारकाणि । इत्याद्यनुमानैश्चस्ववेद्यत्वरूपस्वप्रकाशत्ववान्स्वप्रकाशदीप्त्याश्रयप्रदीपवत् । तस्माद्यौगिकापुनरुक्तानंतवैदिकशब्दैर्वाच्यतयावेद्यत्वादनंतगुणंब्रह्मेति ॥ ७ ॥
आत्मनःपराभिमतस्वप्रकाशत्वभंगः ॥१२॥ ७ ॥ यच्चेदमुच्यते ब्रह्मसर्वशब्दावाच्यमिति । तत्रावाच्यपदेनोच्यतेचेत् वाच्यत्वसिद्धिः । नापितेनापिलक्ष्यते अवाच्यरूपमुख्यार्थस्यान्यस्याभावात् भावेवाब्रह्मनावाच्यं किंतुतीरवदवाच्यरूपमुख्यार्थसंबंधिमात्रमितिस्यात्

स्मान्महागुणोविष्णुर्नाम्नामपुनरुक्तित" इत्यनुव्याख्यानं "अतोनंतगुणोविष्णुर्यच्छब्दायोगवृत्तय" इतिभाष्यसंग्रहंचहृदिनिधायोपसंहरन्वक्ष्यमाणमुपक्षिपति ॥ तस्मादिति ॥ आत्मनःपराभिमतस्वप्रकाशत्वभंगविवरणं ॥१२॥ अन्यस्येति॥ ब्रह्मातिरिक्तस्येत्यर्थः ॥ भावेवेति ॥ अवाच्यरूपमुख्यार्थस्यब्रह्मव्यतिरिक्तस्यभावइत्यर्थः ॥ तीरवदिति ॥ गंगापदमुख्या

SGDF

र्थस्यप्रवाहस्यतीरान्यस्यसत्वात्तीरंमुख्यार्थसंबंधिमात्रमेव नतुतत्रगंगात्वमस्ति एवमवाच्यपदमुख्यार्थभूतंयदस्ति तत्संबंध्येवब्र
ह्म । नतुस्वयमवाच्यमित्यर्थः ॥ हीनस्यापीति ॥ अवाच्यपदस्येत्यर्थः ॥ घटइति ॥ तथाचतत्रत्वयावाच्यंघटपदेनघटरूपा
र्थस्यलक्ष्यत्वे(तद्वाच्य)वाच्यमुख्यार्थस्यान्यस्याभावान्नलक्षकत्वमिति तत्प्रकृतेपितुल्यमितिभावः॥ इत्यादिशब्दैरिति॥ ब्रह्म
मात्रनिष्ठतयाप्रसिद्धैस्तद्व्यतिरिक्तमुख्यार्थप्रसक्तिशून्यैरित्यर्थः ॥ अन्यस्येति ॥ शुद्धब्रह्मातिरिक्तस्येत्यर्थः । भावेवाब्रह्मननि

मुख्यार्थहीनस्यापिब्रह्मलक्षकत्वेघटशब्दोपिघटलक्षकःस्यात् । एवं निर्विशेषंस्वप्रका
शंपरमार्थसदित्यादिशब्दैर्ब्रह्मोच्यतेचेद्वाच्यत्वसिद्धिः । नापितैरपिलक्ष्यते निर्विशे
षस्वप्रकाशादिरूपमुख्यार्थस्यान्यस्याभावात् । एवंलक्ष्यशब्देनोच्यतेचेद्वाच्यत्वसि
द्धिः लक्ष्यतेचेल्लक्ष्यत्वहानिः गंगाशब्दलक्ष्यस्याऽगंगात्ववत्लक्ष्यपदलक्ष्यस्यालक्ष्य
त्वात् ननुनिर्विशेषादिशब्दानांविशेषाभावादिविशिष्टंवाच्यं तच्चनब्रह्म तस्यविशे
षाभावाद्युपलक्षिततत्वादितिचेत् तर्हिविशेषाभावोपलक्षितशब्दवाच्यत्वमनिवार्यं।

र्विशेषादिरूपं किंतुतीरवन्निर्विशेषादिरूपमुख्यार्थसंबंधिमात्रमितिस्यात् । मुख्यार्थहीनस्याऽपिलक्षकत्वेघटशब्दोपिघटलक्षकः
स्यादितिभावः । तमेवोपपादयति ॥ गंगेति ॥ निर्विशेषादिरूपमुख्यार्थस्यान्यस्याभावादित्येतदयुक्तमित्याशयेनशंकते ॥
नन्विति ॥ ननुतर्हिविशिष्टस्याऽपिब्रह्मत्वेब्रह्मणएववाच्यत्वसिद्धिरितिचेत्तत्राह ॥ तच्चेति ॥ पुनर्निर्विशेषादिपदमुख्यार्थभूत

SGDF
Sri Gargeshwari Digital Foundation

मन्यदस्तीत्याशंकते ॥ नन्विति ॥ तच्चेति ॥ निर्विशेषादिपदवाच्यंवस्त्वित्यर्थः । तर्हिब्रह्मकीदृशमित्यतआह ॥ किंत्विति ॥ तदाश्रयेति ॥ निर्विशेषत्वाद्याश्रयेत्यर्थः । सिद्धिः निर्विशेषादिपदानामितिशेषः नन्वेवंगंगापदलक्ष्यस्यतीरस्यागंगात्ववन्निर्विशेषादिशब्दलक्ष्यस्यननिर्विशेषत्वादिकमित्यतआह ॥ ब्रह्मणइति ॥ जातिरेवशब्दार्थःतदाश्रयव्यक्तिर्लक्ष्येतिमते सत्पदलक्ष्यस्यापिघटादेर्मुख्यार्थसंबंधित्वेनासत्वायोगात् एवंनिर्विशेषादिपदलक्ष्यस्यापिब्रह्मणोमुख्यार्थभूतनिर्विशेषत्वाश्रयत्वे

ननुविशेषाभावोपलक्षितत्वादिकंवा तद्विशिष्टत्वंवा निर्विशेषादिपदवाच्यं तच्चनब्रह्म किंतुतदाश्रयव्यक्तिभूतंविशेष्यं एवंचमुख्यार्थसिद्धिः । ब्रह्मणोनिर्विशेषादिशब्दलक्ष्यत्वेपिनिर्विशेषत्वाद्यहानिश्चेतिचेन्न । व्यक्तिःशब्दार्थः जातिस्तूपधानमितिमते जातिविशिष्टाव्यक्तिःशब्दार्थइतिमतेच यत्रविशेष्येनिर्विशेषत्वादिकंतस्यतद्वाच्यत्वायोगात् ।[1]

नतत्संबंधितयातदसिद्ध्ययोगात् । "सत्वादीनांतुजातीनांव्यक्तितादात्म्यदर्शनात् ॥ लक्ष्यव्यक्तिरपिब्रह्मसत्वादिनजहातिन" इत्युक्तत्वात् । नदीशब्देनतुनदीत्ववाचिनातदाश्रयव्यक्तेर्नलक्षणा किंतुतदाश्रयव्यक्तिसंबंधिनःतीरस्येतितस्यानदीत्वमितिवैषम्यादितिभावः ॥ जातिस्त्विति ॥ अनंतासुव्यक्तिषुशक्तिग्रहासंभवेनशक्तिग्रहदशायांतत्स्थैवजातिर्व्यक्तीनामनुगमिकेत्यर्थः । शक्तिग्रहाधिकरणीभूतव्यक्त्यनुगमकत्वमुपधानशब्दार्थः । विशेष्ये विशेष्यव्यक्तौ । ननुजातिर्वाच्या व्यक्तिर्लक्ष्येतिम

1 ब्रह्मण्येव निर्विशेषत्वांगीकरात् ।

SGDF
Sri Gargeshwari Digital Foundation

ताश्रयणान्नदोषइतिचेन्न । तस्यमतस्यायुक्तत्वादित्याह ॥ जातिरेवेति ॥ व्युत्पत्तीति ॥ व्युत्पत्तेर्वृद्धव्यवहारसाध्यत्वात्त स्यचव्यक्तावेवसंभवेनजातावसंभवादित्यर्थः । अन्यत्र तर्कतांडवे ॥ अस्मिन्निति ॥ जातिःशब्दार्थःतदाश्रयव्यक्तिर्लक्ष्येति मतांगीकारेघटादिव्यक्तेरपिघटादिशब्दावाच्यत्वेनब्रह्मणोपितद्वत्सत्यादिपदावाच्यत्वेततोविशेषाभावप्रसंगेनतदर्थंघटादेर्मुख्या र्थसंबंधित्वेनलक्ष्यत्वंब्रह्मणस्तुमुख्यार्थाश्रयव्यक्तिसंबंधित्वेनलक्ष्यत्वेंगीकार्येमंचत्वाधारमंचरूपव्यक्तिसंबंधिपुरुषेषुअमंचत्ववद्ब्र

जातिरेवशब्दार्थः व्यक्तिस्तुलक्ष्येतिमतस्यचव्युत्पत्तिविरोधादिनान्यत्रनिरासात् । अस्मिन्पक्षेघटा दिव्यक्तेरपिघटादिशब्दावाच्यत्वेनब्रह्मणस्ततोविशेषार्थंजातिवाचिभिःसत्यादिशब्दैःमंचशब्देनपु रुषइवब्रह्मजात्याधारव्यक्तिसंबंधितयैवलक्ष्यतइतिवक्तव्यत्वेनमुख्यार्थाभावादिदोषतादवस्थ्या च । सत्यंज्ञानमित्यादौब्रह्मणःसत्यत्वादिधर्माश्रयतयैवलक्ष्यत्वेघटादिवत्सखंडार्थत्वापाताच्च ।

ह्मणोपिसत्यत्वनिर्विशेषत्वाद्यभावादिकंदुर्वारमित्यर्थः ॥ मुख्यार्थाभावादीति ॥ शक्यमंचत्वतदाश्रयव्यक्तितल्लक्ष्यपुरुषा णामिवशक्यनिर्विशेषत्वतदाश्रयव्यक्तितल्लक्ष्यब्रह्मणांत्रयाणामभावात् ब्रह्मभिन्नस्यनिर्विशेषपदवाच्यस्याभावात् ब्रह्मणश्चनिर्वि शेषपदलक्ष्यत्वांगीकारादित्यर्थः । ननुघटादिसाधारण्येनैवसत्यंज्ञानमित्यादौब्रह्मणःसत्वादिधर्माश्रयतयैवलक्ष्यत्वमस्त्वित्यत आह ॥ सत्यमिति ॥ जातिःशब्दार्थइतिमतेघटत्वाश्रयतयैवघटादिव्यक्तिर्लक्ष्येतिवत्सत्यत्वाश्रयतयैवब्रह्मव्यक्तिर्लक्ष्येतिसखं

डार्थत्वमेवेत्यर्थः ॥ अब्रह्मेति ॥ निर्गुणत्वाद्यधिकरणस्यब्रह्मत्वानंगीकारादित्यर्थः । अवाच्यलक्ष्यादिपदानांब्रह्मान्यस्यमु ख्यार्थस्याभावात्तेब्रह्मवाचकाइत्युक्तं तत्रशंकते ॥ नन्विति ॥ समस्तेति ॥ नञ्पदस्यवाच्यपदस्यचसमस्तत्वादित्यर्थः । यौ गिकाः । लक्षधातोःकर्मणिण्यत्प्रत्ययेसतिनिष्पन्नस्ययौगिकत्वादितिभावः । उभयेषां समस्तानांयौगिकानांचेत्यर्थः ॥ नेति ॥ तथाचमुख्यार्थाभावेपिसंसर्गलक्षकत्वांगीकारात्ब्रह्मलक्षकत्वंयुक्तं । पदस्यलकक्षत्वांगीकारेहितस्यमुख्यार्थोवक्तव्यः । मयातुवा क्यस्यलक्षकत्वमंगीकृतंतस्यतुनार्थवाचकत्वमतोनतस्यमुख्यार्थोपेक्षितः तथाचमुख्यार्थाभावेपिलक्षकत्वंयुक्तमित्यर्थः ॥ अ

किंचनिर्गुणस्वप्रकाशादेरब्रह्मत्वेयद्यद्ब्रह्मतयेष्टंतत्तदब्रह्मेतिसाधुसमर्थितोब्रह्मवादः । नन्ववाच्यादिशब्दाःसमस्तरूपाः लक्ष्यादिशब्दास्तुयौगिकाः उभयेषामपिवाक्यतु ल्यत्वान्नवाचकतेतिचेन्न । अन्विताभिधानपक्षे तेषामपिवाचकत्वात् । अभिहिता न्वयपक्षेपि वाक्यएवाभिहितान्वयस्वीकारेणप्रकृतिप्रत्यययोरन्विताभिधायित्वात् ।

न्वितेति ॥ पदसमुदायोहिवाक्यं समुदायोहिसमुदायिभूतपदात्मकएव एवंसतिपदानामन्विताभिधानांगीकारेणान्वयस्यवा च्यत्वांगीकारात्पदसमुदायात्मकानांसमस्तानांयौगिकानांचशब्दानांवाचकत्वादित्यर्थः । ननुपदैरभिहिताःपदार्थाएवान्वयंबो धयंतीतिमतेसमस्तस्ययौगिकस्यवाक्यस्यनवाक्यार्थभूतान्वयार्थत्वं नवालक्षकत्वं मुख्यवृत्तिंलक्षणारूपांचवृत्तिंविनैवान्वयबो धांगीकारेणपदभिन्नेषुपदार्थेषुचवृत्त्यभावेनान्वयस्याशाब्दत्वांगीकारादितिचेत्तत्राह ॥ अभिहितेति ॥ पदाभिहितपदार्थबो

SGDF

ध्यान्वयस्यवृत्तिंविनैवाभिधायकत्वरूपाभिहितान्वयस्यवाक्यएवांगीकारेणवाक्यांतर्गतपदनिष्ठप्रकृतिप्रत्यययोस्तावत्स्वार्थवाचकत्वमेवास्ति। तन्मते अतःसर्वथावाचकत्वाभावोनास्ति। नह्येवंसत्यादिवाक्यांतर्गतस्यकस्यचिद्वापदस्यवाचकत्वंत्वयास्वीकृतमितिभावः। वाक्यतुल्यत्वान्नवाचकतेत्यत्रदूषणांतरमाह ॥ **समासइति** ॥ अवाच्यमित्यत्रेत्यर्थः। यौगिके लक्ष्यमित्यत्र ॥ अनभिधेयत्वेपीति ॥ वृत्तिंविनैवसंसर्गबोधकत्वांगीकारादितिभावः। समासेपदार्थस्य यौगिकेप्रकृत्याद्यर्थस्येत्यर्थः। तथाचस

समासेपदार्थसंसर्गस्ययौगिकेप्रकृतिप्रत्ययार्थसंसर्ग
स्यचानभिधेयत्वेपिपदार्थस्यप्रत्ययार्थस्यचवाच्यत्वात्
तदर्थस्यचब्रह्मणःवाच्यत्वापरिहाराच्च। यदितुब्रह्मन
पदाद्यर्थः किंतुपदाद्यर्थसंसर्गरूपं तर्हिसखंडंस्यात्।

र्वथाऽवाचकत्वंनास्ति तदंतर्गतस्यपदादेर्वाचकत्वांगीकारात्। सत्यादिवाक्यपदार्थभूतस्यब्रह्मणोवाच्यत्वमनिवार्यमितिभावः। ननुमयाब्रह्मपदार्थरूपत्वेननस्वीकृतं येनवाच्यत्वंस्यात् किंतुवृत्तिंविनैवबोध्योयःसंसर्गस्तद्रूपत्वांगीकारादित्यतआह ॥ यदित्विति ॥ नन्वन्यत्रकुत्रचिदब्रह्मपरेसमासेयौगिकेवाक्येपदार्थस्यप्रत्ययार्थस्यचवाच्यत्वेपिअवाच्यंलक्ष्यमित्यादौसमासादिवाक्येपदद्वयस्यप्रकृतिप्रत्यययोर्वानप्रत्येकंप्रत्येकंस्वार्थसंसर्गपरत्वं येनपदार्थस्यब्रह्मणोवावाच्यत्वापत्तिः किंनामसर्वेषामपिलक्षणयाब्र

SGDF Sri Gargeshwari Digital Foundation

ह्ममात्रपरत्वादितिचेत्तत्राह ॥ यदित्विति ॥ तर्ह्यीति ॥ ब्रह्मस्वरूपमात्रपरत्वेनतदवाच्यत्वेलक्ष्यत्वेचतात्पर्याभावान्नावाच्य लक्ष्यादिपदेनब्रह्मणोऽवाच्यत्वादिसिद्धिरित्यर्थः ॥ स्यादिति ॥ अवाच्यत्वपदलक्ष्यस्यावाच्यत्वाभावादितिभावः । तत्रदृष्टां

यदितुअवाच्यमित्यादौपदद्वयादिकंनस्वार्थसंसर्गपरं किंतुब्रह्ममात्रलक्षकं तर्हिनतेनावाच्यत्वादिसिद्धिः तस्मान्निर्विशेषादिशब्दवाच्यत्वंदुर्वारं । तदुक्तं "पदंचनिर्गुणइतिकथंगौणंवदिष्यति । गुणाभावोपलक्ष्यंचेत्पदंतदपिवाचक" मिति। "येनलक्ष्यमितिप्रोक्तंलक्ष्यशब्देनसोऽवदादि"ति। एवंच "अवाच्यलक्ष्यादिपदैर्लक्ष्यंचेद्वाच्यतादिकं । स्यान्नदीशब्दलक्ष्यस्यानदीत्वमिवहिध्रुवं यतोवाचोनिवर्त्तंते अशब्दमस्पर्श" मित्यादिश्रुतिस्तुअद्भुतत्वाद्यभिप्राया । "नतदीदृगितिज्ञेयंनवाच्यंनचतर्क्यते । पश्यंतोपिनपश्यंतिमेरोरूपंविपश्चित" इत्यादौदर्शनात् । "अद्भुतत्वादवाच्यंतदतर्क्याज्ञेयमेवच । अनंतगुणपूर्णत्वादित्यूदेपैंगिनांश्रुतिः । अवाच्यमितिलोकोपिवक्त्याश्चर्यतमंभुवी" त्युक्तेश्च । पराभिमतार्थेअशब्दमित्यादिशब्दवाच्यत्वस्यापिनिषेधेनअशब्दशब्दावाच्यस्याशब्दत्वासिद्ध्यास्वव्याघाताच्च।

तोनदीति। ननु "यतोवाचोनिवर्तंत" इत्यादिश्रुत्याऽवाच्यत्वसिद्धिरित्यतआह ॥ यतइत्यादिना॥ अशब्दमित्यादेःसर्वथाऽवाच्यत्वाभिप्रायेबाधकमाह ॥ परेति ॥ अशब्दत्वासिद्ध्येति ॥ गंगापदलक्ष्यस्यतीरस्यागंगात्ववदित्यर्थः । मनोवृत्तेःसर्व

SGDF
Sri Gargeshwari Digital Foundation

थानिषेधायोगेहेतुरंतःकरणवृत्तिव्याप्यइति । एवंचांतःकरणवृत्तिव्याप्येब्रह्मणिश्रुतस्यापिमनोवृत्तिनिषेधस्यसाकल्यादिनासंको चवत्वाग्वृत्तिनिषेधस्यापिसाकल्येनावाच्यत्वादिनासंकोचःकार्यइत्याह ॥ यतइति ॥ किंच "यतोवाच" इत्यादिश्रुतौयतइ त्यादिबहूनांपदानांब्रह्मवाचकत्वरूपमुख्यार्थलाभायनिवर्ततइत्येकमेवपदंसाकल्येनप्रतिपादनान्निवर्ततइतिस्वार्थात्प्रच्यावनीयं

"यतोवाच" इत्यत्रमनसासहेतिश्रुतमतोवृत्तेरिवांतःकरणवृत्तिव्याप्येब्रह्मणिवाग्वृत्तेरपिसर्व थानिषेधायोगाच्च । यतआनंदंब्रह्मणइतियदानंदाद्यनेकशब्दमुख्यार्थत्वायनिवर्ततइत्येकामुख्या र्थत्वस्यैवन्याय्यत्वाच्च । त्वन्मते "यतोवाचोनिवर्तंत" इत्यादेरपिलक्षणयाचिन्मात्रपरत्वेनवा च्यत्वाविरोधित्वाच्च । "अथकस्मादुच्यतेब्रह्मेतितस्मादुच्यतेपरंब्रह्मेती" तिश्रुत्या "वचसांवा च्यमुत्तमं परमात्मेतिचाप्युक्त" इत्यादिस्मृत्या वेदांततात्पर्यविषयोब्रह्म वाच्यं वस्तुत्वाल्ल क्ष्यत्वाच्च तीरवत् । परमार्थसदादिपदंकस्यचिद्वाचकं पदत्वा द्घटपदवत् । सत्यज्ञानादिवाक्यं वाच्यार्थतात्पर्यवत्पदयुक्तं वाक्यत्वात् अग्निहोत्रादिवाक्यवदित्याद्यनुमानैश्चाविरोधाच्च ।

बहुबाधस्याऽन्याय्यत्वात् "त्यजेदेक" मितिन्यायाच्चेत्याह ॥ यतइति ॥ अविरोधित्वादिति ॥ दंडीतिवाक्यस्यदेवदत्त इतिवाक्येनाऽविरोधदर्शनेनविशिष्टपरस्यविशेष्यपरत्वाविरोधादित्यर्थः । वाच्यत्वप्रतिपादकश्रुतिस्मृत्यनुमानविरोधाच्चनाऽ वाच्यत्वमित्याह ॥ अथेत्यादिना ॥ ब्रह्मवाच्यंलक्ष्यत्वात्तीरवदित्यनुमानेऽप्रयोजकत्वपरिहाराय "सर्वशब्दावाच्यस्यलक्ष

णाऽयुक्ते" रितिभाष्यंहृदिनिधायहेतूच्छित्तिंबाधकमाह ॥ विपक्षइति ॥ स्वरूपतइति ॥ स्वरूपतस्तीरत्वादिनारूपेणावग तस्यवाच्यार्थनदीसंबंधित्वेनचावगतस्यतीरादिरूपार्थांतरस्यलाक्षणिकोगंगादिशब्दोबोधकइत्यर्थः ॥ अन्यथेति ॥ किंतुपूर्व धीस्थेवाच्यार्थइत्युक्तप्रमेयानंगीकारइत्यर्थः ॥ अतिप्रसंगादिति ॥ गंगापदेनघटस्यापिलक्ष्यत्वप्रसंगइत्यर्थः । ज्ञेयत्वंचतस्य

विपक्षेलक्ष्यत्वंनस्यात् तथाहिलाक्षणिकशब्दोनश्रुतएवार्थांतरधीहेतुः तत्रागृहीतश क्तिकत्वात् किंतुपूर्वधीस्थेवाच्यार्थेनुपपत्तिदर्शनेसतितत्त्यागेनस्वरूपतोवाच्यार्थसंबं धित्वेनचावगतस्यार्थांतरस्यबोधकः । गंगाशब्दादौतथादर्शनात् । अन्यथातिप्रसंगाच्च । तथाचब्रह्मणोपिलक्ष्यत्वेवाच्यार्थसंबंधित्वेनज्ञेयत्वात् । औपनिषदत्वश्रुत्यावेदैकगम्यस्य चाशब्देनाज्ञेयत्वात् स्वप्रकाशतयानित्यसिद्धौचशब्दवैयर्थ्यात् अवाच्येचशब्दस्यलक्षक स्यैववक्तव्यत्वात् तत्रापिवाच्यसंबंधित्वेनज्ञेयत्वेनानवस्थेतिकथमवाच्येलक्षणा । एवंच "वाच्ययोगितयाबुद्धंलक्ष्यंब्रह्मचवैदिकं॥अवाच्यंचेतिवक्तव्येलक्षकेह्यनवस्थितिः"॥१॥

नशब्देतरप्रमाणेन वेदैकगम्यत्वात् तदपिकुतः "औपनिषदःपुरुष" इतिश्रुतेरित्याह ॥ औपनिषदत्वेति ॥ ननुवाच्यार्थसं बंधित्वादिनाब्रह्मज्ञानमपिशब्देनैवभवतीतिचेत्तत्राह ॥ अवाच्येचेति ॥ वाच्येति ॥ वैदिकंऔपनिषदंब्रह्मवाच्यसंबंधित

SGDF ... Foundation

याबुद्धंचेल्लक्ष्यं नान्यथा तद्बोधश्चनाशब्देनेतिवैदिकपदमेववक्तव्यं तेनापिब्रह्मवाच्यमितिपुनर्लक्षकएवपदेवक्तव्येसत्यनव स्थितिमाशंक्यपरिहरति ॥ नचेति ॥ शब्दैकेति ॥ तस्यापिगृहीतसंगतिकस्यैवबोधकत्वादनवस्थेत्यर्थः ॥ यौगिकेति ॥ पदानामितरत्रलोकेसंगतेर्गृहीतत्वात्तत्समुदायरूपवाक्येनसंगतिग्रहणानपेक्षेणार्थोऽपूर्वएवभासतइत्यंगीकारान्नानवस्थेत्याशयः।

नचवाचकस्यापिगृहीतसंगतिकस्यैवबोधकत्वात्संबंधग्रहणस्यचसंबंधिज्ञानाधीनत्वात्संबं धिनश्चब्रह्मणःशब्दैकगम्यत्वात्तत्राप्यनवस्थेतिवाच्यं । यौगिकशब्दानांवाक्यतुल्यत्वेन संगतिग्रहणानपेक्षणात्। एवमवाच्यंचेद्ब्रह्मनसिद्ध्येत् स्वतःसिद्धेर्निरस्तत्वात् औपनिष दत्वेनचाशब्देनासिद्धेः । लक्षकस्यचशब्दस्यवाच्यार्थसंबंधित्वेनज्ञातंप्रत्येवसाधकत्वेना वाच्यस्यासिद्ध्ययोगात्। ननुचात्रपक्षोब्रह्मपदवाच्यंचेत्सिद्धसाधनं लक्ष्यंचेद्विरोधः।अतए वावाच्यत्वेलक्ष्यत्वंनस्यादितितर्कोप्ययुक्तः । आपाद्यापादकयोरप्रसिद्ध्याव्याप्त्यसिद्धेश्च

अवाच्यत्वांगीकारेब्रह्मासिद्धिरूपंबाधकांतरंचाह ॥ एवमिति ॥ नसिध्येदिति ॥ प्रत्यक्षानुमानलौकिकशब्दानांब्रह्मण्यप्र वृत्तेः । वैदिकशब्दवाच्यत्वस्यचत्वयानंगीकारात्लक्षकस्यचशब्दस्यवाच्यार्थसंबंधित्वेनयेनपुंसाब्रह्मज्ञातंतंप्रत्येवसिद्धिजनकत्वे नवाच्यार्थसंबंधित्वेनज्ञानस्यचोक्तरीत्याऽसंभवेनावाच्यरूपब्रह्मासिध्ययोगादित्यर्थः ॥ ननुचात्रेति ॥ ब्रह्मवाच्यंलक्ष्यत्वादि

SGDF Sri Gargeshwari Digital Foundation

त्यत्रपक्षीभूतंब्रह्म ब्रह्मपदवाच्यमुतब्रह्मपदलक्ष्यं । नाद्यः ब्रह्मपदवाच्यंब्रह्मवाच्यमितिसाधनेसिद्धसाधनता । उपलक्षणमेतत् ममआश्रयासिद्धिश्च । द्वितीयेविरोधः एवमस्मानस्यपक्षाविवेकेनदुष्टत्वादनेनैवविकल्प्यदूषणेन अवाच्यत्वेलक्ष्यत्वंनस्यादितितर्कोऽप्ययुक्तः वाच्यत्वलक्ष्यत्वयोःकेवलान्वयित्वेनतदभावरूपापाद्यापादकयोरप्रसिद्धिश्चेत्यर्थः । तथाचैवंपक्षस्यविवेक्तुमशक्यत्वान्नवाच्यत्वानुमानंयुक्तमितिभावः । ननुब्रह्मणोऽवाच्यत्वेपिलक्ष्यत्वायोगेनत्वदभिमतंलक्ष्यत्वमपिनसिद्ध्येदितिचेन्न एवमुक्तरीत्यावाच्यत्वानुपपत्तौलक्ष्यत्वंस्वतएवसिद्धंभविष्यतीतिनपुनस्तत्रपृथक्प्रमाणंवक्तव्यमित्याशयेनतत्रसंमतिमाह ॥ उक्तंही

उक्तंहि "कथंलक्ष्यत्वमत्यंतावाच्यस्येतिनचोद्यतां । अत्यंतावाच्यशब्देनलक्ष्यस्यै
वावबोधनादि" तिचेन्न । वेदांततात्पर्यविषयत्वादिनारूपेणपक्षीकरणात् । अ
न्यथात्वदीयेऽवाच्यत्वानुमानेपिपक्षोवाच्यंचेद्विरोधः लक्ष्यंचेदाश्रयासिद्धिरि
तिस्यात् । अस्तिचयत्रप्रयोजकाभावस्तत्रप्रयोज्याभावइतिसामान्यव्याप्तिः ॥

ति ॥ अत्यंतावाच्यशब्देनैवेत्यन्वयः ॥ अन्यथेति ॥ वेदांततात्पर्यविषयीभूतंवस्त्वित्येवंरूपेणपक्षीकारेणब्रह्मअवाच्यंप्रवृत्तिनिमित्तशून्यत्वादितिवक्ष्यमाणानुमानेब्रह्मपदवाच्यंपक्षश्चेत्तत्रावाच्यत्वसाधनेविरोधः ब्रह्मपदलक्ष्यंपक्षश्चेन्ममाश्रयासिद्धिरित्यर्थः । ननुवेदांततात्पर्यविषयीभूतंब्रह्मअवाच्यंचेल्लक्ष्यंनस्यादित्यत्रवाच्यत्वलक्ष्यत्वयोःकेवलान्वयित्वेनापाद्यापादकयोरप्रसिद्ध्याव्याप्यत्वासिद्धिश्चेत्युक्तंदूषणंसामान्यव्याप्त्युक्त्यापरिहरति ॥ अस्तिचेति ॥ ननुस्यादियंव्याप्तिःयदिलक्ष्यत्वेवाच्यत्वंप्रयो

SGDF
Sri Gargeshwari Digital Foundation

जकंस्यादित्यतआह ॥ उक्ताचेति ॥ अनवस्थादिनाउपपादितेत्यर्थः ॥ व्यभिचारइति ॥ लक्ष्यत्वेपिवाच्यत्वाभावात्ब्रह्म वाच्यंलक्ष्यत्वादित्यनुमानेव्यभिचारइत्यर्थः ॥ माधुर्येति ॥ माधुर्यमित्येवंरूपोवाक्यार्थइत्येवंरूपोयःसाधारणशब्दस्तद्वाच्य त्वादित्यर्थः ॥ इत्युक्तत्वेनेति ॥ तथाचक्षीरमाधुर्यादेःसूदशास्त्रप्रसिद्धविशदाद्यसाधारणशब्दवाच्यत्वादित्यर्थः । वाक्यार्थ स्याप्यसाधारणशब्दवाच्यत्वमस्तिगवादिपदस्येतरान्वितस्वार्थवाचकत्वांगीकारेणगवादिपदस्यैववाक्यार्थभूतान्वयवाचकत्वादि

उक्ताचलक्ष्यत्वेवाच्यत्वस्यतंत्रता । नचेक्षुक्षीरमाधुर्यादौवाक्यार्थेचव्यभिचारः तस्यापिमाधु र्यवाक्यार्थादिसाधारणशब्दवाच्यत्वात् । "विशदंक्षीरमाधुर्यंस्थिरमाज्यस्यतीक्ष्णकं । गुडस्यपन सादीनांनिर्हारीत्यभिधीयत" इत्युक्तत्वेनअन्विताभिधानस्यान्यत्रसमर्थितत्वेनचासाधारणशब्द वाच्यत्वाच्च । अभिहितान्वयपक्षेपि वाक्यार्थोनोच्यते नापिलक्ष्यतेकिंत्वन्विताभिधानेविशे षान्वयइववृत्तिंविनैवसंसर्गमर्यादयाप्रतीयतइतितार्किकमतेवाक्यार्थेलक्ष्यत्वस्याप्यभावाच्च ।

त्याह ॥ अन्वितेति ॥ अभिहितान्वयवादिनांतार्किकाणांमतेतुवाक्यार्थस्यपदवृत्तिविषयत्वाभावेनतत्रलक्ष्यत्वस्यैवाभावेनन व्यभिचारइत्याह ॥ अभिहितेति ॥ पक्षेपितार्किकमतेचवाक्यार्थेलक्ष्यत्वस्याप्यभावादित्यन्वयः । तत्रदृष्टांतः ॥ अन्विते ति ॥ सामान्यतःकारकपदानांचक्रियान्वितेस्वार्थेशक्तिःक्रियापदानांचकारकान्वितेस्वार्थेशक्तिरितिपक्षेविशेषान्वयेपदवृत्तिंवि

नैवप्रतीयमानेलक्ष्यत्वाभाववत्वाक्यार्थेपिलक्षत्वाभावात् । तथाचपदवृत्तिंविनैवसंसर्गमर्यादयावाक्यार्थःप्रतीयतइतितार्किक मतेपिवाक्यार्थस्यलक्ष्यत्वाभावादित्यर्थः । अस्माभिस्तुसामान्यान्विताभिधानशक्तिरेवपदांतरसमभिव्याहारेणविशेषान्वयेपर्य वस्यतीत्यंगीकारेणशक्तिरूपपदवृत्तेरेवांगीकारात् वृत्तिंविनैवविशेषान्वयःप्रतीयतइत्यपिकेषांचिन्मतमितिद्रष्टव्यं । यदुक्तंवा क्यार्थस्यापिवाक्यार्थइतिसाधारणशब्देनैववाच्यत्वादिति तदयुक्तं वाक्यार्थशब्दस्यसमस्तवाक्यत्वेनवाचकत्वाभावात् किंतु लक्षकत्वमेव अतोव्यभिचारएवेत्याशंक्यनिषेधति ॥ नचेति ॥ समासस्यलक्षकत्वेपिवाचकत्वमप्यस्तीत्याह ॥समासस्येति॥

नचवाक्यार्थशब्दस्यसमासत्वेनलक्षकत्वात्नवाचकतेतिवाच्यं । समासस्यलक्षकत्वपक्षेपिरा जपुरुषइत्यत्रराजशब्दस्येववाक्यशब्दस्यषष्ठ्यर्थलक्षकत्वेपिपुरुषशब्दस्येवअर्थशब्दस्यवाचक त्वात् । एतेनसमासस्यवाक्यतुल्यत्वेनाभिहितान्वयेऽभिधानंविनैवस्वार्थबोधकतेतिनिरस्तं ।

समासस्यलक्षकत्वपक्षेपिनसमग्रपदानामपिलक्षकत्वं यथाराजपुरुषइतिषष्ठीसमासेराजशब्दस्यषष्ठ्यर्थस्यराजसंबंधित्वस्यलक्षक त्वेपिपुरुषशब्दस्तुनलक्षकः किंतुमुख्यार्थएव एवंवाक्यस्यार्थोवाक्यार्थइत्यत्रापिवाक्यशब्दस्यषष्ठ्यर्थस्यवाक्यसंबंधित्वस्यलक्ष कत्वेपिअर्थशब्दस्तुमुख्यार्थएवातोनसमस्तवाक्यार्थशब्दस्यलक्षकत्वमेवेत्यर्थः । पुरुषशब्दस्येवार्थशब्दस्यवाचकत्वादित्यन्वयः। समासस्य वाक्यार्थशब्दस्य अभिधानंविनैव पदशक्तिंविनैवेत्यर्थः ॥ स्वार्थेति ॥ लक्षणयावाक्यार्थबोधकतेत्यर्थः । तथाचवा

SGDF Foundation

क्यार्थेव्यभिचारइतिभावः । एतेनेत्युक्तमेवविशदयति ॥ वाक्येति ॥ अर्थपदेति ॥ तथाचसाध्यस्यापिसत्वान्नव्यभिचारइ त्यर्थः । रूढयइत्यत्ररूढिःसंकेतः । अमीषांमध्ये घटादाविवेतिमायावादिशिष्यस्यैवशंका नतत्ववादिनइत्यवधेयं । घटादौघट त्वादिकमेवारोपितं आरोपितंव्यावहारिकं निमित्तं गुणादिरूपं । तथाचवाच्यत्वंयुक्तमितिभावः ॥ अयोगेनेति ॥ अतत्वावे

वाक्यशब्दार्थशब्दयोर्यावर्थौतत्संसर्गत्वेनरूपेणसमासावाच्यत्वेपिअर्थत्वरूपेणार्थपद वाच्यत्वात् । ननुप्रवृत्तिनिमित्ताभावात्कथंवाच्यत्वं । उक्तंहि "दृष्टागुणक्रियाजातिरू ढयःशब्दहेतवः । नात्मन्यन्यतमोऽमीषांतेनात्मानाभिधीयत" इति । नचघटादावि वारोपितंनिमित्तमस्तीतिशंक्यं । आरोपितेश्रुतितात्पर्यायोगेनतात्पर्यविषयस्यवाच्य त्वायोगादितिचेन्न । सत्यादिशब्दानांलक्षकत्वेसिद्धेनिमित्ताभाव स्तस्मिंश्चसिद्धेलक्ष कत्वमित्यन्योन्याश्रयात् । स्वरूपमात्रप्रश्नोत्तरत्वेनतल्ल(क्षकते)क्ष्यतेत्यस्यचनिरासात् ।

दकत्वेनाप्रामाण्यापत्त्याआरोपितनिमित्तेश्रुतितात्पर्यायोगात् तथाचश्रुतितात्पर्यविषयस्य "श्रुतितात्पर्यविषय" निमित्तशून्य स्यवाच्यत्वायोगादित्यर्थः ॥ तस्मिंश्चसिद्धइति ॥ वाचकत्वाभावेसिद्धइतिशेषः । ननुसत्यादिपदानांस्वरूपमात्रप्रश्नोत्तरत्वे नतयोर्वैयधिकरण्यानुपपत्त्यैवलक्षकत्वमंगीक्रियते नतुनिमित्ताभावेनातोनान्योन्याश्रयइत्यतआह ॥ स्वरूपमात्रेति ॥ किंच

SGDF Sri Gargeshwari Digital Foundation

ब्रह्मणिसत्यादिपदप्रवृत्तिनिमित्तगुणाभावःकुतः निर्विशेषत्वप्रतिपादकवाक्यविरोधादितिचेन्न । तस्यापिब्रह्मस्वरूपमात्रेतात्पर्ये उतनिर्विशेषत्वादिविशिष्टे । नाद्यइत्याह ॥ निर्विशेषेति ॥ निर्विशेषत्वप्रतिपादकेत्यर्थः ॥ सत्यत्वादीति ॥ विशेष्यपरविशिष्टपरवाक्ययोरविरुद्धत्वेनस्वरूपमात्रपरनिर्विशेषवाक्यस्यनिर्विशेषत्वेतात्पर्याभावेनसत्यत्वादिवैशिष्ट्यप्रतिपादकसत्यादिवा

निर्विशेषवाक्यस्यचस्वरूपमात्रपरत्वेसत्यत्वाद्यविरोधात् । तस्यनिर्विशेषत्वविशिष्टपरत्वे तुनिमित्तस्यसत्वेननिर्विशेषशब्दवाच्यत्वापातात् । अभावनिमित्तकशब्दवाच्यत्वेचनिर्गुणत्वभंगेउक्तरीत्याप्रामाणिकत्वाविशेषेणभावनिमित्तकशब्दवाच्यत्वस्यापिदुर्वारत्वात् । तस्माद्ब्रह्मणिसर्वेषांवैदिकशब्दानांलक्षणेत्येतदयुक्तं । उक्तंहि "एकस्यापिचशब्दस्यगौणार्थस्वीकृतौसतां । महतीजायतेलज्जायत्रतत्राखिलारवाः ॥ १ ॥ अमुख्यार्थाइतिवदन्यस्तन्मार्गानुवर्तिनां ॥ कथंनजायतेलज्जावक्तुंशाब्दत्वमात्मनः" ॥ २ ॥ इति ।

क्याबाधकत्वादितिभावः । द्वितीयेत्वाह ॥ निमित्तस्येति ॥ निर्विशेषत्वविशिष्टेतात्पर्येनिर्विशेषशब्दप्रवृत्तिनिमित्तस्यापिश्रुतितात्पर्यविषयत्वेनसत्वात्तन्निमित्तकनिर्विशेषशब्दवाच्यत्वंस्यादित्यर्थः । ननुनिर्विशेषत्वरूपप्रवृत्तिनिमित्तस्याऽभावरूपत्वात्तन्निमित्तकनिर्विशेषशब्दवाच्यत्वमंगीकृतं । नतुसत्यत्वादिभावरूपप्रवृत्तिनिमित्तकसत्यादिपदवाच्यत्वमितिचेत्तत्राह ॥अभावे

SGDF
Sri Gargeshwari Digital Foundation

ति ॥ वक्ष्यमाणमुपक्षिपन्नुपसंहरति ॥ तस्मादिति ॥ ७ ॥ अवाच्यत्वभंगविवरणं ॥ ७ ॥ १३ ॥ निरपेक्षत्वेति ॥
प्रतियोग्यादिनिरपेक्षधर्म्यभिन्नत्वाद्भेदस्यापिनिरपेक्षत्वंस्यादित्यर्थः ॥ अनवस्थेति ॥ भेदस्यधर्मत्वमंगीकृत्यभिन्नत्वांगीकारे
भेदपरंपरयाऽनवस्थेत्यर्थः ॥ भेदेप्रतीतइति ॥ तथाचकुंभस्यस्तंभधर्मिकभेदंप्रतिप्रतियोगित्वसिद्धिरित्यर्थः । भिन्नत्वेनज्ञातस्यै

तस्माद्यौगिकानंतवैदिकशब्दवाच्यत्वादनंतगुणंब्रह्मजीवादिभिन्नमिति ॥ ७ ॥
अवाच्यत्वभंगः ॥ ७ ॥ १३ ॥ यच्चेदमुच्यते भेदःकिंस्वरूपंधर्मोवा । नाद्यः निर
पेक्षत्वाद्यापातात् । नांत्यः अनवस्थाद्यापत्तेः । कुंभस्यस्तंभाद्भेदेप्रतीतेस्तंभस्यकुं
भाद्भेदधीरित्यन्योन्याश्रयाद्यापत्तेश्चेति । अत्रब्रूमः किंभेदप्रतीतिरेवनास्तीत्यु
च्यते किंवासाकारणजन्यानेति उतबाध्यविषयेति। नाद्यः भेदभ्रमनिरासायवे
दांतश्रवणाद्ययोगात् । भेदाप्रतीतौबहुयत्नैस्तन्निरासायोगाच्च । स्वपरपक्षदूषण
भूषणादेर्भेदाप्रतीतौबहुविप्लवापत्तेश्च । भेदःस्वरूपंधर्मोवेतिविकल्पायोगाच्च ।

वप्रतियोगित्वादितिभावः ॥ किंभेदेति ॥ निरपेक्षत्वानवस्थादिदूषणेनेतिशेषः ॥ बाध्येति ॥ बाध्यभूतभेदविषयेत्यर्थः ॥
तन्निरासेति ॥ भेदनिरासेत्यर्थः ॥ भेदःस्वरूपमिति ॥ स्वरूपधर्मयोर्भेदानवगमेतयोरभेदेनपर्यायत्वापत्त्यास्वरूपंधर्मोवे

तिसहप्रयोगेनविकल्पोनस्यादित्यर्थः । तदेवोपपादयति ॥ नहीति ॥ अयंघटोवाकरीरोवेतिविकल्पादर्शनादित्यर्थः ॥ नित्यत्वे
ति ॥ उक्तदूषणेनभेदप्रतीतेःकारणाजन्यत्वेननित्यत्वप्राप्त्याब्रह्मज्ञानानिवर्त्यत्वप्राप्तेर्मायावादिनःस्वप्रातिकूल्याचरणप्रसंगइत्य
र्थः ॥ श्रुत्यादिनेति ॥ "अद्वितीय" मितिश्रुत्यादिनेत्यर्थः । तद्वदेव निरपेक्षब्रह्मस्वरूपवदेव ऐदंपर्यं इदंपरत्वं । ब्रह्मणिता

नहिपर्यायेणविकल्पःसंभवति । द्वितीयेकारणाजन्यत्वमजन्यत्वेनवास्यात् अकारणज
न्यत्वेनवास्यात् । नाद्यः भेदप्रतीतेर्नित्यत्वापत्त्यास्वप्रातिकूल्याचरणापातात् । नद्विती
यः । व्याघातात् । जनकस्यैवकारणत्वात् । तृतीयेपि किंशुष्कतर्कैरेवभेदस्यबाध्यत्वाध्य
वसायः श्रुत्यादिनावा । नाद्यः ऐक्यस्यापिब्रह्मस्वरूपत्वेतद्वदेवनिरपेक्षत्वाद्यापातात् धर्म
त्वेऽनवस्थेत्यादितर्कबाध्यत्वसाम्यात् । त्वयैववेदांतानामैदंपर्यंदर्शयितुमिदंशास्त्रंप्रवृत्तं
नतर्कशास्त्रवत्केवलाभिर्युक्तिभिःकंचित्सिद्धांतंसाधयितुंदूषयितुंवाप्रवृत्तमित्युक्तत्वाच्च ।
एवंच "भेदःस्वरूपंधर्मोवेत्यादिरूपाविभीषिका ॥ अकारमात्रप्रक्षेपेस्यादभेदविभीषिका" ।

त्पर्ययुक्तत्वमित्यर्थः । इदंशास्त्रं मीमांसाशास्त्रं ॥ इत्युक्तत्वादिति ॥ तथाचशुष्कतर्कैरेवबाध्यत्वोक्तौतद्विरोधइत्यर्थः ॥
अकारमात्रेति ॥ भेदःस्वरूपंधर्मोवेत्यत्रअभेदःस्वरूपंधर्मोवेत्यकारप्रक्षेपेभेदपक्षोक्तविकल्पादेरभेदपक्षेपिसाम्यादितिभावः

SGDF

॥ भेदेति ॥ तथात्वेहितत्रविकल्पप्रसरइतिभावः ॥ ऐक्यसिद्धिरिति ॥ तथाचतत्रपृथक्प्रमाणंनोच्यते येनतत्रोक्तदूषणप्रसरइतिभावः ॥ साध्यइति ॥ तथाचाभेदस्यमयाऽसाध्यत्वान्नोक्तदोषइतिभावः । ननुजल्पादौस्वपक्षस्यभेदस्यस्थाप्यत्वात्तत्रचोक्तदोषइत्यतआह ॥ स्वपक्षस्येति ॥ अभेदस्येत्यर्थः । तत्रचोक्तदूषणमितिभावः । वितंडायांमयाऽभेदस्यासाध्यत्वान्नोक्तदोषइतिचेत्तत्राह ॥ वितंडायांत्विति ॥ ननुवितंडायामभेदवादिनोममैवाधिकारः ममपक्षपरिग्रहशून्यत्वेनस्थाप्यपक्षाभा

भेदाभावादन्यदैक्यंनास्तीतिचेदैक्याभावादन्योभेदोनास्तीतिसमं । भेददूषणेनैवैक्यसिद्धिश्चेदैक्यदूषणेनैवभेदसिद्धिःस्यात् । एवंच “भेदस्यखंडनेनैवयद्यभेदःप्रसिध्यति । अभेदखंडनेनैवतर्हिभेदोपिसिद्ध्यतु” । भेदएवदूष्योस्माकंनत्वभेदःसाध्यइतिचेत् अभेदएवदूष्योस्माकंनतुभेदःसाध्यइतिसमं । स्वपक्षस्यजल्पादौत्वयापिस्थाप्यत्वात् । वितंडायांतुमयाप्यस्थाप्यत्वात् । नचवितंडातवैवेतिनियमः । सत्यपिपक्षपरिग्रहेतवेवममापितदातदस्थापनेनवितंडाधिकारात् । अन्यथातार्किकादेःशब्दानित्यत्वादौमीमांसकादिनासहवितंडानस्यात् ।

वात् तवतुनवितंडायामधिकारः पक्षपरिग्रहवत्त्वात् अतःभेदसाधनेनतवोक्तदूषणंस्यान्नममेतिचेत्तत्राह ॥ नचेति ॥ तवैवेति ॥ अभेदवादिनएवेत्यर्थः । किंतुतत्त्ववादिनोममाप्यस्तीतिभावः । ननभेदवादिनस्तवपक्षपरिग्रहवत्त्वान्नवितंडेतिचेत्तत्राह ॥ सत्यपीति ॥ ममेतिशेषः । तदा वितंडावस्थायां । तदस्थापनेन परिगृहीतभेदपक्षासाधनेन ॥ अन्यथेति ॥ पक्षपरिग्रहस्य

SGDF
Sri Gargeshwari Digital Foundation

वितंडानधिकारप्रयोजकत्वइत्यर्थः । शब्दानित्यत्वादौ विषये । मीमांसकादिना शब्दनित्यत्ववादिना । वितंडा तदसाधन रूपा तार्किकःस्वपरिगृहीतशब्दानित्यत्वमप्रसाध्यमीमांसकाभिमतशब्दनित्यत्वमेवखंडयतीतिवितंडास्ति सानस्यात् तार्किक स्यपक्षपरिग्रहवत्त्वादितिभावः । एवंशब्दनित्यत्वादौमीमांसकादेस्तार्किकादिनासहवितंडानस्यादित्यपिद्रष्टव्यं । किंचवितंडात त्ववादिनोममैवयुक्तः ममसज्जनत्वात् नतव तवासज्जनत्वादित्याह ॥ उक्तंचेति ॥ किंचपक्षपरिग्रहहीनत्वस्यनवितंडाधिकार

उक्तंच "वितंडातुसतामन्यैस्तत्वमेषुनिगूहित" मिति । पक्षपरिग्रहहीनस्यतुनिर्मर्यादस्यापसि द्धांतादिनिग्रहानर्हतयानवितंडायामप्यधिकारः। नाप्यौपनिषदंमन्यस्यापितववितंडैवेतिनियमः। त्वदिच्छाननुसारित्वात्प्राश्निकानां । उपनिषदांपरपक्षनिरासमात्ररूपत्वाभावाच्च । परपक्षनिरास केनद्वितीयाध्यायेनैवगतार्थत्वेनस्वपक्षसाधनार्थानामाद्याद्यध्यायानांवैयर्थ्यापाताच्च । भाषितं चत्वयैवाद्यद्वितीययोःसंगतिंदर्शयतास्वपक्षसाधनंप्रथमंकृतंतद्ध्यभ्यर्हितंपरपक्षप्रत्याख्यानादिति।

प्रयोजकत्वं तथात्वेवितंडायामपसिद्धांतादिनिग्रहोद्भावनंनस्यात् तदंगीकृतसिद्धांताभावादित्याह ॥ पक्षेति ॥ ननूपनिषदां परपक्षनिरासमात्ररूपत्वेनौपनिषदंमन्यस्यममाऽपिवैदिकतयासज्जनत्वाद्वितंडैवेतिचेत्तत्राह ॥ नापीति ॥ त्वदिच्छेति ॥ तथाचतैःस्वपक्षोऽभेदस्त्वयासाध्यइत्युक्त्वाममवितंडादानेऽभेदस्यत्वयासाधनीयत्वेनोक्तदूषणंस्यादेवेत्यर्थः । किंचोपनिषदांप रपक्षनिरासमात्ररूपत्वाभावाच्चौपनिषदंमन्यस्यतवनवितंडेत्याशयेनाह ॥ उपनिषदामिति ॥ आद्यादीति ॥ समन्वयसाध

SGDF
Sri Gargeshwari Digital Foundation

नफलाध्यायानां त्वया तत्ववादिना मायावादिना ॥ कथमिति ॥ तथाचेत्थंसमयबंधदशायांस्वपक्षस्यस्थापनीयत्वेतत्रोक्तदू
षणंभवतांस्यादेव नममेतिभावः । त्वयास्थाप्यंमयादूष्यमित्येवंसामान्याकारेणसमयबंधएवायुक्तः मयामदनभिप्रेतप्रमेयस्या
स्थाप्यत्वात् त्वयापित्वदभिमतस्यादूष्यत्वेनसामान्यतःसमयबंधेस्वानभिप्रेतस्यापिस्थाप्यत्वापत्तेः स्वाभिमतस्यापिदूष्यत्वाप

त्वयास्थाप्यं मयादूष्यमिति समयबंधेकथमितिचेन्न । मयापिस्वानभिमतस्यास्थाप्यत्वेन
त्वयापिस्वाभिमतस्यादूष्यत्वेनतथासमयबंधायोगात् । त्वयाभेदःस्थाप्यःमयादूष्यइतितद्बंधेकथ
मितिचेत् । त्वयैक्यंस्थाप्यंमयादूष्यमितितद्बंधेकथं । तदापिअस्वव्याघातकैरेवत्वयाऐक्यंदूष्यमि
तिचेत् । भेदेपितथेतिनस्वव्याघातकैर्भेददूषणंयुक्तं । ब्रह्मातिरिक्तमैक्यमेवनास्तीतिचेत् घटाद्यति
रिक्तोभेदोपिनास्तीतिसमं । श्रुतिविरोधादैक्यदूषकास्तर्काआभासाइतिचेत् प्रत्यक्षादिविरोधा
द्भेददूषकाअपितथेतिसमं । प्रत्यक्षंतर्कविरोधादप्रमाणंचेच्छ्रुतिरपितद्विरोधादुपचरितार्थेतिसमं ।

त्तेश्च अतोनैवंसमयबंधोयुक्तइत्याह ॥ मयापीति ॥ अस्वव्याघातकैरिति ॥ अभेदःकिंस्वरूपंधर्मोवेतिदूषणंतुस्वव्याघा
तकं भेदेपिसंभवादितिभावः ॥ भेदेपीति ॥ अस्वव्याघातकैरेवदूषणैर्भेदोदूष्यः । भेदःस्वरूपंधर्मोवेत्यादिदूषणंचस्वव्याहत
मितिभावः ॥ नास्तीति ॥ तथाचभवदुक्तदूषणविषयएवनास्तीतिभावः । अभेदनिरासः अभेदमात्रनिरासः । स्वव्याहत्युप ॥५४३॥

पादनायोक्तं ॥ स्वस्येति ॥ स्वस्मिन्स्वाभेदांगीकारादितिभावः । भेदनिरासो भेदमात्रनिरासः । अत्रापिस्वव्याहत्युपपादना
योक्तं ॥ ब्रह्मणइति ॥ ब्रह्मण्यनृतव्यावृत्त्यंगीकारादित्यर्थः । ननुस्वस्मिन्स्वाभेदस्यसत्वात्स्वाभेदोमिथ्येत्यंगीकारेसत्यंनस
त्यमित्युक्तंस्यात् तथाचविरुद्धतेतिचेत् तर्हिसत्यस्यब्रह्मणोऽनृताद्भेदस्यमिथ्यात्वेसत्यमसत्येभ्योभिन्नंनेत्युक्तंस्यात् तथाचसत्य
स्यासत्याभेदप्राप्त्याविरुद्धतास्यादितिसममित्याह ॥ नहीति ॥ अधिकाविरुद्धतानह्यस्ति विरुद्धत्वंसममितियावदित्यर्थः ।

त्वन्मतेपिस्वस्यस्वाभिन्नत्वादभेदनिरासःस्वव्याहतइतिचेत् त्वन्मतेपिब्रह्मणोऽनृताद्भिन्नत्वा
द्भेदनिरासोपिस्वव्याहतइतिसमं । ब्रह्मणोऽनृतादपिभेदोमिथ्येतिचेन्न स्वस्यस्वाभेदोपिमिथ्ये
तिसुवचत्वात् । "नहिसत्यमसत्येभ्योभिन्नंनेत्युक्तितोपिच । सत्यंनसत्यमित्युक्तावधिकास्ति
विरुद्धता" । एवंच "शुष्कतर्कैर्भेदबाधेस्यादभेदोपिबाधितः । प्रमितत्वात्तत्रतर्कास्तुच्छाश्चे
त्प्रकृतेनकिं" । नद्वितीयः श्रुतेःसाक्षिप्रत्यक्षाद्यबाधकत्वस्योक्तत्वात् । श्रुत्यादेःसम्यग्व्या
ख्यातत्वाच्च । प्रत्यक्षस्यापिभाविबाधकशंकाभंगेउक्तन्यायैर्भेदधीबाधकत्वासंभवाच्च ।

प्रकृते भेदविषये ॥ नद्वितीयइति ॥ श्रुत्यादिनाबाध्यत्वाध्यवसायइतिद्वितीयोपिनेत्यर्थः ॥ साक्षीति ॥ जीवेशभेदग्राह
कसाक्षिप्रत्यक्षेत्यर्थः ॥ श्रुत्यादेरिति ॥ अभेदबोधकाद्वितीयश्रुत्यादेरित्यर्थः ॥ प्रत्यक्षस्येति ॥ प्रत्यक्षेयाभाविबाधकशंका
तद्भंगइत्यर्थः ॥ बाधकेति ॥ कॢप्तस्यकल्प्यमानस्यवाबाधकस्याभावादित्यर्थः । ननुकॢप्तस्यबाधकस्याभावेपिकल्प्यमानमस्त्वि

SGDF

तिचेन्न । भाविबाधेपिबाधकल्पनापातादित्युक्तत्वात् । दूषणांतरंचाह ॥ किंचेति ॥ यत्किंचिद्गोचरत्वंकुतोवक्तव्यमित्यतआह ॥ निरालंबनेति ॥ ननुअभेदइत्यत्रनञस्तदन्यत्वरूपार्थपक्षेऽन्यशब्देनैवभेदप्राप्त्यातस्यदुष्परिहरत्वेपितद्विरुद्धत्वतदभावत्वरूपार्थद्वयपक्षेकथंभेदस्यदुष्परिहरत्वमित्यतआह ॥ तदनन्यत्वेचेति ॥ लोकेघटस्यघटानन्यत्वेनघटविरुद्धत्वघटाभावत्वयोरयोगदर्शनात्प्रकृतेपिभेदानन्यत्वेभेदविरुद्धत्वादेरयोगेनतदंगीकारेतद्व्याप्यमन्यत्वमप्यंगीकार्यमितिभेदोदुष्परिहरइत्यर्थः ।

किंचकल्प्यमानमपिबाधकंकिंभेदमेवगोचरयेत् उताभेदं यद्वा यत्किंचिन्निरालंबनज्ञानायोगात् । नाद्यः साधकत्वात् । द्वितीयेतदन्यस्तद्विरोधीतदभावोवानञर्थोवाच्यः पक्षत्रयेपि दुष्परिहरोभेदः । तदनन्यत्वेचतद्विरुद्धत्वतदभावत्वयोरयोगात् । भेदाभावादिग्राहिणापिप्रतियोगिविलक्षणतयैवस्वविषयस्यग्राह्यत्वाच्च । औदासीन्येनप्रवृत्तस्यइदमितिज्ञानवद्बाधकत्वात् अतएवनतृतीयः । एतेनबाधकंभेदभ्रमाधिष्ठानतत्वगोचरमितिनिरस्तं ।

ग्राहिणा बाधकेन ॥ प्रतियोगीति ॥ भेदरूपेत्यर्थः ॥ विलक्षणतयेति ॥ तथाचवैलक्षण्यस्यभेदरूपत्वेनतदवगाहिनःप्रमाणस्यनभेदधीबाधकत्वमित्यर्थः । बाधकप्रमाणंप्रतियोगिवैलक्षण्येनस्वविषयंनगृह्णाति किंत्वौदासीन्येनेतिचेत्तत्राह ॥ औदासीन्येनेति ॥ प्रतियोगिवैलक्षण्यादिप्रकारानवगाहितयेत्यर्थः ॥ अतएवेति ॥ यत्किंचिदितिज्ञानस्यइदमितिज्ञानवद्भेद

SGDF
Sri Gargeshwari Digital Foundation

धीबाधकत्वाभावादेवेत्यर्थः । अधिष्ठानतत्वं ब्रह्मस्वरूपं तस्यापि अधिष्ठानतत्वस्यापि ॥ तज्ज्ञानस्येति ॥ अध्यस्तभेदप्रति योगिकभेदरहितंअध्यस्तभेदविलक्षणत्वेनागृहीतंयत्भेदभ्रमाधिष्ठानतत्वंतद्गोचरस्यबाधकज्ञानस्यइदमितिज्ञानवदबाधकत्वा दित्यर्थः ॥ नेदमिति ॥ इदंरजतमितिभ्रमेसतियथानेदंरजतमितिबाधकज्ञानंभवति एवंभेदभ्रमेसतिनायंभेदइतिबाधकेनभ

तस्यापिभेदाद्भेदाभावेभेदविलक्षणत्वेनाग्रहणेचतज्ज्ञानस्यभेदबाधकत्वायोगात् । किंच नायंभेदइतिवा नास्त्यत्रभेदइतिवा अन्यदेवभेदात्मनाप्रत्यभादितिवा बाधकज्ञानेनभवितव्यं नेदंरजतमित्यादिवत् । तदेतत्सर्वथाभेदावगाहीतिकथंतद्बाधकं । एकमेवानेकात्मनाप्रत्यभादिति ज्ञानंबाधकमितिचेन्न । एकानेकयोर्वस्तुतोभेदाभावेवैलक्षण्याग्रहणेचतस्यबाधकत्वायोगात् । एवंच "भेदाद्भिन्नतयास्वार्थबाधधीर्गाह्यतेनवा । आद्येभेदःस्थिरोऽन्त्येतुनसास्याद्भेदबाधिका ॥ १ ॥ तस्मात्कॢप्तविषयत्वात्नान्योन्याश्रयतादेरुत्थानं । उत्थितस्यभवेदाभासत्वं । एतेनयदुक्तंखंडने ।

वितव्यमित्यर्थः ॥ इत्यादिवदिति ॥ नास्त्यत्ररजतमितिवत्अरजतमेवरजतात्मनाप्रत्यभादितिवदित्यर्थः ॥ तदेतदिति ॥ आद्येद्वितीयेचबाधकज्ञानेअधिकरणप्रतियोगिनोर्भेदआवश्यकः तृतीयेऽन्यदेवेत्युक्त्यास्पष्टंभेदावगाहित्वमितिमंतव्यं ॥ अयोगादिति ॥ इदमितिज्ञानवदित्यर्थः ॥ नसेति ॥ इदमितिज्ञानतुल्यत्वादित्यर्थः ॥ भेदेति ॥ प्रमाणप्रमितभेदेत्यर्थः ॥

S.M.S.A. SABHA LIBRARY BANGALORE
SGDF
Sri Gargeshwari Digital Foundation

भवेदिति ॥ प्रमाणविरोधादेवेत्यर्थः ॥ निर्वचनवादिनीति ॥ यस्तुपदार्थान्निरुच्यव्यवस्थापयतितंप्रतीदंदूषणंशोभते ना
निर्वचनीयवादिनंमांप्रतीत्यर्थः । अनिर्वाच्यो वक्तुमशक्यः । एतेनेत्युक्तंविवृणोति ॥ तर्केति ॥ स्वज्ञानेति ॥ घटादिज्ञाने
त्यर्थः ॥ अन्यथेति ॥ अनृतादिव्यावृत्तेरपिअनृतत्वादिवत्ब्रह्मज्ञानबाध्यत्वेनमिथ्यात्वांगीकारइत्यर्थः ॥ भ्रांत्यंतरेति ॥

निर्वचनवादिनीदंशोभते नास्मासु प्रतिभासमानोयंभेदःस्वरूपादिपक्षांतर्भावबहिर्भावाभ्यां
सदसत्त्वाभ्यांवाअन्येनापिधर्मेणवाऽनिर्वाच्यइत्यंगीकारादिति । तन्निरस्तं । तर्कबाधमात्रेणा
निर्वाच्यत्वेऐक्यस्यापितत्प्रसंगात् । किंच त्वयापिअनृतजडदुःखपरिच्छिन्नाद्यनात्मकेब्रह्मणि
अनृतादिव्यावृत्तिर्ब्रह्मज्ञानाबाध्येतिवाच्यं शून्याद्यनात्मकेघटादौशून्यादितःस्वज्ञानाबाध्यभे
ददर्शनात् । अन्यथानृतादिव्यावृत्तिबोधनेनतद्भ्रांतिनिवारकस्यसत्यज्ञानादिवाक्यस्यभ्रांत्यंत
रहेतुत्वंस्यात् । ब्रह्मण्यनृतत्वादेरधिष्ठानज्ञानाबाध्यात्यंताभावप्रतियोगित्वरूपंमिथ्यात्वंच
नस्यात् । उक्तंचैतद्देहात्मैक्याध्यासभंगे । नचप्रतियोगिनोऽनृतत्वात्ततोव्यावृत्तिरप्यनृता ।

मुमुक्षोर्ब्रह्मण्यनृतत्वादिभ्रांतिंवारयितुंप्रवृत्तेनसत्यादिवाक्येनपुनरनृतव्यावृत्तिभ्रांत्युत्पादनायोगादित्यर्थः ॥ नस्यादिति ॥ ॥ ५४५ ॥
अनृतत्वादिव्यावृत्तिरूपस्यानृतत्वाद्यत्यंताभावस्याधिष्ठानभूतब्रह्मज्ञानबाध्यत्वांगीकारादुक्तरूपमिथ्यात्वंनस्यादित्यर्थः ॥ अनृते

ति ॥ प्रतियोगिभूतंयदनृतत्वंतस्यब्रह्मण्यनृतत्वेनतत्प्रतियोगिकत्वात्तत्रव्यावृत्तिरप्यनृतेत्यर्थः ॥ प्रातिभासिकत्वापत्त्ये
ति ॥ प्रातिभासिकरूप्यप्रतियोगिकाभेदस्येवरूप्यभेदस्यापिरूप्यप्रतियोगिकत्वेनप्रातिभासिकत्वेत्यर्थः ॥ इष्टापत्तिपरिहारायो
क्तं ॥ बाधगम्यस्येति ॥ अयोगादिति ॥ भ्रांतिबाधयोरुभयोरपिप्रातिभासिकरूप्याभेदरूप्यभेदविषयकत्वाविशेषादित्य
र्थः । इतोपिभेदनिराकरणंतवायुक्तमित्याह ॥ एवमिति ॥ मिथ्यात्वमिति ॥ देहात्सदात्मनोभेदस्यात्मज्ञानबाध्यत्वेदेहा

शुक्तौरूप्याभेदवत्बाधगम्यस्यतद्भेदस्यापिप्रातिभासिकत्वापत्त्याभ्रांतिबाधव्यवस्थायोगात् ।
विस्तृतंचैतन्मिथ्यात्वभंगे । एवमात्मनिदेहात्आत्मज्ञानाबाध्यभेदाभावेदेहात्मैक्यस्यमिथ्यात्वं
नस्यादितित्वर्दायातदैक्याध्यासोक्तिरयुक्तास्यात् । तथानित्यस्यानित्यात्तात्विकभेदाभावेसाध
नचतुष्टयांतर्गतोनित्यानित्यवस्तुविवेकोभ्रमःस्यादितितेनानित्यहानेननित्येप्रवृत्तिरयुक्तास्यात् ।

त्मैक्यस्याधिष्ठानज्ञानाबाध्यात्यंताभावप्रतियोगित्वरूपमिथ्यात्वंनस्यात् । देहात्मभेदस्यदेहात्मैक्यात्यंताभावरूपत्वात्तस्यचा
धिष्ठानभूतात्मज्ञानबाध्यत्वांगीकारादितिभावः ॥ अयुक्तेति ॥ उक्तरीत्यादेहात्मैक्यस्यमिथ्यात्वाभावेतदैक्यस्याध्यस्तत्वो
क्तिरयुक्तेत्यर्थः । किंचनित्यानित्यवस्तुविवेकःशमदमादिसंपत्तिर्वैराग्यंमुमुक्षेतिसाधनचतुष्टयमध्येनित्यानित्यवस्तुविवेकाख्यंसा
धनमंगीकुर्वताऽवश्यंतात्विकोभेदोंगीकार्यः कुतइतिचेत्तत्राह ॥ तथेति ॥ तेन भ्रमरूपविवेकेन । इतोपिनतवभेददूषणंयुक्त

SGDF

मित्याह ॥ एवमिति ॥ अन्यथेति ॥ प्रपंचनिष्ठसद्वैलक्षण्यस्याधिष्ठानभूतब्रह्मज्ञानबाध्यत्वेपरस्परविरुद्धयोरितिन्यायेनप्रपंचसत्वस्याधिष्ठानज्ञानाबाध्यसत्वापातादित्यर्थः ॥ जगन्मिथ्यात्वेति ॥ सद्वैलक्षण्यरूपानिर्वाच्यत्वाख्यमिथ्यात्वस्याधिष्ठानज्ञानबाध्यत्वांगीकारेणमिथ्यात्वादित्यर्थः । एवंचसद्वैलक्षण्यरूपभेदस्याधिष्ठानज्ञानाबाध्यत्वमंगीकार्यमितिभावः । किंचाभेदभेदयोरेवांततस्तात्विकोभेदोंगीकार्यइतिनतद्दूषणंतवयुक्तं । नन्वभेदभेदयोर्भेदःकुतोंगीकार्यइतिचेत्तत्राह ॥ एवमिति ॥

एवंप्रपंचेसद्वैलक्षण्यादिरूपमनिर्वाच्यत्वमधिष्ठानज्ञानाबाध्यमितिवाच्यं । अन्यथाऽधिष्ठानज्ञानाबाध्यसत्वापातात् । जगन्मिथ्यात्वप्रमाणानामतत्वावेदकत्वापाताच्च । एवमभेदस्यभेदात्तात्विकभेदाभावेतयोरभेदस्तात्विकःस्यादितिभेददोषैरभेदबाधनंअभेदप्रमाणैर्भेदसाधनंचस्यात् । नचतात्विकभेदाभावेपितात्विकाभेदाभावमात्रेणव्यवस्थेतिवाच्यं । अभेदाभावेभेदध्रौव्यात् ।

अस्त्वितिचेत्तत्राह ॥ भेददोषैरिति ॥ स्यादिति ॥ अभेदभेदयोरेकत्वादितिभावः ॥ तात्विकेति ॥ अभेदभेदयोरितिशेषः ॥ व्यवस्थेति ॥ भेददोषैर्भेदस्यैवबाधनंअभेदप्रमाणैरभेदस्यैवसाधनमित्येवंरूपाव्यवस्थेत्यर्थः ॥ भेदेति ॥ परस्परविरुद्धयोरितिन्यायेनभेदाभेदयोस्तात्विकाभेदाभावेतात्विकभेदध्रौव्यादित्यर्थः । ननूक्तव्यवस्थार्थअभेदभेदयोस्तात्विकभेदःकुतो

SGDF
Sri Gargeshwari Digital Foundation

ङ्गीकार्यः व्यावहारिकभेदेनोक्तव्यवस्थोपपत्तेरित्याशंक्यनिषेधति ॥ नचेति ॥ कल्पितेनेति ॥ एवंचत्वन्मतेअभेदभेदयो स्तात्विकाभेदसद्भावेनतत्कार्यस्यभेददोषैरभेदबाधनस्यअभेदप्रमाणैर्भेदसाधनरूपस्यव्यवस्थाभावरूपकार्यस्यकल्पितेनव्यावहा रिकभेदेनप्रतिबंधायोगादित्यर्थः । तथाचव्यावहारिकभेदेनाप्युक्तव्यवस्थानस्यादेवेतिभावः । किंचभेदेऽन्योन्याश्रयादिदोषप

नचव्यावहारिकभेदाद्व्यवस्था । कल्पितेनाकल्पितकार्याप्रतिबंधादित्युक्तत्वात् । एवंच "ब्रह्मणो ऽनृततोभेदःसत्यश्चेद्द्वैदखंडनं ॥ व्याहतंस्यादसत्यश्चेद्ब्रह्मणोऽनृतताभवेत् ॥ १ ॥ भेदाभेदभिदा चेत्स्यात्कथंभेदोनिवार्यते । भेदाभेदभिदानोचेत्कथंभेदोनिवार्यते" ॥ २ ॥ किंच । भेदस्यव्या वहारिकसत्यत्वरक्षार्थमेवत्वयाप्यन्योन्याश्रयादिकमुद्धार्यं । नह्यन्योन्याश्रयादिदुष्टस्यव्यावहा रिकतापिदृष्टचरी । नहिमृद्वास्तवीत्येतावतास्वजन्यघटजन्या । अन्यथाकाशवाय्वादेरेवान्यो न्यमुपादानत्वाधिष्ठानत्वेस्यातामित्यज्ञानब्रह्मणोस्ते नकल्प्येस्यातां । यदिचान्योन्याश्रयादिदुष्ट स्यापिअविद्यासामर्थ्यात्व्यावहारिकतातर्हीश्वरसामर्थ्यात्तादृशस्यापिपारमार्थिकतैवास्तु ।

रिहारस्तवाप्यावश्यकोनममैवेत्याशयेनाह ॥ किंचेति ॥ ननुव्यावहारिकेऽन्योन्याश्रयोनदोषइतिचेत्तत्राह ॥ नहीति ॥ अ वास्तवी व्यावहारिकसती तदप्यस्त्विवतिचेत्तत्राह ॥ अन्यथेति ॥ ते उपादानत्वाधिष्ठानत्वे दुष्टस्यापि भेदस्य ॥ अविद्या सामर्थ्यादिति ॥ दुर्घटघटनास्वभावत्वादविद्यायाइतिभावः ॥ तादृशस्यापीति ॥ अन्योन्याश्रयदुष्टस्यापीत्यर्थः । वास्तवं

SGDF
Sri Gargeshwari Digital Foundation

स्यात्प्रमास्यादित्यनयोः कोभेदइतिचेदुच्यते। रूप्याभावेपिरूप्यज्ञानस्वरूपंवास्तवंदृष्टं एवंभेदरूपार्थाभावेपितद्दर्शनस्वरूपस्यवास्तवत्वंयुक्तं प्रमात्वंत्वर्थसत्ताघटितं । अतोभेददर्शनस्यप्रमात्वेतद्विषयस्यभेदरूपार्थस्यसत्वमुपपद्यतइतिभावः ॥ यदिभेददर्शनंस्यादिति ॥ अन्योन्याश्रयादिनाभेददर्शनमेवनास्तीतिब्रूयादित्यर्थः । इत्यादीत्यादिपदेनस्त्रीत्वमपरिगृह्णीयान्मातरंगर्दभींसुतामित्यतिप्रसंगसंग्रहः । तस्मान्नास्तिभेददर्शनमितिविपर्ययपर्यवसानायोगः कुतइत्यतउक्तं ॥ भेदादर्शनइति ॥ भेददर्श

अपिचकथमत्रापादनक्रमः यदिभेददर्शनंस्यात् तर्ह्यन्योन्याश्रयादिकंस्यात् नचतद्युक्तं तस्मान्नास्तिभेददर्शनमितिवा, यदिभेददर्शनंवास्तवंस्यात्तर्हिअन्योन्याश्रयादिकंस्यादितिवा, यदिभेददर्शनंप्रमास्यात्तदाऽन्योन्याश्रयादिकंस्यादितिवा यदिभेददर्शनंधर्मिप्रतियोग्यादिसापेक्षंस्यात्तदान्योन्याश्रयादिकंस्यादितिवा । नाद्यः यदिभेददर्शनंनस्यात्तदापरःपरमतमिवस्वमतमपिनिराकुर्यात् सकलव्यवहारविधुरश्चस्यादित्यादिप्रतिकूलतर्कपराहते भेदादर्शनेतन्निरासायोगेनविपर्ययापर्यवसानाच्च । नद्वितीयः वास्तवेऽन्योन्याश्रयादेरभावेनव्याप्तिवैकल्यात् ।

नस्यैवाभावेप्रतियोगिज्ञानाभावेनभेददर्शनंनास्तीतिभेददर्शननिरासायोगेनभेददर्शनेंगीकार्येविपर्ययापर्यवसानमित्यर्थः । वास्तवे भेददर्शनस्यवास्तवत्वे ॥ व्याप्तीति ॥ यत्रवास्तवत्वंतत्रान्योन्याश्रयादिकमितिव्याप्त्यभावादित्यर्थः । व्याप्त्यभावोपपादनायोक्तं ॥ वास्तवइत्यादि ॥ भेददर्शनस्यवास्तवत्वांगीकारपक्षेतत्रान्योन्याश्रयादेरेवानुत्थानात्तथात्वेचवास्तवत्वमेवनस्या

दित्यर्थः । एवंचव्याप्त्यभावइतिभावः । अस्तुभेददर्शनस्यतर्केणावास्तवत्वं तथापि तद्विषयस्यभेदस्यवास्तवत्वमस्तु तथाहि त्वन्मतेऽभेददर्शनस्यब्रह्मव्यतिरिक्तत्वेनावास्तवत्वेपितद्विषयस्याभेदस्यवास्तवत्वंयथा तथाऽन्योन्याश्रयादिनाभेददर्शनस्यावास्तवत्वेपितद्विषयस्यभेदस्यवास्तवत्वौचित्यादित्याह ॥ दर्शनेति ॥ प्रमात्वनिषेधायोगादिति ॥ अर्थबाधःप्रमात्वनिषेधः तस्यायोगःभेदरूपार्थसत्वमेवस्यादित्यर्थः । प्रतीतौअन्योन्याश्रयप्राप्त्याप्रतीतिरेवनिवर्तते नतुतस्याःप्रमात्वं प्रतीतिनिवृत्तेरेवापादनेचाद्यपक्षांतर्भावइतिभावः । तत्रदृष्टांतश्चोरापराधादिति ॥ केचिच्चोरारात्रौधनिकगृहस्थद्रव्यमपहृत्यगच्छंतोग्रामपालै

दर्शनावास्तवत्वेपिअभेदवद्भेदस्यापिसत्वोपपत्तेश्च । नतृतीयः त्वयास्तंभात्कुंभस्यभेदप्रतीतौकुंभात्स्तंभस्यभेदधीरितिप्रतीतावेवान्योन्याश्रयत्वस्योक्तत्वेनचोरापराधान्मांडव्यस्यशूलप्राप्तिवत्प्रतीतिगतेनान्योन्याश्रयेणप्रमात्वनिषेधायोगात् ।

रनुद्रुताःसंतस्तद्द्रव्यंमांडव्यसमीपेप्रक्षिप्यापलायंत तेग्रामपालास्तद्द्रव्यंदृष्ट्वाऽयमेवचोरोद्रव्यमपहृत्यमुधासमाधिरास्तइतिमांडव्यंशूलमारोपितवंतइतिकथा। तथाचप्रतीतिगतान्योन्याश्रयापराधेनप्रमात्वनिषेधायोगाद्यदिभेददर्शनंप्रमास्यादित्यापादनमेवायुक्तमितिहृदयं । ननुप्रतीतावन्योन्याश्रयोमयानोच्यतइत्याशंकापरिहारायोक्तं ॥ त्वयेत्यादिउद्धृतत्वेनेत्यंतं ॥ नन्वन्योन्याश्रयत्वेनप्रतीतेर्विचारासहत्वमुच्यते ॥ तेनचभ्रमत्वंशुक्तिरूप्यवत् । तथाचसाक्षात्प्रमात्वानिषेधेपितद्व्याप्यधर्मभूतभ्रमत्वे

SGDF
Foundation

नप्रमात्वनिषेधोपिलब्धएवेत्याशंक्यनिषेधति ॥ नचेति ॥ विचारासहत्वेननभ्रमत्वंसाधयितुंशक्यं । चरमवृत्तौव्यभिचारादि त्याह ॥ विचारेति ॥ विचारासहत्वोपपादनायप्रपंचांतर्गतेत्युक्तं ॥ जीवस्येति ॥ ब्रह्माभिन्नत्वेनज्ञातस्यैवजीवस्यअभेद प्रतियोगित्वादित्यर्थः । अप्रतीताभेदस्यप्रतियोगित्वेदहनस्यापितुहिनाभेदप्रतियोगित्वंस्यात् । एवंचान्योन्याश्रयदुष्टतयैक्यप्र तीतेरपिविचारासहत्वप्राप्त्याभ्रमत्वंस्यादितिव्यभिचारइतिभावः । दृष्टांतेसाधनवैकल्यंचेत्याह ॥ रूप्यादीति ॥ अख्यातिवा

नचप्रतीतेर्विचारासहत्वेनभ्रमत्वं विचारासहप्रपंचांतर्गतचरमवृत्तिवत्प्रमात्वोपपत्तेः । जी वस्यब्रह्मैक्यप्रतीतौब्रह्मणोजीवैक्यधीरितिऐक्येप्यन्योन्याश्रयस्यवक्ष्यमाणत्वाच्च । रूप्यादि भ्रमस्यापित्वयाऽख्यातिवाद्युक्तहेत्वभावादिबाधकानामुद्धृतत्वेनविचारासहत्वाच्च । चतुर्थेपि सापेक्षतामात्रंनिवर्ततांभेददर्शनस्यकिमायातं प्रकारांतराभावात्स्वयमपिनिवर्ततइतिचेत् न ।

दीति ॥ अन्यथाख्यात्यनंगीकारिप्राभाकरोक्तेत्यर्थः ॥ हेत्वभावेति ॥ विषयस्यासत्वेचेंद्रियसंनिकर्षायोगेनहेत्वभावान्नभ्र मांगीकारोयुक्तइत्यर्थः । यथाहुःप्राभाकराः "साकारवादादसतोनभानात्संविद्विरोधादथहेत्वभावात् ॥ धियामनाश्वासभयाच्चने ष्टायतोऽन्यथाख्यातिरतोयथार्थे" ति ॥ उद्धृतत्वेनेति ॥ रूप्यस्यासद्वैलक्षण्यमंगीकृत्याविद्यारूपदोषस्यसंनिकर्षत्वंस्वीकृत्य हेतुसद्भावाद्भ्रमोयुक्तइत्युद्धृतत्वेनेत्यर्थः ॥ सापेक्षतेति ॥ धर्म्यादिसापेक्षतेत्यर्थः ॥ प्रकारांतरेति ॥ भेदःप्रतीयमानोध

SGDF
Sri Gargeshwari Digital Foundation

र्म्यादिप्रतीतिमपेक्ष्यैवप्रतीयेत नान्यथा अन्योन्याश्रयादिनातदपेक्षानिवृत्तौप्रकारांतरेणतत्प्रतीत्युपायाभावात्स्वयमपिभेददर्शनंनिवर्ततइत्यर्थः । प्रतीतेः भेदप्रतीतेः ॥ अपेक्षणीयत्वेनेति ॥ अन्यथापरमतमिवस्वमतमपिनिराकुर्यादित्यतिप्रसंगापत्तेरित्याशयः । अन्योन्याश्रयेणधर्म्यादिप्रतीत्यपेक्षानिवृत्त्याप्रतीतेःप्रमात्वंनिवर्ततइतिचेत्तत्राह ॥ प्रमात्वेति ॥ उक्तत्वादिति ॥ चोरापराधादित्यादिनेत्यर्थः ॥ अन्यथेति ॥ एवमुक्तरीत्याआपादनक्रमासंभवेपिपुनरन्योन्याश्रयेणभेददूषणइत्यर्थः ॥ न

प्रतीतेःपरेणाप्यपेक्षणीयत्वेननिवर्तयितुमशक्यत्वात् । प्रमात्वनिवर्तनेच सामर्थ्याभावस्योक्तत्वात् । अन्यथास्वाभिमताद्वैतमपिनसिद्ध्येदित्युक्तं । किंचत्वत्पक्षेघटस्यपटाद्भेदइवघटेनाभेदोपिव्यावहारिकः उक्तरीत्याब्रह्मजीवैक्यमिवब्रह्मण्यनृतव्यावृत्तिरपितात्विकीतिकथमभेदमुपेक्ष्यभेदेद्वेषः ॥

सिध्येदिति ॥ तत्राप्यन्योन्याश्रयस्यसाम्यादित्यर्थः ॥ किंचेति ॥ अभेदमुपेक्ष्यभेदेद्वेषःकुतः ततश्चाभेदोपेक्षानकर्तव्याभेदवत्तत्रापिद्वेषएवकार्यः । ननुघटपटभेदस्यव्यावहारिकत्वादभेदस्यपारमार्थिकत्वाद्भेदएवद्वेषोनाभेदइतिचेन्न घटपटभेदवत् घटेघटाभेदस्यापिव्यावहारिकत्वात् । ननुघटेघटाभेदस्यव्यावहारिकत्वेपिजीवब्रह्मणोरभेदोनव्यावहारिकः किंतुतात्विकएवातोनतद्वेषइतिचेन्न । तर्हिघटपटभेदस्यव्यावहारिकत्वेपिब्रह्मण्यनृतव्यावृत्तिरूपस्यभेदस्यापिब्रह्मवत्तात्विकत्वेनभेदद्वेषोनयुक्तए

SGDF
Sri Gargeshwari Digital Foundation

वेत्यर्थः । इदंदूषणंसंगृह्णाति ॥ एवंचेति ॥ कलशे स्वतःस्वरूपेण घटेस्वरूपेणघटेनाभेदस्यघटपटभेदवन्मिथ्यात्वेव्यावहारिकत्वेसतिअभेदमुपेक्ष्यभेदएवद्वेषःकिंकृतः । ननुघटेघटाभेदस्यमिथ्यात्वेपिजीवब्रह्मैक्यंनमिथ्येतिचेत्तत्राह ॥ ब्रह्मणीति ॥ घटपटभेदस्यमिथ्यात्वेपिब्रह्मण्यनृतभेदस्यसत्यत्वात्तस्यसत्यत्वेसतिभेदेद्वेषस्तुकिंकृतइति । पूर्वोक्तदूषणानुसारेणकारिकायोजनीया ॥ ७ ॥ सामान्यतोभेदखंडनोद्धारविवरणं ॥ १४ ॥ ७ ॥ तत्रेति ॥ भेदस्यस्वरूपत्वइत्यर्थः ॥ व्याप्तेरिति ॥

एवंच "ब्रह्मण्यनृतभेदस्यसत्यत्वेकलशेस्वतः । अभेदस्यचमिथ्यात्वेभेदेद्वेषस्तुकिंकृतः" ॥ सामान्यतोभेदखंडनोद्धारः ॥ १४ ॥ ७ ॥ संभवतिचभेदस्यस्वरूपत्वेननिर्वाहः । तत्रयदुक्तंनिरपेक्षघटस्वरूपत्वेतद्वदेवभेदस्यापिनिरपेक्षत्वंस्यादितितन्न । व्याप्तेःस्वपरासंमतेः । त्वन्मतेसापेक्षायाअविद्यानिवृत्तेर्जीवब्रह्मैक्यस्यमतद्वयेपिस्थितौव्यक्तिसापेक्षस्यजातिमात्रस्यप्रतीतौसापेक्षस्य

यत्सापेक्षंतन्ननिरपेक्षाभिन्नमितिव्याप्तेःस्वरीत्यापररीत्याचासंमतेरित्यर्थः । तदेवोपपादयति ॥ त्वन्मतइति ॥ सापेक्षायाइति ॥ अविद्यारूपप्रतियोगिसापेक्षायाइत्यर्थः । अविद्यानिवृत्तेर्निरपेक्षब्रह्मस्वरूपत्वादित्यन्वयः । अधिकरणातिरिक्ताभावानंगीकारेणआत्मैवाज्ञानहानिरित्यंगीकारादितिभावः ॥ जीवेति ॥ धर्मिप्रतियोगिभावेनजीवब्रह्मसापेक्षस्याप्यैक्यस्यब्रह्मस्वरूप ॥ ५४९ ॥
त्वादित्यन्वयः ॥ मतद्वयेपीति ॥ आवयोर्मतइत्यर्थः ॥ स्थिताविति ॥ गोत्वादेःससंबंधिपदार्थत्वाभावेनस्थितावेवव्यक्त्यपेक्षा नप्रतीतावित्यर्थः । जातिमात्रस्य समस्तजातेरित्यर्थः । निरपेक्षव्यक्तिस्वरूपत्वादित्यर्थः ॥ नीलतरत्वादीति ॥ नीलरूपनिष्ठोत्कर्षरूपजातिविशेषस्यनीलादिदंनीलतरमित्येवंप्रतीतौअवध्यादिसापेक्षस्याप्युत्कर्षरूपगुणगतजातिविशेषस्यव्यक्तिरूपत्वादित्यर्थः ॥ अर्थेति ॥ अर्थप्रकाशरूपज्ञानस्यार्थसापेक्षस्यनिरपेक्षब्रह्मस्वरूपत्वात् । ब्रह्मणिविद्यमानस्यब्रह्माभेदस्यब्रह्मस्वरूपत्वात्अस्तित्वस्यचब्रह्मस्वरूपत्वादित्यन्वयः । अस्त्वेवंव्यभिचारेणव्याप्त्यभावःततःकिमित्यतआह ॥ व्याप्तीति ॥ ननुजी

नीलतरत्वादिजातिविशेषस्यअर्थप्रकाशात्मकज्ञानस्यब्रह्मणिब्रह्माभेदस्यास्तिब्रह्मेत्यादौकालसापेक्षस्यास्तित्वस्यचनिरपेक्षब्रह्मव्यक्त्यादिस्वरूपत्वात् । व्याप्त्यभावेचानुमानस्यतर्कस्यचाभासत्वात् । ऐक्यस्यास्वरूपत्वेचसत्वेऽद्वैतहानिः मिथ्यात्वेचतत्परस्य "तत्वमसी" त्यादेरतत्वावेदकत्वं भेदस्यसत्यताचस्यात् । यत्रयदध्यस्तंतत्रतद्विरोधितज्ज्ञानाबाध्यं यथाशुक्तावरूप्यत्वमितिवा यत्रयदैक्यमध्यस्तंतत्रतद्भेदस्तज्ज्ञानाबाध्यो यथादूरस्थवनस्पत्योर्भेदइतिवा

वब्रह्मैक्येनव्यभिचारः सापेक्षस्यतस्यब्रह्मस्वरूपत्वानंगीकारादित्यतआह ॥ ऐक्यस्येति ॥ स्वरूपातिरिक्तमैक्यंसत्यं मिथ्यावा नाद्यइत्याह ॥ सत्वइति ॥ द्वितीयेत्वाह ॥ मिथ्यात्वेचेति ॥ दूषणांतरमाह ॥ भेदस्येति ॥ नन्वैक्यस्यमिथ्यात्वेभेदस्यसत्यत्वंकुतइत्यतस्तत्रव्याप्तिमुपपादयति ॥ यत्रेत्यादिना ॥ यत्र शुक्तौ यद्रूप्यत्व मध्यस्तं तत्र शुक्तौ तद्विरोधि अरू

SGDF
Sri Gangadhar Digital Foundation

ष्यत्वं तज्ज्ञानाबाध्यं शुक्तिज्ञानाबाध्यंदृष्टं एवंब्रह्मण्यप्यैक्यमध्यस्तंतत्रब्रह्मणितद्विरोधिभेदोब्रह्मज्ञानाबाध्यइत्यर्थः । व्याहृयं तरमाह ॥ यत्रेति ॥ यदैक्यमिति ॥ येनैक्यमित्यर्थः । तद्भेदः तेनभेदः ॥ यथेति ॥ यत्रचूतेपनसैक्यमध्यस्तं तत्रचूतेते नपनसेनभेदश्चूतज्ञानाबाध्योदृष्टः एवंब्रह्मणिजीवेनैक्यमध्यस्तमितितेनजीवेनभेदोब्रह्मज्ञानाबाध्यइत्यर्थः । व्याहृयंतरमाह ॥ यत्रेति ॥ एवंचैक्यमध्यस्तमितितद्विरोधीभेदस्तात्विकइत्यर्थः । नन्वैक्येसापेक्षत्वस्यैवाऽभावान्नव्यभिचारइतिचेत्तत्राह ॥

यत्रयदध्यस्तंतत्रतद्विरोधितात्विकं यथाब्रह्मण्यनृतत्वस्याध्यस्तत्वेसत्यत्वंतात्विकमितिवा व्याप्तेः । ऐक्यस्यचनिरपेक्षत्वेतत्त्वंपदार्थपराणां "सत्यंज्ञानंविज्ञानघन" इत्यादीनांऐक्यपर महावाक्यैकवाक्यत्वाभावेनवैयर्थ्यंस्यात् । नचप्रतियोगिनोभेदस्यसापेक्षत्वादैक्यंसापेक्ष वदितिवाच्यं । घटःपटोनेतिनञर्थस्यभेदस्यैवतादात्म्यनिषेधत्वेनवैपरीत्यस्यैवोचितत्वात् ।

ऐक्यस्येति ॥ एकवाक्यत्वेति ॥ ऐक्यापेक्षितजीवब्रह्मस्वरूपप्रतिपादकत्वेनतदेकवाक्यत्वंवाच्यं ऐक्यस्यनिरपेक्षत्वेतन्न स्यादित्यर्थः । ऐक्यं भेदनिषेधरूपं ॥ सापेक्षवदिति ॥ वास्तवंसापेक्षत्वंनास्तीत्यर्थः । ऐक्यस्यैवसापेक्षत्वात्तन्निषेधरूपोभेद एवसापेक्षइवोच्यतइतिवैपरीत्यमेवास्त्वित्याह ॥ घटइति ॥ भेदस्यकथमैक्यनिषेधरूपत्वमितिचेदुच्यते ऐक्यंतादात्म्यंतन्निषे धोहिभेदः तत्रतादात्म्यंनाम तन्निष्ठासाधारणधर्मवत्त्वमेववा अभेदोवा । आद्ये तन्निष्ठेत्यादितच्छब्दोक्तपदार्थसापेक्षंयत्तन्नि

SGDF
Sri Gargeshwari Digital Foundation

ष्ठासाधारणधर्मवत्त्वरूपंतादात्म्यं तन्निषेधरूपत्वाद्भेदःसापेक्षइवेत्यर्थः । तादात्म्यस्याभेदरूपत्वेत्वाह ॥ ऐक्यइति ॥ तादात्म्यस्यैक्येऽभेदरूपत्वे । अभेदरूपैक्यमेवभेदसापेक्षमितिनतस्यनिरपेक्षब्रह्मरूपत्वमितिभावः । ननुजीवब्रह्मणोस्तदैक्येचननिरपेक्षत्वसापेक्षत्वे येनव्यभिचारः किंतुतत्प्रतीत्योरेवेत्याशंकते ॥ अथेति ॥ तयोरेव प्रतीत्योरेव ॥ नत्विति ॥ तथाचसापेक्षनिरपेक्षयोरैक्यायोगाज्जीवब्रह्मणोरैक्यस्यचभेदःस्यादितिवक्तुंनशक्यतइतिभावः । ननुसापेक्षनिरपेक्षप्रतीतिविषयत्वादेवविष

?→ऐक्येभेदसापेक्षत्वस्यदुर्वारत्वाच्च । अथतत्रप्रतीत्योरेवसापेक्षत्वनिरपेक्षत्वेइतितयोरेवभेदः नतुतद्विषयस्य। एकस्यामेवतत्तायांसंस्कारसापेक्षनिरपेक्षस्मृत्यनुभवविषयत्वस्यएकस्मिन्नेवाद्ग्यादौव्याप्त्यादिधीसापेक्षनिरपेक्षानुमितिप्रत्यक्षविषयत्वादेर्दर्शनादितिचेत् समंप्रकृतेपि । एवंच "अज्ञानहानिवद्ब्रह्मरूपधीवदभेदवत् । स्वरूपत्वेपिभेदस्यसापेक्षत्वंहियुज्यते" ।

यस्यापिभेदोऽस्त्विवतिचेन्न । व्यभिचारादित्याह ॥ एकस्यामेवेति ॥ संस्कारसापेक्षस्मृतिविषयत्वस्यतन्निरपेक्षानुभवविषयत्वस्यचेत्यर्थः ॥ सममिति ॥ प्रकृतेपिघटादिरूपधर्मिभेदप्रतीत्योरेवसापेक्षत्वनिरपेक्षत्वेइतितयोरेवभेदोनतुतद्विषययोर्घटभेदयोरित्यर्थः ॥ अज्ञानेति ॥ प्रतीतौप्रतियोगिसापेक्षाज्ञानहानिवत्ब्रह्मरूपधीवत्निरपेक्षब्रह्मस्वरूपधीवत्प्रतीतौनिरपेक्षब्रह्मस्वरूपधीवदितियावत् ॥ अभेदवत् । प्रतीतौसापेक्षाभेदस्वरूपवत् भेदस्यस्वरूपत्वेपीत्यन्वयः । ननुजीवब्रह्मैक्ययोःसापेक्ष

SGDF
Sri Gargeshwari Digital Foundation

त्वादेरवच्छेदभेदेनोपपत्तेरैक्यंयुक्तमितिचेत् समंघटभेदयोरपीत्याह ॥ अथेति ॥ स्वरूपेण ब्रह्मत्वेन । स्वरूपेण घटत्वेन । युक्तंचैतत्केनचिद्रूपेणनिरपेक्षस्यापिकेनचिद्रूपेणसापेक्षत्वं दृष्टत्वादित्याह ॥ प्रमेयत्वादिनेति ॥ अभावादेःप्रमेयत्वेनप्रतीतौप्रतियोग्यादिसापेक्षत्वाभावेपिअभावत्वादिनाप्रतीतौतत्सापेक्षत्वादित्यर्थः ॥ स्वरूपेणेति ॥ दंडत्वादिनानिरपेक्षस्यापिदंडादेःकारणत्वेनप्रतीतौनिरूपकसापेक्षत्वात् अस्येदंकारणमितिहिप्रतीतिः तथाब्रह्मत्वेनविषयनिरपेक्षस्यापिब्रह्मणोज्ञानरूपत्वे

अथतत्रस्वरूपेणनिरपेक्षस्यापिब्रह्मणोऽभेदत्वेनसापेक्षत्वं तर्हिस्वरूपेणनिरपेक्षस्यापिघटस्यभेदत्वेनसापेक्षत्वमस्तु प्रमेयत्वानिरपेक्षस्यापिअभावसादृश्यादेरभावत्वादिनासापेक्षत्वस्यस्वरूपेणनिरपेक्षस्यापिदंडादेर्ब्रह्मणश्चकारणत्वेनज्ञानत्वेनचसापेक्षत्वस्यदर्शनात्। सप्रतियोगिकनिष्प्रतियोगिकव्यवस्थातु यदसाधारण्येनस्ववाचकपदप्रवृत्तिनिमित्तावच्छेदेनप्रतीतौप्रतियोगिप्रतीतिसापेक्षं तत्सप्रतियोगिकं अन्यत्तुनिष्प्रतियोगिकमिति ।

नप्रतीतौविषयसापेक्षत्वादित्यर्थः । नन्वेवंसर्वस्यापिपदार्थस्यकेनचिद्रूपेणप्रतियोग्यादिसापेक्षत्वनिरपेक्षत्वादेःसंभवेनइदंसप्रतियोगिकमिदंनिष्प्रतियोगिकमितिव्यवस्थानस्यादित्यतआह ॥ सप्रतियोगिकेति ॥ यत् अभावादिकं असाधारण्येनेत्यस्यविवरणं ॥ स्ववाचकेत्यादि ॥ अभाववाचकंयत्पदंतस्ययत्प्रवृत्तिनिमित्तमभावत्वंतदवच्छेदेनप्रतीतावित्यर्थः ॥ अन्यत्त्विति ॥ घटादिकंघटादिवाचकपदप्रवृत्तिनिमित्तभूतघटत्वाद्यवच्छेदेनप्रतीतौप्रतियोग्यादिनिरपेक्षत्वान्निष्प्रतियोगिकमित्यर्थः । ननुत

थापिऐक्यब्रह्मणोरेकत्वेपिब्रह्मशब्दोल्लेखेधर्म्यादिनिरपेक्षत्वेपिअभेदशब्दोल्लेखेसापेक्षत्वमितिव्यवस्थासंभवेननव्यभिचारइत्याशंकते ॥ यदिचेति ॥ शब्दोल्लेखभेदेननिरपेक्षत्वादिकंकुत्रदृष्टमित्यतआह ॥ लघुत्वेति ॥ लघुत्वं अगुरुत्वं । अगुरुत्वशब्देनप्रतीतौप्रतियोगिभूतगुरुत्वादिसापेक्षत्वमस्तीत्यर्थः ॥ एकस्यैवेति ॥ गच्छतिचलतीत्यत्रगमनक्रियैकैवप्रतीयते तत्रैकस्यैवगमनरूपार्थस्यसकर्मकगच्छतिशब्दोल्लेखेनकर्मसापेक्षत्वं अकर्मकचलतिशब्दोल्लेखेनकर्मनिरपेक्षत्वं ॥ यथावा करोतिप्रयतत्यो

यदिचतत्रैकस्यैवार्थस्यलघुत्वकठिनत्वशब्दोल्लेखेननिरपेक्षस्यापिअगुरुत्वाद्रवत्वशब्दोल्लेखेनसापेक्षत्ववत्ब्रह्मशब्दोल्लेखेननिरपेक्षस्याप्यभेदशब्दोल्लेखेनसापेक्षत्वं तर्हीहापिघटशब्दोल्लेखेननिरपेक्षस्यापिभेदशब्दोल्लेखेनसापेक्षत्वमस्तु । एकस्यैवगमनस्यगच्छतिचलतिशब्दोल्लेखाभ्यां प्रयत्नस्यचकरोतियततिशब्दोल्लेखाभ्यांकर्मसापेक्षत्वनिरपेक्षत्वयोःशब्दस्वभावप्रयुक्तयोर्दर्शनात् । यदिचतत्राभेदत्वादिकमेवसापेक्षंनत्वभेदरूपोविशेष्यः तर्ह्यत्राप्यन्योन्याभावत्वरूपं भेदत्वमेवसापेक्षं नतुभेदरूपोविशेष्यइतिसमं । नचतर्ह्यन्योन्याभावएवभेदोस्त्विवतिवाच्यं ।

रेकार्थत्वमेव प्रयत्नस्यैवसमस्ताख्यातार्थत्वात् एवंचैकस्यैवप्रयत्नस्यसकर्मकाकर्मककरोतिप्रयततिशब्दोल्लेखविषयत्वमस्ति एवंचसापेक्षत्वादेःशब्दस्वभावत्वदर्शनादिहापिसापेक्षत्वादिकंभेदघटादिशब्दस्वभावएवास्तु तथाचनविषयभेदइतिभावः । पुनःसापेक्षत्वादिव्यवस्थामाशंक्यप्रकृतेपिसाम्यमाह ॥ यदिचेति ॥ तर्हीति ॥ भेदत्वस्यान्योन्याभावत्वरूपत्वइत्यर्थः ॥अस्त्वि

SGDF

ति ॥ तथाचान्योन्याभावरूपभेदस्यनधर्मिस्वरूपत्वं । भावाभावयोरैक्यायोगादितिभावः ॥ स्वरूपत्वोक्तेरिति ॥ अन्यो न्याभावरूपभेदाख्यविशेषस्यैवधर्मिस्वरूपत्वोक्तेरित्यर्थः । भावाभावयोरैक्यायोगइतिशंकापरिहारस्तु "अस्मत्पक्षेविशेषस्यस र्वत्रांगीकृतत्वतः ॥ नास्तिदोषःक्वचिद्भावोह्यभावश्चसएवहि ॥ सर्वेभावाअभावाश्चपदार्थाएवसर्वदा ॥ तथापिप्रथमंबुद्धेर्योनि षेधस्यगोचरः ॥ सोऽभावोविधिबुद्धेस्तुगोचरःप्रथमंपर" इत्यनुव्याख्यानोक्तरीत्याद्रष्टव्यः । स्वयंप्रतिबंद्यासमाधत्ते ॥ अविद्ये

अन्योन्याभावस्यैवस्वरूपत्वोक्तेः । उक्तंहि "भावाभावस्वरूपत्वान्नान्योन्याभावतापृथ गि" ति । उक्तंच "नस्वरूपमात्रंभेदः किंत्वन्योन्याभावः सचवस्तुनासविशेषाभिन्न" इति । कथमभावस्यभावैक्यमितिचेत् । अविद्यानिवृत्त्यद्वैतयोरपिकथंब्रह्मैक्यं । भावः स्वाभावेनविरुद्धोनत्वन्याभावेनेतिचेत् समंप्रकृतेपि । अभावाभावस्यभावत्वदर्शनात् ।

ति ॥ अविद्यानिवृत्त्यद्वैतयोः अभावरूपयोरित्यर्थः । ब्रह्मैक्यं भावरूपब्रह्मैक्यं स्वाभावेन स्वप्रतियोगिकात्यंताभावत्वेन ॥ अन्याभावेनेति ॥ अन्यप्रतियोगिकाभावेनेत्यर्थः । तथाचाविद्यानिवृत्त्यद्वैतप्रतियोगिकाभावत्वेनस्वभावत्वाभावान्नविरो धोतस्तयोर्ब्रह्मैक्यंयुक्तमितिभावः ॥ समंमिति ॥ अत्रापिघटःस्वाभावेनाविरुद्धो नत्वन्योन्याभावेनतादात्म्यरूपान्यप्रतियो गिकेनान्योन्याभावेना तस्तयोरैक्यंयुक्तमित्यर्थः । ननुयथाकथंचिद्भावाभावरूपत्वेतयोरैक्यंविरुद्धमितितत्राह ॥ अभावेति ॥

SGDF Sri Gargeshwari Digital Foundation

लोकेभावस्यस्वाभावाभावरूपत्वेनभावाभावयोरैक्यंदृष्टं तदपिनस्यात् अतःभावःस्वाभावेनैवविरुद्धो नत्वन्याभावेनेत्येववक्त
व्यं तत्प्रकृतेपिसममित्यर्थः । ननुअविद्यानिवृत्तेःकथंब्रह्मैक्यमित्युक्तमयुक्तं । प्राभाकररीत्याऽधिकरणातिरिक्ताभावानंगीकारे
णाऽधिकरणस्यैवाभावव्यवहारालंबनत्वात्ब्रह्मरूपाधिकरणस्यव्यतिरिक्तोऽविद्यानिवृत्तिरूपःपदार्थएवनास्तीतिचेत् । तर्हिंअ
धिकरणीभूतघटातिरिक्तोऽन्योन्याभावएवनास्तीतिसममित्याह ॥ यदिचेति ॥ नन्वविद्यानिवृत्तेःकथंब्रह्मैक्यमयुक्तमित्युक्तं

यदिचाविद्यानिवृत्तेर्ब्रह्मत्वंनामप्राभाकरमतइवाधिकरणस्यैवनिवृत्तिव्यवहारालंबनता । तर्हिइहा
पिघटस्यैवान्योन्याभावव्यवहारालंबनतेत्यस्तु । यदिचाद्वैतंनद्वैताभावः किंतुतद्विरोधिभावांतरं
द्वैताभावोपलक्षितंब्रह्मैववा तर्हिभेदोपिनतादात्म्याभावः किंतुतद्विरोधिभावांतरं तदभावो
पलक्षितंस्वरूपमेववाऽस्तु। केचित्तुतत्तादात्म्यायोग्यत्वंवातदैक्यधीव्यवहारविरोधित्वंवातद्भेदत्वं

अद्वैतस्यभावरूपत्वेनाभावरूपत्वाभावादित्याशंक्यतत्प्रकृतेपिसममित्याह ॥ यदिचेति ॥ तद्विरोधीति ॥ द्वैतविरोधीत्य
र्थः । यथाहि अधर्मोधर्मविरोधीभावरूपः एवमित्यर्थः । ननुद्वैतविरोधिभावरूपभेदत्वंनामकिमित्यतस्तन्निर्वचनप्रकारमन्या
पदेशेनदर्शयति ॥ केचित्त्विति ॥ तदिति । घटेपटभेदत्वंनामपटतादात्म्यायोग्यत्वमित्यर्थः । अस्याऽभावरूपत्वाद्भावरूपभे
दत्वायोगादाह ॥ तदैक्येति ॥ अत्रतदैक्यधीव्यवहारविरोधित्वमित्येवस्वरसःपाठः नतुतदैक्यप्रमित्यविषयत्वमिति। तथात्वे

SGDF
Sri Gargeshwari Digital Foundation

पुनरभावरूपत्वापत्तेरितिध्येयं । पटैक्यधीव्यवहारविरोधित्वमेवघटेपटभेदत्वमित्यर्थः ॥ यत्रेति ॥ यत्रघटेपटभेददर्शनंपटतादात्म्याध्यासविरोधितत्रघटेतत्त्वंतत्तादात्म्याध्यासविरोधित्वमेवपटभेदत्वमित्यर्थः ॥ पुनःस्वरूपभेदत्वमन्यापदेशेनस्वयमेव दर्शयति ॥ इतरेत्विति ॥ अनाधारत्वरूपंवास्वरूपभेदत्वमित्यन्वयः । अत्रयत्किंचिच्छब्दद्वयंव्यतिरेकिपरं यत्किंचित्पदद्वयाभावेप्रमेयत्वादिकेवलान्वयिधर्मप्राप्त्यातदनाधाराप्रसिद्धेरित्यवगंतव्यं । अयमर्थः स्वशब्देनघटः तद्वृत्तिर्यत्किंचिद्धर्मोघटत्वं

यत्रयद्दर्शनंयत्तादात्म्याध्यासविरोधि तत्रतत्त्वंवातद्भेदत्वमित्याहुः । इतरेतुस्ववृत्तियत्किंचिद्धर्मानाधारनिष्ठयत्किंचिद्धर्मानाधारत्वरूपंवास्वावृत्तिधर्माधारानिष्ठधर्माधारत्वरूपंवास्वरूपत्वंभेदत्वं । अनाधारत्वंचाधारत्वराहित्यंनत्वाधारान्यत्वमितिनान्योन्याश्रयइत्याहुः । एतेनप्रतियोगिनिरूप्यस्यभेदस्यवस्तुस्वरूपत्वेप्रतियोगिनोपिवस्तुस्वरूपत्वंस्यादितिनिरस्तं ।

तदनाधारःपटः तन्निष्ठोयत्किंचिद्धर्मःपटत्वं तदनाधारस्वरूपत्वमेवघटेपटभेदत्वं तथाचपटत्वानाधारत्वंपटभेदइत्युक्तंभवति । तथाचस्वशब्देनघट स्तदवृत्तिधर्मःपटत्वं तदाधारःपटः तदनिष्ठोधर्मोघटत्वं तदाधाररूपत्वमेवघटेपटभेदत्वं तथाचघटत्वमेव स्वरूपभेदत्वमित्युक्तंभवति । अत्राद्यपक्षेभावरूपत्वालाभात्स्वावृत्तीति द्वितीयनिर्वचनं । नन्वनाधारत्वंनामआधारान्यत्वं अन्यत्वंचभेदएवेतिभेदज्ञानेतद्घटितलक्षणज्ञानं तज्ज्ञानेचभेदज्ञानमित्यन्योन्याश्रयइत्यतआह ॥ अनाधारत्वंचेति ॥ स्यादि

ति ॥ यन्निरूप्यस्ययद्भवतितन्निरूपकस्याऽपितद्भवतीतिव्याप्तेरित्याशयः । एतेनेत्युक्तमेवविशदयति ॥ व्याप्तेरिति ॥ दुःखनि[१]वृत्तेःपुमर्थत्वेपिदुःखेपुमर्थत्वस्यादर्शनात् । अनुमानादौ[२]व्यभिचारादिदोषाभावस्यसाध्यादिसाधकत्वप्रयोजकत्वेपिदोषेपिसाधकत्वप्रयोजकत्वस्यादर्शनात् अनृतव्या[३]वृत्तेर्ब्रह्मस्वरूपत्वेपिअनृतेचब्रह्मस्वरूपत्वस्यादर्शनात् आत्मैवाज्ञानहानिरित्युक्तत्वेनाज्ञाननिवृत्तेर्ब्रह्मस्वँ[४]रूपत्वेपिअज्ञानेब्रह्मस्वरूपत्वस्याऽदर्शनात् । अज्ञानादिप्रकाशरूपज्ञानस्यै[५]ब्रह्मस्वरूपत्वेपिअज्ञाने

व्याप्तेःस्वपरासंमतेः दुःखनिवृत्तेःपुमर्थत्वेपिदोषाभावस्यसाधकत्वप्रयोजकत्वेपि अनृतव्यावृत्त्यज्ञाननिवृत्त्योःअज्ञानादिप्रकाशरूपज्ञानस्यचब्रह्मस्वरूपत्वेपिअज्ञाननिवृत्तेर्मोक्षत्वेपिदुःखदोषेऽनृतेऽज्ञानेचपुमर्थत्वस्यसाधकत्वप्रयोजकत्वस्यब्रह्मस्वरूपत्वस्यमोक्षत्वस्यचादर्शनात् । तत्राज्ञानादिकंकार्यानन्वयित्वेनोपलक्षणंसत्निरूपकमात्रं नतुकार्यान्वयित्वेनविशेषणमितिचेत् समंप्रकृतेपि ।

ब्रह्मस्वरूपत्वस्यादर्शनात् अज्ञाननिवृत्तेर्मोक्षत्वेपिअज्ञानेमोक्षँ[६]त्वस्यचादर्शनाद्व्यभिचारइतिविवेकोद्रष्टव्यः ॥ कार्यानन्वयित्वेनेति ॥ मोक्षत्वाद्यनन्वयित्वेनेत्यर्थः ॥ सममिति ॥ अत्रापिप्रतियोगिनोवस्तुस्वरूपत्वानन्वयित्वेनभेदंप्रत्युपलक्षणत्वेन निरूपकमात्रत्वमेव नतुकार्यान्वयित्वेनविशेषणत्वमितिसममित्यर्थः । ननुलंबकर्णमानयेत्यादौनिरूपककर्णादेःकार्यान्वयोदृष्ट

SGDF

इतिचेत् चित्रगुमानयेत्यादौतदभावोपिकिंनदृष्टइत्याह ॥ लोकइति ॥ वैपरीत्येति ॥ लंबकर्णमानयेत्यादौकर्णस्यकार्यान्वयदर्शनेन चित्रगुमानयेत्यादावपिकार्यान्वयापादनेनपक्षतुल्यत्वान्नव्यभिचारइत्युच्यतेचेत्तर्हिचित्रगुमानयेत्यादौगवादेःकार्यान्वयादर्शनेनलंबकर्णमानयेत्यादावपिकर्णादेःकार्यान्वयोनस्यादित्यापादनसंभवेनव्याप्तिग्रहणस्थलाभावाद्व्याप्तिग्रहोनस्यादित्यर्थः । कर्णादेःकार्यान्वयदर्शनेनगवादेरपितदापादनेकर्णदृष्टांतेनैवाज्ञाननिवृत्तेर्ब्रह्मस्वरूपत्वेनाज्ञानस्यापिब्रह्मस्वरूपत्वापत्तिरित्याह

लोकेपिनिरूपके "लंबकर्णमानये" त्यादौकार्यान्वयस्येव "चित्रगुमानय" "काशीवासीसमागत" इत्यादौतदनन्वयस्यापिदर्शनात् । नचव्याप्तिग्रहणेऽनुसृतालौकिकीरीतिर्व्यभिचारे नानुसरणीया । नचकर्णस्यकार्यान्वयदर्शनेनगवामपितदापादनं । वैपरीत्यापत्तेः । अज्ञानादेर्ब्रह्मस्वरूपत्वापत्तेश्च । ननुप्रतियोगिनउपलक्षणत्वेकदाचित्काकाऽज्ञानेपिगृहज्ञानवत्प्रतियोग्यज्ञानेपिभेदज्ञानंस्यादितिचेत् तर्ह्यज्ञानाद्यज्ञानेपिकदाचित्तन्निवृत्त्यादिज्ञानंस्यात् ।

॥ अज्ञानादेरिति ॥ ननुप्रतियोगिनोघटादेर्भेदंप्रत्युपलक्षणत्वमयुक्तं यथागृहंप्रत्युपलक्षणस्यकाकस्याज्ञानेपिगृहज्ञानंभवति एवमुपलक्षणस्य प्रतियोगिभूतघटादेर्ज्ञानाभावेपिकदाचिद्भेदज्ञानप्रसंगादित्याशंकते ॥ ननुप्रतियोगिनइत्यादिना ॥ तथात्वेउपलक्षणाज्ञानाद्यज्ञानेपिउपलक्ष्याज्ञाननिवृत्त्यादिज्ञानप्रसंगसाम्यमित्याह ॥ तर्ह्यज्ञानाद्यज्ञानेपीति ॥ अज्ञानादेरपित्वयोपलक्षण

SGDF
Sri Gargeshwari Digital Foundation

त्वांगीकारादितिभावः।यदिचाज्ञानाद्युपलक्षणज्ञानंउपलक्ष्याज्ञाननिवृत्त्यादिज्ञानंप्रतिकारणंतदभावेकाकज्ञानाभावेगृहस्येवउपलक्ष्याज्ञाननिवृत्त्यादेर्ज्ञानंनभवतीत्युच्यते। (ननुअज्ञानाद्यज्ञानेपिकदाचित्तन्निवृत्त्यादिज्ञानंनभवति। तथाहि।अभावंसादृश्यंचप्रतिउपलक्षणंयत्प्रतियोग्यादि तस्यनियमेनोपलक्ष्याभावसादृश्यज्ञानहेतुत्वंदृष्टं ।ननुगृहादिवत्तज्ज्ञानाभावेप्यभावादिज्ञानं। तद्वदिदमुपलक्षणं । अतोऽज्ञानाद्यज्ञानेतन्निवृत्तिज्ञानंनभविष्यतीतिचेत्।) तर्हिभेदप्रतियोग्यादिरपिअभावसादृश्यादिप्रतियोगिव

अथोपलक्षणस्यापिप्रतियोग्यादेर्ज्ञानमुपलक्ष्याभावसादृश्यादिज्ञानकारणंदृष्टमित्य
दोषमितिचेत् समंप्रकृतेपि । तस्मात्प्रतियोगिनउपलक्षणत्वान्नधर्मिण्यंतर्भावः ।
एवंच "पुरुषार्थेदुःखमिवब्रह्मण्यज्ञानवत्तथा। मोक्षेचमोहवन्नांऽतर्गतंकुंभादिकंपटे।
तटस्थत्वेपिकुंभादेरप्रतीतौनभेदधीः। अज्ञानादेरप्रतीतौतद्धान्याद्यप्रतीतिवत्" ।

न्नियमेनोपलक्ष्यज्ञापकइतिनगृहादिवत्तज्ज्ञानाभावेपिभेदज्ञानंभविष्यतीत्याह ॥ अथेत्यादिना ॥ दुःखमिव दुःखंयथानांतर्गतं अज्ञानवत् अज्ञानंयथानांतर्गतं मोहवत् मोहोऽज्ञानंयथानांतर्गतं एवंकुंभादिकं प्रतियोगिभूतं पटे तत्स्वरूपे नांतर्गतमित्यर्थः । अथोपलक्षणस्यापीत्युक्तदूषणंसंगृह्णाति ॥ तटस्थत्वेपीति ॥ अभावसादृश्यादिवदुपलक्षणस्याप्यज्ञानादेरप्रतीतौनियमेनतन्निवृत्त्याद्यप्रतीतिर्यथा एवंतटस्थत्वेनोपलक्षणत्वेसमानेपिउपलक्षणभूतकुंभादेरप्रतीतौनियमेनभेदधीर्नभवत्येवेत्यर्थः ।

SGDF
Sri Gargeshwari Digital Foundation

ननुकार्यान्वय्येवकर्णादिविशेषणंदृष्टं प्रतियोगिनस्तुधर्मिस्वरूपान्वयाभावात्कथंभेदंप्रतिविशेषणत्वमितिचेन्न । शब्दोनित्यइत्यादौविधेयभूतानित्यत्वानन्वयेपिशब्दत्वादेर्विशेषणत्वंदर्शनादेवमिहाप्युपपत्तेरित्यन्यापदेशेनाह ॥ केचित्त्विति ॥ विदारणात्मनो विदारकत्वस्वभावतः विभागाख्यद्वैधीभावहेतुत्वादात्मनइतियावत् विदारणं द्वैधीभावः ॥ परमाणुरपीति ॥ परमाणावपिभेदस्यसत्वेनतस्यापितत्स्वरूपत्वात्तत्रापिद्वैधीभावरूपविभागापत्त्यासोप्येकोनस्यादित्यर्थः । ऐक्येपीदंदूषणंसमानमि

केचित्तुप्रतियोगिनोविशेषणत्वेपिनदोषः । शब्दोऽनित्यइत्यादौशब्दत्वादेरिवकार्यानन्वयेपि विशेषणत्वोपपत्तेरित्याहुः । ननुतथापिविदारणात्मनोभेदस्यघटस्वरूपत्वेघटस्यापिविदारणं एवंतदवयवानामपीतिपरमाणुरपिनैकइतिशून्यतापत्तिरितिचेन्न। अविदारणात्मकस्याभेदस्य ब्रह्मस्वरूपत्वेपारमार्थिकस्यब्रह्मणोऽव्यावहारिकेणघटादिनाप्रातिभासिकेनरूप्यादिनाशून्येन चाप्यविदारणेनतदैक्यंस्यादितिसाम्यात् । यदिचतत्रजीवाभेदएवब्रह्मस्वरूपंनतुघटाद्यभेदः

त्याह ॥ अविदारणेति ॥ अविभागात्मकस्येत्यर्थः। अविदारणेन अविभागेन व्यावहारिकघटाभेदःप्रातिभासिकरूप्याद्यभेदः शून्याभेदश्चघटेरूप्येशून्येचतावदस्ति सोपिब्रह्मस्वरूपमेव अभेदमात्रस्यतत्स्वरूपत्वात् एवंचभेदस्यविदारणात्मकत्वेऽभेदस्या ॥ ५५५ ॥ विदारणात्मकत्वापत्त्याघटाद्यविभागात्मकाभेदस्यतत्स्व(ब्रह्मस्व)रूपत्वाद्घटादेरपिब्रह्मस्वरूपत्वंस्यादित्यर्थः । "प्रतियोगिनोहि

भेदोयंनतुस्वस्मात्कथंचने" त्यनुव्याख्यानंहृदिनिधायाह ॥ तर्हीति ॥ नत्विति ॥ तथाचघटस्यापिविदारणंस्यादित्यापादनायोगइत्याशयः ॥ यथाहीति ॥ यथाहिजीवैक्यमेवब्रह्मात्मकं तथाचस्वस्यैवजीवाविभागरूपाविदारणसंपादकं नपरेण घटादिना तदभेदस्यब्रह्मात्मकत्वाभावादित्यर्थः । स्वस्मिन्नितिपाठः स्वाभिन्नेघटइत्यर्थः । स्वस्मादितिपाठेस्वस्मिन्नित्येवविभक्ति

तर्ह्यत्रापिपटादिभ्योभेदएवघटस्वरूपंनतुस्वस्मादितिसमं। एवंच "विदारकत्वेपिपटाद्घटस्यस्याद्विदारणं। नतुस्वतोयथाह्यैक्यंस्वेनैवनपरेणतु" । किंचभेदस्यस्वस्माद्विदारकत्वेपि(अवयवानां)कार्याणांविभागेनसूक्ष्मत्वमेवस्यात् नतुशून्यत्वं नहिशून्यानां संयोगात्कस्यचिज्जन्म। येनावयवानांविभागेनशून्यपरिशेषःस्यात् । अपिच विदारकमपिलवित्रादिस्वयंयत्सबंधितदेवविदारयति । नतुस्वात्मानं ततोधर्मभेदवादे कथंचिदेवंवक्तव्यं नतुस्वरूपभेदवादे । वस्तुतस्तुभेदोनाविदारकः किंतुविदारणं

व्यत्ययेनार्थोद्रष्टव्यः ॥ कार्याणांविभागेनेति ॥ कार्याणांविभागेस्वकारणपरिशेषेणभाव्यं। एवंचकार्याणांविभागेनशून्यत्वं नप्राप्नोति । कुतइत्यतआह ॥ नहीति ॥ धर्मभेदवादइति ॥ यदिभेदोघटादिधर्मःस्यात् तर्हिविदारकस्वभावभूतोभेदःलवित्रवद्घटादिसंबद्धःसन्तत्रद्वैधीभावरूपंविभागंकुर्यादितिवक्तुंशक्यं नह्येवमस्ति स्वरूपत्वांगीकारेणघटादिसंबंधित्वानंगीकारादि

SGDF

त्यर्थः ॥ भावेति ॥ भिदिर्विदारणइतिधातुः कुतइत्यतआह ॥ नहीति ॥ विदारणस्येति ॥ घटस्यैवविदारणत्वादित्यर्थः ॥ स्ववृत्तीति ॥ स्वस्यस्वस्मिन्वृत्तीत्यर्थः । नघटे विदारणमित्यर्थः । कुतइत्यतआह ॥ स्वस्येति ॥ तर्हि(भिदिर्विदारण)इ

भावसाधनत्वाद्भेदशब्दस्य तथाचघटोपिविदारणंस्यात् नतुघटस्य । नहिविदारणस्यविदारणं स्ववृत्तिविरोधात्। एवंच "विदारणस्यभेदस्यघटत्वेहिघटोपिच । विदारणंस्यान्नघटेस्वस्यस्व स्मिन्नवृत्तितः" । अंगीकृत्यचेदमुदितं वस्तुतस्तुनविभागरूपविदारणात्माभेदः किंत्वन्योन्या भावः "क्रियावाचित्वमाख्यातुमेकैकोर्थःप्रदर्श्यते । प्रयोगतोनुगंतव्याअनेकार्थाहिधात व" इतिवचनेनभिदेर्विभागोन्यत्वंचार्थोयतः । अन्यथासंयुक्तयोरोष्ठयोर्भिन्नावितिव्यवहा रोनस्यात् । उक्तंच "भेदस्यचस्वरूपत्वेयेवदंतिचशून्यतां । अद्भुतास्तेयतोन्यस्यप्रतियोगित्व मिष्यते ॥ १॥ प्रतियोगिनोहि भेदोयंनतुस्वस्मात्कथंचन। विभागेनाल्पतैवस्यात्कुतएवचशून्य ता ॥ २ ॥ नशून्यानांहिसंयोगाद्भावोवस्तुनइष्यते । विदारणार्थोधातुश्चविभागगुणवाचकः ॥ ३ ॥ अविदारणेपिह्यास्यस्यभिन्नावोष्ठौतुतस्यहि" इति ॥ एतेनअनेकत्वैकार्थसमवायिनोभे दस्यघटस्वरूपत्वेघटस्याप्यनेकत्वंस्यात्। तथातदवयवानामपीतितद्विरुद्धमेकत्वंक्वापिनस्यात्।

तिधातुविरोधइतिचेत्तत्राह ॥ क्रियेति ॥ "भूवादयोधातव"इतिस्मरणादित्यर्थः ॥ अन्यथेति ॥ विभागरूपविदारणस्यैव

SGDF
Sri Gargeshwari Digital Foundation

भिदिधात्वर्थत्वइत्यर्थः । ऐक्यपक्षेपिसाम्यादित्याह ॥ एकत्वेति ॥ पटेनसहानेकत्वंनस्यादित्यन्वयः । तस्यैकत्वेनविरुद्धत्वादित्यर्थः । वास्तवंपटेनसहानेकत्वंनास्त्येव तस्यापिमिथ्यात्वादित्यतउक्तं ॥ धर्मीति ॥ घटेत्यर्थः । तथाचव्यावहारिकमप्यनेकत्वंनस्यादितिभावः ॥ ब्रह्मणाचेति ॥ एकत्वैकार्थसमवायिनइतिवर्तते । तथाचैकत्वैकार्थसमवायिनोब्रह्मणासहब्रह्माभेद

एकत्वाभावेचानेकत्वमपिनभवेत् । तथाचसंख्यारहितस्यद्रव्यस्यशून्यतापत्तिरितिनिरस्तं । एकत्वैकार्थसमवायिनोघटेनघटाभेदस्यघटस्वरूपत्वेघटस्यपटेनसहधर्मिज्ञानाबाध्यमनेकत्वंब्रह्मणाचब्रह्माभेदस्यब्रह्मस्वरूपत्वेभावाद्वैतमतेब्रह्मणःअभावेनसहाप्यनेकत्वंनस्यादितिसाम्यात् । अथस्वेनैकत्वेप्यन्येनसहानेकत्वमविरुद्धं तर्ह्यन्येनसहानेकत्वेपिस्वेनैकत्वमविरुद्धमितिसमं । किंचभेदस्यसादृश्यादिवदन्यनिरूप्यस्यैकमात्रवृत्तित्वादनेकत्वैकार्थसमवायित्वमसिद्धं ।

स्यब्रह्मस्वरूपत्वेब्रह्मणोऽभावेनसहाप्यनेकत्वंनस्यात् तस्यैकत्वेनसहविरोधादित्यर्थः । ननुद्वितीयाभावस्यापिमिथ्यात्वात्तेनसहानेकत्वंनास्त्येवेत्यतउक्तं ॥ भावाद्वैतमतइति ॥ द्वितीयोभावएवनास्ति अभावरूपंद्वितीयमस्तीतिमतइत्यर्थः ॥ एकमात्रेति ॥ भेदस्यद्विष्ठत्वपक्षएवानेकत्वैकार्थसमवायित्वं नत्वन्यनिरूप्यमेकमात्रवृत्तीतिपक्षइत्यर्थः । यथोक्तं "संयोगश्च

SGDF
Sri Gargeshwari Digital Foundation

विभागश्च भेदश्चैवपृथक्पृथक् । अन्योन्यप्रतियोगेनह्युभयोरपिदृश्यत" इति ॥ अपिचेति ॥ अनेकत्वेनसहभेदस्यएकार्थरूपघटसमवायोपिनास्ति अस्मन्मतेघटस्यैवभेदात्मकत्वेनानेकत्वेनसहएकार्थेमृदादावधिकरणेभेदात्मकोघटःसमवेत स्तस्यैवानेकत्वमापादनीयंनतुघटस्य व्यधिकरणत्वादित्यर्थः । एतेनेत्युक्तमैक्येनसाम्यमुपपादयति ॥ प्रत्यगिति ॥ अप्रका

अपिचभेदस्यानेकत्वैकार्थसमवायित्वेपियत्रभेदात्मकोघटस्तस्यानेकत्वंस्यात् नतुघटस्य कथं चानेकत्वबलेनएकत्वाभावमुक्त्वापुनस्तेनैवानेकत्वाभावंवदतःनपूर्वोत्तरविरोधः । नह्यत्रकाप्यस्मद्रीतिरस्तीत्युक्तं । येनपररीत्यापादनमितिनिस्तारःस्यात् । एतेनभेदस्यधर्मिस्वरूपत्वे संशयादिकंनस्यात् । धर्मिज्ञानस्यसंशयादिहेतुत्वात्तज्ज्ञानेनैवचतदभिन्नस्यभेदस्यग्रहणाद्भेदज्ञानस्यचसंशयादिविरोधित्वादितिनिरस्तं । प्रत्यक्चैतन्येस्वयंभातेपितदभिन्नस्यैक्यस्यानवच्छिन्नानंदस्यचाप्रकाशवत्धर्मिणःप्रकाशेपितदभिन्नस्यभेदस्याप्रकाशोपपत्तेः । ऐक्यस्य चप्रकाशेचतत्रविप्रतिपत्तिर्नस्यात् तदुपदेशानर्थक्यं*चस्यात् । नचस्वरूपज्ञानेनैक्यस्यस्वतोशोपपत्तेरिति ॥ तथाचसंशयविरोधिनोभेदस्याप्रतीतत्वात्संशयःसंभवतीतिभावः । ननुप्रत्यक्चैतन्येस्वयंभातेपितदभिन्नैक्यस्याप्रकाशोनास्तीतिचेत्तत्राह ॥ ऐक्यस्यचेति ॥ विप्रतिपत्तिः संशयः ॥ उपदेशेति ॥ तत्त्वमस्यादीत्यर्थः ॥

* इतआरभ्यविशेषसमर्थन(१६)समाप्तिपर्यंतंटिप्पणीनोपलभ्यते ।

भानेप्यज्ञानविरोधिन्यावृत्तेरभावात्विप्रतिपत्त्यादीतिवाच्यं । प्रत्यगर्थवदेववृत्त्यभावेपिस्वतोभानेनैवैक्येपिविप्रतिपत्त्याद्ययोगात् । यदिचैक्यस्याविद्यावरणादप्रकाशः तर्हिभेदस्यापिसादृश्यादिदोषादप्रकाशइतिसमं । एवंच "स्वरूपत्वेपिभेदस्ययुज्यतेसंशयादिकं । स्वप्रभप्रत्यगात्मत्वेप्यभेदेसंशयादिवत् ॥ किंचभेदःस्वरूपेणप्रकाशतएव । उक्तरूपेणभेदत्वेनतुनप्रकाशते । भेदत्वेनभेदज्ञानमेवचसंशयादिविरोधि । किंचसंशयादिस्थलेपिभेदस्यभेदत्वेनाप्रतीतिरप्यसिद्धा प्रायःसर्वतोभिन्नमेवहिवस्तुतत्रप्रतीयते । अन्यथासर्वकोटिःसंशयःस्यात् । किंतुतस्यघटप्रतियोगिकत्वंपटप्रतियोगिकत्वमित्यादयोनेकेधर्माःसंति तत्रसादृश्यादिवशाद्यत्प्रतियोगिकत्वंनभातितत्रसंशयः । नहिनिरूपकभेदेननिरूप्यभेदः । एकघटनिरूप्ययोःप्रागभावप्रध्वंसयोर्भेददर्शनात् । अनेकविषयनिरूप्यस्यापिईश्वरज्ञानादेरनेकद्वैतनिरूप्यस्याद्वैतस्यचैक्यदर्शनात् । केचित्तुस्वरूपभेदवादेभेदज्ञानंनभ्रमविरोधि । किंत्वधिष्ठानेआरोप्यविरुद्धधर्मादिज्ञानमित्याहुः । केचित्तुअदोषमूलताद्रूप्येणाप्रतीतौप्रतीतिःस्वरूपभेदलक्षणं । शुक्तेःशुक्त्यात्मत्वेनाप्रतीतिश्चदोषमूलेतिनातिव्याप्तिः । एवंचभ्रमस्थलेताद्रूप्येणाप्रतीत्यभावादभेदभ्रमोपपत्तिरित्याहुः । एवंच "सापेक्षत्वात्सावधेश्चतत्वेऽद्वैतप्रसंगतः । एकाभावादसंदेहान्नरूपंवस्तुतोभिदे" तिश्लोकः "सापेक्षत्वात्सावधेश्चतत्वेद्वै

यत्र निरूप्यभेदस्तत्र निरूपकभेद इत्यत्र अन्वयव्यतिरेकव्यभिचारौ क्रमेणाह । श्लो

SGDF

तत्प्रसंगतः । नैकाभावादसंदेहान्नरूपंवस्तुनोऽभिदे” तिपठनीयः । एतेनभेदस्यघटस्वरूपत्वेघटभे
दयोरेकतरपरिशेषःस्यादितिनिरस्तं । ऐक्यस्यानंदस्यज्ञानस्यचब्रह्मस्वरूपत्वेऽप्येकतरपरिशेषःस्या
दितियुक्तिसाम्यात् । तत्रवस्तुभेदाभावादिष्टापत्तिरितिचेत्समंप्रकृतेपि । तथाहि । एकतरपरिशे
षःस्यादितिकोर्थः किंवस्तुभेदोनस्यात् किंत्वेकमेवस्यादिति, किंवाघटइतिवाभेदइतिवाव्यवहारः
स्यात् नतूभयथेति । यद्वाएतयोरेकस्यैवार्थक्रियास्यात् नोभयार्थक्रियेति । अथवाद्विवचनप्रयो
गोनस्यादिति । नाद्यः । इष्टापत्तेः । नद्वितीयः । प्रवृत्तिनिमित्तभेदेनतदुपपत्तेः । नतृतीयः । एक
त्रैवदीपेशुक्लभास्वररूपोष्णस्पर्शावच्छेदेनप्रकाशदाहरूपार्थक्रियावदेकत्रैवघटत्वभेदत्वावच्छेदेनत
दुपपत्तेः । नचतुर्थः । अर्थप्रकाशात्मकत्वनिरुपाधिकेष्टत्वरूपयोर्ज्ञानत्वानंदत्वरूपविशेषणयोरने
कत्वेनविज्ञानानंदावितिवदिहापिघटत्वभेदत्वयोरनेकत्वेनतदुपपत्तेः । एतेनभेदस्यस्वरूपत्वेघटभे
दशब्दयोःपर्यायत्वंस्यादितिनिरस्तं । ऐक्यब्रह्मशब्दयोःपर्यायत्वंस्यादितिसाम्यात् । यदितत्रैका
र्थपर्यवसानेपिशुक्लःपटइत्यादाविवप्रवृत्तिनिमित्तानेकत्वादपर्यायत्वं तर्हिप्रकृतेपिसमं । एतेनभे
दस्यस्वरूपत्वेअस्यभेदःइदंभिन्नमितिचसंबंधित्वेनधीर्नस्यात् । प्रत्युतघटोभेदइतिधीःस्यादितिनि
रस्तं । जीवब्रह्मणोरैक्यंआनंदंब्रह्मणइत्यादिवदुपपत्तेः । नह्येकंब्रह्मेतिवदैक्यंब्रह्मेत्यस्ति । जीवब्र

SGDF
Sri Gargeshwari Digital Foundation

ह्मणोरैक्यमितिव्यपदेशमात्रमितिचेत् मात्रशब्देनकिमर्थोनिषिध्यते । व्यवहारस्याबाधितत्वंवा
व्यवहारनिमित्तंवा । आद्येपिकिंब्रह्मस्वरूपंनिषिध्यते ऐक्यंवा तत्संबंधोवा । नाद्यः । निराश्रय
स्यैक्यस्यानिर्वाहात् । निर्वाहेवाब्रह्माद्वैतंशून्याद्वैतेपर्यवस्येत् । नद्वितीयः । भेदोन्मज्जनापातात् ।
नह्युभयोदासीनतत्वसिद्धिः उभयात्मकत्ववत् । तस्यापिव्याहतत्वात् । तृतीयेप्यैक्यस्यान्यसंबं
धित्वंवामेरुमंदरादिवत्स्वातंत्र्यंवास्यादितिप्रत्यग्ब्रह्मैक्यासिद्धिः । ऐक्यमात्रस्यमन्मतेसत्त्वेनासिद्ध
साधनादिकंचस्यात् । नद्वितीयः । उक्तरीत्याअर्थाबाधेनव्यवहारबाधायोगात् । नतृतीयः । निमि
त्ताभावेकार्यासंभवात् । क्लृप्तभेदाख्यनिमित्ताभावाद्व्यपदेशमात्रत्वोक्तिरितिचेत्प्रकृतेपितथास्तु ।
एवंच । अपर्यायत्वैकतरापरिशेषविशेष्यता । अभेदस्येवभेदस्यस्वरूपत्वेपिसंगताः ॥ तत्रगत्यंत
राभावादैक्यस्यस्वरूपत्वंसिद्धमित्यपर्यायत्वादिकंकथंचिन्निर्वाह्यमितिचेत् इहापिधर्मपक्षस्यत्वयैव
दूषितत्वेनपृथक्त्वान्योन्याभाववैलक्षण्यभेदवादेपिपृथक्त्वादावंततरस्वरूपभेदस्यांगीकरणीयत्वे
नचगत्यंतराभावात् । तथाभेदस्यघटेपटात्मकोनेत्यप्रतीतेः घटःपटात्मकोनेत्येवचप्रतीतेःतत्रचपटता
दात्म्यनिषेधरूपस्यभेदस्यमृद्धटइतिवत्घटसामानाधिकरण्येनाभेदस्यैवभानेनप्रत्यक्षात्, तथाघटत
द्भेदयोरेकस्यप्रतीतावितरस्यनियमेनप्रतीयमानत्वादिलिंगात् "सत्यंभेदस्तुवस्तूनांस्वरूपंनात्रसंश

SGDF
Sri Gargeshwari Digital Foundation

य" इत्यागमाच्चभेदस्यस्वरूपत्वंसिद्धं नचपटाद्भेदस्यघटस्वरूपत्वेकुड्यस्याघटस्वरूपत्वात् (घटस्वरूप त्वाभावात्) तस्यपटाद्भेदोनस्यादितियुक्तं ॥ अभेदस्यब्रह्मस्वरूपत्वेघटतुच्छयोरब्रह्मस्वरूपत्वात् तयोःस्वाभेदोनस्यादितिसाम्यात् । यदितुब्रह्माभेदोब्रह्मस्वरूपंघटाद्यभेदस्तुतत्स्वरूपं तर्हिपटप्रति योगिकोभेदोघटधर्मिकएवघटस्वरूपं कुड्यधर्मिकस्तुकुड्यस्वरूपमितिसमं । यद्यपि (घटकुड्यादिरू पाः) कुड्यकुल्यादिरूपाःपटाद्भेदाःस्वरूपेणाननुगताः । तथाप्यनेकेषुघटज्ञानेच्छादिषुघटविषयत्व स्येवेहापिपटप्रतियोगिकत्वस्यपटैक्यव्यवहारविरोधित्वादेर्वानुगमात्पटाद्भिन्नमितिव्यवहारानुग मः । एतेनभेदोयदीदमस्माद्भिन्नमितिवाअस्यामुष्माद्भेदइतिवा । धर्मिप्रतियोगिघटितत्वेनगृह्येत तदाधर्मिप्रतियोगिज्ञानेसतिभेदज्ञानं । अस्यामुष्मादितिविलक्षणधर्मिप्रतियोगिज्ञानंचभेदज्ञाने सतीत्यन्योन्याश्रयः । यदिघटपटौभिन्नावितिघटपटविशेषणतयाघटपटयोर्भेदइतितद्विशेष्यतया वागृह्येत तदापिघटपटप्रतीतौतद्विशेषणत्वादिनाभेदप्रतीतिःभेदप्रतीतौचद्वित्वावच्छिन्नघटपटप्र तीतिरित्यन्योन्याश्रयएवेतिनिरस्तं । भेदस्यस्वरूपत्वेनस्वरूपप्रतीतेरेवभेदधीत्वेनधीद्वयाभावात् । भासमानंहिवस्तुइदंनसर्वात्मकं किंतुस्वयमेवेतिसामान्यतःसर्वतोव्यावृत्तमनुभूयते । अन्यथाइदं सर्वात्मकमेवेतिविपर्ययादिस्यात् । नचसार्वज्ञ्यापत्तिर्दोषः सामान्यतःसर्वज्ञानस्यप्राणभृन्मात्रवृ

त्तित्वात् । अन्यथासर्वोपसंहारवतीव्याप्तिर्नसिद्ध्येदितिसर्वानुमानतर्कोच्छेदःस्यात् । सर्वशब्द प्रयोगादिकंचनस्यात् "सर्वंखल्विदंब्रह्मे" त्यादिवाक्यार्थधीश्चनस्यात् । ननुयद्यपिभेदोधर्मिस्वरू पमितिनतदपेक्षयाऽन्योन्याश्रयः । तथापिप्रतियोगिरूपंनेतितदपेक्षयान्योन्याश्रयइतिचेन्न । विद्य मानभेदस्यतदैक्येनचाप्रतीतस्यस्वरूपप्रतीतिमात्रेणप्रतियोगित्वबुद्ध्युपपत्तेः । नहिसामान्यतःसर्व स्मिन्प्रतीतेपितस्यपुरोवर्तिनोभेदाग्रहेणपुरोवर्तिनःसामान्यतःसर्वस्माद्भेदाग्रहोदृष्टः । किंचास्ती दमित्यत्रसाक्षिसिद्धेनकालेनसहैववस्तुनइवनजानामीत्यत्रसाक्षिसिद्धेनविषयेणसहैवाज्ञानस्येव "सर्वंखल्विदंब्रह्मे" त्यत्रसर्वेणसहैवाऽभेदस्येवचेहापिसाक्षिसिद्धेनप्रतियोगिनासहैवव्यावृत्तिप्र तीतेर्नाऽन्योन्याश्रयः । उक्तंहि । "सर्वसामान्यतोयस्मात्सर्वैरप्यनुभूयते । तस्माद्व्यावृत्ततासर्वैः सर्वस्मादनुभूयत" इति । सर्वस्मादित्यनेनचतदात्मकत्वेनाज्ञातंसर्वंविवक्ष्यते । यथा "सर्वंख ल्विदंब्रह्मे" त्यत्रब्रह्मात्मत्वेनाज्ञातंसर्वमितिनकश्चिद्दोषः । एतेनविशिष्यभेदप्रतीतौस्तंभात्कुंभ स्यभेदसिद्धौकुंभात्स्तंभस्यभेदसिद्धिरित्यन्योन्याश्रयः । धर्मिणःसकाशाद्भेदेनप्रतीतस्यैवप्रतियो गित्वात् । अप्रतीतभेदस्यप्रतियोगित्वेतुस्वस्यापितत्स्यादितिनिरस्तं । त्वन्मतेपिबिंबादेःप्रतिबिं बादिनाब्रह्मणश्चब्रह्मणाजीवेनचाभेदोपिइदमनेनाभिन्नमितिवाअस्यामुष्माद्भेदइतिवाइमेअभिन्ने

SGDF Digital Foundation

इतिवाअनयोरभेदइतिवाप्रत्येतव्यः । धर्मिप्रतियोगिभावधीःद्वित्वावच्छिन्नधीश्चभेदज्ञानाधीने
तितद्विरुद्धाभेदज्ञानानुपपत्तिरितिसाम्यात् । यदिचतत्राऽभेदंप्रतिप्रतियोग्यादिधीर्नभेदज्ञाना
धीना विरोधात् तर्हीहापिभेदंप्रतिप्रतियोग्यादिधीरपिनभेदज्ञानाधीना असंभवात् । अनयोरि
तिद्वित्वधीरिदमस्माद्भिन्नमित्यवध्यवधिमत्त्वधीश्चापेक्षाबुद्ध्यादिसामग्रीतः । नतुभेदज्ञानात् ।
नह्यवधित्वादेर्भेदकस्यज्ञानंनियमेनभेदज्ञानाधीनं । भेदकज्ञानानंतरमपिभेदधीदर्शनात् । ऐक्य
प्रतीताविवावधित्वाद्यवच्छेदकनीलत्वादिधीमात्रेणतत्संभवाच्च । अन्यथाजीवस्यब्रह्माभेदेज्ञाते
ब्रह्मणोजीवाभेदधीरितितवाप्यन्योन्याश्रयः । धर्मिणासहाभेदेनप्रतीतस्यैवाभेदप्रतियोगित्वात् ।
अप्रतीताभेदस्यप्रतियोगित्वेतुदहनस्यापितुहिनाभेदप्रतियोगित्वंस्यात् । "तत्त्वमसी" त्यत्रत्वं
पदवाच्यस्यविशिष्टस्यचतत्स्यादितिसमं । तत्रविद्यमानाभेदस्यासतिप्रतिबंधकेअभेदयोग्यचि
त्त्वादिरूपेणप्रतीतिरभेदधीहेतुः भेदभ्रमेतुदोषःप्रतिबंधकइतिनाभेदधीरितिचेत् । अत्रापिस्वरूप
भेदपक्षेवस्तुतोऽन्योन्यप्रतियोगिकयोर्घटपटस्वरूपभेदयोरन्योन्यप्रतियोगित्वयोग्यघटपटत्वादि
रूपेणप्रतीतयोरसतिप्रतिबंधकेअन्योन्यप्रतियोगितयाविशिष्टधीः । धर्मभेदपक्षेपिविद्यमानभेद
स्यासतिप्रतिबंधकेभेदयोग्यनीलपीतत्वादिरूपेणप्रतीतिर्भेदधीहेतुः । दूरस्थवनस्पत्यादौदूरादिदो

SGDF
Sri Gargeshwari Digital Foundation

षःप्रतिबंधकइतिनभेदधीरितिसमं । नह्युक्तविशेषणेसतिस्तंभात्कुंभस्यभेदाग्रहेणकुंभात्स्तंभस्य
भेदाग्रहोदृष्टः । नचान्योन्याश्रयासंस्पर्शिनिमार्गेसतितदापादकोमार्गोग्राह्यः । गौर्गवयसदृशी
त्यादावपिगवयादीनांगवादिभ्योभेदःसन्नेवप्रतियोगित्वेहेतुः । नतुप्रतियोगित्वज्ञानेभेदज्ञानंहेतुः ।
नहिगौर्गवयसदृशीतिप्रत्यक्षधीरपिनियमेनगवयोगोभिन्नइतिज्ञानपूर्विकानुभूयतेसुतरांशाब्द
धीः । तत्रभेदवाचिशब्दाभावात् । अन्यथाचैत्रस्यमैत्रपितृत्वगुरुत्वादिकेज्ञातएवमैत्रस्यचैत्रपुत्र
त्वादिज्ञानं गवयस्यगोसादृश्येज्ञातएवगोर्गवयसादृश्यज्ञानमितिसप्रतियोगिकपदार्थज्ञानमात्रेऽ
न्योन्याश्रयःस्यात् । एवंच । "सद्भेदस्यस्वरूपेणज्ञातस्याप्रतिबंधके[1] ॥ प्रतियोगितानभेदेनज्ञातेतन्न
मिथःश्रयः ॥ १ ॥ जीवस्यब्रह्मणाद्यैक्येज्ञातेजीवैकतामतिः । ब्रह्मणीतितवाऽपिस्यादन्यथाऽन्यो
न्यसंश्रयः ॥ २ ॥" एतेननप्रतियोगिधीमात्रंभेदधीहेतुः । तन्निर्विकल्पकादपिभेदधीप्रसंगात् ।
किंतुप्रतियोगित्वेन । तत्रापिनान्यंप्रतिप्रतियोगित्वधीर्भेदधीहेतुः । अतिप्रसंगात् । किंतुभेदंप्रति ।
तथाचभेदज्ञानेप्रतियोगित्वधीः । तज्ज्ञानेचभेदधीरित्यन्योन्याश्रयइतिनिरस्तं । सप्रतियोगिकेसा
दृश्यादावभेदेचसाम्यात् । तत्रसादृश्याभेदादिप्रतियोगितावच्छेदकगवयत्वचित्त्वादिरूपेणधी
रेवसादृश्याभेदादिधीहेतुश्चेदिहाऽपिवस्तुतःप्रतियोगितावच्छेदकपीतादेःपीतत्वादिरूपेणधीरेवभे

[1] अप्रतिबंधके - प्रतिबंधकाभावे सद्रूपे(?)

SGDF
Sri Gargeshwari Digital Foundation

दधीहेतुः । यद्वायत्रधर्मिप्रतियोगिनौसन्निहितौ तत्रधर्मिप्रतियोगिस्वरूपयोस्तद्भावयोस्तद्भेदस्यच
युगपद्धीः इदमनेनसदृशमितिवत् तथाविशेषणविशेष्यभूतयोर्भेदभेदिनोर्विशेषणविशेष्यभाव
स्यचयुगपदेवधीः इमौसदृशावितिवत् सर्वस्येंद्रियसन्निकृष्टत्वात् योग्यत्वाच्च । युगपदनेकज्ञानो
त्पत्तेर्विरुद्धत्वेपिदीपसहस्रइवसमूहालंबनैकज्ञानाविरोधात् । नहिमन्मतेदंडीचैत्रइतिविशिष्टधी
रपिविशेषणज्ञानपूर्विका । उक्तंचैतदन्यत्र । यत्रतुधर्मिप्रतियोगिनोरन्यतरस्यासन्निधानं तत्रापि
संस्कारसचिवेंद्रियसन्निकर्षेणैकमेवज्ञानमुत्पद्यते तदनेनसदृशमितिवत् । अन्यथाऽभेदज्ञानमपि
नस्यात् । तथाचनान्योन्याश्रयः । तदुक्तं । "धर्मित्वप्रतियोगित्वतद्भावायुगपद्यदि । विशेषणं
विशेष्यंचतद्भावश्चैवगृह्यते । कोविरोधःस्वरूपेणगृहीतोभेदएवतु । अस्यामुष्मादितिपुनर्विशेषेणै
वगृह्यत" इति ॥ यद्यपिव्यावृत्तिधीहेतुधीविशेषविषयत्वादिरूपव्यावर्तकत्वाद्यात्मकस्यविशेषण
त्वादेर्विशिष्टज्ञानाधीनव्यावृत्तिज्ञानानंतरंनिर्णयस्यनविशिष्टज्ञानेस्फुरणं तथाप्युपसर्जनत्वादिरू
पविशेषणत्वादेर्विशिष्टज्ञानेस्फुरणंयुक्तं । किंच "अन्यत्वाग्रहणेप्रोक्तःकथमन्योन्यसंश्रयः । अ
न्यत्वंयदिसिद्धंस्यात्कथमन्योन्यसंश्रय" इत्युक्तत्वादुभयतःपाशारज्जुः । एतेनविशेषणविशेष्य ॥ ५६१ ॥
भावेनैवभेदस्यप्रत्येतव्यत्वात्तद्भावप्रतीतेश्च भेदप्रतीत्यधीनतायादंडचैत्रादौदर्शनेनभेदप्रतीतिपरं

परयानवस्थेतिनिरस्तं । ब्रह्मजीवाभिन्नंजगन्मिथ्यास्वपक्षोनिर्दोषःपरपक्षोदुष्टइत्यादावप्यभेदादे
र्विशेषणादिभावेनैवप्रत्येतव्यत्वात्तत्प्रतीतेश्चभेदप्रतीत्यधीनत्वेनानवस्थाना(न्नप्राथमिकाभेदादि)
न्नाऽभेदादिधीरितिसाम्यात् । अथदंडादावपिभेदःसन्नेवविशेषणत्वादिहेतुः नतुभेदज्ञानंतज्ज्ञाने
तथाननुभवादतोनानवस्थेतिचेत्समंप्रकृतेपि । विद्यमानभेदयोःस्वरूपेणप्रतीतयोरसतिप्रतिबंधे
विशेषणत्वादिधीसंभवादित्युक्तत्वात् । किंचभिन्नत्वेनैवज्ञातस्यविशेषणतायांभिन्नंब्रह्मेतिभेद
धीपूर्वकंविशेषणतयाविज्ञातस्याभेदस्यपुनर्ब्रह्माभेदज्ञानंनस्यात् विरोधात् । एवंच "विशेषणत्वंभे
देनज्ञानंनापेक्षतेन्यथा ॥ नस्याद्विशेषणंह्यैक्यंब्रह्माभिन्नंविरोधतः" ॥ एतेनप्रत्यक्षंकिंभेदमेवगोचर
येत् । उतवस्त्वपि । नाद्यः । भेदइत्येवाप्रतीतेः । द्वितीयेपिकिंभेदपूर्वकंवस्तुगोचरयेत् । उतवस्तु
पूर्वंभेदं युगपद्वोभयं । नाद्यः । भेदइत्येवाप्रतीतेः बुद्धेर्विरम्यव्यापाराभावाच्च । अतएवनद्विती
यः । नतृतीयः । वस्तुग्रहस्यभेदग्रहहेतुत्वादितिनिरस्तं । बिंबप्रतिबिंबयोर्जीवब्रह्मणोश्चाभेदग्रा
हिप्रत्यक्षंशब्दश्चकिंभेदमेवगोचरयेदित्यादेःसाम्यात् । वस्तुमात्रज्ञानानंतरभाविनाविशिष्टज्ञाने
नयुगपदुभयग्रहणाच्च । विशिष्टधीर्विशेषणधीपूर्विकेतिमते भूतलेघटाभावइतिज्ञानानंतरमेवभू
तलंघटाभाववदितिज्ञानवदनयोर्भेदइतिज्ञानानंतरमेव इमौभिन्नावितिधियःसंभवेन । तत्पूर्वि

SGDF

कैवनेतिमतेतुयुगपदेवोभयगोचरविशिष्टधियःसंभवेनोक्तदोषानवकाशाच्च । यच्चोच्यतेभेदस्या
न्योन्याभावत्वेतत्प्रतियोगिनःस्तंभकुंभयोस्तादात्म्यस्याप्रामाणिकत्वेनान्योन्याभावस्याप्यप्रामा
णिकत्वंस्यादिति। तन्नरूप्यस्यद्वैतस्यात्यंतासतश्चाप्रामाणिकत्वेनबाधगोचरस्यरूप्याभावस्याद्वैतस्या
सद्वैलक्षण्यस्यचाप्रामाणिकत्वंस्यादितिसाम्यात् ॥ यदितत्रप्रतियोगिनोनिरूपकत्वमात्रत्वेनाप्रामा
णिकत्वेपितदभावस्यप्रामाणिकत्वं तर्हिप्रकृतेपितथा । नह्यस्मन्मतेप्रामाणिकस्यैवनिषेधइतिनिय
मः। येषांनियमःतन्मतेपिपटेप्रमितस्यपटतादात्म्यस्यघटेनिषेधइत्यस्तु। तन्मतेन्योन्याभावसंसर्गा
भावयोर्घटप्रतियोगिकत्वेपियत्रप्रतियोगिनमधिकरणेसमारोप्यनिषेधावगमःससंसर्गाभावः यत्र
त्वधिकरणेप्रतियोगितावच्छेदकमारोप्यनिषेधावगमःसोन्योन्याभावइतितयोर्भेदः। एतेनभेदेपि
स्वेतरभेदस्यवक्तव्यत्वात्स्ववृत्तित्वमितिनिरस्तं।जीवब्रह्माभेदेस्वेनाभेदस्यवक्तव्यत्वात्स्ववृत्तित्वमि
तिसाम्यात्। तत्राभेदांतरंवातस्यैवस्वनिर्वाहकत्वंवाचेदिहापितथास्तु । एतेननृश्रृंगशशश्रृंगात्यं
ताभावयोरन्योन्याभावरूपभेदस्यसत्त्वादभावाभावस्यचभावत्वान्नृश्रृंगशशश्रृंगयोःसत्त्वंस्यात्।
एवंघटध्वंसप्रागभावयोरन्योन्याभावस्यवक्तव्यत्वादभावाभावस्यभावत्वाद्धटध्वंसकालेघटः
स्यादितिनिरस्तं । अविद्यानिवृत्तिःपंचमप्रकारेतिमतेभावाद्वैतमतेचअविद्यानिवृत्तेः ब्रह्मतोन्यो

SGDF
Sri Gargeshwari Digital Foundation

न्याभावस्यवक्तव्यत्वाद्भावाभावस्यभावत्वादविद्यानिवृत्तिकालेऽविद्यास्यादितिसाम्यात् । य
दित्वभावसंसर्गाभावएवभावः । नत्वन्योन्याभाव स्तर्हिप्रकृतेपिसमं । यच्चोक्तं । भेदेषुजातिरू
पमौपाधिकधर्मरूपंवाभेदत्वंवाच्यं तत्रपुनर्भेदोवाच्यः । अन्यथाभेदत्वस्यान्यस्माद्भेदोनस्यात् ।
तथाचान्योन्यवृत्तिरिति । तन्न । अभेदेष्वभेदत्वंवाच्यं तत्रपुनरभेदोवाच्यः । अन्यथातस्यस्वाभे
दोनस्यात् । तथाचान्योन्यवृत्तिरितिसाम्यात् । नचघटस्यघटाभेदः जीवस्यजीवाभेदोवा जीवस्य
ब्रह्माभेदः वेदांतवैयर्थ्याद्यापत्तेः । अथतत्रप्रमेयत्वाभिधेयत्वयोरिवप्रमितत्वादन्योन्यवृत्तिरदो
षः तर्हिप्रकृतेपितथास्तु । ननुभेदःकिंभिन्नेवर्तते उताभिन्ने । नाद्यः । अनवस्थाद्यापातात् । नांत्यः ।
विरोधादितिचेत् अभेदःअनात्मनोनिर्वाच्यत्वंआत्मनोनिर्विशेषत्वंस्वपक्षेदोषाभावःपरपक्षेदोष
श्चकिंतद्वतिवर्तते उततद्रहितेइत्यादेःसाम्यात् । यद्यभेदादिस्वरूपंयदिवा[1]स्वाश्रयत्वयोग्येवर्तते ।
योग्यताचप्रमितिरूपकार्योन्नेया तर्हिप्रकृतेपितथास्तु । एवमन्येपिस्वव्याघातकाःक्षुद्रोपद्रवाःपरि
हार्याः । नह्यत्रभेदखंडनेकेनापिकाप्यत्रास्वव्याघातिका अजातिरूपायुक्तिरुक्ता । तदुक्तं । “ए
तादृशस्यवक्तारावुभौजात्युत्तराकरौ । मायीमाध्यमिकश्चैवतावुपेक्ष्यौबुभूषुभि” रिति ॥ ७ ॥
विशिष्यभेदखंडनोद्धारः ॥ १५ ॥ वस्तुतस्त्वस्मन्मतेभेदोवस्तुनास्वविशेषाभिन्नः । ततश्चाभिन्न

1 "यद्यभेदादि स्वरूपं, यदि वा" इति लिख्य पठनीयम्

SGDF
Sri Gouri Digital Foundation

त्वान्नानवस्थादि । भेदप्रतिनिधेश्चविशेषस्यसत्त्वान्नपर्यायत्वादिकं । विशेषश्चभेदहीनेप्येकतरप
रिशेषाभावादिनिर्वाहकः । तदुक्तं । "भेदहीनेत्वपर्यायशब्दांतरनियामकः ॥ विशेषोनामकथि
तःसोस्तिवस्तुष्वशेषत" इति । प्रमाणं(त्वत्रा)तत्रार्थापत्तिः । तथाहि । "विज्ञानमानंदंब्रह्मे" त्या
दिवाक्यबोध्यविज्ञानानंदादीनांपरमतेपिनतावद्भेदोभेदाभेदौवा अखंडार्थत्वात् । "एकधैवानुद्र
ष्टव्य" मित्याद्यैकरस्यश्रुतिविरोधाच्च । तत्रभेदप्रतिनिधिर्विशेषोपिनचेत्कथंतच्छब्दानामपर्यायत्वं
पदांतरावैयर्थ्यं विज्ञानानंदयोरेकतरापरिशेषः भ्रमाधिष्ठानत्वेनचैतन्यभानेपिमोक्षइवेदानीमानं
दाप्रकाशइत्यादिभेदकार्यंस्यात् । लक्ष्यार्थभेदाभावेपिवाच्यार्थभेदादपर्यायत्वंव्यावर्त्यभेदादवैयर्थ्यं
चेतिचाखंडवादेनिरस्तं । नचसखंडवादेपिप्रवृत्तिनिमित्तयोर्ज्ञानत्वानंदत्वयोर्भेदादपर्यायत्वं । "ए
वंधर्मानि" तिश्रुत्यातयोरपिभेदनिषेधात् । अर्थप्रकाशत्वनिरुपाधिकेष्टत्वरूपयोस्तयोरर्थप्रकाश
निरुपाधिकेष्टरूपाश्रयविशेषसापेक्षत्वाच्च । आकाशशब्द शब्दाश्रयशब्दयोर्निमित्तभेदाभावेन
पर्यायत्वापाताच्च । नह्याकाशशब्दस्यशब्दाश्रयत्वादन्यन्निमित्तमस्ति । ज्ञानानंदयोरेकतरपरिशेषे
चमोक्षेआनंदप्रकाशोनस्यात् । तस्माद्विज्ञानानंदादेरैक्यश्रुतिबलादभेदइत्येकतरापरिशेषाद्यर्थंवि
शेषोप्यंगीकार्यः । एवंतत्त्वमसीत्यत्रशोधितात्तत्पदार्थाद्वाक्यार्थस्यैक्यस्यनतावत्परमतेभेदोभेदा

भेदौवा । ऐक्यस्यमिथ्यात्वाद्यापत्तेः । तत्रविशेषोपिनचेत्कथंस्वप्रकाशचैतन्यप्रकाशेप्यैक्यस्याप्र
काशः । तत्प्रकाशस्यभेदभ्रमाविरोधित्वेप्यैक्यप्रकाशस्यतद्विरोधः । तस्यनिरपेक्षत्वेप्यैक्यस्यसा
पेक्षत्वमित्यादि । नचाविद्यावरणादैक्यस्याप्रकाशः । विशेषाभावेअनावृतचिदभिन्नस्यैक्यस्याव
रणायोगात् । नहिशुक्त्यज्ञानेनशुक्त्यंशएवावृतोऽनावृतश्चभवति । किंचै "वंधर्मानि" तिश्रुतिब
लादपिविशेषसिद्धिः।अत्रहिब्रह्मणोधर्मानुक्त्वातद्भेदोनिषिध्यते । नचभेदप्रतिनिधेरभावेधर्मधर्मि
भावोधर्माणामनेकत्वंचयुक्तं । नचधर्मानित्यनुवादः । श्रुतितोन्येनब्रह्मधर्माप्राप्तेः नचेयंश्रुतिरत्यं
तभेदनिषेधिका । भेदमात्रनिषेधा त्तादृशभेदाभावस्यलोकतएवप्राप्तत्वाच्च । "भेदाभेदौचयःप
श्येत्सयातितमएवचे" त्यादिस्मृतेश्च ।तदुक्तं । "उक्त्वाधर्मान्पृथक्त्वस्यनिषेधादेवमेवहि ॥ विशे
षोज्ञायतेश्रुत्याभेदादन्यश्चसाक्षित" इति । किंचगुणगुण्याद्यभेदपक्षेपटोपलंभेपिशौक्ल्याद्यनुपलं
भार्थं भेदाभेदपक्षेपितयोरविरोधार्थं मत्यंतभेदपक्षेपिसमवायःसंबंधःसत्तासती,भेदोभिन्नःअंत्य
विशेषोव्यावृत्तःकालःसदास्ति,देशःसर्वत्रेत्यबाधितव्यवहारार्थं विशेषोंगीकार्यः । किंचाभावादा
वस्तित्वादिर्नाभावादितोभिन्नः । गुणादिष्वनंतर्भावेनषट्पदार्थनियमभंगात् । अनियमपक्षेप्य
स्तित्वेप्यस्तित्वांतरमित्यनवस्थानात् । तत्रविशेषोपिनचेत्कथंविशेषणविशेष्यभावादि । नचस

तत्र समवायः सम्बन्ध इत्यादौ

SGDF
Digital Foundation

 त्तासतीत्यादिधीर्भ्रांतिः । सन्घटइत्यादिवदबाधात् । नाप्युपचारः । देवदत्तःसिंहोनेतिवत्सत्ता
 सतीनेतिकदाप्यव्यवहारात् । ननुसत्तादेःसत्ताद्यंतराभावेपि स्वभावविशेषादेवसद्व्यवहारइतिचे
न्न । तस्यैवस्वभावविशेषस्यास्माभिर्विशेषशब्देनोक्तेः । समवायादिःस्वनिर्वाहकइतिचेन्न । स्वस्य
स्वयमेवनिर्वाहकंहिस्वनिर्वाहकं ॥ विशेषाभावेचकथमेकस्यैवनिर्वहणक्रियायांकर्तृत्वंकर्मत्वंच । अ
यमेवविशेषःवस्त्वभिन्नःस्वनिर्वाहकश्चेतिनानवस्था तस्यतथात्वंचधर्मिग्राहकमानसिद्धं । यत्रभेदा
भावो भेदकार्यंचप्रमितौ तत्रैवविशेषःकल्प्यतइति नप्रमितभेदेघटपटादौविशेषमादायभेदत्या
गः । नहिसोमाभावेपूतिकइति तल्लाभेपिसः । एतेनोक्तस्थलेभेदएवास्तुभेदकार्यार्थंनतुभेदप्रतिनि
धिरस्त्वितिनिरस्तं । तत्रभेदस्यबाधितत्वात् । एवंचब्रह्मस्वरूपभूतयोर्विज्ञानानंदयोर्ब्रह्माभेदयोश्च
एकतरपरिशेषाभावः प्रमेयत्वादेःस्वाश्रितत्वादिकंवाभेदान्यनियम्यं भेदानियम्यत्वेसतिनियम्य
त्वात् । यद्यदनियम्यत्वेसतिनियम्यं तत्तदन्यनियम्यं यथासंमतं ब्रह्मस्वरूपभूतंविज्ञानानंदादिकं
वाभेदान्यैकतरापरिशेषनिर्वाहकवत् भेदहीनत्वेसत्येकतरापरिशेषरूपनिर्वाह्यवत्त्वात् । यद्यद्धी
नत्वेसतियन्निर्वाह्यवत् तत्तदन्यतन्निर्वाहकवत् यथासंमतं स्वाश्रितंप्रमेयत्वादिकंवाभेदान्याश्रया
श्रयिभावनिर्वाहकवत् भेदहीनत्वेसत्याश्रयाश्रयिभावरूपनिर्वाह्यवत्त्वात् । यद्यद्धीनत्वेसतियन्नि

र्वाह्यवत् तत्तदन्यतन्निर्वाहकवत् यथासंमतमित्यादिप्रयोगोद्रष्टव्यः । किंचायंविशेषःप्रत्यक्षसिद्धः ।
तथाहि । तंतुपटादिबुद्धीनांभिन्नघटपटादिबुद्धितोवैलक्षण्यंतावदनुभूयते । तच्चनतावत्संबंधविष
यत्वेन कुंडबदरादिबुद्धितोपिवैलक्षण्यानुभवात् । नापिसंयोगान्यसंबंधविषयत्वेन घटतद्ज्ञानत
द्भावबुद्धितोपिवैलक्षण्यानुभवात् । नापिस्वरूपप्रत्यासत्तिसंयोगान्यसंबंधविषयत्वेन । घटतद्ध
र्मिकान्योन्याभावादिबुद्धेः घटपटादिबुद्धितोवैलक्षण्याभावापातात् । नाप्ययुतसिद्धिविषयत्वेन
आश्रयाश्रयिभावनियमोह्ययुतसिद्धिः । तत्रतदानींतनआश्रयाश्रयिभावःकुंडबदरादिबुद्धावपि
भाति नियमस्तु न तंतुपटादिबुद्धावपि । नहिप्रत्यक्षातंतुपटादिधीः तंतुपटसंबंधनाशोवा तंतुपट
विभागोवानभविष्यतीत्याकारा । नापिकुंडबदरादिधीस्तयोःसंबंधनाशोवाकुंडबदरविभागोवा
भविष्यतीत्याकारा । नापिसमवायविषयत्वेन उक्तरीत्यासंबंधनित्यत्वस्यवासंबंध्ययुतसिद्धत्वस्य
वातत्राऽस्फुरणात् । तस्माद्भेदविषयत्वेनैववैलक्षण्यंवाच्यं । अयंघटः गजाश्वादिरेवसेना पत्रमे
वताटंकमित्यादौ पुरोवर्त्यादिनोघटादेरिवआतानवितानात्मकाःतंतवःपटःशुक्लःपटइत्यादावपितं
त्वादिनापटस्याभेदप्रतीतेः । नचात्रपटत्वशुक्लत्वयोरेकस्थत्वमेवभातीतिवाच्यं । पटशुक्लयोरैक्य

SGDF ... Digital Foundation

स्यापितत्रांतर्गतेः । अन्यथाक्वाप्यभेदोनसिद्ध्येत् । घटःपटोनेतिधीश्चभेदविषयानस्यात् । दंडीचै
त्रइत्यत्रापिदंडिनाचैत्रस्याऽभेदोभात्येव । नचशुक्लःपटइत्यत्रशुक्लवानेवशुक्लपदार्थइतिवाच्यं । शु
क्लरूपमित्यत्रयच्छुक्लंतस्यैवेहप्रतीतेः । अन्यथेहापिशुक्लीपटइतिधीःस्यात । मतुब्लोपादिकल्पनंतु
व्यवहारे नतुप्रतीतौ । पटस्यशौक्ल्यंरूपीपटइत्यादिधीस्तुसंबंधविषया नतुभेदविषया । सत्तासती
त्यादिवत्भेदाभावेप्युपपन्ना । पटस्यतंत्वन्यत्वेचगुरुत्वद्वयंस्यात् तंतुयुक्तेभूतलेंपटवृत्तिश्चनस्यात् ।
मूर्तानांसामानाधिकरण्यायोगात् । व्यवहारार्थक्रियाभेदादितुपत्रताटंकादिवदित्युक्तं । तस्मात्तं
तुपटादिबुद्धिरभेदविषयैव । यदिचेयंकेवलाभेदविषया तर्हिसमानाधिकरणंव्यवहारंनजनयेत् ।
घटःकलशइत्यव्यवहारात् । तेनज्ञायतेअधिकोप्यस्याविषयोस्तीति । नचायंभेदः पटोनशुक्लइत्यु
ल्लेखापातात् । भेदाभेदाविरोधायविशेषस्यावश्यकत्वाच्च । तस्माद्योधिकोविषयःसएवविशेषइ
तिसिद्धंविशेषस्यप्रत्यक्षत्वं । तदुक्तं "येनप्रत्यक्षसिद्धेनव्यवहारोखिलोभवेदि" ति । "अभेदेपि
विशेषोस्तिव्यवहारस्ततोभवेदि" तिस्मृतिसिद्धश्चविशेषः । तस्माद्भेदस्यवस्तुनासाविशेषाभिन्न
त्वान्नकोपिदोषइति ॥ ७ ॥ विशेषसमर्थनं ॥ १६ ॥ ननुतथापिनतावज्जीवेश्वरभेदेप्रत्यक्षंमानं ।

SGDF
Sri Gargeshwari Digital Foundation

ईश्वरस्येति ॥ भेदस्याभावरूपत्वेनतत्प्रत्यक्षत्वेधर्मिप्रतियोग्युभयप्रत्यक्षत्वंतंत्रमितितस्याभिप्रायः ॥ अप्रत्यक्षत्वादिति ॥ प्रत्यक्षाप्रत्यक्षसंयोगोऽप्रत्यक्षःवायुवनस्पतिसंयोगवदित्यर्थः ॥ अप्रसिद्धेति ॥ तात्विकभेदस्याप्रसिद्धेरित्यर्थः ॥ धर्मीति ॥ घटादौतत्समसत्ताकव्यावहारिकभेदवत्त्वंप्रसिद्धमित्यर्थः ॥ असाधारण्यादिति ॥ घटादौसाध्यवतिसर्वज्ञत्वहेतोरभावादित्यर्थः । नाप्रसिद्धविशेषणमितिभावः ॥ आत्मभेदमात्रसिद्धिरिति ॥ मात्रशब्दःकार्त्स्न्ये बुद्ध्याविवेकेनआत्मशब्देनसंबध्यते । एवं

ईश्वरस्याप्रत्यक्षत्वेनतद्धर्मिकस्यतत्प्रतियोगिकस्यवाभेदस्याप्रत्यक्षत्वात् । नाप्यनुमानं । जीवेश्वरौ भिन्नौविरुद्धधर्माधिकरणत्वात् दहनतुहिनवदित्यत्रतात्विकेभेदेसाध्येदृष्टांतस्यसाध्यवैकल्यात् । अतात्विकेसाध्येसिद्धसाधनात् । दुःखादेरंतःकरणधर्मत्वेनासिद्धेश्च । ब्रह्मतत्वतोजीवाद्भिन्नं सर्वज्ञत्वात् व्यतिरेकेणजीववदित्यत्राप्रसिद्धविशेषणत्वात् । ब्रह्मधर्मिसत्तासमानसत्ताकभेदवदिति साध्यनिर्देशेप्यसाधारण्यात् । नाप्यात्मत्वं नानाव्यक्तिनिष्ठं जातित्वात्पृथिवीत्ववदित्यादिभिरात्मभेदमात्रसिद्धिः आत्मैक्यवादिनंप्रत्यसिद्धेः । दुःखंगुणत्वावांतरजात्यास्वजातीयाश्रयभिन्नाश्रितं

चसर्वात्मनांभेदसिद्धिरित्यर्थइत्याहुः । वस्तुतस्तुअनेनानुमानेनआत्मभेदमात्रंसिद्ध्यति नतुतस्यतात्विकत्वं तात्विकत्वसिद्धिस्तु प्रकारांतरेणआत्मत्वस्यजातित्वेतदाश्रयव्यक्तिभेदस्यौपाधिकत्वायोगात्स्वाभाविकत्वसिद्धिरितिद्रष्टव्यं । कुतोनेत्यतआह ॥ आत्मैक्येति ॥ आत्मत्वेजातित्वाभावादित्यर्थः । दुःखं देवदत्तदुःखं ॥ स्वजातीयेति ॥ स्वसजातीयेत्यर्थः । स्वशब्देनपक्षीभूतं

SGDF
Sri Gargeshwari Digital Foundation

दुःखंतत्सजातीयंदुःखंयज्ञदत्तीयादिदुःखं तदाश्रयोयज्ञदत्तादि स्तद्भिन्नोयोदेवदत्त स्तदाश्रितमित्यनेनानुमानेनदेवदत्ताद्यात्मनां भेदःसिद्ध्यति । ननुनानेनानुमानेनजीवानांभेदःसिध्यति स्वशब्दोक्तंयत्पक्षीभूतंदुःखं पदार्थत्वादिनातत्सजातीयंघटादि स्तदाश्रयोमृत्पिंड स्तद्भिन्नोयोदेवदत्तस्तदाश्रितत्वसिद्ध्याजडजीवभेदसिद्धेरर्थांतरमित्यतउक्तं ॥ गुणत्वावांतरजात्येति ॥ गुणत्वावांतरजातिर्दुःखत्वं तयायत्सजातीयंतद्दुःखांतरमेवायास्यति ततश्चजीवानांभेदसिद्धिरितिध्येयं ॥ रूपवदिति ॥ तत्रगुणत्वावांतरजातीयरूपत्वं तेनयत्स्वजातीयंरूपांतरं तदाश्रयोघटः तद्भिन्नोयआश्रयःपटः तदाश्रितमित्यर्थः ॥ शब्दइति ॥ गुणत्ववति

गुणत्वाद्रूपवदित्यत्रशब्देव्यभिचारात् । दुःखादीनामंतःकरणधर्मत्वेनसिद्धसाधनाच्च ।
विमतानिशरीराणिस्वसंख्यासंख्येयात्मवंति शरीरत्वात् संमतवदित्यत्रयोगिशरीरेव्य
भिचारात् । आत्माधर्मिसत्तासमानसत्ताकात्मप्रतियोगिकभेदवान् द्रव्यत्वात् घटवत् ।

शब्देगुणत्वावांतरजात्याशब्दत्वेनसजातीयंशब्दांतरं तदाश्रयआकाश स्तद्भिन्नाश्रितत्वाभावेनसाध्याभावादितिभावः ॥ दुःखादीनामिति ॥ गुणत्वावांतरजात्यादुःखत्वेनस्वसजातीयदुःखांतराश्रयभूतयज्ञदत्तीयांतःकरणभिन्नदेवदत्तीयांतःकरणाश्रितत्वसद्भावेनांतःकरणभेदसिद्ध्यांतःकरणभेदस्यचास्माकंसंमतत्वेनजीवानांभेदासिद्ध्यासिद्धसाधनतेत्यर्थः ॥ स्वसंख्येति ॥ तथाचशरीराणामनेकत्वात्तत्रत्यात्मनामप्यनेकत्वसिद्धिरितिज्ञेयं ॥ संमतवदिति ॥ व्यतिरेकेणघटवदित्यर्थः ॥ योगिशरीरइति ॥ योगसामर्थ्येनगृहीतेषुसौभर्यादिशरीरेषुविद्यमानस्यात्मनएकत्वेनसाध्याभावादितिभावः । आत्मा चैत्रात्मा ॥ आत्मेति ॥

SGDF
Sri Gargeshwari Digital Foundation

मैत्रात्मेत्यर्थः । व्यावहारिकभेदेनार्थांतरवारणायधर्मीत्यादिविशेषणं । धर्मिभूतचैतन्येत्यर्थः । अन्यथाचैत्रस्यव्यावहारिकत्वेन पुनर्व्यावहारिकभेदमादायार्थांतरतापत्तेरितिध्येयं ॥ आत्मेति ॥ आत्मानानेतिसाध्येअंतःकरणोपाधिकंनानात्वमादायाऽ र्थांतरतापत्तेरुक्तं ॥ द्रव्यत्वव्याप्येति ॥ आत्मत्वजात्येत्यर्थः । तथाचात्मत्वजात्याश्रयतयानानेतियावत् स्वभावतएवनाना नतूपाधितइत्याशयः । संख्यादिगुणाधिकरणेद्रव्यत्वव्याप्यजातेरभावेनतदाश्रयतयानानात्वशून्येकालादौव्यभिचारवारणाय

आत्माद्रव्यत्वव्याप्यजात्यानाना अश्रावणविशेषगुणाधिकरणत्वा
त् घटवदित्यत्रचात्मनोनिर्गुणत्वेनासिद्धेः । उक्तसाध्यएवशरीरा
त्मसंयोगाधारत्वात् शरीरवदित्यत्राभाससाम्यात् । नापि "द्वासु
पर्णे" त्यादिश्रुतिः अनुवादकत्वात् । व्यावहारिकभेदपरत्वाद्वा ।

विशेषपदं । शब्दाख्यविशेषगुणाधिकरणेस्वाभाविकनानात्वशून्येआकाशेव्यभिचारवारणायअश्रावणेतिगुणविशेषणं ॥ घट वदिति ॥ द्रव्यत्वव्याप्यजातिःघटत्वं तदाश्रयतयानानात्वमस्तीत्यर्थः ॥ निर्गुणत्वेनेति ॥ निर्धर्मकत्वेनेत्यर्थः । तेनहेतुद्व यस्याप्यसिद्धिरितिभावः ॥ साध्यएवेति ॥ द्रव्यत्वसाक्षाद्व्याप्यजात्यानानात्वरूपेसाध्यएवेत्यर्थः ॥ शरीरवदिति ॥ तत्र द्रव्यत्वव्याप्यजातिःशरीरत्वं तदाश्रयतयैवनानात्वमस्तीत्यर्थः ॥ आभाससाम्यादिति ॥ शरीरात्मसंयोगाधारत्वेनैवहेतु

SGDF
Sri Gargeshwari Digital Foundation

नाआत्मनिअनित्यत्वादेरपिसुसाधत्वादित्यर्थः ॥ भेदांतरेपीति ॥ जडजीवभेदादावपीत्यर्थः ॥ यत्रहीति ॥ एतच्चानिर्वाच्य भंगेस्पष्टंव्याख्यातं प्रतियोगिप्रत्यक्षत्वमभावप्रत्यक्षत्वे नप्रयोजकं अन्वयतोव्यतिरेकतश्चव्यभिचारादित्याह ॥ जलपरमा णाविति ॥ ननुतर्ह्यभावप्रत्यक्षत्वेकिंप्रयोजकमितितत्राह ॥ प्रतीतीति ॥ स्तंभःपिशाचोनभवतीत्यन्योन्याभावस्यप्रत्यक्ष

एवंभेदांतरेपिप्रमाणंनिरसनीयमिति । उच्यते । प्रत्यक्षंतावत्जीवस्यब्रह्मतोभेदेप्रमाणं । घटःपटोनेतिवन्नाहंसर्वज्ञःनाहंनिर्दुःखइत्यनुभवात् । नचब्रह्मणोप्रत्यक्षत्वात्ततोभेदोप्यप्र त्यक्षः । यत्रहियत्सत्वमनुपलब्धिविरोधि तत्रतदभावःप्रत्यक्षः नतुप्रतियोगिप्रत्यक्षत्वंअभा वप्रत्यक्षत्वेतंत्रं । जलपरमाणौपृथिवीत्वाभावस्यप्रत्यक्षत्वापातात् । स्तंभःपिशाचोनभवति घटःपरमाणुर्नभवतीति प्रत्यक्षप्रतीतेश्च । प्रतीत्यनुसारेणचप्रयोजकंकल्प्यं । अन्यथाजीवे श्वराभेदश्रुतेरप्रसक्तप्रतिषेधत्वंस्यात् । तद्भेदश्रुतेश्चत्वदुक्तंप्रत्यक्षप्राप्तानुवादित्वंनस्यात् ।

त्वदर्शनात्तदनुसारेणान्योन्याभावप्रत्यक्षत्वेऽधिकरणप्रत्यक्षत्वमेवप्रयोजकमितिकल्पनीयमित्यर्थः ॥ अन्यथेति ॥ जीवेश्वर भेदस्योक्तरीत्याप्रत्यक्षत्वाप्राप्तत्वइत्यर्थः । श्रुत्याप्राप्तस्यश्रुत्यानिषेधेतुश्रुतेरुन्मत्तवाक्यत्वापत्तेरित्याशयः ॥ तद्भेदश्रुतेरिति ॥ ॥ ५६७ ॥ जीवेश्वरभेदस्यप्रत्यक्षसिद्धत्वाभावेतत्प्रतिपादक(द्वासुपर्णे)त्यादिश्रुतेस्त्वयोच्यमानंप्रत्यक्षप्राप्तभेदानुवादित्वंनस्यादित्यर्थः ।

एवंचजीवस्येश्वराद्भेदसिद्धिः । तथाईश्वरस्यजीवाद्भेदोपिप्रत्यक्षसिद्धएव । नन्वस्मदादिप्रत्यक्षेणकथंतत्सिद्धिरितिचेन्न । ईश्वरप्र त्यक्षेणैवतत्सिद्धेरुच्यमानत्वात् । नन्वस्माकंकथंतत्प्रत्यक्षावगमइतिचेत् तद्वाक्यादेवेत्याह ॥ तान्यहमिति ॥ यदुक्तं नाहं निर्दुःखइत्यादिप्रत्यक्षमेवजीवेश्वरभेदेप्रमाणमिति तदयुक्तमित्याशंकते ॥ नन्वत्रेति ॥ प्रत्यक्षइत्यर्थः । निर्दुःखात् ब्रह्मचैत

ईश्वरस्यजीवाद्भेदेतु "तान्यहंवेदसर्वाणिनत्वंवेत्थपरंतप उत्तमःपुरुषस्त्वन्य" इत्यादि तद्वचनानुमितमीश्वरप्रत्यक्षंप्रमाणं । नन्वत्रयोभातिअंतःकरणाविद्याविशिष्टस्याहमर्थ स्यनिर्दुःखाद्भेदःसममापीष्टः यस्तुनेष्टःशुद्धचैतन्यस्यनिर्दुःखाद्भेदः सोत्रनभातीतिचे न्न । योहमस्वाप्संयस्यममाज्ञानंसंसारश्च सोहंनिर्दुःखोनेतिसुषुप्तिकालीनांतःकरणानव च्छिन्नाभेदेनअज्ञानाद्याश्रयाभेदेनचप्रत्यभिज्ञायमानेशुद्धेभेदप्रतीतेः संसाराधारस्यतद नाधाराद्भेदएवह्यावयोर्विवादः । नतुचैतन्यस्यचैतन्यात् । साधितंचाहमर्थस्यशुद्धात्मत्वं

न्यात् नेष्टः मम ॥ शुद्धेति ॥ जीवचैतन्यस्येत्यर्थः । निर्दुःखात् ब्रह्मचैतन्यात् अत्र नाहंनिर्दुःखइतिप्रत्यक्षे ॥ अंतःकरणा नवच्छिन्नेति ॥ चैतन्येत्यर्थः ॥ भेदेति ॥ अहंनिर्दुःखोनेतिभेदप्रतीतेरित्यर्थः । नन्वेतावताऽज्ञानाश्रयाच्छुद्धान्निर्दुःखस्यशुद्ध स्यभेदःसिध्यति नतुजीवादित्यतआह ॥ संसारेति ॥ अज्ञानमेवसंसारः । भेदएवभेदविषयएव । तथाचममते जीवस्यैवसं

SGDF Foundation

साराधारत्वाज्जीवएवनिर्दुःखेश्वरभेदोविवादापन्नःसिद्धएवेत्यर्थः ॥ तथापीति ॥ तथाचाहमर्थेनिर्दुःखत्वावच्छिन्नप्रतियोगिताकोभेदोह्यत्रप्रतीयते तथाचेश्वरोपिनिर्दुःखत्वरूपप्रतियोगितावच्छेदकावच्छिन्नइतितत्प्रतियोगिकोभेदोपिप्रतीयतएवेत्यर्थः ॥ ननिर्दुःखमिति ॥ तथाचब्रह्मननिर्दुःखत्वरूपप्रतियोगितावच्छेदकावच्छिन्नमित्यर्थः ॥ बहुजीवेति ॥ एकस्यमुक्तावप्यपरस्यसंसारिणःसत्वेनतद्दुःखेनब्रह्मणोपिदुःखितयातद्भावरूपमुक्तेरपुरुषार्थत्वादितिभावः । यद्यप्येकजीववादेब्रह्मभावरूप

यद्यपिघटाद्यपिनिर्दुःखं तथापिनिर्दुःखमात्राद्भेदधीरियंब्रह्मतोपिभेदविषयैव । नचाद्वैतमतेर्जीवदुःखेनब्रह्मापिदुःखीतिननिर्दुःखंब्रह्मेतिवाच्यं । बहुजीववादेब्रह्मभावरूपमुक्तेरपुमर्थत्वापातात् । एकजीववादेप्यौपाधिकश्यामत्वादेर्बिंबमहाकाशयोरिवदुःखित्वादेर्ब्रह्मण्यसत्त्वात् । विस्तृतंचैतदविद्याश्रयभंगे साधितंचप्रत्यक्षप्रामाण्यावसरेबाह्यप्रत्यक्षस्यबलवत्प्रत्यक्षेतरेणनबाधः । साक्षिप्रत्यक्षस्यतुनकेनापिबाधइति । तस्माज्जीवेशभेदःप्रत्यक्षः ।

मुक्तेःपुरुषार्थत्वंयुक्तं तथापिजीवदुःखेननब्रह्मणोदुःखित्वंयुक्तं तथाहि दर्पणाद्युपाधिकृतमपिश्यामत्वंप्रतिबिंबएव नबिंबे यथावाघटाद्युपाधिकृतंपरिच्छिन्नत्वंघटाकाशएव नमहाकाशे एवमंतःकरणाद्युपाधिकृतमपिदुःखादिकंजीवएव नब्रह्मणि अतोब्रह्मणोपिप्रतियोगितावच्छेदकावच्छिन्नत्वाद्युक्तस्तस्माज्जीवस्यभेदइत्याशयेनाह ॥ एकजीवेति ॥ ननुनिर्दुःखत्वादिग्राहिप्रत्यक्षंबाधितंकिंनस्यादितिचेत्तत्राह ॥ साधितंचेति ॥ नबाधइति ॥ साधितमित्यन्वयः । एवंचबाह्यप्रत्यक्षस्यापियदाबल

SGDF
Sri Gargeshwari Digital Foundation

वत्प्रत्यक्षंविनान्येनबाधोनास्ति । तदाकिमुवक्तव्यंसाक्षिप्रत्यक्षस्यबाधोनास्तीति प्रकृतेचनिर्दुःखत्वादिग्राहिप्रत्यक्षंसाक्षिरूपमेवेतिभावः । एवंजीवेशभेदस्यप्रत्यक्षत्वमुपपाद्यभेदचतुष्टयस्यापिप्रत्यक्षत्वमुपपादयति ॥ एवमिति ॥ ननुनाहंचैत्रइत्यत्रचैत्रस्यप्रतियोगित्वात्परात्मनश्चाप्रत्यक्षत्वात्कथंतत्प्रतियोगिताकभेदस्यप्रत्यक्षत्वमित्यतआह ॥ शब्दादित्यादि ॥ चेष्टालिंगकानुमानेन नाऽहंचैत्रइतिपरस्परंजीव[1]भेदानुभवः घटोनब्रह्मे[2]तिजडेश्वरभेदानुभवः घटोनपटइतिपरस्परं[3]जडभेदानुभवः नाहंघटईति

एवंशब्दादनुमानादिनावाचैत्रात्मादिकंज्ञातवतामैत्रेणनाहंचैत्रःघटोनब्रह्मघटोनपटःनाहंघटइत्यनुभवात्पंचापिभेदाःप्रत्यक्षाः ॥ ९ ॥ भेदपंचकेप्रत्यक्षं ॥ १७ ॥ अनुमानानिच । ईश्वरःजीवप्रतियोगिकतात्विकभेदवान् सर्वशक्तित्वात् सर्वज्ञत्वात् सर्वकार्यकर्तृत्वात् स्वतंत्रत्वाच व्यतिरेकेणजीववत् । जीवोवाब्रह्मप्रतियोगिकतात्विकभेदवान् अल्पज्ञत्वात् अल्पकर्तृत्वात् संसारित्वाच्च व्यतिरेकेणब्रह्मवत् । परमतेपिजीवब्रह्मणोर्व्यावहारिकभेदस्यसत्त्वात्पक्षदृष्टांतभावः । अन्यथापरस्यापिजीवात्मानस्तत्त्वतःपरमात्मनोनभिन्नाः आत्मत्वात्परमात्मवत् इत्यादिनस्यात् ।

जडजीवभेदानुभवइतिद्रष्टव्यं ॥ ९ ॥ भेदपंचकेप्रत्यक्षविवरणं ॥ १७ ॥ ननूक्तानुमानद्वयेजीवेश्वरयोर्मध्येएकस्यपक्षत्वमपरस्यदृष्टांतत्वमुक्तं तदयुक्तं तयोरेकत्वेन संदिग्धसाध्यवत्त्वनिश्चितसाध्यवत्त्वरूपपक्षत्वदृष्टांतत्वयोरसंभवादित्यतोनुमानंशोधयति ॥ परमतेपीत्यादिना ॥ अन्यथेति ॥ तयोरैक्येनपक्षदृष्टांतभावायोगशंकायां । ननूक्तानुमानद्वयेसाध्यावैशि

SGDF
Sri Gargeshwari Digital Foundation

ष्ट्यं हेतुसाध्ययोरैक्यात् कथमितिचेत् ममसर्वपदार्थाभेदवादित्वेनतदंतर्गतहेतुसाध्ययोरप्येकत्वादित्यतआह ॥ एतेनेति ॥ तदेवदर्शयति ॥ परेणापीति ॥ स्वव्याहतीति ॥ जीवात्मानःपरमात्मनस्तत्वतोनभिद्यंतइत्यनुमानेपिसर्वाद्वैतिनःसाध्यावैशिष्ट्यापत्त्यास्वव्याहतिःस्यादित्यर्थः । ननुभेदस्यधर्मिस्वरूपतायाभवद्भिरंगीकाराद्भेदवानितिभेदवत्त्वोक्तिर्बाधितेत्यतआह ॥ भेदस्येति ॥ अप्रसिद्धेति ॥ तात्विकभेदस्याप्रसिद्धेरितिभावः । व्यतिरेकिणिअप्रसिद्धमेवसाध्यंसिध्यतीतिमतमाश्रित्याह

एतेनसर्वाद्वैतवादिनंप्रतिसाध्यावैशिष्ट्यादिदोषान्नभेदेनुमोक्तिर्युक्तेतिनिरस्तं । परेणापिस्वव्याहतिनिरासायव्यावहारिकभेदमात्रेणहेतुसाध्यादिव्यवस्थायाःस्वीकृतत्वात् । भेदस्यवस्तुस्वरूपत्वेपिविशेषबलात्वस्तुविशेषणत्वंचास्तीत्युक्तत्वात् भेदवत्त्वंनबाधितं । नचाप्रसिद्धविशेषणता । जीवब्रह्माभेदेऽनिष्टप्राप्तेर्वक्ष्यमाणत्वेनतद्विपर्ययस्याष्टद्रव्यातिरिक्तद्रव्यादेरिवानुमानयोग्यत्वात् । यद्वाजीवःकिंचिद्धर्मिकप्रतियोगिज्ञानाबाध्यभेदप्रतियोगी ।

॥ जीवेति ॥ इदमुपलक्षणं जीवब्रह्मणोरतात्विकभेदेपीतिद्रष्टव्यं । तद्विपर्ययस्य अतात्विकभेदविपर्ययस्य ॥ अष्टद्रव्येति ॥ तथाहि इच्छायाअष्टद्रव्याश्रितत्वेबाधकसद्भावादिच्छाअष्टद्रव्यातिरिक्तद्रव्याश्रितेत्यनुमानेनअष्टद्रव्यातिरिक्तंद्रव्यमप्रसिद्धमपिसिध्यतीत्यंगीकृतंतार्किकैः तथाअभेदेअतात्विकभेदेचबाधकसद्भावात्तात्विकभेदोऽप्रसिद्धएवानुमानेनसिध्यतीत्यर्थः । ईश्वरपक्षकानुमानेऽप्रसिद्धिंपरिहर्तुंसामान्यतःप्रसिद्धिमाह ॥ जीवइति ॥ व्यावहारिकभेदमादायार्थांतरवारणायप्रतियोगिज्ञाना

बाध्येत्युक्तं । प्रतियोगिभूतजीवेत्यर्थः । जीवस्यैवब्रह्मत्वेनतज्ज्ञानाबाध्यभेदसिद्धौतस्यतात्विकत्वमेवसिध्यति तथाचानेनानुमानेनजीवप्रतियोगिकतात्विकभेदःकस्मिंश्चिद्धर्मिणिसामान्यतःसिद्धः सचव्यतिरेकिणाधर्मिविशेषनिष्ठतयासाध्यतइतिद्रष्टव्यं । जीवपक्षकेद्वितीयानुमानेऽप्रसिद्धिवारणायसामान्यप्रसिद्धिमाह ॥ ब्रह्मवेति ॥ प्रतियोगीति ॥ ब्रह्मेत्यर्थः । तथाचानेनब्रह्मप्रतियोगिकतात्विकभेदःकस्मिंश्चिद्धर्मिणिसामान्यतःसिद्धः सचव्यतिरेकिणाधर्मिविशेषनिष्ठत्वेनसाध्यतइतिभावः ॥ अधिष्ठानत्वादिति ॥ अविद्यानावृतंजीवचैतन्यमेवाधिष्ठानमितिमतसद्भावाज्जीवेप्यधिष्ठानत्वमस्तीतिनाद्यानुमानेस्वरूपा

ब्रह्मवाकिंचिद्धर्मिकप्रतियोगिज्ञानाबाध्यभेदप्रतियोगि अधिष्ठानत्वा च्छुक्तिवदितिसामान्यतस्तात्सिद्धेर्नाप्रसिद्धिः । केचित्तुजीवात्भिन्नइत्येवसाध्यं । तथाचनाप्रसिद्धिः । मिथ्याभेदेनसिद्धसाधनंतुनिरसिष्यते ।

सिद्धिः ॥ शुक्तिवदिति ॥ शुक्तिप्रतियोगिकोभेदोरूप्येऽस्ति तथाचकिंचिद्धर्मिकोरूप्यधर्मिकः प्रतियोगिभूतशुक्तिज्ञानाबाध्योयोभेदःशुक्तिभेदस्तत्प्रतियोगित्वंशुक्तावस्तीतिध्येयं । केचित्त्वित्यनंतरंईश्वरइतिशेषः । हेतुस्तुसर्वज्ञत्वादिरेवद्रष्टव्यः ॥ तथाचेति ॥ जीवाद्भेदस्यव्यावहारिकस्यघटादौमायिमतेप्रसिद्धत्वादित्यर्थः । नन्वप्रसिद्ध्यभावेपिमिथ्याभूतेनतेनैवभेदेनसिद्धसाधनतातुस्यादित्यतआह ॥ मिथ्येति ॥ व्याप्तिपक्षधर्मतोपेतसाल्लिंगपरामर्शेनजायमानानुमितिःप्रमारूपैवेतितात्विकभेदएवा

SGDF ... Foundation

नुमानविषयइतिनारोपितभेदमादायसिद्धसाधनतापरीक्षकेणदातुंशक्या अन्यथाविमतंमिथ्येत्यत्रापिकल्पितमिथ्यात्वमादायास्माकंसिद्धसाधनत्वेनत्वदभिमतंतात्विकमिथ्यात्वंनसिध्येत् तथापर्वतोऽग्निमानित्यादौसर्वत्रारोपितवह्न्यादिकमादायसिद्धसाधनतायादातुंशक्यत्वेनानुमानमात्रोच्छेदःस्यात् अतस्तत्रत्वयाऽस्मदुक्तएवसमाधिर्वाच्यः तथाचनसिद्धसाधनमित्यर्थः ॥ साधनादिति ॥ सर्वज्ञत्वादिहेतुनेतिशेषः ॥ नाप्रसिद्धिरिति ॥ घटादौसाध्यसिद्धेरितिभावः ॥ नापीति ॥ जीवप्रतियोगिकब्रह्मरूपधर्मिसत्तासमानसत्ताकभेदस्यमायिनोऽसिद्धत्वादित्यर्थः । अप्रसिद्धिपरिहारेव्यतिरेकिणिअसाधारण्यमापद्यतइ

यद्वाब्रह्मजीवप्रतियोगिकधर्मिसत्तासमानसत्ताकभेदवदितिसाधनान्नाप्रसिद्धिर्नापिसिद्धसाधनं । नचोभयत्राप्यसाधारण्यं । तस्यागृह्यमाणविशेषावस्थायामेवदोषत्वादित्याहुः । इतरेतुब्रह्मजीवप्रतियोगिकतात्विकाभेदवन्नेतिसाधनाप्रसिद्धिः। परपक्षेपिघटादेर्जीवेनतात्विकाभेदाभावादित्याहुः।

नाम्ना

त्याशंक्यनिराकरोति ॥ नचोभयत्रापीति ॥ केचिदित्युक्तानुमानद्वयेपिसाध्यवतिघटादौसर्वज्ञत्वादिहेतोरभावादितिभावः ॥ तस्येति ॥ अनुकूलतर्कादिविशेषादर्शनदशायामेवसंशयाधायकत्वेनतस्यदोषत्वात्प्रकृतेचानुकूलतर्काणांवक्ष्यमाणत्वेनागृह्यमाणविशेषत्वाभावान्नतस्यदोषत्वमित्यर्थः। जीवप्रतियोगिकव्यावहारिकाभेदाभावमादायसिद्धसाधनवारणायतात्विकेत्युक्तं। जीवप्रतियोगिकतात्विकाभेदाभावरूपसाध्यस्यघटादौप्रसिद्धत्वान्नाप्रसिद्धिरित्याह ॥ परपक्षेपीति ॥ नेदंनिरात्मकमित्यादि

SGDF
Sri Gargeshwari Digital Foundation

रूपेणाभावःएवंकेवलव्यतिरेकिणासाध्यतेअभावाभावश्चभावएवेतिसुशकोव्याप्तिग्रहइतिकश्चिदितिटीकाकारैरुक्तत्वादिहापिभे
दोनामान्योन्याभावः तथाचेश्वरोजीवप्रतियोगिकान्योन्याभाववान्सर्वज्ञत्वादितिसाध्यते तथाचजीवप्रतियोगिकान्योन्याभा
वप्रतियोगितावच्छेदकीभूतंजीवतादात्म्यमेवजीवत्वमितियावत् तच्चजीवएवप्रसिद्धमितिनाप्रसिद्धिरित्याह ॥ अपरेत्विति ॥
साहीति ॥ विशेषणभूतसाध्यस्याप्रसिद्धत्वात्तन्निरूपितव्याप्तेर्ग्रहीतुमशक्यत्वाद्व्याप्तिविघटकत्वेनैवदोषः प्रकृतेचाभावाभाव
स्यभावत्वात्तस्यजीवएवप्रसिद्धत्वेनसुशकोव्याप्तिग्रहइतिभावः । नन्वप्रसिद्धेर्व्याप्तिविघटकत्वेनैवदोषताकुतः विशेषणाप्रसि

अपरेत्विहसाध्यस्यजीवप्रतियोगिकतात्विकभेदस्यान्योन्याभावरूपत्वा
न्नाप्रसिद्धिर्दोषः । साहिव्याप्तिग्रहविघटकत्वेनदोषः । पक्षतातुसि
षाधयिषाविरहसहकृतसाधकप्रमाणाभाववत्त्वादिरूपासंदेहानपेक्षा ।

द्धौतत्कोटिकसंशयायोगेनसंदेहघटितपक्षतायाअयोगाद्धेतोःपक्षधर्मतायाअसंभवेनपक्षधर्मताविघटकत्वेनदोषत्वंकुतोनस्यात् ।
विशेषणस्याप्रसिद्धत्वेपिपक्षतो पपादनोपायस्तुनास्तीत्यतआह ॥ पक्षतात्विति ॥ अस्तुवासंदेहघटितापक्षता सापिप्रकृते
विशेषणस्याप्रसिद्धत्वेपिसंभवत्येव । कथमितिचेत् उच्यते यथाशब्दोभिधेयइत्यत्राभिधेयभेदस्याप्रसिद्धत्वेनशब्दोऽभिधेयोन
वेतिसंदेहासंभवेपिअभिधेयत्वंशब्दवृत्तिनवेतिसंदेहोपपादनेनपक्षतामुपपाद्यसंदेहघटितापक्षधर्मतोपपाद्यते एवमिहापिब्रह्मजी

SGDF
Sri Gargeshwari Digital Foundation

वात्तत्वतोभिन्नंनवेतिसंदेहायोगेपिजीवब्रह्मणोर्भेदेतात्विकत्वमस्तिनवेत्येवंरूपेणसंदेहःसंभवत्येवेतिव्याप्तिग्रहाभावघटकत्वेनैव दोषत्वंतस्यावाच्यमित्याह ॥ सापेक्षत्वेपीति ॥ प्रकृतेचव्याप्तिग्रहःसंभवतिअभावाभावस्यभावत्वादित्याह ॥ व्यतिरेकिणिचेति ॥ जीवप्रतियोगिकान्योन्याभावाभावरूपसाध्याभावस्यव्याप्तिः । व्याप्तिस्तन्निष्ठेत्यर्थः । जीवाभेदो जीवतादात्म्यं जीवत्वमितियावत् । नन्वेवंव्यतिरेकिण्यभावस्यैवसाध्यस्यसुखेनकर्तुंशक्यत्वेनाभावाभावोभावएवेतिसुखेनव्याप्तिग्रहसंभवा

सापेक्षत्वेपिशब्दोभिधेयइत्यादाविवजीवब्रह्मणोर्भेदेतात्विकत्वमस्तिनवेतिसंदेहेनैवसायुक्ता । न तुब्रह्मजीवात्तत्वतोभिन्नंनवेतिसंदेहसापेक्षा व्यतिरेकिणिचसाध्याभावस्यव्याप्तिः । अत्रचसाध्याभावोजीवाभेदोजीवेप्रसिद्धः । यत्रतुव्यतिरेकिणिभावःसाध्यःतत्राभावस्यभावज्ञानाधीनत्वात्सा दोषइत्याहुः । यद्वाब्रह्मजीवात्भिन्नं दुःखाननुभवितृत्वात् घटवदितिप्रयोगान्नाप्रसिद्धविशेषणत्वासाधारण्ये । नचमिथ्याभेदेनसिद्धसाधनं । भेदरूपार्थेसाध्येर्थशून्यभ्रांत्यासिद्धसाधनोक्त्ययोगात् ।

व्यतिरेकिण्यप्रसिद्धिर्दोषएवनस्या त्ततश्चतत्प्रवादविरोधइत्यतआह ॥ यत्रत्विति ॥ भावः सात्मकत्वादिरूपः । ब्रह्मजीवाद्भिन्नमित्यत्रभेदविषयानुमितेर्भ्रमत्वोपपत्त्यासिद्धसाधनमितिविवक्षित मुतैतदनुमितिविषयस्यार्थस्यभेदस्यमिथ्यात्वादिति नाद्यइत्याह ॥ भेदरूपार्थइति ॥ अर्थपदोपरिसल्लिंगपरामर्शजन्यायाभेदरूपार्थावगाह्यनुमितेःप्रमात्वादित्यर्थः । नद्वितीयइत्याह ॥ एतदिति ॥ सल्लिंगपरामर्शजन्यैतदनुमितिविषयतयेत्यर्थः ॥ एषाशंकापिशाचिकाअस्माभिःजीवाद्भिन्नमित्यत्रतात्विकत्वविशेषणेदत्तेपिनपरिहरणीयेत्याह ॥ तात्विकत्वेति ॥ तात्विकत्वेनरूपेणकल्पितभेदमादायापिसिद्धसाधनंस्यादेवेत्यर्थः । इदमपिममेष्टमितिनसंतोष्टव्यं । जीवाःपरमात्मनस्तत्वतोनभिद्यंतइत्यत्रापितात्विकत्वेनकल्पिताभे

एतदनुमितिविषयतयाप्रामाणिकत्वेन सिद्ध्यतो भेदस्यमिथ्यात्वायोगाच्च । अन्यथात्वदीयेषुमिथ्यात्वानुमानेषुकल्पितमिथ्यात्वादिनासिद्धसाधनंस्यात् । तात्विकत्वविशेषणेपितात्विकत्वेनकल्पितभेदेन सिद्धसाधनमितिचस्यात् । यद्वाब्रह्मजीवप्रतियोगिकधर्मिसत्तासमानसत्ताकभेदवत् । दुःखाननुभवितृत्वात् अभ्रांतत्वात् असंसारित्वाच्च घटवत् जीवोवाब्रह्मप्रतियोगिकधर्मिसत्तासमानसत्ताकभेदवान् असर्वशक्तित्वात् असर्वज्ञत्वात् अस्वतंत्रत्वाच्च घटवदितिप्रयोगान्नदोषः । अत्रचजीवब्रह्मशब्देनत्वन्मतेपि "तत्त्वमसी" त्यत्रतत्त्वंपदाभ्यां "जीवाःपरमात्मनस्तत्वतोनभिद्यंते आत्मत्वात् परमात्मव" दित्यत्रचजीवपरमात्मशब्दाभ्यांयेविवक्षिते तेसंसाराधारानाधारचैतन्येविवक्षिते तेचसत्येइतिनसिद्धसाधनं ।

दमादायापिसिद्धसाधनंस्यादित्यत्रतात्पर्यं । कल्पिताभेदेनेतिपाठेतुनकोपिदोषः । तत्रतात्विकत्वविशेषणेपीत्यस्यतात्विकत्वविशेषणयुक्तत्वदीयानुमानेपीत्यर्थोद्रष्टव्यः । नन्वत्रानुमानद्वयेपिजीवेश्वरयोःपक्षत्वेनतयोश्चविशिष्टत्वेनमिथ्यात्वात्स्वसमानसत्ताकपरस्परप्रतियोगिकमिथ्याभूतभेदवत्त्वंतयोरस्त्येवेतिसिद्धसाधनमितिचेत्तत्राह ॥ अत्रचेति ॥ त्वन्मतेइत्यत्रतत्त्वं

SGDF
Foundation

पदाभ्यांइत्यत्रचजीवपरमात्मशब्दाभ्यांयेविवक्षितेसंसाराधारानाधारचैतन्ये तेअत्रउक्तानुमानद्वयेजीवब्रह्मशब्देनविवक्षि
ते तेचचैतन्येसत्येइतियोज्यं । ननुब्रह्मणोनिर्धर्मकत्वेनधर्मवत्त्वरूपधर्मित्वाभावात्यद्वेत्युक्तब्रह्मपक्षकानुमानेबाधइत्याशं
क्यनिराकरोति ॥ नचेति ॥ व्याघातादिति ॥ धर्मित्वाभावंप्रतिधर्मित्वेधर्मित्वाभावरूपधर्मस्यैवप्राप्त्याधर्मित्वाभावोक्ति
व्याघातः । धर्मित्वाभावंप्रतिधर्मित्वानंगीकारेधर्मित्वाभावोनास्तीत्युक्तंस्यात् ततश्चधर्मित्वस्यैवप्राप्त्याधर्मित्वाभावोक्तिर्व्याघा
तइत्यर्थः । इह अनुमाने ॥ आश्रयमात्रस्येति ॥ नतुधर्मवत्त्वरूपंधर्मित्वमित्यर्थः । ननुपुनःसिद्धसाधनता तथाहि जीवप्र

नचब्रह्मणोधर्मित्वाभावाद्बाधः। धर्मित्वाभावंप्रति धर्मित्वाधर्मित्वाभ्यांव्याघातात्।
इहधर्मिशब्देनाश्रयमात्रस्यविवक्षितत्वाच्च । धर्मिशब्दस्यचपित्रादिशब्दवत्संबंधि
शब्दत्वान्नमिथ्यात्वंप्रतिधर्मिभूतशुक्तिरूप्यसमानसत्ताकप्रातिभासिकभेदेनसिद्ध
साधनं । नहिमातापूज्येत्युक्तेस्वसुतमाताभार्यापूज्यते धर्मिपदस्थानेस्वपदंवास्तु ।

तियोगिकः धर्मिभूतंयच्छुक्तिरूप्यं तस्यापिमिथ्यात्वंप्रतिधर्मित्वात् तत्समानसत्ताकः प्रातिभासिकोभेदस्तद्वत्त्वमादायापिसा
ध्यपर्यवसानसंभवादित्यतआह ॥ धर्मिशब्दस्येति ॥ ब्रह्म । धर्मिसमसत्ताकेत्युक्तेधर्मिशब्देनसमभिव्याहृतंब्रह्मैवायास्यति
नतुयत्किंचिच्छुक्तिरूप्यादीत्यर्थः । तत्रदृष्टांतमाह ॥ नहीति ॥ स्वसुतमातेत्यस्यार्थोभार्येति किंतुस्वमातैवपूज्येत्यायाति मा
तृशब्दस्यसंबंधिशब्दत्वादित्यर्थः ॥ स्वपदंवेति ॥ तस्यस्पष्टंसमभिव्याहृतपरत्वादित्यर्थः । नन्वथापिब्रह्मसत्तेत्ययुक्तं ब्रह्म

SGDF
Sri Gargeshwari Digital Foundation

णिसत्ताजातेरभावादित्यतोब्रह्मणिसत्वंनामसत्ताजातिरूपंममापिनविवक्षितं किंनाम तवयद्विवक्षितं बाधाभावादिरूपं तदेवे हममापिविवक्षितमित्याह ॥ सत्तेति ॥ ननुपुनःस्वशब्दोक्तशुक्तिज्ञानाबाध्यभेदवत्त्वादेर्ब्रह्मणिसत्वात्सिद्धसाधनतास्यादित्यत आह ॥ स्वशब्दस्येति ॥ अन्यथेति ॥ स्वशब्दस्यसमभिव्याहृतपरत्वानंगीकारे ॥ स्वेति ॥ तत्रापिस्वशब्देनपक्षीभूतप्रमा णज्ञानेतरघटादिपदार्थग्रहणसंभवेनविवक्षितार्थासिद्धिःस्यादित्यर्थः ॥ आद्यइति ॥ ब्रह्मजीवप्रतियोगिकपारमार्थिकभेदव

सत्तात्रैविध्यंवदतस्तवमतेपिब्रह्मणिबाधाभावरूपायावा तदुपलक्षितस्वरूपरूपायावा सत्तायाःसत्त्वान्नबाधः । यद्वाधर्मिसत्तासमानसत्ताकेतिपदस्थानेपारमार्थिकेतिवा यावत्स्वस्वरूपमनुवर्तमानेतिवा स्वाज्ञानाकार्येतिवा स्वज्ञानाबाध्येतिवा विशेषणंदे यं । स्वशब्दस्यचसमभिव्याहृततत्तत्परत्वस्यव्युत्पन्नत्वान्नकश्चिद्दोषः । अन्यथातवा पिस्वप्रागभावव्यतिरिक्तेत्याद्ययुक्तंस्यात् । नचात्राद्येसाध्येदृष्टांतस्यसाध्यवैकल्यं ।

दित्येवंधर्मिसत्तासमानसत्ताकेतिपदस्थानेपारमार्थिकपदस्यप्रक्षेपेणसाध्यकरणे दृष्टांतेघटेजीवप्रतियोगिकपारमार्थिकभेदाभा वात्साध्यवैकल्यमित्यर्थः । घटेपिजीवप्रतियोगिकपारमार्थिकभेदंसामान्यतःसाधयति ॥ घटइति ॥ स्वज्ञानेति ॥ प्रतियो गिभूतजीवज्ञानाबाध्येत्यर्थः । भेदस्यजीवज्ञानाबाध्यत्वेजीवस्यैवब्रह्मत्वेनतज्ज्ञानाबाध्यत्वरूपपारमार्थिकत्वसिद्धिरितिद्रष्टव्यं

SGDF
Sri Gargeshwari Digital Foundation

॥ जीवधर्मिकेति ॥ घटोजीवप्रतियोगिकभेदवान्जीवस्यघटाभेदरहितत्वादित्यनुमानंविवक्षितं तत्रवैयधिकरण्यपरिहारायजीवधर्मिकेत्यादि अभेदरहितत्वादित्येवोक्तेवस्तुतःपटाभिन्नेपिपटेप्रातिभासिकाभेदरहितेभेदवत्त्वरूपसाध्यशून्येव्यभिचारवारणायाबाध्येत्युक्तं । तत्रचाबाध्याभेदस्यैवसत्वेनतद्राहित्याभावान्नव्यभिचारः । स्तंभज्ञानाबाध्योयःपटपाषाणाभेदस्तद्राहित्यं पुनःपटेस्तीतिव्यभिचारवारणाय जीवधर्मिकेत्यादि ॥ धर्मिज्ञानेत्यत्रधर्मिशब्दःसमभिव्याहृतजीवपरः ॥ यथेति ॥ दूर

घटोजीवप्रतियोगिक(स्वज्ञानाबाध्यभेदवानिति)टिप्पणसंमतःपाठः
प्रतियोगिज्ञानाबाध्यभेदवान् जीवधर्मिकधर्मिज्ञानाबाध्याभेदाप्रतियोगित्वात् यद्यज्ज्ञानाबाध्ययद्धर्मिकाभेदाप्रतियोगि तत्तज्ज्ञानाबाध्यतत्प्रतियोगिकभेदवत् यथादूरस्थवनस्पत्योरेकइत्याद्यनुमानेनतत्सिद्धेः ।
यद्वाब्रह्मतत्त्वतोजीवाभिन्नंनेतिसाध्यं । एवंचनसाध्यवैकल्यशंकापि ।

स्थवनस्पत्योर्मध्येएकोवनस्पतिर्दृष्टांतइत्यर्थः। चूतःपनसज्ञानाबाध्यपनसधर्मिकाभेदरहितत्वात् । पनसज्ञानाबाध्यपनसप्रतियोगिकभेदवानित्यवधेयं । पनसस्यचूतभिन्नत्वाच्चूतोपिपनसभिन्नइत्येतावतोर्थस्यविवक्षितत्वादस्यचवनस्पतिद्वयमगृहीत्वातन्मध्येएकस्यग्रहणेऽसंभवाद्वनस्पत्योरेकइत्युक्तं । दूरस्थेतिस्वरूपकथनमित्याहुः । ननुघटेजीवाभेदाभावरूपसाध्यस्यभवन्मतेस

त्वेपिमन्मतेऽभावात्साध्यवैकल्यशंकास्यादेवेत्यतआह ॥ त्वन्मतेपीति ॥ बंधस्वरूपनिर्वचनायस्वतइत्याद्युक्तं एतादृशबंधस्यांतःकरणगतत्वेबंधमोक्षयोर्वैयधिकरण्यंस्यादितिभावः ॥ अवश्यमिति ॥ तथाचनव्यभिचारइतिभावः । बंधमोक्षयोःसामानाधिकरण्यायानर्थोजीवेंगीकार्य स्तथाचयादृशदुःखानुभवितृत्वंतवजीवेऽभिमतं तदभावएवमयाहेतूक्रियतइतिनदोषइत्या

त्वन्मतेपिकल्पितेघटेअकल्पिताज्जीवात्तात्विकभेदवत् तात्विकाभेदस्याप्यभावात् । नचांतःकरणस्यैवदुःखानुभवितृत्वात्तदननुभवितृत्वंजीवेनैकांतं । त्वन्मतेपिदुःखादेरंतःकरणधर्मत्वेपिव्यावहारिकस्यस्वतोनर्थरूपदुःखानुभवात्मकबंधस्यमोक्षसामानाधिकरण्यायजीवस्थत्वावश्यंभावात् । त्वन्मतेपियदनर्थरूपमहंदुःखीत्यनुभवितृत्वंजीवस्यतदभावोहेतुरितिनकश्चित्क्षुद्रोपद्रवः । नचासंसारित्वादेर्ब्रह्मण्यसिद्धिःजीवेनैकांत्यंवा । त्वन्मतेप्यौपाधिकश्यामत्वादिवत्तस्यव्यवस्थितत्वात् । एवंचजीवेश्वरौधर्मिज्ञानाबाध्यपरस्परप्रतियोगिकभेदवंतौ विरुद्धधर्माधिकरणत्वात्

ह ॥ त्वन्मतेपीति ॥ अनुभवितृत्वं अनुभवकृतोच्चनीचत्वादिरूपं । क्षुद्रोपद्रवो जीवेऽनैकांत्यरूपः ॥ असिद्धिरिति ॥ जीवगतसंसारेणतदभिन्नब्रह्मणोपिसंसारित्वादित्यर्थः ॥ जीवइति ॥ असिद्धिपरिहारायब्रह्मणोऽसंसारित्वांगीकारेजीवेव्यभिचारःस्यात् ब्रह्माभिन्नत्वेनजीवस्याप्यसंसारित्वात् तत्रचजीवप्रतियोगिकभेदाभावादित्यर्थः ॥ औपाधिकेति ॥ यथादर्प

SGDF Foundation

णाद्युपाधिकृतंश्यामत्वं मालिन्यमितियावत् प्रतिबिंबएवास्ति नत्ववदातेबिंबइत्यंगीकृतं एवमिहाप्यंतःकरणाद्युपाधिकृतंसंसारित्वंप्रतिबिंबेजीवएव नतुबिंबभूतईश्वरइत्यंगीकृतत्वेनासंसारित्वस्यब्रह्मणिनासिद्धिर्नवाजीवेऽनैकांत्यमित्यर्थः ॥ इत्याद्यपिसुस्थमिति ॥ जीवेश्वरौभिन्नौविरुद्धधर्माधिकरणत्वा दहनतुहिनवदित्यत्रतात्त्विकभेदेसाध्येदृष्टांतेसाध्यवैकल्यात् अतात्विकेसाध्येसिद्धसाधनादितिपूर्वपक्षावसरेउक्तदूषणस्यधर्मिज्ञानाबाध्यपरस्परप्रतियोगिकभेदवंताविति साध्यकरणेनानवकाशात्तदप्यनुमानंसुस्थमित्यर्थः । विरुद्धधर्माधिकरणत्वहेतुंसमर्थयते ॥ विरोधश्चेत्यादिना ॥ सर्वज्ञत्वाल्पज्ञत्वादेर्विरोधःकीदृ

दहनतुहिनवदित्याद्यपिसुस्थं । विरोधश्चयद्यपिनसहावस्थानं । अद्वैतिनंप्रत्य
ऽसिद्धेः । नापिवध्यघातुकभावः । नाजातएकोन्यंहंतिनाप्यन्याधारइतिन्यायेन

शोभिप्रेतः किंतेजस्तिमिरवत्सहानवस्थानरूपोवा मूषकमार्जारादिवद्वध्यघातुकभावरूपोवा गोत्वाश्वत्ववत्परस्पराभावव्याप्यत्वरूपोवा अभावाभावोभावएवेतिवचनाद्धटतदत्यंताभाववत्परस्पराभावत्वरूपोवा । नाद्यइत्याह ॥ नसहानवस्थानमिति ॥ असिद्धेरिति ॥ जीवब्रह्मणोरद्वैतवादिनामयासर्वज्ञत्वाल्पज्ञत्वयोरेकस्मिन्नेवचैतन्येसहावस्थानांगीकारेणविरोधानंगीकारात् मांप्रतिहेतुःस्वरूपासिद्धइत्यर्थः । नद्वितीयइत्याह ॥ नापीति ॥ नाजातइति ॥ इदंन्यायद्वयं । लोकेएकःस्वयमजातःअनुत्पन्नःसन्अन्यंनहंति कुलीरापत्यादेःस्वजन्मनैवस्वमात्रादिहंतृत्वदर्शनादित्यर्थः ॥ नापीति ॥ योन्याधारःअन्यप्रदेशस्थः

SGDF Sri Gargeshwari Digital Foundation

वध्यसमानाधिकरणोनभवति वध्यापेक्षयाभिन्नाधिकरणस्थितइतियावत् सोप्यन्यंनहंति । एकस्यांसमरभूमौसंघटितानामेवभटा नांमूषकमार्जारादीनांचवध्यघातुकभावदर्शनादित्यर्थः ॥ तस्येति ॥ एवंचसर्वज्ञत्वाल्पज्ञत्वयोर्वध्यघातुकभावरूपविरोधमंगी कुर्वद्भिरवश्यंतयोरैकाधिकरण्यंवक्तव्यं । एवंचसर्वज्ञत्वाल्पज्ञत्वयोर्वध्यघातुकरूपयोराश्रयैक्यसापेक्षत्वेनस्वाधिकरणजीवब्रह्मभे दसाधकत्वाभावादितिसंप्रदायः । नापितृतीयचतुर्थावित्याह ॥ नापीति ॥ नपरस्पराभावव्याप्यत्वं कालभेदेननीलरूपंरक्तरू पंचप्रत्याश्रयेघटेव्यभिचारात् । नापिपरस्पराभावरूपत्वं कालभेदेननीलरूपंतत्प्रागभावंचप्रत्याश्रयेघटेव्यभिचारादितियथाक्र मंसंबंधः । अयमर्थः परस्परविरहव्याप्यत्वरूपविरोधवद्धर्माश्रयत्वेननधर्मिभेदसाधनंयुक्तं तथात्वेयदानीलरूपंतदारक्तरूपा

तस्यभेदासाधकत्वात् । नापि

भावः यदाचरक्तरूपंतदानीलरूपाभावइतिपरस्परविरहव्याप्यत्वरूपविरोधवन्नीलरूपरक्तरूपाख्यधर्मयोःकालभेदेनाधिकरणे घटेभेदाभावेनव्यभिचारात् परस्पराभावत्वरूपविरोधवद्धर्माश्रयत्वेनधर्मिभेदसाधनेतुयद्यपिनपूर्वोक्तोव्यभिचारःसंभवति नी लरूपरक्तरूपयोःपरस्पराभावरूपत्वाभावात् तथापिपुनर्घटेव्यभिचारएव नीलरूपतत्प्रागभावयोस्तावत्परस्परविरहरूपत्वमस्ति प्रतियोगिनएवप्रागभावविरहरूपत्वेननीलरूपस्यस्वप्रागभावविरहरूपत्वात् नीलरूपप्रागभावोपिनीलरूपविरहएव नीलरूपो त्पत्तेःपूर्वंविद्यमानस्यनीलरूपाभावस्यतत्प्रागभावरूपत्वात् एवंचनीलरूपोत्पत्तेःपूर्वंप्रथमक्षणावच्छिन्नेघटेनीलरूपप्रागभावाश्र

SGDF
Sri Gargeshwari Digital Foundation

यत्वमस्ति द्वितीयादिक्षणेषुनीलरूपाश्रयत्वमस्ति एवंचपरस्परविरहरूपत्वरूपविरोधवन्नीलरूपतत्प्रागभावरूपधर्मंप्रतिकालभे
देनाधिकरणेभेदाभावेनव्यभिचारःस्यादितिसंप्रदायः । नीलरूपंरक्तरूपप्रागभावंचप्रत्याश्रयेइतिपाठेतुकालभेदेनेत्येतन्नसंयो
ज्यं एकदैवघटेनीलरूपरक्तरूपप्रागभावयोःसत्वादितिध्येयं ॥ परस्परेति ॥ नीलरूपरक्तरूपयोर्नीलरूपतत्प्रागभावयोर्वापर
स्परात्यंताभावरूपत्वाभावान्नव्यभिचारइतिभावः ॥ परस्परेति ॥ नीलरूपरक्तरूपयोर्नपरस्परात्यंताभावव्याप्यत्वं यत्रयदा
नीलरूपंतत्रतदारक्तरूपात्यंताभावइतिनास्ति उत्तरत्रघटेरक्तरूपस्यजायमानत्वेनात्यंताभावविरोधिनःप्रागभावस्यसत्वात् तथा

परस्पराभावव्याप्यत्वंपरस्पराभावरूपत्वंवा कालभेदेननीलरूपंरक्तरूपंनीलरू
पप्रागभावंचप्रत्याश्रयेघटेव्यभिचारात् । तथापिपरस्परात्यंताभावव्याप्यत्वंवा
परस्परात्यंताभावरूपत्वंवाकालभेदेनापिसामानाधिकरण्यायोग्यत्वंवाविरोधः ।

यत्रयदारक्तरूपं तत्रतदानीलरूपात्यंताभावइतिनास्ति पूर्वंघटेजातस्यनीलरूपस्यध्वस्तत्वेनात्यंताभावविरोधिनोध्वंसस्यसत्वान्न
व्यभिचारः। तथा नीलरूपतत्प्रागभावयोरपिनपरस्परात्यंताभावत्वरूपविरोधः । यत्रयदानीलरूपप्रागभावः तत्रतदानीलरूपात्यं
ताभावइतिनास्ति । प्रथमक्षणावच्छिन्नएवघटेनीलरूपात्यंताभावविरोधिनःप्रागभावस्यैवसत्वात् । तथा यत्रयदानीलरूपंतत्र
तदानीलरूपप्रागभावात्यंताभावोनास्ति नीलरूपप्रागभावप्रतियोगिकात्यंताभावविरोधिनोनीलरूपप्रागभावध्वंसस्यैवसत्वाद
तोनव्यभिचारइत्यालोचनीयं ॥ कालभेदेनापीति ॥ तथाचकालभेदेनसमानाधिकरणयोर्नीलरूपरक्तरूपयोर्नीलरूपतत्प्राग

भावयोर्वानव्यभिचारइतिभावः । ननुतथापिपरस्परात्यंताभावरूपत्वेन परस्परात्यंताभावव्याप्यत्वेनवा विरुद्धयोःसंयोगतद
त्यंताभावरूपधर्मयोरधिकरणेवृक्षेभेदाभावेनव्यभिचारइत्याशंक्यहेतोरेवाभावान्नव्यभिचारइत्याह ॥ संयोगेति ॥ आवा
भ्यामवयवावयविनोर्भेदाभेदांगीकारेणभेदस्यापिसत्वादग्ररूपवृक्षावयवएवास्तिसंयोगः मूलरूपवृक्षावयवएवास्तितदत्यंताभा
वः नतुतदवच्छिन्नेवृक्षेवृत्तित्वमंगीकृतं येनव्यभिचारःस्यात् । तथाचसंयोगतदत्यंताभावाधिकरणयोर्भिन्नत्वेनएकस्मिन्नेववृक्षेत

संयोगतदत्यंताभावयोश्चसामानाधिकरण्यंनैत्यावयोर्मतमितिनतदाश्रये
व्यभिचारः । तादृशविरुद्धधर्माश्चस्वतंत्रत्वास्वतंत्रत्वादयः । नचासि
द्धिः । "अल्पशक्तिरसार्वज्ञ्यंपारतंत्र्यमपूर्णता ॥ उपजीवकत्वंजीवत्वमी
शत्वंतद्विपर्ययः ॥ स्वाभाविकंतयोरेतन्नान्यथातुकथंचने" त्यादिश्रुतेः ।

दधिकरणत्वाभावान्नव्यभिचारइतिभावः ॥ असिद्धिरिति ॥ एतादृशविरुद्धधर्माधिकरणत्वस्याप्रामाणिकत्वादितिभावः ।
नन्वथापिविरुद्धधर्माधिकरणत्वहेतोर्जीवेश्वरयोर्नतात्विकभेदप्रयोजकत्वंसिध्यति सार्वज्ञादिविरुद्धधर्मव्यवस्थायाःकल्पितत्वे
नकल्पितायास्तस्याःकल्पितभेदेनैवोपपत्तेः । यथाहि एकस्मिन्ककारेवास्तवभेदाभावेपिकल्पितभेदमादायदीर्घत्वादिकाल्पनि
कीव्यवस्थांगीक्रियते नैतद्व्यवस्थानुसारेणैकस्मिन्वर्णेतात्विकोभेदःसिध्यति एवंप्रकृतेपीत्यप्रयोजकतेत्याशंक्यनिराकरोति ॥

SGDF Foundation

नचेति ॥ नेयंव्यवस्थाकल्पितेत्याह ॥ सगुणवादोक्तेति ॥ "उपक्रमादिन्यायेनश्रुतिलिंगनयात्तथा ॥ विशेषसामान्यनया
द्वयायान्निरवकाशतः ॥ १ ॥ बह्वल्पन्यायतश्चोपजीव्यत्वन्यायतस्तथा ॥ पशुच्छागनयाच्चैवसविशेषनयात्तथा ॥ २ ॥ उपां
शुयाजन्यायेनयुक्तायुक्तनयात्तथा। आदृतत्वात्सूत्रकृताप्रबलासगुणश्रुति ॥ ३ ॥" रित्युक्तन्यायेन "यःसर्वज्ञ" इत्यादिश्रुत्यु
क्तसार्वज्ञादेर्ब्रह्मणिसत्यत्वादित्यन्वयः ॥ प्रत्यक्षेति ॥ "स्वतःप्रमात्वंप्रत्यक्षेलिंगाद्यैश्चोपजीविभिः ॥ स्वविरोधान्मृत्यवस्था

नचकल्पितायाःसार्वज्ञासार्वज्ञादिव्यवस्थाया वर्णेदीर्घत्वह्रस्वत्वव्यवस्थावत्कल्पितभेदेनैवोपपत्त्या
तात्विकंभेदंप्रत्यप्रयोजकत्वं सगुणवादोक्तन्यायैःश्रुतसार्वज्ञ्यादेःब्रह्मणिप्रत्यक्षप्रामाण्यवादोक्त
न्यायैर्नित्यनिर्दोषानुभवरूपसाक्षिसिद्धासार्वज्ञ्यादेश्चजीवेसत्यत्वात् । एवंब्रह्मस्वज्ञानाबाध्यजीवप्र
तियोगिकभेदवत् पदार्थत्वा द्घटवत्। जीवस्यापिजीवांतराद्भिन्नत्वात्नव्यभिचारः । चेतनत्वंजीव
त्वावच्छिन्नप्रतियोगिताकधर्मिज्ञानाबाध्यभेदवद्वृत्ति सर्वचेतनवृत्तित्वाचेतनावृत्तित्वरहितत्वाद्वा

मापन्नैर्नैवबाध्यत" इत्युक्तन्यायैरित्यर्थः । व्यावहारिकभेदेनसिद्धसाधनत्वपरिहारायस्वज्ञानाबाध्येतिविशेषणं । एवमुत्तरत्रा
प्येतादृशविशेषणकृत्यंद्रष्टव्यं । ननुजीवेजीवप्रतियोगिकभेदाभावाद्व्यभिचारइत्यतआह ॥ जीवस्यापीति ॥चेतनत्वमिति ॥
अनेनानुमानेनजीवत्वावच्छिन्नसर्वजीवप्रतियोगिकभेदवान् कश्चिच्चेतनःसिध्यति । तथाचेश्वरेजीवभेदसिद्धिरितिध्येयं । अत्र

SGDF
Sri Gargeshwari Digital Foundation

चेतनत्वंजीवप्रतियोगिकभेदवद्वृत्तीत्युक्तेसिद्धसाधनता चैत्रप्रतियोगिकभेदवन्मैत्रवृत्तित्वादतोजीवत्वावच्छिन्नप्रतियोगिताके
त्युक्तं यस्मिन्भेदेजीवत्वंप्रतियोगितावच्छेदकमित्यर्थः । चैत्रप्रतियोगिकभेदेतुनजीवत्वंप्रतियोगितावच्छेदकं प्रतियोगितानधि
करणेमैत्रेपिसत्वेनाधिकवृत्तित्वात् किंतुचैत्रत्वमेवेतिनोक्तदोषइतिभावः ॥ शब्दार्थत्ववदिति ॥ शब्दप्रतिपाद्यत्वरूपकेवला
न्वयिधर्मवदित्यर्थः । ब्रह्मणिमायिनावाच्यत्वापरपर्यायाभिधेयत्वानंगीकारेणतत्रसाधनवैकल्यपरिहारायमायिमतेपिलक्ष्यभूत
ब्रह्मसाधारण्यायाभिधेयत्ववदित्यनुक्त्वाशब्दार्थत्ववदित्युक्तमितिद्रष्टव्यं । तत्रजीवत्वावच्छिन्नप्रतियोगिताकभेदवज्जडवृत्ति

शब्दार्थत्ववदित्यादीनिचानुमानानिजीवेश्वरभेदेप्रमाणानि । विपक्षे ब्रह्मणोपिजीववत्संसाराद्यापत्तिः । एतेन । "अप्रमेयेनुमानस्यप्रवृत्तिर्नकथंचन । प्रमेयस्यत्वनात्मत्वात्तत्रभेदानुमेष्यत" इतिनिरस्तं ।

त्वेनदृष्टांतेसाध्यपर्यवसानं । पक्षेप्येवंसाध्यपर्यवसानेजडजीवभेदस्यैवसिद्ध्यानेश्वरजीवभेदसिद्धिरित्यर्थांतरंतुबाधादिनानेति
ध्येयं । अप्रयोजकतांपरिहरति ॥ विपक्षइति ॥ जीवेश्वरभेदानंगीकारइत्यर्थः ॥ अप्रमेयइति ॥ भेदानुमानंभवद्भिरप्रमे
येऽप्रमेयवस्तुविषयेकथ्यते प्रमेयेवा । नाद्यः अप्रमेयंमन्मतेब्रह्मैव । तत्रचप्रमाणमात्रप्रवृत्तेरभावेनतत्रभेदानुमानप्रवृत्त्ययोगात् ।
नद्वितीयः । प्रमेयस्यदृश्यस्यमयानात्मत्वांगीकाराज्जडत्वांगीकारात्तद्विषयेभेदानुमानंमयेष्यतएव जडेषुव्यावहारिकभेदांगी

SGDF
Sri Gargeshwari Digital Foundation

कारेणसिद्धसाधनतापत्तेरित्यर्थः । एतेनेत्युक्तंविशदयति ॥ त्वन्मतइति ॥ ब्रह्मण्येवानुमानप्रवृत्तिरंगीक्रियते नचतस्याप्रमेयत्वान्नतत्रानुमानप्रवृत्तिरितिवाच्यं । त्वन्मतेप्यात्मनःशब्दलिंगादिजन्यवृत्तिव्याप्यत्वांगीकारेणाप्रमेयत्वाभावादित्यर्थः । अनुमानस्य जीवाःपरमात्मनस्तत्वतोनभिद्यंतइत्यभेदानुमानस्य । प्रमेयस्य दृश्यस्य अनात्मत्वात् जडत्वात् प्रमेयेऽभेदानुमान

त्वन्मतेप्यात्मनःशब्दलिंगादिजन्यवृत्तिव्याप्यत्वात् । अन्यथा । "अप्रमेयेऽनुमानस्यप्रवृत्तिर्न कथंचन । प्रमेयस्यत्वनात्मत्वात्तदैक्यानुमितिःकथं" इतिसुवचत्वेनत्वदीयाआत्माभेदेअनुमाद्युक्तिरयुक्तास्यात् ॥ ७ ॥ जीवब्रह्मभेदानुमानानि ॥ १८ ॥ जीवानामन्योन्यंभेदेतुचैत्रोमैत्रप्रतियोगिकधर्मिज्ञानाबाध्यभेदवान् । मैत्रानुसंहितदुःखाननुसंधातृत्वात् घटवत् इहचदहनतुहिनादौक्लृप्तयानुसंधानाननुसंधानरूपविरुद्धधर्मयोरेवप्रयोजकत्वात् विमतंसुरभिधूमरहितं चंदनप्रभववह्निरहितत्वादित्यादाविवासिद्धिवारकाविशेषणवत्त्वंनदोषः । एवंचैत्रोमैत्रप्रतियोगिकतात्विकाभेदवान्न । मैत्रस्मृतसर्वास्मर्तृत्वात् मैत्रानुभूतसर्वाननुभवितृत्वाच्च घटवत् ।

प्रवृत्तिश्चेत्त्वन्मतेजडस्यैवप्रमेयत्वात् । तदैक्यानुमितिः जडैक्यानुमितिः कथं बाधादित्यर्थः ॥ ७ ॥ जीवब्रह्मणोर्भेदेऽनुमानानांविवरणं ॥ १८ ॥ ननुचैत्रेस्वीयदुःखानुसंधातृत्वस्यैवसत्वेनस्वरूपासिद्धिवारणायमैत्रानुसंहितपदमतोऽसिद्धिवारकत्वाद्वैयर्थ्यमित्यतआह ॥ इहचेति ॥ अयमर्थः धूमवह्निभ्यांयुक्तेपर्वते विमतंसुरभिधूमरहितंवह्निरहितत्वादित्यत्रचंदनप्रभ ॥ ५७७ ॥

ववविशेषणस्यासिद्धिवारकत्वेपि वह्निराहित्यमात्रस्यसुरभिराहित्येप्रयोजकत्वाभावेनव्याप्तिग्रहासंभवादप्रयोजकत्वनिरासायव्याप्तिग्रहोपयुक्तत्वेनचंदनप्रभवेतिविशेषणंप्रयुज्यते एवमत्रमैत्रानुसंहितविशेषणस्यासिद्धिवारकत्वेपिदुःखाननुसंधातृत्वमात्रंनभेदप्रयोजकं कदाचित्स्वस्मिन्नप्यतीतदुःखाननुसंधातृत्वसद्भावेनस्वतोपिभेदापत्तेः । अतोदुःखाननुसंधातृत्वमात्रस्यभेदेऽप्रयोजकत्वेनव्याप्तिग्रहायोगात्तदर्थंमैत्रानुसंहितेतिविशेषणं । एवंचदहनतुहिनादौदाहकत्वादिरूपधर्मयोरेवप्रयोजकत्वस्यक्लृप्तत्वादिहापितयोरेवप्रयोजकत्वंवाच्यं । तच्चमैत्रानुसंहितपदेसतिलभ्यतइति । रूपादिषुपंचसुमध्यइत्यस्यविशेषणस्यासिद्धिवारकत्वेन

विमतोबंधध्वंसःस्वप्रतियोगितावच्छेदकावच्छिन्नाधारप्रति
योगिकप्रतियोगिज्ञानाबाध्यभेदवन्निष्ठः । बंधध्वंसत्वात्

व्याप्तिग्रहौपयिकत्वं । इहतुअप्रयोजकत्वनिरासद्वारातदुपयुक्तत्वमितिरीत्यंतरमितिद्रष्टव्यं ॥ विमतोबंधध्वंसइति ॥ सर्वमुक्तिपक्षेविमतानांसर्वेषांजायमानःसामान्यतोबंधध्वंसःस्वप्रतियोग्याधारप्रतियोगिकभेदवन्निष्ठः । स्वशब्देनबंधध्वंसः तत्प्रतियोगीबंध स्तदाधाराविमतशब्दोक्ताआत्मानस्तत्प्रतियोगिकोयोभेदस्तद्वंतोयेविमताआत्मानस्तन्निष्ठः । नन्वेवंसर्वेषामपिजीवानांअन्योन्यभेदोनप्राप्तः । तथाहि । स्वशब्दोक्तध्वंसप्रतियोगिबंधाधारएकश्चैत्रात्मा । तत्प्रतियोगिकभेदवान्मैत्रात्मा तन्निष्ठत्वमस्तीतिसिद्धसाधनतावारणायस्वप्रतियोगितावच्छेदकावच्छिन्नाधारेत्युक्तं स्वशब्दोक्तध्वंसप्रतियोगीबंधः तदवच्छेदकंबं

SGDF
Foundation

धत्वं । तदवच्छिन्नायेबंधास्तदाधारायेआत्मानः अनेन बद्धाइतियावदित्युक्तंभवति । तत्प्रतियोगिको बद्धप्रतियोगिकोभेदः अंतर्गणिकभेदः तद्वंतोयेविमतशब्दोक्ताआत्मानस्तन्निष्ठइत्यर्थः । तेन नात्मद्वयमादायसिद्धसाधनं एकस्यचैत्रात्मनःस्वकीयैकबंधाश्रयत्वेपि बंधत्वावच्छिन्नप्रतियोगिताकसर्वबंधाश्रयत्वाभावादितिज्ञेयं । व्यावहारिकभेदमादायसिद्धसाधनतावारणायप्रतियोगिज्ञानाबाध्येत्युक्तं। बंधाधारप्रतियोगिकेत्युक्तत्वादत्रप्रतियोगिनोबंधाधाराआत्मानोविवक्षितास्तज्ज्ञानाबाध्येत्यर्थःतेषांचपरमतेब्रह्मस्वरूपत्वाद्भेदस्यतज्ज्ञानाबाध्यत्वेतात्विकत्वमेवसिध्यति ।अत्रस्वप्रतियोगितावच्छेदकावच्छिन्नाधारप्रतियोगिकप्रतियो

संमतवत् । जीवःसंसारीवासंसारध्वंसाधारोवा स्वज्ञानाबाध्यजीवप्रतियोगिकभेदवान् स्वज्ञानाबाध्यसंसारिप्रतियोगिकभेदवान्वा स्वज्ञानाबाध्यसंसारध्वंसाधिकरणप्रतियोगिकभेदवान्वा पदार्थत्वात् घटवत् ।

गिज्ञानाबाध्यभेदवज्जडनिष्ठत्वमादायसाध्यपर्यवसानेतन्निष्ठत्वस्यबंधध्वंसेबाधान्नार्थांतरतेतिद्रष्टव्यं ॥ संमतवदिति ॥ निगडबंधवंतोयेपुरुषाबहवस्तेषांजायमानोयोबंधध्वंसस्तद्वत् तत्रस्वशब्दोक्तध्वंसप्रतियोगितावच्छेदकीभूतनिगडबंधत्वावच्छिन्नायेनिगडबंधा स्तदाधारानिगडबद्धाइतियावत् तत्प्रतियोगिकःप्रतियोगिभूतबंधाधारज्ञानाबाध्योयोभेदःअंतर्गणिकस्तद्वंतोयेपुरुषास्तन्निष्ठोभवतिनिगडबंधध्वंसइत्यर्थः । ननुतर्हिचैत्रःस्वज्ञानाबाध्यस्वभेदवान् पदार्थत्वादित्याभाससाम्यमितिचेत्तत्राह ॥

SGDF
Sri Gangeshwari Digital Foundation

विपक्षइति ॥ स्वनिष्ठेति ॥ आनंदनिष्ठेत्यर्थः ॥ दुःखविरोधित्वव्याप्यधर्मेणेति ॥ आनंदत्वेनेत्यर्थः । पदार्थत्वादिना स्वशब्दोक्तानंदजातीयघटादिप्रतियोगिकभेदस्यानंदेसत्वात्सिद्धसाधनंस्यादतःस्वनिष्ठेत्यादि । तथाचानंदानांपरस्परंभेदेसिद्धे जीवजडयोश्चभेदसिद्धिः । दृष्टांतेपक्षीभूताकाशरूपविभुव्यतिरिक्तत्वेनसाध्यपर्यवसानं पक्षेबाधान्नैवंसाध्यपर्यवसानमितिद्रष्ट

विपक्षेबाधकस्यवक्ष्यमाणत्वात्नाभाससाम्यं । आत्मभेदमात्रेतुआत्माआत्मप्रति योगिकस्वज्ञानाबाध्यभेदवान् पदार्थत्वा द्घटवत् । विमतआनंदःस्वनिष्ठदुःखविरो धित्वव्याप्यधर्मेणसजातीयप्रतियोगिकस्वज्ञानाबाध्यभेदवान् दुःखविरोधित्वात् दुः खाभाववत् । आत्मवैभवपक्षेआकाशःआत्मप्रतियोगिकधर्मिज्ञानाबाध्यभेदाधार विशेषगुणवद्विभुव्यतिरिक्तः द्रव्यत्वात् पृथिवीवदित्याद्यपिद्रष्टव्यं। केचित्तुपृथिवीत्वं जलत्वतेजस्त्ववायुत्वमनस्त्वेतरद्रव्यत्वसाक्षाद्व्याप्यजातिभिन्नंमेयत्वात् जलत्ववत् ।

व्यं । कालदिशावादायार्थांतरतावारणायविशेषगुणवदित्युक्तं । आत्मनामात्मत्वजात्यास्वभावतएवनानात्वंसाधयितुंआत्मत्व स्यजातित्वंसाधयति ॥ पृथिवीत्वमिति ॥ पक्षेआत्मत्वरूपद्रव्यत्वसाक्षाद्व्याप्यजातिमादायसाध्यपर्यवसानं दृष्टांतेतुजलत्वा दीतरपक्षीभूतपृथिवीत्वमादायेतिद्रष्टव्यं । पक्षेतुबाधान्नैवंसाध्यपर्यवसानं। गगनत्वंजातिरितिमतेतदादायपक्षेसाध्यपर्यवसान

SGDF
Sri Gangeshwari Digital Foundation

संभवेनआत्मत्वस्यजातित्वासिद्धेराह ॥ गगनत्वेति ॥ ननुजलत्वादीतरद्रव्यत्वसाक्षाद्व्याप्यजातिरंधकारत्वंतद्भिन्नत्वेनसाध्य पर्यवसानंसंभवतीत्याशंक्यनिराकरोति ॥ नचेति ॥ क्लृप्तेधर्मिणि आत्मरूपधर्मिणि धर्ममात्रेण आत्मत्वरूपजातिमात्रेणेत्य र्थः । तथाचधर्मिकल्पनातोधर्मकल्पनालघीयसीतिन्यायेनाभावत्वेनसिद्धांधकाररूपधर्मिणोद्रव्यत्वंकल्पयित्वातन्निष्ठधर्ममादा

गगनत्वजातिवादिनंप्रतिगगनत्वेतरेत्यपिविशेषणीयं । नचोक्तजातिमत्पदार्थांतरसिद्ध्यार्थां तरं । लाघवेनक्लृप्तेधर्मिणिधर्ममात्रेणानुमानपर्यवसानात् । सत्ताद्रव्यत्वान्यात्मनिष्ठजात्यन्या द्रव्यत्वंवा सत्तान्यात्मनिष्ठजात्यन्यत् मेयत्वात् घटत्ववत् । आत्माणुत्वमते । आत्मा द्रव्य त्वव्याप्यजातिमान् अविभुद्रव्यत्वात् पृथिवीवदित्यादिभिरात्मत्वजातिसिद्धौतात्विकात्म भेदसिद्धिः । जातेर्धर्मिज्ञानाबाध्यभेदंविनाऽयोगात् । अन्यथाव्यक्त्यभेदःक्वापिदोषोनस्या त् । विपक्षेआत्मत्वस्यजातित्वेलाघवं । औपाधिकत्वेतस्योपाधिज्ञानाधीनत्वेनगौरवंबाधकं ।

यसाध्यपर्यवसानमयुक्तमितिभावः ॥ द्रव्यत्वेति ॥ तथाचानेनानुमानेनापि आत्मत्वस्यजातित्वसिद्धिरितिद्रष्टव्यं ॥ तात्वि केति ॥ स्वाभाविकेत्यर्थः । तदेवोपपादयति ॥ जातेरिति ॥ भेदं स्वाश्रयव्यक्तिभेदं ॥ अन्यथेति ॥ व्यक्तिभेदाभावेप्या त्मत्वस्यजातित्वांगीकारे ॥ नस्यादिति ॥ तथाचाकाशत्वादिकमपिजातिःस्यादितिभावः । औपाधिकत्वे पाचकत्वादिवदौ

पाधिकधर्मत्वे । ननुव्यक्त्यभेदःक्वापिदोषोनस्यादित्यापादनमयुक्तं इष्टापत्तेः आकाशत्वस्यापिजातित्वादित्यतआह ॥ आका शादिकंत्विति ॥ ७ ॥ जीवानामन्योन्यभेदेनुमानानांविवरणं ॥ १९ ॥ ७ ॥ अतीतादीति ॥ भवन्मतेऽ तीतादिशरीरभेदसद्भावान्नतत्रसुखाद्यनुसंधानमितिशरीरभेदस्याननुसंधानप्रयोजकतायाःक्लृप्तत्वात्तद्धन्मयाप्यननुसंधानेशरीर

आकाशादिकंतु धर्मिग्राहकमानेनैकतयासिद्धमितिनाकाशत्वंजातिरित्याहुः ॥ ७ ॥ जी वानामन्योन्यंभेदेनुमानानि ॥ १९ ॥ आत्माभेदेतुअन्योन्यंसुखदुःखाद्यनुसंधानंस्यात् । नचोपाधिभेदोननुसंधानेतंत्रं हस्तपादाद्युपाधिभेदेप्यनुसंधानदृष्टेः । नापिविश्लिष्टोपाधिभे दस्तत्रतंत्रं । मातृसुखादेर्गर्भस्थेनानुसंधानापातात् । "उद्यतायुधदोर्दंडाःपतितस्वशिरोक्षि भिः । पश्यंतःपातयंतिस्मकबंधाअप्यरीन्युधी" तिभारतोक्त्याविश्लेषेप्यनुसंधानदृष्टेश्च । नाप्यतीतादिशरीरेष्विवशरीरभेदस्तत्रतंत्रं । तद्भेदेपिबाल्येऽहंदुःखीत्यनुसंधानस्यजातिस्म रणस्यचजन्मांतरेऽहंदुःखीत्यनुसंधानस्ययोगिनश्चनानादेहगभोगानुसंधानस्यचदर्शनात् ।

भेदस्तंत्रत्वेनोच्यतइत्यर्थः । ननुयौवनावस्थापन्नदेहस्यबाल्यशरीरेणात्यंतभेदाभावाद्युक्तमनुसंधानमित्यस्वरसादाह ॥ जाती ति ॥ नन्वनुसंधानंनामवर्तमानत्वेनानुभवस्तथास्मरणंवा तथाचयौवनावस्थायामहंबाल्येसुखीत्यादिकमनुसंधानमेवनभवती

SGDF
Sri Gangadhareshwar Digital Foundation

त्यतोनोक्तदोषइत्यतआह ॥ नचेति ॥ अननुसंधानस्येति ॥ तथाचतत्रांतःकरणभेदेसत्यप्यनुसंधानसद्भावाद्व्यभिचारइ
तिभावः ॥ सुषुप्ताविति ॥ तत्रांतःकरणस्यैवाभावेनतदेकत्वादेर्दुरापास्तत्वादितिभावः ॥ उक्तत्वादिति ॥ त्वन्मतइत्यव्य

नचवयंसदावर्तमानतया अनुभवंस्मरणंवा अनुसंधानंब्रूमः । किंनाम कदाचित्स्वीयतयानु
भवमात्रं । नचतन्नास्त्यतीतेसुखादौ । नचांतःकरणरूपोपाधिभेदस्तत्रतंत्रं । योगिनोंतःकर
णमेकमेवेतिवाच्यं । चैतन्यैक्येप्यंतःकरणभेदादननुसंधानस्यमांप्रत्यव्याप्यासिद्धत्वेन शरीरभे
दवच्चक्षुरादिकरणभेदवच्चतद्भेदस्याप्यप्रयोजकत्वात् । त्वन्मतेप्रत्यहंसुषुप्तावंतःकरणलये
पिपूर्वेद्युरहंदुःखीत्यनुसंधानाच्च । सुषुप्तप्रलीनमुक्तानामंतःकरणभेदाभावेनसंसारिदुःखाद्यनु
भवापाताच्च । नचांतःकरणैकत्वानेकत्वेअनुसंधानाननुसंधानयोस्तंत्रे । मुक्तादेःस्वरूपसु
खाननुभवापातात् । अंतःकरणनानात्वेप्यनुसंधानस्योक्तत्वाच्च । नचाविद्यारूपोपाधिभे
दस्तत्रतंत्रं सुषुप्तौचाविद्यास्तीतिवाच्यं । उक्तरीत्याज्ञानप्रागभावभेदस्याप्यप्रयोजकत्वा
त् । यावंतिज्ञानानितावंत्यज्ञानानीतिमतेएकस्मिन्नपिजीवेब्रह्मविषयकाज्ञानानांभिन्नत्वाच्च ।

वहितपूर्वग्रंथेनेत्यर्थः ॥ ज्ञानप्रागभावेति ॥ उक्तरीत्याचक्षुरादिभेदवज्ज्ञानप्रागभावभेदस्यानुसंधानभेदप्रयोजकत्वंनास्ति

1 तथा च तत्र नानुसंधानमिति क्वचित्।

SGDF
Sri Gargeshwari Digital Foundation

एकस्मिन्नेवपुरुषेऽनेकेषांज्ञानप्रागभावानांसत्वेपिअनुसंधानदर्शनात्तद्वदित्यर्थः ॥ मुक्तस्येति ॥ अननुसंधानप्रयोजकाविद्या रूपोपाध्यभावादित्यर्थः ॥ वैयधिकरण्येति ॥ मुक्तेःशुद्धचिन्मात्रनिष्ठत्वांगीकारादितिभावः । श्यामत्ववदित्यादौसर्वत्रऔ पाधिकभेदेनेतिशेषः ॥ औपाधिकभेदेनेति ॥ उपाधिकृतभेदस्यभास्करमतेचैतन्यएवसत्वेनेत्यर्थः ॥ बद्धस्येति ॥ बंधरू

मुक्तस्यसंसारिदुःखाद्यनुसंधानापाताच्च । नचाविद्यैकत्वानेकत्वे अनुसंधानाननुसंधानयोस्तंत्रे । मुक्तस्यस्वरूपसुखाननुभवापातात् । किंचानेकाविद्यासंबंधस्यदुःखानुसंधानरूपानर्थस्यचविशि ष्टगतत्वेबंधमोक्षयोर्वैयधिकरण्यापातेनशुद्धगतत्वेवाच्येयच्छुद्धंचैत्रीयदुःखानुसंधातृ तदेव मैत्रीयदुःखानुसंधात्रितिकथमनुसंधानाननुसंधानव्यवस्था । एतेनबिंबप्रतिबिंबयोरवदातत्व श्यामत्ववत् घटाकाशमहाकाशयोःपरिच्छिन्नत्वापरिच्छिन्नत्ववत् एकस्यैवनभसस्तत्तत्क र्णपुटावच्छेदेनतत्रतत्रश्रोत्रभाववच्चौपाधिकभेदेनजीवब्रह्मणोरनुसंधानाननुसंधानेइतिनिर स्तं । दुःखानुसंधानरूपस्यानर्थस्योपहितनिष्ठत्वेतस्यकल्पितत्वेनबद्धस्यनिवृत्तिरेवनतुमोक्षइ त्यापातात् । दुःखाद्यनुसंधानस्यसाक्षिरूपतयोपाधिधर्मत्वाभावेनश्यामत्वादिवैषम्याच्च ॥

पानर्थवतोविशिष्टस्योपाधिनिवृत्तौनिवृत्तिर्नाशएवस्यात् नतुमोक्षःतथाचबंधमोक्षयोर्वैयधिकरण्यमेवेतिभावः । पूर्वोपन्यस्तेए तेनेतिमतेश्यामत्वादिदृष्टांतवैषम्यरूपदोषांतरमाह ॥ दुःखादीति ॥ उपाधिधर्मत्वाभावेन उपाधिप्रयुक्तधर्मवत्त्वाभावेन ।

१ मुक्तेऽविद्याभावात् ।

SGDF
Sri Gargeshwari Digital Foundation

न्यायामृ० एवमेवक्वचित्पाठोपि । श्यामत्वादेरुपाधिप्रयुक्तत्वादितिभावः ॥ वस्त्वंतरत्वेनेति ॥ बिंबादत्यंतभिन्नपदार्थत्वेनेत्यर्थः ॥ श्रीनिवा०
सावयवत्वेनेति ॥ तथाचात्मनआकाशःसंभूतइतिश्रुतेःकार्यद्रव्यतयाआकाशस्यसावयवत्वेनतत्रपरस्परंभेदःस्वाभाविकएवे आत्मभेदे.
॥ १५३ ॥ तित्वयांगीकारादित्याशयः । यच्चोक्तंएकस्यैवनभसइत्यादि तत्रपरस्परंभेदस्यौपाधिकत्वाभावमुक्त्वांशिनोनभसःसकाशादपिभे

प्रतिबिंबस्यछायावद्वस्त्वंतरत्वेनाकाशस्यतुत्वन्मतेपिकार्यद्रव्यतयासावयवत्वेनतैजसाहं २ । २०
कारकार्याणांश्रोत्राणांस्वतएवभिन्नत्वेनदृष्टांतासम्मतेश्च। एतेना(ऽऽत्मेंद्रियमनोयुक्तंभोक्ते
त्याहुरिति)श्रुतेर्विशिष्टस्यैवभोक्तृत्वात्तस्यचभिन्नत्वाद्व्यवस्थेतिकौमुद्युक्तंनिरस्तं । शुद्धचि
न्मात्रनिष्ठत्वेतुतत्रभेदाप्रतीत्याकल्पितभेदस्याप्यभावात् । भावेवाभेदस्यैवव्यवस्थारूपस्व
कार्यकारिणोवह्न्यावुष्णत्ववद्धर्मिज्ञानाबाध्यत्वं । अभेदस्यत्वव्यवस्थारूपस्वकार्याकारिणोनु
ष्णत्ववन्मिथ्यात्वमित्यापाताच्च । कल्पितभेदहीनस्यमुक्तस्यसंसारिदुःखानुभवापाताच्च ।

दःस्वाभाविकएवेत्याह ॥ तैजसेति ॥ भिन्नत्वेनेति ॥ परस्परमितिशेषः । तथाचोपाधिप्रयुक्तश्चैतन्ययोःपरस्परंभेदइत्ययुक्त
मित्यर्थः ॥ एतेनेति ॥ विशिष्टस्यैवानर्थान्वयेनकल्पितस्यतस्यनिवृत्तिरेव नतुमोक्षइतिबंधमोक्षयोर्वैयधिकरण्यापातेने ॥ ५८१ ॥
त्यर्थः॥ विशिष्टस्यैवेति ॥ आत्मशब्दोक्तदेहेंद्रियमनोयुक्तस्यविशिष्टत्वादित्यर्थः । व्यवस्था अनुसंधानतदभावरूपा ॥

एतेननोपहितेनुसंधानं किंतुतार्किकमतेआत्मनिदुःखाद्याश्रयतादेहादिनेवेहापिचिन्मात्रेनुसंधातृ
ता । अविद्यारूपोपाधिनावच्छिद्यतइतिनिरस्तं । तन्मतेआत्मनइवात्रचितएवानर्थान्वयेनब्रह्मदुः
खित्वापादकस्यसंसारिदुःखस्यसत्त्वेनतद्भावरूपमुक्तेरपुमर्थत्वापातात् । नित्यमुक्तत्वश्रुतेर्निर्विषय
त्वापाताच्च । विस्तृतंचैतदविद्याश्रयभंगे । ननुकिमत्रांशानांजीवानामनुसंधानमापाद्यं । अंशिनो
ब्रह्मणोवा । नाद्यः । हस्तावच्छिन्नेनपादावच्छिन्नदुःखाद्यननुसंधानात् । नांत्यः । तस्याभोक्तृत्वेन
भोगाप्रसंगात् । दुःखादिज्ञानमात्रस्यचसर्वज्ञेतस्मिन्निष्टत्वादितिचे न्नतावदाद्येदोषः नहिभोगाय
तनानांसांकर्यमापाद्यते येनपादेमेवेदनाशिरसिमेसुखमितिनस्यात् । किंत्वनुसंधानमात्रं । तच्चां
शानामस्त्येव। अन्यथाचैत्रदेहलग्नकंटकोद्धारायमैत्रस्येवपदेलग्नकंटकोद्धरणायहस्तव्यापारोनस्यात्।
नचपुत्रादाविवोपपत्तिः दुःखाद्यनुमानपूर्वककृपादेरनुपलंभात् । एतेननेत्राद्यवच्छिन्नस्यात्मनःश
ब्दाद्यनुपलंभवदेकशरीरविशिष्टस्य शरीरांतरेननुसंधानमितिनिरस्तं । योहंरूपमद्राक्षंसोहंशृणो
मीत्यनुभवात् । नाप्यंत्येदोषः । भोक्तृजीवाभिन्नत्वेनब्रह्मणोपिभोक्तृत्वस्यापादनात् । आपादनेच
प्रमाणविरोधस्यालंकारत्वात् । नचांतःकरणस्यतदवच्छिन्नस्यवानुसंधातृत्वान्नब्रह्मणस्तदितिवाच्यं ।

SGDF Digital Foundation

तद्वारेति ॥ विशिष्टेविशेष्यस्यानुस्यूतत्वादविद्यावच्छिन्नस्यानुसंधानेतद्वाराशुद्धस्याप्यनुसंधानापरिहारादित्यर्थः ॥ तद्गतस्येत्यादि ॥ अंतःकरणावच्छिन्नगतस्येत्यर्थः । शुद्धस्याविद्याअवच्छेदिका अविद्यावच्छिन्नस्यांतःकरणमवच्छेदकमित्यंगीका

दुःखभोगस्यशुद्धब्रह्मगतत्वोक्तेः। एतेनानवच्छिन्नेअभ्रांतेचब्रह्मण्यनुसंधानेतंत्रस्यांतःकरणावच्छेदस्याभावात्नतस्याहंदुःखीतिभ्रांतिरूपमनुसंधानमितिनिरस्तं। कल्पितस्याकल्पितस्यवादुःखभोगस्यशुद्धचिद्गतत्वावश्यंभावात् भ्रांतजीवाभिन्नेश्वरस्याभ्रांतत्वायोगाच्च । एतेनांतःकरणावच्छिन्नान् अनुसंधातॄन्प्रत्यविद्यावच्छिन्नस्यांशित्वात्तस्यैवदुःखानुसंधानं नतु शुद्धस्येतिनिरस्तं । चिन्मात्रमेवानुसंधात्रित्युक्तत्वात् । अवच्छिन्नस्यानुसंधातृत्वेप्यवस्थात्रयानुस्यूताविद्यावच्छिन्नस्यैवानुसंधातृत्वेनतद्वाराशुद्धस्यानुसंधानापरिहाराच्च । अंतःकरणावच्छिन्नस्यैवानुसंधातृत्वेपितद्गतस्याऽनुसंधानस्यतदवच्छेद्याविद्यावच्छिन्ननिष्ठत्ववत् अविद्यावच्छिन्ननिष्ठस्यतदवच्छेद्यशुद्धनिष्ठत्वापत्तेश्च । एतेनयथा स्वकर्णपुटपरिच्छिन्ननादोपलंभेपि भागांतरवर्तिनादानुपलंभः तथा सुखदुःखाद्युपलंभानुपलंभावितिनिरस्तं ।

रेणांतःकरणावच्छिन्नगतस्याशुद्धनिष्ठत्वंस्यादेवेत्यर्थः ॥ तथेति ॥ स्वशरीरावच्छिन्नसुखाद्युपलंभएवभवतिनपरशरीरावच्छिन्ने

SGDF Sri Gargeshwari Digital Foundation

त्यर्थः। आत्मभेदे आत्मभेदपक्षे॥ सर्वदेहस्थेति॥ सर्वदेहानामपिस्वीयकर्णपुटस्थानीयत्वादितिभावः। तत्रबद्धमुक्तव्यवस्थोपप
आत्मभेदेकर्णपुटानांतत्तदीयत्वनियमवत् ऐकात्म्यवादेसर्वदेहानांस्वीयत्वेन तत्तदीयत्वनियमाभा
वेनस्वीयकर्णपुटद्वयपरिच्छिन्ननादोपलंभवत् सर्वदेहस्थदुःखाद्यनुसंधानस्य दुर्वारत्वात्। नचकर्म
णांतत्तदीयत्वेनशरीराणांतत्तदीयत्वं। आत्मैक्येकर्मणामपितत्तदीयत्वनियमायोगात्। शरीरनि
यमेनकर्मनियमेत्वन्योन्याश्रयात्। तदुक्तं। "सिद्धौहिकर्मभेदस्यस्यादुपाधिविभिन्नता॥ तत्सिद्धौ
चैवतत्सिद्धिरित्यन्योन्यव्यपाश्रय" इति। एतेनयत्केनचिदुक्तं। नसुखदुःखव्यवस्थयाभेदसिद्धिः।
व्यवस्थाशब्देनधर्मभेदोक्तौएकस्मिन्नेकदैवसुखदुःखदर्शनेनव्यभिचारात्। भिन्नाश्रयधर्मोक्तौअ
न्योन्याश्रयात् विरुद्धधर्मोक्तौविरोधस्यसहानवस्थानरूपत्वेअसिद्धेः। वध्यघातुकभावरूपत्वे "ना
जात" इतिन्यायेनभेदासाधकत्वादितिनिरस्तं। व्यवस्थाशब्देनानुसंधानाननुसंधानयोरुक्तेः।
तस्मादात्मैक्ये सुखदुःखादिव्यवस्थानस्यादेव। तदुक्तं। "सुखदुःखादिभोगश्चस्वरूपैक्येनभेदतः॥
दृश्योह्युपाधिभेदेपिहस्तपादादिगोयथा॥ १॥ नानादेहगभोगानुसंधानंयोगिनोयथा। नचेद्भो
गानुसंधानंतदिच्छायोगिनःकुतः॥ २॥" इति। उक्तंच। "अनुसंधानरहितमैक्यंचेदेकतान
तत्॥ चैतन्यैक्येनुसंधानंप्रमाणंनैवचापर"मिति। एवंबद्धमुक्तव्यवस्था पंडितमूर्खव्यवस्था

१ स्वीयकर्णपरिच्छिन्ननादोपलंभवदिति प्रतिरेकदृष्टान्तः॥

SGDF
Sri Gargeshwari Digital Foundation

त्तिमाशंक्यनिराकरोति ॥ नचेति ॥ मुक्तिरिति॥ यस्यांतःकरणरूपोपाध्यपगमःनसबद्धइतिशेषः । कुतोनचेत्यतःउपाधिसं बंधस्यैवाऽयोगादित्याह ॥ उपाधीति ॥ अधुनेति ॥ सर्वोपाध्यपगमाभावादित्यर्थः॥ अभावादिति ॥ तथाचतद्भावरू

चैत्रप्रमयामैत्रस्यभ्रांत्यनिवृत्तिः । चैत्रानुभूतेमैत्रस्यास्मृतिरित्यादिव्यवस्थाचनस्यात् । नचतत्त दुपाध्यपगमेतस्यतस्यमुक्तिः । उपाधिसंबंधस्योपहितनिष्ठत्वे आत्मान्योन्यचक्रकाश्रयानवस्थान्य तरापातात् । शुद्धनिष्ठत्वेपिकिमेकैकोपाध्यपगमोमुक्तिः उतसर्वोपाध्यपगमः । नाद्यः । सदामु क्तिरेवनतुबंधइत्यापातात् । नांत्यः । अधुनाबंधएवनकस्यापिमुक्तिरित्यापातात् । त्वन्मतेइदानीं कल्पितबंधवतःतत्वतोमुक्तत्वेपि यादृशःकल्पितोऽप्यनर्थरूपः ज्ञानेनोच्छेत्तव्योबंधः तद्रहितस्यमु क्तशब्दार्थस्याभावात् । तदेवंनौपाधिकभेदमात्रेणबद्धमुक्तादिव्यवस्थायुक्ता ॥ किंचोपाधेर्भेदक त्वमेवायुक्तं । तथाहि । उपाधिःकिमेकदेशेनसंबध्यते कृत्स्नेनवा । आद्येत्वन्मतेस्वाभाविकांशा भावेनऔपाधिकत्वेवाच्येऽनवस्था । अंत्ये नभेदकता । कृत्स्नस्यैकोपाधिग्रस्तत्वात् । एवंगगनादा वपिस्वाभाविकांशानंगीकारेघटाद्युपाधिसंबंधोनस्यादेव । तदुक्तं । "नचेदुपाधिसंबंधएकदेशेऽ थसर्वगः । एकदेशेऽनवस्थास्यात्सर्वगश्चेन्नभेदक" इति ॥ ७ ॥ आत्मभेदेअनुकूलतर्काः ॥ २० ॥ ॥ ५८३ ॥

पमुक्तेरपुरुषार्थत्वंस्यात् नित्यमुक्तत्वश्रुतिविरोधश्चेत्यर्थः ॥ ७ ॥ आत्मभेदेअनुकूलतर्कविवरणंसमाप्तं ॥ २० ॥ जडा

नात्मकत्वादिति ॥ जडनिष्ठासाधारणधर्मशून्यत्वादित्यर्थः । अतोनसाध्यावैशिष्ट्यशंकेतिध्येयं ॥ विपक्षेत्विति ॥ जडभे दानंगीकारइत्यर्थः । घटादिजडभेदानंगीकारइतियावत् ॥ प्रमेति ॥ गौरजडदेहाभेदस्यात्मनिसत्यत्वादित्यर्थः । व्यावहारि

जडेशभेदेजडजीवभेदेचब्रह्मजीवोवा अनात्मप्रतियोगिकधर्मिज्ञानाबाध्यभेदवान् । पदार्थ त्वाद्धटवत् ब्रह्मजीवोवा घटप्रतियोगिकधर्मिज्ञानाबाध्यभेदवान् घटासंबद्धकालसंबंधित्वात् तदसंबद्धदेशसंबंधित्वात् तज्जनकाजन्यत्वात् पटवत् । ब्रह्मजीवोवाजडप्रतियोगिकधर्मिज्ञा नाबाध्यभेदवान् जडानात्मकत्वात् यदेवं तदेवं यथादूरस्थवनस्पत्योरेकः । विपक्षेतुघट सिद्ध्यैवब्रह्मसिद्ध्यावेदांतवैयर्थ्यं । ब्रह्मणोजडत्वानित्यत्वाद्यापत्तिः । मुक्तिसमानाधिकर णसंसाराधारस्यजीवस्यजडवन्निवृत्त्यापत्तिः । गौरोहमित्यादिज्ञानंचप्रमास्यादित्यादिबाध कं । जडानामन्योन्यंभेदेतु घटस्तत्वतश्शुक्त्यभिन्नोन शुक्तिसंबद्धकालासंबंधित्वात् तज्ज नकाजन्यत्वात् शुक्त्यारोपितरूप्यवत् । परमतेपिव्यावहारिकभेदस्यसत्त्वान्नासिद्ध्या दिशंक्यं । अन्यथाभेदसिद्ध्यसिद्ध्योर्दोषतदभावयोश्चाभेदेनस्वक्रियादिविरोधःस्यात् ।[1]

कशुक्तिभेदांगीकारेणसिद्धसाधनतावारणायाह ॥ तत्वतइति ॥ ननुसर्वपदार्थाभेदवादिमतेघटजनकस्यापिशुक्तिजनकाभिन्न त्वाद्द्वितीयहेतोरसिद्धिः साध्यहेत्वोरप्यैक्यात्साध्यावैशिष्ट्यंचेत्यतआह ॥ परमतइति ॥ स्वक्रियेति ॥ सर्वाभेदवादिनात्व

1 आदिपदेन स्वसाध्यविरोधो ग्राह्यः

SGDF

याभेददूषणैर्भेदोनसिध्यतीत्युच्यते तदऽयुक्तं भेदासिद्धेस्तद्दूषणस्यचभेदसिद्धिदूषणाभावाभ्यांअभिन्नत्वेनतदसिद्ध्युक्त्यैवत त्सिद्धिप्रसंगात् दूषणोक्तिरेवतदभावोक्तिःस्यादितिस्वक्रियाविरोधइत्यर्थः ॥ स्ववृत्त्रीति ॥ स्वशब्देनपक्षीभूतोऽनात्मा तद्वृत्ति धर्मानाधारईश्वरःतज्ज्ञानाबाध्योयःआंतर्गणिकअंतर्गणसंबंधीजडसमुदायांतर्गतोभेदः तद्वानित्यर्थः ॥ स्ववृत्तिधर्मानाधारप्र तियोगिकभेदवानित्युक्तेईश्वरभेदेनार्थांतरंस्यान्नतुपरस्परजडभेदसिद्धिरतउक्तमंतर्गणिकेति । व्यावहारिकभेदेनार्थांतरवारणा

अनात्मा स्ववृत्तिधर्मानाधारज्ञानाबाध्यांतर्गणिकभेदवान् पदार्थत्वात् आत्मवत्। वि पक्षेदूरस्थवनस्पत्योश्शुक्तिरूप्ययोश्चाभेदग्राहिप्रत्यक्षंतत्वावेदकंस्यात् मुक्तिसंसारा दिसांकर्यंचस्यादित्यादिबाधकं । आत्मनांपरस्परमात्मानात्मनोश्चतात्विकभेदे अना त्मास्वावृत्तिधर्माधिकरणप्रतियोगिकप्रतियोगिज्ञानाबाध्यभेदाधिकरणं यत्स्वावृत्ति धर्माधिकरणं,तत्प्रतियोगिकप्रतियोगिज्ञानाबाध्यभेदाधिकरणं पदार्थत्वात् आत्मवत्

यानाधारज्ञानाबाध्येति ॥ आत्मवत् जीववत् दृष्टांतीभूतेजीवेस्वशब्दोक्तजीववृत्तिधर्मानाधारःपक्षीभूतोऽनात्मा तज्ज्ञानाबा ध्योयोंऽतर्गणिकोभेदः परस्परजीवभेदः तद्वत्त्वमस्तीतिध्येयं ॥ विपक्षइति ॥ जडेष्वांतर्गणिकभेदाभावेपरस्पराभेदस्यवा स्तवत्वापत्त्येत्यर्थः ॥ स्वावृत्तीत्यादि ॥ तथाचस्वशब्देनघटादि स्तदवृत्तिधर्माधिकरणंचैत्रः तत्रतत्प्रतियोगिकःप्रतियोगिभू

SGDF Sri Gargeshwari Digital Foundation

तचैत्रज्ञानाबाध्योयश्चैत्रभेद स्तदधिकरणंयत्स्वशब्दोक्तपक्षीभूतघटाद्यनात्माऽवृत्तिधर्माधिकरणंचमैत्रः एतावताआत्मनांपरस्परंभेदसिद्धिः तत्प्रतियोगिकोमैत्रप्रतियोगिकःप्रतियोगिभूतमैत्रज्ञानाबाध्यश्चयोभेदोमैत्रभेदस्तदधिकरणं । अनेनात्मनःसकाशाद्घटाद्यनात्मनांभेदसिद्धिरितिज्ञातव्यं । पक्षेसाध्यमुपपादयति ॥ पक्षइति ॥ आत्मा चैत्रः । आत्मांतरात् मैत्रात् । दृष्टांतेसाध्यमुपपादयति ॥ दृष्टांतेत्विति ॥ स्वशब्देनाऽऽत्मा तदवृत्तिधर्माधिकरणंघटः तत्प्रतियोगिकःप्रतियोगिभूतघटज्ञानाबाध्योयोभेदस्तदधिकरणंयत्स्वशब्दोक्तात्मावृत्ति धर्माधिकरणंपटःतत्प्रतियोगिकःप्रतियोगिभूतपटज्ञानाबाध्यःयोभेद

पक्षेस्वावृत्तिधर्माधिकरणमात्मा ततोभिन्नादात्मांतराद्भिन्नत्वेनसाध्यसिद्धिः। दृष्टांतेतुस्वावृत्ति
धर्माधिकरणंजडं ततोभिन्नाज्जडांतराद्भिन्नत्वेन । भेदस्यतात्विकत्वार्थंप्रतियोगिज्ञानाबाध्येति
विशेषणं। जीवस्यब्रह्मतोजीवाच्चजडस्यसत्यभेदेपृथिवीब्रह्मप्रतियोगिकधर्मिज्ञानाबाध्यभेदाधि
करणं यदहृवाद्यनधिकरणं, तत्प्रतियोगिकप्रतियोगिज्ञानाबाध्यभेदवती वस्तुत्वात् अंबुवत् ।

स्तदधिकरणत्वमात्मन्यस्तीतिदृष्टांतेसाध्यंद्रष्टव्यं । पक्षेतुनैवंसाध्यपर्यवसानंबाधादितिद्रष्टव्यं ॥ भेदस्येति ॥ आत्मनांपरस्परंभेदस्यव्यावहारिकत्वनिरासायआत्मनःसकाशादनात्मनोभेदस्यव्यावहारिकत्वनिरासायतात्विकत्वार्थंप्रतियोगिज्ञानाबाध्येतिविशेषणद्वयमित्यर्थः । भेदस्यजीवज्ञानाबाध्यत्वेतस्यैवब्रह्मत्वेनब्रह्मज्ञानाबाध्यत्वरूपतात्विकत्वसिद्धिरितिध्येयं ॥ एवमुत्तरत्रापि ॥ जीवस्येति ॥ जीवेश्वरभेदेजीवजडभेदेचेत्यर्थः । जीवाज्जडस्यभेदसिद्ध्यर्थंअहृवादीतिविशेषणं ॥ धर्मीति ॥

SGDF
Sri Gargeshwari Digital Foundation

जीवेत्यर्थः । परमतेजीवज्ञानाबाध्यत्वेतस्यैवब्रह्मत्वेनब्रह्मज्ञानाबाध्यत्वसिद्ध्यातात्विकत्वसिद्धिः । ब्रह्मप्रतियोगिकजीवनिष्ठभेदस्यतात्विकत्वार्थंधर्मिज्ञानाबाध्येतिविशेषणं । जीवप्रतियोगिकपृथिवीनिष्ठभेदस्यतात्विकत्वार्थंप्रतियोगिज्ञानाबाध्येतिविशेषणं । ननुयैर्वादिभिरबादीनांनामांतराणिस्थापितानिसंतितान्प्रतियदद्वाद्यनधिकरणमितिविशेषणायोगादाह ॥ अद्वादिश ब्देनेति ॥ पक्षइत्यादि ॥ ब्रह्मप्रतियोगिकःधर्मिभूतजीवज्ञानाबाध्योयोभेदस्तदधिकरणंयत्अद्वाद्यनधिकरणंजीव स्तत्प्र

अद्वादीत्यादिशब्देन तत्तद्वादिनःप्रतितत्तद्वादिसिद्धाःपृथिवीत्वादन्येजडनिष्ठा धर्माविवक्षिताः । पक्षेब्रह्मभिन्नाज्जीवाद्भिन्नत्वेनसाध्यसिद्धिः । दृष्टांतेतुब्रह्मभिन्नात्पार्थिवाद्भिन्नत्वेनेतिज्ञेयं । जीवस्यब्रह्मजीवांतराभ्यांजीवाच्च जडस्यभेदे । पृथिवी ब्रह्मप्रतियोगिकधर्मिज्ञानाबाध्यभेदाधिकरणं यदद्वाद्यनधिकरणं आंतर्गणिकभेदवच्च, तत्प्रतियोगिकप्रतियोगिज्ञानाबाध्यभेदवती वस्तुत्वात् अंबुवत् ।

तियोगिकःप्रतियोगिभूतजीवज्ञानाबाध्योयोभेदस्तद्वत्त्वंपृथिव्यामस्ति । दृष्टांतीभूतेअंबुनितुब्रह्मप्रतियोगिकःधर्मिभूतांबुज्ञानाबाध्योयोभेदस्तदधिकरणंयत्अद्वाद्यनधिकरणंपक्षीभूतापृथिवीतत्प्रतियोगिकःप्रतियोगिभूतपृथिवीज्ञानाबाध्योयोभेदस्तद्वत्त्वमस्तीतिध्येयं ॥ जीवस्येति ॥ जीवेश्वरभेदे परस्परजीवभेदेजीवजडभेदेचेत्यर्थः । पृथिवीत्वानुमानंपूर्वोक्तमेवजीवेश्वरजीव ॥ ५८५ ॥

जडभेदसाधकं तत्रांऽऽतर्गणिकभेदवदितिविशेषणमधिकं तत्प्रयोजनमाह ॥ अत्रेति ॥ ब्रह्मप्रतियोगिकेत्यादि ॥ आद्यमधिकरणांतंजीवस्यब्रह्मणःसकाशाद्भेदसिध्यर्थं । अद्वाद्यनधिकरणमितिजडात् आंतर्गणिकभेदवदितिजीवांतरात् एवंचब्र

अत्रजीवस्यजीवांतरादपिभेदार्थंपूर्वस्मादधिकमांतर्गणिकभेदवदितिविशेषणं । अत्रपक्षेब्रह्मतःपरस्परंचभिन्नाज्जीवाद्भिन्नत्वेनसाध्यसिद्धिः । दृष्टांतेतुब्रह्मतःपरस्परंचभिन्नात्पार्थिवाद्भिन्नत्वेनेतिज्ञेयं । जीवस्यब्रह्मजीवांतराभ्यांजडस्यचजीवा द्ब्रह्मणोजडाच्चभेदे पृथिवीब्रह्मप्रतियोगिकधर्मिज्ञानाबाध्यभेदाधिकरणं यदद्वाद्यनधिकरणं आंतर्गणिकभेदवच्च, तत्प्रतियोगिकप्रतियोगिज्ञानाबाध्यभेदवत्त्वेसति अद्वाद्यनधिकरणासंसारिधर्मिकधर्मिज्ञानाबाध्यभेदप्रतियोगिनी वस्तुत्वात् अंबुवत् । अत्रचब्रह्मणो जडादपिभेदार्थंपूर्वस्मादधिकमद्वाद्यनधिकरणासंसारीत्यादिविशेषणं । अत्रपक्षे अद्वाद्यनधिकरणासंसारिब्रह्मतद्धर्मिकभेदप्रतियोगित्वेनसाध्यसिद्धिः । दृष्टांतेतु अद्वाद्यनधिकरणासंसारिपार्थिवं तद्धर्मिकभेदप्रतियोगित्वेनेतिज्ञेयं । भेदमात्रेतुब्रह्मभेदहीनंनावतिष्ठते स्वज्ञानाबाध्यभेदवद्वा पदार्थत्वा द्घटवत् अनात्माखान्यज्ञानाबाध्यभेदाधिकरणं पदार्थत्वात् आत्मवत् ।

ह्मजडजीवांतरेभ्योभिन्नाज्जीवात्पृथिव्यांभेदःसत्यंतेनसिद्ध्यति । द्वितीयेनाद्वादीत्यनेनेश्वरस्यजडभेदः तत्राऽसंसारिपदंब्रह्मपरं तादृशादीश्वराद्भेदःपृथिव्यांसिध्यतीतिपंचापिभेदायुगपत्सिध्यंतीत्यर्थः ॥ स्वान्येति ॥ ब्रह्मेत्यर्थः । दृष्टांतेआत्मनिस्वज्ञा

SGDF

नबाध्यभेदाधिकरणत्वस्यैवसत्वेनस्वान्यज्ञानाबाध्यभेदाधिकरणत्वरूपसाध्यमस्तीतिज्ञातव्यं ॥ नसर्वेति ॥ सर्वत्रनास्तीतिने त्यर्थः ॥ ब्रह्मेति ॥ ब्रह्माभेदस्यब्रह्मण्येवसत्वेनसर्वनिष्ठात्यंताभावप्रतियोगित्वाभावरूपसाध्यमस्तीतिभावः ॥ शुक्तीति ॥ शुक्तिज्ञानाबाध्यरजतभेदवच्छुक्तिविषयकंशुक्तिज्ञानमित्यर्थः ॥ घटइत्यादि ॥ पटादिधर्मिकोयस्त्रैकालिकाभावोऽन्योन्याभा वस्तत्प्रतियोगित्वंघटेसाध्यते । एवंचपटनिष्ठभेदप्रतियोगित्वस्यघटेसिध्याजडभेदःसिध्यतीतिध्येयं । अत्यंताभावस्यापित्रैका

ब्रह्मभेदोनसर्वनिष्ठात्यंताभावप्रतियोगी ब्रह्मनिरूप्यत्वात् ब्रह्माभेद
वत् ब्रह्मज्ञानंस्वाबाध्यभेदवद्विषयं ज्ञानत्वात् शुक्तिज्ञानवत् घटोघट
संसर्गानवच्छिन्नप्रतियोगिताकपटादिधर्मिकत्रैकालिकाभावप्रतियोगी
द्रव्यत्वात् पटवत्। अत्रविपक्षेबाधकानामुक्तत्वात्नाभाससाम्यादि ।

लिकाभावत्वेनार्थांतरतावारणायघटसंसर्गानवच्छिन्नप्रतियोगिताकेतित्रैकालिकाभावविशेषणं । संसर्गाभावत्वंतादात्म्याभाव त्वंचेत्यभावविभाजकोपाधिद्वयपक्षेऽत्यंताभावेसंसर्गस्यैवप्रतियोगितावच्छेदकत्वादितिध्येयं । एवंचघटतादात्म्यावच्छिन्नप्र तियोगिताकपटादिधर्मिकत्रैकालिकाभावरूपान्योन्याभावप्रतियोगित्वमादायपक्षेसाध्यंद्रष्टव्यं ॥ पटवदिति ॥ पटेपटोना स्तीतिप्रतीत्यापटात्यंताभावस्यपटेसत्वेनपटधर्मिकस्यपटात्यंताभावरूपत्रैकालिकाभावस्यपटसंसर्गावच्छिन्नप्रतियोगिताकत्वेनघ

SGDF
Sri Gargeshwari Digital Foundation

टसंसर्गानवच्छिन्नप्रतियोगिताकत्वसद्भावादुक्तसाध्यमस्तीतिसंप्रदायः ॥ एवंसमानाधिकरणेत्यादि ॥ भेदइत्येवपक्षनिर्देशे मिथ्यात्वेनोभयसिद्धचंद्रभेदमादायबाधवारणायोक्तमबाध्येति । मायिमतेआश्रयासिद्धिपरिहारायोक्तंकर्मेत्यादि ॥ कर्मप्रागभावसमानकालीनंयज्ज्ञानंइदानींतनंब्रह्मज्ञानेतरत् अयंघटइत्यादिज्ञानं तदबाध्यत्वंमायिनःसंमतं अस्माकंतुसर्वथाऽबा

एवंसमानाधिकरणकर्मप्रागभावसमानकालीनज्ञानबाधायोग्यो(ध्यो)भेदःपरमार्थसन्
प्रातिभासिकत्वानधिकरणत्वेसत्यसत्त्वानधिकरणत्वात् स्वासत्त्वागोचरप्रमांप्रतिसाक्षा
द्विषयत्वात् आरोपितमिथ्यात्वकत्वात् कल्पकरहितत्वात् स्वविषयकसाक्षात्कारात्पूर्व
भावित्वाचात्मवत् जीवब्रह्मभेदःपरमार्थसन् अनादित्वादात्मवत् साक्षिवेद्यःसुखदुः
खादिभेदःपरमार्थसन् अनिषेध्यत्वेनदोषाजन्यज्ञानंप्रतिसाक्षाद्विषयत्वात् आत्मवत् ।
धर्माधर्मयागदानादिभेदःपरमार्थसन् श्रुतितात्पर्यविषयत्वात् ब्रह्मवदित्याद्यूह्यं ।

ध्यत्वेनविशेषणंसंमतमितिध्येयं । तथाचव्यावहारिकोभेदइतितात्पर्यार्थः । तथैवपक्षनिर्देशेऽस्माकमाश्रयासिद्धिरित्यवधेयं । मुक्तानांकर्मप्रागभावाभावेनभेदाबाधकेऽयंघटइत्यादिज्ञानेमुक्तात्मकर्मप्रागभावसमानकालीनत्वाभावादाश्रयासिद्धिरित्यतउक्तं समानाधिकरणेति । मुच्यमानात्मनिष्ठेत्यर्थः । प्रातिभासिकासतोर्व्यभिचारवारणायविशेषणविशेष्ये दोषाजन्यंबाधकज्ञानं

SGDF
Sri Gurgeshwari Digital Foundation

प्रतिनिषेध्यत्वेनसाक्षाद्विषयेरूप्येव्यभिचारवारणायोक्तमनिषेध्यत्वेनेति । नन्वत्रभेदस्यसत्वमात्रंसाध्यतां पारमार्थिकत्व
विशेषणंव्यर्थंवादिनोमममते व्यावर्त्याप्रसिद्धेरित्याशंक्यपरिहरति ॥ अत्रेति ॥ विमतंसद्वापारमार्थिकसद्वेत्यत्रवादिनःपर

अत्रकंटकोद्धारः जगत्सत्यत्वमानप्रस्तावेकृतइति ॥ ७ ॥ भेदपंचकेऽनुमानानि ॥ २१ ॥ किंच
"द्वासुपर्णा यआत्मनितिष्ठन् नित्योनित्यानांचेतनश्चेतनानां अजोह्येकोजुषमाणोऽनुशेतेजहा
त्येनांभुक्तभोगामजोन्य" इत्यादिश्रुतिभिः "नैतदिच्छंतिपुरुषमेकंकुरुकुलोद्वह ।अन्यश्चपरमो
राजंस्तथान्यःपंचविंशकः।यथेश्वरश्चजीवश्चसत्यभेदौपरस्पर" मित्यादिस्मृतिभिः "भेदव्यपदे
शात् भेदव्यपदेशाच्चान्यः शारीरश्चोभयेपिहि भेदेनैनमधीयते पृथगुपदेशादि" त्यादिभिर्नि
र्णायकसूत्रैश्चसिद्धोभेदः । नचश्रुतिरनुवादः । जगत्सत्यत्वश्रुतेरननुवादकत्वप्रस्तावोक्तन्यायै-
र्जीवत्वावच्छिन्नजीवभेदस्याप्राप्त्या "नहिंस्यादि" त्यादिवदननुवादकत्वोपपत्तेः।शाखांतरस्थ
विधिवाक्यस्येवपुंविशेषंप्रत्यर्थवत्त्वाच्च "द्वयोःप्रणयंती" त्यादिवद्वर्तमानमात्रग्राहिप्रत्यक्षाप्राप्त

मार्थत्वविशेषणंव्यर्थंव्यावर्त्याप्रसिद्धेरित्याशंक्यपरप्रसिद्धत्वमात्रेणव्यावर्त्यत्वोपपत्तेःपरार्थानुमानेपरंप्रतिसिद्धसाधनोद्धारस्या ॥ ५८७ ॥
पितत्प्रयोजनत्वादित्यादिनाकृतइत्यर्थः ॥७॥ भेदपंचकेऽनुमानानांविवरणं ॥२१॥ उक्तन्यायैर्जीवत्वावच्छिन्नेति ॥ य

थापृथिवीइतरभिन्नानहिंस्यादित्यत्रएकदेशघटादौविधेयभूतेतरभेदादिसिद्धावपिपृथिवीत्वाद्यवच्छेदेनासिद्धिवद्धिश्वत्वावच्छेदे
नतदसिद्ध्याननुवादकत्वादित्युक्तन्यायेनप्रत्यक्षेणदेवदत्तयज्ञदत्तभेदसिद्धावपिजीवत्वावच्छेदेनासिद्ध्याननुवादकत्वमित्यर्थः ।
शाखांतरेत्यादिकंविश्वमिथ्यात्वस्यागमबाधप्रस्तावेसम्यग्व्याख्यातंतद्रीत्यैवद्रष्टव्यं । ननुशास्त्रप्राप्तमेवशास्त्रेणानूद्यतइतितुनशं

कालत्रयाबाध्यभेदप्रापकत्वोपपत्तेश्च। ऐक्येषड्विधतात्पर्यलिंगवद्दार्ढ्यार्थत्वाच्च । षड्विंशतिरित्ये
वब्रूयादितिवत्प्रतिप्रसवार्थत्वाच्च । प्रत्यक्षस्याप्रामाण्येश्रुतेरनुवादकत्वायोगाच्च । श्रुतेःप्रत्यक्ष
निरपेक्षानुवादत्वेनधारावाहिकद्वितीयादिज्ञानवत्प्रमात्वोपपत्तेश्च । विद्वद्वाक्यवत्सप्रयोजना
नुवादत्वेनस्वार्थपरत्वाच्च । यत्तन्नेत्यादिनिषेधार्थानुवादलिंगाभावेनविधेयांतरश्रवणेनचनिषे
धार्थानुवादायोगात् । विधानार्थानुवादेचानुवाद्यस्यतात्विकत्वनियमाच्च । अनुवादकत्वेपिया
थार्थ्यरूपप्रामाण्याहानेश्च । किंचौपनिषदस्यब्रह्मणोशास्त्रेणाप्राप्तेःतद्धर्मिकस्यतत्प्रतियोगिकस्य
वाभेदस्यकथंशास्त्रनिरपेक्षप्रत्यक्षादिनाप्राप्तिः । नचशास्त्रसापेक्षप्राप्त्याशास्त्रस्यानुवादकता।

कनीयं तथात्वेश्रुतेरुन्मत्तवाक्यत्वप्रसंगादित्याशयेनाह ॥ नचेति ॥ नहीत्यर्थः । ननुजीवेश्वरभेदस्यप्राप्त्यानुवादकत्वंभेदश्रु
तेर्नोच्यते येनोक्तदोषः किंनाम भेदमात्रंतावत्प्राप्तं घटपटयोर्भेदस्यप्रत्यक्षसिद्धत्वात् तथाचभेदश्रुतिरनुवादइत्यतआह ॥

SGDF
Sanskrit Digital Foundation

भेदमात्रस्येति ॥ ७ ॥ भेदश्रुतेरनुवादकत्वभंगविवरणं ॥ २२ ॥ प्रत्यक्षाविरुद्धेति ॥ चिन्मात्रैक्यपरेत्यर्थः । विरु
भेदमात्रस्यप्राप्त्यानुवादत्वेतुघटेनघटैक्यस्यप्राप्त्यैक्यश्रुतिरप्यनुवादःस्यात् ॥ ७ ॥ भेदश्रुतेरनुवादकत्वभं
गः ॥ २२ ॥ ७ ॥ नचाननुवादकत्वेपि बाध्यव्यावहारिकभेदपराश्रुतिः । अप्रामाण्यापातात् । नचाभेदश्रु
तिविरोधात्तदिष्टं । तस्यालक्षणयाअखंडचिन्मात्रपरत्वेनभेदाविरोधित्वात् । वैपरीत्यस्यापिसुवचत्वा
च्च । यदितुभेदश्रुतिःप्रत्यक्षप्राप्तार्थत्वात्दुर्बला तर्ह्यैक्यश्रुतिरपितद्विरुद्धत्वात्तथास्यात् मानांतरप्राप्तिवत्
तद्विरोधस्यापिदौर्बल्यहेतुत्वात् । यदिचैक्यश्रुतिःप्रत्यक्षाविरुद्धैक्यपरा तर्हिभेदश्रुतिरपितदसिद्धत्रिका
लाबाध्यभेदपरास्तु । नचषड्विधतात्पर्यलिंगवत्त्वादैक्यश्रुतिःप्रबला लिंगानांतात्पर्यमात्रज्ञापकत्वेनार्थ
तथात्वाज्ञापकत्वात् । स्वीकृतंचभेदश्रुतेरनुवादकत्वंत्यजतात्वयापिभेदपरत्वं । अस्तिचात्रापिअत्तिअन
श्नन्पूर्णःपरोजीवसंघोह्यपूर्णइत्याद्युपपत्तिरूपं सत्यंभिदासत्यंभिदेत्यादावभ्यासरूपंचतात्पर्यलिंगं तद्ब
हुत्वंचत्वत्पक्षेप्रमाणसंप्लववत्व्यर्थमित्युक्तं । वक्ष्यतेचभेदश्रुतेरपिषड्विधलिंगवत्ता । निषेधवाक्यत्वात्
ऐक्यश्रुतिःप्रबलेतितुनिरस्तं । किंचभेदएवैक्यनिषेधरूपः । किंचभेदश्रुतिरेवप्रबला । अनुपसंजातविरो
धित्वात् । प्रत्यक्षादिसंवादात् निरवकाशत्वाच्च । उक्तंहि । “स्वातंत्र्येचविशिष्टत्वेस्थानमत्यैक्ययोरपि ।
सादृश्येचैक्यवाक्सम्यक्सावकाशायथेष्टत”इति । किंचायंभेदोनव्यावहारिकः । मुक्तावपिभेदस्यस्मृतेः

द्धधर्मावुदाहरति ॥ अत्ति अनश्नन्निति ॥ ७ ॥ भेदश्रुतेर्व्यावहारिकभेदपरत्वभंगविवरणं ॥ २३ ॥ नित्यःपरइ
श्रुतेश्च । नचसामुक्तिरवांतरा । “इदंज्ञानमुपाश्रित्यममसाधर्म्यमागताः । सर्गेपिनोपजायंतेप्रलये
नव्यथंतिचे” त्यादिस्मृतौसर्गाद्यभावोक्तेः । “नयत्रमायाकिमुतापरेहरेरनुव्रतायत्रसुरासुरार्चि
ताः । श्यामावदाताःशतपत्रलोचनाःपिशंगव(स्त्राःसुरुचःसु)स्त्राभरणाःसुपेशस” इतिस्मृतौमा
यानिषेधाच्च । “योवेदनिहितंगुहायांपरमेव्योमन् । सोश्नुतेसर्वान्कामान्सहब्रह्मणाविपश्चिते” त्य
त्रशुद्धब्रह्मज्ञानफलत्वोक्तेश्च । त्वयापिशुद्धब्रह्मविषयत्वेनस्वीकृतायाभूमविद्यायाःफलोक्त्यवसरे
“तस्यसर्वेषुलोकेषुकामचारोभवति सएकधाभवतित्रिधाभवतिपंचधाभवतिसप्तधे”तिभेदोक्तेश्च।
“परंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यते सतत्रपर्यैतिजक्षन्क्रीडन्रममाण” इत्यादौस्वरूपाभि
व्यक्त्युक्तेश्च । “तदाविद्वान्पुण्यपापेविधूयनिरंजनःपरमंसाम्यमुपैती” त्यत्रकर्मक्षयोक्तेश्च । “जुष्टं
यदापश्यत्यन्यमीशमस्यमहिमानमितिवीतशोकः । पृथगात्मानंप्रेरितारंचमत्वाजुष्टस्ततस्तेनामृत
त्वमेती” त्यादौभेदज्ञानान्मोक्षोक्तेश्च । त्वन्मतेपि भेदभोगादिपरेषु फलाध्यायांत्यपादस्थेषु “ज
गद्व्यापारवर्जं संकल्पादेवचतच्छ्रुतेः भोगमात्रसाम्यलिंगाच्चे” त्यादिसूत्रेषुप्रक्रांतशुद्धब्रह्मविद्याफ
लस्यैववक्तव्यत्वाच्च ॥ ७ ॥ भेदश्रुतेर्व्यावहारिकभेदपरत्वभंगः ॥२३॥ किंचपूर्वतंत्रेद्वितीयाध्याये

SGDF

शब्दान्तराभ्याससंख्यागुणप्रकरणः कर्मभेदः संज्ञा

ति ॥ एकेननित्यशब्देनपरेशेनित्यत्वेऽभिहितेपुनस्तत्रैवनित्यत्वबोधनायोगान्नित्यशब्दाभ्यासःपरजीवौभिनत्तीत्यर्थः । गुणां
तरंविधातुंप्रत्यभिज्ञायमानेपुनःश्रुतेरभेदकत्वादुक्तमप्रत्यभिज्ञायमानेति । प्रत्यभिज्ञाज्ञापकंसोयमित्यादिपदमत्रनास्तीत्य

यैःशब्दांतरादिभिःकर्मभेदउक्तः तैरेवजीवेश्वरभेदसिद्धिः । "एषएवजीवंप्रबोधयति एतस्मा
ज्जीवउत्तिष्ठती" ति विरुद्धार्थधातुनिष्पन्नाख्यातरूपशब्दांतरस्य "नित्यःपरोनित्योजीव" इ
तिअप्रत्यभिज्ञायमानपुनःश्रुतिरूपाभ्यासस्य "द्वासुपर्णे" त्यादिसंख्याया । "अश्नन्ननश्नन्नि"
त्यादेर्भेदकस्यगुणांतरस्य "यतोवाचोनिवर्तंत" इत्यादिप्रकरणांतरस्यजीवेशावितिनामधे
यभेदस्यचसत्त्वात् ॥ ७ ॥ जीवेशभेदेशब्दांतरादि ॥ २४ ॥ संतिचभेदश्रुतेरपि षड्विधतात्पर्य
लिंगानि । तथाहि । आथर्वणे "द्वासुपर्णे" त्युपक्रमः । परमंसाम्यमुपैतीत्युपसंहारः । "तयो
रन्यः अनश्नन्नन्यः अन्यमीश" मित्यभ्यासः । शास्त्रैकगम्येश्वरप्रतियोगिकस्य * तद्धर्मिकस्यवा *
कालत्रयाबाध्यभेदस्यशास्त्रंविनाअप्राप्तेरपूर्वता । "पुण्यपापेविधूये" तिफलं । "अस्यमहिमान"
मितिस्तुतिरूपोर्थवादः । "अत्तिअनश्नन्नि" त्युपपत्तिः । अत्र "मायामात्रमिदंद्वैत" मित्यादा
विवद्विशब्दएवभेदवाचकः तदाक्षेपकोवा द्वित्वसंख्यैववैक्यविरोधिनीत्युपक्रमोभेदविषयः । ॥ ५८९ ॥

र्थः । अधिकरणानितरंगिण्यांद्रष्टव्यानि ॥ ७ ॥ जीवेशभेदेशब्दांतरादिविवरणं ॥ २४ ॥ साम्यप्रतिपादकोपसंहारस्य

भेदपरत्वमुपपादयति ॥ तद्भिन्नत्वेति ॥ नत्विति ॥ तद्भिन्नत्वंविहायतन्निष्ठबहुधर्मयोगित्वमात्रं नभवतीत्यर्थः । कुतोने
त्यतस्तन्निष्ठबहुधर्मयोगित्वरूपसादृश्यस्यैक्यरूपत्वेबाधकमाह ॥ नायमित्यादि ॥ नायंसइतिसादृश्यविधानायैक्यंनिषिध्यते
नायंतत्सदृशइतिऐक्यविधानायसादृश्यंनिषिध्यते तन्नयुक्तं । यदिसादृश्यमैक्यंस्यादित्यर्थः अतोभेदगर्भत्वंवाच्यमितिभावः ।
ननुसादृश्यस्यभिन्नत्वगर्भत्वे "गगनंगगनाकारंसागरःसागरोपम" इत्यादिप्रयोगानुपपत्तिरित्यतआह ॥ गगनमिति ॥ ननु

तद्भिन्नत्वविशेषितमेवतन्निष्ठबहुधर्मयोगित्वंतत्सादृश्यं नतुविशेष्यमात्रं । नायंसः किं
तुतत्सदृशः नायंतत्सदृशः किंतुसएवेतिसादृश्यैक्ययोरेकतरविधानायान्यतरनिषेधा
त् "गगनंगगनाकार" मित्यादितुतत्सदृशवस्त्वंतरनिषेधपरं । गगनाद्येकदेशस्यतदेकदे
शसादृश्यपरंवेत्युपसंहारोपिभेदपरः । अभ्यासत्वेचार्थतएकप्रकारत्वंतंत्रं नतुशब्दतः
अतिप्रसंगात् । "पश्यत्यन्यमीश" मित्यत्रेशगतान्यत्वंप्रतिपश्यतीतिप्रकृतोजीवः

"तयोरन्य" इत्यादीनांशब्दतएकप्रकारत्वाभावात्कथमभ्यासत्वमित्यतआह ॥ अभ्यासत्वेचेति ॥ अतिप्रसंगादिति ॥
सास्नादिमद्व्यक्त्यभिप्रायेणपृथिवीवागाद्यभिप्रायेणचप्रयुक्तस्यगौर्गौर्गौरित्यस्याप्यभ्यासत्वापत्तिः शब्दतएकप्रकारत्वसद्भावादि
त्यर्थः । नन्वन्यमीशमितिकथमभ्यासः । "तयोरन्यः अनश्नन्नन्य" इत्यत्रजीवेशयोरन्योन्यमन्यत्वमुच्यते अन्यमीशमित्य
त्रतुईशस्यघटादिनाकेनचिदन्यत्वमेवोच्यते नतुजीवादतःकथमर्थतोप्येकप्रकारत्वमित्यतआह ॥ पश्यतीति ॥ प्रकृतइति ॥

SGDF Foundation

दर्शनकर्तृत्वेनप्रकृतइत्यर्थः ॥ पदिन्यायेनेति ॥ यथापदेजुहोतीत्यत्रप्रकृतैकहायिन्येवपदेन्वेतिनतुयत्किंचित्तद्वदित्यर्थः ॥७॥

पदिन्यायेनप्रतियोगितयासंबध्यतइतिसिद्धोऽभ्यासः । एवं "वेत्थनुत्वंकाप्यतमंतर्यामिण" मि
त्युपक्रमः । "एषतआत्मांतर्यामी" त्युपसंहारः । "एषतआत्मांतर्याम्यमृत"इत्येकविंशतिकृत्वो
भ्यासः । अंतर्यामित्वस्याप्राप्तत्वादपूर्वता । "सब्रह्मवि" दित्यादिफलं । "तचेत्त्वंयाज्ञवल्क्यसूत्र
मविद्वांस्तंचांतर्यामिणंब्रह्मगवीरुदजसेमूर्धातेविपतिष्यती" तिनिंदारूपोर्थवादः । "यस्यपृथिवी
शरीरंयंपृथिवीनवेदे" त्याद्युपपत्तिः । इयंचश्रुतिर्भेदपरैवेतिसूत्रकृतैवोक्तं । "शारीरश्चोभयेपिहि
भेदेनैनमधीयत" इतिसूत्रंभेदपरमितित्वयापिभाषितत्वात् ॥ ७ ॥ भेदश्रुतेःषड्विधतात्पर्यलिंगा
नि ॥ २५ ॥ किंचतिष्ठतुभेदः । ऐक्यंकिमात्मस्वरूपं उतान्यत् । नाद्यः । पर्यायत्वैकतरपरिशेषा
द्यापत्तेः । सापेक्षस्यैक्यस्यानिरपेक्षात्मत्वायोगाच्च । स्वप्रकाशस्यात्मनोविद्यादिसाक्षित्वेनसदाप्र
काशमानत्वेनशास्त्रवैयर्थ्याच्च । नचत्वन्मतेअपर्यायत्वादिनिर्वाहकोविशेषोस्ति । नचभेदभ्रमनि
रासार्थंशास्त्रं । अधिष्ठानाप्रकाशंविनाभेदभ्रमस्यैवायोगात् । स्वरूपप्रकाशेनप्रकाशमानेप्यात्मन्य
ज्ञानविरोधिवृत्त्यभावाद्भ्रमइतित्वविद्याविषयभंगेनिरस्तं । अंत्येऐक्यंसत्यं मिथ्यावा । आद्येअद्वै

भेदश्रुतेःषड्विधतात्पर्यलिंगविवरणं ॥ २५ ॥ विशेषनिषेधइति ॥ तदनिष्ठधर्मानधिकरणत्वोक्तौतन्निष्ठधर्माधिकरण

त्वस्यैवप्राप्तिः । विशेषनिषेधःशेषविध्यनुमापकइतिन्यायात् । अतःसधर्मकत्वमेवप्राप्तमित्यर्थः । अभेदत्वादीति ॥ अभेदेऽ
भेदत्वाभावेऽभेदत्वहानिःसोऽभेदएवनस्यादित्यर्थः । तथातत्रपारमार्थिकत्वाद्यभावेऽपारमार्थिकोऽसंश्चस्यादित्यर्थः ॥ तन्मा

तहानिः । अभावद्वैतमभावस्याधिकरणमात्रत्वंचप्रागेवनिरस्तं । भेदाभावोपलक्षितआत्मैक्य
मित्यपिनयुक्तं । उपलक्षणीभूतभेदाभावस्यसत्त्वेअद्वैतहानिः । मिथ्यात्वेद्वितीयेंतर्भावात् ।
नद्वितीयः । तत्त्वमसीत्यादेरतत्वावेदकत्वापातात् । भेदस्यसत्यत्वापत्तेश्च । किंचान्यत्वपक्षे
ऐक्यंकिमेकत्वसंख्या तन्निष्ठसकलधर्माश्रयत्वंवा तन्निष्ठासाधारणधर्माश्रयत्वंवा भेदाभा
वोवा तदनिष्ठधर्मानधिकरणत्वंवा । नाद्याः । निर्धर्मकेब्रह्मणितत्वतःसंख्याद्यभावात् । न
चतुर्थः । भेदस्यैक्याभावरूपत्वेनान्योन्याश्रयात् । नपंचमः । शून्यस्यापिब्रह्मैक्यापातात् ।
विशेषनिषेधेशेषाभ्यनुज्ञानेन सधर्मकत्वापाताच्च । किंचाभेदेअभेदत्वपारमार्थिकत्वासद्वैल
क्षण्यादीनितत्त्वतःसंतिचेत्तैरेवसद्वितीयत्वं नचेदभेदत्वादिहानिरितिदिक् । नचैक्यस्यदुर्व
चत्वेप्यात्मस्वरूपमात्रमबाधितमितिवाच्यं । तन्मात्रस्यसम्मतत्वेनत्वच्छास्त्राविषयत्वात् ।

त्रस्येति ॥ आत्मस्वरूपमात्रस्यभ्रमाधिष्ठानत्वाविद्यासाक्षित्वादिनासिद्धेस्स्वतसंमतत्वेनत्वदीयशास्त्राविषयत्वादप्राप्तेशास्त्रम

SGDF Foundation

थर्ववदितिस्व(वचना)न्यायादितिभावः ॥ निरस्तमिति ॥ अभेदएवखंड्योऽस्माकंनतुभेदःसाध्यइत्यपिवक्तुंशक्यत्वादितिनि
भेदएवखंड्योस्माकंनत्वभेदःसाध्यइतितुनिरस्तं ॥ ७ ॥ ऐक्यस्वरूपभंगः ॥ २६ ॥ यच्चेदमुच्यतेजीवब्र
ह्माभेदे "तत्त्वमसी" त्यादिश्रुतिर्मानं । यद्यप्यत्रसार्वज्ञासार्वज्ञादिविशिष्टयोस्तत्त्वंपदवाच्ययोरैक्यं
जरद्गवादिवाक्यवद्योग्यताविरहान्नयुक्तं । तथापिसोयंदेवदत्तइत्यादिवद्विरुद्धांशत्यागेनलक्षितयोरैक्यं
युक्तं । उक्तंहि । "युष्मदस्मद्विभागज्ञेस्यादर्थवदिदंवचः । अनभिज्ञेऽनर्थकंस्याद्बधिरेष्विवगायन"मिति।
इयंचनवप्रकरणीषड्विधतात्पर्यलिंगवत्त्वात्प्रबला । तथाहि । "एकमेवाद्वितीय" मित्युपक्रमः । "तत्त्व
मसी" त्युपसंहारः । तत्त्वमसितत्त्वमसीतिनवकृत्वोऽभ्यासः । जीवब्रह्मैक्यस्यान्यतोप्राप्तत्वादपूर्वता ।
"अथसंपत्स्यत" इतिफलं । "येनाश्रुतंश्रुतंभवती" त्यादिरर्थवादः । मृत्पिंडादिदृष्टांतैरुपपादनादुपप
त्तिरपि । एवंविमताआत्मानःपरमात्मनःपरमार्थतो(तत्वतो)नभिद्यंतेआत्मत्वात्परमात्मवदित्याद्यनु
मानानिचेति । अत्रब्रूमः । विरुद्धाकारत्यागःकिंअविवक्षामात्रेणा नित्यत्वेनवा मिथ्यात्वेनवा । नाद्यः ।
विरुद्धाकारस्याविवक्षायामप्यनपायात् । नहि "असद्वाइदमग्रआसीत् सर्वंखल्विदंब्रह्म" त्यादिश्रुत्या
असत्त्वशून्यत्वयोश्चित्त्वजडत्वयोर्वाअविवक्षामात्रेणब्रह्मणःशून्येनजडेनवैक्यंसुवचं । नद्वितीयः ।
रस्तमित्यर्थः ॥ ७ ॥ ऐक्यस्वरूपभंगविवरणं ॥ २६ ॥ असद्वाइदमग्रआसीदिति ॥ श्रुत्याऽसत्वशून्यत्वयोरविवक्षामा

त्रेणब्रह्मणःशून्येनैक्यंनहिसुवचं "सर्वंखल्विदंब्रह्म" त्यादिश्रुत्याचित्त्वजडत्वयोरविवक्षामात्रेणब्रह्मणोजडेनवैक्यंनहिसुवचमि
तथात्वे तत्त्वंभविष्यसीतिनिर्देशापत्त्याऽसीतिवर्तमाननिर्देशायोगात् । दशाभेदेनभेदाभेदयोः
सत्त्वापत्त्यात्वयाप्यनंगीकाराच्च । जीवेशयोःस्वातंत्र्यपारतंत्र्यादेर्नित्यत्वेश्रुत्यादेरुक्तत्वाच्च । नतृ
तीयः । निर्दोषश्रुतिसाक्षिसिद्धयोर्विरुद्धधर्मयोर्मिथ्यात्वायोगादित्युक्तत्वात् । सोयमित्यादौतुत
त्तादेर्नत्यागः । क्रमेणैकत्रतत्तेदंतयोरविरोधादित्युक्तं । किंचैक्यश्रुत्याप्रत्यक्षसिद्धंजीवमनूद्यतस्य
ब्रह्मत्वंवाश्रुतिसिद्धंब्रह्मानूद्यजीवत्वंवा उभयानुवादेनाभेदोवाविधेयः । सर्वथाप्युपजीव्यविरो
धान्नैक्येप्रामाण्यं प्रत्यक्षेणजीवस्यब्रह्मतोभिन्नत्वेनश्रुत्याचसर्वज्ञत्वादिनाब्रह्मग्राहिण्याब्रह्मणस्तद्भी
नत्वेनानुभूयमानाज्जीवाद्भिन्नत्वेनग्रहणात् । उपजीवकयोर्हिविरोधे नतावद्द्वयोःप्रामाण्यं वस्तुनोद्वै
रूप्यापातात् । नापिद्वयोरप्रामाण्यं वस्तुनोनिःस्वभावत्वापातात् । नाप्युपजीव्यस्यैवाप्रामाण्यं ।
दुर्बलेनप्रबलबाधायोगात् । तस्मात्परिशेषादुपजीवकस्यैवाप्रामाण्यं । तदुक्तं । (शास्त्रगम्यपरेशा
नाद्भेदःस्वात्मनईयते ॥ अनुभूतिविरोधेनकथमेकत्वमुच्यते ॥ सार्वज्ञादिगुणंजीवाद्भिन्नंज्ञापयति
श्रुतिः ॥ ईशंतामुपजीव्यैववर्ततेह्यैक्यवादिनी)ति ॥ २॥ ईश्वरस्यानुमेयत्वेप्युपजीव्यविरोधएव।
त्यन्वयोद्रष्टव्यः ॥ भविष्यसीति ॥ विरुद्धाकारस्यानित्यत्वेनतन्नाशानंतरमित्यर्थः ॥ प्रतिषेधशास्त्रेति ॥ तथाचनेदंर

ओपजी

SGDF
Foundation

जतमित्यादेरप्यप्रामाण्यापातात्प्रतिषेध्यरजतज्ञानस्यप्रामाण्यादितिभावः ॥ धर्मिणइति ॥ नेदंरजतमित्यत्रधर्मिभूतेदमंश
समर्पकत्वेनइदंरजतमितिज्ञानंनापेक्षितं नेदंरजतमितिज्ञानेनइदमंशरूपधर्मिसिद्धेः । यदिचइदंरजतमितिज्ञानमेवधर्मिसमर्प
कमित्युच्यते । तर्हितत्रापिधर्मिभूतेदमंशसमर्पकंज्ञानांतरंवाच्यंस्यात् । उच्यतएवेतिचेत् । तर्हिइदंरजतमित्यत्रयद्धर्मिसमर्पकं
ज्ञानांतरमुच्यते तदेवनेदंरजतमित्यत्रापिधर्मिसमर्पकमस्तु । किंमध्येइदंरजतमितिज्ञानस्यधर्मिसमर्पकत्ववचनेन । अथनेदंर
अनुमित्यापितस्यसर्वज्ञत्वादिनैवसिद्धेः । नचैवंनिषेध्यार्पिकेदंरूप्यमितिधीरपिनेदंरूप्य
मित्यस्योपजीव्यास्यादितिवाच्यं । *यद्धियदपेक्षंयस्यबाधेस्वस्यापिबाधापत्तिश्चतत्तस्योप
जीव्यमिह तच्चयद्धर्म्यादिग्राहकंस्वप्रामाण्यादिग्राहकंच तदेव, नतुनिषेध्यार्पकं । नहिब्र
ह्मरूपधर्मिज्ञानाप्रामाण्ये ऐक्यज्ञानप्रामाण्यज्ञानाप्रामाण्येच ब्रह्मात्मैक्यज्ञानाप्रामा
ण्यवत् प्रतिषेध्यज्ञानाप्रामाण्येप्रतिषेधज्ञानाप्रामाण्यं प्रतिषेधशास्त्रविपरिलोपापातात् ।
नच"इदं
नचेदंरूप्यमितिधीरपिधर्मिग्राहित्वेनैवोपजीव्या । धर्मिणइदमंशस्यापिनेदंरूप्यमितिप्र
जतमितिज्ञानमेवास्मिन्धर्मिसमर्पकमितिब्रूयास्तर्हिनेयंरूप्यमितिप्रत्यक्षेपितुल्यमितिप्रौढिवादेनदूषणोक्तिरितिसंप्रदायः । ननु
यथापुरोडाशकपालेनतुषानुपवपतीत्यत्रकांस्यपात्र्याभुङ्क्तइत्यत्रेवकरणस्याधिकरणत्वंविवक्षितं एवंचतुषोपवापेपुरोडाशविशिष्ट
कपालस्याधिकरणत्वाभावात्पुरोडाशत्यागेनकपालरूपाधिष्ठानलक्षणामंगीकृत्यवाक्यार्थोपपत्तिर्मीमांसकैःस्वीकृता एवंमयापि

SGDF
Sri Gargeshwari Digital Foundation

त्यक्षेणैवसिद्धेः । नचजीवोपितत्त्वमस्यादिवाक्यसिद्धः । अप्राप्तेशास्त्रस्यार्थवत्त्वात् । अस्तुवेदंरूप्य
मितिधीरपिधर्मिग्राहकत्वेनोपजीव्या तथापिनेदमित्यत्रेदमंशमात्रंधर्मि नतुरजतत्वविशिष्टं ।
इदमंशमात्रेरूप्यत्वनिषेधेनैवेष्टसिद्धेः । एवंचयदुपजीव्यं तन्नबाध्यं । इदमंशस्याबाधात् । यच्चबा
ध्यंरजतत्ववैशिष्ट्यं नतदुपजीव्यं रजतत्वविशिष्टस्याधर्मित्वात् । नन्वेवमैक्येपिब्रह्मस्वरूपमात्रं
धर्मि नतुसार्वज्ञादिविशिष्टं । एवंचयदुपजीव्यंनतद्बाध्यं यच्चबाध्यंनतदुपजीव्यमितिचेत् । किंसा
र्वज्ञादिनाभावरूपेणासंसारित्वादिनाऽभावरूपेणवाऽसाधारणधर्मेण ब्रह्मोद्देश्यं चित्त्वादिनासा
धारणधर्मेणवा स्वरूपेणैववा । आद्येस्ुस्थउपजीव्यविरोधः । द्वितीयेचितएवजीवैक्यंसिद्ध्येत् ।
नतुब्रह्मणः । तच्चममापिसम्मतं । नतृतीयः । शब्देनासाधारणब्रह्मस्वरूपोद्देशस्यासाधारणधर्मेण
विनाऽसिद्ध्योपजीव्यविरोधतादवस्थ्यात् । साधारणस्वरूपोद्देशेचब्रह्मैक्यासिद्धेः । एतेननसार्व
ज्ञादिवाक्यसिद्धंब्रह्मधर्मि किंतुनिर्गुणादिवाक्यसिद्धमितिनिरस्तं । तत्सिद्धस्याप्युक्तपक्षाबहिर्भा
वात् । निर्गुणादिवाक्येनापि धर्मिग्राहकविरोधेनगुणनिषेधासंभवाच्च । एतेनसार्वज्ञाद्युपलक्षितो
धर्मीतिनिरस्तं । जीवव्यावृत्तब्रह्मत्वस्योपलक्ष्यतावच्छेदकत्वेधर्मिग्राहकविरोधात् । चित्त्वस्यतत्त्वे
सिद्धसाधनात् । सोयंदेवदत्तइत्यादौतुतत्ताविशिष्टएवोद्देश्यः । यद्धत्तयाज्ञातएवयदन्वयधीःत

SGDF
Sri Gargeshwari Digital Foundation

न्यायामृ० लक्षणांगीक्रियतइत्यतआह ॥ पुरोडाशेति ॥ तदेवोपपादयति ॥ तत्रेति ॥ तत्रेत्यनंतरंअधिष्ठानमात्रलक्षणयेतिशेषः । श्रीनिवा०
॥ १६५ ॥ त्वरूपस्यविशेषणत्वस्यतत्तादौसंभवादित्युक्तं । नचप्रकृतेपिसंसारित्वेनज्ञातेब्रह्मैक्यधीः तज्ज्ञा ऐ. श्रु. उ.
नस्यप्रमात्वेब्रह्मैक्यायोगात् भ्रमत्वेचोपजीव्यस्योपजीवकेनबाधापातात्। (पुरोडाशकपालेनतुषानु
पवपती)त्यत्राधिष्ठानलक्षणायामपिनदोषः । तत्रतुषोपवापस्यान्यतोप्राप्त्यातत्रतुषोपवापविधाने २ । २७
नैवेष्टसिद्धिः । इहतुचितोजीवैक्येननेष्टासिद्धिः । एवंच । “चिताचिदैक्यंसिद्धंनःसार्वज्ञादिविशि
ष्टयोः ॥ ऐक्यंतुधर्मिग्राहिभ्यांश्रुत्यक्षाभ्यांविरुध्यते ॥ १ ॥” अन्यथापरमाणुःसावयवःईश्वरोस
र्वज्ञःआदित्योयूपइत्यादावप्युपजीव्यविरोधोनस्यात् । उत्पत्तिशिष्टगुणविरुद्धगुणविधेरुत्पत्तिवा
क्यविरोधश्चनस्यात् । तत्रापिपरमाणुत्वादिविशिष्टोनधर्मीकिंतुस्वरूपमात्रमितिसुवचत्वात्। निर
वयवत्वादिनाविना परमाण्वादेर्धर्मिकरणमेवनसिद्ध्यतीतिचेत् समंप्रकृतेपि । सर्वज्ञत्वादिनावि
नेश्वरस्यापिधर्मिकरणासिद्धेः । आरोपितेनसार्वज्ञादिनाव्यावृत्तंधर्मीतिचेत् । तत्राप्यारोपितेन
निरवयवत्वादिनाव्यावृत्तोधर्म्यस्तु । निरवयवत्वादिग्राहिणःप्रमाणत्वान्नतथेतिचेत्समंप्रकृतेपि ।
एतेनैक्यश्रुतेर्जीवान्यद्ब्रह्मनास्तीत्यत्रतात्पर्यमितिनिरस्तं । निरीश्वरवादांतर्भावेनबहुश्रुतिविरोधा ॥ ५९३ ॥
इहत्वित्यनंतरंलक्षणयेतिशेषः । चितोजीवैक्येनउक्तेन॥नेष्टसिद्धिरिति॥सिद्धत्वेनशास्त्राबोध्यत्वेनशास्त्रवैयर्थ्यंस्यादितिभावः

त् । यदितुसार्वज्ञासार्वज्ञादिकेविरुद्धधर्मेसत्यपिचित्त्वादिनैक्यंविवक्षितं तन्ममापिसम्मतं । एते
नैक्यश्रुतेर्लक्षणयाचिन्मात्रपरत्वेनैक्यपरत्वाभावान्नतस्याधर्मिग्राहकत्वेनश्रुत्यादिकमुपजीव्यंनवा
तद्विरोधइतिनिरस्तं । इष्टापत्तेः । यद्वायेनविनायस्यानुत्थानं तत्तस्योपजीव्यं इदंरूप्यमितिधीश्च
प्रतिषेध्यार्पकतयोपजीव्यैव तथापिनदोषः । नह्युपजीव्यत्वमेवप्राबल्येतंत्रं । किंतुपरीक्षितत्ववि
शिष्टं । नचाविशिष्टस्यव्यभिचाराद्विशिष्टमप्रयोजकंभवति । परीक्षाचनतावत्प्रतिषेध्यार्पकशु
क्तिरूप्याभेदज्ञानांशेस्ति । त्वन्मतेपि तस्यव्यावहारिकप्रामाण्यापातात् । इहतुनिषेध्यार्पिकापि
भेदश्रुतिः साक्षिप्रत्यक्षंचनिर्दोषत्वात्परीक्षितं इत्थमेवचदोषाभावादिज्ञानरूपपरीक्षायामनाश्वा
सेप्रमाणतदाभासव्यवस्थानस्यादित्युक्तं प्रत्यक्षप्राबल्यप्रस्तावे । यद्यपिधर्म्यर्पकेइदंज्ञानांशेपरीक्षि
तत्वविशिष्टमुपजीव्यत्वमस्ति तथापिनतद्बाध्यमित्यनुपदमेवोक्तं । तदुक्तं । “भ्रमेप्यभ्रमभागो
स्तितन्मात्रमुपजीव्यतु । बाधकज्ञानवृत्तिस्यान्नचैवंसुपरीक्षित” इति । तस्मादुपजीव्यविरोधात्
“उत्पत्तिवाक्यविज्ञातंकर्मसर्वमनूद्यते । नचाश्रितगुणेशक्यंतद्विरोधिगुणांतर” मितिवार्तिकोक्त
रीत्या आमिक्षावाक्योपजीवकस्यवाजिनवाक्यस्यतद्विरोधिगुणविधायकत्ववत्प्रत्यक्षोपजीवक
स्य “यजमानःप्रस्तर” इत्यादेस्तद्विरुद्धयजमानत्वबोधकत्ववच्च “तत्त्वमस्या” दिवाक्यस्यनैक्यबो

SSDF ... Digital Foundation

॥ ७ ॥ ऐक्यश्रुतेरुपजीव्यबाधविवरणं ॥ २७ ॥ जीवाश्रयत्वादिति ॥ जीवंप्रत्याश्रयोजीवाश्रयः । तत्त्वादितितत्पु
धकतायुक्ता । तदुक्तं । "यजमानप्रस्तरत्वंयथानार्थःश्रुतेर्भवेत् । ब्रह्मत्वमपिजीवस्यप्रत्यक्षस्याविशे
षत" इति । यजमानप्रस्तरादिवाक्यादैक्यश्रुतेर्वैषम्यशंकातुप्रत्यक्षस्यशब्दाबाध्यत्वप्रस्तावेनिर
स्ता । नैवंभेदश्रुतेरैक्यश्रुतिरुपजीव्या । धर्मिणोजीवस्यप्रत्यक्षेणईश्वरस्यचसर्वज्ञादिवाक्येनशा
ब्दधीप्रामाण्यादेश्चप्रत्यक्षेणैवसिद्धेः । तस्यचसर्वस्य भेदानुगुणत्वात्प्रतिषेध्यार्पकविरोधस्यचप्रतिषे
धशास्त्राप्रामाण्यानापादकत्वादित्युक्तत्वात् श्रुतिंविनैवैक्यप्राप्तेर्वक्ष्यमाणत्वाच्च । ऐक्यश्रुतेस्तुनि
षेध्यप्रसक्तिर्भेदश्रुतिप्रत्यक्षाभ्यामेव त्वत्पक्षेहि भेदश्रुतिरपिनिषेध्यार्पिकैव नतुसत्यचिन्मात्रपरा
तत्त्वावेदकत्वापत्तेः । निषेध्यार्पकमपिपरीक्षितंचेन्नबाध्यमित्युक्तं । एतेन "अभेदंनोल्लिखंतीधीर्न
भेदोल्लेखनक्षमा । तथाचाऽऽद्येप्रमासास्यान्नांत्येस्वापेक्ष्यवैशसात्" इतिनिरस्तं । तदुक्तं नोपजी
व्योह्यभेदोत्रक्वचिद्भेदश्रुतेर्बलादिति ॥ ७ ॥ ऐक्यश्रुतेरुपजीव्यबाधः ॥ २७ ॥ किंचत्वन्मतेपदद्वये
लक्षणा ततोवरंमद्रीत्यैकस्मिंस्तत्पदेत्वंपदेवाअमुख्यवृत्तिः।तथाहि तत्साहचर्यात्तदितिव्यपदेशः ।
"वसंतादिभ्यष्ठक्" इत्यत्र "साहचर्यात्ताच्छब्द्यंभविष्यति वसंतसहचरितमध्ययनंवसंत" इति
महाभाष्योक्तेः । प्रसिद्धंचजीवस्यब्रह्मसहचरितत्वं द्वासुपर्णेत्यादौ । यद्वातदाश्रितत्वात्तदितिव्य

SGDF
Sri Gargeshwari Digital Foundation

पदेशः । (समर्थःपदविधि)रित्यत्रसमर्थपदाश्रितत्वात्पदविधिरुपचारेणसमर्थइतिपदेनोच्यतइति महाभाष्योक्तेः॥ “सर्वाःप्रजाःसदायतना” इतिवाक्यशेषाच्च । अथवा “ब्राह्मणोस्यमुखमासीदि” त्यादिवत्ततोजातत्वात्तदितिव्यपदेशः । “इग्यणःसंप्रसारण” मित्यत्र “यथाकाकाज्जातःकाकःश्येनाज्जातःश्येनः । एवंसंप्रसारणाज्जातोवर्णःसंप्रसारण” मितिमहाभाष्योक्तेः। “सन्मूलाःसोम्येमाःसर्वाःप्रजा” इतिवाक्यशेषाच्च । “ब्राह्मणोमुखमित्येवमुखाज्जातत्वहेतुतः । यथावदच्छ्रुतिस्तद्वज्जीवोब्रह्मेतिवाग्भवेदि” तिस्मृतेश्च । अथवा “धान्यमसिधिनुही” त्यत्रतंडुलेधान्यशब्दवत्तदधीनत्वात्तदितिव्यपदेशः । “प्राणबंधनंहिसोम्यमन” इतिवाक्यशेषेजीवस्येशाधीनत्वोक्तेः। “यदधीनायस्यसत्तातत्तदित्येवभण्यत” इतिभारतोक्तेश्च । अथवाअतिदेशोयंतद्वत्त्वमसीत्यर्थः। “बहुगणे” त्यादिसूत्रेबहुगणवतुडतयःसंख्यावद्भवंति अंतरेणापिवतिमतिदेशोगम्यते अब्रह्मदत्तंब्रह्मदत्तइत्याह तेनवयंमन्यामहेब्रह्मदत्तवदयंभवतीतिमहाभाष्योक्तेः । “सारूप्यादि” तिजैमिनिसूत्रे “आदित्योयूप” इत्यादिकंसादृश्यादित्युक्तत्वाच्च । “तद्गुणसारत्वात्तुतद्व्यपदेशःप्राज्ञवदि” तिब्रह्मसूत्रेब्रह्मगुणयोगाज्जीवेतदितिव्यपदेशइत्युक्तत्वाच्च । “भिन्नाजीवाःपरोभिन्नस्तथापिज्ञानरूपतः । प्रोच्यंतेब्रह्मरूपेणवेदवादेषुसर्वशः” इतिस्मृतेश्च । अन्यथातत्त्वमसीतिवाक्यमबोधकं

SGDF
Sri Gargeshwari Digital Foundation

रुषः । जीवआश्रयोयस्येतिव्याख्यानेउत्तरग्रंथेनपौनरुक्त्यंस्यादितिध्येयं ॥ तत्सिद्ध्येति ॥ ब्रह्मणःसर्वकर्तृत्वेनजीवकार्यस्य
स्यात् । यथोक्तंमहाभाष्ये "योगामश्वइतिब्रूयात्नजातुचित्संप्रत्ययःस्यादि" ति । यद्वाशाखास
देशेचंद्रेशाखाशब्दवत् जीवांतर्यामितयाजीवसदेशेब्रह्मणित्वमितिव्यपदेशः । "यआत्मनितिष्ठ
न्नि" त्यादिश्रुतेः । यद्वा "ब्राह्मणोवैसर्वादेवता" इत्यादिवत्जीवाश्रयत्वाद्ब्रह्मणित्वमितिव्यपदे
शः । यद्वाब्रह्मणःसर्वकर्तृत्वात् "यजमानःप्रस्तर" इत्यादिवत्तत्सिद्ध्यात्वमितिव्यपदेशः । एवंच
"तदधीनत्वताद्देश्यतातास्थ्यताद्धर्म्यपूर्वकैः । निमित्तैस्तत्त्वमस्यादिसामानाधिकरण्यगीः" ॥ नचै
वंमुख्यार्थत्यागदोषः । अंतर्यामिणित्वमित्यादेर्मुख्यतायावक्ष्यमाणत्वात् । त्वद्रीत्यापदद्वयलक्षणा
तःमद्रीत्याएकपदलक्षणायाज्यायस्त्वाच्च । किंच जहदजहल्लक्षणायांवाच्यांतर्गतत्वेनप्राक्धीस्थ
स्याप्यनंतरमनुपपत्तिदर्शनेनत्यक्तस्यपुनःस्वीकारः । जहल्लक्षणायांतु अधीस्थस्याप्यत्यक्तस्यैवस्वी
कारः त्यक्तस्वीकारादपिवरं अधीस्थस्वीकारः । एवंच । "एकस्यामुख्यवृत्त्यैवतत्त्वमित्यस्यसंभवे ।
भेदेनैवैक्यपरतानेकलक्षणयाकुतः" ॥ नचसदेवेत्यादिवाक्येलक्षणयाप्रकृतेशुद्धेप्रकृतवाचिनस्त
त्पदस्याऽभिधैवेतिवाच्यं । शुद्धस्यावाच्यत्वात् । तदित्येकपदलक्षणानिरासाय "तदैक्षत तत्तेजो
सृजते" त्याद्यनेकपदलक्षणायोगाच्च । यद्वा "सुपांसुलुगि" त्यादिसूत्रात्तृतीयाविभक्त्यादेर्लुक्प्र

तरंगिणी

तेनसिद्ध्यातत्कार्यकर्तृत्वादित्यर्थः ॥ त्यक्तस्यपुनरिति ॥ समुदायस्यसमुदाय्यनन्यत्वादितिभावः ॥ संख्यार्थत्वेनेति ॥
एकत्वादिसंख्यायाएवप्रथमादिविभक्त्यर्थत्वादितिभावः ॥ एकविभक्त्यस्वारस्यमिति ॥ तन्मतेतत्त्वमितिएकविभक्त्यंत
सामानाधिकरण्येनैवैक्यंबोध्यते । असीतिसामानाधिकरण्यलब्धाभेदानुवादकमित्यंगीकारात् । तत्रतदित्येकविभक्तेरेवास्वा
थमैकवचनादेशोवा । ततश्चतेनत्वंतिष्ठसीतिवा ततस्त्वंजातइतिवा तस्यत्वमितिवा तस्मिंस्त्वमि
तिवार्थः । "अनेनजीवेनात्मनानुप्रभूतःपेपीयमानोमोदमानस्तिष्ठति सन्मूलाःसोम्येमाःसर्वाःप्र
जा ऐतदात्म्यमिदंसर्व" मित्यादिवाक्यशेषात् । मीमांसकैः "उतयत्सुन्वंतिसामिधेनीस्तदन्वा
हु" रित्यत्रयत्रसुन्वंतितत्रहविर्धानेस्थित्वासामिधेनीरनुब्रूयादितिसप्तम्यर्थेप्रथमास्वीकाराच्च । न्या
य्यंचनिरवकाशप्रधानभूतानेकप्रातिपदिकस्वारस्यायसंख्यार्थत्वेनसावकाशाप्रधानैकविभक्त्यस्वार
स्यं । प्रोद्गातृणामित्यत्रतुविभक्त्यंतरेप्रथमैकवचनस्येवषष्ठीबहुवचनस्यान्यत्राविधानात् बहुवचना
नुसारेणप्रातिपदिकस्यप्रस्तोत्रादिच्छंदोगेषुलक्षणाश्रिता । दृष्टंच "प्रयाजशेषेणहवींष्यभिघारय
रस्यमस्तु । प्रातिपदिकापेक्षयाविभक्तेरप्रधानत्वादितिभावः ॥ ननुयदिप्रातिपदिकस्वारस्यायविभक्त्यस्वारस्यमंगीक्रियते त
र्हिप्रोद्गातृणामित्यत्रोद्गातुरेकत्वाद्बहुवचनानुपपत्तिमाशंक्यषष्ठीबहुवचनरूपविभक्तिस्वारस्यमंगीकृत्यतदर्थंउद्गातृप्रातिपदिकस्य
प्रस्तोत्रादिषुसामगानकर्तृषुलक्षणांगीकृता सानस्यादित्यतआह॥ प्रोद्गातृणामित्यत्रेति ॥ अस्माभिस्तदित्यत्रप्रथमाविभक्तेःतृ

SGDF
Sri Gangadharendra Digital Foundation

तीयाद्यर्थकत्वेनप्रथमाविभक्त्यस्वारस्यंप्रथमैकवचनस्य(सुपा)मितिविभक्त्यंतरेविधानादाश्रितं नहितद्वत्षष्ठीबहुवचनस्यएकव
चनादिरूपेविभक्त्यंतरेविधानमस्ति येनप्रातिपदिकस्वारस्यायविभक्त्यस्वारस्यमुच्यते अतस्तत्रविभक्तिस्वारस्यमंगीकृत्यप्राति
पदिकास्वारस्यमंगीकृतमित्यर्थः। छंदोगेषु अपसुब्रह्मण्येषु ॥ विभक्त्यस्वारस्यामिति ॥ तृतीयायाद्वितीयात्वेनविपरिणत
ती" त्यत्र प्रयाजशेषप्रातिपदिकस्वारस्यायप्रयाजशेषंहविःषुप्रक्षिपतीतिविभक्त्यस्वारस्यं । एवं
"चावकाशोज्झितानेकमुख्यनामानुसारतः । युक्तोऽतादृग्विभक्तेर्हिबाधःप्रायाजशेषवत्"। यद्वात
स्यत्वमित्यर्थैतत्त्वमितिसमस्तंपदं । यद्वाऐतदात्म्यमिदंसर्वंतत्सत्यंसआत्मातत्वमसीत्यत्रतदित्यने
ननात्मापरामृश्यते। किंत्वैतदात्म्यंनपुंसकलिंगत्वात् । ऐतदात्म्यमित्यस्यचैषचासावात्माचएत
दात्मातस्येदंऐतदात्म्यं। एतदीयंवस्तुत्वमसीत्यर्थः । परमतेहिएततत्सत्आत्मायस्यतदैतदात्म्य
मितिव्याख्यातत्वात्भावप्रत्ययोव्यर्थः। ततोवरमर्थांतराश्रयणं। विचित्राहितद्धितगतिरितिवच
नात्। "सस्रष्टाचैवसंहर्तानियंताराक्षिताहरिः। तेनव्याप्तमिदंसर्वमैतदात्म्यमतोविदु"रितिस्मृतेश्च।
केचित्तुशरीरवाचिनांदेवमनुष्यादिशब्दानांशरीरिपर्यंतत्वदर्शनात् । जीवस्यचतस्यात्माशरीरमि
त्वांगीकारादितिभावः। मुख्यनामानुसारतः मुख्यप्रातिपदिकानुसारतः । ननुकथंतदीयत्वरूपार्थांतराश्रयणंयुक्तं ऐतदात्म्य
मित्ययंष्यञ्प्रत्ययांतः ष्यञ्चस्वार्थेभावेवाविहितो नतदीयत्वरूपार्थइत्यतआह ॥ विचित्राहीति ॥ ईश्वरशरीरत्वादिति ॥

SGDF
Sri Gargeshwari Digital Foundation

तथाचतत्ब्रह्मत्वमित्युच्यतेत्वच्छरीरकत्वादित्यर्थः ॥ निर्देशइति ॥ ऐक्यनिर्देशइत्यर्थः ॥ याइंद्रकमंडलुस्थाइति ॥ इंद्रः
त्यादिश्रुत्येश्वरशरीरत्वात् तत्त्वमितिव्यपदेशःशरीरशरीरिभावनिबंधनइत्याहुः ।इतरेतुआदित्यो
ब्रह्मेत्यादिवत् जीवेब्रह्मत्वोपासनार्थस्तत्वमसीतिनिर्देशः नतुवस्तुतत्वनिष्ठइत्याहुः।यद्वासआत्मा
तत्वमसीत्यत्रयद्यपिद्वेधापदच्छेदःसंभवतितथापिशब्दोनित्यइत्यत्रानित्यघटदृष्टांतेनानित्य इति
च्छेदवत्अत्रापिभिन्नशकुनिसूत्रादिदृष्टांतैरतदितिच्छेदः । नहिआद्येखंडेसयथाशकुनिःसूत्रेणप्र
बद्धइत्युक्तयोःशकुनिसूत्रयोःषष्ठेलवणमेतदुदकइत्यादिनोक्तयोःलवणोदकयोःसप्तमेपुरुषंसोम्यगं
धारेभ्यइत्यादिनोक्तयोःपुरुषगंधारदेशयोःनवमेऽपहार्षीत्स्तेयमकार्षीदित्यादिनोक्तयोःस्तेनापहार्य
योश्चैक्यंस्तेनापहार्यदृष्टांतेहिस्पष्टऐक्यज्ञानिनोऽनर्थः । परकीयब्रह्मत्वाभिमानीहिस्तेनः ।
नतुविद्यमानब्रह्मत्वाज्ञानी । नचसत्यानृताभिसंधिमात्रमिहविवक्षितं । तथात्वेसत्यानृतवाक्दृष्टां
तेनपूर्तैरपहार्षीत्स्तेयमकार्षीदित्यपहारदृष्टांतायोगात् । आद्यखंडेसुषुप्तविषयेस्वमपीतोभवतीत्य
त्रब्रह्मणिस्वशब्दोनजीवाभेदाभिप्रायः ।"स्वातंत्र्यात्स्वइतिप्रोक्तआत्मायंचाततत्वतः । ब्रह्मायंगु
णपूर्णत्वात्भगवान्विष्णुरव्ययः"इतिश्रुतेः आत्मीयार्थत्वसंभवाच्च । अपीतोभवतीत्यस्यापितिरो
हितःसन्प्राप्तोभवतीत्येवार्थः । नत्वभिन्नइति । अपेरपिधानेइणश्चगतौनिष्ठायाश्चकर्तरिशक्तेःक्लृप्त

SGDF
Sri Gargeshwari Digital Foundation

नानात्ययानां

त्वादैक्ययेयोगरूढ्योरभावाच । ऐक्यार्थत्वेअपीतइत्यस्यभवतेश्चाकर्मकत्वेनश्रुतद्वितीयायोगाच । अश्रुततृतीयाकल्पनाप्रसंगाच । "खंकुलायंयथाऽपीतःपक्षीस्यादेवमीश्वरं । अप्येतिजीवःप्रस्वापे" इतिस्मृतेश्च । "यथास्मिन्नाकाशेश्येनोवासुपर्णोवाविपरिपत्यश्रांतःसंहत्यपक्षौसल्लयायैवध्रियते एवमेवायंपुरुष" इतिसुषुप्तिविषयश्रुत्यंतरेभिन्नश्येननीडदृष्टांतोक्तेश्च । "प्राज्ञेनात्मनासंपरिष्वक्त" इतिसुषुप्तौभेदश्रुतेश्च । त्वन्मतेपि भेदपरेण "सुषुप्त्युत्क्रांत्योर्भेदेन" तिसूत्रेणविरोधाच । त्वत्पक्षेपि जागरणइवसुषुप्तावप्याविद्यकजीवब्रह्मभेदस्यसत्त्वाच । नचद्वितीयखंडेना "नात्ययानांवृक्षाणांरसानां" इत्यादिनोक्तानांनानावृक्षरसानां । तृतीये "इमाःसोम्यनद्य" इत्यादिनोक्तयोर्नदीसमुद्रयोश्चैक्यंशंक्यं । नहिनानावृक्षरसाअन्योन्यंभेदत्यागेनप्राक्सिद्धेनमधुनैक्यमापद्यंते नवा प्राग्भेदभ्रांतिविषयाःपश्चात्तदविषयाः किंतुतंतवइवपटं अन्योन्यंभिन्नाएवप्रागसिद्धंमधूत्पादयंति नचेदंदार्ष्टांतिकानुगुणं । नदीसमुद्रदृष्टांतेपिकिंनदीसमुद्रावयविनोरैक्यं किंवातदवयवजलाणूनां उतद्रव्यांतरारंभः । नाद्यद्वितीयौ । माषराशौप्रक्षिप्तमाषतदवयवानामिव क्षीरेप्रक्षिप्तनीरतदवयवानामिवचान्योन्यंमिश्रीभावेपिप्राग्भिन्नानांपश्चादप्यैक्यायोगात् "ताएवापोददौतस्यसमुनिःसंशितव्रत" इतिकौर्मेयाइंद्रकमंडलुस्थाआपः स्वकमंडलौनिक्षिप्तास्ताएववसिष्ठोदत्तवानित्यु

सजलेवशिष्टकमंडुलौस्वकमंडलुजलंउत्तरत्रपरीक्षार्थंस्थापयित्वासुदासस्यराज्ञोयज्ञंप्रतिगत्वापुनरागत्यवशिष्टंप्रतिपरीक्षार्थंस्वजक्तेश्च । सप्तनदीनांमिश्रीभूतानामपिपुनर्वि(यु)भज्यसमुद्रगमनदर्शनाच "यथोदकंशुद्धेशुद्धमासिक्तंतादृगेवभवती" तिसावधारणश्रुतिविरोधाच । "उदकंतूदकेसिक्तंमिश्रमेवयथाभवेत् । नचैतदेवभवतियतोवृद्धिःप्रदृश्यत" इति सयुक्तिकस्मृतिविरोधाच । समुद्रेतुमहत्त्वाद्वृद्ध्यदर्शनं । पूतापूतयोःशीतोष्णयोर्मधुरलवणयोर्जलयोर्मेलने उभयगुणदर्शनाच । "ताःसमुद्रात्समुद्रमेवापियंती" ति अवधित्वादिनिर्देशायोगाच । वाचस्पतिनापि "अवस्थितेरितिकाशकृत्स्न" इतिसूत्रे नदीसमुद्राभेदस्यनिरस्तत्वाच । भेदाज्ञानंतुक्षीरनीरयोरिवव्यामिश्रीभूतस्वर्णताम्रादेरिवचमिश्रीभावाद्युक्तं । अंत्येनकस्यापिकेनाप्यैक्यं दार्ष्टांतिकानानुगुण्यंच । "ताःसमुद्रात्समुद्रमेवापियंति ससमुद्रएवभवती" त्यत्रापिप्रकृतनदीरुद्दिश्यसमुद्रभवनविधानेतंडुलाओदनंभवंतीतिवत्ताः समुद्रएवभवंतीतिस्यात् । अतोनद्यःनियतजलराशिरूपात्स्वातरूपाद्वादेवतारूपाद्वासमुद्राद्गच्छंतितंप्रविशंतिच समुद्रस्तुसएव नैतासांसमुद्रत्वमितिवाससमुद्रएवनतुनदीत्वंप्राप्नोतीतिवार्थः । तस्मात्सतोप्यन्योन्यंभेदस्याज्ञानएवइमौदृष्टांतौ । अतएवनानारसवाक्येदार्ष्टांतिके "एवमेवखलंययाचे वशिष्टस्तज्ज्ञात्वाताएवापइंद्रायददावित्यर्थः ॥ सप्तनदीनांमिश्रीभूतानामिति ॥ कृष्णवेणीतुंगभद्राभीमरथीम

SGDF Foundation

लुसोम्येमाःसर्वाःप्रजाःसतिसंपद्यनविदुःसतिसंपत्स्यामहेइति तइहव्याघ्रोवे” ति नदीसमुद्रवा
क्येचदार्ष्टांतिके “सतआगम्यनविदुःसतआगच्छामहइति तइहव्याघ्रोवे” तिसतोभेदस्याज्ञाने
नैवानर्थउक्तः । नहिगृहेप्रविष्टस्यगृहादागतस्यवातदैक्यं । तस्माद्दृष्टांतानुसारेणातत्वमसीतिच्छे
दोयुक्तः । तथाचश्रुत्यंतरं । “यथापक्षीचसूत्रंचनानावृक्षरसायथा । यथानद्यःसमुद्रश्चशुद्धोदलव
णेयथा ॥ १ ॥ यथास्तेनापहार्यौचयथापुंविषयावपि । तथाजीवेश्वरौभिन्नौसर्वदैवविलक्षणावि
ति ॥ २ ॥” किंचाद्येखंडे “स्वप्नांतंमेसोम्यविजानीही” तिस्वातंत्र्यशंकानास्पदसुषुप्तिनिदर्शनेन
चतुर्थेच “अस्ययदेकांशाखांजीवोजहाती” त्यादिना अन्वयव्यतिरेकोक्त्याअष्टमेच “पुरुषंसोम्यो
पतापिन” मित्यादिनास्वातंत्र्यशंकानास्पदमरणनिदर्शनेनेश्वराधीनत्वस्योक्तत्वादतदित्येवच्छेदोयु
क्तः । एवंच “वाक्यशेषानुसारेणमुख्यार्थस्यैवसंभवे । तद्विरुद्धानेकपदलक्षणानैवयुज्यते” ॥ च
तुर्थखंडे “अनेनजीवेनात्मनानुप्रभूतःपेपीयमानोमोदमानस्तिष्ठती” त्यत्रचजीवशब्दईश्वरपरः ।
मोदमानइतिसंसारिणःपृथगुक्तेः । “एतस्यैवसोम्यैषोणिम्नएवंमहान्यग्रोधस्तिष्ठती” त्यत्राणिमश
ब्दःपरमसूक्ष्मेश्वरपरः । “सएषोणिमाऐतदात्म्यमिदंसर्वं” मिति इहैवश्रुतावीश्वरेतस्यप्रयोगात्
नतुपररीत्याधानापरः । “तासांकिमत्रपश्यसी” ति अण्व्यइवेमाधानाभगवइतिभावप्रत्ययरहि

तेनस्त्रीलिंगेनबहुवचनांतेनेवशब्दशिरस्केनचाणुशब्देननिर्दिष्टतयातद्विपरीताणिमशब्दानर्हत्वात्
ननिभालयसइत्युक्ताद्दृश्यत्वायोगाच्च । यदिचाष्टमेविदुषोब्रह्मप्राप्तिमात्रंविवक्षितं तदातस्यवाङ्म
नसिसंपद्यतइत्यादि तेजःपरस्यांदेवतायामित्यंतमेववाक्यंस्यात् । “तस्ययावन्नवाङ्मनसिसंपद्यत”
इत्यादिव्यर्थं स्मृतिश्च “यदाप्राणान्ददातीशस्तदाचेतनकोखिलं । जानातिग्रस्तकरणस्तेनवेत्तिन
किंचने”ति ॥ सआत्मेत्यत्रचसःअणिमशब्दोक्तईश्वरः आत्माआततइत्येवार्थः नतुजीवात्मेति ।
“यदाप्नोतियदादत्तेयच्चात्तिविषयानिह । यच्चास्यसंततोभावस्तेनात्मेतिहिभण्यत” इति भारतो
क्तेः । “नानुमानमतच्छब्दात् प्राणभृच्चे” तिसूत्रे “तमेवैकंजानथात्मान” मितिवाक्योक्तोनजीवः
तद्वाचिशब्दाभावादितित्वयापिसिद्धांतितत्वेनात्मशब्दस्यजीवेष्वमुख्यत्वाच्च । “सइमास्तिस्रो
देवताअनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरोदि” त्यत्रापि जीवशब्देनेश्वरउच्यते नतुसंसा
री “जीवइतिभगवतोनिरुद्धस्याख्ये” तिश्रुतेः “विष्णुर्जीवइतिप्रोक्तःसततंप्राणधारणादि” ति
स्मृतेश्च । जीवेपियोगसंभवेनरूढिकल्पकाभावाच्च । “अहंहिजीवसंज्ञोवैमयिजीवःसमाहित” इ
तिमोक्षधर्मेभगवद्वचनाच्च । प्राणधारकत्वरूपनिमित्तस्येश्वरएवमुख्यत्वाच्च संसारिणस्त्रिवृत्करण
पूर्वकंनामरूपात्मकप्रपंचकर्तृत्वायोगाच्च । तेजोबन्नानां “तत्तेजऐक्षत ताआपऐक्षंत इमास्तिस्रोदे

SGDF
Digital Foundation

लापहाभवनाशिनीतिसप्तनदीनानिवृत्तसंगमेमिश्रीभूयोत्तरत्रगतानांपुनर्वियुज्यप्रत्येकंप्रत्येकंसमुद्रगमनदर्शनादित्यर्थः ॥ छ ॥
वता" इतिपूर्वमेवचेतनत्वसिद्ध्यापुनर्जीवप्रवेशोक्त्ययोगाच । एकमेवाद्वितीयमित्युपक्रमः । एक
विज्ञानेनसर्वविज्ञानंचप्रागेवव्याख्याते । नचैक्याप्रसक्तेरतत्त्वमसीतिनिषेधायोगः । "इष्टापूर्तंम
न्यमानावरिष्ठ" मित्यादाविव श्रुतितात्पर्यापरिज्ञानेनवा "तद्धैकआहुरसदेवेदमग्रआसी" दित्या
दाविवानादिकुसमयेनवादेहेंद्रियादीन्प्रतिस्वातंत्र्यरूपस्येश्वरलक्षणस्य सर्वैरपिआत्मन्यभिमन्य
मानत्वेनप्रत्यक्षेणवाप्रसक्तस्यैक्यस्य निषेधोपपत्तेः । एवंच "एकमेवाद्वितीय" मितिसमाभ्यधिक
राहित्यस्योपक्रमात् । ऐतदात्म्यमितितस्यैवोपसंहारात् अतत्वमसीतिनवकृत्वोभ्यासात् शास्त्रं
विनाशास्त्रैकगम्येश्वरभेदस्याप्रसक्त्या अपूर्वत्वात् । अथसंपत्स्यतइतिफलश्रवणात् येनाश्रुतंश्रुतं
भवतीत्याद्यर्थवादात् शकुनिसूत्रादिदृष्टांतैरुपपादनात् षड्विधतात्पर्यलिंगानिभेदपराण्येवेति॥छ॥
तत्त्वमसिवाक्यार्थः ॥ २८ ॥ एतेनाहंब्रह्मास्मीत्याद्यपिव्याख्यातं । उक्तरीत्याएकपदलक्षणयाब्र
ह्मसाहचर्यादिनाजीवेब्रह्मेतिव्यपदेशस्यवासादेश्यादिनाब्रह्मण्यहमितिव्यपदेशस्यवोपपत्तौपदद्व
यलक्षणयैक्यपरत्वायोगात् । किंचाहंशब्दोजीवांतर्यामिणिमुख्यः । "सर्वांतर्यामिकोविष्णुःस
तत्वमसिवाक्यार्थविवरणं ॥ २८ ॥ किंचात्रवाक्यइति ॥ बृहदारण्यकवाक्यइत्यर्थः ॥ यस्ययेनेति ॥ यस्ययेनार्थसं

SGDF
Sri Gargeshwari Digital Foundation

र्वनाम्नाऽभिधीयते । एषोहंत्वमसौचेतिनतुसर्वस्वरूपत” इत्यादिस्मृतेः “अहंमनुरभवंसूर्यश्चे”त्यं तर्यामिणिअहंशब्दप्रयोगाच्च। नहित्वत्पक्षेपिविशिष्टचैतन्यरूपोवामदेवोविशिष्टचैतन्यरूपमनुसू र्यादिर्भवति।अहंमन्वादिशब्दैश्चिन्मात्रलक्षणायांचोत्तमपुरुषायोगः“अहंभूमिमददामार्याये” त्या द्ययोगश्च । नहिचिन्मात्रंभूमिमदात् । भगवान्विष्णुर्हीद्रायभूमिमदात् तस्मादहंनामाभवत्तस्यो पनिषदहमिति । “अहंनामाहरिर्नित्यमहेयत्वात्प्रकीर्तित” इत्यादिश्रुतेश्च । श्रुत्यंतरे “अहंतत्तेजो रश्मीन्नारायणंपुरुषंजातमग्रतः । तमिममहंविजानाती” ति अहेयेअहंशब्दप्रयोगाच्च । अन्यथा अहंविजानामीतिस्यात् । ततश्चांतर्याम्यैक्यमेवात्रोच्यते । उक्ताचांतर्यामिणिनियम्यानंत्यादिना भेदप्रसक्तिः । तथाचश्रुत्यंतरं “सयश्चायंपुरुषेयश्चासावादित्येसएक” इति । अन्यथा “यएषआ दित्येपुरुषोदृश्यतेसोऽहमस्मी” तिछांदोग्ये “सएनान्ब्रह्मगमयती” तिभेदपरोत्तरवाक्यविरो धः । किंच “सयएतमेवंविद्वानुपास्त” इत्युत्तरवाक्येउपास्तिश्रवणात्त्वन्मतेचोपास्यस्यारोपित त्वान्नानेनैक्यसिद्धिः । “योसावसौपुरुषःसोहमस्मिवायु” रितीशावास्येच “वायुरनिलममृतमथे दंभस्मांतंशरीर” मित्युत्तरवाक्यविरोधः । नहिशरीरादेरपिजीवैक्यं । “अग्नेनयसुपथारायेअ स्मानि” त्यादिभेदपरोत्तरवाक्यविरोधश्च । “तद्योहंसोसौयोसौसोह” मित्यैतरेयेच “चक्षुर्मित्र

SGDF
Sri Gargeshwari Digital Foundation

स्यवरुणस्याग्ने" रितिभेदपरोत्तरमंत्रविरोधः । "ब्रह्मवाइदमग्रआसीत्तदात्मानमेवावेदहंब्रह्मा
स्मी" तिबृहदारण्यकेच "तद्योयोदेवानांप्रत्यबुध्यततथाऋषीणांतथामनुष्याणा" मितिभेदपरवा
क्यशेषविरोधः । किंचात्रवाक्येब्रह्मणएवप्रकृतत्वात्नानेनजीवब्रह्मैक्यसिद्धिः । "यएवंवेदाहं
ब्रह्मास्मी" त्युत्तरवाक्येत्वितिशब्दयोगात् त्वन्मतेचेतिशब्दयुक्ताना "मादित्योब्रह्मे" त्यादीना
मुपासनार्थत्वात् । "अथयोऽन्यांदेवतामुपास्त" इत्युत्तरवाक्येउपास्तिश्रवणाच्चनानेनैक्यसिद्धिः।
यद्वात्रब्रह्मशब्दोबृंहणार्थइति नपरब्रह्मैक्यसिद्धिः । अन्यथापूर्ववाक्ये "आत्मानमेवावेदि" त्यने
नैवब्रह्मेतिज्ञानस्यसिद्धत्वात्ब्रह्मास्मीतिव्यर्थं । एतेना "हंहरिःसर्वमिदंजनार्दन" इत्यादिस्मृतयो
पिव्याख्याताः । "अथयोन्यांदेवतामुपास्तेअन्योसावन्योहमस्मीतिनसवेदयथापशु" रित्यत्राप्यं
तर्यामिभेदज्ञानीनिंद्यते । अन्यथापदद्वयादिलक्षणादिदोषात् । यद्वायोन्योजीवःअन्यांविलक्षणां
देवतामुपास्ते । किमिति । अन्योसौपरमात्माअहमस्मीतिनसवेदयथापशुरित्यर्थः । अन्यथाहमर्थ
स्यापिविशेष्यत्वेदेवतामुपास्तइत्ययुक्तं । नचव्यवहितान्वयदोषः । यस्ययेनार्थसंबंधइतिन्याये
नसन्निधानाद्योग्यतायाःप्रबलत्वात् । अथवास्वातंत्र्येणाऽन्यसद्भावनिषेधायश्रुतिस्त्वियं । "अ
न्योसावन्योहमस्मीतिपश्यन्नज्ञइतिस्मह । आहतद्ब्रह्मणोधीनाभिन्नाजीवास्तुसर्वश" इत्यादिस्मृ

SGDF
Sri Gargeshwari Digital Foundation

तेःस्वातंत्र्यज्ञानीपशुरित्यर्थः । केचित्तूपास्तइत्यादिश्रवणात्पुंप्रयत्नसाध्यज्ञानविजातीयवृत्त्यंतररू
पोपासनायाएवनिषेधः नतुज्ञानस्येत्याहुः । "सयोहवैतत्परमंब्रह्मवेदब्रह्मैवभवती" त्यत्रापिद्वितीयोब्रह्मशब्दोजीवपरः । बृहजातिजीवकमलासनशब्दराशिष्विति वचनात् । "ब्रह्माणिजीवाःसर्वेपी" त्यादिस्मृतेश्च । "द्वेब्रह्मणीवेदितव्ये" इत्यादौजीवेतत्प्रयोगाच्च । तथाचयःपरमंब्रह्मवेदसजीवएवभवति नतुपरंब्रह्मेत्यर्थः । अतएवाद्योब्रह्मशब्दःपरमत्वेनविशेषितः । यद्वाब्रह्मभवतिबृंहितत्वरूपब्रह्मत्वाक्रांतोभवतीत्यर्थः । "संपूज्यब्राह्मणंभक्त्याशूद्रोपिब्राह्मणोभवे" दितिवत् । नहिशूद्रःस्वपूज्यब्राह्मणव्यक्तिरेवभवति किंतुब्राह्मणत्वजात्याक्रांतः । ब्रह्मण्यपिब्रह्मशब्दस्यबृंहणार्थत्वात् "ब्रह्मत्वंबृंहितत्वंस्याज्जीवानांनपरात्मते" तिस्मृतेश्च । "अस्यमहिमानमितिवीतशोक" इतिवाक्यशेषाच्च । अन्यथापूर्वत्र "यथानद्यःस्यंदमाना" इतिभिन्ननदीसमुद्रदृष्टांतोक्तिः "परात्परंपुरुषमुपैतिदिव्य" मितिब्रह्मप्राप्त्युक्तिश्चायुक्तास्यात् । किंचत्वत्पक्षेनित्यंब्रह्मभूतस्यापूर्वब्रह्मभावोक्तिरयुक्ता । आरोपनिवृत्तेःसाध्यत्वेप्यशाब्दत्वात् "ब्रह्मैवसन्ब्रह्माप्येती" त्यत्रापि जीवएवसन्ब्रह्मप्राप्नोतीतिकर्तृकर्मभावेनभेदएवोच्यते । "कर्माणिविज्ञानमयश्चआत्मापरेऽव्ययेसर्वएकीभवंती" त्यत्रापि एकीभावःस्थानैक्यंमत्यैक्यंसादृश्यंवा नस्वरूपैक्यं । "अविरोधश्चसादृश्यमे

SGDF
Sri Gargeshwari Digital Foundation

कदेशस्थितिस्तथा । एकीभाव(स्त्रिधा)स्तथाप्रोक्तोनैकीभावःस्वरूपयो" रितिवचनात् । "अहीत स्ततोगतागावःसायंगोष्ठेएकीभवंति एकीभूतान्नृपाःसर्वैवभृषुःपांडवंशरैः" "अस्मिन्ग्रामेमहाजना एकीभूताः" "कीटोभ्रमरेणैकीभूत" इत्यादौप्रयोगाच्च । त्वत्पक्षेऐक्यस्यप्रागेवसिद्धत्वादभूततद्भावा र्थच्विप्रत्ययबाधः । तथासकृत्प्रयुक्तस्यैकीभवंतीत्यस्यकर्मसुनिवृत्तिरर्थः विज्ञानात्मन्यैक्यमर्थइति अनेकार्थत्वं । तथा "परेऽव्यय" इति श्रुतसप्तमीहानिः अश्रुततृतीयाकल्पनापत्तिः । तथा "निरं जनःपरमंसाम्यमुपैती" तिपूर्ववाक्येन "परात्परंपुरुषमुपैतिदिव्यमि" त्युत्तरवाक्येनचविरोधः स्यात् । नाप्यंतर्यामिप्रकरणस्थं "नान्योतोस्तिद्रष्टे" तिवाक्यंअक्षरप्रकरणस्थं "नान्यदतोस्तिद्र ष्ट्रि" तिवाक्यंचैक्येमानं । अतइत्यनेनप्रस्तुतंसर्वनियंतारंपरामृश्यान्योद्रष्टानास्तीत्युक्ते अस्मि न्ग्रामेअयमेवसर्वनियोजकःनान्यःपुरुषोऽस्तीत्यादावन्यशब्दस्य प्रस्तुतसदृशान्यपरतयाव्युत्पन्नत्वे नेहापिसर्वनियामकद्रष्ट्रंतरनिषेधात् । उक्तंहि समानमितरच्छयेनेनेत्यत्रइतरशब्दस्यपूर्वनिर्दिष्टस दृशपरत्वं । एवंच "कंदर्पःसुंदरोलोकेनान्योस्तीहपुमानि" त्युक्तेकंदर्पतोन्यः किंपुमान्नेतिप्रतीयते किंतुकंदर्पसदृशःसुंदरोनेतिभासते । एवंपरात्मसदृशद्रष्ट्रभावोत्रभासते । अन्यथाअंतर्यामिवा क्ये "यआत्मनोंतरः यमात्मानवेद यस्यात्माशरीरं यआत्मानमंतरोयमयती" तिपूर्ववाक्येन "ए

षतआत्मांतर्याम्यमृतः अतोन्यदार्त" मित्युत्तरवाक्येनचविरोधः । तत्रपरमात्मनोन्यंचेतनमंगी कृत्यतस्यार्तियुक्तत्वेनास्वातंत्र्यस्यैवोक्तेः । अक्षरवाक्येच "एतस्यवाअक्षरस्यप्रशासनेगार्गिसूर्या चंद्रमसौविधृतौतिष्ठत" इत्यादिपूर्ववाक्येनविरोधःस्यात् द्वितीयाद्वैभयंभवतीत्यस्यापिविरोधिनः समानाद्भयंभवतीत्येवार्थः लोकेतादृशादेवभयदर्शनात् । अस्यचलोकसिद्धानुवादित्वात् । "समा नाद्धिभयंभवे" दितिस्मृतेश्च । पूर्वत्र "तस्मादेकाकीबिभेती" ति उत्तरत्रच "तस्मादेकाकीनरम त" इतिश्रवणाच्च । "यदाह्येवैषएतस्मिन्नुदरमंतरंकुरुत" इत्यत्रापि एतस्मिन्निति विशेषणात्स्वगत स्यैवभेदस्यनिषेधः । एवं "एकोदेवःसर्वभूतेषुगूढ" इत्यादिश्रुतिः । "एकएवहिभूतात्माभूतेभूते व्यवस्थित" इतिस्मृतिश्चांतर्याम्यैक्यपरा । भूतशब्दस्य "यतोवाइमानिभूतानिजायंते यत्प्रयंत्य भिसंविशंती" त्यादाविवचेतनपरत्वात् । "यावन्मोक्षंतुभेदःस्याज्जीवस्यपरमस्यच । ततःपरंनभे दोऽस्तिभेदहेतोरभावतः । विभेदजनकेऽज्ञानेनाशमात्यंतिकंगते । आत्मनोब्रह्मणोभेदमसंतंकः करिष्यती" त्यादिस्मृतिष्वपि भेदशब्दोमित्रभेदइत्यादाविववैमत्यार्थः । "जीवस्यपरमैक्यंतुबुद्धि सारूप्यमेवचे" त्यादिस्मृतेः । जीवस्यहिआमोक्षमीश्वरकामविरुद्धकामिता नतुमोक्षे । अतएवमु क्तःसत्यकामः । असंतमभद्रमित्यर्थः । "क्षेत्रज्ञंचापिमांविद्धिसर्वक्षेत्रेषुभारते" त्यस्यापि क्षेत्रज्ञं

SGDF
Sri Gangadharan Digital Foundation

बंधोदूरस्थेनापितेनसः । ग्राह्यइतिवचनादित्यर्थः ॥ इतिश्रवणादिति ॥ उपास्तइतिपुंप्रयत्नसाध्यत्वश्रवणात्ज्ञानस्यचातथा
त्वात्उपासनायाएवतथात्वादितिभावः ॥ सर्वक्षेत्रेष्वपिविद्धीति ॥ सर्वत्रममसत्वाच्चेतनाचेतनात्मकेषुप्रतिमात्वेनमच्छरी
रभूतेषुस्थितंविद्धीत्यर्थः । चेतनाचेतनात्मकस्यप्रपंचस्यक्षेत्रत्वंकुतइत्यतआह ॥ तत्रैवेति ॥ गीतायामेवेत्यर्थः । तथापितस्य

सर्वज्ञंमांसर्वक्षेत्रेष्वपिविद्धीत्यर्थः । तत्रैव । "इदंशरीरंकौंतेयक्षेत्रमित्यभिधीयते । एतद्यो
वेत्तितंप्राहुःक्षेत्रज्ञइतितद्विदः । तत्क्षेत्रंयच्चयादृक्कतत्समासेनमेशृणिव"त्युक्त्वा "महाभू
तान्याहंकारोबुद्धिरव्यक्तमेवच । इंद्रियाणिदशैकंचपंचचेंद्रियगोचरा" इत्याद्युक्त्वा "एत
त्क्षेत्रंसमासेनसविकारमुदाहृत" मित्यनेन "यस्यपृथिवीशरीर" मितिश्रुत्याईश्वरशरीरत
योक्तंचेतनाचेतनात्मकंसर्वक्षेत्रमित्युक्तत्वात् । मोक्षधर्मे "क्षेत्राणिचशरीराणिबीजानि
चशुभाशुभे । तानिवेत्तिसयोगात्माततःक्षेत्रज्ञउच्यते" इति । "प्रकृतेश्चविकाराणांद्रष्टा
रमगुणान्वितं । क्षेत्रज्ञमाहुर्जीवंतुकर्तारंगुणसंवृत" मितिचोक्तेः । नचैवंरूढार्थत्यागः ।

शरीरत्वंकुतइत्यतउक्तं ॥ यस्यपृथिवीति ॥ तानिवेत्तीति ॥ यतइतिशेषः । यतोवेत्तिततःसंयोगात्माज्ञानरूपोभगवान्क्षे
त्रज्ञउच्यतइत्यर्थः ॥ रूढार्थेति ॥ (क्षेत्रज्ञआत्मापुरुष)इत्यभिधानेनक्षेत्रज्ञशब्दस्यजीवेरूढत्वादित्यर्थः । योगरूढ्योश्चरूढेरेव

SGDF
Sri Gargeshwari Digital Foundation

प्रबलत्वादित्यर्थः । जीवेपिनरूढः किंतुयौगिकएवेत्याह ॥ जीवेपीति ॥ ननूभयत्रापियौगिकत्वाविशेषाज्जीवःकुतोनगृह्यत इत्यतआह ॥ शास्त्रस्थावेतिन्यायाचेति ॥ प्रकृतेक्षेत्राणिचशरीराणीतिमोक्षधर्माख्यशास्त्रेणक्षेत्रज्ञशब्दस्यईश्वरेप्रसिद्धत्वा त्सएवग्राह्यइतिभावः ॥ ७ ॥ अहंब्रह्मास्मीतिश्रुत्यर्थविवरणं ॥ २९ ॥ जातिरूपत्वेविरोधादिति ॥ आत्मत्वस्यजाति

जीवेपिक्षेत्रज्ञशब्दस्ययौगिकत्वात् शास्त्रस्थावेतिन्यायाच्च । एवमन्यान्यपिवाक्यानियोज्यानि । तस्मान्नागमऐक्येप्रमाणं ॥ ७ ॥ अहंब्रह्मास्मीत्यादिश्रुत्यर्थः ॥ २९ ॥ नाप्यनुमानं । जीवाःपर मात्मनस्तत्वतोनभिद्यंते आत्मत्वात्परमात्मवदित्यत्रत्वात्मत्वस्यज्ञातृत्वादिरूपत्वेतवाऽसिद्धेः । अवेद्यत्वादिरूपत्वेममासिद्धेः । जातिरूपत्वेविरोधात् । अबाध्यत्वादिरूपत्वेनैकांत्यात् । विस्तृ तंचैतज्जडत्वभंगे । जीवाःपरमात्मनोव्यवहारतोपिनभिद्यंतेआत्मत्वात्परमात्मवदित्याद्याभा ससाम्याच्च । विमताजीवाश्चैत्रात्तत्त्वतोनभिद्यंते । जीवत्वात् चैत्रवत् । विमतंवस्तुतोब्रह्मतो नभिन्नंवस्तुत्वाद्ब्रह्मवदित्यत्रापिचैत्राद्व्यवहारतोपि नभिद्यंते जीवत्वाच्चैत्रवदित्याभाससाम्यात् ।

रूपत्वेतस्याश्रयीभूततात्विकात्मव्यक्तिनानात्वसापेक्षत्वेनउक्तसाध्याभावेनैवव्याप्त्याविरुद्धत्वादित्यर्थः ॥ अबाध्यत्वादिरूप त्वेऽनैकांत्यादिति ॥ अभाववद्द्वैतमस्तीतिमतेद्वितीयाभावेव्यभिचारः अबाध्यत्वरूपात्मत्वस्यतत्रसत्वेपिपरमात्मनस्तत्वतोभेद

SGDF
Sri Gargeshwari Digital Foundation

स्यैवसद्भावादित्यर्थः । तद्भेदस्याताात्विकत्वेचतन्निवृत्तौद्वितीयाभावब्रह्मणोरैक्यापत्तिः साचनयुक्ता भावाभावयोर्विरुद्धरूपयो रैक्यायोगादितिभावइतिसंप्रदायः । विमतानिशरीराणिमद्भोगायतनानिच । शरीरत्वादितिभगवत्पादैर्भोगायतनत्वेनाभेदसा धकानुमानमनूदितमस्ति तदेवकुतोनूदितं चैत्राधिष्ठानत्वंवाचैत्रेणैवाधिष्ठितत्वंवाकस्मान्नानुवदितव्यमित्यतस्तत्रकृत्यप्रदर्श नाभिप्रायेणपरिशेषमाह ॥ विमतानीत्यादिना ॥ अन्याधिष्ठितेति ॥ ग्रहवदितिशेषः ॥ ईश्वरस्यापीति ॥ अंतर्यामि

विमतानिशरीराणिचैत्राधिष्ठितानि शरीरत्वाचैत्रशरीरवदित्यत्रचैत्राधिष्ठितत्वे प्यन्याधिष्ठितत्वसंभवेनैक्यासिद्धेः । चैत्रेणैवाधिष्ठितानीत्युक्तौत्वीश्वरस्यापि चै त्रशरीराधिष्ठातृत्वेनदृष्टांतस्यसाध्यवैकल्यात् । चैत्रस्यैवभोगायतनानीत्युक्तौ चत्वन्मतेयस्यभोक्तृत्वं अंतःकरणविशिष्टस्यतस्यप्रतिशरीरंभेदः यस्यचैक्यंशुद्ध चैतन्यस्यतस्याभोक्तृत्वमितिबाधात् । विमतानिशरीराणि चैत्रमनसैवयुक्तानि

त्वादितिभावः । अत्रचैत्रशब्देनविशिष्टचैतन्यंविवक्षितंशुद्धचैतन्यंवा । नाद्यइत्याह ॥ यस्येति ॥ यस्यांतःकरणविशिष्टस्यभो क्तृत्वं अंगीकृतमितिशेषः ॥ भेदइति ॥ तथाचतस्यभोगायतनत्वेनैक्यसाधनेबाधइत्यर्थः । नद्वितीयइत्याह ॥ यस्यचेति ॥ अभोक्तृत्वमंगीकृतमितिशेषः । तथाचतस्यभोगायतनत्वेनैक्यसाधनंकार्यं तथाचतत्रैक्यसंभवेपितस्याभोक्तृत्वेनतस्यभोगायत ॥ ६०३ ॥

नानीत्युक्तेबाधइत्यर्थः ॥ इत्याद्याभासेति ॥ मनसामप्यभेदःसिध्येदितिभावः ॥ द्रव्यत्वेत्यादि ॥ स्वाभाविकभेदवान्नभ

शरीरत्वाचैत्रशरीरवदित्याद्याभाससाम्याच । आत्माद्रव्यत्वातिरिक्तपरजात्यानानानभवति वि भुत्वात् गगनवदित्यत्रत्वन्मते गगनस्यप्रतिकल्पंभेदेनसाध्यवैकल्यात् । परिच्छिन्नत्वेनसाधनवै कल्याच । आत्मत्वस्यपरमाणुत्ववदजातित्वेप्यात्मभेदासिद्ध्यार्थांतरत्वाच । विमतोभेदोमिथ्या एकस्यांदृशिकल्पितोवा भेदत्वात् दृश्यत्वाच चंद्रभेदवत् एकस्यांदृशिक्षणिकवादिकल्पितभेदव द्वेत्यत्रतूक्तरीत्यामिथ्यात्वानिरुक्तेःसत्यासत्यभेदानुगतभेदत्वसामान्यस्यासिद्धेश्च । चंद्रस्यकल्पि ताद्वितीयचंद्राद्भेदस्यसत्यत्वेन दृष्टांतस्यसाध्यवैकल्याच मुक्तेःसंसाराद्ब्रह्मणोनृतादात्मनोदेहाद्भे देचव्यभिचाराच । अभेदोमिथ्याअभेदत्वात् देहात्माभेदवदित्याभाससाम्याच । दृश्यत्वादेर्निर स्तत्वाच । विमताभेदप्रतीतिः भ्रांतिः भेदप्रतीतित्वात् चंद्रभेदप्रतीतिवदित्यत्र ब्रह्मणोऽनृताद्भे दप्रतीतौव्यभिचारात् आभाससाम्याच । "विमतंतत्वतःस्वांतभेदहीनंमतत्वतः । यदित्थंतत्त थायद्वत्स्वंतथेदंततस्तथे" त्यत्रत्वन्मतेगगनस्यसावयवत्वात् संयोगित्वेनसांशत्वस्यसुसाधत्वाच

वतीतियावत् ॥ परिच्छिन्नत्वेनेति ॥ गगनस्यपरिच्छिन्नत्वेनविभुत्वाभावादित्यर्थः । आकाशद्वैतस्यत्वयानंगीकारादितिभावः ।

SGDF Sri Gangadhar Digital Foundation

भेदत्वहेतौचंद्रभेदोदृष्टांतः दृश्यत्वहेतौतुद्वितीयइतिविवेकः ॥ विमतइति ॥ विमतस्यघटपटभेदस्यस्वसमानाधिकरणात्यं ताभावप्रतियोगित्वेसाध्येऽव्याप्यवृत्तित्वमादायार्थांतरतास्यान्नतुमिथ्यात्वमित्यतोऽव्याप्यवृत्तिधर्मेत्यादिपक्षविशेषणं। तत्रप्रति योगितावच्छेदकस्यघटत्वादेर्व्याप्यवृत्तित्वेनाव्याप्यवृत्तित्वाभावात्तद्भेदेउक्तंपक्षविशेषणमस्तीत्यर्थः । एतादृशेभेदेउक्तसाध्यंप र्यवस्यत्मिथ्यात्वमादायैवपर्यवस्यतीतिध्येयं ॥ संयुक्तेति ॥ संयुक्तवृक्षप्रतियोगिकोभेदोवृक्षएवास्ति वृक्षःसंयोगवान्नेतिप्रती

साध्यवैकल्यात् । संवित्स्वांतर्गणिकस्वाभाविकभेदहीना उपाधिभेदमंतरेणाविभाव्य मानभेदत्वात् गगनवदित्यत्रसाध्यवैकल्यात् । इच्छादेरपिघटेच्छापटेच्छेत्युपाधिभे देनैवविभाव्यमानभेदत्वेनव्यभिचाराच्च । विमतःअव्याप्यवृत्तिधर्मा(द)वच्छिन्नप्रतियो गिताकोभेदःस्वसमानाधिकरणात्यंताभावप्रतियोगी भेदत्वात् संयुक्तप्रतियोगिता कभेदवदित्यत्राव्याप्यवृत्तिशब्देनस्वसमानाधिकरणात्यंताभावप्रतियोग्युक्तौबाधात् ।

तेस्तार्किकैरंगीकारात् । तत्रभेदसमानाधिकरणोयोऽत्यंताभावःप्रतियोगितावच्छेदकीभूतःसंयोगएव अन्योन्याभावप्रतियोगि कात्यंताभावस्यप्रतियोगितावच्छेदकरूपत्वेनसंयोगवतिवृक्षेतद्वदन्योन्याभावस्यापिसत्वात् एवंचतत्प्रतियोगित्वंभेदेऽस्तीति द्रष्टव्यं ॥ अव्याप्यवृत्तिशब्देनेति ॥ अव्याप्यवृत्तिधर्मानवच्छिन्नेत्यत्राव्याप्यवृत्तिशब्देनेत्यर्थः । अव्याप्यवृत्तित्वंचस

SGDF
Sri Gargeshwari Digital Foundation

मानाधिकरणात्यंताभावप्रतियोगित्वं । एवंचस्वसमानाधिकरणात्यंताभावाप्रतियोगिघटत्वाद्यवच्छिन्नप्रतियोगिताकोभेदःस्व समानाधिकरणात्यंताभावप्रतियोगीतिसाधनेबाधइत्यर्थः ॥ अवयववृत्तीति ॥ घटपटयोरंत्यावयविवृत्तित्वेनावयववृत्तित्वा भावादवयववृत्तिधर्मानवच्छिन्नप्रतियोगिताकेभेदउक्तसाध्यसाधनेनबाधइत्यर्थः ॥ द्रव्यत्वादीति ॥ एवंसतिअंत्यावयवि वृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदस्यैवमिथ्यात्वप्राप्तावपिअवयवानवयववृत्तिर्योधर्मोद्रव्यत्वादिस्तदवच्छिन्नप्रतियोगिकोभे

अवयववृत्त्युक्तौत्ववयववृत्तिद्रव्यत्वाद्यवच्छिन्नप्रतियोगिकभेदस्यापक्षत्वापातात् ।
विमतोभेदःकेवलान्वय्यत्यंताभावप्रतियोगी पदार्थत्वात् नित्यद्रव्यवदित्यत्रचस्वरू
पेणात्यंताभावप्रतियोगित्वेसाध्येऽत्यंतासत्त्वापातात् । पारमार्थिकत्वादिधर्मावच्छे
देन तत्प्रतियोगित्वेसाध्येऽर्थांतरात् । अन्योन्याभावत्वंस्वसमानाधिकरणात्यंता
भावप्रतियोगिवृत्ति त्रैकालिकाभावमात्रवृत्तित्वेसत्यभावत्वसाक्षाद्व्याप्यधर्मत्वात्

दःगुणोद्रव्यंनेत्येवंरूपस्तस्यपक्षत्वाभावेनमिथ्यात्वालाभादित्यर्थः ॥ अन्योन्याभावत्वमित्यादि ॥ भेदत्वमित्यर्थः । स्वश ब्देनभेदः तत्समानाधिकरणोयोऽत्यंताभावोभेदात्यंताभावःतत्प्रतियोगीभेदःतद्वृत्तित्वमन्योन्याभावत्वेस्ति एवंचस्वसमाना धिकरणात्यंताभावप्रतियोगित्वेनमिथ्यात्वंसिध्यति । दृष्टांतेपिस्वशब्देनसंयोगात्यंताभाव स्तत्समानाधिकरणोयोऽत्यंताभावः

SGDF
Sri Gargeshwari Digital Foundation

संयोगात्यंताभावप्रतियोगिकोऽत्यंताभावःसंयोगएव अभावाभावस्यभावत्वात् तद्वृत्तित्वमत्यंताभावत्वेऽस्तीत्येवमव्याप्यवृत्ति संयोगात्यंताभावमादायदृष्टांतेसाध्यंद्रष्टव्यं । अभावेविभाजकोपाधिचतुष्टयमितिमतानुसारेणाभावत्वसाक्षाद्व्याप्यधर्मत्वादित्युक्तं । सत्यंताभावेप्रागभावत्वादौव्यभिचारःस्यात् प्रागभावध्वंसयोःप्रागुत्तरकालयोःसत्वेनतत्प्रतियोगिकात्यंताभावाभावेनतत्रसाध्याभावात् अतःसत्यंतं तावत्युक्तेरूपात्यंताभावत्वादौव्यभिचारःस्यात् रूपस्यव्याप्यवृत्तित्वेनसंयोगवदव्याप्यवृत्तित्वाभावाद्रूपात्यंताभावाभावस्यस्वशब्दोक्तरूपात्यंताभावसमानाधिकरणत्वाभावात् अतोविशेष्यभागः । रूपात्यंताभावत्वस्य

अत्यंताभावत्ववदित्यत्रमन्मतेपिशुक्तौशुक्तिभेदस्यारोपितत्वेनसिद्धसाधनात् । त्रैकालिकस्य मिथ्यात्वायोगेनविरोधाच्च संयोगादिवत् सत्यत्वेपि स्वात्यंताभावसामानाधिकरण्यसंभवेनार्थांतरत्वाच्च । तत्रविप्रतिपत्तौचदृष्टांतस्यसाध्यवैकल्यात् । एवमन्यान्यप्यनुमानादिदूष्याणि ।

चाभावत्वव्याप्यात्यंताभावत्वव्याप्यत्वेनअभावत्वसाक्षाद्व्याप्यधर्मत्वाभावान्नव्यभिचारइत्यनुमानंपरिशोधनीयमितिसंप्रदायः ॥ मन्मतेपीति ॥ एतावताअनेनानुमानेनभेदस्याध्यस्तत्वंसाधितं तच्चेष्टमेव । स्वस्मिन्स्वप्रतियोगिकाभेदस्यैवावयोर्मते सत्यत्वेनस्वस्मिन्स्वप्रतियोगिकभेदस्यमिथ्यात्वेनतमादायसाध्यपर्यवसानसंभवात्सिद्धसाधनमर्थांतरं नैतावताघटपटादिभेदमिथ्यात्वसिद्धिरितिभावः ॥ विरोधादिति ॥ हेतोःसाध्याभावेनसत्यत्वेनव्याप्यत्वादित्यर्थः ॥ तत्रेति ॥ संयोगस्यस्वात्यंताभावसामानाधिकरण्येविप्रतिपत्तावित्यर्थः ॥ दृष्टांतस्येति ॥ अत्यंताभावत्वेऽव्याप्यवृत्तिसंयोगात्यंताभावमादायैवसाध्योपपादनंकार्यं तच्चनसंभवीत्यर्थः ॥ अनुमानानि भेदामिथ्यात्वानुमानानि । एवमित्युक्तान्साधारणदोषान्दर्शयति ॥ धर्मिग्राह

धर्मिग्राहकप्रत्यक्षश्रुत्यादिबाधः। पूर्वोक्तैर्भेदानुमानैःसत्प्रतिपक्षत्वं अप्रयोजकत्वं सुखदुःखाद्यनुसंधानापत्तिरूपप्रतिकूलतर्कपराहतिरित्यादयोभेदमिथ्यात्वानुमानसाधारणदोषाः ॥ ७ ॥ ऐक्यानुमानभंगः ॥ ३० ॥ नच "अंशोह्येषपरमस्य, पादोस्यविश्वाभूतानी" तिश्रुतौ "ममैवांशोजीवलोकेजीवभूतःसनातन" इत्यादिस्मृतौ "अंशोनानाव्यपदेशादि" तिसूत्रेचांशत्वोक्तेरैक्यं । अयं ज्येष्ठस्यांशः अयंतुकनिष्ठस्यांशः । चैत्रस्यचतुर्थांशबलोमैत्रः अनर्घ्यस्यास्यरत्नस्यायंरत्नाभासःसहस्रांशइत्यादिवत् मार्गविन्यस्तचैत्रपादाकृतौचैत्रपादइतिवच्चभेदेनैवोपपत्तेः । त्वन्मतेपिब्रह्मप्रतिजीवस्यांशत्वंनतावदारंभकत्वं । ब्रह्मणोनादित्वात् । नापिखंडत्वं । अवच्छेद्यत्वात् । नापिसमुदायित्वं । समुदायस्यसमुदाय्यनन्यत्वेन व्यवहारदशायामपिसंसारिजीवान्यशुद्धब्रह्माभावापातात् । नापिभिन्नाभिन्नद्रव्यत्वं । अनंगीकारात् । नापिप्रदेशत्वं । खंडपटस्यपटंप्रतीवनिष्प्रदेशंब्रह्मप्रत्यकल्पितस्यतस्यायोगात् । नापिघटाकाशस्याकाशंप्रतीवकल्पितप्रदेशत्वं । प्रतिबिंबपक्षेतदयो

केत्यादिना ॥ ७ ॥ ऐक्यानुमानभंगविवरणं ॥ ३० ॥ मत्स्याद्यभिन्नांशेऽतिव्याप्तिवारणाय ततोन्यूनत्वमिति । तदधी

SGDF ... Foundation

न्यायामृ०

॥ १७८ ॥

नत्वमितियावत् ॥ ईश्वरोपाधिनेति ॥ ईश्वररूपोपाधिनेत्यर्थः ॥ तथात्वइति ॥ यथाघटरूपोपाधिनाशेघटाकाशस्यमहा श्रीनिवा०

काशेनैक्यंभवति तस्यैवैतदवच्छिन्नत्वात् एवमविद्यांतःकरणादिरूपजीवोपाध्यपगमेतस्येश्वरोपाध्यवच्छिन्नचैतन्यैक्यस्यैवप्रा अंश. भं.

गात् । स्वतोनिरंशेऔपाधिकांशायोगस्योक्तत्वाच्च । नाप्यत्यंताभिन्नत्वं । तत्रांशशब्दाप्रयोगात् ।

पटाद्भिन्नेप्येकस्मिन्तंतौपटांशत्वव्यवहाराच्च । तस्मात्तत्सदृशत्वेसतिततोन्यूनत्वंजीवस्यांशत्वं २ । ३१

नतुतदेकदेशत्वं । "अभिन्नांशास्तुमत्स्याद्यास्तेजसःकालवह्निवत् । जीवाभिन्नांशकास्तत्रतेजसः

प्रतिबिंबवत्" ॥ इतिस्मृतेः । किंचत्वन्मतेजीवस्यांशत्वं किंशुद्धचैतन्यंप्रति ईश्वरंप्रतिवा ।

नाद्यः । "पादोऽस्यविश्वाभूतानी" तिश्रुताविदंशब्देनसहस्रशीर्षत्वादिविशिष्टप्रकृतेश्वरस्य "म

मैवांश" इतिस्मृतौचेश्वरप्रयुक्तास्मच्छब्देनेश्वरस्यैवोक्तेः । नांत्यः । त्वन्मतेईश्वरस्याप्युपहितत्वेन

घटाकाशंप्रतिकरकाकाशस्येवेश्वरंप्रतिजीवस्यांशत्वायोगात् । नचमठाकाशएवपुनर्घटेनेवेश्वरोपा

धिनावच्छिन्नमेवचैतन्यंपुनर्जीवोपाधिनावच्छिद्यते । तथात्वेहिमुक्तस्यशुद्धब्रह्मत्वंनस्यात् । तस्मा

त्त्वन्मतेपिनमुख्यांशत्वं । अतएवत्वयापिभाषितं । "अंशइवांशः । नहिनिरवयवस्यमुख्यांशःसं

भवती" ति । एवंच"शतांशश्चंद्रबिंबस्यगुरुबिंबंयथातथा । भेदेपिन्यूनतामात्राज्जीवोब्रह्मांशउच्यते ।" ॥ ६०६ ॥

ध्यामुक्तस्यशुद्धब्रह्मत्वंनस्यात् तथाचनमुक्तिःस्यात् शुद्धब्रह्मत्वस्यैवत्वन्मतेमुक्तित्वादित्यर्थः ॥ गुरुबिंबमिति ॥ बृहस्पति

SGDF
Sri Gargeshwari Digital Foundation

मंडलंचंद्रमंडलाच्छतांशन्यूनं चंद्रमंडलस्याऽष्टाशीतिसहस्रत्वादितिमंडलप्रयुक्तएवन्यूनाधिकभावोनतुस्वरूपतः अतोनकश्चि
तस्मान्नांशत्वेनैक्यसिद्धिः ॥ ७ ॥ अंशत्वेनैक्यसिद्धिभंगः ॥ ३१ ॥ नापिजीवब्रह्मणोर्बिंबप्रति
बिंबत्वान्मुखप्रतिमुखवदैक्यं । दृष्टांतस्यसाध्यवैकल्यात् । तथाहि । बिंबप्रतिबिंबयोरैक्ये न
तावत्प्रत्यक्षंमानं । इमेचैत्रतच्छायेभिन्नेइतिवत्इमेचैत्रतत्प्रतिबिंबेभिन्नेइत्येवपार्श्वस्थेनग्रहणात् ।
स्वेनापिस्वकरतत्प्रतिबिंबेभिन्नेइत्येवग्रहणाच्च । ननुयथाबहिःस्थितश्चैत्रोयत्स्वलक्षणःप्रतिपन्नःतत्स्व
लक्षणएववेश्मांतःस्थोपिभाति तथायत्स्वलक्षणंग्रीवास्थंमुखंतत्स्वलक्षणमेवदर्पणस्थमपिभाति न
तद्वस्त्वंतरत्वेयुज्यते तस्मादेकमेकदेशस्थंचमुखंभ्रांत्याभिन्नंभिन्नदेशस्थंचभातीतिचेत् । उच्यते ।
किमनेनसव्येतरहस्तयोरिवात्यंतसादृश्यधीरुपन्यस्ताप्रत्यभिज्ञावा । नाद्यः । तयैक्यासिद्धेः । अं
त्येऽसिद्धिः । किंचित्स्वच्छताम्रादौप्रतीतेमुखच्छायामात्रेमुखसंस्थानविशेषाप्रतिपत्त्याप्रत्यभिज्ञा
भावस्यस्पष्टत्वात् । स्वनेत्रगोलकादौस्वस्याभिज्ञाभावेनप्रत्यभिज्ञायोगाच्च । सूर्यपार्श्वेप्रतिसूर्यइति
वत्दर्पणेममुखच्छायेत्येवानुभवेनदर्पणेममुखंलग्नमितिप्रतीत्यभावाच्च चैत्रप्रतिबिंबमेवदृष्टं न
चैत्रः चैत्रस्तुतेनानुमितइत्यनुभवायोगाच्च । प्रतिमुखेप्रत्यङ्मुखत्वादिनादृश्यमानेपिस्वमुखे तद्बु
द्धिक्षुद्रोपद्रवइत्यवधेयं ॥ ७ ॥ अंशत्वेनैक्यसिद्धिभंगविवरणं ॥ ३१ ॥ अतएवेति ॥ प्रतिबिंबस्यवस्त्वंतरत्वादेव । बा

SGDF
Sri Gargeshwari Digital Foundation

लान्प्रतिआदर्शेप्रदर्शितेसतिअस्मत्सदृशोऽन्योबालइत्येवभ्रमोबालानांभवति नाहमेवेतीत्यर्थः ॥ अतिप्रसंगादिति ॥
द्ध्यभावाच्च । अतएवबालानांस्वप्रतिबिंबेबालांतरभ्रमः क्वचित्प्रतिमुखेममसुखमितिव्यपदेशस्तुस्व
च्छायाशिरसिस्वशिरोव्यवहारवत्मार्गविन्यस्तस्वपादाकृतौस्वपादव्यवहारवच्चगौणः । भेदज्ञाने
सत्यभेदव्यवहारस्यगौणत्वनियमात् । किंचबिंबप्रतिबिंबयोर्भेदसाक्षात्कारेतावन्नविवादः । अन्य
थात्वयापिकस्यभ्रमत्वमुच्येत । नचभेदंभेदकंचसाक्षात्कुर्वन्नभेदमपिसाक्षात्कुर्वन्दृष्टः । नचैक्ये
साक्षात्कृतेपिसोपाधिकभेदभ्रमोयुक्तः तदुपादानस्याप्यैक्याज्ञानस्यैक्यज्ञानेननिवृत्तेः । नचोपा
धिनिवृत्तिसहकृतमेवैक्यज्ञानंअज्ञाननिवर्तकं । ज्ञातेकदापिनजानामीत्यननुभवेनज्ञानस्यस्वप्राग
भावंप्रतीवाज्ञानंप्रत्यप्यन्यानपेक्षस्यैवनिवर्तकत्वादित्युक्तत्वात् । नचबिंबप्रतिबिंबयोरैक्येज्ञातेपि
तदवच्छिन्नचैत(न्यैक्या)न्याज्ञानात्तत्रभेदभ्रमः । अतिप्रसंगात् । नचबिंबप्रतिबिंबैक्याज्ञानाभावे
पिमूलाविद्याकार्योयंभेदभ्रमः । व्यावहारिकत्वापत्तेः । नचसोपाधिकभ्रमंप्रतिनाज्ञानज्ञानेउत्पाद
कनिवर्तके किंतूपाधिसन्निधानरूपदोषतदपगमावितिवाच्यं । दोषोनिमित्तंकार्यानुगुणं मिथ्याभू
तमज्ञानमेवतूपादानमितित्वन्मतहानेः । अन्यथाह्यज्ञानाकार्यत्वेन ज्ञानानिवर्त्यत्वेनचबिंबप्रति ॥ ६०७ ॥
घटपटयोरपिवस्तुगत्याऐक्यमेवतत्रभेदप्रतीतिस्तुतदवच्छिन्नचैतन्यैक्याज्ञानाद्भ्रमरूपेतिवक्तुंशक्यत्वादित्यतिप्रसंगइत्यर्थः ॥

क्रियासाम्यस्येति ॥ बिंबचलनेसतिप्रतिबिंबचलनमितिबिंबचलनाधीनचलनरूपक्रियासाम्येत्यर्थः ॥ बिंबादर्वाचीनइति ॥
बिंबसमानकालोत्पत्तिकेप्रतिबिंबेकथंचित्संभवेपिबिंबादर्वाचीनेबिंबोत्पत्तेःपश्चादुत्पद्यमानेबिंबकारणमात्रजन्यत्वस्यासिद्धेरित्य
र्थः । तर्हिकिंतदुत्पत्तौकारणमित्यतआह ॥ पृथगिति ॥ परिवेषःखेणेत्यपभ्रष्टभाषा किंचच्छायातावन्नत्वन्मतेदेहप्रतिबिं
बिंबभेदःसत्यःस्यादितिदिक् । नाप्यनुमानंतत्रमानं । अत्यंतसादृश्यस्यसव्येतरकरादौव्यभिचा
रात् विरोधाच्च । वैधर्म्याभावस्यचासिद्धेः । क्रियासाम्यस्यचच्छायादावनैकांत्यात् । बिंबकारण
मात्रजन्यत्वस्यचबिंबादर्वाचीनेप्रतिबिंबेसिद्धेः । पृथग्दृष्टकार्यानुरोधेनपरिवेषेंद्रचापच्छायाप्रति
सूर्यादाविवकारणस्यकल्प्यत्वात् । प्रतिबिंबमपिहिच्छायाविशेषः । नहिभेरीघातादिक्लृप्तहेत्वभा
वात्ध्वनावुपरतेप्युपलभ्यमानःप्रतिध्वनिर्नशब्दांतरं । एतेनदर्पणादौनमुखव्यक्त्यंतरमस्तितज्ज
न्मकारणशून्यत्वात् शशमस्तकेविषाणवदितिविवरणोक्तंनिरस्तं । एतेनैवाभिज्ञायांभेदोभाति
प्रत्यभिज्ञायांत्वभेदः । तत्रभेदधीर्मुखांतरहेत्वभावेनोपपत्तिहीनत्वात्भ्रांतिः । अभेदधीस्तुसोप
पत्तिकत्वात्प्रमेतिनिरस्तं । अभेदधीरेवनास्तीत्युक्तत्वात् । छायादाविवकारणस्यकल्प्यत्वेनभेदबुद्धेः
बः । तथाचच्छायायांतावत्पृथक्कारणंत्वयाऽवश्यंवाच्यमेव तदेवमन्मतेप्रतिबिंबोत्पत्तौकारणंभवति कुतइत्यतआह ॥ प्रति
बिंबमपिहीति ॥ ननुपरिदृश्यमानानांबिंबोत्पत्तौक्लृप्तकारणानांसंभवान्नप्रतिबिंबवस्त्वंतरमित्यतआह ॥ नहीति ॥ उपलभ्य

SGDF
Sri Gangadhareshwar Digital Foundation

सोपपत्तिकत्वाच क्लृप्तद्रव्यानंतर्भावेतमोवद्द्रव्यांतरत्वसंभवाच । "नोपरक्तंनवारिस्थ" मिति स्मार्तव्यवहारस्तुचित्रितःसिंहइतिलोकव्यवहारवत् "यथादारुमयीयोषायथाचर्ममयोमृगः" इत्यादिस्मार्तव्यवहारवच्चगौणः । त्वत्पक्षेपिहिवारिस्थशब्दोनमुख्यः वारिणिसूर्यांतराभावात् । गगनस्थस्यचवारिस्थत्वायोगात् । भेदस्तूक्तप्रत्यक्षेणन्यूनाधिकपरिमाणत्वचलत्वाचलत्वोपाधिसंयुक्तत्वासंयुक्तत्वत्वगादिग्राह्यत्वाग्राह्यत्वप्रत्यक्प्राङ्मुखत्वरूपेणकस्तूरीतत्प्रातिबिंबयोःसौरभतदभावरूपेणगुडतत्प्रतिबिंबयोर्माधुर्यतदभावरूपेणवह्नितत्प्रतिबिंबयोरौष्ण्यतदभावरूपेणपर्वततत्प्रतिबिंबयोर्गुरुत्वतदभावरूपेणसशब्दभेरीतत्प्रातिबिंबयोःशब्दतदभावरूपेणचानुमानेन "यथैषापुरुषेछायाएतस्मिन्नेतदाततं । छायायथापुंसदृशीपुमधीनाचदृश्यते । एवमेवात्मकाःसर्वेब्रह्माद्याःपरमात्मन" इत्यादिश्रुत्या "तवैवसदृशश्चायंबिंबस्यप्रतिबिंबवत् । बहवःसूर्यकायद्वत्सूर्यस्यसदृशाजले । एवमेवात्मकालोकेपरात्मसदृशामताः" इत्यादिस्मृत्याचसिद्धः । नचबिंबातिरेकेणदर्पणेकस्तूर्यंतराभावात्तत्रगंधाभावइतिवाच्यं । तथापियत्स्वलक्षणंकस्तूर्यादितत्स्वलक्षणस्यैवदर्पणस्थत्वेनारोपिततयातद्रूपादियुक्तस्येवतद्गंधादियुक्तस्यैवदर्पणस्थत्वेनप्रतीत्यापत्तेः । घटेगगनस्येवदर्पणेकल्पितभेदयुक्तमुखस्याप्यभावे उपाधेःप्रतिबिंबपक्षपातित्वेनमुखप्रातिमुखयोरवदाततत्व

SGDF
Sri Gargeshwari Digital Foundation

मानः । प्रदेशांतरइतिशेषः । कल्पितभेदमात्रमेवांगीकृत्यकल्पितभेदयुक्तप्रतिबिंबरूपवस्त्वंतरानंगीकारेदूषणमाह ॥ नहीति ॥
श्यामत्ववत् जीवब्रह्मणोःसंसारासंसारादिव्यवस्थितमितित्वन्मतहानेश्च । नहिशुक्तौनशुक्तिरि
यमितिभेदभ्रांतिमात्रेणरूप्यंनशुक्तावध्यस्तं आरोपितेनदर्पणस्थत्वेनविशिष्टंप्रतिबिंबंतत्रमालिन्या
ध्यासइतिचेत्न ॥ मालिन्यवद्दर्पणस्थत्वस्याप्यारोपितत्वेनैकविशिष्टेइतरारोपायोगात् प्रतिमुख
मेवदर्पणस्थं नतुमुखमितिप्रतिबिंबेदर्पणस्थत्वानुभवेनप्रतिबिंबत्वस्यतत्स्थत्वगर्भितत्वाभावाच्च मा
लिन्यस्थानीयसंसारस्यापिविशिष्टनिष्ठत्वापत्त्याशुद्धाश्रितमोक्षसामानाधिकरण्यायोगाच्च । एते
नवृक्षस्याकपिसंयोगाधारताग्रेणेवमुखस्यामालिन्याधारताउपाधिनावच्छिद्यते । तथाचदर्पणाव
च्छिन्नएवमालिन्यधीर्युक्तेतिनिरस्तं । संसारस्यापिशुद्धचिन्मात्रगतत्वापातात् वृक्षःकपिसंयुक्तइ
तिवत्मुखंमलिनमित्यनुभवापत्त्यामुखंनमलिनंकिंतुप्रतिमुखमेवेत्यनुभवविरोधाच्च । यदिचकस्तूर्या
दिप्रतिबिंबेतत्स्वलक्षणाननुगमेपि तदाकारतामात्रेणतत्त्वं तर्हिच्छायाप्रतिमुद्राप्रतिमादीनामपि
तत्त्वंस्यात् । नचप्रतिमुखेप्रत्यङ्मुखत्वादिधीर्भ्रांतिः प्रतिबिंबंबिंबाभिमुखंनेतिकदाप्यननुभवात् अ
बाधेप्यारोपितत्वेप्रतिमुखस्वरूपस्यसालक्षण्यस्यचारोपितत्वापातात् छायादावपिवैधर्म्यधीर्भ्रांति
शुक्तावध्यस्तंरूप्यंप्रातिभासिकंवस्त्वंतरंनेतिनहीत्यन्वयः । तथाचशुक्तौनशुक्तिरितिभेदमात्रमेवस्यान्नतुतत्राध्यस्तंरूप्यंत्वन्मते

SGDF
Sri Gargeshwari Digital Foundation

स्यादित्यर्थः ॥ स्वात्मानंप्रतीति ॥ मैत्रंप्रतीत्यर्थः ॥ दृष्ट्वास्नायादिति ॥ आदित्यंदृष्ट्वास्नायात्स्नानफलकोभवतीत्यर्थः । रितिसुवचत्वेन तस्यापिपुरुषादिनैक्यापत्तेश्च । एतेन "दर्पणाभिहतादृष्टिःपरावृत्यस्वमाननं । व्याप्नुवंत्याभिमुख्येनव्यत्यस्तंदर्शयेन्मुख" मितिनिरस्तं । परावृत्यस्वमुखस्यैवग्रहणेपार्श्वस्थस्यमुखद्वयप्रतीत्ययोगात् । अस्मिन्पक्षेदर्पणादेर्नेत्राद्यभिघातकत्वमात्रेणोपक्षीणत्वेनदर्पणैक्यइवदर्पणभेदेप्यनेकमुखप्रतीतेःमणिदर्पणकृपाणेषुचविरुद्धरूपानेकमुखप्रतीतेश्चायोगात् । अस्याःप्रक्रियायाःब्रह्मप्रतिबिंबेजीवेअसंभवाच्च । नेत्रस्यपरावृत्त्यानेत्रंप्रत्याभिमुख्येपिस्वात्मानंप्रत्याभिमुख्यप्रतीत्ययोगाच्च । विरलावयवस्यजलस्यनेत्राभिघातकत्वेस्वच्छजलांतर्गतशिलाद्यग्रहणापत्तेश्च । दर्पणाद्यभिहतेननेत्रेणबहुयोजनव्यवहितोर्ध्वभागस्थसूर्यादिग्रहणेपृष्ठभागस्थस्यापिव्यवहितस्यग्रहणापत्तेश्च । अस्यांप्रक्रियायांस्वच्छतायाअनुपयोगेनशिलाद्यभिहतनेत्रस्यापि स्वमुखग्राहकत्वापाताच्च । प्रतिचंद्रादिदर्शनेन चंद्रादिदर्शनजन्यसुखादेःकपिलादिप्रतिबिंबदर्शनेन कपिलादिदर्शनजन्यपुण्यादेश्चप्रसंगाच्च । सूर्यकस्यापिसूर्यवहुदर्शत्वादिप्रसंगाच्च । अतिस्वच्छदर्पणइवकिंचित्स्वच्छताम्रादावपिमुखसंस्थानविशेषप्रतीत्यापाताच्च । अवच्छेदपक्षेद्विगुणीकृत्यवृत्त्यसंभवेपिप्रतिबिंबनपक्षेतत्संभवेनांतर्यामित्वमितिस्वोक्तिविरोधाच्च । उपाधेःप्रतिबिंबपक्षपातित्वोक्त्ययोगादित्युक्तत्वाच्च ।

दृष्ट्वास्नातइत्यपिक्वचित्पाठः । अंत्यजावैष्णवादीनांदर्शनेसतिधर्मशास्त्रेआदित्यमवलोकयेदितिप्रायश्चित्तंविहितमस्ति अयंच एतेननेदंरूप्यमितिवन्नेदंमुखमितिस्वरूपेणनबाधः किंतुनात्रमुखमितिसंसृष्टतयैवेति नदर्पणेमुखव्यत्ययंतरमस्तीतिनिरस्तं । नात्रमुखच्छायासीदित्यननुभवेनप्रत्युतएतावंतंकालमत्रप्रतिसूर्यआसीदितिवदत्रप्रतिमुखमासीदित्येवानुभवेन "प्रतिबिंबमिवादर्श" इत्यादिस्मृत्याच प्रतिमुखेदर्पणस्थत्वस्याप्यबाधात् । नहिभूमौमेघोनेत्येतावतामेघच्छायापिबाधिता । "छायापुरुषवत्तस्माच्छायावत्प्रतिसूर्यवत् । प्रतिध्वानादिवद्भिन्नंप्रतिबिंबंहिबिंबतः" । अन्यथाप्रतिबिंबाद्बिंबानुमितिर्नस्यात् । साध्यावैशिष्ट्यात् । "नेक्षेतोद्यंतमादित्य" मित्यनेन उद्यत्प्रतिबिंबदर्शनस्यापिनिषेधःस्यात् । वारिस्थसूर्यदर्शननिषेधेनाकाशस्थतद्दर्शनस्यापिनिषेधःस्यात् । त्वत्पक्षेगगनस्थस्यैववारिस्थत्वेनप्रतीतेः। प्रतिबिंबदर्शनेनैव "दृष्ट्वास्नायादि" तिशास्त्रार्थोप्यनुष्ठितःस्यात् । नचतात्विकाभेदेपिकल्पितभेदाच्छास्त्रीयाव्यवस्था अनौदुंबरतयाज्ञातेनौदुंबरेणौदुंबरोयूपोभवतीतिशास्त्रार्थासिद्धिप्रसंगात् । आत्मतयाज्ञातदेहश्रवणादिना "आत्माश्रोतव्य" इतिशास्त्रार्थसिद्धिप्रसंगाच्च । किंचानादेर्जीवस्यनोपाध्यधीनत्वादिरूपंप्रतिबिंबत्वं किंतुतदधीनत्वेसतितत्सदृशत्वरूपं तच्चभेदव्याप्तमितिविरुद्धोहेतुः । उक्तंहिसूत्रकृता "अतएवचोपमासूर्यकादिवदि" ति । भाष्यकृताच "अतएवभिन्नत्व

SGDF Digital Foundation

शास्त्रार्थोगगनस्थबिंबभूतादित्यावलोकनाभावेपिवारिस्थप्रतिबिंबदर्शनेनैवानुष्ठितःस्यात्तयोरभिन्नत्वादित्यर्थः ॥ ७ ॥ बिंबप्र
तदधीनत्वतत्सादृश्यैरेवसूर्यकाद्युपमा नोपाध्यधीनत्वादिने”ति ॥७॥ बिंबप्रतिबिंबैक्यभंगः॥३२॥
अणुत्वाच्चजीवोव्याप्तादीशाद्भिन्नः । नन्वेतदयुक्तं। “नित्यःसर्वगतःस्थाणु” रित्याद्यागमैः जीवोना
णुःप्रत्यक्षगुणाश्रयत्वात् प्रत्यक्षत्वाच्च घटवदित्याद्यनुमानैश्च विपक्षेदेहव्यापिस्पर्शादिज्ञानंनस्या
दित्यादिबाधकसहितैस्तस्यविभुत्वादितिचेन्न । अणुर्ह्येषआत्मायंवाएतेसिनीतः पुण्यंचपापंच “वा
लाग्रशतभागस्यशतधाकल्पितस्यच। भागोजीवःसविज्ञेयःसचानंत्यायकल्पत”इत्यादिश्रुत्या“अणु
मात्रोप्ययंजीव”इत्यादिस्मृत्याजीवोनव्याप्तः । उत्क्रांतिमत्त्वाद्गतिमत्त्वादागतिमत्त्वात्क्रियावत्त्वा
च्च। खगशरीरवदित्याद्यनुमानैश्चविपक्षेहेतूच्छित्तिबाधकसहितैरणुत्वसिद्धेः । नचासिद्धिः । “सो
स्माच्छरीरादुत्क्रम्यामुंलोकमधिगच्छति अमुष्मादिमंलोकमागच्छती” त्यादिश्रुतिभिः “तत्रचांद्र
मसंज्योतिर्योगीप्राप्यनिवर्तत” इत्यादिस्मृतिभिश्चतत्सिद्धेः । नचगत्यादिश्रुतिर्बुद्धिविषया “ना
कस्यपृष्ठेसुकृतेतेऽनुभूत्वाइमंलोकंहीनतरंवाविशंतितेअशुभमनुभूयावर्तत” इत्यादिश्रुतौगतेःसु
खदुःखाद्यनुभवसामानाधिकरण्योक्तेः । “सएनान्ब्रह्मगमयती” त्यादिश्रुतौ “तत्रप्रयातागच्छं ॥ ६१० ॥
तिबिंबैक्यभंगविवरणं ॥ ३२ ॥ वालाग्रेति ॥ अश्वपुच्छाग्रेत्यर्थः । शतधाकल्पितस्य शतधाकृतस्येत्यर्थः ॥ कर्तुरव

तिब्रह्मब्रह्मविदोजना” इत्यादिस्मृतौचमुक्तिसामानाधिकरण्योक्तेश्च । “तेनप्रद्योतेनैषआत्मानि
ष्क्रामती” त्यात्मनिष्ठत्वश्रुतेश्च । अन्यथाबंधमोक्षादिकमपिबुद्धेरेवस्यात् । नचश्रुतिर्बुद्ध्युपाधिक
गत्यादिविषया । “तद्यथानःसुसमाहितमुत्सर्जद्यायादेवमेवायंशारीरआत्माप्राज्ञेनात्मनान्वारूढ
उत्सर्जद्याती” तिस्वाभाविकगत्याश्रयशकटदृष्टांतोक्तेः। “तमुत्क्रामंतंप्राणोनूत्क्रामती” त्यादिश्रु
तौत्वद्रीत्याप्राणाख्यबुद्धिगतितःप्रागेवजीवगत्युक्तेश्च “मनउदक्रामन्मीलितइवाश्नन्पिबन्नास्तैवे”
त्यादिश्रुतौमनसउत्क्रमणेपिआत्मनस्तदभावश्रवणाच्च । “तदाविद्वान्नामरूपाद्विमुक्तःपरात्परंपुरु
षमुपैतिदिव्य” मित्यादिश्रुतौनामरूपाद्विमोक्षानंतरमपिगतिश्रवणाच्च । “परंज्योतिरुपसंपद्यस्वे
नरूपेणाभिनिष्पद्यते सउत्तमःपुरुषः सतत्रपर्येती” त्यादिश्रुतौमुक्तेपिगत्युक्तेश्च । किंचबुद्धिगते
नगत्यादिना तदवच्छिन्नात्मनिगत्यादिजायतेवा बुद्धिगतमेवारोप्यतेवा उपचर्यतेवा नाद्यः । घट
गत्यातदवच्छिन्ननभसिगत्यंतरादृष्टेः । अन्यथायतोघटस्यबुद्धेर्वागतिः तत्राकाशस्यात्मनोवास
च्छिद्रत्वंअन्यत्रद्विगुणीकृत्यवृत्तिश्चस्यात् । नचप्रतिबिंबपक्षेनोक्तदोषइतिवाच्यं । तस्यवस्त्वंतर
त्वमतेदोषाभावेपिदर्पणाभिहतादृष्टिःपरावृत्यस्वमुखंगृह्णातीतित्वन्मतेउपाधिगत्याबिंबेनगतिःप्रति
बिंबेतुसेत्यस्यायोगात् । नांत्यौ । कर्तुरवच्छिन्नस्यैतदात्मप्रदेशस्यभोगायनलोकांतराप्राप्तिः ।

SGDF Digital Foundation

चिछन्नस्येत्यादि ॥ बुद्धिरूपोपाध्यवच्छिन्नस्यातएवकर्मकर्तुरात्मप्रदेशस्यआत्मरूपांशस्यस्वतोगत्यभावेनतस्यभोगायतनलो
कांतरप्राप्तिर्नास्तीतितद्बुद्ध्यवच्छेदेनकृतस्यकर्मणःफलप्रदत्वहानिःस्यात् तथाततःकर्तुरात्मनः(प्रका)सकाशाद्गतायाबुद्धेरेवगत्यं
गीकारात्तंविहायगतयातयाबुद्ध्यावच्छिन्नंयत्प्रदेशांतरंआत्मांशांतरंआत्मनोऽव्याप्तत्वादेवचतदेवभुङ्क्ते भोगसंपादिकायाबुद्धेरा

किंतुगतयाबुद्ध्याअवच्छिन्नप्रदेशांतरमेवभुङ्क्तइतिस्वीकारेकृतहान्यादिप्रसंगात् कर्तुर्भोक्तुश्चाव
च्छिन्नस्यभिन्नत्वात् अभिन्नेचानवच्छिन्नेकर्तृत्वाद्यभावात् बाधकंविनाबहूनांवाक्यानामप्रामाण्य
स्यउपचरितार्थत्वस्यचायोगाच्च । नचव्यावहारिकस्यगत्यादेःसत्त्वान्नात्यंताप्रामाण्यं । अमूर्तेमू
र्तावच्छिन्नेपिव्यावहारिकगत्यदृष्टेः व्यावहारिकत्वेघटगतिवद्बुद्धिगतव्यावहारिकगत्युपाधिकत्वा
योगाच्च । “नचव्यावहारिकत्वेपिधर्मिणापरमार्थसदात्मनासत्त्वाभावादौपाधिकत्वं धर्मिणोव
च्छिन्नात्मनोप्यपरमार्थत्वात्” । विस्तृतंचैतत्कर्तृत्वाध्यासभंगे । केचित्तु आत्मत्वमणु
निष्ठंद्रव्यत्वसाक्षाद्व्याप्यजातित्वात् पृथिवीत्ववत् जीवोवानव्याप्तःभूतेतरत्वेसतिपरत्वासम
वायिकारणानाधारत्वेसत्यऽसर्वज्ञत्वात् शब्देतरानित्यविशेषगुणाश्रयत्वात् संस्काराश्रयत्वाच्च

त्मांशांतरावच्छिन्नत्वात्तस्यभोगःस्यात् एवंचतस्याकृताभ्यागमःस्यादित्यर्थः ॥ भूतेतरत्वेसतीति ॥ आकाशे कालदिशो री
श्वरेचव्यभिचारवारणायक्रमेणपदानि ॥ शब्देतरेति ॥ आकाशेईश्वरेकालदिशोश्चातिव्याप्तिपरिहारायक्रमेणपदानिद्रष्टव्या

SGDF
Sri Gargeshwari Digital Foundation

नि ॥ कटवदिति ॥ कटेमध्यमपरिमाणस्यसत्वेनव्याप्तत्वाभावरूपसाध्यमस्तीतिज्ञेयं । ज्ञानासमवायिकारणमात्ममनःसंयोगः
॥ तेजोंतरेति ॥ अनुद्भूतरूपमुद्भूतस्पर्शंतेजोंतरंवह्निसमीपेकल्पयित्वातत्रत्यएवोष्णस्पर्शउपलभ्यतइत्यपिकल्पयितुंशक्यतइ
कटवत् जीवोणुःज्ञानासमवायिकारणाश्रयत्वात् मनोवदित्याद्यनुमानैर्जीवस्याणुत्वमित्याहुः । अणु
त्वेपिजीवस्यदेहव्यापिस्पर्शादिज्ञानंज्ञानरूपगुणव्याप्त्यायुक्तं। जीवस्याणुत्वेपितद्गुणव्याप्तिस्तुप्रदी
पगुणभूतायाःप्रभायाःप्रदीपंविनान्यत्रवर्तनवत्जातिसमवायादेर्धर्मितोन्यत्रवर्तनवत्वन्ह्यौष्ण्य
स्यतत्समीपेवर्तनवत्गंधस्यद्रव्यंविनान्यत्रवर्तनवच्चयुक्ता । वह्निसमीपस्थौष्ण्यस्यतत्समीपस्थानुद्भू
तरूपतेजोंतरगुणत्वेवह्नेरुद्भूतस्पर्शोनसिद्ध्येत् । नचगंधेआश्रयद्रव्यावयवगतिःकल्प्या । सर्वतो
योजनादिव्यापिगंधोपलंभायानेकस्थूलावयवापसारेणसद्योगुरुत्वादिह्रासस्यद्रव्यक्षयस्यचापाता
त् । स्फटिककरंडकांतस्थकस्तूर्यादौचावयवांतरानुप्रवेशकल्पनेमानाभावात्प्रत्यभिज्ञाविरोधाच्च ।
"नित्यःसर्वगतःस्थाणु" रित्यत्र "नित्यसर्वगतेविष्णावणुजीवोव्यवस्थित" इत्यादिस्मृत्यनुसारेण
सर्वगतस्थश्चासावणुश्चेतिविग्रहः । अन्येतुक्रमेणनानादेहसंबंधाज्जीवस्यसर्वगतत्वोक्तिरित्याहुः ।
प्रत्यक्षत्वादितिहेतुस्त्वप्रयोजकः । तेनैवाविभुत्वस्यापिसुसाधत्वात् उक्तश्रुत्यादिविरुद्धश्च । किं
त्यर्थः ॥ वह्नेरिति ॥ परिदृश्यमानवह्नेरित्यर्थः । अनुद्भूतरूपवह्निरेवउद्भूतरूपवह्न्युपरिपतितोऽस्तितदीयस्पर्शएवस्पार्शनेनो

SGDF
Sri Gargeshwari Digital Foundation

पलभ्यतइत्यपिकल्पयितुंशक्यत्वादित्यर्थः ॥ चैत्रभोगाहेतोरपीति ॥ यथाआत्मनोव्याप्यत्वमंगीकृत्यचैत्रभोगहेतुभूतका
शीस्थांकुरादेरात्मद्वारकादृष्टसंबंधोस्ति एवमात्मनोव्याप्यत्वाच्चैत्रभोगाहेतोरपिमार्गस्थांकुरादेरप्यात्मद्वारकादृष्टसंबंधस्यसत्वा
त्तज्जन्यत्वंस्यात् नचैतदस्तीत्येवंतस्यात्मद्वारकादृष्टसंबंधस्यतज्जन्यत्वेऽतंत्रत्वादित्यर्थः । नन्वंकुरादिकंतावदात्मादृष्टजन्यंभव

चात्मनांव्याप्तत्वेसर्वशरीरेंद्रियाणांसर्वदासर्वात्मसंयुक्तत्वेनसर्वात्मसाधारण्यात् । कर्मणामपिसा
धारणदेहादिकृतत्वेनासाधारण्यायोगात् । अहंत्वारोपादेरपि नियामकमूलसंबंधाद्यभावेनैयत्यायो
गात् । सर्वाण्यपिशरीराणिसर्वेषांभोगायतनानिस्युरितिप्रतिकूलतर्कपराहतिः । एतेनचैत्रभोगार्थस्यां
कुरादेःतददृष्टजन्यत्वात्आत्मसमवेतस्यचादृष्टस्यसाक्षादंकुराद्यसंबंधेनात्मद्वारासंबंधस्यवाच्यत्वात्
आत्मनोविभुत्वमितिनिरस्तं । चैत्रभोगाहेतोरप्यंकुरादेरात्मद्वारकादृष्टसंबंधेपितदजन्यत्वेनतज्जन्य
त्वेतस्यातंत्रतया प्रतियोग्यनुयोगिभाववाच्यवाचकज्ञानज्ञेयादाविवादृष्टकार्ययोरपिसंबंधांतरस्यैवव
क्तव्यत्वात् । अस्तिहिकारीर्यदृष्टस्यवृष्ट्यासहतदुद्देशेनविहितक्रियाजन्यत्वादिरूपस्संबंधः । नच

ति आत्मनश्चव्याप्यत्वेनतद्वारकसंबंधाभावेकःसंबंधइतिचेत् तदुद्देशेनविहितक्रियाजन्यत्वादिरूपसंबंधांतरस्यैवकल्प्यमान
त्वात् । घटतदभावयोःपदपदार्थयोःघटतज्ज्ञानयोश्चसंबंधवदित्यर्थः । तदेवसंबंधांतरंदृष्टांतमुखेनदर्शयति ॥ अस्तिहीति ॥
आत्मनोव्याप्यत्वसाधकंश्वेताश्वेतरोपनिषद्वाक्यमाशंक्यदूषयति ॥ नचेति ॥ बुद्धेर्गुणेनज्ञानेनाऽऽराग्रमात्रःअत्यणुः आत्म

SGDF
Sri Gargeshwari Digital Foundation

गुणेनपरिमाणेनापरोव्याप्तइत्यन्वयःपूर्वपक्ष्यभिप्रेतः । अत्राऽऽरशब्दोवालवाची वालाग्रमात्रइत्यर्थः । अपरशब्दश्चविभुत्व वाची । आत्मगुणेनविभुत्वमित्युत्तरत्रव्यवहारादितिध्येयं । अतएवतत्रोपनिषदिएतद्वाक्यादुत्तरत्रैववालाग्रशतभागस्येतिवाक्यमस्तीतिद्रष्टव्यं । एवंच "व्याप्ताह्यात्मानः अणुर्ह्येवैषआत्मे" तिश्रुत्योरविरोधोऽनेनोक्तइतिद्रष्टव्यं । त्वदुक्तप्रकारेणान्व

"बुद्धेर्गुणेनात्मगुणेनचैवह्याराग्रमात्रोह्यपरोपिदृष्ट" इतिश्रुतौबुद्धिगुणेनाराग्रमात्रत्वमात्मनो गुणेन तुविभुत्वमुक्तमितिवाच्यं । "तद्यथाअणुनश्चक्षुषःप्रकाशोव्याततएवमेवाऽस्यपुरुषस्यप्रकाशोव्याप्तोऽणुर्ह्येवैषपुरुष" इतिश्रुत्यनुसारेणबुद्धेर्ज्ञानस्यगुणेनापरःआत्मगुणेनत्वाऽऽराग्रमात्रइति अन्वयादितिदिक् । तस्मादणुत्वादपिजीवोव्याप्तादीश्वराद्भिन्नइति ॥ ७ ॥ जीवाणुत्वं ॥ ३३ ॥ तस्मादविरोधाध्यायोक्तन्यायैर्दोषिभ्योजीवेभ्योत्यंतभिन्नस्यनिर्दोषस्यब्रह्मणःसाक्षात्कारायांगीभूतंनिदिध्यासनमंगभूतंश्रवणादिकंचमुमुक्षुणाकार्यमितिसिद्धं ॥ ७ ॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्याणां श्रीमद्ब्रह्मण्यतीर्थपूज्यपादानांशिष्येणव्यासयतिनासंगृहीतेन्यायामृतेद्वितीयःपरिच्छेदः ॥ २ ॥ ॥ ॥

योनभवतीत्याह ॥ तद्यथेति ॥ आत्मगुणेनपरिमाणेनाराग्रमात्रोणुरित्यर्थः ॥ ७ ॥ जीवाणुत्वविवरणं ॥ ३३ ॥ परिच्छेदार्थमुपसंहरन्उत्तरप्रमेयमुपक्षिपति ॥ तस्मादिति ॥ ७ ॥ इतिश्रीमद्यदुपत्याचार्यपूज्यपादाराधकेनश्रीनिवासेनविरचितेन्यायामृतप्रकाशेद्वितीयःपरिच्छेदः ॥ २ ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ इतिश्रीमन्न्यायामृतेद्वितीयःपरिच्छेदः ॥

॥ अथश्रीमन्न्यायामृतेतृतीयःपरिच्छेदः ॥

SGOF

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ *नन्वेतदयुक्तं विवरणे श्रवणमंगि प्रमाणस्यप्रमेयावगमंप्रत्यव्यवधानात् । मनननिदिध्यासनेतुचित्तस्यप्रत्यगात्मप्रवणसंस्कारपरिनिष्पन्नतदेकाग्रवृत्तिकार्यद्वारेणब्रह्मानुभवहेतुतांप्रपद्येतेइतिफलोपकार्यंगेइत्युक्तत्वादिति चेन्न । यतः विचारःकरणंनैवबोधेशब्दप्रमाणजे । नचायंसंनिपत्यांगंशब्दस्यकरणात्मनः ॥ १ ॥ करणांतर्गतोयेनविचारोर्हंतिवद्भवेत् । संनिपात्यपिनैवासौ(यं)शेषीमत्यादिकंप्रति ॥ २ ॥ अन्यथा हिभवेद्वंतेःप्रयाजान्प्रतिशेषिता। हीषादेश्चयथाभिन्नफलेसौभरशेषिता ॥ ३ ॥ श्रवणादेस्तथाभिन्नफलेस्याच्छब्दशेषिता । तस्माद(न्न)युक्तामत्यादेःश्रवणंप्रतिशेषिता ॥ ४ ॥ तथाहि नतावच्छ्रवणरूपोविचारःशाब्दज्ञानेकारणं वेदेनधर्मइवब्रह्मणिप्रमीयमाणेविचारस्यानुमानादौतर्कस्येवशब्दरूपे शब्दज्ञानरूपेवाकरणेइतिकर्तव्यमात्रत्वात् । एतेनानुमितौलिंगज्ञानवत्शाब्दज्ञानेतात्पर्यविशिष्टशब्दज्ञानंकरणमितिविद्यासागरोक्तंनिरस्तं । आकांक्षादियुक्तशब्दज्ञानस्यैवकरणत्वसंभवेपि विवरणेअन्योन्याश्रयात्शाब्दप्रमाकरणतांनिषिध्यतात्पर्यभ्रमरूपप्रतिबंधनिरासोपक्षीणतयोक्तस्यतात्पर्यज्ञानस्यापिकरणकोटित्वेमननादेरपितदापत्तेः । किंचतात्पर्यज्ञानस्यापिकरणत्वेवेदेपिता

* तृतीयस्यास्यपरिच्छेदस्यटिप्पनीनोपलभ्यते ।

SGDF
Sri Gargeshwari Digital Foundation

तपर्यभ्रमसंभवात् बाह्यागमेपितात्पर्यप्रमासंभवात् शाब्दज्ञानकरणस्यदुष्टत्वादुष्टत्वव्यवस्थानस्या
त्। तस्मान्नतात्पर्यज्ञानंकरणं। नचाकरणमपितद्यागस्यावघातादिकमिवशब्दस्यसंनिपत्योपकारकं
येनकरणकोटिनिविष्टंस्यात्। तद्वत्करणीयद्रव्यशेषत्वादेरभावात् । किंचसंनिपत्योपकारकत्वेपि
नफलोपकारकमननिदिध्यासनरूपांगंप्रतिशेषिता । अन्यथाऽवघातादिःप्रयाजादिंप्रतिशेषीस्या
त्। एतेनकरणभूतशब्दगतातिशयहेतुत्वाच्छ्रवणस्यकरणत्वेनांगित्वं मनननिदिध्यासनयोस्तुसह
(का)चारिभूतचित्तगतातिशयहेतुत्वाच्छ्रवणेफलोपकार्यंगतेतिचित्सुखोक्तंप्रत्युक्तं । सोमयागस
हकारिभूतदीक्षणीयाद्यंगत्वेनतद्गतातिशयहेतोःप्रयाजप्रोक्षणादेःसोमयागेसंनिपात्यंगत्वेनतद्गता
तिशयहेत्वभिषवग्रहणादिकंप्रत्यंगत्वप्रसंगात्। गौणांगत्वंत्वनंगत्वेपर्यवस्यति । एतेनकरणीभूत
शब्दधर्मशक्तितात्पर्यविषयत्वाच्छ्रवणस्यकरणांतर्भावेनांगित्वमितितत्वशुद्ध्युक्तंनिरस्तं । किंच
शब्देनापरोक्षज्ञप्तावप्रतिबद्धापरोक्षज्ञप्तौवोत्पाद्यायांमनननिदिध्यासनयोरिवापरोक्षज्ञप्तौप्रतिब
द्धापरोक्षज्ञप्तौवोत्पाद्यायांश्रवणस्याप्यपेक्षितत्वात्त्रयाणामपिशब्दंप्रतिफलोपकार्यंगत्वेकथंपरस्पर
मंगांगिभावः । अन्यथायोवृष्टिकामोयोऽन्नाद्यकामोयःस्वर्गकामःससौभरेणस्तुवीतहीषितिवृष्टि
कामायनिधनंकुर्यात् ऊर्गित्यन्नाद्यकामाय ऊइतिस्वर्गकामायेतिश्रुतानांवृष्ट्यादिफलायसौभरेतिक

र्तव्यताभूतानांनिधनगतहीषादीनांपरस्परमंगांगिभावःस्यात् । करणापूर्वोत्पत्तौचयागार्थस्याव
घातादेःपरमापूर्वोत्पत्तौतदर्थप्रयाजादिःशेषःस्यात्। क्लृप्तंचपरोक्षज्ञानंलोकेशब्दफलं। नचाकरणम
पिश्रवणंप्रतिनिदिध्यासनस्यांगत्वेश्रुतिवाक्येस्तः । लिंगंतुविपरीतं। नापिप्रकरणं । श्रवणस्यफ
लासंबंधेनप्राधान्यासिद्धावितिकर्तव्यताकांक्षायोगात्। स्थानसमाख्येत्वसंभाविते। किंचतात्पर्य
ज्ञानस्यशाब्दप्रमाहेतुतायास्त्वयानिषेधात्तदर्थस्यविचारस्यकथंप्रमाफलं । येनमननादेःफलोपका
र्यंगतास्यात् । यच्चोक्तंमननस्यचित्तैकाग्र्यायोग्यत्वरूपासंभावनानिरसनंद्वारं निदिध्यासनस्यतु
विपरीतसंस्काररूपविपरीतभावनानिरसनंद्वारमिति । तन्न। सूक्ष्मवस्तुज्ञानेचित्तैकाग्र्यस्यहेतुत्वे
दृष्टेपियुक्त्यनुसंधानरूपमननस्यायुक्तत्वशंकानिवर्तकतायाएवदृष्टत्वेनतद्रहितेउक्तायोग्यत्वशंका
निवर्तकतायाअदृष्टत्वेनचदृष्टहानाद्यापातात्। मननविधेरपूर्वविधित्वापाताच्च। "मतिर्यावदयुक्त
ते" त्यादिस्मृतिविरोधाच्च । निदिध्यासनस्यतुविपरीतसंस्कारनिवर्तकत्वेदृष्टेपितन्निवृत्तेर्नज्ञानहेतु
तादृष्टा । रूप्यसंस्कारानुवृत्तावपिशुक्तिसाक्षात्कारदर्शनात् । तस्माच्छ्रवणसामर्थ्यरूपालिंगेन
"ततस्तुतंपश्यतेनिष्कलंध्यायमान" इत्यादिवाक्येननिदिध्यासनस्यफलसंबंधात् प्रकरणेनचश्रव
णादिकंनिदिध्यासनेसंनिपात्यंगं । युक्तश्चविप्रकृष्टात्फलोपकारात्संनिकृष्टःस्वरूपोपकारः । अत

SCDF
Digital Foundation

एवनवमेपार्वणहोमयोरारादुपकारकत्वत्यागेनसंनिपत्योपकारकतोक्ता। नच "द्रष्टव्यःश्रोतव्य" इ
तिदर्शनाव्यवहितपाठरूपसंनिधानाच्छ्रवणस्यदर्शनान्वयः । सन्निधानस्यलिंगादितोदुर्बलत्वात् ।
किंच "श्रुत्वामत्वातथाध्यात्वातदज्ञानविपर्ययौ । संशयंचपराणुद्यलभतेब्रह्मदर्शन" मितिस्मृत्या
श्रवणस्याज्ञाननिवृत्तिद्वारा मननस्यतुसंशयविपर्ययनिवृत्तिद्वारा परोक्षतत्वनिश्चयसाध्येसाक्षा
त्कारफलकेनिदिध्यासनेंगतासिद्धा । तदुक्तं "अपरोक्षदृशिश्चैवश्रवणान्मननादनु । सम्यङ्निश्चित
तत्वस्यनिदिध्यासनयाभवेदि" ति। उक्तंचसुधायां "निदिध्यासनंब्रह्मदर्शनसाधनं तत्सिद्ध्येश्रव
णमननेअपिकर्तव्ये" इति । नचभावनाप्रकर्षजन्यत्वेनसाक्षात्कारस्यकामुकस्यकामिनीसाक्षात्कार
वदप्रमा(ण)त्वापातः । त्वयापि "वेदांतवाक्यजज्ञानभावनाजापरोक्षधीः । मूलप्रमाणदार्ढ्येनप्रा
माण्यंप्रतिपद्यते" इत्युक्तेः। नचनिदिध्यासनस्यप्रमाकरणत्वमसिद्धमितिवाच्यं । त्वयाप्रतिबंधनि
रासकत्वेनोक्तस्यश्रवणस्यापितदसिद्धेः। निदिध्यासनानंतरंपुनरनुस्मृतःशब्दएवकरणं निदिध्या
सनंतुतत्सहकारि श्रवणादितुनिदिध्यासनांगमितिसंभवाच्च । अथवाश्रवणाद्यंगकनिदिध्यासन
मपरोक्षज्ञानकरणमनःसहकारि । तस्मात् ध्यानेश्रुत्यादिभिःसाक्षात्काररूपफलान्विते । मननश्र
वणेअंगेनिरस्याज्ञानसंशयौ ॥ नतुविवरणमतइवश्रवणमंगिनिदिध्यासनादिकंतुतदंगमिति ॥७॥

SGDF
Sri Gargeshwari Digital Foundation

मननिदिध्यासनयोर्विवरणोक्तश्रवणांगत्वभंगः ॥ १ ॥ ७ ॥ यच्चोक्तंविवरणे श्रवणादीनांविष
यावगमंप्रत्यन्वयव्यतिरेकसिद्धोपायत्वादिनातद्विधेरपूर्वपरिसंख्याविधित्वायोगेपिनियमविधित्व
मिति । तन्न । यतः श्रवणंह्यापरोक्ष्यायत्वन्मतेश्रवणेनच । नापरोक्ष्यंक्वचिद्दृष्टंतेनापूर्वविधिर्भवे
त् ॥ तथाहि त्वन्मतेपरोक्षज्ञानेकामनाभावात् तत्कामस्यविचारविध्यनधिकारित्वेनपरोक्षज्ञानं
प्रतिसाधनत्वेनविचारविधानायोगात् त्वदभिप्रेतायाश्चापरोक्षज्ञानंप्रतिविचारसाधनतायाअत्यंता
प्राप्तत्वेनापूर्वविधित्वमेवयुक्तं । ननुगांधर्वशास्त्रादिविचारस्यषड्जादिसाक्षात्कारहेतुताक्लृप्तेतिचे
न्न । नतावद्विचार्यशास्त्रार्थसाक्षात्कारेसहेतुःक्लृप्तः । कर्मकांडविचारेणतदर्थसाक्षात्कारादर्शनात् ।
आत्मनोपरोक्षत्वात्तद्विचारस्तथा कर्माणितुनैवमितिचेन्न अपरोक्षेविचारवैयर्थ्यात् । नहियोंशो
परोक्षःसविचार्यते । नापिविचारेणवा विचार्यशास्त्रेणवा जन्यसाक्षात्कारेसहेतुःक्लृप्तः आत्मसा
त्कारोद्देशेनशास्त्रविचारविधिंविनात्मसाक्षात्कारस्यशास्त्रविचारजन्यत्वानिश्चयात् । नापिवि
चार्यशास्त्रार्थस्यसाक्षात्कारयोग्यस्यसाक्षात्कारेसहेतुःक्लृप्तः । कालांतरेसाक्षात्करिष्यमाणत्वेनत
द्योग्येविचार्यशास्त्रार्थेस्वर्गादौनिध्यादौचविचारेणतददर्शनात् । तस्मात्षड्जादिसाक्षात्कारेगांध
र्वादिशास्त्रविचारोहेतुत्वेनक्लृप्तइतिवाच्यं । नचप्रकृतकार्यविजातीयकार्येप्रकृतविचारविजातीय

S.M.S.A. SABHA LIBRARY

SGDF
Sri Gargeshwari Digital Foundation

विचारस्यहेतुताक्लृप्तिमात्रेणप्रकृतेतस्यापूर्वविधित्वहानिः। अपूर्वविधिमात्रोच्छेदापातात्। किंच पाक्षिकप्राप्तौहिनियमः। साचसाधनांतरप्राप्तौ। नचरूपादिरहितात्मज्ञानेऽन्यप्राप्तिरस्ति। नन्व पू(र्वीये)र्वार्थेषुव्रीहिषुनखविदलनादेरप्राप्तावपिव्रीहिमात्रेतत्प्राप्त्या "व्रीहीनवहंती" तियथानियमः तथानिर्विशेषात्मनिमानांतराप्राप्तावप्यात्ममात्रेतत्प्राप्त्यानियमइतिचेन्न। व्रीहीनित्यत्रव्रीहिशब्दोपूर्वीयद्रव्यपरोनतुव्रीहिपरः। अन्यथायवेष्ववघातऔपदेशिकोनस्यात्। नीवारेषुचव्रीहिरूपद्वाराभावेनातिदिष्टोपिबाध्येतेतिनवमेस्थापितत्वेनापूर्वीयद्रव्यएवविदलनादिप्राप्तेर्वक्तव्यत्वात्। अन्यथावैतुष्यमात्रेऽवघातनियमेद्रव्यार्जनेयाजनाद्युपायनियमवत् तस्यपुरुषार्थत्वप्रसंगेनलौकिकेष्वपिव्रीहिषुदलनेप्रत्यवायःस्यात्। नचसामान्येदलनादिप्राप्त्याविशेषेऽवघातनियमः। इहनिर्विशेषसविशेषरूपविशिष्टद्वयानुगतेविशेषाभावाद्विद्वारावेदांतवेद्योचिन्मात्रेमानांतराप्राप्तेः। यत्रापूर्वीयेष्ववघातनियमस्तत्रैवदलनप्राप्तिसंभवेवैयधिकरण्यायोगाच्च। संभवतिह्यपूर्वीयेष्वपिव्रीहिषुनियमादृष्टाजनकस्यापिदलनस्यप्राप्तिः। नहितस्यप्राप्तिर्नामतेनतस्यवैतुष्यसंपादनं। तथात्वेऽवघातनियमायोगात्। किंतुशक्तत्वेनप्रसक्तिमात्रं। तच्चदलनादेरपूर्वीयेष्वप्यस्ति। निर्विशेषात्मनितुप्रत्यक्षादेःप्रसक्तिरपिनास्तीतिविशेषः। अवघातसाध्यवैतुष्यस्यदलनादिसाध्याद्वैजात्येपिवि

ध्यंतरापेक्षितवैतुष्यस्यसामान्यस्यदलनेनापिसिद्धेर्नियमः। कौमुद्यांतु यथामंत्रार्थज्ञानस्यतन्मूलकल्पसूत्रीयग्रहणकवाक्यादिप्राप्त्यापक्षेऽप्राप्तमंत्रसाध्यत्वंनियम्यते "मंत्रैरेवस्मृतिःसाध्ये" ति। तथावेदांतमूलस्त्रीशूद्रसाधारणस्मृतिपुराणादिप्राप्त्यापक्षेऽप्राप्तवेदांतश्रवणादिपरिपूर्णार्थोनियमः। "तस्माद्ब्राह्मणोनावैदिकमधीयीते" तिश्रुतेः। "श्रोतव्यःश्रुतिवाक्येभ्य" इतिस्मृतेश्चेत्युक्तं। तन्न। "इतिहासपुराणाभ्यांवेदंसमुपबृंहये" दित्यादिस्मृतिविरोधात्। नह्यविचारितेनगहनेनतेनोपबृंहणंयुक्तं। "अपिस्मर्यते" इत्यादिनासूत्रकारेणाप्युपबृंहणाच्च। नचवेदांततात्पर्यनिर्णयायैवतद्विचारोनतुब्रह्मज्ञानायेतिवाच्यं। कर्मविषयकस्मृतिभिःकर्मज्ञानस्येव ब्रह्मविषयकात् भारतादौमुमुक्षून्शुकादीन्प्रत्युपदिष्टादितिहासादपिसाक्षाद्ब्रह्मज्ञानस्योदयात्। समुपबृंहयेदित्यस्यतुवेदतात्पर्यंवेदवाक्यानुसारेणेवाऽनेकशाखाद्यभिज्ञऋषिप्रणीतनिर्णयात्मकेतिहासाद्यनुसारेणैवज्ञेयमित्यर्थः। नतुसर्वेणापीतिहासादिनावेदतात्पर्यमेवज्ञेयं अर्थस्तुनज्ञेयइति। "नावैदिक" मितिश्रुतिस्त्ववैदिकबाह्यागमाद्यध्ययनंनिषेधति। नतुवैदिकेतिहासादेः। "ऋग्वेदंभगवोध्येमी" त्यारभ्य "इतिहासपुराणंपंचमंवेदानांवेद" मितिश्रुत्या "वेदानध्यापयामासमहाभारतपंचमानि" त्यादिस्मृत्याचविरोधात्। वेदांगाध्ययनस्यापिनिषेधापाताच्च। "श्रोतव्यःश्रुतिवाक्येभ्य" इतितुश्रु

SGDF Digital Foundation

तीनांमूलप्रमाणत्वाभिप्रायं । किंच विप्रकीर्णनानाशाखार्थसंग्रहादिरूपेणेतिहासादिनातत्वनिश्च
यदर्शनात् सतिचतस्मिन्विविदिषाद्वारातदर्थायाअंतःकरणशुद्धेरपेक्षितत्वात् । आपरोक्ष्यस्यच
विषयस्वभावादेवसिद्ध्यावेदजन्येब्रह्मज्ञानेइतिहासादिजन्यादधिकस्याऽऽपरोक्ष्यस्याननुभवेनचत
स्यनियमाद्दष्टासाध्यत्वात् । ज्ञानस्यचस्वप्रागभावनिवर्तनइवाऽज्ञाननिवर्तनेप्यदृष्टनिरपेक्षत्वादन्य
स्यचनियमाद्दष्टसाध्यस्याभावान्ननियमविधिर्युक्तः । तस्मात् नियमाद्दष्टसाध्यस्यव्यावर्त्यस्याप्य
भावतः । श्रवणादेर्नियमनंपरपक्षेनयुज्यते । एतेनशूद्रप्रणीतात्मविद्याप्रबंधादिप्राप्तिनिमित्तका
प्राप्तांशपूरणार्थोनियमविधिरितिनिरस्तं ॥ ७ ॥ श्रवणादिविधेर्विवरणोक्तनियमविधित्वभंगः॥७॥
॥ २ ॥ किंच नतावच्छक्तितात्पर्यावधारणंवा तद्विशिष्टशब्दावधारणंवा तात्पर्यप्रमापकलिंगाव
धारणंवा आगमाचार्योपदेशजन्यज्ञानंवा श्रवणं । परमतेज्ञानविध्यभावात् । अवाच्येचब्रह्मणि
शक्त्यसंभवात् । तात्पर्यमपिनतावदापातधीजन्यस्यविचारनिवर्त्यस्यसंशयस्यधर्मिणि । तस्यप्रा
गेवनिश्चितत्वेनतन्निश्चयार्थंतात्पर्यनिश्चयसाधनस्यविचारस्यवैयर्थ्यात् । अन्यथाविचारानंतरमपि
संशयादिप्रसंगात् । नापिसंशयधर्मिगतप्रकारविशेषे तद्विशिष्टे तदुपलक्षितेवा । अखंडार्थता
हानेः । नापिगुरुमुखाद्वेदांतानांब्रह्मणिसंयोजनंश्रवणं । संयोगस्याऽप्युक्ततात्पर्यावधारणाद्यनति

SGDF
Sri Gargeshwari Digital Foundation

रेकात् । नापिवाक्यविशेषप्रयोगरूपवादकथाश्रवणं । तत्रश्रवणपदाप्रयोगात् । अतएवनपरमते मननिदिध्यासनविधिर्युक्तः । तयोरपिज्ञानविशेषव्यतिरेकेणदुर्निरूपत्वात् । नचानिच्छतोपिदुर्गंधादिज्ञानदर्शनेनज्ञानस्याविधेयत्वेपिनिदिध्यासनस्यज्ञानसंतानत्वेनविधेयत्वं । अनिच्छतोपिदुर्गंधज्ञानसंतानदर्शनात् । नचावधारणंनामनज्ञानं किंतुध्यानमुभयविजातीयंचेतोवृत्त्यंतरंवा । श्रवणादिक्रियातावत्कर्तव्येहप्रयत्नत" इतिसुरेश्वरेणक्रियाशब्दप्रयोगादितिवाच्यं । तात्पर्यरूपे विषये उपक्रमादिरूपेप्रमाणेचसति जायमानस्यतस्यज्ञानाद्बहिर्भावानुपपत्तेः । नहिवाचोधेनुत्वे नोपासनादिकंप्रमाणवस्तुपरतंत्रं । एतेनतर्कात्मकोविचारःश्रवणमितिप्रत्युक्तं । व्याप्तिज्ञानपरतंत्रत्वेनानुमितेरिवतर्कज्ञानस्याप्यपुंतंत्रत्वात् । नहिपुंतंत्रःप्रतिमादौनारायणाद्यारोपोव्याप्तिज्ञानाद्यपेक्षः । तस्मात् श्रुत्यादेर्धीस्वरूपत्वाद्विध्यनर्हत्वतोधियां । परपक्षेनैवयुक्तःश्रवणादिविधिःक्वचित् ॥ ९ ॥ परमतेश्रवणादिविध्यनुपपत्तिः ॥ ९ ॥ ३ ॥ केचित्तु अधीतात्स्वाध्यायात्प्रयोजनवदर्थदर्शनात्तन्निर्णयायपुरुषःस्वयमेवतत्वदर्शिनआचार्यान्न्याययुक्तवाक्यार्थग्रहणरूपेश्रवणेप्रवर्ततइतिश्रोतव्यइत्यनुवादः । आचार्योपदिष्टस्यार्थस्यस्वात्मन्येवमेवयुक्तमितिहेतुतःप्रतिष्ठापनरूपस्यमननस्यश्रवणप्रतिष्ठार्थत्वेनप्राप्तत्वान्मंतव्यइतिचानुवादः । निदिध्यासितव्यइत्येवतुविधिः । अविच्छिन्न

SGDF
Sri Gargeshwari Digital Foundation

स्मृतिसंतानरूपध्यानात्मकनिदिध्यासनकर्तव्यतायाअन्यतोप्राप्तेः । द्रष्टव्यइत्यनेनतुतस्यध्यानस्य
विशदतरावभासत्वरूपा दर्शनसमानाकारताविधीयतइत्याहुः । तन्न । त्वयापि "सहकार्यंतरवि
धि" रितिसूत्रे "तस्माद्ब्राह्मणःपांडित्य" मित्यादिवाक्येऔपदेशिकार्थाधिगमस्यपुनःपुनर्ब्रह्मसंशी
लनस्यचविधेरनंगीकृतत्वेनतयोरेवश्रोतव्योमंतव्यइत्याभ्यांविधिसंभवात् । औपदेशिकार्थाधिग
मादौश्रवणादिपदप्रयोगात् । किंचोपायत्वदशाप्रभृतिभगवज्ज्ञानंप्रीतिरूपमितिवदतस्तवमते
कृतश्रवणमननंपुरुषंप्रतिभगवतोत्यंतानुकूलत्वात् अनुकूलविषयचिंतनेचरागतएवप्रवृत्तेश्चिंतनरू
पनिदिध्यासनस्यैवविधिर्नस्यात् । तत्ररागप्राप्तेचिंतनेऽविच्छिन्नत्वादिगुणविधानंचेत् रागप्राप्तेवा
क्यार्थग्रहणेगुरुमुखपूर्वकत्वादिगुणविधानंश्रवणादिवाक्येष्वस्तु । किंच ज्ञानस्यविशदतरावभास
त्वंनतावदधिकविषयत्वं स्मरणस्यस्वजनकानुभवात्तज्जन्यस्मरणाच्चाधिकविषयत्वायोगात् । नापि
साक्षात्त्वं । स्मृतौतदसंभवात् । पुत्रादिध्यानस्येवसाक्षात्त्वस्यभ्रांतिमात्रत्वेचमोक्षहेतुत्वायोगात् ।
दर्शनश्रुतीनामुपचरितार्थत्वापत्तेश्च ॥ ७ ॥ श्रोतव्यइत्यादेरनुवादत्वभंगः ॥ ७ ॥ ४ ॥ यच्चोक्तंवि
वरणेश्रवणविधिरेवविचारविधायकइतिविचारविधायकंजिज्ञासासूत्रंश्रवणविधिमूलमिति । त
न्न । त्वयाविचारविधौश्रवणसाध्यपरोक्षज्ञानाधीनायाअपरोक्षज्ञानकामनायाअधिकारिविशेष ॥ ६१९ ॥

णत्वांगीकारेणान्योन्याश्रयापातात् । किंचायंजिज्ञासासूत्रोक्तोविचारस्तत्वनिर्णायकन्यायानुसं
धानरूपः । अन्यथान्यायग्रथनात्मकशास्त्रारंभसिद्धयेतत्कर्तव्यतोक्त्ययुक्तेः । इतरस्यवेदेतिकर्त
व्यतानुपपत्तेश्च । नचश्रवणमुक्तन्यायानुसंधानरूपं । मननाभेदप्रसंगात् । नन्वद्वितीयेब्रह्मणिवे
दांतानांशक्तितात्पर्यावधारणंश्रवणं । तच्चोपक्रमोपसंहारादितात्पर्यलिंगविचाराधीनमितिविचा
रविधायकंश्रवणविधिमूलमेवजिज्ञासासूत्रं । मननंतुश्रुतस्यार्थस्ययुक्तिभिरनुचिंतनमितिचेन्न ।
विवरणेश्रवणमंगिप्रमाणस्यप्रमेयावगमंप्रत्यव्यवधानादितिकरणत्वेनोक्तस्यश्रवणस्येतिकर्तव्यतारू
पविचारत्वायोगात् । किंच युक्तिभिरनुचिंतनंनामयदिश्रवणनिश्चितस्यतात्पर्यस्यतद्विषयस्यवा
स्मरणंवाप्रत्यभिज्ञावासंस्कारदार्ढ्यफलकंश्रवणसमानाकारमभिज्ञांतरंवा तर्हितस्याऽऽवश्यकश्र
वणावृत्त्यैवसिद्धेर्मननविधिवैयर्थ्यं । त्रिविधस्यापितस्यश्रवणानंतर्गतयुक्त्यनपेक्षत्वेन "श्रोतव्यः
श्रुतिवाक्येभ्योमंतव्यश्चोपपत्तिभि" रितिव्यवस्थापकस्मृतिविरोधश्च । "श्रवणंयावदज्ञानंमति
र्यावदयुक्तते" तिमननस्यश्रवणानिवर्त्यायुक्तत्वशंकानिवर्तकत्ववाचिस्मृतिविरोधश्च । यदित्वनु
चिंतनं श्रवणेनतात्पर्येगृहीतेप्यस्यात्रतात्पर्यंयुक्तंनवेतिसंशयादिनिवर्तकयुक्त्यनुसंधानरूपं तर्हि
युक्तायुक्तत्वसंशयादेःसंशयपूर्वपक्षसिद्धांतैर्मीमांसाशास्त्रेग्रथितात्संशयादिनिवर्तकान्न्यायजाता

SGDF
Digital Foundation

दन्येनानिवृत्तेस्तादृशन्यायग्रथनात्मकमीमांसाशास्त्रारंभोपयुक्तविचारकर्तव्यताप्रतिपादयदाद्यं
सूत्रंमननविधिमूलमेवस्यात् । एतेनगुरुमुखाद्वेदांतानांब्रह्मणिसंयोजनंश्रवणं । मननंतुयुक्तितोसं
भावनानिरसनमितिकौमुद्युक्तस्तयोर्भेदःप्रत्युक्तः । श्रवणेउक्तयुक्त्यननुप्रवेशेइष्टसिद्धेः । अनुप्रवे
शेचभेदासिद्धेः । तेनैवासंभावनानिरसनसिद्धेश्च । युक्त्यननुसंधानेपिश्रुतपदप्रयोगाच्च । नचकौ
मुद्युक्तस्यवादकथारूपश्रवणस्ययुक्त्यनुसंधानात्मकमननाद्भेदः । वादकथायास्तत्वनिर्णायकन्याय
चर्चारूपत्वेनमननाद्भेदायोगात् । वाक्यार्थग्रहणंविनानिरालंबनचर्चायोगेनतदर्थवाक्यार्थग्रहण
रूपत्वेचेष्टापत्तेः । न्यायानुसंधानार्थप्रश्नोत्तररूपवाक्यविशेषप्रयोगरूपत्वेचतत्रश्रवणपदाप्रयो
गात् । विचारविधायकस्याद्यसूत्रस्यश्रवणविधिमूलत्वासिद्धेश्च । ननुसमन्वयाध्यायोक्ततात्पर्य
नि(श्चाय)र्णायकोपक्रमादियुक्त्यनुसंधानंश्रवणं । द्वितीयाध्यायोक्तार्थासत्त्वाशंकानिवर्तकयुक्त्यनु
संधानंतुमननं सुरेश्वरेण "वेदांतश्रवणंयत्तदुपायस्तर्कएवच । श्रुतिलिंगादिकोन्यायःशब्दशक्ति
विवेककृत् । आगमार्थविनिश्चित्यैमंतव्यइतिभण्यते । वेदशब्दानुरोध्यत्रतर्कोपिविनियुज्यत" इ ॥ ६२० ॥
त्युक्तेः । अन्यैरपि "वेदांतानामशेषाणामादिमध्यावसानतः । ब्रह्मात्मन्येवतात्पर्यमितिधीःश्रव
णंभवेत् । समन्वयाध्यायएतत्सूक्तंधीस्वास्थ्यकारिभिः । तर्कैःसंभावनार्थस्यद्वितीयाध्यायईरिते

SGDF
Sri Gargeshwari Digital Foundation

त्युक्ते” रितिचेन्न। विवरणे “यौक्तिकासंभावनाविपरीतभावनानिरसिततर्काणांप्रथमज्ञानेंतर्भूत
त्वा” दित्यादिनार्थोपपत्तीनामपिश्रवणांतर्गतिमुक्त्वाब्रह्मात्मपरिभावनाप्रचयनिमित्तकतदेका
ग्रवृत्त्ययोग्यत्वमसंभावना “विपरीतभावनातुशरीराद्यध्याससंस्कारप्रचय” इत्यादिनाअसंभा
वनानिवर्तकस्यमननस्यार्थनिश्चयानंतरभाविभावनाप्रचयहेतुचित्तैकाग्र्यहेतुतायाएवोक्तत्वात् जि
ज्ञासासूत्रस्यांशेमननविधिमूलत्वापाताच्च। “मंतव्यश्चोपपत्तिभि” रितिस्मृतिस्थोपपत्तिशब्दस्य
“मतिर्यावदयुक्तते” तिस्मृतिस्थायुक्तशब्दस्यच “श्रोतव्यःश्रुतिवाक्येभ्य” इतिश्रुतिशब्दस्येव
सामान्यपरताहानेन “आदौयच्छ्रद्धयासिद्धंपश्चान्न्यायेनसाधित”मितिन्यायेनयुक्त्यनपेक्षश्रद्धा
मात्रेणप्रतिवाक्यमयमस्यवाक्यस्यार्थइतिगुरुमुखाद्वाक्यार्थग्रहणंश्रवणं पश्चान्न्यायानुसंधानंमनन
मितिभेदसंभवेयुक्तिष्वेवश्रवणमननभेदकल्पनायोगाच्च। उक्तस्यवाक्यार्थग्रहणस्यश्रवणादित्रया
नंतर्भावेनचतुर्थस्यापिमुमुक्ष्वनुष्ठेयत्वापाताच्च। केवलंगुरुमुखाद्वेदार्थःश्रुतवतिनश्रुतमनेनेतिप्रसं
गाच्च। प्रमाणभूतश्रुतितात्पर्येनिश्चितेर्थसत्त्वार्थमुपपत्त्यपेक्षाऽयोगेनमननस्यार्थासत्त्वरूपाप्रामाण्य
शंकानिवर्तकत्वेवक्तव्येनिश्चितप्रामाण्यस्यपुंसोमननाभावप्रसंगाच्च। नचापेक्षितसर्वतर्काणांश्रव
णांतर्गतावपिश्रुत्यविरुद्धमनुमानमर्थापत्तिर्वामननमितियुक्तं। ब्रह्मणऔपनिषदत्वश्रुत्यानुमाना

SGDF
Sri Gargeshwari Digital Foundation

द्यगोचरत्वात् । श्रवणनियमेनशब्देतरस्यसर्वस्यकरणस्यनिषेद्धव्यत्वाच्च । अन्यथाकदाचिदनुमा
नादिनापिब्रह्मनिश्चयसंभवेनश्रवणेनियमेननप्रवर्तेत । तस्माद्युक्त्यनुसंधानरूपोविचारोनश्रवणं
किंतुमननमेवेतिमननविधिमूलमेवजिज्ञासासूत्रं । उक्तंहिसुधायां "जिज्ञासानामयुक्त्यनुसंधाना
त्मकविचारापरपर्यायंमनन" मिति । किंचत्वन्मतेकर्मकांडविचारोयथोत्तरक्रतुविधिप्रयुक्तस्तथा
ब्रह्मकांडविचारोज्ञानविधिप्रयुक्तःकिंनस्यात् । उत्तरक्रतुविधिभिःस्वानुष्ठाप्यार्थनिर्णयायतद्विचार
स्येव "तरतिशोकमात्मविदि" त्यादिनाशोकनिवृत्तिहेतुत्वेनावगतेनात्मज्ञानेनस्वसिद्धयेवेदांतवि
चारस्याऽऽक्षेपात् । युक्तंचानेकेषांक्रतुविधीनामाक्षेपकत्वादप्येकस्यैवतत् । यदिचाध्ययनविधेर्नि
त्यत्वेनार्थज्ञानार्थत्वाभावेनादृष्टार्थत्वाद्विचारविध्यभावेविषनिर्हरणमंत्रस्येवतरतीत्यादेरर्थपरत्वा
भावान्नतदाक्षेपकता तर्हिततएवोत्तरक्रतुविधीनामपिसानस्यात् । अथाध्ययनविधेर्नित्यत्वेपिश
ब्दसामर्थ्यात्प्रतीतार्थोनत्याज्यइतिक्रतुविधीनामाक्षेपकता तर्हिततएवतरतीत्यादेरपिसास्यात् ।
अस्तिचब्रह्मकांडवत्कर्मकांडेपिसाक्षाद्विचारविधिः " स्थाणुरयंभारवाहःकिलाभूदधीत्यवेदंनवि
जानातियोर्थं । पठेद्वेदानथार्थानधीयीत । यदधीतमविज्ञातंनिगदेनैवशब्द्यते । अनग्नाविवशुष्कै

॥ ६२१ ॥

धोनतज्ज्वलतिकर्हिचि"दित्यादिः । तस्माच्छ्रवणविध्याक्षिप्तोविचारइतिविवरणमतंनयुक्तं । अत
एवकर्मकांडविचारस्यार्थज्ञानपर्यंताध्ययनविधिप्रयुक्तत्वेपिब्रह्मविचारःश्रवणविधिप्रयुक्तइतिकौमु
द्युक्तंचनिरस्तं । विचारस्यश्रवणविधिप्रयुक्तत्वनिरासात् । कर्मविचारवत्ब्रह्मविचारस्याप्यध्ययन
विधिप्रयुक्तत्वसंभवाच्च । ननुसाक्षात्कारफलकमावृत्तिगुणकंमननाद्यंगकमिदंश्रवणमध्ययनविधि
प्रयुक्तश्रवणमात्राद्भिन्नमितिविध्यंतरंयुक्तमितिचेन्न । ब्रह्मविचारस्याध्ययनविधिप्रयुक्तत्वेपिसा
क्षात्कारस्यापरोक्षैकरसात्मविषयकत्वेनैवसिद्धेः । आवृत्तेश्च विध्यंतरांगीकारेप्यवघातादिवदृष्टफ
लत्वेनैववक्तव्यत्वात् । कर्मकांडेपितात्पर्यावधारणपर्यंतंविचारावृत्तेरपेक्षितत्वात् । ततःपरं ब्रह्म
कांडेपितदावृत्तेरनपेक्षणात् । मननस्यचकर्मकांडेपितदर्थनिश्चयायापेक्षितत्वादध्ययनविधिविहि
तैकदेशारण्यकाध्ययनानुवादेनवाक्यांतरेणारण्याद्यंगांतरविधानवत् मुंडककारीर्याद्यध्ययनानुवा
देनशिरोव्रतभूभोजनाद्यंगविधानवत् "तांचतुर्भिरादत्त" इत्यत्रार्थप्राप्तादानानुवादेनसंख्याविधा
नवच्चाध्ययनविध्याक्षिप्तविचारैकदेशानुवादेनत्वद्रीत्यामननाद्यंगविधानस्यसंभवात् । तस्मात् यु
क्तिचिंतनरूपस्यविचारस्यविधायकं । सूत्रंतद्रूपमननविधातृश्रुतिमूलकं । नतुविवरणकारमतइव
श्रवणविधिमूलं ॥ ७ ॥ श्रवणविधेर्विवरणोक्तविचारविधायकत्वभंगः ॥ ७ ॥ ८ ॥ यत्तुभामत्युक्तंश्रव
णादिविध्यभावादध्ययनविधिरेवकांडद्वयविचाराक्षेपकइति तत् "स्वाध्यायस्यहितथात्वेने" त्यत्रसू

SGDF

त्रभाष्यादौ "अध्ययनस्यचार्थज्ञानपर्यंतत्वादि" तिटीकायांचतस्यतदाक्षेपकतायाउक्तत्वादिष्टं ।
श्रवणादिविधिस्तुसमर्थयिष्यते । ननुतत्रैवटीकायांयोनधीतेत्यकरणेप्रत्यवायस्मरणेनाध्ययनस्यनि
त्यताप्युक्ता । तत्कथंतस्यार्थज्ञानपर्यंतत्वमितिचेन्न । अर्थज्ञा(नार्थत्वे)नपर्यंतत्वेप्यध्ययनविधेरवै
य्यर्थ्यायाधीतेनैववेदेनकर्तव्यतांज्ञात्वानुष्ठितंकर्मफलायालमित्यादिनियमाश्रयणात् । असत्यध्य
यनेयथोक्तनित्यादिकर्मानुष्ठानासिद्ध्याप्रत्यवायश्रवणोपपत्तिः । तथाचार्थज्ञानार्थस्याप्यध्ययनस्यफ
लतोनित्यत्वमितिकेचित् । अपरेतु अनध्ययनेनसंध्यानुपासनेनेवसाक्षात्प्रत्यवायस्मरणेनाध्ययन
स्यादृष्टार्थत्वेप्यर्थज्ञानस्यापिदृष्टत्वादपेक्षितत्वाचतादर्थ्यमपीत्युभयार्थता पशुपुरोडाशादिवदि
त्याहुः । अथवा श्रुतिबलाद्दध्यादेःक्रत्वर्थत्वपुरुषार्थत्ववद्दर्शपूर्णमासादेर्नित्यकाम्यत्ववच्चाध्ययन
स्याप्युभयार्थता । प्रत्यवायस्येव "सर्वेवेदायत्पदमामनंति" इत्यादिश्रुत्या "वेदैश्चसर्वैरहमेववेद्य"
इतिस्मृत्याचब्रह्मज्ञानार्थत्वस्याप्यवगमात् । यद्वोक्तश्रुत्याध्ययनस्यब्रह्मज्ञानार्थत्वेपि "यदेवविद्य
याकरोती" त्यादिश्रुत्याब्रह्मज्ञानस्यैवावश्यकत्वात्ज्ञानार्थत्वेप्यध्ययनस्याकरणेप्रत्यवायश्रवणंयु
क्तं । एतेननित्यत्वादध्ययनविधिर्नविचाराक्षेपकइतियद्विवरणाभिप्रेतंतन्निरस्तं तस्मात् ब्रह्मज्ञान
फलस्यापिस्वाध्यायाध्ययनस्यया । टीकायांनित्यताप्रोक्तासापिनैवविरुध्यते ॥ ७ ॥ अध्ययनविधे

र्नित्यत्वेपिविचारविधायकत्वं ॥ ७ ॥ ६ ॥ अस्माकंतु श्रवणंशब्दजंज्ञानमुपपत्त्यनुचिंतनं । मतिर्नि
रंतराचिंतानिदिध्यासनमुच्यते । आपातदर्शनभिन्नंकृतिसाध्यत्वेनविधानार्हंप्रतिवाक्यमयमस्य
वाक्यस्यार्थइतिसिद्धार्थोक्तिरूपेणगुरूपदेशोनानेकशाखास्थवाक्यार्थग्रहणमात्रंश्रवणं । तच्चाज्ञान
मात्रविरोधि । नतुमननमिवसंशयादिविरोधि । मननरूपन्यायावतारांगसंशयधर्मिज्ञानरूपत्वात्
उक्तंहिसुधायां "श्रवणजंज्ञानंपूर्ववृत्त" मितिमीमांसातःश्रवणस्यपूर्ववृत्तत्वं । मननंत्वयमेववा
क्यार्थोयुक्तोनान्यइतिनिर्णयहेतुयुक्त्यनुसंधानं । तत्रसमन्वयाध्यायोक्ताउपक्रमादियुक्तयोवा
क्यार्थतत्वनिर्णायिकाः । युक्तिसमयपादाभ्यामुक्तास्तुयुक्तत्वनिर्णायिकाइत्युभयविधयुक्त्यनुसंधा
नमपिमननांतर्गतं । तच्चसंशयादिविरोधि । निरंतरंध्यानंनिदिध्यासनं । तच्चापरोक्षज्ञानसाधनं ।
एतच्च "तन्निर्धारणार्थनियम" इतिसूत्रभाष्यादौस्पष्टं । उक्तश्चभामत्यामपि तृतीयाध्यायेइत्थमेव
श्रवणादीनांभेदः । विचारादिविधिस्त्वपूर्वविधिः । ब्रह्मज्ञानेवेदविचारहेतुतायाअत्यंताप्राप्तत्वात्
नहिवेदार्थज्ञानायवेदविचारःकर्तव्यइतिवचनव्यक्तिः । ब्रह्मज्ञानस्योद्देश्यत्वात् । नापिब्रह्मज्ञाना
यब्रह्मविचारःकर्तव्यइति । तथात्वेब्रह्मणोविधेयविशेषणतयागुणत्वापातात् । किंतुब्रह्मज्ञानाय
वेदविचारःकर्तव्यइत्येववचनव्यक्तिः । यद्यपिब्रह्मपरवेदविचारएवब्रह्मविचारःतथापिनब्रह्मविचा

SGDF Digital Foundation

रूपेणविधानं । किंतुवेदविचाररूपेण । तथाचश्रुतिः "तस्मादेनंसर्ववेदानधीत्यविचार्यचज्ञातुमिच्छे" दिति । टीकाचब्रह्मज्ञानोद्देशेनजिज्ञासाविधानात्कुतोप्राधान्यमिति । एवंचयथाघटादावितरभेदेसिद्धेपिपृथिवीत्वोपहितेतदसिद्धेःपृथिवीइतरेभ्योभिद्यतइत्यत्रनसिद्धसाधनता यथावास्थानप्रकरणाधिकरणोक्तरीत्याराजसूयांतर्गतेष्टिपशुसोमेषुप्रातिस्विकरूपेचोदकतइतिकर्तव्यताप्राप्तावपिराजसूयरूपेतदप्राप्तिः तथावेदविचारत्वोपहितेब्रह्मज्ञानहेतुतायाअप्राप्तेरपूर्वविधिता । नहि कर्मकांडादिना ब्रह्मकांडेप्यवांतरकारणादिवाक्येन पदवर्णस्वरादिनाचआपाततोपिब्रह्मधीरस्ति। अतएवानुव्याख्याने "जिज्ञास्योयंविधीयत" इति भाष्येच "आत्मेत्येवोपासीतेत्यादिविधीनामिति" निरुपपदविधिपदप्रयोगः । यद्वा निदिध्यासनस्याव्यक्तस्वभावब्रह्मसाक्षात्कारहेतुतानान्यतःप्राप्तेतिसतावदपूर्वविधिः । तथाऽज्ञानादौनिदिध्यासनासंभवेनश्रवणमननयोर्निदिध्यासने लिंगादेवप्राप्तावपिनियतविषयकनिदिध्यासनविषयगुणान्यगुणेषुलिंगेनतयोरप्राप्तेस्तद्विधिरप्यपूर्वविधिरेव । एवंचश्रवणमननयोर्निदिध्यासितव्यगुणांशेदृष्टद्वाराऽन्यत्रत्वदृष्टद्वारेणनिदिध्यासनांगतेतिध्येयं । यद्वागुरुप्रसादपूर्वकत्वरहितस्वयत्नमात्रसाध्यवाक्यार्थग्रहणादिप्राप्तिनिमित्तकः श्रोतव्यइत्यादिनियमोस्तु । "आचार्यवान्पुरुषोवेदे" त्यादिश्रुतेः । अथवा दुःशास्त्ररूपोपायांतर

प्राप्तिनिमित्तकोनियमोस्तु । पाशुपताद्यागमविचारस्यब्रह्मप्रमाहेतुत्वाभावेपिजगत्कारणज्ञानहेतुतायाःप्राप्तेः । अतएवशास्त्रयोनिसूत्रं । "दुरागमास्तदन्येयेतैर्नज्ञेयोजनार्दन" इतिस्मृतिश्च "सच्छास्त्रमभ्यसेन्नित्यंदुःशास्त्रंतुपरित्यजेदि" त्यनुव्याख्यानंच । यद्वा विचारसाध्यज्ञानविशेष्यात्मज्ञानेष्वनुमानादेःप्राप्त्यानियमोस्तु । "नैषातर्केणे" त्यादिश्रुतेः । नचयदाकारज्ञानंविचारहेतुकंतदाकारज्ञानेउपायांतरप्राप्तिर्नियमेतंत्रं । इदंतत्वतएवपरामृष्टव्यमित्यादावेकस्मिन्विशेष्येउपायांतरप्राप्तिमात्रेणनियमदर्शनात् । नह्येकस्मिन्नेवाकारेतात्विकत्वातात्विकत्वयोःप्राप्तिरस्ति । परमते तुविशेष्यस्यैवौपनिषदत्वात्तत्रैवोपायांतराप्राप्तिरितिवैषम्यं । संभवतिचशब्दयुक्तिजन्यज्ञानवाचिभ्यांश्रोतव्यमंतव्यपदाभ्यांदुरागमरूपशब्दाभासतदनुग्राहकन्यायाभासजन्यज्ञानव्यावर्तनं । एवंश्रवणस्याप्यध्ययनवद्गुरुनिरूप्यत्वादगुरुमुखाभ्यासव्यावृत्तिः । तस्माज्ज्ञानरूपमपिश्रवणादिविधेयं। केचित्तुकार्यत्वाद्यनुमानस्यश्रुतिविचारस्यचनियमेनप्राप्तावाज्यभागौयजतीतिवदेकस्मिन्शेषिणिशेषद्वयप्राप्तौशेषांतरनिवृत्तिफलकपरिसंख्येत्याहुः । तन्न । तत्राखंडोपकारस्यसमुचिताज्यभागप्रयाजादिसाध्यत्ववदिहज्ञानसमुचितप्रमाणसाध्यत्वाभावात् । शब्देतिकर्तव्यताभूततर्कसाहित्वस्यचेष्टत्वात् । अन्येतु "अन्यावाचोविमुंचथे" तिश्रुतेरब्रह्मविचारनिषेधपरत्वमित्याहुः ।

SGDF ... Digital Foundation

तन्न । ब्रह्मज्ञानेऽब्रह्मविचारस्याप्राप्तेः । इतरेतु श्रुत्यादिविचारस्यापातप्रतीतब्रह्मतदन्यज्ञानसाध
नत्वेप्राप्ते "इत्यश्वाभिधानीमादत्त" इतिवदेकस्यशेषस्यशेषिद्वयसंबंधप्राप्तौशेष्यंतरनिवृत्तिफलक
परिसंख्येत्याहुः । तन्न । श्रुत्यादिनाऽऽपाततोन्यप्रतीतावपिश्रुत्यादिविचारस्यान्यज्ञानसाधनत्वे
नाप्राप्तेः अपरेतु "श्रवणाज्जनलोकादि" रित्यादिवचनेनापोदितंयच्छ्रवणस्यज्ञानहेतुत्वंतस्यप्रतिप्र
सवार्थंज्ञानोद्देशेनश्रवणादिविधानमित्याहुः । तन्न । श्रवणादितिवाक्यस्यश्रवणात्तद्दृष्टज्ञानद्वाराज
नलोकादिरित्येवंपरत्वेनज्ञानसाधनत्वानपवादकत्वादिति ॥ ७ ॥ स्वमतेश्रवणादिविधिसमर्थनं ॥
॥ ७ ॥ ७ ॥ अत्रपरैरुक्तं अनिच्छतोपिदुर्गंधादिज्ञानदर्शनात्ज्ञानस्यप्रमाणवस्तुपरतंत्रत्वेनाविधे
यत्वाल्लिङादयःश्रूयमाणाअपिशिलातलप्रयुक्तक्षुरतैक्ष्ण्यवत्कुंठीभवंतीति । तन्न । "पत्न्यवेक्षित
माज्यंभवति । विदुषाकर्मकर्तव्यंतस्मातपश्येतनित्यश" इत्यादिनातद्विधानात् । तत्रतद्वेत्विंद्रिय
संप्रयोगादिविधौलक्षणाप्रसंगात् । संप्रयोगस्यापींद्रियनिष्ठक्रियाद्वाराकृतिसाध्यत्वेनसाक्षात्तद
साध्यत्वात् । परंपरयाकृतिसाध्यत्वस्यचज्ञानेपिसंभवात् । अनिच्छतश्चानिष्टसंप्रयोगादर्शनात् ।
"भक्षेहीं" तिभक्षमंत्रेचतृप्तेरनुनिष्पादिततयाननुष्ठेयत्वेनतृप्तिप्रकाशकभागस्यतत्रविभज्याविनि
योगाभावेप्यवेक्षणस्यानुष्ठेयत्वात्तत्प्रकाशकभागस्यावेक्षणेविभज्यविनियोगइतितृतीयेऽभिहित

SGDF
Sri Gargeshwari Digital Foundation

त्वात् । एकश्रोत्रगतानेकतारगकारेषुचबुभुत्साप्रयत्नाभ्यामभीष्टगकारज्ञानदर्शनात् । ज्ञानस्यच
“यदेवविद्ययाकरोती” त्यंगत्वश्रवणात् । अविहितस्यचांगत्वानुपपत्तेः । दुर्गंधादिज्ञानस्येच्छा
विषयत्वाभावेपिब्रह्मज्ञानस्यतद्विषयत्ववत् । ज्ञानांतरस्यनियमादृष्टासाध्यत्वेपिब्रह्मज्ञानस्यत
त्साध्यत्ववत् पर्वतादिज्ञानस्यनयनोन्मीलनेसतिप्रयत्नांतरानिरपेक्षत्वेपिध्रुवारुंधत्यादिज्ञानस्यत
त्सापेक्षत्ववच्चातिसूक्ष्मब्रह्मज्ञानस्येच्छाप्रयत्नसाध्यत्वसंभवात् । शास्त्रार्थज्ञानस्यचनियमेनपुंतंत्र
त्वदर्शनात् । ब्रह्मणश्चशास्त्रार्थत्वात् । प्रशस्ताप्रशस्तज्ञानयोश्चविधिनिषेधदर्शनात् । इच्छादिना
चोत्पत्तिनिरोधयोरनुभवात् । तत्रचकरणव्यापारस्यैवपुंतंत्रत्वांगीकारेनामादिषुब्रह्मोपासनायां
त्वयाविधेयत्वेनांगीकृतायामपिमनोनिरोधादेरेवपुंतंत्रत्वंनतूपासनायाइतिप्रसंगात् । अनेकशा
स्त्राजन्यज्ञानरूपस्यचश्रवणस्यतदुपक्रमोपसंहारैकरूप्याद्यनुसंधानरूपस्यचमननस्यश्रुतमतानेकगु
णविशिष्टतयानिरंतरानुस्मरणरूपस्यचनिदिध्यासनस्यातिप्रयत्नसाध्यत्वानुभवात् । निदिध्यास
नादेश्च “खंडास्मृतिर्धारणास्यादखंडाध्यानमुच्यते । अप्रयत्नात्समाधिश्चे” त्यादिस्मृत्याप्रयत्नसा
ध्यत्वप्रतीतेः । त्वन्मतेपिपरोक्षज्ञानसंतानरूपस्यनिदिध्यासनस्यविधेयत्वात् । संतानिनांचकृत्य
साध्यत्वेसंतानस्यतदयोगात् । श्रवणादीनांज्ञानातिरेकेणदुर्निरूपत्वस्योक्तत्वात् । तेषांचज्ञानाना

SGDF
Sri Gargeshwari Digital Foundation

त्मकत्वे “श्रवणंयावदज्ञान” मित्यज्ञानविरोधित्वस्मृतेः श्रवणेनाज्ञानंनिवृत्तमित्यनुभवस्यचानुपपत्तेः । “विज्ञायप्रज्ञांकुर्वीते” त्यादौचविज्ञानानंतरभाविनःप्रज्ञाशब्दार्थस्यविचारत्वानुपपत्तेः । ध्यानस्यचत्वयापिविधेयत्वेनांगीकृतत्वात् । तस्यचज्ञानानात्मकत्वेतेनस्वविषयेव्यवहाराभावप्रसंगात् । ध्यानान्यज्ञानेनचध्यानविषयेव्यवहारांगीकारेगौरवात् । ध्यानविषयेचकदाचिन्नजानामीत्यनुभवप्रसंगात् । संस्कारस्यचज्ञानजन्यत्वेनध्यानेस्मरणाभावप्रसंगात् । “तस्याभिध्याना” दितिश्रुतौचध्यानस्यमायाख्याविद्यानिवर्तकत्वोक्तेः । त्वयापिविधेयतयांगीकृतोपासनायांचश्रुतौ “मनोब्रह्मेत्युपासीत यएवंवेद” ति तथा “आत्मेत्येवोपासीत यस्तद्वेद” त्यादिबहुस्थलेषुज्ञानार्थविदधातुप्रयोगेणोपासनायाज्ञानात्मकत्वात् । प्रमाणादिपरतंत्रस्यापिज्ञानस्य प्रतिग्रहीत्रादिपरतंत्रस्यापिदानादेरिवपुंतंत्रत्वोपपत्तेः । ब्रह्मपरवाक्यमध्येप्युपासनाविधिवत्ज्ञानविधेरपिसंभवात् । वृथैववैदिकलिङादेरस्वारस्यायुक्तेः । नचज्ञानस्याक्रियात्वेनाविधेयत्वं । धात्वर्थस्यपूर्वापरीभूतस्यवाक्रियात्वासिद्धेः । शास्त्रार्थंजानामीत्यादौ पचतीत्यादाविवपूर्वापरीभावप्रतीतेः । स्पंदस्याक्रियात्वेतुयागादेरप्यक्रियात्वंस्यात् । तस्मात् पश्यवेक्षितमित्यादौज्ञानस्यैवविधानतः । सूक्ष्मशास्त्रार्थबुद्धेश्चकृतिसाध्यत्वदर्शनात् ॥ १ ॥ ध्यानस्यापिचविज्ञानव्यतिरेकानिरूपणात् ।

ज्ञानस्वरूपमपिचश्रवणादि विधीयते ॥ २ ॥ ननुतथापिज्ञानस्यानवगमेतत्कर्तव्यताबोधनासंभवात्तदवगमस्यचविषयावगमंविनाऽयोगाद्विषयस्याप्यवगमेफलस्यजातत्वाद्व्यर्थोविधिरितिचेन्न । त्वयापिविचारविध्यंगीकारात् विचारस्यचविषयनिरूप्यत्वेनसाम्यात् सामान्यतोब्रह्मज्ञानमात्रेणचतद्विषयकश्रवणादेःकर्तव्यताबोधनसंभवात् वेदांतवाक्यानुग्राहकन्यायानुसंधानादिरूपतयाचब्रह्मज्ञानात्प्रागेवज्ञातस्यमननादेःब्रह्मज्ञानायविधानसंभवाच्चेति । ननुतथापिज्ञानंनविधेयं । तथाहि । विधीयमानंज्ञानंकिंशाब्दंकिंवातदभ्यासः यद्वातत्वमनपेक्ष्यारोपितविषयतयामनसःसंकल्पप्रवाहरूपंध्यानं किंवापरोक्षफलंज्ञानांतरं । नाद्यः । कर्मकांडइवगृहीतसंगतेःस्वतःसिद्धत्वेन कृत्यसाध्यत्वेनविध्यनपेक्षणात् । द्वितीयेतद्विधिर्मोक्षायचेत्तस्यनैयोगिकफलत्वेनस्वर्गादिवदनित्यत्वंस्यात् साक्षात्कारायचेत्सनादृष्टंफलं । प्रमाणायत्तत्वात्तस्य । नापिफलंदृष्टं । परोक्षज्ञानाभ्यासेनसाक्षात्कारादर्शनात् । अतएवनतृतीयः । प्रोषितपुत्रादिध्यानेनारोपितरूपसाक्षात्कारदर्शनेपितत्वसाक्षात्कारादर्शनात् । चतुर्थेशब्दस्यब्रह्मणिप्रामाण्यंनस्यात् । ब्रह्मणिप्रमाणीभूतज्ञानकर्तव्यतायामेवप्रमाणत्वादितिचेत् नतावदाद्येदोषः । कर्मकांडेप्यापातजन्यस्यस्वतःसिद्धत्वेपिविमर्शजन्यस्यकृतिसाध्यत्वात् । अन्यथाऽध्ययनविधेरुत्तरक्रतुविधेर्वातद्विचाराक्षेपकतानस्यात् ।

SGDF

द्वितीयेपिनदोषः । दृष्टफलत्वइवनैयोगिकफलत्वेपिबंधध्वंसस्यध्वंसत्वाच्छ्रुत्यादिफलत्वाच्चनित्य
त्वोपपत्तेः । तृतीयेपिनदोषः । मोक्षस्यनैयोगिकफलत्वेपिनित्यतायाउक्तत्वात् । ध्यानादिनाप्रस
न्नदेवतासाक्षात्कारदर्शनेनध्यानसंस्कृतमनसाब्रह्मसाक्षात्कारोपपत्तेश्च । चतुर्थेपिनदोषः । ज्ञान
विधिवाक्यस्यज्ञानकर्तव्यतायांप्रमाणत्वेपिब्रह्मण्यपिमहातात्पर्यवत्त्वात् सत्यज्ञानादिवाक्यस्या
विधिपरत्वाच्चेति ॥ ७ ॥ ज्ञानविधिसमर्थनं ॥ ७ ॥ ८ ॥ यच्चोक्तं "तत्त्वमसी" त्यादिवाक्यादेवाप
रोक्षधीः । "तद्वास्यविजज्ञौ तमसःपारंदर्शयती" त्यादावुपदेशादेवापरोक्षज्ञानोक्तेः । "वेदांत
विज्ञानसुनिश्चितार्था" इत्यत्रशाब्दज्ञानस्यविशब्देनविशेषविषयत्वेसिद्धेसुशब्देनापरोक्षत्वोक्ते
श्च । विमतंशाब्दज्ञानमपरोक्षं अपरोक्षमात्रविषयकत्वात् । सुखादिज्ञानवत् । अपरोक्षत्वं वेदां
तवाक्यजन्यज्ञानवृत्ति । अपरोक्षज्ञाननिष्ठात्यंताभावाप्रतियोगित्वात् । ज्ञानत्ववदित्याद्यनुमाना
च्च । नच विमतःशब्दो नापरोक्षधीहेतुः । शब्दत्वाज्ज्योतिष्टोमादिशब्दवदित्यादिनासत्प्रतिपक्ष
त्वं । दशमस्त्वमसीत्यादौशब्दादेवापरोक्षधीदर्शनेनव्यभिचारात् । नचतत्रापींद्रियमेवकरणं शा
ब्दस्तुसहकारीतियुक्तं । क्वचिद्बहुलतमेतमसि क्वचिच्चलोचनहीनस्यापिवाक्याद्दशमोस्मीत्यपरो
क्षधीदर्शनादिति । मैवं । "तद्वास्यविजज्ञा" वित्यादेःपरोक्षज्ञानेनापिचरितार्थत्वात् । दर्शयतीत्या

SGDF
Sri Gargeshwari Digital Foundation

देस्तुग्राममार्गोपदेष्टरिग्रामंदर्शयतीतिवत्परंपरयासाक्षात्कारसाधनत्वेनकृतार्थत्वात् । अन्यथा “मनसैवानुद्रष्टव्य” मित्यादिश्रुतिविरोधात् । वेदांतविज्ञानेत्यत्रसुशब्देनाप्रामाण्यशंकाभावादे रुक्तेः । अन्यथावेदांतबोधस्यचविचारकर्तव्यतादेरचिरादेश्चापरोक्ष्यापातात् । आद्यानुमानस्य अयंघटः त्वंसुखवानसीत्यादिवाक्यजन्यज्ञानेवक्ष्यमाणरीत्याव्यभिचारात् । अज्ञानावृतेऐक्येआ परोक्ष्याभावेनासिद्धेश्च । आपरोक्ष्ययोग्यत्वविवक्षायांतुभित्त्यंतरितघटविषयकशब्दज्ञानेव्यभि चारात् । द्वितीयानुमाने अपरोक्षत्वंज्योतिष्टोमादिवाक्यजन्यज्ञानवृत्तीत्यपिसुसाधत्वेनाभास साम्यात् । शब्दत्वहेतुनासत्प्रतिपक्षत्वाच्च । किंचास्यशब्दस्यापरोक्षधीहेतुत्वेप्रत्यक्षेंऽतर्भावाप त्तिः । नचयथाबाह्यप्रत्यक्षत्वेयोगिमनोन्यत्वेसतिबाह्यप्रत्यक्षप्रमितिकरणत्वंतंत्रं । तथास्वतोपरो क्षविषयशब्दान्यत्वेसतिप्रत्यक्षप्रमाकरणत्वंप्रत्यक्षत्वेतंत्रमितिवाच्यं । वक्ष्यमाणरीत्याक्कापिशब्दा दपरोक्षज्ञानाभावेनविशेषणकल्पकाभावात् । यश्चशब्दत्वहेतोर्दशमस्त्वमसीत्यादौव्यभिचारउ क्तः सकिंस्वात्मनोदशमत्वंपश्यंतंप्रतिप्रयुक्तेदशमस्त्वमसीतिवाक्ये अन्यंप्रतिवा । नाद्यः । त स्यदृष्टघटंप्रतिप्रयुक्तादयंघटइतिवाक्याज्जन्यज्ञानस्येवपरोक्षत्वेपिप्रत्यक्षसिद्धार्थानुवादित्वमात्रेण प्रत्यक्षत्वाभिमानात् । द्वितीयेपियदींद्रियव्यापारोस्तितदारत्नतत्वइवोपदेशसहकृतेंद्रियेणैवदशम

SGDF
Sri Gargeshwari Digital Foundation

त्वेऽपरोक्षधीः । यदिसनास्तितदाधर्मवांस्त्वमसिपर्वतोग्निमानित्यादाविवविशेष्यस्यप्रत्यक्षत्वेपिवि
शेषणेदशमत्वेपरोक्षधीरेव । तत्राप्यपरोक्षेतिमयोच्यमानत्वात्प्रतीतिकलहोयंनिरवधिकइतिचेत्
नतावच्छब्दस्यापरोक्षधीहेतुत्वंस्वाभाविकं । अतिप्रसंगात् । नाप्यपरोक्षविषयकत्वनिमित्तकं ।
जीवाःपरमात्मनोनभिद्यंतेआत्मत्वादित्यादिलिंगजन्यायाः श्रवणात्प्रागापततोवेदांतजन्यायाभा
षाप्रबंधजन्याया अनधीतवेदांतजन्यायाश्चैक्यप्रतीतेरापरोक्ष्यापातेनश्रवणनियमादेरयोगात् । किं
च अर्थस्यापरोक्षत्वंनतावदपरोक्षधीरूपत्वं । तस्यब्रह्मणिसत्त्वेपिदशमत्वादावसत्त्वात् । चैत्रस्याप
रोक्षज्ञानेमैत्रस्यशब्दादिनासाक्षात्कारादर्शनाच्च । नाप्यपरोक्षव्यवहारविषयत्वं । व्यवहारापरो
क्ष्यस्यपरोक्षविषयत्वरूपत्वेऽन्योन्याश्रयात् । अपरोक्षोयमित्येवंरूपत्वेत्वज्ञानावृतेऐक्येतदभावात् ।
त्वयापिनप्रकाशतइत्यादिव्यवहारार्थमेवावरणकल्पनात् । उक्तव्यवहारयोग्यत्वरूपत्वेभित्तिव्य
वहितेघटेशब्दादपरोक्षधीप्रसंगात् । अपरोक्षज्ञानजन्यत्वरूपत्वेचवक्ष्यमाणपक्षांतर्भावात् । त
स्मादर्थस्यापरोक्षधीविषयत्वमेवापरोक्षत्वंवाच्यं । तत्रचैतज्ज्ञानविषयत्वेनतदुक्तावन्योन्याश्रया
त् । ज्ञानांतराभिप्रायेतुकेषांचिदपरोक्षेस्वर्गादावस्माकंशब्दादपरोक्षधीःस्यात् । एकपुरुषाभिप्राये
चपूर्वेद्युश्चैत्रस्यापरोक्षेइदानींशब्दादपरोक्षधीःस्यात् । एककालाभिप्रायेचप्रत्यक्षेऽग्नौलिंगाच्छब्दा

च्चापरोक्षधीःस्यात् । नचेष्टापत्तिः । करणशक्तिमतिलंघ्यज्ञानस्यविषयानुसारित्वेचाक्षुषादिविषय
कस्मृत्यनुमितिस्पार्शनज्ञानादेश्चाक्षुषत्वाद्यापातात् । लिंगशब्दादिसिद्धेचेंद्रियात्परोक्षधीप्रसंगा
त् । अनुमितेचशब्दादनुमितिप्रसंगात् । एवंच परोक्षेचापरोक्षेवचाक्षुषेस्पार्शनीवच । अपरोक्षे
परोक्षाधीर्युक्ताकरणशक्तितः । तस्माद्येविरुद्धेज्ञानत्वावांतरजातीपरोक्षत्वापरोक्षत्वेतदाश्रययो
र्ज्ञानयोर्भिन्नत्वात् यश्चैकोविषयस्तत्रविरुद्धजात्यभावाद्विरुद्धजात्याधारज्ञानविषयत्वस्यचचाक्षुष
स्पार्शनज्ञानविषयत्वस्येवैकस्मिन्नसंभवात्प्रत्यक्षविषयमपिशाब्दज्ञानंपरोक्षमेव । किंचधर्मिमात्रस्य
प्रत्यक्षत्वाभिप्रायेप्रत्यक्षेघटादौ अयंगुरुः पर्वतोग्निमानित्यादिशब्दादपरोक्षधीःस्यात् । नापिसप्र
काराभिप्रायं । प्रकृतेतदभावात् । नहिदशमस्त्वमसि तत्त्वमसीत्यादिबोधकबोध्यंदशमत्वैक्या
दिप्रागपरोक्षं । वाक्यवैयर्थ्यात् । नचस्वरूपाभिन्नेऐक्येस्वरूपज्ञानेनापरोक्षतोभात्यपिवृत्त्यर्थंश
ब्दः । त्वयास्वरूपज्ञानप्रयुक्तभानप्रतिबंधार्थमेवावरणकल्पनात् । एतेनापरोक्षेब्रह्मणिपरोक्षधीः
परोक्षेकामिन्यादावपरोक्षधीरिवाप्रमाणंस्यादितिनिरस्तं । स्मृतेऽनुभववत् अनुमितेश्चाविंद्रियेणा
परोक्षधीवत् पूर्वंपरोक्षेपश्चाद्योगजसाक्षात्कारवत् परोक्षतत्तायामपरोक्षप्रत्यभिज्ञानवच्चापरोक्ष
ज्ञानविषयेर्थेपरोक्षत्वजात्याधारज्ञानोदयेप्यपरोक्षस्यपरोक्षत्वेनानुल्लेखेनाप्रामाण्यानापत्तेः । का

SGDF Sanskrit Digital Foundation

भिन्नीसाक्षात्कारस्तुबाधादप्रमाणं । नतुपरोक्षार्थविषयकापरोक्षत्वजात्याधारत्वात् । तथात्वेयोग
जसाक्षात्कारादेरप्यप्रामाण्यप्रसंगात् । किंचैवंशब्दादेवापरोक्षधीरितित्वदेकदेशिमतेदोषाभावे
पिइंद्रियमादावभिज्ञानमुत्पाद्यसंस्कारसचिवंप्रत्यभिज्ञानमिव शब्दआदौपरोक्षज्ञानमुत्पाद्यमन
नादिसाध्यप्रतिबंधनिवृत्तिसचिवोपरोक्षज्ञानंजनयतीतित्वदेकदेशिमतेप्रथमोत्पन्नपरोक्षज्ञानस्या
प्यप्रामाण्यंस्यात् । एतेनप्रमातारमपेक्ष्यदेशतःकालतःस्वभावतोवाविप्रकृष्टएवपरोक्षज्ञाननियमा
त्स्वप्रकाशप्रमातृचैतन्याभिन्नत्वेनाविप्रकृष्टेब्रह्मणिपरोक्षधीरेवनयुक्तेतिनिरस्तं । प्रत्यक्षेवह्नौलिंगा
दप्यपरोक्षधीप्रसंगात् । अविप्रकृष्टएवापरोक्षज्ञाननियमेनविप्रकृष्टतत्ताख्याख्यादाविंद्रियजन्यप्र
त्यभिज्ञाख्याख्यादिज्ञानस्यापिपरोक्षत्वापाताच्च । तत्रसंस्कारादेरेवसन्निकर्षत्वेऽत्राप्यावरणकृतवि
प्रकर्षस्यसत्त्वात् वृत्तेरावरणनिवर्तकत्वेपिवृत्त्युदयात्प्राग्विप्रकर्षात् पराचीनस्यचाविप्रकर्षस्यप्रा
चीनवृत्त्याआपरोक्ष्येऽतंत्रत्वात् । ननुकर्तृत्वादिरूपापरोक्षाध्यासस्यपरोक्षप्रमयाऽनिवृत्तेरौपनिषदे
ब्रह्मणिमानांतराप्रवृत्तेःशब्दादपरोक्षज्ञानानुत्पत्तावनिर्मोक्षःस्यादितिचेन्न । तस्यज्ञाननिवर्त्यताया
निरस्तत्वात् । निदिध्यासनसंस्कृतमनसाऽपरोक्षधीसंभवाच्च । "यन्मनसानमनुत" इत्यादिश्रुतिस्तु
"मनसैवानुद्रष्टव्य" मित्यादिश्रुतिविरोधेनापक्वमनोविषया । "मनसातुविशुद्धेने" त्यादिश्रुतेः ।

SGDF
Sri Gargeshwari Digital Foundation

अन्यथा शब्दस्यकरणत्वेपि “यतोवाचोनिवर्तंत” इत्यादिश्रुतिबाधःस्यात् । मनसानकाप्यपरोक्ष धीर्दृष्टेतिचेन्न । योगजसाक्षात्कारदर्शनात् । शब्देनापितद्दर्शनाच्च । मनसस्तत्करणत्वेउक्तश्रुतेरिवशब्दस्यतत्करणत्वेश्रुत्यादेरदर्शनाच्च । “औपनिषदःपुरुष” इत्यादितुमनसःकरणत्वेप्यौपनिषदनिदिध्यासनापेक्षत्वात् । तदुक्तं शब्देनदृश्यतेब्रह्मेत्यत्रमानंनदृश्यते । मनसादृश्यतेब्रह्मेत्यत्र मानंतुदृश्यतेइति । शाब्दप्रत्यक्षभंगः ॥ ९ ॥ ७ ॥ तस्मात्साधनाध्यायोक्तन्यायैर्मोक्षायश्रवणादि साध्यनिदिध्यासनजन्यसाक्षात्कारेणेश्वरःप्रसन्नीकरणीयइतिसिद्धं ॥ ७ ॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्याणांश्रीमद्ब्रह्मण्यतीर्थपूज्यपादानांशिष्येणव्यासयतिनासंगृहीतेन्यायामृतेतृतीयः परिच्छेदः ॥ ७ ॥ ३ ॥ ॥ ॥ ॥ ॥ ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ इतिश्रीमद्व्यायास्मृतेतृतीयःपरिच्छेदः ॥

॥ अथश्रीमद्व्यायास्मृतेचतुर्थःपरिच्छेदः ॥

SGDF
Sri Gargeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ समस्तवेदसंवेद्यंव्यासंसर्वगुणार्णवं । विवृणोमिप्र
णम्याहंपरिच्छेदंचतुर्थकं ॥ १ ॥ ईश्वरप्रसादोमोक्षहेतुरित्येतदाक्षिपति ॥ नन्विति ॥ वृत्तिनिवृत्तौमोक्षनिवृत्तिंपरिहरति ॥
उपलक्षणइति ॥ निवृत्तिरिति ॥ ज्ञानंवृत्तिः तथाउपलक्षितआत्मामोहहानिः । नन्वविद्यानिवृत्तेरात्मान्यत्वेऽनिर्वाच्यत्वं

॥ नन्वेतदयुक्तं ।अविद्यानिवृत्तिर्हिमोक्षः।ज्ञानंचाविद्यांदीपइवांधकारंप्रसादनिरपेक्षमेवनिवर्त
यति । स्यादेतत् । अविद्यानिवृत्तेरात्ममात्रत्वेनसाध्यत्वं । अनात्मत्वेतुसत्त्वेऽद्वैतहानिः । अ
निर्वाच्यत्वेऽविद्यातत्कार्ययोरन्यतरत्वंस्यात् । नचवृत्तिविशिष्टआत्माऽज्ञानहानिः । वृत्तिनि
वृत्तौमोक्षनिवृत्त्यापातादितिचेत् वृत्त्युपलक्षितस्यात्मनोऽज्ञानहानित्वात् । उपलक्षणेनिवृत्ते
पिमुक्तेरनिवृत्तिः पाकेनिवृत्तेपिपाचकस्येवयुक्ता । उक्तंहि "निवृत्तिरात्मामोहस्यज्ञातत्वेनोप
लक्षितः । उपलक्षणहानेपिस्यान्मुक्तिःपाचकादिवदि" ति । यद्वा आत्मान्यैवनिवृत्तिः । तत्र
चानिर्वाच्यत्वंसदसद्विलक्षणत्वंचेन्निवृत्तिरनिर्वाच्यैव अविद्याद्यन्यतरत्वेतुनिवृत्तिमत्त्वंतंत्रं ।

स्यादित्याशंक्यसदसद्विलक्षणत्वमनिर्वाच्यत्वमितिमतेइष्टापत्तिरित्याह ॥ तत्रचेति ॥ नन्वविद्यानिवृत्तेरनिर्वाच्यत्वेऽविद्या
तत्कार्यान्यतरत्वापत्त्यातस्याज्ञाननिवर्त्यत्वंस्यादित्यतआह॥ अविद्यादीति ॥ अविद्यानिवृत्तौसामान्यस्यैवाभावात्तद्विशेषापा

SGDF
Sri Gurgeshwari Digital Foundation

दनमयुक्तमित्यतआह ॥ नचनिवृत्तेरिति ॥ प्रत्यपीपदन् प्रतिपादयामासुः तस्मादात्मत्वस्वरूपाअविद्यानिवृत्तिस्तदतिरिक्तत्वेतिपक्षद्वयं द्वितीयेप्यनिर्वाच्यावापंचमप्रकारावासत्यावेतिपक्षत्रयमित्युपसंहरति ॥ इतीति ॥ यत्किंचिद्वृत्त्युपलक्षिता

नचनिवृत्तेर्निवृत्तिर्युक्ता । अनिर्वाच्यत्वंज्ञाननिवर्त्यत्वरूपंबाध्यत्वंबाध्यत्वंचेत् पंचमप्रकारः । उक्तंहि “नसन्नासन्नसदसन्नानिर्वाच्यश्चतत्क्षयः । यक्षानुरूपोबलिरित्याचार्याःप्रत्यपीपदन्नि” ति । एवंचनाद्वैतहानिः । सतोद्वितीयस्याभावात् । नाप्यविद्याद्यन्यतरत्वापत्तिः । अनिर्वाच्यत्वाभावात् । अथवा भावाद्वैतमतेआत्मान्यासत्यैवनिवृत्तिरिति । उच्यते । नतावदात्मान्यत्वपक्षोयुक्तः । आत्मावृत्तिव्याप्योपिनेतिमतेऽपसिद्धांतात् । वृत्त्युपलक्षितस्यवृत्तेःपश्चादिवपूर्वमपिसत्त्वाच । पाकोपलक्षितोपिपाकात्पूर्वमस्त्येव । किंतुतदज्ञानात्पाचकइत्यव्यवहारः । नचात्रमुक्तइतिव्यवहारःसाध्यः । किंतुमुक्तिः । एवंच वृत्त्योपलक्षितचितःपश्चादिवपुरापिच । सद्भावान्मोहकालेपिमोहहानिःप्रसज्यते ।

त्मनःसंसारकालेपिसत्त्वेनातिप्रसंगात् श्रवणादिजन्यात्मविषयकवृत्त्युपलक्षितआत्माऽज्ञाननिवृत्तिरितिवाच्यं । तत्रचापसिद्धांतइत्याह ॥ आत्मेति ॥ नचात्रेति ॥ वृत्तेःपूर्वमुक्तइतिव्यवहाराभावेपिपूर्णानंदप्रकाशरूपमुक्तिःस्यादेव पाकेनिवृत्तेपि

पाचकस्यानिवृत्तेरितिभावः । पराभिमतपाचकत्वं किंपाकजनककृत्याश्रयत्वंवा पापकर्तृत्वयोग्यत्वंवा । आद्येआह ॥ पाककर्तृत्वमिति ॥ तथाचसनदृष्टांतइत्यर्थः । द्वितीयेयद्यपिदृष्टांतेतत्संभवति तथापिदार्ष्टांतिकेतन्नास्तीत्याह ॥ कर्तृत्वेत्यादि ॥

किंच पाककर्तृत्वंपाचकत्वमितिमतेपश्चान्नपाचकः । तद्व्यवहारस्तुभ्रष्टाधिकारेदंडनायकइतिवद्भूतपूर्वगत्यैव । कर्तृत्वावच्छेदकावच्छिन्नत्वरूपंकर्तृत्वात्यंताभावानधिकरणत्वरूपंवातद्योग्यत्वं पाकानवच्छिन्नाधिकरणताकपाकबोधितव्यावृत्त्यधिकरणत्वरूपंपाकोपलक्षितत्वंवापाचकत्वमितिमतेपितदुभयंपश्चादप्यस्ति । नचेहमुक्तावात्मातिरिक्तंयोग्यत्वाद्यस्ति । चिन्मात्रंतुप्रागपि । एवंच । वृत्त्योपलक्षितस्यापिचिन्मात्रत्वेनसाध्यता । पाकोपलक्षितस्येवत्वाधिक्येसविशेषता ॥ किंचवृत्त्युपलक्षितात्मरूपस्याज्ञानध्वंसस्यप्रागेवसिद्धत्वेश्रवणादिवैयर्थ्यं । असिद्धत्वेनात्ममात्रत्वं । आत्मनोनित्यसिद्धत्वात् । अभावापलापपक्षेपिकैवल्यादिविशिष्टस्यैवाधिकरणस्याभावत्वात् । अन्यथातत्राप्युक्तदोषात् । आत्मान्यत्वेतुमुक्तावप्यविद्याभेदयोरनिवृत्तिः । [एवंच प्रागेवसिद्धोमोक्षश्चेच्छ्रवणादिश्रमोवृथा । असिद्धौनात्ममात्रत्वमन्यत्वेसद्वितीयता ।] किंचेयंप्रक्रियाकिमन्यत्रापि इहैववा । नाद्यः । बिंबप्रतिबिंबैक्याज्ञाननिवृत्तावपिज्ञातंतदैक्यमित्यापत्त्यातदैक्यधीकालेसोपाधिकतद्भेदचिन्मात्रमिति ॥ तथाचप्रागपिमुक्तिःस्यादित्यर्थः ॥ इयंप्रक्रियेति ॥ अज्ञाननिवृत्तिर्ज्ञानाधिष्ठानरूपेत्येवंरूपाप्रक्रियेत्यर्थः

SGDF

॥ नियामकेति ॥ एतत्प्रक्रियांविनाऽनुपपत्त्यभावादित्यर्थः । नन्वज्ञाननिवृत्तेरधिष्ठानातिरिक्तत्वेविश्वमिथ्यात्वश्रुतिपर्यालो
चनयानिवृत्तेरपिनिवृत्त्यापत्तिरतस्तदेवनियामकमित्यतआह ॥ विश्वमिथ्यात्वेति ॥ विश्वमिथ्यात्वश्रुतिर्हिअज्ञाननिवृत्तेर

भ्रमोपादानाज्ञानानुवृत्त्ययोगात् । नांत्यः । नियामकाभावात् । विश्वमिथ्यात्वश्रुतेर्ज्ञानाद्विश्वनि
वृत्तिपरत्वेनस्वतात्पर्यविषयनिवृत्तीतरामिथ्यात्वपरत्वोपपत्तेः । अपिच वृत्त्युपलक्षितआत्माजीव
न्मुक्तावप्यस्तीतितदापिमोक्षःस्यात् । नचसर्वकर्मनाशोपलक्षितत्वेसतिवृत्त्युपलक्षितआत्मामोक्षः
तदाचारब्धकर्मास्तीतिवाच्यं । विशेष्यवैयर्थ्यात् । कर्मनाशोपलक्षितस्यकर्मकालेपिसत्त्वाच्च । अवि
द्यानाशइवकर्मनाशेऽप्यात्ममात्रत्वेतदन्यत्वेचोक्तदोषाच्च । एतेन वृत्तिनिवृत्त्युपलक्षितआत्मामु
क्तिः सचवृत्तेःप्राङ्नास्तीतिनिरस्तं । वृत्तिनिवृत्तेरात्मत्वादावुक्तदोषात् । जीवन्मुक्तस्यसुषुप्त्यादौ
वृत्तिनिवृत्त्युपलक्षितस्यसत्वाच्च । एतेनैवचरमसाक्षात्कारेणनिवृत्तेनतेनवोपलक्षितआत्मामोक्षः ।
जीवन्मुक्तौचनचरमःसाक्षात्कारोस्तीतिनिरस्तं । चरमसाक्षात्कारात्पश्चादिवपूर्वमपितदुपलक्षित

धिष्ठानरूपत्वं(न)साक्षाद्वक्ति । ज्ञानाद्विश्वनिवृत्तेरेवतदर्थत्वात् । किंतूक्तविधयानुपपत्त्या । साचान्यथाप्युपपन्ना । निषेधस्य
विहितेतरनिषेधपरत्वादितिभावः ॥ कर्मनाशोपलक्षितस्येति ॥ उपलक्षणप्रागभावकालेपितदुपलक्षितस्वरूपमात्रस्यसत्त्वा

दित्यर्थः ॥ पूर्वस्मादिति ॥ ज्ञानादित्यर्थः ॥ आनंदाभिव्यक्तीति ॥ वृत्तावानंदाभिव्यक्तिरूपविशेषसत्त्वेतस्याअसाध्य
त्वापातइत्यर्थः ॥ अनिर्वाच्यस्याध्यस्तत्वेनेति ॥ अध्यस्तस्याज्ञानोपादानकत्वेनाज्ञाननिवृत्तिकालेप्यज्ञानसत्त्वापत्तिरित्य

स्यसत्त्वात् । तन्निवृत्तेरात्मत्वादौदोषोक्तेश्च । पूर्वस्माच्चरमज्ञानेआनंदाभिव्यक्तिरूपविशेषाभावे
चरमक्षणेनवाचरमश्वासेनवोपलक्षितआत्मामुक्तिरित्यापाताच्च । एवंच निवृत्तिरात्मामोहस्यज्ञा
तत्वेनोपलक्षितः । इत्येतन्नैवघटतेजीवन्मुक्तौप्रसक्तितः । किंच वेदांतश्रवणादिसाध्येनपुरुषार्थेन
भाव्यं । नचत्वन्मतेतद्युक्तं । मुक्त्यनुस्यूतस्यसुखज्ञप्तिरूपस्यात्मनःपुरुषार्थत्वेप्यसाध्यत्वात् । चर
मवृत्त्युपलक्षितस्याप्यद्वैतभंगापत्त्यासिद्धात्ममात्रत्वात् । वृत्तेस्तुसाध्यत्वेपिस्वतोपुरुषार्थत्वात् ।
तथाचात्मान्योवृत्तिसाध्यआवरणनिवृत्तिरूपआनंदप्रकाशःपुरुषार्थोवक्तव्यइतिकथमात्मैवनिवृ
त्तिः । एवंच यःपुमर्थःससाध्योनआत्मानंदचिदात्मकः । याचसाध्यावृत्तिरिष्टानतत्रपुरुषार्थता ॥
तस्मान्नाज्ञानहानिरात्मस्वरूपं । अनिर्वाच्यत्वपक्षोप्ययुक्तः । अनिर्वाच्यस्याध्यस्तत्वेनमोक्षेतद
ध्यासोपादानाज्ञानानुवृत्त्यापत्तेः । अध्यस्तस्याप्यभावत्वेननिरुपादानत्वे सघटेघटाभावाध्यास
स्यप्रपंचांतर्गतस्यघटध्वंसस्यघटान्योन्याभावस्यचज्ञानान्निवृत्तिर्नस्यात् । किंच निवृत्तेरबाध्यत्वे
र्थः ॥ अभावत्वेनेति ॥ भावरूपस्याध्यस्तस्याज्ञानोपादानकत्वमित्यंगीकारेनिवृत्तिःस्यादितिभावः ॥ निवृत्तेरित्यनुषंगः ।

SGDF

ननुज्ञाननिवर्त्यत्वाभावेपिप्रतिपन्नोपाधावित्यादिरूपंबाध्यत्वंनिवृत्तौभविष्यतीत्यतआह ॥ प्रतिपन्नेति ॥ तद्व्याप्तत्वात् ॥ ज्ञाननिवर्त्यत्वव्याप्तत्वात् । अभावात् । मुक्ताविति शेषः ॥ नद्वितीयइत्याह ॥ तन्मात्रस्येति ॥ तत्वस्थितौ । तत्वव्यवस्थापने

कथमबाध्यरूपसद्वैलक्षण्यं । बाध्यत्वेतुतन्निवृत्तिःस्यात् । ज्ञानान्निवृत्तेरेवबाध्यत्वात् । प्रतिपन्नोपाधौत्रैकालिकसत्त्वनिषेधस्यापितद्व्याप्तत्वात् । निवृत्तेर्निवृत्तिरयुक्तेतिचेन्न । अतएवानिष्टत्वेनतवतदापादनात् । नचनिवृत्तेर्निवृत्तिरस्तु अज्ञानानुन्मज्जनंतुप्रागभावनिवृत्तिरूपघटनाशेपिप्रागभावस्येवयुक्तमितिवाच्यं । अप्रामाणिकानंतनिवृत्त्यापातात् आत्मान्यस्याभावात् । तन्मात्रस्यचाहेतुत्वेननिवृत्तेर्निवृत्तिहेत्वभावाच्च । पंचमप्रकारत्वपक्षोप्ययुक्तः । चतुर्थप्रकारत्वस्यैवनिरस्तत्वेनतस्याष्टमरसतुल्यत्वात् । बौद्धैरपि "नसन्नासन्नसदसन्नचाप्यनुभयात्मकं । चतुष्कोटिविनिर्मुक्तंतत्वंमाध्यमिकाविदु"रित्युक्तत्वेनतत्वस्थितौबौद्धमतानुसरणापाताच्च।बाध्यत्वाबाध्यत्वयोर्दोषोक्तेश्च। मिथ्यात्वमनिर्वाच्यत्वादिकमितिमतेदृश्यत्वादेर्निवृत्तौव्यभिचाराच्च । प्रातिभासिकव्यावहारिकान्यस्यास्यपारमार्थिकत्वेनाद्वैतहानेश्च । प्रतियोगिनोऽनिर्वाच्यत्वेनाज्ञाननाशस्यापिघटनाशवद्

इत्यर्थः ॥ व्यभिचाराच्चेति ॥ तत्वस्थितौपंचमप्रकारत्वपक्षेसदसद्वैलक्षण्यरूपानिर्वाच्यत्वरूपमिथ्यात्वाभावादित्यर्थः ॥ प्रति

SGDF
Sri Gargeshwari Digital Foundation

योगिनइति ॥ प्रतियोगितद्ध्वंसयोःसमानसत्ताकत्वेहिविरोधः । अन्यथाविरोधएवनस्यादितिभावः ॥ अभावद्वैतस्येति ॥ भावापेक्षयाऽभावस्यात्यंतगुरुत्वादितिभावः । प्रागेवसिद्धइत्ययंश्लोकः क्वचित्पुस्तकेकिंचेयंप्रक्रियेत्यादिग्रंथात्पूर्वंपठ्यते । अत्रैव तुयुक्तःपाठः । तस्मादविद्यानिवृत्तेरात्ममात्रत्वमितिमतं १ आत्मान्यत्वेपिसदसद्वैलक्षण्यरूपानिर्वाच्यत्वमितिमतं २ ज्ञाननि

निर्वाच्यत्वावश्यंभावाच्च । प्रतियोगिवैलक्षण्येपिसदसदात्मकत्वापत्त्यापंचमप्रकारत्वासिद्धेश्च । एवंच यक्षानुरूपबलिवत्प्रतियोगिविलक्षणः । मोहध्वंसोयदितदाभवेत्सदसदात्मकः ॥ सत्त्वपक्षो प्ययुक्तः । अभावद्वैतस्यनिरासात् । ध्वंसस्यप्रतियोगिसमसत्ताकत्वेनाविद्यायाअपिसत्त्वापत्तेश्च । एवंच प्रागेवसिद्धोमोक्षश्चेच्छ्रवणादिश्रमोवृथा । असिद्धोनात्ममात्रत्वमन्यत्वेसद्वितीयता ॥ अ विद्यानिवृत्तिभंगः ॥ १ ॥ ७ ॥ यच्चोच्यतेब्रह्मरूपायाःस्वप्रकाशचितोऽज्ञानसाधकत्वेनतदनिवर्त कत्वेपितद्विषयावेदांतश्रवणादिजन्याऽपरोक्षवृत्तिर्निवर्त्तिकेति । तन्न । असत्यात्सत्यसिद्धेर्निर स्तत्वेनासत्ययावृत्त्यासत्यायानिवृत्तेरसिद्धेः । अज्ञानेनजानामीतिज्ञप्तिरूपचिद्विरोधस्यैवानुभवे नाज्ञप्तिरूपवृत्तिविरोधस्यासंभवाच्च । चिताप्रकाशमानेसुखादावज्ञानादर्शनाच्च । वृत्तेर्जातिविशे

वर्त्यत्वरूपंबाध्यत्वमनिर्वाच्यत्वमितिमतेपंचमप्रकारत्वमतं ३ आत्मान्यत्वपक्षेपिभावाद्वैतमतेसत्त्वंचेतिमतमिति ४ मतचतु ष्टयमप्ययुक्तमितिद्रष्टव्यं ॥ ७ ॥ इत्यविद्यानिवृत्तिभंगविवरणं ॥ १ ॥ ७ ॥ असत्यादिति ॥ कार्यकारणयोःसमसत्ता

SGDF
Sri Gargeshwari Digital Foundation

कत्वादित्यर्थः । ननुचिन्मात्रंनिर्विशेषात्मप्रकाशकं । अतोनाज्ञाननाशकमित्यतआह ॥ नचनिर्विशेषइति ॥ ननुचैतन्येऽ
ज्ञानसहभावदर्शनादविरोधित्वमित्याशंक्यवृत्तावपितद्भावोस्तीत्याह ॥ अयमिति ॥ उक्तंचैतदिति ॥ तदज्ञाननिवर्तकत्वे
तद्विषयकत्वंतंत्रं । नतुतदन्यविषयकत्वाविशेषितंतत् । अन्यथाघटपटाविवितिसमूहालंबनाद्धटाज्ञाननिवृत्तिर्नस्यादित्युक्तमित्य
षेणैवतन्निवर्तकत्वेइच्छादिनिवर्त्यद्वेषादिवदज्ञानस्यसत्त्वापत्त्याशुक्त्यादिज्ञानवदर्थप्रकाशकत्वेनत
न्निवर्तकत्वेवक्तव्येचैतन्यस्यापितत्त्वेनतन्निवर्तकत्वावश्यंभावाच्च । नचनिर्विशेषेवृत्तिश्चैतन्याद
धिकप्रकाशिका । त्वन्मतेऽयंघटइत्यादिवृत्तावपिघटस्यप्रकाशेपिचितोप्रकाशाच्च । उक्तंचैतदविद्या
विषयभंगे । किंच तन्निवर्तकत्वेतत्स्थित्यसहिष्णुस्थितिकत्वरूपविरोधस्यतंत्रत्वात्कार्यस्यचोपादा
नेनाविरोधान्नवृत्तिः स्वोपादानाज्ञाननिवर्तिका । उपांत्यजन्योंत्यःशब्दस्तन्निवर्तकोपिनतदुपादान
कः । आतंचनादिनानिवृत्तक्षीरत्वगोमयत्वाद्यवस्थाएवचतत्तदवयवादधिवृश्चिकाद्युपादानानीति
नक्वापिकार्येणोपादाननाशः । एतेनवृत्तिप्रतिबिंबिताचिदेवाविद्यानिवर्तिका । उक्तंहि "तृणादेर्भा
र्थः । त्वन्मतेप्रत्युतवृत्तेश्चरमज्ञानविरोधित्वमनुपपन्नमित्याह ॥ किंचेति ॥ तन्निवर्तकत्वइति ॥ "तरतिशोकमात्मवित्
सोविद्याग्रंथिंविकरतिहसोम्ये" त्यादिश्रुतिस्तु अज्ञानानुपादानकवृत्तिपक्षेप्युपपन्नेतिध्येयं । आतंचनं क्षीरेदध्यादिप्रक्षेपः ॥
एतेनेति ॥ चिन्मात्रस्यैवाज्ञाननिवर्तकत्वेवक्तव्येविशिष्टस्यतत्कल्पनेमानाभावेनेत्यर्थः ।ननुवृत्तिमात्रसत्त्वेचिन्मात्रसत्त्वेवाऽज्ञा

SGDF
Sri Gargeshwari Digital Foundation

नानिवृत्तिरेवतत्रमानमित्यतआह ॥ अपरोक्षेति ॥ वृत्तिर्वातत्प्रतिबिंबितंचैतन्यंवानिवर्तकमस्तु तथापितद्विषयोदुर्निरूप
इति नतस्यज्ञानत्वमित्यभिप्रेत्याह ॥ किंचेति ॥ ननुचात्मनोवृत्तिविषयत्वेपिचिदविषयत्वाददृश्यत्वमुपपत्स्यतइत्यतआह ॥
उक्तंचैतदिति ॥ घटादावपिवृत्तिभिन्नदृशोसिद्धिरित्युक्तमित्यर्थः । वृत्तेरज्ञाननिवर्तकत्वेतन्निवर्तकस्यान्यस्याभावेनतदनिवृ
त्त्यापत्त्याचितएवाज्ञाननिवर्तकत्वंवाच्यं । तत्रचोक्तदोषाइत्यभिसंधायाह ॥ अपिचेति ॥ अतिप्रसंगेनेति ॥ क्षणिकत्वा

सिकाप्येषासूर्यदीप्तिस्तृणंदहेत् । सूर्यकांतमुपारुह्यतंन्यायंचितियोजयेदि”तिनिरस्तं । अपरोक्षवृत्तौ
सत्यांचिदप्रतिबिंबनेनानिवृत्तेरदर्शनाच्च । किंच निवर्तकस्यज्ञानस्यनतावच्छुद्धात्माविषयः । तस्याद्द
श्यत्वात् । उक्तंचैतद्दृश्यत्वभंगे । नाप्यन्यः । तस्याध्यस्तत्वेनतज्ज्ञानस्यभ्रांतित्वापातात् । अपि
चांत्यज्ञानस्यानिवर्तकंस्वयमेववान्यद्वा । नाद्यः । प्रागभावःप्रतियोगिहेतुरितिपक्षेतन्मात्रस्याहेतुत्व
वत्प्रतियोगीध्वंसहेतुरितिपक्षेप्यतिप्रसंगेनतन्मात्रस्याहेतुत्वात् । दग्धदाह्यदहनस्यापीशेच्छादिनै

पत्तिरूपेणेत्यर्थः । ननु “वेणुसंघर्षजोवह्निर्दग्ध्वाशाम्यतितद्वनं । एवंगुणव्यत्ययजावृत्तिःशाम्यतितद्यथेति” तत्राह ॥ दग्धे
ति ॥ दाह्यंदग्धंयेनदहनेनतस्यापीत्यर्थः । तत्रापिस्वमात्रनिवर्त्यत्वंनसंमतमित्याह ॥ ईशेच्छेति ॥ “नऋतेत्वत्क्रियतेकिंच
नार” इतिश्रुतेः “व्यतिरेकानवस्थितेश्चानपेक्षत्वादि” तिसूत्राच्चेतिभावः । नन्वथापिकतकरजोवदुपपद्यतइत्याशंकायाअपि

SGDF
Sri Gargeshwari Digital Foundation

ईश्वरेच्छादिनैवनाशादित्युक्तरीत्यापरिहारेपिविशेषंवक्तुमाह ॥ कतकरजस्त्विति ॥ चिल्लबीजेत्यपभ्रष्टभाषा ॥ नापीति ॥
ईशेच्छादिनैवनाशादित्यर्थः । कुतःपंकंननाशयतीत्यतआह ॥ विश्लेषेति ॥ जलमिश्रितपंकंकतकरजःसंबंधेनप्रशिथिलावय
वंसत्जलंविहायजलाधोभांडमध्येऽवस्थितंदृश्यते अतोनपंकंस्वरूपेणनाशयतीत्यर्थः । अंत्यज्ञाननिवर्तकत्वेनोच्यमानमन्यत्
शुद्धात्ममात्रंतदन्यद्वानाद्यइत्याह ॥ शुद्धेति ॥ नद्वितीयइत्याह ॥ तदन्यस्येति ॥ निवृत्तत्वादिति ॥ वृत्त्यैवनिवृत्तत्वेन

वनाशात् । कतकरजस्तुनपंकंनाशयति । नापिस्वयंस्वेनैवनश्यति । विश्लेषमात्रदर्शनात् । नांत्यः।
शुद्धात्ममात्रस्यकिंचिदपिप्रत्यहेतुत्वात् । तदन्यस्यचनिवृत्तत्वादिति ॥ अविद्यानिवर्तकभंगः ॥२॥ छ॥
यच्चोच्यतेनवैशेषिकादीनामिवास्माकंमुक्तौदुःखनिवृत्तिमात्रं । किंतुनिरतिशयानंदस्फुरणमपि ।
उक्तंहि "तस्मादविद्यास्तमयोनित्यानंदप्रतीतितः । निःशेषदुःखोच्छेदाच्च(पुरुषार्थःपरोमत)पुमर्थः
परमामत" इति । तत्रनतावत्सुखात्मतापुरुषार्थः । सुखीस्यामितिवत्सुखंस्यामितीच्छायाअदर्श

वृत्तिनिवर्तकत्वासंभवादित्यर्थः ॥ छ ॥ अविद्यानिवर्तकभंगविवरणं ॥ २ ॥ छ ॥ यच्चोच्यतइति ॥ मायावादिभिरि
तिशेषः । परमपुरुषार्थत्वेनित्यानंदप्रतीतितः निःशेषदुःखोच्छेदाच्चेतिहेतुद्वयं । अथवा चशब्दोप्यर्थे । वैशेषिकाभिमतात्केव
लनिःशेषदुःखोच्छेदादप्यस्मन्मतेऽविद्यास्तमयःपरःपुरुषार्थः । तत्रहेतुर्नित्यानंदप्रतीतितइति । तथाचन्त्यकारिकयानवैशेषि

कादीनामिवेत्युक्तप्रमेयसंग्रहइतिमंतव्यं । ननुसुखंस्यामित्येवेच्छाभवतीतिचेत्तत्राह ॥ स्वतइति ॥ तथाच्चप्रकारांतरायोगात्
सुखीस्यामित्येवमेवेच्छायादर्शनात् स्वकीयं स्वसंबंधीतियावत् सुखंपुरुषार्थइत्येववक्तव्यं । तच्चत्वन्मतेनसंभवति । सुखस्यस
त्त्वेनसंबंधघटितस्वकीयत्वस्यत्वन्मतेऽसंभवादितिपूर्वग्रंथस्यभावोवर्णनीयः । अन्यथाअतएवेत्यादिग्रंथासंगतेरित्यवधेयं । न
नुस्वकीयंसुखंपुरुषार्थइतिनोच्यते । किंनामापरकीयंसुखंपुरुषार्थइत्येवोच्यते तच्चस्वरूपत्वेपियुज्यतइत्यतआह ॥ अतएवेति ॥
अतएवेत्युक्तंविशदयति ॥ तथेति ॥ अपरकीयंसुखंमेस्यादितीच्छायाअभावादित्यर्थः ॥ गौरवाच्चेति ॥ स्वकीयत्वस्यभाव
रूपत्वेनतदपेक्षयाऽपरकीयत्वस्याभावरूपत्वेनगुरुत्वादित्यर्थः । इतोपिनोक्तापरकीयत्वस्यपुरुषार्थत्वप्रयोजकत्वंयुक्तमित्याह ॥

नात् । स्वतःपुरुषार्थेचेच्छायाअनियम्यत्वात् । अन्यथा आत्मनाशादिरपि बौद्धादिनियमितेच्छ
यापुमर्थःस्यात् । अतएवनापरकीयंसुखंपुरुषार्थः । तथेच्छाभावाद्गौरवाच्च । सुखसाधनेपरकीयेप्य

सुखसाधनइति ॥ सुखवत्तत्साधनमपितावत्पुरुषार्थः । सुखवत्तत्साधनस्यापीष्टत्वाविशेषात् । एवंचयथादेवदत्तयज्ञदत्ता
भ्यांमिलित्वानिर्मितःप्रासादउभयोरपिसुखसाधनंभवति । तत्रदेवदत्तस्यसुखसाधनंनस्यात् । यज्ञदत्तसंबंधित्वेनापरकीयत्व
स्याभावात् । अस्मदुक्तंस्वकीयत्वरूपंपुरुषार्थत्वप्रयोजकमस्ति । एवंचसुखसाधनेपरकीयत्वेनत्वदुक्तप्रयोजकशून्येपिप्रासादेस्व
कीयेऽस्मदुक्तप्रयोजकोपेतेदेवदत्तसुखसाधनत्वेनपुरुषार्थत्वस्यदर्शनात् । व्यतिरेकव्यभिचारस्त्वत्प्रयोजकस्य । अस्मदुक्तस्य
त्वन्वयव्याप्तिरस्ति । तथाऽपरकीयेपरोक्तप्रयोजकवतिचंद्रमंडलतक्षकचूडामण्यादौपरकीयेस्वकीयत्वाभावेनापुरुषार्थत्वदर्श

नात् । तस्यपुरुषकृत्युत्पाद्यत्वाभावेनापुरुषार्थत्वात् । त्वदुक्तप्रयोजकस्यान्वयव्यभिचारः । अस्मदुक्तस्यतुव्यतिरेकव्याप्तिर स्तीतिभावः । नन्वेतावतासुखसाधननिष्ठपुरुषार्थत्वएवस्वकीयत्वापरकीयत्वयोःप्रयोजकत्वाप्रयोजकत्वेनतुसुखइत्यतआह ॥ इष्टत्वाविशेषादिति ॥ तथैवेति ॥ स्वकीयत्वेनैवदुःखवैपरीत्येनपुमर्थत्वादित्यर्थः । संसारिणः पुरुषार्थप्रसंगादित्यन्वयः । मुक्तस्वरूपसुखेसंसारिणंप्रतिपरकीयत्वोपाधेरविद्यांतःकरणादेर्नष्टत्वेनस्वरूपसुखस्यैकत्वादितिभावः ॥ सुप्तेति ॥ जाग्रन्मैत्रं

स्वकीयेऽपुरुषार्थत्वस्यचदर्शनेनेष्टत्वाविशेषात्सुखेपितत्कल्पनाच्च । दुःखतत्साधनयोःस्वकीय तयैवापुमर्थत्वस्यदर्शनेनसुखादेरपितथैवपुमर्थत्वाच्च । त्वन्मतेऽपरकीयेनमुक्तस्वरूपसुखेनसं सारिणः सुप्तचैत्रस्वरूपसुखेन जाग्रतोमैत्रस्यच पुरुषार्थप्रसंगाच्च । नापिसुखापरोक्ष्यंपुरुषा र्थः । ईश्वरादीनामस्मदादिसुखदुःखापरोक्ष्येणार्थानर्थप्रसंगात् । एतेन उपलब्धानामेवसुख साधनानांपुरुषार्थत्वादिष्टत्वाविशेषात्सुखमप्युपलब्धमेवपुरुषार्थोनतुस्वसंबद्धंगौरवात् ।

प्रतिसुप्तचैत्रस्वरूपसुखस्यपरकीयत्वोपाधेरविद्यांतःकरणादेःसुप्तौविलयादित्याशयः ॥ एतेनेति ॥ ईश्वरादेरपिसुखापरोक्ष्य सद्भावेनानर्थप्रसंगेनेत्यर्थः । स्वर्गादीनांसुखसाधनानांपुरुषार्थत्वेपिसुखस्यकिमायातमित्यतआह ॥ इष्टत्वेति ॥ उपलब्धं साक्षात्कृतं स्वसंबद्धं स्वकीयं निर्विशेषेसंबंधासंभवादितिभावः । सुखेउपलब्धत्वंस्वसंबद्धत्वंचास्ति तत्रउपलब्धत्वमेवपुरुषा

SGDF
Sri Gargeshwari Digital Foundation

र्थत्वप्रयोजकंनसंबद्धत्वमितिकुतइत्यतआह ॥ संबंधस्त्विति ॥ तत्रदृष्टांतद्वयं अनित्यत्वेत्यादि । सुखेअनित्यत्वरूपोधर्मो स्ति । तथास्रगादिसाधनाधीनत्वरूपसाधनपारतंत्र्यरूपश्चधर्मोस्ति । एवंचयथासुखनिष्ठयोस्तयोर्नधर्मयोःप्रयोजकत्वं एवंसुख निष्ठसंबंधस्याप्यवर्जनीयसंनिधित्वमेव नप्रयोजकत्वं । नचोपलब्धत्वेप्येवमेवास्त्वितिवाच्यं । अन्वयव्यतिरेकाभ्यांसुखसा धनेतस्यप्रयोजकत्वदर्शनेनसुखेपितथाकल्पनात् । अतएवोक्तमुपलब्धानामेवेत्यादि । उपलब्धत्वमप्यप्रयोजकं परकीय

संबंधस्त्वनित्यत्वसाधनपारतंत्र्यादिवदवर्जनीयसंनिधिरितिविवरणोक्तंप्रत्युक्तं । परकीयसुखसाधनस्यो पलभ्यमानस्याप्यपुरुषार्थत्वाच्च । सुखंमेस्यादितिसंबंधइवानित्यत्वादौप्रार्थनाभावाच्च । नाप्यपरकीयस्य सुखस्यसाक्षात्कारःपुरुषार्थः । सुषुप्तस्वरूपसुखसाक्षात्कारादिनाईश्वरादेःपुरुषार्थप्रसंगात् । किंच अप रकीयसुखसाक्षात्कारोनतावत्स्वसंबद्धःस्वस्यपुरुषार्थः । मुक्तस्यसुखसाक्षात्काररूपतयातंप्रत्यपितस्या

सुखसाधनेतत्कलत्रादौस्वेनोपलब्धत्वसद्भावेपितस्यस्वंप्रतिपुरुषार्थत्वादर्शनात् । स्वकीयत्वमेवप्रयोजक मतोनावर्जनीयसन्नि धित्वंतस्येत्याशयेनदूषणांतरमाह ॥ परकीयेति ॥ तर्हिसुखनिष्ठानित्यत्वादेरपिपुरुषार्थत्वप्रयोजकत्वापातइत्यतआह ॥ सुखं मइति ॥ संबंधइवेति ॥ सुखंमइतिषष्ठ्यर्थसंबंधस्यापिप्रार्थनाकोटिनिवेशवदनित्यत्वादौतदभावादित्यर्थः । अपरकीयसुख साक्षात्कारःस्वसंबद्धःपुरुषार्थोवा स्वेतरासंबद्धःपुरुषार्थोवाअपरकीयसुखसाक्षात्काररूपत्वंवा । नाद्यइत्याह ॥ किंचेति ॥

SGDF
Sri Gargeshwari Digital Foundation

अपुरुषार्थत्वापत्तेरिति ॥ स्वसंबद्धत्वाभावादित्यर्थः । नापिद्वितीयइत्याह ॥ नापीति ॥ कुतोनेत्यतआह ॥ मुक्तेति ॥
संसारीतरेति ॥ मुक्तस्यसुखसाक्षात्काररूपत्वेनस्वशब्दोक्तसंसारीतरमुक्तासंबद्धत्वान्मुक्तस्वरूपसुखेस्वेतरासंबंधत्वसद्भावा
पुरुषार्थत्वापत्तेः । नाप्यपरकीयसुखसाक्षात्कारःस्वेतरासंबद्धःस्वस्यपुरुषार्थः । मुक्तस्वरूपेणसुखानुभ
वेनसंसारीतरासंबद्धेनसंसारिणःपुरुषार्थप्रसंगात् । नाप्यपरकीयसुखानुभवरूपतापुरुषार्थः । तादृ
शेच्छायाःकदाप्यदर्शनात् । एतेनप्रत्यक्प्रदृश्यमानमनतीतंसुखंपुरुषार्थइत्यानंदबोधोक्तंनिरस्तं । प्र
त्यक्शब्देनस्वरूपत्वस्यस्वकीयत्वस्यापरकीयत्वस्यवाविवक्षणीयत्वात् । तस्यचदूषितत्वात् । अपिच सु
खत्वेनसुखसाक्षात्कारःपुरुषार्थः । सचपरमतेनमोक्षेस्ति । एतेनपरमतेदुःखाभावस्यनदपरोक्षस्यवा
पुरुषार्थत्वंनिरस्तं । तस्मादहंसुखीतिस्वसंबंधिसुखानुभवःस्वस्यपुरुषार्थः । सचपरमतेनेतिनमोक्षःपुरुषा
र्थः । किंचायंमोक्षःकस्यपुरुषार्थः । किमहमर्थस्य किंवाचिन्मात्रस्य । नाद्यः । त्वन्मतेऽहमर्थस्यमुक्त्यन
न्वयात् । नांत्यः । अहंमुक्तःस्यामितीच्छावच्चिन्मात्रंमुक्तंस्यादितीच्छायाअदर्शनात् । उक्तंचैतदहमर्थ
स्यानात्मत्वभंगे । किंच सुखस्यदुःखाभावमात्रत्वेवैशेषिकमोक्षवदपुमर्थता । अतिरेकेसद्वितीयत्वं ।
दित्यर्थः । नापितृतीयइत्याह ॥ नापीति ॥ परमतइति ॥ मोक्षेत्वप्रत्ययार्थभूतधर्माद्यभावादित्यर्थः । किंचसुखंकेवलंदुः
खाभावमात्ररूपंवा तदतिरिक्तंवा । नाद्यइत्याह ॥ किंचेति ॥ द्वितीयेत्वाह ॥ अतिरेकइति ॥ दुःखाभावव्यतिरिक्तवस्तु

प्राप्त्यासद्वितीयत्वमित्यर्थः । अपिचमुक्तात्माकिंसुखमात्रं उतप्रकाशमात्रं यद्वासुखप्रकाशोभयरूपं । नाद्यः । सुखप्रकाशाभा
वेनापुरुषार्थत्वापत्तेः । नद्वितीयः । सुखप्रकाशत्वाभावेनकेवलप्रकाशत्वमात्रस्यापुरुषार्थत्वात् । नतृतीयः । धर्मद्वयात्मकत्वे
शुद्धात्मरूपमुक्तस्यसखंडत्वापत्तिरित्याह ॥ अपिचेत्यादिना ॥ अस्फुरणादिति ॥ त्वयादुःखाभावस्यापिस्वप्रकाशत्वानं
अपिचात्मनःसुखमात्रत्वेप्रकाशमात्रत्वेचसुखप्रकाशाभावेनापुमर्थत्वं । उभयात्मकत्वेचाखंडत्व
हानिः । किंचदुःखाभावस्यसुखस्यचतत्वतोदुःखाद्भेदेऽपसिद्धांतः । अभेदेत्वपुमर्थता । किंचस्वप्र
काशस्यसुखस्यस्वतःस्फुरणेपिदुःखाभावस्यास्फुरणादपुमर्थतेतिदिक् ॥ निर्विशेषसुखस्यपुरुषार्थत्व
भंगः ॥ ३ ॥ ५ ॥ यच्चोच्यते तत्वसाक्षात्कारेणनष्टाविद्योऽनुवृत्तदेहादिप्रतिभासश्चजीवन्मुक्तः ।
नचतत्वज्ञानादविद्यानाशेसद्यःशरीरादिनिवर्तेतेतिवाच्यं । चक्रभ्रमणवद्भयकंपादिवच्चाविद्यासं
स्कारादपितदनुवृत्तेः । नचक्रियाज्ञानयोरेवसंस्कारः । निःसारितपुष्पायांतत्पुटिकायांपुष्पवास
नादर्शनात् । विमतोनाशःसंस्कारव्याप्तः संस्कारनाशान्यत्वेसतिनाशत्वात् । ज्ञाननाशवदित्य
गीकारादितिभावः ॥ ५ ॥ निर्विशेषसुखस्यपुरुषार्थत्वभंगविवरणं ॥ ३ ॥ ५ ॥ कारणेनिवृत्तेपिकार्यानुवृत्तौदृष्टांतमाह
॥ चक्रेति ॥ कुलालेनदंडेनचक्रभ्रमणंकृत्वातत्कारणदंडापनयनेपितदुत्तरघटकादिकालपर्यंतमपिचक्रभ्रमणानुवृत्तिदर्शनादि
त्यर्थः ॥ भयेत्यादि ॥ बाधकज्ञानेनसर्पादिभ्रमनिवृत्तावपिपुनर्भयकंपादेस्तत्संस्कारेणदर्शनादित्यर्थः॥क्रियाज्ञानयोरेवेति॥

SGDF

नाविद्यायाइत्येवार्थः । संस्कारनाशेपुनःसंस्काराभावेनसाध्याभावाद्व्यभिचारवारणायसत्यंतं । संस्कारात्यंताभावेसंस्कारानं गीकारेणतद्वारणायविशेष्यभागः । ननुसंस्कारस्यकार्यत्वेनाविद्योपादानकत्वादविद्यानिवृत्त्यनंतरंकथमवस्थानमित्यतआह ॥ संस्कारइति ॥ नन्वथापिसंस्कारोनाविद्यानपेक्षः तस्यजीवनिष्ठत्वात् । जीवस्याविद्याधीनत्वात् । अतोऽविद्यानिवृत्त्यनंतरं कथंसंस्कारावस्थानमित्यतआह ॥ अविद्येवेति ॥ यथाअविद्याशुद्धचिन्मात्रगता एवंसंस्कारोपीत्यर्थः । ननुतत्वसाक्षात्का

नुमानाच्च । संस्कारःकार्योपिध्वंसइवनिरुपादानः । अविद्येवचशुद्धात्माश्रितइति
नाविद्यापेक्षः । संस्कारनिवृत्तिश्चाऽऽवृत्तात्तत्वसाक्षात्कारात् । यद्वा अविद्याले
शानुवृत्त्यातदनुवृत्तिरिति । अत्रब्रूमः । नतावत्संस्कारपक्षोयुक्तः । भावकार्यमध्य
स्तंसंस्कारंदेहादिकंतद्धेतुप्रारब्धकर्मादिकंचप्रत्युपादानत्वेनाज्ञानानुवृत्त्यापातात् ।

रानंतरमप्यनुवृत्तस्यसंस्कारस्यकेननिवृत्तिरित्यतआह ॥ संस्कारेति ॥ आवृत्तात् पुनःपुनरभ्यासात् । तदनुवृत्तिःसंस्कारा नुवृत्तिः ॥ भावकार्येप्रतीति ॥ उपादानत्वेनेत्यन्वयः । संस्कारस्यचभावपदार्थत्वेनसोपादानत्वस्याऽऽवश्यकत्वादिति भावः । किंचाध्यस्तमात्रंत्वन्मतेतावत्सोपादानकं तत्वसाक्षात्कारानंतरमप्यनुवर्तमानंसंस्कारदेहप्रारब्धादिकंचाध्यस्तमितिसो पादानकत्वमावश्यकमित्याह ॥ अध्यस्तमिति ॥ नन्वध्यस्तोपिसर्पादिभ्रमसंस्कारोऽज्ञानोपादानकोपिबाधकज्ञानेनाज्ञान

SGDF
Sri Gargeshwari Digital Foundation

निवृत्त्याभ्रमनिवृत्तावप्यनुवर्तमानोदृष्टइतिचेत्तत्राह ॥ सर्पादीति ॥ अविद्यावरणेति ॥ अविद्यारूपावरणस्यनष्टत्वादि
त्यर्थः ॥ द्विचंद्रादीति ॥ यथाचंद्रस्वरूपेसम्यक्ज्ञातेप्यंगुल्यवष्टंभरूपदोषवशाद्बाधितस्यापिद्वितीयचंद्रस्यानुवृत्तिरेवंबाधि
सर्पादिभ्रमसंस्कारस्तुसत्योनत्वज्ञानोपादानकः । पूर्वसाक्षात्कारानिवृत्तस्याध्यस्तस्यतदनधिक
विषयेणाऽऽवृत्तेनाप्युत्तरेणज्ञानेननिवृत्त्यदर्शनाच्च । जीवन्मुक्तस्याविद्यावरणाभावेनतदानिर
तिशयानंदस्फूर्त्यापाताच्च । संस्कारस्तुनावरणमितित्वयैवोक्तं । एतेनतत्वेज्ञातेपिद्विचंद्रादिव
द्दोषाद्बाधितानुवृत्तिरितिनिरस्तं । तत्रैवात्रतत्वज्ञानानिवर्त्यदोषाभावात् । लेशपक्षेपिनतावल्ले
शोऽवयवः । अज्ञानस्यनिरवयवत्वात् । एतेनाविद्यैवदग्धपटन्यायेनकंचित्कालंतिष्ठतीतिनिर
स्तं । निरवयवेदग्धपटन्यायासंभवात् । अनुवृत्तस्यज्ञानानिवर्त्यत्वेनसत्त्वापाताच्च । अथमतं
लेशोनामाऽऽकारः । "इंद्रोमायाभि" रित्यादिश्रुत्या अविद्यायाअनेकाकारत्वेनप्रपंचेपरमार्थ
सत्त्वादिभ्रमहेत्वाकारनिवृत्तावपिदेहाद्यपरोक्षप्रतिभासहेत्वाकारोऽनुवर्तते । विरोधिनितत्वज्ञा
नेसत्यपितदनुवृत्तिश्चाऽऽरब्धकर्मभिर्ज्ञानप्रतिबंधात् । कर्मानुवृत्तिश्चतद्धेत्वज्ञानलेशानुवृत्तेः ।
उक्तंच "अविद्यालेशशब्देनमोहाकारांतरोक्तितः । ज्ञानस्यप्रतिबंधाच्चप्रबलारब्धकर्मभि"
तस्यापिसंस्कारस्यानुवृत्तिरित्यर्थः ॥ असंभवादिति ॥ दग्धपटस्यसावयवत्वेनावयवेनिवृत्तेसत्येवस्वयंकिंचित्कालंतिष्ठती

SGDF
Sri Gargeshwari Digital Foundation

त्यर्थः ॥ अन्यूनेति ॥ पूर्वतनसाक्षात्कारस्यचरमसाक्षात्कारापेक्षया अधिकभूतदेहादिविषयकत्वेपितदन्यूनविषयकत्वंतावद
रित्यादि । आकारिनिवृत्तावप्याकारस्यानुवृत्तिर्व्यक्तिनिवृत्तावपिजातेरिवयुक्तेति । तत्राऽऽकारो
जातिशक्त्यादिरूपोधर्मोवा स्वर्णस्यकुंडलादिरिवावस्थाविशेषोवा अज्ञानव्यक्त्यंतरंवा । नाद्यद्वि
तीयौ । तयोर्देहादिभ्रमोपादानत्वेऽविद्यात्वापातात् । अनुपादानत्वेचोपादानांतराभावेनदेहादि
भ्रमायोगात् । आत्मान्यत्वेनज्ञाननिवर्त्यत्वेनचतयोरविद्यातत्कार्ययोरन्यतरत्वावश्यंभावेनाज्ञाने
निवृत्तेस्थित्ययोगाच्च । धर्मेउपादानत्वस्यावस्थायांचावस्थावंतंविनास्थितेरयोगाच्च । नतृतीयः ।
अज्ञानैक्यपक्षेतदयोगात् । तद्भेदपक्षेपिव्यक्त्यंतरंपूर्वाज्ञानादधिकविषयंनवा । नाद्यः । निर्विशे
षेतदयोगात् । नांत्यः । एकस्मिन्नपिविषयेयावंतिज्ञानानितावंत्यज्ञानानीतिमतस्यप्रतिकर्मव्यव
स्थाभंगेदूषितत्वात् । चरमसाक्षात्कारान्यूनविषयसाक्षात्कारस्यपूर्वमपिसत्त्वेपश्चादिवजीवन्मु
क्तावपितदज्ञानहेतुकाध्यासायोगाच्च । नचपूर्वज्ञानस्यकर्मणाप्रतिबंधादज्ञानानिवर्तकतेतियुक्तं ।
ज्ञानस्यस्वप्रागभावनिवर्तनइवाज्ञाननिवर्तनेपिप्रतिबंधायोगात् । स्थितेलेशेकर्मानुवृत्तिस्तदनुवृत्तौ
चज्ञानस्यप्रतिबंधेनलेशस्थितिरित्यन्योन्याश्रयाच्च । नच “भूयश्चांतेविश्वमायानिवृत्ति” रित्यत्र
भूयइतिश्रवणात्लेशानुवृत्तेर्मानांतरेणाधिगमान्नज्ञसावन्योन्याश्रयइतिवाच्यं । तथापिस्थिताव

स्त्येवेत्यर्थः ॥ ब्रह्मज्ञानस्येति ॥ पूर्वमुत्पन्नस्यब्रह्मज्ञानस्य आप्रायणंमरणपर्यंतं अनुवृत्तिहेतुभूतानियानियज्ञादिकर्माणितैर्ब्र
ह्मज्ञानस्यप्रतिबंधःक्रियते अतोनतस्यसमूलाज्ञाननिवर्तकत्वमित्यर्थः । यज्ञादिकर्मणांकाम्यत्वनिवृत्त्यर्थंज्ञानार्थेत्युक्तं निवृत्ते
त्यर्थः ॥ उक्तत्वादिति ॥ ज्ञानस्यस्वप्रागभावनिवर्तनइवाज्ञाननिवर्तनेपिप्रतिबंधायोगादेरित्यर्थः ॥ अन्यथेति ॥ ब्रह्मत
न्योन्याश्रयात् । श्रुतौचभूयोयोजनादित्यन्वयः । एतेनब्रह्मज्ञानस्याप्रायणमनुवृत्तिहेतुज्ञानार्थय
ज्ञादिकर्मभिःप्रतिबंधइतिनिरस्तं । प्रतिबंधायोगादुरुक्तत्वात् । अन्यथाशुक्तिज्ञानमपितदज्ञानका
र्येणभ्रमादिना उत्तरंब्रह्मज्ञानमप्यारब्धकर्मणाप्रतिबध्येत । तदाभोगेनकर्मक्षीणमितिचेत्न । भो
गैकनाश्यत्वेज्ञानानिवर्त्यत्वेनसत्त्वापातात् । एतेनाज्ञानस्यानेकशक्तित्वेनारब्धकर्मतत्कार्येतराध्या
ससंपादनशक्तिमात्रस्यवा प्रपंचेपारमार्थिकसत्यत्वादिभ्रमहेतुशक्तिमात्रस्यवाप्रतिबंधोलेशानुवृ
त्तित्वेनविवक्षितइतिनिरस्तं । पूर्वज्ञानस्यशक्तिमात्रप्रतिबंधकत्वेतदनधिकविषयस्यचरमस्यापित
त्वापत्त्याकदाप्यज्ञानहान्यसिद्धेः । तस्मात्परमतेमोहकार्यत्वादखिलस्यच । ज्ञानेनमोहनाशाच्चजी
वन्मुक्तिर्नयुज्यते । अस्माकंतु अपरोक्षज्ञानिनोपिस्वयोग्यपरमानंदहेतुपरमकाष्ठापन्नभक्त्यभावे
त्वज्ञानस्यब्रह्माज्ञानकार्येणप्रारब्धकर्मादिनाप्रतिबंधोक्तौभ्रमनिवर्तकंशुक्तिज्ञानमपिशुक्त्यज्ञानकार्येणभ्रमेणप्रतिबद्धंसत्नशु
क्त्यज्ञानंनिवर्तयेदित्यर्थः ॥ तदेति ॥ चरमज्ञानकालइत्यर्थः ॥ तत्कार्येति ॥ प्रारब्धकर्मसंपादनेत्यन्वयः । आरब्धकर्म

SGDF
Sri Gangadharendra Saraswati Digital Foundation

कार्ययदितरत्देहादिकंतदध्यासंसंपादनेत्यर्थः । लेशानुवृत्तित्वेन लेशानुवृत्तिशब्दार्थत्वेनेत्यर्थः ॥ भावेत्विति ॥ आत्यंति
तत्साध्यस्यमोचकस्येश्वरप्रसादस्याभावेनप्रारब्धकर्मणासंसारानुवृत्त्याजीवन्मुक्तिः । भावेतुप्रसा
दस्यापिभावेननिःशेषदुःखनिवृत्तिविशिष्टस्वतोनीचोच्चभावापन्नस्वरूपानंदाविर्भावरूपामुक्तिर्यु
क्तेति ॥ जीवन्मुक्तिभंगः ॥ ४ ॥ ७ ॥ ननुमुक्तौनतारतम्यं । मानाभावात् । "परमंसाम्यमुपैती"
तिसाम्यश्रुतेश्च । सातिशयत्वेचमुक्तेःस्वर्गादिवदनित्यत्वंस्यात् । अधिकदर्शनेनदुःखद्वेषेर्ष्यादिकं
चस्यादितिचेत् । उच्यते । मुक्तावतारतम्यं किंतत्रभेदभोगादेरेवासत्त्वात् । किंवातत्सत्त्वेपिसा
म्यात् । नाद्यः । भेदप्रस्तावोक्तश्रुत्यादिभिस्तत्सिद्धेः । अंत्येपिकिंमुक्तजीवेशयोरतारतम्यं किंवा
मुक्तजीवानामेव । नाद्यः । त्वन्मतेपितयोर्विभुत्वाणुत्वशेषित्वशेषत्वस्वातंत्र्यपारतंत्र्यादिनाता
रतम्यात् । अनेकेश्वरापत्त्याजगत्प्रवृत्त्ययोगाच्च । "अल्पशक्तिरसार्वज्ञ" मित्यादिभेदप्रस्तावोक्तश्रु
तिभिः "ब्रह्मेशानादिभिर्देवैर्यत्प्राप्तुंनैवशक्यते । तद्यत्स्वभावःकैवल्यंसभवान्केवलोहरे" इत्या
दिस्मृतिभिः "जगद्व्यापारवर्ज" मित्यादिसूत्रैः मुक्तजीवभोगः ईश्वरभोगान्निकृष्टः । जीवभोग
त्वात्संसारिभोगवत् । एवंमुक्तजीवज्ञानादिकमपिपक्षीकृत्यप्रयोक्तव्यं । ईश्वरानंदोजीवानंदादु ॥ ६४० ॥
कभक्तिसद्भावेत्वित्यर्थः ॥ जीवन्मुक्तिभंगप्रकरणं ॥ ४ ॥ ७ ॥ भेदभोगादेरिति ॥ वैशेषिकरीत्याभेदसहितभोगादेरि

त्यर्थः । किंवातस्यसत्त्वेपिसाम्यादिति रामानुजमताभिप्रायेण ॥ तदवश्येति ॥ अत्रयोयन्नियामकानंदःसतदानंदादुत्कृष्टइ
त्येवोक्ते कश्चिद्राजादरिद्रःधनिकप्रजादत्तान्नादिभोक्ताराजत्वेनतन्नियामकश्चास्ति । तदानंदेप्रजानियामकस्यराज्ञआनंदत्वमस्ति
प्रजानंदादुत्कृष्टत्वरूपंसाध्यंनास्ति । राजापेक्षयाधनिकप्रजायाएवपरमसुखित्वदर्शनादतस्तत्रव्यभिचारवारणायतदवश्येत्युक्तं ।
त्कृष्टः । तदवश्यतन्नियामकानंदत्वात् । यदेवंतदेवं । यथासेवकानंदात्सेव्यमानानंदः । ईश्वरोजी
वस्वभावानंदादितउत्कृष्टस्वाभाविकानंदादिमान् । तत्प्रेप्सुत्वेसतितत्रशक्तत्वात् । योयत्प्रेप्सुत्वे
सतितत्रशक्तः सतद्वान् यथासंमतइत्याद्यनुमानैश्चविरोधाच्च । नद्वितीयः । त्वन्मतेपिजीवान्प्रति
शेषिणोपिलक्ष्मीतत्वात् तान्प्रतिनियामकाद्विष्वक्सेनादितश्चेतरजीवानांनिकृष्टत्वात् । "सैषानं
दस्यमीमांसाभवति । तेयेशतंमानुषानंदाः सएकोमनुष्यगंधर्वाणामानंदः श्रोत्रियस्यचाकामहत
स्ये" त्यादितैत्तरीयश्रुत्या । "अथयेशतंकर्मदेवानामानंदाः सएकआजानजदेवानामानंदः । यश्च
श्रोत्रियोऽवृजिनोकामहत" इत्यादिवाजसनेयश्रुत्या । "अक्षण्वंतःकर्णवंतःसखायोमनोजवेष्वस
माबभूवु" रित्याद्यैतरेयश्रुत्या नृपाद्याःशतधृत्यंतामुक्तिगाउत्तरोत्तरं । सर्वैर्गुणैःशतगुणामोदंतइ
राज्ञोदरिद्रत्वेपिप्रजानंदस्यतद्वश्यत्वेनतदवश्यत्वाभावान्नव्यभिचारइत्यर्थः । समानंदेव्यभिचारवारणायविशेष्यभागः । त्वन्म
ते रामानुजस्यतवमतेशेषिणः प्रधानभूतात् ॥ तान्प्रतीति ॥ लक्ष्मीतत्वनियम्यजीवान्प्रतीत्यर्थः ॥ परतंत्रेत्यादि ॥

SGDF Foundation

आनंदप्रतियोगिकतारतम्यवानित्येवोक्तेजीवानंदस्येश्वरानंदप्रतियोगिकतारतम्यवत्त्वस्यरामानुजैरंगीकृतत्वात्सिद्धसाधनता स्यात् अतःसजातीयेत्युक्तं । नन्वीश्वरानंदोप्यानंदत्वेनधर्मेणजीवानंदसजातीयोपिभवत्येवेतिपुनःसिद्धसाधनवारणायोक्तं । परतंत्रानंदत्वेत्यादि । परतंत्रानंदत्वस्यसाक्षाद्व्याप्योधर्मोदेवानंदत्वंतेनधर्मेणसजातीयोयआनंदोदेवानांपरस्परमानंदः । तथा

तिहिश्रुतिः । मुक्तानामपिसिद्धानांनारायणपरायणः । सुदुर्लभःप्रशांतात्माकोटिष्वपिमहामुने” इत्यादिस्मृतिभिः “वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामंजस्यादेव” मित्यादिसूत्रैरुक्तवक्ष्यमाणश्रुतितर्कानुगृहीतैः अस्मदादिमुक्तभोगः मुक्तचतुर्मुखभोगान्निकृष्टः । अस्मदादिभोगत्वात् । संसारस्थास्मदादिभोगवत् । एवमस्मदादिज्ञानादिकंचपक्षीकृत्यप्रयोक्तव्यं । जीवस्वरूपानंदः परतंत्रानंदत्वसाक्षाद्व्याप्यधर्मेणसजातीयानंदप्रतियोगिकतारतम्यवान् । जीवानंदत्वात् । तदीयवैषयिकानंदवत् । प्रकृतिबंधनिवृत्तिः स्वसजातीयबंधनिवृत्त्याश्रयप्रतियोगिकतारतम्यवन्निष्ठा । बंधनिवृ

परतंत्रानंदत्वसाक्षाद्व्याप्योधर्मःऋष्यानंदत्वंतेनापिसजातीयोयऋष्यादीनांपरस्परमानंदस्तत्प्रतियोगिकतारतम्यवानितिसाध्यार्थः ॥ प्रकृतिबंधनिवृत्तिरिति ॥ देवादीनांजायमानाप्रकृतिबंधनिवृत्तिरित्यर्थः ॥ स्वसजातीयेत्यादि ॥ स्वशब्देनपक्षीभूतदेवादिबंधनिवृत्तिस्तज्जातीयायाबंधनिवृत्तिर्ऋष्यादिबंधनिवृत्तिस्तदाश्रयोऋष्यादिस्तत्प्रतियोगिकतारतम्यवंतोदेवास्तन्निष्ठे

त्यर्थः । एवंचजीवानामन्योन्यतारतम्यसिद्धिः ॥ निगडबंधेति ॥ देवदत्तनिष्ठनिगडबंधनिवृत्तिः स्वसजातीयायाबंधनिवृत्तिर्यज्ञदत्तीया तदाश्रयोयज्ञदत्तस्तत्प्रतियोगिकतारतम्यवान्देवदत्तस्तन्निष्ठेत्यर्थः । ननुस्वरूपसुखेषुकथंतारतम्यं तेषामेकैकत्वेनसंख्याकृततारतम्याभावात् । अणुभूतजीवस्वरूपत्वेनपरिमाणकृततारतम्याभावाच्चेतिशंकाभासंनिराकरोति ।।स्वरूपेति।।

त्तित्वात् । निगडबंधनिवृत्तिवदित्याद्यनुमानैश्चविरोधाच्च । स्वरूपसुखानांप्रत्येकमेकत्वेनाणुत्वेनच संख्यापरिमाणकृतवैषम्याभावेपिजलसुधापानसुखयोरिवमधुरमधुरतरत्वादिवत्स्वरूपकृतवैषम्यं युक्तं । प्रसिद्धंचसालोक्यादिमुक्तितःसायुज्यादेरुत्कृष्टत्वं । नचसायुज्यमैक्यं । सारूप्यादिमति सालोक्यादिवत्सायुज्यवत्यपिसारूप्यादेःसत्त्वात् । “चंद्रमसःसायुज्यंसलोकतामाप्नोती” त्यादि श्रुतौ “सायुज्यंचेदिभूभुज” इत्यादिस्मृतौचभेदेसत्यपिसायुज्योक्तेश्च । “सयुजःपरमात्मानंप्रविश्यचबहिर्गता” इत्यादिस्मृतौसयुजांप्रवेशमात्रोक्तेश्च । सयुजोभावःसायुज्यमितितच्छब्देनसंबंधस्यैवोक्तेश्च । “सालोक्यमथसामीप्यंसारूप्यंयोगएवचे” तिस्मृतौसायुज्येसंबंधार्थयोगपदप्रयो

जलपानंसुधापानंचतदुभयजन्येत्यर्थः ॥ सारूप्यादीति ॥ सालोक्यसामीप्यसारूप्यसायुज्यरूपंमुक्तिचतुष्टयं । तत्रोत्तरोत्तरमुक्तिमतितदधस्तनामुक्तिरस्ति सारूप्यादिमतिसालोक्यादिदर्शनात् एवंसायुज्यवतिसारूप्यादिमुक्तिदर्शनात् सारूप्यादेश्चभेदगर्भत्वेनभेदगर्भसारूप्यादिमुक्तेः सायुज्यस्यैक्यरूपत्वपक्षेऽयोगादित्यर्थः ॥ भेदेसत्यपीति ॥ नहिविशिष्टेनचंद्रेणैक्य

SGDF

रूपंसायुज्यंयुक्तमित्यर्थः ॥ अन्यस्मिन्वासंसारिणीति ॥ श्रोत्रियादिपदवाच्येविरक्तपुरुषइत्यर्थः । किंचत्वत्पक्षेप्रकृतोवि
गाच्च । तस्मात्सायुज्यंनामक्षीरनीरवदन्यदेहप्रविष्टग्रहदेवतादिवच्चसंश्लेषमात्रं । नत्वैक्यं । "हरौ
नियतचित्तत्वाद्ग्रहवत्तत्प्रवेशनात् । मोक्षंतादात्म्यमित्याहुर्नतुतद्रूपतःक्वचिदि" तिस्मृतेः । नचो
क्ततारतम्यश्रुतिरमुक्तविषया । प्रकृतेमनुष्यगंधर्वादावप्रकृतेऽन्यस्मिन्वासंसारिणितैत्तरीयोक्त
स्याकामहतत्वस्यवाजसनेयोक्तयोरवृजिनत्वाकामहतत्वयोश्चायोगात् । अकामहतत्वंहिकामकृतो
पद्रवाभावः । नत्वकामत्वं । हतशब्दवैयर्थ्यात् । सचसत्यकामस्यमुक्तस्यैव । "सोश्नुतेसर्वान्का
मान् कामस्ययत्राप्ताःकामास्तत्रमाममृतंकृधी" त्यादिश्रुतेः । "सहिमुक्तोऽकामहत" इतिब्रह्मांडो
क्तेश्च । अवृजिनत्वमप्यदुःखत्वमपापत्वंवा । उभयमपिमुक्तस्यैव । अपरोक्षज्ञानिन्यपिप्रारब्धपा
पतत्कार्यदुःखयोःसत्वात् । नचाबाधेमुख्यार्थस्त्यागार्हः । श्रोत्रियत्वंचमुक्तस्यैवमुख्यं । "प्राप्तश्रुति
फलत्वात्तुश्रोत्रियाःप्राप्तमोक्षिणः । तएवचाप्तकामत्वात्तथाऽकामहतामता" इतिभारतोक्तेः ।
किंचप्रकृतमनुष्यगंधर्वादिपरत्वेश्रोत्रियस्यचेत्यत्रयश्चश्रोत्रियइत्यत्रचैकवचनंसमुच्चयार्थश्चशब्दश्चा
युक्तः । नहिसंभवतिवसिष्ठोब्राह्मिष्ठोऽरुंधतीपतिश्चतथेति । अप्रकृतसंसारिपरत्वेतुबाधः । चतुर्मु
रक्तरूपःश्रोत्रियोयःसएकएवमनुष्यगंधर्वमारभ्यब्रह्मपर्यंतंश्रुतेषुश्रोत्रियस्येत्यादिवाक्येषूच्यते । उतभिन्नः नाद्यइत्याह ॥

SGDF
Sri Gargeshwari Digital Foundation

अपिचेत्यादिना ॥ नद्वितीयइत्याह॥ भिन्नश्चेदिति ॥ अकामहतत्वादेःसर्वेष्वपिश्रोत्रियेष्वेकप्रकारतयाश्रवणेनतत्साध्यानंदे
ष्वपितारतम्यरूपव्यवस्थायाअयोगइत्यर्थः ॥ तदितरपदकामश्चेति ॥ तथाचाकामहतत्वंनसर्वत्रैकप्रकारमित्यर्थः । अतो
खाद्यानंदस्यान्यस्मिन्संसारिण्यदर्शनात् । अपिचप्रकृतश्रोत्रियः सर्वत्राप्येकश्चेन्मानुषादिभ्यःसा
वधारणंशतगुणितमनुष्यगंधर्वाद्यनेकानंदाएकस्मिन्विरुद्धाः । भिन्नश्चेदकामहतत्वादेरेकरूपतया
श्रुतस्याव्यवस्थापकत्वादानंदव्यवस्थाऽयोगः । अथव्यवस्थार्थंतत्रतत्रतत्तत्पदाकामः तदितरपद
कामश्चविवक्ष्यते तदाऽश्रुतकल्पना बाधश्च । नहींद्रादिपदेराजपदेवानिष्कामस्यभिक्षुकस्येंद्राद्यानं
दानुभवोस्ति । उक्तंहि "कुत्रचित्कामिनःपुंसःकामाभावात्क्वचित्क्वचित् । इंद्रादिसुखभोगोस्तीत्य
नुभूतिर्हिकुप्यती"ति । नचाबाधेवैराग्यप्रशंसामात्रपरत्वंयुक्तं । तस्माच्छ्रुत्यापूर्ववाक्येनामुक्तानां
तारतम्यमुक्त्वा "श्रोत्रियस्यचेत्यादिना यश्चश्रोत्रिय" इत्यादिनाचोत्तरवाक्येनमुक्तस्यतदुच्यते ।
"अक्षण्वंत" इतिश्रुतिस्तुतत्प्रकरणे "ऋचांत्वःपोषमास्त" इत्यादिनाब्रह्मबहुत्वोक्तेर्मुक्तविषया ।
अपिच मुक्तसुखंपरस्परंतारतम्यवत् । परस्परंतारतम्यवत्साधनसाध्यत्वात् । संमतवत् । नचा
सिद्धिः । मुक्तिःप्रयागमरणभगवद्द्वेषभक्त्यादिनाज्ञानकर्मसमुच्चयेनवासाध्येतिमतेप्रयागमरणादी
व्यवस्थोपपत्तिरितिभावः ॥ उक्तंहीति ॥ अनुव्याख्यानइत्यर्थः । ननुचरमदेहस्यसर्वेषामेकप्रकारत्वान्नतारतम्यमित्यतआह

SGDF
Sri Gargeshwari Digital Foundation

S.M.S.A. SABHA LIBRARY BANGALORE

॥ चरमदेहोपीति ॥ मर्त्यादिरेवमर्त्यऋषिदेवादिरूपएवेतितत्रैवतारतम्यमितिभावः । त्वत्पक्षेरामानुजपक्षे । निरंतरचिंता
नांवर्णाश्रमकर्मणांचविषमत्वात् । ज्ञानैकसाध्येतिसिद्धांतेपि "कस्तंमदामदंदेवंमदन्योज्ञातुमर्हे
ति। सर्वेगुणाब्रह्मणैवह्युपास्यानान्यैर्देवैःकिमुसर्वैर्मनुष्यै" रित्यादिश्रुत्या "ब्रह्मापियंवेदनचैवसम्य
गन्येकुतोदेवमुनींद्रमर्त्या" इत्यादिस्मृत्यादेवर्षिमनुष्यादिस्थमुक्तिहेतुब्रह्मज्ञानगतस्यबह्वल्पाल्पत
रशाखाश्रवणादिसाध्यत्वस्यबह्वल्पाल्पतरब्रह्मगुणविषयकत्वंविनाऽयोगेनार्थापत्त्याचतत्सिद्धेः ।
चरमदेहोपिहिमर्त्यादिरेव। "यस्तआशिषआशास्तेनसभृत्यःसवैवणिक्। सवैभृत्यःसवैस्वामीगुणलु
ब्धौनकामुकौ । मुमुक्षोरमुमुक्षुस्तुवरोह्येकांतभक्तिमानि" त्यादिस्मृत्यामुमुक्षुभक्तादमुमुक्षोर्निरुपा
धिकभक्तस्याधिक्योक्तेश्च। तत्राधिक्यस्यलोकरीतिसिद्धत्वाच्च। "भक्तिःसिद्धेर्गरीयसी" त्यादिस्मृ
त्याऽल्पभक्तिसाध्यमुक्तितोऽधिकमुक्तिहेतुभक्तेराधिक्योक्तेश्च । "अन्येत्वेवमजानंतःश्रुत्वान्ये
भ्यउपासते । तेपिचातितरंत्येवमृत्युंश्रुतिपरायणा" इत्यत्रापिशब्देन "स्त्रियोवैश्यास्तथाशूद्रास्ते
पियांतिपरांगतिं । किंपुनर्ब्राह्मणाःपुण्या" इत्यत्रकैमुत्येनसाधनतारतम्येनसाध्येतत्प्रतीतेश्च ।
"साधनस्योत्तमत्वेनसाध्यंचोत्तममाप्नुयुः । ब्रह्मादयःक्रमेणैवयथानंदश्रुतौश्रुता" इतिब्राह्मे अ
धिकंतवविज्ञानमधिकाचगतिस्तवे" तिमोक्षधर्मेचसाधनतारतम्येनसाध्येतदुक्तेश्च । "विकल्पो ॥ ६४३ ॥

भक्तिः । भरन्यासः अंतःकरणभरन्यासः । प्रपत्तिर्विश्वासइतियावत् । स्वरूपतो विषमत्वादित्यन्वयः ॥ कर्मेति ॥ निरंतर
चिंतारूपभक्तिः । अंतःकरणशुद्धिद्वाराकर्मापेक्षा । प्रपत्तिस्तुकर्मानपेक्षेत्यर्थः ॥ आवृत्तीति ॥ चिंतारूपाभक्तिर्निरंतरमावृ
त्तिसापेक्षा । नैवंप्रपत्तिरित्यर्थः । ननुभक्तिस्वरूपकर्मावृत्तिभ्यांआधिक्येपिविश्वासोल्पःप्रपत्तौतुकर्मावृत्त्योरभावेपिविश्वासोभूया

विशिष्टफलत्वा" दितिसूत्रेत्वयाविकल्पेनमोक्षहेतुत्वेनोक्तानांदहराक्षरादिविद्यानामधिकाल्पगु
णविषयत्वेनतारतम्याच्च । त्वद्रीत्याप्रत्येकंमोक्षहेत्वोर्निरंतरचिंताभरन्यासरूपयोर्भक्तिप्रपत्त्योः
स्वरूपतःकर्मापेक्षानपेक्षाभ्यामावृत्त्यनावृत्तिभ्यांचविषमत्वाच्च । नचतयोरुक्तरीत्याधिकाल्पत्वेपि
विश्वासाल्पत्वाधिक्याभ्यांसाम्यमितिवाच्यं । विश्वासस्यावर्तनीयायांभक्तावेवयावदावृत्त्यपे
क्षितत्वेनानावर्तनीयप्रपत्तितोधिकत्वात् । यदिचफलसाम्येनसाधनसाम्यार्थंप्रपत्तावधिकविश्वा
सःकल्प्येत तर्ह्यन्योन्याश्रयः । साधनवैषम्येपिसाध्यसाम्येचाधिकविधात्र्याःश्रुतेरनुपादेयत्वं फ
लदातुरीश्वरस्यवैषम्यादिकंचस्यात् । नचदेवमनुष्यादीनांतत्रशक्त्यशक्तिमात्रेणशक्ताशक्तानुष्ठि

नितिदशरूप्यैकसुवर्णन्यासेनभक्तिप्रपत्त्योःसाम्यमित्याशंक्यनिराकरोति ॥ नचतयोरिति ॥ प्रपत्त्यपेक्षयाभक्तावेवविश्वा
साधिक्यमित्याह ॥ विश्वासस्येति ॥ सकृद्भोजनेबहुघृतभोक्त्रपेक्षया बहुषुभोजनेष्वल्पघृतभोक्तुरेवबहुघृतभोक्तृत्ववदनेक

SGDF Foundation

भक्त्यावृत्तिष्वल्पाल्पविश्वासस्यापिसकृन्निवृत्तिप्रपत्तिगतविश्वासापेक्षयाधिकत्वादित्यर्थः ॥ अंधेति ॥ अंधेनकृतेयागेआ
ज्येक्षणाद्यंगवैकल्यं पंगुकृतेविष्णुक्रमाद्यंगवैकल्यं ॥ कर्मणामिति ॥ अल्पकर्मणोल्पफलंमहतोमहदित्येवंविशेषचोदनाभावे
प्यल्पस्यकर्मणःस्वविषयेल्पफलेमहतिविभागोनियमोभवति स्थानसाम्यात् यथाब्राह्मणकांडेप्रथमस्थानगतेनकर्मणाप्रथमकांडे

तनि(वृत्त)त्यकर्मणइवनफलवैषम्यतिवाच्यं । अशक्तार्जितस्यज्ञानस्यांधपंग्वादिकृतकाम्यकर्मणइ
वविकलत्वेनकाम्यमोक्षसाधनत्वायोगेनतत्साधनत्वायस्वोचितमुक्तिफलंप्रत्यविकलतायावक्तव्य
त्वात् । एतेनभक्तिप्रपत्योर्विषमत्वेपिशक्ताशक्तविषयत्वात्फलसाम्यमितिनिरस्तं । तथाऽश्रव
णात् । कल्पनेचातिप्रसंगात् । तस्मात्साधनतारतम्यान्मुक्तितारतम्यं । अतएव "कर्मणामल्पम
हतांफलानांचस्वगोचरे । विभागस्थानसामान्यादविशेषेपिचोदित" इतिवार्तिकेनाविशेषेणस्वर्ग
साधनत्वेनश्रुतयोरपिज्योतिष्टोमाग्निहोत्रयोस्तारतम्यात्तत्साध्येस्वर्गेपितदुक्तं । उक्तंच "युक्तंच
साधनाधिक्यात्साध्याधिक्यंसुरादिषु । नाधिक्यंयदिसाध्येस्यात्प्रयत्नःसाधनेकुत" इति । किंच

प्रथमस्थानगतस्यमंत्रस्यस्थानप्रमाणेनसंबंधस्तथाल्पफलंप्रत्यल्पमेवकर्मसाधनंसंबध्यते महत्फलंप्रतिमहदित्यर्थः । अपरोक्षज्ञा
नोत्तरमनुष्ठितानिविचित्रकर्माणि मोक्षेतन्नयत्नानि मोक्षाहेतुत्वेसतिसफलत्वादिति सामान्यव्याप्तिकानुमानेनमोक्षेवैचित्र्यंसि

SGDF
Sri Gargeshwari Digital Foundation

ध्यतीत्याह ॥ तस्यतावदेवेति ॥ विशेषणासिद्धिंपरिहरति ॥ नापीति ॥ वैचित्र्यापाताचेति ॥ तदंगीकारेत्विष्टापत्तिः। अर्थांतरंपरिहरति ॥ नापिफलेति ॥ बाधान्नतत्सिद्धिरितिभावः । विशेष्यासिद्धिंपरिहरति ॥ नापीश्वरेति ॥ लीलार्थे नि

"तस्यतावदेवचिरंयावन्नविमोक्ष्येताथसंपत्स्यत" इत्यादिश्रुत्या "तस्यकार्यंनविद्यत" इत्यादिस्मृत्याचयस्यस्थितप्रज्ञस्यमोक्षायकर्तव्यांतराभावउक्तस्तस्यापरोक्षज्ञानिनोभक्तस्यप्रपन्नस्यवाशुकादेर्नित्यादिकर्मब्रह्मध्यानादिकंचनतावदज्ञस्येवविविदिषादिद्वारावापापक्षयादिद्वारावा। प्रत्यवायपरिहारद्वारावाज्ञानादेःसंनिपत्यांगं । तस्यसिद्धत्वात् । नापिफलोपकार्यंगं । मुक्तौज्ञानकर्मणोःसमुच्चयापातात् । कर्मणांविचित्रत्वेनमोक्षवैचित्र्यापाताच्च । मोक्षायकर्तव्यांतराभावपरोक्तश्रुत्यादिविरोधाच्च । नापिफलांतरार्थं । नित्यत्वात् । ज्ञानिनोऽनिष्टत्वाच्च । नापिलोकसंग्रहार्थमीश्वराज्ञापालनार्थंवा । तयोरपिस्वतोफलत्वात् । नापीश्वरप्रीत्यर्थं । भक्त्यादिनैवमोक्षहेतुप्रीतेःसिद्धेः । नापितत्प्रीत्यतिशयार्थं । फलातिशयाभावेतस्यपारिभाषिकत्वापातात् । तद्वैयर्थ्याच्च । नापीश्वरवल्लीलार्थं ।

ष्फलं । अपरोक्षज्ञानिकृतंकर्म लीलार्थं सांसारिकभोगार्थमक्रियमाणज्ञानिकर्मत्वात् ईश्वरकृतकर्मवदित्यत्रविवक्षितस्यविधि

SGDF
Sri Gargeshwari Digital Foundation

बद्धाकृतत्वस्योपाधेःपक्षाद्व्यावृत्तिंवक्तुंज्ञानिनांकर्मविधिमाह ॥ आचार्यादिति ॥ पक्षासिद्धिंपरिहरति ॥ सूर्यादयइति ॥
"आचार्याद्विद्यामवाप्यैतमात्मानमभिपश्यशांतोभवेद्दांतोभवेत् पश्यन्नपीममात्मानंकुर्यात्कर्मा
विचारय"न्नित्यादिनाऽपरोक्षज्ञानिनः "मत्कर्मकृन्मत्परमोमद्भक्तःसंगवर्जितः । मन्मनाभव
मद्भक्तोमद्याजीमांनमस्कु"र्वित्यादिनाभक्तिप्रपत्तिमतश्चतद्विधानात् । "शक्रेणवर्षकोटीश्चधू
मःपीतोतिदुःखतः । वर्षायुतंचसूर्येणतपोऽर्वाक्शिरसाकृत"मित्यादिस्मृतिषुक्लेशेनानुष्ठानोक्तेश्च ।
सूर्यादयश्चापरोक्षज्ञानिनः । "नदेवपदवींप्राप्ताब्रह्मदर्शनवर्जिता" इत्यादिस्मृतेः । अद्वैतिभि
"र्यावदधिकार"मितिसूत्रेक्लेशेनकर्मानुष्ठातॄणांवसिष्ठादीनामपरोक्षज्ञानित्वोक्तेश्च । तस्मादपरोक्ष
ज्ञानोत्तरंकर्मादिकंमुक्तावानंदातिशयार्थमेव । ब्रह्मांडेच "ज्ञानान्मोक्षोभवत्येवसर्वाकार्यकृतो
पितु । आनंदोह्रसतेऽकार्याच्छुभंकृत्वाचवर्धत" इति । स्मर्यतेच "सर्वदुःखनिवृत्तिस्तुज्ञानिनोनि
श्चितैवहि । उपासयाकर्मभिश्चभक्त्याचानंदचित्रते" ति । अतएव "सयआत्मानमेवलोकमुपास्ते
नहास्यकर्मक्षीयत" इतिश्रुतौज्ञानिकृतस्यकर्मणोमोक्षान्वयादक्षयफलत्वमुक्तं । नहिमोक्षादन्यत्रा
क्षयत्वं । परमसाम्यश्रुतिस्तुदुःखाभावसत्यकामत्वादिनासरःसागरयोरिवस्वयोग्यानंदपूर्त्याचसा
शुकशक्रसूर्यादयः ॥ यावदधिकारमिति ॥ यावदधिकारमवस्थितिराधिकारिकाणामितिसूत्रं ॥ भोगसामान्यएवसा

म्यमिति ॥ मुक्तभोगेईश्वरभोगगतभोगत्वमस्तीत्यर्थः ॥ त्वन्मतेपीति ॥ मुक्तानामैश्वरभोगविशेषवत्त्वेजगद्व्यापारस्यापी
ष्यात् । "लिंगभेदःपरानंदोदुःखाभावःसमामता" इतिस्मृतेः । अन्यथामुक्तस्येश्वरवज्जगत्स्रष्टृत्वा
दिकिंनस्यात् । तच्च "जगद्व्यापारवर्जं" मितिसूत्रेत्वयापिनिषिद्धं । अत्रजगद्व्यापारशब्दउपलक्षणा
र्थइतितवापिसंमतं । अन्यथामुक्तस्यस्वातंत्र्याद्यपिस्यात् । "भोगमात्रसाम्यलिंगाच्चे" तिसूत्रस्थ
मात्रशब्दस्यतुमन्मतेभोगसामान्यएवसाम्यं नतुतद्विशेषइत्यर्थः । त्वन्मतेपिभोगमात्रेमुक्तस्यब्रह्म
साम्याल्लिंगाज्जगद्व्यापारवर्जमितिव्याख्यातत्वादवधारणार्थोमात्रशब्दोनकात्स्न्यार्थः । सत्यकाम
त्वंचजगत्स्रष्टृत्वादाविवाधिकानंदेपिकामस्यैवाभावाद्युक्तं । वाराहेच "स्वाधिकानंदसंप्राप्तौस्रष्ट्या
दिव्यापृतिष्वपि । मुक्तानांनैवकामःस्यादन्यान्कामांस्तुभुंजत" इति । सातिशयत्वेपिनित्यत्वंचे
श्वरादपकृष्टत्वइवमुक्तांतरणसाम्यइवचश्रुत्यादिबलाद्युक्तं । अन्यथोत्कर्षस्याप्यनित्यत्वव्याप्त्याब्र
ह्मानंदोप्यनित्यःस्यात् । नचद्वेषेर्ष्यादिप्रसंगः । "निःशेषगतदोषाणांबहुभिर्जन्मभिःपुनः । स्या
दापरोक्ष्यंहिहरेर्द्वेषेर्ष्यादिततःकुतः । भवेयुर्यदिचेर्ष्याद्याःसमेष्वपिकुतोनते । तप्यमानाःसमान्द्
ष्ट्वाद्वेषेर्ष्यादियुताअपि । दृश्यंतेबहवोलोकेदोषाएवात्रकारणं । यदिनिर्दोष(तात)तैवात्रकिमाधि
श्वरगतभोगत्वेनतद्वर्जनंमुक्तानांनस्यादित्यर्थः ॥ सातिशयत्वेपीति ॥ सातिशयस्येवापकृष्टस्यसमस्यविनादर्शनात्त्वत्पक्षे

SGDF Sanskrit Digital Foundation

पिसस्यात् । श्रुतिबलात्तत्त्यागस्तुममापिसमइत्यर्थः ॥ उत्कर्षस्येति ॥ गंधाद्युत्कर्षस्य ॥ प्रकृतिमिति ॥ स्वभावं ॥ स्वभावजेति ॥ स्वभावस्यत्रैविध्यात्श्रद्धात्रैविध्यमितिगम्यते ॥ हठापरपर्यायेति ॥ हठस्यकारणांतरापूर्वकत्वात् नानवस्था ॥

क्येनदूष्यत" इत्युक्तेः । नच मुक्तिःस्वरूपा(नंदा)विर्भावमात्ररूपा स्वरूपाणिचैकरूपाणीति कथं तारतम्यमितिवाच्यं । "योयद्रूपःसतद्रूपःनिसर्गोह्येषभवती" त्यादिश्रुत्या "अवजानंतिमांमूढा मानुषींतनुमाश्रितं । राक्षसीमासुरींचैवप्रकृतिंमोहिनींश्रिताः । महात्मानस्तुमांपार्थदैवींप्रकृति माश्रिताः । भजंत्यनन्यमनसोज्ञात्वाभूतादिमव्ययं । त्रिविधाभवतिश्रद्धादेहिनांसास्वभावजा । सात्विकीराजसीचैवतामसीचेतितांशृणु । श्रद्धामयोयंपुरुषोयोयच्छ्रद्धःसएवस" इत्यादिस्मृत्याच तुर्मुखादेरितरेभ्यउत्कर्षस्यदृष्टेनादृष्टेनवाऽऽगंतुकहेतुनासाध्यत्वेतत्रापिहेत्वंतरान्वेषणेऽनवस्थाप त्त्याऽनादियोग्यताहठापरपर्यायस्वभावोहेतुर्वाच्यइत्यादियुक्त्याचतारतम्यस्वभावत्वात् । "तद्य थापेशस्कारीपेशसोमात्रामुपादायान्यन्नवतरंकल्याणंरूपंतनुते एवमेवायमात्मेदंशरीरंनिहत्याविद्यांगमयित्वान्यन्नवतरंकल्याणंरूपंकुरुते पित्र्यंवागांधर्वंवाप्राजापत्यंवाब्राह्मंवान्येषांभूताना" मि

लिंगशरीराविद्यानिवृत्तेरिति ॥ तथाचपितृत्वगंधर्वत्वादिकंनदेहाद्युपाधिकं किंतुस्वरूपकृतमिति गम्यतइत्यर्थः । मुक्तानां

SGDF
Sri Gargeshwari Digital Foundation

भोगानुपपत्तिपरिहाराय "अभावंबादरिराहह्येव" मित्यधिकरणसिद्धजडाजडदेहवत्त्वंतेषांसाधयितुमाह ॥ नचमुक्तस्येति ॥ "अभावंबादरि" रितिसूत्रसिद्धंचिच्छरीरत्वंमुक्तानांसाधयति ॥ अस्तिहितावदिति ॥ "भावंजैमिनिर्विकल्पाम्नानादि"

तिश्रुतौलिंगशरीराविद्यानिवृत्तेरूर्ध्वमपिपितृत्वाद्युक्तेश्च । नचमुक्तस्यदेहाद्यस्तिचेत्दुःखादिस्यात् नचेद्भोगायोगगतिवाच्यं । ईश्वरवच्चिदात्मकस्यवा कर्मानारब्धस्यैच्छिकस्यप्राकृतदेहस्यवा सत्त्वा त् । अस्तिहितावच्चिद्रूपंशरीरं । "चिदानंदशरीरेणसर्वेमुक्तायथाहरिः । भुंजतेकामतोभोगांस्तदं तर्बहिरेवचे" तिश्रुतेः । न्यायविवरणे नचमुक्तस्यचिदात्मकोदेहोपिनास्तीतिवाच्यं । अकृत्रिमत्वे नतस्यानपगमादित्युक्तेश्च । अस्तिचजडशरीरं । "स्वेच्छयावाशरीराणितेजोरूपाणिकानिचित् । स्वीकृत्यजागरितवद्भुक्त्वात्यागःकदाचने" तिब्रह्मवैवर्तोक्तेः । तत्वप्रदीपे "शुद्धप्रकृतिमयानिज्यो तीरूपाणिसुखैकतानानिशरीराण्यनुप्रविश्ये" त्युक्तत्वाच्च । "चितावाऽचितावानित्येनवाऽनित्येन वाथानंदीह्येषभवती" ति.देहद्वयश्रुतेश्च । मोक्षधर्मेच प्रकृतिंचाप्यतिक्रम्यगच्छंत्यात्मानमव्ययं । परं नारायणात्मानंनिर्द्वंद्वंप्रकृतेःपरं । इंद्रियाण्यनुबुध्यंतिस्वदेहंयोगिनोनृप । करणान्यात्मनस्तानिसू

तिसूत्रसिद्धं जडशरीरत्वंसाधयति ॥ अस्तीति ॥ यथाजाग्रदवस्थायांदेहसद्भावेनभोगसंभवस्तथामुक्तावपिदेहसद्भावेनभोगो पपत्तिरित्येवमर्थकेन "भावेजाग्रद्वदि" तिसूत्रेणसूचितंप्रमाणमाह ॥ स्वेच्छयावेति ॥ इंद्रियवत्त्वंतेषांसाधयति ॥ मोक्षध

SGDF
Sri Gargeshwari Digital Foundation

मेंचेति ॥ शरीरमनुप्रविश्येत्यनंतरंतत्प्रकाशयंतइतिशेषः । एतद्भाष्यव्याख्यांगंसूत्रमाह ॥ प्रदीपवदिति ॥ तन्निरुक्त्यभा
वादिति ॥ "तदशीर्यताशारीतितच्छरीरमभवदि" त्याद्युक्तविशरणरूपतन्निरुक्तेस्तस्मिन्मुक्तशरीरेऽभावादित्यर्थः । अतएवाह

क्ष्मैःपश्यतितैस्तुसः । सजिघ्रतियथान्यायंस्पर्शान्स्पृशतिचप्रभो" इति । नचप्राकृतदेहयोगेदुःखाद्या
पत्तिः । मुक्तस्यवश्यप्रकृतित्वेनप्रकृतिवशत्वाभावात् । नहियस्यवन्ह्यादिर्वश्यस्तस्यतद्योगजंदुःखं ।
उक्तंहिन्यायविवरणे "मुक्तानांवशितायत" इति । तत्वप्रदीपेच "वश्यप्रकृतीना" मिति । भा
ष्येच "शरीरमनुप्रविश्यपुण्यानेवभोगाननुभवति । नतुदुःखादीन् । यथाप्रदीपोदीपिकादिषुप्रवि
ष्टस्तत्स्थंतैलाद्येवभुङ्क्तेनतुकाष्ण्यादी" निति । सूत्रितंच "प्रदीपवदावेशस्तथाहिदर्शयती" ति ।
"नहवैसशरीरस्यसतःप्रियाप्रिययोरपहतिरस्ती" तिश्रुतिस्तुकर्मारब्धदेहविषया । मुक्तस्याशरी
रत्वश्रुतिरपि तन्निरुक्त्यभावात् । नहितानिशीर्यंते । तच्छरीरस्यलोकविलक्षणत्वाच्चाभावोक्तिः ।
अप्रहर्षमनानंदमित्यादिवत् । उक्तंच "ग्रामस्थाअपिनग्राम्यावैलक्षण्याद्धिसज्जना" इति । कथम
न्यथादेहि(सदेहे)ष्वेवजयादिषु "देहेंद्रियासुहीनाना" मित्युक्तिः । तस्मात्फलाध्यायोक्तन्यायैस्तर

॥ नहीति ॥ शरीरेसत्येववैलक्षण्यमात्रेणशरीराभावोक्तौदृष्टांतमाह ॥ कथमन्यथेति ॥ तारतम्यसमर्थनामुपसंहरति ॥

तस्मादिति ॥ तत्प्रयोजनमाह ॥ नियामकइति ॥ स्वयंनियच्छति ब्रह्मादिभ्योनियमयतिचेत्यर्थः ॥ ७ ॥ एतद्ग्रंथस्यब्र
ह्ममीमांसासंबंधित्वमुक्तमुपसंहरिष्यन् तदवधृतविशेषणवत्तयेष्टदेवतानमस्काररूपमंगलंग्रंथसमाप्तावाचरति ॥ नमइति ॥
स्वस्यस्वातंत्र्येणकर्तृत्वस्याभावेपिपराधीनस्यसत्त्वादेतद्ग्रंथकरणेनभगवत्प्रीतिमाशास्ते ॥ मत्प्रेरकेणेति ॥ संगृहीतइत्युक्त्या

तमभावापन्नमुक्तब्रह्मरुद्रादिनियामकोभगवान्श्रीपतिःसर्वोत्तमइतिसिद्धं ॥ ५ ॥ ७ ॥ नमोनिरस्त
दोषायसमस्तगुणराशये । विमलानंददेहायकमलापतयेसदा ॥ १ ॥ मत्प्रेरकेणहरिणायापूजास्व
स्यकारिता । वाग्यज्ञरूपालक्ष्मीशस्तयाप्रीणातुकेशवः ॥ २ ॥ ७ ॥ मुक्तावपिब्रह्मादीनांतारतम्य
समर्थनं ॥ ५ ॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्याणांश्रीमद्ब्रह्मण्यतीर्थपूज्यपादानांशिष्येण
व्यासयतिनासंगृहीतेन्यायामृतेचतुर्थःपरिच्छेदः ॥ ७ ॥ ॥ ॥ ॥

ऽत्रोक्तन्यायानांमूलशास्त्रोक्तत्वंसूचितमितिज्ञातव्यं ॥ ७ ॥ मुक्तावपिब्रह्मादीनांतारतम्यसमर्थनं ॥ ५ ॥ इतिश्रीम
द्यदुपत्याचार्यपूज्यपादाराधकश्रीनिवासेनविरचितेन्यायामृतप्रकाशेचतुर्थःपरिच्छेदः ॥ संपूर्णश्चायंग्रंथः ॥

अयं ग्रंथः कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण मुंबय्यां निर्णयसागरमुद्रणालये मुद्रयित्वा प्रकाशितः.

शाकः १८२९, सन १९०८.

SGDF
Sri Gargeshwari Digital Foundation